The Department of Public Instruction, Bombay.

THE

DVYÂS'RAYAKÂVYA.

BY

HEMACHANDRA

WITH

A Commentary

BY

ABHAYATILAKAGAṆI.

Text—Cantos I to X.

EDITED BY

ABAJI VISHNU KATHAVATE, B. A.

1915.

Price Rs. 9

SOLD AT

GOVERNMENT CENTRAL PRESS, BOMBAY.

Bombay Sanskrit and Prakrit Series, No. LXIX.

Printed by Ramchandra Yesu Shedge, at the Nirnaya-sagar Press, 23, Kolbhat Lane, Bombay and published by the Government Central Press, Bombay.

श्रीः ।

आचार्यश्रीहेमचन्द्रकृतम्

द्व्याश्रयकाव्यम्

अभयतिलकगणिविरचितया टीकया समेतम्

बी. ए. इत्युपपदधारिणा

काथवटेइत्युपाह्वेन विष्णुसूनुना आबाजीइत्येतेन

संशोधितम्

(मूलमेव–सर्गाः १–१०)

तच्च

मुम्बापुरीस्थराजकीयग्रन्थमालाधिकारिणा

मुम्बय्यां

निर्णयसागरमुद्रणालये मुद्रयित्वा प्रकाशितम् ।

शाके १८३७ वत्सरे १९१५ खिस्ताब्दे

मूल्यं ९ रूप्यकाः

PREFACE.

The work of editing the Dvyâs'rayakâvya was undertaken by the late Prof. Abaji Vishnu Kathavate of the Elphinstone College, who however, died after he had seen through the Press, only the first few forms. So the work of seeing the remaining part of the edition through the press was entrusted to Mr. D. K. Agashe Shastri of Thana High School. The MSS. which the editor made use of in preparing the text are not all available to the writer of this preface, nor is it possible for him to rightly judge of their worth and importance, without a careful study of the same. Under these circumstances, no alternative is left but to print a rough note in pencil, in the late Prof. Kathavate's own hand-writing, found in his papers which barely mentions the names of the MSS. The note runs as follows:—

[A—The MS. obtained at Ahmedabad by Mr. Dhruva—which forms the original from which the copy for printing is made.

B—Copy obtained by Mr. Dhruva through Jyeshtharam Mukundji leaf 29 wanting for V 171 (?).

C—The MS. from which different readings were given in Kumârapâlacharita. Find out its name and source.

D—Deccan College Library No. 404 Sarga 13.

E—Deccan College Library 406 sargas 7, 8, 9. 39 leaves with 8 wanting (7, 14, 23, 30, 31, 33, 36, 38).

F—Deccan College Library No. 405 of 1879–80. First 2 sargas, and 84 verses of the third.] Here ends the note.

A, B, C, D, E, F are shown in the footnotes as ए, बी, सी, डी, ई, एफ् respectively.

Of these C seems to be evidently the MS. referred to as D in the following paragraph from the Preface to the Kumârapâlacharita (B. S. S. No. LX), which I quote here—

"The third MS. D, has lost the first leaf, and a few lines seem to be left out by the copyist at the end of the last leaf; so it is not possible to find out when and where it was got copied. This MS. forms a part of the whole consisting of 473 leaves. The first 387 leaves contain, with the Vṛitti or Commentary, the Sanskṛita Dvyâs'raya Kâvya which illustrates the Sanskrit Grammar; and the remaining leaves from 389 to 473, contain the Prâkṛita portion of the Dvyâs'raya Kâvya with the Vṛitti on it. The leaves measure 10″ by 4½″ and contain 17 lines on each side."

The MS. D (No. 404 of 1879–80 Deccan College Library) contains only the first 13 Cantos and a part of the 14th Canto, (extending to the 35th verse only) of the original Kâvya and its commentary. It has 293 leaves, with about 14 lines per page and about 54 letters per line. It is written in the usual Jain fashion, with a blank square in the centre of every page.

The MS. E (No. 406 of 1879–80 of the Deccan College Library) is a mere fragment containing only three Cantos *i. e.* 7, 8 and 9. It has 39 leaves (with 8 leaves missing), with 20 lines per page and about 62 letters per line. This MS. also has a blank square in the centre of every page. It

ends with the words:—"भद्रं भवतु शिवतिलकमुनेर्लेखयितुः॥ सं० १५१२ वर्षे." Thus the MS. is more than 450 years old.

The MS. F (No. 405 of 1879-80 of the Deccan College Library) contains only the first 2 Cantos and a part of the 3rd Canto, up to the 85th verse. It has 25 leaves only. The peculiarity of the MS. is that the original text of the Kâvya is written in a bolder character in the page proper and the commentary is written in very small though legible characters on all the four sides of the text, in the four margins as it were.

The present volume contains the first ten Cantos of the text and the commentary. The remaining text with the commentary and notes and introduction will form the second volume.

V. S. G.

अर्हम् ॥

ॐ नमः सर्वसर्वज्ञेभ्यः ॥

श्रीभूर्भुवःस्वस्त्रितयाहिताग्निगेहेऽभितो यस्य विभास्वरस्य ।
भातः स्फुलिङ्गाविव पुष्पदन्तौ तज्ज्योतिरेकं परमं नमामः ॥ १ ॥

यद्भक्त्याभिषेके गगनसवनसन्मण्डपे स्नाननीरं
स्वर्गङ्गाम्भे शुभार्थं सुरतरुदलयुक्पूर्णकुम्भो मृगाङ्कः ।
वृद्धस्त्रीक्षिप्तलाजा ध्रुवमुडुनिकरा जह्नुरेकातपत्रं
राज्यं जैनेश्वरोयं त्रिजगति कुरुतां सार्वभौमः प्रतापः ॥ २ ॥

ज्ञानं रातु सरस्वती भगवती सा मे यया ज्योतिषा
विश्वोद्द्योतिसदोदितेन[1] वसने वासप्रतिष्ठां[2] मिषन् ।
निर्जित्य द्विजनायक; किल मृगार्भं लालयन्पालय-
न्नङ्कस्थं सभयाकरोति विजनेनन्ते वने[3] वासितः ॥ ३ ॥

श्रीपार्श्वनाथजिनदत्तगुरुप्रसादा-
दारभ्यते रभसतोल्पधियापि किंचित् ।
श्रीहेमचन्द्रकृतसंस्कृतदुर्गमार्थ-
श्रीद्व्याश्रयस्य विवृतिः स्वपरोपकृत्यै ॥ ४ ॥

इह हि भक्तिप्राग्भारोहमहमिकानम्रकम्रश्रीकुमारपालप्रमुखासंख्य-पृथ्वीपालचक्रवालभालस्थलीक्लृप्तसुरभिमृगनाभिपुण्ड्रकचूर्णप्रसक्तिप्रोच्छ-

---

१ प °न भुवने । समासे ‘भुवने’ इति शब्दः. पफु °न सवने. २ पफु °तिष्ठा मि°. ३ डी °ने चासि°. ४ पफु °राहहम°.

लितपादारविन्दोदारनखरादर्शसौन्दर्या लक्षणतर्कच्छन्दःसाहित्यालंका-
रत्रिषष्टि[1]शलाकापुरुषचरित्रयोगशास्त्रप्रमुखानेकशास्त्रनिर्माणोन्मूलितजग-
त्त्वष्टृ[2]विशिष्टसृष्टिचातुर्याः कोविदवृन्दवर्याः श्रीहेमचन्द्राचार्या यद्यपि
स्वोपज्ञश्रीसिद्धहेमचन्द्राभिधानस्य संस्कृतशब्दानुशासनस्य निःशेषशब्द-
व्युत्पादनवपुषः सुप्रतिष्ठसप्ताध्यायाङ्गस्य सुललितपदन्यासस्य[4] प्रभूतप्र-
श्नोत्तरप्रवृत्तिमदगन्धो[3]द्धुरस्य गजस्येवाल्पप्रमाणे ग्रन्थे समुद्गक इव नि-
बन्धः कर्तुं दुःशकस्तथापि मन्दमतय एतद्बृहद्वृत्तावधीतायामपि भूरिसं-
ज्ञाधिकारनियमविभाषा[5]परिभाषोत्सर्गापवादादिविचारातिबाहुल्येनैतस्या-
मुक्तं प्रयोगजातं सम्यग्विवेक्तुं न शक्ष्यन्त्यतस्तेषां सकलप्रयोगजातस्य
सम्यग्विविक्तये तथानेन शब्दानुशासनेन प्रधानोपाध्यायेनेव सर्वेपि
शब्दाः शिष्या[6] इव सम्यग्व्युत्पादिता अपि यावन्महाकाव्ये लोकव्यव-
हार इव न व्यापारितास्तावत्स्वमत्यान्यत्राव्यवहारिकेर्थे प्रयुज्यमाना
नाभीष्टार्थसिद्धिभाजो भवन्तीति ते यस्मिन्नर्थे यथा प्रयुज्यन्ते तथा
दिग्मात्रेण दर्शनार्थं तथा संसिद्धशब्दसंदर्भपुष्पो[7]त्करसंभृतादस्माद्व्याकर-
णार्त्पु[8]ष्पकरण्डकादिवोद्धृत्यैतत्प्रयोगप्रसून[9]प्रकरः काव्यदाम्नि गुम्फितः सुम-
तिभिरपि सुखेन ग्राह्यो भवतीत्येतदर्थमेतच्छब्दानुशासनविशेषहेतुश्रीसि-
द्धचक्रवर्तिश्रीजयसिंहदेववंशावदातवर्णनाय च द्व्याश्रयं[10] शब्दानुशासन-
प्रयोगसंदर्भसंग्रहस्वरूपतयो[11] सर्वकाव्यलक्षणलक्षितकथाप्रबन्धस्वरूपतया
च यथार्थाभिधानं महाकाव्यं चिकीर्षन्तः शिष्टसमयपरिपालनाय निर्वि[12]-
घ्नशास्त्रसमाप्तये च तस्यादौ श्रीसिद्धहेमचन्द्राभिधानशब्दानुशासननम-
स्कारानुसारेणाभीष्टदेवताप्रणिधानरूपं नमस्कारं चक्रुः ॥

---

१ सी डी °ष्टिशिला°. २ सी °ष्टृस°. ३ सी °न्धोर°. डी °न्धोदर°. ४ सी °बधाताम°. ५ सी °षापरिभाषाप°. ६ एफ् शिक्षा इ°. ७ सी °पुष्फोत्क°. डी °पुष्फोत्क°. ८ सी डी °त्पुष्फक°. ९ सी °नक°. १० सी डी °श्रयश°. ११ डी °या च य°. १२ एफ् °विंघ्नं शा°.

अर्हमित्यक्षरं ब्रह्म वाचकं परमेष्ठिनः ।
सिद्धचक्रस्य सद्बीजं सर्वतः प्रणिदध्महे ॥ १ ॥

१. अर्हमिति वर्णसमुदायं सर्वतः सर्वस्मिन्क्षेत्रे काले च प्रणिदध्महे । आत्मानं ध्यायकं बीजमध्ये न्यस्तं संश्लेषेणार्हकारैर्ध्येयैः सर्वतो वेष्टितं चिन्तयामः । यद्वा । अर्हशब्दवाच्येन भगवतार्हता[1] ध्येयेनाभिन्नमात्मानं ध्यायकं[2] ध्यायाम इत्यर्थः । कीदृशम् । निर्मुक्तात्मकत्वात्परमे पदे सिद्धिलक्षणे तिष्ठति । "परमात्किद्" इत्यौणादिके कितीनि "भीरुष्ठानादयः" [२.३.३३.] इति षत्वे[3] गणपाठसामर्थ्यात्सप्तम्या अलुपि परमेष्ठी तस्य परमेष्ठिनो भगवतोर्हतो वाचकं प्रतिपादकमत एवाक्षरं ब्रह्माभिधानाभिधेययोरभेदोपचारादचलं ज्ञानं परमज्ञानस्वरूपपरमेष्ठिवाचकमित्यर्थः[4] । यद्वा । अक्षरमिति भिन्नं विशेषणं ब्रह्मेति च । ततोक्षरं शाश्वतमेतदभिधेयस्य[5] भगवतः[6] परमपदप्राप्तत्वेनाविनश्वरत्वाद्ब्रह्म च परमज्ञानस्वरूपम् । यद्वा । अक्षरस्य मोक्षस्य हेतुत्वादक्षरं ब्रह्मणो ज्ञानस्य[7] हेतुत्वाच्च ब्रह्मात एव च सिद्धचक्रस्य सिद्धा विद्यासिद्धादयस्तेषां चक्रमिव चक्रं यन्त्रकविशेषस्तत्र सत् आद्यत्वेन प्रधानं बीजं तत्त्वाक्षरम् । स्वर्णसिद्ध्यादिमहासिद्धिहेतोः सिद्धचक्रस्य पञ्च बीजानि वर्तन्ते तेष्विदमार्द्यक्षरमित्यर्थः[8] । तेन स्वर्णसिद्ध्यादिमहासिद्धीनामिदं मूलहेतुरित्युक्तम् । अत एव चेदं ध्यानार्हमित्यर्थः । नन्वर्हमित्यस्य योभिधेयः स एव प्रणिधेयत्वेन मुख्यः । अर्हमिति शब्दस्त्वर्हद्वाचकत्वेन प्रणिधानार्हत्वाद्गौणः । गौणं च मुख्यानुयायीति मुख्यस्यैव प्रणिधानं कर्तुमुचितम् । एवं चार्हमित्यक्षरं ब्रह्मवाच्यं श्रीपरमेष्ठिनं सिद्धचक्रादिबीजेन सर्वतः प्रणिदध्मह इति कार्यं स्यात् । अत्र चैवमन्वयः । सिद्धचक्रादिबीजेनार्हमित्यनेन[10] वाच्यं परमेष्ठिनं प्रणिदध्मह इति । नैवम् ।

१ सी डी °ता ध्ये°. २ सी डी ध्याया°. ३ एफ् °ष्ठी अस. ४ सी डी °रूपं प°. ५ सी °मेतत°. एफ् °मेव त°. ६ सी भव°. ७ सी डी °नहे°. ८ सी डी °षमक्ष°. ९ बी सी डी एफ् °र्थः । एते°. १० सी डी °सिद्धादि°.

यथा कश्चित्स्वस्वामिना प्रेषिते[1] लिखिते समायाते स्वामिनीवान्तरङ्गं[2] बहु-
मानं प्रकटयन् स्वामिनि सातिशयां प्रीतिं प्रकाशयत्येवं परमेष्ठिनो वाच-
कमर्हमिति प्रणिदधत् श्रीहेमचन्द्रसूरिर्मुख्ये प्रणिधेयेर्हेति[3] सातिशयं प्र-
णिधानं ख्यापितवान् । येन हि यस्य नामापि ध्यातं तेन स नितरां
ध्यात इति यथोक्तमेव साधु । तथा सर्वपार्षदत्वादस्य काव्यस्य सर्वद-
र्शनानुयायी नमस्कारो वाच्य इत्यर्हशब्देन परमेष्ठिशब्देन च हरिहर-
ब्रह्माणोपि व्याख्येयौः । यथा परमेष्ठिनो हरेर्हरस्य ब्रह्मणश्च वाचकम-
र्हमिति प्रणिदध्महे । अर्हशब्दस्य ह्येते त्रयोपि वाच्याः । यदुक्तम् ।

अकारेणोच्यते विष्णू रेफे ब्रह्मा व्यवस्थितः ।
हकारेण हरः प्रोक्तस्तदन्ते परमं पदम् ॥ इति ।

शेषं प्राग्वद्व्याख्येयम् ॥

अर्हम् । इत्यनेन शब्दानुशासनसूत्रादिस्थः "अर्हम्" [१] इति नमस्कारः सूचितः । अक्षरं ब्रह्मेत्यादिना च तद्वृत्तिः सूचिता ॥

अथैतत्काव्यनायकवंशमाशीर्वादपूर्वं प्रशंसन्नाह ।

भीमकान्तोद्धतोदात्तहिंस्रशान्तगुणात्मने ।
भद्रं चौलुक्यवंशाय ह्रस्वस्याद्वादसिद्धये ॥ २ ॥

२. चौलुक्यवंशाय चुलुके संध्यावन्दनाय विधात्राम्बुना भृते हस्ते भवो "दिगादिदेहांशाद्यः"[६. ३. १२४.] इति ये चुलुक्यः । उक्तं च ।

अयोग्या मातङ्गाः परिगलितपक्षाः क्षितिभृतो
जडप्रीतिः कूर्मः फणिपतिरयं च द्विरसनः ।
इति ध्यातुर्धातुः क्षितिविधृतये सांध्यचुलुका-
त्समुत्तस्थौ कश्चिद्विलसदसिपट्टः स सुभटः ॥

---

१ सी °पितलेखि°. डी °पिते लेखि°. २ बी °वान्तरं व°. सी °वान्तरं प्र°. ३ बी °र्हमिति. ४ सी डी °याः । ते य°. ५ सी डी °भ्यः । यदुक्तम् ।. ६ ए °हः सुलु°.

चुलुक्यस्यादिक्षत्रियविशेषपुरुषस्यायं "तस्येदम्" [६.३.१६०.] इत्यणि चौलुक्यः । स चासौ वंशश्च । यद्वा । चुलुकोत्पन्नः पुरुषोप्यभेदाच्चुलुकस्तस्यापत्यं वृद्धं गर्गादित्वाद्यञि [६.१.४२.] चौलुक्यस्तस्य वंशः संतानश्चौलुक्यवंशस्तस्मै भद्रं स्वस्त्यस्त्वित्याशीर्वादः । "तद्भद्रायुष्य०" [२.२.६६.] इत्यादिना चतुर्थी । यत्रान्यत्क्रियापदं न श्रूयते तत्रास्तिर्भवन्तीपरः प्रयुज्यते इत्यत्र भवन्तीत्यस्योपलक्षणत्वात्पञ्चम्यादिपरोपि । तेनात्रास्त्विति ज्ञेयम् । आशीर्वाददाने हेतुगर्भं विशेषणमाह । क्लृप्तस्याद्वादसिद्धय इति । स्यादित्यसकृधातोर्योत्प्रत्ययान्तस्य प्रतिरूपको विधिविचारणास्तित्वविवादानेकान्तसंशयाद्यर्थवृत्तिरव्ययः । अत्र तु भीमकान्तेति विशेषणेनानेकान्तस्यैव साध्यत्वादनेकान्तवृत्तिर्गृह्यते । तस्य तत्पूर्वको वा वादः स्याद्वादो नित्यत्वानित्यत्वाद्यनेकधर्मशबलैकवस्त्वभ्युपगमरूपः श्रीमदार्हतमतप्रधानप्रासादचूलावलम्बिप्रलम्बोद्दण्डपाण्डुरपताकायमानोनेकान्तवादः । सिद्धिर्निष्पत्तिर्ज्ञापनं वा । क्लृप्ता निर्मिता स्याद्वादस्य सिद्धिर्येन तस्मै । स्याद्वादसिद्धिविधानेपि हेतुविशेषणमाह । भीमकान्तोद्धतोदात्तहिंस्रशान्तगुणात्मन इति । भीमा रौद्राः कान्ताः सौम्या उद्धता अविनयप्रधाना उदात्ता विनयप्रधाना हिंस्रा घातुकाः शान्ता दयाप्रधाना ये गुणा धर्मास्त एव धर्मधर्मिणोरभेदविवक्षया वंशस्य भीमत्वादिधर्मैः सहैक्यादात्मा स्वरूपं यस्य तस्मै । अत्र च भीमगुणात्मकत्वकान्तगुणात्मकत्वादीनां परस्परविरुद्धानामपि विरोधो रोधोभाग इव प्रत्यक्षप्रमाणमत्तवृषभेण बाध्यमानो भ्रंसते । यत उक्तम् ।

दृश्यत्वान्न विरोधोपि कथ्यते युक्तिशालिभिः ।
विरोधो[12]नुपलम्भो हि यतो जैनमते मतः ॥

यदि ह्येषामेकत्र दृश्यमानानामपि विरोध उद्भाव्येत तदैकस्मिन्नपि

---

१ बी सी डी °दानहे°. २ सी डी °गर्भवि°. ३ सी डी °धिर्विचा°. ४ एफ् °कान्तासं°. ५ सी डी °न्तवादसिद्धिनिष्पत्तिशापनवृ°. ६ बी °त्वाय°. ७ सी डी °लाविल°. ८ सी डी °त्मकादी°. ९ सी डी °धो भा°. १० सी डी °भेणे बा°. ११ सी डी भ्रंशते. १२ सी डी °रोधानु°.

पुरुषे पुत्रत्वपितृत्वे स्थूलत्वकृशत्वे लघुत्वमहत्त्वे न घटेयाताम्[1]। अथै-कोपि पुमान्स्वजनकापेक्षया पुत्रः स्वपुत्रापेक्षया जनकः स्थूलापेक्षया कृशः कृशापेक्षया स्थूलो महदपेक्षया लघुर्लघ्वपेक्षया[2] च महानिति विषयभेदेन विरुद्धधर्मा अप्येते घटन्ते तदत्रापि समानम्। तथाहि। शत्रूनुद्दिश्य भीमगुणत्वं प्रजासु[3] कान्तगुणत्वं[4] दर्पिष्ठेषूद्धतगुणत्वं पूज्येषूदात्तगुणत्वं व्यसनिषु हिंस्रगुणत्वं कृपापात्रेषु शान्तत्वं चेति। एवं च प्रत्यक्षसिद्धभीमकान्तगुणाद्यनेकधर्मात्मकेनानेन चौलुक्यवंशेन दृष्टान्तभूतेन नित्यानित्याद्यनेकधर्मशबलैकवस्त्वभ्युपगमरूपस्याद्वादसिद्धिविधानपूर्वकं दर्शनान्तरीयाणां बौद्धसांख्यादीनामेकान्तानित्यत्वैकान्तनित्यत्वादिवादेषु स्याद्वादस्यैव न्याय्यत्वं सूचितम्। अत एव श्रीहेमचन्द्रसूरेर्यतिमौलेराशीर्वादार्होयं वंश इति। व्रतिनो हि धार्मिकं विनान्यस्य प्रशंसायां दोषसंभवः॥

स्याद्वादसिद्धये। इत्यनेन "सिद्धिः स्याद्वादात्" [२] इति सूत्रार्थः सूचितः॥

अथान्येभ्योधिकेन येन[5] गुणेनायं वंशोत्र काव्ये वर्ण्यस्तं प्रकर्षयन्नाह।

लोकात्सालातुरीयादेः शब्दसिद्धिरिवानघा।
चौलुक्यवंशाज्जयति नयधर्मव्यवस्थितिः॥ ३॥

३. चौलुक्यवंशात् "गम्ययपः कर्माधारे" [२.२.७४.] इति कर्मणि पञ्चमी। चौलुक्यवंशं प्राप्य नयधर्मव्यवस्थितिर्नयो न्यायो धर्मोहिंसादिर्द्वन्द्वे तयोर्व्यवस्थितिर्व्यवस्था सम्यक्प्रतिपाल्यमानत्वेन न विद्यतेघं दुःखं व्यसनं पापं वा यस्यां[6] सानघा श्रेयसी सती जयति सर्वोत्कर्षेण वर्तते। यथा सालातुरीयादेर्लोकात्[7] सलातुर आभिजनो निवासोस्य "[8]सलातुरादीयण्" [६.३.२१६.] इतीयणि सालातुरीयः पाणिनिस्तत्प्रभृतिम्। आदिपदादिन्द्रचन्द्रशाकटायनादिवैयाकरणानां श्रीसिद्धसेनमल्लवादिहरिभद्रसू-

---

१ सी डी °म्। यथै°. २ सी डी °या म°. ३ सी डी एफ् °जासुद्दिश्य का°. ४ सी डी °त्वं पू°. ५ सी डी °न येन गु°. ६ ए एफ् यस्याः सा°. ७ सी डी एफ् °र् साला°. ८ सी डी एफ् "साला°. ९ सी डी °ति आदि°.

रिप्रभृतितार्किकाणां च परिग्रहः । लोकं वैयाकरणसमयविदं[1] प्रमाणविदं च प्राप्य शब्दसिद्धिः साधुशब्दनिष्पत्तिरनघासाधुत्वदोषरहिता सती जयति । अथवात्र श्लोक इहेत्यध्याहार्यम् । सिद्धिव्यवस्थित्यपेक्षया च गम्ययस्त्वम् । ततोयमर्थः । सालातुरीयादिलोकमाश्रित्य यानघा शब्दसिद्धिर्ये[2] प्रयोगार्हाः शब्दाः सिद्धाः सा यथेह प्रबन्धे जयति । इयं हि काव्यफला काव्ये चात्र शब्दानुशासनक्रमानतिक्रमेण निबध्यमानेषु शब्देषु स्वफलप्राप्त्योत्कर्षवती भवति तथा चौलुक्यवंशं प्राप्य यानघा नयधर्मव्यवस्थितिः सेह प्रारभ्यमाणे प्रबन्ध आधारे जयति । इयं चानघत्वेन स्वयमेवोत्कृष्टाप्यस्मिन्काव्ये[3] निबध्यमाना विशेषेणोत्कृष्टा भवतीत्यर्थः । भवति हि विशिष्टाधारकृतो विशेषो यथा राजा सर्वाङ्गभूषितोपि रूपपात्रमपि यदास्थानमण्डपे सिंहासनमध्यारोहति तदान्यां कां चन शोभां लभत एवमत्रापीति । अत्र च व्याख्याने लोकात्सालातुरीयादेरित्यत्र शब्दसिद्धिः[5] सामान्योक्तावपि श्रीहेमचन्द्रसूरिकृतात्र काव्येभिधेयत्वेनावबोध्या स्वोपज्ञतया तत्क्रमानतिक्रमेणैवात्र सिद्धशब्दानां प्रयोगात् । एतेन चास्य काव्यस्य स्वोपज्ञशब्दानुशासनसंसिद्धशब्दैश्चौलुक्यनयधर्मव्यवस्थित्या[6] च सहाभिधानाभिधेयलक्षणः संबन्ध उक्तः । प्रयोजनं च सिद्धानां शब्दानां काव्यविषयं प्रयोगज्ञानम् । नयधर्मव्यवस्थितिज्ञानं चानन्तरम् । परंपरं[7] च सिद्धशब्दप्रयोगज्ञानेभीष्टदेवतादिस्तुत्यादिक्रमेण नयधर्मव्यवस्थितिज्ञानेन च नयधर्मानुष्ठानादिक्रमेण निःश्रेयसमुक्तम् । तथास्य द्वयोराश्रयत्वाद् द्याश्रय इत्यन्वर्थं[10] नामापि[11] व्यञ्जितम् ॥

लोकात् । इत्यादिना "लोकात्" [१] इति सूत्रार्थः सूचितः ॥

---

१ सी डी °दं च. २ सी डी °र्येन प्र°. ३ एफ् स्वमे°. ४ सी डी °पमात्र°. ५ बी सी डी °सिद्धेः सा°. ६ सी °क्यवंशस्य न°. डी °क्यवंश्यस्य न°. ७ एफ् °रं च. ८ सी डी °त्या क्र°. ९ एफ् °स्थितिः । ज्ञा°. १० बी °त्यर्थना°. सी °त्यना°. ११ एफ् °मातिव्य°.

अथ [1]श्रीसिद्धहेमचन्द्राख्यशब्दानुशासनमनुसारेण प्रयोगजातं द- र्शयन् यत्र चौलुक्यवंशो नयधर्मव्यवस्थित्या राज्यमपालयत्तत्पुरमाह ।

अस्ति स्वस्तिकवद्भूमेर्धर्मागारं नयास्पदम् ।
[1]पुरं श्रिया सदाश्लिष्टं नाम्नाणहिलपाटकम् ॥ ४ ॥

४. नाम्नाणहिलपा[2]टकमणहिलपाटकाख्यं पुरं नगरमस्ति । कीदृशम् । धर्मो[3]हिंसादिर्धर्मे दानादिर्वा । धर्मधर्मिणोरभेदोपचाराद्धर्मस्य धर्मवतामगारं गृहमत एव पूर्ववदभेदान्नयस्य न्यायवतामास्पदं स्थानं यत एव धर्मागारं नयास्पदं चात एव च श्रिया धनधान्यद्विपदचतुष्पदादिमहर्द्ध्या [4]लक्ष्मीदे- [5]वतयो वाश्लिष्टमाश्रितमत [6]एवं च भूमेः सागराम्बरायाः स्वस्तिकमिव यथा स्वस्तिकेनाढ्यवेश्मवेदिकालंक्रियते तथा येन सर्वापि भू[7]र्भूष्यत इत्यर्थः । यच्च पुरं शरीरं धर्मागारं धर्मस्य पूर्वोपार्जितसुकृतस्यागारं नयस्य चास्पदं भवति तत्स[8]दा श्रिया लक्ष्म्याश्लिष्टं भवतीत्युक्तिलेशः ॥ पूर्वं किल वनराजराजेन नवपुरविधित्सया प्रधानभूमिखण्डगवेषणार्थं विचरतैकदारण्यमध्ये ग- वादींश्चारयन्नणहिलो नाम [9]गोपालो दृष्टस्तदग्रे च चित्ताभिप्रायो निवेदितस्ते- नापि तत्कार्यकरणार्थं शकुनगवेषणं कुर्वतैकत्र प्रदेशे शृगालो बलिष्ठकुक्कुरं [10]निर्धाटयन् दृष्टस्तत्रैव चाणहिलेन वनराजराजः पुरनिवेशं स्वनाम्ना कारित इति लोकश्रुतिः । आदिमध्यावसानमङ्गलानि हि शास्त्राण्यायुष्मच्छ्रोतृ- काणि [11]मतिमच्छ्रोतृकाणि च भवन्तीत्यर्हमिति प्रणिधानेन सर्वमङ्गलश्रेष्ठे भावमङ्गले विहितेपि लोकरूढिमनुसरन्नस्तिस्वस्तिकेति शब्देन द्रव्यम- ङ्गलमपि न्यस्तवान् । नाम्नेत्यत्र करणे तृतीया ॥

---

१ एफ् °रं सदा श्रियाश्लि°.

---

१ सी डी श्रीहे°. २ सी डी °टकाख्यं. ३ बी सी डी एफ् °दिर्दाना°. ४ बी लक्ष्म्या दे°. ५ ए °याश्लि°. ६ सी डी °व भू°. ७ बी °र्भूषिता इ°. ८ सी °दाश्लि°. ९ सी डी गोवालो. १० ए बी सी एफ् निर्द्दाट°. ११ बी °णि भ°.

अथैतदेव पुरं धर्मार्थकामोपनिबद्धवर्णनाभिर्विंशेन शतेन श्लोकैर्वर्णयति[1] । धर्मार्थकामवर्णना यथायथं स्वयमेवाभ्यूह्याः ।

सपत्नीर्ष्याविधीहाभिः श्रीद्धेऽत्रानुपतीष्यते ।
मधूत्तमं वधूढाभिः सभ्रूत्क्षेपं मृदूरुभिः ॥ ५ ॥

५. श्रिया सर्वसमृद्ध्येद्धे भासुरेऽत्र पुरे मृदूरुभिः कोमलसक्थीभिर्वधूढाभिर्वध्वो योषितो[2] या ऊढाः पाणिगृहीत्यस्ताभिरनुपति भर्तृसमीप उत्तमं[3] पत्या स्वयं दीयमानत्वेन प्रेमकन्दलोद्रेदकत्वाद्मनोज्ञं[4] मधु मद्यमिष्यते । कथम् । सह भ्रुवोरुत्क्षेपेणोपहासाय[5] चालनेनास्ति यत्तत्सभ्रूत्क्षेपं यथा स्यादेवम् । यतः सपत्नीनां येर्ष्या परसंपत्तौ चेतसो व्यारोषस्तस्या[6] विधिः[7] करणं तत्रेहाभिलाषो यासां ताभिः । यथायथा सपत्न्यः प्रियर्कृततथा[8]विधप्रेमसंपत्तिं पश्यन्त्यो गाढतरेर्ष्यया म्लायन्ति तथातथा वधूढा भ्रूत्क्षेपेणोपहस्य मधु पिबन्तीत्यर्थः ॥

उमाभर्तृषभस्कन्धा मातापित्रृषिपूजकाः[9] ।
नृभर्तृऋषभा अस्मिन्नासन्पितृणवर्जिताः ॥ ६ ॥

६. नृभर्तृऋषभा नृणां भर्तारः स्वामिनो[10] नृभर्तारो राजानस्तेषु[11] ऋषभा मुख्या राजाधिराजा वनराजादयोस्मिन् पुर आसन् । एतेनास्य[12] पुरस्य चिरंतनतोक्ता[13] । कीदृशाः । उमाभर्ता शंभुस्तस्य ऋषभो बलीवर्दस्तस्कन्धवत्स्थूलबलिष्ठाः[14] स्कन्धा येषां ते । तथा मातापितृ(त्रृ?)षिपूजका माता च पिता च मातापितरौ[15] तौ च ऋषयश्च तेषां पूजका अर्चकाः । वाज-

---

१ एफ् °र्णना. There is here an evident omission of intermediate letters. २ बी °पित ऊ°. ३ एफ् °मं मधु प°. ४ ए °लोद्रेक°. ५ ए °पेणाप°. ६ सी °रोषंत°. ७ बी °धिः कार°. ८ सी °कृतं त°. डी °कृतां त°. ९ The commentary in Ms. C. begins with. उमाभर्ता शंभुः. १० डी °नो रा°. ११ एफ् राजन°. १२ ए बी एफ् °स्य चि°. १३ एफ् °तनोक्ताः ।. १४ एफ् °स्तस्य स्क°. १५ सी डी °रौ च.

कादित्वात्समासः । [३. १. ७८.] । एतेन विनयोक्तिः । अत एव पितृणवर्जिताः । पितॄणामृणमपत्याभावस्तेन वर्जिताः पुत्रवन्त इत्यर्थः । भवति हि [1]पूज्यपूजकानां पुत्रादिसमृद्धिः ॥

होतॄतं पोतॄतं मातॄल्तं पितॄतमुद्गृणन् ।
अत्र स्याज्जडजिह्वोपि वाग्मी विद्यामठे पठन् ॥ ७ ॥

७. अत्र पुरे । [2]मठश्छात्राद्यालयः । विद्यायै मठो विद्यामठो धर्माद्यर्थमुपाध्यायच्छात्राणां भोजनाच्छादनादिसामग्र्योपेत ईश्वरैः कारितो वेश्मविशेषस्तत्र । जातावेकवचनम् । विद्यामठेष्वित्यर्थः । जडा वर्णमात्रोच्चारणेप्यपट्वी जिह्वा यस्य स जड[3]जिह्वोप्युपाध्यायाध्या[4]पननै[5]पुण्येन होतृत्-पोतृत्-मातृल्[6]तृ-पितृत्-शब्दान् दुरुच्चार्यानप्युद्गृणन्नुच्चारयन्[7] सन् वाग्मी पटुवाक् स्यात् । जड[8]जिह्वा हि जिह्वापाटवाय विषमवर्णानुच्चार्यन्ते ॥

अमुष्मिन्पुरुषार्थानां त्रिरूपत्वव्यवस्थितिः ।
लृकारस्य ऋकारेण संधाविव विराजते ॥ ८ ॥

८. अमुष्मिन् [9]पुरे पुरुषार्थानां धर्मार्थकामानां त्रिरूपत्वव्यवस्थितिः । त्रीणि रूपाणि[10] स्वरूपाणि येषां तेषां भावस्त्रिरूपत्वं तस्य [11]व्यवस्थितिर्व्यवस्था विराजते । परस्प[12]रान[13]बाधया स्वस्ववेलायां प्रवर्तनेन धर्मार्थकामानां त्रीणि रूपाणि[14] व्यवस्थि[15]तानि शोभन्त इत्यर्थः । यथा । लृकारस्य ऋकारेण सह संधौ त्रिरूपत्वव्यवस्थितिः । क्लृकारः । कॄऋकारः । कृकारः । इत्येवं रूपत्रयव्यवस्था राजते ॥

---

१ सी पूज°. २ बी मठं छात्रा°. ३ सी °डप्यु°. ४ सी °पनै°. ५ बी °पुणेन. ६ ए एफ् °त् श°. ७ सी डी °न् वा°. ८ सी डी °जिह्वो हि. ९ सी पुर°. १० ए °णि ये°. ११ सी व्यस्थि°. १२ बी °रानबा°. १३ सी °बाधाया. १४ एफ् °णि स्वरूपाणि व्य°. १५ सी °स्थितिशो°.

गम्लृतं पत्लृतं शक्लृतं लाक्ष[2]णिका इव ।
अत्राक्षरमपि[3] प्राज्ञा न वद[4]न्ति निरर्थकम् ॥ ९ ॥

९. यथा लाक्षणिका वैयाकरणा गमः पतः शकश्च धातूनां संबन्धिलृतम् लकारम[1]नुबन्धमक्[2]ार्यार्थत्वान्निरर्थकं न वदन्ति तथात्र पुरे प्राज्ञाः पण्डिताः प्राज्ञत्वादक्षरमपि[3] स्वरव्यञ्जनमात्रमपि निरर्थकं निःप्रयोजनं न वदन्ति । एतेनात्रत्यजनानामवाचालत्वमुक्तम् ॥

अस्मिन् महदृषिस्तुल्ये नृपाञ्शममहादृषीन् ।
दृष्ट्वेव लज्जिता जग्मुस्ते द्यां सप्त महर्षयः ॥ १० ॥

१०. अस्मिन् पुरे । नृपान् । अपिरत्र गम्यते । प्रचण्डदोर्दण्डोग्रान् राज्ञो[4][5]पि शमेन कृत्वा महादृषीन् महामुनितुल्यान् दृष्ट्वा लज्जिता इव तेतिशमित्वेन प्रसिद्धाः सप्त महर्षयो मरीचि१अत्रि२अङ्गिरः३पुलस्त्य[6]४पुलह५क्रतु६व[7]सिष्ठाख्या[8]७ महामुनयो द्यां व्योम जग्मुर्गताः । योपि येनोत्तमेन गुणेनोत्तमंमन्यः स्यात्स यदान्यस्मिन्नात्मनोतिहीनेपि तं गुणं पश्यति तदा लो[9]कोपहासेन लज्जितो देशान्तरं याति ॥

भान्ति मत्तेभगामिन्यो रम्भास्तम्भनिभोरवः ।
सर्वर्तुमण्डितोद्यानेष्वत्रालकारभ्रुवोङ्गनाः ॥ ११ ॥

११. इह पुरे सर्वर्तुमण्डितोद्यानेषु सर्वैः षड्भिर्ऋतुभिरुपचाराद्धेमन्तशिशिरवसन्तग्रीष्मवर्षाशरदाख्यषडृतुजन्यपुष्पफलादिभिर्मण्डितानि दे[10]वताप्रभावादिनावतर[11]णाद्भूषितानि यान्युद्याना[12]न्युपवनानि तेषु मत्तेभगामि-

१ सी °शल°. २ सी एफ् °क्षणका°. ३ सी °पि शा. ४ सी °दति नि°.

१ एफ् °मक्ता°. २ एफ् °कार्यर्थ°. ३ सी डी °पि नि°. ४ डी राज्ञ उपश°. एफ् राज्ञेपि. ५ सी °शोपशमनं कृ°. ६ ए बी सी एफ् °स्त्यकल°. ७ ए एफ् °वशिष्ठा°. ८ एफ् °ख्या मु°. ९ सी लोप°. १० सी देवाप्र°. डी देवप्र°. ११ सी डी °रणद्भू°. १२ सी डी °नानि°.

न्यः पुष्पफलाद्युच्चयनाय मदोन्मत्तहस्तिवत्सविलासं विहरमाणाः सत्यो-ङ्गना भान्ति यतो रम्भास्तम्भनिभोरवः कदलीकाण्डतुल्यसक्थ्यस्त-था नागरलिपौ वक्राकारलकारो लिख्यते तद्वद्वक्रे भ्रुवौ यासां ताः। रूपवत्य इत्यर्थः ॥

"औदन्ताः स्वराः" [१.१.४-४२.] इत्यादिभिः सूत्रैर्विधीयमानानां स्वरादि-संज्ञानां प्रयोजनम् "इवर्णादेरस्वे स्वरे यवरलम्" [१.२.२१.] इत्यादिविधिसू-त्रेष्वेवेति तदुदाहरणदर्शनेनैवैता ज्ञापिता भविष्यन्तीति स्वरादिसंज्ञासूत्राण्यु-ल्लङ्घ्य विधिसूत्रोदाहरणानि दर्शितवान्। तथा हि।

धर्मागारम्। नयास्पदम्। नाह्मणहिल्ल। सदाश्लिष्टम्। अनुपतीष्यते। विधीहाभिः। श्रीद्धे। सपत्नीर्ष्या। मधूत्तमम्। मृदूरुभिः। सभ्रूत्क्षेपम्। वधूहाभिः। भर्तॄषभ। गम्लृतम्। इत्यत्र "समानानां तेन दीर्घः" [१] इति दीर्घः॥ बहुवचनं व्याप्त्यर्थम्। तेनोत्तरसूत्रेण लृऋतोरपि ऋलृति ह्रस्वो भवति। क्लृऋकारः। मातृलृतम्। अन्यथा "ऋस्तयोः" [५] इति परत्वाद् ऋरेव स्यात्॥

महऋषि। नृभर्तृऋषभाः। मातृलृतम्। शक्लृलृतम्। इत्यत्र "ऋलृति ह्रस्वो वा" [२] इति वा ह्रस्वः॥ पक्षे। महर्षयः। उमाभर्तॄषभ। होतॄतम्। गम्लृतम्॥ कश्चित्तु ह्रस्वत्वाभावपक्षे प्रकृतिभावमपीच्छति। तन्मते महाऋषीन्॥

ऋता। कॄकारः॥ लृता। पल्लृतम्। इत्यत्र "लृत ऋलृ ऋलृभ्यां वा" [३] इति लृतो वा ऋलृ आदेशौ॥ पक्षे। ऋता सह पूर्वेण ह्रस्व उत्तरेण ऋकारश्च। क्लृऋकारः। कॄकारः॥ लृता च सह दीर्घत्वं ह्रस्वत्वं च। गम्लृतम्। शक्लृलृतम्॥

ऋता। पितृषि॥ लृता। पोल्लृतम्। इत्यत्र "ऋतो वा तौ च" [४] इति

१ सी °माणस°. २ एफ् °द्वक्रौ भ्रु°. ३ सी डी °नां प्र°. ४ सी डी °हिल्ल।. ५ ए एफ् °षभः। ग°. ६ एफ् °नामिति। ब°. ७ एफ् °ण ऋलृतो°. ८ एफ् °योरपि°. ९ एफ् °षभः। मा°. १० एफ् °त्र ह°. ११ एफ् °षभः। हो°. १२ बी ह्रस्वामा°. १३ सी °देशप°. डी °देशः। प°. १४ सी डी °त्र ऋत्त°.

ऋत ॡ आदेशौ ॥ पक्षे । ऋति । भर्दृषभ । भर्तृऋषभाः ॥ ऌति । होदृतम् । मातृऌतम् ॥ तौ च वा । पितृण । पित्ऌतम् । पक्षे यथाप्राप्तम् ॥

कृकारः । होदृतम् । इत्यत्र "ऋस्तयोः" [५] इति ऌऋतोः स्थाने यथासंख्यमृता ऌता च सह ऋकारः ॥

मत्तेभ । इन्द्रेव । मण्डितोद्यानेषु । निभोरवः । सर्वर्तु । महर्षयः । अग्रल्कार । इत्यत्र "अवर्णस्य°" [६] इत्यादिना एदादेशः ॥ अकारस्य इत्–ऋत्–ऌन्नि-मित्तकानि आकारस्य इत्–उत्–ऊर्–ऋत्–ऌत्–ऌन्निमित्तकानि चोदाहरणानि स्वयं ज्ञेयानि । एवमन्यत्राप्यदर्शितोदाहरणानि स्वयं ज्ञेयानि ॥

ननु "ऌत ॡ ऋऌभ्यां वा" [३] इत्यादिसूत्रापेक्षया "ऋऌति ह्रस्वो वा" [२] इति सूत्रस्य "ऋतो वा तौ च" [४] इत्यस्यापेक्षया "ऌत ॡ ऋऌभ्यां वा" [३] इत्यस्य च प्राथम्यादेतदुदाहरणगर्भाणां दशमा-ष्टमनवमश्लोकानां पञ्चमश्लोकानन्तरमुपन्यासः कर्तुमुचितस्तदनु "ऋतो वा तौ च" [४] इत्युदाहरणगर्भयोः षष्ठसप्तमश्लोकयोः । एवं हि सूत्रक्रमोऽनुसृतः स्यात् । सत्यम् । लाघवार्थम् । एवं ह्युपन्यासे क्रमप्राप्तं भर्दृषभेत्येतद् ऋति "समानानां तेन दीर्घः" [१] इति दीर्घोदाहरणम् "ऋतो वा तौ च" [४] इत्यस्य वि-कल्पोदाहरणं च युगपद्दर्शितं स्यात्तथा महर्षय इत्येतद् "ऋऌति ह्रस्वो वा" [२] इत्यस्य विकल्पोदाहरणम् "अवर्णस्येवर्णादि°" [६] इत्यत्रावर्णग्रहणे-नाप्तस्य आत ऋति परे अर्कार्योदाहरणं च युगपद्दर्शितं स्यादिति सर्वमुपपन्नम् । एवमन्यत्रापि व्युत्क्रमोपन्यासकारणानि यथायथं सुधिया स्वयमभ्यूह्यानि ॥

इहर्णार्णं कम्बलार्णं वत्सरार्णं दशार्णकम् ।
वसनार्णं वत्सतरार्णं प्रार्णं वा न कस्य चित् ॥ १२ ॥

१२. इह पुरे ऋणस्यावयवतया ऋणमृणार्णं कलान्तरं कम्बलस्य

---

१ डी वास्ति न.

---

१ एफ् °तृऋत°. २ सी °दयश्च ।. ३ सी डी °नि चो°. ४ एफ् °त्-ऋत्-ऋ° ५ सी डी एफ् °या "ऋत°. ६ बी सी डी दीर्घो°. ७ ए बी °त्यत्र व°. ८ बी सी डी °र्थं स्वधि°.

ऋणं कम्बलार्णं वत्सरस्य वर्षस्य ऋणं वत्सरार्णं दशानां रूपकादीनामृणं दशार्णं कुत्सितमल्पमज्ञातं वा दशार्णं दशार्णकं वसनार्णं वस्त्रस्य ऋणं वत्सतरार्णं तर्णकस्य ऋणं प्रकृष्टमृणं प्रार्णं वा। कस्य चिन्नास्तीति प्रत्येकमभिसंबध्यते । वाशब्दः पूर्वोक्तऋणार्णाद्यपेक्षया विकल्पार्थः । एतेनात्रत्यलोकानामैश्वर्यातिशयोक्तिः ॥

सुखेतोप्रऋणार्तश्च परमर्तो रतीच्छया ।
अस्मिन् स्मरऋतः स्त्रीभिर्मुदर्तो रमते जनः ॥ १३ ॥

१३. अस्मिन्पुरे जनः स्त्रीभिः सह रमते। चः पूर्ववाक्यार्थापेक्षया समुच्चये । कीदृक्सन् । अप्रऋणार्तः । न प्रकृष्टेन ऋणेन ऋतः पीडित ईश्वर इत्यर्थः । अतएव सुखेतोनुपमभोजनाच्छादनविलेपनादिजनितं सुखं प्राप्तोत एव च मुदा प्रीत्या कर्त्र्यार्यते स्म ऋतः प्राप्तो यथा देवदत्तेन ग्रामो गतः प्राप्त इत्यर्थः । अत एव च स्मरऋतः कामेन पीडितोत एव च रतीच्छया निधुवनाभिलाषेण कर्त्र्या परमर्तः । परमं प्रकृष्टं गाढं यथा स्यादेवमृतः पीडितः ॥

प्रार्णम् । दशार्णकम् । ऋणार्णम् । वसनार्णम् । कम्बलार्णम् । वत्सरार्णम् । वत्सतरार्णम् । इत्यत्र "ऋणे प्र°" [७] इत्यादिना आर् ॥ समानानामिति बहुवचनस्य व्याप्त्यर्थत्वेनोक्तत्वादिहोत्तरत्र च ह्रस्वोपि भवति । प्रऋण ॥

ऋणार्तः । इत्यत्र "ऋते°" [८] इत्यादिना आर् ॥ ह्रस्वोपि भवति । स्मरऋतः ॥ ऋत इति किम् । सुखेतः॥ तृतीयाग्रहणं किम् । परमर्तः । समास इति किम् । मुदर्तः॥

इहर्च्छन्ति परार्च्छन्ति खे प्रार्च्छन्त्यहिसद्मनि ।
प्रर्षयोत्र स्वतेजोभिरनपेतास्तपोमयैः ॥ १४ ॥

१४. अत्र पुरे वर्तमानाः प्रर्षयस्तपोध्यानादिविशेषेण प्रकृष्टा मु-

१ एफ् °नां ऋणं रू°. २ सी पूर्वं ऋ°. डी पूर्वेण ऋ°. ३ सी एफ् °ते। च पू°. ४ बी सी डी °नितेन सु°. ५ बी सी डी सुखेन प्रा°. ६ सी डी प्राप्त°. ७ सी °मानामि°. ८ डी °ति। अप्र°. ९ सी °दि आ°.

नय इह मर्त्यलोकेऽभ्यादार्च्छन्ति यान्ति । तथा स्व ऊर्ध्वलोके पराच्र्छेन्ति प्रकर्षेण गच्छन्ति । तथाहिसन्नन्यधोलोके च प्रार्च्छेन्ति । यतस्तपोमयैस्तपांसि प्रकृतानि कारणतया येषु तैस्तपोमयैः स्वतेजोभिः स्वकीय[1]प्रे[2]भावैरनपेताः संयुक्ताः । तपःप्रभावादत्रत्यमुनीनां त्रिभुवनमपि गृहाङ्गणमित्यर्थः । एवं[3] च तपःप्रभावोपेतमहामुन्यवस्थित्यास्य पुरस्यातिपाविञ्यं सूचितम् ॥

प्रार्च्छेन्ति । पराच्र्छेन्ति । इत्यत्र "ऋत्यारुपसर्गस्य" [९] इत्यार् ॥ उपसर्गस्येति किम् । इहर्च्छेन्ति । येन धातुना युक्ताः प्रादयस्तं प्रत्युपसर्गसंज्ञास्तेनेह न स्यात् । प्रर्षयः ॥

प्रार्षयन्ति शमे धर्मधुरायां प्रर्षभन्ति च ।

अत्र प्रऋजवन्त्येव दुर्जने[1]ष्वपि साधवः ॥ १५ ॥

१५. अत्र पुरे साधवः सज्जनाः शम इन्द्रियजयविषये प्रार्षयन्ति प्रकर्षेण ऋषय इवाचरन्ति । "कर्तुः क्विप्०" [३.४.२५.] इति क्विप् । तथा धर्मधुरायां धर्मकार्यप्राग्भारविषये प्रर्षभन्ति प्रकर्षे[4]ण ऋषभा इवाचरन्ति यथा धवलाः शकटादिधुरं वहन्त्येवं धर्मधुरामिति । अतिधार्मिका इत्यर्थः । अत एव दुर्जनेष्वपि[5] खलेष्वपि प्रऋजवन्त्येव प्रकर्षे[6]ण ऋजव इवाचरन्ति । हितमेव कुर्वन्तीत्यर्थः ॥

प्रार्षयन्ति प्रर्षभन्ति । इत्यत्र "नाम्नि वा" [१०] इति वा आर् ॥ केचित्तु पक्षे ह्रस्वत्वमपीच्छन्ति । प्रऋजवन्ति ॥

प्राल्कारायितवेणीकाः प्रऌकारायितभ्रुवः ।

प्रल्कारयन्ति खे दन्तज्योत्स्नयात्र मृगीदृशः ॥ १६ ॥

---

१ सी डी °नेष्विव सा°.

---

१ एफ् °कीयैः प्र°. २ सी डी °प्रतापैर°. ३ एफ् °वं त°. ४ सी डी °र्षे ऋ°. ५ सी डी एफ् °पि प्र°. ६ सी डी °र्षे ऋ°.

१६. अत्र पुरे प्राल्कारायिताः प्रकर्षेण ल्कारवदाचरितवत्यः । कुटिला इत्यर्थः । वेण्यः कबर्यो यासां ता एवं प्रल्कारायितभ्रुवो मृगीदृशो दन्तज्योत्स्नया दन्तकान्त्या कृत्वा खे व्योम्नि प्रल्कारयन्ति प्रकर्षेण ल्कारान् कुर्वन्ति दन्तानामतिनैर्मल्यान्मृगीदृशां[3] दन्तकान्तय ल्काराकारा व्योम्नि स्फुरन्तीत्यर्थः । दन्तकान्तिज्योत्स्नयोर्नैर्मल्यादिगुणैः सादृश्याद्दन्तकान्तिर्ज्योत्स्नात्वेन व्यपदिश्यते । अतो ज्योत्स्नाशब्दस्य चन्द्रिकावाचकस्याप्यत्र प्रयोगो न दुष्यति ॥

प्राल्कारायिते प्रल्कारयन्ति । इत्यत्र "ल्त्याल्वा" [११] इति वाल् ॥ अत्रापि पक्षे ह्रस्वत्वमित्येके । प्रल्कारायित ॥

उपस्थिते प्रभोः कार्ये गुणौघैर्धौतवृत्तयः ।
प्रैषप्रौढा इह प्रैष्याः प्रौहप्रौढिं न कुर्वते ॥ १७ ॥

१७. अत्र पुरे प्रभोः स्वामिनः कार्ये उपस्थित उपागते सति[7] प्रैष्या भृत्याः प्रौहप्रौढिं प्रौहे कथमि[...]करिष्यत इत्येवंरूपे वितर्के प्रौढिं प्रागल्भ्यं न कुर्वते यतः प्रैष इदमेवं कार्यमिति स्वामिनियोगे प्रौढाः समर्था दुष्करस्यापि स्वाम्यादेशस्य तत्क्षणादेव कारका इत्यर्थः । प्रैषप्रौढत्वमपि[9] कुत इत्याह । गुणौघैः स्वामिभक्तिसुशक्तिस्थैर्यधैर्यादिभिर्धौतेव धौता निर्मला वृत्तिर्व्यापारो येषां ते ॥

ओघैः । गुणौघैः । इत्यत्र "ऐदौत्संध्यक्षरैः" [१२] इति ऐदौतौ ॥

धौत । इत्यत्र "ऊठा" [१३] इति औत् ॥

प्रैष । प्रैष्याः । प्रौढाः । प्रौढिम् । प्रौह । इत्यत्र "प्रस्यैष°" [१४] इत्यादिना ऐदौतौ ॥

---

१ सी °ल्कारयि°. २ सी डी °कारयि°. ३ एफ् °दृशीद°. ४ बी सी °कान्तेर्ज्योत्स्नाया नै°. डी °कान्तेर्ज्योत्स्नायाश्च नै°. ५ सी डी °त प्रल्कारायित प्र°. ६ सी डी °कारयि°. ७ ए °ति प्रेष्या°. ८ सी डी प्रौढ्यं प्रा°. ९ एफ् °पि इत°. १० सी डी °क्तिस्थै°. ११ एफ् °ना एदौ°.

स्वैरिस्मराक्षौहिणीनां स्वैरस्त्रीणामभावतः ।
इहैव धर्मः सोद्येव त्रेतात्रेति वितर्क्यते ॥ १८ ॥

१८. इहैवाणहिल्लपाटक एव नान्यदेशेषु धर्मोस्तीति तथात्र पत्तनेद्येवाद्यापि कलिकालेपि स स्त्रीमहासतीत्वादिधर्मप्रधानत्वेन प्रसिद्धस्त्रेता द्वितीययुगमस्तीति च लोकैर्वितर्क्यते । इतिर्वाक्यसमास्यर्थे उभयत्रापि योज्यः । कुतः । अभावतोभावात् । कासाम् । स्वैरस्त्रीणाम् । स्व आत्मीयैः स्वेच्छाकृत ईर आसाम् । यद्वा । स्वेनात्मना न तु श्वशुराद्यनुज्ञयेरन्ति ईरते वा विचरन्ति "नाम्युपान्त्य°" [५.१.५४.] इत्यादिना के स्वैरा याः स्त्रियस्तासां कुलटानाम् । किंभूतानाम् । स्वयमीरितुं शीलमस्य स्वैरी स्वतन्त्रो यः स्मरः कामस्तस्याक्षौहिण्य इव दुःसाध्यानां कामविपक्षाणां मुनीनामपि रूपलावण्यलीलाकटाक्षविक्षेपादिशस्त्रैः साधकत्वात्सेनाविशेषा इवं याः । यद्वा । स्वैरिण्यो याः स्मराक्षौहिण्यस्ता इव याः । तासाम् ॥

स्वैर । स्वैरि । अक्षौहिणीनाम् । इत्यत्र "स्वैरस्वैरि°" [१५] इत्यादिना ऐदौतौ ॥ यदा तु स्वैरिण्यश्च ताः स्मराक्षौहिण्यश्चेति समासस्तदा स्वैरिण्य इत्यत्र "नामग्रहणे लिङ्गविशिष्टस्यापि" [न्या° सू° १६] ग्रहणमिति न्यायादैत् ॥

अद्येव । इत्यत्र "अनियोगे लुगेवे" [१६] इत्यस्य लुक् ॥ नियोगे तु इहैव धर्मः ॥

नौतुनेत्रा न वृद्धोतुक्रूरा नाभौतुलम्पटाः ।
न दीर्घोष्ठा न ह्रस्वौष्ठा नौष्ठस्थूला इह स्त्रियः ॥ १९ ॥

१९. सुगमः । नवरं नौतुनेत्राः न मार्जारवत्कपिलरौद्राक्ष्यः । न च वृद्धोतुवत्क्रूराशयाः । न च बालौतुवल्लम्पटाः । तथा स्थूलशब्दोत्र गुण-

१ सी एफ् °ति वाक्य°. २ एफ् °यस्वे°. ३ बी सी न श्व°. ४ ए °व । य°. ५ सी डी स्वैरण्य°.

मात्रवाची। ओष्ठयोः स्थूलः स्थूलत्वं यासां ता ओष्ठस्थूला न। यद्वा। गुणिवचनः स्थूलशब्दः। नौष्ठाभ्यां स्थूलाः। न स्थूलोष्ठय इत्यर्थः॥

दीर्घौष्ठाः ह्रस्वौष्ठाः। वृद्धोतु अभौतु। इत्यत्र "वौष्ठौतौ समासे"[1] [१७] इति वाऽऽवुक्॥ समास इति किम्। नौष्ठस्थूलाः। नौतुनेत्राः॥

अत्रोपैति जनः स्वोढां न प्रोखति परस्त्रियम्।
प्रेलितः श्रोत्रियोङ्कारैर्धर्मश्चास्मिन्नुपैधते॥ २०॥

२०. अत्र पुरे जनो लोकः स्वोढां स्वेनौढामात्मना परिणीतामुपैत्युपगच्छति[2]। सेवत इत्यर्थः। ननु स्वदारांस्तावत्सेवते परदारानपि[3] सेविष्यत इत्याह। परस्त्रियं परेणोढां नारीं न प्रोखति धार्मिकत्वान्न गच्छति। अत एवास्मिन्पुरे धर्मश्च न केवलमुक्तनीत्या कामः किं त्वार्थपुमर्थोप्युपैधते वर्धते[4]। परस्त्रीवर्जनं हि परमधर्मवृद्धिनिबन्धनं[5] सर्वशास्त्रेषु गीयते। उत्प्रेक्ष्यते[6]। श्रोत्रियोंकारैः प्रेलित इव। श्रोत्रियाणां[7] यज्वनां[8] यागादिविधिकाल उच्चारणेन संबन्धिनो य ओंकाराः प्रणवास्तैः प्रेरित इव प्रेरितो वर्धस्व वर्धस्वेति दत्तानुमतिक इवेत्यर्थः। अत्रेत्यलोकस्य[9] परदारवर्जकत्वेन धर्मः स्वयमेव वर्धते श्रोत्रियैश्च यागादिविधौ वेदमंत्रानुच्चारयद्भिः[10] स्थाने स्थान ओंकारा उच्चार्यन्ते तेषां चानुमतेरप्यर्थस्य दर्शनादेवमुत्प्रेक्षा[11]। अत्रोत्प्रेक्षा साक्षादनुक्तापि वाक्यार्थसामर्थ्यादवसीयत इति। नचैवंविधे[12] विषय इवादिशब्दप्रयोगमन्तरेणासंबद्धतैवेति शक्यं वक्तुम्। गमकत्वात्। अन्यत्रापि तदप्रयोगे तदर्थावगतिदर्शनात्। यथा माघकाव्ये।

---

१ बी "वोष्ठौतौ. सी डी "वौष्ठोतौ. २ एफ् °पैति से°. ३ एफ् °पि न से° ४ एफ् °धः पु°. ५ बी °रमं ध°. ६ सी डी एफ् °त्प्रेक्षते. ७ सी डी इति। श्रो°. ८ सी डी °णां या°. ९ ए °त्र लो°. १० एफ् °मन्त्रोच्चा ११ सी डी °क्षा सा°. १२ एफ् °वं विष°.

त्रासाकुलः परिपतन्परितो निकेतान्पुंभिर्न कैश्चिदपि धन्विभिरन्वबन्धि।
तस्थौ तथापि न मृगः कचिदङ्गनाभिराकर्णपूर्णनयनेषुहतेक्षणश्रीः॥५.२६.

परितः सर्वतो निकेतान्परिपतन्नाक्रामन्न कैश्चिदपि चापपाणिभिरसौ मृगोनुबद्धस्तथापि न कचित्तस्थौ त्रासचापलयोगात्स्वाभाविकादेव। तत्र चोत्प्रेक्षा ध्वन्यते। अङ्गनाभिराकर्णपूर्णैर्नेत्रशरैर्हृतेक्षणश्रीः सर्वस्वभूतास्य यैतोतो न तस्थौ। नन्वेतदप्यसंबद्धमस्तु। न। शब्दार्थव्यवहारे हि प्रसिद्धिरेव प्रमाणम्। एवमन्यत्रापि ज्ञेयम्॥

ओम्रियोंकारैः। स्वोढाम्। इत्यत्र "ओमाङि" [१८] इत्यलुक्॥ आङि दीर्घत्वेनैव सिद्धे लुग्विधानमनर्थकं स्यादित्याङित्याङादेशो गृह्यते। तेन आ ऊढा ओढा। ततस्तेन समासः॥

प्रेक्षितः। प्रोक्षति। इत्यत्र "उपसर्गस्य°" [१९] इत्यादिनालुक्। अनिणेषीति किम्। उपैति। उपैधते॥

अत्र गुर्वर्थपित्रर्थनतिलाकृतिभिर्जनैः।
प्रोजायते प्रौषधयन् धर्मः प्रेकत्युपैकितैः॥ २१॥

२१. अत्र पुरे धर्मः प्रोजायते प्रकर्षेणौजस्वीव बलिष्ठ इवाचरति। कैः कृत्वा। जनैः। किंभूतैः सद्भिः। गुरुर्धर्माचार्यो विद्याचार्यो वा तस्मा इयं गुर्वर्था। पितरौ मातापितरौ ताभ्यामियं पित्रर्था। द्वन्द्वे ते ये नती प्रणामौ ताभ्यामेव न तु रोगादिना लृकारस्येव ॡकारस्येव वा वक्रा आकृतिः संस्थानं येषां तैः। विनीतैरित्यर्थः। अत एवोपपन्नं यथा स्यादेवमेक इव मुख्या इवाचरन्ति स्म। किपि के च उपैकिताः। तैः। सर्वगुणमूलविनर्यवत्त्वेन प्रधानैरित्यर्थः। यथौजस्वी स्वौजसा शत्रून् पराभवति

१ एफ् °तान् पत°. २ बी एफ् °न्नाक्रम°. ३ एफ् °नारा°. ४ सी डी ०ो न. ५ सी डी एफ् °स्तु। श°. ६ बी आङ् दी°. ७ एफ् °षि इति. एफ् °यत्वेन°.

स्वानुकूलान् स्वजनादींश्च पोषयति[1] तथा धर्मोप्यत्रत्यजनविनयलक्षणेन[2] महाबलेन बलिष्ठत्वादहंकारादीन् स्वशत्रूनभिभवति स्वानुकूलान् दानशीलादींश्च पोषयतीत्यर्थः । अत एव प्रेकति प्रकर्षेणैक इवासाधारण इवाचरति । बलिष्ठत्वेन निःसपत्नत्वान्निरुपमो भवतीत्यर्थः । उत्प्रेक्ष्यते[3] । प्रौषधयन् । पूर्ववदुत्प्रेक्षात्रावसेया । प्रकर्षेण बलकान्त्यादिवृद्धिकरीमोषधिं[4] कुर्वन्निव । णिज् । करोतिः सामान्यकरणार्थोपि प्रस्तावादिह विशेषे भक्षणकरणे वर्तते । यद्वा । अनेकार्थत्वाद्धातूनां करोतिरिह भक्षणार्थस्तेनौषधिं भक्षयन्निवेत्यर्थः । यो हि बलकान्त्यादिवृद्धिकरीमोषधिं[5] भक्षयति स तत्प्रभावादोजस्वी निरुपमश्च स्यात् । अचिन्त्यो हि मणिमन्त्रौषधीनां[6] प्रभावः ॥

रजतं चारु ईक्षित्वा हारि अत्र च काञ्चनम् ।
दधियेतन्मधुवेतत्कुमारी एवमूहते ॥ २२ ॥

२२. सुगमः । नवरं हारि जात्यत्वाद्रम्यम् । एतत्प्रत्यक्षं वस्तु[7] दधि वर्तते । एवं तथैतत्प्रत्यक्षं[8] वस्तु मधु वर्तते । एवं च बालिका वितर्कयेति । सावर्ण्याद्बाल्याच्चैवमूहः । एवमिति भिन्नक्रमे यथास्थानं योजित एव । एवंशब्देनैव कर्मण उक्तत्वाद्दधियेतदित्यत्र मधुवेतदित्यत्र च नामार्थमात्रे प्रथमैव ॥

रोदस्यौ पावयन्त्येनोलवन्यौर्वाग्निनायिनी ।
अव्येतिवृत्ता ब्राह्म्यत्र गव्यनाव्यजला नदी ॥ २३ ॥

२३. अत्र पुरे ब्राह्मी ब्रह्मणोपत्यं नदी सरस्वत्यस्ति । कीदृशी । ब्रह्मणः पुत्रीत्वेन महातीर्थत्वादेनः पापं लूयतेनयेत्येनोलवनी । अत एव रोदस्यौ द्यावापृथिव्यौ पावयन्ती[10] पवित्रयन्ती । तथौर्वाग्निं वडवानलं

---

१ एफ् °षति. २ बी °क्षणम°. सी एफ् °क्षणे म°. ३ सी डी एफ् °त्प्रेक्षते. ४ बी सी डी °रीमौष°. ५ बी सी °रीमौष°. ६ एफ् °मन्त्रमहौष°. ७ सी डी °स्तु मधु. ८ एफ् °थैव त°. ९ सी डी °यन्ति । सा°. १० ए बी °न्ती त°.

समुद्रमवश्यं नीतवती "णिन् चावश्यकाधमर्ण्ये" [५.४.३६.] इति णिनि औवोग्निनायिनी । सकलं जगद्भक्षयिष्यामीति वदन्तं वडवाग्निं ब्रह्मादिष्टा सरस्वती समुद्रे प्रक्षिप्तवतीति पुराणम् । अत एव श्रव्यं श्रवणार्हमितिवृत्तं चरितं यस्याः सा । तथा गव्यं सुस्वादुशीतलशुभपरिणामत्यादिना गोभ्यो हितं नाव्यं चागाधत्वान्नावा तार्यं च जलं यस्यां सा । एतेनास्य पुरस्यातिपावित्र्यं निर्दोषजलप्राचुर्यं चोक्तम् ॥

न गव्यत्यत्र गोयानो नौयानो न च नाव्यति ।
उपोयमानः श्राव्याभिर्लौयमानीसुगीतिभिः ॥ २४ ॥

२४. अत्र पुरे गोयानो वृषवाहनो नरो न गव्यति[2] न गामिच्छति तथा नौयानश्च प्रवहणवाहनः पुमान्न नाव्यति न नावमिच्छति । यतः श्राव्याभिर्मधुरतयावश्यं श्रवणार्हाभिर्लौयमानीसुगीतिभिः । लूयते कूर्चश्रेण्यां लूयमानो देवलो मार्दङ्गिकादिस्तस्यापत्यानि स्त्रियः "अत इञ्" [६.१.३१.] लौयमान्यो गायन्यः । यद्वा । लूयन्ते लूयमानाः केदारास्तेषामिमा रक्षित्र्यः "तस्येदम्" [६. ३. १६०.] इत्यणि लौयमान्यो गोप्यः । तासां सुगीतयः शोभनगानानि । ताभिरुपोयमानो व्याप्यमानः । आवर्ज्यमान इत्यर्थः । एवं नाम सुगीतीनां माधुर्यादिगुणैर्हृतहृदया यावता स्वस्य यानहेतुत्वेनात्यभीष्टमपि गवादिकं यानं चौराद्यैरपह्रियमाणमपि गोयानादयः सुगीतिश्रवणभङ्गभयेनावहेलयन्तीत्यर्थः ॥

प्रेकति उपैकितैः । प्रोजायते प्रौषधयन् । इत्यत्र "वा नाम्नि" [२०] इत्यस्य लुग्वा ॥

प्रेकत्युपैकितैः । गुर्वर्थं । पित्रर्थं । लाकृतिभिः । इत्यत्र "इवर्णादेः°" [२१] इत्यादिना यवरलाः ॥ केचित्त्विवर्णादिभ्यः परान् यवरलानिच्छन्ति । दधियेतत् । मधुवेतत् । तन्मतसंग्रहार्थमिवर्णादेरिति पञ्चमी व्याख्येया ॥

---

१ सी °स्वादशी°. २ सी डी °ति त°. ३ पफ् °वल°.

हारि अत्र । चारु ईक्षित्वा । इत्यत्र "ह्रस्वोपदे वा" [२२] इति वा ह्रस्वः ॥ पक्षे । माहत्यत्र ॥ कश्चित्तु प्रकृतिभावमपीच्छति । कुमारी एवम् ॥ अपद इति किम् । रोदस्यौ ॥

पावयन्ती । औवाँग्निनायिनी । इत्यत्र "एदैतोयाय्" [२३] इत्ययायौ ॥

लवनी । पावयन्ती । इत्यत्र "ओदौतोवाव्" [२४] इत्यवावौ ॥

गव्यति । नाव्यति । अ[1]क्य । आव्याभिः । गव्य । नाव्य । इत्यत्र "य्यक्ये" [२५] इत्यवावौ ॥ अक्य इति किम् । उपोयमानः । लौयमानी[2] ॥ क्यवर्जनाद्यकारादिः प्रत्ययो गृह्यते । तेनेह न भवति । गोयानैः[3] । नौयानः ॥

पित्र्ये पक्षेत्र वी[1]क्षन्ते गवाक्षस्थाः पुरन्ध्रयः ।
गोक्षानन्दितृणां भूमिं गवाक्षानन्दिनीं नदीम् ॥ २५ ॥

२५. अत्र पुरे पितृषु साधुः पित्र्यस्तस्मिन् पित्र्ये पक्षे श्राद्धपक्षे गवाक्षस्था वातायनस्थिताः पुरन्ध्रयो विलासिन्यो भूमिं वीक्षन्ते विशेषेण पश्यन्ति । यतो गवां धेनूनां वृषभाणां चाक्षाणीन्द्रियाणि तेषां तृप्तिहेतुत्वादानन्दीनि आह्लादनशीलानि तृणानि हरितानि यस्यां ताम् । तथा नदीं सरस्वतीं च वीक्षन्ते । यतो गवाक्षानन्दिनीं तृष्णाद्युच्छेदकत्वाद्गवेन्द्रियाणामाह्लादयित्रीम् । शरदि हि भूमिर्हरिताभिरामत्वेन नदी च स्वच्छजलपूर्णत्वेन विशेषेण दर्शनीया स्यात् । एतेनात्र मह्र्द्धिकातिसुखिता विलासिन्यः सन्तीत्युक्तम् ॥

---

१ सी डी एफ् वीक्ष्यन्ते.

---

१ ए अव्यः ।. २ एफ् °मानः ।. ३ सी डी एफ् °नः ॥ २४ ॥ ४ सी गवां क्षान°. ५ डी एफ् °णां वाक्षा°.

गवोष्ट्रिभिर्गवेन्द्रांसैर्गवुष्ट्रप्रियवीरुधः ।
गोअग्रस्थायिभिश्चास्य निषेव्यन्ते बहिर्भुवः ॥ २६ ॥

२६. अस्य पुरस्य बहिर्भुवो बाह्यभूमयो गावश्चोष्ट्राश्च गवोष्ट्रमस्त्येषां तैर्गवोष्ट्रिभिर्गोपालोष्ट्रपालैर्गवोष्ट्रस्य चारणाय निषेव्यन्ते । किंभूतैः । गवामिन्द्रो गवेन्द्रः शण्डस्तदंसवदंसौ स्कन्धौ येषां तैः । गोदुग्धोष्ट्रीदुग्धपानेनावलितस्कन्धैरित्यर्थः । तथा गोर्वृषस्याग्रमग्रभागः ककुत्प्रदेशस्तत्र तिष्ठन्तीत्येवंशीला[2]स्तैर्गोअग्रस्थायिभिश्च वीवधाहारिभिश्च वीवधाहरणाय च सेव्यन्ते । यतः कीदृ[3]श्यः । गवुष्ट्रस्य वृषकरभव्रजस्योपलक्षणादश्वादेश्च प्रिया वीरुधो लता यासु ताः । पत्तनगोचरे हि वृषभोष्ट्रादिप्रियचारिसंकीर्णं महद्वनमस्ति ॥

पित्र्ये । इत्यत्र "ऋतो रस्तद्धिते" [२६] इति रादेशः ॥

पक्षेत्र । गोक्ष । इत्यत्र " एदोतः०" [२७] इत्यादिनास्य लुक् ॥

गवाक्ष । इत्यत्र "गोर्नाम्नि०" [२८] इत्यादिना अवादेशः ॥ नाम्नीति किम् । गो[4]क्ष ॥ कश्चित्त्वसंज्ञायामपि गवाक्षेतीच्छति ॥

गवोष्ट्रिभिः गवुष्ट्र । इत्यत्र "स्वरे वानक्षे" [२९] इति वावादेशः ॥ अनक्ष इति किम् । गोक्ष ॥

गवेन्द्र । इत्यत्र "इन्द्रे" [३०] इत्यवः ॥

गोअग्र । इत्यत्र "वात्यसंधिः" [३१] इति वासंधिः ॥ पक्षे । गो[5]क्ष ॥

व्रज३ आस्स्वेति मा वास्स्व३ इति स्वाधीनभर्तृकाः ।
इदं ब्रूहि३ इदं मा वा ब्रूहीत्याहुरिह प्रियम् ॥ २७ ॥

२७. सुगमः । नवरं व्रज३ इत्यत्र इदं ब्रू[6]हि इत्यत्र च वाक्यपरि-

१ प °षां ते गो°. २ प पफ् °ला ये तैर्गो°. ३ डी सी °दृशो ग°. ४ पफ् गोक्षः ।. ५ पफ् गोक्षः ।. ६ प सी डी ब्रूहीत्य°.

समास्यर्थे इतिशब्दो योज्यः । तथा स्वाधीनो रतगुणाकृष्टत्वेनायत्तो भर्ता यासां ताः स्वाधीनभर्तृकाः "क्षियाशीः प्रैषे" [७.४.९२.] इति सर्वत्र प्लुतः ॥

प्रज३ आस्स्व । इत्यत्र "प्लुतोनितौ" [३२] इत्यसंधिः ॥ अनिताविति किम् । आस्स्वेति[1] । अत्र प्लुतस्य संधिः ॥ केचिदिवितिशब्दे विकल्पमिच्छन्ति । आस्स्व३ इति आस्स्वेति ॥

ब्रूहि३ इदम् । इत्यत्र "इ३ वा" [३३] इति वासंधिः ॥ पक्षे । ब्रूहीति । अत्रापि प्लुतस्य संधिः ॥

मणी इव जपावर्ण[1]कुसुमे हारिणी अपि ।
अहो३ किं स्वि३दमू३ अग्नी३ इत्युज्झ्येते इहार्भकैः ॥ २८ ॥

२८. इह पुरे जपावर्णकुसुमे जपा वर्णश्च वृक्षभेदौ तयोः कुसुमे मणी इव रत्ने इव हारिणी अपि । मणयो हि सामान्येन कान्तिमन्तो रक्ताश्च वर्ण्यन्त इति कान्तिमत्तारक्तताढ्यतया मनोहरे अप्यर्भकै-[2]र्बालकैरुज्झ्येते त्यज्येते । ननु बालका रम्यं वस्तु कौतुकाद्बालस्वभावाच्च प्रत्युत गृह्णन्ति तत्किमिति हारिणी अपि ते त्यज्येते इत्याह । अहो ३ किंस्वि३दमू३ अग्नी३ इतीति । अमू जपावर्णकुसुमे किमग्नी वह्निकणाविति बुद्ध्या । अहो इति किंस्विदिति च निपात[4]द्वयं वितर्कातिशयद्योतनाय । वितर्कस्य चान्तरात्मप्रश्नरूपत्वात् "प्रश्ने च प्रतिपदम्" [७.४.९८.] इति प्लुतः ॥ सावर्ण्याद्वाल्या[5]नामग्निकणभ्रान्तिः ॥

---

१ सी डी °वर्णे कु°.

---

१ एफ् °ति प्लु°. २ सी डी °भ वा. ३ सी डी °र्बालैरु°. ४ सी °तनद्व°. ५ एफ् °ल्याद्वाग्नि°.

मणीव मसृणौ चक्रदंपतीव युतौ स्तनौ ।
विजेतुं रोदसीवात्र स्त्रीणां भातः स्मरायुधे ॥ २९ ॥

२९. अत्र पुरे स्त्रीणां स्तनौ भातः । कीदृशौ । मणीव रत्ने इव मसृणौ कठिनकोमलौ । तथा चक्रदंपतीव । जाया च पतिश्च दंपती चक्रश्च चक्री च चक्रौ चक्रौ च तौ दंपती च चक्रदंपती चक्रवाकमिथुनम्[1] । तौ यथा प्रेमातिरेकादन्योन्यं युतौ भवतस्तथा युतावति[2]स्थूलत्वादन्योन्यं मिलितौ । उत्प्रेक्ष्येते[3] । रोदसी द्यावापृथिव्यौ जेतुं[4] पराभवितुं स्मरायुधे इव कामशस्त्रद्वयमिव रोदस्योरपि द्वयोर्जेतव्यत्वात् ॥

हारिणी अपि । अमू३अस्मी । उज्झ्येते इह । इत्यत्र "ईदूदेद्विवचनम्" [३४] इत्यसंधिः ॥ एषां प्लुतानामितावपि संधिर्न स्यात् । अग्नी३इति ॥ केचित्तु मणीवोष्ट्रस्य लम्बेते प्रियौ वत्सतरौ ममेति[5] प्रयोगदर्शनान्मणी इव मणीवेत्यादावसंधिप्रतिषेधं वर्णयन्ति तदयुक्तम् । वाशब्देनोपमार्थेन सिद्धत्वात् ॥ अन्ये तु यथादर्शनं संधिमसंधिं वेच्छन्ति । मणीव । दंपतीव । रोदसीव[6] । मणी इव ॥

अमी अमुमुईचोस्य नखाः कण्ठे इ ईक्षिताः ।
अ[1] एहि त्वमु उत्तिष्ठ यद्या एवं नु मन्यसे ॥ ३० ॥
ऊ ऊहस्व त्वमे अस्मिकी ईदृशि रतिः कथम् ।
तदो अलमनेनेति सखीमाहात्र मानिनी ॥ ३१ ॥

३०, ३१. अत्र पुरे किल काचिन्नायिका पत्यौ सपत्नीनखक्षता-

---

१ सी अत ए°.

---

१ डी °नमेतौ. २ एफ् °ताविति°. ३ सी डी °त्प्रेक्षेते. एफ् °त्प्रेक्षते. ४ सी डी °तुं स्म°. ५ डी °ति प्रायो°. ६ एफ् °सीव ॥.

दिकं दृष्ट्वात्यन्तं दृष्टा पादपातादिकां प्रसादनक्रियां कुर्वाणेपि मानिनी-त्वाद्यदा कथमपि न प्रसीदति तदा तत्सखीपार्श्वात्स तां प्रसादयति। तां च सखीमनुनयार्थं पत्यपराधं निगूहयन्तीं मानिनी स्याह ब्रूते। यथा। अ इति संबोधने। हे सखि एहि मद्वचःश्रवणाय मत्पार्श्वमागच्छ। इ इति संबोधने। हे सखि अमूं विप्रकृष्टवर्तिनीं सपत्नीमश्चति गच्छति यस्तस्यामुमुईचोस्य प्रियस्य कण्ठेमी प्रत्यक्षवर्तिनो नखास्त्वये-क्षिता दृष्टाः। एवं तया प्रत्यक्षमपराधे दर्शितेपि यावदद्यापि सखी किंचिन्न प्रतिवदति तावन्मानिनी मदुक्तं सत्यमप्येषा नाङ्गीकरोतीति कोपाविष्टाह। उ उत्तिष्ठ यद्या एवं नु मन्यस इति। उ इति संबोधने। आ निरनुबन्धः पूर्ववाक्यार्थवैपरीत्ये वर्तते। पूर्वं यत्त्वया पत्यपराद्धं मनितं तद्यदीदानीमेवं नु मन्यसे नु निश्चितमन्यथा मन्यसे तदा हे सखि उत्तिष्ठ मत्पार्श्वाद्गच्छ पूर्वं मनितस्यार्थस्य केनापि द्रव्यलोभादिना हेतुनान्यथाभाषिण्या त्वयापि न प्रयोजनमित्यर्थः॥ एवं परुषोक्तौ सखी मा रुषदिति विचिन्त्य पुनस्तां साम्नाह। ऊ ऊहस्वेत्यादि। ऊ इत्यक्ष-मायाम्। पतिमक्षाम्यन्ती प्राह। ए इति संबोधने। हे सखि त्वमूहस्व त्वमेव स्वचेतसि पर्यालोचय। ई इति खेदे। खिद्येहमीदृशि व्यक्तमत्यन्त-मपराद्धर्यस्मिन् पत्यौ विषये कथं रतिः प्रीतिः स्यात्। न कथमपीत्यर्थः। ओ इति संबोधने। हे सखि तत्तस्माद्धेतोरनेन पत्यालम्। सृतमिति॥

न जानू अरुजल्लङ्कां भ्रमतो यस्य मारुतेः।
अहो आन्तं जिगमिषो रुजेत्तस्यापि जान्विह॥ ३२॥

३२. जानू इत्यत्र उ लोकसंबोधने। हे लोका यस्य मारुतेर्हनूमतो लङ्कां रावणपुरीं भ्रमतो दहनाय पर्यटतः सतो जान्वष्ठीवावारुजन्न

१ सी °सान°. डी °साधन°. २ डी °दा कदा क°. ३ सी एफ् °यन्ती मा°. ४ एफ् °वं प्र°. ५ सी एफ् °वं पुरु°. ६ एफ् °स्तां सकोमलवचसा सा प्राह। ७ एफ् °लौ क°.

आन्तम् । अहो इत्याश्चर्ये । जान्विहेत्यत्र उ इति संबोधने । हे लोका आश्चर्यं तस्यापि मारुतेरपीह पुर आन्तादन्तं मर्यादीकृत्याभिव्याप्य वा श्रीविशेषविलोकनाय जिगमिषोर्गन्तुमिच्छोः सतो जानु रुजेत् खिद्येत। संभावने सप्तमी । इदमहं संभावयामीत्यर्थः । एतेनास्य लङ्कासकाशादपि महत्त्वमत्वोक्तिः ॥ आन्तमित्यत्र क्रियाविशेषणे द्वितीया [२. २. ४१.] ॥

अमी अमुमुईचः । इत्यत्र "अदोमुमी" [३५] इत्यसंधिः ॥

अ एहि । आ एवं नु मन्यसे । इ इंक्षिताः । ई ईदृशि । उ उत्तिष्ठ । ऊ ऊहस्व । ए अस्मिन् । ओ अलम् । इत्यत्र "चादिः स्वरोनाङ्" [३६] इत्यसंधिः ॥ स्वरे पर इति प्रत्यासत्तेस्तन्निमित्तकसंधिप्रतिषेधादिह दीर्घत्वलक्षणः संधिर्भवत्येव । जानू अरुजत् ॥ केचित्तु चाद्यचादिस्थानस्याचादिरूपत्वात्स्वरनिमित्तकमपि संधिमिच्छन्ति । जान्विह ॥ अनाङिति किम् । आन्तम् ॥

अहो आन्तम् । इत्यत्र "ओदन्तः" [३७] इत्यसंधिः ॥

उ इत्यूँ इति विति[1] चाहो इत्याह्वायके गुरौ ।
विभो इति प्रभविति चाहात्र विनयी जनः ॥ ३३ ॥

३३. सुगमः । नवरं[2] सर्वत्र उ इति संबोधने । आगच्छेत्यादिका च क्रिया सर्वत्राध्याहार्या । संबोध्यानां[3] च बहुत्वाद्बहूनि संबोधनपदानि[4] । तथा विभो इति प्रभवितीत्येतयोः प्रत्युत्तरवाक्ययोरादिशेत्यादिक्रियाध्याहार्या । उपलक्षणत्वाद्भगवन्नित्यादीन्यपि गुरुसंबोधनपदानि ज्ञेयानि । प्रत्युत्तरदायिनामनेकत्वात् । इतिः[5] सर्वत्र वाक्यपरिसमाप्तौ ॥

---

१ ए एफ् °ति वाहो.

---

१ सी डी °समोक्तिः ।. २ एफ् °रं उ इति स°. ३ डी °बोधनीयानां. ४ एफ् °नि ज्ञेयानि । त°. ५ सी डी °ति स°.

चिमो इति प्रभचिति। इत्यत्र "सौ नवेतौ" [३८] इति वासंधिः ॥

उ इति। इत्यत्र "ऊँ चोञ्" [३९] इति वासंधिः। असंधिपक्षे च उञ् ऊँ इत्येवंरूपो दीर्घोनुनासिको वा[1]। ऊँ इति ॥ पक्षे। संधिः। विति[2] ॥ ञित्करणं स्वरूपपरिग्रहार्थम्। तेन विकृतस्य न भवति। अह उे[3] अहो इति ॥

किमु अम्बा किमु तातः किम्वीशो गीरु इत्यभूत्।
गुरुं प्रति नृणामत्र वृद्ध्यै घञु अलं यथा ॥ ३४ ॥

३४. अत्र पुरे गुरुं[4] धर्माचार्यं[5] विद्याचार्यं वा प्रति लक्ष्यीकृत्यैवं[6]-[7] विधा नृणां गीर्वाणी वृद्ध्यै धनसंतत्यादि[8]वृद्धिनिमित्तमलं समर्थाभवत्[9]। भवति हि वृद्धिः पूज्येषु पूजोपचारवचनादिना[10]। का गीरित्याह। उ हे गुरो वात्सल्यपरमोपकारित्वादिना त्वमस्माकं किमु अम्बा किमु किं वा तातः किम्वीशः किंवा स्वामीति। यथा उ हे लोका घञ् प्रत्ययो ञानुबन्धत्वाद्वृद्ध्यायैकारौकारार्लक्षणायै समर्थो भवति। शब्दसाम्येनोपमा। किमुशब्दा उनिपातयुताः सर्वेपि[11] वितर्कस्य वाचकाः ॥

किम्वीशः। इत्यत्र "अञ्वर्गात्[12]०" [४०] इत्यादिना वकारो वा स चासन्। असत्त्वादनुस्वारानुनासिकाभावः ॥ पक्षे। किमु अम्बा ॥ वर्गादिति किम्। गीरु इति ॥ अञिति किम्। घञु अलम् ॥ स्वर इति किम्। किमु तातः ॥

सामँ साम ध्रुवं तावद्दधिँ दधि मधुँ मधु।
श्रूयन्ते सुभ्रुवामत्र न यावन्मधुरा गिरः ॥ ३५ ॥

३५. सामवेददधिमधूनि हि अतिमधुरत्वादिप्रधानगुणोपेतानि स्युः।

---

१ डी वा भवति प°. २ प बी पफ् °ति ॥ कि°. ३ डी उ अहो अ°. ४ डी गुरुधर्माचार्यं वा. ५ सी पफ् °र्यं वा. ६ सी डी लक्षीकृ°. ७ बी °कृत्येत्येवं°. सी °कृत्येवं. ८ पफ् °संपत्त्या°. ९ सी डी भवेत्।. १० सी डी °दि का°. ११ सी °पि त°. १२ पफ् °र्गादि°.

परमेतानि तावदेव स्वेनस्वेनातिमाधुर्यादिप्रधानगुणेनोपेतानि यावदत्र पुरे सुभ्रुवां गिरो न श्रूयन्ते । तासु चातिमधुरतमत्वादिप्रधानतमगुणोपेतासु श्रुतासु सामादि न किंचिदित्यर्थः । अत्राद्याः सामादिशब्दाः सामवेदादिवाचकाः । द्वितीयास्तु तद्गुणवाचकाः । तावद्यावतोः "क्रियाविशेषणात्" [२. २. ४१.] इति "कालाध्वनोर्व्याप्तौ" [२. २. ४२.] इति वा द्वितीया ॥

अमू पाणी मृदू पद्मे किमु किं नु नखा अमी ।
केसराणीति तर्क्यन्ते जनैरस्मिन्मृगीदृशाम् ॥ ३६ ॥

३६. अस्मिन्पुरे जनैर्मृगीदृशां स्त्रीणां पाणी नखाश्च तर्क्यन्ते । कथमित्याह । अमू प्रत्यक्षौ मृदू कोमलौ पाणी किमु पद्मे तथामी पाणिस्था नखा रक्तत्वान्मृदुत्वाच्च किं नु केसराणि पद्मस्थानि किञ्जल्कानीति ॥

सामँ साम । दधिँ दधि । मधुँ मधु । इत्यत्र "अइउवर्णस्य०" [४१] इत्यादिना वानुनासिकः ॥ अन्त इति किम् । गिरः । मधुराः ॥ अनीदादेरिति किम् । पाणी । अमू । मृदू । अमी । किमु ॥

द्वितीयः पादो लक्षणतः समर्थितः ॥

एतद्ध्यायान् क्षमौ स्तोतुं न चतुर्मुखषण्मुखौ ।
हेतुर्वृद्धेरेतण्णिद्वञ्ञिद्धूयेत सूरिभिः ॥ ३७ ॥

३७. आस्तां तावदेकमुखः कश्चिद्यावच्चतुर्मुखषण्मुखावपि । अ-

---

१ एफ् ॥ ३६ ॥ द्वितीयपादो लक्षण° ॥

---

१ सी डी °गुणोपे°. एफ् °गणेनोपे°. २ एफ् °नगु°. ३ डी ३६ ॥ स्त्री°. ४ डी °त्वाच्च. ५ डी किम् पा°. ६ एफ् °दादिरि°. ७ एफ् °मु ॥ ३६ इति द्वितीयः पादः ॥

पि[1]रत्राध्याहार्यः । अथास्कन्दावप्येतन्न्यायानस्य पुरस्य नीतीः स्तोतुमेतावन्त ईदृशाश्चात्र न्याया इति वर्णयितुं न क्षमौ न समर्थौ । एतेनात्रत्यन्यायानां श्रेष्ठतमत्वमसंख्यत्वं चोक्तम् । अत एवैतत्पुरं सूरिभिस्तत्त्वातत्त्वविवेककुशलैर्वृद्धेर्धनधान्यद्विपदचतुष्पदादिसमृद्धिवर्धनस्य हेतुः कारणं ञ्ब्येत कथ्यते । वर्तमानाया अर्थेपि क्वचित्सप्तमी दृश्यते । भवति हि न्यायवति पुरे लोकः श्रीपात्र[2]म् । यद्वा । सूरिभिर्वास्तुविद्याकुशलैर्वास्तुविद्यानुसारेण निर्मितत्वाद्वृद्धेर्हेतुर्ञ्ब्येत । वास्तुविद्यानतिक्रमेण निर्मिते हि पुरे श्रीर्विजृम्भते । णिद्वञ्णिद्वदिति । यथा णित् णानुबन्धो णिगादिर्ञित् ञानुबन्धो ञिजादिश्च प्रत्ययो वृद्धेरैदौदार्लक्षणाया हेतुः सूरिभिर्वैयाकरणैः कथ्यते ॥

अस्मिन् सागरुधूमे[3]ब्दशङ्काभाग्णशिखः शिखी ।
सम्रु[4]अचञ्चुरुद्गम्य सुवाङ्कवत उन्मनाः ॥ ३८ ॥

३८. सहागरोर्धूमेन वर्तते यत्तस्मिन् सागरु[5]धूमेस्मिन् पत्तने णव[6]ण्णकाराकारा शिखा चूडा यस्य स णशिखस्तथा ञकाराकारा चञ्चुर्यस्य स ञचञ्चुः । नागरलिपौ हि णकारञकारावेवं लिख्येते । यथा । ण ञ । शिखी मयूर उद्गम्य ग्रीवामूर्ध्वीकृत्य सुवाग्मधुरस्वरं यथा स्यादेवं ङ्कवते केकायते । कीदृक् सन् । अब्दशङ्काभाग् मेघवितर्कवान् । अत एव सुहृत्संगमाभिप्रायेण समुत्सहर्षः । अत एव चोन्मना उत्कण्ठितः । एतेनैवं नामात्रा[7]गरुः प्रभूतो देवगृहेषु विलासिभवनेषु च दन्दह्यते यावता तद्धूमो नभस्तलेभ्रपटलविभ्रमं वहतीत्युक्तं स्यात् ॥

१ एफ् °पि अत्रा°. २ सी °ग्रम् । सू°. डी °ग्रम् । अथवा सू°. ३ सी एफ् °गरधू°. ४ सी डी ण इव णका°. ५ बी °डास्य. ६ बी सी डी °मागुरुः. ७ एफ् °त्रु द°.

न यो हल्माँत्रझल्मात्राभिज्ञः सोपि क्षणाद्भवेत् ।
ज्ञाता षण्णां दर्शनानामस्मिन्वाङ्मयसद्मनि ॥ ३९ ॥

३९. यो नरो न हल्माँत्रझल्मात्राभिज्ञः । हल् व्यञ्जनम् । हलेव हल्माँत्रम् । झल् धुट् । झलेव झल्मात्रम् । मात्रशब्दोत्र स्वार्थे एव । द्वन्द्वे । तयोरभिज्ञो ज्ञाता न स्यात् । यो व्यञ्जनधुट्संज्ञामपि न वेत्तीत्यर्थः । सोप्यस्मिन्पुरे षण्णां षट्संख्यानां दर्शनानां जैन१बौद्ध२ सांख्य३वैशेषिक४नैयायिक५जैमिनीय६मतसंबन्धिनां तत्तत्त्वदेवताप्र[1]माणादिप्रकाशकशास्त्राणां क्षणाज्झटिति[2] ज्ञाता भवेत् । यतः किंभूतेस्मिन् । वाङ्मयसद्मनि वाचां विकारोवयवो[3] वा वाङ्मयं व्याकरणतर्कसिद्धान्तसाहित्यादिसर्वशास्त्राणि । तच्च पुरुषविशेषं पुस्तकादि[4] चाधारं विना नावतिष्ठत इत्यर्थाद्वाङ्मयस्य वाङ्मयवतां पुरुषविशेषपुस्तकादीनां सद्मानि गृहे सर्वशास्त्रपाठसामर्थ्योपेत इत्यर्थः ॥

सुवाङ्कवते । जिह्वड्डयेत । णिड्ढ्ञिढ्ढत् । सम्मुञ्ज । एतण्णिढ्ढत् । शङ्काभाग्ण । एतच्छायात् । उड्डम्य । षण्मुखौ । उञ्मनाः । इत्यत्र "तृतीयस्य पञ्चमे" [१] इति वानुनासिकः ॥ तृतीयस्येति किम् । चतुर्मुख[5] ॥ पञ्चम इति किम् । क्षणाद्भवेत् । केचित्तु व्यञ्जनस्य स्थानेनुनासिके[6] वानुनासिकमिच्छन्ति । तस्य च "ह्रस्वाङ्ङणनो द्वे" [१. ३. २७] इति द्वित्वं च नेच्छन्ति । तन्मते । हल्माँत्र झल्मात्र ॥

वाङ्मय । षण्णाम् । इत्यत्र "प्रत्यये च" [२] इति नित्यमनुनासिकः ॥ पदान्त इत्येव । सद्मानि ॥

---

१ बी तत्तस्व°. २ एफ् °ज्झटति. ३ सी डी °वो वाक्म°. ४ बी °दि वाधा°. ५ बी सी डी एफ् °र्मुखः ।. ६ डी °के चानु°. ७ एफ् °ल्मात्रं झ°. ८ एफ् °ल्मात्रम् ।. ९ डी °ङ्मयः ष°. एफ् °ङ्मयं ष°.

तावद्धिमांशुरानन्दी तावद्धेमाद्रिरुन्नतः ।
वाग्घ्लादिनोत्र नेक्ष्यन्ते यावद्विष्वग्हिता नराः ॥ ४० ॥

४०. हिमांशुश्चन्द्रस्तावदानन्दी जगतामाह्लादयिता । तथा हेमाद्रिर्मेरुस्तावदुन्नत उच्चो[1] यावदत्र पुरे नराः सज्जना नेक्ष्यन्ते । किंभूताः । वाग्घ्लादिनो वाचा सत्यमितमधुरया वाण्या ह्लादिनः सकलपृथ्व्या[2] आनन्दनशीलाः[3] । तथा विष्वग्हिता विष्वक् समंततः सर्वैः प्रकारैः सर्वेषु[4] च हिता अनुकूलाः । एतेनोन्नतमनस्कत्वसूचा । उन्नताशया हि विष्वग्हिताः स्युः । तुच्छाशयास्तु कदाचित्कार्यवशेन हिताः कदाचिन्नेति । वाग्घ्लादिविष्वग्घितानामत्रत्यजनानां दर्शने सुधांशुमेरू आनन्दकोन्नतावपि न किंचित्प्रतिभासेते इत्यर्थः ॥

यशःकृतककुब्भासैर्द्विड्डुतिप्रथितैर्नृपैः ।
ककुब्हस्तिबलैरत्र तुराषाड्ढ्रियमश्नुते ॥ ४१ ॥

४१. अत्र पुरे नृपैर्वनराजादिभिर्हेतुभिस्तुराषाडिन्द्रो ह्रियमश्नुते लज्जते । कीदृशैः । ककुब्हस्तिबलैः । दिग्गजपराक्रमैरत एव द्विड्डुतिप्रथितैः । द्विषां शत्रूणां हत्या[5] हननेन सर्वत्र विख्यातैरत एव च यशसा कीर्त्या कृतः ककुभां दिशां हासो लक्षणयोद्योतो यैस्तैः । अत्रत्यनृपान्[6] मनुष्यानपि बलादिना स्वस्मादधिकान् दृष्ट्वेन्द्रो लज्जत इत्यर्थः ॥

अनञ्ज्ञलिव सोञ्हलभ्यां धर्मार्थाभ्यां युतो जनः ।
निरीक्ष्यतेत्र निष्पापं चेष्टयन् हितकाम्यया ॥ ४२ ॥

४२. अत्र पुरे स सर्वत्र प्रसिद्धो जनो लोको हितकाम्ययैहिकपा-

---

१ एफ् उच्चैस्तरो या°. २ सी डी °पृथिव्यां आ°. ३ सी °न्दशी°. ४ एफ् °षु हिताश्चानु°. ५ एफ् हन°. ६ बी °त्र नृ°.

रत्रिकश्रेयइच्छया निष्पापं निरवद्यं वस्तु चेष्टयन् व्यवहरन्सन्धर्मार्था-भ्यां धर्मधनाभ्यां युतो निरीक्ष्यते । भवतो हि निष्पापव्यापारिणां धर्मार्थाविति । पाणिन्यादयो[1] हि केचित् स्वरव्यञ्जनयोरच्[2]हल्संज्ञां कुर्वन्ति । ततो यथानच् स्वररहितो हल् व्यञ्जनम् अच्हल्भ्यां स्वरव्य-ञ्जनाभ्यां युतो निरीक्ष्यते । अस्वरं हि व्यञ्जनं पुरःस्थिताभ्यां स्वर-व्यञ्जनाभ्यां युतं स्यात् ॥

वाग्ध्लादिनः विष्वग्हिताः । अनज्झल् अज्हल्भ्याम् । द्विड्ढति तुराषाड्ढियम् । तावद्धिमांशुः तावद्हेमाद्रिः । ककुब्भासैः ककुब्हस्ति । इत्यत्र "ततो हश्च-तुर्थः" [३] इति वा चतुर्थः ॥ तत इति किम् । चेष्टयन् हित ॥

वाक्छूरान्वीक्ष्य सोप्यस्मिन्वाक्पतिः स्यादवाक्शिराः ।
राज्ञां यशोभिस्तच्छ्वेतं यच्श्वेतं न कदाप्यभूत् ॥ ४३ ॥

४३. अस्मिन्पुरे वाक्छूरान् वाचा सुभटान्महावादिनो वीक्ष्य स वाक्पतित्वेन सर्वत्र प्रसिद्धो वाक्पतिरपि[3] बृहस्पतिरप्यवाक्शिरा लज्जया नीचैर्मूर्धा स्यात् । संभावनेत्र सप्तमी । अत्रत्यविदुषां वाक्पतेरप्य-तिमात्रं वाग्मित्वादिदमहं संभावयामीत्यर्थः । तथा यद्वस्तु कज्जलव्यो-मादि[4] सदा कृष्णत्वेन कदापि श्वेतं शुभ्रं नाभूत्तदप्यत्र राज्ञां वनगा-जादीनां यशोभिरतिबाहुल्याच् श्वेतमभूत् । कविरूढ्या हि यशः श्वेतं वर्ण्यते ॥

वषट्श्रौषट् शान्तिकृतां वाक् श्च्योतति सुधामिह ।
अप्छायिदेवो[1] नाज्ञायी पश्यञ् श्रियमिहागताम् ॥ ४४ ॥

४४. इह पुरे शान्तिकृतां नगरादिक्षुद्रोपद्रवमार्याद्युपशान्ति[5]विधा-

१ एफ् °प्छायी दे°.

१ बी °यो के°. २ बी सी °च्अल्°. ३ सी डी °रप्य°. ४ एफ् °वि महाक्र°. ५ सी डी °न्तिध्यायि°.

यिनां द्विजानाम् । वषट्श्रौषट्शब्दावव्यये मन्त्राक्षरे इन्द्राहुतौ वर्तेते । शान्तिकर्मार्थाग्निकारिकादिविधानकाले वषट्श्रौषड्रूपा वाक् वाणी सुधामिव सुधां श्च्योतति स्रवति । मार्याद्युपद्रवोच्छेदकत्वेनात्याह्लादकत्वात् । एतेनास्य पुरस्य निरुपद्रवत्वमुक्तम् । तथा श्रियं लक्ष्मीदेवीमिह पुर आगतां पश्यन् सन्नप्सु जलेषु शेत इत्येवंशीलोप्छायी स चासौ देवश्चाप्छायिदेवोब्धिशयनः श्रीपतिर्नाप्शायी नाब्धिशयनः संभाव्यते । प्रस्तावादत्र संभाव्यत इत्यध्याहार्यम् । श्रियोत्रागमनात्समुद्रे तद्वियोगे निद्राया अभावाच्छ्रीपतिरप्यत्रागत इति संभाव्यत इत्यर्थः ॥

वाक्छूरान् अवाक्शिराः । तच्छ्वेतम् यच्श्वेतम् । वषट्छ्रौषट् श्रौषट् शान्ति । अप्छायि अप्शायी । इत्यत्र "प्रथमाद्°" [४] इत्यादिना वा छः ॥ प्रथमादिति किम् । पश्यञ् श्रियम् ॥ अघुटीति किम् । वाक् श्च्योतति ॥

अस्यान्तक्कृतिभिक्कल्यैख्खजैत्रैःफलदैःपरम् ।
धर्मः प्रीतः कलिः खिन्नः फलितः सन्मनोरथः ॥ ४५ ॥

४५. अस्य पुरस्यान्तर्मध्ये कल्यैर्दानशीलतपःस्वाध्यायादिभिर्धर्मक्रियाभिः कृत्वा परमतिशयेन धर्मः प्रीतः प्रहृष्टः । विजृम्भित इत्यर्थः । अत एव कलिः पापयुगं खिन्नः संतप्तः । अत एव च सन्मनोरथः सतां साधूनां मनोवाञ्छा फलितः सिद्धः । किंभूतैः सद्भिः । खजैत्रैर्जेतार एव प्रज्ञाद्यणि [७.२.१६४.] जैत्राः । खानामिन्द्रियाणां जैत्रा वशीकारिणस्तैः । अत एव पुण्यहेतुत्वेन कृतं पुण्यमस्त्येषु तैः कृतिभिः । अत एव फलं स्वर्गापवर्गादिकं ददति ये तैः फलदैः ॥

कृतिभिक्कल्यैः । अन्तक्कृतिभिः । कल्यैख्खजैत्रैः । फलदैःपरम् । खजैत्रैःफलदैः ।

---

१ एफ् °नां व°. २ बी °रूपवा°. ३ सी डी एफ् °ति श्रव°. ४ सी °नां वा°. ५ एफ् °जैत्रा व°. ६ डी °दैः । अन्त°. ७ डी °म् । इत्य°.

इत्यत्र "रः कखं०" [५] इत्यादिना ᳲकᳲपौ वा ॥ पक्षे । प्रीतः कलिः । कलिः खिन्नः । धर्मः प्रीतः । खिन्नः फलितः ॥

स्वयंभूश्श्रीपतिः शंभुस्सूर्यः सोमष्षडाननः ।
नृपैः षट्चक्रभृत्तुल्यैरस्यान्तस्स्थापिताः सुराः ॥ ४६ ॥

४६. नृपैर्वनराजादिभिर्महाधार्मिकत्वादस्य पुरस्यान्तर्मध्ये धर्मार्थकारितनव्यप्रासादेषु स्वयंभूर्भगवानर्हन् ब्रह्मा च । श्रीपतिर्विष्णुः । शंभुर्हरः । सोमश्चन्द्रः । सूर्यो रविः । षडाननः स्कन्दश्च । एते सुरा देवाः स्थापिताः । किंभूतैः । षण्णां चक्रभृतां मांधातृ(१)धुन्धुमार(२)हरिश्चन्द्र(३)पुरूरवो(४)भरत(५)कार्तवीर्या(६)ख्यानां समाहारः षट्चक्रभृत् । बलसैन्यादिना तेन तुल्यैः ॥

स्वयंभूश्श्रीपतिः । सोमष्षडाननः । शंभुस्सूर्यः । अन्तस्स्थापिताः । इत्यत्र "शषसे शषसं वा" [६] इति वा शषसाः ॥ पक्षे । श्रीपतिः शंभुः । नृपैः षट् । सूर्यः सोमः ॥

निस्तन्द्रैश्चञ्चलैश्छेकैष्टीकमानैष्ठकारिभिः ।
तैस्तैस्थट्टैरिहाश्वानां रसति व्यथितेव भूः ॥ ४७ ॥

४७. इह पुरेऽश्वानां तैस्तैः । अनेकैरित्यर्थः । थट्टैः समूहैः कृत्वा भू रसति शब्दायते । कीदृशैः । निस्तन्द्रैर्निरालस्यैस्तेजस्विभिरित्यर्थः । चञ्चलैर्जात्यहयस्वभावेन चपलैः । छेकैः सुशिक्षितत्वेन गतिपञ्चककरणदक्षैरत एव टीकमानैर्बाह्यालिकादौ वल्गद्भिरत एव च ठकाराकारखुरैर्भूम्या हननेन ठं ठंकारं भूपृष्ठे कुर्वन्तीत्येवंशीला ये तैष्ठकारिभिः । उत्प्रेक्ष्यते । व्यथितेव पीडितेव । अन्योपि हि व्यथावान् रटति । भुवश्च

१ एफ् °खपफ इ°. २ सी °रिनव्याप्रा°. ३ डी °भृतानां मां°. ४ बी एफ् °कैस्थट्टैः. ५ ए सी °र्थः । स्थट्टैः. ६ सी डी °न ठ°. ७ सी डी °त्प्रेक्षते.

पीडासंभावनाश्वखुराघातात् । तैस्तैरित्यत्र वीप्सायां द्विरुक्तिः । वीप्सा चात्र थट्टगतबहुत्वगुणेनैव ॥

निस्तन्द्रैश्चञ्चलैश्छेकैष्टीकमानैष्टकारिभिः । तैस्तैः । निस्तन्द्रैः । तैस्थट्टैः । इत्यत्र "चटते°"[1] [७] इत्यादिना शषसाः ॥

गायंस्तारं वहंश्छायां व्रजंश्चारु वधूजनः ।
दृश्यतेऽस्मिष्ठको यूनां कुर्वंष्टलतमं मनः ॥ ४८ ॥

४८. अस्मिन्पुरे वधूजनो यूनामेव ठकश्छलेक[2] इव दृश्यते । कीदृक् सन् । तारं तारस्वरं यथा स्यादेवं गायन् विप्रलम्भादिप्रधानगीतीरुच्चारयंश्छायां रूपलावण्यकान्तिवेषादिकृतशोभां वहन् धारयंश्चारु सलीलं व्रजन्नत एव यूनां तरुणानां मनश्चित्तं टलैति[3] विक्लवीभवति अचि प्रकृष्टे तमपि च टलतमं स्मरातिरेकादतिशयेन निःसत्त्वं कुर्वन् । ठकोपि हि ठकतागोपनार्थं लोकच्छलनार्थं च तारं गायति छायां शिष्टजनोचितां वेषादिशोभां वहति चारु शिष्टजनोचितं गच्छति ततश्चूर्णक्षेपादिना लोकानां मनो विक्लवीकरोतीति[4] ॥

जानंस्थूत्कसमान्प्राणाँश्चरँष्टङ्कारिकार्मुकः ।
पराँश्छ्यन् भटलोकोस्मिँस्त्रायकः शरणार्थिनाम् ॥ ४९ ॥

४९. अस्मिन्पुरे भटलोकः शरणार्थिनां[5] प्राणैषिणां त्रायको रक्षकोस्ति[6] । एतेनात्रत्यलोकस्य निर्भयत्वोक्तिः । कीदृक् । चरन् गच्छन् । तथा प्राणांस्थूत्कसमान् थूत्कृततुल्यान् थूत्कृतवत्स्वाम्यादिकार्ये परित्याज्याञ्जानन् । एतेन सात्त्विकत्वोक्तिः[7] । तथा टं करोतीत्येवंशीलं टंकारि

१ एफ् °ते सद्वितीये' इति श°. २ सी एफ् °ल इ°. ३ एफ् °लयति. ४ सी डी एफ् °रोति ॥. ५ डी °नां त्रा°. ६ सी डी रक्षाकारको°. ७ एफ् °त्विकोक्तिः ।.

कार्मुकं धनुर्यस्य स निरन्तरं धनुरास्फालयन्नित्यर्थः। एतेन धनुर्विद्याकौशलोक्तिः। तथा परान् शत्रूंश्छ्यन् विनाशयन्। एतेन बलिष्ठत्वोक्तिः॥

अङ्गान्यस्मिँस्थुडँष्ठाभकुचो भाति वधूजनः।
प्रशाश्वरन् त्सरुकोपि कोपि नैवात्र दारुणः॥ ५० ॥

५०. अस्मिन्पुरे ठाभौ ठकारवद्वृत्तौ कुचौ स्तनौ यस्य स वधूजनः कुलाङ्गनालोकोङ्गानि स्तनादीनवयवांस्थुडन्नुत्तरीयादिना संवृण्वन्[१] सन् भाति। कुलाङ्गनानां हि सर्वाङ्गोपाङ्गसंगोपनं शोभातिशयहेतुः। तथात्र[२] त्सरौ खड्गादिमुष्टौ कुशलः "कुशले" [६. ३. ९५.] इति के त्सरुकोपि खड्गादि[३]शस्त्रभृद्भटलोकोपि। आस्तां वणिगादिरित्यपेरर्थः[४]। प्रशानुपशान्तः[५] संश्वरन्नस्ति[६]। विचरतीत्यर्थः। अतश्चात्र कोपि नैव दारुणो रौद्रः। एतेनात्र राजाज्ञाया अतिसौष्ठवमुक्तम्[७]॥

व्रजंश्चारु। प्राणाँश्चरन्। वहंश्छायाम्। पराँश्छ्यन्। कुर्वंष्टल। चरँष्टङ्कारि। अस्मिंष्ठकः। स्थुडँष्ठाभ। गायंस्तारम्। अस्मिँस्थायकः। जानंस्थूत्क। अस्मिँस्थुडन्। इत्यत्र "नोप्रशान°" [८] इत्यादिना शषसा अनुस्वारानुनासिकौ च पूर्वस्य॥ अप्रशान इति किम्। प्रशाश्चरन्। अधुट्पर इति किम्। चरन् त्सरुकः॥

पुंस्कामा अप्यपुंश्चल्य इह पुँस्कोकिलस्वनाः।
अपुंश्छन्नैरपुंस्खेटैः पुंश्छेकैर्भान्ति भर्तृभिः॥ ५१ ॥

५१. इह पुरे स्त्रियो भर्तृभिः सह भान्ति। कीदृश्यः। कोकिलः परपुष्टः। पुमांश्चासौ कोकिलश्च पुंस्कोकिलस्तस्येव स्वनः स्वरो यासां

---

१ एफ् °न् भा°. २ एफ् °था त्स°. ३ सी डी °खड्गश°. ४ डी °त्यर्थः।. ५ ए एफ् °शान्नुप°. ६ सी डी संचर°. ७ सी डी °वत्वमु°. ८ सी डी °शानो इ°. एफ् °शाने इ°.

तास्तथा पुंस्कामा अप्यपुंश्चल्यः । पुमांसं कामयन्ते पुंस्कामाः । पुमांसं चलयन्ति पुंश्चल्यः कुलटाः । न तथापुंश्चल्यः सत्यः । अपिर्विरोधे । पुंमात्रकामनविवक्षया विरोधः । अविरोधस्तु स्वपतेरेव कामनविवक्षया । अत एवापुंश्चल्यः । किंभूतैर्भर्तृभिः । पुंश्छेकैः पुरुषेषु विदग्धैः । तथापुंस्खेटैः । खेटा अधमाः । पुमांसो ये खेटाः पुंस्खेटाः । न तथापुंस्खेटास्तैः । परदारसेवादिनिन्द्यकर्मरहितैरित्यर्थः । अतएवापुंश्छन्नैः न पुंसान्येन पुरुषेणाच्छादितैः । विद्वत्तया सदाचारतया च सर्वपुरुषेषु मुख्यैरित्यर्थः । भवति ह्युत्तमगुणानां दंपतीनां संबन्धः शोभातिशयहेतुः ॥

न पुंष्टिट्टिभपुँश्चौरा न च पुँस्खलपुंष्ठकाः ।
न पुंस्फल्गुर्न पुँस्फेरुर्न पुंस्पशुरिह कचित् ॥ ५२ ॥

५२. टिट्टिभा उत्पादशयनाः पक्षिभेदाः । पुमांसष्टिट्टिभा इवोद्धतत्वात् पुंष्टिट्टिभाः । तथा पुमांसश्च ते चौराश्च पुंश्चौराः । द्वन्द्वे । पुंष्टिट्टिभपुंश्चौराः । इह पुरे कस्मिंश्चित्कस्मिन्नपि स्थाने न सन्तीति संटङ्कः । एवं सर्वत्रास्तिक्रिया नञा सह योज्या । खला दुर्जनाः । पुमांसश्च ते खलाश्च पुंस्खलाः । एवं पुंष्ठकाः पुंश्छलकाः । ततो द्वन्द्वः । तथा पुंसु फल्गुः पुमर्थविकलत्वेन निष्फलः पुंस्फल्गुः । तथा पुमान् फेरुरिव भीरुत्वात् शृगाल इव पुंस्फेरुः । तथा पुमान् पशुरिव मूर्खत्वात् पुंस्पशुः ॥

पुँस्प्रष्ठैः पुंस्तमैः पुँस्त्वपुंख्यातैः सह सौहृदम् ।
पुँष्ठकुराः सपुंस्थट्टाः पुंगवा अत्र कुर्वते ॥ ५३ ॥

---

१ बी सी डी °ष्ठैः पुंस्त्वपुंख्यातैः पुंस्तमैः स°.

---

१ ए पुंमान्काम°. बी पुंसोत्र. २ ए बी °टा पुं°. सी °टा न°. ३ बी °या स°. ४ एफ् °त्रापि क्रि°. ५ सी डी °श्च ए°. ६ सी° कास्ततो°. ७ ए सी डी एफ् पुंस्सु फ°. ८ डी एफ् निःफलः.

५३. अत्र पुरे पुमांसो गाव इव पुंगवा नरश्रेष्ठाः पुंस्तमैः श्रेष्ठपुरुषैः सह सौहृदं मैत्रीं कुर्वते । किंभूतैः । पुंस्त्वपुंख्यातैः । पुंस्त्वेन पुरुषकारेण शौर्येण पुंसु ख्यातैः प्रसिद्धैः । अत एव पुंस्प्रष्ठैः पुरुषेष्वग्रेसरैः । पुंगवा अपि किंभूताः । पुंष्ठकुराः । नृणां स्वामिनः अत एव सपुंस्थट्टाः पुरुषौघावृताः । एतेनात्रत्यजना गुणिनो गुणानुरागिणश्चेत्युक्तम् ॥

पुंशूरा अत्र पुँष्टक्काः परपुंस्थुंक्कृतासहाः ।
अपुंक्षुद्राः प्रकुर्वन्ति सेवां चौलुक्यभूभुजाम् ॥ ५४ ॥

५४. अत्र पुरे पुंष्टक्काः पुमांसः पौरुषोपेता ये टक्काः क्षत्रियजातिभेदास्ते चौलुक्यभूभुजां मूलराजादीनां सेवां प्रकुर्वन्ति । कीदृशाः । पुंशूराः पुंसु पौरुषोपेतेषु भटेषु शूराः । अत एव परे शत्रवो ये पुमांसस्तेषां यत् थुंक्कृतं न्यक्काराय मुखविकृतिपूर्वं शब्दविशेषस्तस्याप्यसहा अक्षमाः । तथा क्षुद्राः क्लिष्टचेतस्का द्रोहाद्यभिप्रायेण । पुमांसश्च ते क्षुद्राश्च पुंक्षुद्रा न तथापुंक्षुद्राः ॥

पुंस्कामाः । पुँस्कोकिल । अपुंस्खेटैः । पुँस्खल । अपुंश्चल्यः । पुँश्चौराः । अपुंश्छवैः । पुँश्छेकैः । पुंष्टिट्टिभ । पुँष्टक्काः । पुंष्ठैकाः । पुँष्ठकुराः । पुंस्तमैः । पुँस्त्व । पुंस्थट्टाः । पुँस्थुक्कृत । पुंस्पशुः । पुँस्प्रष्ठैः । पुँस्फल्गुः । पुंस्फेरुः । इत्यत्र "पुमोशिटि°" [९] इत्यादिना रोन्तादेशोनुस्वारानुनासिकौ च पूर्वस्य ॥ अशिटीति किम् । पुंशूराः । अघोष इति किम् । पुंगवाः । अधुट्पर इत्येव । अपुंक्षुद्राः । अख्यागीति किम् । पुंख्यातैः ॥

१ डी °स्थुत्कृता°. एफ् °स्थूत्कृता°.

१ एफ् °गावः पुं°. २ ए सी डी एफ् पुंस्सु ख्या°. ३ सी डी °वापि. ४ सी डी °गुणा°. ५ ए सी डी एफ् पुंस्सु पौ°. ६ डी एफ् थूत्कृतं. ७ ए °छक्काः ।. ८ एफ् °स्त्वसपुं°. ९ सी एफ् °स्थुत्कृत. डी °स्थूत्कृतम्.

नॄंऽप्रीणन् किं हरिश्चन्द्रो नॄँऽपाता किं पुरूरवाः।
नॄन्पुष्यन्[1] किमु मांधतेत्यत्र तर्क्येत भूपतिः ॥ ५५ ॥

५५. अत्र पुरे भूपतिर्नॄन्प्रजाः प्रीणन् मधुरवचनादिदानेन सुख-यन् सन् किमयं हरिश्चन्द्रस्तृतीयचक्री। हरिश्चन्द्रेण हि प्रजा अत्यन्तं[1] प्रीणिताः। इत्येवं प्रकारेण[2] तर्क्येत संभाव्यते। जनैरिति संबन्धः। अग्रेप्येवं योजना कार्या[3]। पाता चौरादिभ्यो रक्षन् पुरूरवाश्चतुर्थचक्री। पुष्यन् इत्यत्र पुषिरन्तर्भूतणिगर्थः सकर्मकः। दानसन्मानादिना पोषय-न्नित्यर्थः। मांधाता आद्यचक्री ॥

नॄंऽप्रीणन् नॄँऽपाता। इत्यत्र "नॄनः पेषु वा" [१०] इति रोन्तादेशो वानुस्वा-रानुनासिकौ च पूर्वस्य ॥ पक्षे। नॄन्पुष्यन् ॥

कांस्कान् रथान्भटान् काँस्कानश्वान् कान् कानिभानिह।
न पश्यति सहस्राक्षो दृक्सहस्रं कृतार्थयन् ॥ ५६ ॥

५६. सहस्राक्ष इन्द्रो दृक्सहस्रं[4] लोचनसहस्रं कृतार्थयन् कृतार्थमा-चक्षाणः सन्निह पुरे कांस्कान् रथान् कांस्कान् भटान् पत्तीन्[5] कान-श्वान् कानिभांश्च न पश्यति किं तु सर्वानपि[6] गजादीन्। सर्वोत्कृष्टगुणै-र्निरुपमत्वेनादृष्टपूर्वदर्शनात्स्वमक्षिसहस्रं सफलं मन्यमानः सहस्राक्षः सैतर्ष[7] पश्यतीत्यर्थः। एतेनात्र चतुरङ्गबलसंपद्विशेष उक्तः ॥

कांस्कान्। काँस्कान्। इत्यत्र "द्विः कानः कानि सः" [११] इति सोन्तादे-शोनुस्वारानुनासिकौ च पूर्वस्य ॥ द्विरिति किम्। कान्कान् ॥

---

१ एफ् °न् किं मां°.

---

१ एफ् °न्तं प्रणताः. २ एफ् °ण वितर्क्यते सं°. ३ एफ् °र्या एताश्चौरा°. ४ डी °स्रं कृ°. ५ एफ् °न् कांस्कान°. ६ एफ् °पि राजा°. ७ एफ् सहर्षं.

रत्नसंकरसंस्कारि त्वष्टा पश्येदिदं यदि ।
संस्कर्तुं स्वःपुरीं कं कमुपस्कारं न चिन्तयेत् ॥ ५७ ॥

५७. रत्नानां नानाजातीयानां मणीनां संकरो मेलकस्तेन संस्कारः शोभातिशयो विद्यते यत्र तद्रत्नसंकरसंस्कारीदं पुरं त्वष्टा देववर्धकिर्यदि पश्येत्तदा स्वःपुरीममरावतीं संस्कर्तुं विशेष्टुं कं कमुपस्कारं प्रयत्नं न चिन्तयेत् । किं तु येन येन प्रयत्नेन स्वःपुर्येतत्पुरसदृशी स्यात्तं तं सर्वमपि परिभावयेदित्यर्थः । एतेनास्य स्वःपुरीसकाशादप्यधिकं रम्यत्वमुक्तम् ॥

न यथा कोपि सस्कर्ता संचस्कार यथा न च ।
अरोचकी गुणेष्वत्र सँस्कर्तुं यतते तथा ॥ ५८ ॥

५८. अत्र पुरे न रोचते धान्यं क्षुधोभावादस्मिन् "नाम्नि पुंसि च" [५.३.१२२.] इति णके अरोचको बुभुक्षाया अभावः सोस्त्यस्य "प्राणिस्थाद्°" [७.२.६०] इत्यादिना स्वाभिस्वादिनि अरोचकी नरो गुणेषु व्यञ्जनेषु विषये संस्कर्तुं हिङ्गुकर्पूरादिक्षेपेण तथा तेन प्रकारेण यतते प्रवर्तते यथा कोपि पुमान् न संस्कर्ता न संस्करिष्यति यथा कोपि न च नैव संचस्कार संस्कृतवान् ॥

संस्कारि। संँस्कर्तुम् । इत्यत्र "स्सटि समः" [१२] इति सोन्तादेशोनुस्वारानुनासिकौ च पूर्वस्य ॥ स्सटीति किम् । संकर । कृत् विक्षेपे । संकरणं संकरोत् । कृगोभावान्नात्र स्सट् ॥ संचस्कार । इत्यत्र तु व्यवधानान्न भवति । सम इति किम् । उपस्कारम् ॥

---

१ ए °नां सं°. २ सी डी एफ् °संस्कारी°. ३ ए °न प्र° सी डी °न स्वः°. ४ एफ् °क्षुधाभा°. ५ एफ् नास्तिम्नि. ६ डी °वस्तस्य. ७ डी °ते व°. एफ् °ते र्य°. ८ ए एफ् °र्ता सं°. ९ सी एफ् संस्कारि. १० ए सी सँस्कर्तुम्.

सस्कर्ता । इत्यत्र "लुक्" [१३] इति लुगन्तादेशः । पृथग्योगादनुस्वारानुनासिकौ च पूर्वस्येति निवृत्तमिति तौ न भवतः ॥ केचित्त्वत्राप्यनुनासिकमिच्छन्ति । सँस्कर्तुम् ॥

चतुरं चंचलत्यश्वा मंदं दंद्रमति द्विपाः ।
रम्यश्चंक्रम्यते स्त्रैणं सर्वोस्मिन्पंफुलद्गुणः ॥ ५९ ॥

५९. अस्मिन्पुरे चतुरं धौरितकादिगतिबन्धुरं[1] यथा स्यादेवमश्वाश्चंचलति कुटिलं चलन्ति । वल्गन्तीत्यर्थः । यङ्लुबन्तः । तथा द्विपा गजा मन्दं सलीलं यथा स्यादेवं दंद्रमति कुटिलं गच्छन्ति । तथा स्त्रैणं स्त्रीसमूहो रम्यं सलीलेमन्थरं[2] यथा स्यादेवं चंक्रम्यते कुटिलं गच्छन्ति । एवं च न केवलमश्वादीनामुत्कृष्टगुणत्वं[3] किं त्वस्मिन् सर्वोपि घटपटादिः[4] पदार्थः पंफुलतोतिशयेन[5] फलन्तोतिविलसन्तो[6] गुणाः सौन्दर्यादयो यस्य स पंफुलद्गुणोस्ति[7] । सर्वमप्यत्र वस्तु गुणोत्कृष्टमित्यर्थः ॥

दूरन्दन्द्रमितच्छायान् सदा पंम्फुलितांस्तरून्[1] ।
खचङ्क्रमणकन्याश्च चञ्चूर्यन्तेत्र कौतुकात् ॥ ६० ॥

६०. ख आकाशे कुटिलं क्रामन्तीत्येवंशीला[8] "द्रमक्रम°" [५.२.४६] इत्यादिनाने खचङ्क्रमणा विद्याधरादयस्तेषां कन्या बालिका अत्र पुरे वर्तमानांस्तरूनुपवनद्रुमान् कौतुकाच्चञ्चूर्यन्ते मास्मान् जनश्चौर्य इत्यपवादी-

१ ए सी डी °पम्फलि°.

१ ए बी सी डी धौरतिका°. २ सी डी एफ् °लीलं म°. ३ एफ् °णवत्त्वं. ४ सी डी एफ् °दिप°. ५ ए पंफल°. सी डी पुंफल°. ६ सी डी °तिवि°. ७ एफ् पंफल°. सी डी पुंफल°. ८ बी डी °मतीले°. ९ बी सी °ला ग्रुचंक्र°.

दिति प्रच्छन्नगत्या गर्हितं विचरन्ति । यतो दूरमनिकटं यथा स्यादेवमत्युन्नतत्वात् दन्द्रमिता कुटिलं गता छाया येषां तांस्तथा वनाधिष्ठायकदैवतविशेषप्रभावात्सदा पम्फुलितानत्यर्थं फलितान्[2] । एतेनात्रत्यतरूणां छायाफलादिना स्वर्वृक्षेभ्योऽप्यत्युत्कृष्टतोक्ता[3] ॥

रंरम्यन्ते जना गोभिरभ्रंलिहवहल्लिहैः[10] ।
प्रीयन्ते काम्यतपसः संयताः सय्यँतैरिह ॥ ६१ ॥

६१. इह पुरे जना लोका अभ्रं मेघं लिहन्ति स्थूलोन्नतत्वात्स्पृशन्त्यभ्रंलिहा ये वहं ककुदं लिहन्ति जातिस्वभावाज्जिह्वया स्पृशन्ति वहल्लिहास्तैर्गोभिर्वृषभैः कृत्वा रंरम्यन्ते वाहादिना होडापातनेन[4] परस्परमत्यर्थं क्रीडन्ति । एतेन जनानामतिसुखितत्वोक्तिः । तथेह काम्यमभिलषणीयं तपो यैस्ते संयताः[5] सुविहितमुनयः सय्यँतैः[6] सुविहितसाधुभिः सह प्रीयन्ते एकधर्मस्नेहेन स्निह्यन्ति । एतेनात्र सुविहितानां सुविहितैः सह श्राद्धभक्तादिना[7] न विरोध इत्युक्तम् ॥

चंक्रम्यते चङ्क्रमण । चंचलति चञ्चूर्यन्ते । दंद्रमति दन्द्रमित । पंफुलत्[8] पम्फुलितान्[9] । चतुरं चंचलति रम्यश्चंक्रम्यते । मंदं दंद्रमति दूरन्दंद्रमित । संयताः सय्यँतैः । अभ्रंलिहवहल्लिहैः । इत्यत्र "तौ मुम०" [१४] इत्यादिना म्वागमस्य पदान्ते वर्तमानस्य च मस्य स्वावनुस्वारानुनासिकौ वर्णौ पर्यायेण । पदान्त इत्येव । काम्य । स्वाविति किम् । रंरम्यते । क्षौणं सर्वः ।

१ ए सी डी पम्फलि°. २ एफ् °तान् ए°. ३ एफ् °भ्योप्युत्क°. ४ एफ् होडपा°. ५ ए सी संयुताः. ६ ए सी संयतैः. ७ एफ् °भक्तयादि°. ८ ए सी डी पम्फल°. ९ ए सी डी पम्फलि°. १० ए °यतैः सं°.

अत्र मन्दं झलत्स्त्रैणम्झालयेत्कस्य नो मनः।
स्वैरं हलत्करिकुलं ह्वालयत्यवनीमपि ॥ ६२ ॥

६२. अत्र पुरे मन्दं मन्थरं झलद्गच्छत् स्त्रैणं स्त्रीसमूहः कस्य वशिनोपि मनो नो झालयेत् सोत्कण्ठं न कुर्यात् । किं तु सर्वस्यापि । तथापिर्भिन्नक्रमे स्वैरमित्यस्माज् ज्ञेयः । स्वैरमपि स्वेच्छयापि मन्दमपीत्यर्थः । ह्वलद्गच्छत्करिकुलं हस्तिवृन्दमवनिं भूमिं ह्वालयति गिरिवन्महत्तमत्वात्कम्पयति । यद्वा । अपिर्यथास्थान एव योज्यः । आस्तां तावद्यज्जनादि कम्पयति यावत्तावनीमपि । अवनी ह्यचलत्वेन प्रसिद्धा । अत्र च स्त्रैणहास्तिकयोः समानधर्म्योक्त्योपमानोपमेयता व्यज्यते । यथात्र हास्तिकं स्वैरं चलदवनीमपि चालयति तथा मन्थरं चलत्स्त्रैणं वशिनामपि मन इति ॥

अभ्यागतानां निर्मातुं हर्त्तिं ह्लादितमानसः ।
असंह्नुवान आत्मानन्ह्नुतेर्थं नात्र कश्चन ॥ ६३ ॥

६३. अत्र पुरेभ्यागतानामतिथीनां ह्लत्तिं पाद्यभोजनवस्त्राद्यातिथ्यसंपादनेनानन्दं निर्मातुं कर्तुं कश्चन कोप्यर्थं द्रव्यं न ह्नुते सांप्रतं व्यवहारेषु लाभो नास्ति प्रत्युत हानिरेवेत्यतः क्व द्रव्यमिति प्रकारेण न गोपायति । किं तु तदर्थे सर्वस्वं व्ययतीत्यर्थः । कीदृक् सन् । ह्लादितं धार्मिकोदारत्वादतिथिं दृष्ट्वा प्रमोदितं मानसं चित्तं येन स तथा । अत एवासंह्नुवानोतिथिदृष्टिवञ्चनेनातिरोधानः ॥

१ डी °त्स्त्रैणं झल°.

१ सी डी °वदव°. २ बी सी डी धर्मोक्त्यो° ३ ए °ता व्यंज्य°. ४ एफ् °शिनां म°. ५ एफ् °ताम°. ६ सी डी °त्ति खाद्य°. ७ एफ् °यते ।.

पदार्थं ह्यस्तनय्ँह्यद्यापश्यँल्लोको निषेवते ।
अत्र त्रैलोक्यसम्राजं हरिपूज्यं ज्वलद्द्युतिम् ॥ ६४ ॥

६४. अत्र पुरे पदार्थं यौवनसंपदादिकं ह्यस्तनं कल्ये भवमद्य वर्तमानेह्न्यपश्यन् सन् लोकस्त्रैलोक्यसम्राजं त्रिजगत्स्वामिनं श्रीमदर्हन्तं निषेवतेनित्यरूपं संसारं भावयंस्तदुच्छेदायाराधयति । किंभूतम् । हरिपूज्यं शक्राच्र्यं ज्वलद्द्युतिं स्फुरत्कान्तिम् । योपि लोको ह्यस्तनं पदार्थं धनादि चौराद्यपहृतत्वेनाद्यापश्यन् स्यात्स तत्प्राप्त्यर्थं ज्वलद्द्युतिं स्फुरत्तेजसमत एव हरिपूज्यं विष्णुमिवाच्र्यं त्रैलोक्यसम्राजं महाराजं निषेवत इत्युक्तिः ॥

मन्दं ह्मलत् । क्षौणम्ह्मालयेत् । असंह्नुवानः । आत्मानन्ह्नुते । पदार्थं ह्यस्तनम् । ह्यस्तनय्ँह्यद्य । स्वैरं ह्वलत् । कुलव्ँह्वालयति । निर्मातुं ह्रस्तिम् । ह्रस्तिल्ँह्लादित । इत्यत्र "मनयवे॰" [१५] इत्यादिनानुस्वारानुनासिकौ स्वौ पर्यायेर्णे ॥ मादिपर इति किम् । सम्राजं हरि ॥ ह इति किम् । पूज्यं ज्वलत् ॥

सम्राजम् । इत्यत्र "सम्राट्" [१६] इति मस्यानुस्वाराभावो निपात्यते ॥

प्राङ् शौर्यवृत्तौ प्राङ्छास्त्रे प्राङ्छमे प्राङ् समाधिषु ।
प्राङ् सत्ये प्राङ् षड्दर्शन्यां प्राङ् षडङ्ग्यामितो जनः ॥६५॥

६५. अस्मिन् "आद्यादिभ्यस्तस्" [७.२.८४.] इति तसि इतोस्मिन्पुरे जनः शौर्यवृत्तौ प्राङ् प्रथमोस्ति । एवमग्रेतना अपि प्राङ्शब्दा योज्याः । शास्त्रे कार्यकारणयोरभेदाच्छास्त्रशब्देन तत्परिज्ञानमुच्यते तत्र । एवं षड्दर्शनीषडङ्गीशब्दाभ्यामपि । शम इन्द्रियजये । समाधिषु

१ एफ् ॰क्यसाम्रा॰.

१ एफ् ॰म् सन् त॰. २ एफ् ॰नंय्ह्य ।. ३ एफ् ॰वलेत्या॰. ४ एफ् ॰ण मनयादि॰. ५ बी ॰द्दर्शनी॰.

चित्तैकाग्र्येषु। सत्ये सत्यवादे। षड्दर्शन्यां षण्णां दर्शनानां मतानां जैनादिशास्त्राणां समाहारे। षडङ्ग्यां षण्णामङ्गानां शिक्षाकल्पव्याकरणनिरुक्तिज्योतिषच्छन्दसां समाहारे। सर्वत्र विषयसप्तमी॥

स्मृतिगुण्ट् श्रुतिगुण्ट्शास्त्रगुण्शब्दगुण्ट् सुवण् सदा।
नक्षत्रगुण्ट् षाड्गुण्यगुणषट्तर्कज्ञोत्र को न हि॥ ६६॥

६६. अत्र पुरे सदा स्मृतीर्धर्मशास्त्राणि कण्ठस्थत्वाद्गुणयति क्विपि स्मृतिगुण् को नरो नास्ति किं तु सर्वोप्यस्ति। एवं सर्वैर्विशेषणैर्योजना कार्या। श्रुतीति। श्रुतिर्वेदः। शास्त्रेति शास्त्राणि। इदंश्लोकनिर्दिष्टस्मृत्यादिव्यतिरिक्तानि छन्दोलंकारनाटकादीनि। शब्देति शब्दशब्देन व्याकरणं नाममाला चोपलक्ष्यते। सुष्ठु वणति शब्दायते सुवण्। मधुरध्वनिरित्यर्थः। नक्षत्रेति नक्षत्रशब्देन नक्षत्रवाचकं ज्योतिःशास्त्रमुच्यते। तद्गुणयति नक्षत्रगण्। ज्योतिःशास्त्रविदित्यर्थः। षाड्गुण्येति। संधिविग्रहयानासनद्वैधीभावसंश्रयाख्याः षड्गुणाः स्वार्थे "भेषजादिभ्यष्ट्यण्" [७.२.१५५.] इति ट्यणि षाड्गुण्यं षाड्गुण्यप्रतिपादकं नीतिशास्त्रम्। षण्णां दर्शनानां तर्काः षट्तर्कास्तान् जानाति षट्तर्कज्ञः॥

पिकवत्पञ्चमकण्ठु षड्जरणत्सु शिखण्डिवत्।
क्रुञ्चिव मध्यमप्राङ्क्षु रज्येद्गायत्सु कोत्र न॥ ६७॥

६७. अत्र पुरे गायत्सु गायनेषु विषये को न रज्येत्को न रागं कुर्यात्। यतः किंभूतेषु। पिकवत्पञ्चमकण्ठु यथा पिकाः कोकिलाः पञ्चमस्वरं कणन्त्येवं पञ्चमं पञ्चमस्वरं कणत्सूच्चारयत्सु। तथा शिख-

१ सी °ञ्चमं क°. २ सी °ध्यमं प्रा°.

१ एफ् गुण्ट् को. २. बी °शब्दे°. ३ एफ् °वण्ट् म°. ४ डी °तिषशा°. ५ सी डी °भ्यष्ट्यण्. ६ सी डी °ति षा°. ७ सी डी °स्त्रमुच्यते ष°.

ष्विवन्मयूरेष्विव षड्जरणसु षड्जस्वरमुच्चारयत्सु । तथा क्रुञ्क्ष्विव सारसेष्विव मध्यमं मध्यमस्वरं प्राञ्चन्ति गच्छन्ति ये तेषु मध्यमप्राङ्क्षु । उक्तं च

षड्जं मयूरा ब्रुवते गावस्त्वृषभभाषिणः ।
अजाविकं तु गान्धारं क्रौञ्चः क्रणति मध्यमम् ॥ १ ॥
पुष्पसाधारणे काले पिकः कूजति पञ्चमम् ।
धैवतं ह्रेषते वाजी निषादं बृंहते गजः ॥ २ ॥

एतेन गायनानां सर्वस्वरकरणकौशलमुक्तम् ॥

प्राङ् शौर्ये । प्राङ्छाये । प्राङ् शमे । प्राङ् षड्दर्शन्याम् । प्राङ् षडक्ष्याम् । प्राङ् समाधिषु । प्राङ् सत्ये । स्मृतिगुण्ट् श्रुति । श्रुतिगुण्ट्छाक्ष । शाक्षगुण्शब्द । नक्षत्रगुण्ट् षाड्गुण्य । षाड्गुण्यगुण्षट् । शब्दगुण्ट् सुवण् । सुवण् सदा । क्रुङ्क्षु । प्राङ्क्षु । पञ्चमकण्ड्हु । षैड्जरण्सु । इत्यत्र "ङ्णोः कॅटौ०" [१७] इत्यादिना कटावन्तौ वा ॥ ङ्णोरिति किम् । गायत्सु ॥

अस्मिन्त्सम्राड्त्सुराष्ट्राराट्सिन्धुराट्त्सिन्धुरान्रणात् ।
क्ष्मास्वाराट् श्च्योतितकराञ्श्च्योतद्गण्डान्समानयत् ॥ ६८ ॥

६८. क्ष्मायां भुवि स्वाराडिव क्ष्मास्वाराट् राजादःश्लोकोक्तासाधारणविशेषणाद्भीमः सम्राट् सर्वनृपशासकः सन् रणाद्रणं विधाय "गम्ययपः"[२.२.७३.] इति पञ्चमी । सुराष्ट्राराट्सिन्धुराट्त्सिन्धुरान् सुराष्ट्रासिन्धू देशभेदौ । तत्स्वामिनोः सिन्धुरान् गजानस्मिन्पुरे समानयत् । किंभूतान् । श्च्योतिता मदं स्रोतुमारब्धाः कराः शुण्डा येषां तांस्तथा

१ ए °ट् श्चोति°.

१ ए °ड्व°. २ डी °जादिकं. ३ एफ् षड्र°. ४ डी कटावन्ताविल्या°. एफ् कटावन्तौ शिटीत्या°. ५ बी सी डी °राट् सु°. ६ डी मदैः श्च्योतु°.

श्च्योतद्गण्डान् मदक्षारिकपोलान् । भीमेन हि सुराष्ट्रेशसिन्धुराजौ रणे जित्वा तद्गजेन्द्राः पत्तन आनीताः ॥

सम्राट्स्सुराट्ट्रा । अस्मिन्त्सम्राट् । इत्यत्र "ङ्नः सः त्सोश्चः" [१८] इति सस्य त्सादेशो वा ॥ डकारनिर्देशाट्ट्वं न भवति ॥ केचिट्ट्वमपीच्छन्ति । सिन्धुराट्त्सिन्धुरान् ॥ पक्षे । सुराट्सिन्धुराट्सिन्धुराट् ॥ गण्डान् संमानयत् ॥ स इति किम् । सिन्धुरान् रणात् ॥ अश्च इति किम् । स्वाराट् श्च्योतित । कराञ्श्च्योतत् ॥

भजञ्छौर्यं वहञ्शौचं पालयञ्शरणागतान् ।
जनोस्यान्तरनन्तश्रीर्वदञ्श्च्योतति मध्विव ॥ ६९ ॥

६९. अस्य पुरस्यान्तर्मध्ये शौर्यं भजन्नत एव शरणागतांस्त्राणार्थिनः पालयन् जनो भटलोको वदन् मयि रक्षके भवद्भिर्न भेतव्यमिति भाषमाणः सप्रभयवाक्यस्यातिसुखदत्वान्मध्विव श्च्योतति क्षरति । ननु लोभेन शरणागतान्पालयिष्यति । नेत्याह । शौचं निर्लोभतां वहन् यतोनन्तश्रीरसंख्यलक्ष्मीकः । बहुलक्ष्मीको हि प्रायेण तृप्तत्वादेवंविधमशौचं न करोति । यद्वा । अनन्तस्येव श्रीर्यस्य सोनन्तश्रीर्विष्णुतुल्यः । विष्णुर्हि निरपेक्ष एव जगद्रक्षति ॥

प्रातरत्राग्निरादित्या अनन्त इन्द्र आसिताः ।
सुचेत३यन्वेहि पय अ३ग्नेत्रेत्यध्वरे गिरः ॥ ७० ॥

७०. अत्र पुरेध्वरे यागे गिरो वर्तन्ते । अर्थादध्वर्यूणाम् । कथमित्याह । प्रातरित्यादि । केषांचिद्याज्ञिकानामेवं वाचो यथा हे सुचेत३ः शोभनमनस्क

१ सी डी °ध्विह ॥.

१ एफ् °चिशु ट°. २ ए °राट्सि°. ३ सी डी °न् ग°. ४ एफ् श्च्योतति ।. ५ एफ् °गतानां त्रा°. ६ सी डी °ति न°. ७ ए °क्ष्मीको हि. ८ डी या गि°. ९ ए °तः३शो°. सी डी तः शो°. एफ् त३शो°.

प्रातः प्रभाते त्वयाग्निर्वह्निदेवता आदित्या धातृ१अर्यमन्२मित्र३वरुण ४अंशु५भग६इन्द्र ७विवस्वन् ८पूषन्९पर्जन्य१०त्वष्टृ११विष्णु१२संज्ञा द्वादश सूर्या अनन्तो विष्णुरिन्द्रः शक्रश्चात्र प्रदेश आसिता मन्त्रैराहूय स्थापिता इति । तथान्येषां पयोग्निमन्त्रेण जलाग्न्याह्वानं कुर्वतां याज्ञिकानामेवं वाचो यथा हे पयो जलदेवते तथा हे अ३ग्ने वह्निदेवतेत्र प्रदेशेन्वेहि अन्वागच्छावतरेति यावदिति च । इतिर्भिन्नक्रमे । स्थापिता इत्यत्र अ३ग्ने इत्यत्र च योज्यः ॥

भजञ्छौर्यं वहञ्शौचं इत्यत्र "नः शि ञ्" [१९] इति ञ् वा ॥ पक्षे पालयन् शरण ॥ अश्न इत्येव । वदन् श्च्योतति ॥

जनोस्य । इत्यत्र "अतोति रोरुः" [२०] इति रोरुकारादेशः ॥ अत इति किम् । आदित्या अनन्त । सुचेत३यन्वेहि । "दूरादामन्त्र्यस्य०" [७.४.९९] इत्यादिना प्लुतः ॥ अतीति किम् । अनन्त इन्द्र । इन्द्र आसिताः ॥ पय अ३ग्ने । "दूरादामन्त्र्यस्य०" [७.४.९९] इत्यादिना प्लुतः ॥ रोरिति किम् । प्रातरत्र ॥

स्वर्वासिनामपि रतिर्भवेदत्र मनोरमे ।
देहि नः सुमनं३नेति देहिनामिह भारती ॥ ७१ ॥

७१. अत्र पुरे स्वर्वासिनामपि देवानामपि रतिः सुखं भवेत् । संभावने सप्तमी । इदमहं संभावयामीत्यर्थः । यतः किंभूते । मनोरमे नानाद्भुतालयत्वाच्चित्तावर्जके । तथेह पुरे देहिनां प्राणिनां हे सुमनं३औदार्यधार्मिकत्वादिगुणैः शोभनचेतस्क नोस्मभ्यं किंचिद्देहीति भारती वाणी नास्ति । सर्वस्येश्वरत्वेन याचकानामभावाद्याचकदर्शनेनैव यथाकामं दानाद्वा ॥

१ प सी °नः३ने°. बी °न३नें°.

१ बी सी °भाग°. २ पफ् °र्वन्तो या°. ३ बी °तेन्वे°. ४ सी डी अग्ने३ इ°. ५ पफ् °हि । अ°. ६ पफ् °म् । प°. ७ सी डी °पि र°. ८ प °नः३ औ°.

मनोरमे । इत्यत्र "घोषवति" [२१] इत्युत्वम्[1] ॥ घोषवतीति किम् । देहिनः सुमनं३[2] ॥ अत इत्येव । रतिर्भवेत् । सुमने३ नेति[3] ॥ रोरित्येव । स्वर्वासिनाम्[4] ॥

भो गन्धर्वा भगो नागा अघो देवाः किमीदृशम् ।
पुरमस्त्येवमत्रोच्चैर्वदन्ति व्योमचारिणः ॥ ७२ ॥

७२. स्पष्टः । नवरमत्रेत्यत्र विषयसप्तम्याः स्थाने त्रप् । निरुपमत्वादत्र पुरविषये व्योमचारिणो विद्याधराद्या एवं वदन्ति । भो भगो अघो इत्यामन्त्रणेऽव्ययानि ॥

गन्धर्वा भगोः[5] । भो गन्धर्वाः । भगो नागाः । अघो देवाः । इत्यत्र "अवर्ण-भो°" [२२] इत्यादिना रोर्लुक् ॥ घोषवतीत्येव । देवाः किम् ॥

सदा साध्युदयेध्विन्दुर्निष्कलङ्कगुणान्वितः ।
भव्याजय्याव्यलोकोस्मिन्न च वृक्ष लता न च ॥ ७३ ॥

७३. अस्मिन्पुरे भविष्यति गुणपात्रमिति "भव्यगेय°" [५.१.७] इत्यादिना कर्तरि ये भव्यो[6] मोक्षगमनयोग्योत एवाजय्यो[7] भावतः सर्वविर-तिसामायिकान्वितत्वेन रागाद्यान्तरशत्रुभिर्जेतुमशक्योत एव चाव्ययं मोक्षं करोति । णिच् । अव्ययतीति[8] । क्विप् । अव्यय् मोक्षसाधको यो लोकः[9] स मुनिजनः । वृक्षं[10] वृक्षाणां व्रश्चनं "क्रुत्संपदादिभ्यः क्विप्" [५.३.११४]

१ एफ् °निः क°.

१ एफ् °त्युक्तं घो°. २ ए बी डी °नः३ अ°. ३ ए डी °नः३ने° बी °नः-३नेति. ४ डी °रा ए°. ५ D drops the first part, गन्धर्वाभगोः, evidently without understanding the purpose of its insertion which is to illustrate अवर्ण preceeding a *visarga*. ६ सी भव्यो. ७ एफ् °एवाव्य°. ८ ए °ति क्विपि अ°. ९ सी डी °को लो°. १० एफ् वृक्षा°.

इति क्किपि वृक्षवृश्चं करोति णिज्यन्त्यस्वरादिलोपे वृक्षवयति[1] क्किपि वृक्षे[2] वृक्षाणां छेदको न च नैवास्ति[3]। एवं लता न च। लताच्छेदकोपि नैवास्ति। वृक्षलता जन्मजराजीवनमरणा[4]रोहणाहारादिसचेतनधर्मवत्त्वेन सचेतना इति ताः प्राणातिपातनिवृत्तत्वेन न च्छिनत्तीत्यर्थः। यतोध्यारूढ उमीशमध्युः। स चासाविन्दुश्चाध्विन्दुः। स इवं[5] निष्कलङ्का निर्दोषा ये गुणा दयादयः। ईश्वरभालस्थस्य हि कलामात्रस्येन्दोः प्रतिपदिन्दोरिवं[6] निष्कलङ्कत्वात्तैरन्वितः। नन्वत्र पुरे को गुणो येनैवंविधगुणोपेतो मुनिजनोत्र तिष्ठति तत्राह। यतः सदा सर्वदा साध्युदये साधूनां मुनीनामीस्तपःसंयमादिलक्ष्मीस्तस्या उदयो वृद्धिर्यत्र तस्मिन्निर्जीवक्षेत्रताविशुद्धाहारप्राप्त्यादिसंयमगुणोपेततया मुनिजनं[7]प्रायोग्य इत्यर्थः॥

वृक्षलता। लता न च। अव्यलोक। इत्यत्र "व्योः" [२३] इति व(य?)योर्लुक्॥ पदान्त इत्येव। भव्यार्जय्य। कश्चित्तु स्वरजयोरनादिस्थयोर्यकारवकारयोर्घोषवत्यवर्णादन्यतोपि लोपमिच्छति। अध्विन्दु। साध्युदये॥

बन्ध एते दृशा अस्याः कमले क इव भ्रमः।
क इत्थं नेह कामिन्याः स्तुत्या अन्योन्यमुद्यताः॥ ७४॥

७४. कामिन्याः स्तुत्यै लोचनाद्यवयवसौन्दर्यवर्णनायेह पुरेन्योन्यं के नोद्यताः। कथमित्याह। हे बन्धो बान्धवास्याः प्रत्यक्षायाः कामिन्या एते प्रत्यक्षे दृशौ नेत्रे कमले। अत्रार्थे क इव भ्रमः को नाम संशयः। इवोसंभावनायाम्। एते दृशौ पद्मे एव। अत्रार्थे न काप्यसंभावना कार्येत्यर्थ इत्थम्॥

---

१ एफ़ °ति तीति क्कि°. २ ए °क्षव् वृ° [व् बहिः]. ३ सी °स्ति वृ°. ४ बी सी डी °रणरो°. ५ एफ़ °व निः क°. ६ एफ़ °व निः क°. ७ एफ़ °नयो°. ८ बी °जय्या ।.

अघो अर्के भगो ईश भो इन्द्र उ चतुर्भुज ।
इत्यादौ ब्रह्मयज्ञस्य स्मरन्ति ब्राह्मणा इह ॥ ७५ ॥

७५. इह पुरे ब्राह्मणा द्विजा ब्रह्मयज्ञस्याध्ययनस्यादौ प्रारम्भेघो अर्के हे रवे भगो ईश हे शंभो भो इन्द्र उ चतुर्भुज हे विष्णो । जये-त्यादिका क्रिया सर्वत्राध्याहार्या । इत्येवंप्रकारेण स्मरन्त्यर्थादर्कादीन् । निर्विघ्नाध्ययनप्रवृत्तये अर्काद्यभीष्टदेवताः स्मृत्वा ब्राह्मणा वेदाध्ययनं कुर्वन्तीत्यर्थः ॥

अघोयिन्द्र भगोयिन्दो भोयादित्यायु विष्णवु ।
असावु कयु वोत्रेति नृपे पृच्छन्ति खेचराः ॥ ७६ ॥

७६. अत्रे नृपेत्र पुरेस्ति यो नृपस्तत्र विषये खेचरा देवा इन्द्रादीन्पृच्छन्ति । कथमित्याह । अघो इन्द्र भगो इन्दो भो आदित्या द्वादशार्का उ विष्णो वो युष्माकं मध्येसौ नृपः कः । किं प्रश्ने । युष्माकं मध्येसौ किमिन्द्रः किं वेन्दुः किं वा कोप्येको रविः किं वा विष्णुरिति । अत्रत्यनृप ऐश्वर्यकान्तत्वतेजस्वित्वरक्षकत्वादिगुणदर्शनादि-न्द्रचन्द्रादित्यविष्णुशङ्कयैवं प्रश्नः । विष्णवु असावु कयु इत्यत्र त्रयोप्युत्वः पादपूरणे ॥

तेयीश्वरास्तयारामा इमेसाववनीपतिः ।
बन्धवत्र साधवीक्षस्वागन्ताविति वागिह ॥ ७७ ॥

७७. इह पुर आगन्तावागन्तुकजनविषये वागस्ति । यथा हे बन्धो

---

१ सी °श शंभो इन्द्र च°. डी °श शंभो इन्द्र उ च°. २ सी डी त ईश°.

---

१ एफ् °ष्णो जीवेत्या°. २ ए °दिक्रि° ३ डी सी °दीननि°. ४ एफ् °त्र पु°. ५ ए विष्णुवुः अ°. सी विष्णुवु.

बान्धव साधो शिष्ट ये त्वया पूर्वं वार्तया श्रुतास्त इम ईश्वरा आढ्याः । तथा येषां फलान्यमृतरसस्वादूनि त्वमास्वादयो ये त्वया श्रुतपूर्वाश्च त इम आरामा उद्यानानि । तथा यं त्वं यशसा दृष्टपूर्वी सोसाववनीपतिर्भूपो वर्तते । अत्र प्रदेश ईक्षस्वालोकयार्थादीश्वरादीनेवेति ॥

यथितोस्मायिदं देहि यथितोस्मायिदं पुनः ।
उदारायीश्वरायाहुरत्रेति स्वनियोगिनः ॥ ७८ ॥

७८. अत्र पुर उदारायीश्वरा आढ्याः स्वनियोगिनः स्वभाण्डागारिकाॅनित्येवंप्रकारेणाहुः । यथा । अहो नियोगिन् यो याचकजन इतोस्मिन् विवक्षिते पूर्वादिदिग्विभागेस्त्यस्मायिदं स्वर्णदुर्वर्णादि देहि । यः पुनरितोस्मिन् विवक्षिते पश्चिमादिप्रदेशेस्त्यस्मायिदं पूर्वस्मादन्यद्भोजनवस्त्रादिकं देहीति ॥

बन्ध एते । दशा अस्याः । क इव । स्तुत्या अन्योन्य । भो इन्द्र । भगो ईश । अघो अर्क । इत्यत्र "स्वरे वा" [२४] इति वयोर्वा लुक् ॥

पक्षे । विष्णवु । असावु । कयु । आदित्यायु । भोयादित्याः । भगोयिन्दो । अघोयिन्द्र । इत्यत्र "अस्पष्टा°" [२५] इत्यादिना वयोः स्थाने नित्यमस्पष्टावीषत्स्पृष्टतरौ वयौ । अवर्णात्त्वनुञि वा । बन्धवत्र । साधवीक्षस्व । असाववनीपतिः । आगन्ताविति । तयीश्वराः । तयारामाः । अस्मायिदम् अस्मायिदम् । यथितः यथितः । उदारायीश्वराः । ईश्वरायाहुः । अनुञीति किम् । उञि अस्पष्टावेव यथा स्यातां तथा चोदाहृतम् ॥

यथितः । उदारायीश्वराः । भोयादित्याः । भगोयिन्दो । अघोयिन्द्र । इत्यत्र "रोर्यः" [२६] इति रोः स्थाने यः ॥ अवर्णादिभ्य इत्येव । आहुरत्र ॥

---

१ सी डी °रावाः । त°. २ बी सी डी त्वमस्वा°. ३ सी डी °था यत् त्वं. एफ् °था य°. ४ बी सी डी कानाहुः. ५ ए °दं पूर्वस्मायिदं पू°. ६ ए एफ् वयो°. ७ एफ् वयोः. ८ ए बी सी डी रौ यवौ ।. ९ ए उञि अ°.

त्वमीशो भविनामर्हन् भवान् विष्णुर्भवानजः ।
स्तुवन्नाह सुभण्णेवं श्रद्धया युङ्ङिहार्हतः ॥ ७९ ॥

७९ इह पुरेर्हन् देवतास्यार्हतः श्रावकः । श्रद्धया भावनया युङ् युक्तः पुलकाञ्चिताङ्गो नेत्रजलाप्लावितकपोलश्चेत्यर्थः । सुष्ठु भणति क्विपि सुभण् मधुरगीश्च सन् स्तुवंस्तीर्थकरं नुवन् सन्नेवमाह भक्तिविशेषेणार्हन्तं प्रतीदं ब्रूते । यथा हे अर्हन् जिनेश्वर भविनां भव्यानां त्वमीशस्त्वमेव महेश्वरो भवान् विष्णुस्त्वमेव नारायणो भवानजस्त्वमेव स्रष्टा । तवैव मुक्तिप्राप्तिहेतुत्वात्वत्तोन्यद्धरहरिब्रह्माख्यं देवतान्तरं भव्यलोकानामाराध्यं नास्तीत्यर्थ इति ॥

युङ्ङिह । सुभण्णेवम् । स्तुवन्नाह । इत्यत्र "ह्रस्वात्°" [२७] इत्यादिना द्वित्वम् ॥ ह्रस्वादिति किम् । भवानजः ॥ ङ्णन इति किम् । त्वमीशः ॥ स्वर इत्येव । अर्हन् भवान् ॥ पदान्त इत्येव । भविनाम् ॥

आच्छायां दीपिकाच्छाया खद्वाछायेव माच्छिदत् ।
माच्छायाः कुर्वते रत्नदीपानत्राप्रमाछवीन् ॥ ८० ॥

८०. अत्र पुरे मया लक्ष्म्या छाया शोभा येषां ते माच्छाया ईश्वरा रत्नदीपान् रत्नान्येव दीपान् मणिमयान् प्रदीपान् कुर्वते । किंभूतान् । प्रमिमीते क्विपि प्रमा नास्ति प्रमा परिच्छेत्ता यस्याः सा तथाभूता छविः कान्तिर्येषां तान् । सर्वतः प्रसरत्कान्तीनित्यर्थः । रत्नदीपकरणे हेतुमाह । दीपिकाच्छाया दीपपृष्ठेन्धकारं आच्छायामीषदपि लक्ष्मीं माच्छिदन्मास्म विनाशयत् । यथा खद्वाछाया आच्छायां छिनत्ति । दीपखद्वयोश्छाये हि स्पृश्यमाने अश्रिये स्याताम् । यत्पुराणम् ।

---

१ सी °तः आ°. २ एफ् °काचिता°. ३ एफ् °जलप्ला°. ४ एफ् प्रत्येवं ब्रू°. ५ एफ् °दरिहरब्र°. ६ ए °किं किमत्र स्व°. ७ डी °रच्छाया आ°. ८ एफ् °न्मा वि°.

अजारजः खररजस्तथा [1]संमार्जनीरजः ।
दीपमञ्चकयोश्छाया लक्ष्मीं हन्ति पु[2]रोकृताम् ॥ इति ॥

दीपिकाच्छाया खङ्गाछाया । इत्यत्र "अनाङ्माङः°" [२८] इत्यादिना वा छस्य द्वित्वम् ॥ अनाङ्माङ इति किम् । आच्छायाम् । माच्छिदत् ॥ ङित्करणान्माच्छाया इत्यत्र विकल्प एव । तेन पक्षे माछाया इत्यपि ज्ञेयम् । आङ्गाहचर्येणाव्ययस्य माङो ग्रहणात्प्रमाछवीनित्यत्रापि विकल्पस्तेन प्रमाच्छवीनित्यपि ज्ञेयम् ॥

हे३च्छातोदरि हे३छेके तन्वि३च्छद्म न यद्विधुः ।
ह्रीच्छन्निच्छति ते वक्त्रच्छायामत्रेति गीर्नृणाम् ॥ ८१ ॥

८१. अत्र पुरे नृणां प्रस्तावात्कामिनामित्ये[3]वंविधा गीरस्ति । यथा हे३च्छातोदरि कृशोदरि हे३छे[4]के हे[5] तन्वि३कृशाङ्गि त्वन्मुखेन्दीवर-लक्ष्म्या निर्जितत्वाद् ह्रीच्छन् लज्जमानः सन् विधुश्चन्द्रो यत्ते वक्त्रच्छायां मुखलक्ष्मीमिच्छति प्राप्तुं वाञ्छति तन्न च्छद्म न कूटं किं तु सत्यमेतदि-त्यर्थ इति ॥

हे३च्छातोदरि हे३छेके । इत्यत्र "प्लुताद्वा" [२९] इति वा द्वित्वम् ॥ "हेहै-[6]ष्वेषामेव" [७.४.१००] इति प्लुतः ॥ दीर्घादित्येव । तन्वि३च्छद्म । "दूरादा-मन्त्र्य°" [७.४.९९] इत्यादिना प्लुतः ॥

इच्छति । ह्रीच्छन् । वक्त्रच्छायाम् । इत्यत्र "स्वरेभ्यः" [३०] इति पदान्ते-पदान्ते च द्वित्वम् ॥

अक्ष्मवद्व्रतवेत्तारो ह्रुतार्काः कर्कशत्विषा ।
कीर्त्या प्रोर्ण्णोनुवत्याशा अस्मिन्नर्हा गुणह्रदाः ॥ ८२ ॥

८२. अस्मिन्पुरेर्हन्ति पूजामित्यर्हा योगिनः कीर्त्या साधुवादेनाशा

१ ए बी सी डी सन्मार्ज°. २ एफ् °राजिता°. ३ बी °वं गी. ४ बी °के३हे°. ५ एफ् हे३त°. ६ सी डी °ष्वेकामे°.

दिशः प्रोर्णोनुवत्यत्यर्थं व्याप्नुवन्ति । कीदृशाः सन्तः । अगाधा जलाश्रयभेदा ह्रदाः । गुणानां शमेन्द्रियजयादीनां ह्रदा इव गुणह्रदाः । गुणपरिपूर्णा इत्यर्थः । अत एव ब्रह्मवद्विधातेव ब्रह्म परमज्ञानं विन्दन्ति लभन्त इत्येवंशीला ब्रह्मवेत्तारोत एव च कर्कशत्विषा प्रौढज्ञानतेजसा ह्रुत आच्छादितोर्को रविर्यैस्ते ॥

अर्काः । कर्कशः । ब्रह्मवत् ब्रह्म । इत्यत्र "ह्रोदहे°" [३१] इत्यादिना वा द्वित्वम् ॥ अर्हस्वरस्येति किम् । गुणह्रदाः । अर्हाः । वेत्तारः ॥ स्वरेभ्य इत्येव । ह्रुत ॥ अन्विति किम् । प्रोर्णोनुवति । अत्र द्विर्वचने कृते द्वित्वं यथा स्यात् ॥

असंय्यँयतः संय्यँतत्वङ्को नास्मिन्नागतोभजत् ।
पित्रर्थमित्रार्थपरान् विधिरत्रैव चासृजत् ॥ ८३ ॥

८३. एवं नामात्र महात्मानः सर्वसावद्यविरताः संयता आसन् । यावतात्रागतोसंय्यँयतोपि तान् दृष्ट्वा समुच्छलितविवेकः संय्यँतत्वमभजदिति तात्पर्यम् । तथैवंनामात्र बहवः पितृकार्यमित्रकार्यपरायणा जना दृश्यन्ते । यावता ज्ञायतेन्यस्थानकानि मुक्त्वात्रैव विधाता तान् सृष्टवानित्यर्थः ॥

इतङ्कविक्कलैः कान्तः कृतार्चैः प्राह दैवतम् ।
नमतँउपाहि गो३त्रातँउपाहि घो३त्र भुवः प्रभो ॥ ८४ ॥

८४. इतोस्मिन्पुरे कान्त उच्छलच्छ्रद्धापूरेणोच्छ्वसिताङ्गत्वान्मनोहरः

१ ए °तङ्कवि°. २ बी °लः: का°. ३ ए तज्याहि. ४. सी एफ् प्रभोः.

१ सी डी °वत्यर्थं. २ ए न्तः सगा°. ३ डी एफ् °गाधज°. ४ सी °नं वदन्ति. डी एफ् °नं विदन्ति. ५ एफ् कोंपि यैस्ते. ६ ए सी डी °शः।. ७ ए °ना द्वि°. ८ सी डी हुते अ°. । ९ सी संय्यता. एफ् सर्य्यता°. १० ए बी सी डी °तोसंयतो°. ११ ए बी सी डी °कः संयत°. १२ सी °र्यप°. १३ सी एफ् °पूरणो°.

कृतार्चो विहितपूजोपचारः कलो मधुरवाक् च सन् कविः काव्यकर्ता दैवतमर्हदादिकां स्वाभीष्टदेवतां प्राह । कथमित्याह । हे गो३त्रातः संसारसागरोत्तारकत्वेन भूस्थलोकस्य रक्षणशीलात एव हे भुवः प्रभो पृथिव्याः स्वामिंस्तथा हे घो३त्र स्वर्गस्थलोकरक्षके दैवत नमतः प्रणम्रानस्मदादीन् पाहि पाहि रक्ष रक्षार्थात्संसारदुःखेभ्य इति । कविरित्यत्र जातावेकवचनम् । वक्ता हर्षभयादिभिराक्षिप्तमनास्तथा स्तुवन् निन्दन् यत्पदमसकृद् ब्रूयात्तत्पुनरुक्तं न दोषायेत्यलंकारविदां समयात्पाहि पाहीति न पुनरुक्तदोषः ॥ गो३त्रातः । घो३त्र । इत्यत्र "दूरादामन्त्र्यस्य°" [७.४.९९] इत्यादिना प्लुतः ॥

पात्रे यथाविधि प्रत्तधनश्चन्द्रसमो गुणैः ।
धैर्ययुग्ग् वीर्ययुग् राजत्यत्र सर्वोपि सत्यवाक् ॥ ८५ ॥

८५. अत्र पुरे सर्वोपि लोको राजति । यतः कीदृक् । पात्रे ज्ञानदर्शनचारित्राधारे तीर्थकृदादौ यथाविध्यागमोक्तकल्पानुसारेण प्रत्तं प्रदातुमारब्धं धनं वित्तं येन सः । एतेनौदार्यविवेकावुक्तौ । धैर्ययुग्ग् वीर्ययुग् । आपत्स्वप्यचलचित्तता धैर्यं वीर्यं पराक्रमस्ताभ्यां युक्तः । सत्यवागवितथवचनः । अत एव गुणैरौदार्यादिभिः कृत्वा चन्द्रसम इन्दुवन्निर्मलः ॥

विरामे । धैर्ययुग्ग् वीर्ययुग् । अभजत् असृजत् ॥ एकव्यञ्जने । मित्त्रार्थे पित्रर्थे । त्वक्क्कः । असर्य्यँयतः सर्य्यँतत्वम् । इतक्कविः कविक्कलः । नमत॒पाहि गो३त्रात॒पाहि । कलः: कान्तः कान्तः कृतार्चः । गो३त्रातः घो३त्र । इत्यत्र "अदीर्घात्°" [३२] इत्यादिना वा द्वित्वम् ॥ अन्वित्यधिकारात् कत्वगत्वादिषु कृतेषु पश्चाद्द्वित्वम् । अदीर्घादिति किम् । वाक् । पात्रे ॥ विरामैकव्यञ्जन

१ सी डी °क् स°. २ सी डी एफ् °दिकं स्वा°. ३ एफ् °ह । हे. ४ सी डी °क देव°. ५ सी डी °ब्धं वि°. ६ एफ् °ञ्जने कि°.

इति किम् । चन्द्र । यथाविधि संयुक्तव्यञ्जनेपीच्छन्त्येके । प्रस्त ॥ अर्हस्वरस्येत्येव । सर्वः ॥

सल्वाकारा अनुल्के[1]स्मिन् यद्युल्कान्ति मणिप्रभाः ।
अवल्म्मीके च वल्मीकन्त्युन्नता द्रव्यराशयः ॥ ८६ ॥

८६. अनुल्के सदारिष्टरहितत्वेन तत्सूचकोल्को[2]त्पातरहितेस्मिन्पुरे यदि परं सह ला लकारेण वर्तते यो व् अकारस्तद्वदाकार आकृतिर्यासां ताः सल्वाकारा मणिप्रभा रत्नभास उल्कान्ति बाहुल्यादारक्तत्वाच्चोल्कावदाचरन्ति । तथा वंहीयोवास्तव्यजनौ[3]तिसंकीर्णत्वेन न विद्यन्ते वल्म्मीकाः सर्पागाराणि मृत्तिकाकूटा यत्र तस्मिन्नवल्मीके[4] चास्मिन् यदि परं द्रव्यराशयो वित्तकूटानि वल्मीकन्ति वल्मीका इव चरन्ति यत उन्नता उच्चाः । चः पूर्ववाक्यो[5]र्थापेक्षयासमुच्चये । यदीत्युभयत्र योज्यम् ॥

अनुल्के उल्कान्ति । अवल्म्मीके वल्मीकन्ति । इत्यत्र "अम्वर्गस्य°" [३३] इत्यादि[6]र्ना वा द्वित्वम् ॥ वर्गस्ये[7]ति किम् । द्रव्य ॥ अमिति किम्[8] । सल्व ॥ अन्तस्थात[9] इति किम् । उन्नताः ॥

सखि दध्ध्यत्र दध्यत्र सखि मध्विह मध्विह ।
वाग्वाल्यमन्मनात्रेति कुमारीभिः प्रतन्यते ॥ ८७ ॥

८७. हे सखि । अत्र प्रदेशे दध्ध्यस्ति तथात्रापि प्रदेशे दध्यस्ति ।

१ ए सी °नुल्केस्मि°.

१ सी °नुल्के स°. २ एफ् °कोल्कापात.° ३ एफ् °नालिसं.° ४ ए एफ् °के वास्मि°. ५ एफ् °क्यापे°. ६ डी °ना द्वि.° ७ एफ् °स्येत्येव । द्र°. ८ सी डी °म् । अल्व ॥. ९ बी सी डी °स्था इ°.

तथा हे सखि । इह मध्विहापि स्थाने मध्वस्तीत्येवंप्रकारेणात्र पुरे बाल्यमन्मना बालत्वादव्यक्तमधुरा वाग् वाणी कुमारीभिः प्रतन्यते विस्तार्यते । दध्यत्रेत्यादि स्वप्रधानमेव वाक्यद्वयमपि । यद्वात्राकृतयवद्वित्वस्य वाक्यस्य "असकृत्संभ्रमे" [७. ४. ७२.] इति संभ्रमे द्विरुक्तिः[२] । ततो यवयोर्द्वित्वं वा । तदायमर्थः । हे सखि । अत्र प्रदेशे दध्यस्त्यत्र प्रदेशे दध्यस्ति । एवं मध्विह मध्विहेत्येवं संभ्रमप्रकारेण ॥

दध्य्यत्र दध्य्यत्र । मध्विह मध्विह । इत्यत्र "ततोस्याः" [३४] इति वा द्वित्वम् ॥ तत इति किम् । बाल्य ॥ अस्या इति किम् । वाग्बाल्यमन्मना ॥

कष्टंकष्टं कृतञ्छन्नञ्छन्नं मे स्फुरितं स्फुटम् ।
कलिः प्प्रातः पूत्करोतीत्यत्र शङ्खध्वनिच्छलात् ॥ ८८ ॥

८८. पत्तने हि किल देवसद्मसु प्रातःक्षणे धर्ममहाराजजागर्याकृतपुङ्खः सदा शङ्खो वाद्यते । तद्ध्वनिमपह्नुत्यान्यदुत्प्रेक्ष्यते । अत्र पुरे प्रातः प्रभाते शङ्खध्वनिच्छलात्कलिः पापयुगं पूत्करोत्युच्चैः[३] कोकूयत इव । कथमित्याह । मे मम स्फुटं सर्वजगत्प्रकटं स्फुरितं विजृम्भितं सर्वलोकान्यायप्रवृत्तिलक्षणं छन्नं छन्नं गुप्तं गुप्तं कृतम् । प्रस्तावान्नयसद्मनानेन पुरेण तस्मात् कष्टं कष्टं दुःखं दुःखं ममास्तीति । यस्य हि वस्तु केनापि चौरादिना गोप्यते स तद्वियोगेन दुःखितः सन् पूत्करोति । अत्र चान्यायानां नाम्नोप्यभावेन कलिकालस्फुरितस्याज्ञायमानत्वादेवमपह्नुतिः ॥

कष्टं कष्टं कृतञ्छन्नञ्छन्नमित्यत्र वीप्सायां कष्टच्छन्नयोर्द्विरुक्तिं कृत्वा प्रथमद्वितीययोर्द्वित्वम् ॥

---

१ डी कृतँच्छन्नँच्छ°.

---

१ सी डी बाल्यत्वा°. २ बी °तो वयो°. ३ सी डी °त्युच्चकैः को°.

स्त्रैणः कण्ठः कलङ्कान्तङ्कामिभिश्चात्र निश्चितम् ।
जयशङ्खः स्वरापूर्णम्प्रतीतं[1]म्पुष्पधन्वनः ॥ ८९ ॥

८९. अत्र पुरे स्त्रीणामयं स्त्रैणः कलस्वरोपेतत्वात्कलो मधुरोत एव कान्तो मनोज्ञः कण्ठो गलकन्दलो निश्चितमवश्यं पुष्पधन्वनः कामस्य स्वरापूर्णः शब्दायमानो जयशङ्खो विजयहेतुः कम्बुः कामिभिः प्रतीतो ज्ञातः । अत्रत्यस्त्रीणां कलकण्ठत्वेन[1] स्वं स्मरजितं दृष्ट्वा कामिभिः[2] कलः स्त्रीकण्ठः शङ्खाकारत्वात्कामराजस्य शब्दायमानो जयशङ्खो निःसंशयं ज्ञात इत्यर्थः ॥

कष्टं क[3]ष्टं कष्टं कृतम् । स्त्रैणः कण्ठः कँ[4]ण्ठः कलः । कलिः प्मातः प्मातः पूत्करोति । कलङ्कान्तः कान्तङ्कामिभिः । आपूर्णम्प्रतीतः प्रतीतम्पुष्प । कामिभिश्चात्र निश्चितम्[5] । कष्टं कष्टम् । स्फुरितं स्फुटम् । इत्यत्र "शिटः प्रथम°"[३५] इत्यादिना [वा] द्वित्वम् ॥ शिट इति किम् । पूत्करोति । शङ्खः ॥ प्रथमद्वितीयस्येति किम् । स्वर ॥ अनुनासिकादप्यादेशरूपात्केचिदिच्छन्ति । कृतञ्छन्नं छन्नञ्छन्नम् ॥

अत्रोच्चश्रवसच्श्रवः पेयं क्षीरं क्षरति गौः सताम् ।
सतृट्षट्पदपातव्यं पङ्करुट्षण्डवन्मधु ॥ ९० ॥

९०. अत्र पुरे सतां साधूनां गौर्वाणी उच्चश्रवसच्श्रवःपेयमुच्चश्श्वसन्ति सुखानुभवेन[6] सोल्लासानि यानि श्रवांसि श्रोत्राणि तैः पेयं पातव्यं क्षीरं दुग्धं क्षरति परिणामसुन्दरत्वेन[7] मधुरत्वेन च[8] स्रवतीव ।

---

१ ए °तः पु.°

---

१ बी सी डी °कण्ठेन. २ °भिः स्त्री°. ३ डी °ष्टं कृ°. ४ सी डी कलः. ५ सी डी °त स्फु°. ६ सी डी एफ् °नुभावे°. ७ ए °न च. ८ ए बी सी डी °च श्रव°.

यापि गौर्धेनुः साप्युच्चश्वसच्छ्रवसा तर्णकादिना लेह्यं क्षीरं क्षरतीत्युक्तिः । यथा पङ्करुट्षण्डमम्भोजवनं सतृषः साभिलाषा ये षट्पदा भृङ्गास्तैः पातव्यं लेह्यं मधु मकरन्दं क्षरति । अस्यां चोपमायां क्षरतीति सामान्यपदं गवा स्त्रीलिङ्गेन पङ्करुट्षण्डशब्देन नपुंसकेन च सह न भिद्यत इति सामान्यशब्दभेदाख्यदोषाभावः । उक्तं च ।

सामान्यशब्दभेदःसोयं यत्रापरत्र शक्येत ।
योजयितुं नाभग्नं तत्सामान्याभिधायि पदम् ॥ इति ॥

कृतमत्स्यध्वजोत्सेकाः स्त्रियः प्स्सातास्प्सरःश्रियः ।
अस्मिन् सद्यो मनो यूनां मथ्नन्ति ख्यातविभ्रमाः ॥९१॥

९१. अस्मिन्पुरे स्त्रियः सद्यो दर्शनकाल एव यूनां मनो मथ्नन्ति क्षोभयन्ति । यतः प्स्सातास्प्सरःश्रियो रूपलावण्याद्यतिशयेन ग्रस्तदेवाङ्गनारूपलावण्यादिलक्ष्मीकास्तथा[2] ख्याता अतिरामणीयकेन[3] प्रसिद्धा विभ्रमा विलासा यासां ता अत एव कृतमत्स्यध्वजोत्सेका विहितकामोद्रेकाः ॥

उच्चश्वसच्छ्रवः । सतृट्षट्पद पङ्करुट्षण्डवत् । मत्स्स्य उत्सेकाः । क्षीरं क्षरति । प्स्सातास्प्सरः । इत्यत्र "ततः शिटः" [३६] इति[4] वा द्वित्वम् ॥ तत इति किम् । अस्मिन् सद्यः । शिट इति किम् । मथ्नन्ति । ख्यात ॥

तपःकार्श्यजुषां हर्षकृतां हिंस्रोपि दर्शनात् ।
धनुस्त्यागं करोत्यस्मिन्नर्कवत्कासरोत्सवे ॥ ९२ ॥

९२. अस्मिन् पुरे तपसा न तु रोरत्वादिना कार्श्यं कृशत्वं जु-

१ सी डी °प्यादि°. २ एफ् °था ता. ३ एफ् °यकत्वेन. ४ बी सी डी °ति द्वि°.

षन्ते सेवन्ते ये तेषां तपस्विनां दर्शनात् हिंस्रोपि क्रूरकर्मा व्याधा-दिरपि[1] धनुस्त्यागं मृगादिवधार्थमुपात्तस्य धनुषस्त्यागं करोति यतो हर्ष-कृतां धन्या एते भगवन्तो ये शान्तदान्तास्तपसैवमात्मानं[3] क्लेशयन्ति तत्किं वयं निरपराधजीवव्यापादनपापवृत्त्यात्मानं दुर्गतौ पातयाम इति प्रकारेण व्याधादिलोकस्यापि हर्षं क्रूरत्वोपशमैकं मनउल्लासमतिशान्त-त्वतीव्रतपश्चरणकरणादिना कुर्वन्ति ये तेषाम्। यथार्को रविः कृसरा सप्तधान्यानि तस्या अयम् अणि कार्सरो य उत्सवस्तस्मिन् कार्सरो-त्सव उत्तरायणदिने धनुस्त्यागं धनूराशित्यागं करोति। रविर्ह्युत्तराय-णदिने धनूराशेर्मकरराशिं संक्रामति। शब्दश्लेषेणोपमा॥

दर्शनात्। हर्ष। कार्सर। इत्यत्र "न रात्स्वरे" [३७] इति रात्परस्य शिटो न द्वित्वम्॥ रादिति किम्। उत्सवे॥ स्वर इति किम्। काश्र्यं॥ शिट इत्येव। अर्क॥

पुत्रादिन्पुत्रपुत्रादिन्नथवा पुत्रहत्यपि।

पुत्रजग्धीति नाक्रोशत्यस्मिन्मधुरगीर्जनः॥ ९३॥

९३. अस्मिन्पुरे जनो लोकः पुरुषं स्त्रियं च नाक्रोशति न निष्ठुरं वक्ति यतो मधुरगीर्मृदुवाक्यः। कथं नाक्रोशतीत्याह। हे पुत्रादिन्न-भीक्ष्णं पुत्राणां भक्षक हे पुत्रपुत्रादिन्नभीक्ष्णं पौत्राणां भक्षक त्वयेदं कार्यं विनाशितमित्याद्यध्याहार्यम्। इत्येवंप्रकारेण नरम्। अथवा तथा पुत्रो हतोनया "अनाच्छादजात्यादेर्न वा" [२. ४. ४७.] इति ङ्यां पुत्र-

१ ए सी पुत्रह°. २ ए सी पुत्रज°.

१ सी °दि धा°. २ एफ् शान्ता दा°. ३ सी डी °सैवात्मा°. ४ सी °मकम°. ५ एफ् °ह्लासं शा°. ६ सी डी °रणा°. ७ सी डी °न्ति ते°. ८ बी सी डी एफ् जनः पु°. ९ ए सी डी पुत्रह°.

हंती तत्संबोधनं हे पुंत्रहति । तथा[3] हे पुत्रजग्धि भक्षितपुत्रे त्वयेदं दुष्टु[4] कृतमिति स्त्रियं च ॥

पुत्रादिपुत्रपुत्रादिवर्जितेत्रोपहस्यते ।
पुत्रादिपुत्रपुत्रादिमत्स्यो न्यायः प्रचेतसः ॥ ९४ ॥

९४. पुत्रादिनः पुत्रभक्षिणः पुत्रपुत्रादिनश्च पौत्रभक्षिणो मत्स्या यत्र स प्रचेतसोपांपतेर्वरुणस्य न्यायोत्र पुर उपहस्यतेर्थाल्लोकैः । यतः पुत्रादिपुत्रपुत्रादिवर्जिते पुत्रादी पुत्रसंहारी यः पुत्रपुत्रादी पौत्रसंहारी[5] शाकिन्यादिलोकस्तेन वर्जिते रहिते ॥

पुत्रादिन् । पुत्रपुत्रादिन्निति नाक्रोशति । इत्यत्र "पुत्रस्य°" [३८] इत्यादिना न द्वित्वम् ॥ आदिन्पुत्रादिनीति किम् । पुत्रहति पुत्रजग्धीति नाक्रोशति ॥ आक्रोश इति किम् । पुत्रादिपुत्रपुत्रादिवर्जिते पुत्रादिपुत्रपुत्रादिमत्स्यः । एषु "अदीर्घात्°" [१.३.३२] इत्यादिना विकल्प एव ॥

कम्बुकण्ठ्योत्र तन्वङ्ग्यश्चश्चदब्जन्मलोचनाः ।
रंरम्यन्ते यद्भुवोग्रे लुठन्किङ्करति स्मरः ॥ ९५ ॥

९५. अत्र पुरे तन्वङ्ग्यः कृशाङ्ग्यो जलक्रीडादिभी रंरम्यन्तेत्यर्थं[6] क्रीडन्ति । कीदृश्यः । कम्बुः शङ्खस्तद्वद्वर्तुलत्रिरेखो मधुरस्वरश्च कण्ठो यासां तास्तथा चश्चदब्जन्मलोचनाः विकस्वरेन्दीवराक्ष्यः यद्भुवोग्रे यासां भ्रुवः पुरो लुठन्परिवर्तमानः स्मरः कामः किंकरति किंकरवदाचरति । अत्रत्यतन्वङ्गीनां यत्र[7] यत्र भ्रुवोर्निक्षेपस्तत्र तत्र स्मरो विजृम्भत इत्यर्थः । किंकरोपि हि भक्तिविशेषख्यापनाय स्वामिनोग्रे लुठति ॥

---

१ डी °हत्येत°. २ ए सी डी पुत्रह°. ३ एफ् °था पु°. ४ सी डी एफ् दुष्टं कृ°. ५ एफ् °री च शा°. ६ ए °न्तेत्यर्थं. ७ सी डी° त्र भ्रु°.

म्। किङ्करति । [1]कम्बु । न्। तम्बङ्ग्रयः । चङ्क्रत् । कण्ठ्यः। कवुडोपि कण्ठः। रंरम्यन्ते। इत्यत्र "ञ्नां धुट्°" [३९] इत्यादिना निमित्तवर्गस्यैवान्त्यः ॥ [2]धुडिति किम्। अब्जन्मैं ॥ धुड्वर्गे इति किम् । [3]रंरम्यन्ते[4] ॥ अपदान्त इति किम्। लुठन् किंकरति ॥

पद्मान्युन्मधुलिंहीव सुदंश्यास्यानि सुभ्रुवाम् ।

चेतांसीहाच्छताजुंषि पुंसां स्वःसिन्धुवारिवत् ॥ ९६ ॥

९६. यथा पद्मान्युदूर्ध्वं मधुलिहौ भृङ्गदंपती येषु तान्युन्मधुलिंहि भृङ्गमिथुनयुतानि स्युस्तथेह पुरे सुभ्रुवामास्यानि मुखानि सुदंशि रम्येक्षणद्वन्द्वानि सन्ति । पश्चार्द्धं स्पष्टम् ॥

पिण्ड्ढि गर्वं मुखेनेन्दोः स्वः[1]स्त्रीभ्यः स्वं विशिण्ड्ढि च ।

इति शास्ति वदन्साधु स्त्रीजनेत्र सखीजनः ॥ ९७ ॥

९७. अत्र पुरे सखीजनः साध्वनेकभङ्गीचतुरं यथा स्यादेवं वदन् सन् [5]स्त्रीजने विषये शास्ति शिक्षां दत्ते[6]। कथमित्याह । पिण्ढीत्यादि। अत्युत्कृष्टवृत्तत्वकान्तत्वादिश्रीशालिना मुखेन कृत्वा चन्द्रगर्वस्य चूर्णने तथातिशयितरूपादिश्रिया देवीभ्यः सकाशात्स्वस्य विशिष्टीकरणे च तवाधुनावसर इत्यर्थ इति ॥ "प्रैषानुज्ञा°" [५.४.२९] इत्यादिनात्र पञ्चमी ॥

म्। पुंसां । न् । सुदंशि । अच्छताजुंषि । चेतांसि । उन्मधुलिंहि। इत्यत्र "शिड्हे°[7]" [४०] इत्यादिनानुस्वारः ॥ ञ्नामिति बहुवचनात् सुदंशीत्यत्र णत्वं बाधित्वानेनानुस्वार एव ॥ शिड्ह इति किम्। इन्दोः ॥ अपदान्त इत्येव। वदन् साधु ॥ अम्वित्येव। पिण्ड्ढि। शिण्ड्ढि । अत्र पिषशिषोर्हौ तस्य धित्वे षस्य डत्वे च शिड्भावाभ्द्ङ्नकारस्यानुस्वारो न भवति ॥

---

१ सी डी एफ् स्वस्त्री°.

---

१ एफ् कम्बुवत्। न्. २ सी डी धुटिति. ३ एफ् °न्म। रं°. ४ सी डी °न्ते। लु°. ५ सी डी एफ् °जनवि°. ६ एफ् °तेत्र क°. ७ एफ् °ह्नेनुस्वार इत्यनु°.

मृदू रक्तः शुची रम्योभिमाढ्यस्त्रीजनः सुखी ।
अहो रात्रिं च नो वेत्ति स्वारामाजनसंनिभः ॥ ९८ ॥

९८. अस्मिन्पुर आढ्यस्त्रीजनोहो रात्रिं च नो वेत्ति । कीदृक् सन् । मृदुः कोमलपाण्याद्यवयवः कोमलवचनो वा । रक्तः स्वपत्यावनुरागवान् । शुचिरुज्ज्वलाङ्गनेपथ्यः कौटिल्यादिपङ्करहितो वा । रम्यो रूपलावण्याद्यतिशयवान् । सुखी नीरोगत्वसर्वसंपत्तिसामग्र्यादिना सुखितः । अत एव स्वारामाजनसंनिभः स्वर्गस्त्रीसदृशः ॥ अतिसुखितत्वेनोदितमस्तमितं च न जानातीत्यर्थः । स्वारामाजनोप्युक्तविशेषणोपेतो दिनं रात्रिं च न जानाति ॥

स्वारामा । शुची रम्यः । मृदू रक्तः । इत्यत्र "रो रे लुग्°" [४१] इत्यादिना रस्य लुगकारेकारोकाराणां चानन्तराणां दीर्घः ॥ अन्विस्येव । अहो रात्रिम् । अत्र पूर्वमेव रोरुत्वे रेफाभावाल्लुग्दीर्घाभावः सिद्धः ॥

उमामाढिप्रसक्तानां प्रौढानां लीढसौरभः ।
मधुलिड्ढौकते लेढुं मोढात्राव्रूढ आननम् ॥ ९९ ॥

९९. अत्र पुर उमामाढिप्रसक्तानामुमाया गौर्या माढिर्महनं पूजा तत्र प्रसक्तानामासक्तानां प्रौढानामिद्धवयोमन्युकामानां प्रगल्भस्त्रीणामाननं मुखं लेढुमाघ्रातुमाव्रूढ उद्यतः सन् मधुलिट् पूजार्थोपनीतपुंष्पसहचरो भृङ्गो ढौकत आगच्छति यतो मोढा मुखे पद्मभ्रमवान् । कुतः । यतो लीढसौरभ आघ्रातमुखसौगन्ध्यः पूजार्थानीतपुष्पाणि

---

१ सी डी °ढ्यः स्त्री°.

---

१ डी °पताव°. २ सी डी °क्तानां. ३ बी सी डी पफ् °पुष्फस°.

मुक्त्वा सौरभातिशयाढ्यत्वात्प्रौढानां मुखान्याघ्रातुं भृङ्गः पुनः पुनर्ढौकत इत्यर्थः ॥

माढि । लीढ । प्रौढानाम् । इत्यत्र "ढस्तड्डे" [४२] इति ढस्य लुगकारेकारोकाराणां च दीर्घः ॥ तड्ड इति किम् । मधुलिड् ढौकते । नायं लुग्यमानढकारनिमित्तो ढः ॥ अदिदुत इत्येव । आवृढः ॥ अन्वित्येव । लेढुम् । मोढा । अत्र गुणे कृते पश्चाड्ढलोपः ॥

न वोढास्य श्रियां स्वर्गो न सोढा वर्णने गुरुः ।
व्यूढोत्तम्भितकेतूत्थैरुत्स्तौतीत्यारवैर्मरुत् ॥ १०० ॥

१००. मरुद्वायुर्व्यूढा विशाला उत्तम्भिताः कोट्यधिपतिगृहादिपूर्ध्वीकृता ये केतवो ध्वजास्तेभ्य उत्थोत्थानं येषां तैरारवैः पटत्पटिति[1] शब्दैः कृत्वोत्स्तौतीव[2] प्राबल्येन वर्णयतीव । अर्थादिदं पुरम् । कथमित्याह । अस्य पुरस्य श्रियां प्रासादादिलक्ष्मीणां स्वर्गोपि न वोढा न धारयत्यत एवास्य वर्णने गुरुर्वाचस्पतिरपि न सोढा[3] न समर्थ[4] इति ॥

असंस्तब्धः सुसंस्थानः सूत्स्थानः सैप ते पतिः ।
मुग्धास्मिन्निति सख्युक्त्योत्तिष्ठन्त्यङ्गमुदस्तभत् ॥ १०१ ॥

१०१. किल काचिन्नायिका मुग्धा पत्यौ समीपमागतेपि मुग्धत्वादभ्युत्थानादिप्रतिपत्तिं न कृतवतीति सख्या शिक्षार्थमुक्ता । यथा हे सखि[5] स निरुपमगुणैः[6] सर्वत्र प्रसिद्ध एष प्रत्यक्षस्ते तव पतिः सुष्ठु त्वदीयचित्तावर्जनापेक्षित्वेन[7] शोभनैर्मूर्ध्वं[8] स्थानमवस्थितिर्यस्य[9] स सूत्स्थान

---

१ बी सी °व्युत्कोत्ति°.

---

१ एफ् °त्पटेति. २ ए °तीतिव. ३ ए °ढा स°. ४ एफ् °र्थः ॥. ५ डी °खि नि°. ६ डी °णैः स स°. ७ सी °पेक्षत्वे°. ८ एफ् °नमुदूर्ध्वं. ९ सी डी °मूर्ध्वस्था°.

ऊर्ध्वोस्ति । कीदृक् सन् । सुष्ठु सर्वसामु[1]द्रिकलक्षणोपेतत्वेन शोभन[2] संस्थानं शरी[3]रावयवरचना यस्य स सुसं[4]स्थानः सुरूप इत्यर्थः । तथा-संस्तब्धोनहंकारस्त्वयि सप्रश्रय इत्यर्थः । तदेतदभ्युत्थानाय त्वमभ्यु-त्तिष्ठेति व्यञ्जितमित्येवंप्रकारेणास्मिन्पुरे सख्यु[5]क्त्या वयस्याशिक्षयोत्ति-ष्ठन्ती पत्युरभ्युत्थानायोर्ध्वीभवन्ती मुग्धा नवोढा व्यङ्गमुदस्तभर्तृ[6] स्तम्भरहितं चक्रे । विनीतं चकारेत्यर्थः । यद्वा । किल कां चन मुग्धां नि-कटमायान्तं पतिं दृष्ट्वा सद्यः स्मरोद्रेकात्स्तम्भेन सात्विकविकारेणाक्रा[7]न्तां किंकर्तव्यतामूढामभ्युत्थानादिप्रतिपत्तिमकुर्वाणां निकटस्था सख्येवमाह । यथा हे सखि[8] स प्रसिद्ध एष प्रत्यक्षस्ते पतिरसंस्तब्धस्त्वद्दर्शनेपि गा-म्भीर्यातिरेकात्स्तम्भरहितोज्ञेयस्तम्[9]भविकार इत्यर्थः । अत एव सुसं-स्थानोविकृताकार[10]ः सन् सूत्स्थान ऊर्ध्वस्थितोस्ति । एतेनेदं व्यञ्जितं यदुत सखीजनमेलापकेपि त्वं मुग्धतयागम्भीरत्वात्पतिदर्शने स्तम्भा-न्वितात एव विकृ[11]तोपविष्टा चाभूरितीत्येवंप्रकारेणास्मिन्पुरे सख्यु[12]क्त्या मुग्धोत्तिष्ठन्ती पत्युरभ्युत्थानायोर्ध्वीभवन्ती सत्यङ्गमुदस्तभर्तृ[13] स्तम्भ-रहितं चक्रे । एवं व्यङ्ग्योक्त्या सख्या तत्कामचेष्टायां प्रकटितायां पत्युरभ्युत्थानायोत्तिष्ठन्ती स्तम्भ[14]संरम्भमाच्छादयामासेत्यर्थः ॥

सोढा । वोढा । इत्यत्र "सहिवहेः०" [४३] इत्यादिना ढस्य लुगवर्णस्य चौ-कारः ॥ अवर्णस्येति किम् । व्यूढ ॥

केतूत्थैः । उत्तम्भित । इत्यत्र "उदःस्था०" [४४] इत्यादिना सस्य लुक् ॥ उद इति किम्[15] । सुसंस्था[16]नः । असंस्तब्धः ॥ स्थास्तम्भ इति किम् । उत्स्तौति ॥

---

१ सी °मुद्रक°. २ सी °भनम°. ३ सी डी °राघव°. ४ एफ् °सुम्था°. ५ बी सी °ख्युक्तावयस्याः शि°. ६ सी डी °त् संरम्भ°. ७ ए सी °क्रान्तं कि°. ८ सी °खि प्र°. ९ डी °स्तम्भोवि°. १० सी डी °रः सू°. ११ एफ् °कृता-विकारायानासत्युप°. १२ सी °ख्युक्ततामु°. १३ सी डी °त् संरम्भ°. १४ डी °म्भमा°. १५ एफ् °म् । अ°. १६ सी डी °स्थानम् ।.

स इति किम् । उपतिष्ठन्ती । उदस्तभत् ॥ प्रत्यासत्तेः स्थास्तम्भविशेषणस्यैवोदो ग्रहणादिह न भवति । उस्स्थानः । अत्र उदः स्थानेत्यनेन नाम्ना सिद्धता-व्यभावरूपेण संबन्धो न तु पूर्वापरीभूतमात्रवाचिना धातुनेति ॥ सूत्स्थानः ॥

सैष ते पतिः इत्यत्र "तदः सेः०" [४५] इत्यादिना सेर्लुक् ॥

यद्विक्रमः सकोप्यस्य यत्प्रस प्रभुतागुणः ।
इन्द्र एष प्रैष वास्मादद्राक्ष्येषोत्र स्तुतिक्रमः ॥ १०२ ॥

१०२. अत्र पुरे राज्ञि नृपविषय एष एवंविधः स्तुतिक्रमो वर्णनारीतिर्भवति । यथा यद्यस्माद्धेतोरस्य राज्ञो विक्रमः शौर्यं सको यक इन्द्रे । श्रूयते स इत्यर्थः । तस्मादेष राजा इन्द्रः शक्रः । तथा यद्यस्मादस्य राज्ञः प्रभुतागुण आज्ञैश्वर्यं प्रस य इन्द्रे श्रूयते । तस्मात्प्रकृष्ट इत्यर्थः । तस्मात्प्रैष वास्मादस्मादिन्द्रात् प्रकृष्टो वैष राजेति ॥

एषकः किं सकः स्वर्गस्तस्यानेषो हि डम्बरः ।
सोप्यसः किमभूत्सिद्धैरत्रैवं क्रियते भ्रमः ॥ १०३ ॥

१०३. अनेकाद्भुतश्रीनिधानत्वादत्र पुरविषये सिद्धैर्देवभेदैरेवमेवंविधो भ्रमः संशयः क्रियते यथा सकः सदा दृष्टपूर्वः स्वर्गो नाकः किमेषकः प्रत्यक्षेणोपलभ्यमानपुरलक्षणः । यद्वा । नायं स्वर्गः । कुत इत्याह । तस्यानेषो हि डम्बर इति हि स्फुटं तस्य स्वर्गस्य डम्बरे[2] आडम्बरो लक्ष्मीविलासोनेषः प्रत्यक्षेणोपलभ्यमानेदंपुराडम्बर एष न[3] एषोनेषोन्योन्यादृशो[4] हीन इत्यर्थः । तत्किं सोप्यसोभूत् । अपिरेवार्थे । स एव स्वर्ग एव । किं न सोसोन्यः स्वरूपं परित्यज्य रूपान्तरवानभूत् । अनेषे[5] इत्यस्य च प्रत्यक्षोपलभ्यमानपत्तनाडम्बराद्विलक्षणाडम्बरमात्रवाचित्वेन[6]

---

१ ए °स्मादि°. २ एफ् °र ल°. ३ डी न न ए°. ४ एफ् °षोन्यो°. ५ सी °ष-बएषस्य. डी °ष एष इ°. ६ सीडी °त्वे य°.

यद्यपि स्वर्गाडम्बरोधिकोपि वाच्यः स्यात् तथापि पत्तनाडम्बरात्स्वर्गाडम्बरो हीन एव ज्ञेयः। पत्तनस्यात्र वर्ण्यत्वात् ॥

एष प्रैषः। सकोपि। प्रैष वा ॥ प्रस प्रभुं। इत्यत्र "एतदश्च°" [४६] इत्यादिना सेर्लुक्[1] ॥ अनञ्नसमास इति किम्। एषकः किम्। सकः स्वर्गः। अनेषो हि[2]। असः किम् ॥ व्यञ्जन इति किम्। एषोत्र[3][4]। सोपि ॥

सरूपयुक्ताः सद्माग्रे राजन्त्यत्र कुलस्त्रियः।
व्यञ्जनाग्रे पञ्चमान्तस्थावद्वालोपशोभिताः ॥ १०४ ॥

१०४. अत्र पुरे वालैः केशैः[5]। बवयोरैक्याद्बालैरर्भकैर्वा। उपशोभिताः कुलस्त्रियः सद्माग्रे गृहद्वारदेशे सरूपयुक्ताः[6] सरूपैः समानरूपैर्भर्तृभिर्युताः सत्यो राजन्ति[7] शोभन्ते। भवति हि शोभातिशयः स्त्रीणां समानभर्तृयुक्तानाम्। यथा वा विकल्पेन लोपो वालोपस्तेन शोभिता[8] वालोपशोभिताः पञ्चमान्तस्था ङ्ञणनमयरलवा वर्णा व्यञ्जनाग्रे व्यञ्जनात्पराः सरूपयुक्ताः सरूपैः[9] समानरूपैर्ङ्ञणनमयरलवैर्युक्ताः[10] सत्यो[सन्तो?] राजन्ति ॥

कुञ्चो ङ्ग्रौ कुंङ्गौ[11] कुङ्ङौ[12]। अदितेरयमादित्यः स देवतास्य आदित्यः स्थालीपाक आदित्य्य[13] इति वा। इत्यादिषु हि व्यञ्जनात्पराः पञ्चमान्तस्थाः सरूपेषु[14] परेषु "व्यञ्जनात्पञ्चमा°" [४७] इत्यादिना वा लुप्यन्ते। एतेन "व्यञ्जनात्पञ्चमा°" [४७] इत्यादिसूत्रोदाहरणानि सर्वाण्यपि सूचितानि ॥

---

१ एफ् °भुतेत्य°. २ सी डी हि सकः कि°.। एफ् हि। असोवाच्य°. ३ सी °षोमोपि॥ स°. ४ ए °त्र ॥. ५ सी °शैर्बवयो° डी शैर्बवयो°. ६ बी °क्ताः सह स°. ७ ए बी एफ् °न्ति भ°. ८ एफ् °भिताः पञ्च°. ९ सी °रूपैर्ङ°. १० डी °नयुक्तैरू°. ११ डी कुंङ्गौ क्रुंङ्गौ. १२ सी कुङ्गौ १३ डी °दित्या°. १४ एफ् °षु व्य°.

धर्मे शिण्ढि गुणान्शिण्ड्ढि पिण्ढ्यघं पिण्ड्ढि दुष्कलिम्[1] ।
प्रत्तं गृहाण नाप्रत्त्तं शिक्षात्रेति विपश्चिताम् ॥ १०५ ॥

१०५. शिण्ढि सदाचाराचरणेन विशिष्टीकुरु । पिण्ढि चूर्णय । प्रत्तं स्वामिना दत्तम् । नाप्रत्त्तम् । नञ् मार्थे । अदत्तं मा गृहाणेत्यर्थः[1] । शिष्टं स्पष्टम् ॥

शार्ङ्गिणः सक्थ्न उद्भूतां गुणदप्त्रीं सुरस्त्रियम् ।
अत्र नार्यः कलाबोद्ध्र्यो विजयन्ते निजैर्गुणैः ॥ १०६ ॥

१०६. अत्र पुरे कला गीतनृत्ताद्याश्चतुःषष्टिस्तासां बोद्ध्र्यो ज्ञात्र्यो[2] [3] नार्यः सुरस्त्रियं स्वर्वेश्यां निजैर्गुणै रूपादिभिर्विजयन्ते उत्कृष्टत्वात्परा-[4] भवन्ति । किंभूताम् । शार्ङ्गिणो विष्णोः सक्थ्न ऊरुप्रदेशादुद्भूतां संजाताम् । हरेः किलातितीव्रं तपस्तपस्यतः क्षोभाय स्वपदापहारक्षुभितेनेन्द्रेणाप्सरसः प्रेषितास्ताश्च क्षोभनाय नृत्तादिविलासान् कुर्वतीर्दृष्ट्वा[5] तद्दर्पापनोदाय हरिणा निजसक्थि विदार्यागताप्सरोरूपजैत्री उर्वशीनाम्नी स्त्री निर्ममे इति लोकोक्तिः । अत एव गुणदप्त्रीं गुणै रूपलावण्यादिभिर्दर्पिष्ठामपि ॥[6]

प्रत्तं प्रत्त्तम् । शिण्ढि शिण्ड्ढि । पिण्ढि पिण्ड्ढि । इत्यत्र "धुटो धुटि स्वे वा" [४८] इति धुटो लुग्वा ॥ धुट इति किम् । शार्ङ्गिणः ॥ धुटीति किम् । सक्थ्नः ॥ स्व इति किम् । दप्त्रीम् ॥ व्यञ्जनादित्येव । बोद्ध्र्यः ॥[7]

---

१ सी डी °ष्कलम्.

---

१ डी एफ् °र्थः । शेषं स्प°. २ एफ् °नृत्याद्या°. ३ एफ् °षष्टिकलास्ता°. ४ डी °र्वेशां नि°. ५ एफ् नृत्यादि°. ६ एफ् °ष्ठामिति ॥. ७ एफ् °ङ्गिणो ॥ धु°.

अस्तब्धा दुग्धशुद्धात्मन्मा लज्जस्व प्रगल्भ्यताम् ।
पिण्ड्ढि मानं सपत्नीनां मुग्धास्मिन्निति पाठ्यते ॥ १०७ ॥

१०७. अस्मिन्पुरे मुग्धा नवोढा पाठ्यते सखीभिः शिक्ष्यते । कथमित्याह । हे दुग्धशुद्धात्मन्नकुटिलाशये भर्तुः समीपागमे मा लज्जस्व[1] किं तु प्रगल्भ्यतां[2] शृङ्गाररसारस्वकलाकौशलप्रकाशनेन प्रगल्भीभूयताम् । ततश्च प्रेयसोतिवल्लभीभवनेन सपत्नीनां मानं सौभाग्यविषयं[3] गर्वं पिण्ढि चूर्णयेति । यतोस्तब्धा विनीता । यो ह्यस्तब्धो विनीतः स्यात्स[4] मुग्धो[5] मूर्खोप्युपाध्यायेन पाठ्यते ॥

लज्जस्व । दुग्ध । मुग्धा । पिण्ड्ढि । शुद्ध । अस्तब्धा । इत्यत्र "तृतीयः०" [४९] इत्यादिना धुटः स्थानि[6]प्रत्यासन्नस्तृतीयः । तृतीयचतुर्थ इति किम् । पाठ्यते ॥ धुट इत्येव । प्रगल्भ्यताम् ॥

षट्कर्माणोत्र वाक्पूतास्तत्तद्विद्याककुप्श्रुताः ।
विश्वामित्रप्रभाच्छेदे मैत्रावरुणनिष्ठुराः ॥ १०८ ॥

१०८. षट् कर्माणि यजनयाजनाध्ययनाध्यापनदानप्रतिग्रहलक्षणानि प्रतिदिनकृत्यानि येषां ते षट्कर्माणो द्विजा अत्र पुरे सन्ति । कीदृशा वाक्पूताः सत्यमितवाक्त्वेन वचनेन पवित्राः[7] । एतेन सदनुष्ठानवत्त्वमुपलक्षितम् । तथा तास्ता अनेकप्रकारत्वेन प्रसिद्धा या विद्याः शिक्षाकल्पादयश्चतुर्दश ताभिः ककुप्सु दिक्षु श्रुता विख्याताः । एतेन ज्ञानित्वोक्तिः । अत एव विश्वामित्रप्रभाच्छेदे विश्वस्योपद्रवकारित्वेनामित्राः शत्रवो विश्वामित्रा दैत्यराक्षसादयस्त एवान्यायकारित्वाद्विश्वामित्रो गाधिसूनुस्तस्य

---

१ एफ् °स्व प्र°. २ सी °य त°. ३ सी डी °यं सर्व. ४ सी डी °त्स मू°. ५ एफ् °ग्धोपि मू°. ६ सी स्थानप्र°. डी स्थानेप्र°. ७ एफ् °वित्रिताः ।.

यः प्रभाच्छेदः प्रतापोच्छेदस्तत्र मैत्रावरुणनिष्ठुरा उर्वश्यां मित्रावरुणाभ्यां जातत्वान्मित्रावरुणयोरयमपत्यत्वेन मैत्रावरुणो वशिष्ठस्तद्वन्निष्ठुराः प्रचण्डाः। वशिष्ठो ह्यर्बुदाश्रमस्थो विश्वामित्रेण[2] राज्ञार्बुदागतेनापहृताया नन्दिनीधेनोः प्रत्याहरणाय महायागं कृत्वाग्निकुण्डे चतुर्हस्तं चतुर्वेकं कोपावेशात् हुमित्युच्चारयन्तं तेजस्विनं महाभटं निष्पादितवान्।

स जित्वा कौशिकं जन्ये धेनुं प्रत्याहरन्मुनेः।

प्रीत्युन्मुखात् प्रमाराख्यां प्राप प्राज्यैर्वरैः सह। इति।

यथा वैसिष्ठेन[3] महाज्ञानक्रियाबलेन विश्वामित्रस्य माहात्म्यमपहृतमेवं विश्वोपद्रवकारिणां दैत्यादीनां दर्पमपहरन्त इत्यर्थः। यद्वा। षट् कर्माणि देवपूजागुरूपास्तिस्वाध्यायसंयमतपोदानरूपाणि प्रतिदिनकृत्यानि येषां ते षट्कर्माणः[4] परमश्रावका अत्र सन्ति। किंभूता वाक्पूतास्तथा तत्तयानेकविधत्वेन प्रसिद्धया विद्यया श्रुतज्ञानेर्न मतिज्ञानेन वा ककुप्सु श्रुता अत एव विश्वे समस्ता येमित्रा रागद्वेषाद्यन्तरङ्गशत्रवस्त एव विश्वामित्रस्तत्प्रभाच्छेदे[5] मैत्रावरुणनिष्ठुराः॥

वाक्पूताः। प्रभाच्छेदे। षट्कर्माणः। तत्तत्। ककुप्श्रुताः। अमित्र। इत्यत्र "अघोषे०" [५०] इत्यादिना प्रथमः॥ अघोष इति किम्। विद्या[6]॥ अशिट इति किम्। निष्ठुराः॥

अवाक् सुवाग् सतृट् निस्तृड् सलुप् निर्लुब् विमुत्समुद्।
देहभागमरैः सध्यङ् भवत्यत्राद्भुतास्पदे॥ १०९॥

१०९. अत्र पुरेवाक् जडजिह्वत्वेन कुत्सितवाग् मूकत्वेन वाग्रहितो

---

१ बी वसिष्ठ°. २. सी डी °त्रेणार्बु°. ३ सी डी एफ् वशिष्ठे°. ४ एफ् °न वा. ५ सी डी °मित्रास्त°. ६ एफ् °द्याः॥.

[redacted]ा देहभाक् प्राण्युपाध्यायमन्त्रौषधिदेवतादिप्रभावेण सुवाग्। संस्कृत-[redacted]वचनो भवति। तथा सतृट् धनधान्यादिषु सतृष्णो निस्तृड् स्वर्ण-रूप्यादिसिद्ध्या पूर्णमनोरथत्वाद्विगतस्पृहः। तथा सलुप् शरीरावयव-च्छेदवान् निर्लुब् देवतादिप्रभावेण पूर्णाङ्गावयवः। तथा विमुत् रोगात-[redacted]ादिना गतहर्षः समुद् महावैद्यादिसंपत्त्या विगतरोगाद्युपद्रवत्वात्स-[redacted]र्षो भवति। अत एवात्र देहभागमरैर्देवैः सध्यङ् समो भवति। देवा [redacted]अपि हि सुवाचो निस्तृषो निर्लुपः समुदश्च स्युः। यतोऽद्भुतास्पदे महो-[redacted]पाध्यायसप्रत्ययमन्त्रौषधीदेवतादिजनितानामद्भुतानां स्थाने॥

अवाक् सुवाग्। सतृट् निस्तृड्। विमुत् समुद्। सलुप् निर्लुब्। अत्र "विरामे वा" [५१] इति वा प्रथमः॥ विराम इति किम्। देहभागमरैः॥ धुट इत्येव। सध्यङ्॥

कण्ठलग्नाः सदा स्त्रीणाम् खेलन्ति इह षिङ्गकाः।
विरामे न प्रवर्तन्ते कदाचित्संधयो यथा॥ ११०॥

११०. सिन्वन्ति विलासान् "भृङ्गशार्ङ्गादयः" इति गप्रत्ययान्तः पञ्चमोपान्त्यः षिङ्ग इति निपातः। यद्वा। सिटानादरेण गच्छति गायति वा "पृषोदरादयः" [३.२.१५५] इति षत्वे षिङ्ग इति टवर्गीयतृतीयोपा-न्त्यः। अज्ञातेर्थे कपि षिङ्गका भुजङ्गाः स्त्रीणां कण्ठलग्नाः कण्ठाश्लिष्टाः सन्त इह पुरे सदा खेलन्ति क्रीडन्ति। यथा विरामे वर्णानां विरतौ सति संधयः संधिकार्याणि "न संधिः" [१.३.५२] इति प्रतिषेधात्कदाचिन्न प्रव-र्तन्ते। तथा विरामे खेलनाभिवृत्तिविषये न प्रवर्तन्ते नोद्यच्छन्ति॥

खेलन्ति इह। स्त्रीणाम् खेलन्ति। इत्यत्र "न संधिः" [५२] इति संध्य-भावः॥ विरामे न प्रवर्तन्ते कदाचित्संधयो यथेत्यनेन चोपमानेन ते आहुः। तद् लुनाति। भवान् लुनाति इत्यादीनि शेषोदाहरणानि ज्ञापितानि॥

---

१ एफ् °ताम्र° २ सी त धा°. ३ बी °ड् सुवर्ण°. ४ एफ् °हाविद्या°. ५ सी डी °महौष°. ६ °पधदे°. ७ एफ् °ज्ञातार्थे. ८ सी °ति नसंधिभा°. ९ सी डी °त्यादिशे°.

यदि स्त्रीणां श्रुतास्मिन् गीर्यदि दृष्टा मुखेन्दवः ।
कलः क्वाणः खरः पिक्याः फल्गुश्चन्द्रोपि तर्क्यते ॥ १११ ॥

१११. अस्मिन्पुरे स्त्रीणां यदि गीर्वाणी श्रुता तदा पिक्याः कोकिलायाः कलो मधुरोपि क्वाणः शब्दः खरः कठोरस्तर्क्यते । अर्थाल्लोकैः । तथा स्त्रीणां मुखेन्दवो यदि दृष्टास्तदास्तां तावदन्यः कमलादिर्यावच्चन्द्रोपि सकलजगदाह्लादनहेतुकत्वेन[1] सर्वत्र प्रसिद्ध इन्दुरपि फल्गुर्निरर्थकस्तर्क्यते । स्त्रीमुखेन्दुभिरेव सर्वलोकाह्लादनलक्षणस्य चन्द्रकार्यस्य[2] कृतत्वाच्चन्द्रेण न किंचित्कार्यमिति लोकैर्विमृश्यत इत्यर्थः ॥

वसन्ताद्यृतुभिः सर्वैर्युगपत्पर्युपासिते ।
प्रार्छन्ति क्रीडयोद्याने नार्पत्या इह नार्कुलैः ॥ ११२ ॥

११२. नृपतेरपत्यानि "अनि[3] दम्यणि[4]°" [६.१.१५] इत्यादिना ण्ये नार्पत्या राजकुमारा नार्कुलैर्नृकुल[5] उपचाराद्गुणोपेतक्षत्रियवंशे[6] भवैः पौरुषोपेतक्षत्रियकुमारैः सह क्रीडया गेन्दुकक्रीडादिकया हेतुनोद्याने प्रार्च्छन्ति गच्छन्ति । यतः कीदृशे सर्वैः षड्भिर्वसन्ताद्यृतुभिर्युगपत्समकालं पर्युपासिते सेविते । सर्वक्रीडार्हरामणीयक इत्यर्थः ॥

विरामे । मुखेन्दवः । अघोषे । कलः क्वाणः खरः पिक्याः फल्गुः । ऋतुभिः सर्वैः इत्यत्र "रः पदान्ते°" [५३] इत्यादिर्ना रस्य विसर्गः ॥ फल्गुश्चन्द्र इत्यादिषु तु शादय एवापवादत्वात्स्युः ॥ पदान्त इति किम् । तर्क्यते । सर्वैः ॥ कथं नार्पत्याः नार्कुलैः वसन्ताद्यर्तुभिः प्रार्च्छन्तीत्यादि । असिद्धं बहिरङ्गमन्तरङ्गे [न्या० सू० २०] इति वृद्धेरारादेशाश्रयस्य[10] रेफस्यासिद्धत्वाद्विसर्गो न

१ एफ् °तुत्वे°. २ एफ् °स्य कर्नृत्वा°. ३ एफ् अणि द°. ४ °म्यण् इ° ?. ५ सी डी °कुलै उ०. एफ् °कुलैरुप°. ६ डी °वंशभ°. ७ डी °दृशैः स°. ८ एफ् °ना वि°. ९ एफ् °ङ्ग इ°. १० ए सी डी एफ् वृध्यरा°.

स्यात् । एवं क्रेष्पावपि ॥ तयोरिति किम् । सर्वैर्युगपत् । अन्वित्यधिकाराद् गीः इत्यादिषु दीर्घत्वे[1] कृते पश्चाद्विसर्गः । अन्यथा हि पूर्वं विसर्गे कृत इरुरोरभावाद्दी- र्घो न स्यात् ॥

प्रभुकार्येषु धूःख्यातैः क्षत्रियैः प्सातसाध्वसैः ।
भात्यत्र श्रीमतां द्वारं खड्गिभिः त्सरुपाणिभिः ॥ ११३ ॥

११३. अत्र[3] पुरे श्रीमतां द्वारं सौधबहिर्भागः क्षत्रियैः कृत्वा भाति । कीदृशैः । शक्तिस्वामिभक्त्यतिशयेन प्रभुकार्येषु स्वामिकृत्येषु धूःख्यातैः धुर्यादौ प्रसिद्धैः । प्सातसाध्वसैर्ग्रस्तभयैः । शूरत्वेन निर्भयै- रित्यर्थः । खड्गिभिः खड्गग्रहणान्वितैः खड्गे पार्श्वस्थेपि खड्गिन उच्यन्ते तन्निराकरणायाह । त्सरुः खड्गमुष्टिः पाणौ येषां तैः खड्गव्यग्रकरैः । धनिनां हि सौधद्वारे रक्षार्थं खड्गव्यग्रकरामहाभटास्तिष्ठन्ति ॥

धूःख्यातैः । इत्यत्र "ख्यागि" [५४] इति रस्य विसर्ग एव ॥

खड्गिभिः त्सरु । क्षत्रियैः प्सात । ख्यातैः क्षत्रियैः । इत्यत्र "शिट्यघोषात्" [५५] इति रस्य विसर्ग एव ॥

मदाम्भश्श्योतिनोत्रेभा लावण्याम्भश्श्च्युतः[1] स्त्रियः ।
दानाम्भःश्च्युत्करा[2]श्चाढ्या धनं निष्ठ्यूतवद्विदुः ॥ ११४ ॥

११४. अत्र पुर इभा गजा मदाम्भश्श्योतिनो मदजलस्राविणो[4] मदो- न्मत्ताः सन्ति । तथा स्त्रियो लावण्याम्भश्श्च्युतो[5] लावण्यपात्राणिसन्ति । तथाढ्या धनिनो दानं हि जलदानपूर्वं दीयत इति स्मृतेर्दानाम्भःश्च्यु-[6] दानस्य जलं क्षरन् करो हस्तो येषां ते तथा[7] सन्तो धनमुदारत्वान्नि-

१ एफ् °ण्याम्भःश्च्युतः°. २ एफ् °नाम्भश्श्च्युत्क°.

१ एफ् °त्वे प°. २ बी °भावत्वाद्दी°. ३ एफ् अस्मिन्पु°. ४ All mss. read जलश्राविणः. ५ एफ् °ण्याम्भः श्च्युतो. ६ एफ् °नाम्भश्च्यु°. ७ सी डी °था रमतो ध°.

छ्यूतवच्छ्लेष्मवद्विदुर्जानन्ति । लीलयैवार्थिभ्यो वाञ्छितमर्थं ददतीत्यर्थः । एतेनार्थकामधर्मसंपद उक्ताः ॥

निष्ठ्यूतांशुषु दृष्ट्वात्र रत्नवेदीषु वाणिनीः ।
निःष्ठ्यूताश्रूस्खलद्वाचस्स्खलद्दृष्टीर्न कः स्खलेत् ॥ ११५ ॥

११५. अत्र पुरे वाणिनीश्छेका[1] मत्ताश्च विलासिनीर्दृष्ट्वा कः पुमान् न स्खलेद्धैर्यान्न पतेत् । यतो निष्ठ्यूता उन्मुक्ता अंशवः किरणा यकाभिस्तासु[2] रत्नवेदीषु गृहद्वारबहिर्देशवर्तिमणिमयवितर्दिषु स्थितास्तथा निःष्ठ्यूतानि मुक्तान्यश्रूणि मदवशान्नेत्रजलानि यकाभिस्ताः । तथा स्खलन्ती मदादर्धोक्तेपि विरमन्ती वाक् यासां ताः । तथा[3] स्खलन्ती मदेन साश्रुत्वाद् घूर्णमानत्वाच्च पुरस्थाखिलपदार्थग्रहणेपि संकुचन्ती दृष्टिर्यासां ताश्च । मदे हि व्यभिचारिभावेश्रुक्षरणवाक्स्खलनलक्षणा अनुभावाः स्युस्तत्कार्यत्वादेषाम् । यदुक्तम् ।

हर्षोत्कर्षोमदः पानात्स्खलदङ्गवचोगतिः । इत्यादि ॥

मदाम्भश्च्योतिनः । निष्ठ्यूतवत्[6] । निःष्ठ्यूताश्रूस्खलत् । इत्यत्र "व्यत्यये लुग्वा" [५६] इति रस्य लुग्वा ॥ पक्षे । अम्भश्श्च्युतः । दानाम्भःश्च्युत् । निष्ठ्यूतं । निःष्ठ्यूत । वार्चस्स्खलत् । कःस्खलेत् ॥

गीर्षु चेतःसु च स्वच्छा महत्सु वरिवस्यकाः ।
धूर्षूचितासु च दृढा राजद्वार्षु नरा इह ॥ ११६ ॥

११६. इह पुरे राजद्वार्षु नृपप्रासादद्वारेषु विज्ञापकानां विज्ञप्तिवि-

१ डी °श्रूस्स्खल°. २ सी डी °तस्सु.

[1] एफ् °श्छेकम°. २ बी सी डी °निनिर्मुक्ता°. ३ एफ् °था म°. ४ सी डी °रः स्था°. ५ बी सी डी °दार्थाग्र°. ६ ए सी डी एफ् निष्ठ्यू°. ७ ए °त । वा° ८ ए °चःस्खल°.

धये नराः प्रतीहाराः सन्ति । किंविधाः । उचितासु योग्यासु धूर्षु योग्यविज्ञापनादिषु राजकार्यप्राग्भारेषु दृढा धारणसमर्था एवंविधा अप्यविनीतौ[1] विज्ञापकलोकवैमुख्यायैव[2] स्युस्तन्निराकरणायाह । महत्सु पूजार्हेषु वरिवस्यका उचितासनदानादिना सन्मानका विनीता इत्यर्थः । कायेन विनीता अपि वचसा मनसा[3] चाविनीता विज्ञापकानां वैमुख्यायैव स्युस्तन्निराकरणायाह । गीर्षु चेर्तःसु[4] च स्वच्छा[5] अकुटिलवचसोकुटिलाशयाश्चेत्यर्थः ॥

गीर्षु । धूर्षु । द्वार्षु । इत्यत्र "अरोः सुपि रः" [५७] इति रेफ एव । अरोरिति किम् । चेर्तःसु[6] ॥ र इत्येव । महत्सु ॥

गीर्पतिर्गीःपतिः सत्यमहर्पतिरहःपतिः ।
वाक्तेजोभ्राजिलोकेस्मिन्कौ हि गीःपत्यहःपती ॥ ११७ ॥

११७. अत्र प्रथमौ गीर्पत्यहर्पतिशब्दावनुवाद्यौ द्वितीयौ तु विधेयौ । [redacted]थाहि गीर्पतिर्वाचस्पतिः[7] सत्यमवितथं गीःपतिर्गिरां वाचां पतिः स्वामीति [redacted]न्वर्थस्तेनान्वितोस्तीत्यर्थः । तथाहर्पतिर्दिनकरः सत्यमहःपतिस्ते-[redacted]भिरह्नां कारकत्वाद्यथार्थोह्नां पतिश्चास्ति । परमस्मिन्पुरे जने वाक्ते-[redacted]ोभ्राजि वाणीप्रतापाभ्यां सर्वोत्कृष्टत्वाच्छोभमाने सति गीःपत्यहःपती हि स्फुटं कौ । न कावपीत्यर्थः । इति काका व्याख्या ॥

त्वं भुवो धूर्पतिः कीर्तेर्धूःपतिर्धूःपतिः श्रियः ।
प्रचेतो राजन् प्रचेता राजन्नत्रेति गीर्नृणाम् ॥ ११८ ॥

११८. अत्र पुरे गीरस्त्यर्थात् राज्ञि विषये । कथमित्याह । हे

---

१ बी °ता श°. २ ए एफ् °लोके वै°. ३ ए सी °सा वावि°. एफ् °सावि°.
४ डी °तस्सु च. ५ सी °च्छा कुटिलवचसोकु°. एफ् °च्छा अकुटिलाशया इत्य°.
६ सी डी °तस्सु ॥. ७ एफ् गीःपतिवाच°.

प्रचेत[1] औदार्यधार्मिकत्वादिगुणैः प्रकृष्टमनस्कात एव प्रचेता वरुणतुल्य तथा हे राजन् सौम्यत्वेन[2] चन्द्रतुल्य हे राजन्नृप त्वं भुवः पृथ्व्या धूर्पतिर्धूर्यानमुखं धूरिव धूः प्रथमः स चासौ पतिश्च धूर्पतिः । मुख्य-स्वामीत्यर्थः । यद्वा धूर्भारस्तस्याः पतिर्धूर्पतिः । नित्यसापेक्षत्वात्समासः । भुवः कार्यप्राग्भारप्रभुरित्यर्थः । अत एव श्रियो राज्यलक्ष्म्या[3] धूःपतिः । अत एव च कीर्तेर्धूष्पतिर्वर्तस इति ॥

अहर्पतिः[4] । गीर्पतिः । धूर्पतिः । इत्येतेकृतविसर्गाः प्रचेता राजन्नित्ययं च कृतोत्वाभावो "वाहर्पत्यादयः" [५८] इति वा निपात्याः । पक्षे ॥ अहःपती । अहष्पतिः । गीः पतिः । गीष्पतिः । धूःपतिः । धूष्पतिः । प्रचेतोराजन् ॥

सम्राट्स्वाराट्समस्तावच्छ्रीदवच्छ्रीजुषो जनाः ।
क्षुषोदक्षमगिरश्चास्मिन् सन्तो वाक्पतिसंनिभाः ॥ ११९ ॥

११९. तावच्छब्दः प्रक्रमार्थः । अस्मिन्पुरे सम्राट् राजाधिराजस्ताव-त्स्वाराट्समः परमैश्वर्यादिनेन्द्रतुल्योस्ति । तथा जनाः श्रीदवद्धनद इव श्रीजुषस्तथा सन्तश्च विद्वांसश्च वाक्पतिसंनिभा वाचस्पतितुल्याः सन्ति । यतः क्षोदक्षमाः संगतार्थत्वान्महार्थत्वाच्च विचारसहा गिरो येषां ते । एतेनास्य पुरस्य स्वर्गता व्यञ्जिता ॥

उथ्सर्पत्स्वच्छलावण्याः स्त्रियः प्रेक्ष्यात्र मन्यते ।
अप्सु[1] जाता अप्सरसो जम्भारिर्जलमानुषीः ॥ १२० ॥

१२०. अत्र पुर उथ्सर्पदुल्लसत्स्वच्छं निर्मलं लावण्यं सौन्दर्यं यासां

१ सी अप्सु जा°.

१ ए °चेतस् औ°. सी डी °चेता औ°. २ सी डी °त्वे च°. ३ बी एफ् राजल°. ४ एफ् °तिः । धू°.

ताः स्त्रियो नारीः प्रेक्ष्य जम्भारिरिन्द्रोप्सरसो देवीर्जलमानुषीर्जलमानवीरिव मन्यते । यतः कीदृशीरप्सरसोप्सुजलेषु जाताः समुत्पन्नाः । अप्सरसो हि समुद्रे मथ्यमाने जलाज्जाता इति प्रसिद्धिः । जलमानुष्यश्चाप्स्वेव जायन्तेतो जलमानुषीणामिवात्रत्योच्छलल्लावण्यनायिकापेक्षयात्यन्तं निर्लावण्यत्वादप्सरसां जलमानुषीत्वेन मननमित्यर्थः ॥

क्षुषोदक्षम । तावच्छ्रीदवच्श्री । सम्राट्स्वाराट्समः । उच्छर्पेत्स्वच्छ । अप्सु अप्सरसः । इत्यत्र "शिव्याद्यस्य" [५९] इत्यादिना वा द्वितीयः ॥ आद्यस्येति किम् । अस्मिन्सन्त । शिटीति किम् । वाक्पति ॥

उच्शलच्चामरस्मेराः स्फुरच्छत्रोज्ज्वलाः सदा ।
शंश्वज्झषितदौर्गत्या अस्मिञ्शुशुभिरे श्रियः ॥ १२१ ॥

१२१. अस्मिन्पुरे श्रियो राज्यादिलक्ष्म्यः शुशुभिरे । यतः शंश्वत्सदा झषितं हिंसितं दौर्गत्यं दारिद्र्यं यकाभिस्ताः । एतेन स्वारिपूच्छेद उक्तः। अत एव सदोच्शलन्ति राजादिवीजनायोत्क्षिप्यमाणतयोर्ध्वं गच्छन्ति यानि चामराणि तैः स्मेरा हासान्विता इव विकस्वरा इत्यर्थः । तथा सदा स्फुरन्ति विकस्वराणि यानि च्छत्राणि श्वेतातपत्राणि तैरुज्ज्वलाः । ये हि शश्वज्झषितदौर्गत्याः सदामहर्द्धिकाः स्युस्ते सदोच्शलच्चामरस्मेराः स्फुरच्छत्रोज्ज्वलाश्च सन्तः शोभन्ते ॥

प्रशाश्वरञ्जनं प्रीणञ्झषञ्जकुटिलाशयान् ।
विद्वांछात्रेष्वत्र तत्तञ्जुडुवे गीरिव स्वयम् ॥ १२२ ॥

---

१ ए शम्वज्झ°. २ ए विद्वाच्छात्रे सी विद्वारछात्रे डी विद्वाँश्छात्रे.

---

१ बी सी डी एफ् °मानवी . २ ए °मानुपीरि°. ३ एफ् °स्य द्वितीयो वा इति प्रथमस्य द्वितीयोवा ॥. ४ ए बी नि ॥. ५ ए शश्वत्सदाम्ज्झषित हमि°. ६ सी डी °रिद्र य°. ७ ए दिवीज°. ८ एफ् था स्फु . ९ ए ये श°.

१२२. अत्र पुरे विद्वान् । जातावेकवचनम् । पण्डितजातिश्छात्रेषु विषये तत्तद्यद्यच्छात्रा अध्येतुमिच्छन्ति तत्तद्व्याकरणादि जुहुवे व्याख्यदतो ज्ञायते गीरिव स्वयं मूर्ता सरस्वतीव । कीदृक् सन् । प्रशान् विद्यावलेपादिरहितस्तथा चरन्नतिभूरित्वेन दूरस्थानां छात्राणामध्ययनात् प्रमाद्यतामुत्साहनाय तन्मध्ये विचरंस्तथा चकुटिलाशयान् । चकारवत्कुटिलचित्तान् परस्परमात्सर्यादिना कलहादि कुर्वतश्छात्रानित्यर्थः । झषन् प्रलम्बकम्बया ताडयन्नत एव भव्यरीत्या पाठनेन जनं प्रीणन् । गीरपि प्रशान्ता सर्वत्र स्वेच्छया विहरति चकुटिलाशयान् कुवादिनो झषति[1] निराकरोति जनं प्रीणयति तत्तदनेकविधं शास्त्रजातं व्याख्याति च । यद्वात्र पुरे चरन् कणवृत्त्यै भ्राम्यन् सन् विद्वान्वेदोपाध्यायश्छात्रेषु बैदुषु[2] तत्तद्यद्यदध्येतुमिच्छन्ति तत्तद्वेदशास्त्रं जुहुवे बैटून्पाठितवानित्यर्थः[3] । वेदपाठो हि द्विजैर्भिक्षाभ्रमणं कुर्वद्भिर्विधीयते । शेषं पूर्ववत् ॥

स यज्ञपुरुषः स्पर्द्धामस्मिन् राज्ञा कथं वहेत् ।
द्विषद्याच्ञैकवज्रेण पिष्टं यस्याखिलं यशः ॥ १२३ ॥

१२३. दानैकशौण्डत्वेनात्रत्यराजस्य याच्ञया सर्वथाखण्डितयशस्कत्वादस्मिन् राज्ञात्रत्यनृपेण सह स्पर्धां साम्यं स यज्ञपुरुषो विष्णुः कथं वहेत् । यस्याखिलं यशो द्विषतः शत्रोर्या याच्ञा प्रार्थना सैव यशःशरीरस्य चूर्णकत्वेनैकमद्वितीयं निरुपमं वज्रमशनिस्तेन[4] पिष्टं चूर्णितम् । मित्रादपि याच्ञा लाघवहेतोर्यशः पिनष्टि किं पुनः शत्रोः । विष्णुना[5] तु द्विषन् बलिर्वामनीभूय त्रिपदीं याचित इति ॥

---

१ सी डी °ति ज°. २ एफ् बहुपु. ३ एफ् बहून्पा°. ४ ए °न चू°. ५ ए °ना तद्वि°.

मूर्धन्यत्वं शश्वट्टवट्ठवड्डवड्ढवण्णवत् ।
सूनृतस्फुटवक्तॄणामीट्टे को नेह कोविदः ॥ १२४ ॥

१२४. इह पुरे सूनृतस्फुटवक्तॄणां सत्यप्रकटवादिनां मूर्धन्यत्वं मूर्धस्थायित्वमन्यस्थानस्थाखिलसूनृतस्फुटवक्तृभ्यः प्रधानतामित्यर्थः । कः कोविदो विद्वान्नेट्टे । किं तु सर्वोपि वर्णयतीत्यर्थः । यथा टस्य ठस्य डस्य ढस्य णस्य च मूर्धस्थानभवत्वेन मूर्धन्यत्वं मूर्धस्थानभवत्वं कोविदो वैयाकरण ...वर्णटवर्गरषा मूर्धन्या इति शिक्षापदेन वर्णयति । शब्दश्लेषेणोपमा ॥

तन्वण्डामरतामग्रे कुर्वण्णकुटिलालकाः ।
स्मरोस्मिण्ढौकितधनुर्विश्वमट्टितुमड्डति ॥ १२५ ॥

१२५. स्मरो विश्वमट्टितुं हिण्डितुं विजययात्रां कर्तुमित्यर्थः । अड्डत्युद्यच्छति । कीदृक्सन् । अस्मिन्पुरे वर्तमाना णकुटिलालका णकारवत्कुटिलकेशीः स्त्रीर्जगज्जयायाग्रे कुर्वन् । एतेन सैन्यसंपदुक्ता । तथा ढौकितं जगज्जयाय प्रगुणीकृतं हस्ते गृहीतं धनुर्येन सः । धनुशब्दोत्रोदन्तः । सान्ते तु धन्वनादेशः स्यात् । एतेनास्त्रसंपदुक्ता । ...त एव डांमरतां प्रतापप्रचण्डिमानं तन्वन् विस्तारयन् । योपि नाशस्त्रप्रतापसंपदन्वितो विजिगीषुर्नृपः स्यात्स विश्वं जेतुमड्डतीति ॥

शकारेण योगे । उच्शलत् । अस्मिञ्शुशुभिरे ॥ चवर्गेण । उच्शलच्चामरच्छत्र । उज्वल । शश्वज्झषित । तञ्जुञ्चे । प्रशाञ्जरञनम् । प्रीणञ्झषञ्ञ ॥ ...ण चवर्गेण । याञ्चा । यज्ञ । राज्ञा ॥ पूर्वेण शकारेण परेण च षकारेण प्रतिषेधो वक्ष्यते । पूर्वेण तु षकारेण । पिष्टम् ॥ टवर्गेण । शश्वट्टवट्ठवड्डवड्ढवण्णवत् ॥ अड्ड । अड्डति ॥ अट्टि । अट्टितुम् । तन्वण्डामरताम् । अस्मिण्ढौकित । कुर्वण्ण ॥ पूर्वेण टवर्गेण । ईट्टे । इत्यत्र "तवर्गस्य°" [६०] इत्यादिना चवर्गटवर्गादेशौ ॥

१ पफ़ °स्य मू°. २ सी डी सन् । पुरे ।. ३ प °षुं नृपः. ४ पफ़ °चटवर्गौ°.

कस्मात्पापद्वि[1] दोष्ष्वात्ता प्रश्ने बम्भणिष किं न हि ।
लज्जां[2] वृश्चेति मुग्धायां शिक्षेह प्रियसंनिधौ ॥ १२६ ॥

१२६. इह पुरे प्रियसंनिधौ सति मुग्धायां विषये शिक्षा । अर्थात्सखी-नाम्[1] । कथमित्याह । हे सखि दोष्षु बाहुष्वात्ता भर्त्रा गृहीता सती कस्मात्पापट्षि कुटिलं गच्छसि पत्युः सकाशात्किमिति[2] वक्रीभूय यासीत्यर्थः । तथा प्रश्ने पत्युः पृच्छायां किं किमिति न हि बम्भणिषि नैव[3] भृशं भाषसे । तथा लज्जां वृश्च छिन्द्धीति । मुग्धायामित्यत्र जातावेकवचनम् । अन्यथा दोष्ष्वित्यत्र बहुवचनं नोपपद्येत ॥

चवर्गेण । वृश्च लज्जाम् ॥ षकारेण । दोष्षु ॥ टवर्गेण । पापट्षि ॥ बम्भणिष । इत्यत्र "सस्य शषौ" [६१] इति शषौ ॥

प्रश्ने । अत्र "न शात्" [६२] इति ञो न ॥

नगेड्[3]तुङ्गत्वलक्ष्मीजुद्[4]थूत्कृतद्विड्द्युलिड्ध्वजैः ।
नागेन्दुधवलैः शीर्षैर्विभ्राट्सालोत्र सर्वतः ॥ १२७ ॥

१२७. अत्र पुरे सालः कोट्टः सर्वतः[4] सर्वासु दिक्ष्वस्ति । कीदृग् । नगेड् गिरीशो मेरुस्तस्य या तुङ्गत्वलक्ष्मीरौन्नत्यश्रीस्तां[5] जुषते सेवते यः सः । तथा द्युलिहोत्युच्चप्राकारशिरःस्थत्वेनाकाशस्पृशो ये ध्वजास्तैः कृत्वा थूत्कृतद्विट्[6] थूत्कृतमत्र प्रस्तावादश्वफेनस्तस्य द्विट् जेता । अतिश्वेतकेतुरित्यर्थः[7] । यद्वा थूत्कृतं थूत्करणं द्वेष्टि

स्पर्धते जयति द्वेष्टि द्रुह्यति प्रतिगर्जति ।
आक्रोशत्यवजानाति कदर्थयति निन्दति ।

---

१ सी डी अस्मा°. २ एफ् °ज्जां व्रश्चे°. ३ ए °गेडुङ्ग°. ४ एफ् जुड्थू°.

---

१ सी डी °ती अस्मा°. २ सी डी °त्किमपि व°. ३ सी डी एफ् नैवं भृ°. ४ एफ् °र्वत्र स°. ५ बी °त्यस्य श्री°. ६ सी डी °तम°. ७ एफ् °तुभिरि°.

तमन्वेत्यनुबध्नाति तच्छीलति[1] निषेधति ।
तस्य[2] वानुकरोतीति शब्दाः सादृश्यसूचिनः ॥

इति वचनादनुकरोति ॥ थूत्कृतद्विट्द्युलिडित्यत्र द्युशब्दोपादानाद्दिवं प्रति स्वरामणीयकाहंयुत्वेनावज्ञया द्युलिड्ध्वजैः कृत्वा थूत्कुर्वन्निवेत्यर्थः ॥ तथा यथा नागेट् शेषाहिर्धवलैः[3] शीर्षैः शिरःसहस्रेण विभ्राजते । एवं धवलैः शीर्षाकारत्वेन शीर्षैः कपिशीर्षैः कृत्वा विभ्राट् शोभमानः ॥

सषण्णवतिपाषण्डं हृष्टाश्रमचतुष्टयम् ।
स्थितं षण्णगरीः[1] षण्णां जित्वैतच्चक्रवर्तिनाम् ॥ १२८ ॥

१२८. एतत्पुरं षण्णां चक्रवर्तिनां धुन्धुमारादीनां षट् षट्संख्या नगरी राजधानीर्जित्वा श्रीविशेषेण परिभूय स्थितम् । यतः कीदृग् । षड्दर्शनव्यतिरिक्ताः कुत्सितव्रताचाराः सर्वलिङ्गिनः पाषण्डास्ते च लोकोक्त्या षण्णवतिसंख्यया रूढाः सर्वधर्मसाधनसामग्रीसद्भावेन समग्रस्वस्वधर्मनिर्वाहात्सह षण्णवत्या पाषण्डैर्वर्तते[4] तत् । तथा चत्वारोवयवा यस्य चतुःसमुदायस्य तच्चतुष्टयं हृष्टं[5] प्रमुदितमाश्रमाणां ब्रह्मचारि १गृहि२वानप्रस्थ३भिक्षू४णां चतुष्टयं यत्र तत् । एतेनास्यात्यन्तं महर्द्धिकतोक्ता[6] ॥

द्विषन्षड्ग्राम कामादीँल्लीलया विघ्नशान्तये ।
तीर्थकृत्षोडशः शान्तिः स्मर्यते तल्लयैरिह ॥[2] १२९ ॥

१२९. इह पुरे षोडशस्तीर्थकृत् शान्तिः शान्तिनाथो विघ्नशान्तयेन्तरङ्गाणां रागादीनां बाह्यानां मार्यादीनां चोपद्रवाणामुपशमार्थं[7] तस्मिन्[8]

१ पफ्र °रीष°. २ पफ्र ॥ २९ इति तृतीयपादः ॥ इ°.

१ प बी सी पफ्र °च्छीलं तंनि. २ बी °स्य चानु°. ३ सी डी °लैः शि°. ४ पफ्र °ते इति त°. ५ डी °ष्टं मु°. ६ बी °र्द्धितो°. ७ पफ्र °वाणां चोप°. ८ प °यस्तस्मि°.

शान्तौ लयश्चित्तैकाग्र्यं येषां तैस्तल्लयैर्नरैः स्मर्यते प्रणिधीयते । यतः कीदृक् । षड् नाम । नामेति प्रसिद्धि[1]द्योतको निपातः । षडिति संख्यया प्रसिद्धान् कामादीन् काम १ क्रोध२मान३मद४लोभ५हर्षा६नान्तररिपूँल्लीलया द्विषन्पराभवन् ॥

नगेट्तुङ्गस्वलक्ष्मीजुट्थूत्कृतद्विड्धुलिड्ध्वजैः । नागेड्नु । विभ्राट्सालः । इत्यत्र "पदान्तात्° " [६३] इत्यादिना तवर्गसयोष्टवर्गषौ न ॥ टवर्गादिति किम् । चतुष्टयम् ॥ अनाम्नगरीनवते[3]रिति किम् । षण्णाम् । षण्णगरीः । षण्णवति ॥ नामित्यामादेशस्य ग्रहणादिह प्रतिषेधो भवत्येव । षड्नाम ॥

तीर्थकृत्षोडशः । द्विषन्षड् । इत्यत्र "षि तवर्गस्य" [६४] इति तवर्गस्य टवर्गो न स्यात् ॥

तल्लयैः । कामोंदीँल्लीलया । इत्यत्र "लि लौ" [६५] इति[5] स्थान्यासन्नावनुनासिकानुनासिकौ लौ ॥

तृतीयः पादः ॥

धर्माय चार्थकामाभ्यां चात्र लोका अभीप्सवः ।
मुक्तये[1] चातिजरसैर्योगिभिः प्रणिधीयते ॥ १३० ॥

१३०. अत्रत्यलोका धर्ममर्थं कामं च स्वस्वकाले साधयन्तीति पूर्वार्धस्य भावार्थः । तथात्र योगो यमादिरष्टविधोस्त्येषां तैर्योगिभि[6]रतिजरसैः सततयोगा[7]भ्यासेन जरामतिक्रान्तैः सद्भिर्मुक्तये मोक्षाय प्रणिधीयते परमात्मनो ध्यानं क्रियते ॥

---

१ ए °ये वाति°.

---

१ बी सी डी °सिद्धयो°. एफ् °सिद्धोद्यो°. २ डी °वतिरि. एफ् °वतीति. ३ ए बी सी °री।. ४ एफ् °मॉल्ली°. ५ एफ् °तिस्थित्यास°. ६ एफ् °भिः समाधिस्थैर°. ७ सी डी °ततं यो°.

अमीभिरेभिरिमकैरमुकैश्च महात्मभिः ।
भात्यदोतिजरैः सिद्धैरत्रेति जगदुर्जनाः ॥ १३१ ॥[1]

१३१. अत्र पुरे जनाः सिद्धाद्भुतगुणरञ्जितत्वेनान्यजनानां पुरो जगदुः । कथमित्याह । अमीभिः प्रत्यक्षविप्रकृष्टैरेभिः प्रत्यक्षसमीपतरैरिमकैरल्पैरज्ञातैर्वा प्रत्यक्षसमीपतरैरमुकैश्चाल्पैरज्ञातैर्वा प्रत्यक्षविप्रकृष्टैश्च महात्मभिरतिजरैर्योगप्रभावेण जरामतिक्रान्तैः सिद्धैर्[2]विद्यासिद्धैः कृ-[illegible]ादः पुरं भाति पवित्री[3]भवतीत्यर्थ इति ॥

लोकाः । अर्थकामाभ्याम् । धर्माय । इत्यत्र "अत आः[4]०" [१] इत्यादिना आकारः ॥ [illegible] इति किम् । अभीप्सवः ॥ स्यादावि[5]ति किम् । मुक्तये ॥

सिद्धैः । अतिजरैः । इत्यत्र "भिस ऐस्[6]" [२] इति भिस ऐस् ॥ एसादेशेनैव सिद्धे ऐस्करणं संनिपातन्यायस्यानित्यत्वज्ञापनार्थम् । तेन अतिजरसैः । इत्यपि सिद्धम् । अत इत्येव । योगिभिः ॥

इमकैः । अमुकैः । इत्यत्र "इदम्०" [३] इत्यादिना भिस ऐस् ॥ अक्येवेति किम् । एभिः । अमीभिः ॥

एभिर्नयनयोः प्रीतिरेषां श्रीरेभ्य उत्सवः ।
एषु धर्म इति श्रीमद्गृहान् को नास्य वर्णयेत् ॥ १३२ ॥

१३२. अस्य पुरस्य श्रीमद्गृहानाढ्यानां वेश्मानि दारान्वा को न वर्ण-[illegible]त् । कथमित्याह । एभिः श्रीमद्गृहैः कृत्वा सौन्दर्यातिशयान्नयनयोर्लोके-[illegible]णयोः प्रीतिराह्लादः स्यात्तथैषां श्रीर्लक्ष्मीर्वर्तते तथैभ्यः सकाशादुत्सवो वसन्तोत्सवादि[7]र्महः प्रवर्तते तथैषु धर्मो देवपूजादानादिरस्ति । भोगधर्मफलत्वेनैषां लक्ष्मीर्न निरर्थि[8]केत्यर्थ इति ॥

१ सी डी ॥ सि°. २ डी सिद्धैः कृ°. ३ सी °वित्रील°. एफ् °वित्रं भ°. ४ एफ् आः स्यादावित्या°. ५ ए °ति मु°. ६ ए ऐस् एसा. एफ् ऐसिति एसा°. ७ बी एफ् °दिमहः. ८ बी सी डी एफ् °रर्थके°.

भक्त्या गुरुषु पित्रोश्च मोक्षाय ज्ञानसंग्रहात् ।
जनेनाजरसाप्यत्र स्फुरज्जरसिन स्थितम् ॥ १३३ ॥

१३३. अत्र पुरे जनेनाजरसापि जरावर्जितेनापि तरुणेनापि स्फुरन्ती जरा यस्य तेन स्फुरज्जरसिन वृद्धेन स्थितम् । हेतू आह । गुरुषु धर्माचार्येषु पित्रोश्च मातापित्रोश्च विषये भक्त्या विनयेन तथा मोक्षाय यद् ज्ञानं धर्मशास्त्रपरिज्ञानं तस्यैव न तु संसारहेतुकामशास्त्रादिज्ञानस्य यः संग्रहो धारणं तस्माच्च । परिणतानां हि प्रायेण धर्मार्थितया विनयो मुक्तिहेतुज्ञानसंग्रहश्च स्यान्न तु यूनां मदमदनबाहुल्यात् ॥

सर्वस्य दूरजरसः प्रत्यासन्नजरस्य च ।
योगिनातिजरेणेह स्पर्धाध्यात्मे सदा लयात् ॥ १३४ ॥

१३४. इह पुरे सर्वस्य दूरजरसस्तरुणस्य प्रत्यासन्नजरस्य च वृद्धस्य च । कर्तरि षष्ठी । अतिजरेण योगाभ्यासप्रकर्षाज्जरामतिक्रान्तेन योगिना सह सदा स्पर्धा जयेच्छास्ति । कस्मादित्याह । आत्मनि विभक्त्यर्थेऽव्ययीभावे "अनः" [७.३.८८] इत्यति समासान्ते चाध्यात्मं तस्मिन्नात्मनि यो लयः सर्वथा बाह्येन्द्रियनिरोधेन तदेकाग्रचित्तता तस्मात् "गम्ययप°" [२.२.७४] इत्यादिना पञ्चमी । लयमाश्रित्य यादृग् महाध्यानं योगीन्द्राः कुर्वन्ति तादृगत्रत्यो लोकः सर्वोपि करोतीत्यर्थः । अध्यात्म इत्यत्र सामान्यविशेषभावेन द्वौ भावौ यथासन आस्ते इत्यत्रासनं सामान्यविशेषभिन्नम् । अध्यात्म इति ह्यात्मनि यो भावस्तत्र लय इति विज्ञायते । तत्र सामान्यभावो वृत्तावन्तर्भूतस्तं प्रत्याधारभावश्च योसौ लयो विशेषभावः स वृत्तौ नान्तर्भूतस्तं प्रति सामान्यभावस्याधारभावश्चेति तत्र सप्तमी भवति ॥

---

१ सी डी °शास्त्रं प°. २ सी डी °दन°. ३ सी डी एफ् °त्रत्यलो°. ४ सी डी °स्त अत्य°. ५ डी °वश्चे°.

एषु । एषाम् । एभिः । एभ्यः । नयनयोः । इत्यत्र "एद्बहुस्भोसि" [४] इत्येत् ॥ बहुिति किम् । अस्य । स्भोसीति किम् । गृहान् ॥ अत इत्येव । गुरुषु । पित्रोः ॥

जनेन । अतिजरेण । सर्वस्य । प्रत्यासन्नजरस्य । इत्यत्र "टाङसोरिनस्यौ" [५] इतीनस्यादेशौ । अत इत्येव । अजरसा । दूरजरसः । अत्र परत्वान्नित्यत्वाच्च प्रागेव जरसादेशे कृतेकारान्तत्वाभावः । अन्ये तु प्रागेवेनादेशं संनिपातलक्षण-स्यानित्यत्वाश्रयणात्पश्चाज्जरसादेशं चेच्छन्तः स्फुरजरसिन इत्यपि मन्यन्ते ॥

मोक्षाय । संग्रहात् । इत्यत्र "ङेङस्योर्यातौ" [६] इति यादादेशौ ॥

सर्वस्मै प्रियकर्तास्मिन् सर्वस्मादुज्ज्वलो गुणैः ।
नृपः श्रीमूलराजोभूच्चौलुक्यकुलचन्द्रमाः ॥ १३५ ॥

१३५. अथात्र काव्ये वर्णनीयेषु चौलुक्येषु मध्ये[3] प्रथमो[4] यो राजात्र पुरेभूत्तमासर्गान्तमुपश्लोकयति ॥ मूले चौलुक्येष्वादावत्र पुरे राजा मूलराजो यद्वा मूले[6] नक्षत्रे राजा[7] चन्द्रो मूलराजस्तत्र जात-त्वान्मूलराजः श्रिया युक्तो मूलराजः श्रीमूलराजो नाम[8] नृपोभूत् । कीदृक् । गुणैः[9] परोपकरित्वादिभिः कृत्वा सर्वस्मात्समस्तलोकात्[10]संकाशा-दुज्ज्वलोत एव सर्वस्मै प्रियकर्ता वाञ्छितकारी । अत एव[11] च चौलु-क्यकुलचन्द्रमाः । चन्द्रमा अपि गुणैः कान्तता[12]दिभिः सर्वस्मादुज्ज्व-लोत एव सर्वस्मै प्रियकर्ता । तथा श्रिय आवासत्वाच्छ्रियो नक्षत्रप-तित्वान्मूलस्य[13] मूलनक्षत्रस्य च राजा प्रभुः स्यादित्युक्तिः ॥

---

१ एफ् °भ्यः अनयोः. २ एफ् °त एव किम् । गु°. ३ एफ् °ध्ये यः प्र°. ४ सी डी एफ् °मो रा°. ५ एफ् मूलन°. ६ बी सी डी °ले मूलन°. ७ सी °जा स्त°. डी °जा तत्र. ८ एफ् °नामा नृ°. ९ एफ् °णैश्च प°. १० एफ् °त्समस्तलोकसका°. ११ सी डी एफ् °व चौ°. १२ एफ् °न्तत्वादि°. १३ एफ् °लन°.

विश्वस्माद्त्यशेतासौ विश्वस्मायुपकारकः ।
किंसर्वस्मै परसर्वस्मै च यः कामदोभवत् ॥ १३६ ॥

१३६. यो विश्वस्मै हीनायोत्तमाय चोपकारको रक्षादानादिनोपकर्ता सन् किंसर्वस्मै कुत्सितसर्वस्मै हीनलोकाय परसर्वस्मै च प्रकृष्टसर्वस्मायुत्तमलोकाय[1] च कामदो मनोरथपूरकोभूदसौ स मूलराजो विश्वस्मात्सर्वलोकाद्त्यशेतोत्कृष्टोभूत् ॥

तमस्तोभिभवः[2] कालेप्यसर्वस्मिन्महोदयः ।
हीनतास्मादुभौ हेतू उभयस्मिन् रवौ विधौ ॥ १३७ ॥

१३७. उभौ हेतू "सर्वादेः सर्वाः" [२.२.११९] इति प्रथमाया द्वितीयाया वा द्विवचनम् । द्वाभ्यां कारणाभ्यामस्मान्नृपात्सकाशादुभयस्मिन् द्वितये हीनता न्यूनत्वमासीत् । कस्मिन्नुभयस्मिन्नित्याह । रवौ सूर्ये विधौ चन्द्रे च । कौ हेतू इत्याह । तमस्तो राहोः सकाशादभिभवो ग्रहणलक्षणपराभवः[3] । अपिः समुच्चये । तथासर्वस्मिन्काले महोदयो न सर्वस्मिन्काले महान् जगत्प्रकाशक उदयः स्यात् । रवेर्दिन एव चन्द्रस्य च रात्रावेव महोदयात् । अस्य च राज्ञस्तमस्तोज्ञानान्नाभिभवो राज्यलक्ष्मीप्रतापादीनां सदा वृद्ध्या सदा महोदयश्चेति ॥

अन्यस्मै भास्करायान्यतरस्मै विष्णुशक्रयोः ।
रुद्राणामन्यतमस्मै नमोस्मै चक्रिरे नृपाः ॥ १३८ ॥

१३८. नृपा अस्मै मूलराजाय नमो नमस्कारं चक्रिरे यतोन्यस्मै

---

१ डी °दतिशे°. २ पफ़ °स्तोविभ°.

---

१ पफ़ °र्वस्मै चोत्त°. २ सी °दभिशे°. डी °दतिशे°. ३ बी डी पफ़ °णः प°. ४ सी डी °वः स°. ५ पफ़ °नान्न परिभवो राजल°.

भास्कराय महाप्रतापित्वाद्वितीयाय रवये तथा विष्णुशक्रयोर्मध्येन्यं-तरस्मा एकतरस्मै प्रजारक्षापरमैश्वर्यादीनामुभयधर्माणां सद्भावाद्विष्णवे शक्राय वेत्यर्थः । तथा रुद्राणामन्यतमस्मै लीलाविलासित्वादिना अज १ एकपाद[2] २ अहिर्बुध्न ३ विरूपाक्ष ४ रैवत ५ हर ६ बहुरूप ७ त्र्य-म्बक ८ सावित्र ९ जयन्त १० पिनाकि ११ नाम्नामेकादशरुद्राणां मध्येजाय यावत्पिनाकिने वेत्यर्थः । भास्करादिभ्यो हि देवतात्वान्नृपा अपि नमस्कारं कुर्वन्ति ॥

देवेभ्योन्यतमायास्मायितरस्मै फणीशिने ।
श्लाघित्वा सुधियः कुर्युः कतरस्मै पुनः स्तुतिम् ॥ १३९ ॥

१३९. अस्मै नृपाय श्लाघित्वा नृपं श्लाघ्यं परं लोकं ज्ञाप्यं जानन्तं प्रयोज्य नृपं[3] वर्णयित्वेति यावत्सुधियः कतरस्मै कस्मै राज्ञे पुनः स्तुतिं कुर्युः । यतः कीदृशाय । देवेभ्योन्यतमाय शक्तिरूपाद्यतिशयेन देवानां मध्य एकतरस्मै तथेतरस्मै फणीशिने भूभारधारित्वेन द्वितीयाय शे-षाय । सुरशेषाहितुल्यत्वेन सर्वनृपोत्कृष्टत्वादस्य श्लाघायां कृतायाम-न्यस्य श्लाघां कर्तुं न कोपि वाञ्छतीत्यर्थः ॥ "निर्धारणे पञ्चम्यप्यन्ये" [श्रीसिद्ध० व्या० बृ०] इति तन्मतमाश्रित्य देवेभ्य इत्यत्र निर्धारणे पञ्चमी । कतरस्मायित्यत्र संप्रदाने चतुर्थी ॥

यतरस्मै ततरस्मै प्रार्थयित्रे ददावसौ ।
यतमस्मै ततमस्मै दोषकर्त्रे चुकोप च ॥ १४० ॥

१४०. स्पष्टः । किं तु यतरस्मै[4] ततरस्मै शत्रवे मित्राय च । यत-मस्मै ततमस्मै मित्राय शत्रवे च । दोषकर्त्रेन्यायकारिणे ॥

---

१ एफ् °न्यस्मा. २ डी एफ् °पाद् २ अ°. ३ एफ् °पं च व°. ४ एफ् °स्मै श°.

दातृष्वेकतमस्मादेकतरस्माच्च दस्रयोः[1] ।
कतमस्मिन्सर्वतमे देशेस्मान्नाभ्यगाद्यशः ॥ १४१ ॥

१४१. अस्मान्नृपात्सकाशात्सर्वतमेतिशयेन सर्वस्मिन्देशे कतमस्मिन्कस्मिन्[1] यशो नाभ्यगान्न ययौ । सर्वशब्दोत्र तमप्यसंकुचितवृत्तिस्ततो जगत्त्रयेप्यस्य यशो विस्तीर्णमित्यर्थः । यतो दातृषु मध्य एकतमस्मादसाधारणात्तथा रूपातिशयेन दस्रयोरश्विनीकुमारयोर्मध्य एकतरस्मादन्यतरस्मात् । दानरूपातिशयेन हि प्रसरति दिशो[2] दिशं यशो[3] नरस्य ॥

त्वस्माद्याच्ञापराविन्द्रोपेन्द्रौ दानैकशालिनः ।
नेमस्मायपि कल्पेते[2] नास्य हेतुं गुणत्वतम् ॥ १४२ ॥

१४२. गुणत्वतं हेतुम् । त्वच्छब्दः समुच्चयार्थः । शौर्यौदार्यादिगुणसमूहेन हेतुनेन्द्रोपेन्द्रौ शक्रविष्णू अस्य राज्ञो नेमस्मायपि खण्डायाप्यर्थाद्गुणशकलायापि न कल्पेते[4] नालं भवतः । यतो दानेनैकेनाद्वितीयेन न तु याच्ञया शालते शोभत इत्येवंशीलो यस्तस्य । प्रभूतगुणैरपीन्द्रोपेन्द्रौ दानैकशालिनोस्य गुणांशमात्रस्यापि तुल्यौ न भवत इत्यर्थः । यतस्त्वस्मादन्यस्माद्याच्ञापरौ याचकौ । इन्द्रो हि बलिष्ठे बलिदैत्येप्रभवन् विष्णुं बलिबन्धं[5] ययाचे[6] विष्णुश्च बलिं त्रिपदीमिति । याच्ञायां[7] च सर्वे गुणा भ्रंसन्ते । उक्तं च ।

देहीति वचनं श्रुत्वा देहस्थाः पञ्च देवताः ।
नश्यन्ति तत्क्षणादेव श्रीह्रीधीधृतिकीर्तयः ॥ १ ॥

---

१ ए दश्रयोः ।. २ बी कल्प्यंते.

---

१ सी °स्मि य°. एफ् °स्मिन्कतरस्मि°. २ बी °शोदशय°. ३ सी डी °शो नृपस्य. ४ बी कल्प्येते. ५ ए बी डी °लिवधं य°. सी °लिबन्ध य°. ६ बी चेति वि°. ७ बी सी डी °यां स°.

गुणास्तावद्यशस्तावद्यावद्यांचेत नो नरः ।
प्रार्थनायां पुनस्तेपि प्रणश्यन्ति हृता इव ॥ २ ॥

पूर्वस्माच्च परस्माच्च समस्मादसमाद्गुणैः ।
उत्कृष्टो राजकाद्दत्ते सिमस्मै स्मैष विस्मयम् ॥ १४३ ॥

१४३. एष राजा सिमस्मै सर्वस्मै लोकायै विस्मयमाश्चर्यं दत्ते स्म । यतः पूर्वस्माच्चैतदपेक्षया जन्मना प्रथमात्परस्माच्च जन्मना पश्चिमाच्च किं बहुना समस्मात्सर्वस्माद्राजकान्नृपौघादुत्कृष्ट उत्तमः । ननु तद्राजकं विगुणं भविष्यतीति तन्मध्ये चासौ केनाप्येकेन गुणेन युक्त उत्कृष्टो भविष्यति यथान्धेषु काणोपि भातीति निर्गुणत्वनिराकरणायाह । गुणैः शौर्यादिभिरसमादसाधारणात् ॥

दक्षिणस्मादुत्तरस्मादपरस्मात्तथान्यतः ।
कृष्णायास्मायवरस्मायधरस्मिन्न को नतः ॥ १४४ ॥

१४४. दक्षिणस्मादुत्तरस्मादपरस्मात्पश्चिमात्तथान्यतः पूर्वस्माच्च देशादागत्यास्मै राज्ञेधरस्मिन्नधोदेशे पादयोः को न नतो यतः प्रजारक्षाप्रतापादिनावरस्मै कृष्णाय द्वितीयाय विष्णवे । कृष्णाय हि सर्वदेशेभ्य आगत्य जनः प्रणमति । एतेनास्य राज्ञः सर्वजगद्वशीकार उक्तः । दक्षिणस्मादित्यादौ कुसूलात्पचतीत्यादाविवोपात्तविषयेपादाने पञ्चमी ॥

परस्वायास्पृहयालुः स्वस्मायश्लाघनः सदा ।
दक्षिणाय द्विजस्वाय स्वस्मायिव ददावसौ ॥ १४५ ॥

१४५. असौ राजा दक्षिणाय प्रवीणाय द्विजस्वाय ब्राह्मणज्ञातये स्वस्मायिवात्मीयाय स्वजनायेव सदा गोधनादि ददौ । दाताप्यन्यायेन

---

१ एफ् °याचति नो. २ सी °यमा°. ३ एफ् °ष्यतीति.

परद्रव्याणि गृहीत्वा ददत्संभिन्द्य एव स्यादित्याह । परस्वायान्यद्रव्या-यास्पृहयालुरन्यायेन परद्रव्यमगृह्णन्नित्यर्थः । एवंभूतोपि दत्वा विक-त्थनो निन्द्य एव स्यादित्याह । स्वस्मायात्मनेश्लाघनः ॥

चक्रुरस्यारयो वस्त्रायान्तरस्मै कृतस्पृहाः ।
अन्तरायाः पुरो याच्ञामन्तरस्माद्गृहादपि ॥ १४६ ॥

१४६. अस्य राज्ञोरयः पुरमध्ये मा स्म वयं प्रत्यभिज्ञायोमही[हा इ ?]त्याशङ्कया पुरेषु प्रवेष्टुमशक्तत्वादन्तरायाः पुरैश्चण्डालादिपुर्याः सकाशाद-न्तरस्माद्गृहादपि । अपिः समुच्चये । नगरबाह्याच्चण्डालादिगृहाच्चण्डाला-दिगृहयुक्ताद्वा नगराभ्यन्तरगृहाच्च सकाशाद्याच्ञां वस्त्रप्रार्थनां चक्रुः । यतोन्तरस्मै वस्त्राय कृतस्पृहाः । अतिनिःस्वत्वेन वस्त्राभावाद्वस्त्रचतुष्टय-मध्ये तृतीयाय चतुर्थाय वा स्पृहयालवः । एवं चानेन राज्ञा शत्रवो रोराः कृता इत्युक्तम् ॥

अमुष्मै तेजसैकस्मै यस्तस्थे समरान्तरे ।
कृतान्तः कुपितस्त्यस्मै तस्मिन् दैवं पराङ्मुखम् ॥ १४७ ॥

१४७. समरान्तरे रणमध्ये योरातिस्तेजसा प्रतापेनैकस्मायद्वितीयायामुष्मै राज्ञे तस्थे स्थानेनात्मानं वीरं प्रकाशितवांस्त्यस्मै शत्रवे कृ-तान्तः कुपितस्तथा तस्मिञ्शत्रौ दैवं पराङ्मुखं स मृत एवेत्यर्थः । अमुष्मा इत्यत्र "श्लाघह्नुस्था°" [२.२.६०] इत्यादिना चतुर्थी । तस्थ इत्यत्र "ज्ञीप्सास्थेये" [३.३. ६४] इत्यात्मनेपदम् ॥

यस्मायेतस्मै शासित्रे द्वकयोर्घोर्भुवस्तथा ।
त्वादृशोस्मादृशां पुण्यैरित्यश्लाघिष्ट वासवः ॥ १४८ ॥

---

१ ए °त्सर्वनिन्द्य. बी सी डी °त्सर्वत्रनिन्द्य. २ एफ् °याच्याम°. ३ एफ् °रश्चाण्डा°. ४ एफ् °वांस्तस्मै. ५ सी °तस्त्यस्मै तस्मि दै°.

भवादृकीदृगेतस्मिन्नतिसर्वे यदीर्ष्यसि ।
उत्तरे कोशले मन्त्र इत्थमस्योद्यमेभवत् ॥ १४९ ॥

१४८,१४९. अस्य मूलराजस्योद्यमे विजययात्रायां सत्युत्तरे कोशले। सामीप्यकाधारेत्र सप्तमी। उत्तरकोशलाख्यनृपसमीपे मन्त्रः कोशलनृपमन्त्रिणामभूत्। कथमित्याह। हे राजंस्त्वादृशो भवत्सदृशो भूपोस्मादृशामस्माकं पुण्यैर्वर्तेत इत्येवंप्रकारेण। यस्मायेतस्मै राज्ञे वासव इन्द्रोप्यश्लाघिष्ट। यतः किं भूताय। द्वकयोर्द्वयोः शासित्रे रक्षित्रे। कयोर्द्वकयोरित्याह। द्योः स्वर्गस्य तथा भुवः पृथ्व्याश्च। अन्यायिभ्यो ह्यसौ रक्षन् भुवः शास्ता। न्यायकरग्रहोपार्जितधनैर्यागान्कारयन्द्योश्च शास्ता। यतः

"यज्ञेषु वह्नौ विधिवद्धुतं देवानामुपतिष्ठते"

इति श्रुतिः। तथाचोक्तं रघौ।

दुदोह गां स यज्ञाय सस्याय मघवा दिवम्।
संपद्विनिमयेनोभौ दधतुर्भुवनद्वयम् ॥ १.२६ ॥ इति।

अतिसर्वे बलादिना विश्वत्रयेप्युत्कृष्टत्वात्सर्वमतिक्रान्त एतस्मिन्मूलराजविषये हे कोशलेश्वर यत्त्वमीर्ष्यसि कोयं मत्पुर इति यन्न क्षाम्यसि तद्भवादृक्कीदृक् कीदृशः। कियन्मात्र इत्थम्। यस्मायेतस्मा इत्यत्र यदेतच्छब्दौ द्वावप्यनुवाद्यमात्रार्थप्रतीतिकृतौ। यथा

यदेतच्चन्द्रान्तर्जलदलवलीलां प्रकुरुते
तदाचष्टे लोकः शशक इति नो मां प्रति तथा।

---

१ सी °अस्यो°. २ सी °शो भू°. ३ एफ् °द्वयो°. ४ बी सी एफ् °तस्मिंस्तस्मि°. ५ ए बी °लोक इत्यत्र.

अहं त्वेवं मन्ये त्वदरिविरहाक्रान्ततरुणी-

कटाक्षोल्कापातव्रणशतकलङ्काङ्किततनुः ॥

इत्यत्र ॥

सर्वस्मै । परसर्वस्मै[1] । किंसर्वस्मै । सर्वस्मात् । विश्वस्मै । विश्वस्मात् । असर्वस्मिन् । अस्मिन् । इत्येतेषु "सर्वादेः स्मैस्मातौ" [७] "ङेः स्मिन्" [८] इत्येताभ्यां स्मैस्मात्स्मिन्नादेशाः ॥

उभशब्दस्य द्विवचनस्वार्थिकप्रत्ययविषयत्वात्स्मैप्रभृतयो न स्युः । गणपाठस्तु हेत्वर्थप्रयोगे सर्वविभक्त्यर्थः । उभौ हेतू[2] । उभयस्मिन् ॥ अन्यस्मै । अन्यतरस्मै । डतरग्रहणेनैव सिद्धेन्यतरग्रहणं डतमप्रत्ययान्तस्यान्यशब्दस्य सर्वादित्वनिवृत्त्यर्थम् । अन्यतमाय ॥ अन्येत्वाहुः । नायं डतरप्रत्ययान्तोन्यतरशब्दः[3] किंत्वव्युत्पन्नस्तरोत्तरपदस्तरबन्तो वा । तन्मते डतमान्तस्याप्यन्यशब्दस्य सर्वादित्वम् । अन्यतमस्मै । इतरस्मै । डतरडतमौ प्रत्ययौ । तयोः स्वार्थिकत्वात्प्रकृतिद्वारेणैव सिद्धे पृथगुपादानमत्र प्रकरणेन्यस्वार्थिकप्रत्ययान्तानामग्रहणार्थमन्यादिलक्षणार्थं[4] च । कतरस्मै । कतमस्मिन् । यतरस्मै । यतमस्मै[6] । ततरस्मै । ततमस्मै । एकतरस्मात्[7] । एकतमस्मात् । इह न भवति । सर्वतमे ॥ त्वशब्दोन्यार्थः । त्वस्मात् ॥ त्वच्छब्दः समुच्चये । तस्य स्मायादयो न भवन्तीति हेत्वर्थयोगे सर्वविभक्त्यादि प्रयोजनम् । गुणत्वर्त हेतुम् ॥ नेमशब्दोर्धार्थः । नेमस्मै ॥ समसिमौ सर्वार्थौ । समस्मात् । सिमस्मै । सर्वार्थत्वाभावे न स्यात् । असमात् ॥ स्वाभिधेयापेक्षे[8] चावधिनियमे व्यवस्थापरपर्याये गम्यमाने पूर्वपरावरदक्षिणोत्तरापराधराणि । पूर्वस्मात् । परस्मात् । अवरस्मै । दक्षिणस्मात् । उत्तरस्मात्[9] । अपरस्मात् । अधरस्मिन्[10] ।

---

१ सी डी °स्मै स°. २ सी हेतौ । ३ एफ् °तरः श°. ४ सी °णार्थं°. ५ सी डी °तमस्मै । कतमस्मिन् । ततरस्मै । ततमस्मै । ए° ।. ६ ए एफ् °स्मै ततम°. ७ ए °स्मात् इ°. ८ बी °पेक्षयाव°. एफ् °पेक्षया चा°. ९ डी °स्मात् उ°. १० एफ् अध°.

व्यवस्थाया अन्यत्र न स्यात्। दक्षिणाय द्विजस्वाय। आत्मात्मीयज्ञातिधनार्थवृत्तिः स्वशब्दः। आत्मात्मीययोः। स्वस्मै। स्वस्मायिव॥ ज्ञातिधनयोस्तु न। द्विजस्वाय। परस्वाय॥ बहिर्भावेन बाह्येन वा योगे उपसंख्यान[1] उपसंवीयमाने चार्थेन्तरशब्दो न चेद्बहिर्योगेपि पुरि वर्तते। अन्तरस्माद्गृहात्। अन्तरस्मै वस्त्राय। पुरि तु न। अन्तरायाः पुरः। बहिर्योगोपसंख्यानादेरन्यत्र तु न स्यात्। समरान्तरे॥ त्यस्मै। तस्मिन्[2]। यस्मै। अमुष्मै। अस्मै। एतस्मै। एकस्मै। द्वियुष्मद्भवत्स्वसदां स्मायादयो न संभवन्तीति सर्वविभक्त्यादयः प्रयोजनम्। द्वकयोः। त्वादृशः। भवादृक्। अस्मादृशाम्। कीदृक्॥ सर्वे चामी संज्ञायां सर्वादयो न स्युः। तेनेह न स्यात्। उत्तरे कोशले। सर्वादेरिति षष्ठीनिर्देशेन तत्संबन्धिविज्ञानादिह न भवति। अतिसर्वे॥

नेमे दासीकृता नेमा हताश्चानेन भूभुजः।
अर्धे द्विपा हयाश्चार्धाः सन्नद्धाः सर्वे एव न॥ १५०॥

१५० अनेन राज्ञा नेमेर्धा भूभुजो दासीकृतास्तथा नेमाश्च भूभुजो हताः। ये नृपास्तं प्रणतास्ते सेवकीकृताः। ये तु दर्पोद्धुरत्वान्न[3] प्रणतास्ते समूलमुन्मूलिता इत्यर्थः। तत्किं तज्जयाय सर्वं सैन्यं सन्नद्धमित्याह। अर्ध इत्यादि कण्ठ्यम्। एतेन सैन्यस्यातिबाहुल्यमुक्तम्॥

पूर्वं तेजस्विनोभूवन् प्रथमे चरमेपि च।
न प्रथमा न चरमा उदितेस्मिन् रवाविव॥ १५१॥

१५१ पूर्वं मूलराजोदयात्प्रथमं प्रथमे मुख्याश्चरमेपि[4] चामुख्याश्चापि नृपास्तेजस्विनः प्रतापिनोभूवन्। अस्मिन्नृपे महाप्रतापित्वाद्रवाविवोदिते

---

१ सी डी °संवी°. २ एफ् °स्मै अमुष्मिन् अ°. ३ डी °पोंद्धतत्वा°. ४ एफ् °मे चा°.

सति न प्रथमास्तेजस्विनोभूवन्न च चरमाः । सूर्योदयादपि पूर्वं रात्रौ प्रथमे मुख्याश्चन्द्रग्रहाश्चरमेपि चामुख्या नक्षत्रतारास्तेजस्विनो भवन्ति रवौ तूदिते नेति ॥

द्वये त्रयाश्चतुष्टये पञ्चतयाश्च के चन ।
गुणानस्य क्षमा वक्तुमल्पेल्पा गीर्पतेर्न ये ॥ १५२ ॥

१५२ ये गीर्पतेर्बृहस्पतेः सकाशान्नाल्पा वाग्मितया न न्यूनास्तेल्पे के चन स्तोकाः केप्यस्य राज्ञो गुणाञ्शौर्यादीन्वक्तुं वर्णयितुं क्षमाः । अल्पेपि कियन्त इत्याह । द्वौ त्रयश्चत्वारः पञ्च वावयवा येषां ते तथा द्वौ त्रयश्चत्वारः पञ्च वेत्यर्थः । द्वय इत्यत्र द्वाववयवौ येषामिति यच्छब्द-वाच्ययोर्द्वयोरपि गौरवविवक्षायां "गुरावेकश्च" [२.२.१२४] इति बहुत्वा-द्बहुवचनम् । अन्यथा द्विवचनमेव प्रसक्तम् ॥

कतिपयेपि गीर्वाणा नागाः कतिपया अपि ।
मणयः कौस्तुभस्येव बभूवुर्नास्य संनिभाः ॥ १५३ ॥

१५३ कतिपयेपि स्तोका अपि गीर्वाणा ऊर्ध्ववासिदेवाः । नागा नागकुमाराः । ऊर्ध्वलोकेधोलोके च मूलराजतुल्यो न कोप्यभूदित्यर्थः । शिष्टं स्पष्टम् ॥

सर्वे । इत्यत्र "जस इः" [९] इति-इः ।

नेमे नेमाः । अर्धे अर्धाः । प्रथमे प्रथमाः । चरमे चरमाः । चतुष्टये पञ्चतयाः । द्वये त्रयाः । अल्पे अल्पाः । कतिपये कतिपयाः । इत्यत्र "नेमार्ध॰" [१०] इत्या-दिना वा जस इः ॥

---

१ सी डी °श्च चर°. २ सी डी °वच°. ३ डी °र्थः । शेषं स्प°. ४ एफ् °इः ने°.

शैलाः पूर्वापरे पूर्वापराश्च जलधेस्तटाः ।
सैन्येभरदनक्षुण्णाः कीर्तयन्त्यस्य दिग्जयम् ॥ १५४ ॥

१५४. कण्ठ्यः[1] । परं पूर्वापर इति पूर्वे[2] पूर्वदिग्वर्तिनोपराः पश्चिमदिग्वर्तिनः ॥

पूर्वापरे पूर्वापराः[3] । इत्यत्र "द्वन्द्वे वा" [११] इति वा जस इः ॥

पूर्वापराच्छ्रियं कर्षन्दक्षिणोत्तरतोप्ययम् ।
दक्षिणोत्तरपूर्वाणां प्रतीच्याश्चाभवत्पतिः ॥ १५५ ॥

१५५. पूर्वा[4] चापरा च पूर्वापरं तस्मात् । एवं दक्षिणोत्तरतः । चतुर्भ्योपि दिग्भ्य इत्यर्थः[5] । शिष्टं स्पष्टम् ॥

पूर्वापरात् । दक्षिणोत्तरपूर्वाणाम् । इत्यत्र "न सर्वादिः" [१२] इति सर्वसर्वादिकार्याभावः । "सर्वादयोस्यादौ" [३.२.६१] इति पुंवत्तु भवत्येव । तत्र भूतपूर्वस्यापि[6] सर्वादेर्ग्रहणात् ॥

ननामास्मै श्रिया पूर्वायौजःपूर्वाय राजकम् ।
सोस्मायह्लावरायेवाक्लिश्यन्मासावराय नु ॥ १५६ ॥

१५६. अस्मै राज्ञे राजकं नृपौघो ननाम । यतः श्रिया सैन्यादिसंपदा पूर्वाय प्रथमाय तथौजःपूर्वायौजोभिः पराक्रमैः प्रथमाय । ओजसा पूर्वायेति तु वाक्ये "ओजोञ्जः°" [३.२.१२]इत्यादिनालुक् स्यात् । स च राजास्मै राजकायाह्लावरायेव मासावराय नु दिनेन मासेन वा लघव इवाक्लिश्यदप्रीयत । न तु गर्वेण पराङ्मुखोभूदित्यर्थः । अह्लावराय मासावरायेत्येताभ्यां दिनेन मासेनचानुजो भ्रातेव गम्यतेक्लिश्यदिति क्रियापदात् ॥

---

१ सी डी कण्ठ्यम् । २ सी °र्वे दि°. ३ पफू °राः इ°. ४ बी सी डी °र्वा चप°. ५ डी र्थः । शेषं स्प°. ६ पफू °पि स्यादे°.

भिया पूर्वाय । ओजःपूर्वाय । अह्नावराय । मासावराय । इत्यत्र "तृतीयान्तात्°" [१३] इत्यादिना सर्वादिकार्यं न ॥

कृष्णायास्मै द्वितीयस्मै द्वितीयायासिना नृपाः ।
द्वितीयस्माचृतीयाच्च देशादेत्य नमो व्यधुः ॥ १५७ ॥

१५७. गूर्जरत्रादेशापेक्षया द्वितीयस्मात्तृतीयाच्च देशादुपलक्षणत्वात्सर्वदेशेभ्य इत्यर्थः । एत्यागत्य नृपा अस्मै राज्ञे नमः प्रणामं व्यधुः । यतो द्वितीयस्मै कृष्णाय । ईदृशायापि कुत इत्याह । यतोसिना द्वितीयाय महाबलत्वेन सैन्यादिसहायनिरपेक्षायेत्यर्थः ॥

द्वितीयस्यास्तृतीयाया नृपकीर्तेरमर्षणः ।
जगत्यस्मिन्द्वितीयस्मिंस्तृतीये चैष विश्रुतः ॥ १५८ ॥

१५८. एष राजास्मिन् जगति पृथिव्यां द्वितीयस्मिन् जगति पाताले तृतीये च जगति स्वर्गे च विश्रुतो विख्यातः । यतो द्वितीयस्यास्तृतीयायाः स्वकीर्त्यपेक्षयान्यस्या अन्यतरस्याश्चोपलक्षणत्वात्सर्वस्या इत्यर्थः । नृपकीर्तेरन्यराजयशसः कर्मणोमर्षणोसोढा । परिभावुक इत्यर्थः । अतश्चायमेव सर्वत्र प्रसिद्ध इति भावः ॥

तेजसा सूर्यजातीये सर्वेषां प्रलयो द्विषाम् ।
कान्त्या द्वितीयके चेन्दौ हर्षोस्मिन् सुहृदामभूत् ॥ १५९ ॥

१५९. तेजसा प्रतापेन कृत्वा सूर्यः प्रकारोस्य तस्मिन्सूर्यजातीये सूर्यवत्प्रचण्डेस्मिन् राज्ञि सर्वेषां द्विषां प्रलयः क्षयोभूत् । एतत्प्रता-

१. सी °तीयस्माच्च.

१ सी डी °रंद. एफ् °रधात्रीदे°. २ एफ् °तीयस्माच्च. ३ बी सी डी एफ् पृथ्व्यां द्वि°. ४ एफ् °र्गे वि°. ५ बी एफ् °र्यप्र°.

पेनापि सर्वे शत्रवः प्रलीना इत्यर्थः । तथा कान्त्या सौम्यतया कृत्वा द्वितीयकेऽज्ञाते द्वितीय इन्दौ च चन्द्रे चास्मिन् सर्वेषां सुहृदां मित्राणां हर्ष आनन्दोऽभूत् । एतद्दर्शनेनापि सर्वे सुहृद आनन्दिता इत्यर्थः । अस्मिन्नित्यत्र नैमित्तिक आधारे सप्तमी । द्विट्प्रलयसुहृद्धर्षयोरयं निमित्तमित्यर्थः ॥

द्वितीयस्मै द्वितीयाय । द्वितीयस्मात् तृतीयात् । द्वितीयस्मिन् तृतीये । द्वितीयस्याः तृतीयायाः । इत्यत्र "तीयं ङित्कार्ये वा" [१४] इति वा सर्वादिकार्यम् । ङित्कार्ये इति किम् । तत्रैव सर्वादित्वं यथा स्यान्नान्यत्र । तेनाक् न स्यात्तथा च कप्रत्यये सति स्वार्थिकप्रत्ययान्ताग्रहणात्स्मैप्रभृतयो न स्युः । द्वितीयके ॥ अर्थवतः प्रतिपदोक्तस्य च ग्रहणादिह न स्यात् । सूर्यजातीये ॥

सर्वेषाम् । इत्यत्र "अवर्णस्यामः साम्" [१५] इति साम् ॥

पूर्वे न्याये तथा धर्मे पूर्वस्मिन्नेष तत्परः ।
पूर्वस्मात्पुरूरवसस्तत्पूर्वान्नाप्यहीयत ॥ १६० ॥

१६०. एष गर्जो नाहीयत न न्यूनोऽभूत् । कस्मात् । पुरूरवसो बौधाच्चतुर्थचक्रिणः सकाशात् । तथा पूर्वस्मात्पुरूरवस एव प्रथमात्तत्पितुर्बुधात् । तथा तत्पूर्वादपि तस्माद्बुधात्पूर्वः प्रथमः पिता चन्द्रस्तस्मादपि यतः पूर्वे पुरूरवःप्रभृतिपूर्वराजसंबद्धे न्याये नीतौ तथा पूर्वस्मिन्धर्मे तदनुष्ठाने तत्परस्तन्निष्ठः । पूर्वनृपाचरितौ न्यायधर्मौ पालयन्नित्यर्थः । अहीयतेति कर्मकर्तरि ॥

१ एफ् °तीयेन्दौ. २ डी °तीयस्मा°. ३ एफ् °न् । द्वितीये । तृतीयस्मिन् । तृ°. ४ एफ् °स्याः । द्वितीयायाः । तृतीयस्याः । तृ°. ५ एफ् °र्यमिति. ६ सी °दि ङिकार्यत्वं. ७ सी डी °था चाकप्रत्य°. ८ एफ् °जा न हीयेन. ९ एफ् °नो भवेत्. १० एफ् °बन्धे न्या°.

पूर्वे दैत्या बलिप्रायाः पूर्वाः कर्णादयो नृपाः ।
क्षमायां स्मारितास्त्यागक्रियाया अमुना किल ॥ १६१ ॥

१६१. किलेति सत्ये । अमुना राज्ञा त्यागक्रियाया दानाद्धेतोर्बलिप्रायाः । प्रायो बाहुल्यतुल्ययोः । बलिसदृशाः पूर्वेप्रेतना दैत्याः । तथा कर्णादयः कर्णः कौरवपक्षीयो राजा तदादयो दधीचिजीमूतवाहनाद्याः पूर्वो नृपाश्च स्मारिताः स्मृतिपथमानीताः । बलिकर्णादिवद्दावित्यर्थः । बलिकर्णादयो हि लोके[1] दानशौण्डत्वेन प्रसिद्धाः । यदुक्तम् ।

अतिदानाद्वलिर्बद्धः ॥

त्वचं कर्णः शिबिर्मांसं जीवं जीमूतवाहनः ।
ददौ दधीचिरस्थीनि नास्त्यदेयं[2] महात्मनाम् ॥

निर्स्त्रिंशे बहुखट्वायां रिपुकीलालपि व्यधात् ।
स्थानमेषोनुरक्तायाः क्रीडायै विजयश्रियः ॥ १६२ ॥

१६२. एष राजानुरक्तायाः शौर्यादिगुणैरावर्जिताया विजयश्रियः क्रीडायै विलासाय बहुखट्वायामीषदूनखट्वायां विस्तृततया पल्यङ्कतुल्ये निर्स्त्रिंशे खड्गे स्थानमावासं व्यधाद्दत्तवान् । यतो रिपूणां कीलालं रुधिरं पिबति यस्तस्मिञ्शत्रूच्छेदके[3] इत्यर्थः । शत्रूच्छेदकत्वादस्य खड्गे विजयश्रीर्न्यवसदित्यर्थः । याप्यनुरक्ता स्त्री स्यात्तस्या रतये पतिः खट्वायां स्थानं ददाति ॥

पूर्वे पूर्वाः। पूर्वस्मात् पूर्वात् । पूर्वस्मिन् पूर्वे । इत्येषु "नवभ्य°" [१६] इत्यादिना-इस्मात्स्मिनो वा ॥

क्रीडायै । क्रियायाः । अनुरक्तायाः । क्षमायाम् । इत्यत्र " आपो ङिताम्°"

---

१ बी लोका दा°. २ सी डी नास्ति दे°. ३ ए °कत्वा°. ४ एफ् °इत्यत्र न°.

[१७] इत्यादिना वै-यास्-यास्-यामः ॥ आप इति पकारः किम् । कीलालपि । तत्संबन्धिविज्ञानादिह न भवति । बहुखट्वाय नराय । एतद्योदाहरणं स्वयं ज्ञेयम् । इह तु भवति । बहुखट्वायां निर्झिंये ॥

हितः प्रजायै सर्वस्यै सर्वस्याः संपदः पदम् ।

ख्यातोसौ दिशि सर्वस्यां सर्वस्या नृपसंहतेः ॥ १६३ ॥

१६३. अयं राजा सर्वस्या भूतभवद्भाविन्या नृपसंहतेः सकाशात्सर्वस्यां दिशि दशस्वपि दिक्षु ख्यातोभूत् । यतः सर्वस्यै प्रजायै हितोनुकूलः । तथा सर्वस्याः सैन्यकोशादिकायाः संपदः पदं स्थानम् ॥

सर्वस्यै । सर्वस्याः[३] । सर्वस्याः । सर्वस्याम् । इत्यत्र "सर्वादेः°" [१८] इत्यादिना डस्पूर्वा यैयास्यास्यामः ॥

लीलया भुजयोर्लक्ष्मीवसुधे अस्य बिभ्रतः ।

कुन्दावदातैरोदस्यौ यशोभिः पूरिते इमे ॥१६४ ॥

१६४. स्पष्टः ।

लीलया । भुजयोः । इत्यत्र "टौस्येत्" [१९] इत्येत् ॥

पूरिते । इमे । लक्ष्मीवसुधे बिभ्रतः । इत्यत्र "औता" [२०] इत्येत् ॥

चारू चापेषुधी त्यक्त्वा समरेष्वस्य वैरिभिः ।

गुरू अबलताभीती शिश्रियाते अतिस्त्रियौ ॥ १६५ ॥

१६५. अस्य राज्ञः समरेषु वैरिभिश्चारू रणालंकर्मीणौ चापेषुधी धनुस्तूणौ त्यक्त्वाबलताभीती निःसत्वताभये[४] शिश्रियाते आश्रिते । कीदृशे ।

---

१ सी डी °रः । की°. २ सी °बन्धवि°. ३ एफ् °र्वस्या । स°. ४ सी डी निःस्वत्व°.

गुरू महत्यौ। अत एवातिस्त्रियौ। स्त्रीशब्देनात्र स्त्रीगते अबलताभीती उपचारादुच्येते[1]। स्त्रियमतिक्रान्ते स्त्रीगताबलताभीतिसकाशादप्यधिके इत्यर्थः। यदायं राजा रणभूमिमापतति तदा वैरिणः स्त्रीभ्योप्यधिकम[2]बलाभीताश्च सन्तः शस्त्राणि मुञ्चन्तीत्यर्थः[3]। यावप्यतिस्त्रियौ ब्रह्मचारित्वात्स्त्रियमतिक्रान्तौ[4] चारू प्रशान्ततया मनोहारिणौ गुरू आचार्यौ भवतस्तौ चापेषुधी त्यक्त्वा वैरिभिरपि श्रीयेते तथाविधैतद्दर्शने वैरानुबन्धोपशमादित्युक्तिः॥

अस्याभूवन्ननाहार्या बुद्धयः कामधेनवः।
त्रासादतिस्त्रयो[1]नेन चक्रिरेऽहंयवोरयः॥ १६६॥

१६६. अस्य राज्ञोनाहार्या अकृत्रिमा मन्त्र्याद्युपदेशं[5] विनापि संसिद्धा इत्यर्थः। बुद्धयो मनोभीप्सितपूरकत्वेनानाहार्याः केनापि हर्तुमशक्याः कामधेनव इव कामधेनवोभूवन्। अत एवानेन राज्ञा[6]हंयवोहंकारिणोरयस्त्रासाद्भीतेरतिस्त्रयः[7] स्त्रियोपि सकाशाद्भीरवश्चक्रिरे॥

अबलताभीती। गुरू चापेषुधी चारू त्यक्त्वा। इत्यत्र "इदुतोः°" [२१] इत्यादिना ईदूतौ॥ अस्त्रेरिति किम्। अतिस्त्रियौ। इदमेव [8]चास्त्रिग्रहणं ज्ञापकं परेणापीयादेशेने[9]त्कार्यं न बाध्यत इति। तेनातिस्त्रयः॥

अरयः। अहंयवः। बुद्धयः। धेनवः। अतिस्त्रयः। इत्यत्र "जस्येदोत्" [२२] इत्येदोतौ॥

१ एफ् °तिस्त्रियो°

१ एफ् °ते स्त्रीम°. २ एफ् °बलताभी.° ३ ए मुञ्चन्तीत्य°. सी डी मुञ्चन्ती°. ४ एफ् °त्वात्स्त्रीम°. ५ एफ् °रूपदेशं°. ६ डी °हंका°. ७ बी सी °तिस्त्रियः° ८ एफ् °चास्त्रेग्रह°. ९ एफ् °नेतत्का°.

मुनेरपि मुनेरस्य साधोः साधोरपि स्फुटम् ।
कीर्तये चारवे यत्नो जज्ञे बुद्ध्याः प्रकर्षतः ॥ १६७ ॥

१६७. अस्य राज्ञो बुद्ध्याः प्रकर्षतश्चारवे निष्कलङ्कायै[1] कीर्तये स्फुटं प्रकटं यत्नोभूत् । यथा यथा लोके कीर्तिः स्यात् तथा तथावर्तिष्टे-त्यर्थः । बुद्धिप्रकर्षे हेतुगर्भं[3] विशेषणद्वयमाह । मुनेरपि सकाशान्मु-नेरत्यन्तं जितेन्द्रियस्येत्यर्थः । तथा साधोरपि शिष्टादपि सकाशा-त्साधोः । स्याद्धिजितेन्द्रियस्य सदाचारस्य च नरस्य बुद्धिप्रकर्षः[4] ॥

कीर्तये । चारवे । मुनेः । साधोः । मुनेः । साधोः । इत्येषु "ङित्यदिति" [२३] इत्येदोतौ[5] ॥ अदितीति किम् । बुद्ध्याः ॥

ते गुणा अमुना कीर्तिशुचिनात्मनि रोपिताः ।
शंभोः सख्यावपां पत्यौ द्योः पतौ च विधौ च ये ॥ १६८

१६८. शंभोः सख्यौ धनदेपां पत्यौ[6] वरुणे द्योः पतौ चेन्द्रे च विधौ चेन्दौ च ये गुणा औदार्यन्यायपरमैश्वर्यसौम्यत्वादयः सन्ति ते गुणा अमुना राज्ञात्मनि रोपिताः[7] संस्थापिताः । अत एव कीर्तिशुचिना । महापुरुषगुणधारणे[8] हि निष्कलङ्कं यशः प्रसरति ॥

बहुपत्यौ भुवनानामसखौ रणकर्मणि ।
अस्मिन्नरपतौ सर्वान्को गुणान्वक्तुमीश्वरः ॥ १६९ ॥

१६९. भुवनानां बहुपत्यौ भुवनानां पतिर्जगन्नाथो विष्णुस्तस्मिन्नी-षदूने शौर्यादिगुणैर्विष्णुतुल्य इत्यर्थः । अत एव रणकर्मणि युद्धक्रियायां

---

१ ए °यै च की°. २ एफ़ °वतिष्ठतीत्य°. ३ बी °गर्भवि°. ४ एफ़ बुद्धेः प्र°. ५ एफ़ °तौ आदि°. ६ एफ़ °पतौ व°. ७ एफ़ °ताः । अ°. ८ एफ़ °धारिणो हि.

नास्ति सखास्य तस्मिन्नसखौ सहायानपेक्ष इत्यर्थः। अस्मिन्नरपतौ मूलराजे वर्तमानान् गुणान् शौर्यादीन्कः पुमान्वक्तुं वर्णयितुमीश्वरः शक्तः। विष्णुसाम्येनास्य गुणानामानन्त्यान्न कोपीत्यर्थः। बहुपत्याविल्यत्रपतिशब्दो यद्यपि भुवनानामित्यपेक्षते तथाप्यस्य नित्यसापेक्षत्वेन तद्धितवृत्तिस्ततो भुवनानां बहुपत्याविल्यस्य नृपविशेषणत्वम् ॥

सुधिना। अमुना। इत्यत्र "टः पुंसि ना" [२४] इति ना ॥ पतौ। विधौ। इत्यत्र "ङिडौं" [२५] इति[2] डौः ॥

सख्यौ। पत्यौ। इत्यत्र "केवल°" [२६] इत्यादिना–औः ॥ पताविति कश्चित् ॥ केवलग्रहणं किम्। असखौ। नरपतौ। एषु पूर्वेण डौरेव ॥ अन्ये तु बहुप्रत्ययपूर्वादपि पतिशब्दादौकारमेवेच्छन्ति[3]। बहुपत्यौ ॥

हरेः सख्या भुवः पत्या सख्ये चास्पृहयालुना।
स्थितं रणेमुना पत्ये वृतश्चायं जयश्रिया ॥ १७० ॥

१७०. अमुना भुवः पत्या राज्ञा रणे स्थितं न कदाचिदपि[4] नष्टमित्यर्थः। नन्वनेन मित्रसाहाय्यान्न नष्टं भविष्यतीत्याह। सख्ये मित्रायास्पृहयालुना निरपेक्षेण। नन्वस्य मित्रमेव न भविष्यत्यतो दैवेनैवास्पृहयालुः कृत इत्याह। हरेः सख्या च। सख्ये चेति चोप्यर्थो भिन्नक्रमे[5]। नैकयागकरणेन स्वर्गस्य तर्पकत्वादिन्द्रस्य मित्रेणापि सख्यस्योभयनिष्ठत्वादिन्द्रे मित्रे सत्यपीत्यर्थः। एतेनातिपराक्रमित्वोक्तिः[6]। नन्वेवं तर्हि शत्रुशस्त्रज्वलनेस्य पतङ्गायितं भविष्यति। नेत्याह। अयं राजा जयश्रिया पत्ये भर्त्रे वृतश्चात्मभर्त्रीकृतश्चेत्यर्थः ॥

१ सी डी °खा यस्य°. २ सी डी °तिडौ. ३ एफ् °च्छति। ब°. ४ एफ् °चिन्नष्ट°. ५ एफ् °मेनेक°. ६ ए °नापि प°

कान्त्या सदृग्मिशः पत्युर्मधोः सख्युश्च रूपतः ।
शंभोः सख्युः श्रियः पत्युर्हीयते स्म न संपदा ॥ १७१ ॥

१७१. मधोः सख्युश्च कामस्य[1] सदृक् राजा । शंभोः सख्युर्धनदात्[2] । श्रियः पत्युर्नारायणात् । शिष्टं स्पष्टम् ॥

सख्या । पत्या । सख्ये । पत्ये । सख्युः । पत्युः । सख्युः । पत्युः । इत्यत्र "न नाख्यिदेत्" [२७] इति न नादेशैकारौ ॥

अस्योपायचतुःस्तन्यै बुद्ध्यै धेन्वै नु साधवे ।
शुचये कीर्तिदुग्धायै स्पृहयामास वासवः ॥ १७२ ॥

१७२. अस्य राज्ञो बुद्ध्यै धेन्वै न्वर्थात्कामधेनव इव वासवः स्पृहयामास । कामधेनुरिवैतद्बुद्धिर्ममापि भूयादित्यैच्छदित्यर्थः । यतः साधवे मनोज्ञायै । कुतः साधुत्वमित्याह । यत उपायाः सामदानभेददण्डा एव चत्वार स्तना यस्यास्तस्यै । तथा कीर्तिरेव श्वेतत्वाप्यायकत्वादिना दुग्धं यस्यास्तस्यै । बुद्ध्या हि यथौचित्यं नियुज्यमाना उपायाः स्वफलसाधकत्वाद्यशोदुग्धं प्रस्नुवन्ति । तथा शुचये पवित्रायै ॥

तस्याः कीर्त्या मतेस्तस्या अस्मिन्विश्वोपरि स्थिते ।
सजिष्णोरपि दैत्याजिभीर्वा भीर्निर्ययौ दिवः ॥ १७३ ॥

१७३. तस्याः कीर्त्यास्तस्या[3] मतेः । "गम्ययपः०" [२.२.७४] इत्यादिनात्र पञ्चमी । तां शौर्यादिगुणोद्भवां कीर्तिं तां[4] पूर्ववर्णितां मतिं च प्राप्य विश्वोपरि[5] स्थिते विश्वत्रयोपरिवर्तिनि सर्वोत्तम इत्यर्थः । अस्मिन् राज्ञि सति दिवः स्वर्गाद्भीर्निर्ययौ । कीदृश्याः । सजिष्णोरपि जिष्णुना शक्रेण

१ सी डी °स्य च स°. २ डी °द् । शेष स्प°. ३ ए कीर्तेस्त°. ४ सी डी °तां म°. ५ ए °रिव°.

धेन्वै साधवे । भीर्वाः सजिष्णोः । कामधेन्वाः असिधेनोः । अतन्वां तनौ । इत्यत्र "स्त्रियां ङिताम्" [२८] इत्यादिना तत्संबन्धिनामन्यसंबन्धिनां वा ङितां वा दैदास्दास्दामः ॥ अन्ये तु पुरुषस्य समासार्थत्वे सति नेच्छन्ति । तन्मते लम्बभ्रुतेरस्येत्येव स्यात् न तु लम्बभ्रुत्या इति ॥ अन्यस्तु पुरुषस्यैव समासार्थत्व इच्छति न स्त्रियाः । तन्मते स्निग्धदृष्टया अस्येत्यत्रैव स्यात् । न तु स्निग्धदृष्टेः स्त्रिया इति ॥ इदुत इत्येव । द्विवः ॥

लक्ष्म्यै । पृथ्व्याः । पृथ्व्याः । पृथ्व्याम् । वध्वै । परवध्वाः । वध्वाः । वध्वाम् । सुलक्ष्म्यै । सुवध्वै कस्मै चित् । इत्यत्र "स्त्रीदूतः" [२९] इति तत्संबन्धिनामन्यसंबन्धिनां वा ङितां दैदास्दास्दामः ॥ स्त्रिया इत्यनुवर्तमाने पुनः स्त्रीग्रहणं नित्यस्त्रीविषयार्थम् । तेनेह न भवति । ग्रामण्ये खलप्वे परस्त्रियै ॥ ईदूत इति किम् । द्विवः । द्विवि ॥

भुवि श्रियै धिये वासो ह्रियाः स्थानं भियोपदम् ।
द्युभुवा आपतत्स्त्रीणां ललासैष भ्रुवो भ्रुवाम् ॥ १७८ ॥

१७८. दिवो भूर्द्युभूस्तस्या द्युभुवाः स्वर्गभूमेः सकाशाद् भुवि मर्त्यलोक आपतत्स्त्रीणामेतदद्भुतरूपादिगुणश्रीदिदृक्षयागच्छद्देवाङ्गनानां भ्रुव एकस्या भ्रुवः सकाशाद् भ्रुवामपरस्यां भ्रुव्येष राजा ललास चिक्रीड । अत्र भ्रूशब्देन तन्निकटं चक्षुरुपलक्ष्यते । एकस्माच्चक्षुषोपरस्मिंश्चक्षुषि ललास । सर्वाभिरपि देवीभिरहमहमिकयासौ दृष्ट इत्यर्थः । यतः श्रियै रूपादिलक्ष्म्यै धिये बुद्धये च वासः । तादर्थ्ये चतुर्थीयम् । श्रियो बुद्धेश्च गृहमित्यर्थः । तथा ह्रिया लज्जायाः स्थानम् । एतेन कुलीनत्वोक्तिः । तथा भियोपदमस्थानम् । एतेन शूरत्वोक्तिः ॥

---

१ एफ् °तां वा. २ एफ् °तां दै°. ३ एफ् अस्यैत्य°. ४ एफ् °ध्वै व°. ५ ए एफ् °यै इदुत. ६ एफ् दिवि ॥. ७ सी भूस्त°. ८ एफ् °कटचक्षुरूपं ल°. ९ सी डी °रह°.

यवक्रियेस्यारिस्त्रियै भिल्ला नद्यां कटप्रुवे ।
अप्रध्यै कूपवर्षाभ्वायिवाधावन्त निष्कृपम् ॥ १७९ ॥

१७९. अस्य राज्ञोरिस्त्रियै शत्रुभार्यायै निष्कृपं निर्दयं यथा स्यादेवं भिल्ला मेदा अधावन्त ग्रहणार्थं धाविताः । कीदृश्यै । यवा हि कदन्नत्वात्समर्थतरा लभ्यन्त इति यवानेव क्रीणाति या तेस्यायतिनिःस्वायायित्यर्थः । तथा मूलराजेन पत्यौ हते भयेनारण्ये पलायमानत्वान्नद्यां नदीमध्ये नावाद्यसंपत्त्या कटेनैव वीरणादितृणमयेन प्रवते तरति या तस्यै तथा प्रकर्षेण ध्यायति प्रधीर्न तथा या तस्याप्रध्यै । हा दैव कथं भविष्यामीत्यार्तध्यानपरायायित्यर्थः । तथा कूपवर्षाभ्वायिव यथा कूपमण्डूकी कूपादन्यन्न किंचिज्जानाति तथा राज्ञीत्वात्स्वभवनादन्यन्मार्गामार्गादिकमजानत्यायित्यर्थः । कूपमण्डूक्यायपि भिल्ला निष्कृपं मारणाय धावन्ति । भिल्ला हि दुर्दुरानपि मारयन्ति ॥

श्रियै श्रियै । ष्णुभुवाः भ्रुवः । ह्रियाः भियः । भ्रुवां भ्रुवि । इत्यत्र "वेयुवोस्त्रियाः" [३०] इति वा दैदास्दास्दामः । इयुव इति किम् । अप्रध्यै । वर्षाभ्वै । पूर्वेण नित्यमेव ॥ अस्त्रिया इति किम् । अरिस्त्रियै ॥ स्त्रीदूत इत्येव । यवक्रिये कटप्रुवेरिस्त्रियै ॥

असौ निरुपमश्रीणां नानारूपश्रियामिव ।
स्त्रीणां नतभ्रुवां भ्रूणां रङ्गाचार्यकमाचरत् ॥ १८० ॥

१८०. नतभ्रुवां नम्रभ्रूणां स्त्रीणां संबन्धिनीनां भ्रूणामसौ राजा र-

१ एफ् कूटव°.

१ ° डी °ल्लाम्लेच्छा अ°. २ सी डी तस्यै । इति°. ३ एबी °निम्ना°. ४ एफ् कटकेनै°. ५ एफ् °न्मार्गोन्मार्गादि°. ६ एफ् °ये भु°. ७ सी डी °स्त्रियामिति. ८ एफ् °वे ॥.

ङ्गाचार्यकं नटोपाध्यायत्वमाचरंश्चक्रे। एनं सौन्दर्यतर्जितस्मरं दृष्ट्वा नारीणामभिलाषातिशयेन मुहुर्मुहुर्भ्रुव उल्लसन्ति। ततो यथा रङ्गाचार्यो नायिका नर्तयति तथायं लीलावतीभ्रुवो नर्तितवानित्यर्थः। कीदृशीनाम्। निरुपमा सर्वोत्तमा श्रीः सौन्दर्यादिलक्ष्मीर्यासां तासामत एव नानारूपश्रियामिव। एवं ज्ञायते नैताः स्त्रियः किं तर्ह्यनेकमूर्तयो लक्ष्मीदेव्यस्तासाम् ॥

श्रीणां श्रियाम्। भ्रूणां भ्रुवाम्। इत्यत्र "आमो नाम्वा" [३१] इति वा नाम् ॥ अस्त्रियाँ इत्येव। स्त्रीणाम् ॥

याचकानां महतीनामाशानामेष पूरकः।
ग्रामण्यां सोमपां नित्यं तद्वधूनां च पूजकः ॥ १८१ ॥

१८१. याचकानां द्विजादीनां संबन्धिनीनां महतीनां राज्यादिलाभविषयत्वाद्बृहतीनामाशानां मनोरथानां पूरकोभूत्तथा ग्रामण्यां व्रतनियमादिभिः प्रकृष्टानां सोमपां वल्लीरसपायिनां यायजूकभेदानां तद्वधूनां च सोमपाभार्याणां च नित्यं पूजकोभूत् ॥

याचकानाम्। आशानाम्। महतीनाम्। वधूनाम्। इत्यत्र "ह्रस्वापश्च" [३२] इति नाम् ॥ ह्रस्वापश्चेति किम्। सोमपाम्। ग्रामण्याम् ॥

धामाष्टानां धीगुणानां षण्णां जेतान्तरद्विषाम्।
गुणानामतिपञ्चानां भूश्चतुर्णां छन्दसामसौ ॥ १८२ ॥

१८२. असौ राजा षण्णां क्रोध १ मान २ मद ३ स्मर ४ लोभ ५ संमदानामन्तरद्विषां जेताभूत्। अत एवाष्टानां शुश्रूषा १ श्रवण २-

१ बी सी एतं सौ°. एफ् एतं सौ°. altered to एवं सौ°. २ ए °दृशानां. ३. सी डी °यामित्ये°. ४ एफ् ह्रस्वेत्यादिना नाम्. ५ ए °ण्या ॥ ६ सी° र ४ सं°. ७ एफ् °भ५हर्षाणामान्त°.

ग्रहण ३ धारण ४ ऊह ५ अपोह ६ अर्थविज्ञान ७ तत्वज्ञानानां८धीगुणानां धाम स्थानमभूत् । अत एव च पञ्चातिक्रान्ता ये[१] तेषामतिपञ्चां षण्णां संधि १ विग्रह २ यान३ आसन ४ द्वैधीभाव ५ संश्रयाणां ६ गुणानां भूर्यथौचित्यं प्रवर्तनादुत्पत्तिस्थानमभूत् । तथा चतुर्णामृग् १ यजुः[२] २-साम ३ अथर्वणानां ४ छन्दसां वेदानां च भूः पाठेनाध्येत्रध्यापकसाहाय्यकरणादिना चोत्पत्तिस्थानमभूत् । निगृहीतान्तरशत्रुर्हि सुस्थचित्तत्वाद्बुद्धिपात्रं स्यात् । धीमांश्च बुद्धिप्रकर्षेण संध्यादीन् सम्यग् नियुङ्क्ते शास्त्रपाठादि च करोति ॥

चतुर्णाम् । षण्णाम् । इत्यत्र "संख्यानां र्णाम्" [३३] इति नाम् ॥ तत्संबन्धिविज्ञानादिह न स्यात् । अतिपञ्चानाम् ॥ संख्यानामिति किम् । द्विषाम् ॥ बहुवचनं व्याप्त्यर्थम् । तेन भूतपूर्वनान्ताया[३] अपि । अष्टानाम् । एतेनैव नान्तसंख्याया[४] मूलोदाहरणमपि सूचितम् ॥

अतित्रयाणां वर्णानामतित्रीणामुदन्वताम् ।
प्रभुरेष त्रयाणां च पुमर्थानां प्रवर्तकः[१] ॥ १८३ ॥

१८३. एष राजा त्रयाणां पुमर्थानां प्रवर्तकस्त्रीन्धर्मार्थकामान्यथोचितं प्रयुञ्जानः सन् प्रभुरभूत् । केषाम् । अतित्रयाणां त्रीनतिक्रान्तानां चतुर्णां वर्णानां ब्राह्मणक्षत्रियवैश्यशूद्राणां न्यायेन पालनात्तथा । त्रयाणां चेत्यत्र चः समुच्चयार्थो भिन्नक्रमे । अतित्रीणां चतुर्णामुदन्वतां च पूर्वपश्चिमदक्षिणोत्तराब्धीनां च चतुर्दिग्विजयात् ॥

त्रयाणाम् । इत्यत्र "त्रेस्त्रयः" [३४] इति नाम् त्रेस्त्रयादेशश्च ॥ तत्संबन्धिविज्ञानादिह न स्यात् । अतित्रीणाम् ॥ अतत्संबन्धिनः स्यादित्येके । अतित्रयाणाम् ॥

---

१ ए कः ॥ १८३ ॥ स्त्रीन्ध°.

१ सी डी येषा°. २ सी 'जुः२अ'. ३ एफ् °पूवायाना°. ४ एफ् °ख्याम्°

मुनेः साधोश्च सत्कर्ता मदं हर्ता कले रिपोः ।
अद्भुतैरेष विभवैर्द्योर्विशेषं चकार गोः ॥ १८४ ॥

१८४. एष राजाद्भुतैराश्चर्यकारिभिर्विभवैः सदा प्रवर्तमानैर्महोत्सवादिलक्ष्मीभिः कृत्वा द्योः स्वर्गात्सकाशाद्गोर्भूमेर्विशेषमतिशयं चकार । ननु कलौ प्रतिक्षणं पदार्थानां हीयमानत्वात्कुतोद्भुतविभवसंभव इत्याह । रिपोः शत्रुभूतात्कलेः कलिकालात्सकाशान्मदं सांप्रतमनीतिरूपा मदाज्ञैव सर्वत्रास्खलितेत्येवं गर्वं हर्ता । यतो मुनेर्निःसङ्गस्य साधोश्च शिष्टजनस्य सत्कर्ता रक्षादानादिना सैन्मानकः । यथा यथासौ मुनीन्साधूंश्च सत्चक्रे तथा तथा कलिः क्षीणस्ततश्च महर्द्ध्या भूः स्वर्गादपि विशिष्टाभूदित्यर्थः ॥

कलेः । मुनेः । रिपोः । साधोः । द्योः । गोः । इत्यत्र "एदोद्भ्याम्०" [३५] इत्यादिना ङसिङसो रेफः ॥

पत्युर्जयश्रियः पत्युः सख्युः सख्युर्बिडौजसः ।
एनोलून्युरुमाभर्तुर्नन्तुरस्मादभून्नयः ॥ १८५ ॥

१८५. अस्मान्नृपान्नयो न्यायोभूत् । यतः पतिमिच्छति क्यनि दीर्घत्वे पतीयति क्विपि यलोपे च पतीस्तस्याः पत्युः स्वामिनमिच्छन्त्या जयश्रियः पत्युः शत्रूच्छेदेन नायकात् । एतेन सैन्यकोशाद्युत्कृष्टसंपदा महर्द्धिकत्वमुक्तम् । तथैनोलून्युः पूर्ववत्क्यनि क्विप्येनोलूर्नि पापच्छेदमिच्छतोत एव सख्युः सखायमिच्छतो बिडौजस इन्द्रस्य सख्युर्योगा-

---

१ एफ् °नः । म°. २ एफ् शत्रूभू°. ३ एफ् °न्मन्दं सां°. ४ सी डी सम्मान°. ५ सी डी °थासौ. ६ एफ् °त्वे कि°. ७ सी डी °पि य्वोः प्वय् व्यञ्जने लुक् इतिय°. ८ एफ् क्विपि यलोपे लूनिः पा°. ९ डी °लूनीस्तस्यैनोलून्युः पा°.

दिधर्मानुष्ठानविधानेनाह्लादकत्वान्मित्रात्तथोमाभर्तुर्हरस्य नन्तुरेतेन विशे-षणत्रयेणा[1]तिधार्मिक[2]त्वमुक्तम् । महर्द्धिको धार्मिकश्च न्यायमेव करोति ॥

खि । सख्युरस्मात् ॥ ति । पत्युरस्मात् ॥ खी ती । सख्युर्बिडौजसः । पत्युर्जयश्रियः । इत्यत्र "खितिखीतीय उर्" [३६] इति ङसिङसोरुर् ॥ लून्युः । इत्यत्र "कादेशोपि" [२.१.६१] इति नस्यासत्त्वात्तीरूपत्व उर् ॥

नन्तुरस्मात् । भर्तुः । इत्यत्र "ऋतो डुर्" [३७] इति डुर् ॥

सुधास्वसारं वोढारमतिनप्तारमुष्णगोः ।
अमुं भूपप्रशास्तारं लब्ध्वा मुमुदिरे प्रजाः ॥ १८६ ॥

१८६. अमुं भूपप्रशास्तारं राजाधिराजं लब्ध्वा प्रजा मुमुदिरे । यतः सुधायाः स्वसा भगिनी लक्ष्मीर्द्वयोरप्येकस्मिन्नब्धावुत्पन्नत्वात्तां वो[3]ढारमिव वोढारं सम्यक्प्रजापालनादिना विष्णुतुल्यमतएवोष्णगो रवेर्नप्तारं पौत्रमतिक्रान्तम् । सूर्यस्य पुत्रो मनुस्तस्य पुत्र इक्ष्वाकुः सूर्यस्य पौत्रस्तस्मादपि[4] नीतिप्रजापालनादिनाधिकमित्यर्थः । अथवातिनप्तारमतिशयितं पौत्रं लब्ध्वा । प्रकृष्टपौत्रजन्मनि प्रजा लो[5]का मोदन्ते ॥

शंभोः क्षत्तारमाज्ञायां त्वष्टारमिव कौशले ।
अमुं होता[1]रः पोतारो नेष्टारस्तुष्टुवुः क्रतौ ॥ १८७ ॥

१८७. होतारः पोतारो नेष्टारश्च ऋत्विग्विशेषाः क्रतौ यज्ञेमुं नृपं तुष्टुवुः । यतः शंभोर्हरस्याज्ञायां विषये क्षत्तारं प्रतीहारमिव । यथा शंभो-

---

१ एफ् ॰तारो पो .

१ एफ् ॰येण धा॰. २ सी डी ॰कश्च. ३ एफ् ॰ढार म॰. ४ सी डी ॰पि प्र॰ ५ एफ् ॰लोको मोदते ॥.

राज्ञां नन्दिप्रतीहारः करोति[2] तथा शंभूक्तयज्ञादिविधिरूपाज्ञायाः कारकमित्यर्थः । तथा कौशले यागादिविधिविषये नैपुणे त्वष्टारमिव । यथा त्वष्टा वर्धकिः[3] शिल्पक्रियाकुशलः स्यात्तथा यागादिधर्म्यक्रियायां कुशलमित्यर्थः । एवं चास्य यागादिविषयं क्रियाज्ञानं चोक्तम् ॥

पितरः सन्तु संतुष्टा देवाश्च त्वयि यष्टरि ।
चण्डिकामात नन्देति प्रस्तोतारोऽब्रुवन्निमम् ॥ १८८ ॥

१८८. प्रस्तोतार ऋत्विग्विशेषा इमं नृपमब्रुवन् । कथमित्याह । चण्डिका चाण्डालदेवीनाम्नी[4] माता यस्य । यद्वा चण्डिका गौरी प्रतिपालिकात्वान्माता[5] यस्य । तस्य संबोधनं हे चण्डिकामात त्वयि विषये पितरः पूर्वजा देवाश्च संतुष्टाः सन्तु । यतो यष्टरि[6] यागैः पितृदेवानां पूजके । ततश्च नन्देति ॥

वोढारम् । स्वसारम् । नप्तारम् । नेष्टारः । त्वष्टारम् । क्षत्तारम् । होतारः[7] । पोतारः । प्रशास्तारम् । इत्यत्र "तृस्वसृ०" [३८] इत्यादिना-आर् ॥ तृशब्दस्यार्थवतो ग्रहणेन प्रत्ययग्रहणान्नप्त्रादीनामव्युत्पन्नानां संज्ञाशब्दानां तृशब्दस्य ग्रहणं न स्यादिति तेषां पृथगुपादानम् । इदमेव च ज्ञापकम् "अर्थवद्ग्रहणे नानर्थकस्य" [न्या० सू० १४] ग्रहणं भवतीति ॥ व्युत्पत्तिपक्षे तृग्रहणेनैव सिद्धे नप्त्रादिग्रहणं नियमार्थं तेनान्येषामौणादिकानां न स्यात् ॥ पितरः ॥ केचित्तु प्रस्तोतृउद्गातृप्रतिहर्तृप्रतिशास्तृशब्दानामौणादिकानामप्यारं मन्यन्ते । प्रस्तोतारः[8] ॥

पितरः । यष्टरि । इत्यत्र "अर्डौ च" [३९] इत्यर् ॥

चण्डिकामात । इत्यत्र "मातुर्मात०" [४०] इत्यादिना मात इत्यकारान्तादेशः ॥

१ बी सी °प्रतिहा°. २ एफ् °ति यथा. ३ सी °किः शल्यक्रि°. ४ ए चाण्डल°. ५ एफ् °पालकत्वा°. ६ एफ् °रि योगैः. ७ डी °रः प्र°. ८ सी °रः य°.

मातः क्षितेम्ब हे लक्ष्मि शंभो तद्वधु चण्डिके ।
अम्बाडे गोत्रदेवि क स्थेत्यस्य प्रालपन्द्विषः ॥ १८९ ॥

१८९. स्पष्टः । नवरं तद्वधु हरप्रिये । अम्बाडे मातः । इति प्रालपन् । अनेन रणे पातिता द्विषः क्षित्यादिदेवताः स्मरन्त एवमकणमित्यर्थः ॥

भटाग्रणीः सतां मित्र रूपेण परमे नृप ।
त्वया श्रीमन् धृतोर्वीत्यूचेमुं सप्रेयसी जनः ॥ १९० ॥

१९०. सुगमः । किं तु परमश्चासाविश्च परमेः । तस्य संबोधनं हे परमे । रूपेण कृत्वा प्रकृष्टकाम । तथा सह प्रेयसीभिर्वर्तते यः स सप्रेयसी सभार्यो लोकः ।

मातः । क्षिते । शंभो । इत्यत्र "ह्रस्वस्य गुणः" [४१] इति गुणः ॥ ह्रस्वस्येति किम् । लक्ष्मि । तद्वधु ॥

चण्डिके । इत्यत्र "एदापः" [४२] इत्येत् ॥

नित्यदित् । देवि । लक्ष्मि । तद्वधु ॥ द्विस्वराम्बार्थ । अम्ब । इत्यत्र "नित्यदित्°" [४३] इत्यादिना ह्रस्वः ॥ नित्यदिदिति किम् । भटाग्रणीः । अम्बार्थानां द्विस्वरविशेषणं किम् । अम्बाडे ॥ आप इत्येव । मातः ॥

नृप । अम् । मित्र । परमे । इत्यत्र "अदेतः°" [४४] इत्यादिना सेस्तदादेशस्यामश्च लुक् ॥

---

१ एफ् तद्वन्धु.

---

१ सी डी एफ् हरिप्रि°. २ एफ् °तः अति°. ३ एफ्° स्वस्येति ह्रस्वः । ह्र°. ४ एफ् °रार्थ. ५ एफ् °दिद्विस्वरे त्या°. ६ ए एफ् °दिति.

उर्वी । समेयसी । धृता । श्रीमन् । इत्यत्र "दीर्घङ्याप्°" [४५] इत्यादिना सेर्लुक् ॥ एभ्य इति किम् । जनः ॥

अमुम् । इत्यत्र "समानादमोत°" [४६] इत्यमोतो लुक् ॥

चतुर्णां छन्दसां षण्णामङ्गानामेष वेदिता ।
विद्यानां च चतसृणां शक्तीनां तिसृणां गृहम् ॥१९१॥

१९१. एष राजा चतुर्णां छन्दसां वेदानां तथा षण्णामङ्गानां शिक्षा-१ कल्प २ व्याकरण ३ छन्दो ४ ज्योति ५ निरुक्तीनां ६ च वेदितार्थतो ज्ञाताभूत्तथा चतसृणां विद्यानामान्वीक्षिकी १ त्रयी २ वार्ता-३ दण्डनीतीनां ४ गृहं तत्तत्पुस्तकसंग्रहादिनाधारोभूत् । तथा तत्तच्छास्त्रोक्तार्थानुसारेण प्रवृत्त्या तिसृणां शक्तीनां प्रभुत्वशक्ति १ उत्साहशक्ति-२ मन्त्रशक्तीनां ३ गृहं स्थानमभूत् । एतेन सर्वशास्त्राणि ज्ञातानि संगृहीतानि । तदुक्ताचरणाच्च फलप्राप्त्यास्य तानि सफलान्यभूवन्नित्यर्थः ॥

अङ्गानाम् । शक्तीनाम् । इत्यत्र "दीर्घो नामि°" [४७] इत्यादिना दीर्घः ॥ अतिसृचतसृष्र इति किम् । तिसृणाम् । चतसृणाम् । षण्णाम् । चतुर्णाम् । नामीति किम् । छन्दसाम् ॥

नृणामीशेऽत्रारिनृणां शक्तीः प्राणांश्च हर्तरि ।
न कोपि चतुरह्न्याजौ त्र्यह्ने ब्यहनि वापतत् ॥ १९२ ॥

१९२. अत्रास्मिन्नृणामीशे नृपेरिनृणां शक्तीः प्रभुत्वोत्साहमन्त्ररूपा बलानि वा प्राणांश्च हर्तर्यपनयनशीले सत्याजौ रणे कोपि शत्रुर्नोपतन्न डुढौके । कीदृश्याजौ । चतुर्ष्वहःसु भव इति विगृह्य "भवे" [६.३.१२३]

---

१ ए चतसृणां छ°. २ ए एफ् °ति ५ निरु°. ३ एफ् तत्त°. ४ एफ् °नि त°. ५ एफ् °न्यभव°. ६ ए °नि च प्रा°.

इत्यण्विषये "सर्वांश°" [७. ३. ११७] इत्यादिनाट् । अह्लादेशश्च । ततो "द्विगोरनपत्ये°" [६. १. २४] इत्यादिनाणो लुपि चतुरह्नस्तस्मिंश्चतुरह्नि । एवं त्र्यह्ने त्र्यह्नि वा स्तोककालीनेपीत्यर्थः । आजेः प्रयोगः पुंस्यपि दृश्यते । तथा च माघे ।

वाहनाजनि मानासे साराजावनमा ततः । [१९.३३] इति ॥

असायाह्नेपि सायाह्नीवैषोस्वाप्सीन्न जातु चित् ।
अदीप्यत प्रतापेन सायाह्नि हुताशवत् ॥ १९३ ॥

१९३. यथा सायाह्नि संध्याकाले निषिद्धत्वान्न कोपि स्वपिति तथैष राजासायाह्नेप्यसंध्यायामपि स्वापार्हे कालेपीत्यर्थः । जातु चित्कदाचिदपि नास्वाप्सीत् । सदापि प्रजापालने जागरूकोभूदित्यर्थः । तथा यथा सायाह्नि हुताशोग्निः प्रतापेन दीप्त्या कृत्वा दीप्यते तथैष प्रतापेन तेजसा कृत्वादीप्यत ॥

पैत्रे त्र्यह्नि दैवतेपि त्र्यह्ने ब्राह्मे त्र्यह्न्यपि ।
गुणानां वर्ण्यमानानां कोप्यन्तं नास्य लब्धवान् ॥१९४॥

१९४. सुगमः । किं तु पितॄणामयं पैत्रस्तस्मिन् । विगतमहो त्र्यह्नस्तस्मिन् त्र्यह्नि गतदिने । दैवते देवसंबन्धिनि । ब्राह्मे विधातृसंबन्धिनि । पैत्रत्र्यह्नादि प्रमाणं चेदम् ।

---

१ एफ् °त् ॥ १९३ ॥ सं°. २ बी पैत्र्ये त्र्य.

---

१ सी डी °थापि मा°. २ एफ् °सेसरा°. ३ ए बी डी एफ् °मानतः. ४ एफ् स्वापेर्हे. ५ एफ् °प्सीदित्यर्थः । स°. ६ ए °था सा°. ७ सी एफ् °प्यते ॥ पै°. ८ ए °ते देव°. ९ डी ब्राह्मये वि°.

भवेत्पैत्रं त्वहोरात्रं मासेनाब्देन दैवतम् ।
दैवे युगसहस्रे द्वे ब्राह्ममिति ॥

एतद्गुणानां वर्ण्यमानानां पैत्रदैवतब्राह्मादिनान्यैप्यतिक्रामन्ति न तु ते पूर्यन्त इत्यर्थः ॥

नृणाम् नृणाम् । इत्यत्र "नुर्वा" [४८] इति वा दीर्घः ॥

प्राणान् । इत्यत्र "शसोता°" [४९] इत्यादिना शसोता सह दीर्घः पुंसि शसः सस्य नश्च । पुल्लिङ्गाभावे तु दीर्घत्वमेव । शक्तीः ॥

चतुरह्नि । ॅअहनि । सायाह्नि । सायाहनि[5]। व्यह्नि । व्यहनि । इत्यत्र "संख्यासाय°" [५०] इत्यादिनाह्नस्याहनादेशो वा । अहनादेशे च "ईङौ वा" [२. १. १०९] इति वानोस्य लुक् । पक्षे[6] व्यह्ने । असायाह्ने । व्यह्ने ॥

अष्टाभ्यो दिग्गजेभ्यश्चाष्टभ्योद्रिभ्यश्च धूर्नियाम् ।
अत्यष्टानोत्र निधयोत्यष्टाश्चाभिमुखा ग्रहाः ॥ १९५ ॥

१९५. अत्र नृपॅविषयेष्टावतिक्रान्ता अत्यष्टानो नव महापद्म १ पद्म- २ शङ्ख ३ मकर ४ कच्छप ५ मुकुन्द ६ कुन्द ७ नील ८ चर्चाख्या ९ निधयः । तथात्यष्टा नव । अर्क १ सोम २ मङ्गल ३ बुध ४ गुरु- ५ शुक्र ६ शॅनैश्चर ७राहु ८ केतवो९ ग्रहा ॅअभिमुखा अनुकूला अभवॅन् । यतः किंभूते । अष्टाभ्य ऐरावत १ पुण्डरीक २ वामन ३ कुमुद- ४ अञ्जन ५ पुष्पदन्त ६ सार्वभौम ७ सुप्रतीकेभ्यो ८ दिग्गजेभ्यश्च । तथाष्टभ्यो विन्ध्य १ पारिजात २ शुक्तिमत् ३ ऋक्षपर्वत ४ माहेन्द्र-

१ एफ् °त्यष्टश्चा°

१ सी डी एफ् माहयमि°. २ एफ् °ब्राह्मयदि°. ३ सी डी °न्यति°. ४ सी डी व्यह्नि सा°. ५ एफ् °नि व्यह°. ६ एफ् °क्षे अहे. ७ बी °पतिवि°. ८ एफ् शनि७°. ९ सी डी अनु°. १० सी डी °न् । किं°.

५ सह्य ६ व(म ?)लय ७ हिमवद्भ्यो ८ द्रिभ्यश्च कुलाचलेभ्यश्च सकाशात्स-म्यक्पालनया भूभारस्यात्मनि निक्षेपाद्धुरं भूभारं नयत्यात्मानं प्रापयति यस्तस्मिन्धूर्नियां सकलभूभारधर इत्यर्थः । अष्टभिर्दिग्गजैः कुलाचलैश्च भूर्ध्रियत इति कविरूढिः । अथ च यो धूर्नीः कार्यप्राग्भारकरणक्षमः स्यात्तस्मिन्सर्वोऽप्यनुकूलः स्यादिति ॥

नियाम् । इत्यत्र "निय आम्" [·५१] इत्याम् ॥

अष्टाभ्यः । अष्टभ्यः । अत्यष्टाः । अत्यष्टानः । इत्यत्र "वाष्टन आः स्यादौ"[५२] इति वा-आकारः ॥

अष्टावष्ट तथात्यष्टावस्य भावान्विजानतः ।
कीर्त्यात्यष्टौ कृताः क्ष्मांशा दिशोऽष्टाष्टौ नगाः सिताः॥१९६॥

१९६. अस्य राज्ञः कीर्त्या सिताः श्वेताः कृताः । क इत्याह । अष्टावतिक्रान्ता अत्यष्टौ नवेन्द्रद्वीप १ कशेरुमन् २ ताम्रपर्ण ३ गभस्तिमत् ४ नागद्वीप ५ सौम्य ६ गन्धर्व ७ वरुण ८ कुमारीद्वीपाख्याः ९ क्ष्मांशाः पृथ्वीखण्डानि । तथाष्टावैन्द्र्याग्नेयीयाम्यानैर्ऋतीवारुणीवायव्याकौबेर्यैशान्यो दिशः । तथाष्टौ नगाः कुलाचलाः । यतोऽष्टौ तथाष्ट तथात्यष्टौ नव । सर्वसंख्यया पञ्चविंशतिं भावांस्तत्त्वानि विजानतो वेदितुः । सांख्यमते हि पञ्चविंशतिः पदार्था वर्ण्यन्ते । तथाहि सत्वरजस्तमसां साम्यावस्था प्रकृतिः १ तदुद्भूतं महत्तत्त्वं २ तस्मादहंकारः ३ तस्माच्च स्पर्शन ४ रसन ५ घ्राण ६ चक्षुः ७ श्रोत्र ८ नामानि पञ्च बुद्धीन्द्रियाणि । पायु ९ उपस्थ १० वचः ११ पाणि १२ पादा-१३ ख्यानि पञ्च कर्मेन्द्रियाणि । तथा मनः १४ । तथा रूप १५ रस-

१ एफ् °श्च स°. २ ए °ति रू°. ३ एफ् अत्यष्टानः । इ°. ४ ए सी डी °ति आ°. ५ सी डी °प १ सकेरु°. ६ बी °मारद्वी°. ७ ए एफ् °नैर्ऋती°. ८ सी डी एफ् °शति आ°. ९ सी डी एफ् °तिप°. १० सी डी° णि म°.

१६ गन्ध १७ स्पर्श १८ शब्द १९ संज्ञानि पञ्च तनुमात्राणि। इति षोडशको गणः। तनुमात्रोद्भूतानि तेजो २० जल २१ पृथ्वी २२ नभो-२३ वायु २४ संज्ञानि पञ्चभूतानि। अकर्ता विगुणो भोक्ता चात्मा २५ चेति। सांख्यमते पञ्चविंशतितत्त्वव्यतिरिक्तमन्यंजगन्नास्ति। ततश्च सकलजगत्स्वरूपज्ञस्येत्यर्थः। एवंविधस्य च कीर्तिः सर्वत्रापि प्रसरति॥

अष्टौ[2] नगाः। अष्टौ भावान्। इत्यत्र "अष्ट औ[3]र्जस्शसोः" [५३] इत्यौः॥ कृतात्वस्य निर्देशादिह न स्यात्। अष्ट दिशः। अष्ट भावान्। अतत्संबन्धिनोरपीच्छन्त्येके। अत्यष्टौ क्ष्मांशाः। अत्यष्टौ भावान्॥

त्रातुं षडष्ट भुवनान्युचिते ततीह
स्थामान्यधुर्यति हराः किल पञ्च षट् च।
तूणे भृशं जयकृते दधतोस्य चास्तां
मन्ये हयद्विपबले परिवारमात्रम्॥ १९७॥

१९७. किलेति संभावनायाम्। पञ्च षट् च[4] हरा एकादश रुद्रा यति यावन्ति स्थामान्यभवंस्तति तावन्ति[5] स्थामानि बलानीह राज्ञि न्यधुः। स्वकीयानि सर्वाण्यपि बलान्यस्मिंस्थापितवन्त इत्यर्थः। यतः षडष्ट भुवनानि भूर्लोक १ भुवर्लोक[6] २ स्वर्लोक[7] ३ महर्लोक[8] ४ जनलोक[9]-५ तपोलोक ६ सत्यलोका ७ ख्यानि सप्त सप्तभिर्वायुस्कन्धैर्मिलितानि चतुर्दश जगन्ति त्रातुं रक्षितुमुचिते। रक्षितुं क्षमे हि सर्वोपि स्ववस्तु निदधाति। अत एव तथाहं मन्येस्य राज्ञो जयकृते विजयार्थं तूणे तूणौ[10]वुपलक्षणत्वाद्धनुश्च। भृशमत्यर्थं दधतः सतो हयद्विपबले अश्वगज-

१ सी षड्डा.

१ बी एफ् °न्यञ्जग°. २ एफ् °ष्टौ नागाः. ३ एफ् औरित्यादिना औः. ४ बी च ए°. ५ ए° न्ति ब°. ६ ए बी भुवोलोक. एफ् भुविलोक. ७ डी °कज°. ८ बी क ४ ज्ञान°. ९ डी °क ५ पाताललो°. १० बी डी एफ् तूर्णारौ उप°. सी. तूणीर उप°.

सैन्ये। उपलक्षणत्वाद्रथपत्तिबले अपि। परिवारमात्रं परिच्छद एवास्तामभूतां स्वबलेनैवास्य जगच्छासितुं क्षमत्वात् ॥

यति अभवन्। तति न्यधुः। षट् पञ्च हराः। षडष्ट त्रातुम्। इत्यत्र "डतिष्ण°" [५४] इत्यादिना जस्-शसोर्लुक् ॥

स्थामानि। भुवनानि। इत्यत्र "नपुंसकस्य शिः" [५५] इति जस्-शसोः शिः ॥ नपुंसकस्येति किम्। हराः।

बले आस्ताम्। तूणे दधतः। इत्यत्र "औरीः" [५६] इति-ईः ॥

परिवारमात्रम्। भृशं दधतः। इत्यत्र "अतः स्यमोम्" [५७] इति स्यमोरम् ॥ वसन्ततिलका छन्दः। सर्गान्ते छन्दोन्तरं[1] क्रियत इति हि कविसमयः॥

अन्यद्बलं किल महोन्यतरद्रवीन्द्वोर्धैर्यं च नेतरदतीतरमस्य सर्वम्।
सैन्यं द्विषां कतमदेष न संजहार दृष्टं जगत्कतरदेकतरं न चक्रे १९८

१९८. अस्य राज्ञो बलं पराक्रमोन्यदपूर्वं लोकोत्तरमित्यर्थः। तथास्य महस्तेजो रवीन्द्वोः सूर्याचन्द्रमसोर्मध्येन्यतरदेकतरं द्विषां संतापकत्वाद्रवितेजो वा सज्जनानामाह्लादकत्वादिन्दुतेजोवेत्यर्थः। तथास्य धैर्यं चित्तावष्टम्भलक्षणो गुणो नेतरन्नान्यादृशमापद्यप्यविचलमित्यर्थः[2]। किं बहुनास्य सर्वमौदार्यगाम्भीर्याद्यतीतरमितरानन्यानतिक्रान्तं सर्वोत्कृष्टमित्यर्थः। अतश्चैष राजा द्विषां सैन्यं कतमन्न संजहार। तथा कतरदेकतरं जगद्दृष्टं न चक्रे किं तु सर्वमपि ॥

अन्यत्। अन्यतरत्। इतरत्। कतरत्। कतमत्। इत्यत्र "पञ्चत°"[3] [५८] इत्यादिना स्यमोर्दः ॥ अनेकतरस्येति किम्। एकतरम् ॥ अन्यादेरिति किम्। सर्वम् ॥ अन्यादिसंबन्धिनोः स्यमोर्ग्रहणादिह न स्यात्। अतीतरम् ॥

१ एफ् °ति क°. २ बी °दृशामा°. ३ एफ् °अतोन्या इ°

महः । जगत् । इत्यत्र "अनतो लुप्" [५९] इति स्यमोर्लुप्[1] । अनत इति किम् । धैर्यम् । सैन्यम् ॥

सजरसमजरः परित्यजद्विजरः सज्जरसं च संगरे ।
स्वादो क नु वारि तिष्ठसीत्याक्रन्दत्तृषयास्य शात्रवम् ॥१९९॥

१९९. हे स्वादो मिष्ट वारि जल । क न्विति प्रश्ने । कस्मिन्[2] स्थाने त्वं तिष्ठसि । आत्मानं दर्शयेत्यर्थः । इत्येवंप्रकारेणास्य राज्ञः शात्रवं शत्रुसमूहस्तृषया हेतुनाक्रन्दत्[3] व्यलपत् । यतः किंभूतम् । संगरे रणेजरो जरारहितं तरुणं शात्रवं कर्तृ सजरसं जरान्वितं वृद्धं शात्रवं कर्म परित्यजत् । तथा सज्जरसं विद्यमानजरं वृद्धं शात्रवं कर्तृ विजरस्तरुणं शात्रवं कर्म परित्यजत् । अन्योन्याप्रतीक्षया भयातिरेकात्पलायमानमित्यर्थः । पलायमानस्य हि गाढायासेन तृषातिरेकः स्यात्[4] ॥

अजरः । सजरसम्[5] । विजरः । सज्जरसम्[6] । इत्यत्र "जरसो वा" [६०] इति वा स्यमोर्लुक् ॥

स्वादो । इत्यत्र "नामिनो लुग्वा" [६१] इति लुग्वा ॥ पक्षे लुबेव । हे वारि ॥ वैतालीयं छन्दः ॥

सकथ्यायुः पथि खेत्तृणा रिपुनृपा अक्ष्णास्रमोक्षान्तरं[1]
दध्नोस्थ्नश्च न जानते स्म मधुनोम्बूनां च पर्याकुलाः ।
अस्थीयानि सुवल्क्ष्यवल्गिसुमहांस्यत्युक्ष्यनूर्जि क्षणा-
चेषां दन्तिकुलानि चालमभवन्नस्मिन् रणारम्भिणि ॥ २०० ॥

१ ए °क्ष्णाश्रमो°. एफ् °क्ष्णाश्रुमो°.

१ सी डी °र्लुक् ।. २ ए °न् त्वं. ३ सी डी °त् विल°. ४ सी डी °त् । स°. ५ एफ् सजर°. ६ एफ् °सज्जर°.

२००. अस्मिन्नृपे रणारम्भिणि सति रिपुनृपाः सक्थ्नोरुणा हेतुनायुर्जग्मुः । नेशुरित्यर्थः । कीदृशेन । पथि मार्गे खेत्तृणा खिद्यमानेन श्रमान्वितेन । एतेनैषां पूर्वं कदाचिदपि न रणे भङ्ग इति सूचितम् । यदि पूर्वमपि रणेमी भग्नाः स्युस्तदाभ्यासेन श्रमजयादेषां सक्थि नो खिद्येत । तथा दध्नोस्थ्नश्च मधुनो माक्षिकस्याम्बूनां चान्तरं विशेषं न जानते स्म । यतोभूतपूर्वपराभवोत्पत्त्यास्रमोक्त्रा बाष्पमोचनशीलेनाक्ष्णा दृष्ट्योपलक्षिता रोदनाज्जलाविलाक्षा इत्यर्थः । तथा पर्याकुला भयेनोद्भ्रान्ताः । ये पूर्वं रणे कदापि न भग्ना न रुदिता न च भीतास्तेप्यस्मिन् रणारम्भिणि सति भग्ना रुदिता भीताश्चेत्यर्थः । ततश्च तेषां रिपुनृपाणां सुमहांसि शोभनतेजस्कान्यत एव सुशिक्षितत्वाच्च सुष्ठु वल्गन्ति गतिविशेषान् कुर्वन्ति क्विपि सुवल्ङ्यश्वीयान्यश्वसमूहाः प्रहारैर्जर्जराङ्गतयावल्गि गतिविशेषरहितानि क्षणाच्छीघ्रमलमत्यर्थमभवन् । तथा सुमहांसि दन्तिकुलानि गजौघा अतिशयेनोर्जयन्ति क्विपि अत्यूर्ञ्जि । अतिबलिष्ठान्यनूर्जि बलरहितान्यभवन् ॥

अस्रमोक्त्राक्ष्णा । खेत्तृणा । सक्थ्ना । इत्यत्र "वान्यत॰" [६२] इत्यादिना वा पुंस्त्वम् ॥

दध्नः । अस्थ्नः । सक्थ्ना । अक्ष्णा । इत्यत्र "दध्यस्थि॰" [६३] इत्यादिनान्तस्यान् ॥

मधुनः । इत्यत्र "अनाम्स्वरे नोन्तः" [६४] इति नोन्तः ॥ अनामिति किम् । अम्बूनाम् ॥

अश्वीयानि । इत्यत्र "स्वराच्छौ" [६५] इति नोन्तः ॥

सुमहांसि । इत्यत्र "धुटां प्राक्" [६६] इति नोन्तः ॥

अत्यूर्ञ्जि अनूर्जि । सुवल्ङ्गि अवल्गि । इत्यत्र "र्लो वा"[६७] इति वा नोन्तः ॥

शार्दूलविक्रीडितं छन्दः ॥

१ सी डी ॰माश्रिते॰. २ पफू ॰त्याश्रुमो॰. ३ पफू ॰दनजला॰. ४ सी अस्नुमो॰. पफू अश्रुमो॰. ५ प ॰ना पुं॰. ६ सी डी ॰क् नो॰. ७ डी पफू ॰ति नो॰.

प्राङ् वीरेषु भवञ्जगन्ति चक्रुवान् वश्यानि दोष्मानसौ
युङ् बुद्ध्या बलयुग् दृढांससुभगोनड्वानिवैकः पुमान् ।
गौर्द्यौर्गामवतामुनानयमयः पन्था ऋभुक्षाः सुखी
गा विप्रानवितुं विपक्षजलधौ मन्थाश्च खड्गः कृतः ॥ २०१[1] ॥

२०१. असौ राजा जगन्त्यूर्ध्वाधोमर्त्यलोकान् वश्यानि स्वायत्तानि चक्रुवांश्चक्रे । कीदृशः । अनड्वानिव वृषभ इव दृढौ बलिष्ठौ स्थूलौ च यावंसौ स्कन्धौ ताभ्यां सुभगः । तथा शत्रुवधादिस्वकार्यैकरणालंकर्मीणत्वात्प्रशस्यौ दोषौ भुजावस्य स्तः प्रशंसायां मतौ दोष्मान् । अतएव वीरेषु शूरेषु मध्ये प्राङ् प्रथमो मुख्यः । एतैर्विशेषणैरुत्साहशक्त्यतिशय उक्तः । तथा बुद्ध्या यथौचित्योपायादिप्रयोगविषयया मत्या युङ् युक्तः । एतेन मन्त्रशक्तिरुक्ता । तथा बलयुक् सैन्येन युक्तः । एतेन प्रभुत्वशक्तिरुक्ता । अत एवैकोसाधारणः पुमान् भवन्संपद्यमानः । यथा वश्यानि चक्रुवांस्तथाह । गौरित्यादि । अमुना राज्ञा गां पृथ्वीमवतान्यायिभ्यो रक्षता[2] सता पन्था मार्गो नयः प्रकृतो[3]स्मिन्नयमयो न्यायप्र[4]चुरो न्यायप्रधानो वा कृतो न्यायमार्गः प्रवर्तित इत्यर्थः । अत एवामुना गौः पृथ्वी द्यौरिव स्वर्गतुल्या कृता । इवो[5] ज्ञेयः । एतेन मर्त्यलोकस्य वश्यत्वमुक्तम् । तथा गा धेनूर्विप्रांश्चावितुं दैत्येभ्यो रक्षितुं विपक्षजलधौ विपक्षशब्देन सामान्यतः शत्रुवाचकेनापि गा विप्रानवितुमिति विशेषोक्तेर्दैत्या उच्यन्ते[6] । त एव हि गा विप्रांश्च घ्नन्ति । त एव दुर्विगाहत्वाज्जलधिः समुद्रः । तत्र खड्गः कृपाणो मन्था मन्थानकतुल्यः कृतः । विपक्षाः खड्गेन मथिता इत्यर्थः ।

१ एफ् ॥ २०१ ॥ इति श्रीहेमचन्द्राचार्यविरचिते द्व्याश्रयमहाकाव्येणहिलपत्तनश्रीमूलराजयोर्वर्णनो नाम प्रथमः सर्गः समाप्तः ॥ अ°.

१ डी °स्य स प्र°. २ बी एफ् रक्षिता. ३ एफ् °तोस्ति । नय°. ४ ए सी डी °प्रधा°. ५ ए इवेशे°. ६ एफ् °न्ते । अत एव च हि.

एतेनाधोलोकस्य वश्यतोक्ता । यतो दैत्याः पातालौकस उच्यन्ते । अत एवामुना ऋभुक्षेन्द्रः सुखी कृतः । एतेनोर्ध्वलोकस्य वश्यतोक्ता । गा विप्रानवितुं विपक्षजलधौ मन्थाश्च खड्गः कृत इत्यनेन गोविप्ररक्षाविपक्षमथनलक्षणमस्यावदातमग्रे वर्णयिष्यत इति सूचितम् ॥

प्राङ् । इत्यत्र "अचः" [६९] इति नोन्तः ॥

ऋदित् । भवन् । उदित् । चकृवान् । दोष्मान् । इत्यत्र "ऋदुदितः" [७०] इति नोन्तः ॥

युङ् । इत्यत्र "युजोसमासे" [७१] इति नोन्तः ॥ असमास इति किम् । बलयुग् ॥

अनड्वान् । इत्यत्र "अनडुहः सौ" [७२] इति नोन्तः ॥

पुमान् । इत्यत्र "पुंसोः पुमन्स्" [७३] इति पुमन्सादेशः ॥

गौः । द्यौः । इत्यत्र "ओतं औः" [७४] इति-औः ॥

गाम् । गाः । इत्यत्र "आ अमूशसोर्ता" [७५] इति-आः ॥

पन्थाः । मन्थाः । ऋभुक्षाः । इत्यत्र "पथिन्मथिन्०" [७६] इत्यादिनान्तस्य आः । "एः" [७७] इत्यनेनेकारस्याप्याः । "थोन्थ्" [७८] इत्यनेन थस्य न्थादेशश्च ॥

॥ इति श्रीजिनेश्वरसूरिशिष्यलेशाभयतिलकगणिविरचितायां श्रीसिद्धहेमचन्द्राभिधानशब्दानुशासनद्व्याश्रयवृत्तौ प्रथमः सर्गः समर्थितः ॥

१ ए बी सी एफ् ०न्तः । भ०. २ सी डी ०सो पु०. ३ सी डी ०त औः ४ ए ०सोना इ०.

द्व्याश्रयमहाकाव्ये

द्वितीयः सर्गः ।

प्रथमसर्गे गोविप्ररक्षाविपक्षमथनमुख्यमस्यावदातमग्रे वर्णयिष्यंत इति यत्सूचित्तं तच्छंभूपदेशेन प्रवृत्तमिति पूर्वं तमेवाह ।

महीऋभुक्षोस्य मथोरिदग्रां नीतेः पथा क्ष्मां सुपथीं विधातुः ॥
रिरक्षिषोर्द्यां सऋभुक्षिकां च स्वप्ने कदापीदमुवाच शंभुः ॥१॥

१. कदापि शंभुः सोमनाथोस्य राज्ञः स्वप्न इदं वक्ष्यमाणं दैत्यवधेन देवानां सुखीकरणरूपं कार्यमुवाच । यतो महीऋभुक्षः परमैश्वर्येण महामिन्द्रतुल्यस्य । तथारय एव स्थूलत्वादधीनि तेषां मथो मन्थानकस्य । शत्रून् मथ्नत इत्यर्थः । तथा क्ष्मां पृथ्वीं नीतेः पथा न्यायमार्गेण कृत्वा शोभनोः पन्थानो मार्गो यस्यां "स्त्रियां नृतः" [२. ४. १] इत्यादिना ङीः । सुख्यादित्वात्कजभावः । [७.३.१८१] तां सुपथीं विधातुः सन्न्यायान्वितां पृथ्वीं कुर्वत इत्यर्थः । तथा सह ऋभुक्षा शक्रेण वर्तते या पूर्ववद् ङ्यां कजभावे च सऋभुक्षी दैत्यभीतिनिष्प्रतापत्वात् । कुत्सिताल्पाज्ञाता वा सऋभुक्षी कपि "ङ्यादीदूतः के" [२. ४. १०३] इति ह्रस्वे सऋभुक्षिका । तां द्यां स्वर्गं रिरक्षिषोश्च पालयितुमिच्छोश्च शंभूपदेश्यं कार्यं स्वयमेव चिकीर्षत इत्यर्थः । एवंविधगुणोपेतश्चेदशोपदेशार्हः स्यात् ॥

१ सी इतःप्रभृति ८ श्लोका न सन्ति.

१ एफ् °ष्य इ°. २ बी एफ् °ना प°. ३ ए तहा स°. ४ बी एफ् °निःप्रता° ५ डी इत्यनेन ह्र°. ६ एफ् °देशका°.

सुपथीम् । पथा । मथः । सक्तुभुक्षिकाम् । ऋभुक्षः । इत्यत्र "इन् ङीस्वरे लुक्" [७९] इति-इनो लुक् । सर्गेस्मिन्नुपजातिच्छन्दः ॥

अथ वृत्तद्वयेन शंभुः सामान्येनोपदेशमाह ।

बुद्ध्योशनमत्युशन प्रभाभिर्देवेषु भक्त्यानुशनश्चुलुक्य ।
धुर्येत्यनड्वन् प्रियचत्वरेभिर्वर्णैरुपायैः श्रुतिभिः पुमर्थैः ॥२॥
धुर्योस्यनड्वानिव मेतिचत्वा हरेर्भुजस्त्वं तव के सखायः ।
चत्वारि पातस्तव दिङ्मुखानि भूयाननेहा स्मर देवकार्यम् ॥३॥[1]

२, ३. हे चुलुक्य[1] चुलुकवंशोद्भव[2] बुद्ध्या कृत्वोशनन् दैत्यगुरुतुल्य । तथा प्रभाभिः कान्तिभिः कृत्वात्युशन शुक्रमतिक्रान्त । तथा देवेषु विषये भक्त्यान्तरप्रीत्या कृत्वानुशनो[3]दैत्यगुरो देवेषु हितवांछकेत्यर्थः । तथा धूः कार्यप्राग्भारो धूरिव[4] दुर्वहत्वात् धूर्यानमुखं तत्र धुर्येत्यनड्वन्ननड्वाहं वृष[5]भमतिक्रान्त । तथैभिः सर्वजनप्रत्यक्षैरित्यर्थः । वर्णैर्ब्राह्मणक्षत्रियवैश्यशूद्रैरुपायैः सामदानभेददण्डैः श्रुतिभिः ऋग्यजुःसामाथर्वभिः पुमर्थैर्धर्मार्थकाममोक्षैश्च कृत्वा प्रियाश्चत्वारो यस्य हे प्रियचत्वः प्रियवर्णादिचतुष्टयेत्यर्थः । एतेन जनानुरागादिका सर्वसंपदुक्ता । चत्वारि दिङ्मुखानि सकलभूमिमित्यर्थः । पा[6]तो रक्षतः सतस्तव भूयाननेहा प्रभू[7]तः कालोभूत् । अथ देवकार्यं स्मर । ननु कियन्मात्रोहं का च मे सहायसंपद्यदेवंविधं कार्यं भगवता मय्युपदिश्यत इत्याह । असि त्वं हरेश्चतुर्भुजस्य चतुरो भुजानतिक्रान्तोतिचत्वाः पञ्चमो भुजो बाहुः । एतेन नारायणांशत्वेनातिपराक्रमित्वमुक्तम् । अतएव मे ममानड्वानिव वृषभ इव त्वं धुर्यः सर्वकार्यप्राग्भारवहनक्षमः । अतश्च तव के सखायः का तव सहायापेक्षेत्यर्थः ॥

---

१ एफ् ॥ ३ ॥ युग्मम् । हे.

१ डी एफ् चुलक्य. २ ए एफ् चुलक°. ३ डी °नो देवगु°. ४ बी धूरेव. ५ एफ् °षभम°. ६ ए °तो रक्षकस्य स°. ७ एफ् °भूतका°.

सामान्येनोक्त्वाथ विशेषेणोपदेशमाह ।

विष्णोः सखा यान्न निहन्तुमीशो न तत्पिता वा पुरदंशऋद्धः ।
प्रभासविध्वंसपरेषु तेषु दण्डोशना त्वं भव सज्यधन्वा ॥ ४ ॥

४. विष्णोः सखार्जुनो यान् निहन्तुं नेशो न क्षमः । विष्णोः सखेति साभिप्रायम् । विष्णोर्दैत्यारेरपि यः सखा सोपि तथा । वाशब्दोप्यर्थे । तत्पिताप्यर्जुनजनकोप्यृद्धः सैन्यादिसंपद्युक्तः पुरदंशा इन्द्रो यान् न निहन्तुमीशः । एतेनातिबलिष्ठत्वोक्तिः । प्रभासविध्वंसपरेषु प्रभासाख्यतीर्थविनाशकारिषु तेषु ग्राहरिप्वादिषु[1] दैत्येषु विषये त्वं सज्यधन्वारोपितचापः सन् । दण्डोशना दण्डो निग्रहः स एवान्यायिशिक्षाहेतुत्वाद्दण्डो दण्डशास्त्रम् । तत्रोशना शुक्रो भव । यथा शुक्रोन्यायिषु दण्डमुपदिष्टवांस्तथा त्वमेतेषु निग्रहं कुर्वित्यर्थः । एतेनार्जुनेन्द्राजय्यानप्येतान्दैत्यान्मत्प्रसादात्त्वं जेष्यसीति शंभुना सूचितम् । पुरदंशऋद्ध इत्यत्र "ऋलृति ह्रस्वो वा" [१.२.२] इति ह्रस्वः ॥

उशनन् । अत्युशन । इत्यत्र "वोशनस°" [८०] इत्यादिनानो लुक् चान्तादेशौ वा ॥ पक्षेतुशनः ॥

अत्यनड्वन् । प्रियचत्वः । इत्यत्र "उतः°" [८१] इत्यादिना सस्वरो वादेशः ॥

अनड्वान्[4] । अतिचत्वाः । चत्वारि । इत्यत्र "वाः शेषे" [८२] इति वाः ॥ शेष इति किम् । अनड्वन् । प्रियचत्वः ॥

सखायः । इत्यत्र "सख्युः°" [८३] इत्यादिना-ऐकारोन्तादेशः ॥

१ एफ् पुरुदं°

१ बी °दिदै°. २ एफ् °षु वि°. ३ बी इतीति. ४ एफ् °रोव आदे°. ५ एफ् °न् प्रि°. ६ एफ् °ख्युरितोशावैत् इति ऐ°. ७ बी °कारान्ता°.

तत्पिता । दण्डोशना । पुरुदंशा । अनेहा । सखा । इत्यत्र "ऋदुशन" [८४] इत्यादिना डा-अन्तादेशः ॥

सज्यधन्वा । दिङ्मुखानि । इत्यत्र "नि दीर्घः" [८५] इति दीर्घः ॥

अथ प्रबुद्धः स महान्नृपाणां श्रेयानयं स्वप्न इति प्रहर्षी ।
द्विड्हा नृपूषाथ च बन्दिनोपि जगुर्वचांस्युक्तनवार्यमाणि ॥५॥

५. अथ स्वप्नदर्शनानन्तरं स मूलराजः प्रबुद्धः । कीदृशः । द्विड्हा शत्रूच्छेदकः । अत एवं प्रतापैः सकललोकोद्योतकत्वान्न नृपूषा नरेषु रवितुल्योत एव च नृपाणां मध्ये महान् गुरुस्तथायं स्वप्नः श्रेयानतिप्रशस्य इति हेतोः प्रहर्षी सन् । अत्र च महान् सर्वलोकेन पूज्यः श्रेयानतिश्लाघ्यो द्विड्हा मन्देहाख्यदैत्योच्छेदकः पूषा प्रबुद्धः । उदित इत्यप्यर्थो व्यंज्यते । अथ प्रबोधानन्तरम् । चो युगपदर्थः । यदैव प्रबुद्धस्तदैव बन्दिनोपि । अपिः पुनरर्थे । मङ्गलपाठकाः पुनरुक्तो वर्णितो नवार्यमा नूतनरविर्येषु तानि वचांसि वक्ष्यमाणानि जगुः पेठुः । एतेन राज्ञो रात्रिशेष इदं शुभस्वप्नं जातमिति त्वरितमभीप्सितकार्यसिद्धिः सूच्यते ॥

अथ प्रभातवर्णकानि बन्दिवचांस्येव त्रिचत्वारिंशता वृत्तैराह ।

जगन्त्यपूषाण्यभितः प्रसारीण्यालोकहानि प्रसभं तमांसि ।
हन्त्यर्यमाथाददिरे द्विजेन्द्रैः सरांस्यनु स्वाम्पि तदर्घ आपः॥६॥

६. तमांस्यर्यमा प्रसभं बलाद्धन्ति । कीदृंशि । प्रसारीणि । क । अपूषाणि रविरहितानि जगन्त्यभितः सर्वतः । अभित इति सर्वार्थे निपातः । न तसन्तः । उभयार्थे विहितत्वात्तसः । द्वितीया तु "गौणात्॰" [२. २. ३३]

१ ए॰ °व स प्र°. २ बी °त्वान्नृपू°. ३ एफ़ू व्यञ्जते. ४ एफ़ू °पि पु°

इत्यादिसूत्रे बहुवचनात् । सर्वजगत्स्वित्यर्थः । तथालोकहानि दर्शनप्रतिघानीति । अथ तथा तस्यार्यम्णोर्घः पूजा तदर्घस्तस्मिन् । निमित्तसमीपम् । सूर्यार्घार्थं शोभना आपो येषु तानि स्वाम्पि सरांस्यनुलक्ष्यीकृत्य या आपस्ता द्विजेन्द्रैराददिरेऽञ्जलौ गृहीताः । एतेन त्वमपि प्रतापेनोदीयमानार्यमश्रीरसि । तस्मात्सर्वजगद्व्यापकान् आः कष्टं लोकान् प्रतस्तमःप्रकृतीन् ग्राहरिप्वादीन् दैत्याञ्जहि । येन द्विजेन्द्रैरर्घ्यस इति राज्ञो ज्ञापितम् । एवं च दैवादनुवदद्भिर्बन्दिभिरपि शंभूपदेशोवश्यं कर्तव्यतया राज्ञो ज्ञापितः ॥

कुर्वन्करैः[१] स्वम्पि सरांस्युदेति तमिस्रपिण्डग्र[२] इहोग्रतेजाः ।
क्रोष्टेव भीमान्विशति प्रभूतक्रोष्टूनि कुञ्जानि तमिस्रपुञ्जः[३] ॥७॥

७. इहास्मिन्प्रभाते उग्रतेजा उष्णांशुरुदेति । कीदृक्सन् । करैः किरणैः कृत्वा सरांसि[५] स्वम्पि निर्मलजलानि कुर्वन् । तथा करैरेव तमि[६]स्रपिण्डं तिमिरौघं ग्रसते तमिस्रपिण्डग्रः[६] । अत एव क्रोष्टेव यथा शृगालैः[७] प्रातः स्वभावत एव भीमान् भययुक्तः सन् प्रभूतक्रोष्टूनि बहुशृगालानि कुञ्जानि वनगह्वराणि प्रविशति तथा तमिस्रपुञ्जो[८] रवितेजसो[९] भीमान् कुञ्जानि प्रविशति । एतेन त्वमप्युग्रतेजाः प्रचण्डप्रतापोसि । तस्मात्तामसप्रकृतीन् ग्राहरिप्वादिदैत्यान् ग्रसमानश्चेत्त्वमुत्थितस्तदा ते भीमन्तः कुञ्जेषु प्रवेक्ष्यन्तीति राज्ञो विजयो ज्ञापितः । अत्र[१०] च तमिस्रशब्दद्वयोपादानेपि भिन्नवाक्यत्वान्न पुनरुक्तदोषः ॥

---

१ एफ़ °रैः स्वांपि. २ ए °मिश्रमि°. ३ ए एफ़ °मिश्रपु°.

१ एफ़ सर्वे ज° २ डी °मित्ते स°. ३ एफ़ °लक्षीकृ°. ४ डी °न त्वं द्वि°. ५ एफ़ °सि स्वांपि. ६ बी °मिश्रपि°. ७ एफ़ °लः स्व°. ८ बी °मिश्रपु°. ९ बी °सो भीमानिव भी°. १० एफ़ °त्र त°.

श्रेयान्। वचांसि। महान्। इत्यत्र "न्स्महतोः°" [८६] इति दीर्घः॥

प्रसारीणि। प्रहर्षी। आलोकहानि। द्विड्ढा। अपूषाणि। नृपूषा। नवार्यमाणि। अर्यमा। इत्यत्र "इन्हन्पूषा°" [८७] इत्यादिना दीर्घः॥ "नि दीर्घः" [८५] इति सिद्धे नियमार्थं वचनम्। एषां शिस्योरेव यथा स्यात्नान्यत्र। तेन वृत्त्रहनः।

आपः। इत्यत्र "अपः" [८८] इति दीर्घः॥

स्वाम्पि स्वम्पि। इत्यत्र "नि वा" [८९] इति वा दीर्घः॥

भीमान्। उग्रतेजाः। इत्यत्र "अभ्वादेः°" [९०] इत्यादिना दीर्घः॥ अभ्वादेरिति किम्। पिण्डग्रः। 'अतु' इत्युदित्करणादृदितो न भवति। कुर्वन्॥

क्रोष्टा। इत्यत्र "क्रुशस्तुनस्तृच्पुंसि" [९१] इति तृजादेशः॥ पुंसीति किम्। प्रभूतक्रोष्टूनि॥

क्रोष्टोः सुहृत्क्रोष्टरि न प्रतीक्षा क्रोष्टून् शिशून् क्रोष्ट्र्यपि याति मुक्त्वा क्रोष्टूनभीदं कियदुद्गतेऽर्के त्वयीव शत्रून्प्रति बाहुशालिन्॥ ८ ॥[1]

८. अर्के उदिते क्रोष्टोः शृगालस्य सुहृत्क्रोष्टरि मित्रशृगाले यन्न प्रतीक्षा। तथा शिशूनपि क्रोष्टून् मुक्त्वा क्रोष्ट्री शृगाली यद्याति भयेन पलायते। इदमेतत्सुहृदादित्यजनं क्रोष्टून् क्रोष्टारश्च क्रोष्ट्र्यश्च "पुरुषः स्त्रिया" [३. १. १२६] इति पुरुषशेषे क्रोष्टारस्तानभिलक्ष्यीकृत्य कियत्। न किमपीत्यर्थः। अर्के दुर्भेद्यमन्देहादिदैत्यषष्टिसहस्राणामपि तेजोमात्रेणैव भेदक उदिते सति नृमात्रादपि भीरूणां क्रोष्टूणामातङ्कातिरेकाद्विपत्तिरपि संभाव्येत किं पुनः सुहृदादित्यजनमिति भावः। हे बाहुशालिन् भुजाबल-

---

१ एफ् ॥ ८ ॥ इति चतुर्थपादः समर्थितः॥

---

१ एफ् °हान्तील°. २ एफ् न्स्मदेत्यादिना दी°. ३ एफ् °न्हविला°. ४ ए °मार्थे व°. ५ एफ् °श इत्यादिना तृ°. ६ एफ् °लक्षीकृ°. ७ डी °भाव्यते किं°, एफ् °भाव्यत। किं°. ८ ए °जावलिवि°.

विराजमान यथा त्वय्युदिते सति यत्सुहृदादीन् मुक्त्वा शत्रूणां स्वशिशून्मुक्त्वाशत्रुभार्याणां च क्रोष्टुवत्पलायनं तत्कियत्। यतोतिभयादेषां मरणमपि संभाव्यते ॥

क्रोष्टरि। क्रोष्टोः। इत्यत्र "टादौ स्वरे वा" [९२] इति वा तृजादेशः ॥ टादाविति किम्। क्रोष्टून् ॥ क्रोष्टॄन् इत्यपि कश्चित् ॥

क्रोष्ट्री। इत्यत्र "स्त्रियाम्" [९३] इति तृजादेशः ॥

चतुर्थः पादः समर्थितः ॥

प्रेयश्चतस्रः प्रियतिस्र ईशास्तिस्रश्चतस्रोपि वधूर्विहाय।
प्रेयश्चतुष्क श्रुतिभिस्त्रिमूर्तावत्रोद्गते सांध्यविधौ यतन्ते ॥९॥

९. श्रुतिभिर्वेदैः कृत्वा प्रेयस्यो वल्लभाश्चतस्रो यस्य राज्ञो हे प्रेयश्चतुष्काभिप्रेतवेदचतुष्टयीक तिस्र ऋग्यजुःसामवेदलक्षणा मूर्तयो यस्य। रविर्हि त्रयीमयो वर्ण्यते। तस्मिंस्त्रिमूर्तावत्रार्के उद्गते सतीशा ईश्वरजनाः सांध्यविधौ प्रभातसंध्यावन्दनादिकृत्ये यतन्ते प्रवर्तन्ते। किं कृत्वा। आस्तामेका[3] द्वे वा तिस्रोपि चतस्रोपि च वधूर्विहाय। यतः कीदृशाः। प्रेयस्यश्चतस्रो येषां ते प्रेयश्चतस्रो भार्याचतुष्टयान्विताः। तथा[4] प्रियातिस्रः प्रियात्रयान्विताश्च। एतेनात्यन्तकामिनोप्येतत्सांध्यकृत्यं[5,6] कुर्वन्ति। तस्मात्त्वमपि कुर्विति सूच्यते। प्रेयश्चतस्र इत्यादौ संख्याया विशेष्यत्वेन विवक्षितत्वाद् "विशेषणसर्वादि°" [३. १. १५०] इत्यादिना न प्राग् निपातो विशेषणभूतायाः संख्यायास्तत्र प्राग् निपातात् ॥

सतिस्रि भाभिः सुतिसर्युदश्चचतस्रि चश्चचतसर्यमुष्मिन्।
निधौ श्रुतीनां तिसृणां नवार्के जगन्ति राजच्चतसृणि दिग्भिः१०

१०. अमुष्मिन्प्रत्यक्षे नवार्के सति जगन्ति दिग्भिः कृत्वा राजन्त्यो-

१ एफू °शत्रुभा°. २ एफू °श्वराः ज°. ३ बी °मेकां द्वे ४ डी °था प्रियास्तिस्रो येषां ते प्रि°. ५ एफू °ध्यविधि कु°. ६ एफू संध्याया°.

पावित्र्यस्य तमसश्चापगमाच्चतस्रो येषु तानि राजच्चतसृणि शोभमानदिक्चतुष्टयान्वितानि सन्ति । यतः किंभूतेमुष्मिन्[1] । त्रयीतनुत्वात्तिसृणां श्रुतीनां वेदानां निधौ स्थाने । एतेनातिपावित्र्योक्तिः । तथा भाभिः किरणैः कृत्वा सह तिसृभिर्वर्तते यस्तास्मिन् सतिस्रि प्रथमोदितत्वात्किरणत्रयान्विते[2] पश्चाच्च ता एव भाः सप्रकाशतरा बभूवुरिति भाभिः सुतिसरि सप्रकाशतरकिरणत्रयान्विते ततो भाभिरुदश्चच्चतस्त्युदीयमानकिरणचतुष्टये क्षणाच्च भाभिश्च श्वच्चतसरि विकसत्तरकिरणचतुष्टयान्विते च किं चिदुद्गत इत्यर्थः । एतेन तमोपहार उक्तः । योपि नवार्कतुल्योभिनवनृपः प्रवर्धमानतेजाः श्रुतीनां निधिश्च स्यात्तस्मिन्प्रवर्धमानप्रतापत्वात्प्रतापांशेनातिदुष्टनिग्रहपरे[3] श्रुतिनिधित्वेन न्यायित्वाच्छिष्टपालके च सति जगन्ति राजद्दिक्चतुष्टयानि भवन्तीत्युक्तिः ॥

इष्ट्यादिभिः सत्तिसरः सतिस्रो द्विजाः क्रियाभिर्जरसं निहन्तुम् ।
असज्जराः सज्जरसस्तथाद्यं जरामतीतं पुरुषं स्मरन्ति ॥ ११ ॥

११. तथेति पूर्वोक्तसमुच्चये । असज्जरा अविद्यमानजरास्तरुणाः सज्जरसो वृद्धाश्च द्विजा ब्राह्मणा जरसं जरां निहन्तुम् । मुक्तय इत्यर्थः । जरामतीतं मुक्तमाद्यं पुरुषं विष्णुं स्मरन्ति । कीदृशाः । इष्ट्यादिभिर्यजनादिभिः[4] क्रियाभिः षड्भिः प्रतिदिनकर्मभिः कृत्वा सत्यो विद्यमानास्तिस्रो येषां ते सत्तिसरः सतिस्रश्चोभयपदार्थमिलने[5] सैषः[6] । षट्कर्मयुक्ता इत्यर्थः । एतेन नैष्ठिकत्वोक्तिः । यद्वा ।

द्विजो विप्रक्षत्रिययोर्वैश्येदम्भे विहंगमे ।

इति वचनाद्द्विजा निर्दम्भा इष्ट्यादिभिर्देवपूजादिप्रतिदिनक्रियाभिः

---

१ एफ् °तेस्मिन्. २ सी °न्विता. ३ बी °नापि दु°. ४ एफ् °यादिभिः. ५ एफ् °र्थमील°. ६ सी डी स एषः.

षड्भिरन्विता नैष्ठिकश्राद्धा मुक्तय आद्यं पुरुषं प्रथमजिनमृषभं स्मरन्ति। प्रभाते[1] हि नैष्ठिक[2]जना जाग्रतः स्वस्वदेवतां स्मरन्ति ॥

तिस्रः। चतस्रः। प्रियतिस्रः[3]। प्रेयश्चतस्रः। इत्यत्र "त्रिचतुर०" [१] इत्यादिना तिसृचतस्रादेशौ॥ स्यादाविति किम्। त्रिमूर्तौ। प्रेयश्चतुष्कश्रुतिभिः॥

तिस्रः। चतस्रः। प्रियतिस्रः। प्रेयश्चतस्रः। इत्यत्र "ऋतो रः स्वरेनि" [२] इति रः॥ अनीति किम्। तिसृणाम्। राजचतसृणि॥ अन्ये तूपसर्जनयोस्तिसृचतसृशब्दयोर्नौ धुटि चानिस्वरादौ रत्वविकल्पमिच्छन्ति तन्मते। सतिस्त्रि सुतिसरि। उदश्चचतस्रि चश्चचतसरि। सतिस्त्रः सत्तिसरः॥

जरसं जराम्। सजरसः असजराः। इत्यत्र "जराया जरस् वा" [३] इति वा जरस्॥

स्नात्वाद्भिरीशैर्बहुराभि[1]राप्तस्वद्भिर्द्विजेभ्यः परिकल्प्यते राः।
युष्मासु नन्वल्पमिदं तथापि प्रसीदतास्मास्विति भाषमाणैः ॥१२॥

१२. शुचिभिर्दानं देयमिति स्मृतेरद्भिर्जलैः स्नात्वा शुचीभूय बहुराभिः प्रभूतधनैरीश्वरैर्द्विजेभ्यो रा द्रव्यं परिकल्प्यते संप्रदीयते। किंभूतैः सद्भिः। उदकदानपूर्वं दानं देयमित्याप्ताः पाणौ गृहीताः शोभना आपो यैस्तैः। तथौद्धत्यरहितं प्रियवाक्सहितं च दानं विदुषां श्लाघ्यमिति भाषमाणैः। किमित्याह। नन्विति संबोधने। यद्यपि युष्मासु बहुदानार्हेष्वित्यर्थः। इदं दीयमानं स्वं स्वल्पं तथाप्यस्मासु विषये प्रसीदत वस्तुग्रहणेनानुग्रहं कुरुतेति। प्रभाते हीश्वरैर्दानं दीयते॥

---

१ एफ् °शैबहु°.

---

१ एफ् °ते नै°. २ सी डी °ष्ठिकेज°. ३ एफ् °स्रः प्रिय°. ४ सी डी °यचत°. ५ ए °तस°. ६ सी डी °वाक्यहि°. ७ सी डी °भाष्यमा°. ८ बी °नं च स्व°.

अद्भिः । स्वद्भिः । इत्यत्र "अपोद्भे" [४] इत्यद् ॥

राः । बहुराभिः । इत्यत्र "आ रायो व्यञ्जने" [५] इत्वाः ॥

युष्मासु । अस्मासु । इत्यत्र "युष्मदस्मदोः" [६] इत्याः ॥

त्वया मयातित्वयि चातिमय्याः किं तत्र यन्निःस्पृह आवयोः सः ।
मिथ्याब्रवीद्यद्युवयोर्वशेहं काचिद्वयस्यामिति खण्डिताह ॥ १३ ॥

१३. किल कश्चिच्छठोन्यनायिकासङ्गेन द्वे स्वनायिके वञ्चितवान्। तयोरेका खण्डिता वनितान्तरव्यासङ्गादनागते प्रिये दुःखसंतप्ता नायिका वयस्यां भर्तृकृतसमानापमानलक्षणव्यसनापातेन संजातमैत्र्यां[१] सखीम्। द्वितीयां खण्डितां सपत्नीमित्यर्थः । इत्येवं प्रकारेणाह यथा। आः कष्टं हे वयस्ये । अतित्वय्यतिमय्यन्यनायिकासक्तत्वात्त्वां[२] मां चातिक्रान्ते तत्र शठप्रिये[३] विषये त्वया मया च किम्। न किं चिदित्यर्थः। यद्यस्मादावयोस्त्वयि मयि च विषये[४] स शठो निःस्पृहो निरपेक्षः । ननु सोवादीद्युवयोर्वशेहं वर्ते तत्कथमिति ब्रूष इत्याह। युवयोर्वश आयत्तौ[५] वर्तेहं यदब्रवीत्तन्मिथ्यालीकं प्रत्यक्षेणैवमावयोर्वञ्चनात् ॥

त्वया । मया । अतित्वयि । अतिमयि । युवयोः । आवयोः । इत्यत्र "टाङ्योसि यः" [७] इति योन्तादेशः[६] ॥ टाङ्योसीति किम् । अहम् ॥

युष्मभ्यमस्मभ्यमथो युषभ्यं तथेष्टयुष्मभ्यमथोप्यसभ्यम् ।
तथा भियास्मभ्यमदः प्रभातं षड्भ्योपि राजन् भवतात्सुखाय १४

१४. हे राजन् । अद एतत्प्रभातं षड्भ्योपि सुखाय भवतात् । केभ्यः षड्भ्य इत्याह । युष्मभ्यमथो तथास्मभ्यं तथा युषभ्यमस-

१ बी °मैत्र्या स. २ ए सी डी °नायका°. ३ एफ् °ये त्व°. ४ एफ् °ये श°. ५ बी एफ् °यत्तो व°. ६ एफ् °ति यान्ता°.

भ्यमपि युष्मानस्मांश्चाचक्षाणेभ्यो हितं वदद्भ्यो गुर्वादिभ्यश्चेत्यर्थः । तथेष्टा यूयं युष्मानाचक्षाणा वा येषां तेभ्यस्तथा प्रिया वयमस्मानाचक्षाणा वा येषां तेभ्यो युष्माकमस्माकं च स्वजनादिभ्यश्चेत्यर्थः ॥

रात्रौ गतायां वियुतावयीह स्वपद्युवय्याशु युषाक्वसान्नु ।
आवां युवां चार्ककरान्नमामश्चक्रावली न्वाहतुरुच्चनादैः ॥१५॥

१५. प्रभाते हि विरहापगमेन हृष्टत्वाच्चक्रवाकास्तारं कूजन्ति । तत्त्रोत्प्रेक्ष्यते । इह प्रभाते चक्रश्च चक्री च पुरुषशेषे चक्रौ चक्रवाकमिथुनमली पूर्ववत्पुरुषशेषे भृङ्गमिथुनं कर्मोच्चनादैस्तारस्वरैः कृत्वाहतुर्नु वदत इव । किं तदित्याह । हे अली वियुतौ वियोगिनावावां यस्यां तस्यां तथा स्वपन्तौ निद्रयाचेतनौ युवां यस्यां तस्याम् । आवयोर्युवयोश्चाहितायामित्यर्थः । रात्रौ गतायां गमेरिहान्तर्भूतणिगर्थत्वाद् गमितायामर्ककरैरेवापनीतायां सत्यामावां युवां चार्ककरानाशु नमामः । यतः किंभूतान् । युषान्नु असान्नु । अत्यन्तं निकटवर्तित्वाद्युष्मानस्मांश्चाचक्षाणानिव कुशलवार्तादि पृच्छत इवेत्यर्थ इति । इतिरत्राध्याहार्यः । ये हि दीनानाथादयो महापुरुषैर्विपत्तेरुद्ध्रियन्ते कुशलवार्ताप्रश्नादिना संभाष्यन्ते च ते तदुपकारादिगुणोत्कीर्तनयान्योन्यं प्रोत्साहयन्तस्तान्प्रणमन्ति ॥

जितास्मयोः किं जितयुष्मयोः स्त्रीदृशोः प्रबोधे कमलानि हासैः ।
इत्युत्पलैर्भृङ्गरवैरुदित्वा निमील्यते त्वत्पुरदीर्घिकायाम् ॥ १६ ॥

१६. उत्पलैरिन्दीवरैस्त्वत्पुरदीर्घिकायां निमील्यते । किं कृत्वा । भृङ्गरवैर्मध्ये बध्यमानानां भ्रमराणां झङ्कारैरुदित्वेव । इवोत्र ज्ञेयः । किमुक्त्वेत्याह । हे कमलानि सूर्यविकासिपद्मानि जिता वयं युवाभ्यां

१ बी °क्ष्यन्ते । २ एफ् °नं क्रमाच्च° । ३ बी एफ् °तिर° । ४ सी डी °भाख्यन्ते । एफ् °भाव्यन्ते । ५ एफ् च त° । ६ ए सी गुणेकीर्ते° । बी गुणकीर्त° । ७ एफ् °त्पुरीदी° ।

तयोः स्त्रीदृशोः प्रबोधे विकासे सति । युष्माकं हासैर्निःश्रीकत्वादुत्पलान्येतानि स्त्रीदृग्भ्यां जितानीति स्मितैः किम्। न किंचित्। अथ च हासैर्विकासैः किम् । यतो जिता यूयं यकाभ्यां तयोः । स्त्रीदृग्भ्यां यूयमपि जितानीत्यर्थः । एतदुक्तं स्यात् । येह्यात्मनापि पराभूताः स्युस्तैरन्येषां पराभूतानां किं हसनीयमिति । प्रभाते हि कमलानि विकसन्त्युत्पलानि च संकुचन्ति । स्त्रीदृशश्चोतिविकसन्त्यत इयमुक्तिः ॥

त्वया मदीयोथ मया त्वदीयो राजन्प्रतापोनुकृतस्त्वयीति ।
तर्काकुलो भानुरुदेति मन्दमित्याशयः संप्रति मद्विधानाम् ॥१७॥

१७. प्रभाते हि रविर्मन्दं मन्दमूर्ध्वमयते तत इयमुक्तिः । संप्रति प्रातर्मया विधा सादृश्यं येषां तेषां मद्विधानां बन्द्यादिजनानामित्येवंविध आशयश्चित्ताभिप्रायः । इदं वयमुत्प्रेक्षामह इत्यर्थः । यथा हे राजन् मूलराज त्वया मदीयः प्रतापस्तेजोनुकृतोनुहृतोथाथवा मया त्वदीयः प्रतापोनुकृतो द्वयोरप्यावयोस्तुल्यप्रतापित्वादित्येवंप्रकारेण त्वयि विषये योसौ तर्कः संशयपूर्वं मनसा भणनं तेनाकुलो व्यामूढः सन् भानुरादित्यो मन्दमनुत्सुकं यथा स्यादेवमुदेति । तर्काकुलो ह्यन्यचित्तत्वात्प्रस्तुतं कार्यं मन्दमेव करोति ॥

योध्यस्मदासीत्त्वदयश्चित्वद्यो मापयन्कोत्र तवानुतापः ।
वदाम्यहं निश्चिनु तत्त्वमेवं मिथःसखीनामधुनेति वाचः ॥१८॥

१८. अधुना प्रभाते मिथःसखीनां कथमप्यन्योन्यं प्रतिपन्नसखीत्वानां सपत्नीनां वाचः संबोधिका वाण्यो वर्तन्ते । कथमित्याह । हे सखि यः

१ पफ् °चिदित्यर्थः । हासैर्विकासैः । य°. २ पफ् °ग्भ्यां वय°. ३ पफ् °नि सं°. ४ सी डी °श्चापि वि°. ५ सी °तेत इ°. ६ बी °न्योन्यप्र°.

प्रियस्त्वदयन् त्वत्समीपेद्याहं वत्स्यामीति त्वामाचक्षाणः सन्नध्यस्मन्मयि मत्समीप आसीदुवास । तथा यो मापयन् त्वत्समीपेद्याहं वत्स्यामीति मामाचक्षाणः सन्नधित्वत्त्वयि त्वत्समीप आसीदत्रास्मिन् प्रिये विषये कस्तवानुतापः पश्चात्तापः । अयमर्थः । यः शठत्वाद्वासविषये त्वामुक्त्वा मत्समीपेवसन्मां चोक्त्वा त्वत्समीपेवसत्तस्मिन् शठस्वभावे प्रिये सैषास्य वल्लभा नाहमिति किमित्यनुतप्यसे द्वयोरपि समानापमानकारित्वात् । यद्येवं तर्हि किं कार्यमित्याह । यत्तदोर्नित्याभिसंबन्धाद्यदिति गम्यम् । यदहं वदामि तत्पूर्वोक्तं भर्तुः शठस्वभावत्वमेवं निश्चिनु तथेत्यङ्गीकुर्विति ॥

निशि त्वकं मामहकं तथा त्वां युक्तौ नु नावां विधिजृम्भितानि ।
प्रमाणमत्रातिवयं तथातियूयं रथाङ्गाविति कूजतो नु ॥ १९ ॥

१९. रथाङ्गौ चक्रवाकमिथुनमिति न्विदमिव कूजतो वदतः । यथा निशि रात्रौ निशामाहात्म्यात् कुत्सितात्पाज्ञाता वा त्वं त्वकं मां मामाचचक्षे मामवोचस्तथा निशि कुत्सितोल्पोज्ञातोवाहमहकं त्वां त्वामाचचक्षे त्वामब्रवम् । आवां नु । नुः पुनरर्थे । त्वं चाहं च पुनर्न युक्तौ न मिलितौ । यद्यपि निश्यावां संयोगाय प्रेम्णान्योन्यं शब्दायितवन्तौ तथापि न संयुक्तावित्यर्थः । नन्वत्र को हेतुरित्याह । अत्रावयोरयोगे विधिजृम्भितानि दैवविलसितानि प्रमाणं हेतवो यतोतिवयं तथातियूयं दैवस्य प्रतिमल्लाभावान्मां त्वां चातिक्रान्तानीति ॥

युष्मभ्यम् । अस्मभ्यम् । अणिगन्तपक्षे इष्टयुष्मभ्यम् । प्रियास्मभ्यम् । इत्यत्र "शेषे लुक्" [८] इति दस्य लुक् ॥

---

१ बी °था त्वं यु°.

---

१ एफ् प्रियवि°. २ एफ् °मथ यः. ३ बी किमत्य°. ४ सी डी °से स द्व°. ५ एफ् °शाया मा°. ६ एफ् माच°. ७ एफ् °कं त्वा°. ८ डी °मब्रूव°. एफ् °मब्रुव°. ९ सी अणि°.

युष्मभ्यम् । अस्मभ्यम् । इत्यत्र "मोर्वा" [९] इति मस्य वा लुक् ॥ पक्षे इष्टयुष्मभ्यम् । प्रियास्मभ्यमिति णिगन्तपक्षे । शेषइत्येव । युष्मान् । अस्मान् । अत्र पूर्वेण मस्यात्वम् ॥

युवाम् । आवाम् । त्वपद्युवयि । वियुतावयि । इत्यत्र "मन्तस्य°" [१०] इत्यादिना युवावौ ॥ द्वयोरिति किम् । युष्मभ्यम् । अस्मभ्यम् ॥ द्वयोरिति युष्मदस्मद्विशेषणं किम् । जितयुष्मयोः । जितास्मयोः । अत्र समास एव द्वित्व-विशिष्टेर्थे वर्तते न युष्मदस्मदी इति युवावादेशौ न भवतः ॥

त्वया । मया । त्वयि[२] । मयि ॥ प्रत्यये । त्वदीयः । मदीयः ॥ उत्तरपदे । त्वत्पुर । मद्विधानाम् । इत्यत्र "त्वमौ प्रत्यय°" [११] इत्यादिना त्वमौ ॥ त्वदयन् । इत्यत्र नित्यत्वादन्त्यस्वरादिलोपात्प्रागेव त्वमौ ॥ कश्चित्तु पूर्वमन्त्यस्वरा-दिलोपे त्वमादेशेकारस्य वृद्धौ प्वागमे मापयन्नित्याह ॥ प्रत्ययोत्तरपदे चेति किम् । अध्यस्मत् । अन्तरङ्गत्वात्स्यादिद्वारेणैव त्वमादेशे सिद्धे प्रत्ययोत्तरपदग्रहणं "बहि-रङ्गोपि लुबन्तरङ्गानपि विधीन् बाधते" [न्या० सू० ४६] इति न्यायज्ञापनार्थम् । तेन तदित्यादावन्तरङ्गमपि त्यदाद्यत्वादि न स्यात् । एके तु निमित्तनिरपेक्ष-मेकत्वविशिष्टेर्थे वर्तमानयोस्त्वमादेशाविच्छन्ति । तन्मते अधित्वत् ॥

त्वम् । अहम् । इत्यत्र "त्वमहं°" [१२] इत्यादिना त्वमहमौ सिना सह ॥ सिनेति किम् । आवाम् ॥ प्राक् चाक इति किम् । त्वकम् । अहकम् । इत्यत्राकः श्रुतिर्यथा स्यात् । अन्यथा पूर्वमकि सति "तन्मध्यपतितस्तद्ग्रहणेन गृह्यते" इति न्यायात्साकोप्यादेशः स्यात् ॥ केचित्तु त्वां मां चाचष्ट इति णौ त्वमादेशे वृद्धौ क्विपि मन्तयोरेव त्व-अह-आदेशविधानात्सौ त्वां मामिति । धातोरेव वृद्धि-

१ एफ् °स्मदोर्विशे°. २ बी °यि प्र°. ३ एफ् बाध्यते. ४ एफ् °त्, अधिमत् त्व°. ५ डी त्वां मामाच°.

रिति मते त्वं ममित्येव च भवतीति मन्यन्ते। ते हि प्रकृतिमात्रस्यादेशात् ङेजस्ङसीनामंमादेशं ङसस्त्वकारमिच्छन्ति। अत्र तु[3] त्वमिति ममिति च स्वयं ज्ञेयम् ॥

अतियूयम्। अतिवयम्। इत्यत्र "यूयं वयं जसा" [१३] इति यूयंवयमौ ॥

त्वां मां धिगावां च युवां तथास्मान्युष्मांश्च यत्सत्तव सन्ममेशः।
ईक्षेति[1] वाचो नृषु तुभ्यमिष्टमह्यं हितेष्वाश्वधुनोल्लसन्ति ॥ २० ॥

२०. इष्टा वयं यस्य तस्मायिष्टमह्यं तुभ्यं हितेषु त्वय्यत्यन्तं भक्तेषु नृष्वाधारेष्वधुना प्रभात इत्येवंविधा वाच आशूल्लसन्ति। यथा हे मित्र सन् प्रसादपात्रत्वेन प्रधानस्त्वं सन्तौ युवां सन्तो यूयं च यस्य तस्य सत्तव तथा सन्नहं सन्तावावां सन्तो वयं च यस्य[4] तस्य[5] सन्ममेश: स्वामिनो मूलराजस्य यद्यस्मान्नेक्षा दर्शनं नाभूत्तत्तस्मात्त्वां मां युवामावां युष्मानस्मांश्च धिग्[6] धिक्कारोऽस्त्विवति। अतिभक्तत्वात्प्रातस्त्वद्दर्शनेत्युत्कण्ठिताः सेवका यावत् क्षणमात्रं त्वद्दर्शनं न भवति तावदकृतार्थं मन्यमानाः स्वं निन्दन्तीत्यर्थः ॥

तुभ्यम्। इष्टमह्यम्। इत्यत्र "तुभ्यं मह्यं ङ्या" [१४] इति तुभ्यंमह्यमौ ॥

सत्तव। सन्मम। इत्यत्र "तव मम ङसा" [१५] इति तवममौ ॥

त्वाम्। माम्। युवाम्। आवाम्। इत्यत्र "अमौ मः" [१६] इति अम्-औ-स्थाने म् ॥

युष्मान्। अस्मान्। इत्यत्र "शसो न॰" [१७] इति शसो न् ॥

---

१ ए ईंध्येति.

---

१ ए ॰ममा॰. २ बी एफ् तु त्वामि॰. ३ एफ् ॰ति मामि॰. ४ एफ् ॰स्य स॰. ५ ए सी ॰स्य तन्म॰. ६ All Mss read धिकारो.

युष्मभ्यमस्मभ्यमसौहितस्त्वन्मद्युष्मदस्मत्प्रवरस्तथेशः ।
युष्माकमस्माकमिति ब्रुवाणा अमी नृपास्त्वामधुनोपयान्ति॥२१॥

२१. अमी प्रत्यक्षा नृपा अधुना सेवार्थं त्वामुपयान्ति। किंभूताः सन्तः। ब्रुवाणाः। किमित्याह। युष्माकमस्माकं चेशः स्वाम्यसौ मूलराजो युष्मभ्यमस्मभ्यं च हितोनुकूलः। तथा त्वत् त्वत्तो मद् मत्तो युष्मद् युष्मत्तस्तथास्मद् अस्मत्तश्च सकाशात्प्रवरः शौर्यादिगुणैरुत्कृष्टो वर्तत इति ॥

युष्मभ्यम् अस्मभ्यम्। इत्यत्र "अभ्यं भ्यसः" [१८] इत्यभ्यम् ॥

त्वत्। मत्। युष्मत्। अस्मत्। इत्यत्र "ङसेश्चात्" [१९] इत्यत् ॥

युष्माकम्। अस्माकम्। इत्यत्र "आम आकम्" [२०] इत्याकम् ॥

अयं स वो नोवति दत्त ईष्टे तथैव वां नौ हित ईट् च ते मे ।
मिथो जनैरित्युदयन्नुतस्त्वा पुनातु सूर्यस्त्वमिव प्रभो मा ॥ २२ ॥

२२. हे प्रभो स्वामिन् यथा त्वमुदयन् श्रिया प्रवर्धमानः सन् वर्णाश्रमगुरुत्वेन[1] दर्शनस्तवनादिना पापमलक्षालकत्वान्मा माम्। जातावेकवचनम्। बन्दिजातिं पुनासि। तथा सूर्य उदयन् संस्त्वा त्वां पुनातु। किंभूतः सूर्यस्त्वं च। जनैर्मिथो नुतः स्तुतः। कथमित्याह। स सर्वत्र प्रसिद्धोयं प्रत्यक्षः सूर्यो राजा च वो युष्मान्नोस्मांश्चावति परकृतविघ्नोपद्रवादिभ्यो देवतात्वादधिपतित्वाच्च रक्षति। तथा वो युष्मभ्यं नोस्मभ्यं च दत्ते मनोवाञ्छितं ददाति। तथा वो युष्माकं नोस्माकं चेष्टे चेशो भवति। "स्मृत्यर्थ०"[२.२.११] इत्यादिना षष्ठी। यथा वो नोवति दत्त ईष्टे च तथैव वां युवां नावावां चावति युवाभ्यामावाभ्यां च दत्ते युवयोरावयोश्चेष्टे च। तथा ते तुभ्यं मे मह्यं च हितोनुकूलः। तथा ते तव मे ममेट्[2] च स्वामी चेति ॥

---

१ प °र्णाश्रमक्रमत्वे°. २ पफू मेट् स्वा°.

वो नः । इत्यत्र "पदाद्युग्°" [२१] इत्यादिना द्वितीयाचतुर्थीषष्ठीबहुवचनैः सह वस्नसौ ॥

वां नौ । इत्यत्र "द्वित्वे वान्नौ" [२२] इति द्वितीयाचतुर्थीषष्ठीद्विवचनैः सह वांनावौ ॥

ते मे । इत्यत्र "ङेङसा ते मे" [२३] इति ते मे ॥

त्वा मा । इत्यत्र "अमा त्वा मा" [२४] इति त्वामादेशौ ॥

महर्षयोस्माननुशिष्ट कृत्यं देवाः समे मा परिरक्षतेति ।
विप्रा वरा मां प्रपुनीत चेति सूर्येश मावेति च वागिदानीम् ॥२३॥

२३. इदानीं प्रभाते वाग् वाणी वर्तते । अर्थाद्धार्मिकाणाम् । कथं कथमित्याह । हे महर्षयोस्मान् कृत्यं धर्मकार्यमनुशिष्टोपदिशतेति । इतिरत्राध्याहार्यः । तथा हे देवा अर्हदादयः समे सर्वे मा मां परिरक्षत संसारापायेभ्यः पातेति । तथा हे विप्रा वरा ज्ञानक्रियाभ्यां श्रेष्ठा यूयं मां प्रपुनीताशीर्दानपूर्वं मस्तकोपरि मन्त्रपूतदूर्वाक्षतक्षेपादिना पवित्रयतेति च । तथा हे सूर्य ईश स्वामिन् मा मामव रक्षेति । धार्मिका हि प्रातर्धर्मश्रवणादि वाञ्छन्ति ॥

महर्षयोस्मान् । इत्यत्र "असदिव°" [२५] इत्यादिना-आमन्त्र्यपदस्यासत्त्वम् ॥

देवाः समे मा विप्रा वरा माम् । इत्यत्र "जस्वि°" [२६] इत्यादिना आमन्त्र्यविशेष्यस्य वासत्त्वम् ॥

सूर्येश माव । इत्यत्र "नान्यत्" [२७] इति असत्त्वनिषेधः ॥

---

१ सी डी °ह वां°. २ डी वांनौ च ते. एफ् वां नौ ते. ३ एफ् °शीर्वादपूर्वकं म°. ४ एफ् °दिः°. ५ एफ् °शेषस्य पदस्यास°.

नखास्तवाहोरसि[1] वक्षि मां चास्तुभ्यं शपेद्यास्मि तवानपेक्षा ।
किमीक्षसे मां व्रज तां विमुञ्च मामित्यभीकं प्रतिवक्ति का चित् २४

२४. अभीकं प्रभातेनुनयन्तं कामुकं प्रति सपत्नीनखक्षतदर्शनात्कुपिता काचित्कामिनी वक्ति । कथमित्याह । अहेति साभ्यसूये संबोधने । अह अरे धृष्ट तवोरसि वक्षसि नखा नखक्षतानि सन्ति । आः कष्टं[1] च त्वं पुनर्मां वक्षि भणसि । यदुत तुभ्यं शपे त्वमेव मच्चित्ते वर्तस इत्यर्थे तव प्रत्ययार्थं मात्रादिशपथान्करोमीत्यर्थ इति । यतस्त्वमीदृशोतश्चास्म्यहं तव न विद्यतेपेक्षाकाङ्क्षा यस्याः सानपेक्षा । त्वां नापेक्षे । त्वया मम न प्रयोजनमित्यर्थः । एवं च स्थिते मां किमीक्षसे किं चिन्तयसि व्रज तां स्वमनोभिप्रेतां मत्सपत्नीम् । विमुञ्च त्यज मामिति ॥

तुभ्यं शपे । मामित्यभीकम् । इत्यत्र "पादाद्योः" [२८] इति तेमादेशाभावः ॥

वक्षि मां च । नखास्तवाह । इत्यत्र "चाहह°" [२९] इत्यादिना मा ते आदेशाभावः ॥

किमीक्षसे माम् । इत्यत्र "दृश्यर्थैश्चिन्तायाम्" [३०] इति मादेशाभावः ॥

यूयं न सुप्ता इति वोलसत्वं वयं तु सुप्ता इति नः पटुत्वम् ।
यूयं हि कान्तास्तदिना व ईयुर्वयं न कान्तास्तदिना न औज्झन् २५

यूयं[2] सुमृद्यो हि तदेष युष्मान् दुनोति भानुर्न वयं हि मृद्यः ।
तदेष नास्मांस्तुदतीति काकूक्तयः सखीनामुदिता इदानीम् २६[3]

२५,२६. इदानीं प्रभाते सखीनां काकूक्तयः काकुवक्रोक्त्या सो-

---

१ एफ् °सि मां च वक्षि तुभ्यं. २ एफ् °यं समृ°. ३ एफ् ॥ २६ ॥ युग्मम्.

---

१ एफ् °ष्टं त्वं च पु°.

पहासं भणितय उदिता विजृम्भिताः । कथमित्याह । हे सख्यो[1] हि यस्माद् यूयं कान्ताः सौन्दर्यपात्रं तत्तस्मोद्वो[2] युष्माकमिना भर्तारो वो युष्मानीयू रन्तुमागताः । वयं न कान्तास्तदिना न औज्झन् । वयमपि कान्ता एवेत्यस्मद्भर्तारोप्यस्मान् रन्तुमागता एवेत्यर्थः । अत एव हे सख्यो यूयं न सुप्ताः सकलायां निशि निरन्तररमणक्रियया न शयिता इति हेतोर्वो युष्माकमलसत्वमपाटवम् । वयं तु सुप्ता इति नः पटुत्वम् । यूयमिव[3] वयमपि रात्रौ न सुप्ता अतस्तज्जन्यमस्माकमप्यपाटवमस्तीत्यर्थः[4][5] । तथा हि[6] यस्माद्यूयं सुमृद्ध्यो भर्तृप्रसादेन सदा सुखितत्वात्सुकुमाराङ्ग्यस्तत्तस्माद्धेतोरेष प्राभातिकोपि भानुर्युष्मान्दुनोति पीडयति न वयं हि मृद्ध्यस्तदेष नास्मांस्तुदति । यूयमिव वयमपि मृद्ध्य एवातोस्मानप्येष भानुस्तुदतीत्यर्थ इति । एतेन यथा वयमालस्यं मुक्त्वा तपं चावगणय्य सर्वप्राभातिककृत्येषूत्सहामहे तथा यूयमप्युत्सहध्वमिति[7] सखीभिर्व्यज्यत इत्यर्थः ॥

इति वः । इति नः । इत्यत्र "नित्यमन्वादेशे" [३१] इति नित्यं वसूनसौ ॥

तदिना वः । तदेष युष्मान् । तदिना नः । तदेष नास्मान् । इत्यत्र "सपूर्वात्°" [३२] इत्यादिना वा वसूनसौ ॥

पात्रं नयैतच्छुचयैनदेतेनार्घं भजैनेन बलिं च देहि ।

जुहूस्रुचावानय तावदेते अथैनयोः प्रक्षिपसर्पिराशु ॥ २७ ॥

---

१ ए सी डी °ख्यो हियंस्मा°. २ ए °स्माद्वो वो यु°. सी डी °स्माद्धेतोर्युष्मा°. ३ एफ् °व रा°. ४ एफ् °तज्ज°. ५ एफ् °मप्यस्माकमपा°. ६ ए सी डी हियंस्मा°. ७ एफ् °प्युत्साह°.

कुण्डं खनेदं परिलिम्प चैनदिदं[1] फलं धेह्यथ होमयैनम् ।
इदं सदेनेन यजस्व दध्नानयोः श्रुतं सत्कुरु चैनयोस्तत् २८
व्रजेमकस्मायथ देहि चास्मायेतेग्नयोथैषु नतिं कुरुष्व ।
अन्योन्यमित्यादिशतां द्विजानाममूर्गिरो ब्रह्मपुरीष्विदानीम्[2] २९

२७–२९.[1] इदानीं प्रभाते ब्रह्मपुरीषु द्विजानां यायजूकानाममूः प्रत्यक्षा गिर आज्ञावाण्यो वर्तन्ते । यतोन्योन्यमादिशताम् । कथमित्याह । हे द्विजैतत् प्रत्यक्षं पात्रं यज्ञभाजनं नय जलस्थानादि प्रापय । तत एनदेव पात्रं शुचय जलक्षालनादिना[2] पवित्रीकुरु । तथा[3] हे द्विजैतेन पात्रेणार्घं पूजोपकरणं पुष्पफलादि भज गृहाणेत्यर्थः । ततोनेनैव पात्रेणेश्वरेन्द्रादिभ्यो बलिमुपहारं देहि । तथैते जुहूस्रुचौ[4] । जुहूरुत्तरा स्रुक् । ततो गोबलीवर्दन्यायेन स्रुच्शब्देनाधरा स्रुगुच्यते । द्वन्द्वे जुहूस्रुचावुत्तराधरस्रुचौ । तावदिति प्रक्रमे । आनय । अथानन्तरमेनयोरुत्तराधरस्रुचोराशु शीघ्रं होमाय सर्पिः प्राक्षिप[5] । तथेदं कुण्डं खन पुरोवर्तिनीं भूमिं यागाग्न्याधानार्थं खननेन कुण्डाकारां कुर्वित्यर्थः । तत एतदेव कुण्डं परिलिम्प च समन्ताल्लिम्पस्व[6] च । तथेदं फलमाम्रादि धेहि पाणौ धर । अथानन्तरमेनमेव[7] फलं होमय जुहुधि । तथेदं दधि सद् वर्तते । ततोनेनैव[8] दध्ना यजस्व यागं कुरु । तथानयोर्यायजूकयोः श्रुतं वेदादिशास्त्रसारं[9] वर्तते । श्रुतवन्तावेतावित्यर्थः । तत्तस्माद्धे-

१ एफ् चैतदि°. २ एफ् २९ ॥ त्रिभिर्विशेषकम् ॥ इ°.

१ सी डी २९ ॥ प्र°. २ सी °ना प°. डी °नात्पवि°. ३ एफ् °था द्वि°. ४ सी डी °हूरु°. ५. ए सी °पः ।. ६ एफ् °म्प च ।. ७ एफ् °मेतदेव. ८ एफ् तथाने°. ९ बी एफ् °शास्त्र सा°.

तोरेनयोः[1] सत्कुरु सन्मानय । अनयोरित्यत्र संबन्धे[2] षष्ठी विषयसप्तमी वा ॥ तथेमकस्मै व्रज देशान्तरागतत्वादज्ञातमिमं दूरस्थं प्रत्यक्षं द्विजमानेतुं गच्छ । "गम्यस्याप्ये" [२,२,६२] इति चतुर्थी । अथानयनानन्तरमस्मायेवाज्ञातद्विजाय देहि स्वर्णादि वितर । तथैतेभ्रयो दक्षिणाहवनीयगार्हपत्याख्यास्त्रयो वह्नयो वर्तन्तेथ ततश्चैतेष्वग्निषु[3] नतिं कुरुष्वेति[4] । ब्रह्मपुरी नाम धर्मार्थमीश्वरैः कारितानि धनधान्यद्विपदचतुष्पदादिसर्वसामग्रीसहितानि द्विजेभ्यो दत्तानि गृहाणि ॥

शुचयैनत् । भजैनेन । अथैनयोः । इत्यत्र "त्यदामेनद्°" [३३] इत्यादिनैनद् ॥

चैनत्[5] । एनेन यजस्व । चैनयोः । इत्यत्र "इदमः" [३४] इत्येनद् ॥ केचित्त्विदम आदेशमेनमिति मान्तं द्वितीयैकवचन आहुस्तन्मते । होमयैनम् ॥

अस्मायित्यत्र "अव्यञ्जने" [३५] इति साक इदमोत् ॥ केचिदेतदोपीच्छन्ति । अथैषु ॥

एभिः करैरंशुमतेमिकस्यै[1] दिशेवतंसान्सृजता न्वनेन ।
द्यावापृथिव्योरनयोर्निजोयं परोयकं व्यक्तिरियं व्यधायि[2] ३०

३०. अनेन प्राभातिकेनांशुमता[6] द्यावापृथिव्योराकाशभुवोर्मध्येयं निजोयकं[7] कुत्सितोल्पोज्ञातो वायं परोन्य इत्येवंविधा[8] व्यक्तिर्व्यधायि[9] । किंभूतेन सता । एभिः प्राभातिकैः करैः किरणैः कृत्वारुणत्वादिमिकस्यै[10]

१ एफ् °तेमक°. २ सी ३० किं भू°.

१ ए °तोः रन°. सी डी °तोरन°. २ एफ् °बन्धष°. ३ ए °तेग्नि°. ४ सी °ति । ······अनेन. त्रिंशश्लोकस्थ 'व्यधायि' पर्यन्तं तत्र नास्ति. ५ ए सी °त् । अने°. ६ डी °ता सूर्येणानयोर्वा°. ७ डी वायकं प°. ८ डी °वं व्य°. ९ डी यि अकारि । किं°. १० एफ् °दिमक°.

दिशे पूर्वं तमोभिभूतत्वेनानुकम्पितायै प्रत्यक्षायै पूर्वस्यायवतंसाम्रु रक्तपुष्पमुकुटानिव सृजता कुर्वता । निशि हि द्यावापृथिव्योस्तमसा व्याप्तत्वान्निजपरयोर्ज्ञानं नासीद्रव्युदये तु बभूवेत्यर्थः ॥

एभिः । इत्यत्र "अनक्" [३६] इत्यत् ॥ अनगिति किम् । इमिकस्यै ॥

अनेन । अनयोः । इत्यत्र "टौस्यनः" [३७] इति-अनः ॥

अयम् । इयम् । इत्यत्र "अयम्°" [३८] इत्यादिना-अयमियमौ । साकोप्ययमियमादेशौ भवतः ॥ अन्येत्वादेशे कृते[२] पश्चादकमिच्छन्ति । अयकम् ॥

दीपा इमे रव्युदये न राजन्त्यतीदमो हव्यभुजोपि नामी ।
स्य एष नेन्दुर्न स तारकौघो दैवाद्यतः कोपि कदापि सश्रीः ३१

३१. इमे रात्रौ येराजंस्ते दीपा रव्युदये सति न राजन्ति निःप्रकाशत्वात् [निष्प्रकाशकत्वात् ?] । तथामी ये रात्रावराजंस्तेतीदमोतितेजस्वित्वादिमान् दीपानतिक्रान्ता हव्यभुजोप्यग्नयश्च न राजन्ति । तथा स्यो रात्रिं योतिप्रकाशितवान् स एष[३] प्रत्यक्ष इन्दुरपि न राजति । तथा स तारकौघो न राजति । यद्वा युक्तमेवैतद्यतो दैवाद्विधिवशात्कोपि कदापि सश्रीः श्रीयुतः स्यात् ॥

संध्या तनुर्ब्राह्म्यसकाविनोसावेशीद्वयोरप्यमुयोस्तृतीया ।
[१]त्वं चामुको मौरजिती त्रयीयं साक्षात्ततो नादमुयङ् पुमान्कः ॥

३२. हे राजन् । असकौ रव्युदयेन गतप्रायत्वादल्पेयं संध्या प्रभातसंध्या ब्रह्मण इयं ब्राह्मी तनुर्मूर्तिः । एवं किल श्रूयते । पुरा सिसृ-

---

१ डी त्वं वामु°.

---

१ धफ इमक°. २ एफ °ने सति प°. ३ ए सी एव प्र°.

क्षया प्रजासृजा बहवस्तन्वस्त्यक्तास्तत्र देवान्सृष्ट्वा या तनुस्त्यक्ता साहः संपन्ना। पुनर्दैत्यान्सृष्ट्वा या तनुस्त्यक्ता सा रात्रिरूपाजायत। भूयो मर्त्यान्निर्माय तनुरुत्सृष्टा या सा प्रातःसंध्या समपद्यतेति। उथासौ प्रत्यक्ष इनो रविरीशस्य शंभोरियमैशी तनुः। यदुक्तम्।

क्षितिजलपवनहुताशनयजमानाकाशसोमसूर्याख्याः।
ईशस्य मूर्तयोष्टौ चिरंतनैर्मुनिभिराख्याताः ॥ १ ॥

तथामुयोर्द्वयोरपि ब्रह्मेशतन्वोस्तृतीयामुकः प्रत्यक्षस्त्वं मौराजिती तनुर्वैष्णवी मूर्तिः। नृपो हि प्रजापालकत्वेन वैष्णवी मूर्तिरिति रूढिः। एवं चेयं प्रत्यक्षा त्रयी ब्रह्मशंभुविष्णुरूपा साक्षात्प्रत्यक्षास्ति। ततस्तस्माद्धेतोः कः पुमान्नादमुयङ्ङमूं त्रयीं नाञ्चति। अधुना संध्यां सूर्यं त्वां च त्रयीमूर्तित्वात्सर्वो लोकः पूजयतीत्यर्थः ॥

संध्यां नृपार्चामुमुयङ् हरो यद्ब्रह्माप्यमुद्र्यङ् हरिरप्यदद्र्यङ्।
ये नामुनामी अपि यान्ति मुक्तेर्निया पथाघस्य लुवा च लोकाः

३३. हे नृप संध्यां प्रभातसंध्यामर्च। यद्यस्माद्धेतोर्हरोप्यमूं संध्यामञ्चत्यमुमुयङ्। तथा ब्रह्माप्यमुद्र्यङ्। हरिरपि विष्णुरप्यदद्र्यङ्। अथ प्रत्यक्षेणाप्यस्या जगत्पूज्यतामाहुः। लुवा चेति। चो भिन्नक्रमे। येन च हेतुनामुना पथा संध्यार्चालक्षणेनामी लोका अप्यासतां तावदागमगम्या हरादयः प्रत्यक्षा ब्राह्मणादयो जना अपि यान्ति संध्यार्चां कुर्वन्तीत्यर्थः। यतः किंभूतेन। अघस्य पापस्य लुवा छेदकेन। अत एव मुक्तेर्मोक्षस्य निया प्रापकेन ॥

१ डी सी एफ् °स्तन्व्यस्त्य°. २ बी °यास्तनु°. ३ डी °त्रितयाजा°. ४ एफ् °नुः। तदु°. ५ सी °मुनयो°. ६ एफ् °र्वोपि लो°. ७ सी डी °माह। लु°. ८ डी °तेनाप्यघ°.

वेदानधीयन्त इनं स्तुवन्तो यवक्रियः शिश्रियुरग्निमेके।
कुशासकृल्ल्वः समिदुक्ष्य एके कटप्रुवः सिन्धुतटान्ययेयुः॥३४॥

३४. यवान्होमार्थं क्रीणन्ति यवक्रियः। एकेग्निहोत्रिणोग्निकार्यार्थमाग्निं शिश्रियुः। कीदृशाः सन्तः। वेदानधीयन्तोकृच्छ्रेण पठन्तस्तथेनं रविं स्तुवन्तः। अथ तथैकेन्य ऋषयः कटेन प्रवन्ते तरन्ति कटप्रुवो जलपूर्णनदीमपि तरन्तः सन्त इत्यर्थः। सिन्धुतटानि नदीकूलानीयुः प्रापुः। यतः कुशासकृल्ल्वोग्निहोत्रपरिस्तरणाद्यर्थं दर्भाणामसकृच्छेदकास्तथा समिध उन्नयन्ति समिदुन्योग्निज्वालनाय काष्ठाहारका अतिनैष्ठिका इत्यर्थः। नदीतटेषु हि प्रायेण दर्भादि बहु प्राप्यते॥

इमे। इत्यत्र "दो मः स्यादौ" [३९] इति मः॥ त्यदादिसंबन्धिविशेषणादिह न स्यात्। अतीदमः॥

कः। कदा। इत्यत्र "किमः कस्तसादौ च" [४०] इति कः॥

स्यः। सः। असौ। इमे। एषः। द्वयोः। तसादौ। यतः। कदा। इत्यत्र "आद्वेरः" [४१] इति-अः॥

स्यः। सः। एषः। इत्यत्र "तः सौ सः" [४२] इति सः॥

असौ। असकौ। इत्यत्र "अदस॰" [४३] इत्यादिनादस्य सः सेस्तु डौः।

असुकः। इति "॰असुको वाकि" [४४] इति वा निपात्यते॥ पक्षे। असकौ॥

अमुयोः। इत्यत्र "मोवर्णस्य" [४५] इति मः॥

अदमुयङ्। अमुमुयङ्। अमुमुयङ्। अदम्रयङ्। इत्यत्र "वाद्रौ" [४६] इति वा दस्य मः॥ द्वौ चात्र दकारौ तयोर्वा मे सति चातूरूप्यम्॥

---

१ एफू ॰प्रुवं सि॰.

---

१ बी ॰का इति. २ ए सी ॰शानना॰. ३ सी डी सः ······ सेस्तु. ४ सी ॰मुमुय॰.

अमुमुयङ् । इत्यत्र "मादुवर्णोनु" [४७] इति-उवर्णः ॥ अन्विति किमर्थम् । अमुयोरित्यत्र एत्वादिषु कार्येषु कृतेषूवर्णो यथा स्यादित्येवमर्थम् ॥

अमुना । इत्यत्र "प्रागिनात्" [४८] इति उवर्णः ॥

अमी । इत्यत्र "बहुष्वेरीः" [४९] इति ईकारः ॥

नियौ । लुवौ । अधीयन्तः । स्तुवन्तः । इत्यत्र "धातोरिवर्ण°" [५०] इत्यादिनेयुवौ ॥

ईयुः । इत्यत्र "इणः" [५१] इति-इय् ॥

यवक्रियः । कटप्रुवः । शिश्रियुः । इत्यत्र "संयोगात्" [५२] इति य्वोरपवादावियुवौ ॥ धातुना संयोगस्य विशेषणादिह न भवति । उन्न्यः । असकृल्वः ॥

पश्यन्ति सिद्धस्त्रिय उद्भ्रुवोर्कमाराभ्रुवन्तं किल पादपातैः ।
आशास्त्रियः स्त्रीरिव पद्मिनीश्च द्युश्रीस्त्रियं स्त्रीमिव खश्रियं च ३५

३५. अणिमाद्यष्टविधैश्वर्यवन्तः सिद्धास्तेषां स्त्रिय उदूर्ध्वा भ्रुवो यासां ता उद्भ्रुवः सत्योर्कं पश्यन्ति । यतः पादपातैः किरणनिक्षेपैरथ च पादेषु पातैश्चरणप्रणामैः कृत्वाराभ्रुवन्तं किल प्रसादयन्तमिव । काः । आशास्त्रियो दिगङ्गनास्तथा पद्मिनीः स्त्रीरिव । तथा रविकिरणपश्चशती स्वर्गमप्युद्योतयतीतिप्रसिद्धेर्द्युश्रीस्त्रियं स्वर्गलक्ष्मीमेवाङ्गनां खश्रियं चाकाशलक्ष्मीं च स्त्रीमिव । योपि कान्तः प्रेमानुविद्धः स्वकान्ताः पादपातैराराधयति तमन्यस्त्रियोहो अस्य स्वकान्तासु प्रेमानुबन्धो यद्यस्माकमपीदृशः पतिः स्यादित्यभिलाषेणोद्भ्रुवः पश्यन्ति ॥

उद्भ्रुवः । आराभ्रुवन्तम् । इत्यत्र "भ्रूश्नोः" [५३] इति-उव् ॥

---

१ एफ् °शाः स्त्रि°.

---

१ ए °वन्त्यः ।. २ एफ् °शाः स्त्रि°. ३ सी डी °लक्ष्मी च. ४ एफ् प्रेम्णानु°.

सिद्धश्रियः। इत्यत्र "स्त्रियाः" [५४] इति-इयुः॥

श्रियम् श्रीम्। श्रियः श्रीः। इत्यत्र "वाम्शसि" [५५] इति वा-इयुः॥

वस्वोवचिच्युः कुसुमानि चैत्याग्रण्यं जगत्प्वं सुधियोथ निन्युः।
हन्भ्वोपि वर्षाभ्व इवाभिलङ्घ्योपलभ्य कारभ्वमिव प्रभातम् ३६

३६. कारो[2] निश्चयस्तत्र तेन वा भवति कारभूरग्रेगूस्तमिव यथाग्रेगूर्मार्गदर्शकः स्यात्तथा सर्ववस्तुदर्शकं प्रभातमुपलभ्य प्राप्य सुधियः पुष्पोच्चयदक्षा मालाकारा[3]: कुसुमान्यवचिच्युरुच्चितवन्तः[4]। अथ पुष्पावचयानन्तरं जगत्प्वं लोकानां पवित्रकं चैत्याग्रण्यं चैत्येषु देवायतनेषु श्रेष्ठं महाप्रभावत्वेन सर्वलोकपूज्यं जिनमन्दिरादि कुसुमानि निन्युर्विक्रयार्थं[5] प्रापयन्। किं कृत्वा। हन् हिंसन् भवति हन्भूः[6]। हन्भ्वोपि सविषकीटकानपि वर्षाभ्व इव दर्दुरानिवाभिलङ्घ्योत्प्लवनेनातिक्रम्य। अहमंप्रिकया[7] शीघ्रं गत्वेत्यर्थः। यतो वस्वो वसु[8] द्रव्यमिच्छन्तः। प्रभाते हि मालिकाः पुष्पाण्युच्चित्य विक्रयणार्थं देवप्रासादेषु[9] नयन्ति। शीतलकालत्वात् हन्भ्वश्च बाहुल्येन विचरन्ति॥

चिकीर्विधूढेन्द्रदिशः पुनर्भ्वाः करोति काराभ्वमिनोन्धकारम्।
एतद्भुवः पुण्यकरभ्व एनस्तक्ष्णो नु टङ्का दलयन्ति भासः॥३७॥

३७. इनो रविरन्धकारं कारा गुप्तिः कारेव कारा गुहाकूपादि तत्र भवति तिष्ठति यस्तं करोति। कीदृक् सन्। विधुनेन्दुनोदयकाले[10] च संबन्धादूढेवोढा परिणीतेव येन्द्रदिक्पूर्वा तस्याः। पुनर्भ्वाः पुनरूढाया

---

१ सी डी °यू। स्त्रियः।. २ सी डी °रो विनि°. ३ एफ् °लाकराः. ४ए °च्युरुच्चि°. बी °च्युरवचित°. ५ एफ् °क्रयणार्थं. ६ एफ् °न्भू ह°. ७ एफ् °ममिक°. ८ एफ् वसुं द्र°. ९ बी सी °वप्रसा°. १० बी एफ् °ले सं° सी डी °लेव सं°.

इव । चिकीर्षुश्चिकीर्षुरुदयेन पूर्वदिशा संबन्धीभवन्नित्यर्थः । योपीनः स्वाम्यन्योढां कन्यां तस्मिन्मृते सति पुनः परिणयति सोन्धकार-तुल्यमपवादवादिनमहितजनं काराभ्वं गुप्तिस्थं करोति । तथैतद्भुवो रविप्रभवा भासस्तक्ष्णो वर्धकेष्टङ्का नु टङ्किका यथा पाषाणादि विदार-यन्ति तथैनः पापं दलयन्ति । यतः पुण्यस्य धर्मस्य करभ्वोग्रेग्व इव सर्वलोकस्य धर्ममार्गे प्रवर्तकत्वात् ॥

पूर्वाचले धातुवपूंषि वप्राण्यर्वाण उद्यान्त्यघलून्युरंशोः ।
पक्वाम्रताम्रेह तदंह्रिवृक्णधूल्यभ्रलभ्रेव विभाति संध्या ॥ ३८ ॥

३८. अघल्वंनिमिच्छति लोकानामिति सापेक्षत्वेपि नित्यसापेक्षत्वेनैका-र्थ्यात्क्यनि अघलून्युर्लोकपापच्छेदेच्छोरंशो रवेरर्वाणोश्वाः पूर्वाचल उद-याद्रिस्थानि वप्राणि रोधांस्युद्यान्त्युल्लङ्घन्ते । कीदृंशि । धातव एव वपुर्येषां तानि धातुमयानि । ततश्चेह पूर्वाद्रौ पक्वाम्रताम्रा परिपक्वाम्रफलवदारक्ता-भ्रलभ्राकाशस्था संध्या भाति । कीदृक् । तेषामर्वणां येंह्रयः खुरास्तैर्वृक्णो-त्खाता या धूली धातुरेणुः सेव ॥

अवचिच्छ्युः । निन्युः । इत्यत्र "योनेकस्वरस्य" [५६] इति यः ॥

वस्वः । इत्यत्र "स्यादौ वः" [५७] इति वः ॥

चैत्याग्रण्यम् । जगत्त्वम् । इत्यत्र "क्विवृत्तेः०" [५८] इत्यादिना यवौ ॥

असुधिय इति किम् । सुधियः ॥

दृन्भ्वः । पुनर्भ्वाः । वर्षाभ्वः । कारभ्वम् । इत्यत्र "दृन्पुनर्०" [५९] इत्यादिना वः ॥ करशब्देनापीच्छन्त्यन्ये । करभ्वः ॥ काराशब्देनाप्यन्ये ।

---

१ बी °वद्धीभ°. २ बी °प्रभावा. डी प्रभूता भा°. ३ ए °र्वस्य लो°. सी डी °र्वस्य. ४ डी लूनमि°. ५ डी स्थाने व°. ६ एफ् °भ्राकाशलभ्राका°. ७ डी एफ् °णुः सैव. ८ डी °ना य्वौ ॥. ९ ए सी डी °वौ । इ°. १० एफ् काराभ्व°.

काराम्बम् ॥ इनादिभिरिति किम्[1] । एतभ्रुवः ॥ पूर्वेणैव सिद्धे नियमार्थमिदम् । एतैरेव भुवो नान्यैरिति ॥

तक्ष्णः । चिकीः । स्यादिविधौ च । अर्वाणः । वपूंषि । इत्यत्र "णषम्°" [६०] इत्यादिना णत्वषत्वानामसत्त्वादनोकारे[2]लोपे[3]ः । षस्य रुत्वान्त्यदीर्घत्वं च स्यात् ॥

पक्क । स्यादिविधौ च । अघलून्युः । इत्यत्र "क्कादेशोषि" [६१] इति वनयोरसत्त्वाद्धुटि कत्वं त्याश्रित ईट् च स्यात् ॥ अपीति किम् । वृक्ण । अत्र क्कादेशस्य नस्य सत्त्वाद् "यजसृज" [२,१,८७] इत्यादिना धुट्[5]निमित्तः षो न भवति । कत्वे त्वसत्त्वात्तद्भवत्येव ॥ परे स्यादिविधौ चेत्येव । लग्ना । अत्रास्यादिविधौ पूर्वसूत्रकार्ये "अघोषे प्रथमोशिटः" [१,३,५०] इति प्रथमत्वे[6] नैत्वस्यासत्त्वाभावादघोषनिमित्तः प्रथमो न भवति ॥

अश्वा लिलिक्षन्ति विमूर्छदात्मद्युतीः सजूःशाद्वल[1]शङ्कयेह ।
तमः पिपिक्षोररुणस्य[2] दीव्यत्तोत्रा गिरो नो गणयन्ति[3] धुर्याः ३९

३९. अश्वा रवि[8]र्तुरगा लिलिक्षन्ति सिस्वादयिषन्ति । काः । इह पूर्वाचले विमूर्छदात्मद्युतीः । गिरौ मणयो वर्ण्यन्त इति कविरूढिरित्यस्य मणिमयशिलासु विमूर्छन्त्यः प्रतिफलन्त्यो या आत्मद्युतयः स्वकान्तयस्ताः । कया । सजूःशा[9]द्वलशङ्कया । शाद्वलशब्देनात्रोपचाराद्धरिततृणान्युच्यन्ते । सजूंषि[10] मिथः संबद्धान्यतिसान्द्राणि यानि शा[11]द्वलानि हरिततृणानि तेषां या शङ्का भ्रमस्तया । गिरौ हरितसंभवात्प्र[12]तिफलितस्वकान्तीनां

---

१ बी एफू °शाड्वल°. २ एफू °क्षोरुरु°. ३ सी °न्ति धूर्याः ।

१ ए सी डी °म् । पू°. २ ए °रलुक् । सस्य. ३ बी °पः । सस्य च लुप् उपा°. सी °पः । सस्य र उपा°. डी पः । सस्य. ४ डी उरेव स्या°. ५ सी डी °त्वे स°. ६ सी °त्वे त्व°. ७ एफू नतस्य स°. ८ बी °तुरङ्गा लि°. ९ बी एफू °शाड्वल°. १० सी डी सजूर्मिथः°. ११ बी एफू शाड्वला°. १२ सी डी °तिकलि°.

नीलत्वाच्च तानि हरितानि संभावयन्त इत्यर्थः । अत एव धुर्या धुरीणा अश्वा अरुणस्य रविसारथेर्दीव्यद्दृढतोदनाद्देदीप्यमानं तोत्रं प्राजनं यासु ता दीव्यत्तोत्रास्तोत्रतोदनपुरःसरा गिरो हुंकाराम्रो गणयन्ति । यदि ते शाद्वललिलिक्षया तोत्रहुंकारान्न[2] गणयन्ति तर्त्कि तास्तेषु प्रयुङ्क्तेसावित्याह । तमः पिपिक्षोरुच्छेत्तुकामस्य[3] तमःपेषकार्यकरणोत्सुकस्येत्यर्थः ॥

सुगीर्यमाणोपि गुरूक्तगीर्यन् श्रेयोरथे[1] धुर्यति धुर्यमाणः ।
कुर्यात्प्रभान् साधुरिहोपयोगं कुर्यादघं मोहजयं जगन्वान् ॥४०॥

४०. साधुरार्हतमुनिरिह प्रभात उपयोगं प्राभातिकानुष्ठानविशेषं कुर्यात् करोति । कीदृक्सन् । सुगीर्यमाणोपि शोभना गीर्वाग्देवी[4] सुगीस्तद्वदाचरन्नपि गुरूक्तगीर्यन् गुरुभिराचार्यैरुक्तां गिरं वाणीमिच्छन् । अपिर्विरोधे । यो ह्यतिविद्वत्तया वाग्देवीतुल्यः स्यात्तस्य सर्वशास्त्रपारगत्वेनाध्ययनविमुखत्वादाचार्योक्तगिरा किं प्रयोजनम् । विरोधपरिहारस्त्वेवम् । शोभना मधुरा गीर्वाणी यस्य[5] स सुगीस्तद्वदाचरन्नुपयोगवेलायां गुरोः पुरः स्थितो विनतशिरा[6] इच्छाकारेण संदिशतोपयोगं करोमीत्यादिपृच्छावाक्यानि मधुरमुच्चारयन्नित्यर्थः । तथा गुरुभिराचार्यैरुक्तां गिरं कुर्वित्यादिकामुत्तररूपां वाणीमिच्छन् । एतेन विनीतत्वोक्तिः । तथा धुर्यति धुरमिच्छति[7] श्रेयोरथे[8] । श्रेयोष्टादशशीलाङ्गसहस्रलक्षणो धर्मः । स एवालेख्ये[9] रथाकारत्वाद्रथः । तत्रविषये[10] धुर्यमाणो धू-

१ सी °थे धूर्य°.

१ बी एफ् °शाड्वल°. २ ए सी डी °का न ग°. बी °कान्न°. एफ् °कारा न ग°. ३ एफ् पिपक्षो°. ४ एफ् °वी तद्व°. ५ एफ् °स्य सु°. ६ सी डी °शिरसा इ°. ७ एफ् धुरामि°. ८ एफ् °योष्टा°. ९ एफ् °लेख्यर°. १० सी °ये धूर्य°.

रिवाचरन् । यथा धू रथाधारः स्यादेवं यतिधर्मस्याधार इत्यर्थः । अत एव प्रशान्तुपशान्तरागद्वेषः । अत एव[1] मोहजयं मोहनीयकर्मपराभवं जगन्वान् प्राप्तः समयं पापं छुर्याच्छिनत्ति । उपयोगविधिश्च श्रीभद्रबाहुस्वामिपादैरुक्तो यथा ।

आपुच्छणत्थपढमा बिइआ[2] पडिपुच्छणा य कायव्वा ।
आवस्सिया[3] अ तईआ[4] जस्स य जोगो चउत्थोउ[5] ॥ १ ॥

प्रथममापृच्छति यदुत संदिशथोपयोगं करोमि । एसा पढमा ॥

उवओगकारावणिअं[6] काउस्सग्गं
अट्ठहिं ऊसासेहिं नमोक्कारं[7] चिन्तेइ ।
तओनमोक्कारेणं[8] पारेऊणं भणइ
इच्छाकारेण संदिसह आयरिओ भणइ लाभो ॥
साहू भणइ किहं[9] [10] किं गिह्णामित्ति एसा
पडिपुच्छा तओ आयरिओ भणई[11] जहत्ति ।

यथा साधवो गृह्णन्तीत्यर्थः ।

तओ[12] साहू भणइ आवस्सिया जस्स य जोगेत्ति[13] ।
जं जं संजमस्स उवगारे वट्टइ तं तं गिण्हिस्सामि[14] ॥

एवमसावनेन क्रमेणापृच्छने सति गुरुभिरनुज्ञात आवश्यिकां कृत्वा यस्य च योग इत्यभिधाय भिक्षार्थं निर्गच्छतीत्यर्थः ॥

---

१ एफ् °व ज°. २ बी सी डी °इया प°. ३ ए °स्सि आयत°. ४ बी सी डी °इया ज°. ५ एफ् °त्थो य ॥. ६ बी सी डी °णियं का°. ७ बी सी °मोकारं. ८ ए बी सी °मोकारे°. ९ बी एफ् किह गि°. १० सी डी °हं गि°. ११ बी एफ् °इ तह°. १२ सी डी एफ् तउ सा°. १३ बी एफ् जोगुत्ति । १४ बी गिन्हिस्सा°.

जङ्गन्म इत्युक्तिपरैः सपर्णध्वद्यष्टिभी रश्मिधृतानडुद्भिः ।
ग्राम्यैरविद्वद्भिरुदीक्ष्यतेसौ घूखास्रदिन्दुर्दधिपिण्डबुद्ध्या ॥ ४१ ॥

४१. ग्राम्यैरसाविन्दुर्दधिपिण्डबुद्ध्या स्थूलदधिवराटकाशङ्कयोदीक्ष्यत ऊर्ध्वमालोक्यते । कीदृक्सन् । द्यौर्व्योमैव पृथुत्वात् श्यामत्वाच्चोखा स्थाली तस्याः सकाशात्स्रंसतेधः पतति घूखास्रत् । कीदृशैः सद्भिः । जङ्गन्म इत्युक्तिपरैः कुटिलं गच्छाम इत्युच्चारयद्भिः । ग्राम्या हि प्रायेण प्रातः पत्रघासाद्यानयनायान्योन्यमाकारयन्तो बहिर्व्रजन्ति । तथा पर्णानि ध्वंसते पर्णध्वद्यायष्टिर्व्यङ्कुलदावादिः सह तया बदरीपत्रादिपातनार्थं वर्तन्ते ये तैः । तथा पत्रघासादिभारारोपार्थं रश्मौ रज्जौ धृता अवष्टब्धा अनड्वाहो वृषा यैस्तैः । तथाविद्वद्भिर्ग्राम्यत्वान्मुग्धैः । ग्रामेषु दधिबाहुल्येन ग्राम्याणां स्थाल्यधःपतद्घनदधिपिण्डस्य सुपरिचितत्वार्दैस्तकाले व्योम्नोधः पततीन्दौ तथात्वेनाध्यवसायः ॥

उदीयिवदैत्यरणाध्वरर्त्विक्सहस्रदृग्दिक्स्पृगुदकरस्रक् ।
अजीवनग्भिर्मुनिभिर्दधृग्भिरुष्णिक्स्तुतो वोस्त्वघनदृकृतेर्कः ॥४२॥

४२. हे राजन् वो युष्माकमघनदृकृतेघस्य पापस्य या नद् नाशस्तस्या यत्कृत् करणं तस्यायर्कोस्तु । कीदृक् । उदीयिवांसस्तत्कालोदिता ये दैत्या मन्देहाख्याः षष्टिसहस्राणि तेषां यो रणः स एवाध्वरो यागस्तत्र ऋत्विक् । यथर्त्विक् पशुमेधयागे पशून् हन्ति तथा दैत्यान् रणे घ्नमित्यर्थः । तथा सहस्रदृश इन्द्रस्य दिशं पूर्वां स्पृशति यः सः ।

---

१ ए सी °ध्वड्यष्टि°. २ ए °धृग्भिरु°. ३ सी डी °नकृते°.

---

१ सी डी °लदीर्घा स°. २ एफ् °रोपणार्थ. ३ बी वृषभा यै°. ४ सी °दत्तका°. डी °दन्नका°. ५ सी वोघयु°. ६ सी डी °नकृते°. ७ डी °णेहन्ति°.

तथोदध्वन्त्यूर्ध्वं[1] प्रसरन्ती[2] करस्त्र[3]किरणमाला यस्य सः । तथा नास्ति जीवनं[4]जीवस्य नशनं येषां तैरजीवनग्भिरजरामरैर्दधृग्भिः प्रगल्भैर्मुनिभिरष्टाशीतिसहस्रसंख्यैर्वालि(ल?)खिल्याभिधैः कर्तृभिरुष्णिग्भिश्छन्दोभेदैः स्तुत उष्णिक्स्तुतः ॥

पिपिक्षोः । लिलिक्षन्ति । इत्यत्र "षढोः कस्सि"[5] [६२] इति कः ॥

विमूर्छेत् । दीव्यत् । इत्यत्र "भ्वादेर्नामिनः०" [६३] इत्यादिना दीर्घः ॥

सजूः । इत्यत्र "पदान्ते" [६४] इति दीर्घः ॥ पदान्त इति किम् । गिरः ॥

धुर्यः । इत्यत्र "न यि०" [६५] इत्यादिना न दीर्घः ॥ तद्धित इति किम् । गीर्यन् । सुगीर्यमाणः ॥ केचित्तु क्यन्क्यङोरपि प्रतिषेधमिच्छन्ति । तन्मते । धुर्यति[6] । धुर्यमाणः ॥

कुर्यात् । छुर्यात् । इत्यत्र "कुरुच्छुरेः"[7] [६६] इति न दीर्घः ॥

प्रशान्[8] ॥ म्वोः । जङ्गन्मः । जगन्वान् । इत्यत्र "मो नो म्वोश्च" [६७] इति नः ॥

ध्वस्तात् । पर्णध्वत् । उदीयिवत् । अविद्वद्भिः[9] । अनडुद्भिः । इत्यत्र[10] "स्रंस्ध्वंस्०" [६८] इत्यादिना[11] दः ॥

ऋत्विक्[12] । दिक् । दृक् । स्पृक्[13] । स्रक् । दधृग्भिः । उष्णिक् । इत्यत्र "ऋत्विज्दिश्०" [६९] इत्यादिना गः ॥

अजीवनग्भिः । अघनट् । इत्यत्र "नशो वा" [७०] इति वा गः ॥

१ डी एफ् °धत्यूर्ध्वं. २ डी °रतीत्युदङ् क°. ३ एफ् °रसहस्र°. ४ सी °नजीव°. डी °वस्य जीवनस्य. ५ ए बी कः स्सि. ६ एफ् °र्येमा°. ७ सी °च्छुररिति. डी °च्छुर इ°. ८ एफ् °न् ज°. ९ सी °द्भिः उष्णि°. १० डी °त्र स्रन्स्ध्वन्स् इ°. ११ डी °ना पदान्तस्थस्यान्तस्यद्. १२ डी क्सिहस्रदृक् । दिक् । स्पृ°. १३ डी °क् । करस्र°.

युक् शीकरैः प्राङ् मरुदुन्मदक्रुङ् सजू रजोभिः स्फुटमम्बुजानाम् ।
आदावहःस्वेष जडत्वदस्तद्रविः कृताहा अकृताह एव ॥ ४३ ॥

४३. अहःसु दिनेष्वादौ प्रभात एष मरुद्वातो जडत्वं शैत्यं ददाति जडत्वदोस्ति । कीदृक्सन् । शीकरैर्जलकणैर्युक् युक्तोत एवोन्मदा उन्मत्ताः क्रुञ्चः सारसा यस्मात्सः । प्रातः शीतवातस्पर्शे हि क्रौञ्चा मार्द्यन्ति । तथा प्रशस्तं मृदङ्चति गच्छति प्राङ् । तथा विकसितत्वादम्बुजानां रजोभिः स्फुटं व्यक्तं सजूः संबद्धः । तत्तस्माद्धेतो रविः कृताहा अपि । अपिरत्राध्याहार्यः । अकृताह एव । दिने हि रविकिरणैर्जाड्यं खण्ड्यते तच्च प्राभातिके शीतले वाते वाति तदवस्थमेवेत्यर्केण दिनं कृतमप्यकृतमेवेत्यर्थः ॥

युक् । प्राङ् । क्रुङ् । इत्यत्र "युजञ्च°" [७१] इत्यादिना कः ॥

रविः । रजोभिः । इत्यत्र "सो रुः" [७२] इति रुः ॥

सजूः । इत्यत्र "सजुषः" [७३] इति रुः ॥

कृताहाः । अहःसु । इत्यत्र "अह्नः" [७४] इति रुः ॥ कृताहाः । इत्यत्र रुत्वस्यासत्त्वान्नान्तलक्षणो दीर्घो भवति । कश्चित्तु दीर्घं नेच्छति । तन्मते कृताहः ॥

जयत्यहोरत्नमहर्विधित्सु स्फूर्जत्यहोरूपमथ प्रवृत्ताः ।
भवत्यहोरात्रकृताशिषोहो रथन्तरं सामविदश्च गातुम् ॥ ४४ ॥

४४. हे राजन्नहर्विधित्सु दिनं चिकीर्ष्वहोरत्नं दिनमणिः सूर्यो

---

१ सी °होरथं°.

---

१ ए क्रुञ्चसा°. २ सी °स्माद्धे°. डी °स्माद्धेतोस्स उन्मदक्रुङ् तथा स्फुटं प्रकटमम्बुजानां रजोभिः सजूः सहित एतेन शीतो मन्दः सुरभिश्च । त्रिधा वायुरुदात्त इति । तत्तस्माद्धे°. ३ एफ् °यन्ते । त°. ४ ए अकृ°. ५ सी डी °पिर°. ६ सी एफ् °च प्रभा°. ७ ए सी डी °त्यर्थः. ॥ ८ ए दिनीचि°.

जयत्युदेतीत्यर्थः ॥ अथार्कोदयानन्तरं प्रशस्तमहः "प्रशस्ते रूपप्" [७.३.१०] इति रूपपि अहोरूपं स्फूर्जति । तथा भवति त्वयि विषयेऽहोरात्रकृताशिषो नक्तंदिवं दत्ताशीर्वादाः सामविदश्च सामवेदज्ञा अहर्दिने । दिनारम्भ इत्यर्थः । "कालाध्वभाव°" [२.२.२३] इत्यादिनात्र द्वितीया । रथन्तरं सामवेदे[1] सामविशेषं गातुं रागविशेषेणोच्चारयितुं[2] प्रवृत्ताः । प्रातर्हि सामविद्भी रथन्तरं साम गीयत इति स्थितिः ।

अहर्विभिस्तु । इत्यत्र "रोलुप्यरि" [७५] इति रः ॥ अरीति किम् । अहोरत्नम् । अहोरूपम् । अहोरात्र[3] । अहो रथन्तरम् । अन्ये तु रूपरात्रिरथन्तरेष्वेव रेफादिषु रेफप्रतिषेधमिच्छन्ति ॥

एषाब्जिनी षट्पदवाग्भिराह सुदुग्निशावृत्तमिवैतदंशोः ।
वियोगभुत्पर्णघुडस्मि[1] गोधुकालात्क यूयं वदत न्यघूढ्वम्[2] ॥४५॥

४५. एषाब्जिनी पद्मिनी सुष्ठु दुःखयति क्विपि णिलुपि संयोगान्तलोपेम्लोपे च सुदुक् सुष्ठु कष्टोत्पादकमेतदुच्यमानं निशावृत्तमंशो रवेरग्रे षट्पदवाग्भिर्भृङ्गशब्दैः कृत्वाहेव वक्तीव । इवो भिन्नक्रमे । किमित्याह । वियोगं[4] बुध्ये वियोगभुत् । युष्मद्विरहदुःखज्ञात एव पर्णानि गूहामि संकोचयामि पर्णघुडस्म्यहं वर्ते । हे अंशो यूयम् । अंशोरेकत्वेपि गौरवविवक्षया "गुरावेकश्च" [२.२.१२४] इति बहुवचनम् । वदत[5] कथयत । दोहनं धुक् । गवां धुक् गोधुक् । तस्याः[6] कालस्तस्माद्गोधुक्कालात् । "गम्ययप°" [२.२.७४] इत्यादिना पञ्चमी । संध्याकालमारभ्य क न्यघूढ्वं निलीना इति । यापि पतिव्रता भर्तरि प्रोषिते वियोगभुत्सती पतिवि-

---

१ ए °र्णघुड°. २ एफ् न्यगूढ्व°.

---

१ सीडी °वेदसा°. २ एफ् °णोच्चर°. ३ बी एफ् °रात्रम् । अ°. ४ सी °योगभु°. ५ सीडी °तयो°. एफ् °त प्रक°. ६ बी °स्याका°.

रहे सतीनां ताम्बूलभक्षणमनुचितमिति पर्णानि नागवल्लीपत्राणि निगूहति लक्षणया न खादति सा भर्तरि समागते कुलवधूत्वेन सलज्जत्वात् षट् पदानि यासु ता या वाचस्ताभिरल्पाक्षरवाणीभिर्विरहकष्टवृत्तान्तं तथेयन्ति दिनानि यूयं क न्यघूढ्वमित्येतेव वक्तीत्युक्तिः ॥

उदेति तुण्ढिभ्रविबिम्बमैन्द्यास्ततस्तमोदामलिडेष लोकः ।
प्रभोत्स्यते शोत्स्यति दास्यते च विधेयबोद्धा सुकृतं विधित्सुः॥४६॥

४६. ऐन्द्याः पूर्वस्या दिशस्तुण्डिभामुन्नतनाभिवर्तीं करोति णिचि क्विपि च तुण्ढिब् तुण्डिसदृशत्वादैन्द्रीं तुण्डिभामिव कुर्वद्रविबिम्बमुदेति । ततोर्कोदयानन्तरं लोकः प्रभोत्स्यते जागरिष्यति शोत्स्यति स्नास्यति दास्यते च द्विजादिभ्यः । प्रातर्हि स्नात्वा दानं दीयते लोकैः । कीदृक् सन् । विधेयबोद्धा । विवेकित्वात्कृत्यं जानन्नत एव सुकृतं धर्मं विधित्सुश्चिकीर्षुरत एव च तमसो दाममालां लेढि खादति तमोदामलिडर्कस्तमिच्छति क्यनि क्विपि तमोदामलिट् । कदा रविरुदेष्यति येन प्राभातिकं देवपूजादि धर्मकृत्यं करोमीति रवेरुदयनमिच्छन्नित्यर्थः ॥

धत्थ स्म मानं भ्रुकुटिं स्म दात्थ धात्थ स्म धैर्यं यदु तत्पिधद्ध्वम् ।
संदात्त कान्तानभिधात्त चोषःशङ्खोभिधत्ते न्विति मानिनीनाम् ४७

४७. उषःशङ्खः प्रभाते राजद्वारादौ वाद्यमानः शङ्खो मानिनीनां पुरोभिर्धत्ते नु वक्तीव । किमित्याह । हे मानिन्यो भर्तृकृतापराधकुपि-

१ सी तुण्डिभ्र°. २ एफ् °धध्वम्. ३ एफ् °त्त चोषः°.

१ एफ् °सु या°. २ सी °त्तान्तत°. ३ डी °न्तं वक्ति त°. ४ एफ् न्यगूढ्व°. ५ डी °तद्वक्ती°. ६ सी डी तुण्डिभ् दृ°. एफ् तुण्डिब् तुण्डिबा स°. ७ ए °ण्ढि भतु°. ८ सी °ति वास्य°. ९ सी माला ले°. १० सी डी °दायन°. ११ ए °ति किं°. १२ एफ् °दिकृ°. १३ बी एफ् °यमि°. १४ डी °त्ते न°.

ततया भर्तृषु यद्यूयं मानमहंकारं धत्थ स्म धृतवत्योत एव चाटूक्त्यादिना प्रसादयत्सु भर्तृषु यद्यूयं भ्रुकुटिं भ्रूविकारं दात्थ स्मात्यर्थं धृतवत्यस्तथा यद्धैर्यमेषां भर्तृणां संमुखमपि नेक्षिष्यामह इति चित्तावष्टम्भं धात्थ स्मात्यर्थं धृतवत्यस्तन्मानादिधरणं पिधध्वं स्थगयत । परित्यजतेत्यर्थः । किं तु संदात्त भृशं संधयत । धेट् धातुः पानार्थोपि संपूर्वः संधाने वर्तते । यदुक्तम् ।

उपसर्गेण धात्वर्थो बलादन्यत्र नीयते । नीहाराहारसंहारप्रतीहारप्रहारवत् ॥

स्वकान्तैः सह संधानं कुरुतेत्यर्थः । तथा कान्तानभिधात्त भृशं वदत । यद्यपि युष्माभिरवज्ञाततयापमानेन कान्ता युष्मान्न संभाषन्ते तथापि यूयमुपेत्य तान् संभाषध्वमित्यर्थ इति । प्रातर्हि राजद्वारादिषु शङ्खो वाद्यते तत्स्वरं श्रुत्वा रात्रिर्विभातेति मानिन्यो मानं मुक्त्वा रिरंसौत्सुक्येन कान्तान् भजन्त इत्येवमुत्प्रेक्षा । अभिधत्ते न्विति वचनसंभावनया शङ्खस्यानुक्तमपि वाद्यमानत्वं प्रतीयते ॥

वाग्भिः । षट्पद । अब्जिनी । इत्यत्र "धुटस्तृतीयः" [७६] इति तृतीयः ॥ केचित्तु विसर्गजिह्वामूलीययोरप्यलाक्षणिकयोस्तृतीयत्वं गत्वमिच्छन्ति तन्मते सुदुग् ॥

पर्णघुट् । तुण्डिभ् । गोधुक् । वियोगभुत् ॥ सादौ । प्रभोत्स्यते ॥ ध्वादौ च । न्यघूढ्वम् । इत्यत्र "गडद॰" [७७] इत्यादिना आदेश्चतुर्थः ॥ गडदबादेरिति किम् । क्षोत्स्यति ॥ चतुर्थान्तस्येति किम् । दास्यति ॥ एकस्वरस्येति किम् । तमोदामलिट् ॥ स्ध्वोरिति किम् । बोद्धा ॥

अभिधत्ते । धत्थ । धिधित्सुः । पिधध्वम् । इत्यत्र "धागस्तथोश्च" [७८]

---

१ सी °मुखा नक्षि°. डी °मुखं ने°. २ एफ् नेष्या°. ३ ए बी सी डी °ण हि धा°. ४ बी एफ् °द व इ°. ५ सी डी °ति ए°.

इति चतुर्थः ॥ गकारः किम् । घयतेर्मा भूत् ॥ ड्रेर्यङ्लुपि । संदात्त ॥ दधातेरपि यङ्लुबन्तस्य मा भूत् । "तिवा शवानुबन्धेन" [न्या०सू०१८] इत्यादिन्यायात् । दात्थ ॥ केचिद्यङ्लुबन्तस्यापीच्छन्ति । अभिधात्त । धात्थ ॥

दुग्ध स्म दुग्धं स्म निधत्थ पार्यां पिधत्त दात्थ स्म च दार्त्त चापि।
तक्राणि वा दाद्ध किमम्बु दाद्धेत्याहुः समं संप्रति घोषवृद्धाः ४८

४८. संप्रति प्रातर्घोषवृद्धा गोकुले वृद्धनराः समं युगपत्स्वपुत्रादीनाहुः । कथमित्याह । हे पुत्रादयो यूयं दुग्धं क्षीरं दुग्ध स्म क्षारितवन्तः । तथा पार्यां दोहिन्यां दुग्धं निधत्थ स्म निक्षिप्तवन्तश्च । तथा यूयं पार्यां निहितं दुग्धं पिधत्त वस्त्रादिना स्थगयत । तथा यूयं दुग्धं दात्थ स्मात्यर्थं पीतवन्तो दार्त्त चापि पुनरप्यत्यर्थं पिबत । वाथवा यूयं तक्राण्युदश्विन्ति दाद्धात्यर्थं पिबत । यदि दुग्धं न रोचते तदा तक्राणि पिबतेत्यर्थः । किमम्बु दाद्ध किमिति जलं पिबथेति ॥

दुग्धम् । दुग्ध । इत्यत्र "अधः°" [७९] इत्यादिना तथोर्धः ॥ अध इति किम् । दधातेर्यङ्लुबन्तधयतेश्च मा भूत् । पिधत्त । निधत्थ । दात्त । दात्थ ॥ केचित्तु यङ्लुबन्तधयतेरिच्छन्ति । दाद्ध । दाद्ध ॥

लक्ष्मीमवृद्ध्वं पृथिवींववृद्ध्वस्तीर्द्ध्वं द्विषस्तत्सुखमासिषीध्वम् ।
स्तुध्वं गुरून्सांध्यविधिं कृषीद्ध्वं स्तीर्षीद्ध्वमेतद्भुवनं यशोभिः॥ ४९ ॥

४९. अथ पञ्चवृत्त्या मूलराजमुपश्लोकयन्तः प्राभातिकविध्युप-

---

१ बी °त्त वापि.

---

१ सी एफ् °त्।ड्रेर्यं°. २ एफ् दात्त।के°. ३ एफ् °ध स्म. ४ बी सी एफ् °त्त वापि. ५ डी दुग्धमपि न. ६ एफ् °बतेति. ७ एफ् °धमह°. ८ एफ् °कतः प्रा°. ९ ए सी डी °न्तः प्रभा°.

देशगर्भमाशासतश्चाहुः । हे राजन् यूयं लक्ष्मीं शक्तित्रयरूपां श्रियम-
वृढ्वमेववरत स्वीकृतवन्त इत्यर्थः । अत एव द्विषः शत्रूनस्तीर्ढ्वमाच्छा-
दितवन्तो जितवन्त इत्यर्थः । अत एव[3] पृथिवीं वव्रृढ्वे साधितवन्त
इत्यर्थः । तत्तस्मान्निष्कण्टकसर्वसंपत्तिसंपूर्णमहाराज्यावाप्तिरूपाद्धेतोः
सुखं पञ्चेन्द्रियानुकूलमासिषीध्वमवस्थेयास्त । तथा गुरून्मातापितॄन्[4]ध-
र्मोपदेष्टृन्वा स्तुध्वं स्तूयास्त । आशिषि पञ्चम्यत्र । प्रभाते हि विशेषतो
मङ्गलत्वात्पूज्याः स्तुत्याः । तथा सांध्यविधिं संध्यावन्दनदेवपूजादि[5]
प्राभातिककृत्यं कृषीढ्वं ततश्चैतद्भुवनं जगत्त्रयं यशोभिः कृत्वा स्तीर्षीढ्व-
माच्छाद्यास्त व्याप्यास्तेत्यर्थः । निष्कण्टकसमृद्धराज्यप्राप्तिलक्षणस्य
पुमर्थस्यैतान्येव फलानि यत्स्वैरं कामसेवनं गुरुस्तवनादिधर्मानुष्ठानस्य
करणं यच्च यशसा जगद्व्यापनमिति । एतानि चाशीर्भङ्ग्या बन्दि-
भिर्नृप उपदिष्टानीत्यर्थः ॥

अस्तीर्ढ्वम् । स्तीर्षीढ्वम् । वव्रृढ्वे[8] । अवृढ्वम् । कृषीढ्वम् । इत्यत्र "नाम्यन्तात्°"
[८०] इत्यादिना धस्य ढः ॥ नाम्यन्तादिति धातोर्विशेषणं किम् ।
आसिषीध्वम् । परोक्षाद्यतन्याशिष इति किम् । स्तुध्वम् ॥

धियाग्रहीढ्वं निशि निद्रया नाग्राहिढ्वमुद्युक्ततयाग्रहीध्वम् ।
न वा जडिम्ना जगृहिढ्व आन्वग्राहिध्वमुत्कृष्टगुणैः सदा हि ॥५०॥

५०. हे राजन् यूयं धिया कर्त्र्याग्रहीढ्वमाश्रिता इत्यर्थः । अत एव
जडिम्ना मूर्खत्वेन कर्त्रा यूयं न वा जगृहिढ्वे नैवाश्रिताः । तथोद्युक्तत-
योद्यमगुणेन यूयमग्रहीध्वमाश्रिता अत एव निद्रया नाग्राहिढ्वं ना-

---

१ सी °शासितश्चा°. डी °शासिनश्चा°. २ डी एफ् °मनवरतं स्वी°. ३ बी सी डी °व च पृ°. ४ °पित्रादीन्ध°. ५ए बी सी डी °दि प्रभा°. ६ बी °णस्यार्थपु°. ७ सी °वनादि°. ८ ए °ढ्वे । कृ°. ९ ए सी डी °न्तादि°. १० ए आशिषी°.

श्रिताः । हि यस्मादुत्कृष्टा गुणा बुद्ध्युत्साहादयो येषां तैर्गुणाधिकैर्गुरुभिः सदा यूयमान्वग्राहिध्वं सदुपदेशदानादिना समन्तादनुगृहीताः ॥

किमन्वकारिढ्वमुतान्वसारिध्वं किं नु मेहिध्व इनेन भाभिः ।
तमोलविढ्वं द्विषतोलविध्वं यूयं हि विश्वं पुपुविढ्व एतत् ॥ ५१ ॥

५१. हे राजन् हि यस्माद्यूयं नीतिशास्त्रादिसकलशास्त्रवेदित्वात्तमोज्ञानमलविढ्वम्। तथा द्विषतोरीनलविध्वम् । तथैतद्विश्वं भूलोकं पुपुविढ्व अन्यायमलापनयनेन पवित्रितवन्तः।तस्माद्धेतोरिनेन रविणा कर्त्रा भाभिस्तेजोभिः कृत्वा तमोलवनादिस्वकार्यनिष्पादनाय यूयं कर्म किमन्वकारिढ्वम् । अन्तर्भूतणिगर्थत्वात्कृगः । किं यूयं रविणात्मानमनुकारिताः स्वसदृशीकृता इत्यर्थः । उत किं वेनेन भाभिः कृत्वा यूयमन्वसारिध्वमनुसृता रविणा किं तेजोभिर्भवतां साहाय्यं कृतमित्यर्थः । किं नु किं वा यूयं भाभिर्मेहिध्वे तेजोदानेन सन्मानिताः । इदमुक्तं स्यात्तमोलवनादीनि हि रविकार्याणि । एतानि च यूयमपि चक्र । ततो बन्दिभिरेवमाशङ्क्यते । योपीनेन स्वामिना स्वकार्यकरणक्षमतया स्वसदृशः कृत्वा लोके स्थाप्यते साहाय्याय सैन्यादिनानुगम्यते विभूतिदानादिना सत्क्रियते वा स स्वामिकार्याणि कुरुते ॥

यद्यज्ञविघ्नाल्लुँलुविध्व एत्यानुग्राहिषीढ्वं ननु तैरिदानीम् ।
संस्कारिषीढ्वं परिकारिषीध्वं द्रागग्राहिषीध्वं च गुणैस्तदीयैः ॥५२॥

५२. हे राजन् यद्यज्ञविघ्नान् येषां मुनीनां यज्ञेषु विघ्नान्दैत्यादिकृतोपद्रवान् यूयं लुलुविध्वे । नन्विति संबोधने । तैर्मुनिभिरिदानीं प्रातरेत्याश्रमेभ्य आगत्यानुग्राहिषीढ्वमाशिषानुगृह्णीध्वम् । मुनयो हि राज्ञः

१ एफ् °यमन्व°. २ ए सी °ढ्वंस्तथा. ३ बी एफ् किं चेने°. ४ सी डी °नाका°. ५ एफ् °भूतदा.

प्रातराशिषं ददति। तथा तैर्यूयं संस्कारिषीढ्वं[1] मन्त्रपाठपूर्वं तिलककरणेन विशिष्टीकृषीढ्वम्[2]। तथा तैर्यूयं परिकारिषीध्वं परिवार्यध्वम्। तथा[3] तदीयैर्मुनिसत्कैर्गुणैरुपशमादिभिः कर्तृभिर्द्राग्यूयं ग्राहिषीध्वं चाश्रीयध्वम् परिवारस्य गुणाः स्वामिन्यध्यारोहन्ति॥

सिंहासनायोत्सहिषीढ्वमाभां हरेर्ग्रहीषीध्वमथाधिसानोः।
सदोयिषीढ्वं द्युलिडंशुरत्नं प्रौढ्या श्रियं जम्भभिदोयिषीध्वम्॥५३॥

५३. हे राजन् यूयं द्युलिहो व्योमस्पृशोंशवः किरणा येषां तानि तथाविधानि रत्नानि यत्र तत् सद आस्थानमण्डपमयिषीढ्वं गम्यास्त। तथा सिंहासनायोत्सहिषीढ्वमुद्यम्यास्त[4] सिंहासन उपविशतेत्यर्थः। अथ सिंहासनोपवेशानन्तरमधिसानोर्गिरिप्रस्थमध्यारूढस्य हरेः सिंहस्याभां शोभां ग्रहीषीध्वमा[5]श्रयिषीध्वम्। एवं च प्रौढ्यानभिभवनीयाकारेण जम्भभिद इन्द्रस्य श्रियमयिषीध्वमाश्रयत॥

दुग्धोज्ज्वलामुग्धदृशाम्बुरुण्मान्[1]धग्मुग्द्विषां दानवलिट्प्रियोथ।
अमूढधीः कृत्यविधावनुन्मुड्रत्नध्रुगार्तिं[2]ध्रुडसावुदस्थात्॥५४॥

५४. अथैवं बन्दिभणनानन्तरमसौ मूलराज उदस्थात्तल्पादुत्थितः। कीदृक्। दुग्धवदुज्ज्वलामुग्धामूढा विगतनिद्रा या दृग्दृष्टिस्तया कृत्वा। जातावेकवचनाद्दुग्धोज्ज्वलामुग्धदृग्भ्यामित्यर्थः। अम्बुरुही अस्य स्तः सोम्बुरुण्मानिवाम्बुरुण्मान्। प्रभाते हि निद्राध्राणतयाक्षीणि[6] दुग्धोज्ज्वलानि विनिद्राणि च स्युः। कमलानि[7] चेत्युभयोरपि साम्यात्प्रबुद्ध-

१ सी °ण्मात्वग्मु°. २ बी सी °ध्रुगार्तिं°.

१ एफ् °रिढ्वं. २ ए °षीढ्वं प°. ३ डी °था त्वदी°. ४ ए °धम्यस्त. ५ एफ् °षीढ्वमा°. ६ एफ् °णि उज्ज्व°. ७ सी डी °नि चेत्यु°.

कमलतुल्याक्ष इत्यर्थः । तथा मुग्द्विषां मुह्यन्ति मुहो मूढा अन्यायकारिण इत्यर्थः । ये द्विषो दैत्यादयस्तेषां दहतीति धक् विनाशयितात एव वृत्राय द्रुह्यति वृत्रध्रुगिन्द्रस्तस्यार्तिर्दैत्योपद्रवजनिता पीडा तस्यै द्रुह्यति जिघांसति यः सः । तथात एव दानवलिहं दैत्यघातिनं विष्णुमिच्छन्ति[1] दानवलिहो देवास्तेषां प्रियः । तथामूढधीः पटुबुद्धिरत एव कृत्यविधौ नोन्मुह्यत्यनुन्मुट् । शंभुना[2] स्वप्रेतिगुरुकार्यमुपदिष्टं तत्कथं करिष्य इति न किंकर्तव्यतामूढो भवन्सन्नित्यर्थः ॥

द्रुग्धास्निगद्रूढमनः स्निडेष स्नुग्धामृतस्नूढवचाः श्रुतिस्नुक् ।
स्नीढैर्द्विजैः स्निग्धतनुः सुमन्त्रस्नुड्भिर्वृतः सांध्यविधिं व्यधत्त ॥ ५५ ॥

५५. द्रुग्धा जिघांसिता अस्निहो द्विषो येन स दुष्टाग्निजिघृक्षुरित्यर्थः । तथाद्रूढं मनो येषां तेद्रूढमनसोवञ्चकास्तेषु स्निह्यति यः सः शिष्टपालक इत्यर्थः । एष मूलराजः सांध्यविधिं संध्यावन्दनादि व्यधत्त । कीदृक्सन् । द्विजैर्वृतैः[3] । किंभूतैः स्नीढैः । स्नात्वा सांध्यविधिर्विधीयत इति स्नानजलार्द्रत्वात्स्निग्धतनुभिः । तथा सुमन्त्रस्नुड्भिः प्रभातसंध्योचितप्रधानवेदमन्त्रानुच्चारयद्भिः । तथा स्निग्धतनुः स्नानजलार्द्राङ्गः । तथा मधुरत्वात्स्नुग्धं क्षरितममृतं येन तत्स्नुग्धामृतमिव स्नूढमुद्गीर्णं वचो येन सः । तथा सन् श्रुतिं वेदं स्नुह्यत्युद्गिरति श्रुतिस्नुक् । प्रभातसंध्याविध्युचितानि वेदवाक्यानि मधुरमुच्चारयंश्चेत्यर्थः ॥

मेः । अग्राहिढ्वम् आन्वग्राहिध्वम् । अनुग्राहिषीढ्वं[4] ग्राहिषीध्वम् । अन्वकारिढ्वम् अन्वसारिध्वम् । संस्कारिषीढ्वं परिकारिषीध्वम् ॥ इटः । जगृहिढ्वे मेहिध्वे । अग्रहीढ्वम् अग्रहीध्वम् । उत्सहिषीढ्वं[5] ग्रहीषीध्वम् । पुपुविढ्वे लुलुविध्वे ।

---

१ सी °न्ति कं दा°. २ सी डी °ना च स्व°. ३ पफ़ °तः । कीदृशैः स्नी°.
४ सी °षीध्वम् । अ°. ५ पफ़ °षीध्वं पु°.

[1]अलविढ्[2]वम् अलविध्वम् । अयिषीढ्वम् अयिषीध्वम् । इत्यत्र "हान्तस्थाञीड्भ्यां वा" [८१] इति वा ढः ॥ परोक्षायां जिर्न संभवतीति नोदाहृतः ॥

प्रौढ्या । पदान्ते[3] । ष्ठुलिड् । इत्यत्र "हो धुट्पदान्ते" [८२] इति हस्य ढः ॥ असत्पर इत्येव । अम्बुरुण्मान् । अत्र ढत्वतृतीयत्वयोरसत्त्वात् "मावर्णा°" [२.१.९४] इत्यादिना मतोर्मो वत्वं न स्यात् ॥

दुग्ध । पदान्ते[4] । धग् । इत्यत्र "भ्वादेर्दादेर्घः" [८३] इति घः ॥ भ्वादेरिति किम् । दानवलिट् ॥ दादेरिति किम् । प्रौढ्या । अम्बुरुण्मान् ॥

अमुग्ध अमूढ[5]धीः । मुग् अनुन्मुड्[6] । द्रुग्ध अद्रूढ । वृत्रध्रुग्[7] अर्तिध्रुड् । स्नुग्ध स्नूढ । श्रुतिस्नुक् मन्त्रस्नुड्भिः । स्निग्ध स्नीढैः । अस्निक् स्निड् । इत्यत्र "मुहद्रुह°" [८४] इत्यादिना वा हस्य घः ॥

स भक्तिभाग्वाग्नृपनद्धमौलिरत्नाञ्चितोपानदुपोढकृत्यः ।
द्वास्थे किमात्थेति जनेषु वक्तर्यगात्सदो [1]जम्बकजेहुलाभ्याम् ॥५६॥

५६. स मूलराजो [8]जम्बकजेहुलाभ्याम् । [9]जम्बको नाम मूलराजस्य महा[10]मन्त्री । जेहु[11]लश्च स्वड्गराल्लुराणको मूलराजस्य महाप्र[12]धानम् । ताभ्यां सह सदो मन्त्रमण्डपमगात् । येन[13] उपोढं तयोः[14] पुरो भणनाय चित्ते धारितं कृत्यं शंभूपदिष्टं दैत्यवधकार्यं येन सः । क सति । द्वास्थे

---

१ एफ् जम्बुक°.

---

१ सी अयि°. २ डी विध्वं अ°. ३ एफ् °न्ते लि°. ४ डी °न्ते ष्ठुलिट् ध°. ५ बी एफ् °ढ मु°. ६ सी डी °ड् द्रुड् द्रु°. ७ बी सी एफ् °ग् आर्ति°. ८ एफ् जम्बुक°. ९ डी जम्बकजेहुलौ नाम मूलराजस्य महाप्रधानौ । ता°. एफ् जम्बुको. १० सी °हाप्र°. ११ ए °हुरश्च. १२ एफ् °धानः ता°. १३ एफ् यदुपो°. १४ एफ् °योः परो°.

प्रतीहारे । किंभूते । जनेषु विज्ञापकलोकेषु विषये[1] वक्तरि वदति । किमित्याह । किमात्थ किमिति ब्रूषेधुना विज्ञापनायां[2] नावसर इति तूष्णीं तिष्ठेत्यर्थ इति । निषेध्यानां जनानां बहुत्वेपि प्रत्येकं निषेधस्य[3] विवक्षितत्वादात्थेत्यत्रैकवचनम् । कीदृक् सः । भक्तिभाग्विनयान्विता वाग्वाणी येषां तैस्तथाभूतैर्नृपैर्नद्धाः परिहिता ये[4] मौलयो नृपचिह्न[5]मुकुटानि तत्र यानि रत्नानि तैरञ्चिते पूजिते उपानहौ पादुके यस्य स तथा । मुकुटबद्धनृपैः कृतप्राभातिकसेवावसर इत्यर्थः ॥

नद्ध् । उपानद् । आत्थ । इत्यत्र "नहाहोर्धतौ" [८५] इति धतौ ॥

वक्तरि । वाग्[6] । अं: । भक्ति । भाग् । इत्यत्र "चजः कगम्" [८६] इति कगौ ॥

विप्रेट् स यष्टेव शतं ऋतूनां मार्ष्टा गुणानां गुणराष्टिसृड्भ्याम् ।
सम्राडमूभ्यामरिवर्गभृड्भ्यां स्रष्टेव विभ्राड्द्विधिकंसमृड्भ्याम् ॥५७॥

५७. स सम्राड् नृपेशोमूभ्यां जम्बकजेहुलाभ्यां सह विभ्राट् शोभमानोभूत् । कीदृक् । ऋतूनां शतं यष्टेव शतऋतुरिव विप्रान् यजते पूजयति क्विपि विप्रेट् । यथेन्द्रः ऋतूनां शतं कारयन्विप्रानिष्टवांस्तथा यजन् । तथा गुणानां धीर्मत्वकान्तत्वादीनां मार्ष्टा यथोचितं व्यापारणेन[9] निर्मलीकारकः । कीदृग्भ्याममूभ्याम्[10] । गुणराष्टिसृड्भ्यां गुणै राष्टिं राजनं शोभां सृजतः कुरुतो यौ ताभ्यां गुणैः शोभनाभ्यामित्यर्थः । अत एवारिवर्गं स्वस्य राज्ञश्च बाह्यमान्तरं च शत्रुसमूहं भृज्जतः

१ डी °येषु व°. २ एफ् °यानव°. ३ सी डी °षेधाय वि°. ४ एफ् ये मूल°. ५ सी °चिह्ना मु°. डी °चिह्नानि मु°. ६ डी °क् इ°. एफ् °क् भ°. ७ सी जः क°. ८ एफ् °मक्ता°. ९ एफ् °चितव्यापारेण नि°. १० एफ् °ह्यमभ्यन्त°

पचतो विनाशयतो यौ ताभ्यां यथा स्रष्टा हरो विधिकंसमृड्भ्यां विधिर्ब्रह्मा । कंसं मार्ष्टि शोधयति विनाशयतीत्यर्थः । कंसमृड् विष्णुस्ताभ्यां सहितो विभ्राजते ॥

विरुद्धकार्ययोरुपनिपाते हि मन्त्रः स्यादिति ते वृत्तद्वयेनाह ।

दन्तांशुजालैः परिभृष्टशङ्खक्षोदैरिवोद्भ्राष्टि सदः प्रकुर्वन् ।
स विट्पतिः प्राह तयोर्निविष्टः प्रभासवृड्भ्रष्टृनिदेशमैशम् ॥५८॥

५८. निविष्टः सिंहासन उपविष्टः स विट्पतिर्विशां पतिर्नृपस्तयोर्जम्ब[2]कजेहुलयोरैशं शांभवं प्रभासं तीर्थं वृश्चन्त्युपद्रवन्ति प्रभासवृश्चो ग्राहार्योदयस्तेषां भ्रष्टा छेदको यो निदेश उपदेशस्तं प्राह । तत्कालापेक्षया वर्तमानकालता । कीदृक्सन् । दन्तांशुजालैरतिश्वेतत्वात्परि[3]भृष्टशङ्खक्षोदैरिव परिभृष्टः परिपक्वो यः शङ्खस्तस्य ये क्षोदाः क्षुद्यमाना अवयवा अर्थाद्द्रवीभूतास्तैरिव कृत्वा सदो मन्त्रमण्डपमुद्[4]ल्लसन्ती भ्राष्टिर्भ्राजनं शोभा यस्य तत् । शङ्खद्रवविलिप्तमिवेत्यर्थः । प्रकुर्वन् । राजसभा हि शङ्खद्रवविलिप्ता स्यात् ॥

कृतो मया ग्राहरिपुः स जज्ञे परं परिव्राट्तडलकुलग्नः ।
प्रष्टास्मि तष्टास्य कथं न्वहं स्यां स्वरोपिते कः प्रजिहीः पुमान्क्॥५९

५९. ग्राहरिपुर्मया कृ[5]तः प्रतिष्ठितः । परं केवलं स ग्राहरिपुः कुत्सितं लग्नं राश्युदयो यस्य स कुलग्नः कुमुहूर्तजातोत एव न लज्जतेऽलग्निर्लज्जः सन्परिव्राजस्तपस्विनस्तक्षति हिनस्ति परिव्राट्तट् तापसहिं-

१ सी डी °यती°. २ एफ् °जेम्बुक°. ३ए बी सी एफ् °रिभ्रष्ट°. ४ एफ् °मुल्ल°. ५ ए सी डी कृतप्र°.

सक्तो जज्ञे । अस्म्यहं नु प्रष्टा युवां पृच्छामि । किमित्याह । नु इति वितर्के । युवां वितर्कैथां कथमस्य ग्राहरिपोस्त्रष्टा विनाशकोहं स्यां भवेयम् । अथ भणिष्यथो यद्यन्याय्येष तच्छिक्ष्यतां किमनेन प्रश्नेनेत्याह । स्वरोपित आत्मसंस्थापिते जन ऊर्जयतीत्यूर्क् सात्त्विकः पुमान्पुरुषगुणोपेतः कः प्रजिहीः प्रहर्तुमिच्छेत् । न कोपीत्यर्थः । एवं चास्य वध्यत्वावध्यत्वरूपयोर्विरुद्धकार्ययोरुपस्थितयोः किं कार्यमित्यहं युवां प्रष्टा ॥

तस्माद्युवां यद्विधेयं तद्वदतमित्याह ।

त्वमभ्यपास्पा गुरुणाभ्यजर्घास्त्वं चोशनस्त्वं रिपुहा महात्मन् ।
भियामधामन्मतिधाम कृत्यं युवां ब्रुवाथामनहर्विलम्बम् ॥ ६० ॥

६०. हे महात्मन् विपुलाशय भियां भयानामधामन्नस्थान मतिधाम बुद्धिगृह जेम्बक रिपुहा त्वं गुरुणा बृहस्पतिना सहाभ्यपास्पा भृशमस्पर्धथाः । बुध्या त्वं बृहस्पतितुल्य इत्यर्थः । तथा हे महात्मन् भियामधामन्मतिधाम जेहुल रिपुहा त्वमुशनस्त्वं शुक्रत्वमभ्यजर्घा भृशमभिगृध्यो भृशमकाङ्क्षः । बुद्ध्या त्वं शुक्रसम इत्यर्थः । तस्माद्युवां नास्त्यहो विलम्बो यत्र तत् शीघ्रं कृत्यं विधेयं ब्रुवाथाम् ॥

यज् । यष्टा । विभ्रेद् ॥ सृज् । स्रष्टा । राष्टिसृड्भ्याम् ॥ मृज् । मार्ष्टौ । कंससृड्भ्याम् ॥ राज् । राष्टि । सम्राट् ॥ भ्राज् । उद्भ्राष्टि । विभ्राट् ॥ भ्रस्ज् । परिभृट् । वर्गभृड्भ्याम् ॥ भ्रस्च् । भ्रष्टू प्रभासवृट् ॥ परिव्राज् । परिव्राट् ॥ शकारान्त । निविष्टः । विट् । छादेशोपि शो गृह्यते । प्रष्टा । इत्यत्र "यँजसृज°" [८७] इत्यादिना षः ॥

---

१ एफ् जम्बुक. २ एफ् °तिसम इ°. ३ सी डी °मका°. ४ एफ् °आशु°. ५ एफ् गुवीधा°. ६ डी भ्रश्च् ।. ७ ए बी यज्स°.

लंग्न। अलङ्। तष्टा। तट्। इत्यत्र "संयोगस्य°" [८८] इत्यादिना स्कोर्लुक्॥ संयोगस्येति किम्। कृतः॥

पुमान्। इत्यत्र "पदस्य°" [८९] इति संयोगस्य लुगन्तादेशः॥ पदस्येति किम्। स्याम्॥

प्रजिहीः। इत्यत्र "रात्सः" [९०] इति सस्यैव लुग्॥ पूर्वेणैव सिद्धे नियमार्थं वचनम्। तेन रात्परस्य सस्यैव लोपो नान्यस्य। ऊर्क्। अभ्यजर्घाः। अभ्यपास्याः॥

रिपुहा। इत्यत्र "नाम्नो नः°" [९१] इत्यादिना नस्य लुक्॥ अनह्न इति किम्। अनहर्विलम्बम्। अत्र परविधौ रेफस्यासत्त्वान्नलोपः स्यात्॥

महात्मन्। इत्यत्र "नामन्त्र्ये" [९२] इति नलोपाभावः॥

मतिधाम। अधामन्। इत्यत्र "क्लीबे वा" [९३] इति वा नस्य लुक्॥

नृपेथ तूष्णींवति जेहुलो लक्ष्मीवान् यशस्वान्नयवत्सु धीमान्।
मुद्वानदोहीवतिकाम्रुनीवत्पृषीवतीवाः शुचिवाग्बभाषे ॥ ६१ ॥

६१. अथैवमुक्त्वा नृपे मूलराजे तूष्णींवति मौनस्थिते जेहुलोदो वक्ष्यमाणं बभाषे। उपादेयवाक्योहि मैक्ने भाषेतेत्युपादेयवाक्यताहेतुगर्भविशेषणान्याह। लक्ष्मी राज्यकोशादिश्रीरस्यास्ति लक्ष्मीवान्। लक्ष्मीवान् हि प्रायेण सर्वमान्यतयोपादेयवाक्यः स्यात्। लक्ष्मीवानप्यन्याय्यन्यायोपदेशितयाग्राह्यवागेवेत्याह। नयवत्सु मध्ये यशस्वान् श्लाघ्यः। अतिन्यायित्वान्न्याय्यपि निर्बुद्धिरग्राह्यवागेवेत्याह। धीमान्। बुद्धिमानपि शोकातुरो विघटमानवाक्यतयाग्राह्यवागेवेत्याह। मुद्वान् हर्षान्वितः। मुद्वानप्यश्लीलवाक्योसुखर्कत्वादग्राह्यवागेवेत्याह।

---

१ बी लग्नः।. २ ए °त्वसं°. ३ सी डी °म् स्या°. ४ ए सी डी नामिन इ°. बी नाम्न् इ°. ५ डी मत्रं भा°. ६ ए सी एफ् °न् हि. ७ ए °क्ष्मीमान°. ८ एफ् °करत्वा°.

अज्ञाताह्रीवत्यहीवतिका । कपि "ङ्यादीदूतः के" [२.४.१०४] इति ह्रस्वः । तस्याश्च मुनीवत्याश्च ऋषीवत्याश्च नदीनां यद्वार्जलं तद्वच्छुचिः पौनरुक्त्यासत्यत्वादिमलरहितत्वेन निर्मला वाग् वाणी यस्य सः ।

मकारान्तात् । तूर्ष्णींवति ॥ मकारोपान्तात् । लक्ष्मीवान् ॥ अवर्णान्तात् । नयवस्तु ॥ अवर्णोपान्तात् । यशस्वान् ॥ अपञ्चमवर्गात् । मुद्वान् । इत्यत्र "मावर्ण०" [९४] इत्यादिना मतोर्मस्य वः ॥ मावर्णान्तोपान्तापञ्चमवर्गादिति किम् । धीमान् ॥

अहीवतिका । मुनीवती । ऋषीवती । इत्यत्र "नाम्नि" [९५] इति मस्य वः ॥

चर्मण्वतीकर्तृसदृग्रुमण्वदुत्तुङ्ग कक्षीवदनल्पधर्मन् ।
युक्तं नताष्ठीवदिलेश शंस्त्वराभीरचक्रीवति यच्च्यदिक्षत् ॥ ६२ ॥

६२. हे चर्मण्वतीकर्तृसदृक् । चर्मण्वती नदी तस्याः कर्ता रन्तिदेवः । तेन हि गोमेधयागः कारितः । तत्र चानेकगोवधेन गोरक्तैर्नदी प्रवर्तिता । तस्याश्चानेकगोचर्मयुक्तत्वेन चर्मण्वतीति नाम प्रसिद्धम् । तस्य सदृक् महायागकारित्वात्तत्तुल्य । तथा हे रुमण्वदुत्तुङ्ग । लवणमस्यास्ति रुमण्वान्नाम पर्वतस्तद्वदुत्तुङ्गोन्नताशय । तथा हे कक्षीवदनल्पधर्मन् । कक्ष्याशब्दो योपान्त्यः सादृश्ययोगयोर्वर्तते । कक्ष्या धर्मोद्योगोस्यास्ति कक्षीवान्नामर्षिस्तद्वत्प्रभूतधर्म । तथास्थीनि सन्त्येषामष्ठीवन्तो जङ्घोरुसंधयो नता अष्ठीवन्तो येषां ते तथेलेशा यस्य तत्संबोधनं हे प्रणतानेकभूप । आमीरे आभीरजातिग्राहरिपुश्चक्रं मण्डलं मेहनान्ते-

१ बी °मन्वती°. २ ए सी °मन्वदु°.

१ एफ् °वर्णान्तोपान्त इ°. २ एफ् °धा क°. ३ डी °था हे नताष्ठीवदिलेशास्थी°. ४ डी °णताने°. ५ सी डी °रजा°. ६ ए एफ् °तिग्राह°.

स्यास्ति चक्रीवान् गर्दभ आभीर एवान्यायित्वेन निन्द्यत्वाच्चक्रीवांस्तस्मिन्विषये शंभुर्यदनुशासनं न्यदिक्षत्तद्युक्तम्। धार्मिकस्य सैन्यादिसर्वशक्तियुक्तस्य तवान्यायिनि ग्राहरिपौ विषये यः शांभवोनुशासनादेशः स कर्तव्यो मे प्रतिभातीत्यर्थः ॥

अथ राज्ञो मन्यूद्दीपनाय जगत्त्रयसंतापकानि ग्राहरिपोरनेकान्यन्यायपदानि बलानि च वृत्तचतुर्विंशत्या वदन्नीशादेशस्यैव युक्ततां द्रढयति।

औदन्वतद्रोहकरेण चर्मवत्यस्थिमत्यर्दिततीर्थपान्थैः।
कक्ष्यावतामप्यगमाभ्युदन्वत्प्रभासभूश्चक्रवतामुनाभूत् ॥ ६३ ॥

६३. उदन्वन्तं समुद्रमभि "लक्षणेनाभि°" [३.१.३३] इत्यादिनाव्ययीभावे अभ्युदन्वदुदन्वन्तं लक्ष्यीकृत्याभिमुखा प्रभासभूः प्रभासतीर्थभूमिः। प्रभासतीर्थं हि समुद्रसमीपेस्ति। यद्वाभ्यभित उदन्वती समुद्रोदकं बिभ्राणा या प्रभासभूः सा कक्ष्यावतामपि। कर्तरि षष्ठी। उद्यमवद्भिरप्यगमागम्याभूत्। केन हेतुना। अमुना ग्राहारिणा। कीदृशेन। उदकमस्यास्त्युदन्वानृषिस्तस्यापत्यमौदन्वत ऋषिस्तस्य। यद्वोदन्वान्नामाश्रमस्तत्र भवा ऋषयस्तेषाम्। द्रोहकरेण जिघांसुना। तथा चक्रवता सुराष्ट्रादेशस्वामिना। कीदृक्सती भूः। अर्दितामुनैव विनाशिता ये तीर्थपान्था यात्रिकास्तैः कृत्वा चर्मवती चर्मान्विता। तथास्थिमती कीकसान्विता च। अनेनानेकान् यात्रिकान् हतान् दृष्ट्वा यात्राश्रद्धालवोपि भयेन प्रभासे न गच्छन्तीत्यर्थः ॥

चर्मण्वती। अष्ठीवत्। चक्रीवति। कक्षीवत्। रुमण्वत्। इत्येते "चर्मण्वती°" [९६] इत्यादिना निपात्याः ॥ नाम्नीत्येवं। चर्मवती। अस्थिमती। चक्रवता। कक्ष्यावताम् ॥

१ एफ् आहीर°. २ एफ् ग्राहिरि°. ३ एफ् °तां दृढ°. ४ एफ् कक्षाव°. ५ बी रप्याग°. ६ ए बी °राष्ट्रदे°. ७ एफ् °पाताः ॥. ८ ए सी डी °व। अ°.

अक्ष्णौ । अभ्युदन्वत् ॥ नाम्नि । अभ्युदन्वत् । औदन्वत । इत्येते "उदन्वानब्धौ च" [९७] इति निपात्याः ॥

राजन्वती या हरिणा सुराष्ट्रा तां दल्मिमानूर्मिमदब्धिभीमः ।
शौर्योष्मकण्ड्वा कृमिमानिवाद्य स भूमिमान्राजवतीं व्यधत्त ॥६४॥

६४. या सुराष्ट्रा देशो हरिणा विष्णुना कृत्वा शोभनो राजास्त्यस्यां राजन्वत्यासीत् । तां सुराष्ट्रामद्य सांप्रतं स भूमिमान्भूपतिर्ग्राहरिपुर्निन्द्यो राजास्त्यस्यां निन्दायां मतौ राजवतीं व्यधत्त । कीदृक्सन् । शौर्योष्मकण्ड्वा शौर्यस्य य ऊष्मा तीव्रता तेन या कण्डूः खर्जूर्युद्धविधानेच्छातिरेकस्तया कृमयः सन्त्यस्य कृमिमानिव । कृमिमान् हि कण्डूयुक्तः स्यात् । अत एव दल्मिमान् शस्त्रविशेषान्वितः । अत एव चोर्मिमदब्धिभीमः । यथा कल्लोलान्वितः समुद्रो रौद्रः स्यादेवं दल्मिधारणाद्रौद्रः । सुराष्ट्रायामतिरौद्रोयं[2] कुराजाभूदित्यर्थः ॥

गोहृन्मुनीनां यवमत्कराणां माहिष्मतीशो नु ककुद्मदंसः ।
पुरे गरुत्मद्धनुमद्ध्वजार्हे वसत्यसौ भानुमतीशकल्पः ॥ ६५ ॥

६५. असौ ग्राहारिः पुरे वामनस्थल्यां वसति । कीदृक्सन् । महिष्मान्देशस्तत्र भवा माहिष्मती पुरी तस्या ईश. सहस्रार्जुनो नु यथा सहस्रार्जुनो मुनीनां गोहृत् । तेन हि जमदग्निमुनेः कामधेनुर्हठादपहृतेति पुराणम् । तथा यवमन्तो होमार्थं गृहीतयवाः करा येषां तेषां यागविधानव्यग्राणामित्यर्थः । मुनीनां गा हैयंगवीनहवनार्थं संगृहीता धेनूर्हरति चोरयति गोहृदपि[3] । अपिरत्र ज्ञेयः । ककुद्मतो वृषभस्येवांसौ स्कन्धौ यस्य स ककुद्मदंसोतिबलिष्ठः । किंभूते पुरे । गरुत्मान् गरुडो हनु-

१ एफ् °ष्ट्रा ह°. २ बी °यामिति°. ३ सी डी °पिर°.

मान् मारुतिस्तयोस्तुल्या "न नृ°"[७.१.१०८] इत्यादिना कनिषेधे गरुत्म-द्धनुमन्तो गरुडहनुमदादिरूपकालंकृता इत्यर्थः । ये ध्वजास्तेषामर्हे योग्येनेककोटीप्रभुमहेभ्याधिष्ठितहर्म्यैरम्यत्वात् । यद्वा । गरुत्मद्धनु-मन्तौ ध्वजौ चिह्ने ययोस्तौ गरुत्मद्धनुमद्ध्वजौ वासुदेवार्जुनौ तयोरर्हे वासयोग्ये । वामनस्थल्यां हि वासुदेवार्जुनावुषितावभूताम् । चौरा-हि दुर्गपल्ल्यादिस्थान एव वसन्त्ययं तु तथाभूतोपि बलिष्ठत्वेन सर्व-थाकुतोभयत्वान्महर्द्धिके पुर एव स्वेच्छया वसतीत्यर्थः । अतश्च महो-पन्यायित्वाद्भानुमतीशकल्पो भानुमत्या ईशो भर्ता दुर्योधनस्तत्तुल्यः । सोपि यवमत्कराणां महापुरुषत्वाद्यवाकारसुप्रशस्तलक्षणान्वितहस्तानां मुनीनामुपशमेन मुनितुल्यानां पाण्डवानां गोहृद् द्यूतच्छलेन भूमेर-पहर्ता सन् गरुत्मद्धनुमद्ध्वजार्हे पुरे गजपुर उवास ॥

राजन्वती[४] । इति "राजन्वान्सुराज्ञि" [९८] इति निपात्यम् ॥ सुराज्ञीति किम् । राजवतीम् ॥

ऊर्मिमत् । दल्मिमान् । भूमिमान् । कृमिमान् । यवमत् । गरुत्मत्[५] । ककु-द्मत् । माहिष्मती । हनुमत् । भानुमती । इत्यत्र वस्य "नोर्म्यादिभ्यः" [९९] इति निषेधः ॥

निशास्ववस्कन्दिनि निश्यशायिन्यासन्यनासीन इहोग्रदोषि ।
मासार्धमासेन स आसनाय मन्येनुजो विंशतिदोष्ण इच्छेत् ॥ ६६ ॥

६६. इह ग्राहरिपौ सति मन्ये स शौर्यादिगुणैः प्रसिद्धो विंशति-दोष्णो रावणस्यानुजो बिभीषणोर्धमासेन [६]मासा मासेन वासनायोपवे-[७]शनायेच्छेत् । यतः कीदृशीह । निशास्ववस्कन्दिनि धाटीप्रदे छलपर इत्यर्थः । तथा निश्यपि । अपिर्भेयः । अशायिनि सदोद्यत इत्यर्थः ।

१ एफ् °त एव म°. २ डी एफ् °हान्या°. ३ एफ् °नस्तेन तुल्यः. ४ एफ् °ती रा°. ५ ए °त् । मा°. ६ ए सी डी मासे°. ७ ए सी डी °नाये°.

तथोप्रदोषि प्रचण्डबाहुपराक्रमेत एवासनि पीठेनासीने सदा शत्रूनास्कन्दति चेत्यर्थः। मास्मायं छलास्कन्दनेन मामुपद्रवदित्यस्माद्विभ्यद्विभीषणः कुत्राप्यवस्थितिं न बध्नातीत्यहं संभावयामीत्यर्थः॥

दुष्टो हृदा क्ष्माहृदयस्य शल्यं पदार्धपादेन स रावणोनः।
उद्रां निधेरप्युदकैररोध्यः भियासृजोसावपृणद्द्विडस्ना॥ ६७॥

६७. स प्रसिद्धोसौ आहारिः प्रियमसृग् रुधिरं येषां तान् राक्षसान् द्विडस्ना शत्रुरक्तेनापृणदप्रीणयत्। कीदृक्। हृदा चेतसा दुष्टो मायावी। अत एव क्ष्माया हृदयं चित्तमेव हृदयं वक्षस्तस्य शल्यमिव शल्यं लोकानां हृदये निविष्टः शल्यमिव व्यथाकारीत्यर्थः। तथा स्वाभाविकबलेन विद्याबलेन चोद्रां जलानां निधेः समुद्रस्योदकैरप्यरोध्यो रोद्धुमशक्योत एव पदा चतुर्थभागेनार्धपादेनाष्टमभागेन वा रावणादूनो हीनो रावणोनः। सापेक्षत्वेपि गमकत्वात्समासः। रावणतुल्य इत्यर्थः। सोप्येवंविधः॥

लुलद्यकृत्युच्छकृति द्विडैभे प्रजुच्चदन्ते यमदद्भिरस्त्रैः।
समद्ययूषेण नु रक्तयूष्णा यक्नापशक्नामदयत्पिशाचीः॥ ६८॥

६८. स आहरिपू रक्तयूष्णा रुधिररसेन मद्ययूषेण नु सुरारसेनेव तथापगतं निर्गतं शकृद्विष्ठा यस्मात्तेन यक्ना कालखण्डेन पिशाचीर्व्यन्तरीविशेषानमदयन्मत्तीचक्रे। यतो यमदद्भिरतिरौद्रत्वात् शत्रूणां मृत्युहेतुत्वाच्चान्तकदन्ततुल्यैरस्त्रैः कृत्वोच्चदन्त उन्नतदशने द्विडैभे शत्रूणां गजौघे प्रन्प्रहरन्। अत एव किंभूते द्विडैभे। लुलत्तीव्रप्रहारवशात्पतद्यकृत्कालेयं यस्य तस्मिन्। तथा भयेनोद्गतं शकृद्विष्ठा यस्य त-

---

१ एफ् °स्माद्विमी°. २ सी ६७ प्र°. ३ एफ् °तुर्मागे°. ४ एफ् °महाभा°. ५ एफ् °मासेरा°. ६ सी °वणेतु° डी °वणेन तु°. ७ बी °सेणम°. ८ एफ् °ल्यैः शस्रैः. ९ सी उक्रत°. डी उच्चैः कृत°. १० एफ् प्रन्हर°.

स्मिन् । शत्रुसैन्यानि हत्वा तेषां रक्तेन[1] मांसेन च कृत्वासौ पिशाचीरपोषयदित्यर्थः । लुकदित्यत्र लुको धातोर्भक्षिकादित्वात् [२.३.१०४] डस्य लः । लुकिशि धात्वन्तरं के चित् ॥

गिरा स्फुरन्नासिकया न्यकार्षीन्नसीतदृष्टिं द्विपदीः सृजन्तम् ।
वैयाघ्रपद्यं द्विपदीयबुद्धिं तीर्थे पदां स द्विपदाममित्रः ॥ ६९ ॥

६९. स ग्राहरिपुर्व्याघ्रस्येव पादावस्य व्याघ्रपान्मुनिस्तस्य वृद्धमपत्यं[2] गर्गादित्वाद्यञि [६.१.४२] वैयाघ्रपद्यं मुनिं स्फुरन्त्यवज्ञया मुंटन्ती[3] नासिका यस्यां तया गिरा दुर्वाक्येन न्यकार्षीन्निर्भर्त्सितवान् । ननु वैयाघ्रपद्येनापि कायस्य[4] वाचो मनसो वा तदनभीष्टकुव्यापारेणायमपराद्धो भविष्यति । नेत्याह । महायोगित्वान्नसि नासिकायामिते प्राप्ते दृष्टी यस्य तमितदृष्टिम् । एतेनास्य कायकुव्यापारनिवृत्तिरुक्ता । तथा द्वौ पादौ यासु ता द्विपदीर्गाथाविशेषान् सृजन्तं कुर्वन्तम् । एतेन वचः कुव्यापारनिवृत्तिरुक्ता । तथा द्वौ पादौ यस्यासौ द्विपान्मनुष्यस्तस्मै हिता द्विपदीया सा बुद्धिश्चेतोवृत्तिर्यस्य तम् । एतेन मनःशुद्धि-[5]रुक्ता । तर्हि किमित्येवं[6] न्यकार्षीदित्याह । यतस्तीर्थे प्रभासादिपुण्यक्षेत्रे विषये पदां पद्यमानं गच्छन्तं जनमुपदेशदानेन प्रयुञ्जानानां[7] णिग्[8] । किम् । द्विपदामुक्तासाधारणविशेषणान्मुनीनाममित्रः[9] शत्रुः ॥

द्विपात्सु दुष्टेनुपपादुकेस्मिन्वृत्तानि बिभ्रत्यतिगूढपान्दि ।
लोकाच्चतुष्पाद्यति चैकपादितादप्यपाद्येत कथं न धर्मः ॥७०॥

[10] ७०. धर्मः कथं नापाद्येत । अत्र पादसमानार्थः पाच्छब्दः । अवि-

१ सी डी एफ् °रा स्फर°. २ एफ् °पद्यी स्र°.

१ ए बी सी एफ् °तो क्षफि°. २ एफ् °नि स्फर°. ३ एफ् मुदन्ती. ४ बी °स्य कु°. ५ सी डी मतेः शु°. ६ बी °त्रेवं न्य° एफ् °त्येनं न्य°. ७ एफ् °आनां. ८ बी एफ् णिच् ।. ९ ए °मित्रं श°. १० सी डी ७० क°.

घमानः पावरणो यस्य सोपात्पङ्गुः । स इव कथं नाचरेत् । क । सत्यस्मिन् ग्राहारौ । किंभूते । अनुपपादुकेनुपपदनशीलेनुपपन्ने । कार्याकार्यविचाररहित इत्यर्थः । अत एव द्विपात्सु नृषु विषये दुष्टे वधकाभिप्रायेत एव च लोकः कर्मतापन्न एकं पादं भागमाख्यायते स्म णिचि के चैकपादितस्तस्मादपि लोकाच्चतुष्पाद्यति । पादसमानार्थः पाच्छब्दोत्र । ततश्च चतुष्पाच्चतुर्णां पदां भागानां समाहारमिच्छति विश्वासनाय चतुर्थं भागं ग्रहीष्यामीत्युक्तादपि लोकाच्चतुरोपि भागान् ग्रहीतुकाम इत्यर्थः । अत एव चातिगूढपान्दि गूढपादं सर्पमपि रौद्रत्वेन कौटिल्येन चातिक्रान्तानि वृत्तानि लोकदण्डनादीनाचारान् बिभ्रति । कलिमाहात्म्यात्तावदधुना धर्म एकपादेनैवावतिष्ठते । महापापिष्ठेन ग्राहरिपुणा[2] तु धर्मैकपादस्याप्युच्छेदितत्वाद्धर्मः पङ्गुरेवाभूदित्यर्थः । चः पूर्ववाक्यार्थापेक्षया समुच्चये ॥

मासा मासेन । निशि निशासु । आसनि आसनाय । इत्यत्र "मास°" [१००] इत्यादिना लुगन्तादेशो वा ॥

दद्भिः दन्तैः । पदा पादेन । नसि नासिकया । हृदा हृदयस्य । ह्रिडक्का ग्रियासृजः । यूष्णा यूषेण । उद्नाम् उदकैः । दोष्णः दोषि । यक्ना यकृति । शक्ना । उष्छकृति । इत्यत्र "दन्तपाद°" [१०१] इत्यादिना ददित्याद्यादेशा[3] वा ॥

वैयाघ्रपद्यम् । द्विपदाम् । द्विपॅदीः[4] । द्विपदीय । पदाम् । इत्यत्र "यस्वरे°" [१०२] इत्यादिना पद् ॥ यस्वर इति किम् । द्विपात्सु ॥ अणिक्यधुटीति किम् । एकपादितार्त्[5] ॥ क्येति क्यन्क्यङोरविशेषेण ग्रहः । चतुष्पाद्यति । अपाद्यैत्[6] । धुटि । गूढपान्दि । नाम्न इत्येव । अनुपपादुके ॥

१ सी डी °पन्नमेकं. २ सी डी °णा तु ध°. ३ एफ् °देशः ।. ४ डी °पदीय ।. ५ बी एफ् °त्र । अतिगूढपान्दि । क्ये°. ६ बी एफ् °त । ना°.

कृत्वा तिरश्चो नु पुरः पदाचोपाच्यानुदीच्यान्स नृपानहंयुः ।
भ्रुवाप्युदीच्यैति हृदाप्युदीचा दिवं जिगीषुर्नृपतिः प्रतीच्याः ७१

७१. स प्रतीच्याः पश्चिमदिशः पतिर्ग्राहरिपुरपाच्यान्दक्षिणदेशसंबन्धिन उदीच्यानुत्तरदेशसंबन्धिनश्च नृपांस्तिरश्चो न्वजादिपशूनिव पुरोग्रतः पदाचः पादचारिणः कृत्वा भ्रुवाप्युदीच्योत्पाटितया हृदापि चेतसा चोदीचोत्पाटितेनैति गच्छति[1] । यतोहंयुरनेकनृपपदातिभावनयनेन संजातस्वबलवीर्यसंपत्त्युत्कर्षाद्गर्वोध्मातः[2] । गर्वाध्मातत्वात्कमपि चक्षुषा नेक्षते चेतसा न स्मरति चेत्यर्थः । उत्प्रेक्ष्यते । नायं गर्वातिरेकादुत्पाटितभ्रूहृदयः किं तु दिवं स्वर्गं जिगीषुर्नु । यो हि यज्जिगीषति स तदभिमुखं मनश्चक्षुश्च निक्षिपति ॥

उदीच्यान् । उदीचा । उदीच्या । इत्यत्र "उदच उदीच्" [१०३] इत्युदीच् ॥

अपाच्यान् । पदाचः । प्रतीच्याः । इत्यत्र "अच प्राग्दीर्घश्च" [१०४] इति चादेशः प्राग्दीर्घश्च ॥ अन्वाचयशिष्टत्वाद्दीर्घत्वस्य[3] तदभावेपि चादेशः स्यात् । तिरश्चः ॥

विदुष्मतः पुंविदुषोप्यधर्मोपेयुष्मतः पापनिषेदुषोस्य ।
रौद्रात्त्ववैदुष्यजुषोतिभाराद्विषेदुषी क्ष्मा विदुषी चरित्रम् ॥ ७२ ॥

७२. अस्य ग्राहरिपोरतिभाराद्विषेदुषी विषण्णा दुःखिता सती क्ष्मास्य चरित्रं पापस्वरूपं वृत्तं विदुषी ज्ञात्री[4] । एतन्महापापभराक्रान्ता पृथ्व्येवैतद्दुर्वृत्तं जानाति नान्यः कोपीत्यर्थः । यतो विद्वांसो भूम्रा सन्त्यस्य तस्य विदुष्मतोपि । अपिरत्रापि योज्यः । अधर्मोपेयिवांसोधर्ममुपगताः[5] पापिष्ठाः प्रशस्याः सन्त्यस्य तस्याधर्मोपेयुष्मतः प्रभूत-

---

१ बी °दीच्योत्पा°. २ एफ् °ध्मातत्वा°. ३ एफ् °चवशि°. ४ डी ज्ञातवती । ए°
५ बी एफ् °मुपाग°.

विद्वत्सङ्गमेपि पापिष्ठजनसङ्गनिरतस्येत्यर्थः । अतश्च पुंविदुषोपि नृपु मध्ये जानतोपि पापनिषेदुषः पापेन्यायकर्माणि तस्थुषः । विद्वज्जनसङ्गत्या[1] धर्माधर्मादिविवेकं जानतोपि पापिष्ठजनसङ्गातिप्रसङ्गेन पापकर्मनिरतस्येत्यर्थः । तथा रौद्राणि भीष्माणि रुद्रदैवतानि वा यान्यस्त्राणि[2] शस्त्राणि तद्विषयं वैद्वुष्यं[3] नैपुण्यं[4] तज्जुषते सेवते यस्तस्य । रौद्रास्त्रबलिष्ठत्वात्पापकर्मणः केनापि निवर्तयितुमशक्यस्य[5] चेत्यर्थः ॥

वैदुष्य । विदुषः । विदुषी । निषेदुषः । निषेदुषी । विदुष्मतः । उपेयुष्मतः । इत्यत्र "क्सुष्मतौ च" [१०५] इत्युष् ॥

नृशंसतारण्यशुनोस्य यूनो जिघृक्षतो माघवनीं नु लक्ष्मीम् ।
मतिः शुनीपुच्छनिभातियूनी शल्यं मघोनीं भजतो मघोनः ॥७३॥

७३. यूनस्तरुणस्यास्य ग्राहरिपोर्नृशंसतया[6] क्रूरत्वेनारण्यशुनो वृकतुल्यस्य सतो मतिरस्ति । किंभूता । अतियूनी युवानमतिक्रान्ता । युवा हि प्रायो यौवनेन मदोद्धतः स्यात्तस्मादपि मदोद्धतेत्यर्थः । शुनीपुच्छनिभा कुर्कुरीपुच्छवत्कुटिला च । उत्प्रेक्ष्यते[7] । नास्य मतिर्मदेनोत्ताना वक्रा च किं तु माघवनीं शक्रसत्कां लक्ष्मीं जिघृक्षतो नु[8] ग्रहीतुमिच्छोरिव । यो ह्युच्चतर्वादिस्थं फलं जिघृक्षति तस्योच्चफलोत्तारणायोत्ताना वक्राचाकुटयष्टिः[9] स्यात् । अत एव मघोनीं शचीं भजतोपि । अपिरत्र ज्ञेयः । मघोन इन्द्रस्य शल्यं रतिसुखसागरावगाहकालेपीन्द्रस्य तन्मतिर्हृदयस्था शल्यमिव दुःखाकरोतीत्यर्थः[10] ॥

---

१ एफ् सङ्गति°. २ सी °णि त°. ३ सी डी यद्विदु°. ४ एफ् नैः पु°. ५ एफ् निर्वर्तयि°. ६ एफ् शंसंसतारण्यशुनो नृसंशत°. ७ ए °त्प्रेक्षते. ८ एफ् नु गृही°. ९ एफ् °क्रा च कुट. १० बी एफ दुःखं क°.

स यौवनाच्छौवनमत्तताभृल्लोलो युवत्यां मघवत्यभीरुः ।
कीलालपेष्वा विनिहत्य राज्ञो राज्ञीरुदस्रा निदधेवरोधे ॥ ७४ ॥

७४. स आहारिः कीलालपेष्वा रक्तं पिबता शरेण राज्ञो विनिहत्य तेषां राज्ञीरुदस्राः कष्टाद्रुदतीः सतीरवरोधेन्तःपुरे निदधे । यतः कीदृक् । यौवनाद्यूनो विकाराद्धेतोः शौवनमत्तताभृत् । शुन इयं शौवनी या मत्तता मदस्तां बिभर्ति यः सः । श्वेव मदनोन्मादीत्यर्थः । अत एव युवत्याम् । जातावेकवचनम् । युवतिषु लोलो लम्पटः । तथा मघवत्यपि । अपिरत्र ज्ञेयः । इन्द्रस्यशक्त्यादिभ्योपीत्यर्थः । अभीरुर्महाशक्तित्वात् ॥

शुनी । शुनः । अतियूनी । यूनः । मघोनीम् । मघोनः । इत्यत्र "श्वन्°" [१०६] इत्यादिना वस्य उः ॥ ङीस्याद्यघुट्स्वर इति किम् । शौवनं । यौवनात् । माघवनीम् ॥ नकारान्तनिर्देशादिह न स्यात् । युवत्याम् । मघवति । मघवदिति प्रकृत्यन्तरं शक्रवाचकम् ॥

कीलालप । इत्यत्र "लुगातोनापः" [१०७] इत्यातो लुक् ॥ अनाप इति किम् । उदस्राः ॥

राज्ञीः । राज्ञः । इत्यत्र "अनोस्य" [१०८] इत्यनोतो लुक् ॥

साम्नीव साम्नी इह तास्णवार्भ्रग्रस्थामनी राजनि धार्तराज्ञे ।
दुष्कर्मणि स्वर्वणि वीक्ष्य भूम्ना मूर्ध्ना न केघप्रतिदीम्नि नेमुः ॥७५॥

७५. अघप्रतिदीम्न्यप्यघस्य पापस्य प्रतिदीम्नीव दिवसतुल्ये पापे-

---

१ एफ् दुःकर्म°.

---

१ सी डी °दतीर°. २ सी डी °न मा°.

कप्रवर्तकेपीत्यर्थः । धार्तराज्ञे धृता राजानो येन स धृतराजा आहारि-पिता तस्यापत्य इह राजनि आहारौ भूम्ना बाहुल्येन मूर्ध्ना कृत्वा के न नेमुः । यतः स्वर्वणि शोभनाश्वे । एतेन सैन्यसंपदुक्तिः । तथा दु[1]ष्क-र्मणि निस्त्रिंशक्रिये । तथा किं कृत्वा । इह निरीक्ष्य । के । ताक्ष्णवार्त्रघ्नस्था-मनी । तक्ष्णो देववर्धकेरपत्यं ताक्ष्णो वृत्रासुरः । तथा वृत्रघ्नो वज्रिणोपत्यं [2]वार्त्रघ्नोर्जुनः । द्वन्द्वे तयोः स्थामनी पराक्रमौ । वृत्रासुरार्जुनयोरिवाखिल-जगज्जैत्रं बलमत्रालोक्य चेत्यर्थः । यथा साम्नि सामवे[3]दे आधारे साम्नी रथंतरबृहद्रथंतराख्यौ सामविशेषौ जिज्ञासादिना के चिन्नि[4]रीक्षन्ते । एतेनाघप्रतिदीम्न्यपि तस्मि[5]न्सर्वेपि नेमुस्तत्रास्य सैन्यसंपन्निस्त्रिंशताति-बलवत्ताजनितं भयमे[6]व हेतुर्नान्तरङ्गो बहुमान इत्युक्तम् ॥

साम्नी । स्थामनी । साम्नि । राजनि । इत्यत्र "ईङौ वा" [१०९] इति वा-नोतो लुक् ॥

ताक्ष्णं । वार्त्रघ्न । धार्तराज्ञे । इत्यत्र "षादिहन्°" [११०] इत्यादिनातो लुक् ॥

स्वर्वणि । दुष्क[8]र्मणि । इत्यत्र "न वमन्त[9]°" [१११] इत्यादिनानोतो न लुक् ॥ संयोगादिति किम् । प्रतिदीम्नि । भूम्ना ॥ वमन्तेति किम् । मूर्ध्ना ॥

द्विजान्क्षतघ्न्यात्र मखघ्नि पृ[1]थ्वीप्लीह्नि घ्नति द्राक्स्पृहयन् हविर्भ्यः ।
अद्यैव मन्ये क्षुधितो बलारिः सृष्टिं धिगस्मिन् कुमतौ विधातुः ॥७६॥

---

१ एफ् पृथ्वीं प्ली°.

---

१ एफ् दुःकर्म°. २ ए वार्त्रांघ्नो°. सी वार्वाघ्नो°. ३ ए सी डी °वेदे सा°. ४ बी °रीक्ष्यन्ते. डी °रीक्षेते. ५ बी सी डी °स्मिन्यत्सर्वे°. ६ सी डी °मेक एव. ७ सी डी °क्ष्ण धा°. ८ एफ् दुःकर्म°. ९ एफ् °न्तसंयोगादिति नो°.

७६. प्लीहोदररोगभेदः। पृथ्व्याः प्लीहि प्लीहव्याधिवज्जनानां दुःख-केत्र[1] ग्राहरिपौ शतघ्न्यायुधविशेषेण द्विजान् द्राग् प्रति हिंसत्यत एव मखघ्नि यागोच्छित्तिकारिणि सति मन्येहमद्यैव सांप्रतमेव न त्वग्रेपि बलारिरिन्द्रः क्षुधितः। यतो हविर्भ्ये इन्द्रोद्देशेन संप्रदेयमपूतेहव्यव[2]-स्तुभ्यः स्पृहयन्। तस्मात्कुमतौ पापबुद्धावस्मिन् ग्राहरिपौ विषये विधातुः स्रष्टुः सृष्टिं[3] निर्माणं धिग्गर्हामहे॥

शतघ्न्या। मखघ्नि। प्रति। इत्यत्र "हनो घ्नो घ्र्" [११२] इति घ्र्॥ हन इति किम्। प्लीहि॥

स्पृहयन्। मन्ये। इत्यत्र "लुगस्य०" [११३] इत्यादिनास्य लुक्॥ अपद इति किम्। बलारिः अद्यैव॥

कुमतौ। विधातुः। इत्यत्र "क्तिलन्त०" [११४] इत्यादिनान्त्यस्वरादेर्लुक्॥

भाती प्रथिम्ना मदतो विभान्ती समुन्मिषन्ती मिषती यमेन।
गलिष्यती द्यां नु भुवं गलिष्यन्ती न्वस्य नेत्रे सदृशी तनुश्च॥७७॥

७७. अस्य ग्राहरिपोर्नेत्रे सदृशी समाने प्रस्तावात्तन्वा। तनुश्च मूर्तिः सदृशी समाना प्रस्तावान्नेत्राभ्याम्। तथा हि नेत्रे तावत्प्रथिम्ना विस्तारेण भाती शोभमाने। तथा मदतः क्षीबतया घूर्णमानत्वारक्त[4]-त्वादिनेत्यर्थः। विभान्ती तथा समुन्मिषन्ती मदवशादेवान्तरान्तरा[5] विकरालं विकसन्ती[6]। अत एव यमेन सह मिषती स्पर्धमाने यमवद्भीष्मे इत्यर्थः। अत एवोत्प्रेक्ष्यते। न स्वभावतो यमेन मिषती किं तु द्यां स्वर्गं गलिष्यती नु संहरिष्यमाणे इव तथा भुवं गलिष्यन्ती नु। तनुरपि प्रथिम्ना स्थौल्यजनितविस्तारेण भाती तथा मदतोहंकारात्स्फु-

१ डी दुःखकेत्र altered into दुःखकारकेत्र. २ सी °तहतव्य°. डी °तहोतव्य°. ३ एफ् सृष्टिर्निर्मा°. ४ डी °नत्वर°. ५ सी °रालं विककारस°. एफ् °रा विकारा°. ६ डी °रालम्विविकारमन्ती।.

रसकुसुमामोदात एव समुन्मिषन्त्युच्छसन्ती । शेषविशेषणानामर्थ एवमेवेति प्राग्वत् ॥

यदास्य पार्श्वे धुनती दलन्ती स्यन्ती परांश्चापलताथ तूणे ।
तदैव सा द्यौर्दिविषत्सु मुक्तद्युषु द्युसद्भ्यूर्भवेत्कथं नु ॥ ७८ ॥

७८. यदास्य ग्राहारेः पार्श्वे चापलता स्यात् । कीदृक् । धुनती ज्याकर्षवशेन कम्पमाना तथा परान् शत्रून् दलन्ती शरक्षेपिकात्वेन विदारयन्ती स्यन्ती परानेवान्तं नयन्ती च । अथ तथा यदा तूणे तूणीरौ धुनती शराकर्षवशात्कम्पमाने शरक्षेपहेतुत्वात्परान् दलन्ती स्यन्ती च स्यातां तदैव दिविषत्सु मुक्तद्युषु भयवशात्त्यक्तस्वर्गेषु सत्सु द्युसदो देवान् दीव्यतीच्छति क्विपि ऊटि च द्युसद्भ्यूर्देवानिच्छन्ती स[२]। सा दीव्यति क्रीडति देवैरित्यन्वर्थेन प्रसिद्धा द्यौः स्वर्लोकः कथं न्वद्यौ-द्यौर्भवेत् द्युभवेदीव्यति देवैरित्यन्वर्थयुक्ता कथं नाम स्यात् । न स्या-देवेत्यर्थः ॥

समुन्मिषन्ती । मिषती । गमिष्यन्ती गमिष्यती । विभान्ती भाती । अत्र "अवर्णाद्°" [११५] इत्यादिना वातुरन्तादेश ईङ्योः ॥ अत्र इति किम् । धुनती ॥

स्यन्ती । दलन्ती । अत्र "श्यशवः" [११६] इत्यतुरन्तादेशः ईङ्योः ॥

द्यौः । इत्यत्र "दिव औः सौ" [११७] इत्यौः ॥ "निरनुबन्धग्रहणे न सा-नुबन्धकस्य" [न्या० सू० ३२] इति धातोर्न स्यात् । द्युसद्भ्यूः ॥

मुक्तद्युषु । द्युसद् । इत्यत्र "उः[३]" [११८] इत्यादिना उः ॥ पदान्त इति किम् । दिविषत्सु ॥ अनूदिति किम् । द्यु भवेत् । अत्र "दीर्घश्च्वि°" [४.३.१०८] इत्यादिना च्वौ दीर्घत्वं न स्यादेव ॥

पञ्चमः पादः ॥

१ बी °य यथा. २ एफ् °न्ती सा. ३ सी डी द ॥ इति श्रीप°. एफ् द ॥
इति पञ्चमः पादः समर्थितः समाप्तः ॥.

महैनसां कारकवत्क्रियाणां हेतुः स्वतन्त्रः स कुकर्म कर्ता।
विश्वं ततापाट दिशो ललङ्घेऽब्धीनास दुर्गाणि भयं न लेभे ॥ ७९॥

७९. स ग्राहरिपुर्विश्वं ततापोद्वेजितवान्। कीदृक्सन्। स्वतन्त्रः सर्वोत्कटत्वात्कस्याप्यनायत्तः। तथा कुकर्म द्रोहवञ्चनादिकां निन्द्यां क्रियां कर्ता स्वयं कुर्वन्। तथा कारकवत्। यथा कारकं कर्त्रादि क्रियाणां धात्वर्थानां पाकादीनां हेतुस्[1]तथा महैनसां महापापानां द्रोहवञ्चनादीनां हेतुः। अन्यैरपि महापापानि कारयंश्चेत्यर्थः। विश्वतापप्रकारानेवाह। आट दिशः। लोकलुण्टनाद्यर्थं सर्वाशा भ्रान्तवान्। तथा ललङ्घेऽब्धीन्। तथास दुर्गाणि। अद्रिकोट्टादिदुर्गस्थानानि बभञ्ज। दिक्षु पलायितो[2]प्यब्धौ दुर्गे वा प्रविष्टोपि न कोप्यस्माद्दैत्याच्छुटित इत्यर्थः। तथा भयं न लेभे। एवं वि[3]श्वं सन्तापयन् स्वतन्त्रत्वात्कस्मादपि न भीत इत्यर्थः। योपि कुकर्मरूपः कर्ता विधाता कुदैवं स्यात्सोपि स्वतन्त्रो महैनसां क्रियाणां हेतुः सन्दुर्भिक्षडमराद्युत्[4]पादनेन विश्वं लोकं[5] तपति। दिगब्धिदुर्गाण्याश्रय[6]न्नपि तस्मान्न छुटतीत्युक्तिः॥

केल्याप्यटन् भापयते स भूपान्वसूनि गां दोग्ध्यनुशास्त्यधर्मम्।
मुनींश्च सामाह रुणद्धि वृत्तिं न सत्पथं पृच्छति याचतेऽर्थम् ॥८०॥

८०. केल्यापि राजपाट्याप्यटन् गच्छन् स[7]न् स ग्राहरिपुर्भूपान् भापयते। राजपाट्यामप्येतावता बलेन याति याव[8]ताश्वखुरोत्खातधूलीधूसरिताम्बरोसौ नूनमस्मानास्क[9]न्तुमे[10]तीत्याश[11]ङ्कातङ्काकुलान्करोतीत्यर्थः। एतेन च्छद्मपरत्वं बलसंपदतिशयश्चोक्ते। तथा गां पृथ्वीं वसूनि द्रव्याणि दोग्धि क्षारयति। एतेनामुनोर्वी करपीडिता कृतेत्युक्तम्।

---

१ ए सी एफ् °स्तथैन°. २ एफ् °लायमानोप्य°. ३ सी डी °श्वं ताप°. ४ बी °त्पातने°. ५ एफ् °कं तापयति. ६ सी डी °न छु°. ७ एफ् स ग्रा°. ८ डी याव°. ९ एफ् °श्वखरो°. १० एफ् °स्कन्दयितुमे°. ११ एफ् °ङ्काकु°.

तथा गामेवाधर्मं पापमनुशास्ति शिक्षयति पापे व्यापारयतीत्यर्थः । तथा मुनीन्[१] साम मधुरवाक्यं नाह निर्भर्त्सयतीत्यर्थः । तथा मुनीनेव वृत्तिं भिक्षाचर्योञ्छादिकां जीविकां रुणद्धि निवारयति । तथा मुनीन् सत्पथं न्यायमार्गं न पृच्छति न कथापयतीत्यर्थः । तथा मुनीनर्थं द्रव्यं याचते ॥

रत्नानि रत्नाकरमुच्चिनोति निधीन् कुबेरं विजिगीषतेसौ ।
प्राणान्विपक्षैर्युधि भिक्ष्यते च स्वभर्तृभावं बत नीयते च ॥ ८१ ॥

८१. असौ ग्राहारी रत्नाकरं सागरं रत्नान्युच्चिनोति वियोजयतीत्यर्थः । एतेन कोशसंपदुक्तिः । तथा कुबेरं धनदं निधीन् निधानानि विजिगीषते । एतेन संपूर्णेपि कोशे तद्वृद्धौ निरुद्यमित्वनिरास उक्तः । तथासौ युधि विपक्षैः प्राणान्[२] भिक्ष्यते चास्मान् जीवतो मुञ्चेति जीवितव्यं याच्यते[३] च । एतेन पराक्रमित्वोक्तिः । तथा बतेति खेदे । विपक्षैरेवासौ स्वभर्तृभावमात्मस्वामितां नीयते चात्मनः[४] स्वामी क्रियत इत्यर्थः । एतेन प्रभु[५]संपदुक्तिः । एतेन सर्वेणा[६]स्य दुःसाध्यत्वोक्तिः ॥

जह्रेन्यदारान् स्वपुरीं दशास्यो गां कार्तवीर्यो यतिनं मुमोष ।
भ्रूणानकर्षद्भगिनीं च कंसोग्रहीत्किमेतानसकावनीतीः ॥ ८२ ॥

८२. दशास्यो रावणोन्यदारान् रामभार्यां सीतां[७] स्वपुरीं लङ्कां जह्रे निनाय । तथा कार्तवीर्यः सहस्रार्जुनो यतिनं जमदग्निं गां कामधेनुं मुमोषापजहार । तथा कंसः कंसाख्यो[८] दैत्यो भगिनीं देवकीं भ्रूणान् गर्भानकर्षद्देवकीपार्श्वादुद्धार्य भ्रूणान् गृहीतवानित्यर्थः । कं-

१ सी डी °नीने°. २ एफ् °न् विमक्ष्य°. ३ ए सी डी °ते । ए°. ४ सी डी °त्मनं स्वा°. ५ एफ् °भुत्वमं°. ६ एफ् °वेंण प्रकारेणा°. ७ ए सी डी °तां ल°. ८ सी °ख्यो ग.°

सस्य पितोग्रसेनो देवकीपिता देवकश्च भ्रातराविति कंसभगिनीत्वं देवक्याः । एतान्दशास्यादीननीतीरन्यदारापहारादिकानन्यायानसकौ ग्राहारिः किमग्रहीत् । एषां पार्श्वादेता अनीतीः किमसौ जग्राहेत्यर्थः । एतासां सर्वासामप्यनीतीनामत्र दर्शनादेवमाशङ्का ॥

गजाश्वगाः सिन्धुपतिं ममन्थ महीभृतो भेदमुवाह चेत्थम् ।
इन्द्रं गुणान्दण्डितवान्नु कालं स घातयामास न तेन कालः ॥८३॥

८३. स ग्राहारिः सिन्धुपतिं सिन्धुदेशाधिपं गजाश्वगा हस्तितुरङ्ग-वृषभान्ममन्थं मथित्वाग्रहीद्दण्डितवानित्यर्थः । तथा महीभृतो नृपान्भेदं संहत्यभावमुवाह च प्रापितवानन्याञ्नृपान्कूटप्रयोगेण भेदितवानित्यर्थः । इत्थमनेन प्रकारेणेन्द्रं शक्रं गुणान् सिन्धुपतिमन्थनादीन् धर्मान् दण्डितवान्नु किं हठाज्जग्राह । इन्द्रो हि सिन्धुपतिमब्धिमैरावणं गजमुच्चैःश्रवसमश्वं कामधेनुं गां च ममन्थ । तथा महीभृतोद्रीन्भेदं पक्षच्छेदमुवाह । एते चेन्द्रगुणा अत्रापीक्ष्यन्त इत्येवमाशङ्का । तथा स कालं यमं घातयामास । कर्माविवक्षायां जघान कालः । तं जघ्निवांसं स प्रयुयुजे युद्धादिविधानेन सं सर्वं घातितवानित्यर्थः । न तु कालः कर्ता तेन ग्राहरिपुणा प्रयोज्यकर्त्रा घातयामास । हनने कालस्यापि स प्रयोक्ता न तु तस्य काल इत्यर्थः । इदमुक्तं स्याद्यत्रायं रुष्टस्तमसमयेपि यमो हन्ति यत्र त्वयं प्रसन्नस्तं समयेपि यमो दूरान्नमस्करोति ॥

क्रियाणां हेतुः कारकवदित्यनेन "क्रियाहेतुः कारकम्" [१] इति सूत्रं सूचितम् ॥

१ सी डी °वक°. २ सी डी °न्धुदे°. ३ एफ् °ङ्गमवृ°. ४ एफ् °न्थ अग्र° ५ बी °मथना°. ६ एफ् °तिमं°. ७ बी सर्व. ८ एफ् °त्र चायं.

स्वतन्त्रः कर्तेत्यनेन "स्वतन्त्रः कर्ता" [२] इति सूत्रं सूचितम् ॥ प्रयोजकोपि कर्तैवेति भापयते सः ॥

कर्मेत्यंशेन "कर्तुर्व्याप्यं कर्म" [३] इति सूत्रं व्याञ्जि । तत्कर्म त्रेधा। निर्वर्त्यं विकार्यं प्राप्यं च । निर्वर्त्यं यथा । कुकर्म कर्ता ॥ विकार्यं यथा । विश्वं ततापः ॥ प्राप्यं यथा । आट दिशः ॥ त्रिविधमप्येतत्पुनस्त्रिविधमिष्टमनिष्टमनुभयं च । तत्रेष्टम् । कुकर्मादि ॥ अनिष्टम् । अब्धीन् ललङ्घे । दुर्गाण्यास । भयं न लेभे ॥ अनुभयम् । केल्याप्यटन् भापयते स भूपान् ॥ पुनस्तत्कर्म द्विविधं प्रधानेतर-भेदात् । तच्च द्विकर्मकेषु धातुषु दुहि-भिक्षि-रुधि-प्रच्छि चिग्-ब्रूग्-शास्वर्थेषु याचि-जयति-प्रभृतिषु च भवति । दुह्यर्थे । वसूनि गां दोग्धि । भिक्ष्यर्थे । मुनीन् याचतेर्थम् । एवं मुनीन् रुणद्धि वृत्तिम् । मुनींश्च सत्पथं पृच्छति । रत्नानि रत्नाकरमुच्चिनोति। मुनींश्च सामाह । गामधर्ममनुशास्ति ॥ याचेरनुनयार्थस्योदाहरणं स्वयं ज्ञेयम् ॥ जयतिप्रभृति । निधीन् कुबेरं विजिगीषते । जह्रेम्यदारान्स्वपुरीम् । गां यतिनं मुमोष । भ्रूणानकर्षन्नगिनीम् । अग्रहीदेताननीतीः । गजाश्वगाः सिन्धुपतिं ममन्थ । महीभृतो भेदमुवाह । इन्द्रं गुणान्दण्डितवान् ॥ तत्र दुहादीनामप्रधाने कर्मणि कर्मजः प्रत्ययः । असौ प्राणान्विपक्षैर्भिक्ष्यते । नीप्रभृतीनां तु प्रधाने कर्मणि । असौ स्वभर्तृभावं नीयते ॥

कालं स घातयामास न तेन कालः । इत्यत्र "वाकर्मणाम्°" [४] इत्यादिनाणिगवस्थायां यः कर्ता स णौ सति वा कर्म ॥

सोजीगमत्स्वेदमिलां बलौघैरबोधयद्वाररुजं फणीन्द्रम् ।
अदर्शयत्कालपुरीमरातीनभोजयत्तत्पिशितं पिशाचान् ॥८४॥

१ सी डी सूचि°. २ एफ् °त्र व्यञ्जितम् । त°. ३ बी एफ् °ष्टमुभ°. ४ बी एफ् °भे । उभ°. ५ ए सी अर्थः । व°. ६ सी °लाक°. ७ ए सी °नीती । ग°. ८ एफ् °र्मजप्र°.

८४. स ग्राहारिर्बलौघैः कृत्वातिबाहुल्यादिलां महीं खेदं कष्टमजीगमत्प्रापितवान्। अत एव बलौघैः फणीन्द्रं शेषाहिं भाररुजं भारपीडामबोधयत्। तथा बलौघैरातीन्कालपुरीं संयमन्याख्यां यमपुरीमदर्शयत् व्यापादितवानित्यर्थः। अत एव पिशाचांस्तत्पिशितमभोजयत्। एतेन दिग्विजय उक्तः॥

आश्रावयन्निग्रहगर्भवाचं बन्दीकृतान्दण्डमवीवदत्सः।
संस्थापयन्वैरिशिरःसु पादं तेजोभिरुग्रैः कमपीपचन्न॥ ८५॥

८५. स ग्राहारिर्हठापहृता नरो बन्द्या अबन्द्या बन्द्याः कृताः बन्दीकृतास्तान्निग्रहगर्भा। यद्येतावन्न दास्यथ तदाहं युष्मान्मारयिष्यामीति विनाशप्रधाना। या वाक् तामाश्रावयन् शृण्वतः प्रयुञ्जानः सन् बन्दीकृतानेव दण्डमवीवदद्द्राणितवानङ्गीकारितवानित्यर्थः। एतेन म्लेच्छाचारोस्योक्तः। तथा वैरिशिरःसु पादं संस्थापयन् शत्रूनतिन्यक्कुर्वन्नित्यर्थः। स उग्रैः प्रचण्डैस्तेजोभिः प्रतापैः कर्तृभिः कं नापीपचत्कं नादीदहत्॥

स उज्जयन्ते चमरीर्मृगव्येष्वानाययन्नादयते श्ववृन्दैः।
आक्रन्दयन्खादयति प्रभासतीर्थाश्रमैणीरपि चित्रकायैः॥८६॥

८६. स ग्राहारिरुज्जयन्ते रैवतकाद्रौ मृगव्येष्वाखेटकेषु श्ववृन्दैः कुर्कुरौघैः कर्तृभिश्चमरीर्गोविशेषानानाययन्सन् श्ववृन्दैरेव कर्तृभिश्चमरीरादयते खादयति। तथा चित्रकायैर्द्वीपिभिः कर्तृभिः प्रभासतीर्थे य

१ सी आश्रव°.

१ सी स कारग्रा°. २ एफ् °रा अ°. ३ एफ् °तास्ता°. ४ डी °गर्भो य°. ५ डी °दद्रणि°. ६ ए सी डी °वानि°. ७ एफ् °दंस्था°. ८ बी °न् सन् श°. ९ सी डी °भिः ता°. १० एफ् कुकुरौ°.

आश्रमा मुनिस्थानानि तेषां या एण्यो मृग्यस्ता अपि । आसतां ताव-द्वनस्था मृग्यः प्रभासतीर्थाश्रमावस्थित्यातिपावित्र्याद्वध्या अपीत्यपेरर्थः । आक्रन्दयन् । क्रन्दिरत्रान्तर्भूतण्यर्थः सकर्मकः । तीर्थाश्रमैणीरप्याक्रन्दंत: कर्णाद्यवयवग्रहेणाराटयतश्चित्रकायान्प्रयुञ्जानः संश्चित्रकायैरेव कर्तृभिः प्रभासतीर्थाश्रमैणीरपि खादयति ॥

तदेवमस्यात्यपन्यायकारितामतिबलिष्ठतां च प्रतिपाद्याधुना कार्य-माह ।

शब्दायय ह्वायय माद्य दूतैस्तं भक्षयन्तं जगताप्यभक्ष्यम् ।
शारीर्द्विपान्वाहय वाहयाज्ञां तद्दण्डचण्डां ननु दण्डनेत्रा ॥८७॥

८७. तत्तस्माद्धेतोः । नन्विति संबोधने । हे राजन्नभक्ष्यं गोमांसादि कर्म जगताप्यास्तां तावदात्मना लोकेनापि कर्त्रा भक्षयन्तम् । उपलक्ष-णत्वादभक्ष्यभक्षणाद्यन्यायेषु जगदपि प्रवर्तयन्तं सन्तमित्यर्थः । तं ग्राहारिं दूतैः कर्तृभिर्मा शब्दायय मा वादय । तथा दूतैर्मा ह्वायय मा-कारय किं तु द्विपान् शारीर्हस्तिपर्याणानि वाहय । शारीर्धारयतो द्विपान् प्रयुङ्क्ष्व युद्धाय सन्नाहयेत्यर्थः । तथा दण्डनेत्रा सेनान्या कर्त्रा दण्डचण्डां तन्निग्रहरौद्रामाज्ञां वाहय प्रापय तं विनाशयेत्यर्थः ॥

गत्यर्थे । अजीगमत्स्वेदमिलाम् ॥ सामान्यबोधार्थे । अबोधयन्नारदं फणीन्द्रम् ॥ विशेषबोधार्थे । अदर्शयत्कालपुरीमरातीन् ॥ आहारार्थे । अभोजयत्तत्पिशितं पिशाचान् ॥ शब्दक्रिय । बन्दीकृतान्दण्डमवीवदत् ॥ शब्दव्याप्य । आश्रावयन्वाचं बन्दीकृतान् ॥ नित्याकर्मक । संस्थापयन् पादम् ॥ इत्यत्र "ग-

१ एफ् °चण्डी न°.

१ ए °न्दतीः क°. २ एफ् °त्यन्या°. ३ एफ् °चण्डी त°. ४ सी °त्यर्थः । अ°. ५ ए एफ् °धार्थः । अ°. ६ एफ् °धार्थः । अ°. ७ सी एफ् °रार्थः । अ°. ८ ए सी °मकः । सं°.

तिबोध[1]" [५] इत्यादिनाणिकर्ता णौ कर्म ॥ गत्यर्थादीनामिति किम् । तेजोभिः कं नापीपचत् ॥ नयत्यादिवर्जनं किम्[2] ॥ श्ववृन्दैश्चमरीरानाययन्[3] । चित्रकायैरेणीः खादयति । श्ववृन्दैश्चमरीरादयते । दूतैस्त्वं मा ह्वायय[4] । दूतैस्त्वं मा शब्दायय । चित्रकायैरेणीराक्रन्दयन्[5] ॥

"भक्षेर्हिंसायाम्" [६] इत्यत्र हिंसायामेवेति नियमोऽहिंसायामणिकर्तुः कर्मसंज्ञाप्रतिषेधफल एवेत्यस्य[6] सूत्रस्य जगताप्यभक्ष्यं भक्षयन्तमिति कर्मव्यावृत्त्युदाहरणमेव दर्शितम् ॥

शारीर्द्विपान्वाहय । इत्यत्र "वहेः प्रवेयः" [७] इत्यणिकर्ता प्रवेयो णौ कर्म ॥ प्रवेय इति किम्[8] । दण्डनेत्राश्वां वाहय ॥

ननु यदि प्राहारिर्मिहापन्याय्यभक्ष्यभक्षणाद्यन्याये जनमपि प्रवर्तयति तदा तस्यैव दोषो नास्माकमिति राजा मा वोचदित्याह ॥

विहारयेद्यो जनतां कुवर्त्म विहारयेन्मृत्युपथं हि तेन ।
अहारयंस्तं किल दण्डमीशः स्वं हारयेद्धर्ममघेन तस्य ॥ ८८ ॥

८८. यः कोपि जनतां जनौघं कुवर्त्मान्यायमार्गे विहारयेद्भ्रमयेत्तेन कर्त्रा हि स्फुटमीशः समर्थो मृत्युपथं मरणं विहारयेन्मृत्युपथं[10] विहरन्तं तं प्रयुञ्जीत गमयितुमर्हतीत्यर्थः । एतदेव व्यतिरेकेण[11] द्रढयति । किलेत्याप्तवादे । आप्ता[12] एवं वदन्ति । यो जनतां कुवर्त्म विहारयेत्तं[13] नरं दण्डं निग्रहमहारयन्नप्रापयन्नीशः समर्थस्तस्य जनतां कुवर्त्म विहारयितुरघेन पापेन कर्त्रा स्वमात्मीयं धर्मं हारयेच्चोरयेत्[14] । एतेन यदि त्व-

१ एफ् °बोधाहारार्थेत्या°. २ सी डी °म् । चम°. ३ एफ् °यत् । चि°. ४ ए °य । चि°. ५ एफ् °णीरक्र°. ६ सी डी °स्य ज°. ७ बी °न्वाहेत्य°. ८ एफ् °म् । ने°. ९ एफ् °हान्या°. १० एफ् °रयन्मृ°. ११ सी डी एफ् °णदृढ°. १२ सी डी आप्त एव वदति. १३ एफ् °येद्भ्रमयेत्तं°. १४ सी डी °येत् वार°. एफ् °येत् १७.

मीशः सन् पापिष्ठमेतं जगत्पापे प्रवर्तयन्तं न निग्रहीष्यसि तदैत-त्पापेन त्वमपि ग्रहीष्यस इत्युक्तम् ॥

एवमसावनिगृहीतः परलोकेहित इत्युक्त्वा यथेह लोकेप्यहित-स्तथाह ॥

अप्यन्तकं स्थाम निकारयेत्स निकारयेस्तं यदि नात्मदण्डैः ।
उपेक्षिताः स्वं ह्यविकारयद्भिः सद्भिः खलाः कैर्न विकारयेयुः ॥८९॥

८९. यदि त्वं तं ग्राहारिमात्मदण्डैः स्वसैन्यैः कर्तृभिर्न निकारये-र्निग्रहेण न तिरस्कारयसि तदा स ग्राहारिः स्थाम बलेनान्तकमपि । आसतामन्ये युष्मादृशा नृपाः । सर्वत्रास्खलितबलं यममपि निकारये-द्ग्राहरिपुः स्वस्थामान्तकं निकुर्वत्प्रयुञ्जीत । स्वस्थाम्ना यममपि पराभ-वेदित्यर्थः । संभावने सप्तमी । एतेनास्मिन्ननिगृहीते महारोगवद्वर्धमानेसा-ध्यतां गते त्वमपि विनङ्क्ष्यसीत्युक्तम् । एतदेवार्थान्तरन्यासेन दृ(द्र)ढयति । हि यस्माद्धेतोः स्वमात्मानमविकारयद्भिः । अविकुर्वाणं स्वं प्रयुञ्जानैरवि-कृतीभवद्भिरित्यर्थः । सद्भिरुपेक्षिताः सन्तः खला दुर्जनाः कैः कर्तृभिर्न विकारयेयुः कान्विकुर्वाणान्न प्रयुञ्जीरन् । किं तु सर्वानपि स्वपदप्र-च्यावनादिना विकृतान्कुर्युरित्यर्थः ॥

विहारयेज्जनतां कुवर्त्म । विहारयेन्मृत्युपथं तेन । इत्यत्र गत्यर्थत्वात्प्राप्तौ । स्वमविकारयद्भिः । कैर्न विकारयेयुः । इत्यत्राकर्मकत्वात्प्राप्तौ । अहारयंस्तं दण्डम् । हारयेद्धर्ममघेन । अन्तकं स्थाम निकारयेत् । दण्डैस्तं निकारयेः । इ-त्यत्र चाप्राप्तौ "हृक्रोर्न वा" [८] इत्यणिकर्ता णौ कर्म वा ॥

१ बी स्थाम्ना य॰. २ सी डी ॰नक्ष्यसी॰. ३ ए ॰णं स्वयं प्र॰. सी एफ् ॰णं स्वप्र॰. ४ बी ॰कृतैर्मव॰. ५ एफ् ॰रयेयुरित्य॰. ६ सी डी ॰सौ । आहा॰. ७ एफ् ॰येरित्य॰.

एवं च दण्डमवश्यकार्यतयोक्त्वा तत्प्रतिकूलां क्षमां निरसिंस्तद्धेतुं रुषं वृत्तद्वयेन[२] कार्यामाह ।

दुर्नीतिभिर्दर्शयमानमेतमद्यापि किं दर्शयसे प्रसन्नः ।
मा मायिनं जात्वभिवादयस्व न्याय्यैर्नयज्ञा ह्यभिवादयन्ते ॥९०॥

९०. हे राजन्नद्याप्येतन्निग्रहोचितकाल उपस्थितेप्येतं प्राहारिं त्वं प्रसन्नो नीरोषः सन् किं दर्शयसे । एष त्वां प्रसन्नं पश्यति जानाति तं पश्यन्तं त्वमेवानुकूलाचरणेन किमिति प्रयुङ्क्षे । अस्मिन्प्रसन्नं स्वं मा दर्शयेत्यर्थः[३]। यतः किंभूतमेतम् । दुर्नीतिभिः कर्त्रीभिर्दर्शयमानं दुर्नीतीरेतं पश्यन्तीरेतमेवानुकूलाचरणेन प्रयुञ्जानमपन्यायाश्रयमित्यर्थः । तथैनं मायिनं छद्मपरं सन्तं जातु कदा चिदपि माभिवादयस्व । एतं त्वां माययाभिवदन्तं प्रणमन्तं त्वमेवानुकूलाचरणेन मा प्रयुङ्क्ष्व । हि यस्माद्धेतोर्नयज्ञा नीतिवेदिनो न्याय्यैर्न्यायिभिः कर्तृभिरभिवादयन्ते न्याय्यानभिवदतः प्रणमतोनुकूलाचरणेन प्रयुञ्जते नान्याय्यानिति ॥

एतं दर्शयसे । दुर्नीतिभिर्दर्शयमानम् । एतं माभिवादयस्व । न्याय्यैरभिवादयन्ते । इत्यत्र "दृश्यभि०" [९] इत्यादिनाणिक्कर्ता णौ कर्म वा ॥

ननाथ यस्त्वां निशि नाथ नाथं तं नाथसे चेद्यशसामथोच्चैः ।
स्ववंशधर्मे स्मरसि स्मृतेर्वा चेत्तद्दयस्वेह रुषां क्षमां मा ॥ ९१ ॥

९१. हे नाथ निशि यस्त्वां ननाथ प्राहरिप्वादिदैत्यवधं याचितवांस्तं शंभुं नाथं प्रभुं चेन्नाथसे नाथो मे भूयादित्याशंससे । अथाथ वोच्चैरुन्नतानां यशसां दैत्यवधोत्थकीर्तीनां चेन्नाथसे यदि यशोर्थयसे चेत्यर्थः । तथा स्ववंशधर्मे स्ववंशस्य चौलुक्यान्वयस्य धर्ममपन्याय्युच्छेदनरूप-

१ ए °वका°. २ एफ् °येनाह ।. ३ सी °र्थः । तथै°. ४ एफ् °मन्या°. ५ बी °शोर्थ्यसि वेत्य°. ६ एफ् °भन्या°.

माचारं स्मृतेर्वान्यायिनो निग्राह्या इत्याद्युपदेशरूपाया राजधर्मसंहितायाश्चेत्स्मरसि तत्तदेह ग्राहारौ विषये रुषां कोपानां[1] दयस्व गच्छ कोपं कुर्वित्यर्थः । क्षमों[2] मा क्षान्तिं मा दयस्व ॥

तद्वधाय नाहं शक्त इति राजा मा ज्ञासीदिति तद्वधशक्तौ हेतुमाह ।

त्वमेव तस्येशिष इत्यदिक्षदीशान ईट् त्वां तदुपस्कुरुष्व ।

बलं धियां चास्य वधे रुजेद्धि राज्यस्य राष्ट्रं द्विडुपेक्षणामः ॥ ९२

९२. हे राजंस्त्वमेव नान्यस्तस्य ग्राहारेरीशिषे प्रभवसि तं वशीकर्तुं शक्नोपीत्यर्थः । इति हेतोस्त्वामीशानस्तव स्वामी भवन्सन्नीट् शंभुस्त्वामदिक्षद्ग्राहारिवधायादिशत् । यदि त्वं तद्वधाय शक्तो नाभविष्यस्तदा शंभुस्त्वां तद्वधे नोपादिक्ष्यत्[3] । तस्मात्तद्वधे त्वं शक्त इत्यर्थः । तत्तस्मादस्य ग्राहारेर्वधे बलं सैन्यमुपस्कुरुष्व सन्नाहादिसामग्र्या विशिण्ढि[4] । तथास्य मायित्वेन केवलबलेन हन्तुमशक्यत्वाद्धियां चोपस्कुरुष्व मन्त्रविशेषेण बुद्धीर्विशिण्ढि[5] विशिष्टबुद्धिप्रयोगं चेह कुर्वित्यर्थः । असौ स्वपापपरिपाकेनैव पक्ष्यते तदस्योपेक्षैव युक्तेति न वाच्यम् । हि यस्माद्द्विडुपेक्षणामः शत्रूपेक्षणमेवामो[6] रोगो राज्यस्य राष्ट्रं देशं च रुजेत्पीडयेत् । अन्यो रोगः किल रोगिणमेव विनाशयति शत्रूपेक्षारोगस्तु राज्यं राष्ट्रं च विनाशयतीति ग्राहारिवधोपेक्षां मा कृथा इत्यर्थः ॥

अथ राज्ञस्तद्वधे विशेषेणोत्साहनाय यत्स्वयं सर्वविधेयोपदेष्टृनपि युष्मान्प्रति मयैवमुपदिष्टं तत्सर्वं निरर्थकमिति दर्शयन्नाह ।

संतापयन्तं ज्वरयन्तमुर्वीं तमामयं छेत्तुमलं निदेशैः ।

भुवः किलोज्जासयदद्रिचक्रं केनेन्द्र उज्जासयितुं नियुक्तः ॥ ९३ ॥

१ सी डी कोपं. २ बी °मां क्षा°. ३ ए एफ् °दिक्षत् ।. ४ बी विशण्ढि ।. ५ बी °विंशण्ढि. ६ एफ् °वामो रो°.

९३. तं ग्राहारिं छेत्तुं निर्देशैर्युष्मान्प्रतिभणनैरलं सृतम् । कीदृशं तम् । उर्वीं पृथ्वीं संतापयन्तं प्रभूतकरादिभिरुपद्रवन्तं ज्वरयन्तं निर्निमित्तसर्वस्वापहारादिभिः पीडयन्तं च । अत एवामयं रोगतुल्यम् । ज्वराद्यामयोपि हि संतापयति ज्वरयति चाङ्गभङ्गादिना बाधते च । यस्मात् । किलेत्याप्तवादे । भुव उज्ज्वासयत्पातेन हिंसदद्रिचक्रमुज्ज्वासयितुं विदारयितुमिन्द्रः केन नियुक्तो व्यापारितो न केनापीत्यर्थः ॥

अथासौ संप्रत्येव निग्राह्य इति दर्शयन्नाह ।

लोकस्य पिंषन्तमरिं ह्यनुन्नाटयन्नृपो नाटयति क्षमायाः ।

पेष्टा न चेत्तामसि तत्प्रजानामुत्क्राथयन्तं क्रथयैनमद्य ॥ ९४ ॥

९४. हि यस्माल्लोकस्य पिंषन्तं हिंसन्तमरिमनुन्नाटयन्नहिंसन्नृपो नराणां पाता राजा क्षमाया मह्या नाटयति हिनस्ति । सर्वशक्तिमत्त्वेन यथार्थाभिधानः सन्नृपो यदि पृथ्वीविध्वंसिनो हि शत्रून्न निगृह्णाति तदा वस्तुतः स एव पृथ्वीं विनाशयतीत्यर्थः । तत्तस्माच्चेद्यदि त्वं तां क्षमां न पेष्टा न हिंसिता तदा प्रजानामुत्क्राथयन्तं हिंसन्तमेनं ग्राहारिमद्य सांप्रतमेव क्रथय विनाशय मा कालविलम्बं कार्षीरित्यर्थः ॥

अथैवमेतद्वधं हेतुवादेन द्रढयित्वावसरप्राप्तैर्महापुरुषदृष्टान्तैर्द्रढयन्नाह ॥

जम्भं यथाजीजसदुग्रधन्वा मधुं यथानीनटदब्धिशायी ।

पुरं यथाचिक्रथदीश एवं निघ्नन्तमुर्व्याः प्रणिजह्यमुं त्वम् ॥९५॥

९५. यथोग्रधन्वेन्द्रो जम्भं जम्भाभिधं दैत्यमजीजसज्जघान । यथा चाब्धिशायी विष्णुर्मधुं मधुदैत्यमनीनटद्धिंसितवान् । यथा चेशो

१ डी °भिः कृत्वोप°. २ ए सी °न्त वात. ३ सी डी °ति चा°. ४ एफ् °शती°. ५ ए सी डी एफ् °न दृढ°. ६ बी एफ् °न्तैर्दृढ°. ७ सी °था वाब्धि°. ८ एफ् °टद्धिंव्वभि .

हरः पुरं पुराख्यं दैत्यमधिकर्थाद्धिंसितवान् । एवमुर्व्याः पृथ्व्या निघ्नन्तममुं ग्राहारिं त्वं प्रणिजहि हिन्धि ॥

श्रुत्वेति वाचं द्विषतां प्रहन्तुं राज्ञा खरादीनिव निप्रहघ्ना ।
मन्त्री दृशा प्रेरित इत्यवोचत्स [1]जेम्बको जाम्बवदग्र्यबुद्धिः॥९६॥

९६. जेम्बको नाम मन्त्रीति वक्ष्यमाणमवोचत् । यत इति पूर्वोक्तां वाचं जेहुलवाणीं श्रुत्वा द्विषतां ग्राहरिप्वादीनां शत्रूणां प्रहन्तुं राज्ञा मूलराजेन दृशा प्रेरितो व्यापारितः । शत्रवः कथं हन्तव्या इति दृक्संज्ञया पृष्ट इत्यर्थः । कस्मात्पृष्ट इत्याह । यतो [3]जाम्बवान् सुग्रीवमन्त्री तस्येवाग्र्या बुद्धिर्यस्य सः खरादीभिप्रहघ्नेव यथा खरदूषणादीभिप्रहघ्ना राज्ञा रामेण द्विषतां रावणादीनां प्रहन्तुं दृक्संज्ञया पृष्टो जाम्बवानवोचत् ॥

यशसां नाथसे तं नाथसे । इत्यत्र "नाथः" [१०] इति वा कर्म । "आशिषि नाथः" [३.३.३५] इत्यात्मनेपदम् ॥ आत्मन इत्येव । ननाथ त्वाम् ॥

स्मृतेः स्मरसि धर्मं स्मरसि । [4]रुषां दयस्व क्षमां मा दयस्व । तस्येशिषे त्वामीशानः । इत्यत्र "स्मृत्यर्थ°" [११] इत्यादिना वा कर्म ॥

धियामुपस्कुरुष्व बलमुपस्कुरुष्व । इत्यत्र "कृगः°" [१२] इत्यादिना वा कर्म ॥

राज्यस्य रुजेत् राष्ट्रं रुजेत् । इत्यत्र "रुजार्थस्य°" [१३] इत्यादिना वा कर्म ॥

[5]ज्वरिसंतापिवर्जनं किम् । उर्वीं [6]ज्वरयन्तम् । संतापयन्तम् ॥

आमयं भुव उज्जासयत् । अद्रिचक्रमुज्जासयितुम् । [7]क्षमाया नाटयति अरिम-

---

१ एफ् जम्बुको जाम्बुव°.

१ एफ् °थहिसि°. २ एफ् जम्बुको°. ३ एफ् जाम्बुवा°. ४ एफ् रुपं द°. ५ एफ् °संतपि°. ६ एफ् °रन्त°. ७ ए क्षमया.

नुन्नाटयत्। प्रजानामुत्काथयन्तम् एनं क्रथय। लोकस्य पिंषन्तं तां पेष्टा। इत्यत्र "जासनाट०" [१४] इत्यादिना वा कर्म॥ जासनाटक्राथानामाकारोपान्तनिर्देशो यत्राकारश्रुतिस्तत्र यथा स्यादित्येवमर्थः[१]। तेनेह न स्यात्। जम्भमजीजसत्। मधुमनीनटत्। पुरमचिक्रथत्। अत एव च क्राथेः[२] कर्मसंज्ञाप्रतिषेधपक्षे ह्रस्वत्वाभावः। कर्मत्वे तु ह्रस्वत्वमेव॥

उर्व्या निघ्नन्तम्। द्विषतां प्रहन्तुम्। इत्यत्र "निप्रेभ्यो घ्नः" [१५] इति[३] वा कर्म॥ पक्षे। खरादीन्निप्रहत्य। अमुं प्रणिजहि॥

न केपणायन् सुहृदां सुतांश्च व्यवाहरन्वा विभवानसूनाम्।
कार्ये प्रभोर्जेहुलवत्त्ववादीत्तथ्यं च पथ्यं च न कश्चिदित्थम्॥९७॥

९७. प्रभोः कार्ये। नैमित्तिक आधारे सप्तमीयम्। स्वामिकार्यार्थं के स्वामिभक्तभृत्याः सुहृदां मित्राणां सुतांश्च मित्रेभ्यः प्रियतराण्यपत्यानि च नापणायन्। वाथवा। विभवान्[४] बाह्याः प्राणा नृणामर्थ इति सुतेभ्योपि प्रियतराणि द्रव्याण्यसूनां विभवेभ्योपि प्रियतराणां प्राणानां च न व्यवाहरन् क्रयविक्रये[५] द्यूतपणत्वे वा न नियुक्तवन्तः। किं त्वनेकेपि प्रभुकार्यार्थं सुहृदादि व्ययितवन्त इत्यर्थः। तुर्विशेषे। केवलं प्रभोः कार्ये जेहुलवत्तथ्यं[६] च सत्यं च पथ्यं च हितं चेत्थमुक्तरीत्या न कश्चित्कोप्यवादीत्। एतेन जेहुलस्यात्यन्तिकी स्वामिभक्तिः प्रज्ञातिशयश्चोक्तः॥

सुहृदामपणायन् सुतानपणायन्। असूनां व्यवाहरन् विभवान्व्यवाहरन्। इत्यत्र "विनिमेय०" [१६] इत्यादिना वा कर्म॥

१ सी डी °र्थस्ततस्या°. २ बी क्राथेः क. ३ एफ् इ वा. ४ ए विभावन्. ५ सी क्रयं. ६ एफ् °थ्य हि°.

अथ प्रभुकार्ये येसत्यमहितं च भाषन्ते तान् दूषयति ॥

कीर्तेः[1] प्रदीव्यन्ति कुलं च दीव्यन्त्यात्मोन्नतेस्ते किल ये हि मन्त्रे ।
दीव्यन्ति कूटं चटुना च लोभमध्यासिताः पापमधिष्ठिताश्च ॥ ९८ ॥

९८. ये मन्त्रिणो मन्त्रे कूटमलीकेन चटुना च चाटुकारेण च दीव्यन्ति व्यवहरन्ति । कीदृशाः सन्तः । हि स्फुटं लोभं धनादिगार्ध्यमध्यासिता आश्रिता अत एव पापं वञ्चनाप्रयोगमधिष्ठिताश्च[1] । लोभान्मन्त्रे सत्यं हितं च न भाषन्त इत्यर्थः । ते । किलेति सत्ये । कीर्तेः कुलं च प्रदीव्यन्ति । तथात्मोन्नतेः स्वमहत्त्वस्य दीव्यन्ति । क्रैयवि[2]क्रये द्यूतपणत्वे वा विनियुञ्जते कीर्तिं कुलमात्मोन्नतिं च निर्गमयन्ती[3]त्यर्थः । तन्मन्त्रो हि किंपाकफलमिव मुखे[4] मधुर आयतौ नायकस्य महाविपद्धेतुरित्येतेषां कीर्त्याद्युच्छिनत्ति ॥

अथ यः प्रभुकार्ये सत्यवादी तं वर्णयति ॥

भर्तुः स चेतोधिशयीत सोधिवसेत्सभामावसतां च मौलिम् ।
गुरोः समीपं स उपोषितश्च ब्रूयात्सदोनूषितवान् स्फुटं यः ॥ ९९ ॥

९९. सदो मन्त्रमण्डपमनूषितवानध्यासितो यः स्फुटं सत्यं ब्रूयात्स नरो भर्तुः स्वामिनश्चेतोधिशयीताध्यासीत । तथा सभामावसतामाश्रयतां सभासदां मौलिमुत्तमाङ्गं मुकुटं वा सोधिवसेदारोहेत्[5] । सर्वकार्येषु प्रष्टव्यतया[6] सभ्येषु मौलिरिवोत्तमः स्यादित्यर्थः । तथा स गुरोः समीपमुपोषितश्च गुरुकुलं सेवितवांश्च तेनैव विद्या सम्यगधीतेत्यर्थः ॥

१ सी कीर्तिः प्र°.

१ बी °ताश्च श्रिताश्च. एफ् °ताश्चाश्रिताश्च. २ सी डी क्रये. ३ सी डी °यतीत्य°. ४ बी एफ् मुखम°. ५ बी एफ् °हेन म°. ६ डी °या मैन्येपु.

कीर्तैः प्रदीव्यन्ति कुलं प्रदीव्यन्ति । इत्यत्र "उपसर्गाद्दिवः" [१७] इति वा कर्म ॥ उपसर्गादिति किम् । आत्मोन्नतेर्दीव्यन्ति ॥ अत्र "न" [१८] इत्यनेन नित्यं कर्मसंज्ञा न ॥

कूटं दीव्यन्ति । चटुना दीव्यन्ति । इत्यत्र "करणं च" [१९] इति दीव्यतेः करणं कर्म करणं च । तेन कर्मत्वे द्वितीया करणत्वे च तृतीया ॥

चेतोधिशयीत । पापमधिष्ठिताः । लोभमध्यासिताः । इत्यत्र "अधेः शीङ्°" [२०] इत्यादिना कर्म ॥

समीपमुपोषितः । सदोनूषितवान् । मौलिमधिवसेत् । सभामावसताम् । इत्यत्र "उपान्व्°" [२१] इत्यादिना कर्म ॥

अथासत्यस्य दोषान्सत्यस्य च गुणानुक्त्वा सत्यमेव वक्तुमुपक्रमते ॥

तत्तेर्थशास्त्रेभिनिविष्टबुद्धेर्वदाम्यमिथ्याभिनिविश्य पार्श्वम् ।
गोदोहमीशे त्रुटिमप्युदास्ते य आस्यते द्राग्नरकं हि तेन ॥१००॥

१००. यस्मात्सत्यासत्ये पूर्वोक्तगुणदोषोपेते तत्तस्माद्धेतोरर्थशास्त्रे नीतिशास्त्रेभिनिविष्टबुद्धेः क्षुण्णमतेः सतस्ते तव पार्श्वमभिनिविश्याश्रित्यामिथ्या सत्यमहं वदामि । वर्तमानकालनिर्देशोधुनैव वदामीति भणनस्यातिशैघ्र्यज्ञापनार्थः । शीघ्रवदने हेतुमाह । हि यस्मादीशे स्वामिनि स्वामिकार्यविषय इत्यर्थः ॥ गोदोहं यावता कालेन गौर्दुह्यते तावन्तं कालमित्यर्थः । त्रुटिमपि ।

प्रयत्नेन विमुक्तस्य यवस्य पततोम्बरात् ।
द्वियवं यावदध्वानं यः कालः स त्रुटिर्मतः ॥

इत्यतिसूक्ष्मकालमपि यो भृत्य उदास्त उपेक्षते तेन द्राग् नरकमास्यते स्थीयते स्वामिनो द्रोहस्येवोपेक्षाया अपि महापापहेतुत्वात् ॥

१ सी °हस्येवो°. २ सी डी °पापे हे°.

अथ प्रतिज्ञातं सत्यमेव वृत्तनवकेन वदन्ग्राग्ग्राहारेर्दुर्गसंपद्बलसंपदादिबलिष्ठतया दुःसाध्यत्वप्रतिपादनेन ग्राहारिं हन्तुं ससैन्यं दण्डनेतारं प्रेषयेति जेहुलवाक्यमाक्षिपंस्तस्य स्वयमास्कन्धतां वृत्तत्रयेणाह ॥

क्रोशे गिरिर्योजनमाब्धिरस्य दुर्गं स्वपुर्यां वसतोस्त्यमुं तत् ।
समुत्थितं निश्यपि शालिपाकेप्यशायिनं मा स्म मथाः सुसाधम् ॥ १०१ ॥

१०१. अस्य ग्राहारेः स्वपुर्यां वामनस्थल्यां वसतः क्रोशे गिरिरुज्जयन्ताद्रिस्तथा योजनं क्रोशचतुष्टयेब्धिश्च दुर्गं दुर्गस्थानमस्ति । गिरिरब्धिश्चास्यातिनिकटं दुर्गमस्तीत्यर्थः । तत्तस्माद्धेतोरमुं ग्राहारिं सुसाधं सुखजेयं मा स्म मथा मा ज्ञासीः । कीदृशं सन्तम् । निश्यपि समुत्थितमुद्यतम् । अत एव शालिपाकेपि यावता कालेन शालिः पच्यते तावत्यपि काले । शालिर्हि स्तोककाले पच्यत इति स्तोककालमपीत्यर्थः । अशायिनम् । दुर्गबलयुक्तत्वात्सदोद्यतत्वाच्च दुःसाधं जानीहीत्यर्थः । क्रोशे योजनमित्यत्रैकवचनमस्य गिरिसमुद्रदुर्गयोरतिनैकट्यज्ञापनार्थम् । अन्यथा वामनस्थलीतो गिरेः क्रोशसप्तकेब्धेश्च पञ्चयोजन्यां वर्तमानत्वात्तदनुपपन्नं स्यात् । यद्वा वामनस्थल्यां तदा वास्तव्यानां तथा बाहुल्यात्तथा वासाच्चैतदुपपन्नम् । यदि पुनर्ग्राहारेरन्या का चिद्राजधानी यस्याः सकाशात्क्रोशे गिरिर्योजने चाब्धिस्तां न वेद्मि ॥

गोदोहमप्युद्यममत्यजन्तो भजन्त्यहोरात्रममुं नृपास्तत् ।
क्रोशाच्छतं सैन्यपतिं दिशंस्तद्वधाय दात्रेण तरुं लुनासि ॥ १०२ ॥

१०२. गोदोहमपि गोदोहकालमप्युद्यममत्यजन्तः सन्तो नृपा

१ बी °न्यं ने°. २ सी °त्तवये°. डी °त्तद्वयेनाह. ३ बी °नस्थाल्यां. ४ ए °साध्यं जा°. ५ सी क्रोशा यो°. डी क्रोशो यो°. ६ एफ् गिरिः क्रो°. ७ एफ् °केप्वब्धिश्च. ८ बी °रेन्या. ९ ए °शेर्गिरियोज°. १० बी डी °ने वाब्धि°.

अमुं प्राहारिमहोरात्रम् । एतेन भक्त्यतिशयोक्तिः । भजन्ति । एतेन बलसंपदतिशयोक्तिः । तत्तस्मात्तद्बधाय प्राहारिहृतये क्रोशान् शतं क्रोशशते दूरदेश इत्यर्थः । एतेन यदि सेनानीः कथमपि तेन भज्येत तदात्रस्थैर्भवद्भिरस्य साहाय्यं कर्तुं दुःशकमित्युक्तम् । सैन्यपतिं दिश- माज्ञापयंस्त्वं दात्रेण तरुं लुनासि यथा महत्त्वात्तरुर्दात्रेण च्छेत्तुं न शक्यते तथा त्वद्दण्डेशेनापि प्राहारिरित्यर्थः ॥

अभिनिविश्य पार्श्वम् । इत्यत्र "वाभिनिविशः" [२२] इति कर्म[1] वा ॥ व्यवस्थितविभाषेयम् । तेन क चित्कर्मसंज्ञैव । क चिदाधारसंज्ञैव । शाखेभिनिविष्टे ॥

काल । त्रुटिमुदास्ते निशि समुत्थितम् । अध्वा । योजनमस्ति क्रोशेस्ति । भाव । गोदोहमुदास्ते शालिपाकेप्यशायिनम् । देश । नरकमास्यते स्वपुर्यां वसतः । इत्यत्र "कालाध्व°" [२३] इत्यादिना कालादिराधारः कर्म[5] वा । अकर्म- च । यत्रापि पक्षे कर्मसंज्ञा तत्राकर्मसंज्ञापि[6] वा भवतीत्यर्थः । तेन नरकमास्यते इत्यत्र सकर्मकत्वाद्द्वितीया । अकर्मकत्वाच्च भाव आत्मनेपदम् ॥ अन्ये तु सकर्म- काणामकर्मकाणां च प्रयोगे कालाध्वभावानामत्यन्तसंयोगे सति नित्यं कर्मत्वमि- च्छन्ति । भजन्त्यहोरात्रममुम् । क्रोशान्सैन्यपतिं दिशन् । गोदोहमुषममत्यजन्तः ॥

दात्रेण तरुं लुनासि । इत्यत्र "साधक°" [२४] इत्यादिना करणसंज्ञा ॥

तद्बधाय दिशन् । इत्यत्र "कर्माभि°" [२५] इत्यादिना संप्रदानसंज्ञा[11] ॥

---

१ डी °शतदू°. २ ए बी सी डी °में । व्य°. ३ डी °ष्टः । का°. ४ ए सी °ध्वत्वा°. बी एफ् °ध्वभावेत्वा°. ५ एफ् °र्म । अ°. ६ एफ् °पि भ°. ७ एफ् °काणां च. ८ ए °जन्ति हो°. ९ बी °जन्तम् । दा°. १० बी ना कार°. ११ सी संज्ञा ।.

जयाय चेत्त्वं स्पृहयेर्यशो वा लोकाय कुप्यन्तमसूयमानम् ।
द्रुह्यन्तमीर्ष्यन्तममुं स्वयं तत्प्रद्रोग्धुमुत्क्रुध्य कृताभियोगः ॥१०३॥

१०३. जयाय चेत्त्वं स्पृहयेर्यशो वा जयं कीर्तिं वा यदीच्छसि तत्तदामुं ग्राहारिं प्रद्रोग्धुं जिघांसितुं स्वयं कृताभियोगो विहितोद्यमः संस्त्वममुमेवोत्क्रुध्योत्क्रोधविषयं कुरु मा सहस्व । तं स्वयमभिषेणयेत्यर्थः । कीदृशम् । लोकाय कुप्यन्तममृष्यन्तमसूयमानं लोकस्यैव गुणेषु दोषानाविष्कुर्वाणं द्रुह्यन्तमपचिकीर्षन्तमीर्ष्यन्तं लोकसंपत्तौ चेतसा व्यारुष्यन्तम ॥

जयाय यशो वा स्पृहयेः । इत्यत्र "स्पृहेर्व्याप्यं वा" [२६] इति वा संप्रदानम् ॥

लोकाय कुप्यन्तं द्रुह्यन्तमीर्ष्यन्तमसूयमानम् । इत्यत्र "क्रुद्द्रुह°" [२७] इत्यादिना संप्रदानम् ॥

अमुमुत्क्रुध्य । अमुं प्रद्रोग्धुम् । इत्यत्र 'नोपसर्गात्क्रुद्द्रुहा" [२८] इति न संप्रदानम् ॥

अथ दृष्टान्तोक्त्या राज्ञा तस्य स्वयमास्कन्दनं द्रढयति ।

सिंहो निकुञ्जादभिसृत्य यूथाद्धन्तीभमुद्दामतमं मृगेभ्यः ।
यानात्स्वयं मा विरम प्रमाद्यं मा मा जुगुप्सस्व जगत्ततोवन् ॥१०४॥

१०४. सिंहो निकुञ्जाद्वनगह्वरादभिसृत्य निर्गत्य मृगेभ्य आरण्यपशुभ्य उद्दामतमं बलादिनोत्कृष्टतममिभं यूथान्मृगगणादाकृष्य हन्ति तस्मात्त्वमपि ततो ग्राहारेर्जगदवन् रक्षन्सन् स्वयं यानान्मा विरम

---

१ ए °ये यशो°. २ ए द्रुह्यन्त°. ३ एफ् °च त्वं मा जु°.

---

१ एफ् °विः कुर्वा°. २ एफ् °भ्यः । अ°. ३ एफ् °नं दृढ°. ४ ए °वरम्.

दुःखहेतुरिदमात्मन इति विरज्य मा निवर्तस्व । तथा मा प्रमाद्य यत्कार्यं तद्दण्डनेतैव करिष्यतीत्यालस्यं कृत्वा मा निवर्तस्व । तथा मा जुगुप्सस्व नीचोयं स्वयमास्कन्तुमनुचित इति निन्दित्वा मा निवर्तस्व ॥

ननु साहाय्यकृन्मित्रसंपदादिरहितोयं सैन्येशेनापि सैन्यैर्वेष्टब्धो दुर्गस्थोपि निरुद्धधान्यादिप्रवेशस्थानः सुसाध एव तत्किं तत्साधनाय मम स्वयमभिषेणनेनेति राजा मा स्म वददित्यस्य महामित्रसंपदमप्याह ॥

युधोपराजिष्णुररेरभीरुस्त्राता तुरुष्कानपि कच्छदेशात् ।
कुतोप्यनन्तर्दधदस्य सोस्ति लक्षः सखा जात इवैकमातुः ॥१०५॥

१०५. सोनेकावदातैः प्रसिद्धो लक्षो नाम कच्छदेशस्वाम्येकमातुर्जात इव सहोदर इवातिस्निग्धः सखास्य ग्राहारेरस्ति । कीदृक् । अरेरभीरुरत्रस्नुरत एव युधो रणादपराजिष्णुर्दुःखेयं युदिति तामसहमानोनिवर्तिष्णुरत एव च कच्छदेशात्तुरुष्कानप्यासतामन्ये नृपाः सर्वजगद्भयंकरान्म्लेच्छानपि त्राता रक्षन्नत एवं च कुतोपि कस्मादप्यनन्तर्दधदनिलीयमानोनश्यन् ॥

ननु सखास्य दूरे भविष्यति ततः सन्नप्यसत्प्राय एवेति न वाच्यमित्याह ।

कच्छात्सुराष्ट्राष्टसु योजनेषु दीपोत्सवः पक्ष इवाश्वयुज्याः ।
फुल्लात्मभूतो न तदस्य दूरे स्थान्नाधिको भूमिपतिभ्य उर्व्याम् १०६

१०६. यथाश्वयुज्या आश्विनपूर्णिमाया आरभ्य पक्षे गते दीपो-

१ बी °दा र°. २ प °वब्धो°. ३ डी मा वादीदि°. ४ सी °र संपन्मा° ॥ नवोत्तरशततमश्लोकावतरणस्थित 'संपन्माम्' इत्येतत्पदात्प्राक्तनो ग्रन्थो नास्ति. ५ पफू °ष्णुदुःखे°. ६ पफू °व कु°.

त्सवो दीपालिका स्यात्तथा कच्छात्कच्छदेशाद्गतेष्वष्टसु योजनेषु सुराष्ट्रो[१] सुराष्ट्रादेशो[२] भवति तत्तस्माद्धेतोः फुल्लात्फुल्लाख्यान्महाराजात्प्रभूतो जातो लक्षाख्यः सखास्य ग्राहारेर्न दूरे । कीदृक् । उर्व्यां पृथ्वीविषये ये भूमिपतयस्तेभ्यः सकाशात्स्थाम्ना बलेनाधिकः ॥

तथापि द्वावेव शत्रू[३] कृतौ । तौ चानेकमहाराजान्वितः सैन्यपति-रेव निग्रहीष्यति तत्किं स्वयमास्कन्दनेनेति न वाच्यमित्यनेकान् द्विष आह ॥

येद्रौ समुद्रे च नृपा दधानाः क्षत्रत्वमात्मन्युषिता दृगग्रे ।
तेप्यस्य संवर्मयितार आजौ नैको न च द्वौ बहवो द्विषस्तत् ॥१०७॥

१०७. आत्मनि स्वे क्षत्रत्वं क्षात्रधर्मं दधानाः । शौर्यादिक्षत्रिय-गुणान्विता इत्यर्थः । ये नृपा अद्रौ ये समुद्रे चाब्धिसमीपे चोषितोः स्थिताः सन्ति । ये चास्य ग्राहारेर्दृगग्रे दृष्टिपुर उषिताः सन्ति । सदा समीपस्था येमुं सेवन्त इत्यर्थः । तेपि । न केवलं स्वयं लक्षश्चेत्यप्यर्थः[४] । अस्य ग्राहारेराजौ रणनिमित्तं संवर्मयितारः संनह्यन्ते । तत्पक्षत्वा-त्तेपि त्वया सह योत्स्यन्त इत्यर्थः । तत्तस्मान्नैको ग्राहारिर्द्विट् न च द्वौ ग्राहारिलक्षौ द्विषौ किं तु बहवोनेके द्विषः ॥

"अपायेवधिरपादानम्" [२९] तत्त्रिविधम् । निर्दिष्टविषयम् । उपात्तविषयम्[५] । अपेक्षितक्रियं च । निर्दिष्टविषयं यथा । निकुञ्जादभिसृत्य ॥ यत्र[६] धातुर्धात्वन्त-रार्थाङ्गं स्वार्थमाह तदुपात्तविषयम् । यथा यूथाद्धन्ति । अत्र ह्याकर्षणाङ्गे हनने हन्तिर्वर्तते[७][८] ॥ अपेक्षितक्रियं यथा । मृगेभ्य उद्दामसमम् । अपायश्च कायसंसर्ग-पूर्वको बुद्धिसंसर्गपूर्वको वा[९] विभाग उच्यते । तेन यानान्मा विरम । यानान्मा

१ एफ् °ष्ट्यो°. २ डी एफ् °ष्ट्रादे°. ३ बी °त्रू । तौ. ४ एफ् °ताः स°. ५ एफ् °म् । उपे°. ६ बी °त्र तु धात्व°. ७ ए °न्ति वर्त°. ८ एफ् °ते । उपे°. ९ ए वा वा वि°.

प्रमाद्य । यानात्मा जुगुप्सस्व । इत्यत्र दुःखहेतुं यानं बुद्ध्या प्राप्य यानेन कृत्यम-स्तीति यानान्निवर्तमानो राजा [1]जम्बुकेन निषिध्यत इति निवृत्तेरङ्गेषु विरामप्रमा-दजुगुप्सास्वेते धातवो वर्तन्त इति बुद्धिसंसर्गपूर्वकोपायः ॥ तथा जगत्ततोवन् । इत्यत्र राजा यदीदं जगद्ग्राहारिः पश्येन्नूनमस्य सर्वस्वमपहरेदिति बुद्ध्या ग्राहा-रिणा संयोज्य तस्मान्निवर्तयतीत्यपाय एव[2] ॥ तथा युधोपराजिष्णुः इत्यत्रापि युधमसहमानस्ततो न निवर्तत इत्यपाय एव ॥ अरेरभीरुः । इत्यत्रापि वधबन्ध-क्लेशकारिणम[3]रिं बुद्ध्या प्राप्य ततो न निवर्तत इत्यपाय एव । यद्यपि निवृत्तेरपेक्ष-यापादानं स्यात्सा चात्र नञा निषिध्यत इत्यपादानं न प्राप्नोति तथापि निवृत्ते-रपेक्षयात्र प्रथममपादानं ततः सा नञा निषिध्यत इति सर्वमुपपन्नम् । एवम-न्यत्रापि ॥ त्राता तुरुष्कान् कच्छदेशात् । इत्यत्र तुरुष्कैर्देशसंपर्कं बुद्ध्या समीक्ष्य देशस्य विनाशं पश्यंस्तुरुष्कान् देशान्निवर्तयतीत्यपाय एव । कुतोप्यनन्तर्[4]धत् । इत्यत्र भये[5]न मा मां कोपि द्राक्षीदिति न तिरो भवतीत्यत्राप्यपायः ॥ एकमातुर्जात इ[6]त्यत्राप्येकमातुः पुत्रो निष्क्रामतीति स्फुट एवापायः ॥ फुल्लाप्रभूतः । इत्यत्रापि फुल्लाल्लक्षः संक्रामतीत्यपायोस्ति ॥ कच्छात्सुराष्ट्राष्टसु योजनेषु । इत्यत्र कच्छान्निःसृत्य गतेषु योजनेषु भवतीत्यर्थः ॥ आश्वयुज्या दीपोत्सवः पक्षे । ततः प्रभृति पक्षे गते भवती[7]त्यर्थः । उभयत्रापायः प्रतीयते ॥ भूमिपतिभ्योधिक इत्यत्र लक्षः पुंस्त्वादिना भूपैः सह संसृष्ट आधिक्येन धर्मेण ततो विभक्तः प्र-तीयत इति सर्वत्राप्यपायविवक्षा ॥

वैष[8]यिक । उर्व्यां भूमिप[9]तिभ्यः । औपश्लेषिक । अद्रौ ये । अभि[10]व्याप[11]क । आत्मनि क्षत्रत्वम् । सामीप्यक । समुद्रे ये । नैमित्तिक । आजौ संवर्मयितारः ॥ औपचा[12]रिक । दृगग्र उषिताः । इत्यत्र "क्रिया[13]श्रयस्य°" [३०] इत्यादिनाधि-करणम् ॥

१ पफू जम्बुके°. २ पफू °व । यद्य°. ३ डी °मरिं°. ४ प °धहिनित्य°. ५ पफू °ये मा. ६ डी °त्यत्र कच्छादित्यत्रा°. ७ डी °तीति । उ°. ८ डी °यिकम् । उ°. ९ डी °निभ्योप्यधिकः । औ°. १० पफू °भिव्यक. ११ प °पकः । आ°. १२ डी °रिकः । दृ°. १३ प बी °याश्रिय°.

एकः । द्वौ । बहवः । इत्यत्र "नाम्नः°" [२१] इत्यादिना प्रथमा विभक्तिः ॥

अथैवमुक्तदुर्गमित्रसहायसंपद्बलेन ग्राहारेरतिबलिष्ठतां वदन्महाराजस्यैवायं साध्यो नान्यस्येति निर्धारयति ।

मित्रं नृपेन्द्र समया निकषाथ दुर्गं
य: सोप्यलं भवति किं पुनरन्तरा ते ।
तत्तं निहन्तुमवनीं दिवमन्तरेण
त्वामन्तरेण न हि संप्रति कश्चिदीशः ॥ १०८ ॥

१०८. हे नृपेन्द्र यः शत्रुर्मित्रं समया मित्रसमीपे स्यादथाथ वा दुर्गं निकषा पर्वताव्ध्यादिदुर्गमस्थानसमीपे स्यात्सोप्यास्तां तावदेतद्वयसमीपस्थ एकतरसमीपस्थोप्यलं समर्थो भवति किं पुनस्ते मित्रदुर्गे अन्तरा। मित्रदुर्गयोर्यो मध्यवर्ती स नितरां बलिष्ठ इत्यर्थः । तत्तस्माद्धेतोस्तं ग्राहारिं निहन्तुमवनीं दिवमन्तरेण द्यावापृथिव्योर्मध्ये त्वामन्तरेण विना संप्रत्यस्मिन्काले न कश्चित्कोपि सैन्यपत्यादिक ईशः समर्थः । वसन्ततिलका छन्दः ॥

योयं मित्रदुर्गसंपद्भ्यामतिबलिष्ठतया कस्याप्यन्यस्यासाध्यः स कदाचिन्ममाप्यसाध्यः स्यादिति राजा मा शङ्किष्टेत्याह ।

तेनाभीरान्येन सुराष्ट्रामतिवृद्धः
पार्थे स्थाम्ना त्वं चलितश्चेत्समराय ।
हा प्राणेशान्धिग्विधिमेवं प्रलपेयु-
र्वैरिस्त्रैणानीति विभो मां प्रतिभाति ॥ १०९ ॥

१०९. हे विभो स्वामिन्सुराष्ट्रां सुराष्ट्रादेशं येन लक्ष्यीकृत्य य

१ बी °त्रमहासं°. २ एफ् °हारिर°. ३ एफ् °दथवा. ४ एफ् ईदृशः. ५ एफ् °राष्ट्रदे°. ६ एफ् लक्षीकृ°.

आभीरी[1] आभीरजातिक्षत्रिया ग्राहरिप्वादयस्तांस्तेन लक्ष्यीकृत्य[2] चेद्यदि त्वं समराय चलितः कृतप्रयाणस्तदा हा प्राणेशान् कष्टं वल्लभानां मृत्युकालावाप्तेः। अत एव विधिं दैवं धिग् गर्हामहे। इत्येवं प्रकारेण वैरिस्त्रैणानि भाविस्वपतिमरणनिश्चयेन प्रलपेयुराक्रन्देयुरित्येवं मां प्रतिभाति मम प्रतिभासते। इत्यहं जानामीत्यर्थः। ननु ग्राहरिप्वाद्यरयोप्यतिशूरास्तत्तान्प्रति मयि रणायोद्यतेपि तत्पत्नीनां स्वभर्तृमृत्युनिश्चयेन विलापः कथं त्वया विमृश्यत इत्याह। यतस्त्वं पार्थमतिस्थाम्ना वृद्धोर्जुनस्यातिक्रमेण बलेन स्फीतः। अर्जुनादपि बलिष्ठ इत्यर्थः॥

नृपेन्द्र। इत्यत्र "आमन्त्र्ये" [३२] इति प्रथमा॥

मित्रं समया। दुर्गं निकषा। हा प्राणेशान्। धिग्विधिम्[3]। अन्तरा ते। अवनीं दिवमन्तरेण। पार्थमति। येन सुराष्ट्राम्। तेनाभीरान्। इत्यत्र "गौणात्०" [३३] इत्यादिना द्वितीया॥ बहुवचनादन्येनापि युक्ताद्भवति। मां प्रतिभाति॥ धातुसंबद्धोत्र प्रतिस्तेन "भागिनि च०"[4] [३७] इत्यादिना न सिध्यति। मत्तमयूरं छन्दः॥

अथ मन्त्रमुपसंहरन्नाह।

उपर्युपरि भूभृतोध्यधि वनान्यधोधोम्बुधी-
न्द्विषोभिगदितेमुना पुलकभृद्वपुः सर्वतः।
भुजावुभयतः क्षिपन् दृशमथो उदस्थान्नृपः
स्थितौ तमभितश्च तौ परित उत्थितस्तान् जनः॥११०॥[1]

११०. नृपो मूलराज उदस्थात्। कीदृक्सन्। वपुः सर्वतोङ्गस्य

१ एफ् इत्याचार्यश्रीहेमचन्द्राचार्यविरचिते शब्दानुशासनद्व्याश्रयमहाकाव्ये प्रभातमन्त्रवर्णनो नाम द्वितीयः सर्गः समाप्तः॥

१ एफ् °रा जा°. २ ए लक्षीकृ°. ३ एफ् °ग्विधम्।. ४ ए °गिनीवेत्या°. सी °गिनवेत्या°.

सर्वेषु प्रदेशेषु पुलकभृत् । क सति । भूभृतो गिरीनुपर्युपरि वनानि काननान्यध्यध्यम्बुधीनधोधः सर्वत्र क्रियाविशेषणादम् । सप्तमी वा । द्विष इत्यत्रेतिशब्दोऽध्याहार्यः । ततोयमर्थः । भूभृद्वनाम्बुधीनां प्रत्यासन्नं द्विषो ग्राहरिप्वादिशत्रवो वर्तन्त इत्येतस्मिन्नमुना जेम्बकेनाभिगदिते भणिते । यद्वा भूभृद्वनाम्बुधीनां समीपे वर्तमानान्द्विषः शत्रूनभिलक्ष्यीकृत्यामुना गदिते पूर्वोक्तरीत्या भणने द्विषन्नामश्रवणोद्भूतवीररसोल्लासवशेन सर्वाङ्गीणरोमाञ्चाञ्चित इत्यर्थः । तथा महोर्दण्डयोः सतोः केप्यपि शत्रव इत्यहङ्कारेणोत्पन्नरणकण्डू भुजावुभयतो दृशं क्षिपन् द्वयोरपि भुजयोरुपरि दृष्टिं व्यापारयन् । अथो भिन्नक्रमे नृप इत्यतो ज्ञेयः । अथो नृपोत्थानानन्तरं तं नृपमभित उभयपार्श्वयोः स्थितौ सन्तौ तौ जम्बकजेहुलावुदस्थाताम् । उदस्थादित्येवार्थवशाद्विवचनान्ततया योज्यम् । तथा चो भिन्नक्रमे जन इत्यतो ज्ञेयः । तान्नृपजम्बकजेहुलान्परितः सर्वतो मन्त्रमण्डपबहिःस्थितो जनश्च परिवारलोकश्चोत्थितः । नृप उदस्थादित्यनेनाग्रेतनसर्गे ग्राहारिं प्रति नृपस्य प्रस्थानं वर्णयिष्यत इति सूचितम् ॥

अधोधोम्बुधीन् । अध्यधिवनानि । उपर्युपरि भूभृतः । इत्यत्र "द्वित्वेधः०" [३४] इत्यादिना द्वितीया ॥

वपुः सर्वतः । भुजावुभयतः । तमभितः । तान्परितः । इत्यत्र "सर्वोभय०" [३५] इत्यादिना द्वितीया ॥ पृथ्वी छन्दः ॥

॥ इति श्रीजिनेश्वरसूरिशिष्यलेशाभयतिलकगणिविरचितायां श्रीसिद्धहेमचन्द्राभिधानशब्दानुशासनद्व्याश्रयवृत्तौ द्वितीयः सर्गः समर्थितः ॥

---

१ सी °म् । स्वस°. २ ए एफ् जम्बुके°. ३ ए °म्बुदीस°. ४ ए एफ् °ल. क्षीकृ°. ५ डी भणिते द्वि°. ६ डी °ङ्गीणं रो°. ७ बी °रं नृ°. ८ एफ् °तौ जम्बुक°. ९ ए °कहेहु°. १० सी डी °जेहला°. ११ एफ् °जम्बुक°. १२ सी डी °रि तं प्र°.

द्व्याश्रयमहाकाव्ये

तृतीयः सर्गः ।

॥ अर्हम् ॥ अथ विजययात्रानुकूलं शरत्कालं पञ्चाशता श्लोकैर्वर्णयति ।

अथ द्यामभि शुभ्राभ्रा सुनीराभि सरः सरः ।
अभि दिग्विजयं साधुरुपतस्थे शरत्क्षणात् ॥ १ ॥

१. अथ मन्त्रावसरानन्तरं क्षणाद्ग्राहरिप्वभिषेणनविषयाचिन्तासमकालमेव शरदुपतस्थे विजृम्भिता । किं भूता । द्यां गगनमभिलक्ष्यीकृत्य शुभ्राभ्रा विशदमेघा । एतेनाभ्राणामवार्षुकत्वेनादित्यातपनिवारकत्वेन चास्याः सुखदतोक्ता । तथा सरः सरोभि तडागं तडागमभिव्याप्य सुनीरा निर्मलजला । एतेन पेयजलत्वोक्तिः । अत एवाभि दिग्विजयं साधुर्विजययात्राविषये साधुत्वप्रकारमापन्ना । एतेन राज्ञो ग्राहरिपुविषयाभिषेणनमनोरथस्य शीघ्रभाविनी सफलतोक्ता ॥

लक्षणे । द्यामभि ॥ वीप्सये । अभि सरः सरः ॥ इत्थंभूते । अभि दिग्विजयम् । इत्यत्र "लक्षण°" [३६] इत्यादिना द्वितीया ॥

बभ्रुः प्रति नृपं ग्रामपतिं पर्यनु कर्षकम् ।
प्रति ग्रामं दिशं पर्यनु क्षेत्रं सस्यसंपदः ॥ २ ॥

२. नृपमित्यादिषु सर्वेषु जातावेकवचनम् । प्रति ग्रामं दिशं परि

---

१ सी °जयाया°. २ ए सी °द्ग्राहारि°. ३ सी डी °पये चि°. ४ सी डी °ता द्यां. ५ ए सी डी एफ् °लक्षीकृ°. ६ ए सी डी °न चास्याः. ७ सी डी °डागम°. ८ सी डी एफ् वीप्से । अ°.

अनु क्षेत्रं ग्रामान् दिशः क्षेत्राणि च लक्ष्यीकृत्य सस्यसंपदः प्रति नृपं राज्ञां भागे ग्रामपतिं परि ग्रामठक्कुराणां भागेनु कर्षकं हालिकानां भागे च बभुः प्राचुर्येण शुशुभिरे । शरदि हि कर्षकाणां धान्यानि निष्पद्यन्ते । तेभ्यो ग्रामभूस्वामित्वाद्ग्रामपतयो भागं गृह्णन्ति । तेभ्यश्च देशपतित्वान्नृपा भागं गृह्णन्ति ॥

प्रतीभमिभमन्वश्वमश्वं गां गां च पर्यसौ ।
साधुः प्रति मदमनु पालनं बलितां परि ॥ ३ ॥

३. असौ शरदिभमिभं प्रत्यभिव्याप्य मदं प्रति मदग्रहणविषये साधुः साधुत्वप्रकारमापन्नाभूत् । तथाश्वमश्वमन्वाभिव्याप्य पालनमनु रक्तस्रावादिचिकित्साकरणेन रक्तोद्गलनोद्भवरोगाद्रक्षणविषये साधुरभूत् । तथा गां गां च परि वृषं वृषमाभिव्याप्य बलितां परि बलिष्ठताविषये साधुरभूत् । शरदि हीभा माद्यन्ति । अश्वाश्च रक्तस्रावं कृत्वा घृतदानादिना पाल्यन्ते । वृषभाश्च बलिष्ठाः स्युः ॥

भागिनि । प्रति नृपम् । ग्रामपतिं परि । अनु कर्षकम् ॥ लक्षणे । प्रति ग्रामम् । दिशं परि । अनु क्षेत्रम् ॥ वीप्स्ये । इभमिभं प्रति । गां गां परि । अश्वमश्वमनु ॥ इत्थंभूते । मदं प्रति । बलितां परि । अनु पालनम् । इत्यत्र "भागिनि च°" [३७] इत्यादिना द्वितीया ॥

सरोन्ववसितान्यब्जान्यन्वेयुर्येत्सितच्छदाः ।
तेनर्तवोनु शरदमुप गङ्गामिवापगाः ॥ ४ ॥

४. सरोनु । सर इत्यत्र जातावेकवचनम् । अनुः सहार्थे । ततः

१ ए °यंच्छित°.

१ ए लक्षीकृ°. २ ए सी डी °गे ब°. ३ ए बी एफ् °क्तश्रावा°. ४ बी °पभम°. ५ ए बी °क्तश्रावं. ६ बी °म् । प°. ७ सी एफ् वीप्से । इ°. ८ बी °नि जा°.

सरोभिः सह। षिञ् बन्धने। अवसीयन्ते स्मावसितानि संबद्धान्यब्जान्यनु। अत्रानुर्हेतौ। ततः सरोभिः सह संबद्धैरब्जैर्हेतुभिः। यदिति क्रियाविशेषणम्। यत्सितच्छदा राजहंसा एयुरागताः। अर्थाच्छरदि। वर्षासु मेघभयान्मानसं गताः शरदं हि तत आगच्छन्ति। तेन हेतुना ज्ञायते। ऋतवोनु शरदमुप गङ्गामिवापगाः। अत्रानूपौ हीनार्थौ। यथा गङ्गाया अन्या नद्यो हीनास्तथा शरदोन्य ऋतवः शिशिराद्या हीनास्तेषु सितच्छदागमनाभावात्। यो हि सितच्छदतुल्यैर्महापुरुषैराश्रीयते तस्मादन्ये हीनाः स्युः॥

अब्जान्यन्वेयुः। सरोन्ववसितानि। इत्यत्र "हेतुसहार्थेनुना" [३८] इति द्वितीया॥

अनु शरदम्। उप गङ्गाम्। इत्यत्र "उत्कृष्टेनूपेन" [३९] इति द्वितीया॥

शालीन्पक्वान्सप्रमोदं रक्षन्त्यो गोपिका दिनम्।
क्रोशं व्यस्तारयन् गीतीर्नार्तिं गोदोहमप्ययुः॥ ५॥

५. गोपिकाः शालीनां रक्षिकाः स्त्रियो दिनं सकलदिवसं व्याप्य क्रोशं क्रोशप्रमाणभूमिं व्याप्य गीतीर्गानानि व्यस्तारयन्न पुनर्गोदोहमपि यावता कालेन गौर्दुह्यते तावन्तमपि कालमार्तिं खेदमयुर्गताः। यतः पक्वान्निष्पन्नान् शालीन् कलमादीन् सप्रमोदं सहर्षं यथा स्यादेवं रक्षन्त्यः शुकादिभ्यः। सुपक्वशालिदर्शनोद्भूतप्रमोदपारवश्येन सकलं दिनमुच्चैःस्वरेण गायन्त्योपि क्षणमपि खेदं न गता इत्यर्थः। शरदि हि शालयः पच्यन्ते॥

शालीन्पक्वान् रक्षन्त्यः। इत्यत्र "कर्मणि" [४०] इति द्वितीया॥

सप्रमोदं रक्षन्त्यः। इत्यत्र "क्रियाविशेषणात्" [४१] इति द्वितीया॥

---

१ बी °रदं व°. २ डी °रदि हि. ३ एफ् °राश्रिय°. ४ ए °स्माद्धी°.

दिनं रक्षन्त्यः। क्रोशं व्यस्तारयन् । अत्र "काल°" [४२] इत्यादिना द्वितीया ॥ भावादपीच्छन्त्यन्ये । गोदोहं नार्तिमैयुः ॥

पारायणं नवाहेनाधीत्य क्रोशेन चाशिषम् ।
गोदोहेन द्विजा याज्यानभ्यषिञ्चन्यथाविधि ॥ ६ ॥

६. गोदोहेन गोदोहमात्रकालव्याप्त्या यथाविधि वेदोक्तशान्तिमन्त्रोच्चारणादिविध्यनुसारेण याज्यान्नृपामात्यादियजमानान् द्विजा अभ्यषिञ्चन्नस्नपयन् । किं कृत्वा । नवाहेनाश्विनश्वेतप्रतिपदादिदिननवकस्य नवरात्रनाम्नो व्याप्त्यों पारोय्यते गम्यतेनेन पारायणं वेदग्रन्थमधीत्याध्ययनेन समाप्य पूर्णं गुणयित्वेति यावत् । तथा क्रोशेन यावता कालेन क्रोशो गम्यते क्रोशप्रमाणक्षेत्रव्याप्त्या चाशिषं च सप्तशतिकाभिधां सप्तशतप्रमाणां चण्डिकास्तुतिं चाधीत्य गुणयित्वा । शरदि हि पारायणिका द्विजा आश्विनश्वेतप्रतिपदि देवायतनेषु दर्भशलाकैकशतमयब्रह्ममूर्तेरग्रतः कुङ्कुमादिसुरभिद्रव्याढ्यजलभृतं कुम्भं स्थापयित्वा ततो महानवमीं यावदभुक्ता ब्रह्मचारिणो भूशायिनः पारायणं कार्त्स्न्येन तथाधीयते यथा नवमे दिने पूर्णीस्यात्तथा महाप्रभावत्वेन सप्तशतिकां च चण्डिकास्तुतिं महाशिषं गुणयन्ति । तथा च मार्कण्डेयपुराणे चण्डिकोक्तिः ॥

शरत्काले महापूजा क्रियते या च वार्षिकी ।
तस्यां ममैतन्माहात्म्यमुच्चार्यं श्राव्यमेव च ॥ १ ॥

एतन्माहात्म्यं सप्तशतिकोक्तम् । तदेवं पारायणं महाशिषं चाधीत्य

---

१ सी एफ् °न चाशि°.

१ सी डी °दोहनं ना°. २ एफ् °मप्ययुः ॥. ३ सी डी °धि देवोक्त°. ४ बी °स्त्या परो°. ५ ए सी °ते तेन. ६ बी सी डी °णं देवग्र°. ७ सी डी पूर्वं गु°. ८ एफ् °माणच°. ९ सी एफ् °वमी या°. १० सी °म् । एवेदे एवं. डी °म् । एतदेव परा°. ११ ए एफ् °देव पा°.

विजयदशम्यां कुम्भमुत्पाट्य तेभ्यः स्थानेभ्यो राजादिभवनमागत्य राजादिमहायजमानान्प्राङ्मुखानुदङ्मुखान्वा शुचिवस्त्रान्फलहस्तान् शान्तिमन्त्रोच्चारपूर्वं शान्तयेभिषिञ्चन्ति ॥

अधीयानैर्दिनमपि च्छन्दो नाग्राहि माणवैः ।
गोपीगीत्या हृदोद्भ्रान्तैः समेन विषमेण च ॥ ७ ॥

७. अपिर्भिन्नक्रमे । दिनं सकलदिवसं व्याप्याधीयानैरपि पठद्भिरपि माणवैर्बटुभिश्छन्दो जयदेवादि[२] वेदो वा नाग्राहि नागमितम् । केन कृत्वा । समेन तुल्यलक्षणलक्षितपादचतुष्टयेन श्रियादिसमच्छन्दसा विषमेण च भिन्नलक्षणलक्षितपादचतुष्केण पदचतुरूर्ध्वादि[३]विषमच्छन्दसा च । यद्वा समेन लक्षणया सुखपाठ्यस्थानकेन विषमेण च दुःखपाठ्यस्थानकेन च । यतो गोपीगीत्या गोपीनां शाल्यादिरक्षिकाणां स्त्रीणां गानेन हेतुना हृदा कृत्वोद्भ्रान्तैः शून्यचित्तैः । शून्यचित्तेन बहुपठ्यमानमपि हि शास्त्रं नागच्छति ॥

धान्येनार्थ इतीन्द्रस्य मासा पूर्वं पयोमुचः ।
कौतुकेनार्थिनः पौरा[१] स्तम्भेनाद्राक्षुरुत्सवम् ॥ ८ ॥

८. धान्येनार्थः कार्यमिति हेतोर्य इन्द्रस्य स्तम्भेन महाध्वजपताकाकलितोन्नतस्थूणादण्डेनोपलक्षितं उत्सवस्तं पौरा अद्राक्षुः । किंभूताः सन्तः । कौतुकेनार्थिनोभिलाषुकाः । केत्याह । पयोमुचो वर्षाऋतोः सकाशान्मासा मासेन पूर्वम् । 'पूर्वं तु पूर्वजे । प्रागग्रे श्रुतभेदे च' इत्यभिधानादग्रत आश्विनपूर्णिमायामित्यर्थः । इन्द्रमहोत्सवो हि श्वेताश्विनाष्टम्या आरभ्य पूर्णिमां यावद्विधीयते । तथा चावश्यकचूर्णावस्वाध्यायप्रस्ताव

१ बी डी °राः स्त°.

१ सी °श्वति ॥. २ ए डी °दिर्वेदो. ३ ए बी सी डी एफ् °रूर्ध्वादि°. ४ डी °तमुत्स°. ५ सी डी °त्सवं पौ°. ६ सी °रा आद्रा°. ७ बी °त्यर्थेभि°.

उक्तम् । इन्दमहो आसो य पुन्निमाए हवइत्ति ॥ भविष्योत्तरपुराणेपि शारदमहोत्सववर्णनावसर उक्तम् ॥

श्रवणादिभरण्यन्तं दिनानामष्टकं नृपः ।
शुभार्थं सर्वलोकानां कुर्यादिन्द्रमहोत्सवम् ॥ १ ॥

श्रवणभरणीनक्षत्रे ह्याश्विनश्वेताष्टमीपूर्णिमोद्देश एव चन्द्रेण युज्यते। अत एवाश्विनपूर्णिमाया आश्वयुजीति नाम । स चेन्द्रोत्सवः प्रचुरधान्यनिष्पत्त्याद्यर्थं क्रियते । तथा च वराहमिहिरसंहितायामैन्द्रं वचः ।

येषु देशेषु मनुजा भक्तिभारपुरःसराः ।
जनयिष्यन्ति वर्षान्ते मया दत्तं महाध्वजम् ॥ १ ॥
तेषु देशेषु मुदिताः प्रजा रोगविवर्जिताः ।
प्रभूतान्ना धर्मयुक्ता वृष्टमेघा महोत्सवाः ॥ २ ॥
भविष्यन्ति सुवेषाश्च सुभाषाश्च सुभूषणाः ॥ इत्यादि ॥

मित्रैर्मासावरैर्वाचा निपुणैः सह गोकुले ।
गुडेन मिश्रं वेषेण श्लक्ष्णा गोपाः पयः पपुः ॥ ९ ॥

९. स्पष्टः । किं तु वेषेण श्लक्ष्णाः सूक्ष्मा अकर्कशा वा गोकुलस्वामित्वाच्छरद उष्णत्वाच्च परिहितसूक्ष्ममृदुवस्त्रा इत्यर्थः । गोपा गोष्ठाधिकृता मासा मासेनावरैर्लघुभिरात्मसमानैरित्यर्थः । शरदि हि पित्तोद्रेकः स्यादितीक्षुविकारमिश्रपयःपानश्वेतसूक्ष्मांशुकपरिधानादिशैत्यक्रिया पथ्यत्वाद्विधेया । उक्तं च ।

शरत्काले स्फुरत्तेजःपुञ्जस्यार्कस्य रश्मिभिः ।
तप्तानां कुप्यति प्रायः प्राणिनां पित्तमुल्बणम् ॥ १ ॥ ततश्च
शालीन्दुरुग्घनाम्बूनि श्वेतसूक्ष्मांशुकानि च ।
क्षीरमिक्षुविकाराश्च सेव्याः शरदि भूरिशः ॥ २ ॥

१ एफ् °त्सवः । श्र°. २ ए °त्सवप्र°. ३ एफ् °था व°. ४ ए °हरिसं°. ५ बी °क्ष्णाः शूक्ष्मा. ६ बी °तसुशूक्ष्म° एफ् °तमृक्ष्माव°. ७ ए °ग् । शा°. ८ ए °तशूक्ष्मां°.

दाण्डायां गिरिणा काणाः खण्डाः शंकुलया मिथः ।
ग्राम्या युवतयानूना मुष्टिभिः कलहं व्यधुः ॥ १० ॥

१०. युवतया यौवनेनानूना अहीना यौवनस्था ग्राम्या ग्रामीणदारका मुष्टिभिर्मिथः कलहं युद्धं व्यधुर्यतो दण्डः प्रहरणमस्यां "प्रहरणात्क्रीडायां णः" [६.२.११६] इति णे दाण्डा शङ्कुलाकन्दुकक्रीडा । तस्यां गिरिणा कन्दुकेन कर्त्रा काणाः कृताः शङ्कुलागाढघातेनोर्ध्वमुच्छलितेन कन्दुकेनाक्ष्णो व्याघातात् । तथा शङ्कुलया वक्राग्रया क्रीडनयष्ट्या कर्त्र्या खण्डाः खण्डगुणोपेताः कृताः । मिथः प्रतिकूलमाहन्यमानात्कन्दुकात्स्खलितायाः शङ्कुलायाः पादेषु गाढप्रहारात्कुण्ठीकृता इत्यर्थः । शरदि हि पङ्कस्य शुष्कप्रायत्वाद्रजसश्चोत्थानाभावाद्दाण्डा क्रीडा प्रवर्तते । तस्यां च क्रीडकैः श्रेणीद्वयं कृत्वा शङ्कुलाभिर्मिथः प्रतिकूलं विवक्षितस्वसीमपारप्रापणार्थं कन्दुक आहन्यते ॥

नवाहेन । क्रोशेनाधीत्य । इत्यत्र "सिद्धौ तृतीया" [४३] इति तृतीया ॥ सिद्धाविति किम् । अधीयानैर्दिनमपि च्छन्दो नाग्राहि माणवैः ॥ अत्र व्याप्तिमात्रं गम्यते न सिद्धिः ॥ भावादपीच्छन्त्यन्ये । गोदोहेनाभ्यषिञ्चन् ॥

हेतौ । गोपीगीत्योत्क्रान्तैः ॥ कर्तरि । माणवैर्नाग्राहि ॥ करणे । हृदोत्क्रान्तैः । समेन विषमेण च नाग्राहि ॥ इत्थंभूतलक्षणे । स्तम्भेनाद्राक्षुरुत्सवम् । अत्र "हेतु°" [४४] इत्यादिना तृतीया ॥ तथा धान्येनार्थः । मासा पूर्वम् । मासावरैः । मुष्टिभिः कलहम् । वाचा निपुणैः । गुडेन मिश्रम् । वेषेण श्लक्ष्णाः ।

१ ए दण्डा°. २ ए सी °ण्टा शं°. ३ डी °तयोनू°.

१ डी °तयो यौ°. २ डी °म्या ग्राम्याणां दा°. ३ ए बी सी डी °मिथो क°. ४ डी णे च दा°. ५ बी °क्ष्णोर्व्याघा°. ६ ए बी सी एफ् °त्कुण्टीकृ°. ७ एफ् °नाभवनाद्दण्डा. ८ एफ् °तसुमी°.

युवतयानूनाः । शङ्कुलया खण्डाः । गिरिणा काणाः । इत्यादौ हेतौ कृतभवत्यादिगम्यमानक्रियापेक्षया कर्तरि करणे वा तृतीया ॥

पुलिनानि सह क्षौमैः सरांसि नभसा समम् ।
ज्यौत्स्न्योमाह्नामिषन्मेघाः साकं कैलाससानुभिः ॥ ११ ॥

११. शरदि हि नदीतटानि प्रावृषेण्याम्बुपूरक्षालितत्वेन निर्मलानि तरङ्गितजलसंशोषेण तरङ्गितवालुकानि च स्युस्तथा शीतलत्वेन शरत्कालोचितत्वादावलनतरङ्गितानि श्वेतानि क्षौमाणि दुकूलानि लोकैः परिधीयन्ते । तथा सरांसि नभश्चातिनिर्मलानि स्युस्तथा ज्यौत्स्न्यो ज्योत्स्नान्विता निशा अहश्चातिसप्रकाशानि स्युस्तथा मेघा निर्जलत्वेन कैलाससानवश्च वार्षिकाम्बुपूरधौतत्वेनातिश्वेताः स्युस्ततश्च पुलिनादीनि क्षौमाद्यैः सह सादृश्यादमिषन् । येप्येकत्र स्थाने समानगुणाः स्युस्ते मिथः स्पर्धन्ते । अमा सह ॥

बन्धूकान्यधरैः स्त्रीणां पद्मानि युगपन्मुखैः ।
सार्थं हासैश्च कासा(शा ?)नि स्पर्धां न्यक्षेण चक्रिरे ॥१२॥

१२. स्पष्टः । नवरं युगपत्सह । न्यक्षेण सह सामस्त्येन । शरदि ह्यारक्तानि बन्धूकपुष्पाणि विकसितानि पद्मानि श्वेतानि काशपुष्पाणि च जायन्तेतोधरादिभिः सह स्पर्धा । एतेन चाधरादिसमानैर्बन्धूकादिभिः शरत् कामिनीव भातीति व्यञ्जितम् ॥

---

१ ए कानि.

१ बी °तजलवा°. २ एफ् °नि क्षौ°. ३ सी °नि श्वेक्षौ°. ४ एफ् °काम्बूपू°. ५ एफ् °त्वेन श्वे°. ६ बी °ण सा°. ७ ए बी एफ् °पुष्फाणि.

कार्त्स्न्येनाब्जवनोत्क्लेदे सुखेनास्थुः सितच्छदाः ।
दुःखेनाब्दजले प्राप्ये कष्टेनासंश्च चातकाः ॥ १३ ॥

१३. कार्त्स्न्येन सामस्त्येन । उत्क्लेदे विकाशे । अब्दजले मेघजले[1] । शिष्टं स्पष्टम् ॥

सस्येष्वाप्येष्वनायासेनाप्येनायासमम्बुनि ।
पान्थाः पथि सुखं प्रोषुर्दुः[1]खमूषुश्च तत्प्रियाः ॥ १४ ॥

१४. प्राचुर्येण निष्पन्नत्वाद्धान्येषु सुखेन प्राप्येषु तथा जलापूर्णतडागादिकत्वात्सुखेन जले प्राप्ये सति पान्थाः पथि सुखं प्रोषुर्देशान्तरं गतास्तत्प्रियाश्च पान्थभार्याश्च दुःखमूषुर्विरहात्कष्टेने[2] स्थिताः ॥

क्षौमैः सह । इत्यत्र "सहार्थे" [४५] इति तृतीया ॥ अर्थग्रहणात् नभसा समम् । अह्नामा । सानुभिः सान्तम् । सुखैर्युगपत् । हासैः सार्धम् ॥ अर्थाद्गम्यमाने अघरैः स्पर्धाम् । न्यक्षेण स्पर्धाम् । कार्त्स्न्येनाब्जवनोत्क्लेदे । इत्यादावपि सहार्थोस्ति ॥ सुखेना[3]स्थुः । दुःखेन प्राप्ये । कष्टेनासन् । अनायासेनाप्येषु[4] । इत्यादा[5]वा[6]स्यादिक्रियाभिः सह सुखादेः सहार्थोस्ति । क्रियाविशेषणत्वविवक्षायां तु द्वितीयैव । अनायासमाप्ये । सुखं प्रोषुः । दुःखमूषुः ॥

जात्योग्रोनु तिमीन्वभेस्थात्प्रकृत्या शठो बकः ।
अक्ष्णा काणः पदा खञ्जः खलाः प्रायेण मायिनः ॥१५॥

१५. जात्या स्वभावेनोग्रः क्रूरस्तथा प्रकृत्या स्वभावेन शठो मा-

१ ए °प्रोखुर्दुः°.

१ डी °ले । शेषं स्प°. २ सी डी °न प्राप्ये स्थि°. ३ सी °नाप्रा°. ४ डी °प्ये । इ°. ५ एफ् °दावस्था°. ६ डी °वाप्यादि°.

यावी बकस्तिमीन्मत्स्याननुलक्ष्यीकृत्य वप्रे नद्यादितटेस्थात्। कीदृक्सन्। अक्ष्णा काणस्तिमिग्रहणायाधोबद्धदृक्त्वेन संकोचितैकाक्षत्वात्काण इव भवन्नित्यर्थः। तथा पदा पादेन खञ्जो मायित्वात्तिमिविश्वासनाय खोडवन्मन्दं मन्दं गच्छंश्चेत्यर्थः। युक्तं चैतत्। यतः खलाः प्रायेण बाहुल्येन मायिनः स्युः। बकश्च जात्योग्रत्वात्खलः। शरदि ह्यनगाधे स्वच्छे च जले सुखेन दृश्यांस्तिमीन् ग्रहीतुं बका नद्यादितटेषु विचरन्ति॥

गोत्रेण पुष्करावर्त किं त्वया गर्जितैः कृतम्।
विद्युतालं भवत्वद्भिर्हंसा ऊचुर्न्विदं घनम्॥ १६॥

१६. हंसा घनं मेघमिदं न्वेतदिवोचुः। यथा गोत्रेण संतानेन हे पुष्करावर्त पुष्करावर्तगोत्र मेघ स्वसमयाभावेन निष्फलत्वात्त्वया किम्। किमिति प्रतिषेधेव्ययम्। एवं कृतमलं भवत्वित्येतेपि। कृतमित्यकारान्तोनव्ययोपि। त्वया तव गर्जितैर्विद्युताद्भिर्जलैश्च सृतमित्यर्थः। शरदि हि हंसाः कलं शब्दायन्ते तत्प्रतिकूला घनगर्जितादयश्च स्तोकं स्तोकं प्रादुर्भवन्तीत्येवमाशंक्का॥

अक्ष्णा काणः। पदा खञ्जः। प्रकृत्या शठः। प्रायेण मायिनः। गोत्रेण पुष्करावर्त। जात्योग्रः। इत्यत्र "यद्भेदैस्तद्वदाख्या" [४६] इति तृतीया॥ प्रायेण मायिन इत्यत्र प्रायशब्दो बाहुल्यवचनस्तस्य च भेदो मायित्वं यथाक्ष्णः काणत्वं मायित्वेन च बाहुल्यवतां खलानामाख्या। यथा काणत्वेन काणाक्षियुक्तस्य नरस्याख्येति तद्वदाख्यावाचिनः प्रायात्तृतीया॥

१ बी °न् गृही°. २ सी स्वस्वस°. ३ एफ् निःफल°. ४ सी डी किमपि. ५ सी डी कृत्यमि°. ६ ए °न्ते न त°. सी °न्ते नात्प्र°. डी °न्ते तान्प्रति°. ७ ए सी डी °कं प्रा°. ८ ए °शङ्काः॥. ९ डी एफ् °थाक्ष्णा का°. १० बी खकना°. ११ एफ् °त्वे का°. १२ एफ् °णाक्षयु°. १३ एफ् प्रायस्तृ°.

गर्जितैः कृतम् अग्निर्भवतु । विद्युतालम् । किं त्वया । इत्यत्र "कृतार्थैः" [४७] इति तृतीया ॥

मघाभिः पायसं श्राद्धं मघासु ब्रह्मचर्यवत् ।
श्रुत्या स्मृतौ च प्रसिता विदधुर्विधिनोत्सुकाः ॥ १७ ॥

१७. द्विजा मघाभिर्मघाभिश्चन्द्रयुक्ताभिर्युक्ते काले पायसं दुग्धसंबन्धि श्राद्धं पितृतर्पणं विदधुर्यथा मघासु ब्रह्मचर्यं विदधुः । किंभूताः सन्तः । श्रुत्या वेदे स्मृतौ च धर्मशास्त्रे च प्रसिता नित्यप्रसक्ताः श्रुतिज्ञाः स्मृतिज्ञाश्च । अत एव विधिनोत्सुका विधिर्वामजान्ववनमनयज्ञोपवीतापसव्यत्वकरणादिस्तत्रात्यन्तं प्रसक्ताः । शरदि हि श्राद्धपक्षः स्यात्तत्र चावश्यं श्राद्धकृद्भिर्ब्रह्मचर्यं विधीयते । यत्स्मृतिः ।

ताम्बूलं दन्तकाष्ठं च स्निग्धस्नानमभोजनम् ।
रत्यौषधपरान्नानि श्राद्धकृत्सप्त वर्जयेत् ॥ १ ॥

अन्यथा तद्रेतः पितृमुख उपतिष्ठतीति । तत्र चावश्यं मघाश्चन्द्रेण युज्यन्ते । ततस्तास्वपि श्राद्धकृतो ब्रह्मचर्यं विदधति । अत एवोपमाद्वारेणोक्तं मघासु ब्रह्मचर्यवदिति । तथा मघासु पायसमेव श्राद्धं संकल्परूपं क्रियते । तथा च पितृसंहितायां पितृवचः ।

अपि नः स कुले जायाद्यो नो दद्यात्त्रयोदशीम् ।
पायसं मधुसर्पिर्भ्यां वर्षासु च मघासु च ॥ इति ।

न तु पिण्डप्रदानादि क्रियते प्रत्यवायात् । तदुक्तं स्मृतौ ।

मघायां पिण्डदानेन ज्येष्ठपुत्रो विनश्यति । इत्यादि ॥

१ ए सी डी °घादिभि°. एफ् घाभिश्च°. २ ए सी °क्ताः प्रति°. ३ ए सी °त्स्मृति ता°. ४ सी एफ् श्राद्धस°. ५ ए बी सी एफ् °र्भिर्भ्यां व°. ६ सी डी एफ् °ण्डप्रदा°.

उत्सुकाः करदानेववद्धाः कृष्या पशुष्वपि ।
व्रीहीन् द्विद्रोणान् द्विद्रोणान् द्विद्रोणैश्च तिलान्ददुः ॥१८॥

१८. कृष्या महीकर्षणे पशुष्वपि गोमहिष्यादिषु चाववद्धा नित्यप्रसक्ता अत एव करदाने । करः कृषिपशुचारणादिकृतराजकीयभूम्युपभोगहेतुको राजग्राह्यो भागः । तस्य दान उत्सुका अत्यन्तं प्रसक्ता असाधारणविशेषणोपादानाद्ग्राम्याः करोद्ग्राहकराजपुरुषेभ्यो ददुः । कान् । व्रीहीन् । किंभूतान् । द्रोणश्चतुःषष्टिः कुडवाः । द्वौ द्रोणौ मानमेषां "मानम्" [६.४.१६८] इतीकणो "आनाक्र्यद्विक्षुब्" [६.४.१४०] इति लुपि वीप्सायां द्विरुक्तौ च द्विद्रोणान्द्विद्रोणान् । तथा द्विद्रोणैश्च तिलान् । चो भिन्नक्रमे । द्विद्रोणमानान्द्विद्रोणमानांस्तिलांश्च । शरदि हि ग्राम्याः सस्येषु निष्पन्नेषु राजकरं ददते ॥

क्रौञ्चान्सहस्रं सहस्रं पञ्चकेनान्वजीगणन् ।
सहस्रेण शुकान् गोप्यः पञ्चकं पञ्चकं रसात् ॥ १९ ॥

१९. गोप्यः क्षेत्ररक्षिका नार्यः सहस्रं सहस्रं क्रौञ्चान्पक्षिभेदान् रसात्कौतुकात्पञ्चकेन पञ्च संख्या मानमस्य "संख्या डतेः॰" [६.४.१३०] इत्यादिनाके पञ्चकः संघस्तेनान्वजीगणन्पञ्च पञ्च कृत्वा गणितवत्य इत्यर्थः । तथा सहस्रेण सहस्रसंख्यान् सहस्रसंख्यान् शुकान् । पञ्चकं पञ्चकमन्वजीगणन् । पञ्चकं पञ्चकमित्यत्र शुकसामानाधिकरण्येपि पञ्चकशब्दाद्ब्राह्मणाः संघ इतिवदेकवचनम् । शरदि हि क्रौञ्चाः शुकाश्च बाहुल्येन स्युः ॥

---

१ ए ॰हश्रंसहश्रं प॰. २ ए बी ॰हश्रेण.

---

१ एफ् ॰दाग्राम्याः. २ एफ् ॰ष्टिकु॰. ३ बी ॰द्विः लु॰. ४ सी ॰दि ग्रा॰.
५ एफ् ॰स्रं क्रौ॰.

मघाभिः । मघासु । इत्यत्र "काले भात्०" [४८] इत्यादिना वा तृतीया ॥

श्रुत्या प्रसिताः स्मृतौ प्रसिताः । विधिनोत्सुकाः करदाने उत्सुकाः । कृष्यावबद्धाः पशुष्ववबद्धाः । इत्यत्र "प्रसित०" [४९] इत्यादिना वा तृतीया ॥

द्विद्रोणैः । पञ्चकेन । सहस्रेण । इत्यत्र "व्याप्ये द्वि०" [५०] इत्यादिना वा तृतीया ॥ पक्षे । द्विद्रोणान्द्विद्रोणान् । पञ्चकं पञ्चकम् । सहस्रं सहस्रम् ॥ तृतीया वीप्सायां विहितेति तृतीयान्तस्य पदस्य द्विरुक्तिर्न स्यात् । द्वितीया तु कर्मणि विहिता न वीप्सायामतस्तदन्तस्य द्विरुक्तिः स्यात् ॥

संजानाना गुणैः प्रेम संजानन्तः पुरा रतेः ।
संप्रायच्छन्त दासीभिर्व्रीहीन् ग्रामीणदारकाः ॥ २० ॥

२०. ग्रामीणदारका ग्राम्यपुत्रा दासीभिश्चेटीनां व्रीहीन्संप्रायच्छन्त ददुः यतो गुणै रूपलावण्यादिगुणान्प्रेम स्नेहं चार्थाद्दासीनां संजानाना जानन्तस्तथा पुरा पूर्वं रतेः सुरतस्य संजानन्तः स्मरन्तः । ग्राम्या ह्यधर्म्यत्वादधर्म्यासु दासीषु रमन्ते ॥

संप्रायच्छद्बिसं हंस्यै हंसो यत्तन्मुदेऽभवत् ।
आत्मने रोचनाल्लब्धं कस्मै न स्वदतेऽथ वा ॥ २१ ॥

२१. हंसो यद्बिसं मृणालं हंस्यै स्वप्रियायै संप्रायच्छत्प्रेम्णा ददौ तद्बिसं हंस्या मुदेऽभवत् । अथ वात्मने रोचनाद्रोचत इत्येवं शील "इङित्०" [५.२.४४] इत्यादिनाने रोचनस्तस्माल्लब्धं प्राप्तं वस्तु कस्मै न स्वदते किं तु प्रीतेर्वर्धकत्वात्सर्वस्मै रुचिमुत्पादयतीत्यर्थः ॥

१ प स्मृतौ प्र°. २ सी डी °काः कृ°. ३ सी °ना तृ°. ४ प °द्दश्रेण्येत्य°. ५ सी °णान् प°. ६ प °हश्रंसहश्रम् । तृ°. ७ पफू °यान्त्यप°. ८ पफू ग्रामपु°. ९ प रूपाला°. १० प नाजा°. ११ पफू °धर्मत्वा°.

जज्ञे स्वात्यम्बु मुक्ताभ्यो दुग्धं दध्ने न्वकल्पत ।
रिक्तोपि न ययौ मेघः शरदे धारयन्नृणम् ॥ २२ ॥

२२. नुरुपमार्थे । यथा दुग्धं दध्नेकल्पत दधिरूपविकारमापन्नं तथा स्वातिशब्देन स्वातिनक्षत्रयुतरवियुक्तः काल उपचारादुच्यते । स्वातावम्बु मेघजलं स्वात्यम्बु मुक्ताभ्यो जज्ञे मुक्ताफलरूपं विकारमापन्नम् । शरदि दुग्धानि दधीनि चान्यर्तुसकाशात्प्रचुराणि विशिष्टानि च स्युरित्युपमानेनोक्तम् । तथा स्वातौ जलकणा ये के चन शुक्तिमुखेषु पतन्ति ते सर्वेपि मुक्ताः स्युरिति प्रसिद्धिः । तथा मेघो रिक्तोपि जलवर्जितोपि न ययौ । उत्प्रेक्ष्यते । शरदे ऋणं धारयन्न् ध्रियते तिष्ठति स्वरूपान्न प्रच्यवते ऋणं कर्तृ तद्ध्रियमाणं प्रयुञ्जान इव । ऋणिको हि रिक्तो द्रव्यरहित ऋणशोधनाशक्तत्वाद्यत्रोत्तमर्णेन राजाज्ञया ध्रियते तस्मात्स्थानान्न गच्छति ॥

गुणैः संजानानाः । प्रेम संजानानाः । इत्यत्र "समो ज्ञोस्मृतौ वा" [५१] इति वा तृतीया ॥ अस्मृताविति किम् । रतेः संजानन्तः ॥

दासीभिः संप्रायच्छन्त । इत्यत्र "दामः०" [५२] इत्यादिना तृतीया । दाम आत्मनेपदं च ॥ अधर्म्ये इति किम् । हंसै संप्रायच्छत् । अत्र "चतुर्थी" [५३] इति संप्रदाने चतुर्थी ॥

मुदेभवत् । इत्यत्र "तादर्थ्ये" [५४] इति चतुर्थी ॥

रुच्यर्थैः प्रेये । आत्मने रोचनात् । कस्मै स्वदते ॥ क्लृप्यर्थैर्विकारे ।

१ ए °ल्पतः ।.

१ बी सी डी एफ् °युक्तर°. २ एफ् °युक्तका°. ३ सी मुक्तांफ°. ४ सी °न्यत्सर्वेस°. ५ एफ् °त्प्रेक्षते ।. ६ सी °युञ्जन°. डी °युञ्जत इ°. ७ सी हि रक्तो°. ८ एफ् °नासक्त°. ९ डी °क्तश्चान्यत्रो°. १० एफ् °धर्म इ°. ११ एफ् °ते । क्लृप्य°.

दुग्धं दधेकल्पत । जज्ञे स्वात्यम्बु मुक्ताभ्यः ॥ धारियोत्तमर्णे । शरदे धारयद्घृणम् । इत्यत्र "रुचिकृप्यर्थ०" [५४] इत्यादिना चतुर्थी ॥

ध्वानैः प्रत्यशृणोन्मैत्रीं शिखिभ्योनुगृणन्घनः ।
तस्मै प्रतिगृणन्तस्तेप्याशृण्वन्केकयाथ ताम् ॥ २३ ॥

२३. ध्वानैर्गर्जितैः कृत्वा शिखिभ्यो मयूरेभ्योनुगृणन् शिख्युक्तमनुवदन्निव प्रशंसतो वा शिखिनः प्रोत्साहयन्निव घनो ध्वानैरेव मैत्रीमान्तरप्रीतिं शिखिभ्यः प्रत्यशृणोदिव मेघदर्शनमात्रोद्भूतशिखिकेकानन्तरमेव गर्जनादङ्गीचकारेव । अथ घनस्य मैत्रीप्रतिश्रवणानन्तरं केकया तस्मै घनाय प्रतिगृणन्तो घनोक्तमनुवदन्त इव प्रशंसन्तं वा घनं प्रोत्साहयन्त इव । तेपि शिखिनोपि तां मैत्रीं तस्मै केकया आशृण्वन्निव गर्जानन्तरमेव केकायनादङ्गीचक्रुरिव । शरद्यपि हि मेघा गर्जन्ति तद्गर्जाश्रवणाच्च शिखिनः प्रीताः केकायन्ते । अतश्चैवमुत्प्रेक्षा । अत एव शिखिघनानामाख्यातृत्वार्थिते उपपद्येते । उत्प्रेक्षाद्योतकाश्चेवशब्दा अत्रावसीयन्ते । यौ ह्यत्यन्तं स्निग्धौ वयस्यौ भवतस्तावन्योन्यमुक्तमनुवदन्तौ प्रशंसयोत्साहयन्तौ चावां मिथो वयस्याविति वाचापि मानसीं प्रीतिं प्रतिजानीते ॥

शिखिभ्यो मैत्रीं प्रत्यशृणोत् । तस्मै तामाशृण्वन् । इत्यत्र "प्रति०" [५६] इत्यादिना चतुर्थी ॥ अर्थिनीति किम् । शिखिभ्यो मैत्रीं प्रत्यशृणोदित्यत्र मैभ्यां मा भूत् ॥

तस्मै प्रतिगृणन्तः । शिखिभ्योनुगृणन् । इत्यत्र "प्रत्यनोः०" [५७] इत्यादिना चतुर्थी ॥ आख्यातरीति किम् । तस्मै केकया प्रतिगृणन्त इत्यत्र केकायां मा भूत् ॥

१ सी अथाप घ°. डी अथापि घ°. २ सी °र्जाश्राव°. ३ सी डी °पद्यते ।. ४. पफ़् °मुक्ताम°. ५ पफ़् °नाति शि°. ६ बी प्रत्येत्या°. ७ सी °र्थी । आख्या°. ८ पफ़् °द प्र°.

रात्स्यन्ति देवतास्तुभ्यं नाथ किं मह्यमीक्षसे ।
एवमाराधयन्सांयात्रिकेभ्यः कुलयोषितः ॥ २४ ॥

२४. कुलयोषितः सांयात्रिकेभ्यः पोतवणिग्भ्यः प्रस्तावाद्वीपान्तरे जिगमिषुभ्य आराधयन् । द्वीपान्तर[1]जिगमिषुपोतवणिजां क्षेमलाभादिविषयं दैवं पर्यालोचयन् । सविचारमूचुरित्यर्थो ने[2] त्वकुलीना इव संभावितचिरकालीनविरहरूपमहापराधविधानरुष्टत्वात्तां[3]श्रुक्रुशुः । कथमित्याह । हे नाथ वल्लभ रात्स्यन्ति देवतास्तुभ्यं तव द्वीपान्तरे[4] गच्छतः क्षेमलाभादिविषयं दैवं समुद्रदेवताद्या देवताः पर्यालोचयिष्यन्ति तव क्षेमलाभादिविषये देवताः सांनिध्यं करिष्यन्तीत्यर्थः । अतः किं मह्यमीक्षसे मम विरहेऽसौ पतिव्रता भीरुः कथं भविष्यतीति क्षेमा[5]क्षेमादिवि[6]षयं दैवं किमिति निरूपयसि । देवताप्रसादात्त्वयि क्षेमाभ्युदयादिमति त्वदेकशरणाया मम नितरां क्षेमाभ्युदयाद्येवेति मद्दैवचिन्तया त्वया[7] न खेद्यमिति भाव एवम् । यद्वा कुलयोषितः सांयात्रिकेभ्य आराधयन् । पोतवणिजां गमनविषयमभिप्रायं विचारितवत्यो विचारपूर्वमूचुरित्यर्थः । कथमित्याह । हे देव देववन्मर्मा[8]राध्य हे नाथ[9] ता मत्सपत्न्यस्तुभ्यमारां[10]स्यन्ति अकुलीनत्वेनासतीत्वादेतेऽस्मत्पतयः परपुरुषाभिसरणविघ्नाः कदा देशान्तरं यास्यन्तीति तव गमनाभिप्रायं[11] पर्यालोचयिष्यन्ति न तु वयं कुलीनत्वात्तस्मात्किं मह्यमीक्षसेऽस्या अभिप्रायः कीदृश इति विमतिपूर्वं किमिति निरूपयसि । अहं त्वद्विरहं क्षणमपि नाभिलषामीत्यर्थः । एवम् सांयात्रिकाणां कुलयोषितां च बहुत्वेपि प्रत्येकं स्वस्वभर्तारं प्रति भणनविवक्षया तुभ्यमित्यादावेकवचनम् ॥

१ एफ् °न्तरं जि°. २ सी न कु°. ३ बी एफ् °त्वात्ताश्रु°. सी °त्वाभ्याश्रु°. डी °त्वादिभ्यांश्रु°. ४ डी °न्तरमिच्छ°. ५ एफ् °मादि°. ६ सी डी °षये दै°. ७ ए °या निखे°. ८ डी °मात्रारा°. ९ ए °थ म°. १० ए °रात्सन्ति. ११ ए °यं लो°.

असाधयन्न पुत्रेभ्यो दारेभ्यो दद्दशुर्न च ।
प्रोषुर्लाभाय राध्यन्तोपश्यन्तः श्रान्तयेध्वगाः ॥ २५ ॥

२५. अध्वगाः पान्थाः पुत्रेभ्यो नासाधयन् । अस्मद्विरहेमी कथं भविष्यन्तीति पुत्राणां क्षेमाक्षेमादिविषयं दैवं नाचिन्तयन् । एवं दारेभ्यो दद्दशुर्न च । किं तु लाभाय राध्यन्तो वृद्धिं विचारयन्तोत एव श्रान्तयेपश्यन्तो मार्गखेदमविचारयन्तः सन्तः प्रोषुः । शरदि हि पान्था व्यवहारार्थं देशान्तरं यान्ति ॥

तुभ्यं रारस्यन्ति । मह्यमीक्षसे[2] । इत्यत्र "यद्वीक्ष्ये राधीक्षी" [५८] इति चतुर्थी ॥ राधीक्ष्यर्थधातुयोगेपीच्छन्त्यन्ये । सांयात्रिकेभ्य आराधयन् । पुत्रेभ्यो नासाधयन् । राधिरपरपठितश्चुरादिर्णिगन्तो वा । साधिर्णिगन्त एव । दारेभ्यो दद्दशुः । राधी[3]क्ष्यर्थविषयाद्विप्रष्टव्यादिच्छत्यन्यः । लाभाय राध्यन्तः । श्रान्तयेपश्यन्तः ॥

लोहिनीव तडि[1]ज्ज्योत्स्ना तापाय विरहे हि तत् ।
स्त्रैणं स्म श्लाघते पत्ये तिष्ठते शपते ह्नुते ॥ २६ ॥

२६. [4]विरहे सति हि यस्माज्ज्योत्स्ना लोहिनीव तडिल्लोहिता विद्युदिव तापायासीत् । लोहिता हि विद्युत्सन्तापाय स्यात् । यदुक्तम् ।

वाताय कपिला विद्युदा[5]तपायातिलोहिनी ।
पीता वर्षा[6]य विज्ञेया दुर्भिक्षा[7]य भवेत्सिता ॥ इति ।

तत्तस्मात्स्त्रैणं पत्ये श्लाघते स्म तिष्ठते स्म शपते स्म ह्नुते स्म ।

१ प्र °डिज्ज्योत्स्ना.

१ पफ् °मादि°. २ बी °मीक्ष्यसे. ३ प्र °धीक्षार्थ°. ४ सी डी वि स° ५ बी °दातापा°. ६ बी °र्षा च वि°. ७ सी °क्षायामवत्सि°.

स्मेति सर्वक्रियासु योज्यम् । श्लाघास्थानशपथापह्नवान् कुर्वाणं स्त्रैणं कर्तृ आत्मानं ज्ञाप्यं जानन्तं पतिं प्रयोजयति स्मेत्यर्थः । पत्य इत्यत्र जातावेकवचनम् । इदमुक्तं[1] स्यात् । पतीनपराधकत्वेन चाटुकशतैरनुनयतोप्यवगणय्य मानावष्टम्भेनावस्थिता अपि शारदज्योत्स्नोदये[3] कामोद्रेकाद्विगलितमानाः सत्यो नार्यः । श्लाघया वक्रोक्तिभङ्गीभिः स्वप्रशंसया स्थित्यानुरागादिसूचकस्थानविशेषेण शपथेन सपत्न्युद्भावितस्य[4] मिथ्यारूपस्य व्यलीकस्य निरासेन सपत्न्युद्भावितं पतिभिः संभाव्यमानं व्यलीकं यद्यस्मासु कुत्राप्यस्ति तदा वयं मात्रादिशरीरं स्पृशाम इति प्रत्यायकवाक्येन वा निह्नवेन च प्राग्मानवशेन कृतस्यावज्ञाद्यपराधस्यापलापेन[5] चात्यन्तिकानुरागभक्तिरिरंसुतादिगुणोपेतं ज्ञाप्यमात्मानं पतीन् ज्ञापितवत्यः ॥

तापाय लोहिनी तडित् । इत्यत्र "उत्पातेन ज्ञाप्ये" [५९] इति चतुर्थी ॥

पत्ये श्लाघते । ह्नुते । तिष्ठते । शपते । इत्यत्र "श्लाघह्नुस्था°" [६०] इत्यादिना चतुर्थी ॥

पाकाय प्रयता जग्मुर्नीवारेभ्यस्तपस्विनः[1] ।
चतुर्मासोपवासेपि नेयुर्ग्रामं[2] पुराय वा ॥ २७ ॥

२७. पाकाय प्रयताः पक्तुमुद्यताः सन्तस्तपस्विनस्तापसा[6] नीवारेभ्यो वनव्रीहीनाहर्तुं ययुः । एतेनैषां स्वयंपाकित्वमसंग्रहश्चोक्ते[7] । शरदि हि नीवारा बाहुल्येन स्युः । परं चतुर्षु मासेषु भवो "वर्षाका-

१ ए बी °पश्विनः । २ ए °युग्रामं.

१ ए °मु युज्यते श्ल°. २ सी °मुक्ते स्या°. ३ सी °रदाज्यो°. ४ सी डी °वितं. ५ एफ् °पलपे°. ६ बी °पश्विन°. ७ सी °श्चोक्तेः श°. डी एफ् °श्चोक्तः श°.

लेभ्यः" [६.३.८०] इतीकणि तस्य लुपि चतुर्मासः स चासावुपवासश्च तस्मिन्नपि चतुरो मासानभुक्त्वापीत्यर्थः । ग्रामं पुराय वा नेयुः पारणे प्रधानभिक्षालाभाद्यर्थं न गताः । एतेनातिनैष्ठिकत्वोक्तिः । महातापसा हि केचिद्देवस्वपनैकादश्या आरभ्य देवोत्थानैकादशीं यावच्चतुरो वर्षामासानुपवासान्कुर्वन्ति । तत्पारणेपि वनस्थितैरेवारण्यकधान्यैः शिलोञ्छवृत्त्यानीतैः स्वयंपकैः प्राणयात्रां कुर्वन्ति न तु प्रधानभिक्षालाभाद्यर्थं ग्रामपुरादि वसत्स्थानमागच्छन्तीत्येषां धर्मः ॥

चित्रां स्वातेर्विशाखायै गन्तुर्भानोस्त्विषार्दिताः ।
यान्तोध्वानममन्यन्त न शुने स्वं न वा बुसम् ॥ २८ ॥

२८. अध्वानं मार्गं यान्तोध्वगाः पान्थाः स्वमात्मानं शुने कुक्कुराय नामन्यन्तात्यन्तं कष्टाधारत्वेन शुनोप्यात्मानं निकृष्टं मेनिरे । न वा बुसं यद्वाकिंचित्करत्वादात्मानं पलालादप्यसारं मेनिरे । यतश्चित्रां गन्तुः स्वातेर्गन्तुर्विशाखायै गन्तुः । चित्रास्वातिविशाखानक्षत्रैः संयुज्यमानस्य सत इत्यर्थः । भानो रवेस्त्विषातपेनार्दिता अत्युष्णत्वात्पीडिताः । शरदि हि रविश्चित्रास्वातिविशाखाभिरवश्यं युज्यते तद्युक्तश्च प्रायोत्युष्णद्युतिः स्यात् ॥

नान्नं नावं शुकं काकं शृगालं मेनिरे वृषम् ।
पयःपानोन्मदा गोपा महिषं तु शुने तृणम् ॥ २९ ॥

२९. गोपा गोपाला वृष जातावेकवचनम् । शण्डानन्नं नावं शुकं काकं शृगालं वा न मेनिरे । निःसत्त्वतानायासस्ववश्यताकरणादिभि-

---

१ सी डी काष्ठं स्र°.

---

१ पफू °ष्ठिकोक्तिः ।.

रमादिभ्योपि निकृष्टमज्ञासिषुः । महिषं तु वृषाद्गुलिष्टत्वेन शुने तृणं वा मेनिरे । यतः पयःपानोन्मदाः क्षीरपाणोन्मत्ताः ॥

न तृणस्य बुसाय स्वं मन्तेवाशुष्यदम्बुदः ।
सुखो हितोपि पृथ्व्यै द्योर्यदप्रीणान्न चातकम् ॥ ३० ॥

३०. तृणबुससकाशादपि स्वमकिंचित्करं मन्यमान इवाम्बुदो-शुष्यन्निर्जलोभूत् । यद्यस्माद्धेतोरम्बुदश्चातकं नाप्रीणान्न तृप्तीचक्रे । कीदृक् । पृथ्व्यै सस्याद्युत्पत्तिहेतुत्वाद्योः स्वर्गस्य चानेकसस्यौषध्यादि-यज्ञोपकरणोत्पत्तिहेतुत्वात्सुखोपि । अपिरत्रापि योज्यः । सुखकार्यपि हितोप्यनुकूलोपि च । योप्यम्बुदे उन्नतो महापुरुषः स पृथ्व्याः स्वर्गस्य च परोपकारित्वातिधार्मिकत्वादिभिर्गुणैः सुखोपि हितोपि च सन् यदा चतते याचते णके चातकं याचकं केनाप्यसामर्थ्येन न प्रीणाति तदा तृणबुसाभ्यामप्यात्मानमकिंचित्करं मन्यमानः सन्न् शुष्यति खिद्यत इत्युक्तिः ॥

पाकाय प्रयताः । इत्यत्र "तुंमोर्थे°" [६१] इत्यादिना चतुर्थी ॥

नीवारेभ्यो जग्मुः । इत्यत्र "गम्यस्याप्ये" [६२] इति चतुर्थी ॥

ग्रामं नेयुः पुराय नेयुः । इत्यत्र "गतेः°" [६३] इत्यादिना वा चतुर्थी ॥

अनाप्त इति किम् । अध्वानं यान्तः ॥ कृद्योगे तु परत्वात्षष्ठ्येव । स्वातेर्गन्तुः ॥ द्वितीयैवेत्यन्ये । चित्रां गन्तुः ॥ चतुर्थी चेत्यन्ये । विशाखायै गन्तुः ॥

---

१ बी °न्ते चा°.

---

१ सी °न्मद्राः क्षी°. २ बी एफ् °द इवाम्बुद उ°. ३ एफ् °रित्वेनाति°. ४ बी °मर्थेन. ५ ए बी तुमर्थे. ६ सी डी °तुर्थ्यैवेत्य°. ७ ए °खाये ग°.

न त्वां शुनेमन्यन्त न त्वां शुनममन्यन्त । इत्यत्र "मन्यस्य[1]" [६४] इत्यादिना वा चतुर्थी ॥ अनावादिभ्य इति किम् । न वृषं नावमन्नं शुकं शृगालं काकं वा मेनिरे ॥ कुत्स्यतेनेनेति करणाश्रयणं किम् । न त्वां शुने मेनिरे इत्यत्र त्वशब्दान्न स्यात् ॥ अतिग्रहणं किम् । महिषं तृणं मेनिरे । अत्र नञ्प्रयोगाभावे साम्यमात्रं प्रतीयते न त्वतिकुत्सा ॥ कुत्सामात्रेपीच्छन्त्येके । महिषं शुने मेनिरे ॥ न त्वं तृणस्य मन्तेति कृद्योगे परत्वात्षष्ठी । चतुर्थ्यपीति कश्चित् । न त्वं शुनाय मन्ता । न त्वं तृणस्य मन्ता ॥

पृथ्व्यै हितः द्योर्हितः[2] । पृथ्व्यै सुखः द्योः सुखः । इत्यत्र "हितसुखाभ्याम्" [६५] इति वा चतुर्थी ॥

शं पथ्यं भद्रमायुष्यं स्तात्क्षेमोर्थश्च सिध्यतु ।
राज्ञः प्रजाभ्य इत्यूचेगस्तिरुद्यन्घनस्वनैः ॥ ३१ ॥

३१. अगस्तिरगस्त्यर्षिरुद्यन्सन्घनस्वनैर्मेघगर्जितैः[3] कृत्वोच इव । इवोत्रावसीयते । किमित्याह । राज्ञः प्रजाभ्यश्च शं सुखं पथ्यं हितं भद्रं धनधान्यादिसंपल्लाभ आयुः प्रयोजनमस्य "स्वर्गस्वस्ति"[६.४.१२२] इत्यादिना ये आयुष्यमायुर्वृद्धिहेतुर्वस्तु क्षेमो[4] विपदभावश्च स्तादर्थश्च सिध्यतु कार्यं निष्पद्यतां चेति । शरदि ह्यगस्तिरुदेति घनगर्जितानि च स्युरित्येवमुत्प्रेक्षा[5] । मुनिर्ह्युद्यंस्तपोज्ञानादिविशेषेणोदीयमानो राजादिसमीपं गच्छन् घनस्वनैः सान्द्रध्वानैः[6] कृत्वा राज्ञः प्रजाभ्यश्च शमित्याद्याशीर्वादं वक्ति ॥

---

१ एफ् °त्सामत्रे°. २ एफ् °तः पृ°. ३ सी °स्त्य ऋपिरु°. ४ एफ् क्षेम वि°. ५ सी °त्प्रेक्ष्य मु°. डी °त्प्रेक्ष्यते मु°. ६ ए °ध्वानै कृ°.

श्रेयश्चिरायुः कुशलं स्तात्कार्यं सिद्धिमेतु च ।
पुत्रेभ्यश्च स्नुषाणां चेत्यूचुर्बलिमहे स्त्रियः ॥ ३२ ॥

३२. बलिमहे बलिराज्यदिने कार्तिकश्वेतप्रतिपद्दिने स्त्रिय ऊचुः । किमित्याह । पुत्रेभ्यः स्नुषाणां च वधूटीनां च श्रेयो धनाद्यर्द्धिलाभश्चि[१]रायुश्चिरजीवितं कुशलं च विपदभावश्च स्तात् कार्यं सिद्धिमेतु[२] चेत्या[३]शीर्वाक्यानि ॥

बलिमहो हि कार्तिककृष्णपञ्चदशीरात्रौ शुक्लप्रतिपद्दिने च स्यात् । तत्र च लोका यथाशक्ति सुवेषाः सुचेष्टाः प्रमुदितास्ताम्बूलाद्यास्वादनपरा भगिन्यादिस्त्रीः प्रणमन्ति । ताश्च चन्दनवर्धनादिपूर्वं श्रेयः[४] स्तादित्याशीर्वादं ददते । यतः कार्तिकश्वेतप्रतिपदि यच्छुभमितरद्वा चेष्यते तच्चेष्टया सकलं वर्षं याति । यदुक्तं भविष्यत्पुराणे ।

पुरा वामनरूपेण याचयित्वा धरामिमाम् ।
बलिं यज्ञे हरिः सर्वं क्रान्तवान्विक्रमैस्त्रिभिः ॥ १ ॥
इन्द्राय दत्तवान् राज्यं बलिं पातालवासिनम् ।
कृत्वा दैत्यपतेर्दत्तमहोरात्रं पुनर्नृप[५] ॥ २ ॥
पञ्चदश्यां निशा ह्येका कृष्णपक्षस्य कार्तिके ।
एकमप्रेतनदिनं बलिराज्येति चिह्नितम् ॥ ३ ॥
कार्तिके कृष्णपक्षस्य पञ्चदश्यां निशागमे ।
यथेष्टचेष्टं[६] दैत्यानां राज्यं तेषां महीतले ॥ ४ ॥
लोकश्चापि गृहस्यान्तः शय्यायां शुक्लतण्डुलैः[७] ।
संस्थाप्य बलिराजानं फलैः पुष्पैश्च पूजयेत् ॥ ५ ॥
बलिमुद्दिश्य दीयन्ते दानानि कुरुनन्दन ।
यानि तान्यक्षयाण्याहुर्मयैवं संप्रदर्शितम् ॥ ६ ॥

१ प °भाविश्च. २ प सी सिद्धमे°. ३ प °तुश्चेत्या°. ४ प °य स्ता°. ५ प फ नृपः ॥. ६ प थेष्टं चे°. ७ प सी डी °तन्दुलैः ।.

एकमेवमहोरात्रं वर्षे वर्षे विशां पते ।
दत्तं दानवराज्यस्य[1] आदर्शमिव भूतले ॥ ७ ॥
निरुजश्च जनः सर्वः सर्वोपद्रववर्जितः ।
कौमुदीकरणाद्राजन् भवतीह[2] महीतले ॥ ८ ॥
यो यादृशेन भावेन तिष्ठत्यस्यां[3] युधिष्ठिर ।
हर्षदैन्यादिरूपेण तस्य वर्षं प्रयाति हि ॥ ९ ॥
रुदितो रोदते वर्षं हृष्टो वर्षं प्रहृष्यति ।
भुक्तो भोक्ता भवेद्वर्षं [4]सुस्थः सुस्थो भवेदिति ॥ १० ॥

हितार्थे[5] । प्रजाभ्यः पथ्यं स्तात् राज्ञः पथ्यं स्तात् ॥ सुखार्थे । शं प्रजाभ्यस्तात् शं राज्ञः स्तात् ॥ भद्रार्थे । भद्रं प्रजाभ्यः [6]स्तात् । भद्रं राज्ञः स्तात् । श्रेयः पुत्रेभ्यः स्तात् श्रेयः स्नुषाणां स्तात् ॥ आयुष्यार्थे । प्रजाभ्य आयुष्यं स्तात् राज्ञ आयुष्यं स्तात् । पुत्रेभ्यश्चिरायुः स्तात् स्नुषाणां चिरायुः स्तात् । क्षेमार्थे । प्रजाभ्यः क्षेमः [7]स्तात् राज्ञः क्षेमः स्तात् पुत्रेभ्यः कुशलं [8]स्तात् स्नुषाणां कुशलं स्तात् ॥ अर्थार्थे । अर्थः[9] प्रजाभ्यः[10] सिध्यतु अर्थो राज्ञः सिध्यतु । कार्यं पुत्रेभ्यः सिद्धिमेतु कार्यं स्नुषाणां सिद्धिमेतु । इत्यत्र "तद्भद्र०" [६६] इत्यादिना[11,12] वा चतुर्थी ॥

शरदा किं परिक्रीताः सहस्रायायुतेन वा ।
अलं केल्यै श्रिये शक्ता हंसास्तस्या[1] यदन्वयुः ॥ ३३ ॥

१ प हंस्यस्त°.

१ बी सी डी °राजस्य. २ सी डी °तीति म°. ३ प °त्यस्या युधिष्ठिरः । ह°. ४ प सुस्थसु°. ५ प सी °तार्थः प्र°. एफ् °तार्थे प्र°. ६ प एफ् स्तात् । श्रे°. ७ प सी डी क्षेम स्ता°. ८ सी स्तात् पु°. ९ प स्तात् । अ°. १० एफ् °र्थः पुत्रेभ्यः सिध्यतु राज्ञोर्थः सिध्यतु अर्थः प्रजाभ्यः सिध्यतु कार्यं प्रजाभ्यः सिद्धिमेतु कार्यं स्नुषाणां मेतु । इ°. ११ प सी °दिवा. १२ डी एफ् °ना च°.

३३. केल्यै क्रीडायायलं समर्थास्तथा श्रियै शोभायै प्रस्तावाच्छरद एव शक्ता हंसास्तस्याः शरदो यद्यस्मादन्वयुरनुगमनं चक्रुस्तत्किं शरदा कर्ष्यो सहस्राय रूपकादिदशशतेनायुतेन वा रूपकादिदशसहस्र्या वा कृत्वा परिक्रीता नियतकालं स्वीकृताः। ये हि येन परिक्रीताः स्युस्ते सेवकास्तस्य स्वामिनः केल्यायलं[1] नर्मणे शक्ताः श्रियै शोभायै शक्ताश्च सन्तोनुगच्छन्ति ॥

स्वधा पितृभ्य इन्द्राय वषट् स्वाहा हविर्भुजे ।
नमो देवेभ्य इत्यृत्विग्वाचः सस्यश्रियाफलन् ॥ ३४ ॥

३४. ऋत्विग्वाचो मेघवृष्टिसस्यनिष्पत्त्याद्यर्थं पूर्वंकृतकारीरीष्ट्या-[2]दीनां प्रस्तावे यायजूकानां मन्त्राक्षरोच्चारणानि सस्यश्रिया प्रचुरधान्यनिष्पत्त्याफलन् सार्थका आसन् । का वाच इत्याह । पितृभ्यः स्वधा हविर्दानमस्तु । तथेन्द्राय वषट् हविर्दानमस्तु । तथा हविर्भुजेग्निदेवतायै स्वाहा हविर्दानमस्तु । तथा देवेभ्यो नमोस्त्विति ॥

प्रजाभ्यः स्वस्त्यभून्निद्रा समुद्रशयनाद्ययौ ।
आ सिन्धोः शाद्वलान्यासन्नश्मरात्पर्यपोषरात्[1][2] ॥ ३५ ॥

३५. प्रजाभ्यः स्वस्ति सस्यादिसंपत्त्या लोकस्य क्षेममभूत् । तथा समुद्रशयनाद्विष्णोर्निद्रा ययौ । कार्तिकैकादश्यां हि विष्णुर्निद्रां जहातीति रूढिः । तथा आ सिन्धोः समुद्रं मर्यादीकृत्य नदीमभिव्याप्य वा शाद्वलानि[3] सहरितभूखण्डान्युपचाराद्धरितानि चासन् । कथम् । अश्मरात्परि अश्मवन्तं[4] देशं वर्जयित्वा तथोषरादप[5] रिरिणं (इरिणं) देशं वर्जयित्वा ॥

---

१ बी शाड्वला°. २ ए °षणात् ।.

---

१ एफ् °मिनं कल्यायलं निर्मणे. २ सी डी °रीष्टया°. ३ बी शाड्वला°. ४ सी °न्तं त दे°. डी °न्तं तं दे°. ५ एफ् °परिणं.

सहस्राय परिक्रीताः अयुतेन परिक्रीताः । इत्यत्र "परिक्रयणे" [६७] इति वा चतुर्थी ॥

श्रियै शक्ताः । अलं केल्यै । वषडिन्द्राय । नमो देवेभ्यः । प्रजाभ्यः स्वस्ति । स्वाहा हविर्भुजे । स्वधा पितृभ्यः । इत्यत्र "शक्तार्थ°" [६८] इत्यादिना चतुर्थी ॥

समुद्रशयनाद्ययौ । इत्यत्र "पञ्चमी°" [६९] इत्यादिना पञ्चमी ॥

आ सिन्धोः । इत्यत्र "आङावधौ" [७०] इति पञ्चमी ॥

अश्मरात्परि । ऊषरादप । इत्यत्र "परि°" [७१] इत्यादिना पञ्चमी ॥

प्रति द्विपमदामोदाद्गन्धं सप्तच्छदान्यधुः ।
शेफालीभ्यो ददुर्लास्यं प्रति गन्धाच्च मारुताः ॥ ३६ ॥

३६. सप्तच्छदानि सप्तपर्णतरुपुष्पाणि द्विपमदामोदात्प्रति हस्तिमदसौरभ्यस्य तुल्यं गन्धमधुरधारयन् । एतेन शरदि द्विपा माद्यन्ति सप्तच्छदाश्च द्विपमदामोदतुल्यं पुष्पन्तीत्युक्तम् । तथा मारुताश्च गन्धात्प्रति गन्धस्य प्रतिदानभूतं लास्यं नृत्तं शेफालीभ्यः शेफालीलतापुष्पेभ्यो ददुः । शेफालीनां गन्धं गृहीत्वा लास्यं ददुरित्यर्थः । अन्येपि नाट्योपाध्याया गन्धद्रव्यादि गृहीत्वा नर्तकीनां लास्यं ददति ॥

द्विपमदामोदात्प्रति । गन्धात्प्रति । इत्यत्र "यतः प्रति°" [७२] इत्यादिना पञ्चमी । प्रतिशब्दाद्द्वितीया म् ॥

उपाध्यायादधीत्येव केकी श्रुत्वा नटस्य वा ।
प्रासादाग्राभनर्तैनं पौर्यैः प्रैक्षन्त चासनात् ॥ ३७ ॥

१ पफ् °न्त वास°

१ प हश्राय. २ प आशाव°. ३ प बी पुष्फन्ती°. ४ पफ् नृत्यं शे° ५ सी डी ना पश्च°. ६ बी °ति । मो°.

३७. प्रासादाग्राद्देवगृहशिखरमारुह्य केकी मयूरो ननर्त । किं कृत्वा । उपाध्यायादधीत्येव नियमपूर्वं नृत्तविद्यां गृहीत्वेव । वाथ वा नटस्य श्रुत्वेव । इवोत्रापि योज्यः । द्रव्यादिदानेन नृत्तविद्यामाकर्ण्येव । यथोपाध्यायान्नियमपूर्वकं नटाद्वा द्रव्यादिदानेनात्त[1]नृत्तविद्यो नृत्तज्ञत्वान्निपुणं नृत्यति[2] तथा जातिस्वभावेन केकी चतुरं ननर्तेत्यर्थः । अत एवैनं केकिनं पौर्य आसनादासन उपविश्य प्रैक्षन्त[3] कौतुकात्प्रकर्षेणापश्यन् । शरद्यपि मयूरा मत्ताः सन्तो जातिस्वभावेन प्रासादाद्युच्च[4]स्थानमारुह्य नृत्यन्ति । यदुक्तम् ।

प्रोन्मादयन्ती विमदान्मयूरान्प्रगल्भयन्ती कुरर[5]द्विरेफान् ।
शरत्समभ्येति विकास्य[6] पद्मानुन्मीलयन्ती कुमुदोत्पलानि ॥

उपाध्यायादधीत्य । इत्यत्र "आख्यातरि°" [७३] इत्यादिना पञ्चमी ॥ आख्यातरीति किम् । नटस्य श्रुत्वा ॥

प्रासादाग्रान्ननर्त । आसनात्प्रैक्षन्त । इत्यत्र "गम्ययपः°" [७४] इत्यादिना पञ्चमी ॥

वर्षात्ययात्प्रभृत्यब्जोद्गमादारभ्य चाबभौ ।
अन्यो वीणाक्वणाद्भिन्नो वेणुनादादलिस्वनः ॥ ३८ ॥

३८. वर्षात्ययाद्वर्षाकालातिक्रमात्प्रभृत्यब्जोद्गमात्कमलवनोद्भेदा[7]दारभ्य चालिस्वन आबभौ । यतो वीणाक्वणादन्योन्यादृशोतिमधुर इत्यर्थः । तथा वेणुनादाद्भिन्नः । शरदि[8] हि पद्मखण्डविकाशे मधुपानोन्मत्तानां भृङ्गाणां ध्वनिरतिमधुरः स्यात् ॥

---

१ सी डी °त्तवि°. २ ए नृत्तति. ३ ए प्रैक्ष्यं कौ°. ४ एफ् °दाग्राच्च°. ५ ए बी सी एफ् °कुरर°. ६ बी °काश्य प°. ७ सी डी °दार°. ८ सी डी °दि प°.

गम्येपि पश्चिमे देशे ग्रामात्प्राच्यां ययुर्जनाः।
महानवम्या अपरेहि क्रोशात्सीम लङ्घितुम् ॥ ३९ ॥

३९. महानवम्या आश्विनश्वेतनवम्या अपरे[2]नन्तरेहि दिने विजयदशम्यां ग्रामादुपलक्षणत्वात्पुरादेरपि सकाशात्प्राच्यां पूर्वदिशि जना ययुः। क सति। ग्रामात्सकाशात्पश्चिमे देशे पश्चिमदिग्विभागे गम्येपि नदीपर्वताद्यभावेन गन्तुं शक्येपि पश्चिमदेशं मुक्त्वेत्यर्थः। किं कर्तुं ययुः। क्रोशाद्गव्यूतात्परेण सीम। क्लीबेपि सीमन्शब्दं हलायुधभारवी[3] मन्येते। ग्रामादिसीमभूमिं लङ्घितुं शकुनमार्गणाभिप्रायेण ॥

विजयदशम्यां हि अस्तमयदिक्त्वेन लोके सामान्येनाप्रशस्ततया प्रसिद्धत्वात्पश्चिमादिशं वर्जयित्वोदयदिक्त्वेन लोके सर्वदिक्षु मध्ये सामान्येन मङ्गल्यदिक्तया प्रसिद्धत्वात्प्रायः पूर्वस्यां क्रोशात्परे[5]तः सकलवर्षशुभाशुभसूचकशकुनान्वेषणाय लोका यान्ति। तस्य च गमनस्य लोके सीमलङ्घनमिति संज्ञा रूढा। यद्वा ग्रामादित्युक्तया जना ग्राम्या व्यज्यन्ते[6]। ते विजयदशम्यां क्रोशात्परेण सीम लङ्घितुं ग्रामात्पश्चिमे देशे गम्येपि विजयदशम्यां हि प्रातरेव लोकाः सीम लङ्घितुं यान्ति। प्रातश्च पश्चिमादिशि सूर्यस्य पृष्ठवार्तित्वाद्यात्रा कर्तुमुचिता। यदुक्तम् ॥

यामयुग्मेषु रात्र्यन्तयामात्पूर्वादिग्गो[7] रविः।
यात्रास्मिन्दक्षिणे वामे प्रवेशः पृष्ठगे द्वयमिति ॥

गन्तुमर्हेपि ग्राम्यत्वाद्ग्रामात्प्राच्यां ययुः। ग्राम्या हि मूर्खत्वात्तथाविधगम्यागम्यदिक्परिज्ञानाकौशलात्सामान्येन लोकव्यवहारे पश्चिमा न तथा प्रशस्या यथा पूर्वेति पश्चिमां गमनार्हामपि वर्जयित्वा पूर्वामेव यान्ति ॥

---

१ प °म्या प°. २ सी डी °रे अन्त°. ३ प सी डी °रती म°. ४ प शब्दमा°. ५ सी डी °त्परः स°. ६ पफ़ व्यज्यन्ते।. ७ सी °दिशो र°. ८ सी डी °गम्यदि°. ९ डी °लाः सामा°.

आरात्तीराद्बहिर्नीराच्छीतेभ्य इतरै रवेः ।

अप्युस्रैस्तप्यमानोस्थादृणाद्बद्धो नु कच्छपः ॥ ४० ॥

४०. कच्छपः कमठो जातावेकवचनम् । शीतेभ्य इतरैरुष्णै रवेरुस्रैः किरणैस्तप्यमानोपि दह्यमानोप्यारात्तीरान्नद्यादितटसमीपे नीराद्बहि[2][1]श्चास्थात्तस्थौ । उत्प्रेक्ष्यते । ऋणाद्बद्धो नु देयेन हेतुना निगडित इव । ऋणिको हि ऋणादुत्तमर्णेन बद्धो रवेरुष्णैः [3]करैस्तप्यमानो नद्यादितटे तिष्ठति बद्धत्वान्न तु जलमध्ये प्रविशति । शरदि हि कच्छपा जातिस्वभावेन नद्यादितटेषु बाहुल्येन विचरन्ति । उक्तं च ।

अपङ्किलतटावटः शफरफाण्टफालोज्ज्वलः
पतत्कुररकातरभ्रमदद्भ्रमीनार्भकः[4] ।
लुठत्कमठसैकतश्चलबकोटवाचाटितः
सरित्सलिलसंचयः शरदि मेदुरः सीदति ॥

प्रभृत्यर्थं । वर्षात्ययात्प्रभृति । अब्जोद्गमादारभ्य ॥ अन्यार्थं । अन्यः कणात् । भिन्नो नादात् । ग्रामात्प्राच्याम् । बहिर्नीरात्[5] । आरा[6]त्तीरात् । शीतेभ्य इतरैः । इत्यत्र "प्रभृत्यन्य °" [७५] इत्यादिना पञ्चमी ॥ दिशि दृष्टाः शब्दा दिक्शब्दा इति[7] देशकालवृत्तिनापि स्यात् । ग्रामात्पश्चिमे देशे । नवम्या अपरेद्युः ॥ तथा गम्यमानेनापि दिक्शब्देन स्यात् । क्रोशात्सीम । परेणेति गम्यते ॥

ऋणाद्बद्धः । इत्यत्र "ऋणाद्धेतोः" [७६] इति पञ्चमी ॥

सौरभादनुरागेण मुदा बद्धोलिरभ्रमत् ।

कुमुदस्यान्तिकेब्जाच्च दूरे नीपस्य केतकात् ॥ ४१ ॥

---

१ सी डी °टनिष्ठस°. २ एफ् °हिश्च स्था°. ३ एफ् करैः स्त°. ४ एफ् °त्यर्थः । व°. ५ सी डी °त् । शी°. ६ ए °रात्तीरा°. ७ सी °ति गम्य°.

४१. अलिः सौरभादनुरागेण मुदा बद्धः सौरभहेतुको योनुरागस्तद्धेतुका या मुद्धर्षस्तया हेतुना बद्धो व्याप्तः सन् कुमुदस्याब्जाच्च पद्मस्य चान्तिकेभ्रमत् । तथा नीपस्य कदम्बस्य केतकात्केतकीपुष्पाच्च दूरेभ्रमत् । नीपपुष्पस्य किंचित्तीक्ष्णपत्रत्वेन केतकस्य च कण्टकित्वेन नैकट्येन भ्रमणेङ्गविदारणभयात् । शरदि हि कैरवाण्यब्जानि च नवान्युद्भिद्यन्ते कदम्बानि केतकानि च वर्षोद्भवान्यपि शरद्यनुवर्तन्ते वर्ण्यन्ते च कविभिः । अथ वा शरद्यतीतप्रायरामणीयकत्वेन नीपकेतकयोरनुपभोग्यत्वाद्दूरेलिरभ्रमत् ॥

सौरभादनुरागेण । इत्यत्र "गुणाद्°" [७७] इत्यादिना वा पञ्चमी ॥ अस्त्रियामिति किम् ॥ मुदा बद्धः ॥

केतकाद्दूरे नीपस्य दूरे । अब्जादन्तिके कुमुदस्यान्तिके । इत्यत्र "आरादर्थैः" [७८] इति वा पञ्चमी ॥

स्तोकाज्जातीः स्पृशन् स्तोकेनाब्जान्यल्पाच्च शीकरान् ।
अल्पेन वानपि मरुत्कृच्छ्रात्सेहे वियोगिभिः ॥ ४२ ॥

४२. सुगमः । नवरं स्तोकाज्जातीर्जातिपुष्पाणि स्तोकेनाब्जानि च स्पृशन् । शरदि हि जातिपुष्पाणि स्युः ॥

कृच्छ्रेणार्कस्य वीक्ष्यत्वाद्ग्रीष्मः कतिपयाच्छरत् ।
प्रावृट्कतिपयेनाल्पैर्मेघैः स्तोकैश्च गर्जितैः ॥ ४३ ॥

४३. कृच्छ्रेणार्कस्य वीक्ष्यत्वाद्द्रष्टुं शक्यत्वाच्छरत्कालः कतिपयात्स्तोकेन ग्रीष्मोभूत्तथाल्पैर्मेघैः स्तोकैर्गर्जितैश्च कृत्वा कतिपयेन प्रावृडभूत् ॥

---

१ ए बी °पुष्पाच्च. २ बी °पुष्पस्य. ३ सी डी अथो वा. ४ ए सी डी °ना प°. ५ एफ् °रे । अ°. ६ सी डी °रादेर्थैः. ७ बी °नि पुष्पानि च. ८ ए बी °पुष्पाणि. ९ सी डी °त्वाच्छ°. १० ए प्राड°.

क्लान्ताः कृच्छ्रेण तापेन ज्योत्स्नायाः प्रागजानत ।
वीचिह्लादैस्ततोजानंश्चकोराः सरसां पयः ॥ ४४ ॥

४४. कृच्छ्रेण कष्टकारिणा तापेन सूर्यातपेन क्लान्ताः संतप्ताः सन्तश्चकोराः प्राक् सरसां पयो जलं स्वच्छत्वेन ज्योत्स्नाया अजानत ज्योत्स्नाबुद्ध्या प्रवृत्ता इत्यर्थः । प्रवृत्तिरत्र जानातेरर्थः । यद्वा ज्योत्स्नाप्रियत्वाज्ज्योत्स्नायामत्यन्तरक्ताश्चित्तभ्रान्त्या सरःपयो ज्योत्स्नारूपेण प्रत्यपद्यन्तेत्यर्थः । मिथ्याज्ञानवचनोत्र जानातिर्मिथ्याज्ञानं चाज्ञानमेव । ततः पश्चाद्वीचिह्लादैः कल्लोलध्वानैः कृत्वा सरसां पयः सरसां पय एवाजानन् । सरसां पय इत्यनूद्यत्वेन विधेयत्वेन च योज्यम् ॥

स्तोकात् स्पृशन् स्तोकेन स्पृशन्[४] । अल्पात्स्पृशन् अल्पेन वान्[५] । कृच्छ्रात्स्नेहे कृच्छ्रेण वीक्ष्यत्वात् । कतिपयाद्ग्रीष्मः कतिपयेन प्रावृट् । इत्यत्र "स्तोकाल्प°" [७९] इत्यादिना वा पञ्चमी ॥ असत्त्व इति किम् । स्तोकैर्गर्जितैः । अल्पैर्मेघैः । कृच्छ्रेण तापेन ॥

ज्योत्स्नाया अजानत । इत्यत्र "अज्ञाने ज्ञः षष्ठी" [८०] इति षष्ठी ॥ अज्ञान इति किम् । ह्रादैः पयोजानन् ॥

सरसां पयः । इत्यत्र "शेषे" [८१] इति षष्ठी ॥

शैलस्योपर्यधोवस्तात्परस्तादुत्पतिष्णुभिः ।
उपरिष्टाच्छरल्लक्ष्म्या[१] नीलच्छत्रायितं शुकैः ॥ ४५ ॥

४५. शुकैः शरल्लक्ष्म्या उपरिष्टादूर्ध्वदेशे नीलच्छत्रायितं नीलात-

---

१ सी डी °ल्लक्ष्मीनी°.

---

१ प °वृत्त्याइ°. २ सी °तेर्थः ।. ३ सी °त्स्नाया°. ४ प पफ °न् अल्पे°. ५ प °न् । अकृ°.

पत्रवदाचरितम् । यतः शैलस्य गिरेरुपरि ऊर्ध्वदेशेऽधे ऊर्ध्वदेशापेक्षयाधस्तादवस्तात्पश्चिमदिग्विभागे[1] परस्ताच्च पूर्वदिग्भागे[2] चोपलक्षणत्वाद्दक्षिणोत्तरभागयोरप्युत्पतिष्णुभिरुच्छलद्भिः । यथा दण्डोपरि स्थितं नीलवस्त्रेणोपर्यधश्चतुर्दिक्षु चावृतं नीलच्छत्रं राजादेरुपरि धृतं शोभातिशयाय स्यात्तथाद्रेः समन्तादुत्पतिष्णु शुकमण्डलं शरद इत्यर्थः । शरदि हि शुका बाहुल्येन स्युर्जोतिप्रत्ययेन शैलाद्युच्चस्थानेषु निवसन्ति च ॥

ध्रुवस्याभाद्दक्षिणतो वातापेः प्सातुरुत्तरात् ।
पितॄणां दुर्गतेस्त्यागेऽध्वा द्योर्यानस्य साधकः ॥ ४६ ॥

४६. पितॄणामध्वा पितृदण्डः स्वर्गदण्डाख्यो वत्सेति नाम्ना ज्योतिषे प्रसिद्धोऽभात् । कीदृक् । पितॄणामेव दुर्गतेस्तिर्यक्त्वादिकुगतेः श्रुतौ तु दन्दशूकत्वाख्यया प्रसिद्धायास्त्यागे सति द्योः स्वर्गस्य कर्मणो यद्यानं गमनं तस्य कर्मणः साधको निष्पादकः । अनेन हि मार्गेण कृत्वा पितरो दुर्गतिं परिहृत्य स्वर्गं यान्तीति प्रवादः । काभादित्याह । ध्रुवस्य दक्षिणतो दक्षिणस्यां दिशि तथा वातापेर्दैत्यस्य कर्मणः प्सातुर्भक्षकस्यागस्तेः । द्विजानुपद्रवन्वातापिर्दैत्यो ह्यगस्त्येन भक्षित इति प्रसिद्धिः । उत्तरादुत्तरस्यां[3] दिशि । शरदि हि वत्सस्य व्योममध्यस्थस्य मुखं पूर्वस्यां पुच्छश्च पश्चिमायां स्यात् । यदुक्तम् । कन्यासंक्रान्त्यादित्रितयं पूर्वादौ वत्स इति । तत्रस्थश्च ध्रुवापेक्षया दक्षिणस्यामगस्त्यापेक्षया चोत्तरस्यां स्यात् ॥

निद्रां योऽत्यक्तपूर्व्यब्दैर्गर्जकैः साध्वपां पिबैः ।
स तामत्यजदम्भोधौ कैटभस्य मधुं द्विषन् ॥ ४७ ॥

४७. सोऽम्भोधौ तिष्ठन् कैटभस्य मधुं द्विषन् कैटभमधुदैत्ययोः शत्रुर्वि-

---

१ ए सी डी °धस्ता°. २ एफ् °दिग्विभागे. ३ सी डी °स्यां स्यात् ।.

ष्णुस्तां निद्रामत्यजत् । योम्भोधावपां पिबैर्जलानि पिबद्भिर्जलभृतैरित्यर्थः । अत एव साध्वत्यन्तं गर्जकैरब्दैर्मेघैर्हेतुभिर्निद्राम् । त्यक्ता पूर्वमनेन त्यक्तपूर्वी न तथात्यक्तपूर्वी । घनप्रबलगर्जितैरपि यो वर्षासु न जजागारेत्यर्थः ॥

शैलस्योपरि । लक्ष्म्या उपरिष्टात् । शैलस्य परस्तात् । शैलस्यावस्तात् । शैलस्याधः । ध्रुवस्य दक्षिणतः । प्सातुरुत्तरात् । इत्यत्र "रिरिष्टात्°" [८२] इत्यादिना षष्ठी ॥

वातापेः प्सातुः । यानस्य साधकः । अपां पिबैः । ब्योर्यानस्य । दुर्गतेस्त्यागे । इत्यत्र "कर्मणि कृतः" [८३] इति षष्ठी ॥ क्रियाविशेषणस्य कर्मत्वाभावान्न षष्ठी । साधु गर्जकैः ॥ कृत इति किम् । तामत्यजत् निद्रामत्यक्तपूर्वी ॥

कैटभस्य द्विषन् मधुं द्विषन् । इत्यत्र "द्विषो वा तृशः" [८४] इति वा षष्ठी ॥

पवने खं तुषाराणां तरलत्वस्य वीरुधाम् ।

दिशां नेतरि किञ्जल्कान् श्रान्तानां शायिकाभवत्[1] ॥ ४८ ॥

४८. श्रान्तानां शायिकाभवत् खेदापगमात्स्वापोभूत् । क्व सति । पवने । कीदृशे । खं तुषाराणां नेतरि शीकरानाकाशं प्रापयितरि । तथा तरलत्वस्य वीरुधां नेतरि मृदुत्वाल्लताश्चलत्वं प्रापयति । तथा दिशां नेतरि किञ्जल्कान् । शरदि ह्यनियतदिक्को गुणत्रयोपेतो वातो वर्ण्यते ॥

१ सी डी ॥ खेदा°.

१ एफ् °स्याधः । २ बी °त्वान्न. ३ ए °पूर्वम् ॥. ४ ए °णां तेनरि ५ एफ °तम्°. ६ एफ °था देशान्तरं ने°.

खं तुषाराणां नेतरि । तरलत्वस्य वीरुधां नेतरि । यद्वा दिशां नेतरि किञ-ल्कान् । तरलत्वस्य वीरुधां नेतरि । इत्यत्र "वैकत्र द्वयोः" [८५] इति द्वयोः कर्मणोरेकतरस्मिन्वा षष्ठी । अन्यत्र पूर्वेण नित्यमेव ॥

श्रान्तानां शायिका । इत्यत्र "कर्तरि"[1] [८६] इति षष्ठी ॥

कृतिः स्वराणां क्रौञ्चीभिर्विपञ्चीनामिवाबभौ ।
ऋतुमत्येव काशाल्याः कुसुमस्य प्रकाशनम् ॥ ४९ ॥

४९. यथा विपञ्चीनां वीणानां कर्त्रीणां स्वराणां कर्मणां कृतिरा-बभौ । एवं क्रौञ्चीभिः कर्त्रीभिः । शरदि हि क्रौञ्च्यो मधुरं कूजन्ति । तथा यथा ऋतुमत्या स्त्रिया कर्त्र्या कुसुमस्य[3] स्त्रीधर्मस्य कर्मणः प्रका-शनं भवत्येवं काशाल्याः काशतरुपङ्क्तेः कर्त्र्याः कुसुमस्य । जातावेक-वचनम् । पुष्पाणां कर्मणां प्रकाशनमाविर्भावो बभूव ॥

शृङ्गस्य त्याग एणानां मित्रस्येव दुरात्मभिः ।
बिभित्सा भेदिका चोक्ष्णां पयसामिव रोधसः ॥ ५० ॥

५०. यथा दुरात्मभिर्दुर्जनैः कर्तृभिर्मित्रस्य कर्मणस्त्यागः स्यात्तथै-णानां कर्तृणां शृङ्गस्य कर्मणस्त्यागोभूत् । शरदि हि रुरुशम्बरादि-मृगाणां शृङ्गाणि पतन्ति । तथोक्ष्णां कर्तृणां रोधसस्तटस्य कर्मणो बिभित्सा भेत्तुमिच्छा भेदिका च विदारणं चाभूत् । पयसामिव यथा जलैर्वर्षासु रोधसो बिभित्सा भेदिका चाभूत् । शरदि हि वृषभा मत्ता नद्यादितटानि[5] विलिखन्ति ॥

स्वराणां कृतिर्विपञ्चीनामिवक्रौञ्चीभिः । कुसुमस्य प्रकाशनं काशाल्या ऋतुमत्येव[6] ।

१ एफ् °रि प°. २ सी कृतेरा°. ३ सी डी °स्य जाता°. ४ ए °काचिवि°
५ ए °नि वलि°. ६ सी °मस्य.

शूद्रस्य त्याग एणानां मित्रस्येव दुरात्मभिः । इत्यत्र "द्विहेतोः°" [८७] इत्यादिना कर्तरि षष्ठी वा ॥ अक्व्यणकस्येति किम् । बिभित्सा भेदिका चोक्ष्णां पयसामिव रोधसः ॥

स्तुत्यमान्यानुयानीयगातव्यादेयसद्गुणः ।
नृणां देवैश्च स तदा राजा यात्रां प्रचक्रमे ॥ ५१ ॥

५१. स राजा मूलराजस्तदा शरत्काले यात्रां प्रयाणकं प्रचक्रमे प्रारेभे । कीदृक् । नृणां कर्तॄणां देवैश्च कर्तृभिस्तुत्याः श्लाघ्या मान्याः पूज्या अनुयानीया अनुसरणीया गातव्या गेया आदेया ग्राह्याः सन्तः शोभना गुणाः शौर्यादयो यस्य सः ॥

नृणां देवैश्च स्तुत्यमान्यानुयानीयगातव्यादेय । इत्यत्र "कृत्यस्य वा" [८८] इति कर्तरि वा षष्ठी ॥ अत्र च नित्यसापेक्षत्वात्समासः ॥

अथ यात्रोपक्रमं षट्त्रिंशता श्लोकैर्वर्णयति ।

नेतव्योन्तं रिपुः पात्रा गामनेनेच्छुना यशः ।
पूरंपूरं नभो नादैर्दुन्दुभिः प्रोचिवानिदम् ॥ ५२ ॥

५२. नादैः कृत्वा नभः पूरंपूरं व्याप्यव्याप्य दुन्दुभिर्विजयया-आढक्केदं प्रोचिवान् । तदेवाह । अनेन मूलराजेन यश इच्छुना एव गां भुवं पात्रा दुर्नयनिराकरणेन रक्षता सता रिपुर्ग्राहारिरन्तं क्षयं नेतव्यः ॥

---

१ ए °यगीत°.

---

१ एफ् °त्रस्यैव. २ सी डी °जराजस्त°. ३ एफ् °या गीत°. ४ बी °नीयागा°. ५ ए °तंवेरि. ६ सी डी °व्य दु°. ७ ए °भिविज°. ८ ए °ना ए°. ९ बी °नयिनि°. १० एफ् °पुग्राह°.

पवमानो जगत्तन्वन्स्वरं बिभ्राणमुच्चताम् ।
चक्राणो मङ्गलं शङ्खश्छन्दोधीयन्निव द्विजः ॥ ५३ ॥

५३. शङ्खो विजयकम्बुर्मङ्गलं राजादीनां चक्राणश्चक्रे । कीदृक्सन् । उच्चतामुदात्ततां बिभ्राणं स्वरं तन्वन् । तथा जगल्लोकं पवमानो मङ्गल्योदात्तस्वरत्वात्पवित्रयन् । तथा छन्दो वेदमधीयन्नकृच्छ्रेण पठन्नत एवोच्चतां बिभ्राणं स्वरं तन्वन्नत एव च जगत्पवमानः सन् द्विजो मङ्गलं चक्रे । यात्राकाले हि माङ्गल्यार्थं शङ्खो वाद्यते द्विजाश्च वेदमुच्चारयन्ति ॥

ढक्काभिश्चक्रिभिर्ध्वानं दुःसहं दिग्गजैरपि ।
सोत्तभूत्कारको यात्रां सुज्ञानो वज्रिणाप्यभूत् ॥ ५४ ॥

५४. दिग्गजैरपि दुःसहं सोढुमशक्यं ध्वानं चक्रिभिः करणशीलाभिर्ढक्काभिर्विजयभेरीभिः कृत्वा स मूलराजो वज्रिणापि सुज्ञानः सुखेन ज्ञेयोभूत् । कीदृक्सन् । यात्रां कारकोत्तभूद्यात्रां करिष्यामीति खड्गादिशस्त्रभृत् । "क्रियायाम्°" [५.३.१३] इत्यादिना णकच् । यात्रां चिकीर्षोर्मूलराजस्य युद्धोचितास्त्रग्रहणं ढक्काभिर्वाद्यमानाभिरिन्द्रेणापि ज्ञातमित्यर्थः । राजा हि यात्रां चिकीर्षुर्यदा युद्धोचितास्त्रग्रहणमुहूर्तं साधयति तदा विशेषतो विजयढक्का वाद्यन्ते ॥

नेतव्योन्तं रिपुरनेन । इत्यत्र "नोभयोर्हेतोः [८९] इति कर्मकर्त्रोर्न षष्ठी ॥
तृन् । पात्रा गाम् । उदन्त । यश इच्छुना ॥ अव्यय । नभः पूरंपूरम् ॥
क्वसु । इदं प्रोचिवान् ॥ आनेस्युत्सृष्टानुबन्धनिर्देशात्कानशानानशां ग्रहणम् ।
कान । मङ्गलं चक्राणः ॥ शान । जगत्पवमानः ॥ आनश् । उच्चतां बिभ्राणम् ॥
अतृश् । छन्दोधीयन् ॥ शतृ । स्वरं तन्वन् ॥ डि । ध्वानं चक्रिभिः ॥ णकच् ।

१ एफ़ू °नो माङ्ग°. २ सी °दन्तः य°. ३ सी °व्ययं न°. ४ ए °नसां ग्र°.
५ एफ़ू शानः । ज°.

यात्रां कारकोऽभूत् ॥ खलर्थं । दिग्गजैर्दुःसहम् । सुज्ञानो वज्रिणा । इत्यत्र "तृ-
शुवन्त°" [९०] इत्यादिना न षष्ठी ॥

मृदङ्गै रुद्धवद्भिर्द्यां ध्वनिनानुकृतो घनः ।
शिखिभिः शीलिताः केका गतैर्हर्षं सतां मताः ॥ ५५ ॥

५५. ध्वनिना कृत्वा द्यां व्योम रुद्धवद्भिर्व्याप्तवद्भिर्मृदङ्गैः कर्तृ-
भिर्ध्वनिनैव[1] घनो मेघोऽनुकृतो[2] मेघगर्जिविडम्बितेत्यर्थः । अतश्च घनग-
र्जाशङ्कया हर्षं गतैः शिखिभिर्मयूरैः केकाः[3] शीलिता अभ्यस्ताः कृता
इत्यर्थः । कीदृश्यः । सतां विदुषां केकालक्षणज्ञानां कर्तृणां मता मा-
धुर्यादिगुणप्रधानत्वेन मूलराजा[4]रब्धयात्रासाफल्यज्ञापकत्वादभीष्टाः ॥

आरक्षै रक्षितं भूपस्यासितं प्रति योषितः ।
कीर्तेः श्रिया नु हसितं मौक्तिकस्वस्तिकान्व्यधुः ॥ ५६ ॥

५६. आरक्षैरङ्गरक्षै रक्षितं[5] भूपस्य मूलराजस्य कर्तुरास्यतेऽस्मिन्[6]
"अद्यर्थाच्चाधारे" [५. १.१२] इति क्ते आसितं सिंहासनं प्रति लँक्ष्यी-[7]
कृत्य योषितोऽविधवनार्यो मौक्तिकस्वस्तिकान्माङ्गलिक्याय व्यधुः । की-
दृशान् । कीर्तेः श्रिया हसितं नु । निर्मलत्वात्कीर्तिकर्तृकाणि लक्ष्मी-
कर्तृकाणि[8] च हास्यानीव ॥

मृदङ्गैरनुकृतः । द्यां रुद्धवद्भिः । हर्षं गतैः । इत्यत्र "क्तयोः°" [९१] इत्या-
दिना न षष्ठी ॥ असदाधार इति किम् । सतां मताः । "ज्ञानेच्छा°" [५.२.९२]
आदिसूत्रेण सत्यत्र क्तः ॥ कथं शिखिभिः शीलिताः । आरक्षै रक्षितम् । भूतेऽयं
क्तः । वर्तमाने प्रतीतिस्तु प्रकरणादिना ॥

---

१ सी °ता के°.

१ ए °भिध्वनि°. २ सी °नु मे°. ३ ए सी °का शी°. ४ डी °राजस्य या°.
५ एफ् °तं नृप°. ६ एफ् °स्मिन्निति अ°. ७ ए एफ् लक्षीकृ°. ८ सी डी
°णि वा हा°. ९ बी एफ् °मानप्र°.

आधारे। भूपस्यासितम्। कीर्तेर्हसितम्। श्रिया हसितम्। इत्यत्र "वा क्लीबे" [९२] इति[1] वा षष्ठी॥

कामुकस्य श्रियां भूपा राज्ञ आज्ञां प्रपादुकाः।
सुराष्ट्रां गमिनस्तस्थुस्तत्र कोटिं नु दायिनः॥ ५७॥

५७. राज्ञो मूलराजस्याज्ञां प्रपादुका आश्रयन्तो भूपास्तत्रासनसमीपे तस्थुः। कीदृशः सतः[2]। श्रियां[3] शत्रुलक्ष्मीणां[4] कर्मणां कामुकस्येच्छोरत एव ग्राहारिदैत्योच्छेदाय सुराष्ट्रां देशं गामिनो गन्तुकामस्य। उत्प्रेक्ष्यते[5]। कोटिं नु दायिनो दीनारादिकोटिं धारयन्त इव। अधमर्णा हि श्रियां कामुकस्याज्ञां प्रपादुकाः सन्तः समीपे तिष्ठन्ति॥

जगदागामिनोरिष्टस्यावश्यं छेदिनो द्विजाः।
एयुस्तत्राशितारो द्विर्मासे मासो द्विरम्बुपाः॥ ५८॥

५८. तत्रासनसमीपे शान्तिकर्मणे[6] द्विजा एयुः। किंभूताः। मासे द्विर्द्वौ वारावाशितारो[7] भोक्तारस्तथा मासो मासस्य द्विरम्बुपा द्वौ वारौ जलपायिनस्तीव्रतपश्चारिण इत्यर्थः। अत एव जगल्लोकमागामिनो[8] भाविनोपीत्यर्थः। अरिष्टस्याशुभस्यावश्यं छेदिनः॥

आज्ञां प्रपादुकाः। इत्यत्र "अकमेरुकस्य" [९३] इति न षष्ठी॥ अकमेरिति किम्[9]। श्रियां कामुकस्य॥

सुराष्ट्रां गमिनः। जगदागामिनः। कोटिं दायिनः। इत्यत्र "एष्यदृणेनः" [९४] इति न षष्ठी॥ एष्यदृणेन इति किम्। अरिष्टस्यावश्यं छेदिनः। अत्र "णिन् चावश्यकाधमर्ण्ये" [५.४.३६] इत्यावश्यकेर्थे णिन्॥

---

१ बी °ति प°. २ डी °दृशाः सन्तः।. ३ सी श्रियो श°. ४ एफ् °क्ष्मीनां क°. ५ ए °त्प्रेक्षिते।. बी त्प्रेक्ष्यन्ते।. सी डी °त्प्रेक्षते।. ६ सी °र्मणा द्वि°. ७ एफ् °रावशि°. ८ ए °कार इ°. ९ ए °ति किम्।

एयुक्तत्रे[1] । इत्यत्र "सप्तमी°" [९५] इत्यादिना सप्तमी ॥

मासे द्विराशितारः । इत्यत्र "न वा°" [९६] इत्यादिना वा सप्तमी ॥ पक्षे [2]शेषषष्ठी । मासो द्विरम्बुपाः ॥

सौवस्तिकैः सन्मुहूर्ते आयुक्तैस्तपसः श्रुते ।
मन्त्रे शान्तेश्च कुशलैश्चक्रे हस्त्यश्वपूजनम् ॥ ५९ ॥

५९. सौवस्तिकैः पुरोहितैः सन्मुहूर्ते शुभवेलायां हस्त्यश्वपूजनं [3]शान्तये मन्त्रोच्चारपूर्वं पुष्पादिना चक्रे । किंभूतैः । त[4]पसस्तपश्चरण आयुक्तैस्तत्परैः । एतेन नैष्ठिकत्वोक्तिः । तथा श्रुत आगम आयुक्तैः । एतेन ज्ञा[5]नितोक्तिः । अत एव मन्त्रे कुशलैर्निपुणैरत ए[6]वं च शान्तेः शान्तिकर्मणि कुशलैश्च ॥

मन्त्रे कुशलैः । श्रुत आयुक्तैः । इत्यत्र "कुशल°" [९७] इत्यादि[7]ना वा सप्तमी ॥ पक्षे [8]शेषषष्ठी । शान्तेः कुशलैः । तपस आयुक्तैः ॥

स्वामिनोऽश्वेष्विभानां चानसां पत्तिषु चेश्वराः ।
[1]लक्ष्म्यां क्षितेश्चाधिपतेः सद्योद्वारं सिषेविरे ॥ ६० ॥

६०. अश्वेष्विभानां च स्वामिनोनसां रथानां पत्तिषु चेश्वराश्चतुरङ्गबलनायका लक्ष्म्यां [9]राज्यश्रियः क्षितेश्चाधिपतेर्मूलराजस्य द्वारं सिंहद्वारं सद्यः सिषेविरे ॥

---

१ ए लक्ष्म्यां हिते°.

---

१ एफ् °त्र । स°. २ एफ् शेषे षष्ठी. ३ सी डी शातये. ४ एफ् °परत°. ५ एफ् °नित्वोक्तिः ।. ६ बी °व शा°. ७ सी °ना स°. ८ एफ् शेषे षष्ठी. ९ बी राजश्रियां क्षि°.

प्रतिभूभिः श्रियः कीर्तौ धर्मे नीतेश्च साक्षिभिः ।
शुक्रे गुरोः प्रसूतैर्नु दायादैर्न्वायि मन्त्रिभिः ॥ ६१ ॥

६१. मन्त्रिभिरायि नृपान्तिक आगतम् । किंभूतैः । धर्मे धर्मस्य नीतेश्च न्यायस्य च साक्षिभिर्लग्नकैः । स्थानभूतैरित्यर्थः । तथा श्रियः कीर्तौ च प्रतिभूभिर्लग्नकैः स्थानैरित्यर्थः । तथा महामतित्वाच्छुक्रस्य गुरोर्बृहस्पतेर्वा प्रसूतैर्न्वपत्यैरिव । यद्वा दायादैर्नु गोत्रिभिरिव ॥

अश्वेष्विभानां स्वामिनः । पत्तिष्वनसामीश्वराः । लक्ष्म्यां क्षितेरधिपतेः । शुक्रे गुरोर्दायादैः । धर्मे नीतेः साक्षिभिः । कीर्तौ श्रियः प्रतिभूभिः । शुक्रे गुरोः प्रसूतैः । इत्यत्र "स्वामी°" [९८] इत्यादिना वा सप्तमी । पक्षे शेषषष्ठी ॥

ज्योतिषेधीतिनो जन्म च्छायायां शङ्कुमादधुः ।
द्विष्यसाधु नृपे साधु लग्नं साधयितुं क्षणात् ॥ ६२ ॥

६२. जन्म जन्मकालं प्राप्य जन्मन आरभ्येत्यर्थः । "कालाध्वनोर्व्याप्तौ" [२.२.४२] इति द्वितीया । ज्योतिषेधीतमेभिरधीतिनः । "इष्टादेः" [७.१.१६७] इतीन् । आजन्माधीतज्योतिषाः । अत्यन्तं ज्योतिःशास्त्रज्ञा इत्यर्थः । आदधुः समभूभागेस्थापयन् । क । छायायाम् । छायानिमित्तं शङ्कुं ज्योतिःशास्त्रोक्तसरलत्वादिगुणोपेतं सप्ताङ्गुलादिप्रमाणं कालमानकारणं काष्ठकीलकम् । किं कर्तुम् । लग्नं मेषादि क्षणाच्छीघ्रं साधयितुम् । कीदृक् । द्विषि शत्रावसाधु क्षयकारि नृपे मूलराजे साध्वभ्युद-

---

१ डी °तिष्यधी°. २ ए °साधुः नृ°.

---

१ सी डी ॥ मंभिर्लग्नैः स्थानैरि°. २ ए कीर्त्या श्रि°. ३ सी °ना स°. ४ एफ् शेषे षष्ठी. ५ सी °न्मका°. ६ एफ् °न्म आ°. ७ डी °तिष्यधी°. ८ सी डी °त्यन्तज्यो°. ९ एफ् °न् । क छा°. १० बी एफ् °रकं का°.

यकारि । शङ्कुर्हि च्छायामानानयनायातपवति समभूभागे स्थाप्यते । तेन च कालो मीयते । कालमानेन च लग्नं साध्यते । छायायां शङ्कु-मादधुरित्यनेन यात्रालग्नदिनस्य रजोवगुण्डनाद्युत्पातरहितत्वेन श्रेष्ठत्वं सूचितम् ॥

स्वं प्रत्यसाधून्साधूंश्चागणयन्वेत्रिणां पतिः ।
साधून्स्वामिनि तत्कार्ये निपुणांश्चाग्रतो व्यधात् ॥ ६३ ॥

६३. वेत्रिणां पतिः प्रतीहारेशः स्वामिनि मूलराजे साधून्भक्तांस्त-त्कार्ये स्वाम्यर्थे निपुणान्विधानचतुरानग्रतो मूलराजस्य पुरतो व्यधा-च्चक्रे । कीदृक्सन् । अतिस्वामिभक्तत्वात्स्वमात्मानं प्रत्यसाधूनभक्तान् साधूंश्च भक्तानगणयन्नपरिभावयन् ॥

हसन्तो निपुणान्मातुः पितुः साधूंश्च शस्त्रिणः ।
प्रतीशं निपुणास्तस्थुः श्रेण्या द्वारेऽङ्गरक्षकाः ॥ ६४ ॥

६४. अङ्गरक्षकाः श्रेण्या पङ्क्त्या द्वारे तस्थुः । किंभूताः सन्तः । ईशं स्वामिनं प्रति निपुणा रक्षाचतुरा अत एव मातुर्निपुणान्मात्रैव निपुणान्मन्यमानान्पितुः साधूंश्च पित्रैव साधून्मन्यमानान्भटान्हसन्त-स्तथा शस्त्रिणः प्रहरणहस्ताः ॥

ज्योतिषेऽधीतिनः । इत्यत्र "व्याप्ये क्तेनः" [९९] इति सप्तमी ॥ व्याप्य इति किम् । जन्माधीतिनो ज्योतिषे । अत्र जन्मनो मा भूत् ॥

छायायां शङ्कुमादधुः । इत्यत्र "तद्युक्ते हेतौ" [१००] इति सप्तमी ॥

१ एफ् °धूंश्च ग°.

१ सी डी °ने च°. २ एफ् °मिनम्°. ३ ए सी °धून् भ°. ४ एफ् °क्ता-नग°. ५ बी ॥ श्रे°. ६ ए °रात°. ७ डी °तिष्य धी°.

द्विष्यसाधु । इत्यत्र "अप्रति°" [१०१] इत्यादिना सप्तमी ॥ अप्रत्यादा-विति किम् । स्वं प्रत्यसाधून् ॥

नृपे साधु । इत्यत्र "साधुना" [१०२] इति सप्तमी ॥ अप्रत्यादावित्येव । स्वं प्रति साधून् ॥

तत्कार्ये निपुणान् । स्वामिनि साधून् । इत्यत्र "निपुणेन°" [१०३] इत्या-दिना सप्तमी ॥ अर्चायामिति किम् । मातुर्निपुणान् । पितुः साधून् ॥ अप्रत्या-दावित्येव । प्रतीशं निपुणाः ॥

भृत्यानामधि चौलुक्येध्यद्रिषु क्ष्माभुजां बलम् ।
उपखार्यामिव द्रोणो मिलत्यागाद्बलेधिकम् ॥ ६५ ॥

६५. चौलुक्येधि भृत्यानां मूलराजस्येशस्य किंकराणामध्यद्रिषु क्ष्माभुजामीश्येषु पर्वतेषु स्वामिनां राज्ञां बलं सैन्यं बले मूलराजसैन्ये मिलति सत्यधिकमर्गलमागादर्थादेतन्मध्य एव । उपखार्यां द्रोण इव । यथा खार्याः षोडशद्रोण्या द्रोणश्चतुराढकी अधिक इत्यर्थः । एतावन्मू-लराजबलमामिलद्यावति बहूनामप्यद्रिनृपाणां बलं खार्यां द्रोणतुल्यमभू-दित्यर्थः ॥

वेणौ ध्वनति भेर्यास्त भेर्यां वेणुरपि क्षणात् ।
आसीनेषु द्विजेष्वापुः स्वं सूता एषु च द्विजाः ॥ ६६ ॥

६६. वेणुशब्देनात्र वेणूपलक्षितं प्रेक्षणकमभिव्यज्यते । भेरीशब्देन च भेर्युपलक्षितं तूर्यम् । ततो वेणौ वंशोपलक्षिते प्रेक्षणके ध्वनति लयप्र-धानं वाद्यमानैर्वेणुवीणादिभिः शब्दायमाने भेरी भेर्युपलक्षितं तूर्यं प्रे-

१ एफ् °प्रत्यादावित्या°. २ सी डी °न् । तत्का°. ३ बी °लममाद°. ४ एफ् खार्यां बो°. ५ एफ् °द्रोण्यां द्रो°. ६ सी डी °ण इव तु°. ७ एफ् °व्यज्यते. ८ सी डी °माने वी°. ९ एफ् °मानैर्भेरी.

क्षणकस्य विघ्नाभावार्थमास्त निर्ध्वानं[1] स्थिता। तथा भेर्यां तूर्ये ध्वनन्त्यां वेणुरपि[2] प्रेक्षणकमपि क्षणादास्त निरर्थकत्वात्। यात्रार्थमुद्यते हि नृप उत्सवार्थं पर्यायेण प्रेक्षणकं तूर्यवादनं च स्यात्। तथा द्विजेष्वासीनेषु द्रव्यप्राप्तिरहितेषु सूता भट्टाः स्वं द्रव्यमापुर्लेभिरे। एषु च सूतेष्वासीनेषु द्विजाः स्वमापुः। यात्रार्थमुद्यतो हि राजा वीरांश्च गुणोत्कीर्तकेभ्यो[3] भट्टेभ्यो यशसे वेदपाठिभ्यो द्विजेभ्यश्च[4] धर्मार्थं द्रव्यं ददाति[5]॥

स्वे। अध्यग्निषु क्ष्माभुजाम्॥ ईशे[6]। अधि चौलुक्ये भृत्यानाम्। इत्यत्र "स्वेशेऽधिना" [१०४] इति सप्तमी। अधिः स्वस्वामिसंबन्धं द्योतयति॥

उपखार्यां द्रोणः। इत्यत्र "उपेनाधिकिनि"[7] [१०५] इति सप्तमी। उपोऽधिकाधिकिसंबन्धं द्योतयति॥

बलेर्मिकत्यागाद्। इत्यत्र "यद्भावः°" [१०६] इत्यादिना सप्तमी॥ यत्र क्रियार्हाणां कारकत्वं तद्विपर्ययो वा। यथा भेर्यां ध्वनन्त्यां वेणुरास्त। द्विजेष्वासीनेषु स्वं सूता आपुः। यत्र च क्रियानर्हाणामकारकत्वं तद्विपर्ययो वा। यथा सूतेष्वासीनेषु द्विजाः स्वमापुः। वेणौ ध्वनति भेर्यास्त। तत्रापि भावो भावस्य लक्षणं भवतीत्यनेनैव सप्तमी। अत्र च वेण्वपेक्षयोदात्तध्वानत्वेन वाद्येषु मुख्यत्वेन च ध्वानक्रियार्हत्वाद्भेर्याः सूतापेक्षया तपश्चरणादिक्रियाप्रधानत्वेन दानक्रियार्हत्वाद्द्विजानां च क्रियार्हता। भेर्यपेक्षया वेणोर्द्विजापेक्षया सूतानां च ध्वानदानक्रियानर्हत्वेन क्रियानर्हता॥

ग्रामो यो योजनान्यष्टौ योजनेषु दशस्वितः।
पर्वेवाह्नि त्रयोदश्या यात्रां द्रष्टुं स आययौ॥ ६७॥

---

१ सी डी निध्वानं. २ सी डी वेणुर्वेणु°. ३ एफ् °भ्यो य°. ४ सी डी °भ्यः ध°. ५ बी ददाति॥. ६ एफ् °शे चौ°. ७ बी °धिकीनि.

६७. यथा त्रयोदश्यास्तिथेः सकाशादह्नि दिने चतुर्दशीलक्षणे गत इति गम्यते । पर्व पूर्णिमा स्यात्तथेतः पत्तनाद्यो ग्रामो ग्रामस्थो लोकोष्टौ योजनान्यष्टसु योजनेषु गतेषु दशसु वा योजनेषु गतेष्वभूत्स ग्रामो यात्रां प्रयाणं द्रष्टुमाययौ । नानोत्सवादिनात्यद्भुतत्वाद्दूरदेशस्थोपि लोकः कौतुकेन यात्रां द्रष्टुमागत इत्यर्थः ॥

इतो ग्रामो योजनान्यष्टौ । इतो ग्रामो योजनेषु दशसु । इत्यत्र "गते गम्ये°" [१०७] इत्यादिनैकार्थ्ये वा । पक्षे पूर्वेण सप्तमी ॥ अध्वन इति किम् । त्रयोदश्या अह्नि पर्व । अत्रैकार्थ्याभावे पूर्वेण नित्यं सप्तमी ॥

पौर्यो रुदत्सु बालेषु सीदतां गृहकर्मणाम् ।
पर्युर्द्रष्टुं नृपं श्रेष्ठं नृष्विन्द्रमिव नाकिनाम् ॥ ६८ ॥

६८. बालेषु रुदत्सु मातृविरहेण रुदतो बालकान् सीदतां गृहकर्मणामप्रवर्तमानान् रन्धनादीन् गृहव्यापारांश्चानादृत्य पौर्यो नृपं द्रष्टुं कौतुकादेयुः । यतो नाकिनां मध्य इन्द्रमिव नृषु मध्ये श्रेष्ठं रूपैश्वर्यादिगुणैरुत्कृष्टम् ॥

तदास्त्रिभ्यो वरा योधा रेजुर्यैः स्थानकस्थितैः ।
विद्धः क्रोशात्क्रोशयोर्वा म्रियेत क्षणयोः क्षणात् ॥ ६९ ॥

६९. तदा यात्रोपक्रमकालेस्त्रिभ्योस्त्रं धनुरस्त्येषां तेभ्यो वरा धनुर्धरेषु श्रेष्ठा योधा रेजुः स्वावसरप्राप्तिसंभावनया तेजस्विनोभूवन् । यैर्योधैः स्थानकस्थितैरालीढादिस्थानावस्थितैः सद्भिः क्रोशाद्गव्यूतात्क्रो-

१ प °युद्रष्टुं. २ सी नृपश्रे°.

१ सी यात्राप्र°. २ सी °त्र गम्ये°. ३ एफ् °र्मणां प्र°. ४ एफ् मध्ये श्रे°. ५ एफ् °धा रे°. ६ प स्वावव°.

शयोर्वा विद्धः सन् क्षणयोरल्पमानकालभेदयोः क्षणाद्वा । पूर्वो वा-त्रापि योज्यः । म्रियेत[1] । ये दूरवेध्यवेधिनो महाप्राणाश्चेत्यर्थः । संभावने सप्तमी ॥

सीदतां कर्मणामेयुः । रुदत्सु बालेष्वेयुः । इत्यत्र "षष्ठी वानादरे" [१०८] इति वा षष्ठी । पक्षे पूर्वेण सप्तमी ॥

नाकिनां नृषु श्रेष्ठम् । इत्यत्र "सप्तमी च०" [१०९] इत्यादिना षष्ठीसप्तम्यौ ॥ अन्ये तु पञ्चमीमपीच्छन्ति । अश्विभ्यो वरा योधाः ॥

स्थितैः क्रोशात्क्रोशयोर्वा विद्धैः । क्षणात्क्षणयोर्वा म्रियेत । इत्यत्र "क्रिया-मध्येध्व०" [११०] इत्यादिना पञ्चमीसप्तम्यौ । इह धानुष्कावस्थानमेका क्रिया पुरुषव्यधश्च द्वितीया । तन्मध्ये क्रोशोध्वा । तथा व्यधनमेका क्रिया मरणं च द्वितीया । तन्मध्ये क्षणः कालः ॥

संघट्टशीर्णस्त्रीहारैर्मुक्तानां राजवेश्मनि ।
खार्योः खार्योरप्यधिको द्रोणोर्धेन तदाभवत्[1] ॥ ७० ॥

७०. तदा यात्रोपक्रमकाले राजवेश्मनि संघट्टेनान्योन्यं संमर्देन शीर्णास्त्रुटिता ये स्त्रीहारास्तैर्हेतुभिर्मुक्तानां मुक्ताफलानामर्धेन ग्राढक्या कैर्ड्याधिकोध्यारूढो द्रोण आढकचतुष्कमभूत् । कीदृक् । खार्यो मुक्तानामेव द्रोणषोडशकात्खार्योरपि । अपिर्विकल्पार्थः । खारीद्वये वा-धिकोध्यारूढवान् । अक्षतक्षेपादिमाङ्गलिक्यविधयेहमहमिकयागतम-हेभ्यकुलस्त्रीणामतिबाहुल्यादेवं नाम संमर्दे हारास्त्रुटिता यावता राजगृ-हाङ्गणे मुक्ताफलानामेका द्वे वा खार्यौ सार्धद्रोणेनाधिके अभूतामित्यर्थः ॥

१ सी डी भवेत् ।

१ सी डी म्रियते । ये. २ बी °द्धः । विद्धः क्ष° ३ सी क्षणकाल ।. डी क्षण-कालः ।. ४ ए बी एफ् कत्र्यांधि°. ५ बी °पिर्वि° ६ एफ् °पिविक°. ७ बी °र्देन हा° ८ ए सी डी °ङ्गणमु°. ९ ए °कावला°.

अधिको[1] द्रोणः खार्योः । अधिको द्रोणः खार्याः । इत्यत्र "अधिकेन°" [१११] इत्यादिना सप्तमीपञ्चम्यौ ॥

अधिको द्रोणो[2]र्धेन । इत्यत्र "तृतीयाल्पीयसः" [११२] इति तृतीया ॥

नाक्षतैश्चन्दनाद्भाना न दध्नो दूर्वया पृथक् ।
न पुष्पेभ्यः फलं[1] वार्ते पात्राणि दधिरेऽङ्गनाः ॥ ७१ ॥

७१. नानापृथक्शब्दावसहायार्थौ । अङ्गनाः पात्राणि न दधिरे । कीदृंशि । अक्षतैरखण्डतण्डुलैश्चन्दनाच्च श्रीखण्डद्रवेण च नानासहायानि । तथा दध्नो दूर्वया च पृथगसहायानि । तथा पुष्पेभ्यः फलं च नालिकेरादि च ऋते विनाभूतानि । अक्षतचन्दनदधिदूर्वापुष्पफलोपेतानि पात्राणि राजादिगृहेषु महेभ्यादिकुलाङ्गनाश्चन्दनवर्धनादिमाङ्गलिक्याय नयन्तीति स्थितिः ॥

पृथ[3]ग्दध्नः । पृथग्दूर्वया । नाना चन्दनात् । नानाक्षतैः । इत्यत्र "पृथग्नाना°" [११३] इत्यादिना पञ्चमीतृतीये ॥

फलमृते । पुष्पेभ्य ऋते । इत्यत्र "ऋते द्वितीया च" [११४] इति द्वितीयापञ्चम्यौ ॥

नासन्विनाङ्गरागेण कौसुम्भं भूषणा[2]त्स्त्रियः ।
तुल्या रतेः श्रिया चेन्दोः पद्मेन च समैर्मुखैः ॥ ७२ ॥

७२. इन्दोः पद्मेन च समैस्तुल्यैर्मुखैः कृत्वा रतेः कामपत्न्याः श्रिया च विष्णुभार्यया तुल्याः स्त्रियो नासन् । कथम् । अङ्गरागेण कौसुम्भं कुसुम्भरक्तवस्त्रं च भूषणात्स्वर्णालंकाराच्च विना मङ्गल्यत्वात् ।

---

१ बी डी एफ् °लं चर्ते. २ ए °णा स्त्रि°.

१ एफ् °धिकद्रोणः खार्या इ°. २ ए °णोधेन ।. ३ सी डी °थग्दू°.

सुरूपा विभूषितालंकृताः सधवाश्च युवतयो राजादिमङ्गल्यकर्मसु व्यापृता अभूवन्नित्यर्थः ॥

विना कौसुम्भम् । विना भूषणात् । विनाङ्गरागेण । इत्यत्र "विना०" [११५] इत्यादिना द्वितीयापञ्चमीतृतीयाः ॥

श्रिया तुल्याः । रतेस्तुल्याः । पद्मेन समैः । इन्दोः समैः । इत्यत्र "तुल्यार्थैः०" [११६] इत्यादिना तृतीयाषष्ठ्यौ ॥

दत्ताः प्रासादं पूर्वेण गोपुरस्यापरेण च ।
प्राक्प्रयाणादुत्सवेन हेतुना कुङ्कुमच्छटाः ॥ ७३ ॥

७३. प्रयाणात्प्राक्प्रथममुत्सवेन हेतुना यात्रामहोत्सवार्थं कुङ्कुमच्छटा दत्ताः कुङ्कुमाम्बुना भूश्छटितेत्यर्थः । क । प्रासादं पूर्वेण पूर्वाभिमुखाद्राजभवनात्पूर्वस्यामदूरवर्तिन्यां दिशि गोपुरस्य पूर्वदिगभिमुखस्य पूर्द्वारस्यापरेण चापरस्यामदूरवर्तिन्यां दिशि च । प्रासादापेक्षया गोपुरस्य पूर्वत्वाद्गोपुरापेक्षया च प्रासादस्यापरत्वात्प्रासादादारभ्य गोपुरं यावदित्यर्थः ॥

स्नेहाय हेतवे भक्तेर्निमित्तान्मुदि कारणे ।
नरेन्द्रदर्शनस्यार्थस्योत्सुकोभून्न कस्तदा ॥ ७४ ॥

७४. स्नेहाय हेतवे प्रेम्णा हेतुना भक्तेर्निमित्ताद्बहुमानेन हेतुना मुदि कारणे हर्षाद्धेतोर्यन्नरेन्द्रदर्शनं तस्यार्थस्य मूलराजदर्शनेन हेतुना तदा यात्रारम्भकाले क उत्सुको नाभूत् ॥

प्रासादं पूर्वेण । गोपुरस्यापरेण । इत्यत्र "द्वितीया०" [११७] इत्यादिना द्वितीयाषष्ठ्यौ ॥ अनञ्चेरिति किम् । प्राक्प्रयाणात् ॥

उत्सवेन हेतुना । स्नेहाय हेतवे । भक्तेर्निमित्तात् । दर्शनस्यार्थस्य । मुदि कारणे । इत्यत्र "हेत्वर्थैः०" [११८] इत्यादिना तृतीयाद्या विभक्तयः ॥

१ डी °ता अलं°. २ बी सी डी °ताः सुध°. ३ बी °पृतभू°. एफ् °पृताभू°. ४ ए नाद्विती°. ५ ए °स्तुल्या°.

योो हेतुर्वाजिनां हेषा[1] यं[2] हेतुं दन्तिनां मदः ।
हेतुनोक्ष्णां ध्वनिर्येनार्थाय[1] यस्मै भटोद्यमः ॥ ७५ ॥
सोच्छ्वासौ[3] भूर्यतो हेतोर्यस्य हेतोः सुखो मरुत् ।
तत्र हेतौ न दूरेण राज्ञो भावी जयो महान् ॥ ७६[4] ॥

७५,७६. येन हेतुनाश्वादीनां हेषादयोभवंस्तेन हेतुना राज्ञो मूलराजस्य मूलराजाद्वा महान् जयो न दूरे भावी शीघ्रमेव भविष्यति । वाजिहेषादिभिर्यात्राविषयशुभचिह्नैर्भाविनो[1] यात्राकार्यस्य विजयस्य नैकट्यं सूचितमित्यर्थः[2] ॥ संदानितकमिति युग्मस्य संज्ञा । यदुक्तम् । एकद्वित्रिचतुश्छन्दोभिर्मुक्तकसंदानितकविशेषककलापकानि ॥

अथ दूरेपि[5] लोकस्यान्तिके नु तेजसा ज्वलन् ।
न दूराच्छ्रेयसां सिंहासनमध्यास्त भूपतिः ॥ ७७ ॥

७७. अथ सैन्यसज्जनाद्यनन्तरं भूपतिः सिंहासनमध्यास्त । कीदृक्सन् । श्रेयसां पुण्यानां मङ्गलकर्मणां वा न दूरान्निकटस्थ इत्यर्थः । अत एव लोकस्य दूरेपि राजसामन्तादिव्याप्तनिकटप्रदेशकत्वादनिकटेपि वर्तमानस्तेजसा प्रतापेन कान्त्या[3] वा ज्वलन् सँल्लोकस्यान्तिके नु समीप इव वर्तमानः । न दूराच्छ्रेयसामिति सिंहासनस्य वा विशेषणम् । सिंहासनसमीपे हि मुक्तास्वस्तिकादीनि माङ्गलिक्यानि कृतानि स्युः ॥

---

१ सी हेषां यं. २ ए ° षा ये हे°. ३ सी डी °सा सूर्य°. ४ एफ् ॥ ७६ ॥ युग्मम् ।. ५ सी° रेवि लो°

---

१ सी °वितो या°. २ एफ् °र्थः ॥ युग्मम् ॥ सं°. ३ सी °न्त्या व ज्व°. डी °न्त्या च ज्व°.

दूरं राज्ञोपठन् सूता विप्रः सर्वोन्तिकेन तु ।
अन्तिकाद्गुरुराशास्त गायनाश्चान्तिकं जगुः ॥ ७८ ॥

७८. राज्ञो नृपस्य नृपाद्वा दूरं सूता भट्टा अपठन्[1] । विप्रस्तु ब्राह्मणजातिः पुनः सर्वोपि राज्ञोन्तिके वेदमपठत् । गुरुः पुरोहितजातिः सर्वोपि राज्ञोन्तिकात्समीप आशास्ताशिषं दत्तवान् । कृत्यविधिमकथयद्वा । गायनाश्च राज्ञोन्तिकं[2] निकटे जगुः ॥

यो हेतुः । यं हेतुम् । येन हेतुना । यस्मै अर्थाय । यतो हेतोः[3] । यस्य हेतोः । तत्र हेतौ । इत्यत्र "सर्वादेः सर्वाः" [११९] इति सर्वा विभक्तयः ॥

दूरेण राज्ञः । दूराच्छ्रेयसाम् । दूरे लोकस्य । दूरं राज्ञः ॥ अन्तिकार्थं । राज्ञोन्तिकेन । राज्ञोन्तिकात् । लोकस्यान्तिके । राज्ञोन्तिकम्[4] । इत्यत्र "असत्वाराद्°" [१२०] इत्यादिना टा-ङसि-ङि-अम्प्रत्ययाः ॥

विप्रः सर्वः सूताः । सर्वो गुरुः गायनाः । इत्यत्र "जाति°" [१२१] इत्यादिनैकोर्थो बहुवद्वा ॥

स्थास्यावः सुखमद्यावां भास्यामोद्य वयं श्रिया ।
इति तूर्यप्रतिरवैर्जल्पतः स्मेव रोदसी ॥ ७९ ॥

७९. तूर्यप्रतिरवैर्यात्रामाङ्गलिक्यविधापनाय सिंहासनमध्यासीने राज्ञि विशेषतो वाद्यमानानां[6] नान्दीतूर्याणां व्योमादौ प्रतिशब्दितैः कृत्वा रोदसी[7] जल्पतः स्मेव । किमित्याह । अद्य संप्रत्यस्मदुपप्लाविदैत्यानामुच्छेत्स्यमानत्वादावां सुखं स्थास्यावोत एवाद्य वयमावां श्रिया भास्यामः ॥

? सी °स्ताशा°.

१ सी डी °ठत् । वि°. २ बी एफ् °न्तिके नि°. ३ सी डी °तोः । त°. ४ एफ् °न्तिके । इ°. ५ एफ् °सत्वेत्या°. ६ ए °नां दीतू°. ७ ए °सीव ज° ८ ए बी सी डी एफ् °माणत्वा°.

वेद्म्यहं तद्रूयं भ्रूमः पार्थो यः फल्गुनीष्वभूत् ।
स त्वं जयेति वक्तास्य पुरोधास्तिलकं व्यधात् ॥ ८० ॥

८०. पुरोधा अस्य राज्ञो यात्रोचितं तिलकं व्यधात् । कीदृक्सन् । वक्ता वदन् । किमित्याह । तदहं वेद्मि जाने तथा तद्रूयं भ्रूमस्तवाहं[1] सर्वत्र कीर्तयामि । यत्किम् । यः पार्थः फाल्गुनोर्जुनः फल्गुनीषु फल्गुनीभिश्चन्द्रयुक्ताभिर्युक्ते[2] कालेभूज्जातः स पार्थस्त्वं भवानेव । तत्पराक्रमादिगुणोपेतत्वात् । तस्माज्जय शत्रुपराभवेनोत्कृष्टो भव । अर्जुनो हि शत्रुजयेनोत्कृष्टोभूदिति ॥

धूयमाने अलक्ष्येतां राजानमनु चामरे ।
शशाङ्कमनु फल्गुन्यौ किं नु प्रोष्ठपदे नु किम् ॥ ८१ ॥

८१. राजानं मूलराजमनुलक्ष्यीकृत्य धूयमाने वीजनार्थं[3] चल्यमाने चामरे अलक्ष्येतां लोकैरुत्प्रेक्षिते । कथमित्याह । शशाङ्कं चन्द्रमनुलक्ष्यीकृत्य[4] किं नु फल्गुन्यौ किं नु किं वा प्रोष्ठपदे । धूयमानचामरद्वयमध्यस्थो राजा पूर्वफल्गुन्योः पूर्वभद्रपदयोस्तारिकयोर्मध्यस्थश्चन्द्र[5] इव लोकैर्ज्ञात[6] इत्यर्थः ॥

यान्तु याम्यां दिशं[1] प्रोष्ठपदासु तव शत्रवः ।
जय त्वं यूयमेधध्वमिति ज्योतिर्विदोवदन् ॥ ८२ ॥

८२. ज्योतिर्विदोवदन्नात्मानुरूपा[7] आशिषो ददुः । यथा हे राजंस्तव शत्रवो ग्राहरिप्वादयः प्रोष्ठपदासु प्रोष्ठपदाभिः[8] पूर्वभद्रपदाभिरुत्त-

---

१ प दिशि प्रो°.

१ पफ़ °नीभि°. २ प °भियुक्ते. ३ सी °य वल्य.° डी °य चाल्य°. ४ प °लक्षीकृ°. ५. सी डी °योर्म°. ६ सी डी लोके ज्ञा°. ७ सी तिर्वेदो°. ८ बी दादिभि°.

रभद्रपदाभिर्वा[1] चन्द्रयुक्ताभिर्युक्ते काले याम्यां दिशं[2] दक्षिणां यान्तु । म्रियन्तामित्यर्थः । प्रोष्ठपदासु हि दक्षिणदिशि याने पुनरागमनं न स्यात् । यदुक्तम् ॥

धनिष्ठारेवतीमध्ये चन्द्रे चरति यो व्रजेत् ।
दक्षिणस्यां कदाप्यस्य पुनरागमनं न हि ॥

ततश्च जय त्वं तथा यूयमेधध्वं लक्ष्म्या[3] त्वं वर्धस्वेति ॥

युवामर्च्यौ गृहा लक्ष्म्या[1] यूयमस्य भुजाविति ।
कल्याणतिलकाकृष्टा दारा जगुरिवालिनः ॥ ८३ ॥

८३. अस्य राज्ञो भुजौ कल्याणहेतुत्वात्कल्याणं[4] कल्याणाय वा पुरोधसा कृतं यत्तिलकं तेनाकृष्टाः सौरभेण दूरादानीता अलिनो भृङ्गस्य दारा भृङ्ग्यो[5] जगुरिव[6] गायन्ति स्मेव । कथमित्याह । हे भुजौ यूयं युवां लक्ष्म्या[7] विजयादिश्रियो गृहा आश्रयावत एव युवामर्च्यौ स्थ इति । भुजयोर्गानाशङ्का च तयोरेव भविष्यज्जयहेतुत्वेन यात्रारम्भकाले गानार्हत्वात्[8] । या अपि दारा आकृष्टितिलकाकृष्टा भवन्ति तास्तस्याकृष्टुर्गानादिकं कुर्वन्तीत्युक्तिः ॥

गोदौ ग्रामं खलतिकं वनानि देशमश्मकान्[2] ।
भोक्तारोन्येपि भूपास्तं नमस्कृत्याग्रतोभवन्[3] ॥ ८४ ॥

८४. स्पष्टः ॥

---

१ ए लक्ष्मा यू°. २ बी °मस्मका°. ३ सी डी ॥ ८४ ॥ पुर°.

---

१ एफ् °भिर्यु°. २ ए दिशिं द°. ३ ए लक्ष्या त्वं. ४ सी डी °ल्याणं क°. ५ एफ् भृङ्ग्यो ज°. ६ सी °व क°. डी °व स्मे°. ७ सी लक्ष्मा वि°. ८ सी डी °त् । यथा अ

पुरस्खेलिपुरस्पातिपुरस्फकैः स तैर्विभान् ।
नमः करोति स्म महालक्ष्म्यै भक्तिपुरस्कृतः[2] ॥ ८५ ॥

८५. महालक्ष्म्यै नमः करोति स्म । नमःशब्दमुच्चारितवाप्रनाम वा । इष्टदेवताप्रणामपूर्वं[1] हि यात्रा क्रियत इति स्थितिः । कीदृक्सन् । भक्तिपुरस्कृतो[2] बहुमानेन प्रेरितस्तथा तैर्गोदग्रामादिभोक्तृभिरन्यैश्च नृपैर्विभान् । यतः पुरस्खोलिपुरस्पातिपुरस्फकैः । कैश्चित्पुरस्खेलिभिः प्रसादपात्रत्वादग्रे क्रीडनशीलैः कैश्चिच्च पुरस्पातिभिर्भक्त्यतिशयख्यापनायाग्रे लुठद्भिः कैश्चिच्च पुरस्फकैर्विनयान्नीचैर्गच्छद्भिः ॥

आवां स्थास्यावः । वयं भास्यामः । वेद्म्यहम् । वयं ब्रूमः । इत्यत्र "अविशेषणे°" [१२२] इत्यादिनास्मदो द्वावेकश्चार्थौ वा बहुवत् ॥

फल्गुन्यौ फल्गुनीषु । प्रोष्ठपदे प्रोष्ठपदासु[3] । इत्यत्र "फल्गुनी°" [१२३] इत्यादिना द्वावर्थौ बहुवद्वा ॥

जय त्वम् । यूयमेधध्वम् । युवामध्यैौ । यूयं गृहाः । इत्यत्र "गुरावेकश्च" [१२४] इति द्वावेकश्चार्थौ बहुवद्वा ॥ दाराः । गृहाः । देशमश्मकान् । गोदौ ग्रामम् । खलतिकं वनानि । इत्यत्र सर्वलिङ्गसंख्ये[4] वस्तुनि स्याद्वादमनुपतति मुख्योपचरितार्थानुपातिनि च शब्दात्मनि रूढितस्तत्तल्लिङ्गसंख्योपादानव्यवस्थानुसर्तव्या ॥

षष्ठः[5] पादः समर्थितः[6] ॥

नमस्कृत्य । पुरस्कृतः । पुरस्खेलि । पुरस्पाति । पुरस्फकैः । इत्यत्र "नमस्पुरसोः°" [१] इत्यादिना सः ॥ गतेरिति किम् । नमः करोति । अत्र नमःशब्दान्तरं न त्वव्ययमिति । नमःशब्दस्य कृञ्योगे विकल्पेन गतिसंज्ञाविधानाद्वा ॥

---

१ एफ् °क्तिभरपु°. २ एफ् ॥ ८५ ॥ इत्याचार्यश्रीहेमचन्द्रविरचितायां शब्दानुशासनद्व्याश्रयमहाकाव्ये षष्ठपादसमर्थितः । समाप्तः ।

१ एफ् °वं या°. २ सी °नेव प्रे°. ३ सी °दाष्टपदासु. ४ ए °लिङ्गयसं°. ५ सी डी इति ष°. ६ सी डी °तः इति षष्ठः पादः समाप्तः ॥ ७ सी °स्कृतः ।

स्थितं पादं तिरः कृत्वा तिरस्कृतगिरिं गजम् ।
तिरःकृतारिः सोध्यास्त तिरस्कृत्वा रविं त्विषा ॥ ८६ ॥

८६. तिरःकृता अन्तर्हिता जिता अरयो येन स तथा स मूलराजस्त्विषा तेजसा कृत्वा रविं तिरस्कृत्वान्तर्धाय विजित्यातितेजस्वीभूयेत्यर्थः । गजमध्यास्त । कीदृशम् । तिरस्कृतगिरिमौन्नत्येन पराभूताद्रिम् । यदि शैलादप्युन्नतो गजस्तर्हि कथं तमध्यास्तेत्याह । यतः पादं तिरःकृत्वा तिरश्चीनं विधायाधोवनम्येत्यर्थः । स्थितं निश्चलीभूतम् । गजो हि पाश्चात्ययोः[2] पादयोर्मध्ये येन[3] केनाप्यारुह्यते । तमसावधोवनमयति । तिरस्कृत्वा रविं त्विषा तिरस्कृतगिरिं गजं सोध्यास्तेत्यनेन यथा रविर्गिरिमुदयाचलमारोहति तथायं गजमिति व्यज्यते ॥

तिरस्कृत तिरःकृत । इत्यत्र "तिरसो वा" [२] इति वा सः ॥ गतेरिति किम् । तिरः कृत्वा ॥ अगतेरप्यन्तर्द्धाविच्छत्यन्यः । तिरस्कृत्वा ॥

पुंस्फाल्गुनः स पुंस्पाता मत्तपुंस्करिणस्तदा ।
शिरस्पदमलंचक्रे पुंस्खड्गिभिरधस्पदम् ॥ ८७ ॥

८७. स मूलराजस्तदा यात्राकाले मत्तो मदोत्कटः पुमान्पौरुषोपेतश्च यः करी तस्य शिरस्पदं कुम्भस्थलस्थानमलंचक्रे । कीदृक् । पुंस्सु पौरुषोपेतेषु फाल्गुन इवार्जुन इव पुंस्फाल्गुनोत[5] एव पुंस्पाता पुरुषाणां रक्षकः । तथा पुंस्खड्गिभिः पौरुषोपेतखड्गधरैश्चाधस्पदं हस्तिनोर्ध्वस्थानमलंचक्रे । करीन्द्रो हि राज्ञाध्यासितः परप्रवेशनिवारणाय खड्गिभिरधः परिचार्येत[7] इति स्थितिः ॥

---

१ सी °रविं.

---

१ सी स मू°. २ ए °यो पा°. ३ ए सी येना के°. ४ ए सी °रकृत्वा. डी° रःकृत्वा. ५ डी पुंस्पा°. ६ बी °धःस्था°. ७ बी °रिचार्य°.

पुंस्करिणः । पुंस्खड्गिभिः । पुंस्पाता । पुंस्फाल्गुनः । इत्यत्र "पुंसः" [३] इति सः ॥

शिरस्पदम् । अधस्पदम् । इत्यत्र "शिरोधसः०" [४] इत्यादिना सः ॥

अथ राज्ञः प्रस्थानमेव श्लोकानामेकोनत्रिंशता वर्णयति ।

श्रेयस्कामः सहस्कंसोयस्कुशावान्यशस्कृते ।
यान्सोपश्यत्ययस्कुम्भं पयस्कर्णीशुभं पुरः ॥ ८८ ॥

८८. स राजा पयस्कुम्भं जलघटं पुरोपश्यत् । कीदृक्सन् । सहसो बलस्य कंसः पात्रमत एवायःप्रधाना कुशायस्कुशा । अत्र प्रस्तावादङ्कुशः । सास्यास्ति अयस्कुशावान्यशस्कृते शत्रुजयोत्थकीर्त्यर्थं यान् शत्रुं प्रति गच्छन्नत एव च श्रेयः कामयते अणि श्रेयस्कामः कुशलार्थी । किंभूतं कुम्भम् । पयश्च कर्णी च पयस्कैर्ण्यौ ताभ्यां शुभमभग्नकर्णं जलपूर्णं चेत्यर्थः । यात्रायां हि जलपूर्णस्य पूर्णकलैशस्याग्रतो दर्शनं महाशकुनम् ॥

ऊर्जस्पात्रं पुनःकारं गीःकारः सव्यतोस्य गौः ।
यशस्कल्पो द्विषद्दुर्गं रोधस्पाशं शशंस नु ॥ ८९ ॥

८९. गौः शण्डः सव्यतो राज्ञो वामदेशे पुनर्वारंवारं कारः करणं यत्र तद्यथा स्यादेवं गिरं शब्दं करोतीति गीःकारः सन्नस्य राज्ञो द्विषद्दुर्गं ग्राह्यारिदुर्गस्थानं रोधस्पाशं निन्द्यतटं शशंस नूवाचेव । यथाहं रोधस्पाशं सुखेन विक्षिपामि तथा त्वं द्विषद्दुर्गं विक्षेप्स्यसीति शब्दायमानः शण्डो वदद्दिवेत्यर्थः । कीदृक् । ऊर्जस्पात्रं बलिष्ठस्तथेषदूनं यशो यशस्कल्पः । "बाधन्ते स्वार्थिकाः क्वचित्" इति क्लीबत्वाभावः । अतिश्वेतत्वाद्यशस्तुल्यः । यात्रायामीदृक् शण्डः शकुनराजः ॥

---

१ सी पुंस्पल्गु°. २ प सी डी °स्कर्णौ ता°. ३ बी °लसस्या°. ४ सी निन्द्यं त°. ५ बी °त्रायां हीदृ°. ६ सी °क् सण्ड°.

गौः पयस्कं क्षरन्सस्य स्वःकल्पायां पुरो भुवि ।
पयस्काम्यदधःकाम्यदवाःकाम्यत्सुताभवत् ॥ ९० ॥

९०. अस्य राज्ञो गच्छतः पुरः स्वःकल्पायां क्षीरतरुच्छायाहरिततृण-शुचित्वादिगुणरम्यत्वेन स्वर्गतुल्यायां भुवि गौर्धेनुरभूत् । कीदृशी सती । पयस्काम्यन् क्षीरकण्ठत्वेन दुग्धाभिलाषुकोत एवाधःकाम्यन् दुग्धपानायाधस्तनप्रदेशस्येच्छुरवाःकाम्यन्नवप्रसूतत्वाज्जलस्याप्यनिच्छुः सुतो वत्सो यस्याः सात एवापत्यस्नेहेन पयस्कमल्पं पयो दुग्धं क्षरन्ती स्रवन्ती । गन्तुकस्य हीदृग्गौः शकुनमतल्लिका ॥

यशस्कृते । श्रेयस्कामः । सहस्कंसः । पयस्कुम्भम् । अयस्कुशावान् । पयस्कर्णी । ऊर्जस्पात्रम् । इत्यत्र "अतःकृकमि°" [५] इत्यादिना सः ॥ अत इति किम् । गीःकारः ॥ अनव्ययस्येति किम् । पुनःकारम् ॥

रोधस्पाशम् । यशस्कल्पः । पयस्कम् । इत्यत्र "प्रत्यये" [६] इति सः ॥ अनव्ययस्येत्येव । स्वःकल्पायाम् ॥

पयस्काम्यत् । इत्यत्र "रोः काम्ये" [७] इति सः ॥ रोरिति किम् । अवाःकाम्यत् । अनव्ययस्येत्येव । अधःकाम्यत् ॥

ज्योतिष्काम्यत्सु धूःकाम्यन् धनुष्कल्पभ्रुवं स्त्रियम् ।
ससर्पिष्कामगीष्पाशां निष्कलङ्कां स ऐक्षत ॥ ९१ ॥

९१. स राजा ज्योतिर्ज्ञानमिच्छन्ति ये तेषु ज्योतिष्काम्यत्सु धूः-काम्यन् धुरमिच्छन् शकुननिमित्तादिज्ञेषु मध्ये धुरीणः सन् स्त्रियमै-क्षत । कीदृशीम् । धनुष्कल्पे कुटिलत्वेन चापतुल्ये भ्रुवौ यस्यास्ताम् ।

१ सी °ष्पाशनि°.

१ बी धरस्य स्त°. २ डी °ज्जलं तस्या°. ३ ए सी डी °स्येव. ४ बी °ध्येषु धु°.

एतेन रूपवत्त्वमुपलक्षितम् । तथासती गीष्पाशा निन्द्या गीर्यस्यास्तां शुभवादिनीम् । तथा निष्कलङ्कामक्षतशीलां सतीमित्यर्थः । कुष्ठादिकलङ्करहितां वा । तथा ससर्पिष्कां[1] घृतभृतभाजनान्विताम् । यात्रायां हीदृक्स्त्रीरत्नदर्शनं शकुनरत्नम् ॥

दुष्प्रापशकुनान्याविष्पुण्यान्याविष्कृतोद्यमः ।
निष्पिप्रिये बहिष्पश्यन्स बहिष्कृतदुष्कृतः[1] ॥ ९२ ॥

९२. बहिष्कृतदुष्कृतो निर्धूतपापः स राजा निष्पिप्रिये भाविजय[2]सिद्धिनिश्चयेन नितरां प्रीतः । कीदृक्सन् । आविष्कृतोद्यमः प्रकटितयात्रोत्साहः सन् । दुष्प्रापशकुनानि श्रेष्ठत्वादुर्लभानि पूर्वोक्तानि शकुनानि बहिः प्रासादाद्बाह्यदेशे पश्यन् । कीदृंशि । आविष्कृतं ज्ञापितं पुण्यं शुभं दैवं यैः । वृत्तौ गतार्थत्वात्कृतशब्दलोपः । तान्याविष्पुण्यानि ॥

धनुश्चतुष्करं प्रादुष्कुर्वन्स[2] यांश्चतुष्पथे[3] ।
अदौष्पुरुष्यनैष्कुल्यैः प्रादुष्प्रेमार्चितो न कैः ॥ ९३ ॥

९३. स राजा चतुष्पथे चतुष्के यान्सन् प्रादुष्कृतं प्रकटितं प्रेमानुरागो यत्र गतार्थत्वात्कृतशब्दलोपे प्रादुष्प्रेम कैर्नार्चितः पुष्पादिढौकनेन पूजितः । किंभूतैः । दुष्टाः[3] पुरुषा दुष्पुरुषास्तेषां भावो दौष्पुरुष्यं दुष्टपौरुषं कुलान्निर्गता निष्कुलास्तेषां भावो नैष्कुल्यमकुलीनता द्वन्द्वे ते न स्तो येषां तैः पुरप्रधानैरित्यर्थः । कीदृक्सन्[4] । चतुष्करं[5] चतुर्हस्तप्रमाणम् । अत्र प्रमाणान्मात्रटो "द्विगोः संशये च" [७.१.१४३.] इति लोपः । धनुः प्रादुष्कुर्वन् प्रकटयन् ॥

१ बी °दुःकृत°. २ डी °र्वन्यान्स चतु°. ३ बी °न्स यांश्च°. सी °न्मयान् चतु°.

---

१ सी °पिंकां घृ°. २ बी °तिविज°. ३ बी °ष्टापु°. ४ बी °क्सः । च°. ५ सी °तुर्ह°.

अग्नीष्पाशाम्। यजुष्कल्प। सर्पिष्काम्। ज्योतिष्काम्यस्तु। इत्यत्र "नामिनस्तयोः षः" [८] इति षः॥ [२]रोः काम्य इत्येव। धूःकाम्यन्॥

निष्ककङ्काम्। निष्पिप्रिये। दुष्कृतः। दुष्प्राप। बहिष्कृत। बहिष्पश्यन्। आविष्कृत। आविष्पुण्यानि। [२]प्रादुष्कुर्वन्। प्रादुष्प्रेम। चतुष्करम्। चतुष्पथे। इत्यत्र "निर्दुर्०" [९] इत्यादिना षः॥ कथम् [३]अनैष्पुरुष्यनैष्कुल्यैः। एकदेशविकृतस्यानन्यत्वात्॥

[१]द्विःफलं त्रिःफलं स द्विष्पुष्पं त्रिःपुष्पमुज्झतः।
द्विष्खे त्रिःखे क्षिप्तलाजान् द्विष्कांस्त्रिःकान् जगाद नः॥९४॥

९४. नृपः कान्पुंसो द्विः कान्पुंसस्त्रिर्वा न जगाद किं तु सर्वानपि वारद्वयं वारत्रयं वा ललापेत्यर्थः। किंभूतान्। राज्ञो माङ्गलिक्यार्थं द्विर्द्वौ वारौ फलम्। जातावेकवचनम्। बीजपूरादिफलानि त्रिःफलं त्रीन्वारांश्च फलानि। द्विष्पुष्पं त्रिःपुष्पं द्वौ त्रींश्च वारान्पुष्पाण्युज्झतो राज्ञोऽग्रे वर्षतस्तथा द्विष्खे त्रिःखे व्योम्नि च द्वौ वारौ त्रीन्वारांश्च क्षिप्तलाजान्प्रेरिताक्षतान्॥

द्विष्कान्। द्विष्खे। द्विष्पुष्पम्। द्विष्फलम्। इत्यत्र "सुचो वा" [१०] इति वा षः। पक्षे ≍क≍पौ(पौ) विसर्गश्च। त्रिःकान्। त्रिःखे। त्रिःपुष्पं। त्रिःफलम्॥

जनैस्तस्य वपुष्प्रेक्ष्य ज्योतिष्खर्वयदुष्णगोः।
आयुष्काम्यं जनुष्ख्यातं चक्षुष्फलितमूहितम्॥ ९५॥

९५. जनैरायुर्जीवितं काम्यं मनोज्ञं जनुर्जन्म ख्यातं सर्वत्र प्रसि-

---

१ बी द्विष्फलं.

---

१ सी रो का°. २ ए सी डी °दुःकुर्व°. ३ बी सी अनैष्कुल्यदौष्कु°. डी अनैष्कु°.

खम् । कृतकृत्यमित्यर्थः । चक्षुर्लोचनं फलितं सफलमूहितं वितर्कितम् । किं कृत्वा उष्णगो रवेर्ज्योतिस्तेजः सर्वयल्लघयत्तस्य राज्ञो वपुः प्रेक्ष्य ॥

रोचिष्कवलयद्भानोर्दृग्ज्योतिष्फलयनृणाम् ।
सर्वार्चिष्पिदधत्खेगाद्वर्हिः पाण्डुरयद्रजः ॥ ९६ ॥

९६. रजः सैन्यपादघातोत्था धूलिः खेगात् । कीदृक्सत् । बर्हिः । जातावेकवचनम् । दर्भान्पाण्डुरयत् । पृथ्वीस्थं वनगहनादि व्याप्नुव-दित्यर्थः । तथोर्ध्वं प्रसृमरत्वाद्भानो रोचिः किरणान्कवलयद्ग्रसमानम् । तथातिनिबिडत्वात्सर्वेषां दीपादीनामर्चिः कान्तिः सर्वार्चिस्तत्पिदधदत एव नृणां दृग्ज्योतिर्लोचनदीप्तिं फलायन्निष्फलयच्च । रजोतिनिबिडं रोदसी व्यापेत्यर्थः ॥

रोचिष्कवलयत् । ज्योतिष्खर्वयत् । सर्वार्चिष्पिदधत् । दृग्ज्योतिष्फलयत् । आयुष्काम्यम् । अनुष्ष्यातम् । वपुष्प्रेक्ष्य । चक्षुष्फलितम् । इत्यत्र "वेस°" [११] इत्यादिना वा षः ॥ पक्षे । बर्हिः पाण्डुरयत् इत्यादि ॥

अर्चिष्पारश्वधं ज्योतिष्कौन्तं च रुरुचे तदा ।
तन्वदैन्द्रं धनुष्खण्डमीक्ष्यमाणं धनुष्करैः ॥ ९७ ॥

९७. तदा मेघतुल्ये रजसि नभोव्यापिनि सतीत्यर्थः । पारश्वधं परशुशस्त्रसंबन्ध्यर्चिर्दीप्तिः कौन्तं प्राससंबन्धि ज्योतिश्च रुरुचे । कीदृशम् । स्वर्णमण्यादिखचितत्वेनोल्लसदनेकवर्णप्रभाजालत्वादैन्द्रं शक्रसंबन्धि धनुष्खण्डं तन्वदेत एवं धनुष्करैर्धानुष्कैरद्भुतधनुर्भ्रान्त्येक्ष्यमाणम् ॥

---

१ बी °तिफ°. २ बी °मीक्षमा°.

---

१ बी °नं च फ°. २ ए °दद ए°. ३ सी डी °न च ध°.

धनुष्फलकयोग्याभिस्तत्रारुष्पाणयो बभुः ।
सर्पिष्पाः सुभटा बर्हिष्खननैर्ब्राह्मणा इव ॥ ९८ ॥

९८. सर्पिष्पा घृतपायिनोतिबलिष्ठा इत्यर्थः । सुभटा विशेषतो दानसन्मानपात्रत्वाद्बभुः । यतो धनुष्फलकयोश्चापस्फरयोर्या योग्या निरन्तराभ्यासास्ताभिः कृत्वारुर्व्रणं पाणौ येषां ते धनुर्विद्यायां खड्गविद्यायां च कुशला इत्यर्थः । यथा सर्पिष्पा जातिस्वभावेनात्यन्तं घृतप्रियत्वाद् घृतपायिनो ब्राह्मणा भान्ति । यतो बर्हिष्खननैः पवित्रिकाद्यर्थं दर्भच्छेदनैररुष्पाणयो दर्भाणां तीक्ष्णाग्रत्वाद्व्रणितहस्ताः क्रियानैष्ठिका इत्यर्थः ॥

नृपो ज्योतिष्क्रमं छ्यद्भिश्छन्नश्छत्रैश्छदिष्फलैः[1] ।
भ्रातुष्पुत्रं द्रढकस्य[2] कस्कोसेविष्ट नानुयान् ॥ ९९ ॥

९९. कस्को नृपोनुयानननुव्रजन्सन्[3] द्रढकस्य[4] द्रढकाख्यपितृव्यस्य[5] भ्रातुष्पुत्रं भ्रातृजं मूलराजं नासेविष्ट । कीदृक् । छत्रैश्छन्नः सर्वतोप्यावृतो महर्द्धिक इत्यर्थः । कीदृशैः । छदिः पटलं तद्वदवनतप्रान्ततया सर्वतश्छायाकारितया च फलन्ति संपद्यन्ते यानि तैश्छदिष्फलैरत[6] एव ज्योतिष्क्रमं सूर्यातपखेदं छ्यद्भिरपनयद्भिः । सर्वोपि नृपवर्गोमुं महर्द्ध्याभजदित्यर्थः ॥ राजिबीजद्रढकाख्ययो[7] भ्रातर आदिपुरुषाः । राजेरपत्यं मूलराजो बीजद्रढकयोस्तु[8] भ्रातुष्पुत्रः ॥

---

१ बी °दिष्पलैः. २ बी द्रढ क°.

---

१ डी °पस्फुर°. २ सी °दनै°. ३ ए सी डी° यान् व्र°. ४ बी द्रढक°. ५ बी द्रढका°. ६ सी दिष्पलै°. ७ बी °द्रढका°. ८ बी °द्रढक°.

दिक्षु प्रसारिसैन्येषु भारार्तवपुषं महीम् ।
सिषिचुर्[1]मदपाथोभिः पुपूर्षव इव द्विपाः ॥ १०० ॥

१००. दिक्षु प्रसारिसैन्येषु बलेषु प्रसरत्सु सत्सु भारार्तवपुषं प्राग्भारेणाक्रान्तदेहां सतीं महीं द्विपा मदपाथोभिः सिषिचुः[1] । उत्प्रेक्ष्यन्ते पुपूर्षव इव[2] । ये हि पालयितुमिच्छवो दयालवः स्युस्ते भाराक्रान्तवपुषं जनं खेदापनयनायाम्भोभिः सिञ्चन्ति ॥

लिलिक्षन्निव किं निंस्से बर्हींष्युद्वीर्षु पुंस्स्विति[2] ।
स्थितः सर्पिःष्विव वशावार्ष्विभः कथमप्यगात् ॥ १०१ ॥

१०१. इभः कथमपि महता कष्टेनागाद्ययौ । यतः सर्पिःष्विव घृतेष्विव वशावार्षु हस्तिनीमूत्रेषु स्थितो[3]नुरागातिरेकेण तद्गन्धामोदलुब्धत्वादवस्थितः । केषु सत्सु । पुंस्सु हस्तिपकेषु । किंभूतेषु । उद्वीर्षूच्छलद्वाणीकेष्वपि । कथमित्याह । अहो गज लिलिक्षन्निवात्तुमिच्छन्निव बर्हींषि दर्भान् किं निंस्से किमिति चुम्बसीति ॥

ज्योतिष्कौन्तम् । आर्चिष्पारश्वधम् । इत्यत्र "नैर्कार्थेक्रिये"[4] [१२] इति षत्वाभावः ॥

ज्योतिष्क्रमम् । बर्हिष्खननैः । सर्पिष्पाः । छदिष्फलैः । धनुष्करैः । धनुष्खण्डम् । अरुष्पाणयः । धनुष्फलक । इत्यत्र "समासेसमस्तस्य°" [१३] इति षत्वम् ॥ भ्रातुष्पुत्रम् । कस्कः । इत्यत्र "भ्रातुष्पुत्र°" [१४] इत्यादिना ऐकस्य षत्वं सत्वं च निपात्यते ॥

---

१ डी सिषिचुर्म°. २ ए डी पुंस्त्विति ।. बी पुंस्विति ।.

---

१ डी सिषिचु: ।. २ बी °व पिपालयिषव इव । ये. ३ सी स्थितान्नु°. ४ बी °कार्थेक्रि°.

नामिनः । वपुषम् । सैन्येषु । सिषिचुः । असेविष्ट ॥ अन्तस्थापाः । वार्षु । वह्नीर्षु । पुपूर्षवः ॥ कवर्गात् । दिक्षु । किकिक्षन् ॥ शिड्व्यन्तरेपि । सर्पिःषु । बर्हींषि । अत्र "नाम्यन्तस्था°" [१५] इत्यादिना षत्वम् ॥ शिड्ग्रहणेनैव सिद्धे नकारोपादानं नकारस्थानेनैवानुस्वारेण यथा स्यादित्येवमर्थम् । तेन मकारानुस्वारेण न स्यात् । पुंस्सु ॥ शिटा नकारेण चान्तर इति प्रत्येकं वाक्यपरिसमाप्तेरुभयव्यवधाने न स्यात् । निंस्से ॥

अग्निष्टुतः पथि ज्योतिष्टोमायुष्टोमवेदिनः ।
अग्निष्टोमविदो वन्याः सैन्यमैक्षन्त तापसाः ॥ १०२ ॥

१०२. वन्या वनवासिनस्तापसाः पथि सैन्यं कौतुकादैक्षन्त । किंभूताः । ज्योतिषो ज्योतिषे वा स्तोमो यागो ज्योतिष्टोम एवमायुष्टोमश्च तेजोवृद्ध्यर्थमायुर्वृद्ध्यर्थं च क्रियमाणौ यागभेदौ तद्वेदिनः । यद्वा । ज्योतिषां ज्ञानानां स्तोमः संतानस्तेनायुष्टोमवेदिनो जीवितसंतानज्ञास्तथाग्निष्टोमोग्निस्तुतिप्रधानैः प्रथमो यागस्तद्वेदिनः । एतेन ज्ञानितोक्ता । तथा यागाग्निकारिकादिकारित्वेनाग्निं स्तुवन्त्यग्निष्टुतः । एतेन क्रियानिष्ठत्वोक्तिः ॥

अग्निष्टुतः । इत्यत्र "समासेग्नेः स्तुतः" [१६] इति षत्वम् ॥

ज्योतिष्टोम । आयुष्टोम । अग्निष्टोम । इत्यत्र "ज्योतिः°" [१७] इत्यादिना षः ॥

मातृष्वसृपितृष्वस्रोर्वियुग्ग्राम्यार्भको रुदन् ।
अतिमातुःष्वसृपितुःष्वस्राश्वासि चमूस्त्रिया ॥ १०३ ॥

१०३. मातृष्वसृपितृष्वस्रोर्जननीभगिनीजनकभगिन्योर्वियुग्वियुक्तोत एव रुदन् ग्राम्यार्भकश्चमूस्त्रियाश्वासि मधुरालापादिना-

१ ए बी डी °पिड्डः । अ°. २ बी पुंड्ड । शि°. ३ सी °नम°. ४ ए °यास्यासि.

श्वासितः । यतो वत्सलत्वादिनातिक्रान्ते मातुःष्वसृपितुःष्वसारौ यया तया ॥

मातुःस्वस्रा पितुःस्वस्रा सुनदीक्ताः सह व्रजाः ।
क्रीडानिष्णान्नदीष्णातॄनत्वरन्तेक्षितुं द्विपान् ॥ १०४ ॥

१०४. मातुःस्वस्रा पितुःस्वस्रोपलक्षणार्थत्वान्मातृपक्षेण पितृपक्षेण च सह व्रजा गोकुलस्था जना द्विपानीक्षितुमत्वरन्त ससंभ्रमं चेलुः । यतो मुद्धर्षः सैव पूरेणाप्लावकत्वान्नदी तत्र स्नान्ति के सुनदीक्ताः । कुतूहलपूराप्लाविता इत्यर्थः । यतः किंभूतान् । नदीष्णातॄन्कौशलान्नद्यां स्नायकान् । एतदपि कुत इत्याह । यतः क्रीडानिष्णान् जलकेलिकरणचतुरान् । गजो हि जलकेलिं कुर्वन्तोत्यद्भुतत्वाद्दृश्याः स्युः ॥

स्वःसिन्धाविव निस्नानप्रतिस्नाताः समुच्छ्रयात् ।
प्रतिष्णातप्रतिष्णानव्यूता ध्वजपटा बभुः ॥ १०५ ॥

१०५. रथादिस्था ध्वजपटा बभुः । यतः प्रतिष्णातं क्षालनेन शुद्धं यत्प्रतिष्णानं सूत्रं तेन व्यूता निर्मलसूत्रमयाः । उत्प्रेक्ष्यन्ते । समुच्छ्रयादौन्नत्याद्धेतोः स्वःसिन्धौ व्योमगङ्गायां निस्नानप्रतिस्नाता इव निस्नानेन निश्चितस्नानेन कृत्वा प्रतिस्नाता इव निर्मलीभूता इव । येपि प्रतिष्णातमतिव्याप्त्यादिदोषाभावेन शुद्धं यत्प्रतिष्णानं वेदादिसूत्रं तेन व्यूताः पाठेनात्यन्तं वासिताशयाः स्वःसिन्धौ निश्चितं स्नाताश्च स्युस्ते समुच्छ्रयाँल्लोकमध्य औन्नत्याद्ध्वजपटा इव भान्तीत्युक्तिः ॥

---

१ बी °दीक्ता स°.

---

१ ए सी °तुः स्वसा°. २ सी °त्रा दि ज°. ३ सी °दृशाः स्युः ॥°. ४ सी °यां न का°. ५ ए सी °तिस्नाता. ६ सी °याः स्वासि° ७ बी °या लोक°. ८ ए °ता ध्वज°.

मातृष्वसृपितृष्वस्रोः । इत्यत्र "मातृपितुः स्वसुः" [१८] इति षः ॥

मातुःष्वसृपितुःष्वस्रा । इत्यत्र "अलुपि वा" [१९] इति वा षः ॥ पक्षे । मातुः स्वस्रा । पितुः स्वस्रा ॥

निष्णान् । नदीष्णातॄन् । इत्यत्र "निनद्याः°" [२०] इत्यादिना षः ॥ कौशल इति किम् । निस्नान । मुक्षदीस्नाः ॥

प्रतिष्णात । इत्यत्र "प्रतेः°" [२१] इत्यादिना षः ॥ सूत्र इति किम् । प्रतिस्नाताः ॥

प्रतिष्णान । इत्यत्र "स्नानस्य नाम्नि" [२२] इति षः ॥

रथाश्वीत्कृतिविस्तारैर्वैष्टरा विष्टरं श्रियाम् ।
दधुर्वनर्षिविष्टारबृहतीगानविस्तरम् ॥ १०६ ॥

१०६. विष्टरस्य वृक्षस्येमे वैष्टरा रथाश्वीत्कृतिविस्तारैः कृत्वा वनर्षिभिः कर्तृभिर्विष्टारबृहत्याश्छन्दोभेदस्य यानि गानानि गीतयस्तेषां विस्तरं प्रथां दधुरधारयन् । किंभूतम् । श्रियां गाम्भीर्यमाधुर्यादिशोभानां विष्टरमासनं स्थानमित्यर्थः । वनर्षिच्छन्दोगानतुल्यानि चीत्कृतानि रथाश्वक्रुरित्यर्थः ॥

वैष्टराः । विष्टरम् । विष्टारबृहती । इत्यत्र "वे स्तः" [२३] इति षः ॥ नाम्नीत्येव । विस्तारैः । विस्तरम् ॥

अश्वकण्ठेषु मण्याल्योभिनिष्टानावलीनिभाः ।
शशंसुरभिनिस्ताना युधिष्ठिरगुणं नृपम् ॥ १०७ ॥

१०७. अश्वकण्ठेष्वभिनिष्टानावलीनिभा वर्तुलत्वेन विसर्गश्रेणीस-

१ बी °त्कृतवि°. २ सी °तीमान.°

१ डी °तृपि°. २ ए सी डी °तिस्नान°. ३ सी °त्वा नवर्षि°.

भिभा मण्याल्यो हेमशङ्खादिमयमणिपङ्क्तयो नृपं शशंसुस्तुष्टुवुरिव ।
इवोवसेयः । यतश्चलनेनान्योन्यं संसर्गादन्योन्येनैव च कर्त्राभिनि-
स्तन्यन्ते शब्दाय्यन्तेभिनिस्ताना: । किमिति शशंसुरित्याह । यतो
युधिष्ठिरगुणं न्यायादिगुणैर्युधिष्ठिरतुल्यम् ॥

गविष्ठिराभाः श्रीषेणहरिसिंहादयोभ्रुडन् ।
विष्वक्सेनोग्रसेनोरुसेनेत्र कटकोदधौ ॥ १०८ ॥

१०८. गविष्ठिराभा न्यायादिना गविष्ठिरमुनिसमाः श्रीषेणहरि-
सिंहादयो राजानोत्र मूलराजीये कटकोदधावभ्रुडन्नलेक्ष्यी बभूवुः। यतो
विष्वक्सेनो विष्णुरुग्रसेनः कंसपिता द्वन्द्वे तयोरिवोर्व्यो बृहत्यः सेनाः
कटकविशेषा यत्र तस्मिन्नतिमात्रानेकनृपसेनालयत्वादत्यन्तं महाप्र-
माण इत्यर्थः ॥

अभिनिष्टान । इत्ययम् "अभिनिष्टानः" [२४] इति निपात्यते ॥ नाम्नी-
त्येव । अभिनिस्ताना: ॥

गविष्ठिर ।युधिष्ठिर । इत्यत्र "गवि°" [२५] इत्यादिना षः ॥

श्रीषेण । इत्यत्र "एत्यकः" [२६] इति षः ॥ एतीति किम् । हरिसिंह ॥
अक इति किम् । विष्वक्सेन ॥ नाम्नीत्येव । उरुसेने ॥ नाम्यन्तस्थाकवर्गादि-
त्येव । उग्रसेन ॥

अग्रे रोहिणिषेणोभूत्पश्चाद्रोहिणिसेनजः ।
पार्श्वे शतभिषक्सेनः स पुनर्वसुषेणकः ॥ १०९ ॥

१०९. स्पष्टः । किं तु रोहिणिषेणादयो राजविशेषाः । तथाह्यातः

१ बी °वोत्रावत्राव°. २ सी °लक्ष्मी ब°. ३ सी °निष्टाना°. ४ प डी °सिंहः ।
अ°. ५ सी °स्थाव°.

पुनर्वसुषेणः कनि पुनर्वसुषेणकः । यद्वा । पुनर्वसुषेणो मुख्योस्य "सोस्य मुख्यः" [७.१.१८८] इति के पुनर्वसुषेणकः सङ्घः । सह तेन वर्तते यः स शतभिषक्सेनो नृपः पार्श्वेभूत् । एकस्मिन्पार्श्वे शतभिषक्सेनोपरस्मिंश्च पुनर्वसुषेणकोभूदित्यर्थः ॥

रोहिणिषेणः[1] रोहिणिसेन । इत्यत्र "भादितो वा" [२७] इति वा षः ॥ इत इति किम् । पुनर्वसुषेणकः । पूर्वेण नित्यमेव । शतभिषक्सेनः ॥

विष्ठलं कुष्ठलं क्रान्त्वा परिष्ठलकपिस्थले ।
उष्ट्रा[1]ः शमिष्ठलं जग्मुः कृष्ट्वा रूढान् कपिष्ठलान् ॥ ११० ॥

११० उष्ट्राः शमिष्ठलं शमीनां स्थलं जग्मुः शमीतरुपत्रप्रियत्वात् । किं कृत्वा । क्रान्त्वोल्लङ्घ्य । कानि । विगतं वीनां[2] वा पक्षिणां स्थलं विष्ठलं कुत्सितं कोर्वा पृथ्व्याः स्थलं कुष्ठलं परिगतमाम्रादिभिर्व्याप्तं स्थलं परिष्ठलं कपीनां स्थलं कपिस्थलं द्वन्द्वे ते च । तथा रूढांश्चिरतान्कपिष्ठ[3]लान् । कपिष्ठलो नाम गोत्रस्याद्यः प्रवर्तयिता यश्चाग्नापत्यसंततिर्व्यपदिश्यते । उपचारात्तद्वंश्या अप्युच्यन्ते । तान् भटविशे[4]षान्कृष्ट्वा बलादाकृष्य ॥

विष्ठकम् । कुष्ठकम् । शमिष्ठकम् । परिष्ठल । इत्यत्र "विकुशमि°" [२८] इत्यादिना षः ॥

कपिष्ठलान् । इत्यत्र "कपेर्गोत्रे" [२९] इति षः ॥ गोत्र इति किम् । कपिस्थले ॥

---

१ सी °ष्ट्रा श°.

---

१ प सी डी °षेण । रो°. २ सी वीमां वा. ३ सी °ष्ठलो°. ४ बी °षान् ब°.

द्विष्ठत्रिष्ठेष्वपुर्गोष्ठेष्वाम्बष्ठ्याम्बष्ठताजुषः ।
पयोऽशङ्कुष्ठकाङ्गुष्ठं भूमिष्ठापष्ठपत्तयः ॥ १११ ॥

१११. भूमौ तिष्ठन्ति भूमिष्ठा अप मार्गं परिहृत्य तिष्ठन्त्यपष्ठाश्च ये पत्तयस्ते गोष्ठेषु गोकुलेषु पयो दुग्धमपुः पिबन्ति स्म । कथम् । शङ्कौ शल्यासे तिष्ठन्ति शङ्कुष्ठा अज्ञाताः शङ्कुष्ठाः शङ्कुष्ठका न तथाशङ्कुष्ठकाः पयःपानव्यापृतत्वेनाप्रहरणा अङ्गावयवे तिष्ठन्त्यङ्गुष्ठा अङ्गुल्यो यत्र पाने तत् । किंभूतेषु गोष्ठेषु । द्विष्ठत्रिष्ठेषु द्वयोः स्थानयोस्त्रिषु वा स्थानेषु तिष्ठत्सु । किंभूताः पत्तयः । अम्बायां मातरि तिष्ठन्ति "ङ्यापो बहुलं नाम्नि" [२.४.९९] इति ह्रस्वे अम्बष्ठो मातृमुख्यः । तस्य भावः ञ्यणि आम्बष्ठ्यं तस्याम्बष्ठता । अम्बोपह्वकर्ता तस्यायं कार्यभूतः अणि आम्बोपह्वरूपो धर्मस्तत्र तिष्ठति "स्थाप॰" [५. १. १४१] इत्यादिना के आम्बष्ठस्तस्य भावोपह्वस्तां जुषन्ते सेवन्ते ये ते धनुर्विद्यादिकलाकुशला इत्यर्थः ॥

अनम्बाष्ठा असव्यष्ठकुन्तशेकुष्ठपाणयः ।
परमेष्ठदिविष्ठाजीन्पुञ्जिष्ठाः पथ्यकीर्तयन् ॥ ११२ ॥

११२. अनम्बाष्ठा अमातृमुखाः शस्त्रविद्यानिपुणा असव्यष्ठो दक्षिणपार्श्वस्थः कुन्तः प्रासो येषां तेसव्यष्ठकुन्ताः शेकुः पक्षिविशेषस्तत्प्रकृतिध्वजोप्यभेदात् शेकुः । "न नृपूजार्थे" [७.३.१०८] इत्यादिना काभावः । तत्रस्थः पाणिर्येषां ते शेकुष्ठपाणयः । वामपादमोचकमध्यस्थान् महाभटत्वसूचकान् शेकादिजन्तूपलक्षितान्ध्वजान्वामहस्तेनावष्टभन्त इत्यर्थः । विशेषणकर्मधारयेसव्यष्ठकुन्तशेकुष्ठपाणयोश्वारोहसुभटाः पथि पुञ्जिष्ठाः समुदायस्थाः सन्तोकीर्तयन्नवर्णयन् ।

१ बी °ङ्गावय°. २ बी °पु च स्था°. ३ ए सी डी °स्थापला°. ४ सी °स्थकु°. ५ सी °दमौत्रक°.

कान् । परमे पदे तिष्ठन्ति परमेष्ठा दिवि स्वर्गे तिष्ठन्ति दिविष्ठा द्वन्द्वे परमेष्ठदिविष्ठा रामचन्द्रादयस्तेषामाजीन् रणान् ॥

दुःषेधाग्निष्ठमाञ्जिष्ठदृष्टीन्बर्हि[1]ष्ठपाणयः ।
परिकारा अकुष्ठाङ्गा गजान्निन्युः सुषेधताम् ॥ ११३ ॥

११३. परिकारा हस्तिपरि[1]चारका गजान्सुषेधतां प्रशस्तगतितां निन्युः । यतो दुष्टः सेधो गतिर्येषां ते दुःषेधास्तथाग्नौ तिष्ठन्त्यग्निष्ठा मञ्जौ शब्दे तिष्ठति मञ्जिष्ठा तया रक्ता माञ्जिष्ठी अग्निष्ठानामिव माञ्जिष्ठी आरक्ता दृष्टिर्येषां ते [3]तथा । ततो विशेषणकर्मधारयः । तान्मदोद्रेदादुष्टगतीनारक्ताक्षांश्च । किंभूताः सन्तः । अश्वा[4]रूढत्वेनाकुष्ठमभूमिष्ठमङ्गं येषां ते । यद्वा । पादचारिणोपि हस्तिवेगगामित्वात्फालप्रदानैराकाशस्था इव तथा [5]बर्हिःष्ठपाणयः पिञ्छिकाहस्ताः । परिकारा हि पिञ्छिकाहस्ता द्विधा हस्तिवेगजैत्राश्वारूढा हस्तिवेगजैत्राः पादचारिणश्च । त उभयेपि गजाग्रगा मदोद्रेकेण शीघ्रगं गजं पिञ्छिकाभीक्ष्णाच्छोटनैः खेदयित्वा मदं चोपशमय्य स्वभावगतिं नयन्तीति स्थितिः ॥

स्थपुटेष्वप्यनिःषेधैरदुः[2]षन्धिपदैर्हयैः ।
रथाः सुषंधयो यान्तो निःषंधय इवाबभुः ॥ ११४ ॥

११४. रथा निःषंधय इव संधिरहिता इवाबभुः । यतः सुषंधयः सुश्लिष्टसंधानाः । तथा हयैः कृत्वा यान्तः । किंभूतैः । अदुःषंधीनि गुल्फप्रदेशे दुष्टसंधानरहितानि पदा[6]नि पादा येषां तैः । एतेन सुलक्षणत्वोक्तिः ।

१ बी डी °र्हिःष्ठ°. २ बी °दुष°.

---

१ बी सी °रिवार°. २ बी °गति नि°. ३ सी °ततो त°. ४ ए सी डी °रूढास्तेना°. ५ सी °र्हिष्ठ°. ६ ए सी डी °नि ये°.

अत एव स्थपुटेष्वपि विषमप्रदेशेष्वप्यनिःषेधैरसंवलितगतिभिः । सुषंधित्वेनास्खलितगतित्वेन चालक्ष्यसंधित्वादेककाष्ठमया इव रथा ज्ञाता इत्यर्थः ॥

निःषामाणो महामात्रैर्दुःषामाणः सुषामभिः ।
अभीरुष्ठानसैन्यस्य प्रष्ठतां निन्यिरे गजाः ॥ ११५ ॥

११५. साम्नः सामवेदान्निष्क्रान्ता निःषामाणः । गजा हि सामवेदात्प्रसूता इति गजलक्ष्मशास्त्रम् । गजाः सुषामभिः शोभनैः सामवाक्यैः कृत्वा शोभनसामोपायान्वितैर्वा महामात्रैर्हस्तिपकैः कर्तृभिर्निन्यिरे नीताः । काम् । अभीरूणां निर्भीकाणां स्थानं निवासो यत्सैन्यं तस्य प्रष्ठतामग्रेसरत्वम् । यतो दुष्टमरुचितं साम सांत्वनमीप येषां तेतिमदोत्कटत्वेनात्यसहना इत्यर्थः । येपि गजा इव गजा बलिष्ठा दर्पिष्ठाश्च महायोधा युद्धप्रियत्वेन दुःषामाणो रुचितसामोपायौ अत एव निःषामाणो मुक्तसामोपायाः स्युस्ते सुषामभिर्महामात्रैः प्रधानैर्युद्धार्थमभीरुष्ठानसैन्यस्य प्रष्ठतां स्वर्णपट्टबन्धेन मुख्यतां नीयन्त इत्युक्तिः ॥

गोष्ठेषु । अनम्बाष्ठाः । "ङ्यापो बहुलं नाम्नि" [२. ४. ९९] इति ह्रस्वत्वेन आम्बष्ठ्य । श्लिष्टनिर्देशादुभाभ्यामपि स्यात् । आम्बष्ठता । सव्यष्ठ । अपष्ठ । द्विष्ठ । त्रिष्ठेषु । भूमिष्ठ । अग्निष्ठ । शेकुष्ठ । शङ्कुष्ठ । कुष्ठ । अङ्गुष्ठम् । माञ्जिष्ठ । पुञ्जिष्ठाः । बर्हिःष्ठ । परमेष्ठ । दिविष्ठ । इत्यत्र "गोम्बाम्ब°" [३०] इत्यादिना षः ॥

---

१ सी °णसु°.

---

१ बी °रस्खलि°. २ बी °स्य पृष्टता°. ३ बी °याऽत°. ४ बी °त्वे आ°. ५ बी °ष्ठ । मा°. ६ बी °हिंष्ठ° ।. ७ बी °गोम्बेला°.

अनिःषेधैः । दुःषेधं । सुषेधताम् । निःषंधयः[2] । दुःषंधि । सुषंधयः । निःषामाणः । दुःषामाणः । सुषामभिः । इत्यत्र "निर्दुःसोः°" [२१] इत्यादिना षः ।

प्रष्ठताम् । इत्यत्र "प्रष्ठोऽग्रगे" [२२] इति षो निपात्यः ॥

भीरुष्ठान । इत्यत्र "भीरुष्ठानादयः" [२२] इति षो निपात्यः ॥

रूढारुष्टोर्जद्दृपुर्ष्ट्वं सुतेजस्ता बहिष्टराम् ।
सुदोस्त्वं चेति निष्ट्यानामर्घति स्म चतुष्टयम् ॥ ११६ ॥

११६. बहिष्टरामतिशयेन बाह्यदेशे वर्तमानानां निर्गता वर्णाश्रमेभ्यो "निसो गते" [६. ३. १८] इति त्यचि निष्ट्यास्तेषां निष्ट्यानां चण्डालानां चतुष्टयं महाभटत्वसूचकत्वादर्घति स्म बहुधनादिना मान्यमभूत् । अर्घधातुरगणपठितः । किं तदित्याह । रूढारुष्टा[3] रूढाव्रणतोर्जद्दृपुर्ष्ट्वं[4] बलिष्ठशरीरता सुतेजस्ता शोभनप्रतापता शोभनकान्तिता वा सुदोस्त्वं च प्रौढभुजपराक्रमता[5] चेति ॥

स्वाम्याज्ञयाथ सूर्यार्चिष्टो निष्टप्तवपुष्टमाः ।
जम्बूमाल्यां सरित्यूषुर्द्विषभिस्तापिनो[6] नृपाः ॥ ११७ ॥

११७. अथ द्विषभिस्तापिनः शत्रूनभीक्ष्णं सन्तापयन्तो नृपाः स्वाम्याज्ञया मूलराजादेशेन जम्बूमाल्यामेवंनाम्न्यां सरिति नद्यामूषुर्वसन्ति स्म । यतः सूर्यार्चिष्टः । भ्रात्रादित्वात्तस् [७. २. ८४] । रविकिरणैर्निष्टप्तं[7] संतप्तं वपुष्टममतिप्रशस्तं वपुर्येषां ते ॥

१. बी °पुद्विष°.

१ ए सी डी °धः । सु° ।. २ बी °निषं°. ३ बी °ढाव्र°. ४ बी °द्दृं च व°. ५ बी भुजं प°. ६ सी °स्तान°. ७ सी °तप्तव°.

अथासर्गसमाप्ति सैन्यावासनां वर्णयति ।

सैनिकानां श्रमं जघ्नुः सुष्वापयिषवो नु तान् ।

सिस्वेदयिषिनांशूनासिस्वादयिषवो द्रुमाः ॥ ११८ ॥

११८. द्रुमाः सैनिकानां श्रमं मार्गखेदं जघ्नुरभक्षयन्नपनिन्युरित्यर्थः । किंभूताः सन्तः । सिस्वेदयिषवोत्युष्णत्वेन प्रस्वेदयितुमिच्छवो य इनांशवो रविकिरणास्तानासिस्वादयिषवः सान्द्रपत्रप्रकरेण भक्षयितुमिच्छवोपनयन्त इत्यर्थः । अत एव तान्सैनिकान्सुष्वापयिषवो नु शाययितुमिच्छव इव । ये हि सुष्वापयिषवो भृत्याः स्युस्तेपि पटकुटीबन्धनेन छायाकरणाद्रविकिरणान्निवारयन्तो मार्गश्रममपनयन्ति ॥

तुष्टूषुर्वीचिनादैः किं प्रोत्सिसाहयिषुः किमु ।

वपुः सिसिक्षतो नागानधम्भोभिरसीषिचत् ॥ ११९ ॥

११९. अङ्गं सिसिक्षतः सिक्तपयिषून्नागानम्भोभिः कर्तृभिर्नद्यसीषिचदक्षपयत् । कीदृक्सती । वीचिनादैः कृत्वा किं तुष्टूषुः किं नागान्स्तोतुमिच्छन्ती स्तुवती[2]वेत्यर्थः । किमु किं वा प्रोत्सिसाहयिषुः श्रान्तसन्तप्तत्वात्स्नानार्थं प्रोत्सहमानान्नागान्प्रयोक्तुमिच्छुः प्रोत्साहयन्ती[3]वेत्यर्थः । जनन्यादिरपि हि स्तुवती प्रोत्साहयन्ती च बालकान्स्नपयति ॥

सुषुप्सन्तं न तुष्टाव कंचित्कोपीत्यतर्जयत् ।

किं सोषुपिषमाणे त्वं व्यतिसुषुपिषे प्रभौ ॥ १२० ॥

१२०. सुषुप्सन्तं शयितुमिच्छन्तं स्वपन्तमित्यर्थः । कंचिद्भृत्यं कोपि भृत्यो न तुष्टाव[5] किंत्वतर्जयत् । कथमित्याह । प्रभौ स्वामिनि सोषुपिषमाणेत्यर्थं स्वप्तुमिच्छति[6] किं त्वं व्यतिसुषुपिषे प्रभुसंबन्धि-

---

१ डी °ष्टूषुः किं°. २ °सी °न्ती स्तुव°. ३ बी डी °यन्तीवे°. ४ बी सी डी °यन्ती प्रो°. ५ सी °किं तु त°. ६ सी °किं तु व्य°. ७ ए सी डी °न्धेस्वा°.

स्वापक्रियाव्यतिहारेण किमिति सुप्त इति। विभौ हि[1] सोषुपिषमाणे भृत्यस्य स्वापोविनयहेतुत्वेनायुक्तः ॥

सुसोषुपिषमाणोपि कोपीनाद्यामधीषिषन्।
नासिषञ्जयिषच्चक्षुः सिसञ्जयिषुरिन्धनम् ॥ १२१ ॥

१२१. कोपि भृत्यः सुसोषुपिषमाणोपि श्रान्तत्वेनात्यर्थं स्वप्तुमिच्छन्नपि चक्षुर्नासिषञ्जयिषन्मेलयितुं नैच्छन्न सुप्त इत्यर्थः । यत इन्धनं सिसञ्जयिषुर्मेलयितुमिच्छन्मेलयन्नित्यर्थः । एतदपि कुत इत्याह । यत इनाद्यामनेकग्राहकसद्भावे[2]नेन्धनं पश्चाद्दुर्लभं भविष्यत्यतोधुनैव त्वया संग्राह्यमित्थंरूपं प्रभुनिदेशमधीषिषन् स्मर्तुमिच्छन्स्मरन्नित्यर्थः । एतेन भृत्यस्यात्य[3]न्तं स्वामिभक्तिरुक्ता ॥

रूक्षारुष्टा । वपुष्टम् । सूर्योर्चिष्टः । निष्ठ्यानाम् । चतुष्टयम् । बहिष्टराम् । वपुष्टमाः । इत्यत्र "ह्रस्वान्ना[4]मिनस्ति" [३४] इति षः ॥ ह्रस्वादिति किम् । सुदोस्त्वम् ॥ नामिन इत्येव । सुतेजस्ता ॥

निष्टप्त । इत्यत्र "निसः०" [३५] इत्यादिना षः ॥ अनासेवायामिति किम् । पुनःपुनः करणे मा भूत् । द्विषन्निस्तापिनः ॥

जक्षुः । ऊषुः । इत्यत्र "घस्वसः" [३६] इति षः ॥

सुष्वापयिषवः । तुष्टूषुः । इत्यत्र "णिस्तोरेवा०" [३७] इत्यादिना षः ॥ स्वदादिपर्युदासः किम् । आसिस्वादयिषवः । सिस्वेदयिषु । प्रोत्सिसाहयिषुः ॥ स्तौतिसाहचर्यात्स्वदादिपर्युदासेन सदृशग्रहणाच्च ण्यन्तानामपि षोपदेशानामेव ग्रहणम् । तथा च कृतत्वात्सकारस्य "नाम्यन्तस्था०" [२. ३. १५] इत्यादिसूत्रेणैव सिद्धे नियमार्थं वचनम् । णिस्तोरेव षणि षत्वं नान्यस्य । तेनेह न

---

१ ए सी °हि सुषपि°. डी हि सुषुपि°. २ सी °वेनन्ध°. ३ बी °त्यन्तस्वा°. ४ ए सी °न्नामिनस्ति°.

स्वाद् । सिसिक्षतः । एवकारः षण्येव णिस्तोरिति विपरीतनियमनिवृत्त्यर्थस्तेने-हापि भवति । असीषिवत् । तुष्टाव । षत्वं किम् । सुसुप्सन्तम् ॥ नकारः किम् । व्यतिसुषुपिषे । नात्र सन् किं तु परोक्षा से ॥ कथमभीषिषन् । षणि निमित्ते धातोः षत्वनियम उक्त इह तु सन एव द्विरुक्तस्य षत्वं न धातोरिति न प्रतिषेधः । अत्र इं दुं द्रुं शुं श्रुं गतौ ज्ञानेर्थे इण्क गतौ वा । अज्ञानेर्थे हीणो गमादेशः स्यात् ॥ सोषुपिषमाण इत्यत्र यैङि षत्वं पश्चात्सन्निति न प्रतिषेधः । येषां तु दर्शने द्वित्वेपि पुनः सनि द्विरुक्तिस्तन्मते सुसोषुपिषमाण इत्यत्र षणि सुशब्दात्परस्य सस्य षत्वं न भवत्येव ॥

असिषञ्जयिषत् सिसञ्जयिषुः । इत्यत्र "सञ्जेर्वा" [३८] इति वा षः ॥

हयाननभिषुण्वन्तोभ्यषुण्वन्केचिदम्भसि ।
घर्माभिषूयमाणांश्चाभ्यषुवन्सुहृदो मुहुः ॥ १२२ ॥

१२२. केचिदश्वपाला: शोभनावर्तान्वितत्वेन शोभनं हृद्वक्षो येषां तान्सुहृदो हयान्घर्माभिषूयमाणानातपेनाक्रम्यमाणान्सतो मुहुर्वारंवारमम्भसि जलेभ्यषुण्वन्नस्नपयन् । अन्तर्भूतणिगर्थोत्र सुग् । किंभूताः सन्तोनभिषुण्वन्तो गाढजलप्रहारैरपीडयन्तः । एतेन स्नापनकौशलोक्तिः । स्वयमक्लान्तो वा । एतेन चैषामात्मनोपि हयेषु बाढं वात्सल्यमुक्तम् । तथा सुहृदो मित्राणि घर्माभिषूयमाणानत एव हयन्तीति हयास्तान् क्लाम्यतः सतोम्भस्यभ्यषुवंश्च क्षिप्तवन्तश्च ॥

कर्माभिष्टुत्यमभ्यस्यन्येभिष्यत्यनिले श्रमम् ।
भृत्यांस्ताननभिष्टोभान्स्वामिनोभ्यष्टवन्मुदा ॥ १२३ ॥

१२३. अनिले श्रमं मार्गखेदमभिष्यति नदीशीकरोन्मिश्रत्वेना-

---

१ बी °भ्यष्यन्ये°. २ ए सी °भ्यष्टव°.

---

१ बी °ज्ञानार्थे°. २ ए सी °माणो इ°. डी °माणे इ°. ३ बी °यशि ष°. ४ बी °ते नैषा°. ५ सी °मान°. ६ सी °भ्यश्च.

तिशीतत्वादपनयति सति पुनर्नवीभूताङ्गत्वेनाभिष्टुत्यं प्रशस्यं कर्म क्रियां ये भृत्या अभ्यषेस्यन्समापयंस्तानभिष्टोभः स्तम्भो जाड्यं तेन रहितान् दक्षान्भृत्यान्स्वामिनो मुदाभ्यष्टुवन्प्रशशंसुः। भृत्या हि कर्मान्त एव प्रशस्यन्त इति नीतिः। यदुक्तम्।

प्रत्यक्षे गुरवः स्तुत्याः परोक्षे मित्रबान्धवाः।
कर्मान्ते भृत्यवर्गाश्च पुत्रा नैव मृताः स्त्रियः॥ १॥

अभ्यष्टोभन्त दूष्याणि क्ष्मां केप्यभिसुसूषवः।
अभ्यसुसूषत्स्वामीति तं के चनाभ्यसूसवन्॥ १२४॥

१२४. केपि भृत्याः क्ष्मामभिसुसूषवो दाहोपशमाय शीताम्भोभिः सेक्तुमिच्छवो दूष्याणि पटकुटीरभ्यष्टोभन्तावध्नन्। दूष्यबन्धाभावे हि क्ष्मा सिक्ताप्यातपेन शुष्येत्। तथा के चन भृत्याः स्वाम्यभ्यसुसूषत्स्नातुमैच्छदिति हेतोस्तं स्वामिनमभ्यसूसवन् स्नापितवन्तः॥

शाखामभिसिसासन्तमभिसोसूय्य सिन्धुरम्।
महामात्रोभितुस्ताव ततः स्तम्भेभितुस्तुभे॥ १२५॥

१२५. शाखामभिसिसासन्तं विनाशयितुमिच्छन्तं सिन्धुरमभिसोसूय्य शाखाभञ्जनायात्यर्थं प्रेर्य महामात्रो हस्तिपकोभितुस्ताव। अहो सिन्धुरस्य कीदृक्सामर्थ्यमिति प्रशशंस। ततः स्तम्भे वृक्षप्रकाण्डेभितुस्तुभे बबन्ध। मदोत्कटतया बन्द्धुमशक्यं सिन्धुरमेवं स्तवनेन सान्त्वयित्वा स्तम्भे बद्धवानित्यर्थः। योपि महामात्रैः प्रधानं महामात्यादिः सोपि सिन्धुरतुल्यं दर्पिष्ठं बलिष्ठं रौद्रं च नृपादिमन्याये प्रवर्तमानं प्रेर्य स्तवनेन च विश्वास्य बध्नाति॥

१ बी °भ्यष्यन्स°. २ बी प्रसस्य°. ३ ए सी डी °बन्धन्°. ४ सी डी °बद्धुम°. ५ बी °भ्रम°.

(सु।) अनभिषुण्वन्तः । अभ्यषुण्वन् ॥ सुव । अभिषूयमाणान् । अभ्यषुवन् । सो । अभिष्यति । अभ्येष्यन् ॥ स्तु । अभिष्टुतम् । अभ्यष्टुवन् ॥ स्तुभ् । अनभिष्टोभान् । अभ्यष्टोभन्त । इत्यत्र "उपसर्गात्०" [३९] इत्यादिना षः ॥ अद्वित्व इति किम् । अभिसुसूषवः । अभ्यसुसूषत् । अत्र पूर्वसकारस्य षत्वं न भवति । मूलधातोस्तु यथाप्राप्तं षत्वं भवत्येव ॥ केचित्तूपसर्गपूर्वाणां सुनोत्यादीनां पञ्चानामपि सन्नन्तस्तौतिवर्जितानां द्वित्वे सति मूलप्रकृतेरपि षत्वं नेच्छन्ति । अभ्यसूसवन् ॥ सुव । अभिसोसूय्य ॥ सो । अभिसिसासन्तम् ॥ स्तु । अभितुस्ताव ॥ स्तुभ । अभितुस्तुभे ॥

अभिषेणयद्भिरनभिषिषेणयिषुश्रिता ।
क्ष्माधितष्ठे सप्रतिष्ठैर्या प्रत्यष्ठायि वेत्रिभिः ॥ १२६ ॥

१२६. अनभिषिषेणयिषुश्रितापि । अपिरत्रावसेयः । अनभिषिषेणयिषवो वणिगादयस्तैरधिष्ठितापि सा क्ष्माभिषेणयद्भिः सेनयाभियाद्भिर्नृपादिभिरधितष्ठे । या वेत्रिभिः प्रत्यष्ठायि वासाय निर्णीता-दिष्टा वा । न तु हठान्निःसत्वान्वणिगादीन्निराकृत्य स्वयमेव वासभूः परिगृहीतेत्यर्थः । यतः किंभूतैरुभयैरपि । सप्रतिष्ठैः प्रतिष्ठा गौरवस्थित्योः । राजमान्यत्वाद्गौरवार्हैर्वेत्रिभिर्नृपैश्च समर्यादैः ॥

यान्नाभ्यषेणयत्कोप्यभ्यषिषेणयिषन्न च ।
निषिषेधानिषिद्धाज्ञो द्वास्थस्तानसमञ्जसात् ॥ १२७ ॥

१२७. बलादतिप्रचण्डत्वेन यान्नृपान्कोपि नाभ्यषेणयन्नाभ्यषिषेणयिषन्न सेनयाभियातुमपि नैच्छत्तान्नृपाननिषिद्धाज्ञो मूलराजव्यापारि-

१ ए सी डी °क्ष्माभित°.

१ ए सी °ण्वत । अ°. २ ए सी डी °भ्यस्यन्°. ३ बी °सुवः । अ°
४ डी °याद्भि°.

तत्वेनाप्रतिहतादेशो द्वास्थः प्रतीहारोसमञ्जसादन्यायान्निषिषेध । एतेन मूलराजस्यात्यन्तमाज्ञैश्वर्यमुक्तम् ॥

भुवि द्विपान्यषेधन्ये दिग्गजान्यषिषेधिषन् ।
तरून्मूर्धाभिषिक्तेभास्ते न्यषिञ्चन्मदाम्भसा ॥ १२८ ॥

१२८. ते मूर्धाभिषिक्तेभाः पट्टहस्तिनस्तरून्मदाम्भसा न्यषिञ्चन्नस्नपयन् । ये भुवि द्विपान्यषेधन् । मदोल्बणतया सर्वगजजैत्रत्वाद्भुवि प्रतिद्विपप्रचारं ररक्षुरित्यर्थः । तथा दिग्गजान्यषिषेधिषन्न्यक्कर्तुमैच्छन् । एतेन स्वर्गेपि येषां प्रतिमल्ला द्विपा न सन्तीत्युक्तम् ॥

पादौ[1] निषिषिचुस्तोयैर्न्यषिषिक्षंश्च सर्पिषा ।
श्रमाभिषङ्गान्मृद्व्यो[2]भ्यषिषङ्क्षन् जलार्द्रया ॥ १२९ ॥

१२९. मृद्व्यः[1] स्त्रियः श्रमाभिषङ्गान्मार्गजखेद[2]संबन्धाद्धेतोः पादौ जलैर्निषिषिचुः क्षालितवत्यः । सर्पिषा घृतेन न्यषिषिक्षंश्च[3] सेक्तुमैच्छंश्च । अभ्यक्तुमैच्छन्नित्यर्थः । तथा जलार्द्रया जलक्लृतवस्त्रेणाभ्यषिषङ्क्षन्संबन्धयितुमैच्छंश्च । स्नानघृताभ्यङ्गजलार्द्राबन्धनैर्हि शीतक्रियाभिः श्रम उपशाम्यति ॥

वणिजोभ्यषजन्सौस्थ्यं परिष्ठाप्यापणान्पथि ।
अनतिस्थितयस्तत्राभि[3]षषञ्जुः क्रयार्थिनः ॥ १३० ॥

१३०. स्थितिं नातिक्रान्ता अनतिस्थितयो यथोचितस्थानस्थाः समर्यादा वा वणिजः पथि आपणान् हट्टान्परिष्ठाप्य संस्थाप्य विस्तार्य सौस्थ्यमभ्यषजन्नाश्रिताः । व्यवहारप्रवर्तनेन सुखिता बभूवुरित्यर्थः ।

---

१ बी °दौ न्यषि°. २ ए सी डी °न्मृद्व्यङ्ग्यो°. ३ बी °भिषिष°.

१ ए सी डी °मृद्व्यश्च°. २ सी °जस्वेद°. ३ सी डी °श्च सक्तु°.

तथा क्रयार्थिनः क्रायकास्तत्र तेष्वापणेष्वभिषपञ्जुः क्रयेऽर्थे संयुयुजुः । एतेन सैन्येपि नगर इव सर्वोपि क्रयविक्रयव्यवहारोभूदित्युक्तम् ॥

स्था । सम्प्रतिष्ठैः । अधितष्ठे । प्रत्यष्ठायि ॥ सेनि । अभिषेणयद्भिः । अनभिषिषेणयिषु । अभ्यषेणयत् । अभ्यषिषेणयिषत् ॥ सेध । निषिद्ध । निषिषेध । न्यषेधन् । न्यषिषेधिषन् ॥ सिच[3] । अभिषिक्त[4] । निषिषिचुः । न्यषिञ्चन्[5] । अषिषिक्षन्[6] ॥ सञ्ज[7] । अभिषज्ञात् । अभिषषञ्जुः । अभ्यषजन् । अभ्यषिषङ्क्षन् । अत्र "स्यासेना°" [४०] इत्यादिना षः ॥ ण्यन्तानामपि भवति । परिष्ठाप्य ॥ उपसर्गादित्येव । सौस्थ्यम् । पूजार्थत्वान्न सुरुपसर्गः ॥ तथा येन धातुना युक्ताः प्रादयस्तमेव प्रत्युपसर्गसंज्ञा इति अनतिस्थितय इत्यत्र षत्वं न ॥

विष्टब्धदंष्ट्राभिस्तब्धा व्यतस्तम्भन् श्वभिः किरीन् ।
व्यष्टम्भन्केप्यथ प्रासैर्वितष्टम्भुः शरैः परे ॥ १३१ ॥

१३१. निस्तब्धा ऊर्जस्वलाः केचिद्भटा विष्टब्धदंष्ट्रान् दृढदाढान्किरीन् शूकरान् श्वभिः कर्तृभिर्व्यतस्तम्भन्स्तम्भयामासुः । अथ श्वभिः स्तम्भनानन्तरं केपि भटाः प्रासैः कुन्तैर्व्यष्टम्भन् कीलन्ति स्म । परेन्ये च भटाः शरैर्वितष्टम्भुः ॥

प्रतिस्तब्धा अवाष्टम्भन्नेकेवष्टब्धशाखिनः[1] ।
अवष्टम्भमवष्टभ्यावतष्टम्भुस्तटीः परे ॥ १३२ ॥

१३२. एके भटा अवष्टब्धशाखिनो नद्याः समीपवर्तितरूनवाष्टम्भन्नाश्रिताः । यतः प्रतिस्तब्धा बलिष्ठाः । बलिष्ठत्वेनान्यान् जना-

१ सी °ष्टब्ध°.

१ बी °थानतिस्थितः क्र°. २ सी °यार्थे मं°. ३ बी सिच्च. सी सिध. ४ डी °षिक्तम् । नि°. ५ डी °न् । स°. ६ प °षिक्षन् ।. ७ बी सी सञ्ज । अ°.

नपाकृत्य नदीनिकटद्रुमानाश्रिता इत्यर्थः । तथा परेवष्टम्भं चित्तस्थैर्यमवष्टभ्याश्रित्य तटीरवतष्टम्भुश्छायाद्युपभोगायाश्रिताः । अपायबहुले हि नदीतटे चित्तावष्टम्भेनैवावस्थीयते ॥

सादिवर्ग उपष्टब्ध उपस्तब्धांस्तुरङ्गमान् ।
अवातस्तम्भदावासपार्श्वेवस्तब्धकन्धरान् ॥ १३३ ॥

१३३. उपष्टब्ध ऊर्जस्वी सादिवर्गोश्ववारौघस्तुरङ्गमानावासपार्श्वे स्वाश्रयसमीपेवातस्तम्भदाश्रयं ग्राहितवान् । कीदृशान् । उपस्तब्धान्बलिष्ठांस्तथावस्तब्धकन्धरानुन्नतग्रीवान् ॥

विष्टब्ध । वितष्टम्भुः । व्यष्टम्भन् । इत्यत्र "अडप्रति°" [४१] इत्यादिना षः ॥ अडप्रतिस्तब्धनिस्तब्ध इति किम् । व्यतस्तम्भन् । प्रतिस्तब्धाः । निस्तब्धाः ॥

आश्रये । अवष्टभ्य । अवतष्टम्भुः । अवाष्टभ्नन् ॥ ऊर्ज(र्जे?) । अवष्टम्भम् ॥ अविदूरे । अवष्टब्ध । इत्यत्र "अवाच्चा°" [४२] इत्यादिना षः ॥ चकारोऽड इत्यस्यानुकर्षणार्थोनुक्तसमुच्चयार्थश्च । तेनोपष्टब्ध इत्यत्रोपादपि । उपवादित्यकृत्वा चकारेण सूचनमनित्यार्थम् । तेनोपस्तब्धानित्यपि ॥ आश्रयादिष्विति किम् । अवस्तब्ध ॥ अड इत्येव । अवातस्तम्भत् ॥

अवषिष्वणिषुः कोपि विषष्वाण करम्भकम् ।
त्वं विष्वणावष्वण त्वं चेत्यवाषिष्वणत्परान् ॥ १३४ ॥

१३४. अवषिष्वाणिषुर्भोक्तुमिच्छुः सशब्दं बुभुक्षुर्वा भुञ्जानः कंचिच्छब्दं चिकीर्षुर्वा कोपि भटः करम्भकं दधिसक्तून्विषष्वाण बुभुजे सशब्दं भुक्तवान्वा भुञ्जानेः कंचिच्छब्दं चक्रे वा । एवमन्यत्राप्यर्था आविर्भावनीयाः । श्रमतप्ताङ्गा हि बुभुक्षवः शीतत्वात्करम्भं भुञ्जते । तथा त्वं विष्वण भुङ्क्ष्व त्वं चावष्वण भुङ्क्ष्वेत्येवंप्रकारेण

---

१ ए सी. आश्रिया°. २ बी °नः किंचि°. ३ सी भुक्ष्व त्वं.

परानन्यानपि करम्भमवाषिष्वणदभोजयत् । एतेनास्यात्मंभरित्वमपास्तम् ॥

योऽद्रौ व्यषिष्वणज्जायां स्वयं चैलामवाष्वणत् ।
सोवस्वनन्करी बद्धो व्यष्वणच्छष्पपूलिकाः ॥ १३५ ॥

१३५. यः करी अद्रौ विन्ध्यशैले जायां करेणुकामेलां सुगन्धितरुविशेषं व्यषिष्वणद्भोजितवान् । स्वयं च य एलामवाष्वणदभुङ्क्त । स्वभार्यान्वितो य एलां भुक्तवानित्यर्थः । एतेनास्यातिसुखितत्वमुक्तम् । स करी बद्ध आलानस्तम्भे निगडितोवस्वनन्नवबद्धत्वेन बन्धासहत्वादाक्रन्दन्सन् शष्पपूलिका नवतृणपूलान् व्यष्वणदभुङ्क्त । एतेन सुखदुःखावस्थे महतामपि भवत इत्युक्तम् ॥

उष्ट्रान्विस्वनतो भाराद्विषण्णानौष्ट्रिको जनः ।
न्यषीषदन्निषिषत्सून्निषसाद न तु स्वयम् ॥ १३६ ॥

१३६. औष्ट्रिको जन उष्ट्रान्न्यषीषददुपावेशयन् । किंभूतान्सतः । भाराद्धेतोर्विषण्णान् श्रान्तानत एव निषिषत्सूनुपवेष्टुमिच्छून् । तथा विस्वनत आरटतः । न तु स्वयं विषसादोष्ट्रसंबन्धिभिर्भारावतारणचार्यानयनादिभिरनेकव्यापारैर्व्याप्तत्वान्न पुनरात्मना भूम्यामुपाविशन् । एतेनौष्ट्रिकाणामुष्ट्रेष्वतिहितत्वोक्तिः ॥

न्यषीदत्प्रतिसन्नोर्भोम्बामपि प्रत्यसीषदत् ।
साप्यप्रतिसिषत्सुं तत्पितरं प्रत्यसीसदत् ॥ १३७ ॥

१३७. प्रतिसन्नः श्रान्तोर्भो बालको न्यषीददुपाविशत् । अम्बा-

---

१ बी °दन् ।.

---

१ सी °भुक्त । स्व°.

मपि मातरमपि प्रत्यसीषददुपवेशितवान् । साप्यम्बाप्यप्रतिसिषत्सुमनुपविविक्षुं तत्पितरमभंजनकं प्रत्यसीसदत् ॥

श्रमात्प्रतिसिसत्सन्तीः परिष्वक्ताब्जिनीदलाः ।
योषितोभ्यष्वजन्तेशाः प्रतिषिष्वङ्क्षवोम्भसि ॥ १३८ ॥

१३८. श्रमात्प्रतिसिसत्सन्तीरुपविविक्षूरतिश्रमातुरा इत्यर्थः । अत एव परिष्वक्ताब्जिनीदलाः श्रमसन्तापोपशमायाश्लिष्टपद्मिनीपत्रा योषित ईशा भर्तारोभ्यष्वजन्तालिङ्गन्ति स्म यतोम्भसि जले प्रतिषिष्वङ्क्षवो योषितः सम्बद्धाः कर्तुमिच्छवः । सन्तप्तत्वादात्मना सह सिस्नापयिषव इत्यर्थः ॥

येभिषस्वजिरे दूर्वां पर्यषेवन्त चान्तिकम् ।
मुदाश्वांस्तेभ्यषस्वञ्जन्मन्दुरापरिषेवकान् ॥ १३९ ॥

१३९. ये स्थानपाला दूर्वामभिषस्वजिरे भक्षणायाश्वैः सहाभिसंबध्नन्ति स्म । ये चान्तिकमश्वानां समीपं मक्षिकाभक्षणाद्युपद्रवापनयनस्थानशुचीकरणादिशुश्रूषया पर्यषेवन्त शिश्रियुस्ते मन्दुरापरिषेवकानश्वशालासंश्रयिणोश्वान्मुदा कर्योभ्यषष्वञ्जन्समयोजयन् हृष्टी चक्रुरित्यर्थः । ये हि येषां कृते भोज्यं मीलयन्ति भक्तत्वेनान्तिकं सेवन्ते च ते भृत्यास्तान्स्वामिनो विनीतत्वेन हर्षयन्ति ॥

कश्चिन्न्यषेवतैधांसि चुल्लीं परिषिषेविषुः ।
पिष्टं निषेवते स्मान्यो मण्डकान्सिषेविषुः ॥ १४० ॥

१४०. कश्चित्कान्दविकश्चुल्लीमान्तिकां परिषिषेविषुः संधुक्षणेन

१ बी °न्ती प°.

१ बी °शमया°. २ सी °ष्वक्षवो°. ३ बी °वान°. ४ डी °कान् शा°. ५ ए °जन्. ६ सी °स्तामि°. ७ ए °श्चुलीं--प°. बी °श्चुल्ली प°. सी °श्चुल्ली--प°.

सेवितुमिच्छुरेधांसीन्धनानि न्यषेवत मेलनभञ्जनादिना सेवते स्म। तथान्यो मण्डकान्पोलिका निषिषेविषुश्चिकीर्षुरित्यर्थः। पिष्टं गोधूमादिचूर्णं छेदनमर्दनादिना निषेवते स्म ॥

व्यषेवत पयः कश्चित्किलाटं विषिषेविषुः।
माषान्प्रतिसिषेवेन्यो वटकानि विषेवितुम् ॥ १४१ ॥

१४१. कश्चित्किलाटं क्षीरविकारविशेषं विषिषेविषुश्चिकीर्षुरित्यर्थः। पयो दुग्धं व्यषेवत संस्कारविधानादिना सेवते स्म। अन्यश्च वटकानि विषेवितुं कर्तुं माषान्प्रतिसिषेवे मर्दनसंस्कारादिनासेवत ॥

देवं प्रतिसिसेवे च कश्चित्परिषिताञ्जलिः।
निषितो भक्तिनिषयैर्विषयाविषितोद्यमः ॥ १४२ ॥

१४२. कश्चिच्च धार्मिको देवमर्हदाद्यभीष्टदेवतां प्रतिसिसेवे पूजादिना पर्युपासांचक्रे। कीदृक्सन्। भक्तिः श्रद्धा सैवान्यव्यापारनिवर्तकत्वान्निसीयत एभ्य इत्यपादानेक्लि निषया बन्धनानि तैर्निषितोबद्धोत एव विसिन्वन्ति यूनां मनांस्येष्विति "पुंनाम्नि घः" [५.३.१३१] इति घे विषयाः शब्दरूपरसगन्धस्पर्शास्तेष्वविषितोबद्धोकृत उद्यमो व्यापारो येन स एकाग्रचित्त इत्यर्थः। अत एव च परिषिताञ्जलिर्बद्धकरकुड्मलः ॥

बद्धा भृतिपरिषयैः केचिन्निःसितपक्तयः।
विषीव्यन्ति स्म निष्यूतं परिष्यूतदृशः पुटान् ॥ १४३ ॥

१४३. निःसितपक्तयः समर्थितपाकाः केचित्कान्दविकाः सुभटादिभोजनार्थं पुटान्वटादिपत्रमयान्भाजनभेदान्घृतादिद्रवद्रव्यागलनाय

१ सी °त्किटलां वि°. २ बी °व्यषी°. ३ बी निष्टर्यूतं. ४ बी °रिष्टयूत°.

१ ए सी °पपर°. २ ए °स्पर्श्यास्ते°.

निरन्तरं स्यूतं सेवनं यत्र तन्निष्यूतं यथा स्यादेवं विषीव्यन्ति स्म तृणैः प्रोयन्ते स्म । किंभूताः सन्तः । परिष्यूता इव परिष्यूता दृशो येषां ते पुटेष्वत्यन्तं न्यस्तदृशः । यतो भृतिर्मूल्यं सैव वशीकारकत्वात्परिषया बन्धनानि तैर्बद्धा वशीकृताः । वशीकृता हि दुष्करमपि कुर्वन्ति ॥

वृक्षा विषेहिरे भारं प्रहारं परिषेहिरे ।
निषेहुश्चानिसोढव्यं विष्किरैरपरिष्कृताः ॥ १४४ ॥

१४४. विष्किरैः पक्षिभिरपरिष्कृता अपरिवारिताः । सैनिकभयेन मुक्ता इत्यर्थः । वृक्षा भारं वर्मपल्ययनादिसंबन्धिनं विषेहिरे । तथा प्रहारमिन्धनाद्यर्थं कुठारादिघातं परिषेहिरे । तथानिसोढव्यं सोढुमशक्यं शाखाभङ्गादि च निषेहुः । यौजादिकस्य विकल्पेन ण्यन्तस्य सहो रूपमिदम् । येप्यपरिष्कृता एकाकिनो रङ्काः स्युस्तेपीन्धनादीनां भारं चपेटादिप्रहारं चानिसोढव्यं दुर्वाक्यादि च सहन्त इत्युक्तिः ॥

विसोढं परिसोढव्यं कष्टं मातो विसीषहः ।
निसीषिवोर्करुग्भिर्मेति ह्युक्त्या कोप्यदात्स्थुलम् ॥१४५॥

१४५. कोपि स्त्रीवश आतपकष्टनिवारणाय स्थुलं पटकुटीमदाद्बध्नात् । कया । इत्येवंविधया ह्युक्त्या भार्यावचनेन । यथा परिसोढव्यं कष्टं मार्गश्रमादि सोढमतोस्मात्परं कष्टं मा विसीषहः । कष्टं सहमानां मां मा प्रयुङ्क्थाः । कष्टमेव स्पष्टयति । अर्करुग्भिः सूर्यातपैः कर्त्रीभिर्मा निसीषिवोर्करुचः कर्त्र्यो निषीव्यन्ति संबध्नन्ति मामात्मना तास्त्वं मा प्रयुङ्क्थाः ॥ यद्वा । अर्करुचो निषीव्यन्ति संबध्नन्ति मया सह कष्टं तास्त्वं मा प्रयुङ्क्थाः । आतपकष्टं निवारयेत्यर्थ इति ॥

---

१ बी °रिस्कृता°. २ सी °सीषि°. ३ ए विसी°.

---

१ बी °निष्यूतं. २ बी °रिष्यूता°. ३ बी °रिष्यूता°. ४ बी °ता सै°. ५ सी यौज्यादि°. ६ ए बी सी °नन्त°. ७ बी °रिस्कृता. ८ ए सी डी मां विसी°.

विष्वण । अवष्वण । विषष्वाण । अवषिष्वणिषुः[1] । व्यष्वणत् । अवाष्वणत् । व्यषिष्वणत् । अवाषिष्वणत् । इत्यत्र "व्यवात्°" [४३] इत्यादिना षः ॥ अशन इति किम् । विस्वनंतः[2] । अवस्वनन् ॥

विषण्णान् । निषिषत्सून् । न्यषीदत् । न्यषीषदत् । इत्यत्र "सदोप्रतेः°" [४४] इत्यादिना षः ॥ परोक्षायां त्वादेरेव । निषसाद ॥ अप्रतेरिति किम् । प्रतिसस्नः[3] । प्रत्यसीषदत् । अप्रतिसिषंस्सुम्[4] । अत्र प्रतेः परस्याद्यसकारस्य षो न स्यात् । प्रकृतिसस्य नामिनः परस्य "नाम्यन्तस्था°" [२.३.१५] आदिसूत्रेण स्यादेव ॥ अस्यापि नेच्छन्त्येके । प्रत्यसीसदत् । प्रतिसिसत्सन्तीः ॥

परिष्वक्त[5] । प्रतिषिष्वङ्क्षवः । अभ्यष्वजन्त । अभ्यषष्वञ्जन् । इत्यत्र "स्वञ्जश्च" [४५] इति षः ॥ योगविभागादप्रतेरिति नानुवर्तते । तेन प्रतिषिष्वङ्क्षवः ॥ चकारः परोक्षायां त्वादेरित्यस्यानुकर्षणार्थः । अभिषस्वजिरे । ततश्चोत्तरत्राननुवृत्तिः ॥

परिषेवकान् । परिषिषेविषुः । पर्यषेवंत । निषेवते । निषिषेविषुः । न्यषेवत । विषेवितुम् । विषिषेविषुः । व्यषेवत । इत्यत्र "परिनिवेः सेवः" [४६] इति षः ॥ परिनिवेरिति किम् । प्रतिसिषेवे । अत्रोपसर्गाश्रितं षत्वं न स्यात् । धातोस्तु द्वित्वाश्रितं भवत्येव । उभयत्र नेच्छन्त्येके । प्रतिसिसेवे ॥

परिषयैः । निषयैः । विषय । परिषितं[6] । निषितः । अविषित । इत्यत्र "सयसितस्य" [४७] इति षः ॥ परिनिवेरिति[7] नियमादन्योपसर्गपूर्वास्यतेः "उपसर्गात्सुग्°" [२.३.३९] इत्यादिनापि षत्वं न स्यात् । तेन निःसित ॥

परिर्ष्यूत[8] । निष्यूतम् । विषीव्यन्ति । परिषेहिरे[9] । निषेहुः । परिषेहिरे । अपरि-[10]

---

१ डी °पुः । न्यष्व°. २ प सी डी °नत् । अ°. ३ बी °सन्न । प्र°. ४ बी °षत्सुः । अ°. ५ प सी डी °ष्वक्तः । प्र°. ६ प डी °षितः । नि°. ७ बी वेरेवेति. ८ बी रिष्ठ्यूत । निष्ठ्यूत°. ९ प सी डी °र । अ°. १० बी °रिस्कृताः.

ष्कृताः । विष्किरैः । इत्यत्र "असोङ॰" [४८] इत्यादिना षः ॥ असोङेति किम् परिसोढव्यम् । अनिसोढव्यम् । विसोढम् । मा निसीषिवः । मा विसीषहः ॥

क्ष्मां पर्यष्टौत्तृणैरद्भिर्न्यष्टौद्व्यष्टौत्तथेन्धनैः ।
विभुर्यां तां च पर्यस्तौद्व्यस्तौद्व्यस्तौत्परिच्छदः ॥ १४६ ॥

१४६. विभुर्यां प्रशस्यतृणजलेन्धनामवोचत्तां क्ष्मां पृथ्वीं परिच्छदोपीत्यर्थः । एतेन परिच्छदस्य च्छन्दोनुवर्तित्वेन स्वामिन्यात्यन्तिकी भक्तिरुक्ता ॥

ओजो व्यष्वङ्क्तुत्पर्यष्वङ्क्त न्यष्वङ्क्त विक्रमः ।
व्यस्वङ्क्त धीर्न्यस्वङ्क्त श्रीर्नॄन्पर्यस्वङ्क्त न श्रमः ॥ १४७ ॥

१४७. प्रस्तावात्सैन्यावासने सति नॄन्सैनिकान् श्रमो न पर्यष्व(स्व?)ङ्क्त नालिङ्गन्नदीस्नानादिना व्यपगत इत्यर्थः । अत एव बलहर्षोत्साहबुद्धिशोभा नॄनालिङ्गन्नित्यर्थः ॥

क्ष्मां व्यषीव्यद्व्यषीव्यद्वाः पर्यषीव्यद्दरी रजः ।
व्यसीव्यद्द्व्यसीव्यत्खं पर्यसीव्यद्दिशश्च यत् ॥ १४८ ॥

१४८. यद्रजो[2]त्यन्तं निबिडत्वेन द्रून् व्यसीव्यत्प्रोतवानिव व्याप्नोदित्यर्थः । तथा [3]खं न्यसीव्यद्दिशश्च पर्यसीव्यत्तद्रजः क्ष्मां व्यषीव्यत् । तथा वाः जातावेकवचनम् । जलानि न्यषीव्यत्तथा दरीर्गर्ताः पर्यषीव्यत् । सैन्ये चलति तुरगादिखुरोत्खातं यद्रज ऊर्ध्वमुच्छालितमासीत्तत्सैन्य उषितेधः पपातेत्यर्थः । योप्युच्चैस्तमपदारूढः स्यात्सोपि 'उच्चैश्चटितस्यावश्यं पातः' इति लोकोक्तेरधः पततीति ॥

---

१ सी °व्यद्वाः.

---

१ ए सी विष्कीरैस्त°. डी विष्कीरै°. २ सी °जोलं नि°. ३ सी खं व्यसी°.

व्यषहिष्ट तटीपातं पङ्कं पर्यषहिष्ट च।
न्यषहिष्ट पयःशोषं व्यसहिष्ट न किं नदी ॥ १४९ ॥

१४९. नदी जम्बूमाली तटीपातं सैन्यसंमर्दजन्यं तीरभ्रंशं व्यषहिष्ट। तथा वस्त्रादिधावनविगाहनादेः पङ्कं पर्यषहिष्ट। तथा पानादेः पयःशोषं न्यषहिष्ट। अतश्च तटीपातादिसहनात्किं न व्यसहिष्ट ॥

न न्यसाह्यातपः कैश्चित्पर्यसाहि तृषा न च।
पर्यष्कारि तरुच्छाया पर्यस्कारि सरिच्च यत् ॥ १५० ॥

१५०. स्पष्टः। किं तु पर्यस्कारि समाश्रयणेनालंकृता ॥

पर्यष्टौत् पर्यस्तौत्। न्यष्टौत् न्यस्तौत्। व्यष्टौत् व्यस्तौत्। पर्यष्वङ्क्त पर्यस्वङ्क्त। न्यष्वङ्क्त न्यस्वङ्क्त। व्यष्वङ्क्त व्यस्वङ्क्त। पर्यषीव्यत् पर्यसीव्यत्। न्यषीव्यत् न्यसीव्यत्। व्यषीव्यत् व्यसीव्यत्। पर्यषहिष्ट पर्यसाहि। न्यषहिष्ट न्यसाहि। व्यषहिष्ट व्यसहिष्ट। पर्यष्कारि पर्यस्कारि। इत्यत्र "स्तुस्वञ्जश्चाटि न वा" [४९] इति वा षः ॥

विष्यन्दिमदनिःष्यन्दैः कराभिष्यन्दिशीकरैः।
सल्लक्या रसनिष्यन्दः स्म परिष्यन्द्यते गजैः ॥ १५१ ॥

१५१. गजैः सल्लक्या गजप्रियतरुविशेषाद्रसनिष्यन्दो रसप्रवाहः परिष्यन्द्यते स्म चर्वणेन स्राव्यते स्म। कीदृशैः। विष्यन्दी प्रसृमरो मदनिःष्यन्दो मदप्रवाहो येषां तैस्तथा करेभ्यः शुण्डाभ्योभिष्यन्दिनः स्रवणशीलाः शीकरा वमथवो येषां तैः ॥

१ बी न्यस्याह्या°. २ डी °रि स°.

१ बी °र्दजं ती°. २ सी °ङ्क्त। व्यष्व°. ३ सी °ष्ट। प°. ४ ए सी डी °पाणां रस°. ५ डी °न्दो मद°. ६ ए सी °न श्राव्य°. ७ बी °निःस्यन्दो. ८ ए सी डी °नः श्रव°. ९ ए सी °थतो ये°. डी °थतौ ये°.

निःस्यन्दिस्वेदनिस्यन्दात्फेनाभिस्यन्दतो हयैः ।
विस्यन्दिभिरिवाम्भोदैः परिस्यन्दिन्यभून्मही ॥ १५२ ॥

१५२. विस्यन्दिभिर्वर्षुकैरम्भोदैरिव हयैः कृत्वा मही परिस्यन्दिन्यार्द्राभूत् । कुतः । निःस्यन्दी श्रमवशात्स्रवणशीलो यः स्वेदनिस्यन्दो घर्मप्रवाहस्तस्मात् । फेनाभिस्यन्दतः श्रमेणैव मुखफेनस्रवणाच्च ॥

क्षुब्धसिन्धौ बलैः स्मानुष्यन्देते झषकाम्भसी ।
यादोर्णसी इव स्मानुस्यन्देते मन्दराद्रिणा ॥ १५३ ॥

१५३. बलैः सैन्यैः क्षुब्धसिन्धौ विलोडितायां जम्बुमालीनद्यां झषकाम्भसी ह्रस्वमत्स्यजातिजले अनुष्यन्देते स्म प्रसरतः स्म तटान्यतिचक्रमतुरित्यर्थः । यथा मन्दराद्रिणा मेरुणा क्षुब्धसिन्धौ विलोडितेऽब्धौ यादोर्णसी जलजन्तुजातिजले अनुस्यन्देते स्म प्रसृते ॥

विस्यन्दिदन्त्यविष्कन्तृमदैर्विस्कन्तृभिर्भुवः ।
विस्कन्नः सर्वतो रेणुर्नैव विस्कन्नवान् दृशः ॥ १५४ ॥

१५४. रेणुरुपशान्तत्वाद्दृशो नैव विस्कन्नवान्न व्याप्नोद्यतो विस्यन्दिनो मदक्षरणशीला ये दन्तिनस्तेषामविष्कन्तागेऽशुष्यन्तो ये मदास्तैः कर्तृभिः सर्वतो विस्कन्न आर्द्रीकरणेन व्याप्तः । किंभूतैः । बहुलत्वाद्भुवो विस्कन्तृभिर्व्यापकैः ॥

निःष्यन्दैः निःस्यन्दि । अभिष्यन्दि अभिस्यन्दतः । अनुष्यन्देते अनुस्यन्देते । परिष्यन्दते परिस्यन्दिनी । निष्यन्दः निस्यन्दात् । विष्यन्दि विस्यन्दिभिः । इत्यत्र "निरभ्यनोश्च°" [५०] इत्यादिना वा षः ॥ अप्राणिनीति किम् ।

---

१ बी °शाच्छ्व°. २ बी स्मात्तथा फे°. ३ ए बी सी डी °नश्च°. ४ बी विष्कन्न° ५ बी विष्कन्न° ६ बी °न्दते. ७ बी °ष्यन्द नि°.

विस्यन्दिदन्ति । पर्युदासोयं न प्रसज्यप्रतिषेधस्तेन यत्र प्राणी चाप्राणी च कर्ता स्यात्तत्राप्राण्याश्रयो विकल्पो भवति न तु प्राण्याश्रयः प्रतिषेधः । अनुष्यन्देते झषकाम्भसी अनुस्यन्देते यादोर्णसी ॥

विष्कन्तृ विस्कन्तृभिः । इत्यत्र "वेः°" [५१] इत्यादिना षो वा ॥ अक्तयोरिति किम् । विस्कन्नः । विस्कन्नवान् ॥

परिष्कण्णापरिस्कन्नान्वृषान्निःष्फुलनिःष्फुरान् ।
निःस्फुला निःस्फुरा[1] गोपा निन्युः क्ष्मां निष्फुरत्तृणाम् १५५

१५५. निःस्फुलाः संहता[3] निःस्फुराः स्फुरणान्विता गोपा गोपाला वृषान्निष्फुरत्तृणामुल्लसच्छष्पां[4] क्ष्मां चारणार्थं निन्युः । किंभूतान् । परिष्कण्णं श्रमोद्भवः समन्ताच्छोषः पातो वा तेनापरिस्कन्नानपरिगतान्बलिष्ठत्वेन भूरिमार्गगमनेनाप्यश्रान्तानत[5] एव निःष्फुलनिःष्फुरान्[6] विशेषणकर्मधारये संहतान्सतेजस्कांश्च ॥

निष्फुलन्निस्फुरद्वातैर्निस्फुलद्विष्फुरद्ध्वजाः ।
विस्फुरद्विष्फुलच्छायाः पङ्क्त्या विस्फोलिता रथाः ॥१५६॥

१५६. रथाः पङ्क्त्या श्रेण्या विस्फोलिताः संचायिताः संस्थापिता इत्यर्थः । किंभूताः । निष्फुलन्तः संहतीभवन्तो निस्फुरन्तो विचरन्तश्च ये वातास्तैः कृत्वा निस्फुलन्तोन्योन्यं[7] संहतीभवन्तो विस्फुरन्तश्च[8] चला ध्वजा येषु ते । अत एव विस्फुरन्त्यश्चलन्त्यो विस्फुलन्त्यः संहतीभवन्त्यश्छाया ध्वजसंबन्धिन्यो येषां ते ॥

१ ए निःस्फरा°. २ सी °ष्फुर°.

---

१ बी °णी यत्र चा°. २ डी °स्कन्नवा°. ३ ए सी डी संहिता°. ४ ए °निष्पुर° ५ ए सी डी °रिष्कन्ना°. ६ बी °निष्फुरा°. ७ ए सी डी °स्फुरन्तो° ८ डी °श्च चल°.

परिष्कण्णापरिस्कन्नान् । इत्यत्र "परेः" [५२] इति वा षः ॥

निःष्फुरान् निःस्फुराः[1] । निष्फुरत् निस्फुरत् । निःष्फुल निःस्फुलाः[2] । निष्फुलत् निस्फुलत् । इत्यत्र "निर्नेः०" [५३] इत्यादिना वा षः ॥

विष्फुरत् विस्फुरत् । विष्फुलत् विस्फोलिताः । इत्यत्र "वेः" [५४] इति वा षः ॥

रिपुविष्कम्भि विष्कभ्नत्सैन्यं पादपदुःषमाः ।
क्ष्माः स्थलीनिःषमा[1] गर्तविषमाः सुषमा व्यधात् ॥१५७॥

१५७. सैन्यं क्ष्माः सुषमा वृक्षोच्छेद[3]स्थल्युत्खननगर्तापूरणैः समत्वापादनात्सुषमा[4] व्यधात् । कीदृक्सत् । पराक्रमित्वेन रिपून्विष्कभ्नात्यवष्टभ्नातीत्येवंशीलं रिपुविष्कम्भि । तथा विष्कभ्नत्सर्वत्रावासनेन प्रसरत् । कीदृशीः क्ष्माः । पादपदुःषमा वृक्षैर्दुष्टसमत्वाः । तथा स्थलीनिःषमाः स्थलैः समत्वान्निष्क्रान्ताः । तथा गर्तविषमा दरीभिर्विगतसमत्वाः । पादपादिभिर्दुर्गमा इत्यर्थः । एवं नाम सैन्यं बाहुल्येन प्रासरद्यावता भग्नवृक्षैरुत्खातस्थलीभिश्च गर्ताः पूरयित्वा भुवः[5] समाश्चक्र इत्यर्थः । यदपि सैन्यं विष्कभ्नत्प्रसरद्रिपुविष्कम्भि युद्धाय शत्रववष्टम्भकं स्यात्तदपि रणविघ्नभूतवृक्षस्थलीगर्तैर्विषमा रणभुवो वृक्षादिभङ्गादिभिः सुषमाः करोतीत्युक्तिः[6] ॥

छायाविषूतिफलनिःषूतिपुष्पसुषूतयः ।
वनदुःषूतिवृक्षाणां कृतार्थ्यन्ते स्म सैनिकैः ॥ १५८ ॥

१५८. वनेरण्ये नैष्फल्याद्दुष्टा सूतिरुत्पत्तिर्येषां ते ये वृक्षास्तेषां

१ बी °निष°.

१ ए निस्फराः ।. २ डी स्फुली । नि°. ३ सी वृक्षाच्छे°. ४ डी °मा न्यधा°. ५ बी °वस°. ६ सी °क्तिः ॥ या°.

छायाविषूतिफलनिःषूतिपुष्पसुषूतय[1]ः । विशिष्टा सूतिरुत्पत्तिर्वृक्षकर्तृको-त्पादना वा । एवं निश्चिता सूतिर्निःषूतिः । शोभना सूतिः सुषूतिः । ततः षष्ठीतत्पुरुषगर्भो द्वन्द्वः । छायाफलपुष्पाणामुत्पत्तयः सैनिकैः सैन्यैः कृतार्थ्यन्ते स्वोपभोगेन सफलीकृताः ॥

रत्यानिःसमितोरुनिःषमितदृ[1]ग्निःसृतलीलाङ्गना-
निःषूतश्र्यविषुप्तकामुकमनिःषुप्तस्मरं तत्क्षणात् ।
त[2]द्दुःषुप्तसुषुप्तवर्जितभटं प्रादुःषदद्दं विष-
न्सुस्वप्नो नु मुदं दिदेश शिबिरं गंधर्वपुर्याः समम् ॥१५९॥

१५९. यथा विषन्निशेषेण भवन्सुस्वप्नः परिपूर्णचन्द्रपानादिः शोभनः स्वप्नो मम कोपि महाभ्युदयो भावीत्यभिप्रायेण सुस्वप्नालो-किनः पुंसो मुदं करोति । तथा तत्पूर्वव्यावर्णितं शिबिरं सैन्यसन्नि-वेशो द्रष्टॄणां मुदं हर्षं दिदेश चक्रे । यतो गन्धर्वपुर्या ऐन्द्रजालिकपुर्याः समं तुल्यम् । एतदपि कुत इत्याह । यतस्तत्क्षणाद्यदैव जम्बूमाल्यां सैन्य[2]मवसत्तमेव कालमाश्रित्यानिःषुप्तस्मरं तत्कालोत्[3]पन्नानेकशीतोप-चारैः श्रमोपशान्त्या महर्द्धिकत्वातिसुखितत्वादिना च सैन्यजनस्योज्जृ-म्भितस्मरत्वाज्जागरितकन्दर्पमत एवाविषुप्तकामुकमनवरतं सुरतक्रि-यया जागरितकामिजनमत एव च रत्या निधुवनेन कृत्वा ष[4]र्म ष्टम वैक्लव्ये इति समूधातोः क्ते आनिःसमितौ समन्ताभिश्चितं विक्लवीभूतावूरू सक्थी यासां तास्तथा[5] । तथा रत्यैव निःष[6]मिते विक्लवीभूते निद्राभङ्गेन गह्वरिते दृशौ यासां तास्तथा[7] । तथा रत्यैव निःसूता षू धातुः सकर्मकोपि । उत्पादिता लीला शृङ्गारचेष्टाविशेषो यासां तास्तथा । विशेषणकर्मधारये

१ बी °ग्भिः नु मु°. २ सी °दुःसुप्त°.

१ ए सी °तयोर्विशि°. २ बी °न्यमाव°. ३ बी त्पन्नोने°. ४ डी °भ वे°. ५ बी °था र°. ६ बी °षमते. ७ सी °था र°.

तथाविधा या अङ्गनास्ताभिर्निःषूतोत्पादिता श्रीः शोभा यत्र तत् । तथा तत्क्षणादेव प्रादुःषदट्टं व्यवहारार्थं प्रकटीभवदापणमत एव कामासक्तानामर्थासक्तानां च जनानां रक्षार्थं दुःषुप्तसुषुप्तवर्जिता दुष्टस्वापशोभनस्वापाभ्यां रहिताः सर्वथा जागरूका भटा योधा यत्र तत् । गन्धर्वपुर्यपि तात्कालिकानिःषुप्तस्मरत्वादिविशेषणविशिष्टा सती द्रष्टृणामाश्चर्योद्धर्षं करोति । शार्दूलविक्रीडितं छन्दः ॥

प्रादुःष्युरप्सरस आजिमहः स विष्या-
त्सेसिच्यमान इषुभिर्भटपिस्स्यमानः ।
तत्राभिसेधितुमना अभिसोष्यते यो
गङ्गासुसूः स इति सैन्यभटाः प्रदध्युः ॥ १६० ॥

१६०. सैन्यभटाः प्रदध्युरचिन्तयन् । किमित्याह । भटपिस्स्यमानो युद्धार्थं योधैर्गम्यमानः । अत एवेषुभिः सेसिच्यमानोत्यर्थं व्याप्यमानः । स प्रसिद्ध आजिमहो रणोत्सवो विष्याद्विशेषेण संपद्यताम् । ततश्चाप्सरसः प्रादुःष्युराजिकौतुकदिदृक्षया भटवुवूर्षया च प्रकटीभवन्तु । "विधिनिमन्त्रणा°" [५.४.२८.] इत्यादिनात्र प्रार्थने सप्तमी । एतेन भटानां रणविषयोभिलाषातिरेक उक्तः । तथा तत्राजिमहेभिसेधितुमना गन्तुकामो यो भटोभिसोष्यते धारातीर्थे स्नास्यति शत्रुभटैर्हिसिष्यते वा स भटो गङ्गासुसूः सुरापगायां स्नातुमिच्छुर्देवीभवितुमिच्छतीत्यर्थः । रणे हि मृताः स्वर्गे यान्तीति स्मृतिरिति ॥

विष्कम्भत् । विष्कम्भि । इत्यत्र "स्कम्भः" [५५] इति षः ॥

निःषमाः । दुःषमाः । सुषमाः । विषमाः । निःषूति । दुःषूति । सुषूतयः ।

---

१ ए श्रीशो°. २ डी °नां र°. ३ ए सी डी °सुप्त°. ४ सी °दध्यार°. ५ डी °तुकादि°. ६ ए विष्वभ्र° बी विष्कम्भत् ।. सी डी विष्वभूत् ।.

विषूति । इत्यत्र "निर्दुःसु°" [५६] इत्यादिना षः ॥ सम[1]सूतीतिनामग्रहणा-द्धातोर्वैरूप्ये च न स्यात् । निः[2]सम[3]ित । निः[4]सूत ॥ अन्ये तु समसूत्योर्धात्वोरेवे-च्छन्ति । तन्मते निः[5]षमित निःषूतेत्यादावेव स्यात् ॥

निःषुप्त । दुःषुप्त । सुषुप्त । विषुप्त । इत्यत्र "अवः स्वपः" [५७] इति षः ॥ अव इति किम् । सुस्वप्नः ॥

प्रादुःष्युः । विष्यात् । प्रादुःषत् । विषन् । इत्यत्र "प्रादुः°" [५८] इत्यादिना षः ॥

पिस्स्यमानः । इत्यत्र "न स्सः" [५९] इति न षः ॥

सेसिच्यमानः । इत्यत्र "सिचो यङि" [६०] इति न षः ॥

[6]अभिसेधितुमनाः । इत्यत्र "गतौ सेधः" [६१] इति न षः ॥

अभिसो[7]ष्यते । गङ्गासुसूः । इत्यत्र "सुगः स्यसनि" [६२] इति न षः । वसन्ततिलका छन्दः ॥

॥ इति श्रीजिनेश्वरसूरिशिष्यलेशाभयतिलकगणिविरचितायां श्रीसिद्धहेमचन्द्रा-भिधानशब्दानुशासनद्व्याश्रयवृत्तौ तृतीयः सर्गः समर्थितः ॥

॥ ग्रन्थ ११५८ ॥ अं[8] २२ ॥

---

१ ए सी डी °सूति°. २ डी निःसू°. ३ ए सी °मितः । निः°. ४ ए सी डी सूतः । अ°. ५ ए सी डी निःषू°. ६ ए सी डी अतिसे°. ७ बी °ष्यन्ते । ग°. ८ ए सी °ष्यपंले°. ९ बी अ २७ ॥.

चतुर्थः सर्गः ।

अवतीर्णमथापगावनान्तर्नरनाथं कषणक्षमं रिपूणाम् ।
इति नीतिमवृक्णवाक्प्रपुष्णन्नगृणाद्ग्राहरिपोरुपेत्य दूतः ॥ १ ॥

१. अथ सैन्यावासनानन्तरं रिपूणां कषणक्षमं विनाशनसमर्थमत एवाभिषेणनेनापगावनान्तर्जम्बूमालीवनमध्येवतीर्णमावासितं नरनाथं मूलराजमुपेत्य ग्राहारेर्दूत इति वक्ष्यमाणमगृणादवदत् । कीदृक्सन् । नीतिं न्यायं प्रपुष्णन्वर्धयन्नीतिशास्त्रोक्तानुसारेणेत्यर्थः । तथावृक्णाविच्छिन्नाप्रतिहता वाग् यस्य सः । सर्गेत्रौपच्छन्दसिकं छन्दः ॥

तदेवाष्टादशभिर्वृत्तैर्विवक्षुर्दूतः स्वामिनः स्वस्य च नामसंकीर्तनपूर्वं स्वव्यापारणकारणमाह ।

तव शौर्यकिरीटिनो रसेनाविरलेनागमकारणं बुभुत्सुः ।
नयवर्जनकर्शनादिशन्मां द्रुणसं ग्राहरिपुर्विकर्तनाभः ॥ २ ॥

२. नयं न्यायं वर्जयन्ति । "रम्यादिभ्यः कर्तरि" [५. ३. १२७] इत्यने नयवर्जनान्कर्शयति तनूकरोति यस्तस्य संबोधनं हे नयवर्जनकर्शनान्यायिनिग्राहिन्नविरलेन सान्द्रेण रसेनानुरागेण तवागमकारणमागमनहेतुं बुभुत्सुर्ज्ञातुकामो ग्राहरिपुर्द्रुणसं द्रुणसाभिधं मामादिशत् प्रेषितवानित्यर्थः । यतः शौर्यकिरीटिनः शौर्येणोपलक्षकत्वात्प्रतापादिना च कि-

१ डी °तः ग्राहा°.

१ बी °वासान°. २ ए सी °न्दसकं. ३ ए सी °यति । र°. ४ ए सी °भ्यः कीर्तं°. ५ ए सी लेण सा°. ६ बी °क्षणत्वा°.

रीटिनोर्जुनतुल्यस्य सोपि च विकर्तनाभः शौर्यप्रतापादिगुणैरादित्यसमः । भवति ह्युत्तमानामुत्तमेष्वनुरागः ॥

तदेवं मूलराजागमकारणजिज्ञासया स्वव्यापारेण उक्तेपि राज्ञि स्वागमकारणमवदति स्वयमेवं वितर्क्यागमकारणानि पृच्छन्सामोक्त्या परिहरंश्च वृत्तदशकमाह ।

ऋगयनपठनेन दुर्णसैस्तैः प्रवणान्तर्वणनिर्वणोषितैः किम् ।
चलितोसि मृषा द्विजैर्ब्रुवाणैराम्रवणेक्षुवणानि नः खनद्भिः ॥ ३ ॥

३. तैर्ग्राह्यार्युपद्रुतैर्मृषा ब्रुवाणैर्निरपराधा वयं ग्राहारिणोपद्रुता इत्यलीकवादिभिः सद्भिर्द्विजैः किं चलितोसि चलन्प्रयुक्तस्त्वं तेन तेत्रागम इत्यर्थः । इदं चागमकारणं मृषा ब्रुवाणैरिति विशेषणेनैवायुक्तमिति परिहृतम् । नन्वमी कमपराधं चक्रुर्येन्मृषा ब्रुवाणा उच्यन्त इत्याह । प्रवणान्तर्वणनिर्वणनामानि यानि वनानि । यद्वा । प्रकृष्टानि वनानि प्रवणानि । अन्तर्मध्ये वनान्यन्तर्वणानि । निश्चितानि वनानि निर्वणानि[4] । द्वन्द्वे तेषूषितैः स्थितैः सद्भिर्नोस्माकमाम्रवणेक्षुवणानि खनद्भिः । यत ऋगयनपठनेन ऋचः सामिधेन्यः । यकाभिः समिधोग्नावाधीयन्ते । तासामयनमृगयनं वैदिको ग्रन्थस्तत्पाठेन दुर्णसैर्विकृतनासिकैः । अनेन द्विजानामग्नौ समिदाधानं[5] सूचितम् । तत्रावश्यमृगयनपाठात् । ऋगयनपाठेन पलाशाश्वत्थप्रायस्यैव[6] समिधोग्नावाधीयन्त इति श्रुतिरित्येते पलाशप्रायस्यैव समिध ऋगयनपठनेनाग्नौ जुह्वति । परं तत्प्रसङ्गेनास्मदाम्रवणेक्षुवणानि खनन्तीत्येतेपराधिन इत्यर्थः ॥

---

१ सी ऋमन°.

---

१ ए सी डी °नस्य. २ बी °पारेण उ°. ३ बी व वितर्क्य वि°. ४ ए सी डी °र्वणानि. ५ बी °मिवाधा°. ६ ए °स्यैवं स°.

खदिरवणाम्रेवणस्थपीयुक्षावणकार्श्यवणस्थितैर्नृपैर्नैः[1] ।

प्लक्षवणगतैश्च विद्रवः किं शरवणशिग्रुवणेश्वरैश्च चक्रे ॥ ४ ॥

४. स्पष्टम् । किं तु पीयुक्षा द्राक्षा । कार्श्याः शालाख्या वृक्षाः[1] । खदिरवणं चाम्रेवणं च तत्स्थाश्च ते पीयुक्षावणकार्श्यवणस्थिताश्च तैर्नोस्माकं नृपैर्विद्रवः उपद्रवः । शिग्रुः शोभाञ्जनः ॥

बदरीवणवच्च कण्टकास्ते शिग्रुवने बदरीवने च नोत्र ।

माषवणान्वेषको न नीवारवणे माषवनं[2] लभेत जातु ॥ ५ ॥

५. यथा बदरीवणे कण्टकास्तीक्ष्णाग्रा बदर्यवयवा भवन्ति तथात्रास्मिन्नोस्माकं शिग्रुवने बदरीवने चोपलक्षणत्वात्खदिरवनादिषु च ते तव कण्टकाः शत्रवो न[2] भवन्ति । दृष्टान्तमाह । माषवणान्वेषकः पुमान्नीवारवणे वनव्रीहिवनमध्ये जातु कदाचिदपि न माषवनं लभेत । एवमस्माकं युष्मन्मित्राणां वनेषु युष्मच्छत्रवो न सन्त्यतः खदिरवणादिवनस्थास्मन्नृपकृतोपद्रवस्याभावादयमागमने न हेतुरित्यर्थः ॥

नीवारवनोल्लसद्विदारीवनसुरदारुवनेरिकावनेषु ।

गिरिणद्यतिरंहसा मृगव्ये गिरिनद्यां नु सुनीरपाणमागाः ॥ ६ ॥

६. उल्लसद्विदारीवनमुच्चच्छालपर्णीलता[3]विशेषवनम् । सुरदारुवनं देवदारुवनम् । इरिकावनमोषधि[4]विशेषवनम् । द्वन्द्वे तेष्वाधारेषु मृगव्य आखेटार्थम् । न्विति पृच्छायाम् । आगा आगतोसि । केन कृत्वा । गिरिणद्यतिरंहसा पर्वतोद्भूतापगावदतिवेगेन । कथम् । गिरिनद्यां जम्बूमाल्यां शोभनं नीरपाणं जलपानं यत्रागमने तद्यथा स्यादेवम् ।

---

१ बी सी °पैर्न । २ ए सी °वणं ल°.

---

१ बी °लाक्षा वृ°. २ बी न सन्ति. ३ ए सी °ताचवि°. ४ बी °नमोष°,

अस्य चागमकारणस्य परिहाराभणनान्मृगयार्थं चेत्तवात्रागमस्तदा युक्तमित्यनुमतिर्व्यज्यते ॥

यदुभिर्मधुनीरपानगोष्ठ्यामुत दुरभाषि कषायपाणहस्तैः ।
वचने हि कषायपानपाणेर्न सुरापाणसुराष्ट्रकेषु दोषः ॥ ७ ॥

७. मधु मद्यं तदेव प्राचुर्यात्प्रसन्नत्वाच्च नीरं जलं तस्य या पानगोष्ठ्यापानं[1] तस्यां पीयतेनेन पानं पात्रं कषायस्य सुरभिरसस्य प्रस्तावान्मद्यस्य पानं चषको हस्ते येषां तैर्मद्यं पिबद्भिः सद्भिरित्यर्थः । यदुभिर्यादवैः । उतेति प्रश्ने । दुरभाषि किं दुष्टं किंचिदुक्तम्[2] । अर्थात्तव । तेन तवात्रागमः । एतदपि परिहरति । सुराया मद्यस्य पानं येषु ते सुरापाणा ये सुराष्ट्रका मद्यपत्वादेव कुत्सितास्[3] सुराष्ट्रदेशस्था जनास्तेषु कषायपानपाणेः सुरापात्रकरस्य मद्यपस्येत्यर्थः । वचने दुर्वाक्ये हि स्फुटं न दोषः । मद्यपवाक्ये हि विदुषामनास्थैवेत्येतद्धेतुकं[4] त्वदागमनं तदानुचितमित्यर्थः ॥

अवतीर्णम्[5] । प्रपुष्णन् । अगृणात् ॥ व्यवधानेपि । कारणम् । रिपूणाम् । कषण । अवृक्ण । इत्यत्र "रषृवर्णात्°" [६३] इत्यादिना णः ॥ रषृवर्णादिति किम् । वन ॥ एकपद इति किम् । अन्तर्नैर ॥ पद इत्येतावतैवैकपदे लब्ध एकग्रहणं नियमार्थम् । एकमेव यन्निमित्तं तत्र यथा स्यात् । यदेकं चानेकं च तत्र मा भूत् । नरनाथम् ॥ अनन्त्यस्येति किम् । पुष्णन् ॥ लादिवर्जनं किम् । अविरलेन । वर्जन । किरीटिनः । विकर्तन । कर्शन । रसेन ॥

द्रुणसम् । इत्यत्र "पूर्वपद°" [६४] इत्यादिना णः ॥ अग इति किम् । ऋगयन ॥

दुर्णसैः । इत्यत्र "नसस्य" [६५] इति णः ॥

---

१ सी गोष्ठ्या त° डी °गोष्ठी त°. २ ए सी डी किंचि°. ३ बी ता सु°. ४ बी °कं चेदा°. ५ ए सी डी °र्णं । प्र°.

निर्वणं । प्रवण । अग्रेवण । अन्तर्वण । खदिरवण । कार्ष्यवण । आम्रवण । शरवण । इक्षुवण । प्लक्षवण । पीयुक्षावण । इत्यत्र "निष्प्राग्रेन्तर्°" [६६] इत्यादिना णः ॥

ओषधि । माषवण माषवनम् । नीवारवेणे नीवारवन ॥ वृक्ष । शिग्रुवण शिग्रुवने । बदरीवण । बदरीवने इत्यत्र "द्वित्रिस्वर°" [६७] इत्यादिना वा णः ॥ द्वित्रिस्वरेति किम् । सुरदारुवनं ॥ ओषधिवृक्षेभ्य इति किम् । विदारीवन ॥ अनिरिकादिभ्य इति किम् । इरिकावनेषु ॥

गिरिणदी गिरिनद्याम् । इत्यत्र "गिरिनद्यादीनाम्" [६८] इति वा णः ॥

भाव । नीरपाणम् नीरपान । करणे । कषायपाण कषायपान । इत्यत्र "पानस्य°" [६९] इत्यादिना वा णः ॥

सुरापाणसुराष्ट्रकेषु । इत्यत्र "देशे" [७०] इति नित्यं णः ॥

इषुवाहणवीरवाहणाग्रण्युदधिर्जर्तग्रामणीः श्रितो नः ।
करिवाहनयुग्दुनोति वः किं दीर्घाह्न्याः शरदो यथापराह्णः ॥८॥

८. दीर्घाण्यहानि यस्यां तस्या दीर्घाह्न्याः शरदः शरत्कालस्यापराह्णोह्नोपरो भागोत्यन्तमुपतापकत्वेन यथा दुनोति तथा जर्तग्रामणीर्जर्तो देशविशेषस्तत्रत्या भटा वा तत्राधिपत्येन ग्रामणीः प्रधानो लक्षाख्यो नृपः किं वो युष्मान्दुनोति सदास्कन्दनैः पीडयति । तेन तवात्रागमः । यत इषूणां शराणां वाहणा(ना)नि शकटोष्ट्रादीनि वीराणां भटानां वाहणा(ना)नि वीरवाहणानि रथाश्वादीनि । द्वन्द्वे तेषामग्रणीानि उत्कृष्टानि तेषामनेकानामाश्रयत्वादुदधिरिवोदधिस्तथा करिणो यानि वाहनानि तैर्युनक्ति संबद्धीभवति यः सः । एतेन प्रधानचतुरङ्गसैन्यबाहुल्योक्तिः । तथा नोस्मान् श्रित आश्रितोस्मदायत्त इत्यर्थः । इदमुक्तं

१ए सी डी णः° । प्र°. २ सी °वन ।. ३ बी °स्वर इ°. ४ ए सी डी °न । ओष°. ५ बी णः । नी°. ६ ए सी डी °हनानि.

स्यादयमतिबलिष्ठोऽस्मदाश्रितश्चेत्यस्मत्पार्श्वादात्मना सह लक्षं मित्रं[2] कारयितुमिहागत इति । अस्याप्यागमकारणस्य परिहारानुक्तेर्यद्येतदर्थमिहागास्तदा युक्तमित्यनुमतिर्व्यज्यते ॥

क्षपयितुमरिविग्रहं न आगा नु चतुर्हायनकं त्रिहायनं वा ।
सोऽरिदुरहो द्विषां न योग्यः सुचतुर्हायणकत्रिहायणाश्वः ॥ ९ ॥

९. चतुर्हायनकं चतुर्वार्षिकं वा त्रिहायनं वा नोऽस्माकमरिविग्रहं शत्रुभिः सह विरोधं क्षपयितुं सख्येन शत्रूच्छेदाद्विनाशयितुम् । न्विति प्रश्ने । आगाः । परिहरति । स प्राह्णारिर्द्विषां न योग्यो जेतुमशक्य इत्यर्थः । यतः शुभलक्षणाद्युपेतत्वेन शोभनाश्चतुर्हायणका अज्ञाताश्चतुर्वार्षिकास्त्रिहायणाश्च[3] तरुणा इत्यर्थः । अश्वा यस्य सः । एतेन सैन्यसंपदुक्ता । तथारीणां विनाशकत्वाद्दुष्टमहररिदुरहः । अतिविक्रान्तश्चेत्यर्थः । तस्मादस्माकमरिविग्रहनिवृत्तये तवागमनं न युक्तमित्यर्थः ॥

ग्रामणीः । अग्रणि । इत्यत्र "ग्राम°" [७१] इत्यादिना णः ॥

इषुवाहण । वीरवाहण । इत्यत्र "वाह्याद्वाहनस्य" [७२] इति णः ॥ वाह्यादिति किम् । करि[4]वाहन ॥

अपराह्णः । इत्यत्र "अतोऽह्नस्य" [७३] इति णः ॥ अत इति किम् । दुरह्नः ॥ अह्न इत्यकारान्तनिर्देशादिह न स्यात् । दीर्घाह्नयाः ॥

चतुर्हायणक । त्रिहायण । इत्यत्र "चतुस्त्रेः°" [७४] इत्यादिना णः ॥ वयसीति किम् । चतुर्हायनकं त्रिहायनं वारिविग्रहम् ॥

---

१ डी योग्यो जेतु°.

---

१ प °तः श्चे°. २ सी मित्रका°. ३ सी डी °श्च तुरणा°. ४ सी °रिकाह° ५ बी °यणाश्वः । इ°.

अथ सागरवाहिणं जिगीषुर्नृपतिं कंचन गर्ववाहिनं त्वम् ।
क्षतरिपुवापेण तं स जिष्णुः शरवापेन न किं दिशः परीण्वन्॥१०॥

१०. अथेति प्रश्ने। सागरशब्देनात्र लक्षणया सागरकूलमुच्यते । तं वहति स्वामितया प्राप्नोतीत्येवंशीलो यस्तं वेलाकूलाधिपं गर्ववाहिनमहंकारिणं कंचन नृपतिं जिगीषुस्त्वमागाः । आगमकारणप्रश्नप्रस्तावात्पूर्ववृत्तादागा इति क्रियात्र संबध्यते । एवमग्रेतनवृत्तत्रयेपि । एतदपि परिहरति । स ग्राहारिस्तं नृपतिं किं न जिष्णुरपि तु साधु जयत्येव । कीदृक्सन् । क्षता विदारिता ये रिपवस्तान्भूमौ पातनेन वपतीव अणि क्षतरिपुवापस्तेन । यद्वा । क्षतो रिपुवापो लक्षणया शत्रुसन्तानो येन तेन शरवापेन[2] बाणसन्तानेन दिशः परीण्वन् व्याप्नुवन् । तव कथनेन ग्राहारिरेव निकटस्थः सुखेनैव तव शत्रुं जयेत्तस्मादेतज्जयाय तवागमनं न युक्तमित्यर्थः ॥

क्षत्रिययूनः परीन्वतः क्ष्मां दीर्घाह्यां शरदि त्वमस्य वोत्कः ।
परिपक्केनाद्य नः शुभेनाः परिपक्वानि फलानि तत्कृतानि ॥ ११ ॥

११. दीर्घाह्यां बृहद्दिनायां शरदि शरत्काले क्षत्रिययूनो विशेषणकर्मधारये क्षत्रियतरुणस्य क्ष्मां परीन्वतः स्वामित्वेन व्याप्नुवतोस्य ग्राहारेः । वेति प्रश्नान्तरे । किमुत्कः स्नेहेनोत्कण्ठितः सन्नागाः । दीर्घाह्यां शरदि निर्व्यापारस्य दिनेगच्छति ग्राहारेर्मित्रस्य[3] मिलनायोत्मनाः किमत्रागत इत्यर्थः । यद्येवं तर्हि । आ विस्मये । नोस्माकं परिपक्वेन परिपूर्णे निष्पन्नेन शुभेन पुण्यकर्मणा कृत्वा तत्कृतानि शुभनिष्पादितानि फलानि कार्याण्यद्य परिपक्वानि परिपूर्णे निष्पन्नानि । यदि मिलनाय तवागमनं तदातिश्रेयस्तममित्यर्थः ॥

---

१ सी °नावद्य. डी °नावाद्य.

---

१ बी °मन्ध्यते. २ ए सी डी °पेण वा°. ३ बी °स्य मेल°.

उत्तरपदान्त । सागरवाहिणम् गर्ववाहिनम् ॥ नागम । परीण्वन् परीन्वतः ॥ स्यादि । रिपुवापेण शरवापेन । इत्यत्र "वोत्तर" [७५] इत्यादिना वा णः ॥ अयुवपक्काह्न इति किम् । क्षत्रिययूनः । परिपक्कानि । परिपक्केन । दीर्घाह्नथाम् ॥

द्रष्टा[1] वृषगामिणं नु बिभ्रद्गुरुकामाणि बलानि सन्नृपाणि ।
तं वृत्रहणं सुराष्ट्रपाणां सन्नृमुखेण न हि व्यबोधयः किम् ॥१२॥

१२. वृषगामिणं वृषभवाहनं[1] सोमनाथं सन्नृपाणि विद्यमानराजकानि बलानि सैन्यानि बिभ्रद्धारयन्सन्नु किं[2] द्रष्टा आगाः[3] । नन्वहं चेत्सोमनाथदर्शनायागां तत्किमिति सन्नृपाणि बलान्यबिभरमित्याशङ्कयाह । यतो गुरुर्महान्कामो वृषगामिदर्शनाभिलाषो येषां तानि । सुराष्ट्रदेशे हि सोमनाथोस्ति । यद्येवं तर्हि सुराष्ट्रपाणां सुराष्ट्रदेशरक्षिणां नृपाणां वृत्रहणमिन्द्रं तं प्राहार्षि सन्नृमुखेण प्रधानपुरुषमुखेन हि स्फुटं किं न व्यबोधयः किमिति नाज्ञापयः । येनायं सौहार्दातिशयात्तवाभिगमनादिप्रतिपत्तिं कुर्यादित्यर्थः ॥

वरपक्केनेक्षुणा समं किं शङ्खोद्धारान्तर्णिनीषुरम्भः ।
प्रणमामि तव प्रयाणि तत्किं प्रहिणोमि स्म वनानि मा प्रमीणाः १३

१३. वरपक्केन वरेण सुस्वादुना पक्केन परिपूर्णं निष्पन्नेनेक्षुणेक्षुरसेन समं माधुर्यादिभिस्तुल्यं किं शङ्खोद्धारान्तः शङ्खोद्धाराख्यतीर्थमध्यादम्भो जलं निनीषुर्नेतुमिच्छुस्त्वमागाः । सुराष्ट्रेषु हि शङ्खोद्धाराख्यं तीर्थमस्ति । प्रश्नयन्नेवोत्तरमाह । किं तव प्रणमामि तथा किं प्रयाणि शङ्खोद्धारजलानयनार्थं गच्छामि । तथा तदम्भः किं प्रहिणोमि प्रेषयामि । वनानि काननानि मा स्म प्रमीणा मा विनाशय ॥

---

१ ए सी दृष्टा. डी द्रष्टा वृ°.

---

१ बी °षवा°. २ ए सी डी किं दृष्टा. ३ ए सी डी °गाः । अन्व°.
४ ए सी डी °न्यबिभर°.

तदेवं मैत्रीगर्भेषु बहुष्वप्यागमकारणेषूक्तेष्वमन्यमान इव राज्ञि किंचिदप्रतिवदत्यन्यकारणाभावान्निरर्थकं बलभ्रमणं न युक्तमिति वदति ।

प्रहयानि बलान्यदुर्नयस्त्वं न मुधैव भ्रमयेः प्रनायकानि ।
परिणश्यति जीवितेपि मैत्री नान्तर्णश्यति नोप्रनष्टपूर्वा ॥ १४ ॥

१४. हे राजन् प्रहयानि प्रकृष्टाश्वानि प्रनायकानि प्रकृष्टस्वामिकानि च बलानि मुधैव पूर्वोक्तनीत्या कारणाभावेन निरर्थकं न भ्रमयेः । नो मार्थे[1] । नाचीचलः । यतस्त्वमदुर्नयो न्यायीत्यर्थः । न चास्माञ्शत्रुतयाशङ्क्यैवं[2] सैन्यसंरम्भेणागमनं सार्थकं यतोप्रनष्टपूर्वा पूर्वमनपगता नो युष्माकमस्माकं च । "त्यदादिः" [३. १. १२०] इत्यसच्छेषः[3] । मैत्री जीविते परिणश्यत्यपि नान्तर्मध्ये हृदये नश्यति । येयन्ति दिनानि न गता साद्यापि मैत्री कथंचन नापयातीत्यर्थः ॥

कवर्गे । वृषगामिणम् । गुरुकामाणि । नृमुखेण ॥ एकस्वर । वृत्रहणम् । सवृपाणि । सुराष्ट्रपाणाम् । इत्यत्र "कवर्ग°" [७६] इत्यादिना नित्यं णः ॥ अपक्कस्येत्येव । वरपक्केन ॥

ण । प्रणमामि ॥ अन्तर् । अन्तर्णिनीषुः ॥ हिनु । प्रहिणोमि ॥ मीना । मा प्रमीणाः ॥ आनि । प्रयाणि । इत्यत्र "अदुरुपसर्ग°" [७७] इत्यादिना णः ॥ आनीत्यर्थवत[4] एव ग्रहणादनर्थकस्य न भवति । प्रहयानि । अदुरिति किम् । अदुर्नयः ॥ येन धातुना युक्ताः प्रादयस्तमेव प्रत्युपसर्गसंज्ञा भवन्तीतीह न भवति । प्रनायकानि ॥

परिणश्यति । अन्तर्णश्यति[6] । अत्र "नशः शः" [७८] इति णः ॥ शः इति किम् । अप्रनष्टं[7] ॥

---

१ बी °र्थे । माची°. २ सी °शक्यैवं. ३ बी षः । मेत्री. ४ बी °र्थ ए°. ५ बी °काः प्रदाय°. ६ ए सी डी °तिर्नशः. ७ बी °नष्टः ॥

तदेवं सामोक्त्यात्यन्तसौहार्दे ख्यापितेपि राज्ञः किमप्यप्रतिवदतो दौहार्दं प्रकटयन्नेवमागमनकारणं पृच्छति ॥

परिणिमिमीते दिशः स सैन्यैः प्रणिमयते प्रणिदायकेथ भीतान् ।
प्रणिदयतेरीन्प्रणिघ्नतीति प्रणिधिगिरा प्रणिपद्यसे किमीर्ष्याम् १५

१५. स प्राहारिः सैन्यैर्दिशः परिणिमिमीते परिमात्यतिबाहुल्याद्व्याप्नोतीत्यर्थः । तथा प्रणिदायके मैत्र्यादिना गजाश्वधनादिढौकनं स्थापनिकां वा ददति पुंसि[२] प्रणिमयते प्रतिददाति न्यायित्वान्नगृहीत्वा तिष्ठतीत्यर्थः । अथ तथा भीतान् शरणागतान्प्रणिदयते रक्षति । तथारीन्प्रणिघ्नाति खण्डयतीत्येवंविधया प्रणिधिगिरा चरवाचा किमीर्ष्यां प्राहारेः सैन्यादिसंपत्तौ न्यायादिगुणसंपत्तौ[३] च चेतसो व्यारोषं प्रणिपद्यसे आश्रयसि । परसंपत्त्यसहा हि प्रायः क्षत्रियास्तेनैतं विग्रहीतुं तवेत्थमत्रागमनमित्यर्थः ॥

अथ कालप्राप्तया सामदण्डगर्भोक्त्येदमप्ययुक्तमित्याह ।

प्रणिधयति यशो द्विषां प्रणिघ्नन्प्रणिवपति प्रणिपातिषु श्रियं[१] यः ।
प्रणिगदति नयं तदत्र मैत्रीं प्रणिनादीभघटे स्म मा प्रणिश्यः १६

१६. यो प्राहारिर्द्विषां प्रणिघ्नन् शत्रून् हिंसन्सन् द्विषामेव यशः प्रणिधयति पिबत्यपहरति । तथा प्रणिपातिषु नम्रेषु श्रियं राज्यादिसंपदं यः प्रणिवपति निवेशयति । एतेन निग्रहानुग्रहसामर्थ्यमुक्तम् । तथा यो नयं न्यायं च प्रणिगदति प्रकर्षेण वक्ति । तदत्र सं चासावेष च तदेष तस्मिन्नेतस्मिन् प्राहारौ प्रणिनादिनी गर्जन्तीभघटा यस्य तस्मिन्मैत्रीं

१ स्री भियः ।

१ बी °भक्ता°. २ डी °सि म°. ३ डी °त्तौ वा चे°. ४ बी सचैष.

मास्म प्रणिष्यो मा स्म विनीनशः । ईर्ष्यां मा कृथा इत्यर्थः । एतेन ग्राहारिसंबान्धिषूक्तेषु गुणेष्वेकगुणोपेतमपि मित्रं दुर्लभं किं पुनरुक्तसर्वगुणोपेतम् । यदुक्तम् ।

पराक्रमगुणेनैकं सदा[1] चाश्रितपोषकम्[2] ।
सन्न्यायं संपदोपेतं[3] मित्रं पुण्यैरवाप्यते ॥ इति ।

एवंविधेन चानेन चेद्विग्रहं करिष्यसि तदा त्वमेव[4] विनङ्क्ष्यसीत्यपि च व्यञ्जितम् ॥

अथेर्ष्याजन्यभूम्युपद्रवमपि सामदण्डगर्भोक्त्याविधेयं वदन्मैत्रीमेव विधेयतया सूचयन्नाह ।

प्रणिशान्तरिपाविहाप्रणिद्रे प्रणिवहति प्रणिचायि सख्यमुच्चैः ।
प्रणिवात्प्रणिदिग्धसैन्यरेणुः[1] प्रणियास्यस्य[2] किमुर्वरां प्रणिप्सान् १७

१७. इह ग्राहारौ प्रणिचीयते स्वयमेवेत्येवंशीलं प्रणिचाय्युपचितं सख्यं प्रस्तावात्त्वद्विषयमुच्चैरत्यर्थं[5] प्रणिवहति धारयति सत्यस्य ग्राहारेरुर्वरां सर्वसस्याढ्यभूमिं किं किमिति प्रणियासि गच्छसि । कीदृक्सन् । प्रणिप्सान्भक्षयन् । तथा प्रणिवातुड्डीयमानः प्रणिदिग्ध उपचितः सैन्यरेणुर्यस्य सः । प्रभूतसैन्यैर्विनाशयन्नित्यर्थः । कीदृशीह । अप्रणिद्रे सोद्यमेत एव प्रणिशान्तरिपौ वशीभूतशत्रौ । शक्तस्य स्निग्धस्य च मित्रस्योर्वरोपद्रोतुं नोचितेत्यर्थः । अथ च । इह ग्राहारौ प्रणिशान्ते पराभूत्या गतदर्पे रिपौ विषये[6] न तु त्वत्सदृशे दर्पोद्धुरे प्रणिचायि सख्यं प्रणिवहति सत्यस्योर्वरां त्वं प्रणिप्सान्सन्किं प्रणियासि

---

१ बी डी °वान्प्रणि°. २ ए सी °यास्यि कि°.

---

१ ए सी °दा वा श्रि°. २ डी °श्रित पो°. ३ डी °दोपतं मि°. ४ सी °मेवं वि°. ५ सी °चैरित°. ६ सी °ये तनुत्व°.

पश्चाद्रमिष्यसि । अत्रैव त्वं विनङ्क्ष्यसीत्यर्थः । तस्मादुर्वराया अविनाशनेन मैत्रीं कुर्वित्यर्थः ॥

अथैवं भक्तिशक्त्युपदर्शनेन[1] मैत्र्यां विधेयतयोक्तायामपि राज्ञि किमप्यवदत्यवाच्यं छलं संभाव्य पृच्छंस्तदुचितदण्डोक्त्योत्तरयंश्चाह ।

अथ दुर्निगदं छलं त्वमन्तर्ण्यदधास्तत्प्रणिजल्पितेन किं नः ।
मा प्रनिजल्पाधुना कृतान्तः प्रनिकुर्वन्[1]प्रनिखेलतु प्रनिद्विट् ॥१८॥

१८. अथेति प्रश्ने । दुर्निगदं पापत्वाद्[2]दुःखेन वाच्यं छलमतिप्रच्छन्नास्कन्दनादिकूटप्रयोगं त्वमन्तश्चित्ते न्यदधा निहितवांस्तत्तदा नोस्माकं प्रणिजल्पितेन पूर्वोक्तेन किम् । निरर्थकत्वान्न किंचिदित्यर्थः । तथा मा प्रनिजल्प त्वमपि मा वादीस्त्वत्प्रतिवचनेनापि सृतमित्यर्थः । केवलं हे प्रनिद्विट्[3] प्रकृष्टनिश्चितशत्रोधुना प्रनिकुर्वन् रणेन मृत्युरूपं शाठ्यं कुर्वन्कृतान्तो यमः प्रनिखेलतु[4] प्रक्रीडत्वर्थात्त्वया सह । आशिषि पञ्चमी । त्वं प्राहारिणा व्यापाद्यस्वेत्यर्थः ॥

तदेवं दण्डमुक्त्वा राज्ञश्छलं[5] प्राहारेर्ज्ञापयितुं स्वयानमाह ।

प्रनिचिखनिषता त्वयास्मदाख्यां प्रनिचक्रे[2] प्रणिपापचत्प्रकोपम् ।
तदलं प्रनिपापचन्मनास्त्वत्प्रणिदिष्टं[3] प्रनिदेष्टुमेष[4] यामि ॥ १९ ॥

१९. यस्मादस्मदाख्यामस्मत्कीर्तिं प्रनिचिखनिषतैवमास्कन्दनेन[6] खनितुमिच्छता त्वया प्रणिपापचदत्यर्थसंतापकः प्रकोपः प्रबलक्रोधो यत्र तद्यथा स्यादेवं प्रनिचक्रे पराभूतम् । अस्माकं पराभवः कृत

१ ए सी डी °न्प्रतिखे°. २ डी प्रतिच°. ३ ए सी डी °त्प्रतिदि°. ४ सी डी प्रतिदे°.

१ सी °र्शमेन. २ बी °परूपत्वा°. ३ सी प्रतिद्वि°. ४ बी प्रतिखे°. ५ ए सी डी °श्शस्थलं°. ६ ए सी °नेख°. ७ डी °प्रतिच°.

इत्यर्थः । ततस्तस्मादलमत्यर्थं त्वत्प्रणिदिष्टं प्रत्युत्तरादानात्त्वया ज्ञापितमन्तश्छलेप्रकरणं प्रै[3]निदेष्टुं प्राहारेर्ज्ञापयितुमेषोहं यामि । "सत्सामीप्ये सद्वद्वा" [५. ४. १.] इति वर्तमाना । अधुनैवाहं यास्यामीत्यर्थः । कीदृक्सन् । अभीक्ष्णं प्रणिपच्यासि त्वं मदीयं मनः स त्वमेवं विवक्षसे नाहं प्रणिपापच्ये किं तु स्वयमेव प्राणिपापच्यत् । अत्र यङ्लुबन्तस्य धात्वन्तरत्वाद् "एकधातौ॰" [३. ४. १७.] इत्यादिना कर्मकर्तर्यात्मनेपदाद्यभावः । स्वयमभीक्ष्णं सन्ताप्यमानं मनो यस्य सः ॥

ङकारोपलक्षितो माङ् मा । तेन मोंङोर्ग्रहणम्[4] । परिणिमिमीते । प्रणिमयते । दासंज्ञ । प्रणिदायके । ददातेर्दयतेर्वा रूपम् ॥ प्रणिदयते । प्रणि[5]धति । प्रणिधि । प्रणिधयति ॥ पतादि । प्रणिपातितु । प्रणिपद्यसे । प्रणिमादि । प्रणिगदति । प्रणिवपति । प्रणिवहति । प्रणिशाम्त । प्रणि[6]चायि । प्रणियासि । प्रणिवा[7]त् । अप्रणिद्रे । प्रणिप्सान् । मा स्म प्रणिज्यः । प्रणिघ्नन् । प्रणिदिग्ध । अन्तरः शब्दस्यापि । अन्तर्णयदधाः । इत्यत्र "नेर्मादा॰"[७९] इत्यादिना नेर्णः ॥ अडागमस्य धात्ववयवत्वेन व्यवधायकत्वाभावादन्तर्ण्यदधा इत्यादावपि स्यात् ॥ अदुरित्येव । दुर्निगदम् ॥

प्रणिजल्पितेन प्रनिजल्प । प्रणिपापचत् प्रनिपापचन् । इत्यत्र "अकखादि॰" [८०] इत्यादिना वा णः ॥ अकखादीति किम् । प्र[9]निकुर्वन् । प्र[10]निखेलतु ॥ अषान्त इति किम् । प्रनिपिष्ट् ॥ पाठ इति किम् । इह च प्रतिषेधो यथा स्यात् । प्रनिचके । प्रनिचिक्षनिषता ॥ इह च मा भूत् । प्रणिदिष्ट्
प्र[11]निदेष्टुम् ॥ यङ्लुपि नेच्छन्त्येके । तन्मते प्रनिपापचदित्याद्येव स्यात् ॥

---

१ ए सी डी °न्तलक°. २ बी °लक°. ३ डी प्रतिदे°. ४ सी माङोर्प्र°. ५ डी °णिधि°. ६ सी °णिचा°. ७ बी डी °वान् । अ°. ८ ए बी °न "नेर्मा°. ९ सी डी प्रतिकु°. १० सी डी प्रतिखे°. ११ सी प्रणिदे°. डी प्रतिदे°.

अथैवं दूतस्य निर्भीकतया[1] स्वभर्तृपक्षपोषिकया सप्राणयोक्त्या चित्ते रञ्जितो राजा दूतं प्रशंसन्नाह ।

अप्राणिणिषाविहेतिवादिन्युत्प्राणं पर्यण्पराणु पर्यन् ।
पर्यणतां पर्यनन्नसीत्थं तं पर्याणिणदित्युवाच चेशः ॥ २० ॥

२०. इह दूतेप्राणिणिषौ जीवितुमनिच्छौ शूरत्वान्मृत्युभयरहित इत्यर्थः । अत एवोत्प्राणमुद्धतबलं यथा स्यादेवमिति वादिनि पूर्वोक्त-[2]वदनशीले सतीशो मूलराजस्तं दूतं पर्याणिणदुदजीजिवत् । जीवन्तमुवाचेत्यर्थः । कथमित्याह । उ हे पर्यन् पूर्वोक्तवादित्वेन हे समन्ताज्जीवंस्तथा हे पर्यण्पराणु[3] पर्यणतां समन्ताज्जीवतामपि मध्ये पराणातिशयेन जीवन्दूत पर्यणतां[4] समन्ताज्जीवतां मध्ये पर्यनन्नसि त्वमेव जीवन्भवसि । ममाप्यग्र एवं वदतस्तवैव जीवनं सफलमित्यर्थः । इत्थम् । तथेति वक्ष्यमाणमुवाच । इह च पर्यन्नित्यनेन सामान्यतो जीवद्गुणविशिष्टं पर्यण्पराणित्यनेन च विशिष्टजीवद्गुणविशिष्टं दूतं संबोध्य पर्यणतां[6] पर्यनन्नसीत्यनेन जीवद्गुणविशिष्टेषु त्वमेव जीवद्गुणविशिष्ट इति विधेयतयोक्तः ॥

इत्युवाचेत्युक्तं तदेव वृत्तविंशत्या विवक्षुः पूर्वं त्रिवृत्त्या दूतस्य निर्भयवादित्वं प्रशंसन्नाह ।

प्राणिणिनिष आत्मभर्तृपक्षं त्वं पर्यानिन आत्मनो नियोगम् ।
भूपरिहणनैर्ब्रुवन्निहाशङ्केतान्तर्हणनं हि दुर्हनोपि[3] ॥ २१ ॥

२१. इह मत्सभायां भूपरिहणनैर्भूम्यास्फालनैर्ब्रुवन् निःशङ्कं ब्रु-

१ प बी सी च वेशः ॥ २ डी °हान्तर्हणनं ह्याशङ्केत दु°. ३ डी °पि ॥ भूप°.

१ प सी भींतकया. बी °भींकया. २ सी °कवादि°. ३ बी °ण् पर्यन् प°. ४ °तां जीव°. ५ सी °वन्म°. ६ सी °र्यनतां.

वाणः सन्नित्यर्थः । त्वमात्मभर्तृपक्षं प्राणिणिनिष उदजीवयः सातिशयं व्यकर्थेत्यर्थः । तथात्मनो नियोगं दूतकर्म पर्योनिन उज्जीवितवान् । ननु यद्यहं भूपरिहणनैरुक्तवानेतावता कः स्वामिपक्षः को वात्मनो नियोगो मयोज्जीवित इति हेतुमाह । हि यस्मादिह सभायां भूपरिहणनैर्भुवन्दुःखेन हन्यते दुर्हनोप्यास्तां त्वादृशो दूतादिः । समर्थो महाभटादिरप्यन्तर्हणनं स्वचित्ते विनाशमाशङ्केत संभावयेत् । भूपरिहणनैर्भुवमिहेत्युभयत्रापि योज्यम् ॥

द्वित्वे । अप्राणिणिषौ ॥ अद्वित्वे । उत्प्राणम् ॥ अन्ते । पराण् ॥ परेस्तु वा द्वित्वे । पर्योणिणत् पर्योनिनः ॥ अद्वित्वे । पर्यणताम् पर्यनन् ॥ अन्ते । पर्यण् पर्यन् । इत्यत्र "द्वित्वेपि°" [८१] इत्यादिना णः । परिपूर्वस्य तु वा ॥ ये तु द्वित्वे कृते पुनर्द्वित्वमिच्छन्ति तन्मतेपि द्वित्व इति वचनाद्वयोरेवाद्ययोर्णत्वं न तृतीयस्य । प्राणिणिषयतेर्के प्राणिणिनिषः ॥

परिहणनैः । अन्तर्हणनम् । इत्यत्र "हनः" [८२] इति णः ॥ अदुरित्येव । दुर्हनः ॥

प्रहण्मितरां प्रहन्मि चान्तर्हण्मोन्तर्हन्मो भृशं प्रहण्वः ।
परिहन्व इति क्रुधा जिघांसौ नृपचक्रेत्र वदन्सुसौष्ठवोसि ॥ २२ ॥

२२. अत्र मत्सभायां वदन्संस्त्वं शोभनं सौष्ठवं प्रौढिमा यस्य स सुसौष्ठवोतिप्रगल्भोसि । क । सति नृपचक्रे । किंभूते । क्रुधा त्वां जिघांसौ । कथमित्याह । अहं[2] प्रहन्मि[3] प्रहिनस्मि अर्थादेतं[4][5] दूतम् । तथा प्रहण्मितरामतिशयेनाहं प्रहिनस्मि । तथान्तर्हण्मो मध्ये हिंस्मः ।

१ ए सी °हंन्मोन्त°.

१ सी य स°. २ बी °हं परिहण्मि प्र°. ३ ए सी °हण्मि प्र°. ४ बी °देनं दू°. ५ डी °तं तथा.

तथा वयं भृशं शीघ्रमन्तर्हन्मः । तथावां प्रहण्वस्तथावां परिहन्वः सामस्त्येन हिंस्व इति ॥

प्रहण्वः परिहन्वः । प्रहण्मितरां प्रहन्मि । अन्तर्हण्मः अन्तर्हन्मः । इत्यत्र "वमि वा" [८२] इति वा णः ॥

प्रभुकार्यमिति स्फुटं प्रणिक्षंस्त्वमिव भयापरिनिक्षितो वदेत्कः ।
मदिरापरिणिंसनप्रणिन्द्येष्वपरानिंसितपूर्वमप्रनिन्द्यम् ॥ २३ ॥

२३. भयापरिनिक्षितो भयेन[1] नाश्लिष्टः प्रभुकार्यं[2] प्रणिक्षंश्चुम्बन्निव सपक्षपातं स्थापयन्सन्नित्यर्थः। त्वमिव को दूत इत्युक्तप्रकारेण प्रभुकार्यं स्फुटं प्रकटं वदेत्त्वां मुक्त्वा[3] न कोप्येवं वक्तुं शक्त इत्यर्थः । नन्वेवंभाषिणः सुराष्ट्रेष्वनेके दूताः सन्ति तत्किमेवं राज्ञोच्यत इत्याशङ्क्याह । मदिराया यत्प्राणिंसनमास्वादनं तेन प्रणिन्द्येषु[4] गर्हणीयेष्वर्थात्सौराष्ट्रेषु मध्येप्रनिन्द्यं स्फुटत्वेन श्लाघ्यं वचनमपरानिंसितपूर्वं[5] न चुम्बितमनुक्तपूर्वमित्यर्थः । मद्यपेषु सौराष्ट्रेष्वित्थं स्फुटं त्वयैवोक्तमित्यर्थः ॥

परिणिंसन परानिंसित । प्रणिक्षन् परिनिक्षितः । प्रणिन्द्येषु प्रनिन्द्यम् । इत्यत्र[6] "निंसनिक्ष°" [८४] इत्यादिना वा णः ॥

परिहीणमतिः प्रहीणवान्स्वं परियाणीयमिनः[1] प्रयायमाणः ।
न स वेत्ति तव प्रयायिणां नः परियाणे परिवक्तिं[2] चाप्रयाणिम् ॥

२४. अहो दूत स तवेनः स्वामी ग्राहारिः परिहीणमतिः प्रनष्टज्ञानोत एव स्वमात्मानं प्रहीणवांस्त्यक्तवाननेककुकर्मकरणेन त्यक्तस्वमर्याद इत्यर्थः । अत एव च प्रयायमाणोस्माभिरास्कन्द्यमानः सन् स्वमा-

१ प सी °रि आणी°. २ सी °क्ति वाप्र°.

१ बी डी °येनाना°. २ सी °कार्ये प्र°. ३ प सी मुक्ता न. ४ प सी प्रनिन्द्ये°. ५ बी °रानिसि°. ६ बी °त्र निस°.

त्मानं परियाणीयमस्माभिरास्कन्दनीयं न वेत्ति न जानात्यपि तु स्वकृतै-र्महापन्यायैर्हेतुभिः[1] स स्वं परियाणीयं जानात्येवेति काका व्याख्या । अथ च प्रयायिणां प्रयाणं कुर्वतां नोस्माकम् । कर्तरि षष्ठी । परियाणे प्रयाणे विषयेप्रयाणिं परिवक्ति च प्रयाणं मा भूदिति शापं ब्रूते च । एवमने-कान्महापन्यायान् ग्राहारिश्चक्रेन्यथास्मानभिषेणयतो निषेधेदीत्यर्थः । एतेन रसेनाविरलेनागमकारणं बुभुत्सुरिति यद्दूतेनोक्तं तन्निरस्तम् ॥

अथ सामोक्तिगर्भं सामदण्डोक्तिगर्भं च यद्दूतेन मैत्र्येव कार्य-तयोक्ता तामेकादशभिर्वृत्तैरनेकापन्यायरूपापराधप्रकाशनेन निराकु-र्वन् ग्राहारेर्निग्रहणीयतामेव समर्थयति ।

परिभुग्नप्रेक्ष्माणचापो यत्तीर्थाभिप्रेक्षिणां स पापः ।
प्रेक्षणमरुणत्प्रमङ्गनैस्तच्छासितुमेष प्रेक्षणीय एव ॥ २५ ॥

२५. स ग्राहारिस्तीर्थाभिप्रेक्षिणां तीर्थयायिनां यात्रिकाणां प्रेक्षणं तीर्थेषु गमनं यद्यस्माद्धेतोररुणन्निरुरोध । कीदृक्सन् । पापः पापात्मा । तथा परिभुग्नप्रेक्ष्माणचापः कुटिलोल्लसद्धन्वा तत्तस्मात्प्रमङ्गनैः प्रयाणैः कृत्वा शासितुं शिक्षयितुमेव ग्राहारिः प्रेक्षणीय एवास्कन्दनीय एव न तु मित्रीकार्य इत्यर्थः । प्रेक्ष्माणेत्यत्र शीले शानः ॥

परिहीणे । प्रहीणवान् । परियाणे । प्रयायमाणः । प्रयायिणाम् । अप्रयाणिम् । परियाणीयम्[10] । इत्यत्र "स्वरात्" [८५] इति णः ॥ स्वरादिति किम् । परिभुग्नं[11] ॥

प्रेक्षणम् । प्रेक्ष्माणेन[12] । प्रेक्षिणाम् । प्रेक्षणीयः । इत्यत्र "नाम्यादेरेव ने" [८६] इति णः । नाम्यादेरित्येव । प्रमङ्गनैः ॥

---

१ सी °भिः संस्वं. २ ए सी डी °का वाख्या ।. ३ ए सी °रि माणे. ४ बी सी एकम°. ५ डी °धयती°. ६ सी न मिव स°. ७ ए निरांकु°. ८ सी °क्षिणा ती°. ९ डी °णवा°. १० ए सी °रिआणी°. ११ ए सी डी °ग्नः । प्रे°. १२ ए सी °माणे । प्रे°.

परिकोपणमप्रकोपनोऽथांहःप्रवपणदुष्प्रेहणं सहे चेत् ।
अवनिरवश्यं प्रगोपणीया कथमिव तर्हि मया प्रगोपनीया ॥२६॥

२६. अथेति दूतप्रश्ने[1] । दूत पृच्छामि त्वां चेद्यद्यहमप्रकोपनः क्षमाशीलः संस्तं प्राहारिं सहे न निगृह्णामीत्यर्थः । कीदृशं सन्तम् । परिकोपणं[2] धार्मिकमप्यसहिष्णुं[3] तथांहसः पापस्य वञ्चनादेः प्रवपति नैम्द्यायने[4] प्रोप्यतेनेनेति करणेनटि वा प्रवपण उत्पादक इत्यर्थः । यो दुष्प्रेहणो दुष्टचेष्टो दुष्टाभिप्रायो[5] वा तम् । तर्हि तदावश्यं प्रगोपणीया पृथ्वीपत्वेन रक्षणीयावनिः पृथ्वी कथमिव । इवशब्दो वाक्यालंकारे । केन प्रकारेण मया प्रगोपनीया रक्षणीया । न कथमपि । तस्मान्न सह इत्यर्थः । अत्र च प्रगोपणीयेत्यस्यानुवाद्यत्वेन प्रयोगः । प्रगोपनीयेत्यस्य तु विधेयत्वेन ॥

परिकोपणम् अप्रकोपनः । प्रगोपणीया[6] प्रगोपनीया । इत्यत्र "व्यञ्जनादेः०" [८७] इत्यादिना वा णः ॥ व्यञ्जनादेरिति किम् । दुष्प्रेहणम् । नाम्युपान्त्यादिति किम्[7] । प्रवपण ॥

परिमापणमाः प्रयापणीयः परिमापनपरियापनीयविप्रः ।
सत्पथपरिमापिणां नृपेणानिर्विण्णं परिमापिना हि भाव्यम् ॥२७॥

२७. मींग्श हिंसायामिति मींग्शो हिंसार्थत्वाद्गत्यर्थाश्चेति चुरादिपाठाद् "चुरादिभ्यो णिच्" [३.४.८५.] इति णिचि "मिग्मीगोऽखलचलि" [४.२.८] इत्यात्वे पावनटि च परिमापनं हिंसां परियापनीयाः प्रापणीया विप्रा येन स प्राहारिः । आ इति कोपे । परिमापणं हिंसां प्रयापणीयः प्रापणीयो मया न[10] तु मित्रीकार्य इत्यर्थः । हि यस्माद्धेतोर्नृपेण राज्ञा

---

१ प सी °नोथाहप्र°.

---

१ बी °श्ने । हे दू°. २ प बी सी °पनं. ३ बी °र्मिकानप्य°. ४ डी नन्याद्य°. ५ सी °भियो°. ६ प सी डी °णीयाः प्र°. ७ प सी किम् ॥ परि°. ८ प सी °खलचलि". ९ प सी °पणार्हं°. १० प ननु मि०.

सत्पथपरिमापिणां धर्मोच्छेदकानामन्यायिनाम् । कर्मणि षष्ठी। अनिर्विण्णमनिर्वेदं यथा स्यादेवं परिमापिना[1] हिंसनशीलेन भाव्यम् । राजरक्षितानि हि तपोवनानि स्युः ॥

निर्विण्णवदप्रवेपमानाप्रप्यानाप्रख्यानमप्रभानम् ।
अमुना परिभूयमानमुच्चैः कतमद्ब्रह्मपुरं दुनोति नास्मान् ॥ २८ ॥

२८. कतमद्ब्रह्मपुरं ब्राह्मणस्थानमस्मानुच्चैर्न दुनोति न पीडयति[2] । कीदृक्सत् । अमुना ग्राहारिणा परिभूयमानमत एवाप्रवेपमानं भयेन समन्तात्कम्पमानम् । तथाप्रप्यानमनुपचितं क्षीणमित्यर्थः । अत एवाविद्यमानं प्रख्यानं प्रसिद्धिर्यस्य तन्निर्नामकमित्यर्थः । ततो विशेषणकर्मधारयः । अत एव निर्विण्णवद्धर्मकर्मसु निर्विण्णमत एव चाविद्यमानं प्रभानं[3] प्रभा यस्य तन्निस्तेजस्कम् । तस्मात्कानेर्न[4] सह मैत्रीति[5] भावः । यदपि ब्रह्मपुरं ज्ञानाधारः शरीरं तदपि पापै रोगादिना वा परिभूयमानमत एवाप्रवेपमानाप्रप्यानाप्रख्यानं निर्विण्णवदप्रभानं च सत्कतमन्न दुनोति किं तु सर्वमपि ज्ञानोच्छेदशङ्कया दुःखयतीत्युक्तिः ॥

अप्रपवनमस्य चान्यदारप्रगमनदुष्परिकामिनः कुकर्म ।
प्रभवति परिभाव्यमानमप्रख्यापनमप्रप्यायनं भृशं नः ॥ २९ ॥

२९. कुकर्म परस्त्रीगमनादि । अस्य ग्राहारेरन्यदारप्रगमनदुष्परिकामिनः परस्त्रीसेवनविषयदुष्टाभिलाषशीलस्य सत्[6] प्रभवतीष्टे । कीदृशम् । अप्रपवनमिहलोकपरलोकविरुद्धत्वेनापवित्रमत एव भृशमत्यर्थं परिभाव्यमानमस्माभिश्चिन्त्यमानं सन्नः । कर्तरि षष्ठी । अस्माभिरप्रख्यापनमप्रप्यायनं[7] च । चो भिन्नक्रमेत्र योज्यः । प्रख्यातेः प्रप्या-

१ ए सी डी °मत्र प्र°.

१ ए बी सी डी °पिणा हिं°. २ बी °ति । अ°. ३ सी °माय°. ४ बी °न मै°. ५ ए सी °त्रीरिति. ६ ए सी डी °त ईष्टे प्रभवति । की°. ७ सी डी °यन च चो°.

येश्च णिगि भावेनटि नञा बहुव्रीहिः । लोकमध्ये प्रकाश्यमेतत्कारकनिग्रहेणावर्धनीयं चेत्यर्थः । कुकर्मायत्तोयं तदनेन सह का मे मैत्रीत्यर्थः ॥

अमुना परिवेपनेन भग्नः परिपावनपरिभापनः प्रभासः ।
दुष्प्रख्याणप्रकामनेनान्तर्हननत्वं सुप्रगम्यमानः ॥ ३० ॥

३०. परिपावनः पापमलापनेतृत्वात्पावित्र्यहेतुर्यः परिभापनो लक्ष्म्यादिसंपादनेन शोभापादनहेतुः स प्रभासस्तीर्थममुना ग्राहारिणा भग्नः । यतोन्तर्हननत्वमन्तर्हन्यतेस्मिन्नित्यन्तर्हननो देशो यत्र मध्यभागे लोको हन्यते तद्भावं[1] मध्यभागे लोकघातमित्यर्थः । सुप्रगम्यमानः प्राप्यमाणः । कीदृशेन सता । दुष्प्रख्याणे दुष्टख्यातौ प्रकामनमभिलाषो यस्य तेनात एव परिवेप्यते जगद्येन तेन[2] परिवेपनेन प्रच्छन्नधाटीप्रदानादिनाखिललोककम्पकेन । मध्येलोकं घ्नता प्रभासदेशोमुनोपद्रुतोतोमुना सहालं[3] मैत्र्येत्यर्थः ॥

अन्तरयनतां जहौ सुराष्ट्रा येनान्तरयणवारिणा जनानाम् ।
सोन्तर्हणनात्कथं मुपेक्ष्यः सर्पिष्पानप्रावनद्धपिण्डः ॥ ३१ ॥

३१. जनानामन्तरयणं मध्ये गमनं प्रच्छन्नधाटीप्रदानादिना वारयतीत्येवंशीलो यस्तेनान्तरयणवारिणा[4] सता येन कृत्वा सुराष्ट्रादेशोन्तरयनतामन्तर्मध्ये[5] सुस्थत्वेनाय्यते गम्यते यस्यां[6] सान्तरयनी तद्भावं जहौ तत्याज । येन कृत्वा दुर्गमाभूदित्यर्थः । स ग्राहारिः सर्पिष्पानेन प्रावनद्धं पीनं पिण्डमङ्गं यस्य सोतिबलिष्ठ इत्यर्थः । हि स्फुटमन्तर्हणनात्सुराष्ट्रामध्ये वधात्सकाशात्कथमुपेक्ष्यो मोच्यः सुराष्ट्रामध्ये वध्य एवेत्यर्थः ॥

---

१ बी °द्भावम°. २ डी °न प्र°. ३ ए सी मैत्रेल°. ४ ए सी डी °यनवा°. ५ बी °ध्ये स्वस्थ°. ६ ए सी °स्यां सांरतय°.

प्राणद्धाञ्छुष्कगोमयेण मग्नन्यो नरिनर्ति यायजूकान् ।
तस्य नरीनृत्यमानखड्गस्याक्षुभन्मनसः किमन्यदागः ॥ ३२ ॥

३२. यायजूकानृत्विजः प्रणिघ्नन्सन्यो ग्राहारि[1]र्नरिनर्ति संतोषेणाभीक्ष्णं नृत्यति । कीदृशान्सतः । शुष्कगोमयेणाग्नौ हवनार्थं[2] गृहीतेन करीषेण प्राणद्धान् । एतेन साक्षाद्यागकारितोक्तिः । क्रियमाणे हि यागे वैवस्वतं कालमुद्दिश्य कारीषहोमः क्रियते । तस्य ग्राहारेरक्षुभन्मनसो निर्भीकस्यात एव नरीनृत्यमानखड्गस्य यायजूकवधाय पोस्फूर्यमाणासेः किमन्यदागोपराधः । इदमेव महदाग इत्यर्थः ॥

परिमार्पणम्[3] परिमार्पन । परिमापिणाम् परिमापिना । प्रयापणीयः परियापनीये[4] । इत्यत्र "णेर्वा"[5] [८८] इति वा णः ॥

निर्विण्णम् । अत्र "निर्विण्णः" [८९] इति णत्वं निपात्यते ॥ कश्चित्तु निर्विण्णवदिति नेच्छति ॥

अप्रख्यानम् । अप्रपवनम् । परिभूयमानम् । अप्रभानम् । दुष्परिकामिनः । प्रगमन । अप्रप्यार्न । अप्रवेपमान ॥ ण्यन्तेभ्योपि । अप्रख्यापनम् । परिपावेन[6] । परिभाव्यमानम् । परिभापनः । प्रकामनेन । सुप्रगम्यमानः । अप्रप्यायनम् । परिवेपनेन । इत्यत्र "न ख्यापूग्भूभा°" [९०] इत्यादिना न णः ॥ ख्यातेर्णत्वमिति कश्चित् । दुष्प्रख्याण[10] ॥

अन्तरयनताम् । अन्तर्हननत्वम् । इत्यत्र "देशे°" [९१] इत्यादिना न णः ॥ देश इति किम् । अन्तरयण । अन्तर्हणनात् ॥

सर्पिष्पान । इत्यत्र "षात्पदे" [९२] इति न णः ॥

---

१ सी °र्नेविन°. २ बी °र्थं प्रही°. ३ बी °पण प°. ४ ए बी सी डी °पनम् । प°. ५ ए सी डी °नीयः । परियापनीय । इ°. ६ बी "णे वा" इ°. ७ बी °पालम् । क°. ८ सी °न । आप्र°. ९ सी °वनम् । प°. १० बी °ख्याणः ॥ अ°.

प्रावनद्ध । इत्यत्र "पदेन्तरे°" [९३] इत्यादिना न णः । अनाकीति किम् । प्राणद्धाम् ॥ अतद्धित इति किम् । शुष्कगोमयेण ॥

प्रघ्नन्[1] । इत्यत्र "हनो घि" [९४] इति न णः ॥

नरीनृत्यमान । नरिनर्ति । इत्यत्र "नृतेर्यङि" [९५] इति न णः ॥

अक्षुभ्नत् । इत्यत्र "क्षुभ्नादीनाम्" [९६] इति न णः ॥

गर्भेनमत्स्वष्कणासहैणीछ्यूतास्त्रैः छ्यायंस्तमुज्जयन्तम् ।

यो विस्रमकल्पयत्स नः किं मित्रं स्यान्म्लेच्छीकूपीटक्लृप्तः ॥३३॥

३३. यो ग्राहारिस्तं महातीर्थराजतया प्रसिद्धमुज्जयन्तं विस्रं दुर्गन्धमकल्पयच्चक्रे । यतो गर्भेण नमन्त्यः प्रह्वीभवन्त्योत एव ष्वष्कणासहा गमनाक्षमा या एण्यो मृग्यस्ताभिः छ्यूतानि प्रहारवशाच्छिरस्तानि यान्यस्त्राणि रक्तानि तैः कृत्वा तं छ्यायन्संबन्धयन्स ग्राहारिर्म्लेच्छ्याः कूपीटमुदरं तस्मात्क्लृप्तो जात इवोक्तरीत्यातिनिकृष्टाखेटककारित्वात्किरातादिनीचजातितुल्यो नोस्माकं क्षत्रियाणां मित्रं किं स्यान्नैवेत्यर्थः ॥

नमत् । इत्यत्र "पाठे धातु°" [९७] इत्यादिना णस्य नः ॥

सहा । इत्यत्र "षः°" [९८] इत्यादिना षस्य सः ॥ छ्यादिवर्जनं किम् । छ्यायन् । छ्यूत । ष्वष्कण ॥

क्लृप्तः । अकल्पयत् । इत्यत्र "ऋर लृलम्°" [९९] इत्यादिना ऋरयोर्लृलौ ॥ अकूपीटादिष्विति किम् । कूपीट ॥

प्लत्ययमानान्पलायमानान्यो गिलति निजेगिल्यते परस्तम् ।

गिरति तमन्योस्य मात्स्यनीतौ भुजपलिघः परिघत्वभाक्कथं नः ॥ ३४

३४. नोस्माकं भुजपलिघो भुजार्गला कथं परिघत्वभाक् स्यात् ।

---

१ सी °घं न ॥

---

१ सी °नो घि" इ°. २ बी °टका°. ३ बी "ष स°" इ°. ४ बी क्लृप्त । अ°. ५ ए डी °पीटः ॥

कस्यां सत्याम् । अस्य ग्राहारेर्मात्स्यनीतौ स्वजातावन्योन्यं गिलनरूपे मात्स्ये न्याये । कथमित्याह । प्लुत्यमानान्भयेन व्यावर्तमानान्पलायमानांश्च नश्यतो वणिगादीन्यो गिलति संहरति तं परोन्यो निजेगिल्यते गर्हितं गिलति तं च निजेगिलकमन्यो गिरतीति । एतन्मात्स्यनीतिनिवारणाभावान्मञ्जुजार्गला कर्मकारी न स्यादेवेत्यर्थः । तस्मात्कानेन मैत्रीति ॥

पलियोगविदां गुरुं धरित्रीपल्यङ्कं परियोगिणं य आर्दीत् ।
लृफिडमृफिडजांस्तथर्फिलस्त्रीरघपर्यङ्कममुं सहे जवाक्षम् ॥ ३५ ॥

३५. यो ग्राहारिः परियोगिणं महाध्यानिनमृफिडमृषिभेदमार्दीदपीडयत् । कीदृशम् । परि समन्ताद्योगं ध्यानं विदन्ति ये तेषां योगिनां गुरुं शिक्षकत्वादाचार्यम् । एतेनातिज्ञानितोक्ता । तथा धरित्र्येव पल्यङ्कः खट्वा यस्य तं भूमिशायिनमित्यर्थः । एतेन क्रियावत्तोक्तिः । तथा ऋफिडजानृफिडपुत्रांस्तथा ऋफिलस्त्रीर्ऋफिलभार्याश्च य आर्दीत् । तममुं ग्राहारिं सहे क्षमे न सह इति काका व्याख्या । कीदृशम् । अघस्य महर्षिस्त्रीभ्रूणघातादिपापस्य पर्यङ्कमिवाघपर्यङ्कं पापविश्रामस्थानमित्यर्थः । तथा कोपात्सदा मद्यपानाद्वा जपापुष्पवदक्षिणी यस्य तं रक्ताक्षम् ॥

तदेवमस्य सर्वथा मैत्र्ययोग्यत्वमुक्त्वा मैत्र्यकरणेधुना कृतान्तः प्रनिकुर्वन्प्रनिखेलतु प्रनिद्विडित्यनेन यद्दूतो राज्ञो मृत्युरूपं दण्डमुक्तवांस्तं स्वासियष्टेः सामर्थ्योपवर्णनद्वारेण ग्राहारेरेवाह ।

---

१ डी °डजां°.

१ ए सी मासे न्या°. डी मात्स्यना°. २ ए सी °गिल्ये ग°. ३ बी डी गिलती°. ४ ए सी °गिणः म°. बी °गिनं म°. ५ ए बी सी °स्त्री ऋफि°. ६ डी °स्यर्षि°. ७ ए सी° मर्षि°. ८ ए सी डी °मुक्तम् । मे°. ९ बी सी डी प्रतिकु°. १० ए बी सी डी °प्रतिखे°. ११ बी प्रतिद्वि°.

रिपुरक्तजपार्चितासियष्टिर्विजयिन्यष्ट दिशः प्रकाशयित्री ।
प्रजिघत्सति तं स्वसेव मृत्योर्ज्यायस्यथ सुहिंसौ लसन्ती ॥३६॥

३६. असौ प्रत्यक्षा करतलस्था लसन्ती स्फुरन्त्यसियष्टिरथ तं आहारिं प्रजिघत्सति भक्षयितुमिच्छति । कीदृक्सती । विजयिनी विजयहेतुरत एव सुहिन् सुष्ठु हिंसिकार्थोदरीणामत एव रिपुरक्तजपार्चिता शत्रुरुधिरमेवारक्तत्वाज्जपापुष्पं तेनार्चितात एव चाष्ट दिशः प्रकाशयित्री तदावरणरूपशत्रूच्छेदेन प्रकटयित्री । अतश्च यमादपि पूर्वं आहारी मरणरूपस्य यमकार्यस्य चिकीर्षुत्वादतिकृष्णरौद्रत्वाच्चो-त्प्रेक्ष्यते । मृत्योर्यमस्य ज्यायसी बृहती स्वसेव भगिनीव । अनेन चासि-यष्टेर्मृत्युस्वसृत्वारोपेण मृत्योरपि स्वादेशकारित्वं व्यञ्जितम् । तेन चाधुना कृतान्त इत्यादि यद्दूतेनोक्तं तदपास्तम् ॥

पलायमानाम् । प्लयमानान् । इत्यत्र "उपसर्गस्यायौ" [१००] इति लः ॥

निर्जेगिल्यते । इत्यत्र "ग्रो यङि" [१०१] इति लः ॥

गिलति । गिरति । इत्यत्र "न वा स्वरे" [१०२] इति वा लः ॥

पलिघः परिघैः । पल्यङ्कम् पर्यङ्कम् । पलियोग परियोगिणम् । इत्यत्र "परे-र्घाङ्कयोगे" [१०३] इति वा लः ॥

लुफिडम् ऋफिडजान् । ऋफिल ऋफिडजान् । इत्यत्र "ऋफिड°" [१०४] इत्यादिना ऋत लृत् डस्य च लो वा ॥

जवा जपा । इत्यत्र "जपादीनां पो वः" [१०५] इति वा पस्य वः ॥

सप्तमः पादः समर्थितः ॥

---

१ ए बी सी °जयन्य°.

---

१ ए सी °रिं जि°. २ ए सी °कयि°. ३ ए सी °सृत्वारो°. ४ ए सी° मान् ।. ५ बी गिरील°. ६ ए सी डी° लिघ । प°. ७ बी रिघः । घ°. ८ ए सी° लप°.

पिजविती । प्रकाशयित्री । इत्यत्र "स्त्रियां नृतः°" [१] इत्यादिना ङीः ॥ स्त्रियामिति किम् । अष्ट स्त्रियः ॥ नान्तायाः संख्याया युष्मदस्मदोरिवालिङ्गत्वादत एव नलोपे "आन्" [१८] इत्यावपि न स्यात् ॥ अस्वस्रादेरिति किम् । स्वसा ॥

उदित् । ज्यायसी ॥ ऋदित् । ललसन्ती । इत्यत्र "अधातु°" [२] इत्यादिना ङीः ॥ अधात्विति किम् । सुहिन् ॥

तदेवं ग्राहारिविषयं वधाभिलाषमुक्त्वा वधे कृते यज्ञावि फलं तदाशीर्वादपूर्व वृत्तद्वयेनाह ।

प्राची तमसामवावरी भास्करधीवर्यतिशर्वरी यथा हि ।
अद्य तथा तेन बहवावा मदृश्वर्यनवावरी प्रजास्तु ॥ ३७ ॥

३७. यथा प्राची पूर्वदिग् हि स्फुटं तमसां तिमिराणामवावरी ओणतेर्वनि "वन्याङ् पञ्चमेस्य" [४.२. ६५.] इत्यात्वे च अपनायिका स्यात् । कीदृक्सती । अतिशर्वरी रात्रिमतिक्रान्तात एव भास्करधीवरी रविं बिभ्रती तथा तेन ग्राहारिणा कृत्वा बहवोवावानोपनायकाः क्षयकारका यस्याः सा प्रजाद्य सांप्रतं मदृश्वरी मां दृष्टवती मत्स्वामिका सत्यस्तु । कीदृशी । न विद्यन्तेवावानो यस्यां सानवावरी क्षयकारकरहिता ॥

अचिरेण भवत्वसौ सुराष्ट्रा धृतधीवर्यथवा विनष्टधीवा ।
गायन्द्विपदश्चतुष्पदीर्वा कुण्डोध्नीरिह पातु चारणौघः ॥ ३८ ॥

३८. असौ सुराष्ट्राचिरेण शीघ्रं भवतु । कीदृक् । ध्यायति कुकर्मेति

---

१ सी पा चा°.

---

१ सी °सती । इ°. २ प सी °मस्यात्वे. ३ प °वानो य°. सी °वाचो य°.

"ध्याप्योर्धीपी वा"[1][2] इति औणादिके क्वनिपि धीवा चण्डालो धीवेव कुकर्मकारित्वाद्धीवा ग्राहारिर्धृतो गृहीतो बन्दौ क्षिप्तो धीवा यस्यां सा धृतधीवरी। अथवा विनष्टो मृतो धीवा यस्यां सा च । तथेह सुराष्ट्रायां चारणौघो मङ्गलपाठकभेदसमूहो द्वौ पादौ यासां ता द्विपद एवं चतुष्पदीर्वा राजादिवर्णनोपेतांश्छन्दोभेदान् गोवधकस्य ग्राहारेर्वधेन निर्भयत्वाद्गायन्सन् कुण्डमिवोधो यासां ताः कुण्डोध्नी राजादिभ्यो लब्धा धेनूः पातु दुग्धपानाय रक्षतु ॥

तदेवमस्य वधे फलान्युक्त्वा वधहेतौ रणकरणे ग्राहारिमनुमन्यमानो दूतमाह ।

शतकुण्डोधा रथोस्त्वशिश्वीर्योक्ता[1]स्याश्वतरीस्त्रिहाणीस्ताः ।
मुक्त्वा मदिरां त्रिहायनां सोश्वाः सन्नाह्यतु क्षणाद्द्विदाम्नीः ॥३९॥

३९. अस्य ग्राहारे रथैस्ताः[3] पराक्रमित्वादिगुणैः सर्वत्र प्रसिद्धा अश्वतरीर्वेसरीर्योक्ता रणायात्मना सह संबन्धयितास्तु । कीदृक् । शतेन कुण्डोध्नीभिः क्रीतः[4] शतकुण्डोधा । एतेन महार्घत्वोक्तिः[5] । कीदृशीरश्वतरीः । त्रयो हायना वर्षाणि यासां ता यौवनस्था इत्यर्थः । एवंभूता अपि सापत्या अबला एव स्युरित्याह । अविद्यमानाः शिशवो बालका यासां ता अशिश्वीः[6] । तथा द्वे दाम्नी कण्ठाभरणमाले यासां ता अश्वाः क्षणात्सन्नाह्यतु । किं कृत्वा त्रिहायनां त्रिवार्षिकीम् । एतेन परिपक्किमत्वोक्तिः[7] । मदिरां मुक्त्वात्यन्तं रणोत्कण्ठया त्यक्त्वा । एवं च स्वयं ग्राहारेः सैन्यस्य च रणोद्यमेनुमतिरुक्ता । अनया चानुमत्याथ दुर्निगदं छलं त्वमन्तर्ण्येदर्धा इति यद्दूतेनोक्तं तन्निरस्तम् ॥

---

१ ए सी °योंक्तस्या°.

१ सी ध्यापो धी पी. २ ए °प्यो धी पी. ३ ए सी °थस्ता प°. ४ सी डी क्रीता श°. ५ बी °हार्घ्यत्वो°. ६ बी °शिश्वी । त°. ७ ए सी डी क्रिमोक्तिः ।. ८ ए बी सी डी °थादिति.

प्राची । इत्यत्र "अञ्चः" [३] इति ङीः ॥

ण । ओणृ । अवावरी ॥ स्वर । धा । धीवरी ॥ अघोष । मद्दृश्वरी । इत्यत्र[1] "णस्वर°" [४] इत्यादिना ङीर्वनोन्तस्य रश्च ॥ विहितविशेषणं किम् । शृणा-[3] तीति शर्वरी । स्वराद्विहितत्वाद्गुणे कृते घोषवतो यथा स्यात् ॥

अनवावरी बहुधावा । घृतधीवरी विनष्टधीवा । इत्यत्र "वा बहुव्रीहेः"[4] [५] इति वा ङीर्वनोन्तस्य रश्च ॥ बहुमेरुदृश्वरी बहुमेरुदृश्वेति स्वयमभ्यूह्यम् ॥

चतुष्पदीः द्विपदः । इत्यत्र "वा पादः" [६] इति वा ङीः ॥

कुण्डोध्नीः । इत्यत्र "ऊध्नः" [७] इति[5] ङीः ॥ समासान्तविधावूध्नित्यादेशे ना-न्तत्वादेव ङीः सिध्यति किं तु शतेन कुण्डोध्नीभिः क्रीत इतीकणि तल्लुपि च शतकुण्डोध्निति प्रकृतेः सौ शतकुण्डोधिति स्यात् शतकुण्डोध्नेति[6] चेष्यते ।

अशिश्वीः । इत्यत्र "अशिशोः" [८] इति ङीः ॥

त्रिहायणीः । इत्यत्र "संख्यादेः°" [९] इत्यादिना ङीः ॥ अत्र "चतुस्त्रेः०" [२.३.७४.] इत्यादिना णः ॥ वयसीति[7] किम् । त्रिहायना मदिराम् ॥

द्विदाम्नीः । इत्यत्र "दाम्नः" [१०] इति ङीः ॥

अथ त्वत्प्रणिदिष्टं प्रनिदेष्टुमेष यामीति यद्दूतेन स्वयानमुक्तं तद्ग्रहणार्थं[8] ससैन्यस्य सन्नद्धस्य ग्राहारेः स्वदेशसीमन्यागमनं चानुमन्यमान आह ।

व्रज शतराज्ञः सहस्रराज्ञीरधिराज्ञीबहुसाम्न्यधीश्वराद्यैः[1] ।

पृतनाः कृतवर्मणोतिसाम्नो व्युह्य युधे सीमानमेलिनस्ते ॥ ४० ॥

४०. हे दूत व्रज ग्राहारिसमीपम् । तथा ते तवेनः स्वामी ग्राहा-

---

१ प सी °राद्यैः ।.

---

१ सी °त्रं स्व°. २ प सी कीवांनो°. ३ वी शृणोती°. ४ वी °व्रीहिः" इ°. ५ प सी °ति की ॥. ६ प सी °ण्डोधिति. ७ प सी की ति । त्रि°. ८ डी प्रतिदे°.

रियुधे युद्धार्थं सीमानं स्वदेशमर्यादाभूमिमेत्वागच्छतु । किं कृत्वा । पृतनाश्चमूर्ध्युह्य । किंभूताः । अधिका राजानो यस्यां साधिराज्ञी नाम ग्रामो बहूनि सामानि यस्यां सा बहुसाम्नी नाम पुरी । द्वन्द्वे तयोरधीश्वरास्तदाद्यै[1]र्नृपैः कृत्वा । शतं राजानो यासु सह[2]स्रं राजानो यासु वा ताः । अत एवातिसाम्नः सामोपायमतिक्रान्ता युद्धायैव सदोद्यता इत्यर्थः[3] । अत एव च कृतवर्मणः संनद्धाः ॥

इति स विसृष्टो वनान्तसीमास्वतिपर्वासु वृकोऽन्वजाः शताज्याम् ।
द्विपदस्त्रिपदा[1] ऋचो महर्षीन्पठतो गोपजुषो जगाम पश्यन् ॥ ४१ ॥

४१. इत्येवंप्रकारेण विसृष्टो राज्ञा मुत्कलितः स दूतो जगाम ग्राहारिं प्राप । कीदृक्सन् । अतिपर्वासु मूलराजागमनानन्देनातिशयितोत्सवासु वनान्तसीमासु काननपर्यन्तसमिभूमिषु वर्तमानान्महर्षीन्मारणेच्छया क्रूरं पश्यन् । वृको नु यथारण्यश्वा शताज्यां शतस्याजानां समाहारे वर्तमाना अजाश्छागीर्मारणेच्छया पश्यति । कीदृशान् । गोपजुषो गोकुलस्थांस्तथा द्वौ पादौ यासां ता द्विपद एवं त्रिपदाश्च[4] ऋचो मन्त्रविशेषान्पठतः ॥

सह[5]स्रराज्ञीः शतराज्ञः । इत्यत्र "अनो वा" [११] इति वा ङीः ॥

अधिराज्ञी । बहुसाम्नी । इत्यत्र "नाम्नि" [१२] इति ङीः ॥

कृतवर्मणः । इत्यत्र "नोपान्त्यवतः" [१३] इति न ङीः ॥

सीमानम् । इत्यत्र "मनः" [१४] इति न ङीः ॥ [6]अनिनस्मन्ग्रहणान्यर्थवतानर्थकेन च तदन्तविधिं प्रयोजयन्ति । तेन सामातिक्रान्ता अतिसाम्न इत्यादावपि ङीप्रतिषेधः स्यात् ॥

---

१ ए सी डी °दास्चो°.

---

१ ए सी °नृपौ कृ°. २ ए सी °स्रं रा°. ३ ए सी र्थः ।. ४ ए सी डी °श्च ऋचो°. ५ ए सी °स्रा°. ६ डी अनिनस्म°.

सीमासु । अतिपर्वासु । इत्यत्र "ताभ्यां वाप्[1] डित्" [१५] इति वा डि-दाप्॥ पक्षे पूर्वाभ्यां प्रतिषेधाद्ङीर्न भवति । सीमानम् । कृतवर्मणः ॥ उपान्त्य-लोपिनस्तु बहुव्रीहेर्ङीरपि स्याद्[2] । शतराज्ञः । सहस्र[3]राज्ञीः ॥

अजा । इत्यत्र "अजादेः" [१६] इत्याप् ॥ अजादेरित्यावृत्त्या षष्ठीसंबन्ध[4]: किम् । अजादिसंबन्धिन्यामेव स्त्रियामभिधेयायां यथा स्यात् । तेनेह न स्यात् । शताज्याम् । अत्र समाहारः समासार्थः स्त्री । नासावजशब्दसंबन्धिनी ॥

द्विपदः । त्रिपदा[5] ऋचः । इत्यत्र[6] "ऋचि°" [१७] इत्यादिना पाच्छन्दस्या-बन्तस्य पात्पदे निपात्येते ॥

अशृणोदथ ताः कथाः प्रभापा[1] भीमा भूरिनदा नदीर्नु तस्मात् ।
ग्राहरिपुः प्रकोपतः स[2] वन्दीर्गौरीरौत्सीस्तापसीः प्रपश्यन् ॥४२॥

४२. अथ दूतप्राप्त्यनन्तरं स ग्राहारिस्तस्माद्दूतात्ता मूलराजोक्ताः कथा उक्तीरशृणोत् । कीदृक्सन् । औत्सीरुत्सस्यर्षेरपत्यानि स्त्रीः प्रकोपत एताः पापिष्ठा अस्य विग्रहस्य हेतव इति रुषा प्रपश्यन् । कीदृशीः । वन्दीर्[8]हठापहृतास्तथा गौरीः स्वर्णवर्णास्तथा तपोस्त्यासां "ज्यो-त्स्नादिभ्योण्" [७.२. ३४.] इत्यणि तापसीस्तपस्विनी[9]: । कीदृशी[10]: कथाः । भीमा दण्डोपायार्थत्वाद्रौद्रा अत एव भूरिः प्रभूतो नद आह्-तिप्रत्याहतिरूपः शब्दो यासु ताः । अत एव च प्रभां माहात्म्यं पिबन्ति परिभावुको[11]क्त्या ग्रसन्ते यास्ताः नदीर्न्विति । यथा ग्राहरि-पुर्ग्राहाणां जलचरजन्तूनां रिपुर्धीवरो भूरिनदाः प्रभूतवहाः प्रभूतशब्दा

---

१ प बी सी °भापो भी°. २ डी स वन्दी°.

---

१ बी डी °वा डि°. २ बी °त् । शित°. ३ प सी हस्रा°. ४ प सी °न्ध कि°. ५ प सी डी °दा ऋच् । इ°. ६ प सी डी °त्र ऋचि°. ७ बी °स्य ऋपेर°. ८ प सी °न्दी हठा°. ९ प सी °प्रश्विनी°. १० प सी डी °शीः तथा. ११ बी °भावको°.

तात एव भीमा नदीः शृणोति मत्स्यग्रहणाभिलाषेण तासु जिगमिषुत्वाल्लोकादाकर्णयति ॥

उत्क्षिप्नुः सोरिकम्पकारीं शैलेय्या भुजया गदां शिलेयीम् ।
सौपर्णेयीसहोदरौजाः शाक्तीकीः पौंस्नीर्दिदेश सेनाः ॥ ४३ ॥

४३. स ग्राहारिः शाक्तीकीः शक्तिप्रहरणाः पौंस्नीः पुंसां[1] पौरुषगुणोपेतानां नराणामिमाः सेना आदिदेश रणारम्भायाज्ञापयत् । कीदृक् । सुपर्ण्याः । केचित्त्वेनमजादिषु पठन्ति । तन्मते सुपर्णाया वापत्यं स्त्री सौपर्णेयी सुमतिनाम्नी सगरपत्नी तस्याः सहोदरो गरुडस्तद्वदोजो बलं यस्य सः । अत एव शिलायास्तुल्या " शिलाया एयच " [७.१. ११२] इति चकारादेयञि शैलेयी तया शिलादृढया भुजया कृत्वा गदां मुद्गरविशेषमुत्क्षिप्नुरुल्लालयन् । कीदृशीम् । शिलेयीं शिलाभिस्तुल्याम् । अत्रैयच्[2] । अत एवारिकम्पकारीम् ॥

ग्राहारेरादेशे सेना यथामिलंस्तथादशभिर्वृत्तैराह ।

सेनान्योस्याज्ञया तदैयुस्त्यक्त्वा स्त्रैणीराक्षिकीः सलीलाः ।
औशनसाश्चाथ पाणिनीयाः सहसा चारुवलित्रया वधूटीः ॥४४॥

४४. तदास्य ग्राहारेराज्ञया[3] सेनान्यो दण्डनायकाः सेनायुक्ता नृपा वैयुर्ग्राहारिसमीप आगताः । किं कृत्वा । वधूटीर्नवोढाः[4] पत्नीराक्षिकीरक्षैर्दीव्यन्तीः सतीः सहसाकस्मात्त्यक्त्वा । कीदृशीः । चारु मनोज्ञं वलित्रयमुदरमध्यवर्ति रेखात्रयमुपलक्षणत्वाच्छेषाङ्गोपाङ्गानि च यासां ताः । अथ तथा पाणिनीयाः पाणिनिप्रोक्तमहाशब्दानुशासनज्ञाः । एनेन विद्वत्तोक्तिः । तथौशनसाश्च शुक्रप्रोक्तनीतिशास्त्रज्ञाश्च । एतेन

---

१ बी °सां पुरु°. २ बी °यच । अ°. ३ बी °राज्ञाया. ४ सी °टीवो°.

लोकव्यवहारज्ञतोक्ता । तथा लीला शृङ्गारचेष्टाविशेषः । सह तया । उपलक्षणत्वाद्विलासादिभिश्च स्वाभाविकालंकारैर्वर्तन्ते यास्ताः । तथा स्त्रीभिः संस्कृताः सखीभिर्मण्डनालंकारादिभिः शोभिताः । "प्राप्यतः०" [६.१. २५] इत्यादिना नम्रि स्रेणीश्च । तदेवं विशेषणसूचितैरालम्बनविभावोद्दीपनविभावैः शृङ्गारस्य प्रकर्षप्राप्तत्वाद्यूनामत्यन्तं दुस्त्यजानामपि दण्डनायकैः सहसा त्यागेन स्वस्वामिनि ग्राहारावुत्कृष्टा भक्तिः सेनायुक्तनृपैस्तु ग्राहारेः प्रचण्डाज्ञता सूचिता । सेनान्य इत्यनेनाभिधेयाः सेनायुक्ता नृपास्तु त एवात्र ज्ञेया यैर्मित्रा ग्राहारिणा निर्जित्य स्वसेवकीकृतास्तेषामेव ह्यादेशाकरणेतिभीरुत्वादेवमागमनसंभवः । एवं चात्रामित्रबलागमनमुक्तम् ॥

वृद्धाकृतमङ्गलास्त्रिशल्यीभृत ईयुः सुभटाः श्रितास्तुरङ्गीः ।
द्विद्रोणीः षड्वृषास्त्रिपण्याः शतकम्बल्या ग्राचितास्त्रिबिस्ताः ॥४५॥

४५. सुभटा ईयुरागताः । किंभूताः सन्तः । वृद्धाभिः स्थविरस्त्रीभिः कृतं मङ्गलं चन्दनवर्धनादि येषां ते । तथातिबलिष्ठत्वात्त्रिशल्यीभृत-त्रीणि शल्यास्त्राणि धारयन्तः । तथा तुरङ्गीः श्रिता आरूढाः । कीदृशीः । द्रोणश्चतुराढकी धान्यमानभेदः । अत्र चोपचाराद्द्रोणस्थं धान्यमुच्यते । द्वाभ्यां द्रोणाभ्यां क्रीता द्विद्रोणीः । षड्भिर्वृषैर्वृषभैः क्रीताः षड्वृषाः । त्रिभिः पणैः कार्षापणैरनेकस्वर्णमाषसमुदायरूपैर्मानभेदैः क्रीताः "पणपाद०" [६ ४. १४७] इत्यादिना ये त्रिपण्यास्तथा कम्बलोस्य स्यात् "कम्बलाच्चाज्ञि" [७.१. ३४] इति ये कम्बल्यमूर्णापलशतम् । शतेन कम्बल्येन क्रीताः । तथाचितः कर्पासादिक्रया-

१ ए बी सी °भटाश्रि°. २ ए सी °पण्या श्च°.

१ ए सी डी °वियोगः । स°. २ ए सी °ण्डलालं°. ३ बी °णि शिल्पास्त्रा°. ४ सी °यतः । त°. ५ सी °द्रोणी ष°.

णकानां दश भाराः । द्वाभ्यामाचिताभ्यां क्रीता द्व्याचिताः । तथा बिस्तः स्वर्णस्य षोडश माषाः । त्रिभिर्बिस्तैः क्रीताः । एषु पञ्चस्वपि "मूल्यैः क्रीतः" [६.४.४९.] इतीकणो "अनाम्न्यद्विः[1] प्लुप्"[६.४.१४०] इति लुप् । एषु च विशेषणेषु तत्तद्धान्यादिक्रीतानेकभेदतुरङ्गयपेक्षया समुच्चयार्थाश्चा अध्याहार्याः । यत्रैतानि धान्यादीनि दुर्लभानि तत्तद्देशोद्भवत्वस्य विवक्षितत्वेन तत्तद्देशापेक्षया द्विद्रोण्यादिना बहुमूल्येन क्रीतत्वादतिश्रेष्ठा इत्यर्थः । पूर्ववृत्ते मित्रबलमुक्तमप्रेतनवृत्तेषु चाटविकादीनि चत्वारि बलानि वे[2]क्ष्यन्त इत्युद्धरितन्यायादनेन भृतकबलागमनमुक्तम् ॥

कथाः । भीमाः । ताः । इत्यत्र "आत्" [१८] इत्याप् ॥

गौरीः । वन्दीः । नदीः । इत्यत्र "गौरादिभ्यो मुख्याद्ङीः" [१९] इति ङीः ॥ मुख्यादिति किम् । भूरिनदाः ॥

अण् । ता[3]पसीः । कम्पकारीम् ॥ अ[4]ञ् । औत्सीः ॥ एयण् । सौपर्णेयी ॥ एयञ् । शिलेयीम् ॥ एयञ् । शैलेय्या । निरनुबन्धनिर्देशः सामान्यग्रहणार्थः ॥ इकण् । आक्षिकीः ॥ नञ् । स्त्रैणीः ॥ स्नञ् । पौंस्नीः[5] ॥ टित् । शाक्तीकीः । इत्यत्र "अणञेये°" [२०] इत्यादिना ङीः ॥ अणादीनां षष्ठीनिर्देशेनाकारस्य विशेषणं किम् । पाणिनिना प्रोक्तं[6] पाणिनीयम् । तदधीयत इत्यण् । तस्य "प्रोक्तात्" [६.२.१२९.] इति लोपे पाणिनीया वधूटीरिति ङीर्यथा मा भूत् ॥ प्रत्यासत्त्या तैरेवाणादिभिः स्त्रिया विशेषणं किम् । उशनसा प्रोक्ता नीतिरौशनसी तामधीयत इत्यण् । तस्य "प्रोक्तात्" [६.२.१२९] इति लोपे "स्त्र्यादेः°" [२.४.९५] इत्यादिना ङीलोपे ङीर्यथा न स्यादौ[7]शनसा वधूटीः । अत्यत्राणो[8]कारो न तु तदभिधेया नीतिलक्षणा स्त्री प्रत्ययार्हा । यदभिधेया तु वधूटीलक्षणा स्त्री प्रत्ययार्हा न तस्याकारोऽस्तीति । तथा चाल्वकिन्नया वधूटीः ॥

---

१ बी °द्विः प्लु°. २ बी वक्ष्यन्त°. ३ सी °पसी । क°. ४ ए सी अञ् । अञ् । औ°. ५ बी पौंस्नीम् । टि°. ६ ए सी °क्तं प्राणि°. ७ बी °शसना व°. ८ ए सी डी °णो अका°.

वधूटीः । इत्यत्र "वयसि°" [२१] इत्यादिना ङीः ॥ अनन्त्य इति किम् । वृद्धा ॥

त्रिशल्यी । इत्यत्र "द्विगोः°" [२२] इत्यादिना ङीः ॥

द्विद्रोणीः । इत्यत्र "परिमाणात्°" [२३] इत्यादिना ङीः ॥ परिमाणादिति किम् । पञ्चाश्वाः ॥ तद्धितलुकीति किम् । त्रिपण्याः ॥ अवि(बि)स्ताचितकम्बल्यादिति किम् । त्रिवि(बि)स्ताः । आचिताः । शतकम्बल्याः ॥

मेदा बद्धोत्कचास्त्रिकाण्ड्या नवकाण्ड्या दशकाण्डया च रज्ज्वा।
क्षेत्रभुवः फालया द्विकाण्डाः षट्पुरुषीः परिखा विलङ्घ्य चेयुः ॥४६

४६. मेदा भिल्ला एयुः । किं कृत्वा । द्विकाण्डा द्विशरप्रमाणाः क्षेत्रभुवः क्षेत्रभूमीः षट्पुरुषीः षट्पुरुषप्रमाणाः परिखाश्च फालया विलङ्घ्योत्प्लुत्य । कीदृशाः सन्तः । नवकाण्ड्या दशकाण्डया च नवभिर्दशभिर्वा काण्डैः शरैः क्रीतया रज्ज्वा कृत्वा बद्धा ऊर्ध्वं कचा यैस्ते । कीदृश्या । त्रीणि काण्डानि शराः प्रमाणं यस्याः । "प्रमाणान्मात्रट्" [७.१. १४०] इति मात्रट् । "द्विगोः संशये च" [७.१. १४३] इति लुप् । तया त्रिकाण्ड्या । अनेनाटविकबलागमनमुक्तम् । जातिरलंकारः ॥

द्विपुरुषया भान्स कुन्तयष्ट्या रेवत्यामतिरोहिणीशशत्रुः ।
नील्यार्वन्त्याथ नीलयोच्चैः पैत्र्या नील्याद्रिर्नु लक्ष आगात् ॥४७॥

४७. स प्रसिद्धो लक्षो नाम राजागात् । कीदृशः । द्विपुरु-

१ बी °द्धोत्कचा°. २ सी डी °र्वत्याथ°. ३ ए सी पत्यानी°. ४ ए सी °द्रि नु ल°.

१ सी °णादि°. २ बी °लुगीति. ३ बी °चिता । श°. ४ ए सी °काण्ड्यां च. ५ ए सी डी °भिर्वा. ६ ए सी मात्रट् । ७ ए सी लक्ष्यो ना°.

चया द्विपुरुषप्रमाणया कुन्तयष्ट्या कृत्वा भान् शोभमानः । तथा यथा-
[1] द्रिर्नील्यौषधिविशेषेणोपलक्षितः स्यादेवं नीलया नीलवर्णयोर्वैरतिशयि-
तया पट्या वस्त्रेणाथ तथा नील्या हरितयार्वन्त्याश्वयोपलक्षितोत एवा-
तिरोहिणीशशत्रू राहुमतिक्रान्तः । कागादित्याह । रेवत्यां रेवत्या चन्द्र-
युक्तया युक्ते काले द्वादशे चन्द्र इत्यर्थः । लक्ष्मो हि नाम राशिनाश्विनी-
जातत्वान्मेषराशिजातो रेवत्यां च चन्द्रो मीनराशौ स्यादनेन चास्या-
वश्यंभावी मृत्युः सूचितः । एतेन मित्रबलागमोक्तिः ॥

त्रिकाण्ड्या । इत्यत्र "काण्डात्°" [२४] इत्यादिना ङीः ॥ प्रमाणादिति किम् । दशकाण्डया ॥ अप्रमाणादपीच्छन्त्यन्ये । नवकाण्ड्या ॥ अक्षेत्र इति किम् । द्विकाण्डाः क्षेत्रभुवः ॥

षट्पुरुषीः । द्विपुरुषया । इत्यत्र "पुरुषाद्वा" [२५] इति वा ङीः ॥

रेवत्याम् । रोहिणी । इत्यत्र "रेवत°" [२६] इत्यादिना ङीः ॥

[4] नील्यार्वन्त्या । नील्या । इत्यत्र "नीलात्°" [२७] इत्यादिना ङीः ॥ प्राण्योषध्योरिति किम् । नीलया पट्या ॥

नीलीनीलाप्रबद्धलूनीबद्धविलूनामामकीषु जाताः ।
एयुस्तस्यात्मजाः स्वभूभ्यो ज्ञात्वा समयं केवलीविदो[1] नु ॥४८॥

४८. प्रबद्धा चासौ लूना च प्रबद्धलूनी । बद्धा चासौ विलूना च बद्धविलूना । नील्यादिनामका आहारेर्भार्यास्तासु जातास्तस्य आहारेरात्मजाः पुत्राः केवलीविदो नु केवल्यो ज्ञानशास्त्राणि तज्ज्ञा इव समर्थं रणकालं ज्ञात्वा स्वभूभ्यः स्वदेशेभ्य एयुः । एतेन मौलबलागमनोक्तिः ॥

---

१ प सी °दो नुः ॥

---

१ बी सी °द्रिनील्यौ°. २ प सी °वस्त्रं भा°. ३ प सी डी °काण्डा । इ°. ४ प बी सी डी° वंत्या । नी°. ५ प सी डी °लादि°. ६ सी °मय र°.

आर्यकृती भेषजीसुमङ्गल्यपरीपापीभागधेय्य आयुः ।
सैकोत्तरतः समं समान्या भक्त्या केवलयास्त्र पीठदेव्यः ॥ ४९ ॥

४९. समान्या समानीसंज्ञया पीठदेव्या समं सहार्यकृत्यादिनाम्न्यः पीठदेव्यो योगिन्योस्य ग्राहारेः संबन्धिन्या केवलयैकया भक्त्या हेतुना सैकोत्तरत एवंनाम्नोक्थिस्थाद्रिविशेषादायुः । अनेनापि मौलबलागमनोक्तिः । यतो वेलाकूलाधिपतित्वात्तस्य क्रमागतास्ताः सांनिध्यकारिण्यो देव्यः ॥

मीकी मीका । प्रबद्धलूनी बद्धविलूना । इत्यत्र "क्रौञ्च नाम्नि वा" [२८] इति वा ङीः ॥

केवली । मामकीषु । भागधेय्यः । पापी । अपरी । समान्या । आर्यकृती । सुमङ्गली । भेषजी । इत्यत्र "केवल°" [२९] इत्यादिना ङीः ॥ नाम्नीति किम् । केवलया भक्त्या ॥

भाजीकालीं कुशीरदाग्र्यां नागीभिः कुम्भस्थलीभिरुच्चाम् ।
अधिकटिकबरीजुषोध्यरोहन् गुणगोर्णीं गजतां निषादिनोपि ५०

५०. अधिकटिकबरीजुषः श्रोणीं यावत्प्रलम्बमानवेणीका निषादिनोपि मौलबलसंबन्धिनो हस्त्यारोहाश्चै गजतां गजौघमध्यारोहन् । कीदृशीम् । भाजी पैकशाकस्तद्वत्कालीं कृष्णां तथा कुश्ययोविकारस्तद्वत्तिविडास्तीक्ष्णाः प्रलम्बाश्च ये रदा दन्तास्तैरग्र्यामुत्कृष्टां तथा नागीभिः स्थूलाभिः कुम्भस्थलीभिरुच्चामुन्नतां तथा गुणानां शौर्यादीनां गोर्णीमिव गुणगोर्णीं गुणस्थानमित्यर्थः । अस्य च वृत्तस्य पूर्वार्धे नागीं

१ ए सी °र्णीं जगतां.

१ ए सी °श्यकरि°. २ ए सी काना°. ३ ए सी °श्च जगतां. ४ बी पकः शा°. ५ सी °गोणी गु°. ६ बी डी नागीका°. सी नागीकाकी कु°.

कालीं कुशीरदाम्रामलिमद्भाजीभृत्कटस्थलीकामिति पाठान्तरं प्रायो गतार्थम् । केवलमलिप्रधानो यो मदः स एव भाजी तद्भृत्कटस्थली यस्यास्ताम् ॥

कामुकि भाजाभ्रु कान्तिकुण्डे गोणे लावण्याम्बुकुण्डि नागे ।
काले कामस्थले त्वरन्तामित्यूचुर्गृहिणीर्भटाः प्रयातुम् ॥ ५१ ॥

५१. प्रयातुं प्रयाणाय भटा मौलबलसत्कयोधा गृहिणीः प्रोचुः । कथमित्याह । हे कामुकि रिरंसो तथा भाजा नाम काचिद्देवी तस्या इव भ्रुर्भ्रूर्यस्याः । भ्रुशब्द उकारान्तोत्र भ्रूवाचकः । अत "उतो प्राणिनश्च" [२.४.७३] इत्यादिनोङ् । हे भाजाभ्रु भाजाभ्रूसंज्ञे स्त्रि । तथा कुण्डते दहति सपत्नीम् । अच् । कुण्डा । कान्त्या तेजसा कुण्डा हे कान्तिकुण्डे । तथा हे गोणे गोणाख्ये स्त्रि । तथा हे लावण्याम्बुकुण्डि लवणिमजलपात्रि । तथा हे नागे नागाख्ये स्त्रि । तथा हे कामस्थले स्मरास्थानि । तथा हे काले कालाख्ये स्त्रि भवत्यस्त्वरन्तां शीघ्रीभवन्त्विति ॥

जानपदीं वृत्तिमास्थिता सा पात्री जानपदा सुरां प्रजापि ।
सकुशा रणकामुकाक्षिभासा शोण्या कवरा प्राप रोषशोणा ॥ ५२ ॥

५२. जानपदीं जनपदे देशे भवाम् "उत्सादेरञ्" [६.१.१९] इत्यञ् । वृत्तिं पाशुपाल्यकर्षणरूपामास्थितां सा सुराष्ट्रादेशवास्तव्या प्रजापि । आस्तां राजसेवावृत्ती राजलोकः । आभीरजातिकर्षकादिलोकोपि प्रा-

---

१ ए °ले कलह्वामि°. २ ए सी डी °पदीं सु°.

---

१ ए डी °त्कटिस्थ°. २ बी °भ्रृतकट°. ३ ए सी भ्रुभ्रूर्य°. ४ बी °न्तो उ°. ५ ए सी अतो°. ६ डी °था हे ना°. ७ सी हे कामकाल°. ८ डी काले. ९ ए °मकाल°. १० बी °ता भिता सा.

हारिसमीपं प्राप । कीदृक्सती । जानपदीं सुराष्ट्रादेशोद्भवां सुरां मद्यं पात्री पिबन्त्यत एवं शोण्या रक्तयाक्षिभासा नेत्रज्योतिषा [3]कैबरा कर्बुरा । तथा रणकामुका युद्धेच्छुरत एव रोषशोणा क्रोधादारक्तात एव च कुशायोमिश्रं काष्ठमयं शस्त्रं सह तया वर्तते या सा । एतेन श्रेणिबलागमनोक्तिः । श्रेणिबलं तक्षादिकम् ॥

भाजी । गोणीम् । नागीभिः । स्थलीभिः । कुण्डि । कालीम् । कुशी । कामुकि । अधिकटि । कबरी । इत्यत्र "भाजगोण°" [२०] इत्यादिना ङीः ॥ अन्यत्र । भाजा । गोणे । नागे । स्थले । कुण्डे । काले । सकुशा । कामुका । कबरा ॥ कटा । इति स्वयं ज्ञेयम् ॥ जनपदशब्दादपि वृत्ताविच्छत्यन्यः । जानपदीं वृत्तिम् । वृत्तेरन्यत्र जानपदां सुराम् ॥

शोण्या [5]शोणा । इत्यत्र "न वा शोणादेः" [२१] इति वा ङीः ॥

हयखुरहतिजन्मधूलिरुच्चैरथधूली[1]र्निचिता मदाम्बुवृष्ट्या ।
[2]ज्यानिं गजपद्धतेः सुगन्ध्या परितः प्राप समस्तपद्धतीषु ॥ ५३ ॥

५३. षड्विधेपि प्राहारिसैन्ये [6]मिलति रथधूलीनिचिता स्यन्दनरेणुभिः सान्द्रीकृतोच्चैरतिशयिता हयखुरहतिजन्मधूलिरश्वशफघातो[7]त्था रेणुः समस्तपद्धतीषु सर्वमार्गेषु परितो ज्यानिं क्षयं प्राप । कया कृत्वा गजपद्धतेर्हस्तिपङ्क्तेः सत्कया सुगन्ध्या र्नवोद्भेदात्सुरभ्या मदाम्बुवृष्ट्या । अम्बुवृष्ट्या हि धूलिः शाम्यति ॥

---

१ सी °निविड म°. २ प सी ज्यानं ग°.

---

१ प सी हारीस°. २ सी °व शाण्या. ३ बी कर्बु°. ४ प °त्र जन°. ५ सी शोण्या । इ°. ६ बी मिळिते र°. ७ सी °तोत्थो रे°. ८ प सी डी नमोद्भे°.

धूळी[1] धूकिः । इत्यत्र "इतोक्त्यर्थात्" [३२] इति वा ङीः ॥ अक्त्यर्थादिति किम् । हृति । कृष्ट्या । ज्यानिम् ॥ अन्ये त्वङ्गति-अङ्कति-अंहति-शाकटि[2]-शाकि-शारि-तारि-अहि-कपि-मुनि-रात्रि-यष्टिभ्यः कटिश्रोण्यादिप्राण्यङ्गवाचिभ्यः क्तिवर्जितकृदन्तेभ्यश्चेकारान्तेभ्य इच्छन्ति नान्येभ्यस्तन्मते सुर्गन्ध्येत्यादिषु[3] ङीर्न स्यात् । क्तिमात्रवर्जनाच्च ज्यानिप्रभृतिषु न निषेधः ॥

पद्धतीषु पद्धतेः । इत्यत्र "पद्धतेः" [३३] इति वा ङीः ॥

तद्देवं[4] षड्विधबलमीलनमुक्त्वा ग्राहारेः स्वयं प्रस्थानं वृत्तपञ्चकेनाह ।

ग्राहरिपुः शक्तिमान्स पट्व्या शक्त्या[1] शक्तीभृन्निभः प्रतस्थे ।
पटुभिः प्रपिपासुभिर्नु वायुं[2] खरुभिः पाण्डुभिरश्वधोरणीभिः ॥ ५४॥

५४. स ग्राहरिपुरश्वधोरणीभिः कृत्वा प्रतस्थे रणाय प्राचालीत् । कीदृक्सन् । शक्तिमान् । शक्तयः प्रभुमन्त्रोत्साहपूर्वास्तिस्रः । शक्तिः[5] सामर्थ्यं वा । तद्वान् । तथा पट्व्या तीक्ष्णया शक्त्याऽभेदेन[6] कृत्वा शक्तीभृन्निभः कार्तिकेयतुल्यः । किंभूताभिः । खरुभिः

खरुः[7] स्यादश्वहरयोर्दर्पदन्तसितेषु च ।

इति वचनात्खरुर्दर्पस्तद्युक्तोप्युपचारादुच्यते । ततो दर्पवतीभिरत एव पटुभिर्दक्षाभिरत एव चातिवेगवत्त्वेनोत्प्रेक्ष्यते । वायुं वातं प्रपिपासुभिर्नु वेगाद्वातानुव्रजनेन[8] वातं पातुमिच्छन्तीभिरिव वातवद्वेगेन[9] गच्छन्तीभिरित्यर्थः । तथा पाण्डुभिः श्वेताभिः ॥

शक्ती शक्त्या । इत्यत्र "शक्तेः शस्त्रे" [३४] इति वा ङीः ॥ शस्त्र इति किम्[10] । शक्तिमान् ॥

---

१ ए सी °त्त्या सक्ती°. २ ए सी वायु ख°.

---

१ सी धूलि°. २ बी °टि शाखि. सी °टि-शाकटि-शा°. ३ ए सी °गन्धेला°. ४ बी सी °देव ष°. ५ ए बी सी शक्ति सा°. ६ बी °त्त्या अभे°. ७ ए खरुः श्वा°. सी डी खरं श्वा°. ८ डी °द्वातोनु°. ९ बी °तद्वे°. १० ए सी डी °म् । मक्ति°.

पट्व्या पटुभिः । इत्यत्र "स्वराद्°" [३५] इत्यादिना वा ङीः । स्वरादिति किम् । पाण्डुभिः ॥ गुणादिति किम् । प्रपिपासुभिः ॥ अखरोरिति किम् । खरुभिः ॥

श्येनीरेनीर्हयीरुपेयुर्भरणीर्हरिणी रोहिणीश्च योधाः ।
श्येतामेतां तनौ दधाना भरतां हरितां रोहितां च माठिम् ॥५५॥

५५. श्येतां श्वेतामेतां कर्बुरां भरतां धूसरां पाटलां वा हरितां शुकाभां रोहितां चारक्तां च माठिं कवचं तनौ दधाना योधा हयी-स्तुरङ्गीरुपेयुरारोहन्नित्यर्थः । कीदृशीः । श्येतामेतां भरतां हरितां रोहितां च माठिं दधाना धारयन्तीः । तथा श्येनीरेनीर्भरणीर्हरिणी रोहिणीश्च ॥

श्येनीः श्येताम् । एनीः एताम् । हरिणीः हरिताम् । भरणीः भरताम् । रोहिणीः रोहिताम् । इत्यत्र "श्येतैत°" [३६] इत्यादिना वा ङीस्तस्य नश्च ॥

असिताप्यनसिक्न्यभाभ्रभःश्रीरपलिक्न्यः पलिताश्चमूसुकेश्यः ।
खचरसुकेशानिमेषकृद्भिः सैन्योत्खातरजोभिरुच्छलद्भिः ॥ ५६ ॥

५६. असितापि कृष्णापि नभःश्रीरनसिक्नी श्वेताभात् । तथा चमूसंबन्धिन्यः शोभनकेशा नायिका अपलिक्न्योपि । पूर्वोपिरत्रापि योज्यः । अपलिता अपि पलिता इव पलिता अभुः । कैः कृत्वा । सैन्योत्खातरजोभिः । किंभूतैः । उच्छलद्भिरत एव युद्धदर्शनायाग-तानां खचरसुकेशानां विद्याधरस्त्रीणां निमेषकृद्भिरक्षिषु पाताद्दृक्षिनि-मीलनाकारिभिः ॥

---

१ ए सी °नीरो°. २ ए सी डी °ताभ्रभू°. ३ डी °न्योत्खोत°.

---

१ डी ततो द°. २ ए सी श्रीपे°. ३ बी °हयत्रि°. ४ बी °शीः । श्वेता°. ५ ए सी °तां कोर्हि°. ६ ए सी डी भरिणीः ।. ७ डी भरिता°. ८ ए सी °बन्धन्य°. ९ ए सी °जोपि । किं°. १० सी °स्त्रीणा नि°.

सहकेशाः सर्वतोप्यकेशा अपशोफा विकफा मयाः सुवेगाः ।
आरुरुहुर्विद्यमानकेशास्तोयदृतिक्रोडाः स्त्रियो भटानाम् ॥ ५७ ॥

५७. विद्यमानकेशाः स्त्रियो रणे भटानां जलपानाय तोयदृतिर्जलभृतखल्लः क्रोडेङ्के यासां तास्तथा सत्यो मयाः सण्डीर्वेसरीर्वारुरुहुः । कीदृशीः । सर्वतः सहकेशा अलूनवालास्तथा सर्वतोकेशा अपि लूनकेशाश्च । तथापशोफा विगतश्वयथूस्तथा विकफा विगतश्लेष्मकाः । एतेन नीरोगतोक्तिः । अत एव सुवेगाः ॥

दीर्घमुखायां गजाः पदव्यां छायामूर्ध्वमुखीमधोमुखीं वा ।
स्वामप्यसहिष्णवो वृता दृक्ष्वविकेश्यापट्यर्क्षकेशया च ॥ ५८ ॥

५८. दीर्घे मुखं प्रारम्भो यस्यां तस्यां पदव्यां बहुगम्यत्वात्प्रलम्बे मार्ग इत्यर्थः । गजा दृक्षु नेत्रेष्वावृता आच्छादिताः । कया । पट्या वस्त्रेणापट्या वा जवन्या । कीदृश्या । अवेर्मेषस्य केशा यस्यां तयोर्णामय्येत्यर्थः । यद्वा । अविगतकेशया सकेशयेत्यर्थः । तथा ऋक्षाणां भाल्लूकानां केशा यस्यां तया च ऋक्षवालनिर्मितया च । यतः स्वामपि च्छायां प्रतिबिम्बमसहिष्णवो मदान्धत्वात्प्रतिद्विपोयमित्याशङ्कयाक्षमणशीलाः । कीदृशीम् । ऊर्ध्वमुखीं नद्यादिजल ऊर्ध्ववक्त्रामधोमुखीं वा आतपे चाधोवक्त्रां वा ॥

अथैवं प्रस्थितस्य ग्राहारेः पराजयसूचकान्यरिष्टानि वृत्तद्वादशकेनाह ॥

नाभिमुखास्तुङ्गनासिका कानासिक्यो लम्बोष्ठ्य उन्नतोष्ठाः ।
लम्बोदर्यः कृशोदराः काजङ्घाः पृथुजङ्घ्योन्वयुः पिशाच्यः ॥५९॥

५९. स्पष्टम् । किं तु । नाभिरिव मुखं यासां ता नाभिमुखा अति-

---

१ ए बी सी डी °मूर्द्धमु°. २ ए बी सी °जङ्घोन्व°.

---

१ ए सी °ल्लः । क्रोडे°. २ ए सी °ते नी°. ३ ए सी नेत्र्येष्वा°. ४ बी °र्णां भल्लू°. ५ ए बी सी डी ऊर्द्धमु°. ६ ए बी सी डी ऊर्द्धव°. ७ सी °पे वाधो°.

लघुमुखा इत्यर्थः । कानासिक्यः कुत्सितनासाः । पिशाच्यो दुष्टव्यन्तरीभेदाः । अन्वयुर्ग्राहारिमनुजग्मुः । पिशाच्यो हि नृमांसप्रियत्वादनुयान्त्यो महारिष्टाय स्युरिति ग्राहारेरिदं महारिष्टमभूदित्यर्थः । एवमग्रेप्यरिष्टभावना स्वयं ज्ञेया ॥

चेलुर्हलदन्त्य ओतुदन्ताः करिकर्णाः कपिकर्ण्य उष्ट्रश्रुत्यः ।
मृगशृङ्गा रासभाङ्ग्य उष्ट्राङ्गा राक्षस्योऽस्थिपासयाजौ ॥ ६० ॥

६०. स्पष्टम् । किं तु । चेलुर्ग्राहारिसैन्येन सह चलिताः ॥

अहिगात्र्यगगात्र्यृश्यकण्ठ्योत्कण्ठीहलचिबुकातिदीर्घजिह्वी[१] ।
कृशगण्डादीर्घजिह्वर्क्षीमुख्योतुमुखाः प्रेत्य आविरासन् ॥ ६१ ॥

६१. स्पष्टम् । किं तु । अगगात्रा गिरिमहाकाया । अत्र "ऋत्यृति ह्रस्वो वा" [१.२२] इति ह्रस्वः । कृशगण्डा चुटितगल्ला[२] प्रेत्यो दुष्टव्यन्तरीभेदाः ॥

शूर्पनखा दात्रनख्यभात्कालमुखा वज्रणखा सुताश्च तत्र ।
ऋजुपुच्छा दीर्घपुच्छ्यथान्या मणिपुच्छी विषपुच्छ्यपि त्वराभाक्
॥ ६२ ॥

६२. तत्र तासु पूर्वोक्तासु[३] प्रेतीषु मध्ये[४] शूर्पनखा दात्रनखी च प्रेती नृपलरक्तेच्छया त्वराभाक्सत्यभात् । तथा कालमुखावज्रणखाख्ये[५] प्रेत्यौ तत्सुताश्च ऋजुपुच्छादयः प्रेत्यस्त्वराभाजः सत्योभान् । अथापी समुच्चये । मणिः पुच्छेस्या मणिपुच्छी । विषं पुच्छेस्या विषपुच्छी ॥

---

१ बी °ऋश्य°. २ ए सी डी °. जिह्वीः । अ°.

---

१ ए बी सी डी °नाशाः । पि°. २ ए सी डी °गल्लाः । प्रे°. ३ ए सी °र्वोक्ता प्रे°. डी °र्वोक्तप्रे°. ४ ए सी °ध्ये शूर्प°. ५ डी °खाख्यौ प्रे°.

नभसि कबरपुच्छय आशु चिल्ल्यः शरपुच्छयो न्वहिभिः सुपर्णपक्ष्यः
गोपुच्छीं[1] तां चमूं शशंसुः समरक्रीतीं राजिनन्दनेन[2] ॥ ६३ ॥

६३. नभसि व्योम्नि वर्तमानाश्चिल्ल्यः शम्वलीति प्रसिद्धाः शकुनयो गोरिव पुच्छं यस्यास्तां गोपुच्छीं[1] गोपुच्छाकृतिपृष्ठानीकां[2] तां ग्राहारिसत्कां चमूं शशंसुः । कीदृशीम् । राजिनन्दनेन मूलराजेन कर्त्राशु शीघ्रं समरेण क्रीयते स्म या ताम् । एतां चमूं मूलराजो रणेन हनिष्यतीति[3] रक्तपिशितेच्छासूचकेन नभोवस्थानेन सूचयामासुरित्यर्थः । किंभूताः[4] । कबरं कर्बुरं कुटिलं वा पुच्छं यासां तास्तथाहिभिर्भक्षणार्थं गृहीतैः सर्पैः कृत्वा शरः पुच्छे यासां[5] ताः शरपुच्छयो नु । तथा सुपर्णो गरुडस्तत्पक्षाविव स्वर्णवर्णौ पक्षौ यासां ताः ॥

अपलिक्ष्यः[6] पलिताः । अनसिक्न्यः [क्री] असिता । इत्यत्र "क्तः०" [३७] इत्यादिना वा[7] कीस्तस्य क्नादेशश्च ॥

सुकेश्यः[8] सुकेशा । इत्यत्र "असहनञ्०" [३८] इत्यादिना वा कीः ॥ असहनञ्विद्यमानपूर्वपदादिति किम् । सहकेशाः । अकेशाः । विद्यमानकेशाः ॥ अक्रोडादिभ्य इति किम् । तोयदतिक्रोडाः[9] ॥

अविकारोद्रवं मूर्तं प्राणिस्थं स्वाङ्गमुच्यते ।
च्युतं[10] च प्राणिनस्तत्तन्निभं च प्रतिमादिषु ॥

इति च स्वाङ्गम् ॥ अविकार इति किम् । अपशोफाः ॥ अद्रवमिति किम् विकफाः ॥ मूर्तमिति किम् । सुवेगाः ॥ प्राणिस्थमिति किम् । दीर्घमुखायां

१ प बी सी डी क्रीन्तीं रा°. २ प सी °नन्दिने ॥.

१ प सी गोच्छीं. २ सी डी °तिपुच्छानी° ३ डी हरिष्य°. ४ प सी डी °भूता क°. ५ प सी डी °सा ता श°. ६ बी °क्ष्यः । अप°. ७ प सी डी वा कीः । इ°. ८ सी °केश्यल°. ९ सी °क्रोडा ॥. १० प सी च्युचं त प्रा°.

पद्भ्याम् ॥ च्युतं च प्राणिनस्तदिति किमर्थम् । अप्राणिस्थादपि पूर्वोक्तायथा स्यात् । अविकेश्या । ऋक्षकेशयापद्या ॥ तन्निभं च प्रतिमादिष्विति किमर्थम् । प्राणिस्थसदृशादपि पूर्वोक्ताग्यथा स्यात् । ऊर्ध्वमुखीम् । अधोमुखां छायाम् ॥ अस्वाङ्गपूर्वपदादेवेच्छन्त्येके । नाभिमुखा [:] ॥

काणनासिक्यः तुङ्गनासिकाः । लम्बोदर्यः कृशोदराः । लम्बोष्ठ्यः उन्नतोष्ठाः । पृथुजङ्घ्यः काजङ्घाः । हलदन्त्यः ओतुदन्ताः । कपिकर्ण्यः करिकर्णाः । उक्षशृङ्ग्यः मृगशृङ्गाः । रासभाङ्ग्यः उष्ट्राङ्गाः । अहिगात्री अगगात्रा । बत्कण्ठी । ऋश्यकण्ठा । इत्यत्र "नासिकोदर°" [३९] इत्यादिना वा ङीः ॥ पूर्वेण सिद्धे नियमार्थमिदम् । तेन नासिकोदराभ्यामेव बहुस्वराभ्यामोष्ठादिभ्य एव संयोगोपान्त्येभ्यः स्यान्नान्येभ्यस्तेन हलचिबुकेत्यादौ बहुस्वरात्कृशगण्डेत्यादौ च संयोगोपान्त्यान्न स्यात् ॥ केचित्तु दीर्घजिह्वशब्दादपीच्छन्ति । दीर्घजिह्वी दीर्घजिह्वा ॥

दात्रनखी सूर्पनखा । ऋक्षीमुखी ओतुमुखा । अत्र "नख°" [४०] इत्यादिना वा ङीः । अनाम्नीति किम् । वज्रणखा । कालमुखा ॥

दीर्घपुच्छी ऋजुपुच्छा । इत्यत्र "पुच्छात्" [४१] इति वा ङीः ॥

कबरपुच्छ्यैः । मणिपुच्छी । विषपुच्छी । शरपुच्छ्यः । इत्यत्र "कबर°" [४२] इत्यादिना ङीः ॥

सुपर्णपक्ष्यः । गोपुच्छीम् । इत्यत्र "पक्षाच्च°" [४३] इत्यादिना ङीः ॥

समरक्रीतीम् । इत्यत्र "क्रीतात्°" [४४] इत्यादिना ङीः ॥

---

१ ए सी डी °क्ता यथा°. २ ए बी सी ऊर्द्धमु. ३ बी °दराः । ४ बी °गात्रीः अ°. ५ ए सी डी ऋस्यक. ६ डी °पान्त्येभ्यः°. ७ ए सी °त्कृशेग°. ८ सी °ह्वी । दा°. ९ डी °ङीः । सुप°. १० बी °च्छय । म°. ११ ए सी °च्छी । श°. १२ ए सी °पुच्छः । इ°.

रुधिरैर्विलिप्ती रजोविलिप्ताभूद्द्यौर्दन्तकृताथ दन्तजाता ।
दन्तमिता गण्डशुष्क्यकाण्डे दन्तप्रतिपन्ना च दन्तिपङ्क्तिः ॥ ६४ ॥

६४. अथ तथा रजोविलिप्तानल्पेन रेणुना लिप्ता द्यौर्व्योमाल्पेन रुधिरेण विलिप्यते स्म रुधिरविलिप्तीव रुधिरविलिप्त्या रक्ताभूत् । तथा दन्तिपङ्क्तिश्चाकाण्डे प्रस्तावे गण्डौ शुष्कौ यस्याः सा गण्डशुष्की निर्मदाभूत् । कीदृक् । दन्तौ जातौ निष्पन्नौ यस्याः सा । अनेन मत्कुणत्वनिरासः । तथा दन्तौ मितौ परिमाणोपेतौ न ह्रस्वौ नातिदीर्घौ यस्याः सा । तथा दन्तप्रतिपन्ना दन्तशब्देनात्र दन्तगुणविशिष्टौ दन्तौ गृह्येते न सामान्येन । ततो दन्तौ दन्तगुणोपेतौ दन्तौ प्रतिपन्नौ परीक्षकैरङ्गीकृतौ यस्याः सा सर्वसल्लक्षणोपेतदन्तेत्यर्थः । अत एव दन्तौ कृतौ स्वर्णपट्टमठनतीक्ष्णीकरणादिना संस्कृतौ यस्याः सा । अनेन मूर्धाभिषिक्तत्वोक्तिः । पट्टहस्तिनां ह्यकाण्डे मदशोषो महारिष्टसूचकः ॥

रुधिरैर्विलिप्ती । इत्यत्र "कादल्पे" [४५] इति ङीः ॥ अल्प इति किम् । रजोविलिप्ता ॥

गण्डशुष्की । इत्यत्र "स्वाङ्गादेः०" [४६] इत्यादिना ङीः ॥ कृतादिवर्जनं किम् । दन्तकृता[5] दन्तमिता[6] । दन्तजाता । दन्तप्रतिपन्ना ॥

मांसेष्ट्या शोणितेष्ट्योच्चैर्गृध्राल्या बहुयातयोपरिष्टात् ।
अजिनच्छन्नेव वाहिनी सा तिष्ठत्पतिरपि नष्टपत्न्यलक्षि ॥ ६५ ॥

६५. सा ग्राहारिसत्का वाहिनी चमूस्तिष्ठत्पतिरपि विद्यमानग्राहारिलक्षणस्वामिकापि नष्टपत्नीव व्यपगतस्वामिकेवालक्षि लोकैर्ज्ञाता ।

१ ए सी °रवलि°.

१ बी °सी रु°. २ ए सी डी मूर्धाभि°. ३ ए सी °क्त्वाक्तिः। ४ ए सी °रवलि°. ५ सी °कृताः। द°. ६ सी °मिताः। द°. ७ ए सी डी °ली व्यवप°.

यतो गृध्राल्या दूरदृक्पक्षिश्रेण्या कर्त्र्या गृध्रालेर्बाहुल्येनान्योन्यं सान्द्रत्वादजिनं चर्म च्छन्नं परिहितं येया सेव । यस्याः पतिर्न स्यात्सैव ह्यजिनं परिधत्ते । कीदृश्या गृध्राल्या । उच्चैरत्यर्थं मांसमिष्टं यस्यास्तया । तथा शोणितमिष्टं यस्यास्तया । अत एवोपरिष्टात्सैन्यस्योपरि बहु यातं भ्रमणं यस्यास्तया ॥

मांसेष्टया शोणितेष्टया । इत्यत्र "अनाच्छाद°" [४७] इत्यादिना वा ङीः ॥ अनाच्छादग्रहणं किम् । अजिनच्छन्ना ॥ जात्यादेरिति किम् । बहुयातया ॥

नष्टपत्नी तिष्ठत्पतिः । इत्यत्र "पत्युर्नः" [४८] इति वा ङीरन्तस्य नश्च ॥

परिधिमती देवतोस्रपत्नी द्युपतिरभूद्भवभालदृक्सपत्नी ।
अतिपतयो या न जातु पूर्वं ता राज्ञां पत्न्योतिपत्न्य आसन् ६६

६६. उस्रपत्न्युस्राणां किरणानां पतिः स्वामिनी द्युपतिर्व्योमस्वामिनी देवतार्कलक्षणाभूत् । कीदृक् । परिधिमती परिवेषान्विता । तथा समानः पतिरस्याः समानस्य पतिरिति वा सपत्नी भवभालदृशो रुद्रललाटाक्ष्णः सपत्नी लक्षणया सदृशी पिङ्गातिसंतापिका च । रविर्हि परिधिमान्पिङ्गोतिसन्तापकश्चारिष्टाय स्यात् । तथा या राज्ञां पत्न्यो भार्या जातु कदाचिदप्यतिपतयो भर्तारमतिक्रान्ता नासन्कुलाङ्गनात्वेन याः पतिच्छन्दोनुवर्तिन्य आसन्नित्यर्थः । ता अतिपत्न्यो भर्तारमतिक्रान्ता दुर्विनीता आसन् । एतदप्यरिष्टम् ॥

उस्रपत्नी द्युपतिः । इत्यत्र "सादेः" [४९] इति वा ङीर्नश्चान्तादेशः ॥ मुख्यादित्येव । अतिपतयः ॥ गौणादपि केचित् । अतिपत्न्यः ॥

सपत्नी । इत्यत्र "सपत्न्यादौ" [५०] इति ङीर्नश्चान्तादेशः ॥

पत्न्यः । इत्यत्र "ऊढायाम्" [५१] इति ङीर्नश्चान्तादेशः ॥

---

१ प सी डी °र्त्र्यां घृध्रा°. २ प सी डी यथा से°. ३ सी डी °व्योमस्वा°. ४ सी °दृशा र°. ५ बी °का वा । र°. ६ बी °था रा°. ७ प सी °पतयो.

पाणिगृहीतीस्ततर्जुरन्तर्वत्नीः पतिवत्नीष्वयोग्यमेके ।
केपि करात्तीर्धृताश्चलास्तु प्लवगीवद्वृषलीरिव प्रजघ्नुः ॥ ६७ ॥

६७. एके भटा अन्तर्मध्ये गर्भोस्त्यासां ता अन्तर्वत्नीर्गुर्विणीः पाणिगृहीतीरूढास्ततर्जुर्निर्भर्त्सयामासुः । कथम् । पतिरस्त्यासां तासु पतिवत्नीषु जीवत्पतिकास्वयोग्यं हे रण्डे किमित्यधुना रोदिषीत्यादि पतिविनाशसूचकोत्त्यानुचितं यथा स्यादेवम् । एतदपि महारिष्टम् । तुः पुनरर्थे । केपि भटाः पुनः करात्तीरूढा वृषलीरिव दासीरिव प्रजघ्नुर्युद्धविघ्नभूता इति कोपाच्चपेटादिना निर्दयमताडयन् । यतः प्लवगीवद्वानरीरिव धृताञ्चला युद्धगमननिषेधायावष्टब्धपटप्रान्ताः । अञ्चलधरणेन स्खलनं भार्याहननं च द्वयमप्यरिष्टम् ॥

शूद्राश्च क्षत्रियाश्च विभ्युर्यद्यूकाः पत्यंशुकेषु यच्च ।
जयदा क्षणपाक्यथाखुकर्णी गोवाली नष्टाथ शालपर्णी ॥६८॥

६८. यद्यस्माद्धेतोर्यूकाः पत्यंशुकेष्वभवन् यच्च यस्माद्धेतोश्च । जयदेति सर्वपदेषु योज्यम् । जयदा विजयकारिणी क्षणपाक्यथ तथाखुकर्णी तथा गोवाल्यथ तथा शालपर्णी च नष्टा । एवंनाम्न्य ओषध्यो गतास्तस्माद्धेतोः शूद्राश्च मिश्रजातिस्त्रियश्च क्षत्रियाश्च क्षत्रियजातिस्त्रियश्च बिभ्युर्महारिष्टान्येतानीति मनसि चुक्षुभुः ॥

पाणिगृहीतीः । करात्तीः । इत्येतौ "पाणिगृहीती" [५२] इति कथन्तौ निपात्यौ ॥

पतिवत्नीषु । अतर्वत्नीः । इत्येतौ "पतिवत्नी°" [५३] इत्यादिना निपात्यौ ॥

---

१ सी °भ्युका:. २ बी शालिप°.

---

१ सी °म् । तु पु°. २ बी शालिप°. ३ ए सी क्थन्तौ नि°. ४ ए सी °ना निपा°.

वृषली । वृषलीः । इत्यत्र "जातेः०" [५४] इत्यादिना ङीः ॥ जातेरिति किम् । शतांशलाः । अयोन्तेति किम् । क्षत्रियाः ॥ नित्यस्त्रीवर्जनं किम् । यूकाः ॥ शूद्रवर्जनं किम् । शूद्राः ॥

क्षणपाकी । आखुकर्णी । शाकपर्णी । गोवाली । इत्यत्र पाककर्ण°" [५५] इत्यादिना ङीः ॥

शतपुष्पां जिष्णुशङ्खपुष्पीं प्राक्पुष्पां जयदां च काण्डपुष्पाम् ।
सत्पुष्पां प्रान्तपुष्पयामा वासीफल्या सार्धमेकपुष्पाम् ॥ ६९ ॥
भल्लाफलया समं जयिन्या पिण्डफलैकफले च संफलां च ।
अजिनफलादर्भमूल्यमूलाः सशणफला अदहन्पतन्त्य उल्काः ७०

६९. ७०. स्पष्टे । किं तु । शतपुष्पादीनां निरुक्तिः स्वयं ज्ञेया । जिष्णुर्जयनशीला या शङ्खपुष्पी ताम् । जयदामिति सर्वेषु द्वितीयान्तेषु पदेषु योज्यम् । प्रान्तपुष्पयामा सह । जयिन्या विजयवत्या भल्लाफलया । सह शणफलया वर्तन्ते यास्ताः । अजिनफलादर्भमूल्यमूला इत्यत्र द्वन्द्वः । शतपुष्पाद्याः शणफलान्ताः सर्वा एता जयकारिण्य ओषध्योत एव जिष्णु जयदां जयिन्येति विशेषणानि कासांचिदुक्तानि । यासु चैवं विशेषणं नास्ति तासु स्वयमभ्यूह्यम् । उल्कापातो जयदौषधिदाहश्च द्वावप्यरिष्टे ॥

शङ्खपुष्पीम् । इत्यत्र "असत्काण्ड°" [५६] इत्यादिना ङीः ॥ सदादिप्रतिषेधः किम् । सत्पुष्पाम् । काण्डपुष्पाम् । प्रान्तपुष्पया । शतपुष्पाम् । एकपुष्पाम् । प्राक्पुष्पाम् ॥

---

१ ए °यदा च. सी यदा चं का°. २ ए सी °पुष्पा । भ°.

---

१ ए सी °ताशला°. २ सी °यावेति°. ३ बी शालिप°. ४ ए सी यासु चै°. ५ सी °इ य°.

वासी[1]फल्या । इत्यत्र "असंभस्त्रा°" [५७] इत्यादिना ङीः ॥ समादि-प्रतिषेधः किम् । संफलाम् । भस्त्राफलया । अजिनफला । एकफ[2]ले ॥ एकाजे-ऽप्यन्येके । शणफलाः । पिण्डफला ॥

दर्भमूली । इत्यत्र "अनञो मूलात्" [५८] इति ङीः । अनञ इति किम् । अमूलाः ॥

भ्र[1]ष्ठीगोपालिकाकुसीदायीकुसितायीहृद्वृषाकपायीम् ।
गृध्नुर्मेने न तान्यरिष्टान्यग्नायीपूतक्रताय्यरिः सः ॥ ७१ ॥

७१. स आहारिर्दोर्मे[3]दात्तानि पूर्वोक्तान्यरिष्टान्यशुभसूचकानुत्पातान्[4] मेनेवज्ञातवान् । कीदृक्[5] । भ्रष्ठोऽभ्रग ऋषिर्वा[6] तस्य भार्या भ्रष्ठी । गोपालको बल्लव ऋषिर्वा तस्य भार्या गोपालिका । कुसीदकुसितौ ऋषी तयोर्भार्ये कुसीदायी कुसितायी च द्वन्द्वे ता हरति शील[7]भ्रंशा[8]र्थमप-[9]हरति यः सः । तथा वृषाकपायीं वृषाकपे[10]र्विष्णोर्भार्या लक्ष्मीं गृध्नु-रिच्छुः । तथाग्नेर्भार्याग्नायी स्वाहा पूतक्रतोर्ऋत्विजो भार्या पूतक्रतायी द्वन्द्वे तयोररिः ॥

भ्रष्ठी । इत्यत्र "धवाद्°" [५९] इत्यादिना ङीः ॥ अपालकान्तादिति किम् । गोपालिका ॥

पूतक्रतायी । वृषाकपायीम्[11] । [12]अग्नायी । कुसितायी । कुसीदायी । इत्यत्र "पूतक्रतु°" [६०] इत्यादिना ङीरैश्चान्तादेशः ॥

---

१ बी पृष्ठी°.

---

१ ए सी डी °फला । इ°. २ ए सी °फले । ए°. ३ ए सी °दात्तानि. ४ ए सी मेदेव. ५ ए सी °क् । पृष्ठो°. ६ ए सी °र्या पृष्ठी ।. ७ ए सी °लभ्रंशा°. ८ बी भ्रंसार्थं°. ९ ए सी °हति. १० ए सी °ष्णो भार्या. ११ ए सी °यी । अ°. १२ बी अग्नयी ।.

मनुरिन्द्राण्यां मुदा मनाव्यां वरुणानी च मृडान्यथो मनाय्याम्।
शर्वाणीशस्तदा भवान्यां रुद्राणीशे चास्य रिष्टमाख्यत् ॥ ७२ ॥

७२. तदा रिष्टभवनकालेस्य ग्राहारे रिष्टं जातावेकवचनम्। अशुभसूचकोत्पातान्मनुर्मन्वृषेर्भार्या मुदा दानववधसंभावनोद्भूतेन हर्षेण हेतुनेन्द्राण्यामिन्द्रभार्यायामाख्यदवदत् । तथा मनाव्यां मनुभार्यायां वरुणानी[2] च वरुणभार्या च मुदाख्यत्। अथो तथा मृडानी मृडभार्या गौरी मनाय्यां मुदाख्यत्। तथा[3] शर्वाणीशः शंभुर्भवान्यां गौर्यां मुदाख्यत्। रुद्राणी च गौरी चेशे शंभौ मुदाख्यत्। स्त्रियो हि जातिप्रत्ययेन दंपती च स्नेहानुबन्धेन हर्षवार्ता मिथः प्रायेणाख्यान्ति। अनया च देवताभिररिष्टोत्त्यारिष्टानां सत्यभावित्वोक्तिः ॥

धृतवणिजानीयुताहिताग्न्यान्याचार्यानीश्वासवत्प्रचण्डैः।
पवनैर्मुमुदे स मातुलानीदुहितृपतिर्हरिमातुलीशतुल्यः ॥ ७३ ॥

७३. मातुलस्य भार्या मातुलानी तस्या दुहिता पुत्री तस्याः पतिर्भर्ता। यदि भवति तदा सौराष्ट्रैरवश्यं मातुलानीपुत्र्येव परिणीयत इति देशाचारः। स ग्राहारिः पवनैर्वातैः कृत्वा मुमुदे। किंभूतैः। धृता मार्गे देशपुरादिभङ्गेन बन्दीकृता वणिजानीयुता वणिग्भार्यासहिता या आहिताग्न्यान्याचार्यान्योग्निहोतृभार्या आचार्यभार्याश्च तासां ये श्वासा दुःखादीर्घसंतप्ता निश्वासास्तद्वत्प्रचण्डैरत्यन्तमुष्णत्वादीर्घत्वाच रौद्रैरपि। यतः कीदृक्। हरेर्विष्णोर्मातुलः कंसो देवकीभ्रातृत्वात्तस्य भार्या हरिमातुली जीवयशा लौकिकमतेस्तिस्वस्त्याख्ये द्वे भार्ये तयोरीशो भर्ता कंस एव दैत्यत्वात्तत्तुल्यः। ग्राहारिर्यथा दैत्यत्वात्तदा बन्दी-

१ बी सी °ताग्नान्या°. २ ए सी °वत्प्रचण्डै। ३ ए सी °हितृप°.

१ बी °दा अरि°. २ ए सी डी °नी व°. ३ सी °था सर्वा°. ४ ए °सः पु°. ५ सी °वश्ये मा°. ६ ए सी °पुत्रेव. ७ डी °चार्या°. ८ सी °मतेस्ति°.

कृतानां वणिजान्यादीनां प्रचण्डैर्निःश्वासैरहृष्यत्तथारिष्टसंसूचकत्वात्तदा प्रचण्डीभूतैरपि वातैरहृष्यदित्यर्थः ॥

रामाचार्य्याः स याज्ञवल्क्योपाध्याय्या अभिमन्युमातुलायाः।
आयतनान्याबभञ्ज पार्थोपाध्यायानीपुत्ररोषणो यान् ॥ ७४ ॥

७४. स प्राह्वारिर्यान्सन्नायतनानि प्रासादान्बभञ्ज पातितवान्। कासाम्। रामस्य परशुरामस्याचार्यः शंभुस्तस्य भार्या रामाचार्यो गौरी तस्याः। तथा यज्ञवल्कस्यापत्यं वृद्धं गर्गादित्वाद् [६. १. ४१] यञि याज्ञवल्क्यः स्मृतिकारस्तस्योपाध्यायो रविस्तस्य भार्या याज्ञवल्क्योपाध्यायी राज्ञीदेवी तस्याः। तथाभिमन्युरर्जुनसुतस्तस्य मातुला लक्ष्मीर्बलाच्युतयोर्भगिन्या अर्जुनपत्न्याः सुभद्राया अपत्यत्वेन हरेर्भागिनेयत्वात्तस्याश्च। यतः पार्थोर्जुनस्तस्योपाध्यायो द्रोणाचार्यस्तस्य भार्या पार्थोपाध्यायानी कृपी तस्याः पुत्रोश्वत्थामा तद्वद्रोषणोतिकोपनः॥

प्रासादान्पातयन्स नोपाध्यायाचार्ये मन्यते स्म दृप्तः।
सूरीतनयौजसोस्य किं वा सूर्याणीसूनोश्च मान्यमस्ति ॥ ७५ ॥

७५. दृप्तत्वात्स प्राह्वारिः प्रासादान्देवगृहाणि पातयन्सन्नुपाध्यायाचार्ये देवायतनभङ्गो दुरन्त इत्युपदेशिके स्वस्य पाठकव्याख्यातृभार्ये न मन्यते स्म तदुपदेशावगणनेनावगणितवान्। वा यद्वा। अस्य प्राह्वारेः सूर्यस्य भार्या सूर्याणी राज्ञीदेवी तस्याः सूनोश्च यमस्य च किं मान्यं गणनीयमस्ति। यतः सूर्यस्य भार्या मानुषी कुन्ती सूरी तस्यास्तनयः कर्णस्तस्येवौजो बलं यस्य तस्य कर्णस्येव दुर्नयत्वाल्लोकप्रमाथिबलस्येत्यर्थः ॥

१ ए सी °वल्कोपा°.

१ बी पातित°. २ बी °र्या यज्ञ°. ३ ए बी सी °क्ष्मी बला° ४ ए सी °देवीः त°. ५ सी °स्ति परं सू°. डी °स्ति याः सू°. ६ ए सी °वदुर्णस्येव दु°. ७ ए सी °त्वाल्लोक°.

सूर्यातनयातटे हिमानीशीतयवानीतृप्तदन्तिदानैः ।
यवनान्या लेखयन्प्रशस्तिं न्वेषोरण्यानीः क्षणाल्ललङ्के ॥ ७६ ॥

७६. एष ग्राहारिररण्यानीर्महारण्यानि क्षणाल्ललङ्के । कीदृक्सन् । महद्धिमं हिमानी तया यच्छीतं शीतस्पर्शस्तेन दुग्धत्वाद्या यवानी दुष्टो यवस्तेन तृप्ता ये दन्तिनस्तेषां यानि दानानि मदास्तैः कर्तृभिर्य- वनानामियं लिपिर्यवनानी । उक्तार्थत्वात् "तस्येदम्" [६.३. १६०.] इत्यण्न । तया देशभेदलिप्या कृत्वा प्रशस्तिं वर्णनाकाव्यमर्थात्स्वस्य लेखयन्नु । क्व । सूर्यस्य भार्या सूर्या राज्ञीदेवी तस्यास्तनया सुराष्ट्रेषु प्रसिद्धा भद्राख्या नदी तत्तटे । मषीमेचकानां करिमदानां लिप्यनुका- रेण भद्रातटे पातेनाहो ग्राहारेर्दिग्गजानुकारिणो गजा अहो ग्राहारेः सैन्यसामग्रीत्यादिप्रशंसाहेतुत्वादेवमुत्प्रेक्षा ॥

मनाय्याम् मनाव्याम् मनुः । इत्यत्र "मनोरौ च वा" [६१] इति वा ङीरौदैवाग्न्तादेशौ ॥

वरुणानी । इन्द्राण्याम् । रुद्राणी । भवान्याम् । शर्वाणी । मृडानी । इत्यत्र "वरुणेन्द्र°" [६२] इत्यादिना ङीरान् चान्तादेशः ॥ कश्चित्वाहिताग्न्यानी वणिजामीत्यादावपीच्छति ॥

मातुलानी । मातुली ॥ क्षुद्रादित्वाण्णत्वाभावे । आचार्यानी । रामाचार्य्याः । पार्थोपाध्यायानी । उपाध्यायाः । इत्यत्र "मातुला°" [६३] इत्यादिना ङीरान् चान्तः ॥ अन्ये तु मातुलायाः ॥ आचार्ये । उपाध्याया । इत्यपीच्छन्ति तदर्थं ङीरपि विकल्पनीयः ॥

---

१ ए सी °ण्यानी क्ष°.

---

१ ए सी यपच्छी°. २ ए सी °स्तै क°. ३ बी °र्यवानान्या यव°. ४ ए सी °ीस्तस्या°. ५ बी °रेणोज्वले भ°. ६ बी °रे दिग्ग°. ७ बी म् । सर्वा°. ८ सी डी °ध्यायाः । इ°. ९ सी डी °चार्यये । उ°.

सूर्याणी सूर्या । इत्यत्र "सूर्याद्°" [६४] इत्यादिना वा ङीरान् चान्तः ॥ देवतायामिति किम् । सूरी ॥

यवानी । यवनान्या । अरण्यानीः । हिमानी । इत्यत्र "यव°" [६५] इत्यादिना ङीरान् चान्तः ॥

आर्याणी क्षत्रियाण्यभीः किं शुभचातुर्यात्क्षत्रिया किमार्या ।
इत्यूहांचक्र आत्मसैन्ये धृतवात्सीवात्स्यायनीपतिः सः ॥ ७७ ॥

७७. वत्सस्यर्षेरपत्यं वृद्धं स्त्री वात्सी । एवं वात्स्यायनी तस्याः पतिर्भर्ता वात्स्यायनीपतिः । द्वन्द्वे धृतौ बन्दीकृतौ वात्सीवात्स्यायनीपती येन स तथा स ग्राहारिरात्मसैन्य इत्यूहांचक्रे वितर्कितवान् । किमित्याह । अभीर्[1]निर्भया पराक्रमिण्यार्याणी[2] प्रेक्षापूर्वकारिणी वणिगादिजातिः स्त्री किं क्षत्रियाणी क्षत्रियजातिः स्त्री वर्तते भीरुत्वा[3]देवमाशङ्का । क्षत्रियाणी ह्यभीः स्यात् । तथा क्षत्रिया क्षत्रियजातिः स्त्री शुभचातुर्याच्छुभं परिणामे हितं यच्चातुर्यं पर्यालोचितकारित्वं तस्माद्धेतोः किमार्या वणिगादिजातिः स्त्रीति । ग्राहारिः स्वसैन्य आर्या अपि पराक्रमिण्यः क्षत्रिया अपि प्रेक्षापूर्वकारिणीः पश्यन्मत्सैन्ये स्त्रियोपि बुद्धिपराक्रमपात्राण्यतः केनाप्यहं न जेय्य इति स्वचित्ते परिभावितवानित्यर्थः ॥

आर्याणी आर्या । क्षत्रियाणी क्षत्रिया । इत्यत्र "आर्यक्षत्रियाद्वा" [६६] इति वा ङीरान् चान्तः ॥ अधवयोगेयं विधिः ॥

वात्सी वात्स्यायनी । इत्यत्र "यञ°" [६७] इत्यादिना ङीडायन् चान्तो वा ॥

---

१ प सी °त्स्यानी°.

---

१ बी °भीनिर्भ°. २ सी णीक्षा°. ३ बी °भीकत्वा°. ४ बी °मिणी क्ष°. ५ प सी जय्य इ°. ६ सी °र्यांक्षणीः । आ°. ७ सी वात्साय°.

लौहित्यायन्यपेहि सांशित्यायनि कात्यायिन्ययि त्वरस्व ।
शाकल्यायन्ययस्व गौकक्ष्यायणि गौकक्ष्यासुतेपसर्प ॥ ७८ ॥
आवट्यापुत्रि तूर्णमावट्यायनि कौरव्यायणि व्रजेति ।
अनुवनमिह यात्युवाच भीता माण्डूकायन्यासुरायणी च ॥ ७९ ॥

७८,७९. कण्ठ्ये । किं तु । लोहित-संशित-कत-शकल-गोकक्ष-अवटा ऋषिभेदास्तेषामपत्यानि वृद्धानि स्त्रियो गर्गादित्वाद् [६.१. ४२] यञि लौहित्यायन्यादय[३] ऋषिपुत्र्यो गौकक्ष्याद्याः सुताः एवमावट्यापुत्री तासां संबोधनानि । अयस्व गच्छ । अपसर्पोपसर । कौरव्यायणि कुरोः क्षत्रियस्यापत्यं स्त्री "कुर्वादेर्ञ्यः" [६.१. ९९] इति "दुनादि°" [६.१.११७] इत्यादिना वो[६] ञ्यः । अनुवनं वनस्य समीप इह प्राहारौ याति सति भीता सती माण्डूकायनी मण्डूकस्य द्विजस्यापत्यं स्त्री "पील°" [६.१. ६८.] इत्यादिनाण् । आसुरायणी चासुरस्यर्षेरपत्यं स्त्री च बाह्वादित्वाद्[८] [६.१. ३२] इञ् । इति पूर्वोक्तमुवाच ॥

लौहित्यायनि[१] । सांशित्यायनि । कात्यायनि । शाकल्यायनि । अत्र "लोहितादि°" [६८] इत्यादिना ङीडायन् चान्तः ॥

गौकक्ष्यायणि गौकक्ष्या[११] । आवट्यायनि आवट्या । अत्र "चावटाद्वा" [६९] इति वा ङीडायन् चान्तः[१२] ॥

कौरव्यायणि । माण्डूकायनी । आसुरायणी । इत्यत्र "कौरव्य०" [७०] इत्यादिना ङीडायन् चान्तः ॥

---

१ प सी डी यञि लौ°. २ प बी सी डी °लात्या°. ३ प सी डी या सु°. ४ बी °स गौकक्ष्यासुत प°. ५ बी डी °पत्यं स्त्रि. ६ प सी वा ञ्यः ।. ७ बी °ण् । असु°. ८ प सी °दित्वादि°. ९ डी लोहि°. १० प सी डी °त्यायिनि ।. ११ प सी °कक्षा । आ°. १२ डी °न्तः ॥ सौतं°.

सौतंगम्या हृता नगर्या वाराह्या दाक्षीश्च विप्रबन्धूः ।
तित्तिरिवन्न्यङ्कुवश्च बध्नन्कर्कन्धूवनमत्यगात्स लुब्धः ॥ ८० ॥

८०. स प्राहारिः[1] कर्कन्धूवनं बदरीवणमत्यगादत्यक्रामत्[2] । कीदृक्सन् । लुब्धः[3] स्त्रीलम्पटोऽत एव वाराह्या वराहस्यर्षेरपत्यानि स्त्रीः । बाह्वादित्वाद् [६.१.३२] इञ् । दाक्षीर्दक्षर्षिपुत्रीर्विप्रो बन्धुर्जातिरेवासां ता विप्रबन्धूश्च जात्यापि या ब्राह्मण्यस्ताश्चेत्यर्थः । बध्नन्भार्याकर्तुं बन्दौ[4] क्षिपन् । कीदृशीः । सौतङ्गम्याः सुतंगमेनर्षिणा निर्वृत्ताया: सुतंगमादेरिञ् [६.२. ८५] । नगर्याः पुराद्धृता अपहृताः । तित्तिरिवद्यथा तित्तिरीः पक्षिणीभेदान् न्यङ्कुवच्च यथा न्यङ्कूंश्च[5] मृगीभेदांश्च बध्नन् लुब्धो व्याधः कर्कन्धूवनमत्येति ॥

पट्वुरज्जुयतामिव स्खलन्तीं पश्यन्सोऽध्वर्यु कमण्डलूं च ।
कोमलबाहुं च मद्रबाहूं कद्रूजसमः प्राप जम्बुमाल्याम् ॥ ८१ ॥

८१. स प्राहारिर्जम्बुमाल्यां नद्यां प्राप । कीदृक्सन् । कद्रूजसमः कद्वा जातः कद्रूजः सर्पस्तेन क्रूरत्वादिधर्मैः[6] सदृशोऽत एवाध्वर्यु यजुर्वित्स्त्रियं कमण्डलूं चैवंनाम्नीं स्त्रियं च कोमलबाहुं मृदुभुजां मद्रबाहूं चैवंनाम्नीं स्त्रियं च पश्यन् । कीदृशीम् । पट्वुरज्जुयतामिव[7] यथा गाढश्रृङ्खलबद्धा[8] स्खलत्येवं तद्भयात्पदेपदे स्खलन्तीम् । सर्पादपि स्त्रियो गच्छन्त्योऽतिभयेन स्खलन्ति ॥

सौतंगम्या । अत्र "इञ इतः" [७१] इति ऊीः ॥ इञ इति किम् । इनादेशात्स्यान्मा भूत् । वाराह्याः ॥

दाक्षीः । इत्यत्र "नुर्जातेः" [७२] इति[9] ऊीः ॥ नुरिति किम् । तित्तिरि[10] ॥

---

१ ए सी °हारिक°. २ बी °दत्रक्रा°. ३ ए सी लुब्धस्त्री°. ४ ए सी डी निरस्त्रा°. ५ बी न्यङ्कूंश्च. ६ डी °धूर्धम°. ७ ए सी °धर्मैः स°. ८ सी °रज्जूय°. ९ ए सी °ति नीः ॥ नु°. १० ए सी डी °रि । मद्यप°.

विप्रबन्धूः । अप्राणिनश्च । कर्कन्धूः । इत्यत्र "उतोऽप्राणिनश्च०" [७३] इत्यादिनोङ् ॥ अप्राणिनश्चेति किम् । न्यङ्कु ॥ आतेरित्येव । पटु ॥ अयुरज्ज्वादिभ्य इति किम् । अध्वर्युम् । रज्जु ॥

मद्रबाहूम् । कद्रू । कमण्डलूम् । इत्यत्र "बाह्वन्त०" [७४] इत्यादिनोङ् । नाम्नीति किम् । कोमलबाहुम् ॥

करभोरु सहोरु संहितोरुवामोर्वावशफोरु लक्ष्मणोरु ।
सहितोरु मुखं वरोरुनारीश्वश्रूसख्यभ्यर्णगा इहाध्वम् ॥ ८२ ॥

युवते पङ्गूनु दैवदत्त्ये वाराहे वाराहि दाक्षि यूनि ।
वासिष्ठी कापटव्युपान्ते माध्वं पश्यत बाहुविक्रमं नः ॥ ८३ ॥

पौणिक्ये कौडय[2] एहि लाड्ये सूत्ये भोज्ये तिष्ठ मुञ्च भोजे ।
व्रज सूते दैवयज्ञि काण्ठेविद्ध्ये काण्ठेविद्ध्यनुप्रपन्ने ॥ ८४ ॥

धीरा भव सात्यमुग्रि दैवयज्ञ्यासखि मास्स्वातिसात्यमुग्र्या ।
शौचेर्वृक्ष्येथ शौचिवृ[3]क्ष्याळीत्यूचुः प्रयुयुत्सवः स्वकान्ताः ॥ ८५ ॥

८२–८५. प्रेयुयुत्सवो योद्धुमिच्छवो भटाः स्वकान्ता इत्यूचुः । यथा हे करभोरु करभः कनिष्ठाङ्गुलेर्मणिबन्धस्य चान्तरं स इव मृदू निर्मलौ वोरू सक्थी[3] यस्याः । तथा हे सहोरु

सह संबन्धसादृश्ययौगपद्यसमृद्धिषु ।
साकल्ये विद्यमाने च

इति[6] वचनात्सह सदृशावेकादृशौ समृद्धौ वोरू यस्याः । तथा हे सं-

१ ए सी °हाड्ड°. डी हाड्डू°. २ ए सी कौड ए°. ३ ए सी डी वृक्षाळी°.

१ ए सी डी °बाहुम् ।. २ ए सी डी प्राशु°. ३ बी सक्थनीव°. ४ ए सी डी °स्याः । यथा. ५ ए सी डी °ह ष°. ६ बी °ति वाच°.

हितोरूवामोर्वौ संहितौ जानुकटीभ्यां सह सुसंधानावूरू यस्याः सा च वामोरूश्च चारुसक्थिका च । तथा हे अश्लफोरु अनिन्द्यसक्थिके हे [1]लक्ष्मणोरु लक्ष्मीरस्त्यनयोः "लक्ष्म्या अनः" [७.२. ३२] इत्यनेन लक्ष्मणौ श्रीमन्तावूरू यस्याः । तथा हे सहितोरु सुघटितोरु सुखं यथा स्यादेव-मिह प्रदेशे वरो[2]रुनारीश्वश्रूसख्यभ्यर्णगाः प्रशस्योरूणां वनिताश्वश्रू-वयस्यानां निकटस्था यूयमाध्वं तिष्ठत । तथा हे युवते तरुणि हे दैवदत्त्ये देवदत्तस्य पौत्रि हे वाराह्ये वराहस्य पौत्रि हे[3] वाराहि वराहपुत्रि हे यूनि तरुणि दाक्षि दक्षपौत्रि वसिष्ठस्यापत्यं पौत्रादि स्त्री "ऋषिवृष्णि०" [६.१. ६०] इत्यादिनाणि वासिष्ठी कपटोरपत्यं वृद्धं स्त्री कापटवी । द्वन्द्वे तयोः समीपे पङ्गूनुं पादरहितेव माध्वं मा तिष्ठत । तर्हि किं कुर्म इत्याहुः । नोस्माकं बाहुविक्रमं पश्यत । तथा हे पौणिक्ये पुणि-कस्य पौत्रि "अत इञ्" [६.१. ३०] एवं हे कौ[6]ड्ये च क्रोडस्य पुत्रि त्वं चैह्यागच्छार्थाद्रणभुवम् । तथा हे लाड्ये लाडपुत्रि हे सूत्ये प्राप्तयौवने स्त्रि यद्धाँ सूतसंबन्धिनि स्त्रि भोज्ये च भोजवंशजे क्षत्रिये त्वं च तिष्ठात्रै-वास्स्व । तथा हे भोजे भोजाख्ये स्त्रि मुञ्च त्यज प्रस्तावाद्रणे यियासुं माम् । तथा हे सूते प्रसूते कान्ते हे दैवयाज्ञि हे काण्ठेविद्ध्ये देवयज्ञस्य कण्ठेविद्धस्य च पुत्रि पौत्रि वा काण्ठेविद्ध्यनुप्रपन्ने च काण्ठेविद्धीमाश्रिते स्त्रि त्वं च व्रज गच्छार्थाद्रणाङ्गणम् । तथा हे सात्यमुग्रि सत्यमुग्रस्य पुत्रि पौत्रि वा धीरा निर्भया भव । हे दैवयज्ञ्यासखि दैवयज्ञ्याया वयस्ये त्वमतिसात्यमुग्र्या धैर्यात्सात्यमुग्र्यामतिक्रान्ता सती मास्स्व मा तिष्ठ धीरत्वाद्रणदर्शनाय प्रचलेत्यर्थः । शौचेर्वृक्ष्ये इति शौ[9]चेरिति गम्यपरत इत्यपेक्षया "प्रभृत्यन्यार्थ०" [२.२.७४.] इत्यादिना पञ्चमी । अत्र च शब्दार्थ-योरभेदाच्छौचिवृक्ष्य इति शब्देन वाच्यो योर्थः शुचिवृक्षापत्यस्त्रीरूपः

---

१ प सी लक्षणो°. २ प सी रोरुना°. ३ प सी हे वरा°. ४ सी दक्षिपौ°. ५ प सी तयो स°. ६ प सी कौडि च. ७ प सी °द्धासत्सं°. डी °द्धा तत्सं°. ८ प सी °यज्ञास°. ९ सी शौचरि°.

स शौचिवृक्ष्य इति शब्देनाभिमतस्तेन शौचेरिति परपश्चम्यन्तविशेषणं वृक्ष्ये इति शब्दसंबन्ध्यप्यर्थस्य स्याद्यथा समस्तवस्तुविस्तर[1] इत्यत्र विस्तरशब्दस्य वचनप्रथावाचकत्वेपि शब्दार्थयोरभेदादर्थप्रथायामुपन्यास इति । एवमग्रेप्येवंविधे प्रयोगे सर्वत्र ज्ञेयम् । ततः शौचेर्वृक्ष्ये इति कोर्थो हे शौचिवृक्ष्ये शुचिवृक्षस्य पुत्रि पौत्रि वाथ तथा हे शौचिवृक्ष्यालि शौचिवृक्ष्याः सखि त्वमप्यतिसात्यमुग्र्या[2] सती मास्स्वेति ॥

करभोरु[3] । सहितोरु[4] । संहितोरु । सहोरु । अशफोरु । वामोर्वौ । लक्ष्मणोरु । इत्यत्र "उपमान°" [७५] इत्यादिनोङ् ॥ उपमाद्यादेरिति किम् । वरोरुनारीत्यादि ॥

नारी । सखी । पङ्गुः । श्वश्रूः । इत्येते "नारीसखी°" [७६] इत्यादिना ङ्यूङन्ता निपात्याः ॥

युवते । इत्यत्र "यूनस्तिः" [७७] इति तिः ॥ यूनीत्यपि कश्चित् ॥

दैवदत्त्ये । वाराह्ये । इत्यत्र "अनार्षे°" [७८] इत्यादिनान्तस्य ष्यः ॥ अनार्षे[5] इति किम् । वासिष्ठी ॥ वृद्ध इति किम्[6] । वाराहि ॥ बहुस्वरेति किम् । दाक्षि ॥ गुरूपान्त्यस्येति किम् । कापटवी ॥

पौणिक्ये । इत्यत्र "कुलाख्यानाम्" [७९] इति ष्यः ॥

क्रौड्ये । लाड्ये । इत्यत्र "क्रौड्यादीनाम्" [८०] इति ष्यः ॥

भोज्ये । सूत्ये । अत्र "भोज°" [८१] इत्यादिना ष्यः ॥ क्षत्रियायुवत्योरिति किम् । भोजे सूते ॥

दैवयज्ञ्या दैवयज्ञि । शौचिर्वृ(चेर्वृ?)क्ष्ये शौचिवृक्षी । सात्यमुग्र्या सात्यमुग्रि । काण्ठेविद्ध्यो[7] काण्ठेविद्धी । इत्यत्रे[8] "दैवयज्ञि°" [८२] इत्यादिना वा ष्यः ॥ पक्षे सर्वत्र "तुर्जातेः" [२.४.७२] इति ङीः ॥

---

१ ए सी डी °रश°. २ ए सी डी °मुमास°. ३ डी °रु । सं°. ४ सी °तोरु । स°. ५ ए सी °नार्थ इ°. ६ ए सी डी °रे इति. ७ डी °ध्ये इ°. ८ डी °वृक्षी ।. ९ ए सी °विद्धे का°. १० बी °त्र देव°.

कौमुदगन्धीपतिः पुरोऽभूत्कौमुदगन्धीपुत्र आददेतः ।
कौमुदगन्ध्यापतिध्वजिन्यां कौमुदगन्धीबन्धुभिश्च वर्म ॥ ८६ ॥

८६. कौमुदगन्ध्या कुमुदगन्धेः कुमुदगन्धस्य वापत्यं स्त्री राज्ञी पतिः स्वामिनी यस्याः सा या ध्वजिनी चमूस्तस्यां कौमुदगन्धीपतिः कौमुदगन्ध्याया राज्ञ्या भर्ता पुरो प्राहारिसैन्यस्याग्रतो यतोऽभूदतोऽस्माद्धेतोः कौमुदगन्धीपुत्रः कौमुदगन्ध्याङ्गजो वर्मादद्दे जग्राह । तथा कौमुदगन्ध्या राज्ञी बन्धुर्येषां तैश्च कर्तृभिर्वर्माददे गृहीतम् । आदद इत्यत्र कर्तरि कर्मणि चात्मनेपदम् । अत्र च ध्वजिन्या राज्ञश्च स्त्रीपतित्वोक्त्या पुत्रस्य मातृपुत्रत्वोक्त्या च स्त्रिया इवाग्रसैन्यस्य भावी पराजयो व्यञ्जि ॥

कौमुदगन्धीपुत्रः । कौमुदगन्धीपतिः । इत्यत्र "ष्या पुत्र°" [८३] इत्यादिनाबन्तष्य ईच् ॥ तत्पुरुष इति किम् । कौमुदगन्ध्यापतिध्वजिन्याम् ॥ कौमुदगन्धीबन्धुभिः । इत्यत्र "बन्धौ°" [८४] इत्यादिनाबन्तष्य ईच् ॥

सौगन्धीमात आत्तधन्वा पाङ्कजगन्धीमातृभिः सहाभूत् ।
सौगन्ध्यामातदर्शनाद्यत्पाङ्कजगन्ध्यामातरोऽत्यहृष्यन् ॥ ८७ ॥

८७. सौगन्ध्यामातदर्शनात्सौगन्ध्या माता येषां भटानां तद्दर्शनात्पाङ्कजगन्ध्या माता येषां ते पाङ्कजगन्ध्यामातरो भटा यद्यस्माद्धेतोरत्यहृष्यन्सहायिलाभात्तुष्टाः । अतो हेतोः सौगन्धीमातः सौगन्ध्याजननीको भट आत्तधन्वा सन्पाङ्कजगन्धीमातृभिः पाङ्कजगन्ध्याजननी-

---

१ प सी °भूकौमु°. बी °भूत्कौमु°. २ डी °रोऽभ्यह°.

---

१ बी यस्या सा. २ प सी °न्धीपुः कौ°. ३ डी °यो व्यजि. ४ डी °रभ्यह°.

कैर्भटैः सह संयुक्तोभूत् । अत्र च भटाना मातृपुत्रत्वोक्त्या साहाय्यापेक्षोक्त्या च पराजेष्यमाणता व्यञ्जिता ॥

औद्गन्धीमातृकः पदे स्वे लघुमौद्गन्ध्यामातृकं निवेश्य ।
अद्रिचरीं व्यौहत द्विपालीं चलमत्सीनयनाप्सरोरिरंसुः ॥८८॥

८८. औद्गन्धीमातृको राजा स्व आत्मीये पदे स्थाने राज्ये लघुमौद्गन्ध्यामातृकं स्वानुजं निवेश्य संस्थाप्य द्विपालीं गजघटां व्यौहत युद्धाय व्यूहवतीं चक्रे । कीदृशीम् । अद्रौ चरत्यद्रिचरी तां विन्ध्याद्रिभवाम् । यतश्चलमत्सीवच्चञ्चलशफरीवल्लोलानि नयनानि यासां ता या अप्सरसस्ता रिरंसुः अन्तर्भूतण्यर्थत्वात्सकर्मकत्वे रमयितुमिच्छुः । "श्रितादिभिः" [३.१.६२] इति स: । रणे मरणाद्देवीबुभूषुरित्यर्थः ॥

सौगन्धीमातः सौगन्ध्यामात । पाङ्कजगन्धीमातृभिः पाङ्कजगन्ध्यामातरः । औद्गन्धीमातृकः औद्गन्ध्यामातृकम् । इत्यत्र "मात°" [८५] इत्यादिना-वन्तव्यो वेच् ॥

अद्रिचरीम् । इत्यत्र "अस्यं ङ्यां लुक्" [८६] इत्यस्य लुक् ॥ असेति किम् । द्विपालीम् ॥

मत्सी । इत्यत्र "मत्स्यस्य यः" [८७] इति यस्य लुक् ॥

जलमनुषीकाद्रवेय्युदीक्ष्यः सौरीं सौरीयो नु भां दधानः ।
आगस्तीयो नु सिन्धुराजः संनह्यागस्त्यां दिशि स्थितो भात्
॥ ८९ ॥

८९. मनुष्यो नार्यः कद्रवा अपत्यानि स्त्रियः शुभ्रादित्वात् [६.१.

---

१ प सी °चरी व्यौ°. २ प सी °रीं सूरी°. ३ प °राजसं° सी °राज्यं जसं°. ४ प सी °गस्त्यादिदि°.

---

१ बी °त्त्या सहा°. २ बी °पेक्ष्योक्त्या. ३ प सी व्यञ्जता. ४ बी °त्मीयप°. ५ बी °ति समासः ।. ६ प सी डी °मातः । पा°. ७ सी °स्य लुक् ॥ अ°.

७१.] एयणि काद्रवेय्यो नाग्यः । द्वन्द्वे । जलस्य या मनुषीकाद्रवेय्य-स्ताभिरुदीक्ष्योर्ध्वं सत्साम्यमिति बुद्ध्योर्ध्वं विलोक्यः सिन्धुराजः समुद्राधिपत्वाद्यथार्थनामा सिन्धुराजाख्यो नृपः संनह्याभात् । कीदृक्सन् । सौरीं सौरीयो नु भां दधानः । यथा सूर्यो देवतास्य देवताणि सौर्यः । सौर्याय हितः "तस्मै हितः" [७.१.३५] इतीये सौरीयोर्कः । सौरीं सूर्यसत्कां भां तेजो धत्ते तथारिभिरसह्यत्वात्सौरीमिव सौरीं भां प्रतापं दधानः । तथागस्तीयो नु । अगस्त्यो देवतास्यागस्त्यस्तस्मै हितोगस्त्यर्षिः स इवागस्त्यामगस्तिसत्कायां दिशि दक्षिणस्यां सैन्यरचनाविशेषेण स्थितः । यमदिक्श्रयणोक्त्या चास्यावश्यंभावी पराजयः सूचितः । योपि सिन्धुराजो नदीपतिरब्धिः सोपि जलमानुषीकाद्रवेय्युदीक्ष्यः सौरीं सुरासंबन्धिनीं भां श्रियं सुरानुकारिनीरत्वात्सुराजनकत्वाद्वा दधान आगस्त्यां दिशि स्थितो भातीत्युक्तिः ॥

मनुषी । इत्यत्र "व्यञ्जनात्तद्धितस्य" [८८] इति यस्य लुक् ॥ व्यञ्जनादिति किम् । काद्रवेयी ॥

सौरीम् । सौरीयः । आगस्त्याम् । आगस्तीयः । अत्र "सूर्या°" [८९] इत्यादिना यलुक् ॥

ननु सैधमसैध्यमप्यदोहः पौषातैषाणां नृणां हि सिद्ध्यै ।
जल्पन् गैार्गीयतां यदूनामिति गार्गीभूतः ससज्ज लक्षः ॥९०॥

९०. लक्षः ससज्ज युद्धाय प्रगुण्यभूत् । कीदृक्सन् । जल्पन् । किमित्याह । नन्विति संबोधने । हे यदुभटा अदो रणसंबन्ध्यहर्दिनं

१ बी °सैधम°. २ प सी गागीय°.

१ प सी °स्मत्साम्य°. २ प डी °रीं सोरी°. ३ प सी °भानो सूर्योव°. डी °भानः सूर्योव°. ४ प सी °थामिरि°. ५ प सी °सागस्त्य°. ६ प सी डी °सत्कायां. ७ बी °चनां वि°. ८ प सी सुराः सं°.

सैधं सिध्यः पुष्यस्तेन चन्द्रयुक्तेन युक्तमसैध्यमपि[1] पुष्येण चन्द्रयुक्तेनायुक्तमपि पौषातैषाणां पुष्ये जाता "भर्तुसंध्यादेरण्" [६.३.८९] इत्यणि पौषा एवं तिष्ये पुष्ये जातास्तैषा[2] न तथातैषा द्वन्द्वे तेषां पुष्यजातानामपुष्यजातानां च नृणां सिद्ध्यै रणे मृता वै स्वर्गं यान्तीति स्मृतेः स्वर्गप्राप्तिरूपकार्यसिद्धये हि स्फुटं भवति। सैधं हि दिनं किल।

अपि द्वादशमे[3] चन्द्रे पुष्यः सर्वार्थसाधकः।

इतिवचनात्पौषाणामपौषाणां च नृणां सिद्ध्यै स्यादिदं त्वसैधमपीत्यर्थ इति। केषाम्। यदूनां यादवभटानां पुरतः। यतो गार्गीयतां गर्गो गोत्रादिभूतो ब्राह्मणस्तस्यापत्यं वृद्धं गार्ग्यस्तमिच्छन्ति। क्यन्। तेषाम्। जयसिद्धिहेतुदिनपृच्छार्थं[4] गार्ग्यब्राह्मणमिच्छतां यथा तथेदमहः सर्वकार्यसिद्धिकरमिति किं ब्राह्मणपृच्छयेति यदूनामग्रे वदन्नित्यर्थः। अत एवं[5] चागार्ग्यो गार्ग्यो भूतो गार्गीभूतो गार्ग्यब्राह्मणवत्पृच्छकानां यदूनां कार्यसिद्धिकरं दिनं वदन्नित्यर्थः। अमुना च जल्पेन लक्षस्य रणे भावी मृत्युः सूचितः॥

पौषातैर्षाणाम्[6]। इत्यत्र[7] "तिष्य°" [९०] इत्यादिना यलुक् ॥ तिष्यपुष्ययोरिति किम्। असैध्यम्॥ अन्ये तु तिष्यपुष्ययोर्नक्षत्रे वर्तमानयोः सामान्येणि नित्यं सिध्यशब्दस्य तु विकल्पेन यलोपमिच्छन्ति। तन्मते तिष्यो देवतास्य तैष्य(ष?)इत्यत्रापि प्राप्नोति। तथा सैधमसैध्यमित्यपि॥

गार्गीयताम्। गार्गीभूतः[8]। अत्र "आपत्यस्य "क्यच्व्योः" [९१] इति यस्य लुक्॥

वात्स्यवात्सीयवात्स्यायनैर्बैल्वकैर्वैणुकैरागतं[1][2] दैत्यराजन्यकम्।

शस्त्रिमानुष्यकं तत्सपञ्चाग्निभिर्मूलराजस्य विप्रैः शशंसे तदा॥९१॥

९१. तदा शस्त्रि प्रहरणान्वितं मानुष्यकं भटौघो यत्र तत्तथा दै-

---

१ सी °नैर्बैल्व°. २ प बी सी डी °कैर्वैणु°.

---

१ डी °पि पौ°. २ प सी जास्त°. ३ डी °दशे च°. ४ प सी जयसि°. ५ बी °व गा°. ६ प सी °षाणम्।. ७ सी °त्र लप्य°. ८ डी °भूताः। अ°.

त्यराजन्यकं दानवराजन्यौघ आगतमस्य मूलराजस्याग्रे विप्रैः[1] शशंसे कथितम् । किंभूतैः । बिल्वाः सन्त्यस्यां[2] "नडादेः कीयः" [६.२.९२] इति कीये बिल्वकीया नाम नदी तत्र भवैस्ततो वागतैर्बिल्वकैरेवं[3] वैणु-[4]कैश्च । तथा स पञ्चाग्निभिः पञ्चाग्नाय्यो दक्षिणाहवनीयगार्हपत्यस-भ्यावसथ्याख्यानां[5] पञ्चानामग्नीनां भार्या देवता येषां देवताणो लुपि पञ्चाग्नय[6] आहिताग्नयः सह तैर्ये तैस्तथा वत्सो गोत्रादिभूतो ब्राह्मणर्षि-स्तस्यापत्यं वृद्धं वात्स्यस्तत्र साधवो वात्स्यास्तथा वात्स्यस्येमे शिष्या वात्सीयास्तथा वात्स्यस्यापत्यानि युवानो वात्स्यायना विशेषणत्रयद्वन्द्वे तैः । स्रग्विणी छन्दः ॥

पञ्चरामत्रिरम्भोरुषड्गोणिषट्सूचिषट्सप्तयूनां द्विषद्वाजिनाम् ।
हेषितं चाशृणोत्सोसिदण्डं दधत्षट्कुमारीं रिपुस्त्रीत्वदोथोत्थितः
॥ ९२ ॥

९२. द्विषद्वाजिनां शत्रवश्वानां हेषितं स मूलराजोशृणोच्च[7] । चस्तु-ल्ययोगितार्थः । यदैव दैत्यराजन्यकमागतं विप्रैः शशंसे तदैव स हे-षितमैशृणोदित्यर्थः । किंभूतानाम् । पञ्चभी रामाभिर्नारीभेदैरर्थाद्वन्दीभिः[8] क्रीता इकणो "अनाम्न्यद्विः प्लुप्" [६.४.१४१] इति लुपि[9] पञ्चरामाः । एवं तिसृभी रम्भोरूभिः[10] कदलीस्तम्भनिभोरुभिर्बन्दीभिः षड्भिर्गोणीभिरर्था-न्मञ्जिष्ठादिक्रयाणकभृतैरावपनैः[11] षड्भिः सूचीभिः पिशुनभार्याभिर्बन्दीभी रत्नसूचीभिर्वा षड्वा सप्त वा षट्सप्तास्ताभिर्युवतिभिस्तरुणीभिश्च बन्दीभिः क्रीतास्त्रिरम्भोरवः षड्गोर्ण्यः षट्सूचयः षट्सप्तयुवानः । विशेषणद्वन्द्वे । तेषाम् । अथ हेषितश्रवणानन्तरमुत्थितः । कीदृक्सन् । असिदण्डं खड्गं

१ प सी डी चासृणो°.

१ प सी विप्रैश°. २ प सी डी न्त्यस्या न°. ३ प बी सी °तैर्बिल्व° ४ प बी सी °वं वेणु°. ५ सी डी °सत्थाख्या°. ६ प सी° श्चाग्नय°. ७ प सी डी °मसृणो°. ८ प °द्वन्दैभिः. सी डी °द्वन्दिभिः. ९ सी °दिप्लुपि प°. १० प सी °रूभिक°. ११ प सी °यप°.

दधत् । किंभूतम् । षट्कुमारीं वसिष्ठादन्यैः[1] षड्भिर्मुनिभिर्भर्तृभिः[2] परित्यक्तत्वेन महाब्रह्मचारिणीत्वात्कुमारीव कन्येवाचरन्ति क्विपि तल्लुपि च कुमार्यः कृत्तिकास्ततः षण्णां कुमारीणामयं षट्कुमार्यो देवता अस्येति वा कृत्तिकानक्षत्रकत्वात् "द्विगोः°" [७.१.१४४] इत्यादिनाणो लुपि षट्कुमारी तम् । खड्गस्य हि कृत्तिकानक्षत्रम् । यत्पुराणम् ।

असिर्विशसनः[3] खड्गस्तीक्ष्णधर्मा दुरासदः ।
श्रीगर्भो विजयश्चैव धर्माधारस्तथैव च ॥
इत्यष्टौ तव नामानि स्वयमुक्तानि[4] वेधसा ।
नक्षत्रं कृत्तिका चैव स्वयं देवो महेश्वरः ॥ इति ।

अत एवारीणां क्लीत्वं[5] ददात्यरिक्लीत्वदः । असिग्रहणेनातिभयंकरत्वादरीन्क्लीरिवातिभीतान्कुर्वन्नित्यर्थः[6] ॥

वात्स्य । वात्सीय । इत्यत्र "तद्धित°" [९२] इत्यादिना यलुक् ॥ अनातीति किम् । वात्स्यायनैः[7] ॥

बैल्वकैः[8] । वैणुकैः । इत्यत्र "बिल्वकीयादेरीयस्य" [९३] इति यस्य लुक्[9] ॥

राजन्यकम् । मानुष्यकम् । इत्यत्र "न राजन्य°"[10] [९४] इत्यादिना न यस्य लुक् ॥

पञ्चाग्निभिः । पञ्चराम । त्रिरम्भोरु । षड्गवयूनाम् । इत्यत्र "क्यादेः°" [९५] इत्यादिना क्यादेर्लुक् ॥ अक्विप इति किम् । षट्कुमारीम्[11] ॥ तद्धितलुकीति किम् । क्लीत्व ॥ अगोणीसूच्योरिति किम् । षड्गोणि । षट्सूचि[12] ॥ स्रग्विणी छन्दः ॥

---

१ प सी डी वशिष्ठा°. २ बी °न्यैष°. ३ प सी °सन्नः ख°. ४ प सी डी स्वक्तमु°. ५ डी क्लीत्वदः । ६ प सी °त्वादीन्क्ली°. ७ बी °नैः । बेल्व°. सी °नैः । खेल्व° ८ बी °कैः । वेणु°. ९ प सी डी °क् । अक्वि°. १० बी °जन इ°. ११ सी डी °री । त°. १२ प सी °चि स्वल°.

निस्तिरस्करिणिरादददेनतिब्रह्मबन्धुरयमुष्णगुप्रभः ।
वर्म पेष्टुमरिमर्द्धपिप्पलीवन्नृपः सहमहीयसी भुवा ॥ ९३ ॥

९३. अयं नृपो मूलराजोर्धपिप्पलीवत् खण्डपिप्पलीमिवारिं ग्राहारिं पेष्टुं हिंसितुं[2] वर्मादद्दे। कीदृक् । निस्तिरस्करिणिस्तिरस्करोतीत्येवंशीला णिनि बाहुलकाद्वृद्ध्यभावे तिरस्करिण्या[3] जवन्या[4] निष्क्रान्तः[5] । तथानतिब्रह्मबन्धुर्ब्रह्मबन्ध्वो जातिमात्रेण ब्राह्मण्योतिधार्मिकत्वात्ता अपि नातिक्रान्तः । तथोष्णगुप्रभः प्रतापेनार्कसमोत एव भुवा भूम्या कृत्वा सह महीयस्यातिमहत्या वर्तते यः स सहमहीयसी । अतिमहाप्रमाणोर्वीक इत्यर्थः ॥

उष्णगुप्रभः । निस्तिरस्करिणिः[6] । अनतिब्रह्मबन्धुः । इत्यत्र "गोस्त्रान्ते[7]" [९६]इत्यादिना ह्रस्वः ॥ अनंशिसमासे यो बहुव्रीहाविति किम् । अर्धपिप्पली । सहमहीयसी । रथोद्धता[8] छन्दः ॥

स्फूर्जत्सारधि विप्रबन्धुसुहृदा तद्ब्रह्मबन्धूभियं
लक्ष्मीवल्लभलक्ष्मिपुत्रसदृशा तेनाशु सज्जीकृतम् ।
गार्गीपुत्रमहेन्द्रहूसुतयुतैः कारीषगन्धीपति-
प्रायैः श्रीसदनैर्नृपैः[2] सह बलं भ्रूभङ्गभीमाननैः ॥ ९४ ॥

९४. तेन मूलराजेन तत्स्वकीयं बलमाशु सज्जीकृतं सन्नाहितमित्यर्थः । किंभूतेन । लक्ष्मीवल्लभो विष्णुः लक्ष्मिपुत्रः[9] कामः । ताभ्यां

---

१ ए सी °स्करणि°. २ ए सी नैनृपैः.

---

१ ए सी डी °वत्पिप्प°. २ सी °सिव°. ३ ए सी °स्करणि°. ४ ए सी °वण्या नि°. ५ डी निःक्रान्तः. ६ ए सी °स्करणिः ।. ७ ए सी "वोस्वान्ते°. ८ ए सी रतोद्ध°. डी रतो च्छन्दः. ९ ए सी डी °पुत्रका°.

सदृशा । पराक्रमित्वप्रजापालकत्वरूपवत्त्वादिना तुल्येन । अत एव विप्रबन्ध्वो जातिमात्रेण ब्राह्मण्यस्तासामपि सुहृदा पालनया मित्रेण । कीदृग्बलम् । स्फूर्जन्ती स्फुरन्ती सारा स्थिरोत्कृष्टा वा धीर्युद्धविधिविषयं परिज्ञानं यस्य तत् । अत एव निश्चितदैत्यबलविनाशनेन ब्रह्मबन्धूप्रियं जातिमात्रब्राह्मणीनामपि वल्लभम् । तथा कारीषगन्धीपतिप्रायैः कारीषगन्ध्याख्यराज्ञीभर्तृप्रमुखैर्नृपैः सह सहितम् । किंभूतैः । गार्गीपुत्रा द्विजाः । प्रस्तावात्तेत्र मन्त्रिणः । तथा महेन्द्रं ह्वयति महेन्द्रहूर्नाम राजा । तस्य सुता महेन्द्रहूसुताः । द्वन्द्वे । तद्युतैः । तथा श्रीसदनैश्चतुरङ्गबलादिलक्ष्मीनिवासैः । तथा भ्रूभङ्गभीमाननैः कोपवशाद्भ्रुकुटीविधानरौद्रवक्त्रैः ॥

सारेधि । इत्यत्र "क्लीबे" [९७] इति ह्रस्वः ॥

लक्ष्मिपुत्र लक्ष्मीवल्लभ । विप्रबन्धुसुहृदा ब्रह्मबन्धूप्रियम् । इत्यत्र "वेदूत°" [९८] इत्यादिना वा ह्रस्वः ॥ अव्ययादिवर्जनं किम् । अव्यये । सज्जीकृतम् ॥ ऋत् । महेन्द्रहूसुत ॥ ईप् । कारीषगन्धीपति ॥ ङी । गार्गीपुत्र ॥ ह्युप् । श्रीसदनैः । भ्रूभङ्ग ॥ शार्दूलविक्रीडितं छन्दः ॥

॥ इति श्रीजिनेश्वरसूरिशिष्यलेशाभयतिलकगणिविरचितायां श्रीसिद्धहेमचन्द्राभिधानशब्दानुशासनद्व्याश्रयवृत्तौ चतुर्थः सर्गः संपूर्णः ॥

१ ए सी °तैगार्गी°. २ ए सी °नने को°. ३ ए सी °रचैस°. ४ बी सी °ह्मः । वि° ५ ए सी °य । सज्जी°. ६ सी °दनै भ्रू°.

पञ्चमः सर्गः ।

शैलप्रस्थमहित्रातरेवतीमित्रभूभुजाम् ।
सैन्येभूत्तस्य पुंनाट्यनान्दीतूर्यं ध्वनद्धनुः ॥ १ ॥

१. तस्य मूलराजस्य सैन्ये । शिलानां प्रस्थमिव शिलप्रस्थं नाम पुरं तत्र भवः शैलप्रस्थः । महीं त्रासीष्टासौ "तिकृतौ नाम्नि" [५.१.७१] इति के महित्रातो नाम । रेवती मि[1]त्रमस्य रेवतीमित्रो नाम । पदत्रयद्वन्द्वे ते ये भूभुजो मूलराजनृपास्तेषां ध्वने[2]र्ज्याकर्षवशाच्छब्दायमानं धनुरभूत् । कीदृक् । नान्दी पूर्वरङ्गाङ्गं द्वादशतूर्याणां निर्घोषः । तानि चेमानि ।

भम्भा-मुकुन्द-मद्दल-कडम्ब-झल्लरि-हु[3]डुक्क-कंसाला ।
काहल-तिलिमा सङ्खो वंसो पै[4]णवो[5] य बारसमो ॥

तूर्यं तूरम् । नान्दी च तत्तूर्यं च नै[6]न्दीतूर्यम् । पुंसां पौरुषोपेतानां महावीराणां नाट्याय नृत्ताय नै[7]न्दीतूर्यमिव । महाभटा हि धनुर्ध्वनिश्रवणैर्नृत्यन्तीव ॥

मित्रे रेवतिमित्रस्य रणायोत्तस्थतुस्तदा ।
गङ्गाद्वारपती गङ्गमहगङ्गामहानुजौ ॥ २ ॥

२. तदा गङ्गमहगङ्गामहानुजौ गङ्गमहाख्यस्तल्लघुभ्राता च मूलराजनृपौ रणायोत्तस्थतुः । किंभूतौ । गङ्गाद्वारपती गङ्गाया द्वारं यत्र तद्ग[8]ङ्गा-

---

१ बी °त्रस्य°. २ ए सी °नर्ज्याक°. ३ बी °हुडक°. ४ ए पणमो य वा सम्मे । सी पणेमा य वा सम्मे ।. ५ डी °वो दुवालस°. ६ ए सी नान्दीतू°. ७ ए सी नादीतू°. ८ सी °ङ्गाम.

द्वारं नाम पुरं देशो वा तत्स्वामिनौ । तथा रेवतिमित्रस्यैवंनाम्नो[1] नृपस्य मित्रे ॥

महिम्नोत[2] । शैलप्रस्थ । इत्यत्र "ङ्यापः०" [९९] इत्यादिना ह्रस्वः ॥ बहु[3]लवचनात्क्वचिद्विकल्पः । रेवतिमित्रस्य रेवतीमित्र । गङ्गमहे[4] गङ्गामह । कपिञ्ज । नान्दीतूर्यम्[5] । गङ्गाद्वार ॥

रोहिणित्वमजत्वं च नृपैर्दातुं प्रतिश्रुतम् ।
भयस्पृशे रोहिणीत्वमजात्वमभयस्पृशे ॥ ३ ॥

३. नृपैर्मूलराजसत्कभूपै रोहिणित्वं गोत्वमजत्वं च छागीत्वं च दातुं प्रतिश्रुतं प्रतिज्ञातम् । सामान्येनोक्त्वा विशेषेणाह । भयेत्यादि । भयस्पृशे कातराय रोहिणीत्वं दातुं प्रतिश्रुतम् । गौर्हि वध्येति भर्तॄणामवध्यत्वमङ्गीकृतमित्यर्थः । अभयस्पृशे शूरायाजात्वम् । अजा हि वध्येति शूरा एवास्माभिर्हन्तव्या इति प्रतिज्ञातमित्यर्थः । एतेन नृपाणां[6] क्षात्रो धर्म उक्तः ॥

रोहिणित्वम् रोहिणीत्वम् । अजत्वम् अजात्वम् । इत्यत्र "त्वे" [१००] इति बहुलं ह्रस्वः ॥

भटा भटेषु भ्रुकुटिं भ्रुकुंसा नर्तकीष्विव ।
दधु[2]र्भ्रु[1]कुंसकौ[3]न्तेयभ्रुकुटीभृद्यमोपमाः ॥ ४ ॥

४. भटा मूलराजयोधा भटेष्वरियोधेषु विषये भ्रुकुटिं सकोपभ्रूविकारं दधुः । यथा भ्रुकुंसाः स्त्रीवेषधारिणो नटा नर्तकीषु विषये

१ बी °भजत्व°. २ बी °धुर्भ्रुकुं°. ३ बी °कौतेय°.

१ बी °म्नो मित्रस्य. २ ए सी डी °मात: । शै°. ३ ए सी °हुव°. ४ ए सी °ह । क°. ५ ए सी डी °तूर्य । ग°. ६ ए सी °णां क्षेमाय°. डी °णां क्षत्रध°.

स्खलितादौ[1] भ्रुकुटिं दधति । कीदृशाः । भ्रुवौ कुंसयति लिहाद्यचि [५.१.५०] भ्रकुंसः स्त्रीवेषधारी नटो यः कौन्तेयः[2] कुन्त्या अपत्यं "द्विस्वरादनद्याः"[3] [६.१.७१] इत्येयण्। अर्जुनो विराटगृहे[4] छद्मना नाट्याचार्योसावभूदिति प्रसिद्धिः । अत एवास्य बृहन्नट इत्याख्या । तद्वद्भ्रुकुटीभृतः सकोपभ्रूविकारधारिणोत एव रौद्रत्वाद्यमोपमा मृत्युतुल्याः । विशेषणकर्मधारयः[5] ॥

भ्रूकुंसभ्रूकुटीचापा मेनिरे मालभारिणः ।
इषीकतूलवद्योधाः पक्वेष्टकचितोऽगपि ॥ ५ ॥

५. योधा मूलराजभटाः पक्वा या ईष्टका[6] मृद्विकारास्ताभिश्चितं खचितं यद्गृहादि तद्वद्यद्दुर्गं बलिष्ठं भटादि तदपि मेनिरे । कीदृशम् । महाबलतयेषीकतूलवत् । इषीका कूचिका तस्यास्तूलमनस्थि कर्पासादि तद्वदसारम् । इषीकाया मुखे[7] तूलमपि स्यात् । कीदृशाः[8] । भ्रूकुंसभ्रूकुटीचापा नर्तकोपाध्यायभ्रुकुटिवत्कुटिलकार्मुकाः । तथा मालभारिणः पुष्पमालाधारिणः ॥

भ्रुकुंसाः । भ्रकुंस । भ्रुकुटिम् । भ्रकुटी । इत्यत्र "भ्रुवोच[9]°" [१०१] इत्यादिना ह्रस्वोऽ[10] ॥ भ्रूकुंसभ्रूकुटीशब्दावपीच्छन्त्यन्ये ॥

मालभारिणः । इषीकतूलवत्[11] । इष्टकचित । इत्यत्र "मालेषी[12]°" [१०२] इत्यादिना ह्रस्वः ॥

---

१ प सी डी °दौ भ्रकु°. २ बी °न्तेयकु°. ३ प सी डी इत्यण्।. ४ प सी °टसदे ५ प सी °शेषेण°. ६ बी इष्टिका. ७ बी °खे मूल°. ८ प सी °शाः । भ्रुकुं°. ९ बी °कुटव°. १० प °च । भ्रुकुं°. सी °च । भ्रुकु°. ११ प सी °षीकुतूहल°. १२ बी °षीक° इ°.

गोणिं बाणौघमर्यस्रपकं कर्कन्धुकाधनुः ।
पट्टिका भिल्लचमुकाधाद्धर्तुं रिपुलक्ष्मिकाम् ॥ ६ ॥

६. पट्टिकाज्ञाता धनुर्विद्यादिषु कुशला भिल्लचमुका मूलराजसत्का नीचजातित्वात्कुत्सिता मेदसेना रिपुलक्ष्मिकां शत्रूणामन्यायार्जितत्वात्कुत्सितां लक्ष्मीं हर्तुं बाणौघमधाद्धारयत् । किंभूतम् । गोणिं गोण्या मितं यावता गोणी भ्रियते तावन्तमित्यर्थः । तथा सुतीक्ष्णत्वेनारीणामस्रं रक्तं पिबति विच्चि अर्यस्रपा अज्ञातोर्यस्रपा अर्यस्रपकस्तम् । तथा कर्कन्धुकाधनुश्चाज्ञातंबदरीचापं चाधात् । भिल्ला हि प्रायः सुप्रापत्वाद्बदरीधनुरतिलघुहस्तत्वाद्बहून्बाणांश्च बिभ्रति ॥

गोणिम् । इत्यत्र "गोण्या मेये" [१०३] इति ह्रस्वः ॥

पट्टिका । अर्यस्रपकम् । लक्ष्मिकाम् । चमुका । कर्कन्धुका । इत्यत्र "ड्याप्दीदूतः के" [१०४] इति ह्रस्वः ॥

सुलक्ष्मीकाः सुशक्तीकाचमूकाः कुरवोभ्रमन् ।
जितास्रपाकाः खारीकातूणाकानर्घ्यतूणकाः ॥ ७ ॥

७. कुरवः कुरुराजस्यापत्यानि भटा मूलराजसेवका अभ्रमन् युद्धार्थं व्यचरन् । किंभूताः । सुलक्ष्मीकाः शोभनबलादिसंपदः । तथा सुशक्तीकाः शोभनशक्तिशस्त्राश्चम्वः सेना येषां ते सुशक्तीकाचमूकाः "तद्धिताक°" [३.२.५४] इत्यादिना पुंवत्त्वनिषेधः । तथा जिता अस्रपा रुधिरपायिनो दैत्या यैः "शेषाद्वा" [७.३.१७५] इति कचि जितास्रपाका दैत्यरणेष्वनेकशो लब्धजयपताका इत्यर्थः । तथा खारीकाः खार्या

१ डी °म् । गोण्या. २ ए सी मियतं. ३ सी °वन्ता गो°. ४ ए सी डी °ज्ञाव°. ५ डी °त्वाद्धाणां°. ६ ए सी °ट्टिकाः । अ°. ७ बी °काश्र°. ८ ए सी °य विच°. ९ बी °क्ष्मीका शो°.

क्रीताः "खारीकाकणीभ्यः कच्" [६.४.१४९] इति कच्। तूणा निषङ्गा येषां ते। तथानर्घ्याः स्वर्णमण्यादिविच्छुरितत्वेन निर्मूल्यास्तूणा येषां ते तथा। ततो द्वन्द्वः। केचित्खारीकातूणाकाः केचिच्चानर्घ्यतूणका इत्यर्थः॥

सुलक्ष्मीकाः। जितालपाकाः। सुशक्तीकाचमूकाः। खारीका। इत्यत्र "न कचि" [१०५] इति ह्रस्वो न॥

खारीकातूणाकानर्घ्यतूणकाः। इत्यत्र "न वापः" [१०६] इति वा ह्रस्वः॥

जेतुं द्विट्सेनिकां स्कन्दसेनका इव भूभुजाम्।
सेनाकाः कुत्सिकाश्चक्रुर्दुर्गकाधिष्ठितास्त्वराम्॥ ८॥

८. कुत्सिका अज्ञाताः सर्वा भूभुजां मूलराजनृपाणां सेनाका विशेषस्वामिसंबन्धित्वानवगमेनाज्ञाताश्चम्वो द्विट्सेनिकां द्विषो ग्राहारेः कुत्सितां सेनां जेतुं त्वरां वेगं चक्रुः। कीदृश्यः सत्यः। दुर्गकाधिष्ठिताः "ते लुग्वा" [३.२.१०८] इति देवीशब्दस्योत्तरपदस्य लोपे सकललोकवल्लभत्वेनानुकम्पिता दुर्गा "लुक्युत्तर०" [७.३.३८.] इत्यादिना कप्रि(पि?) दुर्गका चामुण्डा। तयाधिष्ठिता अधिष्ठायकत्वेनाश्रिताः। स्कन्दसेनका इवेति स्कन्दस्य प्रियत्वादनुकम्पिताः सेना यथा द्विट्सेनिकां तारकदैत्यसेनां जेतुं त्वरां चक्रुः॥

सेनिकाम्। सेनकाः। सेनाकाः। इत्यत्र "इच०" [१०७] इत्यादिनेकारो ह्रस्वश्च वा॥ अपुंस इति किम्। कुत्सिकाः। अनिदिति किम्। दुर्गका॥

स्विका मृत्योः सुरेभस्य स्वकागर्जज्जयस्विका।
ओजःस्वका गजघटा ज्ञिका युद्धे यते ज्ञका॥ ९॥

९. मूलराजीया गजघटागर्जद्दुलुलारवं चक्रे। एतेन राज्ञो भावी

१ बी °णाका के°. २ ए बी सी सुशक्तीका। जितालपाकाः। सुलक्ष्मीकाः। सुशक्तीका च°. ३ बी ताश्चाम्वो. ४ बी °ष्ठायिकात्वे°. ५ डी सेना°. ६ बी °द्दुगुका°. डी °द्दुगुलुद्दार°.

विजयः सूचितः शुभनिमित्तत्वात् । कीदृशी । युद्धे रणकर्मणि ज्ञिका-ज्ञातपण्डिता तथा यते निषादिनां पादकर्मणि ज्ञका तथौजो बलं तेजो वा तदेव स्वं धनं यस्याः सात एव जय एव स्वं धनं यस्याः सात एवं सुरेभस्यैरावणस्य स्वकाज्ञातज्ञातिरिव तथानेकजन्तुसंहारित्वाद्रौद्राकारत्वाच्च मृत्योर्यमस्य स्विका ॥

अजिकाचर्मपर्याणारिं हन्तुमजकामिव ।

तत्वरेश्वचमूः सेषुभस्त्रिका साम्बुभस्त्रका ॥ १० ॥

१०. अश्वचमूर्मूलराजीयाश्वसेनारिमजकामिव कुत्सितां छागीमिव हन्तुं तत्वरे रयेणाचलत् । कीदृशी । अज्ञाता छाग्यजिका तस्याश्चर्मणा पर्याणं पल्ययनं यस्याः सा । तथा सेषवो बाणभृता भस्त्रास्तूणा यस्यां सा । तथा सहाम्बुभस्त्रया जलदृतिना वर्तते या सा । तथाज्ञाता साम्बुभस्त्रा साम्बुभस्त्रका ॥

क्षत्रियिकाः क्षत्रियकापुत्रांश्चटकिकाश्चटौ ।

द्विषच्चटककाश्येनानूचुः सुनयिका युधि ॥ ११ ॥

११. क्षत्रियिका अज्ञातक्षत्रियस्त्रियो द्विषच्चटककाश्येनान् शत्रुकुत्सितचटकासु श्येनतुल्यान् क्षत्रियकापुत्रान्क्षत्रियान्युधि युद्धार्थमूचुः युद्धं क्रियतामित्यूचुरित्यर्थः । कीदृश्यः सत्यः । अज्ञाताः सुनयाः सुनयिकाः शोभननीतिज्ञा अत एव चटौ चाटुवचने विषये चटकिका अज्ञातचटकातुल्याश्चाटुकारिण्यः । एतेन मूलराजीयक्षत्रियस्त्रीणामपि युद्धविषय उत्साह उक्तः ॥

---

१ बी °स्त्रकाः ॥ २ ए सी युधिः ॥

---

१ सी युधेर°. २ ए सी तेजे वा. ३ बी °व च सु°. ४ ए सी °हारितिव. ५ ए सी °न्तुसहा°. ६ ए सी °कारित्वा°. ७ ए बी सी डी °भस्त्रिका°. ८ ए सी डी पल्य°. ९ डी °टका°. १० बी युक्तार्थं°. ११ बी °ज्ञात°.

निःशङ्किकैक्षिष्ट रणामात्यिका पत्तिसंहतिः ।
द्विके युत्सूतिके तूणे द्वके श्रीसूतके भुजे ॥ १२ ॥

१२. पत्तिसंहतिर्मूलराजपदातिपङ्क्तिर्युत्सूतिके युधो युद्धस्य सूतिके अज्ञाते सूते जननीतुल्ये जनितयुद्धे इत्यर्थः । द्विके अमेयशरभृतत्वेनाज्ञाते द्वे तूणे तूणीरौ । तथा श्रीसूतके विजयलक्ष्मीजनन्यौ द्वके अमेयबलत्वेनाज्ञाते द्वे भुजे बाहू चैक्षिष्ट । यतो निःशङ्किकाज्ञाता निर्भया शूरेत्यर्थः । तथा रणामात्यिका युद्धविषयेऽज्ञाता मन्त्रिणी । यथा राजादिरमात्यिकाभिप्रायेण प्रवर्तत एवं रणकर्मप्रवीणत्वाद्यदभिप्रायेण रणं प्रवर्तत इत्यर्थः ॥

एषिका पुत्रिका मृत्योरेषका नासिपुत्रका[१] ।
वृन्दारिका वृन्दारकापतिदेत्याददे भटैः ॥ १३ ॥

१३. भटैराददे गृहीतासिपुत्रकैव[२] । हेतुमाह । एषका प्रत्यक्षा । कृत्रिमः पुत्रः सूनुः "°पुत्राणु°" [७.३.२३] इति के पुत्रकः । स्त्री चेत्पुत्रका । असेः पुत्रकेवासिपुत्रका क्षुरिका । नासिपुत्रका न क्षुरिका । असिपुत्रकाशब्दः पुनरावर्त्यते । किं तर्हि । एषिका मृत्योर्यमस्य पुत्रिका । यतो वृन्दारकापतीन्देवीनाथान्देवानपि द्याति खण्डयति[३] । यद्वा । वृन्दारकाभ्यो देवीभ्यः पतिं ददाति या । अनया हि हताः सन्तोऽप्सरोभिर्म्रियन्त[४] इति । सा मृत्युहेतुरित्यर्थः । ईदृश्यपि कुत इत्याह । यतो वृन्दारिकातितैक्ष्ण्यचन्द्रिकाधिष्ठितत्वादिना प्रशस्येति[५] ॥

स्विका स्वका । जयस्विका ओजःस्वका । ज्ञिका ज्ञका । अजिका अजकाम् । सेवुभस्त्रिका साम्भुभस्त्रका ॥ यकार । क्षत्रियिका:[६] क्षत्रियका ॥ ककार ।

१ ए °त्रकाः । दृ°.

१ सी °रभृत°. २ ए सी डी °पुत्रिके°. ३ ए बी सी डी °न्दारिका°. ४ ए बी सी डी °न्दारिका°. ५ ए सी °रोभिं म्रिय°. ६ बी °चण्डिका. ७ ए सी डी °यिका । क्ष°.

चटकिका: चटकका । इत्यत्र "स्वज्ञाज°" [१०८] इत्यादिना वेकारः ॥ धातुत्यवर्जनं किम् । सुनयिका: । निःशङ्किका । अमात्यिका ॥

ह्निके ह्नके । एषिका एषका । सूतिके सूतके । पुत्रिका पुत्रका । वृन्दारिका वृन्दारका । [5]इत्यत्र "य्वेष°" [१०९] इत्यादिना वेकारः ॥

द्विड्भ्यो हर्तुं श्रियं श्येनी वर्तकाभ्यो नु वार्तिकाम् ।
युद्धार्तिका जटिलिकोत्तस्थौ[2] मर्वीशबन्धुता ॥ १४ ॥

१४. युद्धार्तिका रणकृत्सती मर्वीशबन्धुता मूलराजसेवकमरुदेशाधिपबन्धुसमूहो द्विड्भ्यः सकाशाच्छ्रियं जयलक्ष्मीं हर्तुमुत्तस्थावुद्यताभूत् । कीदृशी । जटाः संश्लिष्टकेशाः क्षेप्याः सन्त्यस्या जटिलीभूता जटिला जटिलिका लोमशा । स्वरूपविशेषणमिदम् । यथा श्येनी पत्रिणी वर्तकाभ्यश्चटकाभ्यः सकाशाद्वार्तिकां चटकां हर्तुमुत्तिष्ठति ॥

नन्दका वः सकास्तु द्विट्क्षिपकौ[3] ध्रुवका यका ।
भुजेति नरिकामृचुर्मामिकासीत्यहंयवः ॥ १५ ॥

१५. नरानर्थान्नटान्कायति वर्णयति नरिका तां वृद्धस्त्रियं भट्टिनीं वा मामिकासि मदीया त्वमित्यहंयवोऽहंकृता मूलराजयोधा ऊचुस्तव योगक्षेमौ वयं करिष्याम इति बहु मेनिर इत्यर्थः । कथं नरान्कायतीत्याह । सकाज्ञाता सा वो युष्माकं भुजानन्दकारिजयोद्बुद्धिहेतुरस्त्वर्थाल्लोकानाम् । यकाज्ञाता या ध्रुवका दृढा सती द्विक्षु शत्रुषु क्षिपके-

---

१ ए सी डी जटलि°. २ ए सी °स्थौ मुर्वी°. ३ ए सी °का ध्रुव°.

---

१ ए सी डी °किका । च°. २ ए सी डी स्वजाज°. ३ ए डी °यिका । नि°. सी यिका । अ°. ४ ए सी °का । वृन्दिका । वृ°. ५ बी इतत्र. ६ ए सी °स्थावच°. ७ ए सी जटासं°. ८ ए सी डी °ला जटिलि°. ९ ए सी डी वर्तिका°. १० बी वृद्धिकि°. ११ ए सी °या वृद्धि°.

वाससभेद इव द्विट्ठिपका । यद्वा । द्विडर्थं या क्षिपका तस्या ध्रुवके- वावपनभेद इव द्विट्ठिपका ध्रुवकारिवधार्थं क्षिपकासभृदस्तीत्यर्थ इति ॥

वर्तिकाम् वर्तकाभ्यः । इत्यत्र "वौ वर्तिका" [११०] इतीत्वं वा निपात्यम् ॥ वाविति किम् । युद्वर्तिका ॥

जैडिलिका । इत्यत्र "अस्यायत्°" [१११] इत्यादिनेकारः ॥ अनिस्कीत्येव । नन्दका । आक्षिप्यकन् ॥ यत्तरिक्षपकादिवर्जनं किम् । यका । सका । क्षिपका । ध्रुवका ॥

नरिकाम् । मामिका । इत्यत्र "नरिका मामिका" [११२] इतीत्वं निपात्यम् ॥

तारकातारिकास्त्वविड्वर्णकावर्णिका दिवः ।
जयेष्टकाप्रतिज्ञानां कीर्तेः खार्यष्टिका न्वभात् ॥ १६ ॥

१६. तारकातारिका नक्षत्रवद्दीप्रा सत्यकात्विट् शसप्रभाभात् । कीदृशी । दिवो व्योम्नः कर्मणो वर्णकावर्णिका । वर्णयति वर्णका तान्तवः पटविशेषस्तयेव कृत्वा वर्णिका श्येतवर्णीकारिकातिसान्द्रत्वा- द्वर्णका पट्येव द्यां श्वेतयन्तीत्यर्थः । यद्वा । दिवः सबन्धित्वेन वर्ण- कानां पटभेदानां वर्णिकेव लेश इव । तथा जयेरिविजये सत्यष्टकायाः पितृदैवत्यकर्मणः प्रतिज्ञाभ्युपगमो येषां तेषां मूलराजसैनिकानां संब- न्धिन्याः कीर्तेः सत्काष्टिकाष्टद्रोणप्रमाणा खारी नु । असत्विट् सितत्वा- द्बहुलत्वाच्चैवमाशङ्किता । अष्टद्रोणामपि खारीं केचिदिच्छन्ति ॥

तारका । वर्णका । अष्टका । इत्येते "तारका°" [११३] इत्यादिना नि- पात्याः ॥ अन्यत्र । तारिका । वर्णिका । अष्टिका खारी ॥

अष्टमः पादः समर्थितः ॥

१ ए सी डी जटलि°. २ ए बी सी °निस्कीले°. ३ बी °नं य°. ४ सी °काम् । मा°. ५ बी मामकेति इति नि°. ६ बी °ट् शास°. ७ सी °यां । तथा मू°.

मूर्धाभिषिक्ता प्राहारेः प्रणिघ्नन्तोथ ताश्चमूः ।
आगुरध्युपलम्भाय जयस्येषुसुसिक्तखाः ॥ १७ ॥

१७. अथ मूलराजसैन्यस्य युद्धोपक्रमानन्तरं प्राहारे[1]र्मूर्धाभिषिक्ता नृपा जयस्यो[2]ध्युपलम्भाय प्राप्त्यायागुः । किंभू[3]ताः सन्तः । इषुसुसि[4]क्तखाः शरैः सुष्ठु व्याप्तो[5]काशा अत एव ता मूलराजीया युद्धायोद्यताश्चमूः प्रणिघ्नन्तः प्रहरन्तः ॥

शरौघैरतिसिश्चन्तः पर्यानिन्युर्दिशोन्धताम् ।
अति[2] स्थित्वोररीकृत्योरीकृत्यानि धनूंषि ते ॥ १८ ॥

१८. शरौघैः कृत्वा दिशोतिसिश्चन्तोतिव्याप्नुवन्तस्ते मूर्धाभिषिक्ता दिश एवान्धतां विलो[6]काभावाद्विच्छायत्वा[7]चान्धा इवान्धास्तद्भावं पर्यानिन्युः प्रापयन् । किं कृत्वा । अति स्थित्वातिक्रमार्थोत्रातिः । शत्र्वतिक्रमेणाली[8]ढादिस्थानं कृत्वा तथोरीकृत्यान्यङ्गीकर्तुं योग्यानि धनूंष्युररीकृत्याङ्गीकृत्य ॥

दैत्यैः पटपटाकृत्य घुट्कृत्य स्वीकृतासिभिः ।
प्रसृत्य कारिकाकृत्य पत्तीन्सत्कृत्य दध्वने ॥ १९ ॥

१९. स्वीकृतासिभिर्गृहीतखड्गैर्दैत्यैर्दानवनृपैः कर्तृभिर्दध्वने सिंहनादः कृतः । किं कृत्वा । पटपटाकृत्य त्वरया पादन्यासैः पटत्पटच्छब्दं कृत्वा घुट्कृत्य च शत्रुष्ववज्ञया घुडिति शब्दं कृत्वा च । तथा

---

१ सी °रध्याप°. २ ए सी °ति स्थत्वो°.

---

१ ए सी °रेमूर्धा°. २ सी °स्याध्याप°. ३ ए सी °भूता स°. ४ बी °सिक्ताखा°. ५ सी °साबराशा. ६ डी °लोकमा°. ७ बी °च्छायित्वा°. ८ सी °लीतादि°. ९ डी °त्रा × × च । त°.

प्रसृत्य रणाङ्गणे विस्तीर्य । तथा कारिकाकृत्य रणे स्थितिं यत्नं क्रियां वा कृत्वेत्यर्थः[2] । तथा पत्तीन्सत्कृत्याधुना युष्माकं हस्तैर्जेष्यत इति वचनैर्वस्त्रद्रव्यदानादिना च बहु मानयित्वा ॥

भग्नं कुन्तमसत्कृत्यालंकृत्यासिं च पाणिना ।
अदःकृत्यान्तर्हत्यैकः कणेहत्य पयः पपौ[1] ॥ २० ॥

२०. एकः कश्चिद्दैत्यभटः कणेहत्य पयः पपौ । शत्रुवधेनातिसंतुष्टत्वाद्यावत्तृप्तस्तावज्जलं पीतवानित्यर्थः । किं कृत्वा । भग्नं शत्रुप्रहारैर्णै कुटितं कुन्तमसत्कृत्यानादृत्य । तथासिं च पाणिनालंकृत्य गाढं मुष्टिग्रहणेन भूषयित्वा गृहीत्वेत्यर्थः । तथादःकृत्यावश्यं मया शत्रुर्घात्य इति चिन्तयित्वा तथान्तर्हत्यारिं मध्ये हिंसित्वा च ॥

यशः पिबन्मनोहत्यारेः पुरस्कृत्य विक्रमम् ।
अस्तंनीयारिमच्छेत्याच्छोद्य कोप्यनमत्प्रभुम् ॥ २१ ॥

२१. कोपि दैत्यभटः प्रभुमनमत् । यतोरेर्यशो मनोहत्य पिबन्यावत्तृप्तस्तावत्पिबन्नत्यन्तं स्वीकुर्वन्नित्यर्थः । किं कृत्वा । विक्रमं शौर्यं पुरस्कृत्याग्रेकृत्वा । ततोच्छेत्य । अच्छेत्यभ्यर्थे दृढार्थे वा । अभिमुखं दृढं वा गत्वा । तथाच्छोद्याभिमुखं दृढं वोक्त्वा । एतेन च्छलपरिहार उक्तः । ततोरिमस्तंनीय क्षयं नीत्वा । जित्वा हि भटाः संतोषोत्पादनाय प्रभुं प्रणमन्ति ॥

प्रणिम्नन्तः । अभिषिक्ताः । उपलम्भाय । इत्यत्र "धातोः पूजार्थ०" [१]

[1] १ डी °पौ × × × शत्रु°.

१ सी डी यत्नकि°. २ प °र्थः था. ३ प सी °तुष्टात्वा°. ४ बी °ण त्रुटि°. ५ डी कुण्ठितं. ६ सी °त्यान्याद्दृ°. ७ सी गाढमु°. ८ बी °त्यभ्य°. ९ डी °ढं वो°. १० सी क्षयनी°.

इत्यादिना प्रादिरुपसर्गसंज्ञः प्राक् धातोः ॥ एषूपसर्गसंज्ञायां णत्वषत्व-णागमाः सिद्धाः ॥ पूजार्थस्वत्यादिवर्जनं किम् । पूजार्थौ स्वती । सुसिक्त । अतिसिक्तन्तः । अत्रोपसर्गसंज्ञाया अभावे षत्वं न ॥ गतार्थावधिपरी । अध्यु-पक्रमाय । पर्याणिन्युः । अधिकभावः सर्वतोभावश्च प्रकरणादेः प्रतीयत इति गतार्थत्वम् ॥ अत्र प्राक्त्वनियमाभावः । ततश्चोपक्रमायाधिनिन्युः । परीत्यपि स्वयमभ्यूह्यम् । पर्याणिन्युरित्यत्रानुपसर्गत्वाण्णश्च न स्यात् ॥ अतिक्रमार्थो[3]ऽतिः । अति सिक्त्वा । अत्र षत्वं न स्यात् ॥

ऊर्यादि । ऊरीकृत्यानि । उररीकृत्य ॥ अनुकरण । खुट्कृत्य ॥ च्व्यन्त । स्वीकृत ॥ डाजन्त । पटपटाकृत्य ॥ चकारादुपसर्ग । प्रकृत्य । इत्यत्र "ऊर्यादि°" [२] इत्यादिना गतिसंज्ञा धातोः प्राक्त्वं च ॥ गतित्वात् "गतिः" [१.१.३६] इत्यव्ययत्वम् । "गतिकु°" [३.१.४२] इत्यादिना समासश्च फलम् । एवमग्रेपि ज्ञेयम् ॥

कारिकाकृत्य । इत्यत्र "कारिका°" [३] इत्यादिना गतिः प्राक् ॥

अलंकृत्य । सत्कृत्य । असत्कृत्य । इत्यत्र "भूषादर°" [४] इत्यादिना [6]गतिः प्राक् ॥

अन्तर्हत्य । अदःकृत्य । इत्यत्र "अग्रह°" [५] इत्यादिना गतिः प्राक् ॥

कणेहत्य । मनोहत्य । इत्यत्र "कणे°" [६] इत्यादिना गतिः प्राक् ॥

पुरस्कृत्य । अस्तंनीय । इत्यत्र "पुर°" [७] इत्यादिना गतिः प्राक् ॥

अच्छेत्य । अच्छोद्य । इत्यत्र "गत्यर्थ°" [८] इत्यादिना गतिः प्राक् ॥

१ सी अध्याप°. २ सी °णादे प्र°. ३ बी °र्थोतिः ।. ४ बी °णम् । खु°. ५ ए सी डी प्राक्कः । अ°. ६ ए सी डी गति प्रा°. ७ सी °त्य "पु°. ८ सी डी अच्छो°. ९ सी डी °नातिः.

वल्गन्कोप्यतिरोभूयाङ्गं तिरस्कृत्य वर्मणा।
चर्मणांसं तिरःकृत्वा मध्येकृत्येभमप्यहन्॥ २२॥

२२. कोपि दैत्यभटो वल्गन्नृत्यन्सन्निभमपि। आस्तां पर्यश्वादि[1]। महाबलं गजमप्यहन्। किं कृत्वा। अतिरोभूयाभयेनानिलीय[2] रणाङ्गणे प्रकटीभूयेत्यर्थः। तथा वर्मणाङ्गं तिरस्कृत्याच्छाद्य तथांसं स्कन्धं चर्मणा स्फरकेण तिरःकृत्वापिधाय तथा मध्येकृत्य चिन्तयित्वार्थात्प्रहार-[3]प्रस्तावम्॥

मध्ये कृत्वा नृपांस्तर्जन्पदेकृत्यापरो हयम्।
पदे कृत्वा निवचनेकृत्य वाचाजयत्परान्॥ २३॥

२३. अपरोन्यदैत्यभटो[4] नृपान्मध्ये कृत्वान्तर्भाव्य नृपैः सहेत्यर्थः। परान् शत्रुभटांस्तर्जन्भिर्भर्त्सयन्सन् वाचैव न तु प्रहारेणाजयत्। किं कृत्वा। हयमश्वं पदेकृत्याहो अश्वरत्नमित्यादिकेस्त्वाद्यन्तके पदे कृत्वा श्लाघित्वेत्यर्थः। ततः पदे[5] कृत्वा पादयोः कृत्वा युद्धार्थं चालयित्वेत्यर्थः। ततः परान्वाचा साक्षेपगिरा निवचनेकृत्य[6] संक्षोभोत्पादनेन[7] निर्वचनान्कृत्वा॥

कश्चिन्निवचने कृत्वेशाज्ञां[1] मनसिकृत्य च।
यशो मनसि कृत्वोरसिकृत्य जयमुत्थितः॥ २४॥

२४. कश्चिद्दैत्यो रणायोत्थितः किं कृत्वा। निवचने कृत्वा मौनं कृत्वा। ईशाज्ञां युद्धविधिविषयं स्वाम्यादेशं मनसिकृत्य च चित्ते धृत्वा

१ सी °शाज्ञाम°.

१ प सी डी °स्यश्व्यादि°. २ बी सी °भूय भ°. ३ सी °र्थां प्रहा°. ४ बी °रोन्यो दै°. ५ प सी पदेः कृ°. ६ सी °चकृ°. ७ सी °क्षोभ्योत्पा°.

च । यशो रिपुजयोत्थकीर्तिं[1] मनसि कृत्वा च । जयमुरसिकृत्य च चित्ते कृत्वा च । चः सर्वत्र[2] क्त्वान्तेषु योज्यः ॥

स्वकानुरसि कृत्वान्य उपाजेकृत्य सादिनः ।
पत्तीनुपाजकृत्वान्वाजे [1]कृत्वेभानयुध्यत ॥ २५ ॥

२५. अन्यो दैत्यनृपोयुध्यत । किं कृत्वा । स्वकाञ्ज्ञातीनुरसि कृत्वा स्वहृदयाग्रे कृत्वा । तथा सादिन उपाजेकृत्य । पत्तीनुपाजे कृत्वा । इभानन्वाजे [3]कृत्वा । दुर्बलानां भग्नानां वाश्वारो[4]हपदातिहस्तिनां बलाधानं कृत्वा ॥

अन्वाजेकृत्य पुत्रं स्वे पदे कोप्यधिकृत्य च ।
सैन्ये स्वमधि कृत्वाभात्साक्षात्कृत्यास्त्रदेवताः ॥ २६ ॥

१६. कोपि दैत्यनृपोभाद्दिदीपे । किं कृत्वा । पुत्रमन्वाजेकृत्य दुर्बलस्य भग्नस्य वा बलाधानं कृत्वा । तथा[5] स्व आत्मीये पदे राज्येधिकृत्य च स्वामिनं कृत्वा च । तथा सैन्ये स्वमात्मानमधि कृत्वा स्वामीकृत्य । तथास्त्रदेवताः शस्त्राधिष्ठायिका दुर्गाद्याः साक्षात्कृत्य च पूजाबलिमन्त्रस्मरणादिना प्रत्यक्षीकृत्य ॥

साक्षात्कृत्वासिकृत्यां स्वममिथ्याकृत्य दोर्बलम् ।
मिथ्या कृत्वा खलान्कीर्तिं हस्तेकृत्यापरोनदत् ॥ २७ ॥

२७. अपरो दैत्योनदज्जगर्जे । किं कृत्वा । असिरेवारिमृत्युहेतुत्वात्कृत्या मारिदेवता तां साक्षात्कृत्वा प्रत्यक्षीकृत्य । तथा स्वमात्मीयं

१ ए बी सी डी °कृत्येभा°.

१ ए सी °कीर्तिं म°. २ बी सर्वः क्त्वा°. ३ ए बी सी डी °कृत्य । दु°. ४ ए सी डी °रोपप°. ५ ए सी °था स्वे आ°.

दोर्बलममिथ्याकृत्य शत्रुवधेन सत्यीकृत्यात एव खलान् गेहेशूरेणामुना रणे न किंचिन्निष्पादित इत्यसत्यभाषिणैः पिशुनान्मिथ्या कृत्वा । तथा कीर्तिं जयोत्थं यशो हस्तेकृत्य भार्यां कृत्वा ॥

पाणौकृत्य रिपोर्लक्ष्मीं प्राध्वंकृत्यापरः परम् ।
स्वाम्याज्ञां जीविकाकृत्योपनिषत्कृत्य चाययौ ॥ २८ ॥

२८. अपरो दैत्य आययौ स्वामिसमीपमागतः । किं कृत्वा । परं शत्रुं प्राध्वंकृत्य बन्धनेनानुकूलं कृत्वा बद्ध्वा वा । तथा रिपोर्लक्ष्मीं हस्त्यश्वादिकां पाणौकृत्य भार्यां कृत्वा गृहीत्वेत्यर्थः । तथा स्वाम्याज्ञां जीविकाकृत्य जीविकामिव कृत्वा यथा जीवनोपायः सर्वादरेण क्रियते तथा कृत्वेत्यर्थः । उपनिषत्कृत्य चोपनिषदमिव कृत्वा च । यथा रहस्यं सर्वादरेण पाल्यते तथा पालयित्वेत्यर्थः ॥

अतिरोभूय । इत्यत्र "तिरोन्तर्द्धौ" [९] इति गतिः प्राक् ॥

तिरस्कृत्य तिरः कृत्वा । इत्यत्र "कृगो न वा" [१०] इति वा गतिः प्राक् ॥

मध्येकृत्य मध्ये कृत्वा । पदेकृत्य पदे कृत्वा । निवचनेकृत्य निवचने कृत्वा । मनसिकृत्य मनसि कृत्वा । उरसिकृत्य उरसि कृत्वा । इत्यत्र "मध्ये पदे°" [११] इत्यादिना वा गतिः प्राक् ॥

उपाजेकृत्य उपाजे कृत्वा । अन्वाजेकृत्य अन्वाजे कृत्वा । इत्यत्र "उपाजेन्वाजे" [१२] इति वा गतिः प्राक् ॥

अधिकृत्य अधि कृत्वा । इत्यत्र "स्वाम्येधिः" [१३] इति वा गतिः प्राक् ॥

साक्षात्कृत्य साक्षात्कृत्वा । अमिथ्याकृत्य मिथ्या कृत्वा । इत्यत्र "साक्षाद्°" [१४] इत्यादिना वा गतिः प्राक् ॥

---

१ बी र्बलं म°. २ डी °कृत्वा°. ३ बी डी °निष्पद्य°. ४ ए सी °णः. पशु°. डी णः पशुमान्मि°. ५ ए सी डी° क्षादिना.

हस्तेकृत्य । पाणौकृत्य । इत्यत्र "नित्यं°" [१५] इत्यादिना गतिः प्राक् ॥

प्राध्वंकृत्य । इत्यत्र "प्राध्वं बन्धे" [१६] इति गतिः प्राक् ॥

जीविकाकृत्य । उपनिषत्कृत्य । इत्यत्र "जीविका°" [१७] इत्यादिना गतिः प्राक् ॥

समासे नाम नाम्नेव शस्त्रं शस्त्रेण युध्यथ ।
ऐकार्थ्येयोजि विस्पष्टपटुभिर्गूर्जरैर्भटैः ॥ २९ ॥

२९. अथैवं दैत्यैर्युद्धस्य प्रारम्भानन्तरं युधि रणे समासे मिथः संबन्धे सत्यैकार्थ्ये । निमित्तसप्तम्यत्र । विजयलक्षणैककार्येण हेतुना विस्पष्टपटुभिः प्रकटं शस्त्रविद्यानिपुणैर्गूर्जरैर्भटैः शस्त्रं खड्गादि शस्त्रेणारिप्रहरणेन सहायोजि मीलितम् । यथैकार्थ्ये सामानाधिकरण्ये सति यः समास ऐकपद्यं तस्मिन्नाम नाम्ना सह विस्पष्टपटुभिः प्रकटं शब्दविद्याचतुरैर्योज्यते ॥

समासे नाम नाम्नैकार्थ्ये इत्युपमया "नाम नाम्ना°" [१८] इत्यादि समासंसंज्ञासूत्रं ज्ञापितम् । लक्षणं चेदमधिकारश्च । तेन बहुव्रीह्यादिविशेषसंज्ञाभावे यत्रैकार्थता दृश्यते तत्रानेनैव समाससंज्ञा स्यात् । यथा विस्पष्टपटुभिरित्यत्र गुणविशेषणस्य गुणवचनेन समासः ॥

त्रिदशारिषु ते द्वित्रानासन्नानदूरषान् ।
अधिकाष्टानध्यर्धषान्युगपद्वृषुः शरान् ॥ ३० ॥

३०. ते गूर्जरभटास्त्रिदशारिषु त्रिर्दश त्रिदशा देवाः "प्रमाणीसंख्याड्डः" [७.३.१२८.] इति डः । त्रिंशद्देता देवतास्त्रयस्त्रिंशद्देता देवतास्त्रिं-

१ सी इतत्र. २ बी °कृत्त । इ°. ३ ए सी °कात्यत्र उ°. ४ बी °त्कृत । इ°. ५ ए सी °लैक्यार्थे । नि°. ६ डी यत्समा°. ७ सी डी °मासे ऐ°. ८ ए सी डी °ससत्रं सं°. ९ बी विशिष्ट°. १० ए सी त्रिदश त्रिंदशा.

शदक्षरा विराडिति श्रुतेः । तेषामरिषु दैत्येषु शरान्युगपदेककालं ववृषुर्मुमुचुः । कतिसंख्यान् । आसन्नास्त्रयो येषां तांश्चतुरः । तथादूरे षड् येषां तान्पञ्च सप्त वा । तथाधिका अष्टौ येभ्यो येषु वा तान्दशादीन् । अधिकत्वं चाष्टानामेकाद्यपेक्षम् । अवयवेन विग्रहः । समुदायः समासार्थः । तथाधिकमर्धं येषु तेध्यर्धाः षड् येषां तानध्यर्धषान्नव च ॥

अर्धपञ्चमविंशान्केप्यश्वानुपदशा अपि ।
आरूढसुभटाञ्जघ्रुर्द्विट्सैन्ये मत्तबह्विभे ॥ ३१ ॥

३१. मत्तबह्विभे मदोत्कटानेकहस्तिके द्विट्सैन्ये वर्तमानान्केपि गूर्जरभटा अश्वाञ्जघ्नुः । कीदृशान् । आरूढाः सुभटा यांस्तान् । तथार्धपञ्चमी विंशतिर्यासु ता अर्धपञ्चमा विंशतयो येषां तान्नवतिमित्यर्थः । कीदृशाः । उप समीपे दश येषां तेपि नवाप्येकादशापि वा स्तोका अपीत्यर्थः ॥

उच्चैर्मुखानुष्ट्रमुखान्वृषस्कन्धान्सनन्दनान् ।
सौजा दक्षिणपूर्वास्थोदहत्कोप्यग्निवत्परान् ॥ ३२ ॥

३२. दक्षिणपूर्वास्थो दक्षिणस्याश्च पूर्वस्याश्च दिशोर्यदन्तरालं सा दक्षिणपूर्वाग्नेयी दिक्तत्रस्थः सौजा विद्यमानप्रतापः कोपि गूर्जरभटोग्निवद्वह्निदेवतेव परानदहत्तीव्रप्रहारैः संतापितवान् । किंभूतान् । उच्चैःस्थाने मुखं येषां तान् । तथोष्ट्रमुखानुष्ट्रमुखवद्बीभत्सवक्त्रान् । तथा वृषस्कन्धान्वृषभस्कन्धवत्पीनस्कन्धान्बलिष्ठानित्यर्थः । तथा सनन्दनान्पुत्रोपेतान् । अग्निरपि दक्षिणपूर्वदिगधिपत्वात्तत्रस्थः सतेजस्कश्च स्यात् ॥

१ सी मन्यव°.

१ सी °दृश उ°. २ सी °वत्पीन°.

त्रिदश । द्विग्रान् । इत्यत्र "सुज्वार्थे°" [१९] इत्यादिना बहुव्रीहिः[1] ॥

आसन्नग्रान् । अदूरषान् । अधिकाष्टान् । अध्यर्धषान् । अर्धपञ्चमविंशान् । इत्यत्र "आसन्नादूर°" [२०] इत्यादिना बहुव्रीहिः ॥

उपदशाः । इत्यत्र "अव्ययम्" [२१] इति बहुव्रीहिः ॥

आरूढसुभटान् ॥ अनेकं च । मत्तबहिभे ॥ अव्ययम् । उच्चैर्मुखान् । इत्यत्र "एकार्थं च°" [२२] इत्यादिना बहुव्रीहिः ॥

उष्ट्रमुखान् । वृषस्कन्धान् । इत्येतौ "उष्ट्रमुखादयः" [२३] इति बहुकं निपात्यौ ॥

तुल्ययोगे । सनन्दनान् ॥ विद्यमानार्थे । सौजाः । इत्यत्र "सहस्तेन" [२४] इति बहुव्रीहिः ॥

दक्षिणपूर्वा । इत्यत्र "दिशो रूढ्या°" [२५] इत्यादिना बहुव्रीहिः ॥

केषुचिद्विदधानेषु कुन्ताकुं[1]न्ति कचाकचि ।
भूमिर्लोहितगङ्गं नु रक्तैः पञ्चनदं न्वभूत् ॥ ३३ ॥

३३. केषुचिद्भटेषु कुन्ताकुन्ति कुन्तैश्च कुन्तैश्च मिथः प्रहृत्य[3] कृतं युद्धं केषुचिच्च कचाकचि कचेषु[4] च कचेषु[5] च मिथो गृहीत्वा कृतं युद्धं विदधानेषु सत्सु भूमी रणाङ्गणमभूत् । कीदृशम् । रक्तैर्लोहितैः कृत्वा[6] लौहित्याल्लोहितगङ्गं नु लोहिता गङ्गा यत्र देशे स इव । तथा रक्तातिबाहुल्यात्पञ्चनदं नु पञ्चानां नदीनां समाहार इव ॥

द्विगोदावरि मेनेन्योथ त्रिगोदावरं रणम् ।
एकमुनि धनुर्वेदं द्विमुन्यस्य च दर्शयन् ॥ ३४ ॥

३४. अन्यो गूर्जरो रणं द्विगोदावरि द्वयोर्गोदावर्यो[7]ः समाहारमेवं

---

१ प सी डी °कुतिक°.

---

१ सी °ब्रीहे । आ°. २ वीरुढ्योत्ला°. ३ बी °त्यकुन्तयु°. ४ बी °षु क°. ५ बी °षु मि°. ६ बी °त्वालोहि°. ७ प डी सी °र्यो स°.

त्रिगोदावरं च मेने। प्राणत्यागेन स्वर्गफलत्वाद्विगोदावरित्रिगोदावर-तीर्थयोस्तुल्यं मेन इत्यर्थः। लोके हि द्विगोदावरि त्रिगोदावरं च तत्र प्राणत्यागिनां स्वर्गहेतू महातीर्थे प्रसिद्धे। कीदृक्सन्। एको मुनिर्वंश्य आद्यः कारणपुरुषोस्य तदेकमुनि धनुर्वेदं धनुर्विद्याशास्त्रं दर्शयन्सद-भ्यस्तधनुर्विद्यत्वेनालीढादिस्थानानि सम्यक्सत्यापयन्। तथास्य धनु-र्वेदस्य द्विमुनि च द्वौ मुनी वंश्यौ च दर्शयन् द्विमुनिकृतधनुर्वेदोक्त-धनुःकलानां सम्यक्सत्यापनेन द्वौ मुनी साक्षादिव दर्शयन्॥

सप्तकाशि स्वराज्यस्य गङ्गापारपतिः स्मरन्।
पारेरिचमु मध्येश्वमिभमध्येर्दयन्ययौ॥ ३५॥

३५. गङ्गापारपतिर्गङ्गातीराधिपो मूलराजसेवकः काशिदेशराजः पारेरिचमु शत्रुसेनापारं ययौ। कीदृक्सन्। स्वराज्यस्य सप्तकाशि सप्तकाशीन्काशिदेशाधिपान्स्ववंश्यान्स्मरन् सप्तापि स्वानि कुलानि रण-पारगतादिगुणोपेतानि परिभावयन्नित्यर्थः। अत एव मध्येश्वं तुरङ्ग-चमूमध्य इभमध्ये हस्तिचमूमध्येर्दयन्नरिचमूं घ्नन्॥

कोप्यन्तर्धनुराज्यन्तः कराग्रेग्रेधिपं शरान्।
यावद्रिपु परिक्लीबमपार्तं चाजयं न्यधात्॥ ३६॥

३६. कोपि गूर्जर आज्यन्ता रणमध्येग्रेधिपं स्वस्वाम्यग्रे वर्तमा-नोन्तर्धनुश्चापमध्यभागे कराग्र आकर्णान्तमाकृष्टत्वाद्धस्तयोरग्रभागे च वर्तमानान् शरान्न्यधाच्छत्रुष्वक्षिपत्। कथम्। परिक्लीबं निःसत्वा-

---

१ ए सी °कासि स्व°. २ ए सी °पति स्म°.

---

१ बी °वरीती°. २ ए सी °शास्त्रद°. ३ बी च तु द°. ४ ए सी °मु सिन्न°. ५ डी °मध्ये इ°.

न्वर्जयित्वापार्तं च प्रहारादिना पीडितांश्च वर्जयित्वा । तथा यावद्रिपु यावन्तो रिपवस्तावंत इत्यर्थः । तथा आजयं विजयं मर्यादीकृत्य ॥

सेना प्रागर्बुदं राज्ञां बहिर्व्यूहं[1] प्रतिद्विपम् ।
अभ्यश्वं च प्रसृत्यानुजम्बुमालि स्थिता बभौ ॥ ३७ ॥

३७. प्रागर्बुदमर्बुदाद्रेः प्राक्पूर्वदिग्वासिनां राज्ञां मूलराजनृपाणां सेना बभौ । कीदृक्सती । बहिर्व्यूहं मूलराजीयाश्चक्रगरुडादेर्व्यूहाद्बहिर्भूता । तथा प्रतिद्विपमभ्यश्वं च प्रसृत्य रिपूणां द्विपानश्वांश्च लक्ष्यीकृत्याभिमुखं विस्तीर्यानुजम्बुमालि स्थितातिबहुत्वाज्जम्बूमाल्या लक्षणभूताया आयामेनावस्थिता । अर्बुदसेनातिशूरत्वाद्व्यूहान्निर्गत्य युद्धार्थं शत्रूनभि प्रसृतेत्यर्थः ॥

कचाकचि । कुन्ताकुन्ति । इत्यत्र "तत्रादाय°" [२६] इत्यादिनाव्ययीभावः ॥

लोहितगङ्गम् । इत्यत्र "नदीभिर्नाम्नि" [२७] इत्यव्ययीभावः ॥

पञ्चनदम् । त्रिगोदावरम् । इत्यत्र "संख्या°" [२८] इत्यादिनाव्ययीभावः ॥ अन्ये तु पूर्वपदप्राधान्येव्ययीभावो गोदावरीणां त्रित्वं त्रिगोदावरम् । समाहारे तु द्विगुरेवेत्याहुः । द्वयोर्गोदावर्योः समाहारो द्विगोदावरि ॥

द्विमुन्यस्य । सप्तकाशि स्वराज्यस्य । इत्यत्र "वंश्येन°" [२९] इत्यादिनाव्ययीभावः ॥ यदा तु विद्यातद्वतामभेदविवक्षा तदैकमुनि धनुर्वेदमित्यादि सामानाधिकरण्यं स्यात् ॥

---

१ सी °हं मूलराजी°.

---

१ ए सी च प्राहा°. २ ए सी डी °वन्त इ°. ३ ए सी डी लक्षीकृ°. ४ सी डी °क्षणाभू°.

पारेरिषमु गङ्गापार । मध्येरेवम् इभमध्ये । अग्रेधिपम् कराग्रे । अन्तर्धेनुः आज्यन्तः । इत्यत्र "पारे°" [३०] इत्यादिना वाव्ययीभावः ॥

यावदिषु । इत्यत्र "यावदियत्त्वे" [३१] इत्यव्ययीभावः ॥

परिस्त्रीवम् । अपार्तम् । आजयम् । बहिर्व्यूहम् । प्रागर्बुदम् । इत्यत्र "पर्य-पाङ्°" [३२] इत्यादिनाव्ययीभावः ॥

अभ्यश्वम् । प्रतिद्विपं प्रसृत्य । इत्यत्र "लक्षणेन°" [३३] इत्यादिना-व्ययीभावः ॥

अनुजम्बुमालि स्थिता । इत्यत्र "दैर्घ्येनुः" [३४] इत्यव्ययीभावः ॥

अनुस्वाम्यनु नद्यास्ते तिष्ठद्गुपि वहद्गिव ।
युध्यमाना अमन्यन्त धारयन्तः श्रमप्रति ॥ ३८ ॥

३८. युध्यमानाः शत्रुषु प्रहरन्तस्तेर्बुदात्प्राच्या नृपास्तिष्ठन्ति गावो यस्मिन्काले दोहाय वत्सेभ्यो निवासाय जलपानार्थं वा तत्ति-ष्ठद्गुपि संध्याकालमप्यमन्यन्ताज्ञासिषुः । कीदृशम् । वहन्ति गावो यत्र चरणाय जलपानाय वा तद्वहद्गिव प्रभातमिव संजातघटिकाद्वयप्रमाण-दिनमिव । यतः श्रमप्रति खेदाल्पत्वं धारयन्तः । कुत एतदित्याह । यतोनुस्वामि[6] स्वामिनः समीपे नद्या जम्बूमाल्या अनु समीपे च वर्त-मानाः । समीपस्थे स्वामिनि श्लाघादि कुर्वाणे नादेयशीतलजललवो-न्मिश्रवायुसंपर्के च श्रमो ह्यल्पीयान्स्यात् । एतेनैषामत्यन्तं युद्धर-सिकत्वमुक्तम् ॥

अनुस्वामि । अत्र "समीपे" [३५] इत्यव्ययीभावः ॥ अनोरव्ययत्वाद्

---

१ प सी °न्यन्तं धा°.

---

१ डी °श्वम् अ°. २ बी °र्धेनु आ°. ३ प सी "पर्युपा°. ४ सी °द्गुवे । व°. ५ प सी °द्गिव. ६ सी °मिनः स°. ७ सी °तेनेषा°.

"विभक्तिसमीप°" [१९] इत्यादिनैव समासे सिद्धे विकल्पार्थं वचनम् । तेन वाक्यमपि । अनु नद्याः ॥

तिष्ठद्गु । वहद्गु । इत्यत्र "तिष्ठद्गु°" [२६] इत्यादिनाव्ययीभावः ॥

अमप्रति । इत्यत्र "नित्यं°" [२७] इत्यादिनाव्ययीभावः ॥

शलाकापर्यक्षपरि द्विपरीवाजयैः परैः ।
तेऽध्याज्युपनदि क्षुण्णैः सुभिक्षं रक्षसां व्यधुः ॥ ३९ ॥

३९. परैः शत्रुभिः कृत्वा तेर्बुदात्प्राच्या नृपा रक्षसां सुभिक्षं भिक्षाणां समृद्धिं व्यधुरनेके शत्रवो हता इत्यर्थः । किंभूतैः । अजयैर्निःप(ष्प)राक्रमित्वाज्जयरहितैः । शलाकापर्यक्षपरि द्विपरीवेति । एकया शलाकया द्विधाकृतमञ्जकवंशादिमय्या तथैकेनाक्षेण पाशकेन तथा द्वाभ्यामक्षाभ्यां शलाकाभ्यां वा न तथा वृत्तं यथा पूर्वंजय इति विग्रहः । सर्वत्र सप्तम्या लुक् । इवशब्दः प्रत्येकं संबध्यते । पञ्चिका नाम द्यूतं पञ्चभिरक्षैः शलाकाभिर्वा स्यात् । तत्र यदा सर्वे उत्ताना अवाञ्चो वा पतन्ति तदा पातयितुर्जयोन्यथा पाते पराजयस्ततोयमर्थः । यथा पञ्चिकाद्यूत एकया शलाकयैकेनाक्षेण वा द्वाभ्यां शलाकाभ्यामक्षाभ्यां वान्यथापाते द्यूतकारा अजया जयरहिताः स्युः । अत एवाध्याजि रण उपनदि जम्बुमालीसमीपे क्षुण्णैर्विदारितैः ॥

दुःसुराष्ट्रं निःसुराष्ट्रमतिम्लेच्छं विधायिषु ।
तेष्वत्यल्लं ब्रुवन्तोनुद्विपं जग्मुर्द्विषद्भटाः ॥ ४० ॥

४०. अनुद्विपं हस्तिनां पश्चाद् द्विषद्भटा दैत्या जग्मुः । प्राणरक्षार्थं

---

१ बी नद्या ॥. २ ए सी डी °द्गु°" इ°. ३ ए सी °र्यक्षिप°. ४ बी पूर्वं ज°. ५ सी °थाते. ६ ए सी °ते जप°. ७ ए सी °ध्यारिजि.

निलीना इत्यर्थः । किंभूताः सन्तः । अत्यक्षं शस्त्राणां ग्रहणे प्रस्तावाभावं ब्रुवन्तः । केषु सत्सु । तेष्वर्बुदात्प्राच्येषु नृपेषु । कीदृक्षु । दुःसुराष्ट्रं सुराष्ट्राणां सुराष्ट्रदेशस्थभटानां छत्रपातनादिना ऋद्धेर्विगमं निःसुराष्ट्रं सुराष्ट्रभटानामभावमतिम्लेच्छं म्लेच्छानां भिल्लादीनामतीतत्वं सतामेवातिक्रमं च विधायिषु ॥

नानुज्येष्ठमयुध्यन्तेतिमूलराजमिच्छवः ।
सचक्रं धेहि सकुलं कुर्वित्यन्योन्यवादिनः ॥ ४१ ॥

४१. अर्बुदात्प्राच्या नृपा अनुज्येष्ठं ज्येष्ठानुक्रमेण नायुध्यन्त क्रमं मुक्त्वाहमहमिकया युयुधिर इत्यर्थः । कीदृशाः सन्तः । इतिमूलराजं मूलराजशब्दस्य लोके जयोत्थां ख्यातिमिच्छवोत एव सचक्रं धेहि सकुलं कुर्वित्यन्योन्यवादिनश्चक्राक्षेण सहैककालं खड्गादिकं धारय चक्राणि वा युगपद्धारय । तथोत्कृष्टयुद्धेन कुलस्य सदृशं कुर्विति मिथो भाषिणः ॥

सकीर्ति सार्णवं भर्तुर्भूयादित्यर्बुदेश्वरः ।
सनामारीनहन्प्रत्यर्थ्यनुरूपं कृतायुधः ॥ ४२ ॥

४२. भर्तुर्मूलराजस्य सकीर्ति कीर्तेः संपत्सार्णवमर्णवसाकल्येन सकलेष्वर्णवेष्वित्यर्थः । यद्वार्णवपर्यन्तं यथा स्यादेवं भूयादिति हेतोरर्बुदेश्वरोरीनहन् । कीदृक्सन् । प्रत्यर्थ्यरिमरिं प्रत्यनुरूपं रूपस्य स्वाकृतेर्योग्यं यथा स्यादेवं कृतायुधो व्यापारितास्त्रः । कथमहन् । सनाम

१ सी °हि संकु°. २ सी °रूपकु°.

१ डी °राष्ट्र°. २ ए सी निःपुरा°. ३ ए सी °च्छाभि°. ४ सी कीर्तिः सं°. ५ बी °वसा°. ६ सी °पसा स्वा°.

नाम्ना सह यशःपर्यन्तं नामधेयपर्यन्तं वा यशःसाकल्येन नामधेयसाकल्येन वा यशो नामधेयं वा यथा पश्चान्न स्थितमेवमित्यर्थः ॥

प्रहरन्स यथाधर्मं सद्रोणं धनुषा वहन्।
त्रायमाणो यथात्रस्तं तथा रेजे यथार्जुनः[1] ॥ ४३ ॥

४३. यथार्जुनो रेजे तथा सोर्बुदेश्वरो रेजे यतो यथाधर्मं क्षात्रधर्मस्यानतिक्रमेण प्रहरंस्तथा धनुषा धनुःकर्मणा कृत्वा सद्रोणं द्रोणाचार्यसादृश्यं वहंस्तथा यथात्रस्तं येये भीतास्तांस्त्रायमाणो रक्षन् ॥

द्विपरि । अक्षपरि । शलाकापरि । इत्यत्र "संख्याक्ष°" [३८] इत्यादिनाव्ययीभावः ॥

अध्याजि[1] । उपनदि । सुभिक्षम् । दुःसुराष्ट्रम् । निःसुराष्ट्रम् । अतिम्लेच्छम् । अतयकम् । अनुद्विपम् । अनुज्येष्ठम् । इतिमूलराजम् । सचक्रम् । सकुलम् । सकीर्ति ॥ साकल्येन्ते च । सार्णवम् । सनाम । इत्यत्र "विभक्ति°" [३९] इत्यादिनाव्ययीभावः ॥

अनुरूपम् । प्रत्यरि । यथाधर्मम् । सद्रोणम् । इत्यत्र "योग्यता°" [४०] इत्यादिनाव्ययीभावः ॥

यथात्रस्तम् । इत्यत्र "यथाथा" [४१] इत्यव्ययीभावः ॥ अथा इति किम् । यथार्जुनः ॥

स्वीकृत्याकुञ्च्यकं धन्वोत्क्षेप्तुं कुतृणवत्परान्।
सोदुष्कृतजयश्चक्रे सुराजा शरदुर्दिनम् ॥ ४४ ॥

४४. सुराजा न्यायित्वात्पूजितो नृपोर्बुदेश्वरः परान्कुतृणवदसार-

1 सी °र्जुनो रे°.

1 प सी अज्याजि ।.

तृणानीवोत्क्षेप्तुमुत्पाटयितुं शरदुर्दिनं शरैः कृत्वा प्रकाशाभावेन निन्दितं दिवसं चक्रे। किं कृत्वा। असती कुत्सिता ज्या यत्र तदकुज्यकं श्रेष्ठप्रत्यञ्चं धन्व धनुः स्वीकृत्य। यतः कीदृक्। अदुष्कृतो महाशूरत्वादकृच्छ्रेण विहितो जयोनेकारिपराभवो येन सः। अनेकरणेषु लब्धजयपताक इत्यर्थः॥

स्वीकृत्य। कुतृणवत्। इत्यत्र "गतिकु°" [४२] इत्यादिना तत्पुरुषः॥ अन्य इति किम्। अकुज्यकम्। अत्र बहुव्रीहित्वात्कप् स्यात्॥

दुर्दिनम्। दुष्कृत। इत्यत्र "दुर्°" [४३] इत्यादिना तत्पुरुषः॥

सुराजा। इत्यत्र "सुः पूजायाम्" [४४] इति तत्पुरुषः॥

श्रीमालस्यातिराजातिसिश्वभाताम्रदृक् शरैः।
विपक्षप्रभटान्व्याप्रोदतिवेल इवार्णवः॥ ४५॥

४५. श्रीमालस्य भिल्लमालापरनाम्नः पुरस्यातिराजा न्यायपालनेन पूजितोधिपोर्बुदेश्वरो विरुद्धाः पक्षा विपक्षाः शत्रवो ये प्रभटाः प्रकृष्टा भटास्तान् शरैर्व्याप्रोदाच्छादयत्। कीदृक्सन्। आताम्रदृक्कोपेनारक्ताक्षोत एव शरैरतिसिश्वन् रणाङ्गणमतिक्रमेण व्याप्नुवन्नत एव चोत्प्रेक्ष्यते। अतिवेलो निर्मर्यादोर्णव इव॥

प्रतिलोमान्यवेभानि संवर्माणि बलानि सः।
उद्रणः परियुद्धानि निर्युद्धान्यपभीर्व्यधात्॥ ४६॥

४६. सोर्बुदेश्वरोपभीरपगतो भियोत एवोद्रणो रणायोद्युक्तः सन्व-

---

१ ए सी डी °भीर्व्यधा°.

---

१ सी °नीवाक्षेप्तु°. २ ए सी डी यतो की°. ३ ए सी °पक्षाश°. ४ बी °भटाप्र°. ५ डी °रक्ताक्षो°. ६ बी °रैरिति.

कानि शत्रुसैन्यानि परियुद्धानि युद्धाय[1] परिग्लानानि निर्युद्धानि[2] युद्धा-
न्निष्क्रान्तानि च व्यधात् । कीदृंशि सन्ति । प्रतिलोमानि लोमानि[3]
प्रतिगतानि प्रतिकूलं गतानीति व्युत्पत्तिमात्रं लक्षणया द्विषन्ति ।
तथावेभानीभैरवक्रुष्टानि गजबृंहितोपेतानीत्यर्थः । तथा संवर्माणि व-
र्मणा संनद्धानि[4] ॥

अतिक्रमे । अतिसिद्ध्यन् ॥ पूजायाम् । अतिराजा । इत्यत्र "अतिर्°" [४५]
इत्यादिना तत्पुरुषः[5] ॥

आताम्र । इत्यत्र "आत्स्वल्पे" [४६] इति तत्पुरुषः ॥

प्रादयः । प्रभटान् । विपक्ष ॥ अत्यादयः[6] । अतिवेलः । प्रतिलोमानि ॥
अवादयः । अवेभानि । संवर्माणि ॥ पर्यादयः । परियुद्धानि । उद्व्रणः ॥ निरा-
दयः । निर्युद्धानि । अपभीः । इत्यत्र "प्रात्यव°" [४७] इत्यादिना तत्पुरुषः ॥

पुनःप्रवृद्धरोमाञ्चपुनरुत्स्यूतकञ्चुकः ।
परमारः सोसिघातं शस्त्र्याघातं द्विषोक्षिपत् ॥ ४७ ॥

४७. परान् शत्रून्मारयति "कर्मणोण्" [५.१.७२] इत्यणि परमारः ।
परमारः[7] क्षत्रियविशेषजातिः । सोर्बुदेश्वरोसिघातं खड्गेन हत्वा श-
स्त्र्याघातं क्षुरिकया हत्वा च द्विषोक्षिपन्निराकरोत् । कीदृक्सन् । पुनः[8]
प्रवृद्धा वीररसोत्कर्षाद्भूयः स्फीतीभूता ये रोमाञ्चास्तैः पुनरुत्स्यूतो
भूयस्त्रुटितः कञ्चुको वर्म यस्य स तथा ॥

पुनःप्रवृद्ध[9] । पुनरुत्स्यूत । इत्यत्र "अव्ययम्°" [४८] इत्यादिना तत्पुरुषः ॥

परमारः । इत्यत्र "ङस्युक्तं कृता" [४९] इति तत्पुरुषः ॥

---

१ ए सी युधाय. २ ए सी °निर्यु°. डी °नि यु°. ३ सी °नि प्रति प्र°.
४ बी संबद्धा°. ५ ए सी डी °षः ॥ अता°. ६ ए सी °दय । अ°.
७ ए बी सी °मारक्ष°. ८ सी पुप्र°. ९ बी °वृद्धः । पु°.

असिघातम् । शक्याघातम् । इत्यत्र "तृतीयोक्तं वा" [५०] इति वा तत्पुरुषः ॥

अहितानकृतासूर्यंपश्यान्स शरवृष्टिभिः ।
अपुनर्गेयवाक् क्रुद्धोश्राद्धभोजी द्विजो यथा ॥ ४८ ॥

४८. सोर्बुदेश्वरोहितानरीन् शरवृष्टिभिः कृत्वा व्याप्तव्योमत्वात्सूर्यमपि न पश्यन्त्यसूर्यंपश्यास्तानकृत चक्रे । कीदृक्सन् । क्रुद्धोत एव पुनर्न गेया न वक्तुं शक्या वाग्यस्मिन्स तथातिरौद्र इत्यर्थः । श्लेषोपमामाह । यथाश्रोद्धभोजी श्राद्धं न भुङ्क्त इतिव्रतोतिनैष्ठिक इत्यर्थः । द्विजः क्रुद्धोत एवापुनर्गेयवाक्सन् शरवृष्टितुल्यैः शापवचनैरहितानपराद्धानसूर्यंपश्यानन्धान्करोति । अतिनैष्ठिकद्विजो हि कुपितः सत्यशाप एव स्यात् ॥

स्वक्षोलवणभोजीवाकार्णवेष्टकिकान्स तान् ।
अवत्सीयानवध्यघ्नोभि नासान्तापिकोभवत् ॥ ४९ ॥

४९. अवध्यान्वधानर्हान् द्विजगोवत्सादीन्दैत्यत्वेन घ्नन्ति ये तानवध्यघ्नोत एवावत्सीयाञ्च वत्सेभ्यो हितांस्तान्दैत्यानभि इत्थंभूतेत्राभिः । सोर्बुदेश्वरः सांतापिकः "तस्मै योगादेः शक्ते" [६.४.९४] इतीकण्[२] । संतापाय न शक्तो नाभूत् । द्वौ नञौ सातिशयमर्थं गमयत इत्यत्यन्तं संतापाय शक्तत्वप्रकारमापन्नोभवत् । यतोकार्णवेष्टकिकान्कर्णवेष्टकाभ्यां न शोभमानान्कर्णाद्यङ्गावयवच्छेदेन कुण्डलशोभारहितान् । स च कीदृक् । स्वक्षो जितं[३]काशित्वेन प्रमुदितत्वात्पटुविकसितनेत्रोलवणभोजीव । यथा लवणमभुञ्जानो रक्ताद्युद्रेकोत्थरोगाभावेन स्वक्षः स्यात् । अर्बुदेश्वरं हसिताक्षं वीक्ष्य प्रहारजर्जरिताङ्गाः शत्रवः संतेपुरित्यर्थः ॥

---

१ सी °श्राद्धं. २ ए सी °ण् । सांता°. ३ बी °तकांसित्वे°.

अहितान् । इत्यत्र "नञ्" [५१] इति तत्पुरुषः ॥ निवृत्यमानतद्भावश्चो-त्तरपदार्थः । पर्युदासे नञ्समासार्थः । प्रसज्यप्रतिषेधे तु नञ्पदान्तरेण संबध्यत इत्युत्तरपदं वाक्यवत्स्वार्थ एव प्रवर्तते तत्रासामर्थ्येपि यथाभिधानं बाहुलका-त्समासः । असूर्यंपश्यान् । अपुनर्गेय । अश्राद्धभोजी । अलवणभोजी । अकार्ण-वेष्टकिकान् । अवत्सीयान् । अवध्य । असांतापिकः ॥

पूर्वकायेपरकायेधरकायोत्तराङ्गयोः ।
स्वान्क्षुण्णान्वीक्ष्य सायाह्नाभिवद्ग्राहारिरज्वलत् ॥ ५० ॥

५०. सायाह्ने संध्यायां योग्निस्तद्वद्ग्राहारिरज्वलत्कोपाज्जाज्वल्यमा-नोभूत् । किं कृत्वा । स्वानात्मीयान्भटान् ज्ञातीन्वा वीक्ष्य । किंभू-तान् । कायस्य पूर्वभागे हृदयादौ कायस्यापरभाग ऊर्वादौ कायस्याधर-भागे पादादावङ्गस्योत्तरभागे मूर्धादौ क्षुण्णान्प्रहतान् ॥

मध्याह्नार्कनिभः सोर्धदृष्ट्यैक्षिष्ट द्विषां बलम् ।
दृष्ट्यर्धेन च बाहू स्वौ दंष्ट्रिकार्धं परामृशन् ॥ ५१ ॥

५१. स ग्राहारिर्मध्याह्नार्कनिभः कोपाटोपार्चिर्भिः प्रहरद्वयसत्कर-विवज्जाज्वल्यमानः सन्नर्धदृष्ट्या बलावलेपादवज्ञया नेत्रार्धभागेन द्विषां बलं सैन्यमैक्षिष्ट । तथा दंष्ट्रिकार्धं परामृशन्स्वपौरुषावलेपोत्क-र्षाद्दाढिकाकेशार्धभागं पाणिना गृह्णन्सन् पौरुषमदेन वक्रीकृताक्षत्वाद्दृ-ष्ट्यर्धेन स्वौ बाहू चैक्षिष्ट ॥

पूर्वकाये । अपरकाये । अधरकाय । उत्तराङ्गयोः । इत्यत्र "पूर्वा°" [५२] इत्यादिना तत्पुरुषः ॥

---

१ ए सी °न्वीक्ष सा°. २ सी °भः सौर्ध°.

---

१ ए सी °त्वाद्दृष्ट्य°. २ ए सी अध°.

सायाह्नमध्याह्नौ "सायाह्नादयः" [५३] इति साधू॥

अर्धदृष्टया। दृष्टयर्धेन। इत्यत्र "समेंशेर्धे न वा" [५४] इति वा तत्पुरुषः॥ समेंश इति किम्। दंष्ट्रिकार्धम्॥

धिगर्धजरतीयं वः प्राग्जरत्यर्धहासिनाम्।
भग्ना द्वितीयसेना नो यत्तृतीयारिसेनया॥ ५२॥

भूर्द्वितीयं श्रीतृतीयं तुर्यकुप्यं मुधैव वः।
प्रदत्तं माषतुर्याल्पा इत्युक्त्वा सोग्रहीद्धनुः॥ ५३॥

५२,५३. स आह्वारिर्धनुरग्रहीत्। किं कृत्वा। उक्त्वा। किमित्याह। हे माषस्य मदनधान्यस्य तुर्यश्चतुर्थो भागस्तद्वदल्पास्तुच्छा अल्पसत्त्वाः प्राक्पूर्वं जरत्या अर्धं जरत्यर्धं किंचिद्यौवनं किंचिद्वार्धक्यम्।[1] अनेन च शुभाशुभरूपमर्धनिष्पन्नं कार्यं[3] व्यज्यते। तद्धासिनां महाशूरंमन्यतयान्यदीयजयाजयरूपार्धनिष्पन्नकार्योपहासिनां वो युष्माकमर्धं जरत्या अर्धजरती किंचिद्यौवनं किंचिद्वार्धक्यं तस्यास्तुल्यं "काकतालीयादयः" [७.१.११७] इतीये अर्धजरतीयं जयाजयरूपमर्धनिष्पन्नं कार्यं[2] धिग्गर्हामहे। यद्यस्माद्धेतोर्नोस्माकं द्वितीयसेना सेनाया द्वितीयो भागस्तृतीयारिसेनया शत्रुसेनायास्तृतीयेन भागेन भग्ना नाशिता तथात एव वो युष्मभ्यं भूर्द्वितीयं[4] भूमेर्द्वितीयो भागः श्रीतृतीयं लक्ष्म्यास्तृतीयो[5] भागस्तुर्यकुप्यं कुप्यस्य हेमरूप्याभ्यामन्यस्य ताम्रादेश्चतुर्थो भागो मुधैव निरर्थकमेव प्रदत्तमिति॥

---

१ बी °द्वार्धिक्य°. २ डी °रूपं द्वयम°. ३ प सी °र्यं विज्य°. ४ प भूर्द्विती° सी भूर्द्वि°. ५ प लक्ष्मात्र°. सी लक्ष्मीतृ°. डी लक्ष्मास्तृ°.

सौध्यास्तोत्तलपादोग्रहस्तोपात्तवरत्रया ।
गजं पादतलन्यञ्चद्भ्रुवं हस्ताग्रमुद्गरम् ॥ ५४ ॥

५४. स ग्राहारिरारोहवशादुदूर्ध्वेत्तलपादः पादतलं यस्य स तथा सन्नग्रहस्तेन हस्ताग्रेणोपात्ता गृहीता या वरत्रा कक्षा तया गजमध्यास्तारुरोह । किंभूतं सन्तम् । हस्ताग्रे[२] शुण्डाग्रे मुद्गरो यस्य तम् । तथा पादतलेन न्यञ्चन्ती भारातिरेकान्नमन्ती भ्रूर्यस्य तम् ॥

अर्धजरतीयम् जरत्यर्धं । इत्यत्र "जरत्यादिभिः" [५५] इति वा तत्पुरुषः ॥

द्वितीयसेना । तृतीयारिसेनया । तुर्यकुप्यम् । अग्रहस्त । उत्तलपादः । इत्यत्र "द्वित्रि°" [५६] इत्यादिना वा तत्पुरुषः । पक्षे । भूद्वितीयम् । श्रीतृतीयम् । आपत्तुर्य । हस्ताग्र । पादतल ॥

वर्षजाताहिभीमभ्रूरूयब्दजातहरेः समः ।
सैन्यं स स्वयमुद्युक्तोऽस्थापयत्सामिविद्रुतम् ॥ ५५ ॥

५५. स ग्राहारिः सामिविद्रुतमर्धोपप्लुतं सैन्यमस्थापयत्समधीरयत् । कीदृक्सन् । वर्षं जातस्य वर्षजातो योऽहिः सर्पस्तद्वद्भीमे कोपाटोपाद्रौद्रे भ्रुवौ यस्य सः । वर्षप्रमाणोऽहिः[४] प्रौढत्वादतिभीमः स्यात् । तथा त्रयोऽब्दा वर्षाणि जातस्य त्र्यब्दजातो यो हरिः सिंहस्तस्य समः शौर्येण तुल्योऽत एव स्वयमुद्युक्तो रणायोद्यतः ॥

१ सी सौध्या°.

१ बी कक्ष्या त°. २ ए °ग्रे शुण्डा°. सी °ग्रे मु°. ३ सी °रत्ना°. ४ बी °णो हि अहिः. ५ बी मः सौर्ये°. ६ सी °यत व°.

वर्षजात । व्यब्दजात । इत्यत्र "काकः°" [५७] इत्यादिना तत्पुरुषः ॥

स्वयमुद्युक्तः । सामिविद्रुतम् । इत्यत्र "स्वयं°" [५८] इत्यादिना तत्पुरुषः ॥

अखट्वारूढभूपालाः षण्मुहूर्ता न्वहः[1]स्मृताः ।

तस्थुस्तद्वृद्धये पार्श्वेहोरात्रस्नेहशालिनः ॥ ५६ ॥

५६. अखट्वारूढा अनिन्द्या ये भूपाला नृपास्ते तद्वृद्धये तस्य ग्राहारेर्विजयोत्थस्फीत्यर्थं ग्राहारेः पार्श्वे तस्थुः । यतोहोरात्रं सदा यः स्नेहोनुरागस्तेन शालन्ते शोभन्ते तं शलन्ति वा गच्छन्तीत्येवंशीलाः षण्मुहूर्ता न्वहःस्मृता इति । यथा षड् मुहूर्ता घटिकाद्वयमानकालविशेषा अहोरात्र[1]स्नेहशालिनो दक्षिणायने रात्रिचारित्वादुत्तरायणेहश्चारित्वाच्चाहोरात्रेषु[2] यः स्नेहः सदा सहचारित्वेनानुराग इव तच्छालिनोत एवाहर्दिनं[3] स्मृताः संक्रान्ताः सन्तस्तद्वृद्धयेहर्वृद्धये पार्श्वे दिनमध्ये तिष्ठन्ति । मध्यदेशे हि सूर्योदयास्तविशेषेण दिनं नक्तं च परमबृहदष्टादशमुहूर्तमानं परमलघु च द्वादशमुहूर्तमानम् । तत्र यदा दक्षिणायनं स्यात्तदा कर्कसंक्रान्त्यादिदिनादारभ्य धनुःसंक्रान्त्यन्त्यदिनं यावत्प्रतिसंक्रान्ति दिनेभ्यो रात्रिष्वेकैकं मुहूर्तं संचरति । यावद्धनुःसंक्रान्त्यन्त्यादिने षडपि मुहूर्ता रात्रिषु दिनेभ्यः संक्रामन्ति । यदा चोत्तरायणं स्यात्तदा मकरसंक्रान्त्यादिदिनादारभ्य मिथुनसंक्रान्त्यन्त्यदिनं यावत्प्रतिसंक्रान्ति रात्रिभ्यो दिनेष्वेकैकं मुहूर्तं संचरति । यावन्मिथुनसंक्रान्त्यन्त्यादिनं[4] रात्रिभ्यो दिनेषु षण्मुहूर्ताः संक्रामन्ति । अत एव वृत्तावुक्तं षण्मुहूर्ताश्चराचरास्ते रात्रौ गच्छन्ति दक्षिणायन उत्तरायणे त्वहरिति । तथा चोक्तं भगवति श्रीजैनागमे ।

---

१ ए सी डी °हः स्मृताः ।.

---

१ डी °रात्रं स्ने°. २ सी °होरात्रेषु. ३ सी °न्त्यादि°. ४ सी °दिनरा°. ५ सी °द्रुतम°.

कक्कड-संकन्ति-दिणे छत्तीसं नाडियाउ दिण-माणं ।
चउवीसं घडिआओ रयणि-पमाणं विणिद्दिट्ठं ॥ १ ॥
तीय दिणा चउ-गुणिआ सट्ठि-विहत्ता हवन्ति घडियाओ ।
एया सिहाणि वुड्ढी दिण-रयणीसुं तओ पुरओ ॥ २ ॥

किंचिदूनत्वाविवक्षया चतुर्भिर्गुणनम् ॥

मयरे पुण दिण-माणं चउवीसं नाडियाउ पढम-दिणे ।
छत्तीसं घडिआओ रयणि-पमाणं मुणेयव्वं ॥ ३ ॥
परओ दिणस्स वुड्ढी रयणी-हाणी य पुव्व-निद्दिट्ठा ।
ता नायव्वा जावउ उत्तर-अयणस्स चरम-दिणं ॥ ४ ॥

एवं च

पडइ चडइव घडिया पक्खेण दुन्नि मासेण ।
दिण-रयणि-पमाणाओ भणिय-पमाणेण अयण-दुगे ॥ इति ।

खट्वारूढ । इत्यत्र "द्वितीया०" [५९] इत्यादिना तत्पुरुषः ॥

अहःसृताः । इत्यत्र "कालः" [६०] इति तत्पुरुषः ॥

अहोरात्रखेद । इत्यत्र "व्याप्तौ" [६१] इति तत्पुरुषः ॥

सोऽस्त्रश्रितः सुरातीतो योद्धुं प्रववृते वृतः ।
प्राप्तजीविकया चम्वा नृपैश्चापन्नजीविकैः ॥ ५७ ॥

५७. सुरातीतः सुरारित्वाद्देवानतिक्रान्तः स ग्राहारिर्योद्धुं प्रववृते । कीदृक्सन् । अस्त्रश्रितः शस्त्राण्याश्रितः । तथा प्राप्तजीविकया जीविकां वृत्तिं फलितं प्राप्तया चम्वापन्नजीविकैर्जीविकां प्राप्तैर्नृपैश्च वृतः ॥

१ बी °डियाओ. २ बी °णिया स°. ३ बी विहित्ता. ४ सी °रणीसु त°. ५ बी ओ पर°. ६ बी °डियाओ. ७ सी अहस्त°. ८ सी °विकावृत्तिफ°.

अश्वश्रितः । क्षुरातीतः । इत्यत्र "श्रितादिभिः" [६२] इति तत्पुरुषः ॥

प्राप्तजीविकया । आपन्नजीविकैः । इत्यत्र "प्राप्त°" [६३] इत्यादिना तत्पुरुषोनयोरन्तस्य[१] चाकारः ॥

ईषत्ताम्रः क्रुधा तस्याभ्रमन्मदपटुर्द्विपः ।
स्मारयञ् शङ्कुलाखण्डान्द्विषो भ्रमितमुद्गरः ॥ ५८ ॥

५८. तस्य ग्राहारेर्मदपटुर्मत्ततया[३] प्रचण्डो द्विपो रणेभ्रमत् । कीदृक्सन् । क्रुधा कोपेनेषन्मनाक्ताम्र आरक्तोत एव भ्रमितमुद्गरोत एव च द्विषः शत्रून् शङ्कुलाखण्डान् शङ्कुलया कृतान्खोडाभरान् । यद्वा । शङ्कुलया कृताः खण्डाः खण्डत्वानि खण्डीकरणानि पादाद्यङ्गभङ्गा इत्यर्थः । तान्स्मारयन् ज्ञापयन् शङ्कुलयेव भ्रमितमुद्गरेण कुण्ठीकुर्वन्नित्यर्थः ॥

ईषत्ताम्रः । इत्यत्र "ईषद्°" [६४] इत्यादिना तत्पुरुषः ॥

शङ्कुलाखण्डान् । मदपटुः । इत्यत्र "तृतीया°" [६५] इत्यादिना तत्पुरुषः ॥

अन्ये तु गुणवचनैर्गुणमात्रवृत्तिभिरपि समासमिच्छन्ति । तन्मतेन द्वितीयव्या[६]-ख्याने शङ्कुलाखण्डान् इति ज्ञेयम् ॥

म्लेच्छैरनुसृतैरर्धचतस्रोक्षौहिणीस्तले ।
अवीर्योनाः स कृत्वा भीविकलोलोलयत्परान् ॥ ५९ ॥

५९. स ग्राहारिर्भीविकलो[७] भयेन रहितः सन्परानलोलयदमभ्रात् । किं कृत्वा । अक्षौहिणीस्तलेधोभागे कृत्वा । किंभूताः । अवीर्योना न वीर्येणोनास्तथानुसृतैराश्रितैर्म्लेच्छैस्तुरुष्कभिल्लाद्यैः कृत्वार्धचतस्रो-

१ प डी °खन्दान्द्वि°.

१ सी °विवाया ।. २ सी °रतस्य. ३ सी °र्मत्त°. ४ सी °न्मनोक्ता°. ५ प सी डी खण्डा ख°. ६ डी °तीये व्या°. ७ बी °र्भीर्विक°. ८ प सी डी °नुभृते°. ९ प सी °चतुस्रो°.

र्धेन कृताश्चतस्रोऽप्यर्धैतिस्रः। अक्षौहिणीशब्दो हस्ति २१८७० रथ २१८७० अश्व ६५६१० पदाति १०९३५० एवंप्रमाणचतुरङ्ग-बलवाचकोप्यत्र म्लेच्छैरित्युक्तेरेकदेशे १०९३५० इतिमानेषु पत्ति-ष्वेव वर्तते। ततस्तिस्रोऽक्षौ ब्यशीतिसहस्री पञ्चविंशत्यधिकसप्तशतीप्र-माणास्तात्पर्येणातिभूयिष्ठम्लेच्छपत्तिमयीरित्यर्थः॥

तस्मान्मासावरैर्मासपूर्वैर्वा योधिभिर्नृपैः।
अस्त्रभिन्नारिवान्तासृक्पङ्कोभूत्पादहारकः॥ ६०॥

६०. अस्त्रैः करणैर्भिन्ना विदारिता यैरयस्तैः कर्तृभिर्वान्तानि व्युत्सृष्टानि यान्यसृञ्जि रक्तानि तेषां पङ्कः कर्दमोभूत्। कीदृक्। नृपैः कर्तृभिः पादैर्ह्रियते "बहुलम्" [५.१.२] इति कर्मणि णके पादहारकश्चर-णापसार्यः। किंभूतैः। अस्माद्वाहारेः सकाशान्मासावरैर्मासेन लघुभि-र्मासपूर्वैर्वा। वा समुच्चये। मासेन प्रथमैश्च। तथा योधिभिः सुभटान्वितैरवश्यं युध्यमानैर्वा। आवश्यके णिनिः॥

घनघात्यान्परान्बाष्पच्छेद्यवद्वाप्रसृग्नदीः।
काकपेयाः स एकान्नविंशं भूतं नु निर्ममे॥ ६१॥

६१. स ग्राहारिरसृग्नदी रक्तसिन्धूः काकपेया निर्ममे पूर्णाश्चकारे-त्यर्थः। कीदृक्सन्। घनघात्यानत्यन्तं दृढाङ्गत्वाद्घनैर्लोहमुद्गरैर्हन्तुं शक्यानत्यन्तायासेन घात्यानित्यर्थः। परान् शत्रून् बाष्पच्छेद्यवद्वाष्पैः श्वासैश्छेद्यांस्तृणादीनिव घ्नन्नत्यन्तमनायासेन हिंसन्नित्यर्थः। उत्प्रेक्ष्यते। एकान्नविंशमेकेन न विंशतिरेकान्नविंशतिस्तस्याः पूरणं भूतं नु किल। सुर १ असुर २ यक्ष ३ राक्षस ४ कश्मल ५ भस्मक ६ पितृ ७

१ ए सी °श्चतस्रो°. २ ए सी °लक्षीं त्र्या°. डी °लक्षीं त्र्याशीति°. ३ सी °णाति भू°. ४ ए सी °कासान्मा°. ५ ए सी डी °र्वास°. ६ बी सी णिनि॥. ७ बी °मुद्गरै°. ८ सी °ष्पैः स्वासै°. ९ ए सी °त्प्रेक्षते।. १० ए सी सुरा १ अ-सुरा २ य°.

विनायक ८ प्रलाप ९ पिशाच १० अन्त्यज ११ योनिज १२ भूत १३ अपस्मार १४ ब्रह्मराक्षस १५ क्षत्रराक्षस १६ वैश्यराक्षस १७ शूद्रराक्षसाख्या १८ नारायणीसंहितायामुक्ता अष्टादशैव भूतजातयः प्रसिद्धाः । अयं त्वेकोनविंशतितमं भूतमिव । भूत एव हीदृशः स्यात् । भूतशब्दः पुंक्लीबः ॥

तेनात्येकान्नपञ्चाशन्मरुता कुन्त उद्धृतः ।
यूपदार्विव युधज्ञेभाच्छ्रीसुखयशोहितः ॥ ६२ ॥

६२. युधज्ञे रणयागे यूपदार्विव यूपाय यज्ञकीलकाय काष्ठमिव यज्ञस्तम्भ इव तेन प्राहारिणोद्धृतः कुन्तोभात् । यतः श्रिये जयलक्ष्म्यै सुखः सुखकारी यो यशोहितो जयोत्थकीर्तयेनुकूलः स तथा । यूपदार्वपि यागकारयितुः श्रीसुखं यशोहितं च स्यात् । कीदृशा तेन । अत्येकान्नपञ्चाशन्मरुता । एकान्नपञ्चाशन्मरुतो भौमप्रवहादीनेकोनपञ्चाशद्वायून् गणदेवता अतिक्रान्तेनैकोनपञ्चाशद्वायुभ्योप्यधिकबलेनेत्यर्थः ॥

अर्धंचतस्रः । इत्यत्र "चतस्रार्धम्" [६६] इति तत्पुरुषः ॥

[ऊनार्थे ।] वीर्योनाः । भीविकलः ॥ पूर्वाद्य । मासपूर्वैः । मासावरैः । इत्यत्र "ऊनार्थ°" [६७] इत्यादिना तत्पुरुषः ॥

कर्तृ । अरिवान्त ॥ करण । अस्त्रभिन्न । पादहारकः । इत्यत्र "कारकं कृता" [६८] इति तत्पुरुषः ॥ बहुलाधिकारीत्स्तुतिनिन्दार्थतायां प्रायेण कृत्यैः समासः । कर्तृ । काकपेया असृप्नदीः । एवं नाम पूर्णा इत्यर्थः ॥ करण । बाष्पच्छेद्यवत् । एवं नाम मृदूनीत्यर्थः ॥ अन्यत्रापि । वनघात्यान् ॥

---

१ डी °सुय°.

---

१ बी °न्त्यजः ११ यो°. २ प डी °क्षसा १८ ना°. सी °क्षस १८ ना°. ३ बी °ध इव. ४ प सी डी कुम्भोभा°. ५ प सी डी सुखका°. ६ सी °सुखय°. ७ प सी °कात्स्तु°. ८ बी °रास्तुति°. ९ बी °त्सान् ॥ प°.

एकान्नविंशम् । एकान्नपञ्चाशत्[1] । इत्यत्र "नविंशति°" [६९] इत्यादिना तत्पुरुष एकशब्दस्य चादन्तः ॥

यूपदारु । इत्यत्र "चतुर्थी प्रकृत्या" [७०] इति तत्पुरुषः ॥

यशोहितः । स्त्रीसुख । इत्यत्र "हितादिभिः" [७१] इति तत्पुरुषः ॥

जयार्थमस्त्रं तन्वानेऽस्मिन्न मृत्युभयेऽपतन् ।
सिंहभीता इवैणाः केऽप्यल्पान्मुक्ताः परःशताः ॥ ६३ ॥

६३. सिंहाद्भीता ऐणा[2] इव । केपीत्यत्रापिर्भिन्नक्रमे । परःशता अपि शतात्परेपि बहवोपीत्यर्थः । के भटा मृत्युभये मरणाद्भीतौ नापतन् । यतोल्पान्मुक्ताः स्तोकाच्छुटिताः[3] । क सति । अस्मिन् ग्राहारौ । कीदृशे । जयार्थमस्त्रं शस्त्राणि तन्वाने ॥

असौ परःसहस्रारिनृणामुज्ज्वासितं दिशन् ।
उद्यच्छिरोभी राहूणां भ्रान्तं भानोरजीजनत् ॥ ६४ ॥

६४. असौ ग्राहारी राहूणां भ्रान्तं सादृश्याद्राहुभिः करणैः प्रवर्तनम् । यद्वा । अरित्वेन राहावत्यन्तं विरक्तत्वाच्चित्तभ्रान्त्यानेकराहुरूपेण प्रतिपत्तिं भानो रवेरजीजनद्ग्रसनार्थमागच्छतामनेकेषां राहूणां शङ्कां[4] भानोरुत्पादितवानित्यर्थः । कैः कृत्वा । उद्यच्छिरोभिः प्रहारवशोर्ध्वोच्छलन्मस्तकैः । यतः कीदृक् । सहस्रात्परे परःसहस्रा बहवो येऽरीणां नरः पुरुषास्तेषां[5] कर्मणामुज्ज्वासितं[6] हिंसां दिशन् कुर्वन् ॥

जयार्थम् । इत्यत्र "तदर्थार्थेन" [७२] इति तत्पुरुषः ॥

मृत्युभये । सिंहभीताः । इत्यत्र "पञ्चमी भयाद्यैः" [७३] इति तत्पुरुषः ॥

---

१ प सी डी °शात् ।. २ सी एता इ°. ३ प सी डी °टिता क. ४ बी सी शङ्का भा°. ५ सी डी °स्तेषा क°. ६ सी °सित हिं°.

अल्पान्मुक्ताः । इत्यत्र "केनासत्त्वे" [७४] इति तत्पुरुषः ॥ "असत्त्वे ङसेः" [३.२.१०] इत्यलुप् ॥

परःशताः । परःसहस्रा । इत्येतौ "परःशतादिः" [७५] इति साधू ॥

अरिनृणाम् । इत्यत्र "षष्ठी°" [७६] इत्यादिना तत्पुरुषः ॥ अयत्नादिति किम् । नृणामुज्जासितम् ॥ शेष इति किम् । राज्ञूणां ज्ञानम् ॥

द्विड्गतिव्रश्चनो देवयाजकद्वेषिपूजकः ।
घ्नन्नाभूद्रथगणको न पत्तिगणकोपि सः ॥ ६५ ॥

६५. स ग्राहारिघ्नन्नरीन्हिंसन्सन् रथगणको नाभूत्पत्तिगणकोपि नाभूत् । असंख्यान्रथान्पत्तींश्च व्यनाशयदित्यर्थः । कीदृक् । द्विड्गतिव्रश्चनो द्विषां कर्तॄणां गतिः संग्रामे विचरणं तस्याः कर्मणः सर्वथा प्राणहारित्वाद्व्रश्चनश्छेदको रम्यादित्वादनट् [५.३.१२६]। तथा देवानां याजका ऋषिद्विजादयस्तेषां द्वेषिणो दैत्यास्तेषां पूजकः ॥

द्विड्गतिव्रश्चनः[३] । इत्यत्र "कृति" [७७] इति तत्पुरुषः ॥

देवयाजक । द्वेषिपूजकः । इत्यत्र "याजकादिभिः[४]" [७८] इति तत्पुरुषः ॥

पत्तिगणकः । रथगणकः । इत्यत्र "पत्ति°" [७९] इत्यादिना तत्पुरुषः ॥

सर्वपश्चाद्भटांस्तर्जन्स घ्नन्सर्वचिरं परान् ।
युद्धूतभञ्जिकां चक्रेरीभानां दन्तलेखकः ॥ ६६ ॥

६६. स ग्राहारिर्युद्धेव रणमेव हर्षेण कार्यत्वाद्धूतभञ्जिकाग्राणां भञ्जयित्री काचित्क्रीडा तां चक्रे क्रीडामिव युद्धं हर्षोपकारेत्यर्थः । कीदृक्सन् । सर्वपश्चात्सर्वेषां मध्ये पश्चात्पश्चाद्भागे स्थितान्भटांस्तर्जन्साक्षेपवाक्यैर्निर्भर्त्सयन्[६] । तथा सर्वचिरं सर्वेषां मध्ये चिरं चिरकालं

१ बी °शता । प°. २ बी °नच्छेद°. ३ बी °ति । गतिव्र°. ४ डी °कादेरिति. ५ बी युद्धं ह°. ६ सी °निर्त्स°.

यावन्तं कालं न कोपि हन्ति तावन्तं कालमित्यर्थः । परान्घ्नन् । तथारीभानां शत्रुहस्तिनां दन्तानां लेखको दन्तलेखको दन्तविलेखना-जीवः स इव यथा दन्तलेखको दन्तकर्म कुर्वन्दन्तान्भिनत्ति तथारि-गजदन्तान्भिन्दंश्च ॥

सर्वपश्चात् । सर्वचिरम् । इत्येतौ "सर्व°" [८०] इत्यादिना साधू ॥

घृतभक्षिकाम् । दन्तलेखकः । इत्यत्र "अकेन°" [८१] इत्यादिना तत्पुरुषः ॥

गजानामासिकां कुम्भेष्वस्त्राणां क्षेपकोतनोत् ।
क्रुद्धः सुराष्ट्रभूभर्ता पुरां भेत्तेव दुस्सहः ॥ ६७ ॥

६७. सुराष्ट्रभूभर्ता प्राहारिर्गजानां कर्तॄणामासिकामवस्थानमतनो-च्चक्रे । तीव्रप्रहारैर्गजान् रणेपातयदित्यर्थः । कीदृक्सन् । पुरां भेत्तेव तिसृणां दानवपुरीणां कर्मणां विदारको रुद्रः स इव क्रुद्धः सन् दु-स्सहो दुर्धर्षोत एव कुम्भेषु कुम्भस्थलेष्वस्त्राणां कर्मणां क्षेपकः ॥

गजानामासिकाम् । इत्यत्र "न कर्तरि" [८२] इति न तत्पुरुषः ॥

अस्त्राणां क्षेपकः । पुरां भेत्ता । इत्यत्र "कर्मजा तृचा च" [८३] इति न तत्पुरुषः ॥ कथं भूभर्ता । भर्तृशब्दो यः पतिपर्यायस्तेन संबन्धषष्ठ्या याजका-दिपाठात्कर्मषष्ठ्या वार्य समासः ॥

गवां दोह इवागोपै राज्ञां भृत्यानुशासनम् ।
नश्यतां दुष्करमभूत्तस्योग्रायां युधः कृतौ ॥ ६८ ॥

६८. उग्रायां तस्य प्राहारेः कर्तुर्युधः कर्मणः कृतौ करणे सत्यां नश्यतां राज्ञां कर्तॄणां भृत्यानुशासनं प्रेष्याणां कर्मणां भो मा पलोयिध्व-

१ डी गवा दो°.

१ डी °त्ववि°. २ डी °दु स्स°. ३ सी पुरा भे°. ४ सी °ब्दो ×× पतिप°. ५ बी डी °कावच्च°.

मित्यादि शिक्षणं दुष्करमभूत्। यथा गोपैरगोधुग्भिः कर्तृभिर्गवां कर्मणां दोहो दोहाज्ञत्वेन दुष्करः स्यात्। यद्वा। यथागोपैरभूपै राजगुणविकलैर्गवां भुवां दोहो रत्नादिक्षारणं दुष्करः स्यात्॥

गवां दोह इवागोपैः। इत्यत्र "तृतीयायाम्" [८४] इति कर्मजा षष्ठी न समस्यते॥ तृतीयायामिति किम्। दुष्करं राज्ञां भृत्यानुशासनम्॥ कर्तरि षष्ठ्यामपि न समास इति कश्चित्। तस्य युधः कृतौ॥

मांसस्य तृप्तान्सोस्रस्य सुहितान् राक्षसान्व्यधात्।
लङ्कापतेर्द्वितीयो नु राज्ञां साक्षाद्धरेर्द्विषन्॥ ६९॥

६९. हरेर्द्विषन्दैत्यत्वादिन्द्रस्य शत्रुः स प्राहारी राज्ञां साक्षात्समक्षं राक्षसान्व्यधात्। किंभूतान्। अनेकारिवधेन मांसस्य तृप्तानोघ्राणानसृस्य रक्तस्य च सुहितान्। अतश्च राक्षसानां तृप्त्यापादनलक्षणतुल्यकार्यविधानाल्लङ्कापते रावणस्य द्वितीयो नु द्वितीय इव रावण इत्यर्थः॥

विक्रान्तानां स्तुवानोसौ त्रस्तानां विब्रुवन्नहन्।
राज्ञां ज्ञातान्सतां बुद्धान्यमस्येष्टः कलेर्मतः॥ ७०॥

७०. असौ प्राहारिर्भटानहन्। कीदृक्सन्। विक्रान्तानां शूराणां स्तुवानस्तथा त्रस्तानाम्। पूर्वत्रात्र च संबन्धे षष्ठी। विब्रुवन्निन्दन्। तथानेकारीणां वधकत्वेन यमस्य मृत्योरिष्टः। कले रणस्य मतः संमतः। यद्वा। पापिष्ठत्वात्कलेः कलिकालस्य मतः। कीदृशान्। राज्ञां ज्ञातान् शौर्यादिगुणैः प्रसिद्धान्। तथा सतां शिष्टानां बुद्धान् न्यायायोधित्वादिशिष्टोचितक्षात्रधर्मैः प्रसिद्धान्॥

---

१ सी °क्षण दु°. २ ए सी °नाघ्रणा°. ३ ए सी °स्नर°. ४ ए सी तृप्तापा°. ५ डी नुर्द्विती°. ६ ए सी मत सं°.

दैत्यानां पूजितो जज्ञे रक्षसामर्चितस्तदा ।
विक्रमस्यासितः सोरिकीर्तेः शौक्ल्यं कदर्थयन् ॥ ७१ ॥

७१. दैत्यानां पूजितः स ग्राहारिस्तदा युद्धकाले मांसासृक्सुभि-क्षकरणाद्रक्षसामर्चितो जज्ञे । कीदृक्सन् । विक्रमस्य । आस्यते[2] स्मा-त्रेति "नवर्थाच्चाधारे" [५.१.१२] इति के आसितः स्थानम् । अत एवा-रिकीर्तेः शौक्ल्यं श्वेततां कदर्थयन्पराभूत्योत्प्लवमानः[3] ॥

हस्तलाघवतोस्येषुरूपं नालक्षि कैरपि ।
रणशौण्डस्याक्षधूर्तस्येव कैतवपाशकः ॥ ७२ ॥

७२. रणे प्रसक्तः[4] शौण्ड इव रणशौण्डस्तस्यास्य ग्राहारेर्हस्तलाघ-वतो हस्तदाक्ष्यादिषु[5] रूपं शराकारः कीदृगयं शर इति कैरपि नालक्षि न ज्ञातं यथाक्षेषु पाशकेषु धूर्तो वञ्चकोक्षधूर्तस्तस्य प्रवीणद्यूतकारस्य हस्तलाघवतः कैतवाय दम्भाय पाशको देवनः[6] कैतवपाशकः[7] कूटपा-शकः कैरपि[8] न लक्ष्यते कूटोयं[9] पाशक इति न ज्ञायते ॥

तृप्तार्थ । मांसस्य तृप्तान् । अन्नस्य सुहितान् ॥ पूरण । लङ्कापतेर्द्वितीयः ॥ अव्यय । राज्ञां साक्षात् ॥ अतृश् । हरेर्द्विषन् ॥ शतृ । अस्त्राणां विब्रुवन् ॥ आ-नश् । विक्रान्तानां स्तुवानः । अत्र "तृप्तार्थ°" [८५] इत्यादिना न तत्पुरुषः ॥

राज्ञां ज्ञातान् । सतां बुद्धान् । यमस्येष्टः । कलेर्मतः । रक्षसामर्चितः । दैत्यानां पूजितः । विक्रमस्यासितः । इत्यत्र "ज्ञानेच्छा°" [८६] इत्यादिना न समासः ॥

---

१ बी मांसास°. २ डी °तेस्मिन्निति. ३ बी °त्योपप्लव°. ४ बी प्रशक्तः. ५ ए सी °क्ष्यातिदिषु. ६ ए सी °नः केत°. ७ ए सी °शक कू°. ८ ए सी डी °पि क°. ९ ए कूटायं. सी कूटाय पा°. १० ए °प्तार्थः । मां°. बी °प्तार्थम् । मां°. ११ बी तृच् । ह°.

कीर्तेः शौक्ल्यम् । इत्यत्र "असंख्यगुणैः" [८७] इति न तत्पुरुषः ॥ अत्र च शुक्लादेर्गुणस्य शुक्लारिकीर्तिरित्यादौ द्रव्येपि वृत्तिदर्शनादस्वास्थ्यमस्त्येव । गुणशब्देन चेह लोकप्रसिद्धा रूपरसगन्धस्पर्शा गुणा अभिप्रेतास्ततस्तद्भिन्नैपरेषायं प्रतिषेधस्तेन हस्तलाघवत इत्यत्र प्रतिषेधो न स्यात् ॥ असंख्यगुणैरिति किम् । इषुरूपम् ॥

रणशौण्डस्य । अक्षधूर्तस्य । इत्यत्र "सप्तमी°" [८८] इत्यादिना तत्पुरुषः ॥

रणसिंहेन तेनाजिव्याघ्रा अपि कृताः परे ।
तीर्थकाकास्तीर्थबकाः प्रहारैर्युधि विह्वलाः ॥ ७३ ॥

७३. रणे सिंह इवातिशूरत्वाद्रणसिंहस्तेन तेन ग्राहारिणा परे शत्रव आजिव्याघ्रा अपि शूरत्वाद्रणव्याघ्रतुल्या अपि प्रहारैर्विह्वला विधुराः सन्तः कृताः । कीदृशाः । युधि तीर्थकाकास्तीर्थे काका इव तीर्थेबकास्तीर्थे बका इव यथा तीर्थे काका बकाश्चानवस्थिताः स्युरेवं रणे क्षणदृष्टनष्टाः कृता इत्यर्थः ॥

रणसिंहेन । आजिव्याघ्राः । इत्यत्र "सिंहाद्यैः पूजायाम्" [८९] इति तत्पुरुषः ॥

तीर्थकाकाः । तीर्थबकाः । इत्यत्र "काकाद्यैः क्षेपे" [९०] इति तत्पुरुषः ॥ काकाद्यैरिति किम् । युधि विह्वलाः ॥

ते पात्रेसमिताः पात्रेबहुलाश्चाभवन्परे ।
यद्गृहमनिह्नुतं तत्रमहृतं तैरजायत ॥ ७४ ॥

७४. ते पूर्वश्लोकोक्ताः परे पात्रेसमिताः पात्रे भोजनवेलायामेव

---

१ सी °कास्ती°. २ सी °ह्वला......विधु°. ३ सी °निह्नुन्तं.

---

१ प सी कीर्ते शौ°. २ बी °स्वच्छगु°. ३ सी डी °ज्ञादिकी°. ४ प सी °न लो चे°. ५ बी °द्रणे व्या°. ६ सी °धि का°. ७ बी तीर्थे, ८ प सी डी इति का°. ९ सी °ह्वला ॥ ते°.

समितौ मिलिताः । अकिंचित्करा इत्यर्थः । अभवन् । चः समुच्चये । परे चान्ये च शत्रवः पात्रेबहुलाः पात्र एव बहुला बहवोकिंचित्करा अभवन् । यद्यस्माद्धेतोस्तैरुभयैरपि तत्रप्रहृतं प्राहारौ प्रहरणं भस्मनिर्हुतमाहुतिरिवाजायत निष्फलमभूदित्यर्थः ॥

यत्पूर्वाह्णप्रतिज्ञातं पूर्वरात्रप्रतिश्रुतम् ।
तदरण्येतिलक्षुद्रैर्विस्मृतं तत्र निघ्नति ॥ ७५ ॥

७५. यत्प्रस्तावाद्युद्धं पूर्वाह्णप्रतिज्ञातमपराह्ण एवमेवं योत्स्यत इति पूर्वदिनेङ्गीकृतं तथा यत्पूर्वरात्रप्रतिश्रुतं प्रातरेवमेवं योत्स्यत इति पूर्वरात्रेङ्गीकृतं तदरण्येतिलक्षुद्रैररण्ये तिलास्तिलभेदास्तद्वत्क्षुद्रैर्निःसत्त्वैर्भटैस्तत्र प्राहारौ [नि?]घ्नति प्रहरति सति विस्मृतम् ॥

पात्रेसमिताः । पात्रेबहुलाः । एतौ "पात्रेसमितेत्यादयः" [९१] इति साधू ॥

भस्मनिर्हुतम् । इत्यत्र "क्तेन" [९२] इति तत्पुरुषः ॥

तत्रप्रहृतम् । पूर्वाह्णप्रतिज्ञातम् । पूर्वरात्रप्रतिश्रुतम् । इत्यत्र "तत्र°" [९३] इत्यादिना तत्पुरुषः ॥

अरण्येतिल । इत्यत्र "नाम्नि" [९४] इति तत्पुरुषः ॥

रणदेयां न्वदात्पूजां मौलिनीलोत्पलैर्द्विषाम् ।
लोहितस्तक्षकः सर्पो नूग्रतीव्रोस्य युध्येसिः ॥ ७६ ॥

७६. अस्य प्राहारेरसिर्द्विषां मौलिनीलोत्पलैर्मस्तकैरेव नीलत्वान्नीलाब्जैः कृत्वा रणदेयां रणेवश्यं देयां पूजामिव युधि युद्धार्थमदाद्दौ । प्राहारीयासिच्छिन्नानेकारिमौलीनां रणाङ्गणे लुठितत्वादेवमाशङ्का । कीदृक् । उग्रो यमजिह्वाकरालो यस्तीव्रस्तीक्ष्णः स उग्रतीव्रोत

१ ए सी °त्पलद्विषा°. २ सी °ध्यसि ॥.

१ सी °ता अ°. २ सी हुन्तमा°. ३ ए डी सी हुरिति बा°. ४ ए सी °हुमम् ।. ५ सी °रुष ॥ त°. ६ सी °रुष । अ°. ७ सी °रुष ॥

एव तक्षकः शत्रूणां वधकोत एव च लोहितस्तक्षकः सर्पो नु । नुरिवार्थे । लोहितो रक्तवर्णस्तक्षकनामा यः सर्पस्तत्तुल्यः ॥

तीव्रोग्रः सोर्जुनः कार्तवीर्यो नु कृष्णसर्पभः ।
दृष्टनष्टान्व्यधात्सर्वभटानेकधनुर्धरः ॥ ७७ ॥

७७. स ग्राहारिरेकधनुर्धरः सन्सर्वभटान्दृष्टनष्टान्पूर्वं दृष्टान्पश्चान्नष्टानयुध्वैव नष्टानित्यर्थः । व्यधात् । कीदृक् । कृष्णवर्णत्वात्क्रूरत्वाच्च कृष्णसर्पभः कालाहितुल्योत एव तीव्रोग्रः कटुरौद्रोत एव च कार्तवीर्योर्जुनो नु कृतवीर्यस्यापत्यं योर्जुनः सहस्रार्जुनस्तत्तुल्यः ॥

जरत्क्रोडः पुराणाहिः केवलोर्जा नवेन्द्रजित् ।
स क्ष्वेडां विदधे जित्वा सेनां सोत्तरकोशलाम् ॥ ७८ ॥

७८. स ग्राहारिरुत्तराश्च ते कोशलाँ देशास्तेषां राजानोप्युत्तरकोशलाः सह तैर्या तां सेनां गूर्जरचमूं जित्वा क्ष्वेडां जयसूचकं सिंहनादं विदधे । यतः कीदृक् । केवलोर्जा द्वितीयबलेन कृत्वा जरत्क्रोडो जीर्णवराहरूपधारी हरिरिव तथा पुराणाहिश्चिरंतनसर्पः शेष इव तथा नवेन्द्रजिदभिनवरावणिरिव ॥

आपरार्णवमादध्मौ शङ्खं चाधिकषाष्टिकम् ।
प्रत्यग्गवधनान्प्रीणन्त्सोधिकगवप्रियः ॥ ७९ ॥

७९. अधिका गावः प्रिया यस्य सः । सौराष्ट्रा हि स्वभावेनाधिकं

---

१ सी °डां वद°. २ प सी अप°.

---

१ सी °त्तुल्य ॥. २ प सी °टान्दृष्ट°. ३ प सी डी °युध्वैव. ४ प बी सी °वीरस्या°. ५ सी °त्तुल्य ॥. ६ बी °लाश्चोत्तरकोशलादेशस्ते°. ७ सी °तीयाब°. ८ प सी °त्वा रजक्रो°. ९ प सी डी °रीरिव. १० प सी °जितभि°.

धेनुप्रियाः स्युः । स ग्राहारिः शङ्खमादध्मौ च न केवलं क्ष्वेडां विदधे विजयशङ्खमवादयच्च । कीदृक्सन् । प्रतीच्यः पश्चिमाः कविरूढिमाश्रित्य मध्यदेशापेक्षया वैयाकरणमतं चाश्रित्येशानतो नैर्ऋर्तिं[2] गच्छन्त्याः शरावतीनद्या अपेक्षया सुराष्ट्राणां पश्चिमत्वात्सुराष्ट्रदेशोद्भवा गावो धेनवो धनं येषां तान्प्रत्यग्गवधनान्सौराष्ट्रान्प्रीणन् शत्रुजयेनाह्लादयन् । कीदृशं शङ्खम् । आपरार्णवं पश्चिमाब्धौ जातम् । तथाधिकषाष्टिकमधिकया षष्ट्यार्थाद्द्रम्मादीनां क्रीतं श्रेष्ठत्वेन महामूल्यमित्यर्थः ॥

मूलराजोथ दाशार्हषाण्मातुरगुरूपमः ।
द्व्यह्नजाताहवे सास्त्रां द्वितूर्णीं दधदुत्थितः ॥ ८० ॥

८०. अथ शङ्खध्मानानन्तरं द्वे अह्नी जातस्य "सर्वांश°" [७.३.११८] इत्यादिनाह्नादेशे च द्व्यह्नजातो य आहवो रणस्तत्र मूलराजो रणायोत्थितः । कीदृक्सन् । दशार्हस्य वसुदेवस्यायं दाशार्हो विष्णुः षण्णां मातॄणां कृत्तिकानामपत्यं "संख्यासम्°" [६.१.६६] इत्यादिनाणि मातुरादेशे च षाण्मातुरः स्कन्दस्तस्य गुरुः पिता शिवो द्वन्द्वे ताभ्यामुपमा शूरत्वादिगुणैः साम्यं यस्य सः । अत एव सास्त्रां बाणपूर्णां द्वितूर्णीं तूणीरौ दधत् ॥

रणदेयाम् । इत्यत्र "कृयेन°" [९५] इत्यादिना तत्पुरुषः ॥

नीलोत्पलैः । इत्यत्र "विशेषणं°" [९६] इत्यादिना कर्मधारयः ॥ विशेषणविशेष्ययोः संबन्धिवचनत्वादेकतरोपादानेनैव द्वये लब्धे द्वयोरुपादानं परस्परमुभयोर्व्यवच्छेद्यव्यवच्छेदकत्वे समासो यथा स्यादित्येवमर्थम् । तेनेह न स्यात्तक्षकः सर्पः । लोहितस्तक्षकः । नह्यसर्पोन्यवर्णो वा तक्षकोस्ति ॥ यस्तु गुणादिशब्दानामेव समासस्तत्रोभयोरपि पदयोरप्रधानत्वात्कामचारेण पूर्व-

१ सी °हारिश्च° २ प सी डी नैरृतिं. ३ प °त्यग्ग. ४ सी °मुपप°.

निपातः। उग्रतीव्रः । तीव्रोग्रः ॥ बहुलाधिकारात्कचित्समासो न स्यात्। अर्जुनः कार्तवीर्यः॥ कचिन्नित्यः। कृष्णसर्प ॥

पूर्वकाल। दृष्टनष्टान्॥ एकादि। एकधनुर्धरः । सर्वभटान्। जरत्कोङः। पुराणाहिः। नवेन्द्रजित्। केवलौजा। इत्यत्र "पूर्वकाल°" [९७] इत्यादिना कर्मधारयः॥

[संज्ञायाम्।] सोत्तरकोशलाम्। तद्धिते । आपरार्णवम् ॥ उत्तरपद(दे)। प्रत्यग्गवधनान्। अधिकं तद्धिते। आधिकषाष्टिकम् ॥ उत्तरपदे । अधिकगवप्रियः। इत्यत्र "दिगधिकं°" [९८] इत्यादिना कर्मधारयः॥

संज्ञायाम्। दाशार्ह॥ तद्धिते। षाण्मातुरः(र)॥ उत्तरपदे। ब्रह्मजात॥ समाहारे। द्विलूणीम्। इत्यत्र "संख्या°" [९९] इत्यादिना तत्पुरुषः॥ कर्मधारयोयमेवं चानाम्नि द्विगुः॥ अनाम्नीति किम् । दाशार्ह । अत्र द्विगुत्वेनपत्यप्रत्ययस्य लुप् स्यात्॥

क्षत्रखेटः पापदैत्यः स वृतोणकयोद्धृभिः।
शस्त्रीश्यामः केति जल्पन्नृव्याघ्रो ज्यामवीवदत्॥ ८१॥

८१. नृव्याघ्रो मूलराजो ज्यामवीवदत्। कीदृक्सन्। जल्पन्। किमित्याह। स ग्राहारिः क्वास्ते। कीदृक् । क्षत्रखेटः क्षत्रियाधमस्तथा पापदैत्यो निन्द्यदानवस्तथाणकयोद्धृभिर्निन्द्यभटैर्वृतस्तथा शस्त्रीश्यामः क्षुरिकेव कालः॥

---

१ प सी डी °र्जुन का°. २ सी °णाहि। ज°. ३ प सी °वलोजी।. ४ प सी डी °व वा ना°. ५ सी °शार्हम्। अ°. ६ सी °राज्यो ज्या°. ७ प सी °हारि का°. ८ प सी क्षत्रः खे°. ९ प सी °श्याम क्षु°.

नृसिंहः पूर्वपुरुषो न्वपरार्कः स तेजसा ।
हन्तुं प्रथमदैत्यं नु डुढौके चरमासुरम् ॥ ८२ ॥

८२. स मूलराजश्चरमासुरं ग्राहारिं हन्तुं डुढौके । कीदृक्सन् । नृसिंहो नरश्रेष्ठोत एव तेजसा प्रतापेनापरार्को द्वितीयादित्यः । पूर्वपुरुषो नु यथा प्रथमपुरुषो विष्णुर्नृसिंहो नरसिंहरूपधारी सन् प्रथमदैत्यं नु हिरण्यकशिपुमिव हन्तुं डुढौके ॥

मध्यलोकपतिर्वीरपुमान्मध्यमपार्थवत् ।
अजघन्यौजसारेभे सोसमानरणोत्सवम् ॥ ८३ ॥

८३. मध्यलोकपतिर्मर्त्यलोकस्वामी स मूलराजोसमानरणोत्सवं निरुपमं युद्धमारेभे । यतो वीरपुमान् शूरनरस्तथाजघन्यौजसोत्कृष्टबलेन कृत्वा मध्यमपार्थवन्मध्यमस्तृतीयो यः पार्थः पाण्डवोर्जुनस्तत्तुल्यः ॥

वीरपूर्वाः श्रेणिकृतास्तेन पूगकृताः परे ।
श्रेणिमतः पूगमतो न्वेकोप्यैक्षि स तैर्भयात् ॥ ८४ ॥

८४. तेन मूलराजेन पूर्वे च ते वीराश्च वीरपूर्वाः प्रथमशूराः परेपूगाः पूगाः कृताः पूगकृताः समूहीकृता मृत्युभयेनान्योन्याश्रयणात्संयुक्तीकृता इत्यर्थः । कीदृशाः सन्तः । अश्रेणयः श्रेणयः कृताः श्रेणिकृता युद्धार्थं ग्राहारिणा पङ्क्तीकृताः । स मूलराज एकोपि तैः परैर्भयादैक्षि । कीदृशः । अश्रेणिः श्रेणिर्मतः संमतः श्रेणिमतो नु । नुरत्रापि योज्यः । पङ्क्तीभूत इवेत्यर्थः । एवं पूगमतो नु समूहीभूत इवेत्यर्थः ॥

---

१ सी °परां क स. २ ए सी °णिगतः.

---

१ ए बी सी °कसिपु°. २ ए सी पार्थपोड्वो°. ३ ए सी °गाः कृ°. ४ ए सी °णय भे°. ५ ए सी °ध्यर्थ ग्रा°. ६ ए सी डी कृता स°. ७ बी °णिमतः. ८ बी इत्य°.

क्षत्रखेटः । इत्यत्र "निन्द्यं°" [१००] इत्यादिना कर्मधारयः ॥ अपापार्थै-रिति किम् । पापदैत्यः । अणकयोद्भूमिः ॥

शस्त्रीश्यामः । इत्यत्र "उपमानं सामान्यैः" [१०१] इति कर्मधारयः ॥

नृव्याघ्रः । नृसिंहः । इत्यत्र "उपमेयं°" [१०२] इत्यादिना कर्मधारयः ॥

पूर्वपुरुषः । अपरार्कः । प्रथमदैत्यम् । चरमासुरम् । अजघन्यौजसा । असमानरण । मध्यलोक । मध्यमपार्थ । वीरपुमान् । इत्यत्र "पूर्वापर°"[१०३] इत्यादिना कर्मधारयः । "विशेषणं विशेष्येण°" [९६] इत्यादिनैव सिद्धे "स्पर्द्धे" [७.४.११९] परम् इति पूर्वनिपातस्य विषयप्रदर्शनार्थमद्रव्यवाचिनोरनियमेन पूर्वापरभावप्रसक्तौ पूर्वनिपातनियमार्थं च वचनम् । तेन वीरपूर्वाः ॥

श्रेणिकृताः । पूगकृताः । श्रेणिमताः । पूगमतः । इत्यत्र "श्रेण्यादि°" [१०४] इत्यादिना कर्मधारयः ॥

कृताकृतरणेप्यस्मिन्क्लिष्टाक्लिशितमूर्तयः ।
इषुपीतावपीतास्रा भ्रेमुश्छाताच्छिताः परे ॥ ८५ ॥

८५. अस्मिन्मूलराजे किंचित्कृतं किंचिदकृतं च रणं येन तस्मिन्सति परे भ्रेमुर्घातविह्वलतया भ्रमिं प्राप्ता इत्यर्थः । किंभूताः सन्तः । छाताच्छिताः शरैः किंचिच्छिन्नाश्च किंचिदच्छिन्नाश्चात एवावहीनं पीतमवपीतमपीतप्रायमित्यर्थः । इषुभिः शरैः किंचित्पीतं च किंचिदवपीतं चास्रं रक्तं येषां तेत एव च क्लिष्टाक्लिशितमूर्तयः किंचित्पीडितकिंचिदपीडिताङ्गाः ॥

---

१ ए सी °ता चा भेमु°.

---

१ ए सामन्यैः. २ सी °रुषाः । अ°. ३ ए सी ममध्य°. ४ ए सी डी °शेषेण°. ५ बी °र्थे व°. ६ ए सी डी °मत । पू°. ७ ए सी °चिकृतं. ८ ए सी भ्रमि प्रा°. ९ ए सी °पीडता°.

कृताकृत । इत्यत्र "कृ°" [१०५] इत्यादिना कर्मधारयः ॥ इटः काचयवत्वाद्विकारस्य चैकदेशविकृतानन्यत्वाच्च भेदकत्वम् । तेन क्लिष्टाक्लिशित । छाताच्छिताः ॥ आदिग्रहणात्[1] पीतावपीत ॥

चक्रे क्लिशितमक्लिष्टं पुनः परमविह्वलम् ।
उत्तमास्त्रैर्महेभस्थः सन्नृपः स द्विषां बलम् ॥ ८६ ॥

८६. सन्नृपः श्रेष्ठभूपः स मूलराजो महेभस्थः सन् द्विषां बलं सैन्यमक्लिष्टं पूर्वमपीडितं सदुत्तमास्त्रैर्दिव्यप्रभावादिनोत्कृष्टैः प्रहरणैः कृत्वा पुनर्भूयोपि क्लिशितं[2] पीडितं चक्रे । कीदृशम् । परमविह्वलं भयेनातिकातरम् ॥

उत्कृष्टास्त्राण्यथो वर्षन्दैत्यवृन्दारकः क्रुधा ।
पुन्नागैरावृतं राजकुञ्जरं प्रत्यधावत ॥ ८७ ॥

८७. अथो[3] दैत्यवृन्दारको दानवश्रेष्ठो ग्राहारिरुत्कृष्टास्त्राणि वर्षन्मुञ्चन्सन् राजकुञ्जरं नृपश्रेष्ठं मूलराजं प्रति क्रुधाधावत । कीदृशम् । पुमांसो नागा इव गजा इव तैः पुन्नागैर्नरश्रेष्ठैरावृतम् ॥

क्लिशितमक्लिष्टम् । इत्यत्र "सेड्ढानिटा" [१०६] इति न कर्मधारयः ॥

सन्नृपः । महेभ । परमविह्वलम्[4] । उत्तमास्त्रैः । उत्कृष्टास्त्राणि । इत्यत्र "सन्महत्°" [१०७] इत्यादिना कर्मधारयः ॥

दैत्यवृन्दारकः । पुन्नागैः । राजकुञ्जरम् । इत्यत्र "वृन्दारक°"[5] [१०८] इत्यादिना कर्मधारयः ॥

---

१ ए पीताव°. २ सी °शित पी°. ३ बी अथ दै°. ४ सी °ह्वल उ°. ५ बी °न्दारिक°.

कतरकठः कतमौत्सस्ते ज्ञातोस्मि किंनृप ।
इत्याक्षिपन्तावन्योन्यमयुध्येतामुभौ नृपौ ॥ ८८ ॥

८८. उभौ नृपावन्योन्यमयुध्येताम् । किंभूतौ सन्तौ । अन्योन्यमाक्षिपन्तौ तर्जयन्तौ । कथमित्याह । हे किंनृप कुत्सितभूप कतरकठः कतमौत्सश्च द्वयोः कठयोर्मध्ये को नाम कठः कठप्रोक्तवेदाध्यायी द्विजभेदो बहूनामुत्सानां मध्ये को नामौत्सश्चोत्सस्यापत्यं मुनिभेदश्च । भीरुत्वादिधर्मैरस्म्यहं ते त्वया ज्ञातो ज्ञायमानोस्मि । "ज्ञानेच्छा°" [५.२.९२] इत्यादिनासति क्तोत एवं त इत्यत्र कर्तरि षष्ठी । "क्तयोरसदाधारे" [२.२.९१] इत्यत्र कर्तृषष्ठ्या अनिषिद्धत्वादिति ॥

कतरकठः । कतमौत्सः । इत्यत्र "कतर°" [१०९] इत्यादिना कर्मधारयः ॥

किंनृप । इत्यत्र " किं क्षेपे" [११०] इति कर्मधारयः ॥

इभ्यपोटेभ्ययुवतिवत्तस्थुर्दूरतस्तयोः ।
वृता हयकतिपयैर्गजस्तोकैश्च भूभुजः ॥ ८९ ॥

८९. हया ये कतिपयास्तैर्हयकतिपयैरल्पाश्वैर्गजस्तोकैश्चाल्पगजैश्च वृता भूभुजस्तदा रणकर्मानुपयोगित्वात्तयोर्दूरतस्तस्थुः । इभ्यपोटेभ्ययुवतिवदिभ्या हस्तिन्यः स्त्रीजातिभेदः । कामशास्त्रे हि पीनस्तनत्वसूक्ष्माक्षत्वादिहस्तिनीधर्मोपेता स्त्री हस्तिनीत्युच्यते । पुरुषवेषधारिण्यः स्त्रियः पोटाः । गर्भ एव दास्यं प्राप्ता वोभयव्यञ्जना वा भुजिष्यदास्यो वा । तथेभ्या हस्तिन्यः स्त्रीजातिभेदः करेणव एव वा ।

---

१ सी °स्मि कं नृ°. २ ए °नृपः ।. १ डी °स्तदा ।.

१ ए सी °ध्येताः किं°. २ बी °तमोत्स°. ३ ए सी कण्ठयो°. ४ ए सी नासौत्स°. ५ सी °व म इ°. ६ ए सी डी °कयै°. ७ ए सी °श्वैगज°. ८ ए सी °भेदा का°. बी °भेदाः का°. ९ ए सी °क्ष्माक्षत्वा°. १० बी पेतां स्त्री. ११ सी प्रावाम°.

युवतयस्तरुण्यः । कर्मधारयगर्भो द्वन्द्वः । यथेभ्यपोटा इभ्ययुवतयश्च तयोर्दूरे तस्थुः । हस्तिन्योपि ह्यशूरत्वाद्युद्धे तथा नोपयुज्यन्त इति रणाद्दूरे तिष्ठन्ति ॥

गोगृष्टिगोवष्कयिणीगोवेहद्गोवशा इव ।

तौ भूगोधेनुगोपालावयोद्धृन्न प्रजघ्नतुः ॥ ९० ॥

९०. तौ मूलराजग्राहारी अयोद्धृन्नणकौतुकालोक्यादिलोकान्न प्रजघ्नतुः । गोगृष्टिगोवष्कयिणीगोवेहद्गोवशा इव । गृष्टिः सकृत्प्रसूता । वष्कयिणी या वष्कयेण वृद्धवत्सेन दुह्यते । वेहद्गर्भघातिनी । वशा वन्ध्या । कर्मधारयगर्भे द्वन्द्वे ता इव । सर्वा हि गावोवध्याः । यतः किंभूतौ । धेनुर्नवप्रसूता गौश्चासौ धेनुश्च गोधेनुर्भूरेव पाल्यत्वाद्गोधेनुस्तस्यां गोपालौ पालकत्वाद्गोपवत्तुल्यौ । गोपालौ हि गाः पालयतो न तु हिंस्त इति ॥

कठश्रोत्रियकालापाध्यायकौत्सप्रवक्तृवत् ।

कठधूर्तो नु सौराष्ट्रश्चौलुक्यास्त्राण्यवञ्चयत् ॥ ९१ ॥

९१. सौराष्ट्रो ग्राहारिश्चौलुक्यास्त्राण्यवञ्चयदभ्यस्तास्त्रविद्यत्वात्स्वतोटालयत् । यथा कठधूर्तो वञ्चकः कठः कठश्रोत्रियकालापाध्यायकौत्सप्रवक्तृवत् । श्रोत्रियश्छन्दोध्यायी । कालापः कलापिप्रोक्तग्रन्थाध्यायी । प्रवक्तोपाध्यायः । कर्मधारयगर्भे पदत्रयद्वन्द्वे । एतान्वञ्चयति ॥

---

१ सी °गर्भे द्व°. डी °गर्भद्व°. २ बी °रे तस्थुः ।. ३ ए सी °ण गृद्ध°. ४ सी शा वेध्या । क°. ५ बी °श्च गौधे°. ६ डी सदाभ्य°. ७ ए सी °यदाभ्य°. ८ ए सी °स्तात्रवि°. ९ बी °त्रियं का°. १२ ए सी °लापाः क°. ११ ए सी °दद्वय°.

गदामतल्लिकां सोथ दैत्यतल्लजकोमुचत् ।
भ्रष्टाश्वगर्भिणीगर्भं गर्जन् गूर्जरभूपतौ ॥ ९२ ॥

९२. अथ स दैत्यतल्लजको दानवश्रेष्ठो माहारिर्गदामतल्लिकां श्रेष्ठं गदाख्यमायुधभेदं गूर्जरभूपतावमुचदक्षिपत् । कीदृक्सन् । अश्वाश्च ता गर्भिण्यश्चाश्वगर्भिण्यो भ्रष्टाः साध्वसातिरेकादधःपतिता अश्वगर्भिणीनां गर्भा यत्र तद्यथा स्यादेवं गर्जन्महासिंहनादं मुञ्चन् । स्वभावान्मतल्लिकादयः प्रशंसायां रूढा आविष्टलिङ्गाश्च ॥

इभ्यपोटा । इभ्ययुवति । गजस्तोकैः । हयकतिपयैः । गोगृष्टि । गोधेनु । गोवशाः । गोवेहत् । गोबष्कयिणी । औत्सप्रवक्तृवत् । कठश्रोत्रिय । कालापाध्यायक । कठधूर्तः । गदामतल्लिकाम् । दैत्यतल्लजकः । इत्यत्र "पोटायुवति°" [१११] इत्यादिना कर्मधारयः ॥

अश्वगर्भिणी । इत्यत्र "चतुष्पाद्गर्भिण्या" [११२] इति कर्मधारयः ॥

शिरस्काद्युवखलतिर्बुद्धेर्युवजरन्नथ ।
स्मिताद्युवपलितस्तां शक्त्या चिच्छेद राजिभूः ॥ ९३ ॥

९३. अथ राजिभूर्मूलराजस्तां गदां शक्त्याखभेदेन चिच्छेद । कीदृक्सन् । शिरस्काच्छिरस्त्राणाद्युवखलतिस्तरुणः सन्खल्वाटस्तथा बुद्धेर्युवजरंस्तरुणः सन्वृद्धस्तथा स्मितादृदाक्षेपोत्थहासाद्युवपलितस्तरुणः सन्सितकचः ॥

---

१ सी °स्काद्यव°. २ डी °तिर्युद्धे युव°. ३ डी° जिसूः.

---

१ प सी °रिगदा°. २ प सी °ताचद°. डी °तावुद°. ३ प सी अम्य°. ४ प सी डी °वशा । गो°. ५ प सी °यकः । क°. ६ बी °तुष्पाद्ग°. ७ डी °जिसूर्मू°. ८ प सी °स्तरणः. ९ डी °धायुन्व°. १० प सी बुदेर्यु°. ११ प सी °रुण स°.

प्राहारिर्युववलिनोभूद्भालवलिभिः क्षुधा ।
भोज्यतिक्तं नु भुञ्जानस्तुल्यसास्रे दृशौ दधत् ॥ ९४ ॥

९४. प्राहारिः क्षुधा ये भालवलयो ललाटरेखास्तैः कृत्वा युववलिनो युवा सन्वलियुक्तो वृद्धोभूत् । कीदृक् । सास्रे क्षुधाश्रुयुते तुल्ये च ते सास्रे च तुल्यसास्रे दृशौ दधत् । भोज्यतिक्तं भुञ्जानो नु तिक्तं कटु तीक्ष्णरसमपि कटुत्वात्तिक्तशब्देनोच्यते । भोज्यं च तत्तिक्तं च भोज्यतिक्तं तीक्ष्णं त्रिकटुकादि तद्भुञ्जान इव । त्रिकटुकादि भुञ्जानस्याक्षिणी सास्रे भवतः ॥

दोर्भ्यां सदृशपीनाभ्यां भोज्यमन्नं नु लीलया ।
स गृहीत्वायसौ शङ्कू तुल्यौ सर्पाविवाक्षिपत् ॥ ९५ ॥

९५. स प्राहारिरायसौ लोहमयौ शङ्कू शर्वेले मूलराजाभिमुखमक्षिपत् । किं कृत्वा । सदृशपीनाभ्यां तुल्यपीवराभ्यां दोर्भ्यां कृत्वा भोज्यमन्नं नु कवलमिव लीलयातिबलिष्ठत्वादनायासेन गृहीत्वा । किंभूतौ । तुल्यौ मिथः सदृशौ सर्पाविव कृष्णत्वाद्भीष्मत्वाच्च भुजङ्गाविव ॥

युवखलतिः । युवपलितः । युवजरन् । युववलिनः । इत्यत्र "युवाखलति°" [११३] इत्यादिना कर्मधारयः ॥

भोज्यतिक्तम् । तुल्यसास्रे । सदृशपीनाभ्याम् । इत्यत्र "कृत्य°" [११४] इत्यादिना कर्मधारयः ॥ अन्नाख्येति किम् । भोज्यमन्नम् । तुल्यौ सर्पौ ॥

---

१ प सी °हारि क्षु°. २ प सी डी °रेखास्तैः. ३ बी °ववलि°. ४ प सी °क्तं न भु°. डी °क्तं नु भु°. ५ सी भवेद ॥. ६ सी लोमहयौ. ७ सी °खलितः । युवजववलि°. ८ प सी युवज°.

तौ चौलुक्यः कुमारप्रव्रजिताशापदुःसहैः ॥
कुमारश्रमणाशीलतीक्ष्णैर्बाणैः स्म कृन्तति ॥ ९६ ॥

९६. चौलुक्यो मूलराजस्तौ शत्रू बाणैः कृन्तति स्माच्छिनत् । किंभूतैः । कुमारश्रमणाशीलतीक्ष्णैरपरिणीतभिक्षुकीव्रतवन्निशितैः । कुमारश्रमणाया ह्याजन्मब्रह्मचारिणीत्वेन सर्वदाप्यक्षतत्वाच्छीलमत्यन्तं तीक्ष्णं स्यात् । अत एव कुमारप्रव्रजिताशापदुःसहैः कुमारप्रव्रजिताक्रोशवद्दुःसहैः । कुमारप्रव्रजिताया ह्याबालकालाद्व्रतस्थत्वेन महाप्रभावत्वाच्छापोतिदुःसहः स्यात् ॥

कुमारश्रमणा । कुमारप्रव्रजिता । इत्यत्र "कुमारः°" [११५] इत्यादिना कर्मधारयः ॥

मयूरव्यंसकच्छात्रव्यंसकौ नु धियाथ तौ ।
पतत्त्री रेजतुः प्लक्षन्यग्रोधाविव पत्त्रिभिः ॥ ९७ ॥

९७. अथ तौ नृपौ पतत्त्रिः पत्त्रिभिः शरैः कृत्वा रेजतुर्यथा प्लक्षन्यग्रोधौ पतत्त्रिः पत्त्रिभिः पक्षिभी राजतः । प्लक्षो वृक्षभेदः । किंभूतौ तौ । धिया कृत्वा मयूरव्यंसकच्छात्रव्यंसकौ नु बाह्यविकारादर्शनेन रम्याकारदेहनेपथ्यत्वान्मयूर इव मयूरः । व्यंसयति छलयति चेतसा व्यंसकः । एवं विनयादिदर्शनेनच्छात्र इवच्छात्रः । व्यंसकः पूर्ववत् । कर्मधारयगर्भे द्वन्द्वे । ताविव । अन्योन्यं पराभवार्थमत्यन्तं छलकबुद्धी इत्यर्थः ॥

१ ए सी कृतन्तस्मा°. २ सी °श्रणा°. ३ ए सी °दशवैः । ४ ए सी °सह स्या°. ५ ए सी °त्रिभि प°. ६ सी °तौ धि° ७ सी °ति चे°. ८ ए सी °ने तच्छा°.

तौ स्निग्धं वाक्त्वचं पीठच्छत्रोपानहमुद्वहन् ।
धवखदिरपलाशान्प्रविश्यैक्षिष्ट नारदः ॥ ९८ ॥

९८. नारदः कलिकारकर्षिः शैलापातभयाद्धवखदिरपलाशांस्तरुभेदान्प्रविश्य तौ नृपावैक्षिष्ट । कीदृक् । स्निग्धमरूक्षं वाक्त्वचं वचनमङ्गच्छविं च पीठच्छत्रोपानहं मुनित्वाद्बृसीछत्रिकापादुकाश्चोद्वहन्धारयन् ॥

मयूरव्यंसकच्छात्रव्यंसकौ "मयूर०" [११६] इत्यादिना निपात्यौ ॥

प्लक्षन्यग्रोधौ । वाक्त्वचम् । धवखदिरपलाशान् । पीठच्छत्रोपानहम् । इत्यत्र "चार्थे०" [११७] इत्यादिना द्वन्द्वः ॥

अथोत्क्षिप्य भ्रुवौ[1] वक्रे कुटिले दंष्ट्रिके रुषा ।
पृथुभीमे दृशौ दैत्यो महाभीमे भुजे दधत् ॥ ९९ ॥
तुल्यो हरीणामुत्पत्त्याध्यास्त चौलुक्यदन्तिनम् ।
शस्त्रीखड्गौ वहन्मातृमातारौ कीर्तियुद्धयोः ॥ १०० ॥

९९,१००. अथानन्तरं दैत्यो ग्राहारिरुत्पत्योत्प्लुत्य चौलुक्यदन्तिनमध्यास्त मूलराजवधायारोहत् । किं कृत्वा । रुषा कोपेन कुटिला च वक्रा च वक्रे भ्रूश्च भ्रूश्च भ्रुवौ नयनोर्ध्वरोमपद्धती उत्क्षिप्योत्पाट्य । तथा कीदृक्सन् । दधद्धारयन् । के के इत्याह । रुषा वक्रा च कुटिला च कुटिले । दंष्ट्रिका च दंष्ट्रिका च दंष्ट्रिके श्मश्रुणी ।

---

१ ए सी °वौ चक्रे.

---

१ ए सी °कर्षिश°. २ बी शलपा°. ३ ए सी वाक्त्वं च । ध°. ४ ए सी °श्च भ्रु°. ५ सी °णी सं°.

रुषा हि श्मश्रुणी संस्फुरन्ती वक्रीस्याताम् । नासिकाग्रस्थसीमन्तकल्पश्मश्रुमध्यभूतप्रदेशविशेषेण द्विधाकृतत्वात् श्मश्रुणो द्वित्वम् । तथा रुषा पृथुभीमा च महाभीमा च पृथुभीमे दृक् दृक् दृशौ । रुषा हि दृशौ विस्तरतो रौद्रीस्यातां च । तथा रुषा चिकीर्षितोत्प्लवनवशेन वा पृथुभीमा च महाभीमा च महाभीमे भुजा च भुजा च भुजे च । तथा कीर्तियुद्धयोर्यथासंख्यं मातृमातारौ जननीपरिच्छेदकौ कीर्त्युत्पादिकारणसमापकावित्यर्थः । शक्तीखड्गौ क्षुरिकासी वहन् । तथा हरिश्च सिंहो हरिश्च मर्कटो हरिश्च दर्दुरस्तेषां हरीणां तुल्य उत्प्लवनेन सदृशश्च ॥

वक्रे । कुटिले । पृथुभीमे । महाभीमे । इत्यत्र "समानाम्°" [११८] इत्यादिनैकशेषः ॥ अर्थेन समानामिति किम् । शक्तीखड्गौ । कीर्तियुद्धयोः ॥

हरीणाम् । भ्रुवौ । दंष्ट्रिके । दृशौ । भुजे । इत्यत्र "स्यादौ°" [११९] इत्यादिनैकशेषः ॥ स्यादाविति किम् । माता च जननी माता च परिच्छेत्ता मातृमातारौ । अत्र ह्येकत्र मातरावन्यत्र मातारावित्यौकारे रूपं भिद्यते ॥

तौ भ्रात्रोः सुतयोर्न्वर्थे यमपुत्रौ नु शक्त्यसी ।
स्वसोदर्यौ नु बिभ्राणावेकेभस्थौ प्रजह्रतुः ॥ १०१ ॥

१०१. स च ग्राहारिश्च मूलराजश्च तौ । भ्रात्रोर्भ्रातुश्च स्वसुश्च सुतयोर्वा । वाशब्दो ज्ञेयः । सुतस्य दुहितुश्च वार्थे नु कार्ये इव प्रजह्रतुर्मिथो जघ्नतुः । किंभूतौ सन्तौ । एकेभस्थावेकगजे वर्तमानौ । तथा

१ ए सी °यो न्वर्थे.

१ ए °षाणि श्म°. २ ए सी डी °स्थसम°. ३ बी °कीर्षतो°. ४ ए सी भुजे. ५ ए सी डी °कादित्य°. ६ ए सी डी °णां तेन उ°. ७ ए सी °श्च भ्रातु°. ८ ए सी °तयोर्वा ।. ९ बी °तश्च दुहितश्च.

शल्यसी क्षुरिकाखड्गौ स्वसोदर्यौ नु स्वकीयौ भगिनीमिव सोदर्यमिव चादरादित्यर्थः । बिभ्राणौ । कीदृशौ शल्यसी । यमपुत्रौ नु यमस्य सुता च पुत्रश्च पुत्राविव मृत्युहेतुत्वकृष्णत्वादिना यमपुत्रिकापुत्रतुल्यौ ॥

तौ । इत्यत्र "त्यदादिः" [१२०] इति त्यदादेः शेषः ॥

भ्रात्रोः । सोदर्यौ । पुत्रौ । सुतयोः । इत्यत्र "भ्रातृ॰" [१२१] इत्यादिना भ्रात्रर्थपुत्रार्थयोः शेषः ॥

कुमारमातापितरौ प्रद्युम्नपितरौ च ते ।

क्रुद्धावधेति चौलुक्यो ब्रुवन्दैत्यमपातयत् ॥ १०२ ॥

१०२. चौलुक्यो दैत्यमपातयद्गजाद्भूमावभ्रंशयत् । कीदृक्सन् । ब्रुवन् । किमित्याह । कुमारमातापितरौ गौरीश्वरौ प्रद्युम्नपितरौ च लक्ष्मीविष्णू च ते तवाद्य क्रुद्धाविति ॥

पितरौ । इत्यत्र "पिता मात्रा वा" [१२२] इति पितुर्वा शेषः ॥ पक्षे । मातापितरौ । मातुरर्च्यत्वात्पूर्वनिपातः ॥

स तं शिवश्वशुरयोः पुत्रो नूत्पत्य दुर्धरः ।

आक्रन्दिश्वश्रूश्वशुरं बबन्धेभवरत्रया ॥ १०३ ॥

१०३. स मूलराजस्तं ग्राहारिमिभवरत्रया बबन्ध । किं कृत्वा । दुर्धरो महाबलत्वात्केनापि धर्तुमशक्यः सन् श्वशुरश्च श्वश्रूश्च श्वशुरौ शिवस्य शंभोः श्वशुरौ शिवश्वशुरौ तयोर्हिमाद्रिमेनयोः पुत्रो नु मैनाका-

१ ए सी °धेति. २ बी वस्वशुर°.

१ सी °दारेः शे°. २ ए सी °दर्यो । पु°. ३ सी °ममातभ्रं°. ४ ए सी °क्ष्मीतिष्णू. ५ ए सी श्वशुर°. ६ बी डी श्वशुरो. ७ ए सी °नयो पु°.

द्रिरिवोत्पत्योत्प्लुत्य यथा मैनाकः सपक्षत्वेनोत्पतत्येवं दुर्धरत्वाद्गजाद्भूमौ निपतत्येत्यर्थः। कथं बबन्ध। आक्रन्दिनौ रुदन्तौ ग्राहारैः श्वश्रूश्वशुरौ यत्र तद्यथा स्यात्॥

श्वशुरयोः श्वश्रूश्वशुरम्। इत्यत्र "श्वशुरः श्वश्र्वा वा" [१२३] इति वा श्वशुरस्य शेषः॥

गार्ग्यौ वात्स्यौ तुष्टुवतुरिन्द्रौ च ब्राह्मणाविव।
इन्द्रेन्द्राण्यो रिपौ बद्धे तमुपेन्द्रं बलाविव॥ १०४॥

१०४. इन्द्रेन्द्राण्यो रिपौ ग्राहारौ बलाविव बलिदैत्य इव बद्धे तं मूलराजमुपेन्द्रमिव विष्णुमिव तुष्टुवतुः। कौ काविल्याह। गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ वात्सी च वात्स्यायनश्च वात्स्यौ। तथेन्द्रौ चेन्द्रेन्द्राण्यौ। किंवत्। ब्राह्मणश्च ब्राह्मणी च ब्राह्मणाविव भट्टभट्टिन्याविवेत्यर्थः॥

गार्ग्यौ। इत्यत्र "वृद्धो यूना°" [१२४] इत्यादिना वृद्धशेषः॥

वात्स्यौ। इत्यत्र "स्त्री पुंवच्च" [१२५] इति वृद्धस्त्रियाः शेषः। पुंवच्चेयं स्यात्॥

ब्राह्मणौ। इत्यत्र "पुरुषः स्त्रिया" [१२६] इति पुरुषशेषः॥ तन्मात्रभेद इत्येव। इन्द्रेन्द्राण्यौ। अत्र चयोगलक्षणोर्थभेदः। अन्ये तु तन्मात्रभेदोद्भविके प्रकृतिभेद एवैकशेषं नेच्छन्ति। अर्थभेदे त्विच्छन्त्येव। इन्द्रौ॥

---

१ ए सी °नाकस°. २ ए सी डी °श्वसुरौ. ३ बी श्वसुर°. ४ ए सी °श्वसुर°. ५ बी श्वसुरः. ६ बी श्वसुर°. ७ ए सी मूलं रा°. ८ ए सी किंम ब्रा°. डी किंच ब्रा°. ९ ए सी °शेषं पुं°. १० ए सी °त्र ध्रुव°, ११ डी °दाधि°.

इमा गाव इमे वत्सा इमेश्वा रुरवो रयात् ।
यान्त्वित्यस्य ग्रहे जल्पल्लँक्षोथाधावत क्रुधा ॥ १०५ ॥

१०५. अथ लक्षः क्रुधा मूलराजं प्रत्यधावत । कीदृक्सन् । स्नेहातिरेकाज्जल्पन् । किमित्याह । अस्य ग्राहारेर्ग्रहे बन्धे सति रयाच्छीघ्रं योन्त्वँपगच्छन्तु । के क इत्याह । गावश्च स्त्रियो गावश्च पुरुषा इमा गावो धेनुवृषास्तर्था वत्साश्चेमे वत्साश्चेमा इमे वत्सास्तथाश्वाश्चेम अश्वाश्चेमा इमेश्वास्तथा रुरवँश्च मृगभेदाश्चेमे रुरवश्च मृँगीभेदाश्चेमा इमे रुरवश्च । ग्राहारिग्रहे गवादिभिर्मे न किंचित्प्रयोजनमित्यर्थ इति ॥

इँमा गावः । इत्यत्र "ग्राम्या°" [१२७] इत्यादिना शेषः ॥ ग्राम्येति किम् । आरण्यानां मा भूत् । इमे रुरवः ॥ अशिशुग्रहणं किम् । इमे वत्साः । द्विशफेति किम् । इमेँश्वाः ॥

वासोङ्गरागं मालां च बिभ्रत्सितानि तत्सितम् ।
हुवानो दन्तकोन्त्यैत्य चौलुक्यमिति सोभ्यधात् ॥ १०६॥

१०६. स लक्षश्चौलुक्यमेत्यागत्येति वक्ष्यमाणमभ्यधादवोचत् । कीदृक्सन् । सितं च सितश्च सिता चे सितानि श्वेतानि वासो वस्त्रमङ्गरागमङ्गविलेपनं मालां च पुष्पस्रजं च बिभ्रत् । तथा दन्तकान्त्या कृत्वा सितं श्वेतानि तत्तानि वासोङ्गरागं मालां च हुवानः श्वेतत्वाधिक्यादाच्छादयन् ॥

१ ए सी °क्षोधाताव°, डी °क्षोधावत तत्क्रुधा ॥. २ ए सी °कान्तेत्य.

१ ए सी °ति यर°. २ डी यान्तु ग°. ३ ए सी °न्त्व ग°. ४ ए सी °था त्सा°. ५ डी °वश्चेमे मृगाः रु°. ६ ए सी °मृ···गी°. ७ ए सी इवागा°. ८ बी °मे अश्वाः ॥. ९ सी च मिवा°. १० ए डी °नि वा°. ११ ए सी माला च पुष्प°. १२ ए सी बिभद.

तसितम् सितानि । इत्यत्र "क्लीबम्°" [१२८] इत्यादिना क्लीबं शिष्यते तच्चैकमेकार्थं वा ॥

मूल पुष्यपुनर्वस्वोश्चन्द्रस्तेद्योद्रणे मयि ।
यन्मे ग्राहारेश्च तिष्यपुनर्वस्वोर्नु नान्तरम् ॥ १०७ ॥

१०७. हे मूल मूलराज "ते लुग्वा" [३.२.१०८] इत्युत्तरपदलोपः । अनेन च संबोधनेनास्य मूलनक्षत्रजातत्वमुक्तम् । मूलजातानामेव हि प्रायेण नामादौ मूलशब्दः स्यात् । मय्युद्रणे रणायोद्यतेद्य ते तव चन्द्रो वर्तते । क । पुष्यपुनर्वस्वोः । अत्र पुनर्वस्वन्त्यैकपादे पुनर्वसुशब्दः । पुष्यश्च पुनर्वसू च पुष्यपुनर्वसू तयोः । उपश्लेषसप्तमीयम् । पुष्यपुनर्वसुभ्यां संयुक्त इत्यर्थः । अष्टमश्चन्द्र इत्यर्थः । मूलपूर्वाषाढोत्तराषाढापाद एको धनुरिति वचनान्मूलजातस्य राज्ञो धनू राशिः । पुनर्वसुपाद एकः पुष्याश्लेषाश्च कर्क इत्युक्तेः पुनर्वस्वन्त्यैकपादपुष्याश्लेषायुक्तश्चन्द्रः कर्कराशिस्थो धनूराशेश्च कर्कोष्टम इति तत्स्थश्चन्द्रोप्यष्टमः । अष्टमे प्राणसंदेह इत्युक्तेश्च तवाद्य प्राणसंदेह इति तात्पर्यम् । स्वस्योद्रणत्वे हेतुमाह । यदित्यादि । यद्यस्माद्धेतोर्मे ग्राहारेश्च नान्तरं न विशेषो मिथोन्तरङ्गमैत्र्यावयोरेक एवात्मेत्यर्थः । अत्रैव शब्दश्लेषोपमामाह । तिष्यपुनर्वस्वोर्नु यथा पुष्यपुनर्वसुनक्षत्रयोर्व्यवधायकान्यनक्षत्राभावेनान्तरं व्यवधानं न स्यात् ॥

पुष्यपुनर्वस्वोः । तिष्यपुनर्वस्वोः । इत्यत्र "पुष्या°" [१२९] इत्यादिना पुनर्वसुर्द्व्यर्थ एकार्थः स्यात् ॥

---

१ ए सी डी °स्वोश्चन्द्र°.

---

१ ए सी °सू च पुष्यपुनर्वसू त°. २ बी °र्थः । मू°. ३ ए सी डी एकपु°. ४ सी °श्च कार्को°. ५ सी °यममाद्धे°. ६ ए सी °षो मिथोन्तरं न विशेषो मि°. ७ बी °सुर्व्यर्थ°.

मुञ्चामुं क्रोधमानौ च लाभालाभं स्मरात्मनः ।
सुखदुःखौ भजेद्भावौ लाभालाभौ हि चिन्तयन् ॥१०८॥

१०८. हे राजन्नमुं ग्राहारिं क्रोधमानौ च कोपाहंकारौ च मुञ्च तथात्मनो लाभालाभं स्मर । एवं कुर्वतो मम लाभोऽलाभो वेति परिभावय । हि यस्माल्लाभालाभौ चिन्तयन्परिभावयन्सुखदुःखौ सुखदुःखहेतू भावौ पदार्थौ भजेत् । लाभार्थमलाभपरिहाराय च सुखहेत्वर्थं दुःखहेतुमप्यर्थमङ्गीकरोतीत्यर्थः । तस्माद्ग्राहारेर्मोचनं स्वस्य ससैन्यस्यानेकसंपत्तिहेतुत्वाल्लाभकारणममोचनं तु क्षयहेतुत्वादलाभकारणं परिभाव्य दुष्करमपि ग्राहारिमोचनं कुर्विति तात्पर्यार्थः ॥

लाभालाभम् लाभालाभौ । अत्र "विरोधिनाम्" [१३०] इत्यादिना द्वन्द्वो वैकार्थः ॥ विरोधिनामिति किम् । क्रोधमानौ । अद्रव्याणामिति किम् । सुखदुःखौ भावौ ॥

अथाश्ववडवाविच्छेर्वध्वाश्ववडवं न्विमम् ।
तत्स्वे पूर्वापरे ब्रूहि ब्रूमः पूर्वापरं युधि ॥ १०९ ॥

१०९. अश्ववडवं नु तुरंगतुरङ्गयाविवामुं ग्राहारिं बद्धाथ यद्यश्ववडवौ तुरगतुरङ्गयौ । उपलक्षणत्वाद्धस्तिरत्नस्वर्णादिदण्डं चेच्छेर्वाञ्छसि तत्तदा स्वे आत्मीये पूर्वापरे आद्यन्ते पूर्वजान् भ्रातृपुत्रपौत्रादिं पाश्चात्यं स्वसंतानं च कथय त्वद्वंशे यो ग्राहारेर्दण्डं जग्राह यो ग्रहीष्यति च तौ प्रकटयेत्यर्थः । इदमुक्तं भवति । मयि सति तव वंशे स कोपि नाभून्न भविष्यति च यो ग्राहारेर्दण्डं गृहीतवान्ग्रहीष्यति वा ।

१ सी °मौ पादा°. २ सी °हाय. ३ बी °वदुख°. ४ डी °त्वाल्लोभ°. ५ सी °रज्ञ°. ६ बी °दिं पश्चा°. ७ डी °द्वंशो यो°. ८ ए सी योग्राहा°. ९ ए °न् गृही°.

तस्मात्त्वमपि दण्डग्रहणविषयासद्ग्राहं मा कृथा इति । ननु त्व[1]मपि वं स्ववंश्यं कंचन प्रकटय येन मया बद्धः शत्रुर्मोचितो मोचयिष्यते वेत्याशङ्कयाह । ब्रू[2]मः पूर्वापरं युधि । वयं तु स्वं पूर्वापरमाद्यन्ते युधि रणे ब्रूमः स्वदो[3]र्बलप्रकटनेनाधुनैव प्रकटयामः ॥

माधरोत्तरमीक्षस्व कोधरोत्तरयोस्तव ।
गोमहिषेणेव गोमहिषौ युध्यस्व भो मया ॥ ११० ॥

११०. अधरोत्तरं मेक्षस्व भयाकुलतयाधरदेशमू[4]र्ध्वदेशं च मा विलोकय । यतोधरोत्तरयोरधरो[5]र्ध्वप्रदेशयोस्तव संबन्धी कोस्ति । न न कोपीत्यर्थः । तर्हि किं कार्यमित्याह । यथा गोमहिषौ शण्डलुलायौ गोमहिषेण शण्डमहिषाभ्यां सह युध्येते तथा भो मूलराज त्वं मया सह युध्यस्व ॥

चौलुक्योथाह कोपेपि क्षरन्दधिघृतं गिरा ।
असौ मोच्यः कथं यस्य गावो दधिघृते सदा ॥ १११ ॥

१११. अथ चौलुक्यः कोपेपि क्रोधे सत्यपि महापुरुषत्वाद्गिरा [6]कृत्वा दधिघृतं मधुरत्वाद्दधिसर्पिषी इव क्षरन्सन्नाह । किमित्याह । यस्य ग्राहारेः सदा गावो दधिघृते दधिघृततुल्या महापापि[7]ष्ठत्वाद्धेनवो यस्य भोज्या इत्यर्थः । असौ ग्राहारि[8]ः कथं मोच्यस्त्याज्यो न कथमपीत्यर्थः ॥

१ बी °पि त्वं स्व°. सी °पितः स्वं वं°. २ प सी ब्रूम पू°. ३ प सी °दोर्बप्र°. ४ प सी °मूर्द्धदे°. ५ प सी °रोर्द्धप्र°. ६ प सी डी °त्वा......द°. ७ प सी डी °पिष्ठाद्धे°. ८ प सी °हारिक°.

अश्ववडवम् अश्ववडवौ । पूर्वापरं पूर्वापरे । अधरोत्तरम् अधरोत्तरयोः । इत्यत्र "अश्ववडव°" [१३१] इत्यादिना वैकार्थता ॥ अश्ववडवेति निर्देशादेवेतरेतरयोगे[1] ह्रस्वत्वं निपात्यते ॥

पशु । गोमहिषेण गोमहिषौ ॥ व्यञ्जन । दधिघृतम् दधिघृते । अत्र "पशु°" [१३२] इत्यादिना द्वन्द्व एकार्थो वा ॥

कुशकाशमसौ[1] पापः[2] कुशकाशा इमे नृपाः ।
सारो धवाश्वकर्णं नु त्वं मुमोचयिषन्नमुम् ॥ ११२ ॥

११२. पापोसौ ग्राहारिः । कुशकाशं कुशा दर्भाः काशा इषीकाख्यास्तृणभेदा द्वन्द्वे । कुशकाशमिवासार[2] इत्यर्थः । तथेमे ग्राहारिसत्का नृपाः कुशकाशाः । ग्राहारिमोचनेशक्तत्वादसारा इत्यर्थः । एवं च यदि परममुं[3] ग्राहारिं मुमोचयिषन्मोचयितुमिच्छंस्त्वमेव धवाश्वकर्णं नु । धवाश्वकर्णाख्यवृक्षभेदा इव सारो बलिष्ठः । काकुव्याख्ययोपहासगर्भवाक्यार्थत्वादयमत्र तात्पर्यार्थः । न हि[4] ग्राहारिस्तन्नृपाश्चासमर्था आसन्परं ग्राहारिः सर्वेषु नृपेषु पश्यत्सु मया बद्धोतस्त्वमेकोमुं मुमोचयिषुः कियन्मात्र इति ॥

युध्यसे चेदसौ दोस्त्वां तिलमाषाशु पेक्ष्यति ।
भङ्क्ता धवाश्वकर्णान्किं तिलमाषेनिलः स्खलेत् ॥ ११३ ॥

११३. चेद्यदि युध्यसे त्वं तदासौ मामकीनो दोस्तिलमाषाशु तिलमाषानिवासारत्वाल्लीलया त्वां पेक्ष्यति संचूर्णयिष्यति । दृष्टान्त-

---

१ सी °शम°. २ ए सी °मसो पा°.

---

१ ए सी डी °ते । गो°. २ ए सी °शनिवा°. ३ ए सी °ममुमा°. ४ सी हि ग्रमा°.

माह । धवाश्वकर्णान्भङ्क्त्वानिलः किं तिलमाषे स्खलेत् । तदिदमत्राकूतम् । यो धवाश्वकर्णवत्सारान् प्राहार्योदीन्भङ्क्त्वा सोनिलमहाबलो मदोद्दण्डस्तिलमाषतुच्छे त्वयि किं कदाचित्स्खलेत् ॥

ऋश्यैणानां समैरश्वैर्यद्यृश्यैणं नु नङ्क्ष्यसि ।
याहीदानीं मा तित्तिरिकपिञ्जलमिवारट ॥ ११४ ॥

११४. ऋश्यैणानां भाल्लूकानां मृगभेदानां च समैः शीघ्रत्वादिना तुल्यैरश्वैः कृत्वा ऋश्यैणं नु ऋश्यैणा इव यदि त्वं नङ्क्ष्यसि तदेदानीमेव याहि । यदि पश्चादपि रणे नङ्क्ष्यसि तदा प्रथममेव नश्येत्यर्थः । तित्तिरिकपिञ्जलमिव । तित्तिरिः प्रसिद्धः । कपिञ्जलो गौरतित्तिरिः । बहुवचनसमाहारे । तदिव मारट स्वविकत्थनेन मा पूत्कुरु ॥

इत्युक्तः सोग्रहीच्चापं मन्वानोश्वरथं श्रितान् ।
द्विषो न दंशमशकं न तित्तिरिकपिञ्जलान् ॥ ११५ ॥

११५. इत्येवंप्रकारेणोक्तः स लक्ष्मश्चापमग्रहीत् । कीदृक्सन् । अश्वरथं श्रितानश्वान्रथांश्चारूढान्द्विषो दंशमशकं दंशा मशकाश्च क्षुद्रजन्तुभेदाः प्रसिद्धा असारत्वात्तत्तुल्यानपि न मन्वानो न मन्यमानस्तथा तित्तिरिकपिञ्जलांस्तित्तिरिकपिञ्जलतुल्यानपि न मन्वानश्च ॥

तरु । धवाश्वकर्णम् धवाश्वकर्णान् ॥ तृण । कुशकाशम् कुशकाशाः ॥ धान्य । तिलमाषे तिलमाषान् ॥ मृग । ऋश्यैणम् ऋश्यैणानाम् ॥ पक्षिन् । तित्तिरिकपिञ्जलम् तित्तिरिकपिञ्जलान् । अत्र "तरुतृण°" [१३३] इत्यादिना द्वन्द्व एकार्थो वा ॥

---

१ प °रय ॥. २ बी °त्तिरक°.

१ प सी °लवहा°. डी °लवन्महा°. २ सी °तु त्व°. ३ बी °चित्स्खले°. ४ बी °नां भल्लू°. ५ प सी डी नङ्क्षसि. ६ सी °रुते ॥. ७ प सी °रत्वोत्त°. ८ सी °तुल्योन°. ९ बी °त्तिरक°. १० सी °श्यैणा°. ११ बी °त्तिरक°.

सेनाङ्गं । अश्वरथम् ॥ क्षुद्रजन्तु । दंशमशकम् । अत्र "सेनाङ्ग°" [१३४] इत्यादिना द्वन्द्व एकार्थः ॥

बदरामलकं धानाशष्कुलीवाशितुं परान् ।
वर्षतीषून्द्विजक्षत्रविट्छूद्रास्तत्र तत्रसुः ॥ ११६ ॥

११६. द्विजक्षत्रविट्छूद्रास्तत्रसुः । बिभ्युः । क सति । तत्र लक्ष्ये । कीदृशि । इषून्वर्षति । किं कर्तुम् । परान्बदरामलकमिव । इवोत्रापि योज्यः । बदरीफलामलकीफलानीव । तथा धानाशष्कुलीव । धाना भृष्टा यवाः । शष्कुली प्रसिद्धा । खाद्यभेदः । द्वन्द्वे तदिव चाशितुं भक्षयितुमनायासेन विनाशयितुमिति यावत् ॥

द्विजक्षत्रियविट्छूद्रं त्रातापि ध्वनयद्धनुः ।
जयाय भेरीशङ्खं च सद्यो भैरिकशाङ्खिकम् ॥ ११७ ॥

११७. द्विजक्षत्रियविट्छूद्रं त्रातापि रक्षितापि मूलराजोपि सद्यस्तत्क्षणादेव जयाय धनुरध्वनयज्ज्याकर्षणेनावादयत् । तथा मूलराजसत्कभैरिकशाङ्खिकं भेरीवादनशिल्पाः शङ्खवादनशिल्पाश्च जयाय विजयसूचकं भेरीशङ्खमध्वनयत् ॥

ज्यानादैर्धनुरस्योच्चैः शिरोग्रीवमधुन्वतः ।
प्रत्यष्ठात्कठकालापमुदगाच्चेत्युवाच नु ॥ ११८ ॥

११८. अस्य मूलराजस्य धनुर्धरोत्तमत्वेन लक्षबद्धदृष्टित्वाच्छिरो-

---

१ प सी °वासितुं. २ प °च नुः ॥

---

१ बी इतोत्रा°. १ प सी °फलम°. ३ बी °ना भ्रष्टा°. ४ प °व चांशतुं शक्ष°. सी °व वांशक्ष°. ५ प सी रक्षता°. ६ प सी °लसज°. डी °लसत्क°.

ग्रीवमधुन्वतोकम्पयतः सतो धनुः कर्तृ । उच्चैरुदात्तैर्ज्यानादैः कृत्वोवाच नु कठकालापादिदैत्यानां निर्णीतवधत्वेन बभाष इव । किं तदित्याह । कठाः[1] कालापाश्च शाखाध्ययननिमित्तव्यपदेशभाजो[2] द्विजाश्चरणाख्या द्वन्द्वे । तत्प्रत्यष्ठादुदगौश्च[3] प्रतिष्ठामभ्युन्नतिं च प्राप्तमिति ॥

बदरामलकम् । इत्यत्र "फलस्य जातौ" [१३५] इति द्वन्द्व एकार्थः ॥

धानाशष्कुलि । इत्यत्र "अप्राणि°" [१३६] इत्यादिना द्वन्द्व एकार्थः ॥ प्राणिपश्वादिवर्जनं किम् । द्विजक्षत्रियविट्शूद्राः द्विजक्षत्रियविट्शूद्रम् । गोमहिषौ गोमहिषम् । इत्यादीनि पूर्वोक्तान्येव ज्ञेयानि ॥

प्राण्यङ्ग । शिरोग्रीवम् ॥ तूर्याङ्गम् । भेरीशङ्खम् । भैरिकशाङ्खिकम् । अत्र "प्राणि°" [१३७] इत्यादिना द्वन्द्व एकार्थः ॥

प्रत्यष्ठात्कठकालापम्[4] । उदगात्कठकालापम्[5][6] । अत्र "चरणस्य°" [१३८] इत्यादिना[7][8] द्वन्द्व एकार्थः ॥

वाजपेयचयनयोरिषुवज्रयोर्नु तौ ।
अर्काश्वमेधे नु रणे चक्रतुः शरमण्डपम् ॥ ११९ ॥

११९. यथा वाजपेय-चयन-इषु-वज्र-अर्क-अश्वमेधाख्येषु यागभेदेषु च्छायाद्यर्थं शरमण्डपं कौचित्कुरुतस्तथा रणे तौ मूलराजलक्षौ निरन्तरमोक्षैः शरमण्डपं बाणमण्डपं चक्रतुः ॥

अर्काश्वमेधे । इत्यत्र "अक्लीबे°" [१३९] इत्यादिना द्वन्द्व एकार्थः ॥ अक्लीब इति प्रसज्यप्रतिषेधः किम् । वाजपेयं च चयनं च तयोर्वाजपेयचयनयोः । इमौ

---

१ ए सी °चन°.

---

१ बी °ठाः कला°. २ बी °निनिमि°. ३ ए सी °गाश्च प्र°. ४ ए सी डी °र्थः । + + + प्रत्य°. ५ सी °काप°. ६ सी °ठला°. ७ ए सी °दिनो ए°. ८ डी °ना ए°.

क्रतू पुंलिङ्गावपि स्त इति पर्युदासाश्रयणेऽत्रापि स्यात् ॥ अध्वर्युग्रहणं किम्। इषुवज्रयोः। अध्वर्यवो[2] यजुर्वेदविदस्तेषां वेदोऽप्यध्वर्युस्तत्र[3] विहिताः क्रतवोऽश्वमेधादयोऽध्वर्युक्रतवः[4]। इषुवज्रौ तु सामवेदविहिताविति ॥

युत्संहिताया विस्तारात्पदकक्रमकं नु तौ।
स्तुतौ देवासुरैः सर्पनकुलं नु विरोधतः ॥ १२० ॥

१२०. तौ देवासुरैः[5] स्तुतौ देवैर्मूलराजः प्रशंसितोऽसुरैस्तु लक्ष इत्यर्थः। किंभूतौ सन्तौ। विरोधतो वैराद्धेतोः सर्पनकुलं[6] नु सर्पनकुलतुल्यावत एव युद्रणं सैव स्वर्गफलत्वात्संहिता वैदिको ग्रन्थस्तस्या विस्ताराद्विस्तारणाद्धेतोः पदकक्रमकं[7] नु पदानन्तरं क्रमस्य पाठात्पदक्रमौ निकटपाठौ[8] पाठविशेषावधीयाते[9][10] "पदक्रम°" [६.२.१२६] इत्यादिनाके पदकश्च क्रमकश्च तदिव। यथा पदाध्यायकक्रमाध्यायकौ[11] यथोक्तेन संहितास्थपदक्रमपठनेन[12] संहिताया विस्तारकावेवं युधो विस्तारकावित्यर्थः ॥

पदकक्रमकम्। इत्यत्र "निकटपाठस्य" [१४०] इति द्वन्द्व एकार्थः ॥
सर्पनकुलम्। इत्यत्र "नित्यवैरस्य" [१४१] इति द्वन्द्व एकार्थः ॥

तौ गूर्जरत्राकच्छस्य द्वारकाकुण्डिनस्य नु।
नाथौ शरोर्मिमालाभिर्गङ्गाशोणं प्रचक्रतुः ॥ १२१ ॥

१२१. तौ मूलराजलक्षौ गूर्जरत्राकच्छस्य गूर्जरत्राकच्छदेशयो-

---

१ ए बी सी डी °तू पुल्लिङ्गा°. २ सी °र्येवा य°. ३ ए सी ध्वर्यस्त°. ४ ए सी °र्युक्रवत°. ५ बी °रैः सुरैर्देवै°. ६ ए सी डी °कुल°. ७ ए सी °दक°. ८ ए सी डी °ठात्पाद°. ९ ए सी °शेषव°. १० ए सी धीयते. डी °धीयेते. ११ बी °क्रमध्या°. १२ सी °तास्थाप°.

र्नाथौ शरा एव संततोच्छलितत्वादूर्मयः कल्लोलास्तेषां या माला: श्रेणयस्ताभिः कृत्वा गङ्गाशोणं प्रचक्रतुः जाह्नवीनदमिव प्रचक्रतुः । नुरूपमायाम् । यथा द्वारकाकुण्डिनस्य नाथौ । द्वारकापुरीनाथो विष्णुः । कुण्डिनपुरनाथश्च विष्णुश्यालो रुक्मी । रुक्मिण्यपहारकाले महायुद्धविधानाच्छरोर्मिमालाभिर्गङ्गाशोणं प्रचक्रतुः ॥

वाराणसीकुरुक्षेत्रं प्राप्याजिं तावहृष्यताम् ।
शौर्यकेतवतस्येशौ शौर्यकेतवते इव ॥ १२२ ॥

१२२. स्पष्टः । किं तु । वाराणसी च पूः । कुरुक्षेत्रं च देशः । द्वयमपि लोके महातीर्थत्वेन प्रसिद्धम् । इवोत्र ज्ञेयः । स्वर्गहेतुत्वेन वाराणसीकुरुक्षेत्रतीर्थतुल्यामित्यर्थः । शौर्यं पुरम् । केतवता च ग्रामः ॥

दार्ढ्येन गौरीकैलासौ तदा तावनुचक्रतुः ।
अस्त्रैरस्त्राणि तक्षन्तौ तक्षायस्कारमक्षतौ ॥ १२३ ॥

१२३. तदा दार्ढ्येन बलिष्ठत्वेन स्थैर्येण वा गौरीकैलासौ गिरिभेदाविव तौ मूलराजलक्षौ तक्षायस्कारं काष्ठतड्लोहकारमनुचक्रतुः । यतोस्त्रैरस्त्राणि तक्षन्तौ छिन्दन्तौ । तथाक्षतौ स्वयं प्रहाररहितौ । तक्षायस्कारमपि हि स्वयमक्षतं सदस्त्रैर्वासीघनादिभिरस्त्राणि चापखड्गादीनि तक्षति ॥

नदी । गङ्गाशोणम् ॥ देश । गूर्जरत्राकच्छस्य ॥ पुर । द्वारकाकुण्डिनस्य ।

---

१ बी बाणारसी°. २ ए सी डी °लासो त°.

---

१ बी माला श्रे°. २ बी °णं जा°. ३ बी नाच्छिरो°. ४ बी तु । बाणारसी. ५ बी °न बाणारसी°. ६ ए सी °ल्यानित्य°. ७ ए सी डी शौर्यपु°. ८ ए सी °रत्राणि. ९ ए सी तक्षिन्तौ. १० सी °न्तौ…स्व°. ११ बी सी डी पुर । द्वा°. १२ बी द्वारिका°. १३ ए सी डी °कुण्डन°.

इत्यत्र "नदीदेश°" [१४२] इत्यादिना द्वन्द्व एकार्थः॥ स्वैरित्येव । शौर्यकेतवते ॥ पुरग्रामसंभेदेपीच्छत्यन्यः । शौर्यकेतवतस्य ॥ पूर्देशसंभेदेपीत्यपरे[1] । वाराणसी-कुरुक्षेत्रम् ॥ देशग्रहणेन चेह[2] जनपदानां ग्रहणं पृथग्नदीपूर्ग्रहणात् । तेनेह न स्यात् । गौरीकैलासौ ॥

तक्षायस्कारम् । इत्यत्र "पाग्यशूद्रस्य[3]" [१४३] इति द्वन्द्व एकार्थः ॥

आनीयेषून् गवाश्वेनोष्ट्रखरेणार्पयन्भटाः ।
सध्रीचीं दधिपयसोः कीर्तिमाकाङ्क्षतोस्तयोः ॥ १२४ ॥

१२४. तयोर्मूलराजलक्ष[4]योर्गवाश्वेनोष्ट्रखरेण च कृत्वेषूनानीय भटा आर्पयन् । एतेन बाणक्षेपस्यातिबाहुल्यमुक्तम् । कीदृशोः सतोः । दधि-पयसोर्दधिदुग्धयोः सध्रीचीं निर्मलां जयोत्थां कीर्तिमाकाङ्क्षतोः ॥

षड्भिर्गोमहिषैर्वाह्यं[1] सदृग्दृग्मधुसार्पिषोः ।
तुल्योर्गुपदशैर्नागाश्वैर्लक्षः कुन्तमुदधे ॥ १२५ ॥

१२५. षड्भिर्गोमहिषैर्वाह्यं[6] वोढुं शक्यं महाभारमित्यर्थः । लक्षः[5] कुन्तमुदधे[7] मूलराजे क्षेपार्थमुत्पाटितवान् । कीदृक् । मधुसार्पिषोः सदृग्दृक्कोपारक्तत्वात्तुल्याक्षः । तथोपगताः समीपगता दश[8] दशत्वं येषां तैर्नवभिरेकादशभिर्वा नागाश्वैर्हस्तिहयैस्तुल्योर्के[9][10] समानबलः ॥

---

१ बी °वैर्वाह्य.

---

१ बी °रे । बाणारसी°. २ ए सी चेय ज°. ३ ए सी डी "पात्रशू°. ४ बी °लल°. ५ सी °जक्ष°. ६ बी °षैर्वाह्यं. ७ बी °धेमूल°. ८ ए सी °शभि द°. ९ ए सी डी °त्वं ते°. १० ए बी सी डी °ल्योर्गू स°.

नागाश्वं घन्नुपदशं घन्नासन्नदशान् रथान् ।
राजदन्तैर्दशन्नोष्ठं प्रासमुल्लास्य सोक्षिपत् ॥ १२६ ॥

१२६. स लक्षः प्रासं कुन्तमुल्लास्य स्फोरयित्वाक्षिपन्मूलराजाभिमुखं प्रेरितवान् । कदृक्सन् । उपदशं नवसंख्यमेकादशसंख्यं वा नागाश्वं घन्महाबलत्वात्खण्डयंस्तथासन्नदशान्नवैकादश वा रथान् घंस्तथा राजदन्तैर्दन्तानां राजभिरुपर्यधश्च मध्यदन्तैरोष्ठं कोपाद्दशन् ॥

लिप्तवासितदिक्कीर्त्याथोष्णगुश्रीः षडुन्नतः ।
कुन्तेन सर्वसारेणावधील्लक्षं चुलुक्यराट् ॥ १२७ ॥

१२७. अथ चुलुक्यराड् मूलराजः सर्वः सारः प्रधानलोहभेदो यत्र तेन सर्वसारलोहमयेन कुन्तेन लक्षमवधीत् । कीदृशः । महापुरुषत्वेन सल्लक्षणलक्षितत्वात्षट् शिरो हृत्स्कन्धौ पादौ चोन्नता उच्चा यस्य सः । तथोष्णगुश्री रवितुल्यतेजा अत एव कीर्त्या लिप्तवासिताः पूर्वं वासिता आमोदिताः पश्चाल्लिप्ता व्याप्ता दिशो येन सः ॥

द्व्यन्यास्त्र्यन्याः सुराः स्त्रीभिः पुष्पवृष्टिमथ व्यधुः ।
कृतप्रिये क्षणात्तस्मिन्कृतोग्ररिपुनिग्रहे ॥ १२८ ॥

१२८. अथ सुरास्तस्मिन्मूलराजे क्षणात्पुष्पवृष्टिं व्यधुः । कीदृशाः सन्तः । स्त्रीभिः स्वभार्याभिर्देवीभिः कृत्वा द्वे अन्ये येषां ते द्व्यन्यास्तिस्रोन्या येषां ते त्र्यन्याः । केचिद्देवीद्वयोपेताः केचिच्च देवीत्रयंयुक्ता इत्यर्थः । यतः कीदृशे । कृतप्रिये विहितसुराभीष्टे । एतदपि कुत

१ ए सी °न्याखन्याः. २ ए सी सुरा स्त्री°.

१ ए सी प्रासकु°. २ सी °ण्डयस्त°. ३ सी °थ चूलु°. ४ सी सर्वसा°. ५ ए सी डी सलक्ष°. ६ बी °थोष्णुगु°. ७ ए सी °ता अमो°. ८ सी °राजे. ९ ए °र्यादिर्दे°. सी °र्यादिदेवी°. १० ए सी °त्रयं यु°.

इत्याह । यतः कृत उग्रो मारणात्मको रिपोर्लक्षस्य निग्रहो येन तस्मिन् ॥

ग्राहारिं सोमुचत्कृत्ताङ्गुलीकं भिक्षितः पतिम् ।
तस्य पाणिगृहीतीभिर्बालैर्गृहीतपाणिभिः ॥ १२९ ॥

१२९. स मूलराजो ग्राहारिममुचत् । कीदृशं सन्तम् । कृत्ता[1] छिन्नाङ्गुल्यर्थात्कनिष्ठा येन यद्वाङ्गुल्यां कृत्तं येन तं स्ववेलायत्तं कृत्वेत्यर्थः । यतो बालैः कर्तृभि[2]र्गृहीतपाणिभिरात्तहस्ताभिः सतीभिर्मूलराजस्य कृपा[3]तिरेकोत्पादनाय बालकान्हस्तेषु गृहीत्वेत्यर्थः । तस्य ग्राहारेः पा[4]णिगृही[5]तीभिर्भार्याभिः पतिं भर्तारं भिक्षितोस्मभ्यं पतिभिक्षां देहीति याचितः ॥

ततः प्रभृति सौराष्ट्रैः स्त्रीवेषो जातजन्मभिः ।
अजन्मजातैश्चोपात्तः प्राह राजिभुवो यशः ॥ १३० ॥

१३०. ततः प्रभृति तस्मान्मोक्षदिनादारभ्य स्त्रीवेष आप्रपदीनशाटिकापरिधानकच्छादानाभावलक्षणो नारीवेषो राजिभुवो मूलराजस्य यशः सौराष्ट्रजयोत्थां कीर्तिं प्राह । संप्रत्यपि ज्ञापयतीत्यर्थः । कीदृक् । सौराष्ट्रैः सुराष्ट्रादेशो[6]द्भवैर्लोकै[7]रुपात्तो वयं मूलराजस्य पुरः स्त्रीकल्पा इति ज्ञापनाय गृहीतः । कीदृशैः । जातर्जन्मभिः । जन्मशब्दोत्र जन्मप्रभृतिजीवितकालवाची । जातं बाल्ययौवनवार्धक्यावस्थात्रयोपभोगेन कृतकृत्यत्वान्निष्पन्नं परिपूर्णीभूतं जन्म[8] जन्मवारो येषां तैरतिवृद्धैरित्यर्थः । तथा न जातं वार्धक्यानुपभोगेनाकृतार्थत्वादपरिपूर्णीभूतं जन्म येषां तैश्च बालैस्तरुणैश्चेत्यर्थः ॥

---

१ ए सी कृत्वा छि°. २ सी °तैर्ही°. ३ सी °तिरोको°. ४ बी °णिर्गृही°. ५ ए सी डी °हीभि.° ६ बी °शः सुरा°. ७ ए सी °वैलोकै°. ८ सी °जन्मश°. ९ डी °न्मवा°.

सुखयातान्यतीन्यातसुखान्विप्रांश्च भूपतिः ।
दुःखहीनो[1] हीनदुःखान्यथावत्संस्थया व्यधात् ॥ १३१ ॥

१३१. भूपतिर्मूलराजो हीनमपगतं दुःखं यस्मात्स तथा सन्संस्थया व्यवस्थया व्यधात् । कांस्कानित्याह । यातं प्राप्तं सुखं दैत्यवधोत्थं शर्म यै[1]स्तान्सुखयातान्यतींस्तथा यातसुखान्विप्रांश्चोभयानो[2]पि यातसुखत्वेन हीनदुःखान् । कथं व्यधात् । यथौ[3]वद्यः प्रकारो यथा[4] यथास्यास्ति "तदस्य°" [७.२.१.] इत्यादिना मतुः । यद्वा यथेत्येतस्याह "तस्याहे°" [७.१.५१] इत्यादिना वत् । क्रियाविशेषणं यथाविधीत्यर्थः ॥

गवाश्वेन । उष्ट्रखरेण । इत्यत्र "गवाश्वादिः" [१४४] इति द्वन्द्व एकार्थः ॥

दधिपयसोः । मधुसर्पिषोः । अत्र "न दधि°" [१४५] इत्यादिना न द्वन्द्वै- कत्वे[5]म् ॥

षड्गिर्गोमहिषैः । इत्यत्र "संख्याने" [१४६] इति न द्वन्द्वैकत्वम् ॥

उपदशम् नागाश्वम् । उपदशैः नागाश्वैः । अत्र "वान्तिके" [१४७] इति वा द्वन्द्वैकत्वम् ॥

आसन्नदशान् । इत्यत्र "प्रथमोक्तं प्राक्" [१४८] इति प्रथमान्तेन यन्नि- र्दिष्टं तत्पूर्वं निपतति ॥

राजदन्तैः । लिप्तवासित । इत्यत्र "राजदन्तादिषु" [१४९] इत्यप्राप्तपूर्व- निपातं प्राग्नि[6]पतति ॥

विशेषण । उष्णगुश्रीः ॥ सर्वादि । सर्वसारेण ॥ संख्या । षड्वृतः । इत्यत्र "विशेषण°" [१५०] इत्यादिना विशेषणादेः पूर्वनिपातः ॥ शर्कदस्य स्पर्धे पर-

---

१ ए डी °नो दीन°.

१ बी °स्तान्य°. २ ए सी डी °नभिया°. ३ डी °थाद्यः. ४ सी डी °थास्या°. ५ सी °त्वम्···उप°. ६ डी °पति।. ७ ए सी डी °गुश्रीस°. ८ सी °न्दस्प°.

त्वात्सर्वादिसंख्ययोः संख्याया एव पूर्वनिपातः। द्व्यन्याः ॥ उभयोस्तु सर्वादित्वे स्पर्धे परस्य पूर्वनिपातः। अन्याः ॥

कृताङ्गुलीकम्। इत्यत्र[1] "क्ताः" [१५१] इति क्तान्तस्य प्राग्निपातः ॥ क्तान्तस्य विशेषणत्वात्पूर्वेण[2] सिध्यति विशेष्यार्थं तु वचनम्। अङ्गुल्यां कृतमनेन कृताङ्गुलीकम्। स्पर्धे परत्वार्थं च। कृतोग्ररिपुनिग्रहे ॥ बहुवचनं व्याप्त्यर्थम्। तेन कृतप्रिये। इत्यत्र परेणापि स्पर्धे क्तान्तस्यैव प्राग्निपातः ॥

जाति। पाणिगृहीतीभिः गृहीतपाणिभिः ॥ काल[3]। अजन्मजातैः जातजन्मभिः ॥ सुखादि। सुखयातान् यातसुखान्। दुःखहीनः हीनदुःखान्। इत्यत्र "जाति°" [१५२] इत्यादिना जात्यादेर्वा प्राग्निपातः ॥

प्रजया पुत्रजातो नु तेजोग्न्यभ्याहितोथ सः।
प्रभासं जातपुत्रैर्न्वगात्प्रीतैराहिताग्निभिः ॥ १३२ ॥

१३२. अथ स मूलराजो जातपुत्रैर्नूत्पन्नतनयैरिव[4] प्रीतैर्दैत्यवधात्तुष्टैराहिताग्निभिरग्निहोत्रिभिर्द्विजैः सह प्रभासं तीर्थमगात्। कीदृक्। प्रजया कृत्वा जातः पुत्रो येन(यस्य ?) स पुत्रजातो नु प्रजां पुत्रमिव पश्यन्नित्यर्थः। तथा तेजोग्निना प्रतापवह्निना कृत्वाहितः प्रज्वालितोग्निर्येन सोभ्याहितोग्निश्चित्तुल्यो[5] जाज्वलत्प्रताप इत्यर्थः ॥

आहिताग्निभिः[6][7] अग्न्याहितः। जातपुत्रैः पुत्रजातः। इत्यत्र "आहिताग्न्यादिषु" [१५३] इति क्तान्तस्य वा प्राग्निपातः ॥

१ डी °त्र क्तान्त°. २ बी °वेणापि सि°. ३ बी °ल। आज°. ४ ए °त्रैरुत्प°. सी °त्रैकपृत्प°. ५ ए सी डी ग्निचत्तु°. ६ ए प्राहि°. ७ ए सी डी °भिः आग्न्या°.

सोस्युद्यतः पद्मनाभो नूद्यतासिभिरावृतः ।
इन्दुमौलिं शूलपाणिं स्पृष्ट्वा नत्वेति तुष्टुवे ॥ १३३ ॥

१३३. स्पष्टः । किंतु । उद्यत ऊर्ध्वीकृतोसिर्येन सोस्युद्यतः । प्रजापालकत्वात्पद्मनाभो[3] नु विष्णुरिव । इन्दुमौलिं सोमनाथलिङ्गं स्पृष्ट्वा हस्तेन संस्पृश्य ॥

उद्यतासिभिः अस्युद्यतः । अत्र "प्रहरणात्" [१५४] इति क्तान्तं वा प्राग्निपतेत् ॥

इन्दुमौलिम् । पद्मनाभः ॥ प्रहरणात् । शूलपाणिम् । अत्र "न सप्तमी°" [१५५] इत्यादिना सप्तम्यन्तस्य न प्राग्निपातः ॥

यस्त्वां श्रीकण्ठ नौत्यार्तः कण्ठेगड्डुररुःशिराः ।
भवत्यगड्डुकण्ठः सोशिरस्यरुरपि क्षणात् ॥ १३४ ॥

१३४. श्रीकण्ठ हे शंभो गड्डुर्व्रणं कण्ठे यस्य स कण्ठेगड्डुर्गण्डमालामहारोगान्वितस्तथारुर्व्रणं शिरस्यस्य सोरुःशिराश्च । उपलक्षणत्वादन्यैरपि रोगैर्युक्तश्च सन्नार्तो रोगपीडितो नरो यस्त्वां नौति स्तौति स क्षणादगड्डुकण्ठोशिरस्यरुरपि । अपिः समुच्चये । उपलक्षणत्वादन्यरोगविमुक्तश्च भवति ॥

कण्ठेगड्डुः गड्डुकण्ठः । शिरस्यरुः अरुःशिराः । अत्र "गड्वादिभ्यः" [१५६] इति सप्तम्यन्तं वा प्राग्निपतेत् ॥

---

१ सी °यता.

१ पद बी सी डी ऊर्ध्वीकृ°. २ सी °पद्यः । प्र°. ३ डी °भो वि°. ४ पद सी डी °नाभम् । प्र°. ५ सी कान्ते य°. ६ बी °शिरोः । अ°.

विश्वप्रिय प्रियमृषावादस्य त्वन्निरासतः ।
स्याज्जैमिनिकडारस्य तुल्यः कडारजैमिनिः ॥ १३५ ॥

१३५. हे विश्वप्रिय प्रिया विष्णुमूर्त्या पालनीयत्वाद्भवकष्टाब्धेर्निस्तार्यत्वाच्चाभीष्टा विश्वे समस्तजना यस्य । अनेन शंभोः सर्वमान्यतोक्ता । त्वन्निरासतो नास्ति सर्वज्ञः प्रमाणपञ्चकातीतत्वात्खरविषाणवदित्यादिकुवादैस्त्वदभावमननात्प्रियमृषावादस्य जैमिनिकडारस्य कडारः पिङ्गलो दासो वा सर्वज्ञाभावमननेन सर्वजनानां क्षेप्यत्वात्कडार इव कडारो यो जैमिनिर्मीमांसकस्तस्य तुल्यः कडारजैमिनिः कडारमीमांसक एव स्यान्नान्यः । त्वन्निरासं दुरात्मा मीमांसक एवाह नान्य इत्यर्थः । तथा च मीमांसकमताभिप्रायेणोक्तम् ॥

अपौरुषेयो वेदश्च प्रामाण्यं षट्प्रमाणतः ।
सर्वज्ञाभाव इत्येव मीमांसकमतं मतम् ॥ १ ॥

वृद्धमन्वादिभिस्तुल्यं त्वां स्तुयान्मनुवृद्धगीः ।
योर्थधर्मप्रियः स स्याद्धर्मार्थाभ्यां न वञ्चितः ॥ १३६ ॥

१३६. वृद्धश्चिरन्तनो यो मनुराद्यर्षिस्तद्वद्भक्तिसारतार्थसारतादिगुणोपेता गीर्वाणी यस्य स तथा सन्यः पुमांस्त्वां स्तुयात् । यतोर्थधर्मौ प्रियावभिलषणीयौ यस्य सः । अर्थधर्माभिलाषेणेत्यर्थः । किंभूतं त्वाम् । वृद्धमन्वादिभिश्चिरन्तनमनुऋष्याद्यैरादिपदाद्व्यासाद्यैस्तुत्यम् । स धर्मार्थाभ्यां वञ्चितो वियुक्त इत्यर्थः । न स्यात्तस्य धर्मार्थौ भवत एवेत्यर्थः ॥

१ ए सी डी तुल्य क°. २ ए सी डी °स्तुल्यं त्वां.

१ सी °स्त्वाभी°. २ बी °मस्ता ज°. ३ ए सी डी °डारः. ४ सी दास्रो वा. ५ ए °त्वाकडा°. सी डी °त्वाकमार°. ६ ए सी °डारः मी°. ७ सी °णोकाम् ।. ८ ए सी °नुरुष्या°. ९ ए सी डी °स्तुल्यम् ।.

ब्रह्मादीनां त्वमन्तादी तवाद्यन्तौ न कश्चन ।
अग्नीषोमौ वायुतोयाद्याश्च ते तिलमाषवत् ॥ १३७ ॥

१३७. ब्रह्मादीनामादिपदाद्विष्ण्वादीनामन्तादी संहारोत्सर्जनाच्च निधनोत्पत्तिकारणं त्वम् । यदुक्तम् ।

ब्रह्मादीनपि भगवंस्त्वमेव संसृजसि संहरसि चैव । इति ।

तव त्वाद्यन्तावुत्पत्तिविनाशहेतुरनादिनिधनत्वान्न कश्चन । उक्तं च ।

अनादिनिधनं देवं जगत्कारणमीश्वरम् । इति ॥

अतश्चाग्नीषोमौ वह्निदेवतासोमदेवते वायुतोयाद्याश्च वायुदेवतोजलदेवताद्याश्चाद्यपदान्नृदेवतादयश्च ते तव तिलमाषवत्तिलमाषा इवाल्पास्त्वदंशमात्रमित्यर्थः ॥

स्कन्दश्रीदसुतसखे त्यक्त्वा सखिसुतादिकम् ।
यस्त्वां ध्यायेत्रिलोक्यां स्यादस्त्रशस्त्रैः स दुर्जयः ॥१३८॥

१३८. स्कन्दश्रीदौ कार्तिकेयधनदौ सुतसखायौ यस्य हे स्कन्दश्रीदसुतसखे हे शंभो सखिसुतादिकमादिपदाद्भार्यादिकं संसारबन्धनं त्यक्त्वा यस्त्वां ध्यायेत्स नरस्त्रिलोक्यामस्त्राण्याग्नेयादीनि दिव्यायुधानि शस्त्राणि खड्गादीनि द्वन्द्वे तैर्दुर्जयः स्यात् । केनाप्यसौ न जीयेतेत्यर्थः ॥

---

१ सी °नां दी त°. २ ए सी डी °तसुखे.

---

१ ए सी °रात्सर्जं°. २ ए सी डी °ताद्या°. ३ बी याद्य°. ४ ए सी डी °न्नृतदे°. ५ बी °तसुखा°. ६ सी °न्धने त्य°. ७ सी °नाप्यासौ.

श्रद्धातपोभ्यां संपन्ना अर्चित्वा बिल्वगुग्गुलैः ।
शङ्खदुन्दुभिवीणाभिर्धन्यास्त्वां[1] पर्युपासते ॥ १३९ ॥

१३९. सुगमः । किं तु । श्रद्धातपोभ्यां संपन्ना इत्यनेन बिल्वगुग्गुलैरित्यनेन[1] च शिवरात्रिपर्व ज्ञापितम् । तत्रैव हि विशेषतो बिल्वपत्रै[2]र्गुग्गुलैश्च[3] शंभोः श्रद्धोपवासतपःसंपन्नैर्जनैरर्चा क्रियते ॥

वीणादुन्दुभिशङ्खास्ते प्रिया इति पुरस्तव ।
गृह्णन्ति नारदप्रख्यास्ते वीणाशङ्खदुन्दुभीन् ॥ १४० ॥

१४०. सुगमः । नवरम् । ते गन्धर्वविद्याकौशल्यादिना प्रसिद्धा नारदप्रख्या नारदो देवब्रह्मा तन्मुख्यास्तत्सदृशा वा गन्धर्वविद्याधराद्याः ॥

प्रियमृषावादस्य विश्वप्रिय । इत्यत्र "प्रियः" [१५७] इति वा प्रियः प्राग्निपतेत् ॥

कडारजैमिनिः[4] जैमिनिकडारस्य । वृद्धमनु मनुवृद्ध । इत्यत्र "कडार°" [१५८] इत्यादिना कडारादेर्वा प्राग्निपातः ॥

धर्मार्थाभ्याम् अर्थधर्म[5] । आद्यन्तौ अन्तादी । इत्यत्र "धर्मार्थ°" [१५९] इत्यादिनाप्राप्तपूर्वनिपातं वा पूर्वं निपतेत् ॥

लघ्वक्षर । तिलमाष ॥ असखीदुत् । अग्नीषोमौ वायुतोय ॥ स्वराद्युत् । अश्वशकैः ॥ अल्पस्वर । बिल्वगुग्गुलैः ॥ अर्च्य । स्कन्दश्रीद । इत्यत्र "लघ्वक्षर°"[१६०]इत्यादिना लघ्वक्षरादि प्राग्निपतेत् ॥ स्पर्धे परमेव । श्रद्धातपोभ्याम् ॥

---

१ प सी °र्धन्यास्त्वां.

---

१ प सी °लै इत्य°. २ बी °ल्वपात्रै°. ३ प सी °त्रेगुग्गु°. ४ प सी °मिनिजै°. ५ प सी °र्थमर्थ । आ°.

सखिवर्जनं किम्। सुतसखे। सखिसुत॥ एकमिति किम्। युगपदनेकस्य पूर्वनिपाते प्राप्त एकस्यैव यथा पूर्वं निपातः शेषाणां तु कामचार इति प्रदर्शनार्थम्[1]। शङ्खदुन्दुभिवीणाभिः। वीणादुन्दुभिशङ्खाः। वीणाशङ्खदुन्दुभीन्[2]॥

विनायकस्कन्दगुरो पुण्यैः फाल्गुनचैत्रयोः।
ब्राह्मणक्षत्रविट्छूद्रैः प्रेक्ष्यसे ग्रीष्मदोलयोः॥ १४१॥

१४१.[3] विनायकस्कन्दगुरो हे गणेशकार्तिकेययोः पितः फाल्गुनचैत्रयोर्ये ग्रीष्मदोले ग्रीष्मपर्वदोलापर्वणी[4] तयोर्ब्राह्मणक्षत्रविट्छूद्रैः[5] कर्तृभिः पुण्यैः कृत्वा त्वं प्रेक्ष्यसे। फाल्गुने[6] पौर्णमासी ग्रीष्मपर्वोच्यते। यतोत्र काष्ठखड्गव्यंग्रकरैर्बालकैः[7] शिशूनां महासन्तापकत्वेन ग्रीष्मतुल्यत्वाद्ग्रीष्मा ढुण्ढाराक्षसीकृतोपद्रवा उत्तार्यन्ते[8]। यदुक्तं भविष्योत्तरे। पुरा रघुर्नाम[9] राजासीत्। तस्य राज्ये वर्तमाने ढुण्ढा नाम राक्षसी बभूव। सा बालानामुपद्रवं कुरुते। ततो विरागयुक्ताः सदुःखाः सर्वेपि पौरा नृपमूचुः। देव तव राज्येस्मद्बालानां महानुपद्रवो भवति। तत्रायस्व। ततो राजा गुरुं वशिष्ठं सप्रश्रयमुवाच। कोसावदृष्टो बालानामुपद्रवकारी। तच्छ्रुत्वा वशिष्ठ[10] ऊचे। देव ढुण्ढेति नाम राक्षसी तपःप्रभावाल्लब्धवरा बालेभ्योन्यैरवध्या। अतः सा बालान्पीडयति। तदद्य फाल्गुने पूर्णिमायाः।

अस्या निशागमे पार्थ संरक्ष्याः शिशवो[11] गृहे।
गोमयेनोपसंलिप्ते सचतुष्के गृहाङ्गणे।
आकारयेच्छिशून्प्रायः खड्गव्यग्रकरान्नरान्॥ १॥

---

१ ए सी डी एवमि°. २ ए सी °न्दुभिरीन्॥. ३ बी १४१ हे वि°. ४ ए सी डी °वंणी. ५ ए सी °क्षत्रेवि°. ६ ए सी °ल्गुनै पौ°. ७ सी °व्यग्र°. ८ सी °र्यंते। य°. ९ सी रघूनाम. डी रघुनामा रा°. १० बी वसिष्ठ°. ११ ए सी शिवाबो°.

ते काष्ठखड्गैः संस्पृश्य गीतैर्हास्यकरैः[1] शिशून् ।
रक्षन्ति तेषां दातव्यं गुडं पक्वान्नमेव च ॥ २ ॥
एवं ढौण्ढितमात्रस्य[2] स दोषः[3] प्रशमं व्रजेत् ।
बालानां रक्षणं कार्यं तस्मात्तस्मिन्निशागमे ॥ ३ ॥

अस्मिंश्च पर्वणि सोमनाथस्यापि लोकाचार[4] इति कृत्वा ग्रीष्मोत्तारणं विशेषपूजा च[5] चतुर्वर्णलोकैः क्रियते ॥

दोलापर्व च चैत्रशुक्लचतुर्दश्युच्यते[6] । यतोत्र शंभुर्गौरीसहितो महोत्सवेन दोलामारुरोह । यदुक्तं भविष्योत्तरे । गौरी शंकरमाह ।

कौतुकं मे समुत्पन्नं पन्नगाभरण प्रभो ।
अन्दोलकं मम कृते कारयस्व स्वलंकृतम् ॥ १ ॥
त्वया सहान्दोलयेयं यथा चैत्रे त्रिलोचन ।
तद्गौरीवचनं चारु श्रुत्वा गोवृषभध्वजः ॥ २ ॥
सँ[7] दोलं कारयामास आहूय सुरवर्धकिम् ।
स्तम्भद्वयं रोपयित्वा इष्टापूर्तमयं दृढम् ॥ ३ ॥
सत्यं चैवोपरितनं श्रेष्ठं काष्ठमकल्पयत् ।
वासुकिं दण्डिकास्थाने बद्ध्वा ध्वान्तायसप्रभम् ॥ ४ ॥
तत्फणासंचयं[8] पीठं[9] कृतवान्मणिमण्डितम् ।
तत्रारूढस्तु भगवान्सोमः सोमविभूषणः[10] ॥ ५ ॥
नन्दिरं[11] दोलयामास पार्श्वस्थैः पार्षदैः सह । इति ॥

---

१ प सी °रैः रिशू°. २ बी सी ढौढित°. ३ प सी दोषप्र°. ४ प सी लोकांचा°. ५ सी चतु°. ६ प सी °दंच्य°. डी °दश्यामुच्य°. ७ सी सा लोलं. डी स दोलां का°. ८ सी °त्फणं सं°. ९ प पीढं कृ°. १० प सी °षण ॥. ११ प सी डी मन्दि°.

फलमाह।

प्राप्ते वसन्तसमये सुरसत्तमाना-
मान्दोलनं नरवरा ननु कुर्वते ये।
ते प्राप्नुवन्ति भुवि जन्मतरोः फलानि
दुःखार्णवात्कुलशतान्यपि तारयन्ति॥

अस्मिंश्च पर्वणि सोमनाथस्य चतुर्वर्णैर्महाविस्तरेण दोलामहोत्सवः क्रियते॥

फाल्गुनचैत्रयोः। ब्राह्मणक्षत्रविट्शूद्रैः। विनायकस्कन्द। इत्यत्र "मासवर्ण°" [१६१] इत्यादिना मासाद्यनुपूर्वं पूर्वं निपतेत्॥

स प्रावृट्छरदभ्रविभ्रममिभत्वग्भस्मतः कृत्तिका-
रोहिण्यात्मजसंनिभः क्षितिपतिः स्तुत्वेति देवं ततः।
उत्को ग्रीष्मवसन्तयोरतिमघाश्लेषे विधौ द्वादशा-
र्कश्रीः पञ्चषवासरैर्निजपुरं नागाष्टशत्या ययौ॥ १४२॥

१४२. ततः स्तवनानन्तरं स क्षितिपतिर्मूलराजो द्वादशार्कश्रीत्वादतिप्रतापी सन्नागाष्टशत्या हस्तिनां शताष्टकेन सह पञ्चषवासरैः पञ्चभिः षड्भिर्वा दिनैः। शीघ्रमित्यर्थः। स्वपुरं ययौ। यतो ग्रीष्मवसन्तयोरुपचाराद्वसन्तर्तुग्रीष्मर्तुसहचरितासु पुष्पोच्चयजलक्रीडादिक्रियासु विषय उत्क उत्कण्ठितः। किं कृत्वा ययौ। देवं शंभुमित्युक्तरीत्या स्तुत्वा। कीदृक्सन्। कृत्तिकारोहिण्यात्मजौ स्कन्दबुधौ तयोः संनिभः शंभुविषयान्तरभक्तिपाण्डित्याभ्यां तुल्यः। किंभूतं देवम्। इभत्वग्भस्मतो गजचर्माच्छादनभस्माङ्गरागाभ्यां सकाशात्प्रावृट्छरदभ्रविभ्रमं

१ ए सी भ्रम.

१ ए सी डी ननु व°. २ ए सी °वाकुल°. ३ बी °र्णैमहा°. ४ ए सी °ट्शूद्रै। वि°. ५ डी °रं क्षि°. ६ सी °नाष्ट°. ७ सी °हिणीत्म°. ८ बी °वमम°. ९ सी °तो गजच°.

वर्षाशरन्मेघतुल्यम् । क सति ययौ । विधौ चन्द्रे । कीदृशे । अति[1]मघाश्लेषेश्लेषामघानक्षत्रातिक्रान्ते । अस्य च विशेषणस्याप्रावेशिकनक्षत्रातिक्रमस्योपलक्षणत्वात्पूर्व[2]फल्गुन्या अप्यप्रावेशिकत्वात्तामप्यतिक्रान्ते । उत्तर[3]फल्गुनीस्थ इत्यर्थः । उत्तर[4]फल्गुनी हि स्थिरस्वभावत्वात्प्रावेशिकनक्षत्रम् । अश्लेषा क्रूरस्वभावत्वेन मघापूर्व[5]फल्गुन्यौ चोग्रस्वभावत्वेनानिष्टफलत्वादप्रावेशिक्यः । यदुक्तं रत्नमालायाम् ।

> शुभः प्रवेशो मृदुभिर्ध्रुवर्क्षैः[6] क्षिप्रैश्चरैः स्यात्पुनरेव यात्रा ।
> उग्रैर्नृपो दारुणभैः कुमारो राज्ञी विशाखासु विनाशमेति ॥

उग्रादिभि[7]र्भैः प्रवेशे नृपादिर्विनाशमेतीति संबन्धः । अश्लेषामघापूर्व[8]फल्गुनीरतिक्रान्ते चेन्दौ मूलराजस्याष्टमो नवमश्चेन्दुरशुभोपयातीति हेतोश्चातिमघाश्लेष इति विशेषणं विधोः ॥

भ । कृत्तिकारोहिणी ॥ ऋतु । प्रावृट्शरत् । अत्र "भर्तु॰" [१६२] इत्यादिना भर्त्वृतुश्चानुपूर्व्यं प्राग्निपतेत् ॥ तुल्यस्वरमिति किम् । मघाश्लेषे । ग्रीष्मवसन्तयोः ॥ बहुव्रीहौ । पञ्चष ॥ द्विगौ । अष्टशत्या ॥ द्वन्द्वे । द्वौ च दश च द्वादश । इत्यत्र "संख्या समासे" [१६३] इति संख्यानामनुपूर्व्यं पूर्वं निपतेत् ॥ शार्दूलविक्रीडितं छन्दः ॥

नवमः पादः समर्थितः ॥

इति श्रीजिनेश्वरसूरिशिष्यलेशाभयतिलकगणिविरचितायां श्रीसिद्धहेमचन्द्राभिधानशब्दानुशासनद्व्याश्रयवृत्तौ पञ्चमः सर्गः समर्थितः ॥

१ बी °तिमेघा°. २ बी °र्वफाल्गु°. ३ बी रफाल्गु°. ४ बी °रफाल्गु°. ५ बी °र्वफाल्गु°. ६ ए सी डी °वक्षैः क्षि°. ७ बी °दि विना°. ८ बी °र्वफाल्गु°. ९ बी °ग्रपू°. १० बी °नामानु°.

षष्ठः सर्गः ।

अर्हम् ॥

यथावदाराधयतस्त्रिवर्गं चामुण्डराजोस्य सुतोथ जज्ञे ।
परस्परां वाक्कमला च तेजःसौम्ये च नूनं मिषती श्रिते यम् ॥१॥

१. अथानन्तरमस्य मूलराजस्य यथावद्यथौचित्येन परस्परानाबाधया । स्ववेलायामित्यर्थः । त्रिवर्गं धर्मार्थकामानाराधयत आसेवमानस्य सतश्चामुण्डराजः सुतो जज्ञ उत्पेदे । यं चामुण्डराजं वाक् सरस्वती[1] च कमला च लक्ष्मीस्तेजः प्रतापः सोम इवाह्लादकत्वात्सोमः कान्तस्तद्भावः सौम्यं कान्तत्वम् । द्वन्द्वे । ते च श्रिते । नूनं शङ्के । परस्पराम् । स्पर्धमानः[2] स कृष्णम् ।

मेरुं स्पर्धिष्णुनेवान्यो धृतो नाको हिमाद्रिणा ।

इत्यादाविव प्राप्येत्यध्याहारेण परस्परस्य व्याप्यत्वात्[3]परस्परं[4] कर्म परस्परेण सह वा परस्परार्थं वा परस्परस्मात्सकाशाद् गम्ययबपेक्षया "गम्ययपः" [२.२.७४] इति पञ्चम्यां परस्परमाश्रित्य वा परस्परस्य संबन्धिनो वा परस्परस्मिन्वा मिषती स्पर्धमाने । ये हि मिथो मिषतस्ते मिथोभिभवेच्छयोत्कृष्टस्वामिनं श्रयेते । वाक्कमले तेजःसौम्ये च मिथो विरुद्धे अमुं चाश्रिते इत्येवमाशङ्का । सर्गेस्मिन्नुपजातिश्छन्दः ॥

---

१ बी °ती क°. २ ए सी डी °मानस. ३ ए सी डी °त्वापर°.
४ डी °मेंद्धप°. ५ बी °मलते°.

द्वेषं परित्यज्य परस्परेण परस्परं[1] चाप्रतिबाधनेन।
अन्योन्यमुत्कर्षितया च मित्राणीवात्र विद्याश्च गुणाश्च तस्थुः॥२॥

२. मिथो विरुद्धा अपि धर्मशास्त्रकामशास्त्रादिविद्या दानाविकत्थनत्वादयो गुणाश्च मित्राणीवात्र कुमारे तस्थुः । कथमित्याह । परस्परेण सह द्वेषमेकत्रानवस्थानरूपं विरोधं परित्यज्य । तथा परस्परं परस्परेण कृत्वा परस्परार्थं वा परस्परस्मात्सकाशात्परस्परं[1]माश्रित्य वा परस्य कर्मणो वा परस्परस्मिन्वा प्रतिबाधनेनोचिते स्वस्वकाले द्वयानामप्यासेव्यमानत्वादपीडनेन । तथान्योन्यं यथार्थसंबन्धम् । सर्वविभक्त्यर्थः पूर्ववद्भावनीयः । एवमग्रेपि । उत्कर्षितया च मिथो विशेषकत्वेन[2] च हेतुना । तथाहि । धर्मशास्त्रविद्यानुसारेण धर्मप्रवृत्तिर्भोगफलत्वेन विशिष्टकामहेतुरिति कार्यद्वारेण धर्मशास्त्रविद्यो[3] कामशास्त्रविद्योत्कर्षिणी । कामशास्त्रविद्यानुसारेण च कामप्रवृत्तिः संततिवृद्धिफलत्वाद्धर्मवृद्धिहेतुरिति कार्यद्वारेण कामशास्त्रविद्यापि धर्मशास्त्रविद्योत्कर्षिणी । तथा दानेनाश्लाघा विशिष्यतेश्लाघया तु त्याग इति । मित्राण्यपि मिथो द्वेषं त्यजन्ति मिथः कलहादिना न बाधन्ते च मिथो गुणोत्कीर्तनादिनोत्कर्षयन्ति च ॥

शक्तिक्षमे यौवनसंयमित्वे युते न दृष्टे इतरेतरां हि ।
तथापि ते तादृशनीतिभाज्यन्योन्यां[2] चिरं चक्रतुरत्र योगम् ॥३॥

३. यद्यपि शक्तिक्षमे यौवनसंयमित्वे तारुण्येन्द्रियजयौ च हि स्फुटमितरेतरामन्योन्यं युते संबद्धे मिथो विरुद्धत्वान्न दृष्टे । यद्वा ।

१ सी °रं चाप्र°. २ ए सी °तिराज्य°.

१ ए सी डी °रस्य. २ ए सी डी °षत्वे°. ३ डी °विद्यो का°. ४ बी °द्यापि का°. ५ ए सी °यजियौ.

इतरेतरस्माद्युतेन पार्थक्येन दृष्टे तथापि ते शक्तिक्षमे यौवनसंयमित्वे चात्र कुमारेन्यो[1]न्यां चिरं योगं संबन्धं चक्रतुः । यतस्तादृशनीतिभाज्यनन्यसदृशन्यायनिष्ठे शक्तिक्षमाद्यनुरूपाचरिते[2] वा । यो हि तादृशनीतिभागपूर्वन्यायनिष्ठो विरुद्धभृत्यानुरूपाचरणभाग्वा स्वामी स्यात्तत्र मिथो विरुद्धोपि भृत्यजनः स्वाम्यावर्जनाविशेषेण विरोधं विहायान्योन्यं चिरं योगं करोति ॥

संकेतयोगादितरेतरं नु[1] कलाश्च शास्त्राणि च धीगुणाश्च ।
चक्रुर्विशेषानितरेतरस्यान्योन्यस्य भूषां च वितेनिरेस्मिन् ॥ ४ ॥

४. इतरेतरं संकेतयोगान्नु संकेतो वयमत्र कुमारेन्योन्यं विशे[3]षान्भू[4]षां च विधास्याम इति मिथो[5]भ्युपगमस्तल्लक्षणो यो योगः संबन्धस्तस्मादिवास्मिन्कुमारे कलाश्च धनुःकलाद्याश्च शास्त्राणि च धनुर्वेदादीनि च धीगुणाश्च शुश्रूषाद्या अष्टौ बुद्धिगुणाश्चेतरेतरस्य विशेषान् गुणोत्कर्षाश्चक्रुराधारस्यास्य विशि[6]ष्टत्वात्कलादयोन्योन्यं विशेषितवन्त इत्यर्थः । अत एवान्योन्यस्य भूषां च शोभां च वितेनिरे । कृतसंकेता हि संकेतिते स्थाने मिलिताः संकेतितमर्थं कुर्वन्ति ॥

धाक्रमला च तेजःसौम्ये च परस्परां मिषती । शक्तिक्षमे यौवनसंयमित्वे अन्योन्यां योगं चक्रतुः । शक्तिक्षमे यौवनसंयमित्वे इतरेतरां युते । अत्र "परस्पर°" [१] इत्यादिनापुंसि स्यादेरामादेशो वा ॥

परस्परमप्रतिबाधनेन मित्रैरिव विद्याभिः । अन्योन्यमुत्कर्षितया मित्रैरिव

---

१ सी नु काला°.

---

१ डी °न्योर्न्यं चि°. २ डी °ते च । यो. ३ सी °षा भूषांश्च वि°. ४ प °न्भूषांश्च वि°. डी °न्भूषाश्च वि°. ५ प सी °थोत्युप°. ६ सी °शिषत्वा°. ७ बी °धादिभिः.

विद्याभिः । इतरेतरं संकेतयोगात्कलाभिः शास्त्रैः । इत्यत्र "परस्पर°" [१] इत्यादिनापुंस्त्वमादेशो वा ॥

परस्परमप्रतिबाधनेन गुणैः । अन्योन्यमुत्कर्षितया गुणैः । इतरेतरं संकेतयोगाद्वीगुणैः । इत्यत्र "परस्पर°" [१] इत्यादिना पुंसि स्यादेरम्वा ॥ पक्षे । द्वेषं परस्परेण । अन्योन्यस्य भूषाम् । इतरेतरस्य विशेषान् ॥ शेषविभक्त्यन्तानि विकल्पोदाहरणानि ज्ञेयानि । एवं च स्त्रीनपुंसकयोरमामौ द्वावादेशौ वा भवतः॥

यत्सेवमानः स्पृहयंश्च भक्तस्तथोपवृद्धं विरमन्नुपाक्षात् ।
असावधिस्त्र्यव्यसनी तदस्योपप्राच्यसंस्कारमलं निमित्तम् ॥ ५ ॥

५. यदिति क्रियाविशेषणम् । यदसौ कुमारोभूत् । कीदृक् । उपवृद्धं वृद्धा ज्ञानादिवृद्धास्तेषां समीपाय स्पृहयंश्च ज्ञानाद्यर्थमभिलषन्वृद्धानां समीपस्य भक्तस्तथा बहुमानवांश्चात एव वृद्धानां समीपमासेवमानोत एव चोपाक्षात् । अक्षशब्देनात्र पाशकोपलक्षितं द्यूतमुच्यते । तत्समीपाद्विरमन् द्यूतव्यसनान्निवृत्त इत्यर्थः । यद्वा । विषयविषयिणोरभेदोपचारादक्षशब्देनेन्द्रियविषयाः शब्दरूपरसगन्धस्पर्शा उच्यन्ते । तत्समीपाद्विरमन् जितेन्द्रियः इत्यर्थः । अत एव चाधिस्त्रि स्त्रीष्वव्यसन्यत्यासक्तिरहितः । तज्ज्ञायतेस्य कुमारस्योपप्राच्यसंस्कारं प्राच्याः पूर्वजन्मभवा ये संस्कारा वृद्धसेवादिनिरन्तराभ्यासजनिता वासनास्तेषामनन्तरपूर्वभवापेक्षया सामीप्यं कर्तृ अलं समर्थं निमित्तं कारणम् । यदयं स्वभावेनैव गुरुसेवापरायणत्वादिगुणोपेतस्तत्रानन्तरपूर्वभवाभ्यास एव हेतुरित्यर्थः ॥

---

१ सी °शोद्या । प°. २ ए °तयोः गा°. ३ बी °न्यभू°. ४ ए °नि वक°. ५ बी °वंस्त्री°. ६ सी °तं भव°. ७ बी °धऽत ए°. ८ ए सी °सनी सत्ता°. ९ °स्कारां वृ°.

प्रियोपवृद्धः स निशम्य पार्थवृत्तान्युपव्यासमुपेशगेहे ।
किमूपतूणेन किमूपचापं गुरो रणाज्ञां हि विनेति दध्यौ ॥ ६ ॥

६. स कुमारः प्रियमुपवृद्धं ज्ञानवृद्धादिसमीपं यस्य स तथा सन्नुपेशगेहे रुद्रप्रासादसमीपे कथामण्डपादावुपव्यासं व्याससमीपे पार्थवृत्तानि शत्रुजयादिविषयाण्यर्जुनचरितानि निशम्याकर्ण्य दध्यावचिन्तयत् । किमित्याह । गुरोः पितू रणाज्ञां युद्धविषयादेशं विना हि स्फुटमुपतूणेन निषङ्गयोः सामीप्येन किमु तथोपचापं धनुःसामीप्येन च किमु । यावत्पितू रणाज्ञा न स्यात्तावन्निरर्थकत्वाद्धनुर्विद्याभ्याससूचकेन रणार्थं पार्श्वस्थेन तूणद्वयेन चापेन च मम न किंचिदिति पूर्वमहापुरुषावदातांकर्णनोद्भूतातिरिक्तरणोत्साहादचिन्तयदित्यर्थः ॥

उपप्राध्यसंस्कारम् । उपवृद्धं सेवमानः । उपवृद्धं स्पृहयन् । उपवृद्धं भक्तः । इत्यत्र "अम्" [२] इत्यादिना स्यादेरम् ॥ अव्ययीभावस्येति किम् । पार्थवृत्तानि ॥ तत्संबन्धिनः स्यादेरिति किम् । प्रियोपवृद्धः ॥ अत इति किम् । अधिस्त्रि ॥ अपञ्चम्या इति किम् । उपाक्षात् ॥

किमूपचापम् किमूपतूणेन । इत्यत्र "वा तृतीयायाः"[३] इति वाम् ॥

उपव्यासम् उपेशगेहे । अत्र "सप्तम्या वा" [४] इति वाम् ॥

सुगूर्जरं हेतुरनेकभारद्वाजं वरो गीतगुणस्त्रिगङ्गम् ।
स्थितोधिसङ्गत्त्युपगूर्जरेन्द्रे स्वरीशितुः पुत्र इवैष रेजे ॥ ७ ॥

७. एष कुमारः स्वः स्वर्गस्येशितुः स्वामिनः शक्रस्य पुत्र इव

---

१ प सी निसम्य. २ सी °चाप गु°. ३ प सी सगू ।

---

१ प सी °ङ्गयो सा°. २ प सी ज्ञानं स्या°. ३ सी °णार्थं पा°. ४ सी किम् । .... पार्थ°. ५ सी °दानाक°. ६ प सी °रन् ॥ अ°. ७ प सी सी स्वः सर्ग°.

जयन्त इव रेजे । यतः कीदृक् । सुगूर्जरं गूर्जराणां गूर्जरदेशोद्भवनृणां शोभनायामृद्धौ न्यायपालकत्वाद्धेतुः । तथानेकभारद्वाजं भरद्वाजस्यर्षे-रिमेपत्यत्वेन भारद्वाजा अनेकोविद्यमान एको येष्विति कृत्वानेका वा भारद्वाजा वंश्या अर्थात्स्वस्य । भारद्वाजा हि चौलुक्यानामाद्याः प्रवर्तयितारो धर्मगुरवश्चेति श्रुतिः । तेषु धर्मगुरुषु विषये वरो धार्मिक-त्वाद्भक्तिपूजादिकरणेन श्रेष्ठः । तथोपगूर्जरेन्द्रे मूलराजसमीपेधिसद्भक्ति प्रधानभक्तौ विनीतत्वात्स्थितोत एव त्रिगङ्गं तिस्रो भूर्भुवःस्वस्त्रयस्था गङ्गाः समाहृतास्तत्र । लोकत्रयेपीत्यर्थः । गीतगुणः । जयन्तोप्यनेक-भारद्वाजं वर इन्द्रसमीपेधिसद्भक्ति स्थितोत एव त्रिगङ्गं गीतगुणश्च ॥

ऋद्ध । सुगूर्जरम् ॥ नदी । त्रिगङ्गम् ॥ वंश्य । अनेकभारद्वाजम् । इत्यत्र "ऋद्ध°" [५] इत्यादिना सप्तम्या अम् ॥

अधिसद्भक्ति । इत्यत्र "अनतो लुप्" [६] इति स्यादेर्लुप् ॥ अनत इति किम् । उपगूर्जरेन्द्रे ।

स्वः । इव । अत्र "अव्ययस्य" [७] इति स्यादेर्लुप् ॥

यशस्यति क्ष्मानयसूत्रधारे सदा परस्त्रैणमनङ्गरूपे ।
यत्प्राक्श्रियंमन्यमिहाश्रिमन्यं स्त्रींमन्यतामप्यभितोमुचत्तत् ॥ ८ ॥

८. यत्परस्त्रैणमन्येषां स्त्रीसमूहः प्राक्पूर्वं सौभाग्यादिगुणश्रीगर्वेण सदा श्रियंमन्यं हरिप्रियातुल्यमात्मानं मन्यमानमासीत्तदिह कुमारे सत्यश्रियं-मन्यं लक्ष्मीतुल्यमात्मानममन्यमानं सत्स्त्रींमन्यतामप्यास्तामश्रियंमन्यतां

---

१ प सी °त्प्राक्श्रियं°.

१ प सी °गुरव°. २ प सी डी °रुष वि°. ३ सी °कवये°. ४ प सी °न्न इ°. ५ सी °श्रियम°.

[1]नारिंमन्यतामप्यभितः सा[2]मेस्त्येनामुचत् । यतः किंभूते । अनङ्गरूपेपि । अपिरत्र ज्ञेयः । एतेन स्त्रीप्रार्थनी[3]यत्वो[4]क्तिः । परम् । [5]यशस्यति [6]परनारीसहोदरोयमित्यादियशोभिलाषिणि । अत एव क्ष्मायाः पृथ्वीस्थलोकस्यापि नये परस्त्रीसेवननिवृत्त्यादिन्यायविषये सूत्र[7]धारे सूत्रधारवत्प्रवर्तके । लोकस्यापि नये प्रवर्तकत्वात्स्वयमत्यन्तं न्यायनिष्ठ इत्यर्थः । यदासौ रूपप्रकर्षेण स्त्रीप्रार्थनीयोपि यशोर्थित्वेनातिसदाचारत्वाद्रूपसौभाग्या[8]दिनिधीनामपि साभिलाषाणामपि परस्त्रीणां संमुखमपि नालोकत तदा ता आत्मानं रूपादिगुणहीनं सामान्यस्त्रि[9]योपि [10]निकृष्टं च मेनिर इत्यर्थः ॥

अनङ्गरूपे । क्ष्मानयसूत्रधारे । यशस्यति । सूत्रधारे । स्त्रैणम् । इत्यत्र अनङ्ग अस् । रूप स् ॥ क्ष्मा अस् । नय ङ् । सूत्रधा[11]रे स् ॥ यशस् अम् य ॥ सूत्र अम् धार ॥ स्त्री आम् नञ् ॥ इति स्थिते[12] "ऐकार्थ्ये" [८] इति[13] स्यादेर्लु[14]प् ॥ ऐकार्थ्य इति निमित्तसप्तमीविज्ञानादैकार्थ्योत्तरकालस्य न स्यात् । अनङ्गरूपे ॥

स्त्रीं[15]मन्यताम् । श्रियंमन्यम् । अत्र "न नामि°" [९] इत्यादिनामो न लुप् ॥ अन्ये त्वाहुर्यथा प्रेष्ठाद[16]यः शब्दा धवयोगास्त्रियां वर्तमा[17]नाः स्वं लिङ्गं विहाय स्त्रीलिङ्गमुपाददते त[18]था श्रीशब्दः स्त्रैणे वर्तमानः स्वलिङ्गत्यागेन वर्तते । ततो नपुंसकलक्षणं ह्रस्वत्वममो लुप्च स्यात् । श्रिमन्यम् ॥

---

१ ए सी नारिम°. २ बी °मस्तेना°. ३ बी °नीयोक्तिः ।. ४ ए सी °त्वोक्ति । प°. ५ ए सी यसस्य°. ६ बी परं ना°. ७ ए सी डी °धार°. ८ ए सी °दिधी°. ९ डी °पि कनिष्ठं च. १० ए सी निष्टं. ११ ए सी °र यस् ।. १२ ए सी °ते "एकार्थे" इ. १३ बी °ति सपदे°. १४ ए सी °प् । ऐक्यार्थे इति स्यादेर्लुप् । ऐ°. १५ सी °न्यता । श्रि°. १६ ए सी डी °दयः श°. १७ ए सी °नाः स्वेलि. डी °नाः स्वलि°. १८ बी °था स्त्रीश°.

स आह्मणाच्छंसिजनेन्तिकादागते हिमाद्रेस्तपसाकृतोर्जे[1] ।
त्यक्तान्यकर्मा सहसाकृतोत्थोम्भसाकृतार्घोभिमतान्यदत्त ॥९॥

९. आह्मणाच्छंसिजने[1] ऋत्विग्विशेषलोकविषये स[2] कुमारोभिमतानि धनादीन्यदत्त। तदिच्छानुसारेणादादित्यर्थः । यतस्तपसा कृतास्तपश्चरणेन विहिता ऊर्जो व्योमगमनादयः शक्तयो यस्य तस्मिंस्तथा हिमाद्रेरन्तिकादागते[3] । औदार्योत्थकीर्तिश्रवणाद्दूरदेशान्तरेभ्योपि चामुण्डराजसमीपमायति इत्यर्थः । कीदृक्सन् । सहसाकृतोत्थः संभ्रमेण झटिति विहिताभ्युत्थानः । तथा त्यक्तान्यकर्मा मुक्तव्यापारान्तरः । तथाम्भसाकृतार्घो जलेन विहितपादशौचाद्युपचारः ॥

नै तेन किं चित्तमसाकृतं वौजसाकृतं वा विकृतं प्रजायाम् ।
पुंसानुजायां नु यदञ्जसाचो दोषावलोके जनुषान्धभावः॥१०॥

१०. तेन कुमारेण प्रजायां लोकविषये पुंसानुजायां नु पुंसा करणेन पश्चाज्जातायामिव लघुभगिन्यामिवेत्यर्थः । किंचित्स्तोकमपि विकृतं विकारो न वा तमसाकृतमज्ञानेन कोपेन वा कृतं न वौजसाकृतं बलात्कारेण कृतम् । यद्यस्मात्तेन प्रजायां विषये पुंसानुजायामिव दोषावलोके जनुषान्धभाव आजन्मान्धत्वमञ्जसाक्तः स्नेहेनाङ्गीकृतः । अथ च या प्रजापत्यं तस्यां स्नेहाद्दोषावलोकनाभावेन न केनचित्किंचिद्विकृतं तमसा वौजसा वा क्रियत इत्युक्तिः ॥

अन्तिकादागते । अत्र "असत्त्वे ङसेः" [१०] इति ङसेर्न लुप् ॥

---

१ ए सी °तोजे ।. २ सी न केचि°.

---

१ ए सी °ने ऋत्वि°. २ सी स सकु°. ३ सी °दाते ।. ४ सी °यान्त इ°.
५ ए सी डी जनेन. ६ सी °कृता अ°. ७ सी °त्युक्ति ॥. ८ बी °से न लु°.

ब्राह्मणाच्छंसि । इति "ब्राह्मणाच्छंसी" [११] इत्यनेन निपात्यम् ॥

ओजसाकृतम् । अञ्जसात्तः । सहसाकृत । अम्भसाकृत । तेमसाकृतम् । तपसाकृत । इत्यत्र "ओजः०" [१२] इत्यादिना टो न लुप् ॥

पुंसानुजायाम् । जनुषान्ध । इत्यत्र "पुंजनुष०" [१३] इत्यादिना टो न लुप् ॥

स मानसाज्ञायिक आत्मनाज्ञाय्यासात्मनाविंश इवाङ्गभाभिः ।
प्रसन्नयापन्मनसाद्यदेव्यात्मनेपदं पुंस्विह ङिन्नु धातुः ॥ ११ ॥

११. स कुमारः प्रसन्नया संतुष्टया मनसेत्याद्यं यस्याः सा या देवी तया मनसादेव्या सरस्वत्या कृत्वेह जगति पुंस्सु(सु ?) मध्य आत्मन आत्मीर्थे पदं बुद्ध्यादिगुणोन्नतिरूपां पदवीमापत्प्राप । प्रतिभादिगुणैः सर्वनरेषूत्कृष्टोभूदित्यर्थः । शब्दश्लेषोपमामाह । ङिन्नु धातुर्यथा कानुबन्धो धातुर्गाकादिरात्मनेपदं सर्वविभक्तीनां पराणि नव नव वचनानि कानानशौ चाप्नोति । अत एव सोङ्गभाभिः सर्वशास्त्रपरिज्ञानप्रकर्षोद्भूताङ्गतेजोभिः कृत्वात्मनाविंश इव स्वेन कृत्वा विंशतेः पूरण इव विंशतिगुण इवेत्यर्थः । आस बभूव । कीदृक्सन् । मनसा ज्ञातुं शीलमस्य मनसाज्ञायी विद्वांस्तेन संस्कृतः सर्वविद्याध्यापनेन कृतसंस्कारः । यद्वा । मनसाज्ञायिभिर्जयति दीव्यति चरति वा इकणि मानसाज्ञायिकोत एव चात्मना ज्ञातुं शीलमस्यात्मनाज्ञायी विषमशास्त्राद्यपि स्वयं सामस्त्येन जानन् । धातूनामनेकार्थत्वात्सत्तावृत्तेरसतेरासेत्ययं प्रयोग ईक्षामासेत्यादौ णवन्तानुप्रयोगप्रतिरूपकनिपातस्य वा ॥

१ बी °च्छंसी". २ सी डी °कृतम् । अ°. ३ डी °तप°. ४ सी °नुष्यन्ध ।. ५ सी °त्मार्थंप°. ६ बी °वच°. ७ ए सी °व साङ्ग°. ८ बी °श इव स्वेन कृत्वा विंश इ°. ९ सी °न च कृ°. १० ए सी °त्यामनो ज्ञा°. ११ सी °त्तरा°. १२ ए सी ईक्षांमा°. १३ ए सी °पकानि°. १४ ए सी डी °स्य च ॥.

धातुर्नु शेषः स सहः परस्मैपदाय राज्ञातियुधिष्ठिरेण ।
अज्ञाय्यरण्येतिलवत्तदन्यस्त्वक्सारवच्चान्तरसार एव ॥ १२ ॥

१२. अतियुधिष्ठिरेण सत्यभाषित्वादिगुणैर्युधिष्ठिरमतिक्रान्तेन राज्ञा मूलराजेन स कुमारः परस्मायन्यस्मै शत्रुसंबन्धिने[1] पदाय राज्यरूपाय स्थानाय सहः समर्थोज्ञायि । पूर्वोक्तसर्वनृपगुणोपेतत्वाच्छत्रुलक्ष्मीग्रह[2]णसमर्थो ज्ञात इत्यर्थः । यथा शेष आत्मनेपदोपयुक्तादन्यो भूवादिर्धातुः परस्मैपदाय सर्वविभक्त्याद्यवचननवकशतृकसुप्रत्ययेभ्यः सहो ज्ञायते । तदन्यश्चामुण्डराजादपरस्त्वरण्येतिलवदरण्येतिलाख्यवनधान्यभेदवत्त्वक्सारवच्च वंशवच्चान्तर्मध्येसार एवाज्ञायि ॥

स कीर्तिमुक्तात्वचिसारकः[1] स्तूपेशाणदै[2]र्दार्षदिमाषिकैश्च ।
स गीयते यूथपशुप्रदैश्च स्तम्बेरमौजाः खचराधिपश्रीः ॥ १३ ॥

१३. स कुमारः । स्तूपो गवादिराशिः । शाणः स्वर्णमाषचतुष्टयम् । स्तूपे स्तूपे शाणो देयः । वृत्तौ वीप्साया दानस्य चान्तर्भावः । स्तूपेशाणः करभेदस्तं ददति ये तैर्दार्षदिमाषिकैश्च । दृषदि दृषदि माषः पञ्चगुञ्जो देयो दृषदिमाषः करभेदस्तत्र नियुक्तैश्च । यूथं तिरश्चां जातम् । यूथे यूथे पशुर्देयो यूथपशुः करभेदस्तं प्रददति ये तैश्च करपीडाद्यभावेन हर्षाद्गीयते स्म । कीदृशः । स्तम्बेरमौजा गजबलः । तथा खचराधिपश्रीरिन्द्रतुल्यलक्ष्मीकः । तथा कीर्तिमुक्तात्वचिसारको यशोमुक्ताफलेष्वज्ञातवंशतुल्यः । वंशो हि मुक्तायोनिर्वर्ण्यते । यदुक्तम् ।

हस्तिमस्तकदन्तौ तु दंष्ट्रा शुनवराहयोः ।
मेघो भुजङ्गमो वेणुर्मत्स्यो मौक्तिकयोनयः । इति ॥

---

१ ए बी सी °रकस्तू°. २ ए सी °दैदार्ष°.

---

१ ए सी डी °ने रा°. २ बी न्यो भुवादि°.

किं खेचरो गोषुचरो नु विष्णुः शल्योथवा मद्रचरो हृदिस्पृक् ।
सोतर्क्यताभस्मनिमीढकर्मा मध्येगुरूनन्तगुरूंश्च धिन्वन् ॥ १४ ॥

१४. स कुमारोतर्क्यत । कथमित्याह । किमसौ खेचरो विद्याधरो देवो वा । नु किं वा गोपालावस्थायां गोषु चरति गोषुचरो विष्णुरथवा मद्रेषु चरति मद्रचरो मद्रदेशस्वामी शल्य इति । यतः कीदृक् । हृदयं स्पृशति हृदिस्पृग्हृदयज्ञ इत्यर्थः । तथा मध्येगुरून् मध्ये मध्यवयसि वर्तमानान् गुरून् पूज्यानन्तगुरूंश्चान्त्यवयसि वर्तमानान् गुरूंश्च धिन्वन्विनयपूजादिना प्रीणयन् । तथा भस्मनि मीढं सेचनं भस्मनिमीढं तदिव कर्म क्रिया यस्य स भस्मनिमीढकर्मा न तथा सफलकर्मा । खेचरादयो हि हृदिस्पृक्त्वादिगुणान्विताः ॥

नृणामनन्तेगुरुरेकदाथ सिंहो नु सोमध्यगुरुः सभायाम् ।
नृपं प्रणम्योरसिलोमकण्ठेकालोपमं मूर्धशिखो न्यषीदत् ॥ १५ ॥

१५. अथैकदा सिंहो नु मृगेन्द्र इवामध्यगुरुः कृशोदरो नृणामनन्तेगुरुः प्रथमपूज्यो मूर्धनि शिखा शिखण्डिका यस्य स मूर्धशिखः कुमारः सभायां न्यषीदत् । किं कृत्वा । नृपं प्रणम्य । किंभूतम् । महापुरुषत्वादुरसि लोमानि यस्य स तथा यः कण्ठेकालोपम आश्रितानां सर्वकामपूरकत्वात्सोमनाथतुल्यस्तम् ॥

अत्रान्तरे मस्तकमाल्य ऊचे वेत्र्यर्थशौण्डोञ्जलिहस्तबन्धः ।
स्वशीर्षकामेण रथः सुचक्रेबन्धोद्य ते भैष्ययमङ्गभर्त्रा ॥ १६ ॥

---

१ ए सी °ष्णुः शिल्यो. २ बी °श्च धेन्व°. ३ ए सी °हो न सो°.

---

१ ए सी १४ कुमा°. २ बी °कर्माः खे°. ३ बी °स्पृक्त्वादि°. ४ बी °था सफ(?)°.

१६. अत्रान्तरेस्मिन्प्रस्तावे । वेत्री । नाट्ये तु

पताकाभ्यां तु हस्ताभ्यां संश्लेषादञ्जलिः स्मृतः ।

विनीतत्वात्तद्रूपो हस्ते बन्धो यस्य स तथा सन् । करौ योजयित्वेत्यर्थः । नृपमूचे । कीदृक् । भोगित्वान्मस्तके माल्यं पुष्पमाला यस्य सः । तथा सदा विज्ञापककार्यनिवेदने व्यापृतत्वादर्थे विज्ञापककार्ये प्रसक्तः शौण्ड इव मद्यप इवार्थोन्मद्यपानेर्थशौण्डः । यदूचे तदाह । राजन् स्वशीर्षे कामो यस्य तेन जीवितुमिच्छता सताङ्गभर्त्राङ्गदेशस्वामिनाद्यायं प्रत्यक्षं प्राभृतीकृतो रथस्ते त्वदर्थं प्रैषि । कीदृक् । शोभनश्चक्रे बन्धो रत्नखचितस्वर्णपट्टादिना रथाङ्गे बन्धनं यस्य सः । उपलक्षणत्वादशेषरथगुणोपेत इत्यर्थः ॥

त्वयेभबन्धो नृपतिः सहस्तेबन्धः कृतो यः कृतचक्रबन्धः ।
तस्यातिपूर्वाह्णतनांशुमन्पूर्वाह्णेतनाब्जाग्रकरो गजोयम् ॥ १७ ॥

१७. हे अतिपूर्वाह्णतनांशुमन्महाप्रतापितया पूर्वाह्णेभवं सूर्यमतिक्रान्त य इभबन्धो बध्नाति अचि बन्ध इभानां बन्धो बन्धको विन्ध्याद्रिस्वामी नृपतिर्बलिष्ठत्वात्कृतश्चक्रे त्वदीयसैन्ये बन्धो बन्धनं येन । यद्वा । कृतश्चक्रे सैन्ये बन्धो यस्य स तथा सन्सेह हस्ते बन्धेन सहस्तेबन्धस्त्वया कृतः । जित्वा हस्तयोर्बद्ध इत्यर्थः । तस्यायं प्रत्यक्षो गजस्त्वदर्थं प्राभृतमस्ति । कीदृक् । पूर्वाह्णेतनाब्जाग्रकरः प्रशस्यलक्षणत्वात्प्राभातिकपद्मवद्विकसितरक्तहस्ताग्रः । उपलक्षणत्वाच्छुभलक्षणोपेतसर्वाङ्गः ॥

---

१ बी संश्रेषा°. २ सी °र्थे...प्र°. ३ ए °कार्यप्र°. ४ बी °नेर्थे शौ°. ५ सी °यं प्रा°. ६ ए सी डी °दि र°. ७ ए सी हे इति°. ८ ए बी सी डी °तमांशु°. ९ सी °न्सह स्ते.

संध्यां नु पूर्वाह्णतरे नतो पूर्वाह्णेतरां योर्चति[1] पादुके ते ।
ज्योत्स्नाश्रियं पाण्डुपतेरमी पूर्वाह्णेतमां बिभ्रति तस्य हाराः ॥१८॥

१८. यः पूर्वाह्णतरे प्रभाते पूर्वाह्णेतरां प्रदोषे च यथा संध्यां प्रातःसंध्यां प्रदोषसंध्यां च नतः सन्नर्चत्येवं ते पादुके अर्चति तस्य पाण्डुपतेः पाण्डुदेशाधिपस्यामी प्रत्यक्षं प्राभृतीकृता हाराः पूर्वाह्णेतमां प्रभातेप्यतिकान्तिमत्त्वाज्ज्योत्स्नाश्रियं चन्द्रिकालक्ष्मीं बिभ्रति । एतेन चन्द्रादप्येषां कान्तिमत्तोक्ता । चन्द्रो हि प्रातर्न चन्द्रिकाश्रियं बिभर्ति ॥

रत्नानि पूर्वाह्णतमार्कभांसि स सिन्धुराट्[2] प्रेषितवानमूनि ।
पूर्वाह्णकालेत्ति न नाप्यपूर्वाह्णेकाल आत्ताकुलिकस्त्वया यः ॥१९॥

१९. हे राजन्स सिन्धुराडब्धिस्वामी राजामूनि प्रत्यक्षाणि रत्नानि प्राभृतं प्रेषितवान् । कीदृंशि । पूर्वाह्णतमे । प्राभातिक इत्यर्थः । योर्कस्तस्येवातिरक्ताः प्रवर्धमानाश्च भासो येषां तानि । यस्त्वयात्ताकुलिको वेलायत्तीकृतः सन्न पूर्वाह्णकाले दिनस्य प्रथमप्रहरद्वयेत्ति नाप्यपूर्वाह्णकाले दिनस्य पश्चिमप्रहरद्वयेत्ति । निशायां भुङ्क्त इत्यर्थः । वेलायत्तो हि स्वामिन्यदृष्टे निशायामेवात्तीति स्थितिः ॥

आत्मनाविंशः । इत्यत्र "आत्मनः पूरणे" [१४] इति टोलुप् ॥

मानसाज्ञायिकः । आत्मनाज्ञायी । इत्यत्र "मनसश्च" [१५] इत्यादिनालुप् ॥

मनसादेव्या । इत्यत्र "नाम्नि" [१६] इत्यलुप् ॥

---

१ सी °के ज्यो°. २ ए सी सिन्धरा°.

---

१ बी अर्चिति. २ ए बी सी डी हारा पू°. ३ ए सी डी °क्षानि र°. ४ बी °ममथमप्र°. ५ ए सी डी °येति नि°. ६ ए सी °त्तीयात्त°.

परस्मैपदाय । आत्मनेपदम् । अत्र "पर°" [१७] इत्यादिनालुप् ॥

अदन्त । अरण्येतिलकवत् ॥ व्यञ्जन । युधिष्ठिरेण[1] ॥ इत्यत्र "अद्व्यञ्जनात्°" [१८] इत्यादिना सप्तम्या न लुप् ॥ बहुलवचनात्कचिद्विकल्पः । त्वचिसार त्वक्सार ॥ नाङ्कीत्येव । अन्तरसारः ॥

अदन्त । स्तूपेशाण ॥ व्यञ्जन । दार्षदिमाषिकैः[2] ॥ अत्र "प्राक्कारस्य°" [१९] इत्यादिनालुप् ॥ प्रागिति किम् । यूथपशु । उदीच्यां देशे कारोयं न प्राच्याम् ॥

अदन्त । स्तम्बेरम ॥ व्यञ्जन । भस्मनिमीढ ॥ इत्यत्र "तत्पुरुषे कृति" [२०] इत्यलुप् ॥ बहुलाधिकारात्कचिदन्यतोपि । गोषुचरः ॥ कचिन्निषेधो न स्यात्[3] । मद्रचरः ॥ कचिद्विकल्पः । खेचरः खचरः[4] ॥ कचिदन्यदेव । हृदयं स्पृशति हृदिस्पृक् । द्वितीयार्थेत्र सप्तमी ॥

मध्येगुरून् । अनन्तेगुरुः । अत्र "मध्य°" [२१] इत्यादिनालुप् ॥ मध्यगुरुः । अन्तगुरून्[5] । इत्यप्यन्ये ॥

कण्ठेकाल[6] । उरसिलोम । इत्यत्र "अमूर्ध°" [२२] इत्यादिनालुप् ॥ अमूर्धमस्तकादिति किम् । मूर्धशिखः । मस्तकमाल्यः ॥ स्वाङ्गादिति किम् । अर्धशौण्डः[7] ॥ अकाम इति किम् । स्वशीर्षकामेण ॥

हस्तेबन्धः[8] हस्तबन्धः । चक्रेबन्धः चक्रबन्धः । अत्र "बन्धे घञि न वा" [२३] इत्यलुब्वा ॥ घञीति किम् । अजन्ते मा भूत् । हस्तबन्धः ॥

पूर्वाह्णेतन पूर्वाह्णतन । पूर्वाह्णेतराम् पूर्वाह्णतरे । पूर्वाह्णेतमाम् पूर्वाह्णतम । पूर्वाह्णेकाले पूर्वाह्णकाले[10] । अत्र "काकातन°" [२४] इत्यादिना वालुप् ॥

---

१ प सी °ष्ठिरण ।. २ सी °षिकेः । अ°. ३ प सी °त् । द्रमच°. ४ बी °चरः । क°. ५ प सी °गुरुः । नित्य°. ६ बी °ण्ठेकल ।. ७ प सी °शोडः । अ°. ८ प सी डी °न्धः । च°. ९ प सी डी °काक । अ°. १० बी °ले । "का°.

तोयेशयं तोयशयाग्र्यमीशान्तेवासिनं वा विनयान्तवासी ।
त्वां मन्यते[1] यो वनवासभर्ता स्वर्णं वनेवासकरोत्र तस्य ॥ २० ॥

२०. हे राजन् यो वनवासभर्ता वासयति अपि वासो वने वासो वनवासो देशभेदस्तस्य भर्ता विनयान्तवासी विनयेन प्रणामादिना शिष्य इव संस्त्वां मन्यते । कमिव तोयेशयं विष्णुमिवं[2] तोयशयाग्र्यं वासुदेवाग्रजं बलभद्रमिवे[3]शान्तेवासिनं वा परशुराममिव वा । तस्य राज्ञः संबन्ध्यत्र प्रत्यक्षदेशे स्वर्णं वनेवासकरो वनवासदेशस्योपभोगदण्डोस्ति । वनवासदेशे हि स्वर्णं बहु स्यात् ॥

अब्जान्यसायाह्नशयानि वर्षेजसेवयाप्तानि शरेजदेवात् ।
स वर्षजे दण्ड इमान्यदात्तेऽप्सुजाक्ष राजा शरजाचलस्य ॥ २१ ॥

२१. हे अप्सुजाक्ष कमललोचन स प्रसिद्धः शरजाचलस्य शरे जातः शरजः स्कन्दस्तस्य योचलो देवगिरिस्तस्य राजेमानि प्रत्यक्षं प्राभृतीकृतान्यब्जानि वर्षजे सांवत्सरिके दण्डे ते[5] तुभ्यमदात् । किंभूतानि । वर्षेजसेवया वर्षे जाता या सेवा तया शरेजदेवात्स्कन्दादाप्तान्यत एव न सायाह्ने प्रदोषे शेरते संकुचन्त्यसायाह्नशयानि निश्यपि विकस्वराणि ॥

सरोजवासावरजो महाकालिकावरेजश्च स पद्मरागान् ।
प्रैषीद्वनं सारसिजं नु कोल्लापुरेश्वरस्तेरिमनोजशंभोः ॥ २२ ॥

२२. सरोजे वासो यस्याः सा सरोजवासा लक्ष्मीस्तस्या वरः प्र-

---

१ प सी °ते यौ व°. २ प °मान्नदा°. सी °मादान्नदा°.

---

१ सी °न्यसे । क°. २ डी °व वा तो°. ३ बी °मिवे°. ४ डी °स...दे°. ५ सी °रेजादे°. ६ प सी °कस्करा°.

सादस्तत्र जातो महाकालिकावरेजश्च गौरीप्रसादे जातश्च स प्रसिद्धः कोल्लापुरेश्वरः कोल्लापुराख्यमहापुराधिपः पद्मरागाँल्लोहितकमणीन्प्रैषीत् । कीदृशान् । सारसिजं वनं नु रक्तत्वादिगुणै रक्तोत्पलसत्कवनतुल्यान् । कोल्लापुरे ह्यतिश्रेष्ठाः पद्मरागाः स्युः । यतः किंभूतस्य ते । अरय एव मनोजः कामस्तत्र शंभोर्विनाशकस्येत्यर्थः । शंभोर्हि पूजार्थं शंभुर्भक्तः सारसिजं वनमिव पद्मरागान्प्रेषयति ॥

अस्त्रं नवं मानसिजं वरैणक्षरेजपङ्कं क्षरजाग्नितेजः ।
इन्द्राण्युरोजोचितमद्रिजोरसिजोचितं ढौकयति स्म कीरः ॥ २३ ॥

२३. क्षरो मेघो जलं वा तत्र जातो योग्निर्विद्युद्वडवानलो वा तद्वत्तेजो यस्य हे क्षरजाग्नितेजो वराः सुजात्या य एणास्तेषां यः क्षरो मूत्रं तत्र जातो यः पङ्कस्तं जात्यकस्तूरिकामित्यर्थः । कीरः कश्मीराधिपो ढौकयति स्म त्वदर्थं प्रेषितवान् । कीदृशम् । नवमप्रेतनाँ[3]स्त्रेभ्यः पुष्पेभ्यो[4] गन्धोत्कृष्टत्वेनात्यन्तं कामिनां वशीकारकत्वाद[5]भिनवं मानसिजं कान्दर्पमस्त्रं शस्त्रमिव । अत एवेन्द्राण्युरोजोचितमद्रिजोरसिजोचितं च[6] । शचीगौरीस्तनयोर्मण्डनाय योग्यम् । कश्मीरेषु हि मृगविशेषमूत्रात्प्रकृष्टकस्तूरिका स्यात् ॥

तोयेशयम् तोयशयं । अन्तेवासिनम् अन्तवासी । वनेवास वनवास । इत्यत्र "शय°" [२५] इत्यादिना वा सप्तम्यलुप् ॥ अकालादिति किम् । सायाह्नशयानि ॥

वर्षेज वर्षज । क्षरेज क्षरज । वरेजः वरजः । अप्सुज अब्जानि । सारसिजम् सरोज । शरेज शरज । उरसिज उरोज । मानसिजम् मनोज । इत्यत्र "वर्ष°" [२६] इत्यादिना वालुप् ॥

---

१ बी डी °रागाल्लो°. २ ए सी °भक्त सा°. ३ ए सी °नाख्येभ्यः. ४ बी पुष्फेभ्यो°. ५ ए सी °रत्वा°. ६ ए बी सी च । सची°. ७ सी डी °शयः । अ°. ८ सी सम्य°. ९ बी °रजः । व° १० बी °नाल्ल°.

वर्षासुजं तद्दिविजेशधन्व रत्नैर्दधत्प्रावृषिजो नु मेघः ।
नीलं कुरोश्छत्रमिदं[1] निरस्यत्कालेजमप्यातपशारदिज्यम् ॥ २४ ॥

२४. इदं प्रत्यक्षं कुरोः कुरुदेशराजस्यच्छत्रं वर्तते । कीदृशम् । प्रावृषिजो मेघो नु यथा वार्षिको घनो वर्षासुजमिन्द्रधनुर्दधत्स्यादेवं वर्षासुजं वर्षाकालजातं तत्पञ्चवर्णत्वेन प्रसिद्धं दिविजेशधन्व दिविजानां देवानामीशः शक्रस्तस्य चापमिव रत्नैश्छत्रानुलोम्याद्वक्राकारेणानुस्यूतैः पञ्चवर्णमणिभिः कृत्वा दधत्तथा नीलं हरितवर्णं तथा कालेजं शरत्काले जात[1]मातपशारदिज्यमपि शरदि जातः शरदिजस्तस्य कर्म शारदिज्यमातपस्य यच्छारदिज्यं संतापकत्वं तदप्यत्युग्रं शरत्कालातपमपीत्यर्थः । निरस्यत् सान्द्र[2]च्छायाकारित्वात् ॥

दिविज[3] । प्रावृषिजः । वर्षासुजम्[4] । शारदिज्यम् । कालेजम् । अत्र "घुप्रावृड्°" [२७] इत्यादिना सप्तम्यलुप् ॥

अप्सव्यदिव्याश्वसमास्तुरङ्गास्तेजस्य नावो नु रयेऽप्सुचर्यः ।
एतेऽप्सुयोनिच्छवयो जनो यैः पिपासितोऽप्यप्सुमतिर्न हि स्यात् ॥ २५ ॥

२५. यैः कृत्वा जनः पिपासितोऽप्यप्सु जलेषु मतिर्मनो[5] यस्य सोऽप्सुमतिर्न हि स्याद्रूपकान्त्यादिलक्ष्म्याक्षिप्तचित्तत्वाद्यान्पश्यँल्लोकस्तृषमपि न जानातीत्यर्थः । त एते प्रत्यक्षास्तेजस्य तेजदेशराजस्य तुरङ्गाः । किंभूताः[6] । अप्सुयोनिच्छवयो विद्युद्दीप्तयस्तथा रये वेगविषयेऽप्सुचर्यो नावो नु जलचारि[7]वेडातुल्या अत एवाप्सव्यो[8]-

१ ए सी °रोच्छत्र°.

१ ए सी जात श°. २ ए सी °द्रच्छाया°. ३ ए सी °विजः । व°. डी °विजः । प्रा°. ४ ए सी °म् । अ°. ५ ए सी डी °तिर्नमो य°. ६ ए सी °भूत अ°. ७ बी °रिवेडा°. ८ बी °वाप्साव्यो°.

ब्धेर्जातत्वेनाप्सु जलेषु भवो दिव्यः स्वर्गस्थत्वाद्दिवि स्वर्गे भवश्च योश्व उच्चैःश्रवास्तत्समाः ॥

अप्सव्य । अप्सुयोनि । अप्सुमतिः । अप्सुचर्यः । इत्यत्र "अपो य°" [२८] इत्यादिना सप्तम्यलुप् ॥

काम्पील्यसिद्धः खधुनीतटस्थोध्ववर्ति चौरस्यकुलं दधानान् ।
त्वदाज्ञयोच्छिद्य खसान्स दास्याःपुत्रानमूं तच्छ्रियमार्पयत्ते ॥२६॥

२६. स प्रसिद्धः काम्पील्यसिद्धः काम्पील्यं पञ्चालदेशस्थं पुरं तत्राधिपत्वात्सिद्धो विख्यातः पञ्चालराजः खधुनीतटस्थः खसजयार्थं काम्पील्यपुरपरिसरवर्तिगङ्गातटे कृतावासः सन्खसान्क्षत्रियभेदांस्त्वदाज्ञयोच्छिद्योत्पाट्यामूं प्रत्यक्षां तच्छ्रियं खसर्द्धिं ते तुभ्यमार्पयत् । किंभूतान्खसान् । अध्ववर्ति पान्थलुण्टनाय मार्गसमीपस्थं चौरस्यकुलं निन्दितचौरवर्गं दधानांस्तथा दास्याःपुत्रान्दासीपुत्रत्वेन निन्द्यान् ॥

शैलोन्नतः प्रेषित एष दासीपुत्रद्विपो द्वारपलाटभर्त्रा ।
हृत्पाश्यतोहर्यधरोतिवाचोयुक्तिर्दिशोदण्डपदे महेभः ॥ २७ ॥

२७. दासीपुत्रान्तोकिंचित्करत्वाद्दासपुत्रवदाचरन्तो रिपवो यस्य हे दासीपुत्रद्विपो एष प्रत्यक्षं प्राभृतीकृतो महेभो द्वारपलाटभर्त्रा द्वारपाख्येन लाटदेशाधिपेन दिशोदण्डपदे दक्षिणाशाभुक्तिपदे प्रेषितः । कीदृक् । शैलोन्नतोत एव पश्यन्तमनादृत्य हरति लिहाद्यचि [५.१.५०.] पश्यतोहरो यः पश्यतो हरेदर्थं तस्य भावः पाश्यतोहर्यं हृदां जनचित्तानां पाश्य-

१ ए सी °त्रद्विपो.

१ ए सी डी °म्पील्यं. २ ए सी डी °र्थं...ग°. ३ ए सी °त्यक्ष्यां त°. ४ ए सी °सर्द्धिं ते. ५ बी °न्नतोकिं°. ६ सी °त्रद्विपो. ७ ए सी °वः पश्य°.

तोहर्यं धरति यः सः । अत्यौन्नत्यगुणेन पश्यत एव लोकस्य चित्तानि हरन्नित्यर्थः । अत एवातिवाचोयुक्तिर्वाचोयुक्तिमतिक्रान्तो वर्णयितुमशक्य इत्यर्थः ॥ अथ चैष शैलोन्नतो महेभः कुलक्षणत्वादमहायानुत्सवाया-माङ्गलिक्यायेभोमहेभः प्रेषितः । कीदृक् । कुलक्षणत्वेन सर्वस्वविना-शकत्वाद्धृदः स्वामिचित्तस्य शून्यत्वापादनेन पाश्यतोहर्यधरोत एवाति-वाचोयुक्तिरवर्णनीय इत्यर्थः । अयमप्यर्थो गजलक्षणज्ञत्वाद्वेत्रिणा श्लेषोक्त्योक्तः ॥

अध्ववर्ति । काम्पील्यसिद्धः । तटस्थः । अत्र "नेन्°" [२९] इत्यादिना सप्तम्या [न?] लुन्निषेधः ॥

चौरस्यकुलम् । अत्र "षष्ठ्याः क्षेपे" [३०] इति षष्ठ्यलुप् ॥ क्षेप इति किम् । त्वदाज्ञया ॥

दास्याःपुत्रान् दासीपुत्रत् । इत्यत्र "पुत्रे वा" [३१] इति वा षष्ठ्यलुप् ॥

पाश्यतोहर्यं । वाचोयुक्तिः । दिशोदण्ड । अत्र "पश्यद्°" [३२] इत्यादिना षष्ठ्यलुप् ॥

तदेवाह ।

दिशन्दशाथ द्विरदं तमामुष्यपुत्रिकां भूमिपतिर्बुभुत्सुः ।
कुमारमालोकत सोपि नत्वामुष्यायणः प्राञ्जलिरेवमूचे ॥ २८ ॥

२८. अथ वेत्रिणा स्तुतिनिन्दारूपश्लेषोक्त्या गजस्य दुर्लक्षणतासू-चनानन्तरं भूमिपतिः कुमारमालोकत । कीदृक्सन् । आमुष्यपुत्रिका-ममुष्यपुत्रस्य भावं "चोरादेः" [७.१.७३.] इत्यकञ् । अमुष्य भद्रस्य म-

१ प सी डी स्वादिचि°. २ प सी कापील्य°. ३ प सी डी °धः ॥ चोर°. ४ बी "षष्ठ्या क्षे°. ५ सी दा...सी°. ६ बी °प् । पश्य°. ७ प बी सी डी °दण्डे । अ°. ८ बी प् ॥ २७ ॥ दि°. ९ प सी डी °न्नभा°.

न्दस्य मृगस्य मिश्रस्य वा हस्तिनोयं पुत्र इत्यर्थ बुभुत्सुर्जिज्ञासुरत एव तं द्विरदं दृष्ट्वा दिशन्कीदृग्गजोयमिति कुमारं ज्ञापयन्। ततोमुष्य प्रख्यातस्य मूलराजस्य पितुरपत्यं नडादायनणि [६.१.५३.] आमुष्यायणः सोपि कुमारोपि प्राञ्जलिः सन्नत्वैवं वक्ष्यमाणमूचे ॥

आमुष्यपुत्रिकाम्। आमुष्यायणः। अत्र "अदसः°" [३३] इत्यादिना षष्ठ्यलुप्॥

तदेवाह।

यथा शुनःपूर्वकशेपपुच्छलाङ्गूलमुख्यैर्गजलक्ष्म बुद्धा।
वाचस्पतीयं जगदे ममादेवानांप्रियैर्नैषगजस्तथार्हः॥ २९ ॥

२९. अदेवानांप्रियैः पण्डितैः शुन इति पूर्वं येषां ते शुनःपूर्वका अभिधानाभिधेययोरभेदोपचारादभिधेयाविशेषणत्वे[3] ये शेपपुच्छलाङ्गूलास्ते। तथा शुनः शेपमिव शेपमस्येत्यादिविग्रहे शुनःशेपशुनःपुच्छशुनोलाङ्गूलाख्या मुनयस्तदाद्यैर्मुनिभिर्वाचस्पतीयं बृहस्पतेरिदं गजलक्ष्म गजलक्षणप्रतिपादकं शास्त्रं बुद्धा गुरूपदेशेन ज्ञात्वा यथा ममाग्रतो जगदे व्याख्यातं तथा ज्ञायत एष गजो नार्हो न पूज्यो वाचस्पतीयगजलक्ष्मशास्त्रोक्तलक्षणानुसारेण न प्रशस्य इत्यर्थः॥

अथास्यानर्हतामेवाष्टवृत्त्याह।

ईदृग्दिवोदासनुतस्य वास्तोष्पतेरपीभो हि दिवस्पतित्वम्[1]।
हरेत होतुःसुतहोतुरन्तेवास्युद्यताशीःष्वपि[2] दीर्घहस्तः॥ ३० ॥

३०. ईदृगिभो दिवोदासनुतस्य दिवोदासैर्देवविशेषैः स्तुतस्य वा-

---

१ सी दि ति°. २ बी °स्युद्यता°.

---

१ प सी °ष्याणः।. २ सी शुनपू°. ३ प डी °त्वे ते ये ४ प सी °स्पदेते°. ५ बी °क्ष्म ल°. सी °क्ष्म नज°. ६ प सी° दासिर्देवविशैः स्तु°.

स्तोष्पतेरपीन्द्रस्यापि दिवस्पतित्वमैन्द्रं पदं हि स्फुटं हरेतापनेतुं शक्तः संभाव्यते । कासु सतीषु । होतुःसुतहोतुरन्तेवास्युद्यताशीःष्वपि ऋत्विक्पुत्रऋत्विक्शिष्याणां सप्रभावेष्वप्याशीर्वादेषु । यतो दीर्घहस्तः प्रलम्बशुण्डः । अलक्षणं ह्येतत् । योपि दीर्घहस्तः प्रलम्बपाणिः स्यात्स दिवस्पतित्वतुल्यमुन्नतं फलादि वस्तु हरतीत्युक्तिलेशः ॥

ईदृग्गजो भर्तृगृहेस्थिदन्तो हन्यात्पितुःशिष्यपितुस्तनूजान् ।
पितुःस्वसारं स्वसृपत्यपत्यं स्वसुःपतिं नाम पितृष्वसृणाम् ॥ ३१ ॥

३१. ईदृग्गजो भर्तृगृहे वर्तमानो हन्यादुच्छेत्तुं शक्तः संभाव्यते । कान् । पितुःशिष्यपितुस्तनूजान् जनकान्तेवासिनो जनकपुत्रांश्च । तथा पितुःस्वसारं जनकभगिनीं च तथा स्वसृपत्यपत्यं भगिनीभर्तृसन्ततिं च तथा स्वसुःपतिं भगिनीभर्तारं च तथा पितृष्वसृणां जनकभगिनीनां नामापि । अपिरत्र ज्ञेयः । यतोस्थिवन्निःश्रीकौ दन्तौ यस्य सः । सर्वसंबन्धिजनक्षयहेतुः । अपलक्षणं ह्येतत् ॥

ताम्यन्ति होतुःस्वसृयुक्तहोतृस्वस्रात्मजा याज्यगृहागते हि ।
मातापितृभ्यां सममेव होतापोतार ईदृग्गज ओतुनेत्रे ॥ ३२ ॥

३२. ईदृग्गज ईदृशे द्विपे याज्यस्य यजमानस्य राजादेर्गृहमायाते सति होतुःस्वसृभिर्ऋत्विग्भगिनीभिर्युक्ता होतृस्वस्रात्मजा ऋत्विग्भगिनीपुत्रा येषां ते होतापोतारो होतारः पोतारश्च ऋत्विग्विशेषा मातापितृभ्यां सममेव सहैव हि स्फुटं ताम्यन्ति याज्यस्य संपत्क्षयेण दक्षिणादिलाभाभावात्खिद्यन्ते । यत ओतुनेत्रे मार्जारपिङ्गलाक्षे । संपत्क्षयहेतुर्हीदमलक्षणम् ॥

---

१ प सी °लक्ष्यणं. २ प °पाणिं स्या°. सी °पाणि स्या°. ३ प सी शक्तसं°. ४ सी °पत्यं. ५ बी °भिर्हत्वि°. ६ प सी डी °स्वश्रात्म°. ७ प सी °ग्भदिनी°. ८ प बी सी डी हि स्फटं. ९ डी संक्षेपेण.

स्वसादुहित्रोः क्षपकं पितापुत्रयोश्च नाम्नुं शुकपिच्छपुच्छम् ।
जिघृक्षतो दक्षिणयापि होतापुत्रावतीन्द्रावरुणः किमु त्वम् ॥ ३३ ॥

३३. उ हे राजन्नमुं गजं होतापुत्रावृत्त्विक्तत्पुत्रश्च याचकावपि दक्षिणयापि[2] धर्मेणापीत्यर्थः । न जिघृक्षतः । यतः स्वसादुहित्रोः क्षपकं पितापुत्रयोश्च क्षपकं विनाशकम् । एतदपि कुत इत्याह । यतः शुकपिच्छपुच्छम् । नीलपुच्छो हि गजः कुलक्षयाय स्यात् । किं पुनरतीन्द्रावरुणो महर्द्धिकत्वादिगुणैरिन्द्रं वरुणं चातिक्रान्तस्त्वं जिघृक्षसि । नैवेत्यर्थः[3] ॥

वाय्वग्निभः कर्मभिराग्निसौमाग्नावैष्णवैः[1] कृष्णनखे गजेस्मिन् ।
मुधेभशान्तिं रचयेद्द्विजोग्नीषोमोपमोग्नीवरुणोपमो वा ॥ ३४ ॥

३४. द्विजः[4] पुरोहितः कृष्णनखेस्मिन् गजे विषये कर्मभिः शान्तिक्रियाभिः कृत्वेभशान्तिम् । इभशब्देनेभस्थकृष्णनखत्वकुलक्षणजनिता[5] राज्यराष्ट्रादेरुपद्रवा उपचारादुच्यन्ते । तेषां शान्तिमुपशमकर्म मुधा निरर्थकमेव रचयेत् । संभावनेत्र सप्तमी । नोपशमयितुं शक्तः[6] संभाव्यत इत्यर्थः । कीदृशोपि । तपोमन्त्रादिप्रभावोत्थदिव्यशक्त्या वाय्वग्निभो वायुदेवताग्निदेवतातुल्यमहिमाग्नीषोमोपमोग्नीवरुणोपमो[7][8] वा । वाय्वग्नी अग्नीषोमावग्नीवरुणौ च द्वौ द्वौ सहचरौ[9] देवभेदाः । किंभूतैः कर्मभिः । आग्निसौमाग्नावैष्णवैरग्नीषोमावग्नाविष्णू[10] च सहचरौ देवभेदौ[11] देवते येषां तैः ॥

---

१ ए सी °ष्णवै कृ°.

---

१ ए सी गजा हो°. २ बी °त्रोः पि°. ३ ए बी सी नैवेत्य°. ४ सी द्विज पु°. ५ सी °णनि°. ६ ए सी शक्त सं°. ७ ए सी °भितु°. ८ बी °ग्नीवार°. ९ ए सी °हरौ. १० बी ग्निसोमा°. ११ ए सी डी °वते.

अदेवानांप्रियैः । अत्र "देवानांप्रियः" [३४] इति षष्ठ्यलुप् ॥

शुनःशेप । शुनःपुच्छ । शुनोलाङ्गूल । इत्यत्र "शेपपुच्छ°" [३५] इत्यादिना षष्ठ्यलुप् ॥

वाचस्पतीयम् । वास्तोष्पतेः । दिवस्पतित्वम् । दिवोदास । इत्येते "वाचस्पति°" [३६] इत्यादिना निपात्याः ॥

होतुःसुत । होतुरन्तेवासि । पितुस्तनूजान् । पितुःशिष्य । इत्यत्र "ऋतां°" [३७] इत्यादिना षष्ठ्यलुप् ॥ विद्यायोनिसंबन्ध इति किम् । भर्तृगृहे ॥

होतुःस्वसृ होतृस्वसृ । पितुःस्वसारम् पितृष्वसॄणाम् । स्वसुःपतिम् स्वसृपति । इत्यत्र "स्वसृपत्योर्वा" [३८] इति वा षष्ठ्यलुप् ॥

होतापोतारः मातापितृभ्याम् । अत्र "आ द्वन्द्वे" [३९] इत्याकारः । केचित्स्वसादुहित्रोः इत्य[1]त्रापीच्छन्ति ॥ इह तु मते विद्यायोनिसंबन्धः प्रत्यासत्तेः समस्यमानानामृदन्तानामेव मिथो द्रष्टव्यो न येन केन चित् । तेनेह न स्यात् । न हि स्वसा होतापुत्रयोः स्वसा भवन्ती दुहितरमपे[2]क्षते दुहिता वा स्वसारमिति ॥

होतापुत्रौ । पितापुत्रयोः । अत्र "पुत्रे" [४०] इति आत् ॥

इन्द्रावरुणः । इत्यत्र "वेदसह°" [४१] इत्यादिनात् ॥ वायु[3]वर्जनं किम् । वाय्वग्नि ॥

अग्नीषोम । अग्नीवरुण । इत्यत्र "ईः षोम°" [४२] इत्यादिना ईः ॥

आग्निसौम । इत्यत्र[4] "इर्वृद्धि°" [४३] इत्यादिना इः । अविष्णाविति किम् । आ[5]ग्नावैष्णवैः ॥

---

१ प सी °त्यग्नीपी°. २ प सी °पेक्ष्यते. ३ बी °युर्वजे°. ४ प सी °त्रर्वृ°. ५ प सी डी °आग्निवै°.

द्यावापृथिव्योर्मघवत्यदृश्ये दिवस्पृथिव्योर्नहुषेण पात्रा ।
दिवःपृथिव्युत्तरधीः स पृष्टो[१] गुरुर्निनिन्देदृशमल्पवंशम् ॥ ३५ ॥

३५. दिवःपृथिव्युत्तरधीर्[१]द्यावापृथिव्योर्मध्ये सर्वोत्कृष्टबुद्धिः स प्रसिद्धो गुरुर्बृहस्पतिरीदृशमल्पवंशं लघु[२]पृष्ठावयवविशेषं गजं निनिन्द । बार्हस्पतीय[३]गजशास्त्रे हि गजस्याल्पवंशत्वं महापलक्षणमुक्तम् । कीदृक्सन् । द्यावापृथिव्योर्मध्ये मघवतीन्द्रेदृश्ये ताभ्यां बहिर्नेष्टत्वाद्दृश्यमाने सति दिवस्पृथिव्योः कर्मणोः[४] पात्रा रक्षकेण तयोः स्वामिनेत्यर्थः[५] । नहुषेण नहुषाख्येण नृपेणेन्द्रीभूतेन पृष्टः ॥

किल वृत्रदैत्यं रणे हन्तुमशक्नुवन् शक्रस्तं मित्रीकृत्य विश्वस्तं सुप्तमवधीत्ततश्च वृत्तकपालरूपिणी विश्वस्तामित्रहत्येन्द्रस्य पृष्ठं कथमपि यावन्न मुञ्चति तावदिन्द्रो द्यां सप्तद्वीपवर्तीं पृथ्वीं चोल्लङ्घ्य क्षीराब्धिसमीपस्थाब्जनालमध्ये कृमीभूय निलीनस्ततो[६] निःस्वामिकत्वाद्व्याकुलैर्देवैस्तदा सर्वोत्कृष्टो नृपो नहुषः स्वर्गे नीत्वेन्द्रः कृतो रोदस्यौ पाति स्मेति पुराणम् ॥

द्यावापृथिव्योः । अत्र "दिवो द्यावा" [४४] इति दिव्शब्दस्य द्यावा इत्यादेशः ॥

दिवस्पृथिव्योः[७] दिवःपृथिवी । अत्र "दिवस्" [४५] इत्यादिना दिवस् इति दिव इति चादेशौ वा ॥ पक्षे द्यावापृथिव्योः ॥

---

१ ए सी °ष्टोर्गुरु°.

---

१ ए सी डी दिवस्पृथि°. २ ए सी °बुप्रष्ठा°. ३ सी °स्पतीय°. ४ ए सी °र्मणो पा°. ५ बी °र्थः । निहुषेण निहु°. ६ ए सी °तो निस्वा°. डी °तोस्वा°. ७ ए दिव्पृथि°. सी दिवपृथि°.

तौ मातरमाक्पितरावुषासानक्तस्य देवौ यदि पश्चिमायाम् ।
इहोदयेतां क्वचिदप्युषासासोमौ तदोष्ठे वलिमाञ्शुभोयम् ॥ ३६ ॥

३६. तौ प्रसिद्धावुषासानक्तस्य प्रभातरात्र्योर्मातरप्राक्पितरौ जनकत्वान्मातरापितरतुल्यावुषासासोमौ सूर्यश्च सोमश्च देवाविह जगति क्वचिदपि कस्मिन्नपि काले यदि पश्चिमायां दिश्युदयेतां तत्तदोष्ठे वलिमान् रेखावानयं गजः शुभः । गजस्यौष्ठे हि वलयो महादोषः ॥

मृगौ च मातापितरावमुष्य श्वासस्तथावस्करगन्धिरेषः ।
दुःखास्पदं स्यादमुना हि रम्भोरूभार्यकः शोभनभार्यको वा ३७

३७. मृगौ च मृगजाती च हस्तिनावमुष्य गजस्य मातापितरौ तथामुष्य गजस्यैष प्रत्यक्षोपलभ्यमानः श्वासो मुखवातोवस्करोन्नमलं तत्संबन्धात्तद्देशोप्यवस्करस्तस्येव गन्धो यस्य सोस्त्यत एवामुना गजेन कृत्वा रम्भोरूभार्यकः कदलीस्तम्भसुकुमारोरुभार्योपि शोभनभार्यको वा प्रेमाद्यतिशायिभार्यो वापि नृपादिः प्रकृष्टभार्योपभोगभङ्गहेतुमहाविपदास्या दुःखास्पदं स्यात् ॥

उषासानक्तं । इत्यत्र "उषासोषसः" [४६] इत्युषस उषासादेशः ॥ केचित्तु सूर्यशब्दस्यापीच्छन्ति । उषासासोमौ ॥

मातरपितरौ । मातापितरौ । इत्यत्र "मातर°" [४७] इत्यादिना मातरपितरेति वा निपात्यते ॥

अवस्कर आस्पदशब्दौ "वर्चस्कादिषु°" [४८] इत्यादिना निपात्यौ ॥

---

१ बी डी तदोष्ठे- २ ए सी °रूतार्य°.

---

१ बी डी °त्तदोष्ठे. २ ए सी °लभ्यः मा°. ३ ए सी डी °खतो°. ४ ए सी °पि सोम°. ५ सी °स्यत°.

शोभनभार्यकः । अत्र "परतः स्त्री°" [४९] इत्यादिना पुंवद्भावः ॥ अनूङिति किम् । रम्भोरूभार्यकः ॥

श्येतायितायास्तदृदर्शनीयमानी स लाटो भवदीयकीर्तेः ।
इभापदेशादिह दर्शनीयपाशां हि कृत्यां पटयन्दिदेश ॥ ३८ ॥

३८. तत्तस्माद्धेतोः स प्रसिद्धो लाट इभापदेशाद्गजव्याजादिह त्वं-त्समीपे दर्शनीयैपाशां रौद्रत्वात्कुत्सितदर्शनां कृत्यां मारिदेवतां पटयन् पैट्वीं कुर्वन् हि स्फुटं दिदेश तुभ्यं ददौ । कीदृक्सन् । श्येतायितायाः श्येनी ज्योत्स्नादिश्वेतपदार्थजातिस्तद्वदाचरन्त्याः । निर्मलाया इत्यर्थः । भवदीयकीर्तेरदर्शनीयमानी त्वदीयकीर्तिं दर्शनायोग्यां मन्यमानस्त्व-यशोसहमान इत्यर्थः ॥

नीत्वास्रलौहित्यमिषूः पटिष्ठा दारद्यमुन्मूल्य तमानयामि ।
सहास्तिकांश्चेभवराग्नियुङ्क्ष्वाग्नेयद्युते विक्रमरौहिणेय ॥ ३९ ॥

३९. हे आग्नेयद्युतेग्नायीनामग्निभार्याणां षण्णां कृत्तिकानां स्तनपायित्वादपत्यमाग्नेयः स्कन्दस्तत्तुल्यतेजस्क । तथा हे विक्रमरौ-हिणेय शौर्येण बलभद्रतुल्य मूलराजँ । च पुनरर्थे भिन्नक्रमो गम्येन त्वमित्यनेन सह योज्यः । त्वं पुनः सहास्तिकान् हस्तिनीसमूहान्वि-तानिभवरान्पट्टहस्तिन उपलक्षणत्वादश्वान्रथान्भटांश्च नियुङ्क्ष्व लाटा-स्कन्दनाय व्यापारय येन दारद्यं दरदो राज्ञोपत्यं स्त्री "पुरुमगध°" [६.१.११६.] इत्यादिनाणो "द्रेरञण°" [६.१.१२३.] इत्यादिना लुपि दरद् राज्ञी तत्र साधुं भर्तृत्वात्तं लाटमुन्मूल्यानयामि । किं कृत्वा । पटिष्ठा अतितीक्ष्णा इषूरस्रलौहित्यं रक्तेन लोहिनीनां भावमारक्ततां नीत्वा प्रापय्य ॥

१ ए सी दारिद्य°.

१ ए सी डी त्वत्समी°. २ सी °यपांशो रौ°. ३ ए सी पट्वीकु°. ४ ए सी °शेय°. ५ ए सी °ग्नेय स्क°. ६ डी °था वि°. ७ सी °ज । च पु°. ८ सी °वनार°.

क्यङ् । श्येतायिताया: ॥ मानिन् । अदर्शनीयमानी भवदीयकीर्तेः ॥ पित्तद्धित । दर्शनीयपाशाम् । अत्र "क्यङ्मानि°" [५०] इत्यादिना पुंवत् ॥

णि । पटयन् ॥ तद्धितीय । लौहित्यम् ॥ तद्धितस्वर । पटिष्ठाः ॥ जातितद्धितय । दारदम् ॥ तद्धितस्वर । हास्तिकान् । अत्र "जातिश्च°" [५१] इत्यादिना पुंवत् ॥ दौरदम् । इत्यत्र पुंवद्भावादणो लुब् निवर्तते ॥

आग्नेय । इत्यत्र "एयेऽग्नायी" [५२] इति पुंवत् ॥ पूर्वेण सिद्धे नियमार्थं वचनम् । तेन रौहिणेय इत्यत्र पूर्वेणापि पुंवद्भावो न स्यात् ॥

राजा तमूचेथ सहस्व कल्याणीपञ्चमाः पञ्च निशाः कुमार ।
लाटं रटन्तीप्रियमाशु भव्याभक्ते विधातुं यतितव्यमूर्ध्वम् ॥४०॥

४०. अथ राजा तं कुमारमूचे । तदेवाह । हे भव्याभक्ते प्रशस्यगुरुबहुमान कुमार पञ्च निशाः सहस्व । ननु पञ्च निशाः किमिति सह्यन्त इत्याह । यतः कल्याणी पञ्चमी यासु ताः प्रस्थानार्हनक्षत्रवारलग्नाद्युपेतत्वेन हि पञ्चमी रात्रिर्यात्रायां शुभास्त्यतः पञ्चमीरात्रिं यावत्प्रतीक्षस्वेत्यर्थः । ऊर्ध्वं तदनन्तरं पञ्चम्यां निशीत्यर्थः । लाटं रटन्तीप्रियं लाटवधेन रुदत्प्रेयसीकं विधातुमाशु यतितव्यम् ॥

अप् । कल्याणीपञ्चमा निशाः ॥ प्रियादि । रटन्तीप्रियम् ॥ भव्याभक्ते । इत्यत्र "नाप्प्रियादौ" [५३] इति न पुंवत् ॥

---

१ ए सी °शु रव्या°. २ ए बी डी °मूर्द्धम् । सी °मूर्हम् ।.

---

१ सी °कीर्तिः । पि°. २ सी °न् । तयः । लौ°. ३ ए °तयः । लौ°. डी °तय ।...दार°. ४ ए सी दारिद°. ५ बी °र्थम् । ते°. ६ ए सी °रुबहुमा°. ७ बी °द्ध ता प्र°. ८ डी यु...वधे. ९ ए बी सी डी ऊर्द्ध त°. १० बी °त्यर्थोल्लाटं. ११ ए सी रटीतीप्रि°.

त्वं मद्रिकाम्बो नु सहोसि दत्ताभार्यं द्वितीयामतिराशु कर्तुम् ।
आक्रन्दिकाभार्यममुं तथाप्येष्यामो वयं विक्रममीक्षितुं ते ॥ ४१ ॥

४१. हे कुमार यद्यपि त्वं द्वितीया लोकेभ्योन्या सर्वोत्कृष्टेत्यर्थः । मतिर्यस्य स तथा सन् दत्ताख्या भार्या यस्य तममुं लाटमाक्रन्दिकाभार्यं लाटवधेन रुदद्भार्यमाशु कर्तुं सहोसि शक्तोसि । क इव । मद्रिकाम्बो नु । मद्रेषु भवा । वृजि°" [६.३.३८] इत्यादिना के मद्रिकाम्बा माता यस्य स नकुलः सहदेवो वा स इव । तथापि ते तव विक्रममीक्षितुं वयमेष्यामः ॥

तद्धित । मद्रिकाम्बः ॥ अक । आक्रन्दिकाभार्यम् ॥ पूरणी । द्वितीयामतिः ॥ आख्या । दत्ताभार्यम् । इत्यत्र "तद्धिताक°" [५४] इत्यादिना न पुंवत् ॥

तं वैदिशीमातृकमेतु नैयङ्कवीमतिं कुञ्जर एष लाटम् ।
प्राप्नोतु नैयङ्कवबुद्धितायाः फलं स माञ्जिष्ठपटीक आरात् ॥४२॥

४२. एष कुञ्जरो वैदिशी विदिशापुर्यां भवा जाता वा माता यस्य स तं लाटमेतु । यतः किंभूतम् । न्यङ्कुर्मृगभेदः कृष्णाजिनेण विपुलः कुटिलस्वभावश्च । तस्येयं नैयङ्कवी सा मतिर्यस्य तं महाकुलक्षणेभप्रेषणात्कुटिलमतिमित्यर्थः । ततश्च स लाटो नैयङ्कवबुद्धिताया अस्याः कूटमतेः फलमारादद्दूराच्छीघ्रं प्राप्नोतु । किंभूतः । माञ्जिष्ठी मञ्जिष्ठया रक्ता पटी यस्य सः । लाटदेशे हि माञ्जिष्ठी पटी भूमिजलादिगुणेनातिसुरङ्गा प्रायः स्यात् ॥

---

१ ए सी लाघव°. २ ए सी डी ससह°. ३ ए सी ते व. ४ बी अक् । आ°. ५ ए सी °र । इव । तथापि ते न विक्रममी ॥. ६ ए सी डी °दिशि पु°. ७ ए सी डी °ता च मा°. ८ ए सी °स्य ततं. बी °स्यतं. ९ डी °तः । म°. १० ए सी मजिष्ठ°.

व्यसर्जयद्वेत्र्यथ हैमयष्टिः सेभान्कठीमातृकलाटभट्टान् ।
तेयुः सलज्जाकठमानिमातृकाः पूःसुकेशीललनैर्हसद्भिः ॥ ४३ ॥

४३. अथ हैमयष्टिः स्वर्णमयदण्डो वेत्री सेभान् गजयुक्तान्[1] कठ्यः शाखाध्ययननिमित्तकठ्यपदेशभाजो ब्राह्मण्यो मातरो येषां ते ये लाटभट्टा लाटाधिपस्य विशिष्टभूता द्विजास्तान्[2]व्यसर्जयन्न्यक्कारपूर्वं प्रतिप्रेषितवान् । ततस्ते लाटभट्टा अयुर्लाटपार्श्वे गताः । किंभूताः सन्तः । हसद्भिः पूःसुकेश्यः[3] पुरस्य प्रवरचिकुरस्त्रियो ललनाः कान्ता येषां तैरुपलक्षिताः । न्यक्कृतत्वात्पौरतरुणैरुपहस्यमाना इत्यर्थः । अत एव सलज्जा अकठमानिन्योकठीरात्मनो मन्यमाना मातरो येषां ते ॥

वैदिशीमातृकम्[4] । अत्र "तद्धितः स्वर°" [५५] इत्यादिना न पुंवत् ॥ स्वरेति किम् । नैयङ्कवबुद्धितायाः ॥ अन्ये तु वृद्धिमात्रहेतोर्[5]ञ्णितस्तद्धितस्य पुंवत्प्रतिषेधमिच्छन्ति तन्मते नैयङ्कवीमतिम् ॥ अरक्तविकार इति किम् । माञ्जिष्ठपटीकः । हैमयष्टिः ॥

सुकेशीललनैः ॥ जाति । कठीमातृक । इत्यत्र "स्वाङ्गात्°" [५६] इत्यादिर्ना[6] न पुंवत् ॥ स्वाङ्गादिति किम् । अकठमानिमातृकाः ॥ अमानिनीति किम् । अकठमानि ॥

भव्यप्रियां रौचनिकोत्पटीं नु तन्वंस्त्विषं द्रावकवीक्षणीयाम् ।
हरेरिवैकादशमूर्तिरेषोन्येद्युः कुमारानुगतः प्रतस्थे ॥ ४४ ॥

४४. अन्येद्युरेष मूलराज[7]: कुमारानुगतः प्रतस्थे लाटास्कन्दनाय

---

१ ए सी डी °न् काठ्यः. २ ए सी °स्तान्विस°. ३ डी °श्यः प्र°. ४ बी °तृकः । अ°. ५ ए सी °तोर्ञ्णित°. ६ ए सी °नापुं°. ७ सी °राजकु°.

प्राचालीत् । किंभूतः । द्राविडाङ्गनाभिर्गच्छन्ती या वीक्षणीया स्वर्णवर्णत्वाद्दर्शनीया तां त्विषं तन्वन् । उत्प्रेक्ष्यते । भव्या श्लक्ष्णत्वादिगुणैः प्रशस्यात एव या प्रिया सर्वजनवल्लभा तां रौचनिकीं[1] रोचनया रक्ता योत्पट्युपरितनवस्त्रं तां नु तामिव तन्वन् । यद्वा । नुरुपमायाम् । यथा रौचनिकोत्पटीं परिधानेन तनोत्येवं त्विषं तन्वन्नत एव हरेर्विष्णोरेकादशमूर्तिरिव । एकादश्येकादशानां पूरणी या मूर्तिः सेव । हरेर्हि मत्स्य १ कूर्म[3] २ वराह ३ नारसिंह ४ वामन ५ राम ६ राम ७ कृष्ण ८ बुद्ध ९ कल्क्या[१०]ख्या दशैवावताराः प्रसिद्धाः । अयं त्वेकादशोवतार इवेत्यर्थः । हरेरपि हि मूर्तिः पीताम्बरत्वाद्रौचनिकोत्पटीं तनोति ॥

समुत्सुको दारददत्तभार्यापतिं स तं वैदिशनार्यपत्यम्[1] ।
हन्तुं कठस्त्रीजुषि दीर्घकेशपौरीप्रिये श्वभ्रवतीतटेगात् ॥ ४५ ॥

४५. स मूलराजः श्वभ्रवतीतटे श्वभ्रवत्याख्यनदीतीरे स्वसीमसन्धावगात् । कीदृक्सन् । तं लाटं हन्तुं[5] समुत्सुकः । कीदृशम् । दत्ता चासौ भार्या च दत्तभार्या दरद्दरदो राज्ञोपत्यं स्त्री या दत्तभार्या तस्याः पतिम् । तथा वैदिशी विदिशानगरीजाता या नारी स्त्री तस्या अपत्यम् । किंभूते तटे । कठ्यो याः स्त्रियस्तदाश्रये । तथा दीर्घकेश्यो[6] याः पौर्यः पुराङ्गनास्तासां पुष्पोच्चयक्रीडादिहेतुत्वात्प्रिये ॥

१ प सी डी °दिसना°.

१ प सी डी °की च°. २ प सी नुरूप°. ३ प सी डी °र्मवारा°. ४ प सी डी °द्रुधक°. ५ प सी डी हन्तुमु°. ६ डी °श्यो या पौ°.

"नाप्रियादौ" [५३] इत्युक्तम् । तत्रापि भव्यप्रियाम् । "तद्धितोकको पा-न्त्यपूरणाख्याः" [५४] इत्युक्तम् । तत्रापि रौचनिकोत्पटीम् । श्रावकवीक्षणीयाम् । एकादशमूर्तिः । दत्तभार्या । "तद्धितः स्वरवृद्धिहेतुररक्तविकारे" [५५] इत्युक्तम् । तत्रापि वैदिशनारी । "स्वाङ्गाद् ङीर्जातिश्चामानिनि" [५६] इत्युक्तम् । तत्रापि दीर्घकेशपौरी । कठध्नी । दारददत्तभार्या । अत्र "पुंवत्कर्मधारये" [५७] इति पुंवत् ॥

नद्यां वसत्स्नायकमद्रकाद्यजातीयनारीभिरभिद्रुताभिः ।
पुरी द्विषोभूदथ भद्रदेशीया व्याकुलत्वापद्रुते प्रपन्ना ॥ ४६ ॥

४६. अथ द्विषो लाटस्य पुरी भद्रदेशीयोपप्लुतप्रायाभूद्यतो व्याकुलत्वापद्रुते भीर्तिं किंकर्तव्यतामूढतां च प्रपन्नाश्रिता । काभिर्हेतुभिः । नद्यां श्वभ्रवत्यां वसत्स्नायकमद्रकाद्यजातीयनारीभिर्वसत्स्नायकमद्रकेति शब्दा आद्या यस्य स तथा जातीयेति शब्दो यासां तास्तथा या नार्यस्ताभिर्वसज्जातीयस्नायकजातीयमद्रकजातीयनारीभिर्वसन्त्यः स्नायिका मद्रिकाश्च प्रकार आसां ताभिर्वा स्तव्याभिर्मुनिपत्नीभिः स्नायिकाभिर्मद्रिकाभिर्मद्रदेशोद्भवाभिश्च नारीभिः । कीदृशीभिः । अभिद्रुताभिः । परसैन्यदर्शनोत्थातिभयेन पुराभिमुखं पलायिताभिः । नश्यदायान्तीदृष्ट्वेत्यर्थः ॥

पलायकत्वं जगृहुर्विहाय परस्त्रियः पाचकतामकाण्डे ।
म्लेच्छीत्वमज्ञायि न नो कठीता तासां महद्भूतभियैक्यभाजाम् ॥ ४७ ॥

४७. परस्त्रियः शत्रूणां नार्यो भयभीतत्वादकाण्डेप्रस्तावे पाचकतां

---

१ सी पाठक°.

---

१ ए सी °नाप्रिया°. २ ए सी °ताकाको°. ३ ए सी °ज्ञानीजां°. ४ ए सी डी प्रपप°. बी प्रतिप°. ५ ए सी °भिविसज्जांती°. ६ ए सी डी °सत्यः स्ना°. ७ बी °श्च आ°. ८ बी °मद्रका°. सी °मद्रदे°. ९ बी °अतिद्रु°. १० ए सी °लायता°. डी °लायन्तीभिः । ११ ए सी डी °दृष्ट्वेत्व°.

पक्षीणां भावं विहाय पलायकत्वं पलायिकानां भावं जगृहुः । ततस्तासां परक्षीणाममहती महतीभूता महद्भूता या भीस्तयैक्यभाजां मिथोभिन्नानां सतीनां न म्लेच्छीत्वमन्त्यजातित्वं नो वा कठीताश्लायि ॥

या गोमतीभूय चिराय पट्वीभूताः प्रजास्ता अपटूभवन्त्यः ।
तथाद्रवंस्तत्र यथा निपेतुः सर्वासु रथ्यास्वपि सर्वबालाः ॥ ४८ ॥

४८. यांः प्रजा गोमतीभूय गावः सन्त्यासां ता गोमत्योगोमत्यो गोमत्यो भूत्वोपलक्षणत्वान्महर्द्धिकीभूयेत्यर्थः । चिराय चिरकालं पट्वीभूता महर्द्धिकत्वाद्याश्चिरं सौजस्का आसन्नित्यर्थः । ताः प्रजाॅ ऋद्धिविगमाशङ्कयापटूभवन्त्यः सत्यस्तत्र पुर्यां तथा तया प्रकृत्याद्रवन्परचक्रागमनभयेन नष्टा यथा यया प्रकृत्या सर्वास्वपि रथ्यासु सर्वबालाः सर्वासां प्रजा॰ ॰मूलका बालिकाश्च निपेतुरत्यौत्सुक्ययानेन मिथः संमर्देन च कटीभ्यां निपतिताः ॥

वत्सजातीय । मद्रकजातीय । ज्ञायकजातीय । अभ्रदेशीया । इत्यत्र "रिति" [५८] इति पुंवत् ॥

व्याकुकत्वापट्टते । अत्र "त्वते गुणः" [५९] इति पुंवत् ॥ गुण इति किम् । म्लेच्छीत्वम् । कठीता ॥ केचित्तु जातिसंज्ञावर्जितस्य विशेषणमात्रस्य पुंवद्भावमिच्छन्ति । पलायकत्वम् । पाचकताम् ॥

महद्भूतभिया । इत्यत्र "च्वौ क्वचित्" [६०] इति पुंवत् ॥ क्वचिद्ग्रहणाद्गोमतीभूयेत्यादौ न स्यादेव ॥ पट्वीभूताः । अपटूभवन्त्यः । इत्यादौ विकल्पः ॥

१ ए सी डी °त्र तथा.

१ बी °कायका°. २ सी या प्र°. ३ ए सी °जसका आ°. ४ ए सी डी °बारवमि°. ५ ए सी °वन्त्य स°. ६ ए सी डी °कृत्या स°. ७ ए डी °तीवः । म°.

सर्वबालाः । यथा । तथा । तत्र । इत्यत्र "सर्वादयोस्यादौ" [६१] इति पुंवत् ॥ अस्यादाविति किम् । सर्वासु ॥

प्रियं मृगक्षीरमभून्न ते प्राक्पेयं मृगीक्षीरमतः परेण ।
पचत्तरेत्थं मृगशावमुक्त्वा नष्टा मृगीशावविलोचनाभिः ॥४९॥

४९. पचत्तरा प्रकृष्टा पाचिका राजादिसूपकारी मृगीशावविलोचनाभिर्मृगीबालवद्भयचटुलविशालाक्षीभिः स्त्रीभिः सह नष्टा । किं कृत्वा । मृगशावं हरिणीपोतमुक्त्वा । कथमित्याह । हे मृगशाव मृगीपोतक प्राक्पूर्वं ते तव सुस्वादुदुग्धाद्यास्वादनेन मृगक्षीरं हरिणीदुग्धं निरास्वादत्वेन प्रियं नाभूदतः परेणातोनन्तरं मृगीक्षीरं हरिणीदुग्धं पेयमित्थम् । राजादिसूपकार्यो हि मांसपाकस्यातिसुस्वादुतार्थं मृगशावादीन् दुग्धादिभव्याहारैः पोषयन्ति ॥

लाट्यः पचन्तीतरया पचन्तितरा इवोष्णांशुरुचाभितप्ताः ।
ज्यायस्तरोरोजतटीं कटीं ज्यायसीतरां त्रासजुषो निनिन्दुः ॥५०॥

५०. लाट्यो लाटदेशस्त्रियो ज्यायस्तरोरोजतटीमुपचिततरस्तनाभोगं ज्यायसीतरां कटीं च गतिविघ्नत्वान्निनिन्दुः । कीदृश्यः सत्यः । पचन्तितरा इव । यथा प्रकृष्टपाचिकाः सदाग्निसांनिध्यादभितप्ताः स्युरेवं पचन्तीतरयातिशयेन संतापिकयोष्णांशुरुचाभितप्ताः । तथा त्रासजुषोरिचक्रागमेनेन भीताश्च ॥

---

१ ए सी °चन्तरा. २ ए सी °शुरचाभित°.

---

१ ए सी स्त्रीभि स°. २ ए सी हरणी°. ३ ए सी डी °पोतं मु°. ४ ए सी °ततक°. ५ सी प्रियमाभूतः । प°. ६ ए °भूतः । प° डी भूत् । प°. ७ ए सी °रेणतो°. ८ बी °दृशाः स°. ९ ए सी सत्य प°. १० ए सी °ग्निसाध्या°. ११ ए सी पचीत°. १२ सी °मते भीताश्च. १३ ए °ने भी°.

सा ज्यायसिप्राक्तरपुर्यभान्तीरूपैणनेत्राभिरभान्तिरूपा।
नद्या नदन्तीतमया नदन्तितमप्रजाभिश्च नदत्तमाभूत् ॥५१॥

५१. सा लाटेशसत्का ज्यायसिप्राक्तरपुरी ज्यायसितरपुर्येत्यन्तं[1] प्रशस्या वृद्धा वा नगरी भृगुकच्छाख्या प्रशस्ता भान्ती[2] भान्तिरूपा[3] न तथाभान्तिरूपाशोभमानाभूत्। काभिः कृत्वा। अभान्तीरूपा[4] भयव्याकुलत्वेनाशोभमाना[5] या एणनेत्रास्ताभिः। तथा नदत्तमाऽव्यक्तशब्दमेव्यभूत्[6]। काभिः कृत्वा। नदन्तीतमया भयत्रस्तलोकप्रवेशेनाव्यक्तं शब्दायमानया नद्यातिसमीपस्थया नर्मदाख्यनद्या नदन्तितमप्रजाभिश्चार्त्यन्तं कोलाहलं कुर्वाणैर्लोकैश्च ॥

भाद्रूपताभूत्पुरि यान्तिकल्पा यात्कल्पलक्ष्म्यां स्फुरतीभ्रुवायाम्।
स्फुरद्भ्रुवाभूज्जनता प्रयान्तीकल्पस्फुरन्तिभ्रुवजीवया च ॥ ५२ ॥

५२. पुरि[9] भाद्रूपता। प्रशस्यशोभेत्यर्थः। यान्तिकल्पा नश्यत्प्रायाभूत्। कीदृश्यां सत्याम्। यात्कल्पलक्ष्म्यां वास्तव्यजननाशान्नश्यत्प्रायसमृद्धावत एव स्फुरती विलसन्ती या भ्रुवा कुत्सिता तस्याम्। निन्दितशोभायामित्यर्थः। तथा जनता जनौघश्च स्फुरद्भ्रुवा निन्दितस्फुरणाभूत्। कया कृत्वा। प्रयान्तीकल्पा भयेन नश्यन्तीप्रायात एव स्फुरन्ती भ्रुवा कुत्सितं निश्वसन्ती[10] या जीवा प्राणा। जीवः प्राणेषु केदार इति वचनात्रिलिङ्गः। तया ॥

---

१ बी °रूपेण°.

---

१ ए सी °न्तं अश°. २ ए सी °न्ती रू°. ३ बी भातिरू°. ४ ए सी डी °पा य°. ५ ए सी °त्वेन शो°. ६ ए सी °मज्यमू°. ७ बी °ब्दामा°. ८ सी °त्यन्तको°. ९ ए सी °रि साद्रू°. १० ए सी निश्विस°.

नैतच्चलेच्चेलि दिनं चलन्तीचेल्या भैवोच्चैरचलन्तिचेली ।
याद्गोत्रया यास्यनयाथ यान्तीगोत्रे नु गा मा तदयान्तिगोत्राम् ॥ ५३ ॥
समं लपन्तीमतया लपन्तिमता स्म मा भूरलपन्मते त्वम् ।
काश्चया रसन्तीहतया रसन्तिहते कृथा मा स्म रसद्धतां द्याम् ॥५४॥
गार्गिब्रुवे वात्सितरे कुमारिकल्पौत्सिरूपे कठिचेलि यात ।
प्रतीक्ष्यते चण्डितमा किमाङ्गिहतेयमात्रेयिमतौर्विगोत्रा ॥ ५५ ॥
पङ्गुब्रुवा भोगवतिब्रुवेयं पङ्गूब्रुवा गौरिमतिब्रुवासौ ।
अस्त्रीतराश्च स्त्रितरास्तथोचुः सविड्वरायामिति लाटपुर्याम् ॥५६॥

५३—५६. सविड्वरायां सोपद्रवायां लाटपुर्यामस्त्रीतराश्चाप्रकृष्टाः स्त्रियश्च तथा स्त्रितराः प्रकृष्टस्त्रियश्चैतदिमूचुः । तदेवाह । हे चलच्चेलि मन्दगातित्वान्निन्द्यगमने चलन्तीचेल्या मन्दगतिकाया नैतद्दिनं भयेन नश्यमानत्वाच्छीघ्रगतेरेवायमवसर इत्यर्थः । तस्मादुच्चैरतिशयेनाचलन्तिचेली शीघ्रगमना भव । अथ यदि हे यान्तीगोत्रे निन्द्यगमनेनया प्रत्यक्षया याद्गोत्रया निन्द्ययानया सह यासि तत्तदायान्तिगोत्रामनिन्द्यगमनाम् । मामित्यर्थः । मानुयासीर्मत्पृष्ठे मा स्म लग इत्यर्थः । तथा हे-लपन्मतेवाचाले लपन्तीमतया वाचाटया समं सह त्वं लपन्तिमता वाचाटा मा स्म भूः । भयेन निभृतं नश्यमानत्वेन शब्दस्यानवसरात् । तथा रसन्तीहतया शब्दस्यानवसरेण निन्द्यशब्दया काश्चया कृत्वा हे रसन्तिहते

१ प सी नैतिच्च°. २ प सी °लच्चेलि° ३ प सी भवेच्चै°. ४ बी °या प्रया°. ५ प सी °द्धता या°. ६ प सी °तौविगो°. ७ प सी डी पङ्गुगु°. ८ प सी °थोचु स°.

१ प सी °या पल°. २ प सी डी निन्द्यासन°. ३ डी सह क°. ४ बी °सरणे नि°.

निन्द्यं शब्दायमाने रसन्तीहृतया काश्यैव कृत्वा द्यां व्योम रसद्धृतां निन्द्यशब्दान्वितां मा स्म कृथाः । तथा हे गार्गिभ्रुवे गर्गर्षे[1]र्निन्द्ये पौत्रि हे[2] वात्सितरे वत्सर्षेः प्रकृष्टे पौत्रि हे कुमारिकल्पौत्सिरूपे कुमारिकल्पा सतीत्वादिगुणैर्गौरीतु[3]ल्या यौत्सिरूपोत्सस्यापत्यं स्त्री प्रशस्ता त[4]स्याः संबोधनम् । तथा हे कठिचेलि निन्द्ये कठि यूयं यात न[5]श्यत । तथेयं चण्डितमा[6]तिकोपनेयमाङ्गिहृताङ्गस्यापत्यं स्त्री निन्द्येयमात्रेयिमतात्रेर्निन्द्या पुत्रीयमौर्विगोत्रौर्वे[7]र्षेर्निन्द्या पौत्रीयं पङ्कुभ्रुवा निन्द्या पङ्कूर्भोगवतिभ्रुवा निन्द्या भोगवत्याख्या रूयसौ पङ्कूभ्रुवा गौरिमतिभ्रुवा च निन्द्या गौरिमत्याख्यस्त्री च । चोत्र ज्ञेयः । किं किमिति युष्माभिः प्रतीक्ष्यते परिपाल्यते । विपक्षाणां निकटागमनेन चण्डितमादिप्रतीक्षणे नावसर इत्यर्थ इति ॥

मृगक्षीरम् मृगीक्षीरम् । मृगशावम् मृगीशाव । इत्यत्र "मृग°" [६२] इत्यादिना वा पुंवत् ॥

[तर । ?] पचन्तितरा[8]ः पचत्तरा पचन्तीतरया । ज्यायसितर ज्यायस्तर ज्यायसीतराम् ॥ तम । नदन्तितम नदत्तमा नदन्ती[10]तमया ॥ रूप । अभान्तिरूपा भाद्रूपता अभान्तीरूप ॥ कल्प । यान्तिकल्पा यात्कल्प प्रयान्तीकल्प ॥ भ्रुव । स्फुरन्तिभ्रुव स्फुरद्भ्रुवा स्फुर[11]न्तीभ्रुवायाम् ॥ चेलट् । अचलन्तिचेली चलच्चेलि चलन्तीचेल्याः॥ गोत्र । अयान्तिगोत्राम् याद्गोत्रया यान्तीगोत्रे ॥ मत । लपन्तिमता अलपन्मते लपन्तीमतया ॥ हत । रसन्तिहते रसद्धृताम् रसन्तीहृतया । इत्यत्र "ऋदुद्°" [६३] इत्यादिना ह्रस्वः पुंवच्च वा ॥ भ्रुवाद[12]यः कुत्साशब्दाः । "निन्द्यं कुत्सनैः" [३. १. १००] इति समासः ॥ ऋदुदिति किम् । कुमारिकल्पौत्सिरूपे ॥

---

१ प सी °र्षेनिंद्ये पौ°. २ डी हे...कु°. ३ बी तुल्यया. ४ बी तस्या सं°. ५ प सी डी नस्यत. ६ डी माङ्गि°. ७ प सी त्रोवर्षेनिन्द्या. ८ प सी डी °तरा प°. ९ प सी डी °तरा । त°. १० प सी °न्तीते[म]°. ११ बी °रन्तीभ्रु°. १२ प सी दय कु°.

वात्सितरे । चण्डितमा । औत्सिरूपे । कुमारिकल्प । गार्गिब्रुवे । कठिचेलि । और्विगोत्रा ॥ आत्रेयिमता । आङ्गिहता । इत्यत्र "ड्यः" [६४] इति ह्रस्वः ॥ आङ्गि । इत्यत्राङ्गस्य प्राच्यत्वाद् "द्रेरञ्°" [६. १. १२३] इत्यादिनों नाणो लुप् ॥

भोगवतिब्रुवा । गौरिमतिब्रुवा । इत्यत्र "भोगवद्°" [६५] इत्यादिना ह्रस्वः ॥

श्रितराः श्रीतराः । अत्र "नवैक°" [६६] इत्यादिना वा ह्रस्वः ॥

पङ्गुब्रुवा पङ्गूब्रुवा । इत्यत्र "ऊङः" [६७] इति वा ह्रस्वः ॥

महाकरज्ञान्स्वमहाविशिष्टान्धूत्वा महाघासमिवाथ लाटः ।
युधे महद्धाससमैः ससज्जामहत्करज्ञैरमहद्विशिष्टैः ॥ ५७ ॥

५७. अथ लाटो युधे ससज्ज । किं कृत्वा । स्वमहाविशिष्टान्स्वान्स्वकीयान्महतां पितृपितामहादीनां वृद्धनृपाणां विशिष्टान्प्रधानानि महाघासमिव महतोरण्यादेस्तृणमिव धूत्वा युद्धाभिषेधतो निराकृत्येत्यर्थः । किंभूतान् । महतां राज्यलक्ष्म्यादिना बृहतां राज्ञां करो दण्डो महाकरस्तं जानन्ति ये तान्महाकरज्ञान्महाराजानां यो यस्य करो दीयते तद्वेदिनः । कैः सह ससज्ज । अमहद्विशिष्टैः पार्श्वांत्यैः प्रधानैः । किंभूतैः । महद्धाससमैर्निःसत्त्वान्महारण्यादिसत्कघासतुल्यैः । तथामहत्करज्ञैराधुनिकत्वान्महतां राज्ञां दण्डमविद्वद्भिः । महाविशिष्टतिरस्कारोक्त्या महाविशिष्टकृतं महारिष्टसूचकं स्खलनरूपमनिमित्तमस्य ध्वनितम् ॥

महाकर महत्कर । महाघासम् महद्धास । महाविशिष्टान् महद्विशिष्टैः । अत्र "महतः कर°" [६८] इत्यादिना वौ डा अन्तादेशः ॥

---

१ प सी °ष्टा धू°. २ प सी समै स°.

---

१ प सी °त्सिरेत°. २ प सी डी °यिमाता ।. ३ बी °ङ्गिहिता ।. ४ प सी डी °नानणो ५ प सी डी °स्वः ॥...म°. ६ सी °तृमंपि°. ७ सी °श्वात्यै प्र°. ८ बी °मैनिःस°. ९ बी °हाविशिष्ट°. १० प सी °हामक°. ११ प सी वा ब्या म°.

महाविशिष्टं च महाकरं च क्षिप्त्वा महाघासभुगुक्षमत्तः ।
महाबलान्यत्वरयन्महाजातीया[1]वलेपेन महाभुजः सः ॥ ५८ ॥

५८. स लाटो महान्प्रकारोस्य महाजातीयो[1] महान्योवलेपो बलादिकृतोहंकारस्तेन कृत्वा महाबलान्यत्वरयद्युद्धाय प्रेरितवान् । किं कृत्वा । महाविशिष्टं च महत्या राज्यादेः प्रधानं महाकरं च महत्या राज्यादेर्हस्तं च क्षिप्त्वा तिरस्कृत्य । अनेनापि स्खलनरूपमनिमित्तमस्योक्तम् । यतो महत्या अरण्यान्या यो घासस्तं भुंक्ते[2] य उक्षा वृषस्तद्वन्मत्तः । एतदपि कुत इत्याह । यतो महाभुजः ॥

श्रुत्वा महद्भूतबलं तु यष्टायष्ट्युत्सुकं क्ष्मामहतीप्रियं तम् ।
चामुण्डराजोपि चचाल यष्टीयष्ट्यस्यसिक्रीडनकौतुकेन ॥५९॥

५९. चामुण्डराजोपि चचाल । किं कृत्वा । क्ष्मया पृथ्व्या कृत्वा महती प्रिया भार्या यस्य तं विशालभूवधूकं तं तु लाटं पुनः श्रुत्वा । किंभूतम् । यष्टायष्टि[3][4] यष्टिभिश्च यष्टिभिश्च[5] मिथः प्रहृत्य कृते युद्ध उत्सुकमत एव युयुत्सयानेकस्थानकेभ्यो[6] मिलितत्वादमहन्महद्भूतं संपन्नं बलं सैन्यं यस्य तम् । युधि[7] प्रगुणीभूतमित्यर्थः । केन हेतुना चचाल । यष्टीयष्टि यष्टिप्रहरणोपाधिके युद्धेस्यस्यसिप्रहरणोपाधिके युद्धे च विषये क्रीडन[8]कौतुकेनातिशूरत्वेनास्य युद्धस्य सुखसाध्यमानित्वादत्यन्ताभिलाषुकत्वाच्च क्रीडाकुतूहलेन ॥

महाकरम् । महाघास । महाविशिष्टम् । इत्यत्र "स्त्रियाम्" [६९] इति डाः ॥

---

१ डी °तीयोव°.

---

१ प सी महोजा°. २ प सी डी भुक्ते य°. ३ डी °यष्टयुत्सुकं य°. ४ प सी °ष्टिमिश्च. ५ प सी °श्च मथः. ६ प सी °स्तानेके°. ७ बी युधे प्र°. ८ सी क्रीडान°.

महाजातीय । महाबलानि । महाभुजः । अत्र "जातीय°" [७०] इत्यादिना डाः ॥ अच्वेरिति किम् । महद्भूत ॥

क्ष्मामहतीप्रियम् । अत्र "न पुंवन्निषेधे" [७१] इति न डाः ॥

यष्टीयष्टि । यष्टायष्टि । इत्यत्र "इच्य°" [७२] इत्यादिना पूर्वपदस्य दीर्घ आद्यान्तादेशः ॥ अस्वर इति किम् । अस्यसि ॥

अष्टाकपालं नु हविर्द्विषो युन्मखे जुहूषौ नृपतिः कुमारे ।
आदिक्षदष्टापदबाणयुग्यैरष्टागवैर्द्राक्पुरगावणेशम् ॥ ६० ॥

६०. कुमारेष्वसु कपालेषु संस्कृतमष्टाकपालं हविर्नु द्विषो युन्मखे रणयागे जुहूषौ भस्मसाच्चिकीर्षौ सति नृपतिर्मूलराजः पुरगावणेशं पुरगा वृक्षभेदास्तेषां वनं पुरगावणं नाम वनं तस्य य ईशस्तं द्रागा-दिक्षद्रणायाज्ञप्तवान् । कैः सह । अष्टापदस्य स्वर्णस्य ये बाणास्तेषां यु-ग्यानि वाहनानि शकटास्तैः । किंभूतैः । अष्टागवैरष्टौ गावो वृषा युक्ता येषु तैः । यद्वा । समाहारे द्विगौ साहचर्यादुपचारादष्टगवेन यु-क्तान्यप्यष्टागवानि तैर्महाभारान्वितत्वादष्टभिर्गोभिर्वाह्यैरित्यर्थः ॥

स कोटरावणनाथसारिकामिश्रकापूर्ववणेश्वरांश्च ।
सैध्रकिसिध्रकापूर्ववणेशसाल्वागिरेयाञ्जनागिर्यधिपानयदिक्षत् ॥ ६१ ॥

६१. स्पष्टम् । किं तु । स मूलराजः । कोटरावणसारिकावणमिश्रका-वणसिध्रकावणाख्यानि कोटरादितरुसत्कानि वनानि । साल्वा देशास्तेषां

१ सी °न्मखेखे. २ ए सी °ष्टावगैर्द्रा°. ३ डी द्राक्सि°. ४ ए सी डी °क्सिधृका°.

१ ए बी सी डी इच्येला°. २ ए ६० पुरगा वृक्षभेदास्तेषां कु°. ३ बी वणं पु°. ४ डी °क्षदाव°. ५ ए सी शकास्तैः ।. ६ ए सी डी °रे गौ. ७ ए सी °कजः । ८ ए सी °टरव°. ९ ए बी सी देशस्ते°.

गिरिः साल्वागिरिः । अञ्जना वृक्षभेदास्तेषां गिरिरञ्जनस्य कज्जलस्य वाश्रयो गिरिरञ्जनागिरिरेवंनामकौ गिरिभेदौ ॥

महाकपालं हविः । अत्र "हविषि°" [७३] इत्यादिना दीर्घः ॥

महागवैर्युग्यैः । अत्र "गवि°" [७४] इत्यादिना दीर्घः ॥

महापद् । इत्यत्र "नाम्नि" [७५] इति दीर्घः ॥

कोटरावण । मिश्रकावण । सिध्रकावण । पुरगावण । सारिकावण । इत्यत्र "कोटर°" [७६] इत्यादिना दीर्घः ॥

अञ्जनागिरि । साल्वागिरि । इत्यत्र "अञ्जन°" [७७] इत्यादिना दीर्घः ॥

ज्ञातापि राजात्यमरावतीशभोगावतीशं सुतमुत्सुकोयम् ।
शरावतीशाजिरवत्यलंकारवत्यधीशांश्च युधे दिदेश ॥ ६२ ॥

६२. अयं राजा मूलराजः शरावत्यजिरवत्यलंकारवत्याख्यपुरीनृपांश्च । चः पूर्वादिष्टनृपापेक्षया समुच्चये । युधे दिदेशाज्ञापयत् । सुतं बलेनामरावतीशभोगावतीशौ शक्रशेषाही अतिक्रान्तं ज्ञाताप्युत्सुक उत्कण्ठितः प्रेमातिरेकात्पुत्रपरिभवाशङ्काकुलचित्तः सन्नित्यर्थः ॥

बहुस्वर । अमरावती ॥ शरादि । शरावती । इत्यत्र "अनजिरादि°" [७८] इत्यादिना दीर्घः ॥ बहुवचनमाकृतिगणार्थम् । तेन भोगावती ॥ बहुस्वरस्यानजिरादिविशेषणं किम् । अजिरवती । अलंकारवती ॥

वैश्वानरो नु प्रभयातिविश्वामित्रः स विश्वावसुगीतकीर्तिः ।
दन्तावलान्प्रेरयति स्म विश्वाराड्विश्वराजोपि च वत्सलत्वात् ॥ ६३ ॥

६३. स नृपो वत्सलत्वात्पुत्रवात्सल्याद्धेतोर्दन्तावलान् गजान्

१ प सी °मुत्सको°.

१ प सी हवि । म°. २ प सी इत्यत्र. ३ बी °काव°. ४ प सी डी °श्च पू°. ५ बी °ण्ठित प्रे°. ६ सी दीर्घ । ब°.

विश्वस्मिन् राजन्ते ये तान्विश्वराजोपि च नृपांश्च प्रेरयति स्म। कीदृक्। प्रभयाङ्गकान्त्या कृत्वा वैश्वानरो नु विश्वानरस्यर्षेरपत्यमिव बिदादित्वा-दञ् [६.१.४१]। वह्नितुल्यस्तथा प्रभया क्षात्रतेजसातिविश्वामित्रो विश्वा-मित्रं गाधिनन्दनमतिक्रान्तोत एव विश्वावसुना देवविशेषेण गीता कीर्तिर्यस्य सोत एव च विश्वस्मिन्सर्वत्र राजते विश्वाराट् ॥

न पैतृवल्यं न च मातृवल्यं सूनो रणे सप्तचितीकवद्यत् ।
एकाक्यगादित्यनुचिन्त्य दात्राकर्णैर्द्विपैः स स्वयमप्यचालीत्
॥ ६४ ॥

६४. दात्रमिव दात्रं चिह्नं कर्णयोर्येषां तैर्द्विपैः स मूलराजः स्वय-मप्यचालीत्। किं कृत्वा। अनुचिन्त्य। किमित्याह। यद्यस्मा-[३]द्धेतोः सूनोश्चामुण्डराजस्य पितास्यास्ति पितृवलस्तस्य भावः पैतृवल्यं[४] पितृयुक्तता नास्ति मातृवल्यं मातृयुक्तता च नास्ति तस्मात्परमार्थतः सूनुरेकाक्यसहाय एव सप्तचितीकवत्[५]। सप्त चितयोस्मिंस्तस्मिन्निवा-तिरौद्रत्वात्सप्तचितिश्मशानतुल्ये रणेगादिति ॥

दृष्ट्वाष्टकर्णाश्वसमैः पुरोश्वैरच्छिन्नकर्णैर्वलितान्नृपांस्तान् ।
स विष्टकर्णैः सह भिन्नकर्णैर्दध्याविति स्वस्तिककर्णकैश्च ॥ ६५ ॥

६५. स मूलराज इति वक्ष्यमाणं दध्यौ। किं कृत्वा। अश्वैः सह तान्युद्धार्थं प्राक्प्रेरितान्पुरगावणेशादिनृपान्वलितान्पुरो दृष्ट्वा। किंभूतैरश्वैः। अष्टकर्णाश्वसमैः स्वामिचिह्नार्थमष्टप्रकारौ कर्णौ यस्य स योश्व उच्चैःश्रवास्तेन समैः। तथा न च्छिन्नौ स्वामिचिह्नार्थं छेदा-

१ बी डी °तृवल्यं.

१ ए सी डी °रस्यार्षे°. २ ए सी गाधन°. ३ सी °द्धेतो सू°. ४ डी °ल्यं...मा°. ५ डी योस्मिन्नि°. ६ बी °पान्वलि°. ७ ए सी °मिनि चि°.

न्वितौ कर्णौ येषां तैः । तथा स्वामिचिह्नार्थत्वाद्विष्टौ मध्यलीनौ प्रमाणानुगतौ वा कर्णौ येषां तैः । तथा भिन्नौ स्वामिचिह्नार्थत्वेन भेदान्वितौ कर्णौ येषां तैः स्वस्तिककर्णैश्च स्वस्तिकाकारस्वामिचिह्नाङ्कितकर्णैश्च ॥

किं छिद्रकर्णस्रुवकर्णपञ्चकर्णान्तकृत्किंकरकर्मघोरात् ।
रणादमी नीवृत एव मर्माविल्कण्टकेभ्यो निरुपानहो नु ॥६६॥

६६. छिद्रं चिह्नं कर्णयोर्येषां ते तथा स्रुवो यज्ञोपकरणभेदाकारं चिह्नं कर्णयोर्येषां ते तथा पञ्च पञ्चसंख्यालिप्याकारं चिह्नं कर्णयोर्येषां स्वामिचिह्नार्थत्वात्पञ्चप्रकारौ कर्णौ येषां[3] वा ते तथा । त्रिपदे द्वन्द्वे । ते येन्तकृत्किंकरा यमकिंकरास्तेषां यत्कर्म मारणं तेन घोराद्रणात्सकाशादमी नृपाः किं नीवृत एव किमिति निवर्तन्त एव मर्माविल्कण्टके[4]भ्योरुंतुदकण्टकेभ्यः सकाशान्निरुपानहो नु यथा पादुकारहिता निवर्तन्ते ॥

युत्प्रावृषोमी अनृतीषहो भीपरीततः कुत्र नु राजहंसाः ।
यास्यन्ति नीरुग्भिरुगस्त्रभाजो नीक्लेदवन्तो रहिताः प्रहारैः ॥६७॥

६७. अमी[6] प्रत्यक्षा राजहंसाः प्रशस्यवंशोद्भवत्वेन नृपश्रेष्ठा युदेव शरवृष्टिमत्त्वात्प्रावृड्वर्षास्तस्या न[7] ऋतिं पीडां सहन्तेनृतीषहोत एव भियं परितन्वन्ति भीपरीततो रणाद्बिभ्यतः सन्तः क नु यास्यन्ति । राजहंसा हि प्रावृषो बिभ्यतः सन्तो मानसे यान्ति । एषां तु त्रिभुवनेपि स्थानं न जान इत्यर्थः । कीदृशाः । निरोचन्ते क्विपि नीरुग्भि परेषु

---

१ ए सी बन्धो र°.

---

१ सी °था मि°. २ डी° °र्ष ते स्वा°. ३ बी °र्षा ते. ४ ए सी °विकण्ट°. ५ बी °भ्योरंतु°. ६ सी असमी. ७ ए सी न र्तिं.

प्रहाराकरणेन रुधिराद्यालेपाभावाद्भितरां दीप्तानि निरुग्धि निर्भग्नानि[1] यान्यस्त्राणि तानि भजन्ति ये ते । तथा नीस्वेदवन्तो रणत्वरितपलायनोत्थश्रमातिरेकात्स्वेदवन्तस्तथा प्रहारै रहिताः ॥

स नः प्रसादोप्रतिहाररोधं प्रासादकक्षासु यतां मुधैषाम् ।
यन्नारकान्धातमसं प्रवेष्टुमपप्रतीहारमिदं प्रनष्टम् ॥ ६८ ॥

६८. अतिमान्यत्वान्नास्ति प्रतिहारैर्वेत्रिभी रोधो निवारणं यत्र तद्यथा स्यादेवं प्रासादकक्षासु सौधप्रकोष्ठेषु यतां गच्छतामेषां नृपाणां स महत्त्वेन प्रसिद्धो नोस्माकं[4] प्रसादो देशदानाद्यनुग्रहो मुधा निष्फलम् । यद्यस्माद्धेतोरेषामेतत्कर्तृकमिदं प्रत्यक्षं प्रनष्टं पलायनमपप्रतीहारमपगतकाष्ठिकं यथा स्यादेवं[7] नारकान्धातमसं नरकस्य महान्धकारं प्रवेष्टुमभूत् । रणे हि नष्टा नरकं यान्तीति स्मृतिः ॥

एषोनिकाशो नरकोथ वान्धतमस्यनीकाशभयं पराद्यत् ।
एतैरधीकण्ठ इव द्विषन्दक्षिणापथेशाप्यधिकण्ठजीवैः ॥ ६९ ॥

६९. अथ वेति[9] राज्ञां नरकान्तरोपदर्शनगर्भे पक्षान्तरे । अथ वा यत्पराच्छत्रोरन्धतमसं महामूढतात्रास्तीत्यन्धतमसि । अनीकाशभयमतिप्रकर्षप्राप्तत्वेन निरुपमं भयम्[11] । एष एवानिकाशो निरुपमो नरकः । प्रस्तुतार्थेन योजनायैषां राज्ञां भङ्ग्या भयमाह । एतैर्नृपैरधिकण्ठा[12] महाभयेन कण्ठमधिगता जीवाः प्राणा येषां तैस्तथा सन्निर्द्विषन्[13]

१ ए सी यतामु°. २ ए सी °न्धापत°. ३ ए सी डी °नत्थम् ॥.

१ ए सी डी निभग्ना°. २ डी °यनग्र°. ३ ए सी °नोग्र°. ४ बी °कं प्रासा°. ५ ए सी °नापुनु°. ६ ए सी डी °नत्थं प°. ७ सी °देव ना°. ८ ए सी यातीति. ९ ए सी °वेदिति. १० सी °गर्भप°. ११ ए सी °य य°. १२ ए सी °तैनृपै°. १३ ए सी °न्निद्विष°

लाटो दक्षिणः पन्था दक्षिणापथस्तस्मिन्वर्तमानोधिकाः कण्ठा यस्य सोधीकण्ठो दशकन्धर इवाज्ञायि रावण इवाजय्यो ज्ञात इत्यर्थः । तस्मात्पराद्यन्नयमेष एवैषामिह लोकेपि निरुपमो नरकः संपन्न इति परलोकभाविनरकचिन्तया किमिति तात्पर्यार्थः ॥

विश्वामित्रः[2] । अत्र "ऋषौ" [७९] इत्यादिना दीर्घः ॥

वैश्वानरः । अत्र "नरे" [८०] इति दीर्घः ॥

विश्वावसु । विश्वाराट् । इत्यत्र "वसुराटोः" [८१] इति दीर्घः ॥ राविति विकृतिनिर्देशादिह न स्यात् । विश्वराज(जः) ॥

वन्तावकान् । इत्यत्र "वलचि°" [८२] इत्यादिना दीर्घः ॥ अपित्रादेरिति किम् । पैतृवल्यम् । मातृवल्यम् ॥

सहचितीकवत् । इत्यत्र "चितेः कचि" [८३] इति दीर्घः ॥

दात्राकर्णैः । अत्र "स्वामिचिह्नस्य°" [८४] इत्यादिना दीर्घः ॥ विष्टादिवर्जनं किम् । विष्टकर्णैः । अष्टकर्ण[5] । पञ्चकर्ण । भिन्नकर्णैः । छिन्नकर्णैः । छिद्रकर्ण । स्रुवकर्ण । स्वस्तिककर्णकैः ॥

[नह् ।?] निरुपानहः ॥ वृत् । नीवृतः ॥ वृष् । प्रावृषः ॥ व्यध् । मर्माविध् ॥ रुच् । नीरुग् ॥ सह् । अनृतीषहः ॥ तन् । परीततः । अत्र "गतिकारकस्य°" [८५] इत्यादिना दीर्घः ॥ केचित्तु रुचाविच्छन्ति न रुचौ । तन्मते नीरुगिति रूपं रुजेर्निरुगिति तु रुचेरेवं च रुजिरुच्योर्मतभेदेन विकल्पः सिद्धः ॥

नीक्लेद । इत्यत्र "घञि°" [८६] इत्यादिना दीर्घः ॥ क्वचिन्न स्यात् । प्रहारैः ॥ क्वचिद्विकल्पः । प्रतीहारम् प्रतिहार ॥ क्वचिद्विषयभेदेन । प्रासाद गृह । प्रसादोनुग्रहः ॥ बहुलवचनादनुपसर्गेष्वप्यन्यपि च स्यात् ।

१ बी °णः पथा द°. २ सी °मित्र । अ°. ३ ए सी राविरिति. ४ सी °म् । स°. ५ ए सी °र्ण । भि°. ६ ए सी °पदेः । त°. ७ ए सी डी °गृहः । प्र°. ८ ए सी °स्वाप्य°.

दक्षिणापथे ॥ कश्चिद्विकल्पः । अन्धन्तमोऽन्धतमसम् अन्धतमसि ॥ कश्चिद्विषयभेदेन । अषीकण्ठः । अयमाधिक्ये । अन्यत्राधिकण्ठ ॥ कश्चिदुत्तरपदेपि विकल्पः । नारक नरकः ॥ काशशब्दे च घञन्ते विकल्पः । नीकाश निकाशः ॥ अजन्ते तूत्तरविधिः ॥

वीकाशमेते रिपुनीत्तपृष्ठा मुनीवहं पीलुवहं च यान्तु ।
श्वाकूर्दकैः श्वापदमन्दधीभिः श्वापुच्छवक्रैः श्वमुखैः किमेभिः ७०

७०. विकाशते विकाश्यते वा अपि वीकाशं प्रकटं यथा स्यादेवं रिपूणां नीत्तं नष्ट्वाभिदातुमारब्धं पृष्ठं यैस्त एते नृपा मुनीवहं पीलुवहं च पुरं यान्तु मुनीनां पीलूनां च वहं धारकमित्यन्वर्थनाम्नैव मुनीवहपीलुवहपुरयोररण्यप्रायत्वं सूचितम् । ततश्च रिपुदत्तपृष्ठत्वेन महेशेन्यराजदेशे च स्थानाभावादरण्यतुल्ये मुनीवहे पीलुवहे च मुनिवृत्त्या पीलुवृत्त्या चैते वर्तन्तामित्यर्थः । यत एभिर्नृपैः किं न किंचिदित्यर्थः । यतः शुन इव कूर्दो निष्फलं वल्गनं येषां तैस्तथा श्वापदं व्याघ्रादि तद्वन्मन्दा मूढा धीर्बुद्धिर्येषां तैस्तथा श्वापुच्छवक्रैः कुटिलाशयैस्तथा श्वमुखैर्भषणवक्रैः ॥

षोडद्रूषाभाः श्वपदापवित्राः षोढा बलेनापि शुता न शक्ताः ।
षद्धा तथैकादश षोडशार्थं वाराश्च श्वपुच्छं नमितं न चर्जु ॥७१॥

७१. श्वपदापवित्रा रणे भग्नत्वात्कुकुरांह्रिवदस्पृश्या एते नृपा रि-

१ सी °हं च. २ ए सी °वक्रै श्व°. ३ ए सी डी °मुखै कि°. ४ ए सी °श्व रोजान्. ५ ए सी चर्जुः ।.

१ ए बी सी °रकः न°. डी °रकः । का°. २ ए सी घडन्ते. ३ बी °त्यर्थः । ना°. ४ ए सी डी °नाम्नैव. ५ ए सी °देश्येन्य°. ६ डी °त्त्या चै°. ७ ए सी चैते व°. ८ बी °र्तन्तामि°. ९ ए सी °भिर्नृपैः. १० ए सी ते तथा. ११ बी धीबुद्धि°. १२ ए सी ते तथा. १३ ए सी °वक्रैः कु°.

पुविजये न शक्ताः[1] किंभूताः[2] । षोडवृषाभा अपि । अपिरत्रापि योज्यः । षड्दन्ता यस्य स षोडन् युवेत्यर्थः[3] । यो वृषो वृषभो बलयौवनादिना तत्समा अपि । तथा षोढा मौलबल[4] १ भृतकबल २ श्रेणिबल ३ अ-रिबल ४ सुहृद्बल ५ आटविकबल ६ भेदैः षड्विधेन बलेन सैन्येन[5] युता अपि । युक्तं चैतद्यतः षड्वा षड्भिः प्रकारैस्तथैकादश वारानथ तथा षोडश वारांश्च श्वपुच्छं नमितमृजूकृतं न चर्जु न च सरलं स्यात्तथास्वभावत्वात् ॥

वीकाशम् । अत्र "नामिनः काशे" [८७] इति दीर्घः ॥

नीरु । इत्यत्र "दृस्ति" [८८] इति दीर्घः ॥

मुनीवहम् । अत्र "अपील्वादेर्वहे" [८९] इति दीर्घः ॥ अपील्वादेरिति किम् । पीलुवहम् ॥

श्वाकूर्दकैः । अत्र "शुनः" [९०] इति दीर्घः ॥ बहुलाधिकारात्क्वचिद्विकल्पः । श्वापुच्छ श्वपुच्छम् ॥ क्वचिद्विर्षान्तरे[6] । व्याघ्रादौ श्वापद । शुनः[7] पदे श्वपद ॥ क्वचिन्न स्यात् श्वमुखैः ॥

एकादश । षोडश । षोडत् । षोढा । षड्वा[8] । इत्येते "एकादश°"[९१] इत्या-दिना निपात्याः ॥

द्वित्रा अथ द्वादश वा त्रयोदशाष्टादशाथ द्विशतं त्र्यशीत्या ।
लाटेश्वराः सन्तु स तांस्त्रिचत्वारिंशद्रजोर्ज्जेतुमलं कुमारः ॥ ७२ ॥

७२. द्वित्रा द्वौ वा त्रयो वाथाथ वा द्वादश त्रयोदश वाथाथ वाष्टाद-शाथ वा त्र्यशीत्या सह द्विशतं लाटेश्वराः सन्तु तथापि स कुमारस्ता-

---

१ सी शक्ता षो°. २ प भूता षो°. ३ प सी डी °र्थः । वृ°. ४ प सी डी °क भृ°. ५ प सी °न्येतयु.° ६ प सी °षर्यांतरे. ७ प सी शुन प°. ८ प सी षड्वा । इ°. डी षड्वा । इ°.

लॉटेश्वराड् जेतुमलं समर्थः । यतस्त्रिचत्वारिंशतो गजानामिवोग्रबलं यस्य स तथा ॥

एवं विचिन्त्य यच्चक्रे तदाह ।

द्वाषष्टिमष्टानवतिं त्रयश्चत्वारिंशतं साष्टनवत्यशीतिम् ।
शतं द्विषष्ट्यग्र्यमिषून्क्षिपन्तं स तं सुतं वीक्षितुमत्वरिष्ट ॥७३॥

७३. स्पष्टम् । किं तु । साष्टनवत्यशीतिमष्टनवतिसहितामशीतिम् । द्विषष्ट्यग्र्यं द्विषष्ट्याधिकं शतम् । स मूलराजः ॥

द्वादश । त्रयोदश । अष्टादश । इत्यत्र "द्वित्र्यष्टानां" [९२] इत्यादिना द्वा-त्रयस्-अष्टादेशाः ॥ प्राकृतादिति किम् । द्विशतम् ॥ अनशीतिबहुव्रीहौविति किम् । द्व्यशीत्या । द्वित्राः ॥

द्वाषष्टिम् द्विषष्टि । त्रयश्चत्वारिंशतम् त्रिचत्वारिंशत् । अष्टानवति[म्] अष्टनवति । इत्यत्र "चत्वारिंशदादौ वा" [९३] इति वा द्वा-त्रयस्-अष्टाः ॥

ऊचुः प्रणम्येत्यथ हृद्यहार्दहृल्लासहृल्लेखजुषो नृपास्ते ।
दिष्ट्या जयी द्विड्हृदयाम तुक्ते द्विषां हृदामो न ऋते पदातीन् ॥७४॥

७४. अथ राज्ञः सुतवीक्षात्वरानन्तरं ते नृपा राजानं प्रणम्येत्यूचुः । किंभूताः सन्तः । हृदयस्य प्रियं "हृद्यपद्य°" [७.१.११] इत्यादिना ये हृदये भवं "दिगादि°" [६.३.१२४] इत्यादिना ये हृदयाय हितं युगादित्वाद्ये [७.१.३०] वा हृद्यं यद्धार्दं हृदयस्य भावः कर्म वा "युवादेः" [७.१.६७] अण् । स्नेहस्तेन यो हृल्लासो हृदयोत्साहस्तेन यो

१ प सी °यदार्हह°. २ प सी न स्ते.

१ प सी डी °तश्चत्वा°. २ प सी °वोग्रंल. ३ प सी °देशः ॥ प्रा°. ४ बी °दि कि°. ५ प सी डी °हादिति. ६ बी °षष्टि द्वि°. ७ प सी °नं तरं ते नृपा राजानं. ८ डी °य सहि°. ९ बी °यभा°. १० प सी डी °न ह°.

हृल्लेख उत्कण्ठा तं जुषन्ते सेवन्ते ये ते । किमूचुरित्याह । हे द्वि-हृद्याम दुःखत्वाच्छत्रुहृदयेषु रोगतुल्य[2] ते तव तुक्पुत्रो द्विषां[3] हृद्रामो हृदयरोगतुल्यो नोस्मान्पदातीन्विना दिष्ट्या क्षेमेण जयी वर्तते । योपि हृद्रोमः क्षयव्याधिः सोपि द्विषां द्वेषं कुर्वतां नृणां जयी द्वेषेण प्रवर्ध्य-मानत्वादतिपरिभावुकः स्यादित्युक्तिलेशः ॥

पदाजयस्ते पद्गैः पदोपहतक्ष्मैर्यावदमी न यामः ।
तावच्च दृष्टस्त्वसतामरीणां पत्काषिणां पद्धतिपद्यपांशुः ॥ ७५ ॥

७५. हे राजंस्ते[6] तवामी अस्मल्लक्षणाः पदाजयः पत्तयः[7] पादाभ्या-मुपहता क्षमा भूर्यैस्तैः पद्गैः पत्तिभिः सह यावन्न यामस्तावच्चारीणां पद्धतेर्मार्गस्य पद्यः पादोत्थो यः पांशुः स दृष्टः । कीदृशां सताम् । असतां कुमाराद्बिभ्यतामत एव पत्काषिणां पादावभीक्ष्णं[8] मार्गेण सह कषतां नश्यतामित्यर्थः ॥

पद्गाः[1] शरैः पादुपहत्यभाजोयुः पद्धिमार्ता[2] इव विभवेषाः ।
पच्छः प्रगायन्त[3] ऋचोपपादशब्दाः[4] सपच्छब्दरथान्विनैके ॥ ७६ ॥

७६. एके भटाः सपच्छब्दरथान् गमनहेतुत्वात्पादा इव पादा-श्चक्राणि तेषां शब्दश्चीत्कृतिः सह तेन ये ते ये रथास्तान्विना । स-पच्छब्दत्वेन भयहेतुत्वाद्रथान्मुक्त्वेत्यर्थः[9] । पद्गाः पादचारिणोयुर्गताः । किंभूताः सन्तः । पद्धिमार्ता[10] इव पादयोर्हिममवश्यायः[11] पद्धिमं तेन

१ बी पद्गा श°. २ ए डी °द्धिमर्ता°. सी °द्धिमता इ°. ३ ए सी °न्तप°. ४ ए सी °शब्दा स°.

१ बी °खकत्वा° २ ए सी रोमतु°. ३ बी द्विषान् हृ°. ४ ए सी डी °दामोक्षय्या°. ५ बी °त्वादिति. ६ ए सी °स्ते तावा°. ७ ए सी °यः पदा°. ८ ए सी डी °भीक्ष्णमा°. ९ ए सी °मुक्तेत्य°. १० डी °द्धिमर्ता°. ११ ए सी °श्याय प°.

ऋताः पीडिता यथा पादुपहत्यभाजः स्युस्तथा शरैः कृत्वा पादयोरुपहताः पदुपहतास्तेषां भावः पादुपहत्यं तद्व्रजन्ति ये ते । तथा पादव्यथान्विता अत एवापपादशब्दाः शनैर्गमनेन पादोत्थघोषरहिताः । अत एव च विप्रवेषा मन्दगतीनस्मान्मा कोपि शीघ्रमन्वागत्य परिज्ञाय च वधीदिति स्वाकारापह्नवाय ब्राह्मणवेषधारिणः । अत एव च ऋचो मन्त्रभेदान्पच्छः प्रगायन्ते ऋचां पादं पादं वेदध्वनिभेदेनोच्चारयन्तः ॥

पद्घोषि पन्मिश्रमपादमिश्रं प्रोज्झ्याश्ववृष्ट्रैरपपादघोषैः ।
त्यक्तात्मपन्निष्ककलत्रपादनिष्काश्च नस्तोसुषु जग्मुरन्ये ॥ ७७ ॥

७७. अन्ये भटा नस्तः आद्यादित्वात्तस् [७.२.८४.] । नासिकायां सत्स्वसुषु । मरणमहाभयेन नासिकागतेषु प्राणेष्वित्यर्थः । उष्ट्रैर्जग्मुर्नष्टाः । यतोपपादघोषैरपगतांह्रिशब्दैः । उष्ट्राणां हि गच्छतां पादघोषो न स्यात् । किंभूताः सन्तः । त्यक्ता मरणभयेनैव व्युत्सृष्टा आत्मनः स्वस्य पन्निष्काः पादयोर्निष्का वीरकटकाद्यलंकारीकृतानि स्वर्णानि कलत्राणां पादनिष्काश्च पादयोर्नूपुराद्यलंकारीकृतानि स्वर्णानि च यैस्ते तथा । किं कृत्वा जग्मुः । पन्मिश्रं बहीर्यस्त्वेन मिथः पादसंकरात्पादेषु मिश्रं संकीर्णं तथापादमिश्रं सुलक्षणत्वान्न पादेषु स्वकीयांह्रिषु मिश्रं मिलितमुपलक्षणत्वादन्यैरप्यपलक्षणै रहितमाश्वमश्वौघं प्रोज्झ्य त्यक्त्वा । यतः पद्घोषि पादशब्दान्वितम् । आश्वस्य हि यातः पादघोषः स्यात्तेन च नश्यन्तो लक्ष्यन्ते ॥

नःक्षुद्रकाः के चन नस्यघातैर्वक्तुं न नासिक्यमलं बभूवुः ।
शीर्षण्यघातैश्च लुलच्छिरस्याः शीर्षण्यपाशान्न नियन्तुमीशाः ॥ ७८ ॥

७८. के चन भटा नस्यघातैर्नासिकायां भवैः प्रहारैर्नःक्षुद्रका-

१ प नक्षुःद्र॰. सी नक्षुद्र॰.

१ प सी च रुचो॰. २ प सी ॰न्त रुचां. ३ सी ॰ककका॰. ४ डी ॰श्रं बही॰. ५ प सी ॰यस्तेन. ६ प सी ॰शांह्रिषु.

च्छिन्ननासिकत्वात्स्वल्पनासिकाः सन्तो नासिक्यं नासिकास्थानं वर्णं वक्तुमुच्चारयितुं नालं न समर्था बभूवुः । के चन च शीर्षण्यघातैः शिरसि भवैः प्रहारैः कृत्वा लुलन्तो विसंस्थुलाः शिरस्याः[1] शिरसि भवाः केशा येषां ते तथा सन्तः शीर्षण्यपाशान्केशकलापाभियन्तुं[2] संवरीतुं नेशा न समर्था बभूवुः । यद्वा । शिरसा तुल्यानि शाखादित्वाद्ये [७.१.११४] शीर्षण्यानि शिरस्त्राणानि तेषु घातैः कृत्वा लुलैश्छिरस्या[3] भ्रंसमाना[4]शिरस्त्राणाः सन्तः शीर्षण्यपाशान् शिरस्त्राणबन्धाभियन्तुं नेशा बभूवुः ॥

हृल्लास । हृल्लेख । हार्द । हृद्य । इत्यत्र "हृदयस्य°" [९४] इत्यादिना हृदादेशः ॥ हृदयशब्दसमानार्थेन हृच्छब्देनैव सिद्धे हृदादेशविधानं लासादिषु हृदयशब्दप्रयोगनिवृत्त्यर्थम् । अन्यत्र तूभयं प्रयुज्यते ॥ हृ[5]र्दा[6]मः हृदयां[7]म ॥

पदाजयः । पदातीन् । पदगैः । पदोपहत । इत्यत्र "पदः°" [९५] इत्यादिर्ना[8] पदः ॥

पद्धि[9]म । पद्धति । पत्काषिणाम् । पद्य । इत्यत्र "हिमहति°" [९६] इत्यादिना पत् ॥ अन्ये तु गोपहतयोरपीच्छन्ति । पद्गाः[10] । पादुपहत्य ॥

पच्छ[11][12] ऋचः प्रगायन्तः । अत्र "ऋ[13]चश्शसि" [९७] इति पत् ॥

पच्छब्द[14] पादशब्दाः । पन्निष्क पादनिष्काः । पद्घो[15]षि पादघोषैः । पन्मिश्रम् पादमिश्रम् । अत्र "शब्दनिष्क°" [९८] इत्यादिना [वा] पत् ॥

न[16]स्तः । नःक्षुद्रकाः । अत्र "नस्°" [९९] इत्यादिना नस् ॥

---

१ प सी °रस्या शि°. २ प सी °यन्तु सं°. ३ बी °लच्छर°. ४ बी भ्रंशमा°. ५ डी हृद°. ६ प सी °दाम हृ°. ७ प बी सी डी °यामः । प°. ८. डी °ना पादशब्दस्य प°. ९ प सी डी °द्धिमः । प°. १० प सी पद्गा पा°. ११ बी डी पच्छः ऋ°. १२ प सी °च्छ ऋचः. १३ प बी डी ऋचः श्श°. १४ प सी डी °च्छब्दः पा°. १५ प सी °द्घोषिः पा°. १६ सी °स्तः । नक्षु°.

नस्यं। इत्यत्र "नेवर्णे" [१००] इति नस्॥ अवर्ण इति किम्। नासिक्यम्॥

शीर्षण्यघातैः। अत्र "शिरसः शीर्षन्" [१०१] इति शीर्षन्॥

शीर्षण्यपाशान् शिरस्याः। अत्र "केशे वा" [१०२] इति वा शीर्षन्॥ केचित्तु

इत्वला मृगशीर्षस्य शिरस्यास्तारकाः स्मृताः।

इति प्रयोगदर्शनात्केशादन्यत्रापि विकल्पमिच्छन्ति। शाखादियप्रत्यये च शीर्षन्निति नेच्छन्त्येव। तन्मतमाश्रित्य शिरस्या इत्यत्र द्वितीयव्याख्याने शिरसः शीर्षन्नभावः॥

द्रांक्[1]शैर्षिकाः केप्युदपेषमे[2]णमदेन पिष्टेन सुगन्धयोधुः।

प्रिया विहायोदधिकुम्भचारूदवाहना[3] अध्युदवासजस्त्रि॥ ७९॥

७९. उदपेषं पिष्टेनोदकेन घृष्टेनैणमदेन कस्तूरिकया सुगन्धयो विलेपनात्सौरभाढ्याः केपि भटा अध्युदवासजस्त्रि। उदके वास उद-वासस्तस्माज्जाता याः स्त्रियोप्सरे[2]सस्तासु द्रागयुर्देवीभूता इत्यर्थः। यतः शैर्षिकाः शिरसा दीव्यन्तो जयन्तो वा। इकण्[3]। महाशूरत्वाद्रणे शिरःप-णीकारकाः। किं कृत्वा। प्रियाः स्वभार्या विहाय। किंभू[4]ताः। उदकं धीयत एष्वित्युदधयो रणश्रान्तकान्तानां पानाय जलभृता ये कुम्भा-स्तैश्चा[5]रू[6]ण्युदवाहनानि जलवाहनानि शकटानि यासां ताः। एतेन प्रिये[7]ष्वत्यनुरागोक्तिः॥

---

१ प सी द्राकौर्षि°. २ सी °मंदे°. ३. प सी डी °नादध्यु°.

१ प सी नस। इ°. २ प सी °रस्ता°. ३ प सी °कण। म°. डी °कणि म°. ४ प सी °भूपाः। उ°. ५ प सी °श्चारुण्यदद°. डी °श्चारुण्यद°. ६ बी °रूण्यद°. ७ बी °येष्वित्य°.

शौर्षिकाः । अत्र "शीर्षः" [१०३] इत्यादिना शीर्षः ॥

उदपेषम् । उदधिकुम्भ । उदवास । उदवाहनाः । अत्र "उदकस्य°" [१०४] इत्यादिनोदः ॥

भिन्नोन्य आशूदककुम्भभेत्त्रोदकुम्भवत्स्वप्रिययोदहार्या ।
साश्रूदबिन्दूदकबिन्दुपङ्क्त्योक्ष्यमाण आपोदकहारभूषाम् ॥८०॥

८०. अन्यो भट उदकहारभूषामुदकबिन्दूनां हाराकारेण पातादुदकस्य यो हारस्तस्य भूषां शोभामाप । कीदृक्सन् । उदकुम्भवद्यथा जलेघट उदककुम्भभेत्त्रा जलघटभेदकेन नरेण भिद्यत एवमाशु भिन्नः कुमारभटेन केनचिद्विदारितः । अत एवोदहार्या पत्युर्जलपानाद्यर्थं जलमानेत्र्या स्वप्रिययोक्ष्यमाणः सिच्यमानः । कया कृत्वा । अश्रूणि पतिदुःखोद्भूतकष्टोत्थानि नेत्रजलानि तान्येवोदबिन्दवो जलकणाः सह तैर्या सा तथा योदकबिन्दुपङ्क्तिर्मूर्छापनोदाय प्रक्षिप्ता जलकणश्रेणिस्तया ॥

सिन्धूदमन्थोदकमन्थजेभोदवज्रनादोर्युदकौदनादी ।
उदौदनं नूदकवज्रभीमासिना निपिष्टोपि ननर्त कश्चित् ॥ ८१ ॥

८१. कश्चिद्भटो ननर्त महाशूरत्वाद्रणचिकीर्षया ववल्ग । कीदृशः । अरय एवोदकमिश्रं ओदनोर्युदकौदनस्तमत्तीत्येवंशीलः । महाबलत्वादनायासेनारिविनाशक इत्यर्थः । अत एव सिन्धोरब्धेर्य उदकं मथ्यतेनेन "पुंनाम्नि" [५.३.१३०] घे उदमन्थो मन्दरस्तेन य उदकमन्थो जलविलो-

१ ए सी °दभिन्थो°. २ ए सी °कभिन्थ°.

१ ए सी शोर्पि°. २ बी °लकुम्भ उ°. ३ बी °नार्थं. ४ डी °र्थं कुमभा°. ५ ए सी °तिदुषोद्भ°. ६ ए सी °श्र उद°.

डनं तस्माज्जातौ याविभोदवज्रावैरावणविद्युतौ तयोरिव नादोरिजयं-सूचकः सिंहनादो यस्य स तथा सन्कुमारभटेन केनाप्युदकवज्र-भीमासिना विद्युद्रौद्रखङ्गेन कृत्वोदौदनं नूदकमिश्रौदनमिवं निपिष्टोपि छिन्नमूर्धापि ॥

रणोदगाहाद्रुधिरोदभाराः केपि क्षणेनोदकगाहमीयुः ।
प्रियोदसक्तूदकभारजन्तुव्यग्रा व्रणाग्रोदकसक्तुशुभ्राः ॥ ८२ ॥

८२. केपि भटाः क्षणेनोदकँगाहं नद्यादिजलमध्यविलोडनंमीयू रुधिरप्रक्षालनार्थं प्रापुः । किंभूताः सन्तः । रणमेव दुष्करत्वादुदगाहो जलविलोडनं तँस्मादनेकप्रहारव्याप्ताङ्गत्वाद्धेतोरित्यर्थः । रुधिरमेवाति-बाहुल्यादुदभारो जलप्रवाहो येषां तेत एव रुधिरप्रवाहोपशमाय व्रणा-ग्रेषु प्रहारक्षतमुखेषु य उदकसक्तवो जलमिश्रसक्तुपिण्डिकाः । प्रहारेंषु हि पथ्यत्वात्सक्तुपिण्डिका बध्यन्ते । तैः शुभ्राः श्वेता अत एव च प्रिया उदँसक्तवं उदकमिश्राः सक्तवो येषां ते य उदकभारजन्तवो जलप्रवाह-जन्तवो यादांसि तैर्व्यग्रा नद्यादिजलप्रदेशे व्याप्ताः ॥

क्षीरोदविस्फार्युदवीवधार्भैर्मैङ्क्षूदपानोदकवीवधाभाः ।
देवेति दत्तेत्यथ देवदत्तेत्यूचुर्मिथः केपि हतास्त्वदीयैः ॥८३॥

८३. केपि भटाः पीडार्तत्वेन तुच्छत्वेन च शरणार्थित्वान्मिथोन्यो-न्यमूचुः । किमित्याह । देवेति हे देव मां रक्षेति । मां रक्षेत्याद्यध्याहार्यम् । तथा दत्तेति हे दत्त मां रक्षेति । अथ देवदत्तेति हे देवदत्त मां रक्षेति च । किंभूताः सन्तः । उदकं पीयतेस्मिन्नुदपानं कूपाद्यावादि निपानं त-[१०]स्योदवीवधो जलमार्गोल्पत्वेन स्वाक्रम्यत्वात्तेनाभा साम्यं येषां ते तथा-

---

१ सी °यच°. २ प सी °व नपि°. ३ प सी °कम्राहं. ४ प सी °नमयू°. ५ प सी तस्मेद°. ६ प सी °पु पिथ्य°. ७ डी °दक°. ८ प सी °व द°. ९ प सी डी भटा पी°. १० प सी °वीविधे ज°.

त एव क्षीरमेवोदकं यत्र स क्षीरोदः क्षीराब्धिस्तस्य विस्फारी प्रसृमरो य उदवीवध उदकमार्गो महत्त्वेनानाक्रम्यत्वात्तेनाभा येषां तैस्त्वदीयैर्भटैर्मेक्षु हताः प्रहृताः ॥

उदकुम्भ उदककुम्भ । इत्यत्र "वैक°" [१०५] इत्यादिना वोदः ॥

उदमन्थ उदकमन्थ । उदौदनम् उदकौदन । उदसक्तु उदकसक्तु । उदबिन्दु उदकबिन्दु । उदवज्र उदकवज्र । उदभाराः उदकभार । उदहार्यो उदकहार । उदवीवध उदकवीवध । उदगाहात् उदकगाहम् । अत्र "मन्थौदन°" [१०६] इत्यादिना वोदः ॥

उदपान ॥ उत्तरपदस्य । क्षीरोद । इत्यत्र "नाम्नि°" [१०७] इत्यादिनोदः ॥

देव दत्त देवदत्त । इत्यत्र "ते लुग्वा" [१०८] इति पूर्वोत्तरपदयोर्लुग्वा ॥

द्वीपान्तरीपप्रभवः परापानूपेश्वरा लाटसखाय एयुः ।
सूनोस्तवाग्रेङ्गुलिमप्रतीपंमन्यावलंमन्यतयाच्छिदंस्ते ॥ ८४ ॥

८४. द्विधा गता आपो यत्र तद्द्वीपम् । अन्तर्गता आपो यत्र तदन्तरीपम् । यद्यप्यनयोर्नाममालास्वेकार्थता तथापि जलमध्यस्थं बेटकमिति प्रसिद्धं द्वीपं जलसमीपस्थं चान्तरीपमिति भेदो ज्ञेयः । तयोः प्रभवः । परावृत्ता आपोस्मिन्परापं पुरभेदः । अनुगता आपोस्मिन्ननूपो जलबहुलो देशस्तयोरीश्वराश्च लाटसखायो लाटेशसाहाय्यकारिणः सन्तो यत्तदोर्नित्याभिसंबन्धाद्य एयुरागतास्ते तव सूनोरग्रेङ्गुलिं कनिष्ठामच्छिदन् वेलायत्तीबभूवुरित्यर्थः । कया हेतुना ।

---

१ डी परीपा°. २ ए सी लाखस°.

---

१ ए सी °नाम ये°. २ ए सी °कवि°. ३ सी °दव°. ४ ए सी डी °भारः । उ° बी °भारम् । उ°. ५ ए सी °त्र मेथौद°. ६ ए सी डी तxxद°. ७ ए सी °लास्वेका°. ८ डी द्वीपस्थं. ९ डी °न्परीपं. १० ए सी °कारणः.

अप्रतीपंमन्याबलंमन्यतया । अप्रतीपानप्रतिकूलानात्मनो मन्यन्ते-प्रतीपंमन्या येबलंमन्या निःसत्त्वादबलाः[1] स्त्रिय आत्मनो मन्यमानास्तेषां भावेन ॥

अरुंतुदास्त्रैः सृजतीह दोषामन्यं दिनं त्वत्तनयेर्प्यते स्म ।
गीर्मन्यकैः कैरपि दण्डसत्यंकारोगदंकारनिभे स्वपुत्राः ॥ ८५ ॥

८५. अगदंकारनिभे वैद्य इव सकलजगद्धित इत्यर्थः । इह त्वत्तनयेरुंतुदास्त्रैर्मर्माविच्छस्त्रैः कृत्वा दिनं[2] दोषामन्यं रवेरा[3]च्छादितत्वेनान्धकारितत्वाद्रात्रिमात्मानं मन्यमानं सृजति कुर्वति सति कैरपि नृपैः स्वपुत्रा दण्डसत्यंकारो दण्डे करविषये सत्यंकारोर्प्यते स्म । यतः सुप्रतिष्ठवाक्तया गिरं वाग्दे[4]वीमात्मानं मन्यन्ते गीर्मन्याः कुत्सिता गीर्मन्या[5] गीर्मन्यकास्तैर्लोकमध्ये कुत्सि[6]तवाक्प्रतिष्ठमात्मानं मन्यमानैः । ते हि लोके कुत्सितवाक्[7]प्रतिष्ठमात्मानं मन्यन्त इति तव दण्डं दास्याम इति स्ववाक्प्रतीत्यर्थं त्वत्पुत्रे स्वपुत्रानेव सत्यंकारं ददुरित्यर्थः ॥

नष्टप्रनष्टप्रहृतेषु सोस्तुंकारोतिमध्यंदिनसूर्यतेजाः ।
लाटोथ लोकंपृण[1]मभ्यनभ्यो[2]शमित्यं[3]मेत्याह्वयतात्मजं ते ॥ ८६ ॥

८६. अथातिमध्यंदिनसूर्यतेजा अतितेजस्वित्वात्प्रहरद्वयस्थसूर्यमतिक्रान्तः स लाटस्त[8] आत्मजमेत्यागत्याह्वयत सस्पर्धमाकारयत् । कीदृक्सन् । नष्टप्रनष्टप्रहृतेषु स्वभटेष्वस्तुंकारः । अस्त्विति निपातोभ्युपगमे । अस्तु करोति कर्मण्यण्[9] । नष्टप्रनष्टप्रहृताश्चेन्नष्टप्रनष्टप्रहृताः

१ प सी डी °कंप्रण°. २ प सी °भ्याममि°. ३ डी °त्यमित्या°.

---

१ डी °लाः श्रिय°. २ प सी दिन्य दो°. ३ प सी °वेत्राच्छा°. ४ प सी वाग्वेदीमा°. ५ प सी °न्या गैर्मं°. ६ प सी °त्सिकवा°. बी °त्मितं वा°. ७ प सी डी °क्प्रसिद्धमा°. ८ प सी °टस्तेन आ°. डी °टस्ते तव आ°. ९ सी °र्मणाण् ।०

सन्निवति[1] स्वभटानां नष्टप्रनष्टप्रहृतत्वं स्वभुजबलावलेपेनाङ्गीकुर्वन्नित्यर्थः[2][3] । कीदृशम् । लोकंपृणमपि कान्ततादिगुणैर्जगदाह्लादकमपि[4] । अपिर्विरोधे । अनभ्याशमित्यमनभ्याशं[5] दूरमित्यं[6] गन्तव्यं यस्मात्तम्[7] । अनभ्याशेनेत्यं दूरेण प्राप्यमिति वा । तदातिरौद्रत्वाद्दूरात्परिहर्तव्यमित्यर्थः ॥

तमात्मलोकंम्रिणमात्मलोकंम्रीणः कुमारोपि रुचाग्निमिन्धः ।
मत्स्यंगिलो मत्स्यमिवारिधानौघभ्राष्ट्रमिन्धस्तरसाभ्यधावत् ॥८७॥

८७. कुमारोप्यात्मलोकंम्रिणं स्वप्रजाह्लादकं तं लाटं तरसा वेगेनाभ्यधावत्संमुखं धावितः । कीदृक्सन् । रुचा तेजसाग्निमिन्धोग्निरिवेन्धो दीप्यमानोत एवारय एवं धाना उपचाराद्भर्जनार्था[8] यवास्तेषामोघे[9] भ्राष्ट्रमिन्धे प्रज्वलयति भ्राष्ट्रमिन्धो भ्राष्ट्राजीवी यथा भ्राष्ट्राजीवी[10][11][12] धाना अग्निना पचत्येवमरींस्तेजसा पचन्नत एवात्मलोकंम्रीणः । यथा मत्स्यंगिलो मत्स्यं गिलनेच्छयाभिधावति ॥

रणाकिधतैमिंगिलगिल्यभाजौ स्वपक्षभद्रंकरणावभूताम् ।
अन्योन्यमुष्णंकरणाय रात्रिचरारिरात्रिंचरराड्डलौ तौ ॥ ८८ ॥

८८. स्वपक्षभद्रंकरणौ स्वकीयवर्गस्य रक्षया क्षेमंकरौ तौ कुमारलाटावन्योन्यमुष्णंकरणायोष्णस्य[13] संतापस्योत्पादनायाभूताम् । किंभूतौ सन्तौ । रात्रिचरारिरात्रिंचरराड्डलौ रामरावणतुल्यशक्ती । अत एव

---

१ सी डी °त्स्यरिवा°. २ प सी डी °भ्राष्टमि°. ३ प सी °करुणा°. ४ प सी °करुणा°.

१ बी °ति स्वभ°. २ सी °ब्वेना°. ३ प °लेना°. ४ प सी डी °दिगुंणै°. ५ बी °भ्यासमि°. ६ प सी डी °भ्यासि दू°. बी °भ्यासंदू°. ७ प सी डी °सम् । अभ्या°. ८ बी °व प्रधा°. ९ प सी डी °परा°. १० प सी यथास्ते°. ११ डी भ्राष्ट्र°. १२ प सी डी भ्राष्टाजी°. १३ प सी °करुणा°.

गिलस्य गिलो गिलगिलस्तिमीनां गिलगिलस्तिमिंगिलं गिलति वा तिमिंगिलगिलस्तस्य भावस्तैमिंगिलगिल्यं महत्तमतिमिनिगळनं[1] तेन चात्र रणस्याब्धित्वेन रूप्यमाणत्वाद्भटनिगलनशक्तमहाभटनिगलनमाक्षिप्यते । रणाब्धौ तैमिंगिलगिल्यं भजतो यौ तौ । तथा रात्रिचरारिरात्रिंचरराजावप्युक्तविशेषणोपेतौ मिथ उष्णंकरणायाभूताम् । यावप्यब्धितैमिंगिलगिल्यभाजौ तिमिंगिलगिलौ महा[2]मत्स्यौ स्यातां तावपि [3]मिथ उष्णंकरणाय भवतः ॥

तैर्थंकरे तैर्थकरान्तरे वा कथानकेप्यश्रुतपूर्वयुद्धे ।
भूधेनुभव्याद्वृषराज रात्रिमन्यं दिनं चक्रतुरायुधैस्तौ ॥ ८९ ॥

८९. हे धेनुश्चासौ भव्या च धेनुभव्या भूरेव रत्नपयोदोहहेतुत्वाद्धेनुभव्या तत्र वृषराज वल्लभत्वाद्वृषभश्रेष्ठ तौ कुमारलाटावायुधैः कृत्वा दिनं रात्रिमन्यं चक्रतुः । क । अश्रुतपूर्वयुद्धे भूतपूर्व[4]त्वेनाश्रुतपूर्वं यद्युद्धं तस्मिन्निरुपमे युद्धे । काश्रुतपूर्वमित्याह । कथानकेपि । आस्तां सांप्रतमित्यपे[5]रर्थः । किंभूते कथानके । तैर्थंकरे । तीर्थंकरो भगवानर्हं[6]स्तदुपलक्षितः कालोप्युपचारात्तीर्थंकरस्तत्र भवे विद्यमानती[7]र्थंकरकालभवे भरतबाहुबलिकथादौ । तैर्थकरान्तरे वा । तीर्थंकरान्तरालकालभवे वा रा[8]मायणादिकथायाम् । क्वचित् 'अश्रुतपूर्वबुद्धे' इति पाठस्तदा तैर्थंकरे तैर्थकरान्तरे वा कथानकेपि सर्वोत्तमत्वेन न श्रुतपूर्वा बुद्धिर्यस्य तस्य राज्ञः संबोधनम् ॥

---

१ सी °रात्रिं°.

---

१ बी °निगिल°. २ ए सी °हाप्यम°. ३ ए सी मिव उ°. ४ ए.सी °त्वेमाश्रु°. ५ डी °त्यर्थः ।. ६ ए सी °स्तलुप° ७ सी °तीर्थक°. ८ ए सी °मायिणा°.

रसादनन्यार्थपरैश्च धेनुंभव्यासुतौ न्वस्पृहितान्यदर्थौं ।
दृष्टौ सुरैः स्वैस्त्वकृतान्यदास्थान्यद्रागमेतौ युदनन्यदूती ॥ ९० ॥

९०. एतौ कुमारलाटावनन्यार्थपरैरनन्यप्रयोजननिष्ठैरद्भुतरणकारित्वात्तद्दर्शन एवात्यन्तासक्तैरित्यर्थः । सुरैर्देवै रसात्कौतुकात् स्वैस्तु स्वकीयसैन्यैः पुनरकृतावन्यदास्थान्यस्मिन्स्वप्रभोरितरस्मिन्नास्थालम्बनमन्यद्रागोन्यस्मिन्स्वप्रभोरितरस्मिन् रागः स्नेहश्च यत्र तद्यथा स्यादेवं दृष्टौ च । चः पूर्ववाक्यार्थापेक्षया समुच्चये । किंभूतौ सन्तौ । अस्पृहितोन्यः प्रस्तावाद्रणादपरोर्थः कार्यं यकाभ्यां तौ तथात एव युधः सकाशादविद्यमानान्यत्रोतिः संबन्ध आसक्तिर्ययोस्तौ तथात्यन्तं रणासक्तौ । धेनुंभव्यासुतौ न्विति । यथा प्रधानगोपुत्रौ महाशण्डावस्पृहितान्यदर्थौं युदनन्यदूती सन्तावनन्यार्थपरैर्लोके रसाद्दृश्येते ॥

किमन्यदाशीर्वचनान्यदाशान्यदास्थितत्त्वैरिति न व्यधत्ताम् ।
तदान्यदुत्सुक्यमिमौ जयस्यान्यत्कारकेस्याद्धि यशोन्यदीयम्
॥ ९१ ॥

९१. इमौ कुमारलाटौ तदान्यस्मिन्मित्रभृत्यादावुत्सुकावुत्कण्ठितावन्यदुत्सुकौ तयोर्भाव आन्यदुत्सुक्यं तन्न व्यधत्तां विजये कस्यापि साहाय्यं नापेक्षितवन्तावित्यर्थः । कुत इति हेतोस्तमेवाह । हि यस्माद्धेतोर्जयस्य कर्मणोन्यो यः कारकस्तस्मिन्नन्यत्कारके स्वस्मादितरस्मिन्विधातरि सति यशोन्यदीयमन्यसंबन्धि स्यात्तस्मादन्यस्मिन्स्वस्मादितरस्मिन्मित्रभृत्यादौ साहाय्यकर आशीर्वचनानि त्वं मद्विषो जीया इत्यादिमङ्गलशंसनान्यन्यदाशीर्वचनानि तथा स्यादन्यस्मिन्मि-

१ सी °कृदा°. २ ए सी युनन°. ३ बी °दासीर्व°. ४ ए सी °त्कारेके.

१ ए सी °सक्तैरि°. २ ए सी डी °न्यदस्था°. ३ डी °त्यन्तर°. ४ ए सी °साद्दश्यते ।. ५ ए सी °त्कारेके. ६ ए सी डी °न्यदा°. ७ ए सी तस्मान्वस्मि°. बी तथा अस्मि°.

अभूत्वाद्वावाशा जयमनोरथोन्यदाशा तथान्यदाश्रितस्वमन्यस्मिन्मित्रादौ शत्रुविजयार्थमाश्रयणम् । इन्द्वे । तैः किम् । न किंचिदित्यर्थ इति ॥

द्वीप । अन्तरीप । प्रतीप । इत्यत्र "अन्तर्°" [१०९] इत्यादिना ईप्[1] ॥ अनवर्णादिति किम् । परीप ॥

अनूप । इत्यत्र "अनोर्देशे उप्" [११०] इत्यप[2] उप् ॥

अप्रतीपंमन्य । अबलंमन्य ॥ अरुष् । अरुंतुद । इत्यत्र "खिति°" [१११] इत्यादिना मोन्तो यथासंभवं ह्रस्वश्च ॥ अनव्ययेति किम् । दोषामन्यम् ॥ अरुःशब्दोपादानादनव्ययस्य व्यञ्जनान्तस्य मो न स्यात् । गीर्मन्यकैः ॥

सत्यंकारः । अगदंकार । अस्तुंकारः । इत्यत्र "सत्यागद°[3]" [११२] इत्यादिना मोन्तः ॥

लोकंपृणम् । मध्यंदिन । अनभ्याशमित्यम् । इत्येते "लोकंपृण°" [११३] इत्यादिना निपात्याः ॥ अन्ये तु प्रीणातेर्णिगन्तस्यापि ह्रस्वत्वं निपात्य लोकंप्रिणमित्युदाहरन्ति ॥ कश्चित्त्वकृतह्रस्वत्वमेव मन्यते । लोकंप्रीणः ॥

भ्राष्ट्रमिन्धः[5] । अग्निमिन्धः[6] । इत्यत्र "भ्राष्ट्र°" [११४] इत्यादिना मोन्तः ॥

मत्स्यंगिलः । तैमिंगिलगिल्य । इत्यत्र "अगिलाद्°" [११५] इत्यादिना मोन्तः ॥ अगिलादिति किम् । तैमिंगिलगिल्य[7] ॥

भद्रंकरणौ । उष्णंकरणाय । इत्यत्र "भद्रोष्णात्करणे" [११६] इति मोन्तः ॥

रात्रिंचर[8] रात्रिचर । इत्यत्र "न वाखित्°" [११७] इत्यादिना मोन्तो[9] वा । खिद्वर्जनं किम् । रात्रिंमन्यम् ॥ केचित्तैर्थंकरे[10] । तैर्थंकर । इत्यत्रापि विकल्पमिच्छन्ति । तदर्थं न वाखित्कृदन्त इति रात्रेरिति च योगो विभजनीयः ॥

---

१ ए सी डी °राप् । अ°. २ ए °त्यप् उ°. ३ ए सी °गन इ°. ४ ए सी °भ्यासमि°. ५ ए सी °मिधः । अ°. ६ ए सी °मिन्द्रः । इ°. ७ ए सी °गिल्यः ।. ८ ए सी रात्रिंच°. ९ बी मोन्तो खि°. १० ए सी °रे । तीर्थं°.

धेनुंभव्या धेनुभव्या । इत्यत्र "धेनोर्भव्यायाम्" [११८] इति वा मोन्तः ॥

अन्यदर्थौ । अनन्यार्थे । इत्यत्र "अषष्ठी°" [११९] इत्यादिना वा दोन्तः ॥

अन्यदाशीः । अन्यदाशा । अन्यदास्थितत्वैः । अन्यदास्था । आन्यदुत्सुक्यम् । अनन्यदूती । अन्यद्रागम् । अत्र "आशीराशा°" [१२०] इत्यादिना दोन्तः ॥

अन्यदीयम् । अन्यत्कारके । अत्र "ईयकारके" [१२१] इति दोन्तः ॥

लाटोथ तम्यङ्प्रजहार सर्वद्र्यग्भिः शरैः सम्यगहीन्द्रसध्र्यङ् ।
विष्वद्र्यगोजा रथमस्य तिर्यक्चक्रे च देवद्र्यगिषुः कुमारः ॥ ९२ ॥

९२. अथ लाटः सर्वद्र्यग्भिः सर्वगैः शरैः कृत्वास्य कुमारस्य रथं सम्यक्सुप्रयुक्तशरं यथा स्यादेवं प्रजहार । कीदृक्सन् । विषुवति विषूः समर्थस्तमञ्चति विष्वक्तमप्यञ्चति गच्छति विष्वद्र्यक् । अतिबलिष्ठेप्यस्खलितमित्यर्थः । यद्वा । विष्वगित्यव्ययं सर्वतोर्थे । विष्वगञ्चति विष्वद्र्यक् सर्वविषयमोजो बलं यस्य सोत एवाहीन्द्रसध्र्यक् शेषाहिसदृशोत एव च तं कुमारमञ्चति प्रहरणाय गच्छाति तद्र्यङ् । तथा देवद्र्यञ्चः सर्वत्राप्यस्खलितगतित्वाद्देवानप्यञ्चन्त इषवो बाणा यस्य स कुमारश्चामुण्डराजोपि रथं तिर्यक्प्रहारवञ्चनाय तिरोगामि यथा स्यादेवं चक्रे मण्डलाकारेण भ्रमयति स्मेत्यर्थः ॥

मा गास्तिरश्चीनमजीवसि त्वमवीर दुर्बाहुनगेत्युदित्वा ।
लाटोगतुङ्गः स नखायुधो नु नभ्राट् कुमारं निजघान मुष्ट्या ॥ ९३ ॥

९३. हे अवीराशूरात एव दुष्टौ रणकर्मकरणाक्षमत्वेन निन्द्यौ

१ ए सी °रपूर्व°. २ ए सी °ध्वग्गो°. ३ डी °गोजो र°. ४ °र्यश्चक्रे. ५ ए सी °जीरसि.

१ बी °ना दो°. २ ए सी °न्यदस्था ।. ३ ए सी °ना वोन्तः ।. ४ ए बी सी °षुविति. ५ बी °ध्वथम°. ६ ए सी °ति विष्वक्तमप्यञ्चति ग°. ७ डी °विजय° ८ ए सी °श्च । स°. ९ ए सी °वो माणा. १० ए सी °स्य कु°. ११ ए सी °कणा°.

बाहू एवातिस्थूलत्वान्नगौ गिरी यस्य हे दुर्बाहुनग[1] त्वमजीवसि कुत्सितं प्राणिषि तस्मात्तिरश्चीनं तिर्यग्मा गा मृत्युभयेन रथं तिर्यग्मा स्म भ्रमयेत्यर्थः । इत्युदित्वोक्त्वा कुमारं मुष्टया निजघान । कीदृक्सन् । अगतुङ्ग उत्प्लवनेनाभ्रंलिहत्वाद्[3]रिवदुन्नतो[4]त एव न भ्राजते स्वकालादन्यत्र नभ्राड् नु । नुरत्रापि योज्यः । मेघतुल्यः । तथा नैषां खमस्तीति नखा नखरास्त एवायुधानि यस्य स नखायुधो नु सिंहतुल्यश्च । नखायुध इति नामोपन्यासेनैव नखानामायुधत्वान्यथानुपपत्त्या सिंहः[5] कृतक्रमो[6]सूचि । अतश्चागतुङ्गत्वादिधर्मैर्कोटस्य तुल्यत्वान्नखायुध उपमानमिति ॥

सर्वद्र्यग्भिः । तद्र्यङ् । विष्वद्र्यग् । देवद्र्यग् । इत्यत्र "सर्वादि°" [१२२] इत्यादिना डद्रिः ॥

सध्र्यङ् । सम्यग् । इत्यत्र "सह°" [१२३] इत्यादिना सध्रिसम्यादेशौ ॥

तिर्यङ् । इत्यत्र "तिरसस्तिर्यति" [१२४] इति तिरिः ॥ अतीति किम् । तिरश्चीनम् ॥

अवीर । इत्यत्र "नञत्" [१२५] इति नञ् अत्स्यात् ॥

अजीवस्यवीर । इत्यत्र "त्यादौ क्षेपे" [१२६] इति नञत् ॥

नग अग । इत्यत्र "नगो[8]ऽप्राणिनि वा" [१२७] इति वा नञोऽन्निपात्यः ॥

नख । नभ्राड् । इत्यत्र "नखादयः" [१२८] इत्यदभावो निपात्यः ॥ कथं न नखमस्त्यस्य नखो न न भ्राजते किं तु भ्राजत एवेति नभ्राड् । पृषोदरादित्वाद् [३.२.१५५] एकस्य नञो लोपे भविष्यति ॥

---

१ ए सी °बाहन°. २ ए सी °मजव°. ३ बी °लिहित्वा°. ४ ए सी °रिवुदन्न°. ५ ए सी डी सिंहकृ°. ६ बी °क्रमः सूचितः । अ°. ७ ए सी डी न...न् अ°. ८ ए °गोप्रीणि°.

अनायुधाज्यै कुवदं कदश्वदस्तं ददानं कुरथं प्रहारान् ।
अकद्रथोकद्वद आत्मजस्ते तं मुष्टिभिः कत्तृणवत्पिपेष ॥ ९४ ॥

९४. कदश्वदस्तं कुत्सिताः कुलक्षणादिना निन्दिता येश्वास्तैरपि दस्त-[1]मज्ञत्वाद्धर्विष्ठं कुरथं कुलक्षणनिन्दितरथं तं लाटं ते तवात्मजो मुष्टिभिः कृत्वा कत्तृणवत्कुत्सितं तृणं कत्तृणं रोहिषाख्या तृणजातिस्तदिव सुखेन पिपेष परासुं चकारेत्यर्थः। किंभूतम् । अनायुधाज्यै । अनायुधास्त्ररहिता याजिर्युद्धं तस्यै । मल्लविद्यार्थं कुत्सिता वदा वक्तारो यस्याज्ञत्वात्तं मूर्ख-मपि । अपिरत्र ज्ञेयः । बाहुयुद्धेकुशलमपीत्यर्थः । प्रहारान्मुष्टिघाता-न्ददानम् । कीदृगात्मजः । नास्ति कद्रथः कुत्सितो रथो यस्य सोक-द्रथः । यद्वा । कुत्सितो रथो यस्य स कद्रथो न तथाकद्रथस्तथाना-युधाज्यै कुत्सितो वेदः कद्वदो न तथा । यद्वा । कुत्सिता वदा वक्तारो यस्य स कद्वदो न तथा बाहुयुद्धे कुशलः सन् ॥

अनायुध । इत्यत्र "अन्स्वरे" [१२९] इति नञोन् ॥

कदश्व । इत्यत्र "कोः°" [१३०] इत्यादिना कत् ॥

कद्रथः । कद्वदः । इत्यत्र "रथवदे" [१३१] इति कत् ॥ तत्पुरुष एवेच्छ-न्त्येके । अन्यत्र कुरथम् । कुवदम् ॥

कत्तृण । इत्यत्र "तृणे जातौ" [१३२] इति कत् ॥

कत्रीणि यत्कापथकौपुरुष्यकाक्ष्याणि लाटस्य तदाभवन्न ।
किंत्रिद्विषामप्सरसां ततोभूदकापतिः कापुरुषेतरोसौ ॥ ९५ ॥

९५. यद्यस्माद्धेतोस्तदा युद्धकाले कत्रीणि कुं[3] कुत्सितानि कानि वा कुत्सितानि त्रीणि[4] तस्य लाटस्य क्षत्रियोत्तमत्वान्नाभवन् । कानि त्रीणी-

---

१ सी °मज्ञात्वा°. २ सी वद क°. ३ बी कुत्सि°. ४ ए सी त्रीणित्वा°.

त्याह । कुत्सितः पन्था: कापथोऽत्राचारेण युद्धं कुत्सितोल्पो वा पुरुषः कुपुरुषस्तस्य भावः कर्म वा कौपुरुष्यं शत्रौ रणे पृष्ठदानादि निन्द्यं पुरुषकर्म कुत्सितमक्षमिन्द्रियं कोक्षं कुत्सितमक्ष्यस्येति काक्षो वा तस्य भावः काक्ष्यं भयविह्वलेन्द्रियता । द्वन्द्वे । तानि । ततस्तस्माद्धेतोः कापुरुषेतरः कुत्सितादल्पाद्वा पुरुषादन्यः पुरुषसिंहोसौ लाटोभूत् । कीदृक् । कुत्सितानि त्रीणि कापथकौपुरुष्यकाक्ष्याणि येषां ते किंत्रयस्तान्महाशूरप्रियत्वाद्विषन्ति यास्तासामप्सरसां देवीनां नाल्पः पतिरकापतिरतुच्छाशयो भर्ता ॥

कत्रीणि । इत्यत्र "कत्रि" [१३३] इति कोः किमो वा कत्रिपाठः ॥ किमो नेच्छन्त्येके । किंत्रि ॥

काक्ष्याणि । कापथ । इत्यत्र "काक्षपथोः" [१३४] इति कादेशः ॥

कापुरुष कौपुरुष्य । इत्यत्र "पुरुषे वा" [१३५] इति वा कादेशः ॥ अनीषदर्थे विकल्पोयम् । ईषदर्थे तु परत्वादुत्तरेण नित्यमेव । तत्रापि विकल्प एवेति कश्चित् । कापुरुष । कौपुरुष्य ॥

अकापतिः । अत्र "अल्पे" [१३६] इति कादेशः ॥

कवाग्निनेवाहिफणाः कवोष्णाः कदग्निवत्क्रोडमुखं कदुष्णम् ।
स काग्निकोष्णं कमठेन्द्रपृष्ठं कुर्वन्बलैः पश्य कुमार एति ॥९६॥

९६. हे राजन्पश्य स पूर्वव्यावर्णितः कुमार एति । कीदृक्सन् । बलैः सैन्यैः कृत्वा कवाग्निनेवाल्पेन कुत्सितेन वा वह्निनेवाहिफणाः

---

१ बी °रुषस्त°. २ सी काकु कु°. ३ प सी °नां माल्पः. ४ सी °तिका°. डी °तिः का°. ५ प सी कोः कथो वा. ६ सी कापक्ष°. ७ बी °रुषः । कौ°. ८ प सी °षेरेति. ९ प सी °न्पस्य स. १० प सी °ति । हे राजन्पस्य स पूर्वव्यावर्णित । की°.

शेषस्फटा ईषत्कुत्सिता वोष्णाः संतप्ताः । यद्वा । ईषत्कुत्सितं वोष्णं संतापो यासु ताः कुर्वन् । एवं कोष्णमित्यत्रापि समासः । तथा कदग्निवदल्पेन कुत्सितेन वाग्निनेव[3] क्रोडमुख्यमादिवराहदंष्ट्रां कदुष्णं कुर्वंस्तथा कमठेन्द्रपृष्ठं काग्निकोष्णमल्पेन कुत्सितेन वाग्निनेव कोष्णं कुर्वन् ॥

कोष्णम् कवोष्णाः । इत्यत्र "काकवौ वोष्णे" [१३७] इति वा काकवौ ॥ पक्षे यथाप्राप्तमिति तत्पुरुषे कदुष्णम् ॥ अन्यस्त्वग्नावपीच्छति । काग्नि[5] । कवाग्निना । कदग्निवत् ॥

अवश्यगम्ये सहितोर्जि राज्ञि श्रीसंहिते गन्तुमनस्यथागात् ।
प्रणन्तुकामः सततं सकामः स संततौजाः समनाः कुमारः॥९७॥

९७. अथ नृपाणामेवमुक्तौ स कुमार आगात् । कीदृक् । संततं[8] निचितमोजो बलं यस्य सोत एव सततं सदा संगतः कामेन सम्यकामो यस्य वा स सकामः शत्रुजयेन पूर्णमनोरथोत एव च संगतो मनसा सम्यग्मनो यस्य वा स समनाः समाहितचित्तोत एव च राज्ञि मूलराजपादान्तिके प्रणन्तुकामः । शत्रुजयाद्यवदातकर्मणि हि कृते प्रीतिविशेषोत्पादनाय पितरं पुत्रः प्रणमति । किंभूते राज्ञि । अवश्यगम्ये पूज्यत्वादवश्यमभिगम्ये । तथा संधीयते सं सहिता संबद्धोर्[11]र्बलं येन तस्मिन् । तथा श्रीसंहिते[12] विजयादिलक्ष्म्या परीते । तथा गन्तुमनसि स्वपुत्रशौर्यावलोकनाय रणं यातुकामे ॥

१ प सी °स्यगाधात् ।.

१ प सी °त्सितो वो°. २ प यास्तुताः. ३ प सी डी °व क्रोड°. ४ प सी डी °न् ॥ कवो°. ५ सी °ग्निना ।. ६ प सी °ह । सत°. ७ डी °ततमाचि°. ८ प सी °तं मिचित°. ९ सी कनुं अ°. १० बी स्म संहि°. ११ प सी °द्धोर्गकं. १२ बी श्रीसंहते.

अवश्यकाम्ये । अत्र "कृत्ये°" [१३८] इत्यादिना मस्य लुक् ॥

सततम् संतत । सहित संहिते । इत्यत्र "सम°" [१३९] इत्यादिना वा मस्य लुक् ॥

गन्तुमनसि । प्रणन्तुकामः । समनाः । सकामः । इत्यत्र "तुमश्च°" [१४०] इत्यादिना मस्य लुक् ॥

सैन्यान्तरे मांसपचन्य आशु मांस्पाकमौज्झन्प्रियमांसपाकाः ।
द्रष्टुं द्विषन्मांस्पचनप्रतापं समागतं दक्षिणतारतस्तम् ॥ ९८ ॥

९८. सैन्यान्तरे कुमारसैन्यादन्यस्मिन्मूलराजसैन्ये वर्तमाना मांसपचन्यो मांसपाचिकाः प्रियमांसपाका अपि । अपिर्ज्ञेयः । आशु मांस्पाकं मांसप[2]चनमौज्झन्नत्यजन् । किं कर्तुम् । दक्षिणतारतो दक्षिणस्या दिशो दक्षिणस्य देशस्य वा तीरात्समागतं तं कुमारं द्रष्टुम् । यतो द्विषतां मांस्पचनो मांसस्य संता[3]पनः प्रतापो यस्य तं शत्रुजयेनात्यद्भुतप्रतापमित्यर्थः । अथ च यो हि मांस्पचनप्रतापो यस्य प्रतापोपि मांस्पचनस्तं देशान्तरादागतं समानध[4]र्मातिशयेनोत्पादितात्याश्चर्यत्वाद्द्रष्टुं प्रियमांसपाका अपि मांसपचन्यो मांस्पाकमाशूज्झन्तीत्युक्तिलेशः ॥

सहाजसो दक्षिणतीरराजद्रो[1]ः पातनेसौ सपिशाचवात्या ।
सौजाश्चुचुम्बे सरसार्द्रदृष्ट्या वर्षात्समासाश्रु नृपेण दृष्ट्वा ॥ ९९ ॥

९९. असौ कुमारो नृपेण चुचुम्बे । किं कृत्वा । सह रसेन सरसा दूर्वा तद्वदार्द्रा स्निग्धा या दृष्टिस्तया दृष्ट्वा । उत्प्रेक्ष्यते । समासाद्वर्षासु[5] गमनमपेक्ष्य[6] वर्षाणी । मासाधिकं संवत्सरमतिक्रम्येव[7] ।

---

१ ए सी °द्रोः पिताने°.

१ ए बी सी डी °हितत°. २ बी °चमो°. ३ ए सी °पनम°. ४ ए सी °र्मातिश°. ५ ए सी डी °पेक्षया. ६ ए सी °मी । सामाधि°. ७ ए सी °तिक्रम्ये°.

चिरात्पुत्रस्येक्षणे ह्यतिस्नेहदर्शनपूर्वं चुम्बनं स्यात् । कीदृक्कुमारः । सहौजसा यः स सौजा बलिष्ठोत एव सहौजसो बलिष्ठस्य दक्षिणतीरराजद्रोर्लाटेश्वरतरोः पातने सह पिशाचेन दुष्टव्यन्तरभेदेनास्ति या सा तथा या वात्या वातौघस्तत्तुल्यो लाटस्य समूलोन्मूलक इत्यर्थः ॥

मांस्पचन मांसपचन्यः । मांस्पाकम् मांसपाकाः । अत्र "मांसस्य°"[१४१] इत्यादिना वातो लुक् ॥

दक्षिणतारतः दक्षिणतीर[2] । इत्यत्र "दिक्शब्दात्°" [१४२] इत्यादिना वा तारः ॥

सौजाः सहौजसः । अत्र "सहस्य°" [१४३] इत्यादिना वा सः ॥

सरसा । इत्यत्र "नाम्नि" [१४४] इति सः ॥

अदृश्ये[3] । सपिशाचवात्या ॥ अधिके । समासात् । इत्यत्र[4] "अदृश्याधिके" [१४५] इति सः ॥

ऊचे च राजा द्विषतः समूलघातं निहत्येध सहापराद्धम् ।
ज्योतिः सकाष्ठं भवतेवबोद्धे भूयाच्चिरं[1] स्वस्ति सहानुगाय ॥१००॥

१००. राजा मूलराज ऊचे च[5] । चश्चुम्बनापेक्षया समुच्चये । यदूचे तदाह । भवते तुभ्यं चिरं स्वस्ति भद्रं भूयात् । किंभूताय[6] सते । सकाष्ठं काष्ठाष्टादशनिमेषप्रमितकालभेदस्तद्वाचको[7] ग्रन्थोपि काष्ठा तया सह अन्तेव्ययीभावः । काष्ठाशास्त्रमन्ते कृत्वेत्यर्थः । ज्योतिर्ज्योतिःशास्त्रमवबोद्धे बिभ्रतेत्यन्तं ज्योतिर्विद इत्यर्थः । एतेन जयाद्यनुकूल-

१ सी °चिरस्व°.

१ ए सी °तमे स°. २ सी °क्षिणं ती°. ३ ए सी °श्ये । अपि°. ४ ए सी °त्र ह°. ५ सी डी चश्चु°. ६ ए सी डी °य तसे का°. ७ बी °मितः का°.

मूहूर्तवेदितास्योक्ता । अत एव जयहेतुमुहूर्ते रणकरणेनाद्यास्मिन्दिने सहापराह्णं साकल्येऽन्ते वाव्ययीभावः । क्रियाविशेषणं सकलमपराह्णं यावदपराह्णमन्ते कृत्वा वेत्यर्थः । द्विषतो लाटस्य समूलघातं मूलेन पितृपितामहामात्याद्याद्यपुरुषौघेन सह सकलं साकल्येऽव्ययीभावः । निहन्ने तथा सहानुगाय परिवारसहिताय ॥

स्वस्ति स्वदेशाय गवे हलाय वत्साय साद्याय यथा सदैव ।
भद्रं सहाद्याय गवे हलाय वत्साय देशाय तथास्त्वमुष्मै ॥१०१॥

१०१. सशब्द आद्यो यस्य गव इत्यादिशब्दस्य तस्मै साद्याय गवे हलाय वत्साय च सगवे सहलाय सवत्सायेत्यर्थः । स्वदेशाय लाटेशद्विड्वधेन यथा सदैव स्वस्ति क्षेमोस्तु तथा सहाद्याय गवे हलाय वत्साय सहगवे सहहलाय सहवत्साय चेत्यर्थः । अमुष्मै देशाय लाटदेशाय भद्रमस्तु । आशिषि पञ्चमी ॥

समूलघातम् । अत्र "अकाले॰" [१४६] इत्यादिना सः ॥ अकाल इति किम् । सहापराह्णम् ॥

सकाष्ठम् । इत्यत्र "ग्रन्थान्ते" [१४७] इति सः ॥

सहानुगाय भवते स्वस्ति भूयात् । इत्यत्र "नाशिषि॰" [१४८] इत्यादिना न सः ॥ अगोवत्सहल इति किम् । स्वस्ति स्वदेशाय सगवे सवत्साय सहलाय । भद्रमस्तु देशाय सहगवे सहवत्साय सहहलाय ॥

---

१ सी डी ॰हाव्याय.

---

१ ए सी डी ॰कं व॰. २ सी ॰मूले॰. ३ ए सी ॰महमहाला॰. डी ॰महमहामाला॰. ४ ए सी ॰थापु॰. डी ॰थादिपु॰. ५ ए सी डी सफलं. ६ ए सी आषा य॰.

सोगात्पुरीं श्रीदसमानधर्मालकासधर्मामसमानरूपः

अन्वक्सरूपस्तनयोप्यमुष्य सब्रह्मचारी नलकूबरस्य ॥ १०२ ॥

१०२. असमानरूपो निरुपमरूपः स राजा श्रीदसमानधर्मा महर्द्धिकत्वादिना धनदतुल्यः सन्नलकासधर्मां सर्वर्द्ध्युपेतत्वाद्धनदपुरीतुल्यां पुरीमणहिलपाटकमगात्तथान्वक्षोनुचरा अपि सरूपा रूपनेपथ्यावस्थादिभिः सदृशा यस्य सोमुष्य मूलराजस्य तनयोपि पुरीमगात् । कीदृक्सन् । नलकूबरस्य धनदपुत्रस्य सब्रह्मचारी शौर्यादिगुणैस्तुल्य इत्यर्थः । यथा श्रीदो नलकूबरान्वितोलकां यात्येवं मूलराजश्चामुण्डराजान्वितोणहिलपुरीमगादित्यर्थः ॥

सधर्माम् । सरूपः । अत्र "समानस्य°" [१४९] इत्यादिना सः ॥ अन्ये तु धर्मादिषु नवसु वचनान्तेषु विकल्पमिच्छन्ति । सधर्माम् । समानधर्मा । सरूपः समानरूपः ॥

सब्रह्मचारी । इति "सब्रह्मचारी" [१५०] इत्यनेन निपात्यते ॥

बुद्ध्या सदृक्षं सदृशं प्रतापैः सुतं नृपः शक्रसदृश्यधित्सत् ।

स्वर्गादनन्यादृश आत्मराज्येन्यादृक्षमेतन्न हि तादृशानाम् ॥१०३॥

१०३. स्पष्टम् । किं तु । न्यधित्सत्स्थापयितुमैच्छत् । स्वर्गादनन्यादृशे महर्द्धौ स्वर्गतुल्ये । युक्तं चैतत् । हि यस्माद्धेतोरेतत् स्वानुरूपे पुत्रे स्वराज्यस्य निधित्सनं तादृशानां मूलराजतुल्यानां महाराजानां नान्यादृक्षं नासदृशमुचितमेवेत्यर्थः ॥

---

१ ए सी °राजेन्या°.

---

१ सी °तुल्या पु°. २ ए सी डी °हिलपा°. ३ सी सरू°. ४ ए सी °रील°. डी °री । स°. ५ ए सी स्वानरू°. ६ डी नान्यास°.

त्यादृश्यनन्यादृशि तादृशस्तांस्त्यादृक्षबुद्धिः सचिवानिहार्थे ।
स त्यादृशाञ्ज्योतिषिकान् गुरूंश्च तादृक्षमन्त्रान्नृप आजुहाव ॥१०४॥

१०४. स नृपस्त्यादृशि[1] बृहत्तमत्वेन प्रसिद्धेनन्यादृशि सर्वोत्तमत्वेन निरुपम इहास्मिन्नर्थे पुत्रस्य राज्यन्यसनरूपे कार्ये विषये सचिवानाजुहाव । किंभूतान् । तान् महाबुद्ध्यादिमैत्रिगुणैः सर्वत्र प्रसिद्धानत एव तादृशस्तादृक्कार्ये प्रष्टव्यान् । तथा त्यादृशांस्त्रिकालवेत्तृत्वादिदैवज्ञगुणैः सर्वत्र प्रसिद्धान् ज्योतिषिकान् ज्योतिर्विदो राज्याभिषेकशुभलग्नपृच्छार्थमाजुहाव । तथा तादृक्षा महाप्रभावत्वादिना प्रसिद्धा मन्त्रा येषां तान् गुरूंश्च[3] पुरोहितांश्च राज्याभिषेकमङ्गलकर्माद्यर्थमाजुहाव । यद्वा । तादृक्षमन्त्रांस्तदर्थानुसारिपर्यालोचान् गुरूंश्च पूज्यान् कुलमहत्तरांश्चाजुहाव । यतः कीदृक् । त्यादृक्षा पुत्रराज्याभिषेककरणविषया बुद्धिर्यस्य सः ॥

सदृक् । सदृशम् । सदृक्षम् । अत्र "दृग्दृशदृक्षे" [१५१] इति समानस्य सः॥

अनन्यादृशि । अनन्यादृशे । अन्यादृक्षम् । त्यादृशि । त्यादृशान् । त्यादृक्ष[5] ।

तादृशः । तादृशानाम् । तादृक्ष । इत्यत्र "अन्य°" [१५२] इत्यादिना आत् ॥

कीदृक्ष ईदृक्ष इनः शचीदृक्कीदृक्क भौमादय ईदृशाश्च ।
स्युः कीदृशाः पृष्टवतीति राज्ञि विमृश्य ते साध्ववदन्नमूढाः ॥१०५॥

१०५. ते मन्त्रिज्योतिषिकगुरवो विमृश्य[6] पर्यालोच्यामूढा मोहमगत्वा सम्यग्ज्ञात्वेत्यर्थः । साध्ववदन् । राज्यार्होयं कुमार इति म-

१ प सी डी ताद°. २ प सी डी गुरुंश्च. ३ प °मूढा ॥

१ प सी °शि बहित्त°. डी °शि मह°. २ प सी डी °मन्त्रगु°. ३ प सी डी गुरुंश्च. ४ डी °इक्षेति. ५ प सी डी °दृक्षः । ताद°. ६ प सी डी °वं म°. ७ प सी °क्ष्यः प°.

श्रिणो गुरवश्चोचुरिदं च लग्नं सर्वग्रहैः श्रेष्ठमिति ज्योतिषिकाश्चोचुरित्यर्थः। क सति। राज्ञि मूलराजे पृष्टवति। किमित्याह। ईदृक्षश्चामुण्डराजलक्षण इनो राज्यस्थापनेन युष्माकं स्वामी युक्तो न वा। अन्यथापीदं व्याख्येयम्। तद्यथा। ईदृक्षो राज्याभिषेकार्हवृषादिलग्नतृतीयस्थानगतत्वादिगुणोपेत इनो रविः कीदृक्षः स्यात्तथेदृग्लग्नमूर्तिस्थत्वोच्चैःस्थत्वादिगुणोपेतः शशी च कीदृक् स्यात् तथेदृशा लग्ननवमस्थानद्वितीयस्थानैकादशस्थानदशमस्थानषष्ठस्थानेस्थतोच्चैःस्थत्वादिगुणोपेता भौमादयश्च मङ्गलबुधगुरुशुक्रशनिराहवश्च कीदृशाः स्युरिति॥

ईदृक्। ईदृशाः। ईदृक्षैः। कीदृक्। कीदृशाः। कीदृक्षः। अत्र "इदंकिमीत्की" [१५३] इतीकारकीकारौ॥

विगृह्य। इत्यत्र "अनञः क्त्वो यप्" [१५४] इति यप्॥ अनञ इति किम्। अमूर्त्वा॥

छत्रेण मौक्तिकवतंसपृषोदरेण जीमूतडम्बरवता ऽयवतंसकेन।
राज्येऽभ्यषिच्यत नृपेण तदा कुमारो वर्णाश्रमाभ्यवनवक्रयपुण्ययोग्यः॥ १०६॥

१०६. तदा तस्मिन् शुभलग्ने नृपेण कुमारो राज्येऽभ्यषिच्यत। यतो वर्णा ब्राह्मणादय आश्रमा ब्रह्मचारिगृहस्थवानप्रस्थयतयो द्वन्द्वे तेषां यदभ्यवनं रक्षा तदेव वक्रयो मूल्यं यस्य तत्तथा वर्णाश्रमाभ्यवनेन क्रीतमित्यर्थः। यत्पुण्यं धर्मस्तस्य। यद्वा। वर्णाश्रमाभ्यवनस्य वक्रय इव भाटकतुल्यं यत्पुण्यं तस्य योग्यो वर्णाश्रमरक्षासमर्थ इत्यर्थः। किंभूतेन सता। मौक्तिकेषु वतंसा इव मौक्तिकवतंसाः प्रकृष्टमुक्ताफलानि तैः कृत्वा पृषन्ति जलबिन्दव इवोदरे यस्य तेन वक्षःस्थले

१ प सी राज्यं स्था°. २ डी °नस्थितो°. ३ प सी °क्षः। ईदृ°. ४ बी °भ्येमिषि°. ५ प सी डी °वक्र°. ६ प सी °न क्रीत°. ७ प सी °त्वा इव°.

ठल्लमानजलबिन्दुस्वच्छमुक्ताकलापेन तथा श्रीयुक्तोवतंस आपीडो यस्य तेन। "शेषाद्वा" [७.३.१७५] इति कच्। यद्वा। श्रियो राज्यलक्ष्म्याः शोभाहेतुत्वादवतंसक इव यस्तेनात एव जीवनस्य जलस्य मूतः पुटबन्धो जीमूत इन्द्रस्तस्येव डम्बरो लक्ष्म्याडम्बरो यस्यास्ति तेन। कीदृक्सन्। छत्रेणोपलक्षितः। किंभूतेन। मौक्तिकानां वतंसैः शिरोमालाभिः कृत्वा पृषोदरेण जलबिन्दुवृन्दाध्यासितमध्येनेव तथा जीमूतडम्बरवता नीलत्वादिन्द्रचापानुकारखचितानेकवर्णमणित्वाच्छायाहेतुत्वाच्च मेघाडम्बरवतात एव श्र्यवतंसकेन राज्यलक्ष्म्याः शेखरतुल्येन। वसन्ततिलका छन्दः॥

अथ प्राचीं गत्वा द्रुहिणतनयां श्रीस्थलपुरे
वपुः स्वं हुत्वाग्नौ सुपिहितपिनद्धापरयशाः।
ययौ राजेः सूनुर्दिवमनपिनद्धापिहितधी-
र्ग्रहीतुं स्वर्गादप्यवनविधिनावक्रयमिव॥ १०७॥

१०७. अथ पुत्रस्य राज्याभिषेकानन्तरं विजितसर्वशत्रुत्वात्सुपिहितं पट्याद्यावरणेनेवात्यन्तमाच्छादितं सुपिहितमप्यानिवारितप्रसरं कदाचित्कथमपि पिधानमतिक्रम्य प्रकटं स्यादित्याह। पिनद्धं च। लोहशृङ्खलयेव निगडितं चापरयशः शत्रुकीर्तिर्येन स राजेः सूनुर्मूलराजोवनविधिना प्रभूय रक्षाकरणेन स्वर्गादप्यवक्रयं भाटकं ग्रहीतुमिव दिवं स्वर्गं ययौ। किं कृत्वा। श्रीस्थलपुरे सिद्धपुरापरनाम्नि श्रीस्थलाख्ये नगरे पूर्वदिगभिमुखं प्रवहमानत्वात्प्राचीं द्रुहिणतनयां ब्रह्मपुत्रीं सरस्वतीं सर्वतीर्थोत्तमत्वेनात्मसाधनार्थं गत्वा तथाग्नौ

---

१ ए सी °न्। छात्रे°. २ ए सी °ते। मौ°. ३ ए सी डी एत श्र्य°. ४ ए सी अत्र पु°. ५ बी °कं गृही°. ६ ए सी °लासे न°.

करीषवह्नौ स्वं वपुर्हुत्वा क्षिप्त्वा । अङ्गुष्ठे करीषाग्नेर्दानेन स्वाङ्गं भस्मसात्कृत्वेत्यर्थः । यतोपिनद्धा मोहेन नियन्त्रितापिहिता मोहेनाच्छादिता विशेषणकर्मधारयगर्भे नञ्समासेनपिनद्धापिहिता धीर्यस्य स तथा । स्वशरीरेप्यमूढ इत्यर्थः । योपि सूनुः सूर्यः सोप्यस्तसमये स्वं वपुः किरणरूपमग्नौ हुत्वा क्षिप्त्वाथानन्तरं प्रभाते प्राचीं पूर्वां दिशं गत्वा दिवमाकाशं यातीत्युक्तिः ॥

पृषोदरेण । जीमूत । इत्येतौ "पृषोदरादयः" [१५५] इति साधू ॥

वतंस अवतंसकेन । वक्रय अवक्रयम् । सुपिहित अपिहित । पिनद्ध अपिनद्ध । इत्यत्र "वावाप्योः°" [१५६] इत्यादिनावाप्योर्वष्यादेशौ वा । शार्दूलविक्रीडितं (शिखरिणी) छन्दः ॥

दशमः पादः समर्थितः ॥

इति श्रीजिनेश्वरसूरिशिष्यलेशाभयतिलकगणिविरचितायां श्रीसिद्धहेमचन्द्राभिधानशब्दानुशासनद्व्याश्रयवृत्तौ षष्ठः सर्गः समाप्तः ॥

१ सी °षणं क°. २ बी °रूपं हु°. ३ ए सी डी °त । पिन°.

द्व्याश्रयमहाकाव्ये

सप्तमः सर्गः ।

मौलराजिः सोथ पृथ्वीं पार्थो न्वैलो नु पालयन् ।
राज्ञां प्रभवति स्मोच्चैर्गुणवृद्धिमनोहरः ॥ १ ॥

१. अथ स मौलराजिश्चामुण्डराजो राज्ञां प्रभवति स्म प्रभुरभूदित्यर्थः । कीदृक्सन् । उच्चैरुदात्तानां गुणानां शौर्यादीनां या वृद्धिः स्फीतता तया । यद्वा । गुणाश्च वृद्धिश्च कोशसैन्यादिवर्धनं 'गुणमूला वृद्धिः' इति गुणानामभ्यर्च्यत्वात्प्राग्निपाते ताभिः । मनोहरः । अत एव पार्थो नु । पृथाया अपत्यम् "अदोर्नदी"" [६-१.६६] इत्यादिनाण् । युधिष्ठिर इव । ऐलो नु । इलाया अपत्यम् प्राग्वदण् पुरूरवा इव पृथ्वीं पालयन् ॥

गुणवृद्धीत्यनेन "वृद्धिरारैदौत्" [१] गुणोरेदोत्" [२] इति संज्ञासूत्रे सूचिते । तयोश्च प्रयोजनम् । पालयन् । पार्थः । ऐलः । मौलराजिः । इत्यत्र "वृद्धिः स्वरेषु°" [७.४.१] इत्यादिनारैदौतः ॥ मनोहरः । पालयन् । प्रभवति । इत्यत्र च "नामिनो गुणोक्ङिति" [४.३.१] इत्यरेदोतः ॥

प्रभवति । इत्यत्र "क्रियार्थो धातुः" [३] इति क्रियार्थो भूशब्दो धातुसंज्ञः॥

नौत्सुकायत स क्वापि कीर्त्यै सोभ्यमनायत ।
अदीयत मही तेन तेनादीयन्त च द्विषः ॥ २ ॥

२. स[३] चामुण्डराजः क्वापि कस्मिन्नपि कार्ये नौत्सुकायत नौत्सुक्य-

१ सी डी °नां सौर्या°. २ सी डी स का°. ३ सी डी °र्ये चामुण्डराजः नौ°.

भूत् । "च्व्यर्थे भृशादेः स्तोः" [३.४.२९] इति क्यङ्[1]। विमर्शकत्वात्सर्वस्मिन्कार्ये स्थिरप्रकृतिरभूदित्यर्थः। तथा तेन चामुण्डराजेन मही पृथ्व्यदीयत देवद्विजादिभ्यो धर्मार्थं दत्त्वा[2] पालिता वा। दाम्ँदाग्कृँदेकं[3] रूपमिदम्। तथा तेन द्विषोदीयन्त चाखण्ड्यन्त च। यतः स चामुण्डराजः कीर्त्या अभ्यमनायत सस्पृहभूत्। अभिमनैसः[5] कैयङ्[6] ॥

अस्यावदाता दातारेः परोक्षापि हि धीयते ।

ह्यस्तन्यद्यतनी वर्तमानेवाद्यापि सत्कथा ॥ ३ ॥

३. दातारेरुच्छिन्नशत्रोरस्य चामुण्डराजस्य सत्कथा शोभनचरितं[7] हि स्फुटं परोक्षापीन्द्रियाणामविषयापि चिरकालीनापीत्यर्थः। ह्यस्तनीव कल्ये भूतेवाद्यतनीवाद्य भूतेव वा । इवः प्राग्वदत्रापि योज्यः। वर्तमानेव[8] विद्यमानेव प्रत्यक्षेवं[9] वेत्यर्थः। अद्यापि सांप्रतमपि धीयते सदोत्कीर्तनेन धार्यते । यद्वा । पीयते सदादरेण श्रूयत इत्यर्थः[10]। धांक् ट्वे इत्येतयो रूपमिदम्। यतोवदाता निष्कलङ्कानेकावदाताधिष्ठितत्वेन पवित्रा वा ॥

पञ्चमी सप्तमी मूर्तिर्वैष्णवी[2] सोरिशासनात् ।

क्रियातिपत्तिर्नाशङ्कि तस्य[3] श्वस्तन्यपि क्वचित् ॥ ४ ॥

४. स राजारिशासनाच्छत्रुशिक्षणाद्धेतोर्वैष्णवी[11] विष्णुसत्का

---

१ सी °तना व°. २ प °वी शोरि°. ३ प बी सी डी ई °स्य स्वस्त°.

---

१ प बी क्यक्थ । वि°. २ बी दत्त्वा पा°. ३ सी डी °मृदांग्कदेकं. ई °मृदांग्कदेकं. ४ प °ग्कृदेकं. ५ बी °नसा क्य°. ६ प बी सी डी क्यक्थ ॥ ७ सी °था सौभ°. ८ बी °स्तनेव. ९ ई °व चेत्य°. १० प °र्थः। धांक्ड् ड्वे इ° बी °र्थः। धाङ् ड्वें इ°. सी °र्थः। धांङ् ट्वे इ°. डी °र्थः। धांङ् ड्वें इ°. ई °र्थः धाङ् ट्वे इ°. ११ प °णार्द्धेतो°.

पञ्चमी मूर्तिर्वामनाख्या सप्तमी मूर्ती रामचन्द्राख्याभूत्तयोस्तुल्यो-भूदित्यर्थः । अत्रश्चास्य चामुण्डराजस्य क्रियोतिपत्तिः कार्यविनाशैः श्वस्तन्यप्येष्यद्दिनभाविन्यप्युपलक्षणत्वाच्चिरकालभाविन्यपीत्यर्थः । आस्तां तावदद्यभाविनीत्यपेरर्थः । कचित्कस्मिन्नपि स्थाने नाशङ्कि न संभाविता । अर्थात्सर्वजनेन ॥

आशिषास्य भविष्यन्तीं जनता पितरौ सुराः ।
अस्यति स्मास्यतः स्मास्यन्ति स्म चाजस्रमापदम् ॥ ५ ॥

५. आशिषा जय जीव नन्देत्यादिमङ्गलशंसनेनास्य राज्ञो भविष्यन्तीं भाविनीमापदमजस्रं सदा जनता जनौघोस्यति स्म क्षिप्तवती। पितरौ च मातापितरौ चास्यतः स्म । सुराश्चास्यन्ति स्म । एतेन न्यायित्वविनीतत्वधार्मिकत्वादिगुणैर्जनतापितृसुरा अनेनानन्दिता इत्युक्तम् ॥

किं न पश्यसि पश्यामि पश्यावः पश्यथो नु किम् ।
पश्यामः पश्यथेत्यासन्द्वारेस्य क्ष्माभुजां गिरः[3] ॥ ६ ॥

६. अस्य राज्ञो द्वारे[6] सिंहद्वारे क्ष्माभुजां गिरोभवन् । कथमित्याह । किंशब्दो नुश्चाक्षमागर्भे प्रश्नत्रये । अहो क्ष्माभुक् त्वमर्थान्ममोपरिपतनादि कुर्वन्किं न पश्यसि[10] मां नालोकयसि । एवं पृष्टः स प्रत्याह । पश्याम्यवलोकयन्नस्मि । तथा हे क्ष्माभुजौ युवां[11] नु किं न पश्यथः[12] । नन्वत्रापि योज्यः । तावपि प्रत्याहतुः । पश्यावः । तथा

१ ई आसिषा°. २ सी °ष्यन्ती ज°. ३ प गि XXX रोभ°.

१ ई °श्चामु°. २ सी °यार्थे°. ३ प सी डी °शः स्वस्त°. ४ प ई °काले भा°. ५ सी °ष्यन्ती मा°. ६ सी डी °रे क्ष्मा°. ७ सी किमश°. ८ सी डी °शब्दो नु°. ९ प °हो क्षामु°. १० प °सि मा ना°. ११ डी °वां किं. १२ सी °श्यथ । न°.

हे क्ष्माभुजो यूयं किं न पश्यथ । तेपि प्रत्याहुः पश्याम इति । एतेन सेवार्थमहमहमिकयास्य सिंहद्वारे प्रविशतां बहूनां राज्ञां मिथोति-संघर्ष उक्तः ॥

अभ्यमनायत । इत्यत्र "न प्रादिः॰" [४] इत्यादिना प्रादिं व्युदस्य ततः पर एव धातुसंज्ञः । अप्रत्यय इति किम् । औत्सुकायत ॥

अदीयत । अदीयन्त । धीयते । अत्र "अवौ दाधौ दा" [५] इति दा संज्ञा ॥ [१]अवाविति किम् । दाव् । दोत ॥ दैव् । अवदाता ॥

वर्तमाना सप्तमी पञ्चमी [२]ह्यस्तन्यद्यतनी परोक्षा [३]श्वस्तन्याशिषा भविष्यन्[४]ती (न्तीं) क्रियाति[५]पत्तिरित्येतैः ॥ "वर्तमाना तिव् तस् अन्ति सिव् थस् थ मिव् वस् मस् ते आते अन्ते से आथे ध्वे ए वहे महे" [६-९, ११-१६] इत्यादीनि दश संज्ञासूत्राणि सू[८]चितानि ॥

अन्यदि । जनतास्यति । पितरावस्यतः । सुरा अस्यन्ति ॥ युष्मदि । पश्यसि । पश्यथः । प[१०]श्यथ ॥ अस्मदि । पश्यामि । पश्यावः । पश्यामः । इत्यत्र "त्रीणि॰" [१७] इत्यादिना त्रीणि[११] त्रीणि वचनान्यन्यस्मिन्नर्थे युष्मदर्थेऽस्मदर्थे [१२]च यथाक्रमं परिभाष्यन्ते ॥ "एकद्वि॰" [१८] इत्यादिना चैकद्विबहुष्वर्थेषु परिभाष्यन्ते ॥

परस्मैपदमेतेनात्मनेपदमिव प्रियम् ।
क्रियते स्मान्यकार्यार्थं कृतिभिर्भूयते[१]थ वा ॥ ७ ॥

७. एतेन राज्ञा परस्मायन्यार्थं प्रियं पदं नृपत्वादिमहापदवी

---

१ ए °ते तथा ॥

---

१ ए बी अदावि°. २ ई दातारे । दे°. ३ बी °स्तनीष°. ४ बी °क्षा स्वस्तिन्या°. ५ ए °न्तीति क्रि°. ६ ए °ति प्रतिप°. ७ बी °त्येभिर्वर्ते°. ८ ए बी सी डी °नि ॥ ज°. ९ बी °स्यत । सु°. १० ए पस्यथः । अ°. ११ सी डी °णि व°. १२ ए च तथा°.

त्राणं वात्मन आत्मार्थं पदमिव क्रियते स्म कृतम् । अथ वा कृतमस्त्येषां तैः कृतिभिर्विद्वद्भिः परमार्थज्ञैरन्यकार्यार्थं भूयते ॥

दुर्द्धर्षे धीयुते श्लाघ्ये सुस्थानं यत्र च श्रिया ।
जज्ञे वल्लभराजोस्य ह्नुवानोर्कं स तेजसा ॥ ८ ॥

८. अस्य राज्ञस्तेजसार्कं ह्नुवानोपलपन्स वल्लभराजो नामार्थात्पुत्रो जज्ञे । यत्र श्रिया राज्यादिलक्ष्म्या कर्त्र्या सुस्थानं सुखेन स्थीयते । यतः श्लाघ्ये । एतदपि कुत इत्याह । यतो दुर्द्धर्षे शत्रुभिरनभिभाव्ये । धीयुते च । यत्र चेति चो भिन्नक्रमेत्र योज्यः । नीतिशास्त्रादिविषयबुद्धियुक्ते च । 'भाविनि भूतवदुपचारः' इति न्यायेन शूरत्वान्नीतिज्ञत्वाच्च यो राज्यधुराधरणक्षम इत्यर्थः ॥

परस्मैपदम् इत्यनेन "नवाद्यानि°" [१९] इत्यादिसूत्रम् आत्मनेपदम् इत्यनेन "पराणि°" [२०] इत्यादिसूत्रं चासूचि ॥

कर्मणि । क्रियते । श्लाघ्ये । युते । दुर्द्धर्षे ॥ भावे । भूयते । कार्यं । कृतिभिः । सुस्थानम् । इत्यत्र "तत्साप्य°" [२१] इत्यादिनात्मनेपदकृत्यक्तखलर्थाः स्युः ॥

जज्ञे । ह्नुवानः । इत्यत्र "इङितः कर्तरि" [२२] इत्यात्मनेपदम् ॥

क्रीडत्सु व्यतिचिक्रीडे सवयस्सु हरत्सु च ।
व्यतिजह्रे क्रीडनकं घ्नत्सु व्यतिजघान सः ॥ ९ ॥

---

१ सी °त्र चाभि°. २ ए °राज्ञोस्य. ३ ए °र्कं स्वते°. बी °र्कं स्तुते°. ४ बी °रत्सु च ।.

---

१ सी आत्मनार्थ. २ ए °स्थानसु°. ३ ए °त्र व्योज्यः ।. ४ डी °त्वाच्च. ५ सी °ज्यधूरा°. ६ बी °रणे क्ष°. ७ सी श्लाघ्य । यु°. ८ सी डी ई कार्यम् । कृ°. ९ ई °तयोस्म°.

हिंसत्सु च व्यत्याहिनव्यत्यूहेत्वं वहत्सु च।
पठत्सु व्यत्यपाठीच्च वदत्सु व्यत्युवाद च ॥ १० ॥

९–१०. स वल्लभराजः सवयस्सु मित्रेषु बालेषु क्रीडत्सु बालक्रीडया रममाणेषु सत्सु व्यतिचिक्रीडे विनिमयेन रेमे । तथा सवयस्सु क्रीडावशात्क्रीडनकं गेन्दुकादि हरत्सु शङ्कुलादिनापनयत्सु क्रीडनकं व्यतिजह्रे च । तथा सवयस्सु घ्नत्सु क्रीडावशान्मुष्ट्यादिना प्रहरत्सु व्यतिजघान च । तथा सवयस्स्वस्त्रं बालोचितं लघु चापादि वहत्सु शस्त्रविद्याभ्यासार्थं धारयत्सु व्यत्यूहे च । तथा हिंसत्सु कौतुकेनास्त्रविद्याभ्यासपरीक्षया वा पंक्ष्यादि विनाशयत्सु व्यत्याहिनच्च । तथा पठत्सु शब्दविद्याद्यधीयानेषु व्यत्यपाठीच्च । तथा वदत्सूक्तिं कुर्वत्सु व्यत्युवाद च ॥ यद्यपि क्रियाणां साध्यैकस्वभावानां व्यतिहारो न संभवति तथापीतरचिकीर्षितायां क्रियायामितरेण यद्धरणं करणं स क्रियाव्यतिहार इति यदा सवयसः क्रीडादि चक्रुस्तदा कुमारोपि चकारेत्यर्थः ॥

तं व्यतीयुर्गुणा लक्ष्म्यो व्यत्ययुस्तस्य चाभयैः ।
वृत्तैर्व्यत्यहसन्धात्र्यो व्यत्यपश्यन्परस्परम् ॥ ११ ॥

११. गुणास्तं वल्लभराजं व्यतीयुर्विनिमयेन जग्मुः । सर्वेपि गुणास्तमुपस्थिता इत्यर्थः । तथा लक्ष्म्यः सर्वसंपदस्तं व्यत्ययुः । तथा तस्य वल्लभस्याभयैर्भीरहितैर्वृत्तैर्व्यापारैर्मन्दुरास्थमर्कटकर्णग्रहणादिभिर्धात्र्य उ-

१ बी °सस्तु च. २ बी सी डी °त्सु व्युत्सु°. ३ सी डी लक्ष्योव्य°.

१ ए °यस्सु क्री°. २ ए °नकगे°. ३ सी °त्सु सकुलयादि°. डी °त्सु संकुलयादि°. ४ बी Gives margin ally पुष्पादिना besides. ५ ई पक्षादि. ६ डी °बाधी°. ७ बी °स्सु व्युत्सु°. ८ ए बी सी डी यद्दर°. ९ सी डी °णं वा स°. १० डी °ये ज°. ११ बी लक्ष्म्याः स°. १२ ए बी ई °रैर्वेन्दु°.

पमातरो व्यत्यहसन् परस्परमन्योन्यं कर्म[1] व्यत्यपश्यंश्च । स्त्रीणां जातिस्वभावोयं यदा बालकः स्वावस्थानलुरूपां विशिष्टां चेष्टां करोति तदानन्दाश्चर्याभ्यां हसन्ति मिथः पश्यन्ति च ॥

व्यतिचिक्रीडे[3]। व्यतिजह्रे। व्यत्यूहे[4]। अत्र "क्रियाव्यति°" [२३] इत्यादिनात्मनेपदम् ॥ अगतिर्हिंसाशब्दार्थहस इति किम्। व्यतीयुः। व्यत्ययुः। व्यत्यहिनत्। व्यतिजघान। व्यत्युवाद। व्यत्यपाठीत्। व्यत्यहसन् ॥ अनन्योन्यार्थ इति किम्। व्यत्यपश्यन्परस्परम् ॥

चित्ते न्यविशत न्यास्यन्मुदं न्यास्यत विस्मयम् ।
सोपौहत्संशयं राज्ञोपौहतारिमनोरथान् ॥ १२ ॥

१२. स वल्लभोद्भुतविनयशौर्यादिगुणे राज्ञः पितुश्चित्ते न्यविशतावसत्। तथा राज्ञश्चित्ते मुदं न्यास्यत्समस्थापयत्। तथा राज्ञश्चित्ते विस्मयं न्यास्यत। तथा राज्ञश्चित्ते संशयं कीदृगयं पुत्रो भविष्यतीति संदेहमपोहद्विच्छेद। अत एवारिमनोरथांश्चामुण्डराजानन्तरं वयं सुखं स्थास्याम इत्यहिताशा अपौहत ॥

न्यविशत[10]। इत्यत्र "निविशः"[11] [२४] इत्यात्मनेपदम् ॥

न्यास्यत न्यास्यत्। अपौहत अपौहत्। इत्यत्र "उपसर्गादस्योहो वा"[12] [२५] इति वात्मने[13] ॥

---

१ सी °रकाम् ॥.

---

१ सी °मे विल°. २ सी °स्थानपां. डी °स्थानुरू°. ३ सी °क्रीड । व्य°. ४ सी डी व्यत्युहे ।. ५ सी °शतोव°. ६ सी डी °दृग् पु°. ७ सी °हमारोह°. ८ ए सी ई °रथाश्चा°. ९ ई °यं स्था°. १० ए न्यवश°. ११ डी निवशः. १२ ए °स्यो वा. १३ ई °नेपदम् ॥.

राज्ञो दुर्लभराजोभूत्पुत्रोन्य इति तर्कभूः।
नोदयुङ्क्तासुरः कोपि स्वं न्ययुङ्क्तेह किं हरिः॥ १३ ॥

१३. राज्ञो दुर्लभराजो नामान्यो द्वितीयः पुत्रोभूत्। कीदृक्। इति तर्कभूः। एवंविधस्य लोकवितर्कस्य स्थानम्। एवं लोकैर्वितर्क्यमाण इत्यर्थः। कथमित्याह। यस्मादिह दुर्लभराजे सत्युद्भूतभयातिरेकेण कोप्यसुरो नोदयुङ्क्त नोदयच्छन्न कोपि दैत्यो मस्तकमुत्पाटितवानित्यर्थः। तत्किमिह दुर्लभे हरिर्विष्णुः स्वमात्मानं न्ययुङ्क्त व्यापारितवान्। दुर्लभराजरूपी किमयं हरिरभूदित्यर्थः। हरौ ह्युत्पन्नेसुरः कोपि नोद्युङ्क्त इति॥

प्रयुञ्जन्यज्ञपात्राणि परिक्रेष्यत आशिषः।
बुद्ध्या विक्रेष्यते शुक्रं सतोवक्रेष्यते गुणैः॥ १४ ॥
शैलान्विजेष्यते स्थाम्नारीन्पराजेष्यते बलैः।
ज्ञैः संक्ष्णविष्यते प्रज्ञां दैवज्ञैरित्यशंस्यसौ॥ १५ ॥

१४,१५. असौ दुर्लभो दैवज्ञैर्ज्योतिषिकैर्जन्मकुण्डलिकास्थशुभग्रहपातविचारणयेत्येवंविधोशंसि कथितः। यथा यज्ञपात्राणि यागभाजनानि प्रयुञ्जन्यज्ञे व्यापारयन्यज्ञं कारयन्नित्यर्थः। असावाशिषो यैष्ट्रादिप्रयुक्ताशीर्वादान्परिक्रेष्यते संग्रहीष्यतीत्यर्थः। तथा बुद्ध्या कृत्वा शुक्रं विक्रेष्यते पराजेष्यत इत्यर्थः। तथा गुणैः कृत्वा सतः साधूनवक्रेष्यत आवर्जयिष्यतीत्यर्थः। तथा स्थाम्ना स्थैर्येण बलेन वा कृत्वा शैलान्विजेष्यते। तथा बलैः सैन्यैः कृत्वारीन्पराजेष्यते।

---

१ सी °ज्ञोभू°.

---

१ ए °ह। कस्मादि°. २ डी °रूपः कि°. ३ डी °ज्ञैर्ज्यौति°. ४ डी यज्वादि°. ५ सी °त्वावीन्य°.

तथा ज्ञैः पण्डितैः सह प्रज्ञां संक्ष्णविष्यते शास्त्रविनोदेन निर्मलीकरिष्यति । सर्वगुणान्वितो[1] महाराजाधिराजोयं भविष्यतीति सर्वविशेषण[2]तात्पर्यार्थ इति ॥

उदयुङ्क्त । न्ययुङ्क्त । इत्यत्र "उ[3]त्स्वराद्०" [२६] इत्यादिनात्मने ॥ अयज्ञतत्पात्र इति किम् । प्रयुअन्यज्ञपात्राणि ॥

परिक्रेष्यते । विक्रेष्यते । अवक्रेष्यते । अत्र "परिवि०" [२७] इत्यादिनात्मने ॥

पराजेष्यते । विजेष्यते । अत्र "परावेर्जेः" [२८] इत्यात्मने ॥

संक्ष्णविष्यते । अत्र "सं[4]मः क्ष्णोः" [२९] इत्यात्मने ॥

जन्मास्योच्चरमाणोपस्किरमाणवृषध्वनिः ।
संचेरे तुरगैर्द्वास्थलोको वर्धयितुं नृपान् ॥ १६ ॥

१६. द्वास्थलोको नृपान्वर्धयितुं तुरगैः कृत्वा संचेरेभ्रमत् । कीदृक्सन् । अस्य दुर्लभ[5]स्य जन्मोच्चरमाणः । अन्तर्भू[6]तणिगर्थः सकर्मकः । उच्चारयन् । अत ए[7]वापस्किरमाणो हृष्टत्वात्तटादि वि[8]लिखन्यो वृषः शण्डस्तस्येव हर्षप्र[9]कर्षेणोदात्तो गम्भीरश्च ध्वनिर्यस्य सः ॥

अपस्किरमाण । इत्यत्र "अपस्किरः" [३०] इत्यात्मने ॥

जन्मोच्चरमाणः । अत्र "उदश्च[10]रः साप्यात्" [३१] इत्यात्मने ॥

तुरगैः संचेरे । अत्र "समस्तृतीयया" [३२] इत्यात्मने ॥

१ सी डी °न्वितम°. २ प °शेषेण°. ३ बी उत्सरा°. ४ प समक्ष्णोः. ५ बी सी डी °भराजस्य. ६ डी °भूतोत्रणि°. ७ प एवोप°. ८ सी डी विलखन्या वृ°. ९ सी डी °प्रहर्षे°. १० सी डी °रः सोप्या°.

संक्रीडच्छकटारूढाः समक्रीडन्त बन्दकाः ।
सद्यो मुक्ताः परिक्रीडमानैर्मिलितबन्धुभिः ॥ १७ ॥

१७. बन्दका गुप्तौ क्षिप्ता नराः परिक्रीडमानैर्हर्षोद्धास्यचत्त्वर्यादिकरणेन रममाणैर्मिलितबन्धुभिर्गुप्तेश्छुटिता इत्यानन्दान्मिलितैर्बान्धवैः सह समक्रीडन्तोद्यानादिषु रेमिरे । किंभूताः सन्तः । सद्यो दुर्लभजन्मकाल एव मुक्ता गुप्तेस्त्यक्ता अत एव संक्रीडन्तो नूतनत्वेनाव्यक्तं शब्दं कुर्वन्तो ये शकटाः क्रीडाप्रस्तावात्क्रीडारथास्तेषु हर्षेणारूढाः ॥

अननुक्रीडमानायाक्रीडमानाः कृतक्रुधे ।
राजन्या अशपन्तास्मै नाथन्ते स्म यतोस्य ते ॥ १८ ॥

१८. राजन्या राजपुत्राः कृतक्रुधे केनाप्यपराधेन विहितकोपायात एवाननुक्रीडमानायारममाणायास्मै दुर्लभायाशपन्त । वयं त्वयि भक्ता एवाज्ञानात्त्वेवमपराद्धमित्यादि कोपोपशमायेममबोधयन्नित्यर्थः । यद्वा । वाचा मात्रादिशरीरस्पर्शनेनेमं स्वाभिप्रायमबोधयन्नित्यर्थः । कीदृशाः सन्तः । आक्रीडमानाः कुमारत्वाद्बालोचितक्रीडाभिः क्रीडन्तः । शपने हेतुमाह । यतस्ते राजन्या अस्य दुर्लभस्य नाथन्ते स्म नाथोस्माकं भूयादित्याशंसन् । अस्येत्यत्र "नाथः" [२.२.१०] इति षष्ठी ॥

समक्रीडन्त । इत्यत्र "क्रीडोकूजने" [३३] इत्यात्मने ॥ अकूजन इति किम् । संक्रीडच्छकटे ॥

१ ए °न्त बन्द°. २ ए सी मुक्ता प°. ३ ए °माना कृ°. ४ डी नाथ्यन्ते.

१ ए बी बन्द°. २ ए बी °प्तेश्छुटि°. ३ सी डी °कात°. ४ डी °न्तो श°. ५ सी °जपु°. ६ ई °पुत्रा कृ°. ७ बी °हिताको°. ८ बी °णास्मै. ९ सी डी °माय सम°. १० बी °त्यर्थाय°. ११ बी °नेमं. १२ डी °मं त्वमभि°. १३ ए °सतः । अ°. बी ई °सत । अ°. १४ सी डी °कटा । अ°.

अननुक्रीडमानाय । आक्रीडमानाः । परिक्रीडमानैः । अत्र "अन्वाङ्परेः" [३४] इत्यात्मने ॥

अशपन्तावौ । अत्र "शपः°" [३५] इत्यादिनात्मने ॥

अस्य नाथन्ते । अत्र "आशिषि नाथः" [३६] इत्यात्मने ॥

सह तेनाग्रजो भुङ्क्ते स्मा भुनक्सोपि तद्वचः ।
पितुस्तावनुजह्राते नयमानौ नयागमे ॥ १९ ॥

१९. तेन दुर्लभेन सहाग्रजो वल्लभो भुङ्क्ते स्माति स्म । सोपि दुर्लभोपि तद्वचोग्रजवचनमभुनक् पालितवान् । एतेनैतयोरत्यन्तं स्नेहानुबन्ध उक्तः । तथा नयागमे नीतिशास्त्रे नयमानौ नयागमे संध्यादीन्सद्गुणान्युक्तिभिः स्थिरीकृत्यान्योन्यस्य सहाध्यायिराजकुमाराणां वा वृद्धिं प्रापयन्तावित्यर्थः । तौ कुमारौ पितुरनुजह्राते पितुर्गुणविषयं क्रियाविषयं वा सादृश्यमविकलं शीलितवन्तौ पितुर्गमनमविच्छेदेन शीलितवन्तौ वा पितृवज्जग्मतुर्वा पितृवच्छीलयामासतुर्वेत्यर्थः ॥

जज्ञे विनेष्यमाणोर्थाभागराजो नृपस्य तुक् ।
मातोदानयमाना यं नयते स्म सुधारसे ॥ २० ॥

२०. शुभलक्षणसूचितौदार्यधार्मिकत्वादिगुणत्वादर्थान्धनानि विनेष्यमाणो धर्माद्यर्थं तीर्थादिषु विनियोक्ष्यमाणो नागराजो नाम नृपस्य तुक् तृतीयः पुत्रो जज्ञे । यं नागराजमुदानयमानोत्सङ्ग आरोपणायोत्क्षिपन्ती सती माता सुधारसे नयते स्म सुधारसविषयं प्रमेयमास्वादं निश्चिनोति स्म । अमृतपानसुखमनुबभूवेति तात्पर्यम् ॥

---

१ सी °ममून°. २ सी डी °नैव त°. ३ ए °न्ध रक्तः ।. ४ बी °ज्जग्मतु°. सी °ज्जग्मतु°. ५ डी °जो नृ°. ६ ए °तीयपु°.

उपनिन्ये गुरुस्तांस्त्रीन्भृत्यानिव महीपतिः ।
कारं विनयमानाश्च प्रजाः प्रैक्षन्त तान्मुदा ॥२१॥

२१. यथा महीपतिश्चामुण्डराजो भृत्यानुपनिन्ये वेतनेनात्मसमीपं प्रापयत्तथा गुरुरुपाध्यायस्त्रींस्तान्कुमारानुपनिन्य आत्मानमाचार्यं कुर्वंस्तानध्यापनार्थमात्मसमीपं प्रापयत् । तथा कारं राजग्राह्यं भागं विनयमाना दानेर्न शोधयन्त्यः प्रजास्तांस्त्रीन्मुदामी नः पालयिष्यन्तीति चिन्तोत्पन्नहर्षेण प्रैक्षन्त च ॥

भुङ्क्ते । अत्र "भुनजोत्राणे" [३७] इत्यात्मने ॥ अत्राण इति किम् । अभुनक् ॥

पितुरनुजह्राते । अत्र "ह्रगो गत°" [३८] इत्यादिनात्मने ॥

नयमानौ नयागमे । गुरुस्तानुपनिन्ये । भृत्यानिवोपनिन्ये । यमुदानयमाना । नयते सुधारसे । कारं विनयमानाः । अर्थान्विनेष्यमाणः । अत्र "पूजाचार्यक°" [३९] इत्यादिना पूजादिषु क्रमेणात्मने ॥

व्यनयन्तारिषड्वर्गं ते कफं व्यनयञ्श्रमात् ।
व्यनयञ्शीयमानस्य म्रियमाणस्य चार्तताम् ॥ २२ ॥

२२. ते कुमारा अरिषड्वर्गम् । षण्णां क्रोधादीनां वर्गः षड्वर्गोरिः शत्रुर्यः षड्वर्गस्तम् । व्यनयन्त जितेन्द्रियत्वेनाशमयन्त । तथा श्रमाच्छस्त्राभ्यासाद्धेतोः कफं श्लेष्माणं व्यनयन् । श्रमेण हि कफः शाम्यति । तथा कारुणिकत्वाच्छीयमानस्य परपराभवादिना दुःखिनो म्रियमाणस्य महाव्याध्यादिना प्राणांस्त्यजतश्चार्ततां पीडां व्यनयन्परित्राणभैषज्यादिसंपादनेनोपशमयन् ॥

---

१ प्र प्रजा प्रै°. २ प्र ता मुदा ॥. ३ सी °माण°.

---

१ सी डी °यस्त्रीतान्कु°. २ प्र °रानुप°. ३ सी डी °मानदा°. ४ सी °न सोध° डी °न साध°. ५ सी °मान । न°. ६ बी °नोपश°.

मा मृषीष्टेत्यनिद्रायद्गुर्वाशीःष्वपि शात्रवम् ।
ताननिद्रायमाणान्द्राक्श्रुत्वामृत नु मूर्छितम् ॥ २३ ॥

२३. अनिद्रावन्तो निद्रावन्तो भवन्ति "डाच्लोहितादिभ्यः षित्" [३.४.३०] इति[1] क्यङ्[2][3] निद्रायमाणा न तथा ये तानुद्यमिनः कुमारान् श्रुत्वा शात्रवमरिवृन्दं द्राक् मूर्छितं महाभयाकुलत्वेनाचेतनं सद्[4]मृत नु मृतमिवाभूत् । कास्वपि सतीषु[5] । अनिद्रायन्तस्तपोध्यानादौ जागरूका[6] ये गुरवस्तेषामाशीःषु[7][8] । कथमित्याह । मा मृषीष्टेति कुशली भूया इत्यर्थ इति ॥

अरिषड्वर्गं[9] व्यनयन्त । इत्यत्र "कर्तृस्थ°" [४०] इत्यादिनात्मने[10] ॥ कर्तृस्थेति किम् । आर्ततां व्यनयन् । अमूर्तेति किम् । कफं व्यनयन्[11] ॥

शीयमानस्य । इत्यत्र "शदेः शिति" [४१] इत्यात्मने ॥

अमृत । मा मृषीष्ट । म्रियमाणस्य । इत्यत्र "म्रियतेः°" [४२] इत्यादिनात्मने ॥

अनिद्रायमाणान् । अनिद्रायत् । इत्यत्र "क्यङो[12] न वा" [४३] इति वात्मने ॥

नाद्योतिष्ट तथाग्नीनां छन्दसामद्युतन्न च ।
नारोचिष्टादिपुंसां वा यथैषामरुचत्त्रयी[1] ॥ २४ ॥

२४. स्पष्टः । किं तु । अग्नीनां दक्षिणाग्निगार्हपत्याहवनीयानाम् ।

---

१ ई °त्रयम् ॥

---

१ सी डाज्लोहि°. २ बी °तिक्यिङ्. ३ प °ङ्यनि°. ४ डी सद् मृतमि°. ५ डी °तीष्वप्यनि°. ६ सी जागुरू°. ७ प गुरव°. ८ ई °शीष्वपि । क°. ९ सी °षद् व्य°. १० प °ने । XXX अनि°. ११ बी °न् । सीय°. १२ सी क्यङो न°.

छन्दसामृग्यजुस्साम्नाम् । आदिपुंसां ब्रह्मविष्णुहराणाम् । एषां कुमाराणाम् ॥

अद्योतिष्ट अद्युतत् । अरोचिष्ट अरुचत् । इत्यत्र "द्युद्भ्योद्यतन्याम्" [४४] इति वात्मने[2] ॥

कृते विवर्तिषमाणा न्यविवृत्सन्कलेरमी ।
काले वत्स्यत्यवर्तिष्यमाणे तन्नेदृशा ध्रुवम् ॥ २५ ॥

२५. यस्माद्धेतोरमी कुमाराः कृत उपचारात्कृतयुगकालोचिते दानशीलादि[3]धर्मकृत्ये । विवर्तिषमाणाः प्रवर्तितुमिच्छन्त[4]: सन्तः कलेः कलिकालोचिता[6]त्पर[7]द्रोहवञ्चनादिमहा[8]पापाख्यविवृत्सन्निवर्तितुमैच्छन्[9] । तत्तस्माद्धेतोः । वत्स्यति भविष्यति । अवर्तिष्यमाणे भूते वर्तमाने च काले । ध्रुवमवश्यम् । नेदृशा नैषां सदृशाः पुण्यात्मानः केपि स[10]न्ति भविष्यन्त्यभूवन्निति च गम्यते ॥

प्रविवर्धिषमाणोपि नैषां वर्धिष्यते खलः ।
विवृत्सन्वर्त्स्यति सुहृन्निश्चिक्य इति कोविदैः ॥ २६ ॥

२६. स्पष्टः । किं[11] तु । कोविदैरङ्गविद्यादिनिपुणैर्निश्चिक्ये शारीरिकतादृक्शुभलक्षणादिसम्यग्विचा[12]रणया निर्णीतम् ॥

वत्स्यति अवर्तिष्यमाणे । न्यविवृत्सन् विवर्तिषमाणाः ॥ वृधूङ् । वर्त्स्यति वर्धिष्यते । विवृत्सन् प्रविवर्धिषमा[13]णः । अत्र "वृद्भ्यः स्यसनोः" [४५] इत्यात्मने वा ॥

---

१ ए वत्संल°.

---

१ ए °सां ऋग्य°. २ ई °नेपदम् ॥. ३ बी सी डी °दिमहाध°. ४ ए °माणा प्र°. ५ ई °न्तः क°. ६ बी °चित्वात्प°. ७ ए °तापर°. ८ सी °दिमिहा°. ९ ए °तिंमै° १० ए सन्त्यभ°. ११ ए किंतुः । को- १२ ई °रणाया°. १३ सी °माणा अ° डी °माणाः । अ°. १४ ए °सरिता°.

कल्पास्थ प्रभवोस्माकं[1] भृत्वा[2] वः कल्पितास्महे ।
क्रामदक्रममाणानां समक्रामन्हृदीति ते ॥ २७ ॥

२७. स्पष्टः । [1]किं तु । कल्पास्थ संपत्स्यध्वे । ते कुमाराः । क्रामदक्रममाणानां क्रामन्तश्च गच्छन्त[2]स्तैरुणा अक्रममाणाश्चाजङ्गमा वृक्षाः । तेषां हृदि चित्ते समक्रामन्संक्रान्ताः । प्रभुत्वोचिताखिलगुणालंकृतत्वात्सचराचरलोकस्यापि चित्ते भाविप्रभुत्वेनामी प्रतिभासिता इत्यर्थः ॥

कल्पास्थ कल्पितास्महे । अत्र "कृपः श्वस्तन्याम्" [४६] इति वात्मने ॥

अक्रममाणानाम् क्रामत् । इत्यत्र "क्रमः°" [४७] इत्यादिना वात्मने ॥

अनुपसर्गादिति किम् । [4]समक्रामन् ॥

विनये क्रममाणानां शास्त्राय क्रमते स्म धीः ।
क्रममाणा च सा तेषां पराक्रमत सर्वतः ॥ २८ ॥

२८. तेषां कुमाराणां विनय उपाध्यायस्य [5]नैम्रतादिक्रियायां क्रममाणानामस्खलितात्मनामात्मानं यापयतां वा विनयपराणां सतामित्यर्थः । धीः शास्त्राय त[6]र्कादिग्रन्थाय क्रमते[7] स्मोत्सहते स्म तत्परा वानुज्ञाता वाभूत् । सा च तेषां धीः क्रममाणा शास्त्रार्थावगाहनात्स्फीतीभवन्ती संतानेन प्रवर्तमाना वामीभिरेवानुकूलाहाराद्या[8]सेवनेन पाल्यमाना वा सती सर्व[9]तः सर्वकार्येषु पराक्रमताप्रतिहताभूदात्मानं [10]यापितवती वोत्सहते स्म वा तत्परा वानुज्ञाता वाभूत्स्फीताभूद्वा संतानेन प्रावर्तिष्ट वा ॥

---

१ डी °कं भूत्वा. २ ए °त्वा व क°.

---

१ सी किं तुः क°. २ बी °रुणा आक्र° ३ बी सी ई °पः स्वस्त° ४ बी समाक्रा°. ५ डी नमनादि°. ६ सी °र्काय ग्र°. ७ ए °ते स्म. ८ सी °सेवाने°. ९ सी °र्वका°. १० ए °पिभव°.

उपाक्रमत धर्मोर्थे धर्मेर्थश्चानुचक्रमे ।
अनुचक्राम कामोपि तयोस्तेषां विवेकिनाम् ॥ २९ ॥

२९. तेषां कुमाराणां धर्मोर्थे उपाक्रमत । अप्रतिहतोभूदात्मानं यापितवान्वा द्रव्यार्थमुत्सहते स्म वा तत्परोनुज्ञातो वाभूत्स्फीत्यभूद्वा संतानेन प्रावर्तिष्ट वा तैरेव पाल्यते स्म वार्थहेतुरभूदित्यर्थः । अर्थश्च धर्मेनुचक्रमे धर्मस्थानेषु विनियोज्यमानत्वाद्धनमपि धर्मार्थमभूदित्यर्थः । तथा कामोपि तयोरनुचक्राम सन्तानवृद्धिहेतुत्वात्सन्तानवृद्ध्या राज्याद्यर्थवृद्धिहेतुत्वाच्च धर्मार्थयोर्हेतुरभूदित्यर्थः । क्रियार्थाः सर्वेप्युभयत्रापि प्राग्वद्व्याख्याः । यतः कीदृशां तेषाम् । विवेकिनां युक्तायुक्तविचारकाणाम् ॥

वृत्तौ । विनये क्रममाणानाम् ॥ सर्गे । शास्त्राय क्रमते ॥ तायने । क्रममाणा । इत्यत्र "वृत्ति°" [४८] इत्यादिनात्मने ॥

पराक्रमत सर्वतः । उपाक्रमतार्थे । अत्र "परोपात्" [४९] इत्यात्मने ॥ परोपादेवेति किम् । अनुचक्राम ॥ अन्ये तु परोपाभ्यां पराक्रमेर्वृत्त्याद्यर्थाभावेपीच्छन्ति । तेन पराक्रमत । उपाक्रमत । इत्यात्मनेपदमेव । वृत्त्यादिषु त्वन्योपसर्गपूर्वादपि पूर्वेण मन्यन्ते । अनुचक्रमे ॥

साधु विक्रममाणत्वं गजानां प्राक्रमन्त ते ।
उपाक्रमन्त चाश्वानां यदाक्रमत भास्करः ॥ ३० ॥

३०. यदा भास्करोर्क आक्रमतोदेति स्म तदा प्रभाते ते कुमाराः साधु सुशिक्षया चतुरं यथा स्यादेवं गजानां विक्रममाणत्वं गतिं प्राक्रमन्त प्रारेभिरेङ्गीचक्रुर्वा । तथाश्वानां च विक्रममाणत्वं धौरितादिगतिपश्च-

---

१ प ई स्म त°. २ प वार्थो हे°. ३ सी °चपक्र°. ४ ई °र्थः । XXX क्रिया°. ५ डी °द्व्याख्या । य°. ६ बी °मतः स°. ७ सी °मतसर्थे । डी °मत धर्मोर्थे ।. ८ ई °पादिति. ९ बी °न्ये प°. १० डी °मते । उ°. ११ सी °ममण°.

क्रमुपाक्रमन्त । एतेनैषां गजाश्वशिक्षाकौशलोक्तिः । प्राग्रार्ह गजाश्वशिक्षाकुशला राजपुत्रा हस्तिनोश्वांश्च सुगतिं शिक्षयन्तीति स्थितिः ॥

विक्रममाणत्वम् । अत्र "वेः स्वार्थे" [५०] इत्यात्मने ॥

प्राक्रमन्त । उपाक्रमन्त । इत्यत्र "प्रोपादारम्भे" [५१] इत्यात्मने ॥

आक्रमत भास्करः । अत्र "आङः°" [५२] इत्यादिनात्मने ॥

पित्राज्ञामाददानोथ वल्लभः कण्टकच्छिदे ।
प्रतस्थेश्वैर्मुखं कूर्मो व्यादाद्व्यादाच्च भूर्यथा ॥ ३१ ॥

३१. अथ वल्लभः पित्राज्ञां चामुण्डराजादेशमाददानोङ्गीकुर्वन्सं-[1]न्कण्टकोच्छिदे[2] मालैव्यदेशाधिपतेः[3] शत्रोरुच्छित्तयेश्वैः कृत्वा तथातिबाहुल्याद्गाढसंमर्देन प्रतस्थे । यथा कूर्मः कमठो मुखं व्यादाद्गाढभारपीडया प्रसारितवान् । भूः पृथ्वी व्यादाच्च विदीर्णा ॥

चामुण्डराजः किलातिकामाद्विकलीभूतः सन्भगिन्यों[4] वाचिणिदेव्या राज्योंत्स्फेटयित्वा[5] तत्पुत्रो वल्लभो राज्ये प्रतिष्ठितः । चामुण्डराजेन चाभिमानवशादात्मसाधनार्थं वाराणस्यां[6] गच्छता मालैविकैर्[7] विलुण्ठितच्छत्रादिराजचिह्नकेन पत्तन आगत्य वल्लभस्याज्ञा दत्ता यदि त्वं मदीयः पुत्रस्तदा मालविकेभ्यो मदीयच्छत्रादीन्मोचयेति वस्तुस्वरूपम् । एतच्च वर्ण्यत्वेनाधिकृतस्योपनिबध्यमानमनुचितमिति पित्राज्ञामाददान इत्यनेन सूचितम् ॥

आददानः । अत्र "दाणः°" [५३] इत्यादिनात्मने ॥ अस्वास्यप्रसारविकासा[8][9] इति किम् । कूर्मो मुखं व्यादात् । भूर्व्यादात् ॥

---

१ प बी °न्सकण्ट°. २ बी °कच्छेदे. ३ डी °लवदे°. ४ °ई एफ् °न्या चाचि°. ५ ई एफ् °ज्यात्स्फोट°. ६ प वारणस्यां. बी वाणारस्यां. ७ प सी डी °लवके°. ८ बी अभ्यास°. ९ बी °प्रकार°.

आपृच्छतागतान्कांश्चिदानुवानमयूरवाक् ।
कांश्चिदागमयांचक्रे स दत्त्वैकं प्रयाणकम् ॥ ३२ ॥

३२. स वल्लभ एकं प्रयाणकं दत्त्वा कांश्चिद्बन्धुमित्रामात्यादीनागताननुव्रजनायायातानापृच्छत वियुज्यमानः प्रयाणकविषयेनुज्ञापितवान् । कीदृक्सन् । आनुवान उत्कण्ठापूर्वं शब्दायमानो यो मयूरस्तस्येव स्निग्धा मधुरा च वाग्यस्य सः । तथा कांश्चिन्नृपादीनागमयांचक्रे कंचित्कालं प्रतीक्षितवान् । एतेन सर्वसैन्यमेलनमुक्तम् ॥

आनुवान । आपृच्छत । इत्यत्र "नुप्रच्छः" [५४] इत्यात्मने ॥
आगमयांचक्रे । अत्र "गमेः क्षान्तौ" [५५] इत्यात्मने ॥

तं नाह्वन्त नृपा यान्तमाह्वयन्तं जयश्रियम् ।
बन्धूंसंह्वयमानास्तु न्यह्वयन्तार्थहेतवे ॥ ३३ ॥

३३. तं वल्लभं नृपा अन्तरालस्था राजानो नाह्वन्त स्पर्धमाना नाकारितवन्तः । किंभूतं सन्तम् । जयश्रियमाह्वयन्तं मालव्यराजजयेच्छुमित्यर्थः । अत एव मालवान्प्रति यान्तम् । तुर्विशेषे । किं तु बन्धूंसंह्वयमाना मेलनायाकारयन्तः सन्तो नृपा अर्थहेतवे पूजार्थं तं न्यह्वयन्त न्यमन्त्रयन् ॥

व्यह्वास्ताराभतांस्तान्स तद्बन्धूनप्युपाह्वत ।
तत्प्राभृतान्युपायंस्तोपतस्थे चाध्वदेवताः ॥ ३४ ॥

३४. स वल्लभस्तान्नृपानारात्समीपे नतान्सतो व्यह्वास्तालापै । तद्बन्धूनपि नृपाणां बान्धवांश्चोपाह्वतालपत् । तथा तत्प्राभृतानि नृपढौकनान्युपायंस्ताङ्गीचक्रे । तथाध्वदेवता देवकुलादिस्था मार्गाधिष्ठातृदेवता निरुपद्रवायोपतस्थे च पुष्पफलादिनार्चितवान् । एतेनास्य सर्वौचित्यज्ञतोक्ता ॥

१ सी डी °क्रे किंचि°. २ सी डी °न् । इत्येते°. ३ ए. °यन्तं न्य°.

अत्रोपतिष्ठते पारा सिन्धुमध्वैष कुन्तलान् ।
ब्रुवन्त इति राजान उपातिष्ठन्त केपि तम् ॥ ३५ ॥

३५. केपि नृपास्तं वल्लभमुपातिष्ठन्त मैत्र्या हेतुना फलेन वाराधयन् । कीदृशाः सन्तः । ब्रुवन्तो वेत्रिवद्विज्ञपयन्तः । किमित्याह । अत्र देशे पारा पाराख्या नदी सिन्धुं सिन्ध्वाख्यनदीमुपतिष्ठत उपश्लिष्यति । तथैष प्रत्यक्षोध्वा मार्गः कुन्तलान्देशभेदानुपतिष्ठते गच्छतीति । एतेन वल्लभोवन्तिमध्ये प्रविष्ट इत्युक्तम् । तत्र हि परासिन्धुमेलनादि वर्तते ॥

उपातिष्ठन्त तं मन्त्रैस्ते मार्गाश्रमतापसाः ।
उपास्थुर्यानतिथयो ये दातॄनोपतस्थिरे ॥ ३६ ॥

३६. अतिथिवात्सल्यमहाधर्मनिष्ठत्वेन[1] यानतिथय उपास्थुर्लिप्सयोपाश्रितास्तथा ये महातपःपात्रत्वेन[2] शिलोञ्छवृत्तित्वाद्दातॄन्दायकैर्कैनोपतस्थिरे[3] न लिप्सयोपाश्रितास्ते मार्गाश्रमतापसा मार्गनिकटाश्रमवर्तिमुनयस्तं वल्लभं वर्णाश्रमगुरुत्वान्मन्त्रैराशीर्मन्त्रादिभिरुपातिष्ठन्ताराधयन् ॥

तं नाह्वन्त । इत्यत्र "ह्वः स्पर्धे" [५६] इत्यात्मने ॥ स्पर्धे इति किम् । जयश्रियमाह्वयन्तम् ॥

संह्वयमानाः । न्यह्वयन्त । व्यह्वास्त । इत्यत्र "संनिवेः" [५७] इत्यात्मने ॥

उपाह्वत । इत्यत्र "उपात्" [५८] इत्यात्मने ॥

उपायंस्त । इत्यत्र "यमः स्वीकारे" [५९] इत्यात्मने ॥

अध्वदेवता उपतस्थे । तमुपातिष्ठन्त । पारा सिन्धुमुपतिष्ठते । एषोध्वा

---

१ बी °निष्ठित्वे°. २ सी °पःप्रावत्वे°, डी °पःप्रभावत्वे°. ३ सी डी °पकानो° ४ ई °कर्तॄनो° ५ बी °ह्वयत.

कुन्तकावुपतिष्ठते[1] मन्त्रैस्तमुपातिष्ठन्त । इत्यत्र "देवार्चा°" [६०] इत्यादिना देवार्चादिषु[2] क्रमेणात्मने ॥

दात्रुत्रोपतस्थिरे दातुपास्थुः । अत्र "वा लिप्सायाम्" [६१] इति वात्मने ॥

मुक्तावुत्तिष्ठमानास्ते पुरो यावद्वितस्थिरे ।
उदस्थादासनात्तावत्सोवतस्थे च साञ्जलिः ॥ ३७ ॥

३७. मुक्तौ मोक्षार्थमुत्तिष्ठमाना धर्मानुष्ठानेन चेष्टमानास्ते मार्गाश्रमतापसाः पुरो वल्लभस्याग्रतो यावद्वितस्थिरे[3] विशिष्टेन मुनिजनोचितेन संस्थानेन स्थितास्तावत्स वल्लभो विनीतत्वेनासनादुदस्थात्साञ्जलिश्च योजितकरयुगश्चावतस्थेवस्थितः ॥

मा प्रतिष्ठस्व संतिष्ठस्वाद्य तिष्ठामहे हि वः ।
त्वयि नस्तिष्ठते प्रीतिः केप्यूचुरिति तं नृपाः ॥ ३८ ॥

३८. केपि भक्ता नृपास्तं वल्लभमूचुः । कथमित्याह । मा प्रतिष्ठस्व मा प्रस्थानं कार्षीरद्य संतिष्ठस्वात्रैव तिष्ठ । हि यस्मादद्य वयं वो युष्मभ्यं तिष्ठामहे स्वाभिप्रायप्रकाशनेनात्मानं रोचयामः । ननु किमिति यूयमस्मभ्यं तिष्ठध्व इत्याशङ्कयाहुः । यस्मान्नोस्माकं प्रीतिरन्तरङ्गस्नेहस्त्वयि तिष्ठते त्वया प्रमाणभूतेन मानितास्मत्प्रीतिः प्रमाणमित्यर्थ[5] इति ॥

मुक्तावुत्तिष्ठमानाः । अत्र "उदः°" [६२] इत्यादिनात्मने ॥ अनूर्ध्वेह इति किम् । आसनादुदस्थात् ॥

संतिष्ठस्व । वितस्थिरे । प्रतिष्ठस्व । अवतस्थे । अत्र "संविप्रावात्" [६३] इत्यात्मने ॥

---

१ डी °ते । इ°. २ ई. °र्चादिषु. ३ प °रे वशि°. ४ ई °स्यात्प्राञ्ज°.
५ सी डी °र्थः ॥. ६ प बी सी डी पफ़ °दुत्तस्थौ ॥ सं°.

तिष्ठामहे वः । त्वयि तिष्ठते प्रीतिः । अत्र "ज्ञीप्स्यास्थेये" [६४] इत्यात्मने ॥

केष्वप्यभयमातस्थे राज्यं समगरिष्ट च ।
कानप्यवागरिष्टेवापजानानः स तेजसा ॥ ३९ ॥

३९. स वल्लभः केष्वपि भीतेषु राजस्वभयं भयाभावमातस्थे प्रतिज्ञातवान् । तथा केष्वापि निरिच्छयाश्रितेषु राज्यं समगरिष्ट च प्रतिज्ञातवांश्च । प्राक्तनं केष्वपीत्यत्रापि योज्यम् । तथा कानप्यनताभूपांस्तेजसा प्रतापेनापजानानोपलपन्सन्नवागरिष्टेव समूलोन्मूलनेन नाम्नोप्युच्छेदाद्गूस्तवानिव ॥

आतस्थे । अत्र "प्रतिज्ञायाम्" [६५] इत्यात्मने ॥

समगरिष्ट । इत्यत्र "समो गिरः" [६६] इत्यात्मने ॥

अवागरिष्ट । इत्यत्र "अवात्" [६७] इत्यात्मने ॥

अपजानानः । अत्र "निह्नवे ज्ञः" [६८] इत्यात्मने ॥

संजानानास्तादृशं तं संजानन्तो हरेस्तदा ।
जगज्झम्पननाम्नोच्चैः प्रत्यजानत भूभुजः ॥ ४० ॥

४०. तदा यात्राकाले तं वल्लभं भूभुजो जगज्झम्पननाम्ना जगतोर्थोच्छत्रुलोकस्य झम्पनोतर्कितमुपरिपातुकस्तेन नाम्नोच्चैः प्रत्यजानताभ्युपागच्छन् । किंभूताः सन्तः । तादृशं जगज्झम्पनेति नाम्नः सदृशं शत्रुलोकं झम्पयन्तमित्यर्थः । संजानानाः पश्यन्तोत एव हरेः सिंहस्य संजानन्तः स्मरन्तोस्मिन् जगज्झम्पनतालक्षणसिंहसाधर्म्यदर्शनात्सिंहं स्मरन्त इत्यर्थः ॥

तं संजानानाः । तं प्रत्यजानत । इत्यत्र "संप्रतेरस्मृतौ" [६९] इत्यात्मने ॥

अस्मृताविति किम् । हरेः संजानन्तः ॥

---

१ बी सी निछ्या° डी निच्छया°. २ सी °समाग°. ३ प °भगिरि°. ४ प प्रत्युजा°. ५ सी डी °नाः । प्र°.

योस्य जिज्ञासते स्मौजोन्वजिज्ञासन्न केपि तम् ।
तमशुश्रूषमाणानां नाशुश्रूषन्वचोपि हि ॥ ४१ ॥

४१. यो नृपोस्य वल्लभस्यौजो बलं स्वबलावलेपेन रणकरणाज्जिज्ञासते स्म ज्ञातुमैच्छत्तं नृपं केपि स्वकीयमन्त्रिमित्रादयो नान्वजिज्ञासन्नानुमतिमप्यदित्सन्नित्यर्थः । तथा तं वल्लभमशुश्रूषमाणानां मानात्सेवितुमनिच्छूनां नृपाणां वचोपि । आस्तां मैत्रीविधानादीत्यपेरर्थः । केपि न हि नैवाशुश्रूषन्नीषदपि श्रोतुमैच्छन् । केपीति प्राक्तनमत्रापि योज्यम् ॥

जयाय प्रतिशुश्रूषत्यस्मिन्केपि महीभुजः ।
नादिदृक्षन्त दोःशक्तिमसुस्मूर्षन्त निम्बजाम् ॥ ४२ ॥

४२. अस्मिन्वल्लभे जयाय प्रतिशुश्रूषति प्रतिज्ञां चिकीर्षौ सति न केपि महीभुजो दोःशक्तिमदिदृक्षन्त युद्धेन परीक्षितुमैच्छन् । सर्वोत्कृष्टबलत्वादनेन सह न केपि युयुधिर इत्यर्थः । किं तु परित्राणाय निम्बजां निम्बजाख्यां सप्रत्ययां लोकप्रसिद्धां देवतामसुस्मूर्षन्त स्मर्तुमैच्छन् ॥

जिज्ञासते । अत्र "अननोः सनः" [७०] इत्यात्मने ॥ अननोरिति किम् । अन्वजिज्ञासन् ॥

शुश्रूषमाणानाम् । अत्र "श्रुवः°" [७१] इत्यादिनात्मने ॥ अनाङ्प्रतेरिति किम् । आशुश्रूषन् । प्रतिशुश्रूषति ॥

असुस्मूर्षन्त । अदिदृक्षन्त । अत्र "स्मृदृशः" [७२] इत्यात्मने ॥

---

१ सी °दिशधि° २ ई. °न्त । इत्यत्र.

दैवात्सोस्याथ रोगोभूच्छिक्षांचक्रे न कोपि यम् ।
यमेदिधिषमाणं च व्यजिगीषन्त नागदाः ॥ ४३ ॥

४३. अथ दैवाद्विधिवशादस्य वल्लभस्य स रोगः शीतलिकाख्योभूद्यं रोगं कोपि[1] वैद्यादिर्न शिक्षांचक्रे । शरीरान्तर्गतत्वेन न ज्ञातुं शक्नुयामितीच्छति स्मेत्यर्थः । यं च रोगमेदिधिषमाणं विवर्धिषमाणमगदा औषधानि न व्यजिगीषन्त । असाध्यो व्याधिरुत्पन्न इत्यर्थः ॥

सोङ्गे चिक्रंसमानं तमीक्षांचक्राण आत्मना ।
समाधिं बिभरांचक्रे बिभयांचकृवान्न हि ॥ ४४ ॥

४४. स वल्लभो न हि बिभयांचकृवान्नैव भीतः । कीदृक्सन् । अङ्गे चिक्रंसमानं स्फायितुकामं तं रोगमात्मनेक्षांचक्राणो बाधावृद्ध्या ज्ञातवान् । किं तर्हि समाधिं चित्तैकाग्र्यं बिभरांचक्रे पोषितवान् । एतेनास्य विद्वत्तोक्ता ॥

बिभरांचकृवान्स्थैर्यमुत्कुर्वाणः कलिं तदा ।
संसारं सोवचक्रेथोपचक्रे योगिनां पदम् ॥ ४५ ॥

४५. तदा स वल्लभः कलिं कलिकालकर्म रागद्वेषादिकं कलहं वोत्कुर्वाणः परिजिहीर्षया सदोषं प्रतिपादयन्धैर्यं चित्तावष्टम्भं बिभरांचकृवान्पोषितवान् । अथ तथा संसारं रागद्वेषादिदोषात्मकं भवप्रपञ्चमवचक्रे तिरस्कृतवानत एव योगिनां पदमुपचक्रे सिषेवे । योगिनो हि कलिमुत्कुर्वाणा धैर्यं बिभ्रति संसारं चावकुर्वते ॥

१ सी॰ च विजि. डी च वाजि.

१ ए॰ °तिः । यं. २ ए॰ °क्राणा बा°. ३ सी डी °लहमुत्कु°.

नान्यदारानान्यवादान्ये पवित्राः प्रचक्रिरे ।
श्रियं तेषु प्रकुर्वाणः श्रेयसां स उपास्कृत ॥ ४६ ॥

४६. स वल्लभः श्रेयसां पुण्यानामुपास्कृत तेषु गुणान्तरमादधौ तानि विशिष्टतराणि चक्र[1] इत्यर्थः[2] । कीदृक्सन् । ये पवित्रा यमनियमैः पूतात्मानो मुनयोन्यदारान्परस्त्रियो न प्रचक्रिरे न विनिपातमविभाव्य तानभिजग्मुरित्यर्थः । तथा येन्यवादान्परकथा न प्रचक्रिरे न कथयितुमारेभिरे न प्रकर्षेणाकथयन्वेत्यर्थः । तेषु श्रियं प्रकुर्वाणो धर्मार्थं विनियुञ्जानः ॥

शिक्षांचक्रे । अत्र "शकः°" [७३] इत्यादिनात्मने ॥

अनुबन्धेन । एदिधिषमाणम् ॥ उपपदेन । व्यजिगीषन्त ॥ अर्थविशेषेण । अङ्गे चिक्रंसमानम् । अत्र "प्राग्वत्" [७४] इत्यात्मने ॥

ईक्षांचक्राणः इत्यत्राफलवत्यपि । बिभरांचकृवान् इत्यत्र फलवत्यपि "आम्ः कृगः" [७५] इत्यात्मनेपदं स्यान्न स्याद्वेति विधिप्रतिषेधावतिदिश्येते । यत्र तु पूर्वस्मादुभयं तत्र फलवत्यफलवति[3] चोभयं स्यात् । बिभरांचक्रे । बिभरांचकृवान् ॥

कलिमुत्कुर्वाणः । संसारमवचक्रे । पदमुपचक्रे । अन्यदारान्न प्रचक्रिरे । श्रेयसामुपास्कृत । नान्यवादान्प्रचक्रिरे । श्रियं तेषु प्रकुर्वाणः । अत्र "गन्धन°" [७६] इत्यादिना गन्धनादिषु क्रमेणात्मने ॥

स कालमधिकुर्वाणो वदमानः सुहृज्जने ।
तत्त्वेषु वदमानश्चावदिष्ट परमात्मनि ॥ ४७ ॥

४७. स वल्लभः परमात्मनि परमः क्षीणसकलकर्मांशत्वाच्छ्रेष्ठो य

१ ई. °शिष्टानि च°. २ ई. °र्थः । ये°. ३ ई. °ति चोभ°.

आत्मा तस्मिन्सर्वज्ञे देवेवदिष्ट परमात्मैवाधुना मे शरणमिति तद्वि-षयमुत्साहं वाचाविष्कृतवान् ध्यानेन तत्रोत्सहते स्म वेत्यर्थः। परमा-त्मानं दध्याविति तात्पर्यम्। कीदृक्सन्। कालं कृतान्त-मधिकुर्वाणः पूर्वोक्तधर्मध्यानेनाभिभवंस्तेनापराजीयमानो वा शक्तो-शक्तो वा तमुपेक्षमाणो वेत्यर्थः। तथा सुहृज्जने वदमान इन्द्रियो-पघाताभावेन सम्यग्ज्ञानाच्छोकापनोदायानाकुलसंबोधनाच्च विक-सितमुखत्वाद्दीप्यमानो वदन्वा वदन्दीप्यमानो वा दीप्यमान एव वेत्यर्थः। तथा तत्त्वेषु परमात्मोक्तेषु पदार्थेषु वदमानश्च ज्ञात्वा वदन् वदितुं जानन्वा वदन्सन् जानन्वा जानन्नेव वेत्यर्थः॥

कार्ये विवदमानान्स उपावदत मन्त्रिणः।
उपावदत सेनान्यमथात्मानमसाधयत्॥ ४८॥

४८. कार्ये सैन्यव्याघोटनादौ राजकृत्ये विवदमानान्मिथ एकसंमत्य-भावेन विमतिपूर्वकं विचित्रं भाषमाणान्विविधं मन्यमानान्वा मन्त्रिणः स वल्लभ उपावदत युष्माकं कुलक्रमागतानां मन्त्रिणामधुनैवं नाना-मतिकरणं न युक्तमित्युपसान्त्वयामास। इयन्तं कालं मया मत्पूर्वजैश्च यद्यूयं सर्वर्द्ध्या पोषितास्तत्किमधुना विमतिकरणेन राज्यक्षयार्थमित्यु-पालंभत वेत्यर्थः। तथा सेनान्यं सेनापतिमुपावदत यदि त्वं मम स्वामिन उपकारान्स्मरसि तदा त्वया मदीयमृत्युं कुत्राप्यज्ञापयतेदं सैन्यं शीघ्रमणहिल्लपुरे नेयमियद्गजाश्वधनादि मया तुभ्यं प्रसादादत्तमिति रहस्युपालोभयत्। अथानन्तरमात्मानमसाधयत् पण्डितमरणेन दिवं गत इत्यर्थः॥

कालमधिकुर्वाणः। अत्र "अधेः°" [७७] इत्यादिनात्मने॥

---

१ बी सी डी ई °विस्कृत°. २ ई °दन्दी°. ३ ए °षु व°. ४ ई °न्वा जानन्ने°. ५ इ. विविधं भा°. ६ सी डी °मदिल°.

वदमानः सुहृज्जने । तत्त्वेषु वदमानः । परमात्मन्यवदिष्ट । कार्ये विवदमानान् । उपावदत मन्त्रिणः । उपावदत सेनान्यम् । अत्र "दीप्तिज्ञान°" [७८] इत्यादिना दीप्त्यादिषु क्रमेणात्मने ॥

सैन्यैः प्रवदमानैर्हा धिगित्याशु शुकैरिव ।
सेनानीरुल्ललङ्घेथाटवीं संप्रवदच्छुकाम् ॥ ४९ ॥

४९. अथ सैन्यैः सह सेनानीराश्वटवीमुल्ललङ्घे । किंभूतैः । शोकेन विलापित्वाद् हा धिगिति प्रवदमानैः । कैरिव शुकैरिव । सहोपमेयम् । सैन्यशोकाक्रन्दश्रवणेन शोकाक्रान्तत्वाद् हा धिगिति प्रवदमानैः शुकैः सहेत्यर्थः । अत एव किंभूतामटवीं संप्रवदच्छुकां संभूयविलपच्छुकाम् । एतेन वल्लभविरहे पक्षिणामपि शोक उक्तः ॥

सैन्यैः प्रवदमानैः । इत्यत्र "व्यक्त°" [७९] इत्यादिनात्मने ॥ व्यक्तवाचामिति किम् । संप्रवदच्छुकाम् ॥ शुकसारिकादीनामपि व्यक्तवाक्त्वात्सहोक्ताविच्छन्त्यन्ये । प्रवदमानैः शुकैः ॥

विप्रावदन्त नामात्या अन्ये विप्रावदन्न वा ।
मिथोनुवदमानास्तु सेनान्योन्ववदन्वचः ॥ ५० ॥

५०. वल्लभेनोपसान्त्वितत्वादुपालब्धत्वान्नामात्या न विप्रावदन्त मिथो वचो निषेधेन युगपद्विरुद्धं नोचुरित्यर्थः । एवं न वा न चान्ये नृपसामन्तादयो विप्रावदन् । तुर्विशेषे । किं तु सेनान्यो दण्डनेतुर्वचोमात्या अन्ये चान्ववदन् सेनान्या पूर्वमुक्ते पश्चादवदन् । प्रमाणीचक्रुरित्यर्थः । किंभूताः सन्तः । मिथोनुवदमाना मिथ एकसांमत्येन यथैके वदन्ति तथापरे वदन्त एकैः पूर्वमुक्तेपरे पश्चाद्वदन्तो वेत्यर्थः ॥

---

१ ए °काक्रा°. २ सी डी °व च किं°. ३ ए °दीनां व्य°. ४ ई °क्त्वात्स°. ५ ए °वान्ये°. ६ सी डी °दन्ति । ए°.

विप्रावदन्त । विप्रावदन् । इत्यत्र "विवादे वा" [८०] इति वात्मने ॥ मिथोनुवदमानाः । अत्र "अनोः°" [८१] इत्यादिनात्मने ॥ कर्मण्यसतीति किम् । वचोन्ववदन् ॥

राजपुत्रस्य जानानोपतस्थे जनतोन्मुखी ।
संगच्छमाना संपृच्छमाना संशुश्रुवे तथा ॥ ५१ ॥

५१. जनता ग्रामादिजनौघ उन्मुखी सैन्यसंमुखोपतस्थे ढुढौके । यतो राजपुत्रस्य वल्लभस्य जानाना राजपुत्रेण कृत्वा प्रवर्तमाना राजपुत्रे रक्ता सेनान्यमपि राजपुत्रतयाध्यवस्यन्तीवेत्यर्थः । ततश्च तथा संशुश्रुवे यथा वृत्तमाकर्णितवती । यतः संगच्छमाना सैन्यैः सह मिलन्ती संपृच्छमाना सैन्यान्प्रश्नयन्ती च ॥

संविदानां तथा संस्वरमाणां विनिवार्य ताम् ।
सैन्या धैर्ये समिग्राणाः समृच्छन्ते स्म पत्तने ॥ ५२ ॥

५२. तथा कुमारस्य तं मृत्युप्रकारं संविदानां जानतीमत एव संस्वरमाणां शोकेन विलपन्तीं तां जनतां विनिवार्य सैन्याः पत्तने समृच्छन्ते स्म प्राप्ताः । ऋच्छेरर्तेर्वा रूपमिदम् । किंभूताः सन्तः । धैर्ये समिग्राणाः संगच्छमानाः ॥

राज्ञि संपश्यमानेथ शोकपूर्णा विचक्रिरे ।
ते स्वरानविकुर्वाणा धैर्यात्तत्सर्वमूचिरे ॥ ५३ ॥

५३. अथ राज्ञि चामुण्डराजे संपश्यमाने सैन्याभिमुखं पश्यति ते सैन्याः शोकपूर्णाः सन्तो विचक्रिरे । आक्रन्दनादिकचेष्टाभिर्निष्फलमचेष्टन्तेत्यर्थः । ततश्च धैर्याच्चित्तावष्टम्भमाश्रित्य स्वरानविकुर्वाणा नानाविधान् शब्दानकुर्वाणास्तद्यथावृत्तं सर्वमूचिरे ॥

१ प °धा ग्रु°.

न स्वरं व्यकरोद्राजाम्लानयायच्छमानया ।
शुचा नायच्छते स्मांह्री नाहते स्म शिरोपि च ॥ ५४ ॥

५४. आयच्छमानया दीर्घीभवन्त्या अत एवाम्लानया पीडयन्त्या शुचा शोकेन हेतुना राजा न स्वरं व्यकरोद्विनाशितवान् । महापुरुषत्वाच्छोकेन न घर्घरस्वरोभूदित्यर्थः । तथांह्री नायच्छते स्म न विसंस्थुलं प्रसारितवान्नापि च शिर आहते स्म ॥

राजपुत्रस्य जानाना । इत्यत्र "ज्ञः" [८२] इत्यात्मने । "अज्ञाने ज्ञः षष्ठी" [२.२.८०] इति षष्ठी ॥

उपतस्थे । अत्र "उपात्स्थः" [८३] इत्यात्मने ॥

संगच्छमाना । समृच्छन्ते । संपृच्छमाना । संशुश्रुवे । संविदानाम् । संस्वरमाणाम् । अर्तीति सामान्यनिर्देशाद्भ्वादिरदादिश्च गृह्यते । समृच्छन्ते । समिय्राणाः । संपश्यमाने । अत्र "समो गम्°" [८४] इत्यादिनात्मने ॥

शोकपूर्णास्ते विचकिरे । स्वरानविकुर्वाणाः । अत्र "वेः°" [८५] इत्यादिनात्मने ॥ अनाश इति किम् । स्वरं व्यकरोत् ॥

आयच्छमानया । आम्लानया । स्वेङ्गे च कर्मणि । आयच्छते स्मांह्री । आहते स्म शिरः । अत्र "आङो यम°" [८६] इत्यादिनात्मने ॥

शुचा वितपमानाग्नितुल्ययोत्तपमानया ।
उत्तेपेङ्गं नृपोन्ये वा के नाङ्गानि वितेपिरे ॥ ५५ ॥

५५. उत्तपमानयातितीव्रत्वेन प्रज्वलन्त्यात एव वितपमानो आ-

१ सी डी °नाशत°. २ ए स वि°. ३ सी. °या । स्वाङ्गे°.

ज्वल्यमानो योग्निस्तेन तुल्यया शुचा कृत्वा नृपश्चामुण्डराजोङ्गमुत्तेपे संतापितवान् । वा यद्वा । युक्तमेवैतत् । यतः केन्ये शुचाङ्गानि न वितेपिरेपि तु सर्वे सगरादयः पूर्वे महात्मानोपि पुत्रशोकेनाङ्गानि संतापितवन्त इत्यर्थः ॥

वितपमानाग्नि । उत्तपमानयां[2] । स्वेङ्गे कर्मणि । अङ्गानि वितेपिरे । अङ्गमुत्तेपे । अत्र "ब्युदस्तपः" [८७] इत्यात्मने ॥

राजा दर्शयते[1] स्मर्षींस्तीर्थमस्मरयच्च तम् ।
स कलिं गर्धयांचक्रे नावञ्चयत तं कलिः ॥ ५६ ॥

५६. राजा ऋषीन्धर्मोपदेशेन शोकापनोदस्या[3]गतान्मुनीन्दर्शयते[4] स्म पश्यन्ति स्म राजानमृषयस्तान्संमुखालोकनाभ्युत्थानधर्मशुश्रूषाद्यनुकूलाचरणेन राजैव प्रयुङ्क्ते स्म । तथा मुनिभ्यो धर्मश्रवणोद्भूतभववैराग्यतस्तं राजानं तीर्थं पुण्यक्षेत्रमस्मरयच्च तीर्थं स्मरति स्म स तं स्मरन्तं तीर्थमेवै[5] महाप्रभावत्वा[6]द्यनुकूलाचरणेन प्रयुङ्क्ते स्मात्मसाधनार्थं प्रत्यक्षदृश्यमानप्रभावं शुक्लतीर्थं राजा सस्मारेत्यर्थः । अत एव स राजा कलिं कलिकालं गर्धयांचक्र एवं धर्माभिलाषेणावञ्चयत[7] । तथा तं नृपं कलिर्नावञ्चयत तदोद्भूतधर्माभिलाषाव्याववेनेन[8] न प्रतारितवान् । प्रवर्धमानधर्मपरिणामोभूदित्यर्थः ॥

राजा दर्शयते[9] स्मर्षीन् । इत्यत्र "अणिकर्म णि°" [८८] इत्यादिनात्मने ॥

अस्मृताविति किम् । तीर्थमस्मरयत्तम् ॥

कलिं गर्धयांचक्रे । तं नावञ्चयत । इत्यत्र "प्रलम्भे°" [८९] इत्यादिनात्मने ॥

---

१ ए सी °ते स्मार्षी°.

---

१ ए सग°. २ ए °या । स्वाङ्गक°. सी डी °या । स्वाङ्गे. ३ बी °पनोदेन. ४ ई °देशशो°. ५ ए °व प्र°. ६ ए °ववत्वा°. ७ ए °ञ्चत°. ८ ई °लाषोत्पादनेन. ९ ए सी °ते स्मार्षीन्.

द्विषोपलापयमानं स राज्ये न्यस्य दुर्लभम् ।
तपसा लापयांचक्रे नोदलापयत स्वम्‌ ॥ ५७ ॥

५७. उ इति चामुण्डराजीयमहावदातश्रवणाय लोकानामभिमुखीकरणे । अहो लोकाः स राजा द्विषोपलापयमानमभिभवन्तं दुर्लभं दुर्लभराजं राज्ये न्यस्य तपसानशनेन लापयांचक्रे परैरात्मानमपूजयत् । अत एव स्वमात्मानं नोदलापयत नावञ्चयत ॥

तेन स्मालाप्यते विस्मापयमानैस्तपोगुणैः ।
विस्मापनकृता शुक्लतीर्थे गत्वाधिनर्मदम् ॥ ५८ ॥

५८. अधिनर्मदं नर्मदानद्यां शुक्लतीर्थे तिलादिकृष्णवस्तुन इवात्मनोपि पापमलक्षालनेन नैर्मल्यहेतुत्वाच्छुक्लं यत्तीर्थं तस्मिन् गत्वा तेन चामुण्डराजेनालाप्यते स्म परैरात्मा पूज्यते स्म । यतो विस्मापयमानैरतितीव्रत्वेन लोकं विस्मयमानं प्रयुञ्जानैस्तपोगुणैर्निस्पृहतादिभिः कृत्वा विस्मापनकृताश्चर्यकारिणा । नर्मदायां शुक्लतीर्थे तपोभिरात्मानं साधितवानिति तात्पर्यार्थः ॥

तपसा लापयांचक्रे । द्विषोपलापयमानम् । स्वं नोदलापयत । इत्यत्र "लीलिनोः(नः)°" [९०] इत्यादिनात्मन आत्वान्तस्याकर्तर्यपि ॥ अकर्तर्यपीति किम् । तपोगुणैस्तेनालाप्यते ॥

विस्मापयमानैः । अत्र "स्मिङः°" [९१] इत्यादिनात्मन आत्वान्तस्याकर्तर्यपि ॥ अकर्तर्यपीत्येव । विस्मापन ॥

अभीषयत निर्भीषानप्यरीनथ दुर्लभः ।
यद्भापनभुजः शक्रमप्यभापयतोच्चकैः ॥ ५९ ॥

---

१ ए इ °तभाव°. २ सी डी °स्पृहिता°.

५९. अथ चामुण्डराजस्यात्मसाधनानन्तरं दुर्लभो निर्भीषानपि निर्भयानप्यरीनभीषयत भीतवतः प्रयुक्तवान् । यद्यस्मात्स उच्चकैः शक्रमप्यभापयत । यतो भाप्यत आभ्यां भापनौ भुजौ यस्य सः ॥

अभीषयत । इत्यत्र "बिभेतेर्भीष्च" [९२] इत्यात्मने । अस्य च भीषादेशः ॥ पक्षे । अभापयत । इत्यत्रान्तस्याप्याकर्तर्यपि । यद्यप्यत्र परमार्थतो भापनभुजाभ्यां कृत्वा भय तथाप्यवयवावयविनोरभेदेन भुजावपि दुर्लभ एवेति प्रयोक्तुरेव स्वार्थं इत्याल्वं स्यात् ॥ अकर्तर्यपीत्येव । निर्भीषान् । भापन । अत्र न करणाद्भयं किं तु करणाद्भापनमिति प्रयोक्तुः स्वार्थ एवाकर्तर्यप्याकारः ॥

मिथ्याकारयमाणास्य कीर्तिः कृष्णं हिमोज्ज्वला ।
पर्यमोहयतात्यन्तमायासयत च श्रियम् ॥ ६० ॥

६०. अस्य दुर्लभस्य हिमोज्ज्वला कीर्तिः श्रियं कृष्णभार्यामत्यन्तं पर्यमोहयत कृष्णस्यानुपलक्ष्यत्वेन व्यपगमाद्याशङ्कया परिमुह्यन्तीं मूर्च्छन्तीं प्रायुङ्क्तात्यन्तमायासयताखेदयच्च । यतः कृष्णवर्णत्वात्कृष्णं विष्णुं मिथ्याकारयमाणा कृष्णं मिथ्या कूटं करोत्युच्चारयति लोकस्तं प्रयुञ्जाना कृष्णवर्णापह्नवाल्लोकेन कृष्णमन्वर्थाभावरूपदोषदुष्टमसकृत्पाठयन्तीत्यर्थः । अत्र च व्याख्यानेर्थाल्लोकेनेति ज्ञेयम् । यद्वा । कीर्तिः कृष्णं कृष्णवर्णापह्नवेन मिथ्या कूटं करोति विदधाति प्रयोक्त्रैवं विवक्षते नेयं कृष्णं मिथ्याकरोति किं तु कृष्णः स्वयमेव मिथ्याक्रियते मिथ्याभवति तं कीर्तिः प्रयुञ्जाना । एवं विवक्षायां णिगि सत्यपि मिथ्याकारयमाणासकृन्मिथ्याकुर्वतीत्यर्थः । तात्पर्येण कृष्णं श्वेतयन्ती ॥

---

१ सी डी °जस्य चात्म°. २ ए सी °र्भीष्वा" इ°. ३ सी डी °ष्णस्य-स्या°. ४ बी °लक्षत्वे°. ५ ई. °यं मि°. ६ डी कुर्वन्तीत्य°.

स आयामयमानो वादयमानोर्थिनः किल ।
मधून्यधापयत किं किमपाययतामृतम् ॥ ६१ ॥

६१. स दुर्लभः । किलेति सत्ये । अर्थिनो याचकान्कि मधून्यधापयत पाययामास किममृतं सुधामपाययत । कीदृक्सन् । अर्थिन आयामयमानः । पूर्ववत्कर्मकर्तृविवक्षयाकर्मकाद्यातोर्णिगि[2] महादानेन वर्धयंस्तथा वादयमानः प्रियमालपन् ॥

कूर्मं दमयमानां गामवासयत दोष्ण्यसौ ।
प्रतापेनादयांचक्रे द्विषः खङ्गेन चादयत् ॥ ६२ ॥

६२. असौ दुर्लभः प्रतापेन कर्त्रा[3] द्विषो दैत्याद्यन्यायिशत्रूनादयांचक्रे खड्गेन च कर्त्रा द्विष आदयत् । कानपि द्विषः प्रतापेनैव क्षयं नीतवान्कानपि युद्धेनेत्यर्थः । अत एव कूर्मं कमठरूपिणं विष्णुं दमयमानां गुरुत्वात्खेदयन्तीं गां पृथ्वीं दोष्णि भुजादण्डेवासयत स्थापितवान् । सर्वशत्रूच्छेदेनाखिलपृथ्वीं स्ववशीचकारेत्यर्थः ॥

लोकं रोचयमानोसौ नानर्तयत कं मुदा ।
चक्रे धर्मं सुरानीजे व्यधत्तायतनानि च ॥ ६३ ॥

६३. असौ दुर्लभो धर्मं दानादिकं चक्रे । तथा सुरानर्हदादिदेवानीजे पूजितवानायतनानि प्रासादान् व्यधत्त च कारितवांश्च । अत एव लोकं रोचयमानः प्रीणयन् कं मुदा हर्षेण नानर्तयत ॥

स साधूनयजत्तत्त्वं जानानस्तत्प्रजानतः ।
अपावदिष्ट चैकान्तं समयच्छत शुद्धताम् ॥ ६४ ॥

१ बी °वक्षाया°. २ ए °मेका°. ३ ई °र्त्रा दे°. ४ ए °य स्वा°.

६४. स दुर्लभो वसतिमार्गप्रकाशकसुगृहीतनामधेयश्रीजिनेश्वरसूरिभिर्जैनधर्मे प्रतिबोधितत्वात्तत्त्वम् । जातावेकवचनम् । जीवाजीवपुण्यपापाश्रवसंवरनिर्जराबन्धमोक्षाख्यानि नव तत्त्वानि जानानो यथावस्थितान्यवबुध्यमानः संस्तत्त्वं प्रजानतः साधून् जैनमुनीनयजत्सत्कारसन्माननादिनार्चितवान् । अत एवैकान्तमेकान्तवादं बौद्धादिसिद्धान्तपावदिष्टानेकान्तवादित्वान्निराकार्षीत् । अत एव च शुद्धतां पापमलापनोदेन निर्मलतां समयच्छतात्मना सह संबद्धीचक्रे ॥

आयुरायच्छमाना उद्यच्छमानाः श्रियं नृपाः ।
असोद्येमुः कथां स्वं हि नात्मानं पर्यमोहयन् ॥ ६५ ॥

६५. नृपा अस्य दुर्लभस्य कथामवदातवर्णनाग्रन्थमुद्येमुः कथाग्रन्थ उद्यमं चक्रुरित्यर्थः । यत आयुरायच्छमाना दुर्लभावर्जनया जीवितव्यं दीर्घीकुर्वन्तः । तथा श्रियमुद्यच्छमाना राज्यलक्ष्मीविषयमुद्यमं कुर्वन्तो जीवितव्यं च श्रियं च वाञ्छन्त इत्यर्थः । अत एव स्वमात्मीयमात्मानं हि स्फुटं न पर्यमोहयन्न विचेतनीचक्रुरात्मानमजानन्नित्यर्थः । यद्वा । सर्वस्वापहाराद्युत्थाधिव्याधिपीडाया अभावेन न मूर्छयामासुः ॥

परिमोहयमानः स्वान् द्विषोग्रे दोष्मतां भवन् ।
राज्ञाह्वायि महेन्द्रेण स्वसुः सोथ स्वयंवरे ॥ ६६ ॥

६६. अथ स दुर्लभः स्वसुः स्वयंवरे महेन्द्रेण राज्ञा मरुदेशेशेनाह्वाय्याकारितः । कीदृक् । दोष्मतामग्रे धुरि भवन्वर्तमानोत एव स्वान्द्विषः परिमोहयमानस्तीव्रप्रहारादिपीडया मूर्छयन् ॥

---

१ सी °शड्ड°. २ सी °भिर्जिन°. ३ सी °जीव°. ४ सी °न् जिन°. ५ बी सी डी ई °न्माना°. ६ सी डी °या दी°. ७ बी सी डी ई °व्यं श्रि°.

कृष्णं मिथ्याकारयमाणा । इत्यत्र "मिथ्या°" [९३] इत्यादिनात्मने ॥

पर्यमोहयत श्रियम् । आयामयमानोर्थिनः । आयासयत श्रियम् । अपाययताऽमृतम् । अधापयत मधूनि । वादयमानोर्थिनः । अवासयत गाम् । कूर्मं दमयमानाम् । प्रतापेनादर्याचक्रे । लोकं[1] रोचयमानः । कं नानर्तयत । इत्यत्र "परिमुहा°" [९४] इत्यादिनात्मने ॥ अदेर्नेच्छन्त्येके । खङ्गेनादयत् ॥

ईंजे । चक्रे । अत्र "ईंगितः" [९५] इत्यात्मने ॥ फलवतीत्येव । साधूनयजत् । केचित्त्वीगितो धातोर्णिगर्थ एव प्रेषणाध्येषणविशेषे[2] प्रतिविधाननाम्नि वर्तमानादात्मनेपदमिच्छन्ति । व्यधत्त । व्यधापयतेत्यर्थः ॥

तत्त्वं जानानः । अत्र "ज्ञोनुपसर्गात्" [९६] इत्यात्मने[3] ॥ अनुपसर्गादिति किम् । तत्प्रजानतः ॥

एकान्तमपावदिष्ट । इत्यत्र "वदोपात्" [९७] इत्यात्मने ॥

समयच्छत शुद्धताम् । श्रियमुद्यच्छमानाः । आयुरायच्छमानाः । अत्र "समुद्°" [९८] इत्यादिनात्मने ॥ अग्रन्थ इति किम् । कथामुद्येमुः ॥

स्वान् द्विषः परिमोहयमानः । स्वमात्मानं पर्यमोहयन् । इत्यत्र "पदान्तरगम्ये वा" [९९] इति वात्मने ॥

भवन् । इत्यत्र "शेषात्परस्मै" [१००] इति परस्मैपदम् ॥

प्रास्थितेन्द्रं पराकुर्वन्ननुकुर्वन्स पूर्वजान् ।
सानुजोतिक्षिपन्सेनां तद्धूल्यार्कं प्रतिक्षिपन् ॥ ६७ ॥

६७. स दुर्लभः सानुजो नागराजसहितः प्रास्थित । कीदृक्सन् । सेनामतिक्षिपन् । गमनायात्यन्तं प्रेरयन्नत एवातिबाहुल्याच्च तद्धूल्या सेनारेणुनार्कं प्रतिक्षिपन्नाच्छादयन्नित्यर्थः । तथेन्द्रं पराकुर्वन्महर्द्ध्या[4] न्यक्कुर्वन्नत एव पूर्वजान्मूलराजादीननुकुर्वन् ॥

---

१ ए लोकान्तरो°. २ सी डी °विशेषणप्र°. ३ ए °नेपदम् । उप°. ४ ए °र्वंतन°.

अभिक्षिपन्तो हस्ताग्रं गन्धेभाः प्रवहन्मदाः।
सैन्येऽस्यापरिमृष्यन्तोन्योन्यं पर्यवहन्पृथक् ॥ ६८ ॥

६८. अस्य दुर्लभस्य सैन्ये गन्धेभा गन्धप्रधाना गजा हस्ताग्रं शुण्डाग्रभागमभिक्षिपन्त इतस्ततोभिमतं प्रेरयन्तः सन्तः पृथग्भिन्नाः पर्यवहन्समन्ताज्जग्मुः। यतोन्योन्यमपरिमृष्यन्तोसहमानाः। एतदपि कुत इत्याह। यतः प्रवहन्मदाः ॥

पराकुर्वन्। अनुकुर्वन्। इत्यत्र "परा°" [१०१] इत्यादिना परस्मै ॥

प्रतिक्षिपन्। अभिक्षिपन्तः। अतिक्षिपन्। इत्यत्र "प्रत्यभि°" [१०२] इत्यादिना परस्मै ॥

प्रवहत्। इत्यत्र "प्राद्वहः" [१०३] इति परस्मै ॥

परिमृष्यन्तः। पर्यवहन्। इत्यत्र "परेर्मृषश्च" [१०४] इति परस्मै ॥

ययावविरमन्पथ्यारमद्भिर्नर्मबन्धुभिः।
समं परिरमन्नन्योदन्तादुपरमन्नयम् ॥ ६९ ॥

६९. अयं दुर्लभः पथि ययौ। कीदृक्सन्। अविरमन्ननवरतं गच्छं-स्तथारमद्भिः क्रीडद्भिर्नर्मबन्धुभिर्नर्मसचिवैः समं परिरमन्परिखेलं-स्तथान्योदन्तात्स्वयंवरनायिकोदन्तादन्यस्या वार्ताया उपरमन्निवर्त-मानः स्वयंवरकन्यकोदन्तमेव कुर्वन् ॥

क्वापि सोश्वमुपारंस्तेभेनारोहयत क्वचित्।
काप्यासयन् रथे मित्राण्यकारयत सत्कथाः ॥ ७० ॥

---

१ ए °न्येस्य प°.

---

१ ए प्राद्वह°. २ ए परिय°. ३ ई °र्मस°. ४ बी डी °नायको°.

७०. स दुर्लभः क्वापि कस्मिन्नपि स्थानेऽश्वमुपारंस्त । अत्र रमिरन्त-[1]भूतण्यर्थः सकर्मकः प्राङ्युपसर्जनो वा सकर्मकः । आरुह्य गतिपञ्चकेनाखेलयत् । कश्चिदेनमेन कर्त्रारोहयत । आरोहदिमं सः । न्यग्भवन्तं न्यग्भावयेत् । स एवं विवक्षितवान् । नाहमारोहं किं तु स्वयमेवारूढवानेषः स्वयमेव न्यगभूदित्यर्थः । ततः स्वयमेव[3] वारूढं न्यग्भूतं स प्रायुङ्क्त णिग् । "वाकर्मणाम्°" [२.२.४] इत्यादिना कर्तुर्वा कर्मत्वात् । इमेनेमं वा स आरोहयत्पुनः । स एवं विवक्षितवान्नाहमारोहयं किं त्विमः स्वयमेवारोहयत न्यगभूदित्यर्थ इति पर्यायेण्यवस्थानन्तरं पुनरपि स्वयमेवारोहयमाणमिमं स प्रायुङ्क्त । पुनर्णिग् । न्यगभावयदित्यर्थः । क्वापि कस्मिंश्च प्रदेशे मित्राणि रथ आसयन्नुपवेशयन्सन्सत्कथाः साश्चर्याणि पूर्वपुरुषावदातवर्णनान्यकारयत ॥

स्वेदं शोषयमाणोऽभूद्वलयन्वीरुधस्तदा ।
पताकाः कम्पयन्वायुर्मुदे मध्विव भोजयन् ॥ ७१ ॥

७१. तदा दुर्लभस्य गमनकाले वायुर्मुदेऽभूत् । कीदृक्सन् । स्वेदं श्रमसंतापोत्थं घर्मं शैत्याच्छोषयमाणस्तथा वीरुधो लताश्चलयन् । एतेन सौरभोक्तिः । तथा पताका रथादिस्था वैजयन्तीर्मृदुत्वात्कम्पयन्नतश्चात्यन्तं सुखहेतुत्वान्मधु भोजयन्निव । एतेनास्य कार्यसिद्धिसूचकं शुभशकुनमुक्तम् ॥

तस्याभ्युदस्थुर्नीवारानाशयन्तो मृगार्भकान् ।
बोधयन्तोऽध्यापयन्तो बटून् ग्रन्थान्वनर्षयः ॥ ७२ ॥

७२. वनर्षयस्तापसास्तस्य दुर्लभस्याभ्युदस्थुराश्रमगुरुत्वेनाभिमु-

१ डी °टूनर्थान्व°.

१ सी डी °र्थः प्रा°. २ ई °यन्स प°. ३ सी °मेवा°. ४ बी ई °व चारु°.
५ सी डी °श्रमान°.

समुत्थिताः । किंभूताः । कारुणिकत्वान्मृगार्भकाञ्जीवानाशयन्तो भक्ष-
यन्तस्तथा बटून् ग्रन्थानध्यापयन्तः पाठयन्तो बोधयन्तोऽवगम-
यन्तश्च ॥

धुरा धुरं योधयद्भिः प्रावयद्भिरनोपथम् ।
द्रावयद्भिर्द्रुमूलानि स्रावयद्भिर्लता रसम् ॥ ७३ ॥
जनयद्भिः कलकलं नाशयद्भिः सरित्स्वपः ।
अविच्छायद्बलैः सोथ पुरीं गोपायतो मरुम् ॥ ७४ ॥

७३, ७४. स दुर्लभो मरुं मरुदेशं गोपायतो रक्षतो नडूलदेशा-
धिपस्येत्यर्थः । महेन्द्रस्य पुरीं बलैः कृत्वाविच्छायद्ययौ । किंभूतैः ।
औत्सुक्येन युगपदनेकरथानां प्रेरणाद्धुरा सह धुरं योधयद्भिरा-
स्फालयद्भिरत एवानः । जातावेकवचनम् । रथान् । न पथोपथं
"पथः संख्याव्ययोत्तर" इति क्लीबता । तदपथममार्गं प्रावयद्भिः प्रा-
पयद्भिरत एव द्रुमूलानि रसं द्रावयद्भिर्घर्षणेन क्षारयद्भिस्तथा लता वल्ली
रसं स्रावयद्भिः पीलनेन क्षारयद्भिस्तथा कलकलं जनयद्भिस्तथा-
तिप्राचुर्यात्सरित्स्वपो नाशयद्भिः ॥

सोतिधूपायदर्कं तं पनायन्नुचितं व्यधात् ।
लक्षस्य पणमानेषु पणायन्कोटिमुद्भटः ॥ ७५ ॥

७५. स महेन्द्र उचितं दुर्लभस्य योग्यं महाविस्तराभिमुखगम-
नदानसन्मानादि व्यधात् । कीदृक्सन् । उद्भट उदारोत एव लक्षस्य
पणमानेषु हस्त्यश्वालंकारादिप्राभृतदानेन यावता द्रम्मादि लक्षं स्या-

१ बी सोपि धू°.

१ बी ई °विस्तारा°. २ बी °क्षणस्य.

त्यावद्व्यवहरत्सु मैत्र्यादिना लक्षणेणोपचरत्स्वित्यर्थः । अर्थाद्रूपेषु विषये कोटिं पणायन् कोट्या प्रत्युपचरन्नित्यर्थः । तथातिधूपायदर्कं प्रतापातिशयेन संतापयन्तं सूर्यमतिक्रान्तं दुर्लभं पनायँन्स्तुवन् ॥

अविरमन् । आरमद्भिः । परिरमन् । इत्यत्र "व्याङ्°" [१०५] इत्यादिना परस्मै ॥

उपरमन् उपारंस्त । इत्यत्र "वोपात्" [१०६] इति वा परस्मै ॥

आसयन्मित्राणि । इत्यत्र "अणिगि°" [१०७] इत्यादिना परस्मै ॥ अणिगीति किम् । स्वयमेवारोहयमाणमिभं प्रायुङ्क्त । इभेनारोहयत ॥ प्राणिकर्तृकेति किम् । शुष्यति स्वेदः । शोषयमाणः स्वेदं वायुः ॥ अनाप्यादिति किम् । सत्कथाः कुर्वन्ति मित्राणि प्रायुङ्क्ताकारयत सत्कथाः ॥

चलनार्थे । चलयन् । कम्पयन् ॥ आहारार्थे । भोजयन् । आशयन्तः ॥ इङ् । अध्यापयन्तः ॥ बुध् । बोधयन्तः ॥ युध् । योधयद्भिः ॥ प्रु । प्रावयद्भिः ॥ द्रु । द्रावयद्भिः ॥ स्रु । स्रावयद्भिः ॥ नश् । नाशयद्भिः ॥ जन् । जनयद्भिः । इत्यत्र "चल्याहारा°" [१०८] इत्यादिना परस्मै ॥

एकादशः पादः समर्थितः ॥

गोपायतः । धूपायत् । अविच्छायत् । पणायन् । पनायँन् । इत्यत्र "गुपौधूप°" [१] इत्यादिनायः ॥ व्यवहारार्थात्पणो नेच्छन्त्येके । पणमानेषु ॥

कन्यां कामयमानस्तामन्येद्युः प्राविशत्पुरीम् ।
ऋतीयमानः स्वर्गोप्त्रा सोथ गोपायिता भुवः ॥ ७६ ॥

७६. अथान्येद्युः स भुवो गोपायिता रक्षिता दुर्लभः पुरीं प्राविशत् । कीदृक्सन् । स्वर्गोप्त्रेन्द्रेण ऋतीयमानो महद्ध्या स्पर्धमानस्तथा

१ सी °णोपाच°. २ ए °चयर°. ३ डी °यन्नुव°. ४ डी उपार°. ५ बी °यम् । इ°. ६ डी ई °त्पणेनें°.

तां रूपाद्यतिशयेन प्रसिद्धां कन्यां महेन्द्रस्वसारं कामयमानोऽभिलषन् ॥

दृष्ट्वा विच्छायितारं तं पर्णायितृपथे तदा ।
अनुविच्छित्र्यभूत्काचित्पणित्री नेष्टवस्तुनः ॥ ७७ ॥

७७. तदा पुरप्रवेशकाले काचिन्नायिका तद्रूपाक्षिप्तत्वादनुविच्छित्री दुर्लभस्य पश्चाद्यान्ती सतीष्टवस्तुनः पणित्री व्यवहर्त्री नाभूत् । किं कृत्वा । पर्णायितृपथे वणिक्पथे हट्टमार्गे विच्छायितारं गच्छन्तं तं दुर्लभं दृष्ट्वा ॥

पुरधूपायितुर्जेता धूपिता नः स्मरो ह्ययम् ।
इत्थमेनं पनायित्र्यां पनित्र्यासीन्न का तदा ॥ ७८ ॥

७८. एनं दुर्लभं पनायित्र्यां स्तुवत्यां सत्यामर्थात्कस्यां चित्कामिन्यां का कामिन्येनं पनित्री स्तोत्री नासीत् । कथं पनायित्र्यामित्याह । अयं प्रत्यक्षो दुर्लभो हि स्फुटं निश्चितं पुरधूपायितुस्त्रिपुरदाहकर्तुं हरस्य जेता स्मरोस्ति । यतः किंभूतः । नोस्माकं धूपिता रूपातिशयेनोत्कण्ठारणरणकादिविधानात्संतापकोस्माकं सन्तापकत्वादयं नूनं स्वारिं हरं जित्वा स्वमूर्तिधारी कामो वर्तत इत्यर्थ इत्थम् ॥

शचीकामयितुस्तुल्यं कमित्री कापि तं तदा ।
अन्वर्तितारं स्वं बालमृतीयित्र्यजुगुप्सत ॥ ७९ ॥

७९. तदा प्रवेशकाले काप्यन्वर्तितारमनुयान्तं स्वं बालमजुगुप्सत

---

१ सी डी °णायतृ°. २ डी °त्यं कामि°.

---

१ ए °न्द्रदुहितरं. २ सी डी °श्चादयन्ती°. ३ सी पणयित्री. ४ सी डी °णायत्°. ५ बी सी डी ई °न्तं दु°. ६ डी °स जे°. ७ डी °ता स्मा°. ८ सी हरिं जि°. ९ ई °त्वा मू°. १० डी °त्यर्थः ॥.

गतिविघ्नत्वादनिन्दत् । कीदृक्सती । शचीकामयितुरिन्द्रस्य सौन्दर्या-दिसंपदा तुल्यं तं दुर्लभं कमित्रीच्छन्ती । अत एव तमेव ऋतीयित्री दर्शनाय गच्छन्ती ॥

अतितिक्षत न स्थानं विचिकित्सुः स्वजीविते ।
अचिकित्स्ये तदा कापि शीशांसति शरान्स्मरे ॥ ८० ॥

८०. तदाचिकित्स्ये दुर्लभदर्शनेन प्रकर्षप्राप्तत्वात्प्रतिकर्तुमशक्ये स्मरे शरान् शीशांसत्युत्तेजयति सति कापि कामिनी स्वजीविते विचिकित्सुः संशयाना सती स्थानं नातितिक्षत स्थातुं नाशक्नोत् । दुर्लभदर्शनायानवरतं तेन सह ययावित्यर्थः ॥

मीमांसमानां दीदांसमानां च तिलकं सखीम् ।
बीभत्समानां मेने काप्यस्य दर्शनविघ्नतः ॥ ८१ ॥

८१. कापि कामिन्यस्य दुर्लभस्य दर्शनविघ्नतो हेतोः सखीं बीभत्समानां विरूपां प्रतिकूलां मेने । कीदृशीं सतीम् । तिलकं मीमांसमानां भव्यमभव्यं वेति विचारयन्तीं दीदांसमानां च वक्रत्वापनयनेन ऋजूकुर्वतीं च ॥

कामयमानः । अत्र "कमेर्णिङ्" [२] इति णिङ् ॥

ऋतीयमानः । अत्र "ऋतेर्डीयः" [३] इति डीयः ॥

गोपायिता गोप्ता । धूपायितुः धूपिता । विच्छायितारम् अनुविच्छित्री । पर्णायितृ पणित्री । पनायिष्याम् पनित्री । कामयितुः कमित्री । ऋतीयित्री अन्वार्तितारम् । अत्र "अशवि ते वा" [४] इति वायादयः ॥

---

१ डी °भं कामि°. २ ए बी °तीयत्री°. ३ सी डी °त्स्ये तदा दु°. ४ डी °ह संय°. ५ बी डी ई °कुर्वन्तीं च. ६ डी °णायत्. ७ बी °तीयत्री. सी °तीयती अ°. डी °तीयन्ती अ°.

अजुगुप्सत । अतितिक्षत । इत्यत्र "गुप्तिजः°" [५] इत्यादिना सन् ॥

चिचिकित्सुः । अचिकित्से । अत्र "कितः°" [६] इत्यादिना सन् ॥

मीमांसति । दीदांसमानाम् । मीमांसमानाम् । बीभत्समानाम् । अत्र "शान्दान्°" [७] इत्यादिना सन् दीर्घश्चैषां द्विर्वचने सति पूर्वेकारस्य ॥

महीयमाना नारीषु कण्डूयन्ती मुधा श्रवः ।
लालस्यमाना तमनु दोर्मूलं काप्यदर्शयत् ॥ ८२ ॥

८२. कापि कामिनी तं दुर्लभमनुलक्ष्यीकृत्य मुधा निरर्थकं श्रवः कर्णं कण्डूयन्ती सती दोर्मूलं कक्षाधस्तनप्रदेशं संक्षोभना(णा ?)र्थं दुर्लभमेवादर्शयत् । कीदृक् । लालस्यमानात्यर्थं सविलासा तथा नारीषु मध्ये महीयमाना सौन्दर्योत्कर्षेण पूजार्हा ॥

भृशं पुनः पुनः कापि लसन्ती भृशमैक्षत ।
भृशं चकासतं जाजाग्रीयमाणस्मरा नृपम् ॥ ८३ ॥

८३. कापि कामिनी भृशं चकासतं शोभमानं नृपं दुर्लभं भृशमैक्षत । कीदृक्सती । जाजाग्रीयमाणस्मरात्यर्थमभीक्ष्णं वा जागरूककामात एव भृशमत्यर्थं लसन्ती विलसन्ती दुर्लभक्षोभना(णा ?)य गमनादिविशेषं कुर्वतीत्यर्थः । तथा पुनः पुनर्लसन्ती च ॥

काचिदंसात्पतद्दादरिद्र्यमाणोदरांशुकम् ।
नावाव्यताटाट्यमानारार्यमाणैस्तदार्दिता ॥ ८४ ॥

८४. तदा प्रवेशकाले काचिद्दादरिद्र्यमाणोदरातिकृशोदरी कामिन्यंसात्स्कन्धात्पतदंशुकं नावाव्यत भृशमभीक्ष्णं वा नारक्षत् । कीदृक्सती ।

१ बी सी डी ई °श्वास°. २ सी डी °तं तं शो°. ३ सी डी जागुरू°.
४ ई °ले दाद°. ५ सी डी °रा इति°.

अटाट्यमाना दुर्लभदिदृक्षया भृशं पुनः पुनर्वा यान्ती तथारार्यमाणै-रहमहमिकया दुर्लभदर्शनाय भृशं पुनः पुनर्वा गच्छद्भिर्लोकैरर्दित संमर्देन पीडिता स्वकुशोदरस्तनदर्शनेन राज्ञो रागोत्पादनायोदरस्त-नपिधायकं वस्त्रं लोकसंमर्दवशात्पतत्नारक्षदित्यर्थः ॥

अशाश्यमानं मोमूत्र्यमाणं काप्युज्झितुं शिशुम् ।
असोसूत्र्यत सोसूच्यमाने तस्यागमोत्सवे ॥ ८५ ॥

८५. तस्य दुर्लभस्यागमोत्सवे सोसूच्यमाने नान्दीतूर्यनिर्घोषा-दिनाभीक्ष्णं भृशं वा ज्ञाप्यमाने दुर्लभदर्शनेत्युत्सुकत्वात्कापि शिशुमु-ज्झितुमसोसूत्र्यत प्रायतत । यतोशाश्यमानं भृशमभीक्ष्णं वा भुञ्जान मोमूत्र्यमाणं भृशमभीक्ष्णं वा मूत्रयन्तम् ॥

दृशौ प्रोर्णोनूयमानां नीरङ्गीं काप्युदक्षिपत् ।
चङ्क्रम्यमाणा जङ्गम्यमानां चाग्रेभ्यतर्जयत् ॥ ८६ ॥

८६. कापि कुलाङ्गना दृशौ प्रोर्णोनूयमानां भृशमभीक्ष्णं वाच्छा-दयन्तीं नीरङ्गीं मुखाच्छादकवस्त्राञ्चलमुदक्षिपद्दुर्लभावलोकनाविघ्न-त्वादूर्ध्वं चिक्षेप । तथा चङ्क्रम्यमाणा कुटिलं क्रामन्त्यग्रे पुरं जङ्गम्यमानां कुटिलं गच्छन्तीं स्त्रीमभ्यतर्जयच्च ॥

कण्डूयन्ती । महीयमाना । इत्यत्र “ धातोः° ” [८] इत्यादिना यक् ॥ कालस्यमाना । इत्यत्र “ व्यञ्जनादेः°” [९] इत्यादिना यङ् ॥ पक्षे भृशं पुनः पुनर्वा कसन्ती ॥ व्यञ्जनादेरिति किम् । भृशमैक्षत ॥ एकस्वरादिति

१ डी °मूत्रमा.

१ सी डी °र्दनव°. २ ए बी सी ई °त प्रवेते । प°.

किय् । भृशं चकासतम् ॥ केचिज्जागर्तेरिच्छन्ति । जाजाग्रीयमाण ॥ सर्वेभ्यो हुलो-रयादिप्रत्ययपरहितात्केचिदिच्छन्ति । आवाव्यत । दादरिद्रमोण ॥

अटाट्यमाना । अरार्यमाणैः । असोसूय्यत । मोमूय्यमाणम् । सोसूय्यमाने । अशाश्यमानम् । प्रोर्णोनूयमानाम् । अत्र "अट्यर्ति°" [१०] इत्यादिना यङ् ॥

चङ्क्रम्यमाणा । जङ्गम्यमानाम् । अत्र "गत्यर्थात्कुटिले" [११] इति यङ् ॥

दृशा जेगिल्यमानेव तं लावण्यसुधामयम् ।
सासद्यमाना कामेन काप्यलोलुप्यत त्रपाम् ॥ ८७ ॥

८७. कापि कामिनी त्रपामतिसानुरागदृष्टिपरपुरुषालोकोत्थल-ज्जामलोलुप्यतात्यन्तं विलोपाद्गर्हितं चिच्छेद । कीदृक्सती । कामेन सासद्यमाना गर्हितं सद्यमाना निर्दयं पीड्यमानेत्यर्थः । अत एव लावण्यमेवाप्यायकत्वात्सुधा सा प्रकृता यत्र तं लावण्यसुधामयं केव-लसौन्दर्यघटितं तं दुर्लभं दृशा जेगिल्यमानेव सानुरागं निरन्तरं विलोकनाद्गर्हितं गिलन्तीव । यापि कामेन भोजनाभिलाषेण सास-द्यमाना सती स्थूलैकवलाहारेण निजेगिल्यमाना स्यात्सापि "आहारे व्यवहारे च त्यक्तलज्जः सदा भवेत्" इति वचनाद्बहुभक्षणोत्थां त्रपां लुम्पति ॥

काप्यचञ्चूर्यताजञ्जभ्यताजञ्जप्यतापि च ।
दन्दश्यमाना दन्दह्यमाना नु तदवीक्षणे ॥ ८८ ॥

८८. कापि कामिन्यचञ्चूर्यत तद्दर्शनौत्सुक्येन स्वाभाविकलीला-गतित्यागेन शीघ्रगत्याश्रयणाद्गर्हितमगमत् । अजञ्जभ्यत च कामो-

१ बी सी डी °न्ति । भृशा°. २ बी सी डी °माणा ॥. ३ सासद्यमानेत्यारभ्य कामेनेत्यन्तो ग्रन्थांश ई संज्ञके पुस्तके न दृश्यते. ४ डी °क्कोव°. ५ ई सी डी °ल्ला स°. ६ बी °मत ।.

ह्रासंवशेन मोट्टायितस्योज्जृम्भितत्वाद्गर्हितमजभेत । जभैको रूपमिदम् । अत्यर्थं गात्रं मोटितवतीत्यर्थः । अजञ्जप्यतापि ह्रा मया मन्दभाग्यया[१]सौ विश्वनेत्रामृतं नेक्षित इत्यादिस्वगर्हणातिचिन्तया गर्हितमचिन्तयच्च । यतस्तद्वीक्षणे दुर्लभस्यानालोके सति दन्दश्यमाना नु मशकादिभिर्गर्हितं भक्ष्यमाणेव । दन्दह्यमाना न्वग्निना गर्ह्यं दह्यमानेवात्यन्तमरतिमनुभवन्तीत्यर्थः । यापि हि दन्दश्यमाना दन्दह्यमाना वा स्यात्सापि कष्टभयेन पलायनाच्चञ्चूर्यतेऽस्यातिव्यथितत्वाज्जञ्जभ्यते च जञ्जप्यते च मनसा गर्ह्यं ध्यायति चेत्युक्तिः ।

जेगिल्यमाना । अलोलुप्यत । सासद्यमाना । अचञ्चूर्यत । अजञ्जप्यत । अजञ्जभ्यत । दन्दश्यमाना । दन्दह्यमाना । इत्यत्र " गृलुप°" [१२] इत्यादिना यङ् ॥

स्त्रीर्भृशं[१] शोभमानास्ताः क्षोभयन् गृणतीर्ध्रुवम्[२] ।
अगाद्भृशं[३] रोचमानः स स्वयंवरमण्डपम् ॥ ८९ ॥

८९. स दुर्लभः स्वयंवरमण्डपमगात् । कीदृक्सन् । भृशमत्यर्थं रोचमानो रूपवेषादिना शोभमानोत एव भृशं रूपवेषादिना शोभमानास्ताः पूर्वोक्ताः स्त्रीः क्षोभयन् । अत एव कीदृशीः । ध्रुवं गर्ह्यं ह्रा दुर्लभ प्राणवल्लभात्मसंगमेनास्माकं प्राणांस्त्वद्विरहे निर्गच्छतो रक्ष रक्षेत्यादिपरपुरुषाभिलाषप्रकटकवाक्यैः कुलस्त्रीणामनुचितं यथा स्यादेवं गृणतीर्वदन्तीः ॥

---

१ बी स्त्री भृशं. २ ए °ती ध्रुव°. ३ सी डी आगा°.

---

१ ए °संवासन°. २ ए डी °भत् ।. ३ सी डी °या स वि°. ४ सी °शक्यदि°. डी °शक्यादि°. ५ सी डी °ष्टभावेन. ६ बी च म°. ७ सी डी °पमागा°. ८ ए °दिनाप°. ९ बी सी डी °णन्तीर्व°.

भृशं गृणतीः । भृशं शोभमानाः । भृशं रोचमानः । अत्र "न गृणा°" [१३] इत्यादिना न यङ् ॥

तत्र बोभूयमानश्रीर्बोभुवच्छ्रीषु राजसु ।
कुर्वन्मण्डपपोपूर्यां सोध्यास्तोचितमासनम् ॥ ९० ॥

९०. स दुर्लभस्तत्र स्वयंवरमण्डप उचितं स्वयोग्यमासनमध्यास्त । कीदृक्सन् । बोभुवत्यरुचौ नवनवभङ्गीरचनया पुनः पुनर्भवन्ती श्रीर्वेषाभरणमण्डनादिकृता शोभा येषां तेषु राजसु मध्ये बोभूयमानोत्कृष्टीभवन्ती श्रीर्वेषादिसंपद्यस्य सोत एव मण्डपपोपूर्यां स्वयंवरमण्डपपावित्र्यं कुर्वन् ॥

बोभूयमान । बोभुवत् । इत्यत्र "बहुलं लुप्" [१४] इति यङो बहुलं लुप् ॥ बहुलग्रहणं प्रयोगानुसरणार्थम् । तेन क्वचिन्न स्यात् । पोपूर्याम् ॥

पोपुवैस्तैः स योयूयः क्ष्मापैर्वरणमण्डपः ।
नाटयन्निखिलार्कस्याचोरयन्नभसः श्रियम् ॥ ९१ ॥

९१. पोपुवैः सश्रीकत्वेन पवित्रकैस्तैः प्रसिद्धैः क्ष्मापैर्योयूयोत्यर्थं संयुक्तीभवन्सन्स प्रसिद्धो वरणमण्डपः स्वयंवरमण्डपो नभसः श्रियमचोरयत् । किंभूतस्य । नाटयन्तो विजृम्भमाणा निखिला द्वादशार्का यत्र तस्य द्वादशार्कभासुरादपि व्योम्नोनेकराजमार्तण्डैर्वरणमण्डपोत्यन्तं सश्रीकोभूदित्यर्थः ॥

पोपुवैः । अत्र "अचि" [१५] इति यङो लुप् ॥

---

१ ए पोपवै°.

---

१ डी °मानाः ।. २ डी °भुवन्त्य°. ३ ए °रणं म°. ४ ए बी डी °कृतशो°. ५ सी डी °ण्डपेपो°. ६ ए °न् ॥ भू°. ७ ए °ण्डपं स्व°.

योयूयः। अत्र "नोतः" [१६] इति[१] न यको लुप्॥

अचोरयत्। नाटयत्। इत्यत्र "चुरादिभ्यो णिच्" [१७] इति णिच्॥

नियोजयन्त्या वेत्रिण्याः संयोजन्ती करे करम्।
नाम्ना दुर्लभदेव्यागान्महेन्द्रस्य स्वसा ततः॥ ९२॥

९२. ततोनन्तरं नाम्ना दुर्लभदेवी महेन्द्रस्य स्वसा स्वयंवरमण्डपमागात्। किंभूता सती। नियोजयन्त्या राजन्यचक्रदर्शनार्थं प्रेरयन्त्या वेत्रिण्याः प्रतीहार्याः करे करं संयोजन्ती[२] संबध्नन्ती[३] हस्तिकां ददतीत्यर्थः॥

विलम्बं नासहन्भूपा नान्योदन्तमसाहयन्।
सदो भावयमानां तां वीक्ष्य क्षोभं बभूविरे॥ ९३॥

९३. सदः सभां भावयमानां प्राप्नुवतीं तां दुर्लभदेवीं वीक्ष्य नृपाः क्षोभं[४] बभूविरे प्रापुः। अत एव विलम्बं नासहन्। तत्प्राप्त्यौत्सुक्यात्कालक्षेपं न चक्षमुः। तथा तत्रैव गतचित्तत्वादन्योदन्तं दुर्लभदेव्या अन्यस्याः कामिन्या वार्तामपि नासाहयन्न सेहिरे॥

स्त्रीषु रत्नं बभूवैषा भवन्ती तादृशीं श्रियम्।
जीवयन्ती यतोनङ्गं किंकरत्वमकारयत्॥ ९४॥

९४. एषा दुर्लभदेवी स्त्रीषु नारीजातिमध्ये रत्नमुत्कृष्टा बभूव। यतो यस्माद्धेतोरेषानङ्गं किंकरत्वं स्वादेशकारितामकारयत्। कीदृ-

---

१ ए नन्तं किं°.

---

१ डी °ति य°. २ ए °योजं सं°. बी °योजयन्ती. ३ सी डी °ध्नती ह°.
४ ए °भं बिभू°.

क्सती । तादृशीमतिशायित्वेनानाख्येयां श्रियं रूपलावण्यादिशोभां भवन्ती प्राप्नुवेत्यत एवानङ्गं शंभुना दग्धाङ्गत्वादशरीरिणं कामं जीवयन्ती सर्वनृपेष्वस्योल्लासितत्वाज्जनयन्ती । यत्र तादृशीं श्रियं निरुपमां प्रभावलक्ष्मीं प्राप्नुवद्रत्नं चिन्तामण्यादि स्यात्तदेव 'अचिन्त्यो हि मणिमन्त्रौषधीनां प्रभावः' इत्युक्तेरनङ्गं महारोगादिना गतप्रायशरीरं नरं जीवयत्किंकरत्वं स्वसेवकतां कारयति ॥

यान्भिक्षावासयद्यानागमयद्भूपतिर्द्विजान् ।
उमामुद्वाहयन्तोत्र ते स्वात्येन्दुमयोजयन् ॥ ९५ ॥

९५. यान्द्विजान्भिक्षावासयैत्प्राचुर्यंव्यञ्जनवत्वादिनिमित्तभावेन वसतः प्रायुङ्क्त महाव्रतस्थत्वेन भिक्षावृत्तिं य उपाजीवन्नित्यर्थः । अत एव यान्भूपतिर्महेन्द्र आगमयद्द्विजानागच्छत आख्यानेन प्रायुङ्क्तातिपूज्यत्वादहो द्विजा आगताः सन्त्येषामासनादि दीयतामित्यात्मना यदागमनमाख्यदित्यर्थः । तेत्र स्वयंवरमण्डप उमां गौरीमुद्वाहयन्त उमामुद्वहन्तीमभिनयेन प्रयुञ्जाना विवाहप्रस्तावादुमोद्वाहमभिनयन्तः सन्त इत्यर्थः । स्वात्या स्वातिनक्षत्रेण सहेन्दुमयोजयन् स्वात्येन्दुं युञ्जानं ज्ञानेन प्रायुञ्जत । उद्वाहविषये श्रेष्ठोद्य स्वात्येन्दुयोगोस्तीत्यगणयन्नित्यर्थः ॥

स्वदेशात्प्रस्थिताः सूर्यं येत्रोदगमयन्नृपाः ।
तस्या द्वास्था वुवूर्षूंस्ताञ्शशंसेत्यजुगुप्सिषा ॥ ९६ ॥

९६. तान्वुवूर्षून्वरीतुमिच्छून्नृपांस्तस्या दुर्लभदेव्या द्वास्था प्रतीहारी नास्ति जुगुप्सिषा निन्दितुमिच्छा यस्याः सा प्रशंसितुकामा सतीति वक्ष्यमाणप्रकारेण शशंसास्तावीत् । ये नृपाः स्वदेशात्प्रस्थिता अत्र

१ बी °तिशयत्वे°. २ सी डी °वन्स्युत. ३ सी डी °रं जी°. ४ ए यप्राचु°. बी यन्प्राचु°. ५ सी °त्वादाहो. डी °त्वादाह द्वि°. ६ डी °आना ज्ञा°. ७ बी °न्दिनुमि°. ८ डी °सास्तवी°.

मण्डपे सूर्यमुदगमयन्प्राप्योद्गच्छन्तं सूर्यं प्रायुञ्जत । ये स्वयंवरे शीघ्रमागता इत्यर्थः ॥

न युयुत्सितुमिच्छन्ति द्विषो यं जीवकाम्यया ।
जीवीयज्जीवदोङ्गेयमिदंकाम्यसि सुभ्रु किम् ॥ ९७ ॥

९७. जीवीयज्जीवदो जीवितव्येषिणां जीवितव्यदातायमङ्गोङ्गदेशाधिपोस्ति । यं जीवकाम्यया जीवितव्यवाञ्छया द्विषो युयुत्सितुं प्रजिहीर्षितुमपि नेच्छन्ति । तस्माद्धे[1] सुभ्रु किमिदंकाम्यसीममङ्गमिच्छसि ॥

स्वःकाम्या न स्वरिच्छन्ति न किमिच्छन्ति चर्षयः ।
पुत्रीयन्तो[1] यमस्मिन्किं काशिराजे पतीयसि ॥ ९८ ॥

९८. अस्मिन्काशिराजे काशिदेशाधिपे किं पतीयसि पत्याविवाचरसि । यं पुत्रीयन्तो धार्मिकत्वेन पुत्रवत्पालकत्वाद्विनयाद्युपचारकृत्वाच्च पुत्रमिवाचरन्त ऋषयः स्वःकाम्या अपि । अपिरत्राध्याहार्यः । महाकष्टानुष्ठानासेवनेन स्वर्गैषिणोपि न स्वरिच्छन्ति परिपूर्यमाणसकलसमीहितार्थत्वेन सदा सुखितत्वान्न स्वर्गमिच्छन्ति[2] । न किमिच्छन्ति च किमप्यपवर्गादिकमपि नेच्छन्ति ॥

नियोजयन्त्याः संयोजन्ती । असाहयन् असहन् । इत्यत्र "युजादेर्न वा" [१८] इति वा णिच् ॥

भावयमानाम् बभूविरे । अत्र "भूङः प्राप्तौ णिङ्" [१९] इति वा णिङ् ॥ भूङ इति ङकारनिर्देशो णिङभावेप्यात्मनेपदार्थः । प्राप्तेरन्यत्र बभूव । प्राप्तावपि परस्मैपदमित्यन्ये । श्रियं भवन्ती ॥

---

१ सी डी °न्तो जम°. २ बी कासिरा°.

---

१ डी °द्धेतोः सु°. २ सी डी °न्ति च.

प्रेषणेन प्रयोक्तृव्यापारे । अनङ्गं किंकरत्वमकारयत् ॥ अध्येषणेन । अनङ्गं जीवयन्ती ॥ निमित्तभावेन । यान्भिक्षावासयत् ॥ आख्यातेन[1] । यानागमयत् ॥ अभिनयेन । उमामुद्वाहयन्तः ॥ ज्ञानेन । स्वात्येन्दुमयोजयन् ॥ प्राप्त्या । स्वदेशात्प्रस्थिताः सूर्यं येत्रोदगमयन् । इत्यत्र "प्रयोक्तृ°" [२०] इत्यादिना णिग् ॥

वुवूर्षून् । इत्यत्र "तुमर्हाद्°" [२१] इत्यादिना सन् ॥ अतत्सन इति किम् । युयुत्सितुमिच्छन्ति ॥ तद्ग्रहणं किम् । अजुगुप्सिषा ॥

जीवकाम्यया । इदंकाम्यसि । स्वःकाम्याः । अत्र "द्वितीयायाः काम्यः" [२२] इति काम्यः ॥

जीवीयत् । इत्यत्र "अमा°" [२३] इत्यादिना क्यन् ॥ अमाव्ययादिति किम् । किमिच्छन्ति[2] । स्वरिच्छन्ति ॥

यं पुत्रीयन्तः । काशिराजे पतीयसि । इत्यत्र "आधाराच्च°" [२४] इत्यादिना क्यन् ॥

ऐन्द्र्यामिन्द्रति यः शास्त्रे गल्भते न तु होडते ।
अक्लीबमानेवन्तीशे किमत्र त्वं शचीयसे ॥ ९९ ॥

९९. अक्लीबमाने क्लीबवदनाचरति शूरेत्रावन्तीशे मालवाधिपे किं त्वं शचीयस इन्द्राणीवाचरसि । य ऐन्द्र्यां पूर्वस्यामिन्द्रतीशत्वेनेन्द्रवदाचरति । तथा यः शास्त्रे गल्भते[3] गल्भतेचि गल्भः प्रगल्भस्तद्वदाचरति । शास्त्राणि सम्यगवबुध्यत इत्यर्थः । न तु नै[4] पुनर्होडते होडते के होडो मूर्खस्तद्वदाचरति ॥

---

१ बी सी °ख्यानेन. २ डी °न्तिय । यं. ३ सी °तेचि°. ४ सी न होड°.

इन्द्रति । गल्भते । अक्लीबमाने । होडते । अत्र "कर्तुः क्विप्°" [२५] इत्यादिना क्विप् । गल्भक्लीबहोडेभ्यः पुनः स एव ङित् ॥

शचीयसे । अत्र "क्यङ्" [२६] इति क्यङ् ॥

यस्य वाचः पयायन्ते लावण्यं च पयस्यते ।
चैद्येप्सरायमाणा त्वं रन्तुमोजायसेत्र किम् ॥ १०० ॥

१००. अत्र चैद्ये चेदिदेशाधि[1]पेप्सरायमाणा त्वं किं रन्तुमोजायस ओजस्विनीवाचरस्युद्यच्छसीत्यर्थः । यस्य वाचो माधुर्यात्पयायन्ते दुग्धवदाचरन्ति । लावण्यं च सौन्दर्यं च पयस्यते ॥

ओजस्यन्ते भृशायन्ते संश्रायन्ते चतुर्दिशम् ।
कीर्तयो यस्य तत्रास्मिन्कुरौ किं सुमनायसे ॥ १०१ ॥

१०१. तत्रास्मिन्कुरौ कुरुदेशेशे किं सुमनायसेसुमनाः सुमना भवस्यनुरज्यसीत्यर्थः । यस्य कीर्तय ओजस्यन्त ओजस्विन्य इवाचरन्त्यतिप्राचुर्येण प्रबलीभवन्तीत्यर्थः । तथा चतुर्दिशं व्ययअनान्तावपि केचिदापमिच्छन्ति तन्मते दिक्शब्दादपि । चतस्रो दिशा यत्र तद्यथा स्यादेवं भृशायन्तेभृशा भृशा भवन्ति । चतुर्दिक्षु मङ्क्षु प्रसरन्तीत्यर्थः । तथा संश्रायन्ते संश्रत्कुहको विस्मापक इत्यर्थः । असंश्रतः संश्रतो भव[3]न्ति प्रतिदिनं नवनवावदातेभ्य उद्भवेन सदा नवत्वाद्यतस्तृष्वपि दिक्ष्वाश्चर्यकारिण्यः स्युरित्यर्थः ॥

पयायन्ते पयस्यते । अत्र "सो वा लुक्" [२७] इति क्यङन्त्यसस्य च लुग्वा ॥

ओजायसे । अप्सरायमाणा । इत्यत्र "ओजोप्सरसः" [२८] इति क्यङ् सलोपश्च ॥ अन्ये त्वोजःशब्दे सलोपविकल्पमिच्छन्ति । ओजायसे ओजस्यन्ते ॥

---

१ The ms. सी omits the part of the commentary from धि in देशाधिपे to the verse biginning with ओजस्यन्ते. २ बी सी °रन्तिङति. ३ सी °न्ति दि°.

भृशायन्ते । सुमनायसे । संभ्रायन्ते । अत्र "डच्यर्थे°" [२९] इत्यादिना क्यङ् सतयोर्यथासंभवं लोपश्च ॥

लोहितायन्मुखांश्चर्मायतः पटपटायतः ।
द्विषोकष्टायमानोहन्योमुं हूणं वृणोषि किम् ॥ १०२ ॥

१०२. अमुं हूणं हूणदेशेशं किं वृणोषि । योकष्टायमानः कष्टाय पापकर्मणेक्षत्राचारयुद्धादिकायाक्रामन् क्षत्राचारेण युध्यमानः सन्नित्यर्थः । द्विषोहन् जघान । किंभूतान्सतः । चर्मायतश्चर्मणः स्वतन्त्रार्थवृत्त्या प्रकृतिविकारभावाप्रतीतेश्च्व्यर्थो नास्तीति तद्वृत्तेः प्रत्यय इति । अचर्मवतश्चर्मवतो भवतः प्रहाररक्षार्थं[२] सखेटकीभवतोत एव पटपटायतः[३] पटच्छब्दोप्यत्र[४] तद्वति वर्तते । स्फारिका[५]स्फालनोत्थपटच्छब्देनापटत्वतः पटत्वतो भवतः । युद्धोद्यतानित्यर्थः । अत एव च लोहितायन्त्यतिकोपादलोहितानि लोहितानि भवन्ति मुखानि येषां तान् ॥

न यः कक्षायते कोपाल्लोभात्कृच्छ्रायते न च ।
नापि सत्रायते कामान्माथुरं किं भजस्यमुम् ॥ १०३ ॥

१०३. अमुं माथुरं मथुरायां भवं नृपं किं भजसि । यः कोपान्न कक्षायते कक्षाय वधबन्धादिकाय पापकर्मणे न क्रामति[६] न च लोभात्कृच्छ्रायते कृच्छ्राय प्रजातीव्रकरपीडनादिकाय पापकर्मणे न क्रामति नापि कामात्कन्दर्पात्सत्रायते सत्राय परस्त्र्यपहारादिकाय पापकर्मणे[८] न क्रामति ॥

---

१ सी °त्र "वार्थे°". २ सी °क्षार्थे स°. ३ बी सी डी °तः पटप°. ४ डी °ब्दोत्र. ५ ए स्फरका°. ६ सी डी °ति नापि. ७ ए °य प्र°. ८ ए °णे क्रा°.

गहने गहनायन्ते न रोमन्थायितैणके ।
व्याधा अप्याज्ञया यस्य विन्ध्येशे रमसेत्र किम् ॥ १०४ ॥

१०४. अत्र विन्ध्येशे किं रमसे । यस्याज्ञया हेतुना व्याधा अपि मृगयाजीविनोपि गहने वने न गहनायन्ते गहनाय मृगादिवधाय पापकर्मणे न क्रामन्ति । अत एव किंभूते गहने । रोमन्थायिता मृत्युभयाभावेन सुखितत्वाद्रोमन्थमभ्यवहृतं द्रव्यमुद्गीर्य चर्वितवन्त एणा मृगा यत्र तस्मिन् । एतेन तस्यातिधार्मिकत्वोक्तिः ॥

पटपटायतः । लोहितायत् । चर्मायतः । इत्यत्र "डाज्°" [३०] इत्यादिना वित्क्यङ् ॥

कष्टायमानः । कक्षायते । कृच्छ्रायते । सत्रायते । गहनायन्ते । अत्र "कष्ट°" [३१] इत्यादिना क्यङ् ॥

रोमन्थायित । इत्यत्र "रोमन्थाद्°" [३२] इत्यादिना क्यङ् ॥

फेनायन्ते बाष्पायन्ते चोष्मायन्ते च यद्विषः ।
धूमायितेग्नावुद्वोढुं किमन्ध्रेत्र सुखायसे ॥ १०५ ॥

१०५. अग्नौ विवाहाग्निकारिकावह्नौ धूमायिते यवादिक्षेपेण धूममुद्वमति सत्यन्ध्रेन्ध्रदेशाधिपे विषय उद्वोढुं किं सुखायसे सुखमनुभवसि । यद्विषः फेनायन्ते बाष्पायन्ते चोष्मायन्ते च युद्धादिनात्यन्तं खेदितत्वात्फेनान्मुखे फेनबुद्बुदान्बाष्पांश्च पराभवोत्थानि नेत्रवारीण्यूष्मणश्च संतप्तोच्छ्वासानुद्वमन्ति ॥

१ ए °न्थायते°.

१ सी डी यत्रास्मि°. २ बी सी डी ई °न यस्या°. ३ बी °टायितः. ४ ए बी सी डी °नायते. ५ सी डी °न्ते यु°. ६ सी डी °व्यूष्माण°.

श्रीर्न दुःखायते यत्र वाण्या वैरायते न च ।
शब्दायितयशःशङ्खः सोयं श्रीगूर्जरेश्वरः ॥ १०६ ॥

१०६. सोयं प्रत्यक्षः शब्दायितयशःशङ्खः सशब्दीकृतकीर्तिकम्बुर्गूर्जरेश्वरोस्ति । यत्र श्री राज्यादिलक्ष्मीर्न दुःखायते न्यायोत्साहादिगुणैरस्मिन्सुखेन सदा वासित्वान्न[1] दुःखमनुभवति । न च नापि वाण्या सह वैरायेते[2] वैरं करोति । स्वभावान्मिथो विरुद्धे अपि श्रीवाण्यौ[3] विरोधत्यागेन यत्र तिष्ठत इत्यर्थः । अनेन च यदि त्वममुं वृणोषि तदा त्वमपि श्रीरिवात्र न दुःखायसे नापि सपत्नीभिः सह वैरायसे तस्मादमुं वृणीष्वेति दुर्लभदेवी ज्ञापिता ॥

फेनायन्ते । ऊष्मायन्ते । बाष्पायन्ते । धूमायिते[4] । इत्यत्र "फेनोष्म°" [३३] इत्यादिना क्यङ् ॥

सुखायसे । दुःखायते । अत्र "सुखादेः" [३४] इत्यादिना क्यङ् ॥

शब्दायित । वैरायते । अत्र "शब्दादेः कृतौ वा" [३५] इति वा क्यङ् ॥

नमस्यन्वरिवस्यंश्चाचित्रीयत तपस्यताम् ।
यश्च दुर्लभराजं तं नाम्नामुं किं वुवूर्षसि ॥ १०७ ॥

१०७. अमुं नाम्ना दुर्लभराजं किं वुवूर्षसि । यश्च । चः पूर्ववाक्यार्थापेक्षया समुच्चये । नमस्यन्नमस्कुर्वन्वरिवस्यंश्च वरिवः कुर्वन्सेवमानश्च संस्तपस्यतां तपः कुर्वतां कर्मणो वृत्तावन्तर्भूतत्वादकर्मकत्वम् । तपोधनानामचित्रीयताहो राजाधिराजस्याप्यस्य कीदृग्विनय इत्याश्चर्यमकरोत् । नाम्ना दुर्लभमिति नामनिर्देशेन दुर्लभदेवीदं ज्ञापिता

१ सी डी श्रीगुर्ज°.

१ ए °सितत्वा°. २ डी °यन्ते वै°. ३ डी °वाण्योर्विरो°. ४ सी °मायते. डी° मायन्ते वै°.

यदुतैकनामत्वेनैकराशित्वादेकनक्षत्रत्वाच्च तवामुना सहातिश्रेष्ठो योग इति ॥

तपस्यताम् । अत्र "तपसः क्यन्" [३६] इति क्यन् ॥

नमस्यन् । वरिवस्यन् । अचित्रीयत । इत्यत्र "नमः°" [३७] इत्यादिना क्यन् ॥

साथ हस्तयमानास्य कण्ठे चिक्षेप च स्रजम् ।
अश्वैरुत्पुच्छयमानैर्ययौ कुप्यच्च राजकम् ॥ १०८ ॥

१०८. अथैवं द्वास्थाभणनानन्तरं सा दुर्लभदेवी हस्तयमाना हस्तमुत्क्षिपन्त्यस्य दुर्लभस्य कण्ठे स्रजं वरमालां चिक्षेप च । तथा राजकं नृपौघः कुप्यद्दुर्लभवरणेन क्रुध्यत्सदुत्पुच्छयमानैर्वेगेन प्रेरितत्वात्पुच्छानूर्ध्वमस्यद्भिरश्वैः[1] कृत्वा[2] ययौ च स्वयंवरमण्डपान्निर्जगाम च ॥

परिपुच्छयमानेभैरश्वैः पुच्छयमानकैः ।
द्राग्विपुच्छयमानोक्षरथैरागाच्च बन्धुता ॥ १०९ ॥

१०९. बन्धुता दुर्लभस्य बान्धवौघो विवाहोत्सवविधय[3] आगात् । कैः कृत्वा । परिपुच्छयमानेभैः पुच्छान्समन्तादस्यद्भिर्गजैस्तथा पुच्छयमानकैरज्ञातैः पुच्छानस्यद्भिरश्वैस्तथा विपुच्छयमानाः पुच्छान्विविधं विशिष्टं वास्यन्त उक्षाणो वृषा येषु ते तथा ये रथास्तैश्च ॥

हस्तयमाना । इत्यत्र "अङ्गात्°" [३८] इत्यादिना णिङ् ॥

उत्पुच्छयमानैः । परिपुच्छयमान । विपुच्छयमान । पुच्छयमानकैः । अत्र "पुच्छाद्°" [३९] इत्यादिना णिङ् ॥

---

१ सी डी °च्छान्यूर्ध्वं°. २ सी डी °द्भिरुच्चैः कृ°. ३ प इ °विषये.

संभाण्डयन्ते संचीवरयमाणा मखाय ये ।
ते मन्त्रयन्तो ब्रह्माणस्तयोः पाणी अमिश्रयन् ॥ ११० ॥

११०. ते ब्रह्माणो द्विजा मन्त्रयन्तो विवाहोचितमन्त्रानाचक्षाणाः सन्तस्तयोर्वधूवरयोः पाणी अमिश्रयन् संयुक्तीचक्रुः । ये यागेषु सदोद्यतत्वान्मखाय यागार्थं संभाण्डयन्ते भाण्डानि यज्ञोपकरणानि समाचिन्वन्ति । किंभूताः । संचीवरयमाणाश्चीवरं वस्त्रं समाच्छादयन्तो यजमानेभ्यो भिक्षयोपार्जयन्तो वा ॥

संभाण्डयन्ते । अत्र "भाण्डात्°" [४०] इत्यादिना णिङ् ॥

संचीवरयमाणाः । अत्र "चीवरात्°" [४१] इत्यादिना णिङ् ॥

अमिश्रयन् । मन्त्रयन्तः । अत्र "णिच्°" [४२] इत्यादिना णिच् ॥

ये पयो व्रतयन्त्यन्नं व्रतयन्ति च ये द्विजाः ।
वेदार्पयन्तस्ते चक्रुर्मधुपर्कादिकं तयोः ॥ १११ ॥

१११. ते द्विजा वेदापयन्तो वेदमाचक्षाणास्तयोर्मधुपर्कादिकं मधुपर्कं दध्ना संपृक्तं[2] मधु । तेनात्रोपचाराद्वधूवराभ्यां यन्मधुपर्कस्य प्राशनं तदुच्यते । तदादिर्यस्य प्रदक्षिणादापनादेर्विवाहाचारस्य तं चक्रुः । ये पयो दुग्धं व्रतयन्त्यस्माभिः पय एव भोक्तव्यमिति व्रतं कुर्वन्ति गृह्णन्ति वा तथा येऽन्नमस्माभिर्न भोक्तव्यमिति व्रतयन्ति च ॥

चौलुक्याय महेन्द्रोथ सत्यापितमनोरथः ।
अर्थापयञ्श्वेतयन्नश्वयंस्तत्तदा ददौ ॥ ११२ ॥

११२. अथ[3] तथा तदा विवाहकाले सत्यापिताः परिपूर्णीकरणेन[4]

१ ए °पनोचस्ते.

१ बी °पकारक°. २ ई संयुक्तं. ३ सी डी °थ तदा. ४ ए °णे च सत्यीकृत्वा म°.

सत्यीकृता मनोरथा येन स महेन्द्रस्तत्तदर्थादि चौलुक्याय ददौ । कीदृक्सन् । अर्थापयन् श्वेतयन्नश्वयन्नहो अर्थाः श्वेताश्वा अश्वतराश्चानीयन्तामित्यर्थान्धनानि श्वेताश्वान् श्वेततुरङ्गानश्वतरान्वेसरानुपलक्षणत्वाद्धस्त्यादींश्चाचक्षाणः ॥

गालोडयितृशार्ङ्गीव सोथानाह्वरयन्नदात् ।
कनिष्ठां भगिनीमन्यां नागराजाय जिष्णवे ॥ ११३ ॥

११३. अथ स महेन्द्रो जिष्णवे जैत्राय नागराजाय दुर्लभानुजायान्यां कनिष्ठां भगिनीं लक्ष्मीनाम्नीमदात् । कीदृक् । अनाह्वरयन्नाह्वरति कुटिलीभवतीति अचि कुत्सितार्थे कपि च आह्वरकं कुटिलं वाक्यं कुटिलः पुरुषो वा । ऋजुस्वभावत्वेन कौटिल्याप्रियत्वात्तत्त्वानाचक्षाणः । श्लेषोपमामाह । गालोडयितृशार्ङ्गीवेति । गोर्लोडितं लोडनम् । गुप्तं लोडितमिति तु क्षीरस्वामिना निरुक्तिः कृता । उभयत्रापि पृषोदरादित्वाद्गादेशे गालोडितं गोदोहनं विलोडनं वेत्यर्थः । गोपावस्थायां गालोडितं करोति गालोडयिता यः शार्ङ्गी विष्णुः स यथानाह्वरयन्कनिष्ठां भगिनीं सुभद्राख्यां जिष्णवेर्जुनायादात् ॥

पयो व्रतयन्ति । अन्नं व्रतयन्ति । इत्यत्र "व्रताद्°" [४३] इत्यादिना णिच् ॥

सत्यापित । अर्थापयन् । वेदापयन्तः । अत्र "सत्यार्थ°" [४४] इत्यादिना-आदन्तादेशः ॥

श्वेतयन् । अश्वयन् । गालोडयितृ । अनाह्वरयन् । इत्यत्र "श्वेताश्व°" [४५] इत्यादिनाश्व-तर-इत-कानां लुप् ॥

---

१ प° °यन्निश्वय°. २ प° वा कु°. ३ ई° °तत्तत्त्वं वा°. ४ सी डी °डयतृ°. ५ ई° °तं गोलो°. ६ ई° णिज् ॥.

चकासांचक्रतुस्तौ[1] च चकासामासतुश्च ते ।
तेषामुद्वाह[2]हर्षेण स चकासांबभूव च ॥ ११४ ॥

११४. स्पष्टः । किं तु तौ वरौ चकासांचक्रतुरनुरूपवधूसंयोगेन रेजतुस्ते च वध्वौ च । तेषां वधूवराणाम् । स महेन्द्रः ॥

महेन्द्रः स्वांचकारानु यथावद्विससर्ज तौ ।
स्वमुक्षांप्रचकारेवामृतैस्तत्परिरम्भणात् ॥ ११५ ॥

११५. महेन्द्रस्तौ वरौ स्वांचकार स्वमिवाचचार वाल्लभ्यातिशयेनात्मानमिवाज्ञासीदित्यर्थः । एके तु कर्तुः संबन्धिन उपमानाद्द्वितीयान्तात्क्विप्प्रत्ययमिच्छन्ति तन्मतेनात्र कर्तुः संबन्धिन उपमानाद्द्वितीयान्तात्स्वात्क्विप् । अनु पश्चाद्यथावद्दानसन्मानादिविसर्जनविध्यनतिक्रमेण विससर्ज । तथा तत्परिरम्भणाद्वरयोराश्लेषादमृतैः स्वमात्मानमुक्षांप्रचकारेव सुखातिरेकात्सिषेचेव । अथ च यो महेन्द्रो महाशक्रः स स्वममृतैरुक्षतीत्युक्तिलेशः ॥

चकासांचक्रतुः । चकासांबभूव । चकासामासतुः । अत्र "धातोरनेक°" [४६] इत्यादिना परोक्षायाः स्थान आम् । आमन्ताच्च परे कृभ्वस्तयः परोक्षान्ता अनुप्रयुज्यन्ते ॥ कश्चित्तु प्रत्ययान्तादेकस्वरादपीच्छति । स्वांचकार ॥ अनुग्रहणं विपर्यासव्यवहितनिवृत्त्यर्थम् । तेन चकार चकासाम् । ईहां देवदत्तश्चक्रे । इत्यादि न स्यादित्यन्वित्यनेनासूचि । उपसर्गस्य तु क्रियाविशेषकत्वाद्व्यवधायकत्वं नास्ति । तेनोक्षांप्रचकार । इत्यादि स्यादेव ॥

---

१ बी °स्तौ तु चका°. २ ए °मुद्वह°.

---

१ सी डी °णाद्वयो°. २ ई °कासमा°. ३ बी °श्चित्प्र°. ४ ए °पत्वा°.

स्वस्रोर्दासीर्दयांचक्रे दयामास च दासकान् ।
दयांबभूव कोशं च सोन्वयामास चाजलम् ॥ ११६ ॥

११६. स्पष्टः । परं स्वस्रोर्भगिन्योर्दयांचक्रे ददौ । स महेन्द्रः । आजलं जलमवधीकृत्यान्वयामास चानुययौ ॥

दुर्लभोयांबभूवाथान्वयांचक्रे च नागराट् ।
वाटीषु नासांचक्राते नाप्सु चासांबभूवतुः ॥ ११७ ॥

११७. स्पष्टः । किं तु । अयांबभूव ययौ । अन्वयांचक्रे चानुययौ । तथात्यौत्सुक्यगमनेन[1] वाटीष्वमात्याद्युपवनेषु नासांचक्राते दर्शनकौतुकाभ्य स्थितौ ॥

आसामासुर्वरीतुं तां ये कासांचक्रिरेपि च ।
तेस्थुः क्रुधाग्रे तान्दृष्ट्वा स कासामास दुर्लभः ॥ ११८ ॥

११८. ते नृपाः क्रुधाग्रेस्थुश्छलयुद्धाय स्थितास्तांश्च दृष्ट्वा स दुर्लभः कासामास कोपाद्विरुद्धमूचे । ये नृपास्तां दुर्लभदेवीं वरीतुमासामासुः स्वयंवरमण्डपे तस्थुः कासांचक्रिरेपि च । दुर्लभवरणे रुष्टत्वाद्दुर्लभं प्रति विरुद्धानि वचांस्यूचुश्च ॥

कासांबभूवुस्ते दर्पात्समीहामासुराहवम् ।
ईहांबभूवुर्नामात्यान्नचेहांचक्रिरे सखीन् ॥ ११९ ॥

११९. ते नृपा दुर्लभं प्रति कासांबभूवुस्तथा दर्पात्स्वबलौद्धवलेपादाहवं युद्धं समीहामासुरीषुः । अत एवामात्यान्नेहांबभूवुर्युक्तायुक्त-

१ बी आशामा°.

१ ई °ने वा°. २ ए °कासिरि°. ३ ई °लाव°. ४ ई ससमी°.

विचारणया युद्धस्य विघ्नत्वान्नेषुर्न च सखीनीहांचक्रिरे बलाद्यवलेपात्सहायानपि नापेक्षितवन्त इत्यर्थः ॥

खमानर्छोर्णुनावाशा नृपाणां तुमुलस्तथा।
प्रजागरांचकाराशु ग्रसनाय यथान्तकः ॥ १२० ॥

१२०. नृपाणां तुमुलो व्याकुलो रवोत्युच्चैस्त्वात्तथा खमानर्छ व्याप तथाशा दिशस्तथोर्णुनाव व्याप यथान्तको ग्रसनाय नृपाणामेव निगलनायाशु शीघ्रं प्रजागरांचकार। उद्यतोभूदित्यर्थः। गाढव्याकुलस्वरेण हि सुप्तोकस्मादेव जागर्ति ॥

अलक्ष्मीर्जागरामास न जागरांबभूव धीः।
यत्तं जजागरुर्जेतुं समिन्धांचक्रिरे[1] च ते ॥ १२१ ॥

१२१. यदिति क्रियाविशेषणम्। तं दुर्लभं जेतुं यत्ते नृपा जजागरुरुद्येमुः समिन्धांचक्रिरे[1] च तेजस्विनो बभूवुश्च। यत्तदोर्नित्याभिसंबन्धात्तत्तेषामलक्ष्मीर्जागरामास। धीर्बुद्धिर्न जागरांबभूव। तस्यातिशक्तत्वेन केनाप्यजेयत्वात् ॥

समीधेग्निर्यथा यद्वदिन्धांचक्रे च वाडवः।
ईधे तेजस्तथा तेषां विश्वमोषांचकार नु ॥ १२२ ॥

१२२. यथाग्निः समीधे जज्वाल यद्वच्च वाडवश्[3] इन्धांचक्रे तथा तेषां नृपाणां तेजः कोपाटोपोत्थप्रचण्डप्रताप ईधे। अत एव विश्वं जगदोषांचकार नु ददाहेव ॥

---

१ सी डी °मिधांच°.

---

१ बी सी डी °मिधांच°. २ डी °दुः १य°. ३ ए बी ई °व ईधांच°.

उवोषेव दिशो वह्निः क्ष्मा बिभायेव कम्पभृत् ।
न ते तथापि बिभयांबभूवुर्मेदिनीभुजः ॥ १२३ ॥

१२३. वह्निर्दिश उवोषेव । नृपपराजयसूचकोत्पातोद्भवाद्दिशोग्निना दह्यमाना इवालक्ष्यन्तेत्यर्थः । तथा कम्पभृत्क्ष्मा बिभायेव । तथाप्येवमुत्पातसद्भावेपि ते मेदिनीभुजो न बिभयांबभूवुर्बलावलेपाद्भ भीताः ॥

[1]नेन्द्राद्यो बिभयामास बिभयांचकृवान्स किम् ।
प्रजिह्रयांचकाराजौ तैः प्रत्युत चुलुक्यराट् ॥ १२४ ॥

१२४. स्पष्टः । किं तु तैर्नृपैः सहाजौ रणे सति प्रत्युत प्रजिह्रयांचकार किमेभिरतिहीनैः सह युद्धेनेति लज्जितः ॥

जिह्राय यद्यपि तथाप्यजगावं बभार सः ।
पुरो दिधक्षोर्बिभरांबभूवेशस्य विभ्रमम् ॥ १२५ ॥

१२५. स दुर्लभो यद्यपि जिह्राय तैः सह युद्धेन लज्जितस्तथापि तेषां वृथाबलाभिमानापनोदायाजगावं धनुर्बभाराधारयत् । अजगाव[1]शब्दः सामान्यधनुष्यपि वर्तते । अत एव पुरस्तिस्रः पुरीर्दिधक्षोर्दग्धुमिच्छोरीशस्य शंभोर्विभ्रमं बिभरांबभूव । पुरो[2] दिधक्षुरीशो ह्यजगावं पिनाकं बभार ॥

तत्राग्नाविव केपीषुसमिधो जुहुवुर्नृपाः ।
केपि स्वं[2] जुहवांचक्रुर्[3]विदांचक्रुर्न तद्बलम् ॥ १२६ ॥

१२६. केपि नृपास्तत्राजावग्नाविवेषुसमिधः शरैधान् जुहुवुश्चि-

---

१ ए नैन्द्रा°. २ बी स्वं जहुवां°. ३ ए सी डी जुहवां°.

---

१ ए °गावः श॰ २ बी सी डी °रो दधिक्षु°.

क्षिपुः । अग्नौ क्षिप्ताः शरा रणे स्वमेव भस्मीचक्रुर्न[1] तु शत्रुवधादि[2] स्वकार्यं चक्रुरित्यर्थः । केपि च नृपाः स्वमात्मानं जुहवांचक्रुर्न[3] तद्बलं दुर्लभसैन्यं विदांचक्रुरियत्परिमाणमिति[4] परिच्छिन्नवन्तः । शस्त्रविनाशनेनात्मानमेव विनाशितवन्त इत्यर्थः ॥

विदांबभूवुर्नैव स्वं विदामासुश्च नापरम् ।
रजोभिर्विविदुर्नार्कं[5] विदांकुर्वन्तु किं जनाः ॥ १२७ ॥

१२७. जना भटलोका रजोभिः कृत्वा स्वमात्मीयं नैव विदांबभूवुर्ज्ञातवन्तो न चापरं शत्रुं विदामासुर्न चार्कं विविदुः । अतश्च रोदस्यो[6] रजोभिरावरणेन सुज्ञेयानामप्येषामदर्शनात्किं विदांकुर्वन्तु जानन्तु । न किमपीत्यर्थः ॥

अमी विदन्तु मे शक्तिमध्यासीदिति दुर्लभः ।
अस्राक्षीत्पाणिना श्मश्रूण्यस्प्राक्षदिषुधिं ततः ॥ १२८ ॥

१२८. पूर्वार्धं स्पष्टम् । ततश्चिन्तानन्तरं स्वशक्त्यवलेपेन श्मश्रूणि दंष्ट्रिकां पाणिनास्राक्षीत्ततश्चेषुधिं शराकर्षायास्प्राक्षत् ॥

निषङ्गादिषुमक्राक्षीदकृक्षदथ कार्मुकम् ।
यां लीलामर्जुनोम्राक्षीत्तामम्राक्षदसौ तदा ॥ १२९ ॥

१२९. अक्राक्षीदाकृष्टवान् । यां लीलां शोभामर्जुनोम्राक्षीत्पस्पर्श तां लीलां तदा कार्मुकाकर्षणकालेसौ दुर्लभोमृक्षत् । शिष्टं स्पष्टम् ॥

अद्राप्सुर्ये भुजस्थाम्ना मन्त्रास्त्रैरदपंश्च ये ।
स तैः कृतान्तमत्राप्सीदतृपद्यशसा न हि ॥ १३० ॥

१३०. स्पष्टः । किं तु । अद्राप्सुर्गर्वं चक्रुः । तैर्नृपैः कृत्वा स

---

१ डी °र्न श°. २ ई °दि का°. ३ बी सी डी जुहवां. ४ ई °ति न प°.
५ डी °दुर्न ना°. ६ ई °दरोर°.

दुर्लभः कृतान्तमत्राप्सीत्तृप्तीचक्रे । अन्तर्भूतणिगर्थोत्र तृपिः सकर्मकः । ताञ्तृपाञ्चघानेत्यर्थः ।

दयांचक्रे । दयांबभूव । दयामास । अन्वयांचक्रे । अंयांबभूव[1] । अन्वयामास । आसांचक्राते । आसांबभूवतुः । आसामासुः । कासांचक्रिरे । कासांबभूवुः । कासामास । इत्यत्र "दया°" [४७] इत्यादिना-आम् ॥

ईहांचक्रिरे । ईहांबभूवुः । समीहामासुः । इत्यत्र "गुरु°" [४८] इत्यादिना आम् ॥ अनृच्छूर्णोरिति किम् । आनर्छ । ऊर्णुनाव ॥

प्रजागरांचकार । जागरांबभूव । जागरामास । जजागरुः ॥ ओषांचकार । उवोष ॥ समि[2]न्धांचक्रिरे । समीधे । अत्र "जागुष°" [४९] इत्यादिना-आम्वा । सम्ग्रहणं किम्[3] । इन्धांचक्रे ॥ समोन्यत्रापीन्धेराम्विकल्प इत्यन्ये[4] । इन्धांचक्रे । ईधे ॥

बिभयांचकृवान् । बिभयांबभूवुः । बिभयामास । बिभाय ॥ प्रजिह्रयांचकार । जिह्राय ॥ बिभरांबभूव[5] । बभार ॥ जुहवांचक्रुः[6] । जुहुवुः । इत्यत्र "भीह्री°" [५०] इत्यादिना वा-आम् । स च तिव्वत् ॥

विदांचक्रुः । विदांबभूवुः । विदामासुः । विविदुः । अत्र[7] "वेत्तेः कित्" [५१] इति वा-आम् स च कित् ॥

विदांकुर्वन्तु । विदन्तु । इत्यत्र "पञ्चम्याः कृग्" [५२] इति पञ्चम्याः स्थाने वा किदाम् तदन्ताच्च पञ्चम्यन्तः कृगनुप्रयुज्यते ॥

अध्यासीत् । इत्यत्र "सिज°" [५३] इत्यादिना सिच् ॥

अस्राक्षीत् अस्पृक्षत् । अम्राक्षीत् अमृक्षत् । अक्राक्षीत् अकृक्षत् ।

१ सी डी ई अन्वयां°. २ बी °मिधां च. ३ ई °म् । ईधांच°. ४ ई °न्ये । ईधांच°. ५ सी डी °भूवुः । ब°. ६ बी सी डी जुहुवां°. ७ बी °त्र "वावेत्तेः कि°.

अम्राप्सीत् अतृपत् । अद्राप्सुः अदृपन् । इत्यत्र "स्पृशमृश°" [५४] इत्यादिना वा सिच् ॥

य आविक्षंस्तमद्विक्षंस्तमद्राक्षुश्च दर्पतः ।
तान्न्यघुक्षच्छरैरेष न्यकोषीत्तदसूनपि ॥ १३१ ॥

१३१. तान्नृपानेष दुर्लभः शरैर्न्यघुक्षदाच्छादितवांस्तदसूंस्तत्प्राणान्न्यकोषीदप्याकृष्टवानपि । तानवधीदित्यर्थः । ये नृपास्तं दुर्लभमद्विक्षन् द्विष्टवन्तः । अत एवाविक्षन्कोपात्तस्मिन्संरम्भं चक्रुः । तथा दर्पतो बलाद्यवलेपात्तमद्राक्षुश्च ॥

न्यघुक्षत् । आविक्षन् । अद्विक्षन् । इत्यत्र "हशिटः°" [५५] इत्यादिना सक् ॥ अदश इति किम् । अद्राक्षुः । अनिट इति किम् । न्यकोषीत् ॥

यथाश्वोश्वमुपाश्लिक्षद्रथो रथमुपाश्लिषत् ।
नाचीकमत कोप्यस्त्रं तथौजो यमशिश्रियत् ॥ १३२ ॥

१३२. अयं दुर्लभस्तथौजो बलमशिश्रियद्यथाश्वोश्वमुपाश्लिक्षद्रथो रथमुपाश्लिषत् । भयेन युगपच्छीघ्रं संमर्देन नाशादश्वा रथाश्च मिथ आस्फलन्नित्यर्थः । तथा यथा कोपि पत्तिरस्त्रं नाचीकमत द्रुतं नाशेन नैच्छत् । एतेनाश्वरथपत्तिनाश उक्तः ॥

अथ गजानामाह ।

गजतादुद्रुवत्तस्माद्भयान्मूत्रमसुस्रुवत् ।
न चाचकमत स्थातुं पयांस्यपि नचादधत् ॥ १३३ ॥

१३३. स्पष्टः । किं तु तस्माद्दुर्लभात्सकाशाददुद्रुवन्भयान्नष्टा । पयांस्यपि जलानि च न चादधन्नैव पपौ ॥

१ डी अद्रा°. २ सी डी °ना सिच् वा ॥. ३ ई °दिवां°. ४ ई °लाव° ५ ई °पास्तम°. ६ बी °क्षन् । आ°. ७ ए °स्मात्स°. ८ ई °नि चा°.

अर्त्योऽङ्गोधात्पयो नाश्वद्धैर्यमाशा अशिश्वियत्[1] ।
गन्तुं ये चाशिषन् व्यत्यशिषतान्यच्च साधु तान् ॥१३४॥

१३४. अर्त्यो भयातिरेकोत्थमनःपीडयाङ्गोऽङ्गदेशाधिपो धैर्यं चित्ता-वष्टम्भं नाश्वन्नागमदत एवाशा दिशोऽशिश्वियन्नष्ट[1] इत्यर्थः । किं बहुना पयो जलमपि नाधान्न पपौ । तथा ये भटा गन्तुं[2] नंष्टुमशिषन्नशि-क्षयन्नर्थात्तं तानङ्गो गन्तुं व्यत्यशिषत विनिमयेनाशिक्षयत्तान्साधु[3] यथा स्यादेवमाख्यच्च साधु साधूक्तं भवद्भिरिति तान्प्रशंसितवांश्चेत्यर्थः ॥

अपास्यतात्त्रं[2] मालव्यो न्यवोचच्च पलायितुम् ।
शास्तॄन्[3] व्यत्यशासिष्ट नाभ्यसार्षीदपासरत् ॥१३५॥

१३५. मालव्योऽस्त्रमपास्यत[5] तत्याज पलायितुं न्यवोचच्च[4] पलाय्यत इत्यवदच्चेत्यर्थः । तथा पलायितुं[6] शास्तॄन्[7] व्यत्यशासिष्ट[8] विनिमयेनोपादिक्षदत एव नाभ्यसार्षीन्नाभिमुखमगमत्किं त्वपासर-दनेशत् ॥

त्रस्तैः[10] समार्ष्ट नो पुत्रैः कलत्रैर्न समारत ।
हूणो निरारदन्वार्षीन्नष्टानाह्वत्तथापरान् ॥ १३६ ॥

१३६. हूणो हूणदेशाधिपस्त्रस्तैर्भीतैः पुत्रैः सह न समार्ष्ट न समगंस्त । तथा कलत्रैश्च न समारत किं तु निरारद्रणान्निर्गतः । भयभीतान्पु-त्रान्कलत्राणि च मुक्त्वा स्वप्राणानादाय नष्ट इत्यर्थः । अत एव न-ष्टानन्वार्षीदन्वगमत् । तथापरानन्यान्[11]नष्टानाह्वदाकारयत् ॥

---

१ डी °शिश्रिय°. २ ए °तात्रं मा°. ३ ए शाशत्सु.

---

१ सी डी °शिश्रिय°. २ ए °न्तुं नष्टुं°. ३ बी °विनम°. ४ डी °च स सा°. ५ ए °त त्या°. ६ ए °यितं शा°. ७ ए शाशत्सू°. ८ ए °त्सु शा°. ९ सी डी व्यतिशा°. १० सी डी °त्रस्तैः पु°. ११ ए बी सी ई °न्यान्नष्टा°.

स स्वेदेनालिपद्गात्रमसिचत्क्ष्मां च माथुरः ।
य आह्वास्त तुरुष्केशान्पर्वतीयान्य आह्वत ॥ १३७ ॥

१३७. स माथुरः स्वेदेन भयोत्थप्रस्वेदेन गात्रमलिपत् । क्ष्मां चासिचदार्द्रयत् । यो महाशूरत्वेन तुरुष्केशानाह्वास्त युद्धेच्छया सस्पर्धमाकारयत् । तथा यः पर्वतीयान्पर्वतदुर्गभवान्नृपानाह्वत ॥

अलिप्तासिचतान्ध्रः क्ष्मामसृजा मूर्छितस्तदा ।
असिक्तालिपतैनं वाश्चन्दनैर्बन्दिनां गणः ॥ १३८ ॥

१३८. तदा युद्धकाले मूर्छितः संक्षोभातिरेकेण वैचित्त्यं[2] गतः सन्नन्ध्रोन्ध्रदेशाधिपोसृजा मुखान्निर्गतेन रक्तेन कृत्वा क्ष्मामसिचत धाराप्रवाहेणार्द्रीचक्रे[3] । तथा क्ष्मामलिप्त धाराप्रवाहस्याविच्छेदबाहुल्याभ्यामुपचितीचक्रे । अत एव बन्दिनां भट्टानां गण एनमन्ध्रं वाश्चन्दनैरसिक्तालिपत च मूर्छापनोदाय वारिभिः सिक्तवांश्चन्दनैर्लिप्तवांश्चेत्यर्थः ॥

अश्वोश्वमुपाश्लिक्षत् । इत्यत्र "श्लिषः" [५६] इति सक् ॥

रथो रथमुपाश्लिर्षत् । इत्यत्र "नासत्वाश्लेषे" [५७] इति सम ॥

अचीकमत । अशिश्रियत् । अदुद्रुवत् । असुस्नुवत् । अचकमत । इत्यत्र "णिश्रि°" [५८] इत्यादिना कः ॥

अदधत् अधात् । अशिश्वियत् अश्वत् । इत्यत्र "ट्धेश्वेर्वा" [५९] इति वा कः ॥

---

१ सी डी तुरष्टेन्प°.

---

१ डी तुरभेना°. २ डी वैवश्यं ग°. ३ ए °द्रींच । त°. ४ ए °च । इ°.

अशिषन् । व्यत्यशिषत । अपास्थत[1] ॥ वचंङ् मूंग्ङ् वा । न्यवोचत्[2] ॥
ख्यांङ् चक्षिङ् वा । आख्यत् । इत्यत्र "शास्ति°" [६०] इत्यादिना-अङ्[3] ॥
शास्तेरात्मनेपदे नेच्छन्त्येके । व्यत्यशासिष्ट ॥

अपासरत् अभ्यसार्षीत् ॥ ऋ अदादिर्भ्वादिर्वा[4] । निरारत् अन्वार्षीत् ।
समारत समार्ष्ट । । इत्यत्र "सर्त्यर्तेर्वा"[5] [६१] इति वा-अङ् ॥

आह्वत् । अलिपत् । असिचत् । इत्यत्र "ह्वालिप्सिचः" [६२] इत्यङ् ॥

आह्वत आह्वास्त । अलिपत अलिप्त । असिचत असिक्त । इत्यत्र "वात्मने"
[६३] इति वा-अङ् ॥

नाशकन्नाद्युतच्चैद्यो नारुचन्नापुषत्कुरुः ।
अशुषच्छ्वासमरुधद्द्वचोरौत्सीच्च काशिराट् ॥ १३९ ॥

१३९. चैद्यो नाशकद्भयातिरेकाद्द्रन्तुं[6] न समर्थोभूत्तथा विच्छायत्वान्नाद्युतत् । तथा कुरुर्नापुषद्भयैातिरेकात्कृशोभूदत एव नार्रुचत् । तथा काशिराडशुषच्छुष्काङ्गोभूच्छ्वासमरुधद्द्वचश्चारौत्सीत् ॥

क्वाश्वत्प्रियाश्वयीत्पुत्रोम्रोचीन्मन्त्र्यम्रुचत्सखा ।
चिन्तये[1]त्य[2]स्तभन्न स्वं नास्तम्भीत्कोपि वा रथम् ॥१४०॥

१४०. क कस्मिन्प्रदेशे प्रियाश्वद्गता क पुत्रोश्वयीत् । क मन्त्र्यम्रोचीद्गतः । सखा काम्रुचत् । इति चिन्तया कोपि नृपादिः स्वमात्मानं नास्तभन्न गतिरहितं चक्रे रथं वा नास्तम्भीत्प्रियाद्यर्थं नाधारयत् ।

---

१ डी °न्तयाव्यस्त°. २ सी °ये व्यस्त°.

---

१ ई °त ॥ न्य°. २ ई °त् ॥ आ°. ३ ई °ङ् ॥ कश्चित्कर्तर्यपि नेच्छति । व्य°.
४ ए °दिवा । नि°. ५ ए °त्यंर्त्येविति. ६ ई °न्तुं स°. ७ ए °यारिका°.
८ ए °रुचत°. ९ बी °च्छुषाङ्गो°. १० डी °द्वचोरौ°.

मृत्युमहाभयेन प्रियादिचिन्तां मुक्त्वा स्वस्वप्राणानादाय सर्वोपि नृपादिजनो नष्ट इत्यर्थः ॥

योम्लोचीत्सोम्लुचद्भीरोर्नाम्रोचीत्तस्य जीवितम् ।
तेजोम्रुचद्यशोग्लोचीच्चौलुक्यो नाम चाग्लुचत् ॥ १४१ ॥

१४१. यो भीरुर्भयेनाम्लोचीद्रणाद्गतः स भीरुरम्लुचद्गत एव यतस्तस्य भीरोश्चौलुक्यो जीवितं [1]नाम्रोचीन्नाहरत्[2]किं तु चौलुक्यो भीरोस्तेजः प्रताप[3]मम्रुचद्यशश्चाग्लोचीदहरत् । नाम च लोकेप्राप्तनामत्वात्तस्याभिधामप्यग्लुचत् । [4]य[5]द्वा । [6]म्रुंचू ग्लुचू गतावपीत्येके । ततश्चौलुक्यस्तेजोम्रुचत्प्राप्तो यशश्च सर्वदिग्गामिनीं पराक्रमकृतां वा प्रसिद्धिं चाग्लोचीन्नाम चैकदिग्गामिनीं पुण्यदानकृतां वा प्रसिद्धिं चाग्लुचत् ॥

एवं द्विषोजरदसौ मुदमप्यजारी-
दग्लुञ्चदच्युततुलामिति चेष्टितेन ।
स्वामग्लुचच्च नगरीमथ पात्रताम-
ग्लुञ्चीत्ससंभ्रमवधूजनलोचनानाम् ॥ १४२ ॥

१४२. असौ दुर्लभ एवमुक्तरीत्या द्विषोजरत् । अन्तर्भूतणिगर्थो[7]त्र जॄष् । निःसत्वतापादनेन [8]जीर्णांच[9]क्रे । तथा मुदमपि द्विषामजारीदपा[10]नैषीदित्यर्थः । यद्वा । महापुरुषत्वान्मुदमपि [11]द्वि[12]षयोत्थं हर्षमप्यजारीत्स्वस्मिन्ने[13]वाजरयदुत्सेकं न चक्र इत्यर्थः । अतश्चेति चेष्टितेन द्विषज्जरणोत्सेकाकरणरूपेणाचरितेनाच्युततुलां विष्णुसाम्यमग्लुञ्चत्प्राप ।

---

१ ए नाग्लोची°. २ सी डी °त्किं चौ°. ३ ए °मग्लुच°. ४ सी डी यथाम्रु°. ५ ए °द्वा ग्लुचू ग°. ६ सी म्रुच म्रुच ग°. डी म्रुच ग्लुच ग° ई म्रुचू ग°. ७. बी °त्र जॄषः ।. ८ ए जीर्णे च°. ९ ए सी °क्रे । यथा. १० बी °नैषादि°. ११ डी द्विषोत्थं. १२ ई °योत्थह°. १३ ए °वाजार°.

तथा स्वां नगरीं पत्तनमग्लुचच । अथ तथा संभ्रमः कौतुकादिना [1]चित्ता[त्तो ?]त्क्षेपात्त्वरणमादरो वा सह तेन ये वधूजनास्तेषां यानि लोचनानि तेषां पात्रतां विषयत्वमग्लुञ्चीच प्राप च । महोत्सवेन पुर्यां प्र[2]विशन्पौरीभिः ससंभ्रमं ददृश इत्यर्थः ॥

लृदित् । अशकत् ॥ द्युतादि । अद्युतत् । अरुचत् ॥ पुष्यादि । अपुषदे । अलुचत् । अत्र "लृदिद्°" [६४] इत्यादिना-अङ् ॥

अरुधत् अरौत्सीत् । अभृत् अभार्षीत् । अस्तम्भत् अस्तम्भीत् । अग्लुचत् अग्लोचीत् । अम्लुचत् अम्लोचीत् । अग्रुचत् अग्रोचीत् । अंग्लुचत् अंग्लोचीत् । अंग्लुचत् अग्लुञ्चीत् । अजरत् अजारीत् । इत्यत्र "ऋदिच्छ्वि°" [६५] इत्यादिना वा-अङ् । ग्लुचग्लुञ्चोरेकतरोपादानेपि रूपत्रयं सिध्यति । अर्थभेदात्तु द्वयोरुपादानम् ॥ अन्ये त्वच्छ्विधानसामर्थ्याल्लुञ्चेर्नलोपं नेच्छन्ति । तेनाग्लुञ्चत् ॥ वसन्ततिलका छन्दः ॥

॥ इति श्रीजिनेश्वरसूरिशिष्यलेशाभयतिलकगणिविरचितायां श्रीसिद्धहेमचन्द्राभिधानशब्दानुशासनद्व्याश्रयवृत्तौ सप्तमः सर्गः समाप्तः ॥

---

१ ए सी डी ई चित्ताक्षेपा°. २ बी °विशन्पौ°. ३ सी °त्। अत्र. ४ डी अम्लुच°. ५ डी अम्लोची°. ६ डी अग्लोचीत्. ७ ए °दिच्छीला°. ८ ई ग्लुञ्चो°.

द्व्याश्रयमहाकाव्ये

अष्टमः सर्गः ।

नागाद्धीमोथोदपाद्यद्भुतश्रीर्बालोप्युच्चैरग्निवद्योत्यदीपि ।
अर्को वादीपिष्ट सोभ्राजनिष्टाद्यो भीमः किं सोजनीन्द्रानुजो वा॥१॥

१. अथानन्तरं नागान्नागराजाद्दुर्लभानुजाद्भीमो भीमाख्यः पुत्र उदपादि । यो भीम उच्चैरतिशयेन बालोपि तद्दिनजातोपीत्यर्थः । अद्भुतश्रीराश्चर्यकारितेजस्वितादिलक्ष्मीकः सन्नत्यदीप्यतिशयेन दिद्युते । अग्निवदर्को वादीपिष्टेति यथाग्निरर्को वा दिद्युते । अत एवोत्प्रेक्ष्यते । स तेजस्वितादिगुणैः सर्वत्र प्रसिद्ध आद्यः पूर्वो भीमः पाण्डवोजनिष्ट किं वा स इन्द्रानुजो विष्णुरजनि ॥ सर्गेस्मिन्विंशतिं वृत्तानि यावच्छालिनी । ततः परं स्वागता छन्दः ॥

तस्योत्पत्त्या निंष्पितृणं व्यबुद्धात्मानं राजा नागराजोप्यबोधि ।
द्वारं लोकोपूर्यपूरिष्ट मध्यं हर्षं सद्योताप्यतायिष्ट गीतम् ॥ २ ॥

२. तस्य भीमस्योत्पत्त्या राजा दुर्लभ आत्मानं निष्पितृणं पितृणात्पूर्वजऋणान्निष्क्रान्तं व्यबुद्धामंस्त । तथा नागराजोप्यात्मानं निष्पितृणमबोधि । जायमानो हि नरो ऋषिदेवतापितृणामृणबद्धः स्यात्तत्र ब्रह्मचर्यस्वाध्यायाभ्यामृषीणामनृणो भवति यागेन देवानां

---

१ बी निपितृ°.

---

१ ए अनान°. २ बी ई °जश्रिता°. ३ सी डी पूर्वभी°. ४ बी सी डी °ज्ञातिव°. ५ सी डी °त्रिक्रान्तं. ६ ई °षीनाम°.

संवत्या पितॄणामिति स्मृतिः । तथा लोकः सद्यो हर्षमताथि विस्तारितवानत एव द्वारं सिंहद्वारमपूरि व्यापत् । तथा मध्यं[1] प्रासादमध्यभागं चापूरिष्ट तथा गीतं चाताथिष्ट ।

क्ष्माप्यायिष्टाप्यायि राजा मुदाभाज्यापाथोधेर्मङ्गलैश्च व्यजृम्भि ।
कीर्तिर्यच्चायिष्यते चेष्यते श्रीर्धर्मश्चेता चायितानेन वंशः ॥ ३ ॥

३. यद्यस्माद्धेतोरनेन भीमेन श्री राज्यादिलक्ष्मीश्चे[3]ष्यते[4] वर्धयिष्यते । तथा धर्मश्चेता वर्धयिष्यते तथा संतानवर्धनाद्वंशश्चौलुक्यान्वयश्चायिता । अनेनास्य भाव्यर्थधर्मकामसंपदतिश[5]य उक्तः । अत एव कीर्तिश्चायिष्यते । तस्माद्धेतोः क्ष्मा पृथ्वीप्यायि[6]ष्ट स्फीतोच्छ्व[7]सितेत्यर्थः । महापुरुषोत्पत्तौ हि श्रीवृद्ध्यादिशुभसूचकाः क्ष्मोच्छ्वा[8]सादयः सदुत्पाताः स्युः । यद्वा । क्ष्मा पृथ्वीस्थो जनोऽप्यायिष्ट मुदोच्छ्वसिता । तथा राजा दुर्लभो मुदा कर्त्र्याभाज्याश्रितः । अत एवाप्यायि स्फीतीभूतः । तथा मङ्गलैश्च माङ्गलिक्यहेतुभिर्नान्दीतूर्यगीतादिभिश्चाजलधेर्जलधिमभिव्याप्य व्यजृम्भ्युल्लसितम् ॥

चेषीष्टायं नो गिरा चायिषीष्ट श्रेयोभिर्नश्चेति वाग्भिर्मुनीनाम् ।
रोदस्यावाचायिषातां तदानीमाचेषातां मन्त्रनादैश्च मन्द्रैः ॥ ४ ॥

४. अयं भीमो नोस्माकं गिरा चेषीष्ट व[9]र्ध्यतां तथा नोस्माकं श्रेयोभिश्च पुण्यैरपि कर्तृभिश्चायिषीष्टेत्येवंविधाभिर्मुनीनां वाग्भिस्तदानीं पुत्रोत्पत्तिकाले रोदस्यावाचायिषातां व्याप्ते तथा मन्द्रैर्गम्भीरैर्मन्त्रनादैश्चाचेषाताम् ॥

१ बी °ध्यं प्रसा°. २ ई °ष्ट ॥ क्ष्मा°. ३ ए °श्चेक्ष्यते. ४ ई °ते । त°. ५ डी °शयोक्तिः । अ°. ६ सी डी °ष्ट स्पीतो°. ७ ई °सिता । तथा रा°. ८ सी °नोच्छ्व°. ९ ई वर्द्धतां.

ग्राहिष्यन्ते विग्रहीष्यन्त उच्चैर्घानिष्यन्ते निर्हणिष्यन्त ईशाः ।
तेनेनासौ द्रक्ष्यते यैर्न भक्त्या यैर्दोःशक्त्याध्याजि दर्शिष्यते वा ॥५॥
एतेन क्ष्मा ग्राहिताब्धिर्ग्रहीता द्रष्टा तत्त्वं दर्शिता न्यायमार्गः ।
हन्तोत्सेको घानितांहःप्रचारः केनाप्येतौ यौ हि नाघानिषाताम् ॥ ६ ॥
यै रोदस्यावाहसातामवाग्रहीषातां न्यग्राहिषातां च दैत्यैः ।
पुण्याघे नादर्शिषातां निजान्यौ नाद्दक्षातां तेमुना घानिषीरन् ॥७॥
लक्ष्मीः साक्षाद्दर्शिषीष्ट प्रसन्ना सा दृक्षीष्ट ब्रह्मकन्यापि तुष्टा ।
धर्मश्चानुग्राहिषीष्ट ग्रहीषीष्टेन्द्रे मैत्री चेति खे वाक्तदाभूत् ॥ ८ ॥

५-८. तदा पुत्रजन्मकाले खे वागभूद्दैवी वाणी बभूवेत्यर्थः । कथमित्याह । असौ भीमो यैर्भक्त्या न द्रक्ष्यते वा यद्वा यैर्दोःशक्त्या बाहुबलेन हेतुनाध्याजि रणे दर्शिष्यते त ईशाः समर्था अनेन भीमेनोच्चैर्विग्रहीष्यन्ते योधयिष्यन्ते । ततः केचिद्ग्राहिष्यन्ते बद्ध्वा लास्यन्ते । केचिच्च घानिष्यन्ते प्रहरिष्यन्ते । केचिच्च निर्हणिष्यन्ते व्यापादयिष्यन्ते । अत एव क्ष्मा ग्राहिता वशी करिष्यते । तथाब्धिर्ग्रहीता । तथा तत्त्वं परमब्रह्म द्रष्टा ज्ञास्यते । अत एव न्यायमार्गो दर्शिता । अत एव चोत्सेको गर्वो हन्तोच्छेत्स्यते । तथांहःप्रचारः पापविस्तारो घानिता । याचेतावुत्सेकांहःप्रचारौ हि स्फुटं केनापि नाघानिषातां दुर्जेयत्वान्नोच्छेदितौ । एतेन सर्वेपि भीमेन बाह्या आन्तराश्च द्विषो जेष्यन्त इत्युक्तम् । तथामुना भीमेन ते दैत्या घानिषीरन् हन्स्यन्तां यैर्दैत्यै रो-

१ डी °ण्यार्थे ना°.

१ ए ई °शा स°. २ सी डी °रम°. ३ बी °ह्म दृष्टा. ४ बी ई °र्वेणापि. ५ सी डी °मेनैते. ६ बी °न्यन्तां ये°.

दस्यावाहसातां लगुडादिप्रहारैराहते । अवाग्रहीषातां च कारागृहादौ निक्षेपेण प्रतिबद्धे च। न्यग्राहिषातां च सर्वस्वाद्य[1]पहारेण दण्डिते च । तथा नास्तिकत्वेन यैः पुण्या[2]घे धर्माधर्मौ नादर्शिषातां न ज्ञाते । तथा यैर्निजान्यावात्मपरौ नादृक्षातां बलाद्यवलेपान्धतया स्व[3]मात्रां परमात्रां च ये नाजानन्नित्यर्थः । अत एवानेन लक्ष्मीः प्रसभानुग्रह-परा साक्षाद्दर्शिषीष्ट दृश्यताम् । तथा सा प्रसिद्धा ब्रह्मकन्यापि सर-स्वती च तुष्टा सा[4]क्षाद्दृक्षीष्ट । तथा धर्मश्चानुग्राहिषीष्टानुकूलाचरणेना-नुगृह्यताम् । तथेन्द्रे शक्रविषये मैत्री च[5]ैव ग्रहीषीष्टाङ्गीक्रियतामिति ॥

उदपादि । इत्यत्र[6] "जिच्ते°" [६६] इत्यादिना जिच्तलुक ॥

अत्यदीपि अदीपिष्ट । अजनि अजनिष्ट । अबोधि व्यबुद्ध । अपूरि अपूरिष्ट । अतायि अतायिष्ट । अप्यायि अप्यायिष्ट । इत्यत्र "दीपजन°" [६७] इत्यादिना[7] वा जिच्तर्लुक[8] ॥

व्यजृम्भि । अभाजि । इत्यत्र "भाव°" [६८] इत्यादिना जिच्तलुक ॥

चायिष्यते चेष्यते[9] । आचायिषाताम् आचेषाताम् । चायिषीष्ट चेषीष्ट । चायिता चेता । ग्राहिष्यन्ते विग्रहीष्यन्ते । न्यग्राहिषाताम् अवाग्रहीषाताम् । अनुग्रा-हिषीष्ट[10] ग्रहीषीष्ट । ग्राहिता ग्रहीता । दर्शिष्यते द्रक्ष्यते । अदर्शिषाताम् अदृक्षाताम् । दर्शिषीष्ट दृक्षीष्ट । दर्शिता द्रष्टा । घानिष्यन्ते नि[11]र्हंणिष्यन्ते[12] । आघानिषाताम् आहसाताम् । घानिषीरन् । घानिता हन्ता । इत्यत्र "स्वरग्रह°" [६९] इत्यादिना वा जिट् ॥ हन्तेस्त्वाशिषि विकल्पोदाहरणं स्वयं ज्ञेयम् ॥

१ बी °घग्रहा°. २ डी °ण्यार्थे ध°. ३ डी स्वमन्यं च. ४ डी सादृक्षी°. ५ सी डी च गृही°. ६ बी °त्र "निच्ते°. ७ बी °ना जि°. ८ ई °लुक् वा ॥ व्य°. ९ सी डी °ते । अचा°. १० ए °ष्ट ग्राही°. ११ सी डी निर्हिंणि°. १२ बी ई °न्ते । अघा°.

राज्ञोनेनाशय्यत क्रीडताङ्के दत्त्वा सार्धं दीव्यतां स्माति चैषः ।
प्रासादाग्रेष्वभ्रमद्भ्रासमानः स्प्रष्टुं सोग्रे भ्राम्यतो भ्रास्यमानान्
॥ ९ ॥

९. अनेन भीमेन क्रीडता राज्ञो दुर्लभस्याङ्क उत्सङ्गेशय्यतातिवल्लभत्वात्सुप्तम् । तथैष भीम उदारप्रकृतित्वात्सार्धं दीव्यतां राजबालकानां दत्त्वाम्रफलादि भक्षयति स्म च । तथा स भीमो भ्रासमानो रूपवेषादिना शोभमानो भ्रास्यमानानग्रे भीमाग्रे भ्राम्यतः केल्या गच्छतो राजकुमारकान्स्प्रष्टुं छोप्तुं प्रासादाग्रेष्वभ्रमत् । जातिरलंकारः॥

कण्ठे निष्कः क्राम्यतो भ्लास्यमान-
स्यास्य क्रामन्[1]भ्लासते स्मात्रुटच्छ्रीः ।
धन्वात्रुट्यत्कान्ति संक्षिप्य दत्तं
मन्ये सख्यं ल[2]ष्यताखण्डलेन ॥ १० ॥

१०. [1]भ्लास्यमानस्य रूपादिना शोभमानस्यास्य भीमस्य कण्ठेत्रुटच्छ्रीरनेकवर्णमणिखचितत्वेन संपूर्णशोभो निष्कः कण्ठालंकारो भ्लासते स्म । कीदृक्सन् । क्रामंश्चलन् । यतः किंभूतस्यास्य [2]क्राम्यतो बालत्वेन चपलस्वभावत्वादितस्ततश्चलतः । सश्रीकत्वाद्द्वितीयेन्दुवक्रत्वाच्चोत्प्रेक्षते कविः । मन्ये सख्यमनेन सह मैत्रीं [3]लष्यतेच्छताखण्डलेनेन्द्रेणात्रुट्यत्कान्ति अखण्डत्वेन सश्रीकं धन्व धनुः संक्षिप्य लघूकृत्य दत्तमर्थादस्मै ॥

द्राक्संयस्यत्यश्वशालाप्लवङ्गे त्रस्यद्घस्यत्क्लाम्यदन्यार्भकेषु ।
नैषोक्लामन्नात्रसन्नायसच्च द्रष्टुं केल्यासंयसंश्चालषत्तम् ॥ ११ ॥

११. अश्वशालाप्लवङ्गेश्वशाला[4]यां यः प्लवङ्गोश्वानां चक्षुर्दोषाभावाय

१ सी डी °मद्भ्लास°. २ ए लक्ष्यता°.

१ बी सी भ्लासमा°. २ ए बी क्रामतो. ३ ए लक्ष्यते. ४ ई °यां प्लु°.

वानरस्तस्मिन्संयस्यति बालकाभिमुखधावनार्थमुद्यच्छति सति द्राक् त्रस्यन्तो बिभ्यतोत एव यस्यन्त आत्मरक्षायै प्रयतमानास्तथा क्लाम्यन्तो दीनीभवन्तोन्ये भीमाद्व्यतिरिक्ता येर्भकास्तेषु तथा सत्स्वेष भीमो नात्रसत् । अत एव नाक्लामन्नायसच्च किं त्वसंयैसन्नप्रयत्नवान्सैन्केल्या कौतुकेन तं प्लवङ्गं द्रष्टुमलषदैच्छत् ॥

अशक्यत । इत्यत्र "क्यः शिति" [७०] इति क्यः ॥

क्रीडता । इत्यत्र "कर्तरि°" [७१] इत्यादिना शव् ॥ अनद्य इति किम् । अत्ति ॥

दीव्यताम् । अत्र "दिवादेः श्यः" [७२] इति श्यः ॥

भ्राम्यमानान् भ्रासमानः । भ्लास्यमानस्य भ्लासते । भ्राम्यतः अभ्रमत् । क्राम्यतः क्रामन् । क्लाम्यत् अक्लामत् । त्रस्यत् अत्रसत् । अत्रुट्यत् अत्रुटत् । लर्ष्यता अलषत् । यस्यत् । अयसत् । संयस्यति असंयसन् । इत्यत्र "भ्रास-भ्लास°" [७३] इत्यादिना वा श्यः ॥

कुष्यत्कूर्चः कुष्यमाणावतंसोरज्यद्राजारज्यतामात्यवर्गः ।
संसिन्वानेङ्केन तस्मिन्प्रसुन्वन्हर्षं कान्त्वा नानुरागो निराक्ष्णोत् ॥ १२ ॥

१२. तस्मिन्भीमेङ्केनोत्सङ्गेन सह संसिन्वाने संबद्धी भवति राजा दुर्लभोरज्यद्रजद्रागयुक्तं राजानमकरोद्भीमः । प्रेमवशादनायासेन राज्ञो रञ्जितत्वात्प्रयोक्ता विवक्ष्यते नामुं भीमोरजत्किं तु स्वयमेवारज्यत्तथामात्यवर्गश्चारज्यत स्वयमेव रागयुक्तोभूत् । कीदृक्सन् । कुष्यत्कूर्चः कुष्णात्याकर्षति बालस्वभावेन कूर्चं भीमः । प्रयोक्ता विवक्ष्यते नामुं

१ ए सी °नेकेन.

१ डी °माद्यति°. २ ए बी सी डी °क्लाम्यन्ना°. ३ बी °यसन्न°. ४ ई °न्स-केल्या°. ५ सी °ना सिव्. ६ ए बी शच् ॥. ७ बी सी °वादे श्यः. ८ बी °ष्यत अ°. ९ ए °ने सह सं°. १० सी °युकरा°.

भीमः कुष्णाति किं तु स्वयमेव[1] कुष्यति शतरि कुष्यन्स्वयमेवाकृष्यमाणः कूर्चो[2] दाढिका[3] यस्य सः । तथा कुष्यमाणावतंसः स्वयमाकृष्यमाणमूर्धमाल्यः । कूर्चेवतंसे चाङ्कस्थेन भीमेनाकृष्यमाणे राजामात्याश्च हर्षेण रञ्जिता इत्यर्थः । वा यद्वा तस्मिन्नङ्केन संसिन्वाने हर्षं प्रसुन्वन्संदधानो वर्धयन्नित्यर्थः । अनुरागस्तद्विषय आन्तरस्नेहः कान्न निराक्ष्णोन्न व्याप्नोत्किं तु सर्वानपी[4]त्यर्थः ॥

अक्षन्प्रौढिं सोथ शृङ्गाण्यतक्ष्णोक्रीडैणानामभ्यतक्षन्नखांश्च ।
चापेस्तभ्नाच्चैष पूर्वां दृशं चास्तभ्नोत्स्तुभ्नोति[1] स्म नोच्चैर्गुरौ स्वम् ॥ १३ ॥

१३. अथ प्रौढिं शरीरोपचयमक्षन्व्याप्नुवन्स भीमश्चलं[5]लक्ष्य[6]व्यधनाभ्यासाद्यर्थं मृगयाचिकीर्षया क्रीडैणानां हस्तलेयमृगाणां शृङ्गाण्यतक्ष्णोच्छिच्छेद[7] नखांश्च खुराग्रभागांश्चाभ्यतक्षत् । शृङ्गच्छेदे ह्येषां शरीरे कार्ष्ण्यं न स्यात् । मृगीसादृश्यं च स्यात्ततो मृग्य एता इति[8] ता नारण्यमृगा अभिसरन्ति । वर्धितनखच्छेदे त्वेषामस्खलिता गतिः स्यादिति मृगयार्थिनो हस्तलेयकृष्णसारमृगाणां शृङ्गाणि नखांश्च छिन्दन्तीति स्थितिः । तथैष भीमश्चलं[9]लक्ष्यमृगादि[10]वधार्थं[11] चाप उपचाराद्धनुर्ग्रहविषये पूर्वां[12] च कलाचिकां चास्तभ्नान्निश्चल्यकरोद्दृशं चास्तभ्नोन्निश्चलां स्थापितवान् । एतदपि कुत इत्याह । यतो गुरौ विद्याचार्य उच्चैरत्यन्तं स्वमात्मानं[13] न स्तुभ्नोति स्म न स्तब्धं चक्रे विनीतोभूदित्यर्थः । यद्वा प्रौढिमक्षन्स भीमः क्रीडैणानां[14] शृङ्गाणि नखांश्च

१ ए सी डी चास्तुभ्नो°.

१ ई °मे कु°. २ ए कूचो दा°. ३ ए दाडिका. ४ सी डी °र्वान्नपी°. ५ ई °लल्लक्ष्य°. ६ बी °लक्षव्य°. ७ सी डी °तक्ष्यत । शृ°. ८ ए सी °ति ना°. ९ ए °लक्षमृ°. १० सी डी ई °दिव्यधा°. ११ सी °धार्थे चा°. १२ बी सी डी °र्वां क°. १३ सी °नं ते स्तु°. १४ डी क्रीडेणा°.

बाणैश्चिच्छेद यत एष चापे पूर्वां दृशं च निश्चली चक्रे । एतदपि कुत इत्याह । यतो गुरौ स्वं न स्तब्धं चक्रे गुरौ विनयेन धनुर्वेदोक्तकलाचिकादृढस्थापनादौ सदभ्यस्तत्वाद्दयालुत्वाच्च क्रीडामृगशृङ्गादि सूक्ष्मं क्रीडामृगनखादि सूक्ष्मतरं च निर्जीवमेव चलमपि लक्ष्यमसौ शरैर्विव्याधेत्यर्थः ॥

इष्वास्तुभ्नाद्वेध्यमुर्व्या सहासावस्कभ्नोच्च स्कभ्नतो मल्लयुद्धे ।
अस्कुभ्नात्तं स्कुभ्नुवानं च नान्यः स्कुन्वानेनानेन नैवास्कुनाच्च ॥ १४ ॥

१४. असौ भीम इष्वा बाणेन कृत्वोर्व्या सह वेध्यं लक्ष्यमस्तुभ्नान्निश्चलयकरोत् । महाबलत्वाद्वेध्यं भूमिं च युगपद्भिन्नवानित्यर्थः । तथा मल्लयुद्धे स्कभ्नतः पाशबन्धादिना बध्नतो मल्लानस्कभ्नोच्च । न च न पुनस्तं भीमं स्कुभ्नुवानं बध्नन्तमन्यो मल्लोऽस्कुभ्नात् । तथा स्कुन्वानेन पादादिना लवणगोण्यादिमहाभारमुद्धरमाणेनानेन भीमेन सहान्यो नैवास्कुनाच्च नैवोद्धृतवांस्तस्मादन्यस्य सर्वस्याप्यबलत्वात् ॥

कुष्यत् कुष्यमाण । अरज्यत् अरज्यत । इत्यत्र "कुषिरञ्जेः° [७४] इत्यादिना वा परस्मैपदं तत्सन्नियोगे श्यश्च ॥

प्रसुन्वन् । संसिन्वाने । अत्र "स्वादेः श्नुः" [७५] इति श्नुः ॥

निराक्ष्णोत् अक्ष्नन् । इत्यत्र "वाक्षः" [७६] इति वा श्नुः ॥

अतक्ष्णोत् अभ्यतक्षत् । इत्यत्र "तक्षः स्वार्थे वा" [७७] इति वा श्नुः ॥

अस्तभ्नात् अस्तभ्नोत् । अस्तुभ्नात् स्तुभ्नोति । स्कभ्नतः अस्कभ्नोत् ।

१ सी डी स्कुभ्नाने°. २ ई °नेमाने°.

१ सी डी स्वं स्तब्धं न च°. २ डी °गन°. ३ बी लक्ष्म°. ४ ए लक्ष्म°. ५ सी डी नपु°. ६ बी स्कुभ्नवा°. ७ ए °त् । अथा. ८ सी डी स्कुभ्नाने°. ९ ए °श्च ॥ असु° १० ए अस्तुभ्नोत् । अस्तुभ्ना°.

अस्कुभ्नात् स्कुभुवानम्। अस्कुनात् स्कुन्वानेन। इत्यत्र "स्तम्भू°" [७८] इत्यादिना श्ना श्नुश्च ॥

क्रीणन्प्रीणन्स्वैर्गुणैः क्ष्मां गृहाणारींस्तेजोभिर्भृज्जमानस्तुदंस्त्वम् ।
तीर्थं रुन्धे कर्मपाशान्भनज्मीत्यूचे राज्ञा सोथ कुर्वन्सदाज्ञाम् ॥१५॥

१५. अथ सदाज्ञां कुर्वन्स भीमो राज्ञा दुर्लभेनोचे। कथमित्याह। हे भीम क्ष्मां गृहाणाङ्गीकुरु। कीदृक्सन्। स्वैर्निजैर्गुणैः शौर्यन्यायादिभिः कृत्वा क्ष्मां प्रीणन्नत एव क्रीणन्वशीकुर्वंस्तथारींस्तेजोभिः प्रतापैर्भृज्जमानः सन्तापयन्नत एव तुदन्पीडयन्। अहं तु तीर्थं रुन्ध आवृणोमि सेव इत्यर्थः। तथा तीव्रतपोनुष्ठानात्कर्मपाशान्मोहनीयादिकर्मबन्धनानि भनज्मि त्रोटयामीति ॥

व्यातन्वानोश्रूण्यमन्वान एतन्नम्रो भक्त्येत्यब्रवीद्राजपुत्रः।
तातासर्जि स्रक्ष्यते सृज्यतेन्यां सर्वां भक्तिं न त्विदं ते जनोयम्
॥ १६ ॥

१६. राजपुत्रो भीम इत्यब्रवीत्। कीदृक्सन्। अश्रूणि नेत्रजलानि व्यातन्वानो समाधिना विस्तारयंस्तथैतद्राजोक्तममन्वानोप्रतीच्छंस्तथा भक्त्या नम्रः। यदब्रवीत्तदाह। हे तातायं मल्लक्षणो जनस्ते तवान्यां सर्वां भक्तिमसर्ज्यकार्षीत्स्रक्ष्यते करिष्यति सृज्यते करोति च। न तु न पुनरिदं क्ष्माग्रहणमसर्जि स्रक्ष्यते सृज्यते च ॥

क्रीणन्। प्रीणन्। इत्यत्र "क्र्यादेः" [७९] इति श्ना ॥

गृहाण। इत्यत्र "व्यञ्जनाद्°" [८०] इत्यादिना श्नायुक्तस्य हेः स्थान आनः ॥

---

१ ए क्रीडन्प्री°. २ ए भक्तेत्य°. ३ ए बी °ते स्रज्य°.

---

१ ए °त्र "सम्भू°. २ ए क्रीडन्व°. ३ ए आदृणो° ४ ए °शामोह°. ५ बी भजन्मि त्रो°. ६ ई °वार्थां स°. ७ ए क्रीडन्।.

तुदन् । मृज्जमानः । अत्र "तुदादेः शः" [८१] इति शः ॥

रुन्धे । भनज्मि । इत्यत्र "रुधाम्॰" [८२] इत्यादिना स्वरात्परः श्नः । प्रकृतिनस्य च लुगन्वाचीयते ॥

कुर्वन् । व्यातन्वानः । अमन्वानः । अत्र "कृग्॰" [८३] इत्यादिना-उः ॥

असर्जि । सृज्यते । स्रक्ष्यतेयं भक्तिम् । अत्र "सृजः॰" [८४] इत्यादिना कर्तरि ञिक्यात्मनेपदानि ॥

एतेन क्ष्मां गृहाणेति राज्ञा यदुक्तं तन्निषिध्य[1] तीर्थं रुन्धे कर्मपाशान्भनज्मीत्यनेन तपोङ्गीकरणं यत्सूचितं तत्फलं राज्येप्युपपत्त्या दर्शयंस्तपोङ्गीकरणं[3] वृत्तद्वयेन निषेधन्नाह ।

ये तप्यन्ते तत्तपस्तेपिरे वा तान्पातस्तेकारि तीव्रं तपो हि ।
कारिष्यन्ते सिद्धयोथ क्रियन्तेपाचि श्रेयः पच्यते पक्ष्यते वा ॥ १७ ॥

१७. हे राजंस्तत्तीर्थसेवातीव्रत्वादिना प्रसिद्धं तपो व्रतं ये तपस्विनस्तप्यन्ते कुर्वन्ति तेपिरे वा चक्रुर्वा । उपलक्षणत्वात्तप्स्यन्ते वा तान्पातो रक्षतस्ते[4] तव । हि यस्मात्तीव्रं तपोकारि अकार्षीस्तीव्रं तपस्त्वम् । अनायाससाध्यत्वात्प्रयोक्त्रैवं विवक्षितवानयमकार्षीत्किं त्वकारि तपः स्वयमेव । तपस्विरक्षकत्वेन तत्तपोविभागित्वात्ते स्वयमेव तपो निष्पन्नमित्यर्थः । तस्मात्सिद्धयो मनोरथपरिपूर्तयस्तव कारिष्यन्ते करिष्यसि त्वं सिद्धीः । कारिष्यन्ते सिद्धयः स्वयमेव । निष्पत्स्यन्ते स्वयमेवेत्यर्थः । अथ तथा सिद्धयः क्रियन्ते स्वयमेव निष्पद्यमानाः सन्तीत्यर्थः । उपलक्षणत्वात्स्वयमेव निष्पन्नाश्च । वाथ वा युक्तमेवैतद्यत्सिद्धयः[6] कारिष्यन्ते क्रियन्तेकारिषत[7] चेति । यतस्तव श्रेयस्तपोजनितं पुण्यमपाचि अपाक्षीः श्रेयस्त्वम् । अपाचि श्रेयः स्वयमेव स्वयं परि-

---

१ ए °न्वादीय°. २ ए °ध्य तर्थं. ३ ई °ङ्गीकारं वृ°. ४ बी सी डी °भयत्रा°. ५ सी डी रक्ष्यत°. ६ ई °मेवेत°. ७ सी° रिष्यत, डी °रिष्यन्त चे°.

पक्वम्। एवं[1] पच्यते पक्ष्यते च। कृतं क्रियमाणं करिष्यमाणं च श्रेयस्तवाभीष्टफलदानोन्मुखमभूद्वर्तते भविष्यति चेत्यर्थः। एतेन सर्वेण राज्ञस्तपोङ्गीकारो निषिद्धः॥

तद्वद्दुग्धे गौस्तवासौ वसूनि स्वामिन्यद्वद्वेनसूनोरदुग्ध।
हृद्द्विड्[1]लोकोपक्त ते क्षत्रवृत्त्या नो वारुद्धामुत्र लोकः किमेतत्॥१८॥

१८. यद्वद्यथा वेनसूनोः पृथुराजस्य गौः पृथ्वी वसूनि[2] रत्नानि द्रव्याणि वादुग्धाधुक्षद्[3]दुग्ध वा गां वसूनि वेनसूनुः[4]। स एवं विवक्षितवान्नाहं गामधुक्षि किंत्वदुग्ध[5] गौः स्वयमेव न्यायपालनेन महर्द्धिकत्वात्स्वयमेव क्षरितवती तद्वत्तथा हे स्वामिंस्तवासौ गौर्वसूनि दुग्धे स्वयमेव क्षरति। तथा ते तव क्षत्रवृत्त्याभङ्गशौर्यादिना क्षत्रियाचारेण कृत्वा द्विड्लोको हृद्धृदयमपक्त। पचिरत्र द्विकर्मकोन्तर्भूतण्यर्थो वा। अपाक्षीत्क्षत्रवृत्तिर्द्विड्लोकं हृत्। प्रयोक्त्रैवं विवक्ष्यते नेयमपाक्षीत्किं तु द्विड्लोको हृत्स्वयमेवापक्त स्वयं[6] संतापितवानित्यर्थः। नो वा न च क्षत्रवृत्त्या[7] कृत्वा तेमुत्र लोकः परलोकोरुद्धं[8] नारौत्सीन्नारुधर्द्वा। निवर्तमानं[9] न न्यवीवृतत्क्षत्रवृत्तिरमुत्र लोकं[10] नो वारुद्ध स्वयमेव। तस्मात्किं किमर्थमेतद्राज्यत्यागेन तपोग्रहणम्। तपोग्रहणं हि निःसपत्नमहर्द्धिकभूमिस्वामित्वरूपेहलोकफलार्थं स्वर्गापवर्गादिपरलोकफलार्थं च क्रियते। तच्च तव सर्वं राज्यस्थस्याप्यप्रतिहतमस्ति तस्मात्किमनेन तपोग्रहणेनेत्यर्थः॥

ये तपस्तप्यन्ते। तेपिरे। अत्र "तपेः°" [८५] इत्यादिना कर्तरि ञिक्यात्मनेपदानि॥

---

१ सी °ड्लोक्योप°.

---

१ सी डी एव प°. २ सी डी °नि द्रव्याणि रत्नानि वा°. ३ सी डी °दधुग्ध. ४ सी °सूनुः स एवं वि किं त्वदु°. ए सूनुरदु°. ५ ई °दुग्ध गौः. ६ बी °यं हृदयं सं°. ७ सी °द्ध नोरौ°. ८ ई °द्वाऽनि°. ९ बी °नं मन्य°. १० सी °कं नावा°.

अकारि तपः । क्रियन्ते कारिष्यन्ते सिद्धयः । अत्र 'एकधातौ°" [८६] इत्यादिना जिक्यात्मनेपदानि ॥

भेयोपाधि । पच्यते । पक्ष्यते । अपक्त द्विड्लोको हर्तुं । दुग्धे । अदुग्ध गौर्वसूनि । इत्यत्र "पचिदुहेः" [८७] इति जिक्यात्मनेपदानि ॥

अपक्त द्विड्लोको हन्तुं । अदुग्ध गौर्वसूनि । इत्यत्र "न कर्मणा जिच्" [८८] इति न जिच् ॥

नो वारुद्धामुत्र लोकः । अत्र "रुधः" [८९] इति न जिच् ॥

अथ भीमो राज्ये स्वमनधिकारिणमेवाह ।

को वाकारि व्याकृतेति स्मृतिः का पुत्रे राज्यं यत्सति भ्रातरीशे ।
मैवं कार्षीर्गौरदुग्ध स्वयं चेद्दुग्धानर्हे सा हि नादोहि तात ॥१९॥

१९. हे तात भ्रातरीशे राज्यधुराधरणक्षमे सति विद्यमाने यत्पुत्रे राज्यं भवतीत्येवंविधा स्मृतिः का व्याकृत । व्याकार्षीदप्रकटदेवंविधां स्मृतिं स्मृतिकारः । प्रयोक्त्रैवं विवक्ष्यते नायं व्याकार्षीत्किं त्विति स्मृतिः स्वयं व्याकृत । न काप्येवंविधा स्मृतिः प्रकाशते स्मेत्यर्थः । वा यद्वा भ्रातरीशे सति कः पूर्वो नृपः । इतिरत्रापि योज्यः । इतीदृशस्त्वत्सदृशः पुत्रे राज्यस्य स्थापयितेत्यर्थः । अकारि अकार्षीदित्येवंविधं पुत्राय राज्यस्य दातारं कश्चिदमात्यादिरुपदेशदानादिना । स एवं विवक्षितवानाहमकार्षं किं त्विति स्वयमेवायमकारि भ्रातरि समर्थे सति पुत्राय राज्यस्य दाता त्वमिव न कोपि पूर्वनृपोभूदित्यर्थः । एतेनात्मनो राज्यानर्हत्वमुक्तम् । तस्मादेवमिदं मह्यं राज्यसमर्पणं मा कार्षीः । नन्वेवं कृते को दोष इत्याशङ्क्य दृष्टान्तोपदर्शनद्वारेण दोषमुद्भावयति ।

---

१ बी °शे । मेवं.

---

१ ए °द । अ°. २ ई °विकरण°. ३ सी डी °णमाह°. ४ ई °र्षीदेवं°.

गौरित्यादि । हि यस्माद्धेतोर्दुग्धानर्हे उदररोगादिदोषेण दुग्धपानायोग्यवत्सादिनिमित्तं निमित्तसप्तमीयम् । चेद्यद्यपि गौर्धेनुः स्वयमदुग्धाधुक्षदक्षारयद्वां वत्स एवं न । किं तु स्वयमदुग्ध वत्सस्नेहादिना स्वयं क्षरितवतीत्यर्थस्तथापि सा गौर्नादोहि पूर्ववत्कर्मकर्तृत्वाविवक्षायां तत्त्वतो न स्वयं क्षरितवती यदर्थमदुग्ध तस्यायोग्यत्वात् । एवं भ्रातरि समर्थे सति राज्यानर्हाय मह्यं राज्यं दत्तमप्यदत्तमित्यर्थः ॥

व्याकृत अकारि । अदुग्ध अदोहि । इत्यत्र "स्वरदुहो वा" [९०] इति वा ञिच्[2] ॥

राज्ञाथोक्तो नागराजोप्यतप्तोचे च ज्येष्ठो यत्तपोतप्त पार्थः ।
नो राज्यायातप्त केनापि पश्चाद्भ्रात्रायं तत्किं जनोद्यान्वतप्त ॥२०॥

२०. अथ भीमोक्त्यनन्तरं राज्ञा दुर्लभेनोक्तो राज्याङ्गीकाराय भणितो नागराजोप्यास्तां भीम इत्यप्यर्थोतप्त राजा नागराजमताप्सीदेवं न । किं तु स्वयमेवातप्तासमाधिना संतप्तस्तथोचे च । किमित्याह । यदिति यदार्थे । यदा ज्येष्ठः पार्थो युधिष्ठिरस्तपो व्रतमतप्ताकार्षीत्तदा पश्चात्केनापि भ्रात्रा भीमादिना राज्याय नो अतप्त नात्यन्तमुत्कण्ठितं किं तु सर्वैरपि तपश्चरितमित्यर्थः । तत्तस्माद्धेतोरयं जनो मल्लक्षणोद्य सांप्रतं भ्रात्रा दुर्लभेन किमन्वतप्त[3] किमिति राज्यभारारोपेणानुताप्यते स्म । एतेनाहं राज्यं नाङ्गीकरिष्ये किं तु भ्रात्रा सह तपोनुचरिष्यामीत्युक्तम् ॥

कर्मकर्तरि । नागराजोप्यतप्त ॥ कर्तरि । अतप्त तपः पार्थः ॥ भावे । केनापि नो अतप्त ॥ कर्मणि । अन्वतप्तायं भ्रात्रा । अत्र "तपः कर्तृ°" [९१] इत्यादिना न ञिच् ॥

१ डी °यमेवादु°. २ बी सी ञिच् ॥. ३ सी डी °प्तमि°. ४ ई रोपणादनु°. ५ ए बी °त्रा । त°.

नेत्यचीकरत न व्यकृतायं नोदशिश्रियत किं तु तदाभ्याम् ।
अभ्यषेचि स विनीय सुतः प्रास्नोष्ट खं कुसुमवर्षणतश्च ॥ २१ ॥

२१. अयं नागराज इति पूर्वोक्तप्रकारेण नाचीकरत नाकार्षीदिति प्रकार इमं राजानं प्रयोक्तैवं विवक्ष्यते नायं नाकार्षीत्किं तु नाकार्ययं स्वयमेव तं स्वयमक्रियमाणमिति प्रकारः । प्रायुंक्त[1] णिगि नाचीकरदिति प्रकार इमं राजानं पुनः प्रयोक्तैवं[2] विवक्षते[3] एवं न किं त्विति नाचीकरतायं स्वयमेव । यद्वा नाकार्षीदिति प्रकार इमं राजानं तमकृतवन्तं दुर्लभः प्रायुंक्त[4] णिगि नाचीकरदिति प्रकारेणेमं राजानं दुर्लभः स एवं विवक्षितवान्नाहं[5] नाचीकरं न चेति प्रकारो नाकार्षीत्किं त्विति नाचीकरतायं स्वयमेवोक्तरीत्यायं स्वयमेव राजा नाभूदित्यर्थः । राज्य[6]-दानप्रस्तावादत्र राजेति गम्यते । तथेत्युक्तप्रकारेणायं न व्यकृत विकरोतिर्वल्गनेन्तर्भूतण्यर्थः कर्मस्थक्रियः न व्यकार्षीन्न विकृत्य(त्या?)-कार्षीदिति प्रकार इममेवं न किं तु न व्यकृतायं स्वयमेवोक्तरीत्या राज्यादिवाञ्छोत्थविकारवान्नाभूदित्यर्थः । तथेति नोदशिश्रियत नोदशिश्रियं[7]नोद्धत्य(त्या)कार्षीदिति प्रकार इममेवं न किं तु नोदशिश्रियतायं स्वयमेव । उक्तरीत्या बृहद्भ्रातुरुचितप्रतिपत्तिकरणान्नोद्धतोभूदित्यर्थः । किं तु तदाभ्यां दुर्लभनागराजाभ्यां स सुतो भीमो विनीय मधुरा-[8]लापशिक्षया संबोध्याभ्यषेचि राज्येभिषिक्तः । तथा खं व्योम कुसुमवर्षणतः पुष्पवर्षात्प्रास्नोष्ट[9] च । अन्तर्भूतण्यर्थत्वात्सकर्मकत्वे प्रास्नावीत्कुसुमवर्षणं कर्तृ खं कर्म । एवं न किंतु प्रास्नोष्ट च खं स्वयमेव । देवताप्रभावात्पुष्पवर्षेण क्षरितं चेत्यर्थः । चस्तुल्ययोगितार्थः । यदैवं[10] सोभ्यषेचि

---

१ बी ई °युक्त णि° २ बी °योक्रैवं. ३ बी सी डी °वक्ष्यते. ४ बी ई °युक्त णि°. ५ बी °वान्नहं. ६ सी डी °ज्यप्रदा°. ७ ए सी डी ई °यन्नोद्ध°. ८ ए °लापायशि°. ९ बी सी °त्प्राश्नोष्ट. १० डी °व स ताभ्यामभ्य°.

तदैव कुसुमवर्षणतः खं प्राक्नोष्टेत्यर्थः । एतेनास्य राज्याभिषेके[1]ऽतिशुभनिमित्तोक्तिः ॥

णि । नाव्यीकरतायम् ॥ स्नु[2] । प्रास्नोष्ट खम् ॥ श्रि । नोदशिश्रियतायम् ॥ आत्मनेपदाकर्मक । न व्यकृतायम् । अत्र "णिस्नु°" [९२] इत्यादिना न ञिच् ॥

राट्तथालमकृताभिनवः सोलंकरिष्यत इतो न यथान्यः ।
स्वःपुरे पुनरबूभुषताद्योथानुजः सममलंकुरुते स्म ॥ २२ ॥

२२. सोभिनवो राट्[3] राजा भीमस्तथालमकृतालमकार्षीत् । तथा प्रकारः । तमेवं नालमकृत स स्वयमेव राज्यश्रिया तथा रेज इत्यर्थः । यथेतो भीमादन्योपरोभिनवोराड्नालंकरिष्यते नालंकरिष्यत्यन्यं यथा प्रकार एवं[4] न नालंकरिष्यतेन्यः स्वयमेव न शोभिष्यत इत्यर्थः । उपलक्षणत्वाद्यथान्यो[5] न शुशुभे न शोभते च । सर्वराजोत्कृष्टो राजाभूदित्यर्थः । तथाद्यः[6] पूर्वो राट् पुनर्दुर्लभः[7] स्वःपुरे स्वर्गनगरेबूभुर्षत[8] । आद्यराजं[9] स्वःपुरं कर्त्रबूभुषत्स्वमहर्द्ध्यालमकार्षीदेवं न स्वयमेवाबूभुर्षत[10] रेज इत्यर्थः । अथ तथानुजो नागराजः[11] स्वःपुरे समं सहालंकुरुते स्म । कर्मकर्तृविवक्षा पूर्ववत् । दुर्लभनागराजौ स्वर्गे महर्द्धिकौ देवौ सहचरावभूतामित्यर्थः ॥

स्मात्र भूमिभुजि भूषयते भूर्भूषयिष्यत इवाधिबलि द्यौः ।
कीर्तिरत्र च[1] जयिन्यचिकीर्षिष्ट स्म चाम्बुधि चिकीर्षत ऋद्धिः ॥ २३ ॥

२३. अधिबलि बलिदैत्ये रक्षक[12]त्वेनाधारे रक्ष्यत्वेनाधेया द्यौः

१ प सी जयन्य°.

१ सी डी °केशु°. २ डी स्नु । प्रस्नो°. ३ बी राजमी°. ४ बी सी डी °वं ना°. ५ प °न्योन्यशु° ६ सी डी तदाद्यः. ७ बी °भः स्वपु°. ८ सी डी °षत् । आ°. ९ सी °जं स्वपु°. १० डी °षत् रे°. ११ सी °जः स्वपु°. १२ प रक्षावे°.

स्वर्गो यथा भूषयिष्यते । बलिरिन्द्रो भविष्यतीति प्रसिद्धेर्भूषयिष्यति द्यां बलिरेवं न । स्वयमेव भूषयिष्यते द्यौर्बलेः सुप्रभुत्वाच्छोभिष्यत इत्यर्थः । तथात्र भूमिभुजि भीमे न्यायरक्षकत्वेनाधारे वर्तमाना भूर्भूषयते स्म । कर्मकर्तृविवक्षा प्राग्वत् । अत एवात्र भूमिभुजि सति जयिनी सर्वकीर्त्युत्कृष्टत्वेन विजयमाना कीर्तिश्चैतद्दानपुण्यकृता ख्यातिश्चाम्बुधि समुद्रमभिव्याप्याचिकीर्षिष्ट[1] । अचिकीर्षीदयं कीर्ति-मेवं न । किं त्वचिकीर्षिष्ट कीर्तिः स्वयं भवितुमैषीद्विस्तृतेत्यर्थः । तथा[2] ऋद्धिश्चैतदीया भूसैन्यादिसंपच्चाम्बुधि[3] चिकीर्षते स्म । पूर्ववत्कर्मकर्तृ-विवक्षा ॥

यद्व्यकीर्ष्ट सुयशोस्य चिकीर्षिष्यन्त आद्यचरितानि तदुच्चैः ।
अञ्जसा रिपुगणश्च चिकीर्षीष्टेति तत्र किरते स्म नृणां वाक् ॥२४॥

२४. तत्र भीमविषये नृणां वाकिरते[4] स्म । किरन्ति स्म वाचं नर एवं न । किं तु स्वयमेव किरते स्म प्रससारेत्यर्थः । किंभूता । यद्यस्माद्धेतोरस्य भीमस्य सुयशः पराक्रमकृता ख्यातिर्व्यकीर्ष्ट । व्यकारीत्सुयशोयमेवं न । किं तु स्वयं[5] व्यकीर्ष्ट सुयशः सर्वत्रेतस्ततो गतमित्यर्थः । तत्तस्मादुच्चैरतिशयितान्याद्यानां पूर्वेषां रामचन्द्रादीनां च-रितानि दैत्योच्छेदसर्वदिग्जयादीनि[6][7] चरित्राण्यस्य चिकीर्षिष्यन्ते । चिकी-र्षिष्यत्याद्यचरितान्ययमेवं न । किं तु स्वयमेवाद्यचरितान्यस्य चिकीर्षि-ष्यन्ते भवितुं वाञ्छिष्यन्ति । यशोविस्तारादयं रामचन्द्रादिपूर्वनृपतुल्यो भविष्यतीत्यर्थः । इत्येवंविधा । अग्रेतन इतिरत्रापि योज्यः । तथास्य रिपुगणोञ्जसा सामस्त्येन चिकीर्षीष्ट । चिकीर्याद्विक्षिप्योद्धिस्याद्रिपु-

१ ए °र्षिष्ट कीर्तिः. २ ए °था ऋद्धिश्चै°. ३ ए °म्बुद्धि चि° बी °म्बुधिं चि°. ४ बी वाकिर°. ५ ए °यं वाकी°. ६ ए °त्यो सर्वच्छे°. ७ ए °दिग्गया°. ८ सी °ष्यन्ते भवितुं वाञ्छिष्यन्ति ।. ९ डी °प्याद्रि°.

गणमयमेवं[1] न। किं तु स्वयमेव चिकीर्षीष्ट स्वयमेव विक्षेपविषयो
भूयादित्येवंविधा[3] च। एतेनात्यन्तं जनानुरागोक्तिः॥

यद्यगीर्ष्ट गिरते परिगीर्षीष्टेत्यकारयत सिन्धुषु नीतिः।

न प्रजासु पुनरुच्छ्रयते स्मास्मिन्कलिर्विकुरुते स्म न चापि॥२५॥

२५. अस्मिन्भीमे राज्ञि सत्यगीर्ष्ट। अगारीन्महामत्स्यो मत्स्यान्तरमेवं न। किं त्वगीर्ष्ट स्वयमेव प्रकरणान्मत्स्यः स्वयमेव गलविवरेणाधो गतः। तथा गिरते[4] तथा परिगीर्षीष्ट। उभयत्रापि पूर्ववत्कर्मकर्तृविवक्षायां मत्स्यः स्वयमेव गलविवरेण संचरति संचर्याद्वेत्यर्थः। इत्येवंविधा भूतवर्तमानभाविकालत्रयविषया नीतिः स्वजातेरप्यबलिनो बलिना पराभवरूपो[5] मात्स्यो[6] न्यायो यदि[7] परं सिन्धुष्वब्धिष्वकारयत। अकुर्वन्निति नीतिं मत्स्यास्तान्कुर्वतोनुकूलाचरणेन सिन्धवः प्रायुञ्जत। णिग्। इति नीतिमकारयन्मत्स्यैः सिन्धवः। प्रयोक्तैवं विवक्षितवान्न सिन्धवो[8] मत्स्यैरिति[9] नीतिमकारयन्। न चेति नीतिं मत्स्या अकुर्वन्। किं त्विति नीतिः[10] स्वयमकारयत। समुद्रेष्वेव मात्स्यो न्यायः प्रावर्ततेत्यर्थः। न पुनः प्रजासु लोकमध्य इति नीतिरुच्छ्रयते[11] स्म। प्रजा इति नीतिं नोच्छ्रयन्ति स्मैवं न। किं तु नोच्छ्रयते स्मेति नीतिः[12] स्वयमेव। भीमस्यान्यायिनां शासकत्वात्प्रजासु[13] मात्स्यो न्यायो नोज्जृम्भते स्मेत्यर्थः। अत एवास्मिन्सति कलिरपि[14] कलिकालोपि कलहोपि वा न च नैव विकुरुते स्म व्यकृतेतिवत्[15]कर्मकर्तृविवक्षायां नोज्जजृम्भ इत्यर्थः॥

---

१ डी °मेव न।. २ ए भूआदि°. ३ डी °धा वा च।. ४ डी गिराते. ५ बी °पो मत्स्यो. ६ ई मात्स्यन्या°. ७ ए °दिपरि प°. ८ सी °वो मात्स्यै°. ९ डी मत्सैरि°. १० सी नीतिं स्व°. ११ ए °च्छूते. १२ सी नीतिं स्व°. १३ बी °सु मात्स्यो. १४ ए °लिका°. १५ डी °तिपूर्वव°.

प्रैस्नुते स किल गौः स्वयमस्मिन्पर्यवारयत चास्य चमूस्ताम् ।
सच्छिनत्ति युधि साध्वसिरस्येयाज चारिरुधिरेण कृतान्तम्
॥ २६ ॥

२६. किलेति सत्ये । अस्मिन्नृपे सति गौः पृथ्वी प्रैस्नुते स्म । प्रैस्नौति स्माक्षारयद्रत्नान्ययमेवं न । किं तु स्वयमेव प्रस्नुते स्म । सुप्रभोरस्यानुरागेण स्वयमेव रत्नादिदानोन्मुखी बभूव । तथास्य भीमस्य चमूश्च तां गां पर्यवारयत । पर्यवारयत्तां चम्वा कृत्वायमेवं न । किं तु चमूः स्वयं तां पर्यवारयत रक्षार्थमेतच्चमूः पृथ्वीं परिवेष्टितवतीत्यर्थः । एतेन पृथ्वीभीमयोर्मिथ उपकार उक्तः । परिवृत्तिरलंकारः । तथास्यासिः खड्गो युधि साधु क्षत्रियोचितं यथा स्यादेवं छिनत्ति स्म । असिना साधुं च्छिनत्त्ययमरीनेवं न । किं तु साध्वसिश्छिनत्ति स्म स्वयमेव । अत एव चास्यासिररिरुधिरेण कृत्वा कृतान्तमियाजापूजयत् ॥

कोपि नाचकमतापनिनायाप्याचकाणदिह राज्ञि परस्त्रीम् ।
नीतिवर्त्मनि यदेष जजागारातितिक्षत च न क्वचिदागः ॥ २७॥

२७. इहास्मिन् राज्ञि सति कोपि परस्त्रीं नाचकमत नेयेष तथा नापनिनाय नापजह्रे नाचकाणदपि । अपिः समुच्चये । कामवशादार्तस्वरपूर्वं नाशब्दाययत् । एतेन परस्त्रीविषया मनःकायवचसां निवृत्तिरुक्ता । यद्यस्माद्धेतोरेष भीमो नीतिवर्त्मनि न्यायमार्गे जजागारोद्यतोभूत् । तथा क्वचिन्मित्रादावप्यागोपराधं नातितिक्षत नासहत ॥

१ ए प्रश्नुते.

१ डी पृथ्वीः पृस्नु°. २ बी प्रस्नुते. ३ बी प्रश्नौति. ४ बी वृत्तिर°. ५ ए °स्यासिख°. ६ ए तं तथा. ७ बी ई °धु सच्छि. ८ ए सी अपि स°. ९ डी. ब्दायद. १० सी डी °यत । ए. ११ बी. °हत् ॥.

लोलवीत्यपथगान्स्म स तेनाटाट्यतांटिटिषति स्म न चौरः ।
कोपि नाड्डिडिषदट्टिटिषायां सर्व उब्जिजिषति स्म यथावत् ॥२८॥

२८. स भीमोपथगान्स्तेयाद्यन्यायमार्गगाँल्लोलवीति स्म भृशमभीक्ष्णं वा चिच्छेद । तेन हेतुना चौरो नाटाट्यत चौरिकार्थं न बम्भ्रम्यते स्म । नाटिटिषति स्म न चाटितुमैच्छत् । तथा कोप्यट्टिटिषायां हिंसेच्छायांमतिक्रमेच्छायां वा नाड्डिडिषन्नाभियोक्तुमैच्छत् । किं तु सर्वोपि यथावद्यथोचितमुब्जिजिषति स्म ऋजूभवितुमिच्छति स्म ॥

बाढमिन्दिदिषदर्चिचिषच्चारयंदत्र नृपचक्रमशेषम् ।
स्माजिजीयिषति नापि वृकोन्यः को ह्यजीयियिषति स्म बुभुक्षुः ॥ २९ ॥

२९. अशेषं नृपचक्रमत्र भीमेरयंदर्यं स्वामिनमाख्यत् । कीदृक्सत् । बाढमत्यर्थमिन्दिदिषदीश्वरीभवितुमिच्छदत एवार्चिचिषदर्थाद्भीमं पूजयितुमिच्छच्च । तथात्र नृपे सति दयालुत्वेन सर्वयत्नान्निरपराधजन्तुमारिव्यसनवारकत्वाद्वृकोप्यरण्यश्वापि बुभुक्षुः क्षुधार्त्तः सन्नाजिजीयिषँति स्माजेच्छां नेच्छति स्म । मोदकार्थी बुभुक्षां वाञ्छतीतिवदिच्छाया अपीच्छा । हि स्फुटमन्यः को बुभुंक्षुरजीयियिषति स्म न कोपीत्यर्थः । अनेनास्यातिधार्मिकत्वोक्तिः ॥

१ सी. °ताड्डिटिष°. २ प बी ई °दर्चिचि°. ३ प सी °चारार्यं°. ४ प °जीजियिष°.

१ प °यामिति°. २ प सी °मेरार्यं° डी °मेआर°. ३ बी °यंदार्थ. ४ प °दर्थं स्वा°. ५ बी °क्सन् । बा°. ६ बी °ढमित्य°. ७ सी °षत स्मा°. ८ प °च्छाया । हि°. ९ प °भुक्ष्यजीजियिष°.

जात्वजीयिषिषति स्म न कश्चिद्यच्छ्रियः क्षितिभुजीह यथेष्टम् ।
द्राक्स्वराद्यपरनामजधात्वेकस्वरावयववद्विरभूवन् ॥ ३० ॥

३०. यद्यस्माद्धेतोरिह क्षितिभुजि राज्ञि सति श्रियो लक्ष्म्यो या या श्रीरिष्टा यथेष्टं यथेप्सितं द्विरभूवन् द्विगुणीबभूवुरर्थाल्लोकस्य । किंवत्स्वरादेरपरेऽन्ये व्यञ्जनादयो ये नामजधातवो नामधातवस्तेषां य एकस्वरो अवयवास्ते यथा । पुपुत्रीयिषति । पुतित्रीयिषति । पुत्रीयियिषति । पुत्रीयिषिषति । इत्यादौ यथेष्टं प्रथमाद्यवयवानामन्यतमा द्विर्भवन्ति द्विरुच्यन्ते तस्माद्बहुधनत्वाद्धेतोर्जातु कदाचिदपि न कश्चित्कोप्यजीयिषिषति स्म । यदि ममाजा स्यात्तदा शोभनमिति छागेच्छां नेच्छति स्म । एतेन प्रजोपरि राज्ञः शुभचेतस्कत्वोक्तिः । शुभचित्ते हि राज्ञि प्रजाः श्रिया वर्धन्ते ॥

भूषार्थे । अलमकृत सः । नालंकरिष्यतेन्यः । सम[म]लंकुरुते । अबूभुषताद्यः । भूषयिष्यते द्यौः । भूषयते भूः ॥ सन्नन्त । अचिकीर्षिष्ट । चिकीर्षिष्यन्ते । चिकीर्षते ॥ किरादि । व्यकीर्ष्ट । चिकीर्षीष्ट । किरते । अगीर्ष्ट । परिगीर्षीष्ट । गिरते ॥ ण्यन्त । अकारयतं ॥ स्नु । प्रस्नुते गौः ॥ श्रि । नोच्छ्रयते ॥ आत्मनेपदाकर्मक । विकुरुते । एषु "भूषार्थे॰" [९३] इत्यादिना जिक्यौ न ॥

पर्यवारयत चमूस्ताम् । इत्यत्र "करण॰" [९४] इत्यादिनात्मनेपदं कचिस्यात् ॥ कचित्त्व । साध्वसिरिछिनत्ति ॥

द्वितीयः (द्वादशः) पादः समर्थितः ॥

१ डी ई ॰तवस्ते॰. २ ई ॰राव॰. ३ बी ॰यिषष॰. ४ सी डी ॰च्छन्ति स्म. ५ सी प्रजा श्रि॰. ६ बी अबुभु॰. ७ सी ॰षयंते. ८ सी ॰ष्यते । चि॰ ९ ए ॰ष्टगि॰. १० ए ॰त ॥ स्न । प्रस्नुते. ११ सी ॰ना जिक्यौ. १२ ई ॰दः लक्षणतः स॰.

इयाज । अचकमत । इत्यत्र "द्विर्धातुः°" [१] इत्यादिना द्विरुक्तिः ॥
प्रागिति किम् । अपमिनाय । अत्र वृद्ध्यादेः स्वरविधेः पूर्वमेव द्वित्वं सिद्धम् ॥

जजागार । अ(आ)चकाणत् । इत्यत्र "आद्योंश°" [२] इत्यादिना द्विरुक्तिः ॥

अतितिक्षत । कोकूयीति । अत्र "सन्यङश्च" [३] इति द्वित्वम् ॥

अटिटिषति । आटाट्यत । इत्यत्र "स्वरादेर्द्वितीयः" [४] इति द्वित्वम् ॥

उब्जिजिषति । अड्डिडिषायाम् । आड्डिडिषत् । इन्दिदिषत् । इत्यत्र "नं बद०" [५] इत्यादिना संयोगस्यादयो बदना न द्विः स्युः ॥

अर्चिचिषत् । इत्यत्र "अयि रः" [६] इति रस्य न द्वित्वम् ॥ अयीति किम् । आरर्यत् ॥

अजिजीयिषति । अजीयियिषति । अजीयियिषति । इत्यत्र "नाम्नः° [७] इत्यादिना द्वितीयादारभ्यैकस्वरोवयवो द्विः स्यात् ॥

स्वराद्यपरनामजधात्वेकस्वरावयवद्विरभूवन्नित्युपमया "अन्यस्य" [८] इति सूत्रोदाहरणानि पुपुत्रीयिषतीत्यादीनि सूचितानि ॥

नाभ्यसूयियिषति स्म नं चाकण्डूयियत्परधनेष्विह कश्चित् ।
नासुसोपुषिषतैष दिवा यत्रापि सोषुपिषते स निशायाम् ॥ ३१ ॥

३१. इह राज्ञि सति कश्चित्कोपि नरः परधनेषु विषये नाभ्यसूयियिषति स्म राजावग्रहपाताद्यर्थं चौर्यद्रोहोपार्जितत्वाद्यसद्दोषानु-

१ ए बी सी डी न वाक°. २ ए बी ई °सोषपि°.

१ ए आधोंश°. २ सी °लवति. ३ सी डी ई °ति । इत्यत्र. ४ बी सी डी °ति । अटा°. ५ सी डी नवदनेत्या°. ई नवेत्या°. ६ ए सी डी ई °यो बद°. ७ ई अञ्चिचि°. ८ ए अर्ईति. ९ सी °म् । अरार्यत. १० ई °रम्येक°. ११ ए °वो द्विस्या°. १२ बी °यवद्वि°. १३ ए °नि सुपुत्री°. १४ सी राज्ञाव°.

श्रावयितुं नैच्छन्नाकण्डूयियच्च। कण्डूयन्तं न प्रायुङ्क्त। लक्षणयाह। यद्येतानि[2] प्राप्नोमीति वाञ्छातिरेकं कुर्वन्तमन्यं न प्रयुक्तवान्। यद्य-स्माद्धेतोरेष भीमो दिवा नासुसोषुपिषतात्यर्थं स्वप्तुं नैच्छन्नापि नि-शायां सोषुपिषते स्म प्रजापालनायां सदोद्यतोभूदित्यर्थः॥

अकण्डूयियत्। अभ्यसूयियिषति। इत्यत्र "कण्ड्वादेस्तृतीयः" [९] इति द्वित्वम्॥

असुसोषुपिषत। इत्यत्र "पुनरेकेषाम्" [१०] इति द्वित्वे कृते पुनर्द्वि-त्वम्॥ एकेषामिति किम्। सोषुपिषते॥

श्रीरिर्ष्यिषति स्म न वाचा वागपीर्ष्यियिषति स्म तया न।
तां जुहोति विदुषां स्म च जिह्रेत्युच्चकैश्च सचराचरकीर्तिः॥ ३२॥

३२. इह भीमे श्रीर्वाचा सह नेर्ष्यियिषति स्म नेर्ष्यितुमैच्छद्वा-गपि तया श्रिया सह नेर्ष्यियिषति स्म। अन्योन्यविरुद्धे अपि श्रीवाचौ विरोधं विहायात्रावतस्थतुरित्यर्थः। अत एव विदुषां तां लक्ष्मीं जुहोति स्म च ददौ च। तथा चराचरे सकले जगति चरा-चरा परिभ्राम्यन्ती वा या कीर्तिर्दानपुण्योत्था विद्वत्कृता ख्यातिः सह तया यः स तथा सन्नुच्चकैरतिशयेन जिह्रेति स्म च। एतेनास्य महापुरुषत्वोक्तिः॥

क्रीडयापि चलितेत्र महीपाट्टपटार्वतपतापतधूल्या।
द्रक्कलाचलघनाघनबुद्ध्याभूद्रदावदमुखो गुहबर्ही॥ ३३॥

३३. अत्र भीमे क्रीडयापि राजपाट्यापि चलिते प्रस्थिते महा

१ बी °र्ष्यिष°.

१ बी ई °युक्त। ल°. २ ए °नि पाप्नो°. ३ बी °र्वतंम°. ४ ए बी सी °सोषपि°. ५ बी °यत। अ°. ६ सी °यिष्यति. ७ ए °सोषपि°. ८ बी °र्ष्यिष°. ९ ई °यात्र त°. १० बी °या रा°.

भुवः पाटूपटानि खुरप्रहारैर्विदारकाणि यान्यावर्तान्यश्वौघास्तैः पतापतोच्छलन्ती या धूली तया कृत्वा चलाचलघनाघनबुद्ध्या स्थिराम्बुदाशङ्कया गुहबर्ही स्कन्दमयूरो द्रागवदावदमुखः केकाशब्दकारिवक्रोभूत्। अनेनाश्वसंपदुत्कर्षोस्योक्तः॥

ऐभमस्य मदचिक्किदहस्तैश्चक्कसाचलपटूपटदन्तम्।
मीढ्वदङ्गणमसाह्वदिहाब्दान्विस्मयं जगति कस्य न दाश्वत्॥३४॥

३४. अस्य भीमस्यैभं हस्तिवृन्दमिह पृथ्व्यां कस्य विस्मयमाश्चर्यं न दाश्वन्न ददौ। यतो मदेन चिक्किदा आर्द्रा ये हस्ताः शुण्डास्तैः कृत्वाङ्गणं भूमिं मीढ्वत्सिक्तवन्मदोन्मत्तमित्यर्थः। तथा चक्कसा निर्मलाः कुटिला वाचलपटूपटा दार्ढ्येनाद्रीणामपि विदारका दन्ता यस्य तत्तथाब्दान्मेघानसाह्वत्प्रति द्विपाशङ्कयासोढवत्॥

ईर्ष्यियिषति। ईर्ष्यिषिषति। इत्यत्र "यिः सन्वेर्ष्यः" [११] इति द्वित्वम्॥

जुहोति। जिह्वेति। अत्र "ह्वः शिति" [१२] इति द्वित्वम्॥

चराचर। चलाचल। पतापत। वदावद। घनाघन। पाटूपट। इत्येते "चराचर०" [१३] इत्यादिनाचि कृतद्वित्वा निपात्या वा। पक्षे। अचल इत्यादि। केचित्तु पटूपटेति निपातयन्ति॥

चिक्किदंचक्कसौ। "चिक्किद०" [१४] इत्यादिना निपात्यौ॥

दाश्वत्। असाह्वत्। मीढ्वत्। इत्येते "दाश्वत्०" [१५] इत्यादिना निपात्याः॥

---

२ ई दास्वत्.

---

१ सी डी °कानि या°. २ सी °कारव°. ३ ए °स्यैवं ह°. ४ ई दास्वन्न. ५ ए °दौ। ततो. ६ ए °त्वागणं. ७ ए °ढ्वन्सिक्त°. ८ सी °ला वांच°. ९ ए चिक्कद°. १० बी °दचिक्कसौ. डी °दचिक्क°.

ज्ञीप्सतीप्सति सतः स्म स ईर्त्सुः[1] स्माभिधीप्सति च धिप्सति शत्रौ ।
मोक्षति स्म विमुमुक्षति चोच्चैर्नामुमुक्षद[2]निमित्सति[3] शस्त्रम् ॥ ३५ ॥

३५. स भीमः सतः साधूनीर्त्सुरन्तर्भूतणिगर्थतया[1] वर्धयितुमिच्छुः[2] सञ्जीप्सति स्म प्राप्तुमिच्छति स्म । तथा ज्ञीप्सति स्म ज्ञपयितुं तोष[3]यितुमियेष । तथा धिप्सति दम्भितुमिच्छति शत्रौ विषयोभिधीप्सति स्म च । तथा क्षत्रियोत्तमत्वेन[4] शस्त्रं विमुमुक्षति मोक्तुमिच्छति शस्त्रमोक्षमिच्छतीत्यर्थः । शत्रौ विषये[5] शस्त्रमुच्चैरतिशयेन मोक्षति स्म च । तथा शस्त्रमनिमित्सति[6] कातरत्वेन निमातुं प्रक्षेप्तुमनिच्छति शत्रौ शस्त्रं नामुमुक्षञ्च प्रक्षेप्तुमैच्छत् ॥

न स्म[4]मित्सदपशस्त्रममित्सत्क्ष्मां बलैर्जलधिमप्यमिमासत् ।
दित्सया[5] स्म[6] च स धित्सति लक्ष्मीं[7] दित्सति स्म[8] खलु नार्थिन आशाम्
॥ ३६ ॥

३६. स भीमोपशस्त्रं शस्त्ररहितं न हि नैवामित्सद्धन्तुमैच्छत् । तथा बलैः सैन्यैः कृत्वा क्ष्मामममित्सज्जलधिमप्यमिमासद् मातुमैच्छत् । एतेन सार्वभौमत्वोक्तिः । तथा दित्सया दानेच्छया लक्ष्मीं धित्सति स्म वर्धयितुमियेष । अत एव खलु निश्चयेनार्थिन आशां मनोरथं न दित्सति स्म न खण्डयितुमैच्छत् ॥

---

१ सी डी ईत्सुः स्मा°. २ ए °र्नामुमुक्ष°. ३ बी °मिच्छति. ४ ए °मिच्छद°. ५ ए दिच्छया. ६ डी स्म स. ७ ए लक्ष्मी दिच्छति. ८ डी स्म न ख°.

---

१ डी °र्थत्या. २ बी °मित्सुः स°. ३ ए °षमि°. ४ ई °न वि°. ५ ए ई °ये उच्चै°. ६ ए बी सी °मिच्छति. ७ ए °सतुमा°. ८ सी डी °र्थिनामाशां.

धित्सति स्म न पयोप्यवितीर्णं तज्जनः कथमलिप्सत वित्तम्।
नात्र कोपि समरिप्सत कोपात्सोन्तकेप्यविनये यदशिक्षत् ॥३७॥

३७. यद्यस्माद्धेतोः स भीमोविनयेपन्याये सत्यन्तकेपि यमेपि विषयेशिक्षच्छक्तुमैच्छत्। अनुशासितुं समर्थोभूदित्यर्थः। तत्तस्माद्धेतोरत्र जगति जनोवितीर्णमदत्तं पयोपि जलमपि न धित्सति स्म न पातुमियेष। कथं पुनरवितीर्णं वित्तं द्रव्यमलिप्सत प्राप्तुमैच्छेन्न कथमपीत्यर्थः। तथा न कोपि कोपात्समरिप्सत संरम्भं चक्रे। चौर्यं कलहं च न कोपि चक्र इति भावार्थः॥

पित्सते स्म शरणार्थमपित्सन्नारिरात्सुरथ वा य इमं हि।
तं स्म रित्सति न कोपि न कौचिद्रेधतुर्न खलु केपि च रेधुः॥३८॥

३८. यो नरोपित्सन्पतितुमनिच्छन्नभ्रंशितुकामः सन् शरणार्थं स्वरक्षायायथ वा य आरिरात्सुः सेवितुकामः सन् हि स्फुटमिमं भीमं पित्सते स्म जिगमिषति स्म तं नरं कोपि न रित्सति स्म न हिंसितुमैच्छन्न कौचित्कावपि तं रेधतुर्जघ्नतुर्न केपि च तं खलु निश्चयेन रेधुः॥

त्वं हि रेधिथ रराध तु नायं त्वं विरेणिथ विरेणुरमी तत्।
नो यदा बभणिथाबभणुः के सोन्वशादिति विबोध्य सवादान्
॥ ३९ ॥

३९. स भीमः सहवादेन ये तान्सवादान्मिथो विवदमानान्नरा-

---

१ प तद्यनः. २ सी °त्र केपि. ३ बी °पित्सन्ना° ४ बी °रेणथ.

---

१ ई सितं स°. २ सी डी °च्छत्। क°. ३ ई के। कौर्यं. ४ बी °हं न च को°. ५ डी °र्थः॥ विरस° ६ प °षते स्म. ७ प स नं तरं. ८ सी डी °रं न को°. ९ डी °पि न रे°. १० बी °तुजघ्तु°. ११ ई च स°.

न्विबोध्य संबोध्यान्वशात्पुनरेवं न कार्यमित्यशिक्षयत्[1] । कथं संबोध्येत्याह । अहो पुरुष हि स्फुटं त्वं रेधिथ घातं कृतवान्न तु[2] नै[3] पुनरयं नरो रराध । तथाहो यस्मात्त्वं विरेणिथ विरुद्धमवोचस्तत्तस्मादमी नरा विरेणुर्यदा त्वं नो बभणिथ नावोचस्तदा क आवभणुः । न केपीषदप्यूचुरित्यर्थः । तस्मात्तवैव दोषोयमित्युक्तं स्यादिति ॥

ज्ञीप्सति । ईप्सति । इत्यत्र "ज्ञप्याप०" [१६] इत्यादिना ज्ञीपीपादेशौ न च द्विः ॥

ईर्त्सुः । अत्र "ऋध ईर्त्[4]" [१७] इति-ईर्त् न च द्विः ॥

धिप्सति । अभिधीप्सति । इत्यत्र "दम्भ०" [१८] इत्यादिना धिप्धीपौ[5] न च द्विः ॥

मोक्षति विमुमुक्षति[6] । इत्यत्र "अव्याप्यस्य मुचेर्मोग्वा" [१९] इति वा मोक् न च द्विः ॥ अव्याप्यस्येति[7] किम् । शस्त्रं नामुमुक्षत्[8] ।

डुमिंगृ[9][10] । अनिमित्सति[11] ॥ मीति मीङ्मींग्शोर्ग्रहणम्[12][13][14] । नामित्सदपशब्दम् ॥ मेति मांङ्मांङ्मेङां ग्रहणम्[15][16] । अमित्सत लक्ष्माम् ॥ दासंज्ञ । दित्सया । दित्सति । धित्सति लक्ष्मीम् । न धित्सति । इत्यत्र "मिमी०" [२०] इत्यादिना स्वरस्येत्[17] च द्विः[18] ॥ मांङ्मेङोरुदाहरणे स्वयं ज्ञेये । मातेर्नेच्छन्त्येके । अमिमासत् ॥

समरिप्सत[19] । अलिप्सत । अशिक्षत्[20] । अपित्सत्[21] । पित्सते । अत्र "रभलभ०" [२१] इत्यादिना स्वरस्येन्न च द्विः ॥

१ प °बोधेत्या°. २ प तु पु°. ३ सी नर°. ४ डी ईत् न. ५ बी धिपधीपौ. ६ सी विमुक्ष°. ७ बी अवाप्य°. ८ प नानामु°. ९ डी डुमेंग्टृ । अ°. १० प बी मिंग्टृ । अ°. ११ बी °मिच्छति. १२ बी °ति मीङ्क् मीग्शो° सी °ति मीङ्व् मीं°. १३ डी मींङ्व् मी°. १४ प °ङ्व् मीग्शो°. १५ सी मांक मां° १६ डी मांक्मे°. बी मांक्मेंङां. १७ सी °न्न द्विः. १८ बी °द्विः ॥ माक्मेंङो°. १९ डी °प्सत् । अ°. २० डी अपि°. २१ बी °त्सन् । पि°.

रित्सति[1] । इत्यत्र "राधेर्वधे" [२२] इति स्वरस्येत्त्व च द्विः ॥ वध इति किम् । आरिराल्सुः ॥

रेधतुः । रेधुः । रेधिथ । इत्यत्र "अवित्°" [२३] इत्यादिना स्वरस्यैत्त्व च द्विः ॥ अविदिति किम् । रराध ॥

विरेणुः । विरेणिथ । इत्यत्र "अनादेशादेः°" [२४] इत्यादिनैत्त्व च द्विः ॥ अनादेशादेरिति किम् । आबभणुः । बभणिथ ॥

तं चरौ रहसि भेजतुरन्येद्युः प्रफेलतुरिदं च वचस्तौ[1] ।
स्वेन फेलिथ विभेजिथ[2] चाज्ञां[3] यन्निमित्तमवधारय तन्नौ ॥ ४० ॥

४०. अन्येद्यू रहस्येकान्ते चरौ हेरिकौ तं भीमं भेजतुस्तथा तौ चराविदं वचः प्रफेलतुश्च । फलिरत्रान्तर्भूतणिगर्थः सकर्मकः । निष्पादितवन्तावूचतुरित्यर्थः[3] । तदेवाह । हे राजन्यन्निमित्तं यस्य कार्यस्य हेतोस्त्वं नावावयोः स्वेन धनेन कृत्वा फेलिथ फलितवानाज्ञामादेशं विभेजिथ च विभागेन दत्तवांश्च तदवधारय शृणु ॥

आवयोस्त्वमवतेरिथ यस्मात्तेन तेरिव महीं किल पुण्ड्राः ।
त्रेपिरे न वचसाज्ञपयन्यत्स्वेनिथार्हमथ सस्वनिथान्यत् ॥ ४१ ॥

४१. हे राजन्यस्मात्त्वमावयोरवतेरिथ धनादि दत्तवांस्तेन हेतुनावां महीं तेरिव तीर्णौ परिभ्रान्तावित्यर्थः[4] । किलेति सत्ये । यदर्हमुचितं संदेशाद्याज्ञपयंस्त्वं[5] स्वेनिथावोचोथाथ[6][7] वान्यदनर्हं दण्डादिर्कमाज्ञ-[8]

---

१ सी °च सौ । स्वे°. २ सी °भेमिथ. ३ सी डी °थ वाज्ञां.

---

१ बी रिच्छति. २ बी अविद् इ°. ३ ए निष्फादि°. ४ बी °रिभ्रातावि°. ५ ए सी डी °याज्ञाप°. ६ डी °निथ वाचोचिथा°. ७ बी °वोचाथा°. ८ डी °कर्म ज्ञाप°. ९ ए सी °माज्ञाप°.

पयन्सस्वनिथ यत्तदोर्नित्या[1]भिसंबन्धात्तेन वचसाज्ञावचनेन पुण्ड्राः[2] पुण्ड्र-देशराजा[3] न त्रेपिरे न ह्रीणा हृष्टतुष्टास्त्वदाज्ञामङ्गीचक्रुरित्यर्थः । तेरिवेत्यत्र स्मरणं सदपि न विवक्षितं किं तु तत्पूर्वकोनुभव इति कृतास्मरणाः । निह्नवे "परोक्षा" [३.३.१२] इति परोक्षा ॥

यत्रे[1] बभ्रमिथ केशिनमुच्चैर्जेरिथोज्जजरिथापि च कंसम् ।
भ्रेमिथाभिबलि वेमिथ वेदांस्तैत्तिरीं ववमिथापि च शाखाम् ॥४२॥
फेणिथापफणिथार्भककेल्या त्रेसिथेषदभितत्रसिथोच्चैः ।
गोषु रेजिथ रराजिथ गोपैः स्येमिथापि न च सस्यमिथापि ॥४३॥
केपि नैषु विषयेषु तवाज्ञां जेरुरीश न भयं जजरुश्च ।
भ्रेमुरभ्यटवि बभ्रमुरद्रौ वेमुरम्बु रुधिरं ववमुश्च ॥ ४४ ॥

४२–४४. हे ईश स्वामिन्नेषु विषयेषु देशेषु तवाज्ञामादेशं केपि नृपा न जेरुरन्तर्भूतणिगर्थत्वाज्जरितवन्तोवज्ञया न विनाशितवन्त इत्यर्थः । तथा भयं न जजरुश्च[4] न व्यनाशयंश्च भीता इत्यर्थः । अत एवाभ्यटव्यटवीं लक्ष्यीकृत्या[5]भिमुखं भ्रेमुस्तथाद्रौ बभ्रमुस्तथाम्बु स्वेदजलं वेमुरक्षरन्नित्यर्थः । तथा रुधिरं ववमुश्च । भयातिरेकेण हि स्वेद[6]स्रवणं रक्तवमनं च स्यात् । के ते विषया इत्येष्वित्यनेन ये विषया विवक्षितास्ता[7]नाविष्णुः पृथिवी[8]पतिरिति स्मृतिवचनाद्भीमनृपे तत्तद्देशसंजातानामच्युतावदातानां वर्णनाद्वारेण ज्ञापयन्ता[9]वाहतुर्यत्रेत्यादि । यत्रेति प्रतिवाक्यं ज्ञेयम् । यत्र वृन्दावनाख्ये देशे[10] बभ्रमिथ

१ प °त्र विभ्र° बी °त्र विभ्र°.

१ प °त्यापिसं°. २ बी पुण्ड्र°. ३ प बी °जानः त्रे° डी ई° जानो न. ४ प °जरश्च. ५ प लक्ष्मीकृ°. सी लक्षीकृ°. ६ प बी सी डी °दस्रव°. ७ प सी डी °नाह वि°. ८ सी डी पृथ्वीप°. ९ बी °वाहतु°. १० प °शे विभ्र°.

कृष्णावतारेण केश्यादिदैत्यवधार्थं भ्रान्तः । यथोच्चैः[1] केशिनं केशिसं- ज्ञमश्वरूपं दैत्यं जेरिथ मुखमध्ये स्वबाहुप्रवेशेन विनाशितवान् । तथा यत्र देशे मथुरायां कंसं दैत्यमुज्जजरिथापि च । तथा यत्र देशे शो- णितपुरेभिबलि बलिदैत्यं लक्ष्मीकृत्याभिमुखं भ्रेमिथ वामनरूपेण ब- लिबन्धनाय[3] भ्रान्तः । तथा यत्र देशे क्षीरसमुद्रोपकण्ठे वेदानृग्यजुः- सामाख्यान्वेमिथ मत्स्यरूपेणोद्गीर्णवान् । पुरा हि किल चतुर्दशभुवन- प्रलये हरिर्नाभिपद्मे ब्रह्माणं निर्ममौ । स च वेदानस्मार्षीन्मानसानृ- षींश्च निर्ममौ । तस्य च वेदान्स्मरतो जृम्भायामागतायां मुखे विवृते- कस्माच्छङ्खाख्यो दैत्यः प्रविश्य वेदानाहृत्य क्षीराब्धौ प्रविष्टस्ततश्च ज्ञानवैकल्येन ब्रह्मा शून्योभून्मानसर्षिभिश्चामुं शून्यतावृत्तान्तं विज्ञ-[7] पितो हरिर्दिव्यचक्षुषा ज्ञातपरमार्थो मत्स्यरूपेण क्षीराब्धौ प्रविश्य शङ्खं हत्वा वेदानाहृत्य ब्रह्मणो मुखे वान्तवानित्यैतिह्यम् । तथा यत्र देशे मिथिलोपवने तैत्तिरीं तित्तिरेरिमां शाखां यजुर्वेदांशं ववमिथापि च याज्ञवल्क्यरूपेणोद्गीर्णवांश्च । अत्र किल कस्यापि नृपतेः प्रणयिन्या निरपत्यतादुःखमपनेतुमाशिषं दातुं शाकल्यगुरोरादेशेन शान्तवेषा- कारा विनेयाः सदा ययुः । कदाचिदन्येषामसंनिहिततया गुरुर्याज्ञव-[10] ल्क्यमेव प्राहिणोत्तं च नववयस्तया रचितचारुवेषाकारं सविकारमि- वाशिषं दातुमुद्यतं दृष्ट्वाहो अस्य महर्षेराशिषः प्रभावः स्थाणुमपि पल्ल- वयतीति राज्ञी सविस्मयमुपजहास । स च क्रुद्धस्तत्पुरः स्थाणुमेव[12] सप्रभावतया तैरेव स्वैरक्षतैः पल्लवयित्वा गुरोः समीपमाययौ । सा च संभ्रान्ता तमानेतुं नृपेण गुरुमर्थयामास । नृपानुरोधाद्गुरुणा निर्बध्यमानोपि स यदा न ययौ तदा गुरुणा क्रुद्धेन स्वयमध्यापि-

---

१ सी °शिसं°. २ प लक्षीकृ°. ३ सी °नादय. ४ प °नवानृ°. ५ प °सा- त्सङ्खा°. ६ बी °श्च तान°. ७ बी विज्ञापि°. ८ प यजुर्वे°. ९ सी °क्यस्तपे°. १० प °र्याश्यव°. ११ बी °त्पुरस्था° सी °त्युरंस्था°. १२ प °व प्र°.

तानि तैत्तिरीयाणि यजूंषि प्रतीपं याचितः संस्तानि मूर्तानि तित्तिरिरूपाणि योगप्रभावाद्वमति स्म । वमनानन्तरं महर्षिणा तित्ति[1]रीभूय भ्रसित्वा तेषां च यजुषां शिष्येभ्यः प्रतिपादनार्थ[2]यजुर्वेदप्रसिद्धा तैत्तिरी शाखा जज्ञे । तस्याश्च [3]याज्ञव[4]ल्क्येन वान्तानि तित्तिरिरूपाणि यजूंषि कारणमिति कार्यकारणयोरभेदोपचाराद्ववमिथापि च शाखामित्युपपन्नं स्यात् । याज्ञवल्क्यस्य विष्णुत्वेनोपवर्णनं महाप्रभावत्वात् । यदुक्तम् ।

यद्यद्विभूतिमत्सत्त्वं प्रभावोत्कटमेव[5] वा ।
तत्तदेवावगच्छेस्त्वं मम तेजोंशसंभवम् ॥ इति ॥

तथा यत्र दे[6]शेषु यमुनातटेष्वर्भककेल्या गेन्दुकशकुलाक्रीडादिकया बालक्रीडया हेतुना फेणिथ गोपबालकैः सह गतः । तथापफणिथागतश्च । तथेषन्मनाक् त्रेसिथ गेन्दुकादिप्रहाराशङ्कया भीतः । तथोचैरभितत्रसिथ चाभिमुख्येन भीतश्च । विष्णुर्हि कृष्णावतारे कंसभयेन बालकाले यमुनातटस्थेषु नन्द[7]गोकुलेषु गोपरूपेणोषित इत्यागमिकाः । तथा यत्र देशे यमुनात[8]टे वृन्दावने वा गोषु धेनुषु मध्ये रेजिथ गोरक्षाद्यर्थं गोवर्ध[9]नाद्युद्धरणाद्यवदातैः शोभितः । तथा गोपैः परिवारभूतैर्गोपालैः कृत्वा रराजिथ । तथा स्येमिथापि सिण्टाशब्दांश्च-कर्थ च न च सत्यमि[10]थांप्यन्यकार्यैव्यग्रतायां सिण्टाशब्दान् चकर्थ च । गोपा हि जातिस्वभावेनान्यकार्याव्यग्रता[11]यां [12]सिण्टाशब्दान्कुर्वन्ति । केशिकंसवधादीनि वृत्तानि लोकप्रसिद्धान्येवेत्यत्र नोक्तानि ॥

१ बी °री भ°. २ ए °यजुर्वे°. ३ ए बी सी याज्ञव°. ४ बी सी °वल्केन. ५ सी डी °व च। त°. ६ सी डी °शेय°. ७ सी डी °न्दकु°. ८ ए °टे वन्दा°. ९ सी डी °नाभ्युद्ध°. १० डी °थाकार्येष्यन्यव्य° सी °थाकार्यप्यन्यव्य°. ११ बी °यां शण्टा°. १२ ए सिण्डाश°.

स्वेनुरेषु पफणुस्तव सूताः सस्वनुस्तव गुणांश्च विफेणुः ।
तत्रसुः स्वविषये न हि यद्वत्त्रेसुरत्र न चरा अपि तद्वत् ॥ ४५ ॥

४५. हे राजंस्तव सूता भट्टा एषु पूर्वोक्तेषु वृन्दावनादिविषयेषु पफणुर्जग्मुः । तथा विफेणुर्भयाभावेन स्वेच्छाचारित्वाद्विशिष्टं जग्मुः । तथा स्वेनु[1]स्त्वदाशीर्वादाद्यूचुः । तथा तव गुणान्सस्वनुं[2]श्चाकीर्तयंश्च । तथा तव चरा अपि हेरिका अपि । किं पुनः सूतादय इत्यप्यर्थः । यद्वद्यथा स्वविषये निजदेशे गूर्जरत्रायां न हि नैव तत्रसुर्बिभ्युस्तद्वत्तथात्रैषु देशेषु वृन्दावनादिषु न त्रेसुः ॥

सस्यमुर्यदलयो यदु हंसाः स्येमुराः कुरुषु तन्न रराजे ।
रेज ईश तव की[1]र्तनमाबभ्राज इन्द्रसुतवर्णनकं वा ॥ ४६ ॥

४६. उ हे ईश स्वामिन्नलयो भृङ्गा यत्सस्यमुः शब्दायिता यच्च हंसाः स्येमुस्तत्स्यमनै[3]म् । आ इति खेदे । कुरुषु दे[4]शेषु न रराजे सुखदं नाभूदित्यर्थः । खेदश्च तच्छब्दानां मधुरत्वेन सुखदानामप्यसुखकत्वात् । तर्हि किं रराज इत्याह । तव कीर्तनं वर्णनकं कुरुषु रेजे । वा यद्वा । इन्द्रसुतवर्णनकमर्जुनवर्णनाबभ्राजे कर्णाह्लादकमभूदित्यर्थः ॥

भ्रेज ऐल इति राघव आबभ्रास ईश्वरगणः परिभ्रेसे ।
भ्लेस आर्किरजभूपतिराबभ्लास इत्यनुदिशं त्वयि वादाः ॥४७॥

४७. इत्येवंविधा वादास्त्वयि विषयेनुदिशं प्रतिदिशमभूवन् । के

१ बी कीर्तिन°.

१ सी डी °नुस्त्वदा°. २ सी °नुश्चकी°. ३ बी °मन् मा इ°. ४ ए शे न°.

त इत्याह। यथा[1] न्यायित्वादिना प्रकारेण त्वं भ्राजसे तथेत्यर्थः । ऐलः पुरूरवा भ्रेजे । तथेति राघवो रामचन्द्र आबभ्रासे शुशुभे । तथेती-[2]श्वरगण ईश्वरस्य हरस्यान्तरङ्गभक्त्याराधकत्वाद्गणः श्वेताख्यो राजा[3] बाणो वा परिभ्रेसे । तथेत्यार्किरर्कस्यापत्यं कर्णो[4] मनुर्वा भ्लेसे शुशुभे तथेत्यजभूपती रघुपुत्र आबभ्लासे। इत्यैलाद्या[5] आद्यनृपाः स्वगुणैस्त्वया[6] नृणां स्मार्यन्त इत्यर्थः । परिभ्रेस इत्यत्र रसंयोगे ह्रस्वस्य गुरुत्वाभावाच्छन्दो[7]भङ्गः । यदुक्तम् । "ॐ÷पविसर्गानुस्वारव्यञ्जनाह्रादिसंयोगे" । जिह्वामूलीय उपध्मानीये विसर्जनीयेनुस्वारे व्यञ्जने ह्रादिवर्जिते संयोगे च परे ह्रस्वोपि गुरुः स्यात् । अह्रादीति समस्तव्यस्तसंग्रहात् ह्रसंयोगे हसंयोगे रसंयोगे च न गुरुः । आदिशब्दाद्यथा-दर्शनं[8] क्लादिसंयोगे च । एष्वतीव्रप्रयत्नत्वं संयोगस्य गुरुत्वाभावे[9] हेतुस्तीव्रप्रयत्ने तु स्यादेव गुरुः ॥

तेरिव[10] । अवतेरिथ । त्रेपिरे । प्रफेलतुः । फेलिथ । भेजतुः । विभेजिथ । इत्यत्र "तृत्रप°" [२५] इत्यादिनैत्त्वं च द्विः ॥

जेरुः जजरुः । जेरिथ उज्जजरिथ । भ्रेमुः बभ्रमुः । भ्रेमिथ बभ्रमिथ । वेमुः[11] ववमुः । वेमिथ[12] ववमिथ । त्रेसुः तत्रसुः । त्रेसिथ अभितत्रसिथ । विफेणुः पफणुः । फेणिथ आपफेणिथ[13][14] । स्येमुः सस्यमुः । स्येमिथ[15] सस्यमिथ । स्वेनुः सस्वनुः । स्वेनिथ[16] सस्वनिथ । रेजे रराजे । [रेजिथ रराजिथ ।] भ्रेजे आबभ्राजे । परिभ्रेसे आबभ्रासे । भ्लेसे आबभ्लासे । अत्र "जृभ्रम°" [२६] इत्यादिना वैत्वं न च द्विः[17] ॥

१ सी °था ज्ञायि° २ सी °श्वरास्य. ३ डी राजवा°. ४ प त्यं वर्णो. ५ बी भाद्या नृ°. ६ सी नृगा सा°. ७ बी °न्दो भागः । य°. ८ ई °नं क्वादि.° ९ बी °भावहे° १० प °रिथः । अ° डी °रिथ । अ°. ११ प °मुः वे°. १२ सी °मिथः व°. १३ प °फलिथ. १४ सी °णिथः स्ये°. १५ प °थ स्वे°. १६ सी° निथः स°. १७ प सी डी ई °द्विः ॥ क्लेथि°.

श्रेथिथ श्लथमिमं किमु हारं श्रेथुरेवमपरेप्यथ[1] न त्वम् ।
ग्रेथिथेति[2] परिभर्त्स्य वधूः शश्रन्थुरन्ध्रनरपा[3] भवदर्थम् ॥ ४८ ॥

४८. अन्ध्रनरपा अन्ध्रदेशराजा[1] भवदर्थं हारं शश्रन्थुः[2] स्वयं गुम्फितवन्तः । किं कृत्वा । वधूः स्वभार्याः परिभर्त्स्य[3] प्रत्येकं संत[4]-र्ज्य । कथमित्याह । इमं हारं किमु[5] किमिति श्लथं शिथिलं त्वं[6] श्रेथिथ गुम्फितवती । अथाथ[7] वा न त्वमेव हारमेवं श्लथं ग्रेथिथ । गुम्फितवती किं तर्ह्यपरेप्यन्ये मरुयादयोपि हारं श्लथं[8] श्रेथुरिति । अनेनैषां भीम आदरातिशय उक्तः ॥

ग्रेथुरग्र्यमितिहासमथो जग्रन्थुरद्भुतकथाश्चरितैस्ते ।
मागधा न खलु देभुरतः शश्रन्थिथ स्वकगुणैः कतमं नो ॥४९॥

४९. मगधस्य राज्ञ इमे मागधा मगधराजलोकास्ते तव चरितैः कृत्वाग्र्यं प्रधानमितिहासम् । इतिहासो यथावृत्तम् । तत्प्रधानः[9] प्रबन्धोप्युपचारादितिहासः । तं वर्णनाविरहेण पुरावृत्तप्रतिबद्धं प्रबन्धभेदं ग्रेथुररचयन् । तथाद्भुतकथा अद्भुता रसालंकारैराश्चर्यकारिण्यो याः कथा धीरशान्तनायका गद्यबन्धाः पद्यबन्धा वा सर्वभाषावर्णनारूपाः प्रबन्धभेदांस्तांश्च[10] जग्रन्थुः । खलु निश्चयेन न देभुर्न दम्भं[11] चक्रुरान्तरभक्त्या चक्रुरित्यर्थः । अतो हेतोः स्वकगुणैः स्वका गुणाः शौर्यादय एव गुणा रज्जवस्तैः[12] कृत्वा कतमं नरं नो शश्रन्थिथ न बद्धवान् किं तु सर्वमपि वशीचकर्थेत्यर्थः ॥

---

१ डी °रं श्लेथु°. २ ए °थेथि प°. ३ ई शस्रन्थु°.

१ डी °जानो भ°. २ ई शस्रन्थुः.° ३ सी °रिभर्श्य प्र°. ४ सी डी °तर्य । क°. ५ सी किमि°. ६ डी त्वं श्लेथि°. ७ सी डी अथ. ८ बी सी डी °थं श्लेथु°. ९ सी डी °धानप्र°. १० बी सी °दास्ताश्च. ११ ए दम्भ च°. १२ ए सी डी रथव°.

नो न देभिथ ददम्भिथ नो जग्रन्थिथार्जवमिवाच्युतगोपः ।
सोसि[1] देम्भिथ पुनः किमिति त्वां संदिशन्ति यमुनातटघोषाः॥५०॥

५०. यमुनातटघोषाः कालिन्दीतटगोकुलस्थलोकास्त्वां संदिशन्ति । कथमित्याह । हे राजन् । इवो भिन्नक्रमे । अच्युतगोप इवाच्युतो विष्णुर्यो गोपो गोधुक्स यथा गोपगोप्यादिषु[1] दम्भं चक्रे न चार्जवं चकारैवं[2] त्वं नो न देभिथ न नच्छद्माकार्षीः[3] किं तु ददम्भिथ । प्रथममयोगव्यवच्छेदे वाक्यम् । दम्भेन सहायोगो व्यवच्छिद्यते । द्वितीयं त्वन्ययोगव्यवच्छेदे । अन्यस्यापि दम्भो घटते । परं त्वमेव ददम्भिथेत्यन्यस्य[4] दम्भेन योगो व्यवच्छिद्यते । त्वमेव शत्रुष्वनेकधा छलं चकर्थैवेत्यर्थः । दम्भवानप्ययं[5] कदाचिदार्जवमपि[6] कृतवान्भविष्यति नेत्याह । न जग्रन्थिथार्जवं मायाविष्णुः[7] कदाचिदपि सरलस्वभावं[8] नो चकर्थेत्यर्थः । यद्येवं ततः किमित्याह । असि त्वं सोच्युतगोपः । किमिति पुनः किमर्थं पुनर्देम्भिथान्यादृशरूपप्रकाशनेनाच्युतगोपो[9] नासीति मायां चकर्थेत्यर्थ[10] इति । एतेन यमुनातटघोषाणामच्युत इव भीमे भक्त्यतिशय उक्तः[11] ॥

श्रेन्थिथो[2]च्चिचयिथापि न पुष्पं ग्रेन्थिथ स्रज इहाखिलदिक्षु ।
कीर्तिभिः शशसिथाशु[3] तमिस्रं[4] दूरगान्ववणिथेव पुरस्तात् ॥ ५१ ॥

५१. हे राजंस्त्वं पुष्पं[12] कुसुमजातिं नोच्चिचयिथ[13] नोच्चितवान्न[14] श्रेन्थिथापि[15] न[16] ग्रथितवांश्च । परमिह जगत्यखिलदिक्षु कीर्तिभिः कृत्वा

१ बी सी डी °सि देभि°. २ ए श्रेथिथो°. ३ ए °थाश्रु त°. ४ ए बी सी डी मिश्रं दू°.

१ सी °गोपादि°. २ बी °रैव त्वं°. ३ डी °कार्षी किं. ४ डी °त्यस्य. ५ बी ई दम्भुवमन्य°. ६ सी °मपि कृ°. ७ बी डी ई °विषु क°. ८ बी ई °वं न च°. ९ सी डी °नर्देभि°. १० सी °र्थे इ°. ११ बी °क्तः ॥ श्रन्थि.° १२ बी पुष्फं कु°. १३ ए °चियथ. १४ बी °न्न श्रन्थि°. १५ सी श्रेथिथा°. १६ डी ग्रन्थित°.

स्रजः [1]पुष्पमालो[2] ग्रेन्थिथ गुम्फितवान् । श्वेतत्वात्सौरभ्याच्च पुष्पमालातुल्याः कीर्तीर्दि[3]शि दिशि प्रसारितवानित्यर्थः । तथा कीर्तिभिर्दिक्ष्वाशु त[4]मिस्रमन्धका[5]रं शशसिथ व्यनाशयो दिशो निर्मलीच[6]कर्थेत्यर्थः । तथा की[7]र्तिभिर्दूरगान्दूरदेशस्था[8]ञ्जनान्पुरस्तादिवाग्रेस्थितानिव [9]ववणिथावोच इव । निकटस्थैरिव दूरस्थैरपि त्वं गीतकीर्तिरित्यर्थः ॥

त्वद्यशः शशसतुर्ददाते चायशः शशरतुश्च गुणांस्ते ।

[1]ईर्ष्ययैतां ववणतुस्त्वयि दोषान्सिन्धुचेदिनृपती इह दृप्तौ ॥५२॥

५२. हे राजन्निह पृथ्व्यां सिन्धुचेदिनृपती सिन्धुदेशचेदिदेशराजौ दृप्तौ दर्पिष्ठौ सन्तावीर्ष्यया त्वत्संपत्तौ चेतसो व्यारोषेण त्वद्यशः श[10]शंसतुर्जेघ्नतुः । ते तवायशोवर्णवादं ददाते च । तथा ते गुणाञ् शशरतुश्च । तथा त्वयि विषये दोषान्ववणतुश्च[11] । चोत्रापि योज्यः ॥

श्रेथुः शश्रन्थुः । श्रेथिथ शश्रन्थिथ । ग्रेथुः जग्रन्थुः । ग्रेथि[12]थ जग्रन्थिथ । इत्यत्र "वा श्रन्थ°" [२७] इत्यादिना वैत् । एतत्संनियोगे नस्य लुग्न च द्विः ॥

देभुः । अत्र "दम्भः" [२८] इत्येत्त्वस्य लुग्न च द्विः ॥

देभिथ ददम्भिथ । इत्यत्र "थे वा" [२९] इति वैत्तत्संनियोगे च नस्य लुग्न च द्विः ॥ अन्ये तु श्रन्थिग्रन्थिदम्भीनां नलोपे सति नित्यमे[13]त्त्वमिच्छन्ति । नलोपं त्व[14]वित्परोक्षायां नित्यमे[15]व । तेन श्रे[16]थुः । ग्रेथुः । देभुः ॥ नलोपाभावे

---

१ डी ईर्ष्यया.

---

१ बी पुष्फमा°. २ सी °ला ग्रन्थि°. ३ सी ई °शि प्र°. ४ ए बी सी डी °मिश्रम°. ५ ए °रं शिशसि°. ६ ए °चकार्थे°. ७ सी °र्तिभूर्दूरदे°. ८ ए °रस्थादि°. ९ ए °वणि°. १० ए शसःतु°. ११ ई °श्च च यो° १२ ए °थिथः ज°. १३ डी °मेवैत्व°. १४ डी °विति परो°. १५ सी °व श्रे°. १६ डी श्रेथतुः । ग्रेथतुः । देभतुः ॥ न°.

तु शश्रन्थिथ । जग्रन्थिथ । ददम्भिथ । इत्येव स्यात् ॥ अन्यस्त्ववित्परोक्षासेट्थ-[1] वोर्नित्यमेत्वमिच्छति नलोपं त्ववित्परोक्षायामेव[2] । तेन श्रेथुः । ग्रेथुः । देभुः ॥ नलोपाभावेपि[3] । श्रेन्थिथ । ग्रेन्थिथ । देम्भिथ । इत्येवेच्छति ॥

शशासतुः । शशसिथ । ददद्राते । ववणतुः । ववणिथ । शशरतुः । उच्चिचयिथ । इत्यत्र "न शस°" [३०] इत्यादिना नैत् ॥

देहि चाच्छलमथो अवधेहि[1] श्रूयतां व्यधित सिन्धुपतिर्यत् ।
दिग्य इष्टसुरकोशमपीप्यत्त्वज्जिघांसुसुभटान्प्रजिघाय[2] ॥ ५३ ॥

५३. हे राजन्नच्छलं छलस्याभावं देहि वितर । यद्वापि अत्यर्थं वितर वा । आवयोर्वदतोः स्खलितं न गणनीयमित्यर्थः । चः पूर्ववाक्यार्थापेक्षया समुच्चये । अथो अनन्तरमवधेह्यवधानं कुरु । तथा सिन्धुपतिर्यद्व्यधिताकृत यत्तदोर्नित्याभिसंबन्धात्तच्छ्रूयताम्[11] । तदेवाहतुः[12] । त्वज्जिघांसुसुभटांस्तव[13] घातुकान्भटान्सिन्धुपतिर्दिग्ये[14] भूरिद्रव्यादिदानेन पालितवान् । तथेष्टः समभावत्वेनाभिमतो यः सुरो मरुचण्डीशादिस्तस्य[15] कोशं दिव्यजलमपीप्यत् । वयं भीमं हनिष्याम एवेति तद्वचसि स्वप्रत्ययोत्पादनायेष्टदेवतां संकल्प्य तान्स्नानजलं पायितवानित्यर्थः । तथा प्रजिघाय त्वत्पार्श्वे प्राहिणोत् ॥

---

१ ए °धे श्रू°. २ सी डी °प्यत्त्वांज्जि°.

---

१ बी °वो नित्य°. २ ए °मेवे । ते°. ३ डी °वे । श्रे°. ४ सी °थ । ग्रन्थि°. ५ सी °थ । दम्भि°. ६ ए इत्यवे°. ७ ए °णतु । व°. ८ ए °रतु । उ°. ९ ए ई शश ई°. १० ए स्खलित°. ११ सी डी °न्धाच्छ्रू°. १२ सी डी °देवहेतुः. १३ ए °ज्जिघासुः सुभ°. १४ ए °र्दित्ये भू°. १५ सी °स्त को°.

तं जिगाय[1] शिवशाणपतिं प्राजीहयत्स्वकटके स च दूतैः ।
यं जिगीषति न कोपि चिकीर्षुं[2] वाजिभिर्युधि न चापचिकाय[3] ॥५४॥

५४. तं शिवशाणपतिं शिवशाणदेशाधिपं स सिन्धुपतिर्जिगायाभिभूतवान्दूतैः[1] कर्तृभिः स्वकटके प्राजीहयच्चानाययच्च[2] । चो भिन्नक्रमे[3] । जित्वा सदा स्वसेवकं चकारेत्यर्थः । एतेनास्य प्रभुत्वशक्तिरुक्ता । प्रभुराश्वसाधनत्वाद्वाजिभिरश्वैश्चिकीर्षुमुपचेतुमिच्छन्तं[4] यं न कोपि युधि जिगीषति । तथा यं कोपि न चापचिकाय नापचितं क्षीणबलं चक्रे ॥

निश्चिका(चा)य बलमस्य न कश्चिन्निश्चिचीषति न चाशयमस्य ।
दुर्मतिस्त्वयि यदेष इयेषोवोष नः स तदियर्त्यनलत्वम् ॥ ५५ ॥

५५. अस्य सिन्धुपतेर्बलं पराक्रमं न कश्चिद्बलिष्ठोपि[5][6] निश्चिका(चा)वैतावदिति[7] निर्णीतवान् । एतेनोत्साहशक्तिरुक्ता । तथातिगूढहृदयत्वादस्याशयं चित्तं न कश्चिन्निश्चिचीषतीदृशमिदमिति न[8] निर्णिनीषति । एतेन तु मन्त्रशक्तिः । अत एवैष दुर्मतिर्दुष्टाशयः संस्त्वयि विषये यद्धिंसादिकमियेषैच्छत्तन्नोस्मानुवोष ददाह । अत एव तन्नोस्माकमनलत्वमग्नितामियर्ति स्म जगामाग्नितुल्यमभूदित्यर्थः ॥

१ ए जिघाय. २ ए °कीपु वा°. सी °कीर्पुं वा°. ३ ए °चिषाय.

१ सी °वान्तैः क°. २ बी °च्चानायच्च. ३ ई °क्रमो जि°. ४ सी डी °कीर्पुमु°. ५ ए °श्चिद्विलि°. ६ ए बी °लिष्टोपि. ७ डी ई °ति न नि°. ८ ए °वानेनो°. ९ ए न निर्णि°.

यस्तवारिररियर्ति तमेषोर्यर्ति तांस्त्वदुदयं न य ईषुः ।
ताञ्जहार विदुधाव चखानादिद्युतन्परिजगुर्य इह त्वाम् ॥५६॥

५६. यस्तवारिस्तमेष सिन्धुपतिररियर्त्यत्यर्थं[1] गच्छति त्वर्दां रं मित्रीकरोतीत्यर्थः । तथा येन्यायिनश्चरटाद्यास्त्वदुदयं तवोन्नतिं स्वा-विनाशाशङ्कया नेषुस्तानर्यर्ति । तथा तांस्त्वन्मित्रादीनसौ जहार सर्व-स्वापहारेणालुण्टयद्विदुधावेतस्ततो[2] व्यक्षिपच्चखान व्यदारयत् । य इह[3] सिन्धुदेशे त्वां परिजगुर्गुणग्रहणेनाकीर्तयन्नत एवादिद्युतन्प्रकटीचक्रुः ॥

देहि । अवधेहि । इत्यत्र "हौ दः" [३१] इत्येव[4] चायं द्विः ॥ न च द्विरि-त्युक्तेः कृतमपि द्वित्वं निवर्तते । तेन यङ्लुप्यपि देहीति स्यात् ॥

दिग्ये । अत्र "देर्दिगिः°" [३२] इत्यादिना दिग्यादेशः ॥

अपीप्यत् । इत्यत्र "के पिबः पीप्य्" [३३] इति पीप्य्[5] ॥

प्रजिघाय[6] । जिघांसु । इत्यत्र "अङे हि°" [३४] इत्यादिना[7] मूलहस्य घः ॥

अङ इति किम् । प्राजीहयत् ॥

जिगीषति । जिगाय । इत्यत्र "जेर्गिः°" [३५] इत्यादिना गिः ॥

चिकीषुं[8] निश्चिचीषति । अपचिकाय निश्चिचाय । इत्यत्र "चेः किर्वा" [३६] इति वा[9] किः ॥

इयेष । उवोष । इयर्ति । इत्यत्र "पूर्वस्य°" [३७] इत्यादिना—इयुवौ ॥

अर्तेर्यङ्लुपि द्वित्वे पूर्वस्याकारे[10] "रिरौ च लुपि" [४.१.५६] इति रिरी—आगमे तदिवर्णस्य चेयूभावे[11] सति अरियर्ति । एके त्वत्रेयं नेच्छन्ति । अर्यर्ति[12] । तन्मत-

१ प° °रियर्त्य°. २ प° °दिगुधा°. ३ ई सी व्यक्षेप°. ४ सी °त्र दे पि°. ५ प° पीप्य ॥. ६ बी प्रतिजि°. ७ डी °ना पूर्वह°. ८ बी °कीर्षुं नि°. ९ सी वा दिः ॥ इ°. १० सी °र्वत्याका°. ११ बी चेयभा°. १२ डी °र्यंर्ति । त°.

संग्रहार्थं पूर्वस्येति योः समानाधिकरणं विशेषणं तेनेकारोकारमात्रस्यैव पूर्वस्ये-युवौ ॥ अस्य इति किम् । ईयुः ॥

जहार । इत्यत्र "ऋतोत्" [३८]इति[2] ऋतोत् ॥

परिजगुः । विदुधाव । इत्यत्र "ह्रस्वः" [३९] इति[3] ह्रस्वः ॥

परिजगुः । जहार । इत्यत्र "गहोर्जः" [४०] इति जः ॥

अदिद्युतन् । इत्यत्र "द्युतेरिः" [४१] इति–इः ॥

चखान । विदुधाव । इत्यत्र "द्वितीय°" [४२] इत्यादिनाद्यतृतीयौ ॥

नो ऋतिच्छिषति सामनि तिष्ठेवाभ्यूचिच्छिषति किं तु स दण्डे ।
छीचकार स यदा परिटिष्ठेवाथ जीव बुब्रुवे नृपचक्रम् ॥ ५७ ॥

५७. स सिन्धुपतिरुद्धतत्वात्सामनि सान्त्वनोपाये नो ऋतिच्छिषति । न जिगमिषति । ऋच्छ गतावप्यन्ये । तथा सामन्येव विषये तिष्ठेवावज्ञया थूत्कार । तर्हि क जिगमिषतीत्याह । किं तु दण्डेन्त्योपायेभ्यूचि-च्छिषत्याभिमुख्येन यियासति । अत एव स सिन्धुपतिर्यदा छीचकार चुक्षावाथाथ वा यदा परिटिष्ठेव थूत्कृतवांस्तदा नृपचक्रं जीव बुब्रुवे बभाषे । जीवेति कर्मपदमनुकरणम् । अनुकार्यानुकरणयोरभेदविव-क्षया द्वितीयाया अभावः । यद्वात्रेति शब्दोगम्यः । जीवेत्युवाचेत्यर्थः ॥

तिष्ठेव टिष्ठेव । इत्यत्र "तिर्वा ष्ठिवः" [४३] इति वा तिः ॥ केचित्तु "स्वरेभ्यः" [१.३.३०] इति द्विरुक्तस्य छस्य द्वित्वे सति पूर्वस्य त्यादेश-मिच्छन्ति । तन्मते ऋतिच्छिषति इति स्यात् ॥

---

१ बहुषु पुस्तकेषु ष्ठिव् इति धातो रूपाणां स्थानेषु ठू इत्यत्र ट् इति दृश्यते ।

---

१ डी °त्रस्ये°. २ सी °ति रितो°. ३ ए हस्व ॥. ४ सी डी °च्छत् ग°. ५ ए °येभ्यचि°.

अभ्यृचिच्छिषति । इत्यत्र "व्यञ्जनस्य°" [४४] इत्यादिना पूर्वस्य व्यञ्जनस्यानादेर्लुक् ॥

तिष्ठेवे । इत्यत्र "अघोषे शिटः" [४५] इति शिटो लुक् ॥

छीवकार । चुक्रुवे । अत्र "कङश्चञ्" [४६] इति चञौ ॥

चोकवीषि किमु चीनपते कोकूयसे किमिति बर्बरराज ।
कोकवीषि किमु तेजनृपेत्थं वावदीति नृपतीन्नुवतोसौ ॥ ५८ ॥

५८. यदा नृपास्तं प्रसादनाय स्तुवन्ति तदासौ लक्ष्म्यादिमदेनावहेलया रे चीनबर्बरतेजदेशाधिपाः किमिति पूत्कुरुथेति निर्भर्त्सयतीत्यर्थः । वृत्तद्वयेनामुनास्यानेके नृपा दासभूताः सन्तीति दुःसाध्यत्वोक्तिः ॥

बेभिदीति स जहेति वनीवञ्चीति भेद्यपरिहेयसमर्थान् ।
जात्वनाकुलमतिर्न सनीस्रंसीति चोन्नतमनोरथशैलात् ॥ ५९ ॥

५९. स सिन्धुपतिर्भेद्यपरिहेयसमर्थान् भेद्यानुपजापार्हान्नृपान्बेभिदीत्युभयवेतननरव्यापारणादिनात्यर्थमुपजपति । तथा परिहेयान्महादुर्गाद्याश्रितत्वेन बह्वायाससाध्यत्वात्साधनेप्यल्पफलत्वात्परित्याज्यान्नृपाञ्जहेत्यत्यर्थं त्यजति । तथा समर्थानधिकबलान्नृपान्वनीवञ्चीति कुटिलं याति । अन्यदिगभिमुखं यात्राकरणेन समर्थान्विश्वास्य तेष्वज्ञायमानेश्छलेन पततीत्यर्थः । अत एव शत्रुभयाभावा-

१ ए बी °नीसंस्रीति.

१ डी °च्छिष्यति. २ डी °क् न ॥. ३ ई° व । टिष्टेव । इ°. ४ सी °षे शटः. ५ डी लुक ॥. ६ ए चङौ ॥. ७ ए °त्कुथे°. ८ बी वहया°. ९ बी °ल्पत्वा°. १० ए °त्याजान्नृ°. ११ ए °पान्वनी. १२ बी °नच्छले°. सी डी °नस्थले°.

दनाकुलमतिर्निर्भ्रिन्तः सन्नुन्नतमनोरथशैलाज्जातु न सनीस्रंसीति च नात्यर्थं पतति च। चः पूर्ववाक्यार्थापेक्षया समुच्चये। एतेनास्य नीतिशास्त्रोक्तानुसारित्वाद्दुर्जेयतोक्ता॥

द्राक्कनीकसति दिक्षु दनीध्वस्यन्त आपदि पनीपतति स्म।
आपनीपदति मङ्क्षु चनीस्कन्दत्यमुष्य कटकेम्बुधिभूपाः॥ ६०॥

६०. अमुष्य सिन्धुपतेः कटके मङ्क्षु शीघ्रप्रयाणैश्चनीस्कन्दतिच्छलचारित्वेन यियासितदिग्विशेषगोपनाय कुटिलं गच्छति आपनीपदति च कुटिलमायाति चेतस्ततो भ्राम्यति सतीत्यर्थः। अम्बुधिभूपा द्वीपवासिनृपा द्राक् दिक्षु चनीकसति स्म मा स्मेदमस्मासुच्छलेन पप्तदिति भयेन कुटिलं गच्छन्ति स्म। अत एव दनीध्वस्यन्ते स्म सैन्यादिनात्यर्थं क्षीणाः। अत एव चापदि विपत्तौ पनीपतति स्मात्यर्थं पेतुः। एतेनास्य सैन्ये चलिते महादुर्गस्था अपि भयान्न सुखेन शेरत इत्युक्तम्॥

जङ्गमीति च बलैः स बनीभ्रंश्यन्त उच्चशिखराणि गिरीणाम्।
जञ्जभत्यहिपतौ परिबम्भञ्जीति जीर्णकमठोपि च पृष्ठम्॥ ६१॥

६१. स सिन्धुपतिर्बलैर्जङ्गमीति दिग्जयायच्छलचारित्वात्कुटिलं गच्छति। ततश्च गिरीणामुच्चशिखराण्युन्नतशृङ्गाणि बनीभ्रंश्यन्ते चानन्तबलसंमर्देन गिरीणां कम्प्यमानत्वादत्यर्थमधः पतन्ति

१ ए डी द्राकनी°. २ ए सी डी °मुख्यक°. ३ सी डी स वनी°. ४ बी °भ्रस्यन्त. ५ डी °बम्भ्रञी°. ६ ए बी पृष्टम्.

१ सी ई °भ्रितः. २ बी °नीभ्रंसी°. ३ ए बी सी ई °ति छल°. ४ सी कुल°. ५ ए बी सी डी पतदि°. ६ ए °पति वलै°. ७ ए दिग्गया°. ८ ए डी °णि वनी°. ९ सी °नीभृश्य°. १० बी °भ्रसन्ते. ११ ए °त्यर्थः म°.

च । चो भिन्नक्रमे । तथाहिप्तौ शेषराजे जञ्जभति बलभारेणातिखिन्नत्वाद्गर्हितं गात्रं विनमयति सति जीर्णकमठोप्यादिकूर्मोपि पृष्ठं परिबम्भश्चीति[1] चात्यर्थं मोटयति च ॥

ये हि दन्दहति दन्दशति[1] द्राक्पंपशत्यपि च तान्किल मन्त्रान् ।
जञ्जपीत्यनयचञ्चुरितासौ पम्फुलीति च समीहितचूर्त्या ॥६२॥

६२. हि[2] स्फुटं ये मन्त्रा दन्दहत्यभिरूपविधानेन गर्हितं दहन्ति द्राग्दन्दशति सर्पादिरूपविधानाद्गर्ह्यं दशन्ति पंम्पशत्यपि[3] च । पंशिति[4] सौत्रो धातुः । पंषी[5] बाधनस्पर्शनयोः । पंषीस्थाने[6] पशीति केचित् । शिलावृष्टिनागपाशबन्धादिविधानेनात्यर्थं[7] पशन्ति बार्धन्ते[8] च । तान्मन्त्रान्किलेति सत्ये । अनयचञ्चुरितान्याये[9] गर्ह्यं चरणशीलोसौ सिन्धुपतिर्जञ्जपीति गर्ह्यं जपति हिंसाभिप्रायेण जापाज्जापस्य गर्ह्यता । तथा समीहितचूर्त्या वाञ्छितक्रियया पम्फुलीति चात्यन्तं फलयुक्तश्च[10] स्यान्मन्त्रजापोस्य न निष्फल इत्यर्थः । एतेनास्य[11] देवता[12]-वशक्त्युक्तिः ॥

कोकूयसे[13] । अत्र "न कवतेर्यङः"[14] [४७] इति पूर्वस्य नै[15] चः ॥ शवन्निर्देशः[16] कौतिकुवत्योर्निवृत्त्यर्थः[17] । यङ्लुपि च निषेधो न स्यात् । चोकवीषि[18] ॥ अन्ये तु यङ्लुप्यपि प्रतिषेधयन्ति कोकवीषि[19] ॥

---

१ सी °ति XXX द्राग्दन्दशति. २ प °क्पंशपत्य°.

---

१ सी °ति ॥. २ ई हि स्फटं. ३ बी °म्पश्यत्य°. ४ डी पशति. ५ ई पथी बा°. ६ ई पथीस्थानीप°. ७ प °नाशग° ८ ई °धन्ति च. ९ सी °नयं च°. १० प ई °युक्तः स्या°. ११ बी सी डी °स्य देव°. १२ सी °तासश°. १३ बी सी डी ई °यते । अ°. १४ प °यंत्रः इ°. १५ सी डी न च ॥. १६ बी सी डी शवनि°. १७ प °निंवृत्त्य°. १८ डी °वीति ॥ अ°. १९ डी वीति ॥ वा°.

वावदीति । बेभिदीति । इत्यत्र "आगुणावन्यादेः" [४८] इत्यागुणौ ॥ अन्यादेरिति किम् । वनीवञ्चीति ॥

जहेति । इत्यत्र "न हाको लुपि" [४९] इति पूर्वस्य नात् ॥

वनीवञ्चीति । सनीस्रंसीति । दनीध्वस्यन्ते । बनीभ्रश्यन्ते । चनीकसति । पनीपतति । आपनीपदति । चनीस्कन्दति । इत्यत्र "वञ्चस्रंस०" [५०] इत्यादिना नीरन्तः ॥

जङ्गमीति । इत्यत्र "मुरतः०" [५१] इत्यादिना मुरन्तः ॥

जञ्जपीति । जञ्जभति । दन्दहति । दन्दशति । परिबम्भञ्जीति । पम्पशति । इत्यत्र "जप०" [५२] इत्यादिना मुरन्तः ॥

चञ्चुरिता । पम्फुलीति । इत्यत्र "चरफलाम्" [५३] इति मुरन्तः ॥

चञ्चुरिता । चूर्त्या । पम्फुलीति । इत्यत्र "ति च०" [५४] इत्यादिनात उः ।

नाधिचेदि च वचांसि नरीनृत्यन्त आशु न च धीर्नरिनर्ति ।
नर्नृतीति यदसौ भुजदर्पाद्दिक्षु नरीनृतदवारितसेनः ॥ ६३ ॥

६३. यद्यस्माद्धेतोरसौ चेदिर्भुजदर्पान्नर्नृतीत्यत्यर्थं नृत्यति । कीदृक्सन् । दिक्षु नरीनृतत्यो जैत्रत्वेन दर्पोद्धुरत्वादतिशयेन वल्गन्त्योत एवावारिताः केनाप्यनिषिद्धाः सेना यस्य सः । तस्मादधिचेदि च चेदिराजविषये च न केवलं सिन्धुपताविति चार्थः । वचांस्येतावन्मात्रदर्पोसावित्यावयोर्वचनान्याशु शीघ्रं स्तोककाले न नरीनृत्यन्ते नात्यर्थं प्रसरन्ति । धीश्चैतद्दर्पमानविषया बुद्धिश्चाशु न नरिनर्ति । एतद्दर्पो बंहीयस्त्वाद्दसादादिभिर्बहुकालेन ज्ञेयो वाच्यश्चेत्यर्थः ॥

१ डी ई °दील°. २ डी °नीध्वंस्यते । चनीक°. ३ सी ई °भ्रस्यन्ते. ४ सी डी °मील°. ५ ए बी सी डी °अपति. ६ ए °ति पुर°. ७ सी डी °र्त्यां । पुम्फली°. ८ बी °नृत्यतो जै°. ९ ए ई °शयव°. १० ए °वावारि°. ११ सी डी °रिता के° १२ सी डी °षिद्धा से°. १३ बी °त्यादीनि वच°. १४ बी सी डी °र्पो वही°. १५ बी °दसादा°.

नेरीनृत्यन्ते । अत्र "ऋमतां[2]री(रीः) [५५] इति रीः ॥

नरिनर्ति । नर्नृतीति । नरीनृ[3]तत् । इत्यत्र "रिरौ च लुपि" [५६] इति रिरौ रीश्च ॥

क्ष्मामनेनिजुरवेविषुरिन्दोर्न ह्यवेविजुरिहेश यशांसि ।

यानि तेन स पिपर्ति [1]बिभर्तीयर्ति तान्यहह सीम जिहीते ॥ ६४॥

६४. हे ईश ते तव यानि यशांसि क्ष्मामनेनिजु[4]र्निर्मलीचक्रु[5]-रवेविषुर्व्याप्नुवन्नत एवेन्दोश्चन्द्रान्न ह्यवेविजुर्नैव पृथगभवन्निन्दुतु-ल्यानीत्यर्थः । तानि स[6] चेदिर्न पिपर्ति त्वदरिभिर्विलुप्यमानानि न रक्षति न बिभर्ति गाने[7]न न पोषयति न धारयति वा नेयर्ति[8] न याति नाश्रयतीत्यर्थः । अतश्चाहहेति खेदे कष्टं सीम सकलभूमण्डल-व्याप्ति[9]लक्षणा त्वं[10]यशोमर्यादा जिहीते याति भ्रश्यतीत्यर्थः ॥

अम्बुधिं प्रसृतिभिः स मिमीते यो मिमासति तदश्वरथेभम् ।

तं जिजावयिषुरत्र न कालोप्यस्य संयियविषुर्युधि कोन्यः ॥६५॥

६५. यो[11] नरस्तदश्वरथेभं तस्य चेदेरश्वान्रथान् गजांश्च मिमासति संख्यातुमिच्छति सोम्बुधिं प्र[12]सृतिभि[13]श्चुलुकैर्मिमीते संख्याति । तथात्र युधि कालोपि यमोपि तं चेदिं न जिजावयिषुरस्यातिशूरत्वेन स्वमरणा-शङ्कया नात्मा[14]नं गमयितुमिच्छुस्ततो युधि कोन्योस्य संयियविषुः[15] संबद्धीभवि[16]तुमिच्छुः ॥

१ डी बिभ्रर्ती°.

१ सी नरिनार्ति । नरी°. २ प °तां रीः ॥ न°. ३ प बी सी डी °नृत्यत्. ४ सी °निर्मे°. ५ प °क्रुरवेविंषु°. ६ सी स चिदि°. ७ प ई °न पो°. ८ सी °त्यर्थोंतत°. ९ सी °व्याधिल°. १० सी त्वद्योशो°. ११ सी योन्यर°. १२ बी प्रभृति°. १३ सी डी °भिश्चलु°. १४ प नात्मं ग°. १५ प संनियि° १६ प °विभि°.

क्ष्मां रिरावयिषता कटकेनारीँल्लिलावयिषतीह सहेलम्।
को विभावयिषति स्म न सख्यं कः शुशावयिषति स्म न भक्तिम्
॥ ६६ ॥

६६. कः सख्यं चेदिना सह मैत्रीं न विभावयिषति स्म भावयितुमिच्छति स्म। सर्वोपि मृत्युभयात्सख्यं चिकीर्षति स्मेत्यर्थः। तथा[1] को भक्तिं न शुशावयिषति स्म नाविवर्धयिषत्[2]। क सति। इह चेदौ। किंभूते। क्ष्मां रिरावयिषता पादाघातैः शब्दायमानां प्रयोक्तुमिच्छता कटकेन कर्त्रा सहेलं[5] लीलयैवारीँल्लिलावयिषति छेदयितुमिच्छति। एतेन यात्रारम्भिण्यप्यस्मिन्सर्वेपि नृपा वशीभूता इत्युक्तम्॥

अनेनिजुः। अवेविजुः[8]। अवेविषुः। अत्र "निजां शित्येत्"[9] [५७] इति पूर्वस्यैत्[10]॥

पिपर्ति। इयर्ति। बिभर्ति। मिमीते। जिहीते। अत्र "पृभृ०" [५८] इत्यादिना पूर्वस्य-इः॥

मिमासति। इत्यत्र "सन्यस्य"[11] [५९] इति-इः॥

जिजावयिषुः[12]। संयियविषुः। रिरावयिषता। लिलावयिषति। बिभावयिषति। इत्यत्र[13] "ओर्जान्तस्था०" [६०] इत्यादिना-इः॥ ननु ण्यन्तानां वृद्ध्यावादेशयोः कृतयोर्द्वित्वे सति पूर्वस्योकारान्तता न संभवति। तत्र "सन्यस्य" [५९] इत्यनेनैव सिद्धे किं गुरुणा सूत्रेण। एतावत्तु विधेयम्। ओः पयेवर्णे इति। पिपविषते। यियविषतीत्यत्र पूर्वस्योकारान्तस्येत्वं यथा स्यात्। सत्यम्। णौ यत्कृतं कार्यं तत्सर्वं[14] स्थानिवदिति न्यायज्ञापनार्थम्। तेन शुशावयिषतीत्यादि सिद्धम्॥

---

१ प शुभाव°.

---

१ सी डी °था भक्तिं को न. २ प शुभावायि°. ३ प बी °त्। इ°. ४ सी पादघा°. ५ प °हे लील°. ६ प °वारील्लि°. ७ सी डी °यितु°. ८ प °विषुः। अ°. ९ प °जां सत्ये°. बी °जां शेत्ये°. १० बी °स्यैतत्. ११ बी सनस्य. १२ सी °यिषु। सं°. १३ प °त्र कर्जा°. १४ सी ततत्स°.

अन्यभूमिपतिनाम सदा शिश्रावयिष्यत इहास्य न कैश्चित् ।
एक एव हि भवान्नृपतिः शुश्रावयिष्यत इदं स समग्रैः ॥ ६७ ॥

६७. इह पृथ्व्यामन्यभूमिपतिनाम सदा न कैश्चित्कैरपि नृपादिभिः शिश्रावयिष्यतेहंयुत्वेनान्यनृपनाम्नोप्यसहिष्णुत्वादस्य न संभालयितुमिष्यते किं तु हे चेदिपते हि स्फुटमेक एव भवान्नृपतिरिदमस्य समग्रैः सर्वैः शुश्रावयिष्यते स्म । इदमिति भिन्नक्रमे । अस्येत्यस्य व्याप्यत्वेपि संबन्धविवक्षया षष्ठी । एतेनायं त्वन्नामापि न सहत इत्युक्तम् ॥

तैरनेन वसु दण्डपदे सिस्रावयिष्यत[1] इलापतिवर्गैः ।
यैः किलोद्भटभुजैरभितोसुस्रावयिष्यत धनं धनदेन ॥६८॥

६८. तैरिलापतिवर्गै राजौघैः[3] कर्तृभिरनेन चेदिना हेतुकर्त्रा[4] दण्डपदे दण्डस्थाने वसु द्रव्यं सिस्रावयिष्यते क्षारयितुमिष्यते । किलेति सत्ये । उद्भटभुजैर्बलिष्ठबाहुभिर्यैर्हेतुकर्तृभिरभितः सामस्त्येन[5][6][7] धनदेन प्रयोज्यकर्त्रा धनमसुस्रावयिष्यत भुजाबलेन यैर्धनदोपि दण्डं जिघृक्षित इत्यर्थः । एतेनास्य कोशसंपदतिशयोक्तिः ॥

अस्य कोपकठिनं हृदयं दिद्रावयिष्वरिकुलं चटु वक्ति ।
भक्तिवाग्भिरमुना खलु नादुद्रावयिष्यत जनः पुनरन्यः ॥६९॥

६९. अस्य चेदेः कोपकठिनं हृदयं[12] दिद्रावयिषु प्रसिसादयिष्वि-

१ ए सिस्राव°. बी सिश्राव°.

१ ए °युक्तेना°. २ ए सर्वैषुः श्रा°. ३ डी राजोघैः ४ ए हेतुः क°. ५ ए बी °लिष्टना°. ६ बी °बाहूभि°. ७ ए भियैहेतु°. ८ ई °मस्तेन. ९ बी °सुश्राव°. १० सी डी भुजब°. ११ ए °क्षत. १२ ई °नं दि°.

त्यर्थः । अरिकुलं चटु चाटुकारान्वक्ति । अमुना चेदिना पुनरन्यो [1]जनः शत्रुलक्षणः खलु निश्चयेन भक्तिवाग्भिर्भक्तिप्रधानवचनैर्नोद्रुद्रा-[2]वयिष्यत । एतेनामुनारी[3]णां मानो भग्नो न तस्य केनापीत्युक्तम् ॥

अस्य चाश्वबलमुद्भटमुत्पिप्रावयिष्विव रयादधिरूढान् ।
वीक्ष्य सप्ततुरगी ध्रुवमुत्पुप्रावयिष्यत इनेन न सापि ॥ ७० ॥

७०. ध्रुवं सापि सकलाश्वोत्कृष्टतया प्रसिद्धापि सप्ततुरगीनेन रविणा [4]नोत्पुप्रावयि[5]ष्यते नोर्ध्वं गमयितुमिष्यते । किं [6]कृत्वास्य चेदे-रश्वबलं वीक्ष्य । किंभूतम् । उद्भटमश्वेषूत्कृष्टमत एव रयाद्वेगाद-धिरूढानश्ववारानुत्पिप्रावयिष्विवो[7]र्ध्वं गमयितुमिच्छुव । उद्भटत्वाद-धिरूढानां रयेणोत्पिप्रावयिषुर्त्वा[8]चैतदश्वबलं म[9]त्कां सप्ताश्वीमुपरि यान्तीं मा भिषिषेणादित्याशङ्कयार्केण नैतदूर्ध्वं गमयिष्यत इति सं-भावयामीत्यर्थः ॥

पर्वतप्रतिममस्य महीं पिप्लावयिष्विभकुलं मदपूरैः ।
चिन्तयन्स नियतं न मुदापुप्लावयिष्यत हरिः स्वगजेन ॥ ७१ ॥

७१. स ऐरावणवाहनत्वेन सर्वत्र प्रसिद्धो हरिरिन्द्रोपि नियतं निश्चितं मुदा हेतुना स्वगजेनैरावणेन हेतुकर्त्रा नापुप्लावयिष्यतं [10]मुदा प्लवमानो हर्षावस्थां प्राप्नुवन्हरिः स्वगजेन प्रयोक्तुं नैष्यतेत्यर्थः । की-दृक्सन् । अस्य चेदेरिभकुलं चिन्तयन्परिभावयन् । किंभूतं पर्वत-प्रतिमं तथा मदपूरै[11]र्म[12]हीं पिप्ला[13]वयिषु । वृत्तद्वयेनामुना[14]यमुत्कृष्टाश्वेभसं-पदा दुर्जेय इत्युक्तम् ॥

---

१ सी जन श°. २ ए °ष्यथ । ए° ३ सी डी °णां मदो भ°. ४ ए नोपुप्रा°. ५ ए °ष्यति नो°. ६ सी °त्वा चे°. ७ ए बी °वोर्द्ध ग°. ८ ए °त्वाचेत°. ९ ई मम स°. १० सी °ष्यते मु°. ११ ए सी °मंही पि°. १२ सी पिप्लव°. १३ सी °यिष्ट । वृ°. १४ ए °ययत्कृ°.

राजभिर्बहुभिरप्यसकौ चिच्यावयिष्यत उदग्रतरः कैः ।
येन सोपि किल दर्पजुषा चुच्यावयिष्यत इनस्त्रिदशानाम् ॥७२॥

७२. येन चेदिना दर्पजुषा सता सं[1] शौर्यादिगुणैः प्रसिद्धस्त्रिद-शानामिनोपि शक्रोपि चुच्यावयिष्यत इन्द्रपदाद्भ्रंशयितुमिष्यतेसक्तौ[2] चैद्य उदग्रतरः पूर्वोक्तबलादि[3]संपदोद्भटतरो बहुभिरपि राजभिः कैश्चि-च्यावयिष्यते । एतेन त्वां विना त्वन्नृपैर्बहुभिरप्यसौ न साध्य इत्युक्तम् ॥

शिश्रावयिष्यते शुश्रावयिष्यते । सिं[4]स्रावयिष्यते [5]असुस्रावयि[6]ष्यत । दिद्रावयिषु अदुद्रावयिष्यत । उत्पिप्रावयिषु उत्पुप्रावयिष्यते । पिप्लावयिषु अपुप्लावयिष्यं[7]त । चिच्यावयिष्यते चुच्यावयिष्यते । अत्र[8] "श्रुस्रु°" [६१] इत्यादिना पूर्वोत इर्वा ॥

दीर्घनिद्रमथ सो[1]रिगणं सुष्वापयिष्वसिकरोचकथत्तत् ।
मन्त्रिणां बलमचीकरदग्रे केतुभिर्ग[2]गनमौर्णुनवद्यत् ॥ ७३ ॥

७३. अथैवं चरोक्त्यनन्तरं स भीमस्तत्त्वरवचनं मन्त्रिणामचकथं[9]त्तैः सहामन्त्रयदित्यर्थः । कीदृक्सन् । दीर्घा कदाचिदप्यजागरणेन प्रलम्बा निद्रा मृत्युरूपा यत्र तद्यथास्यादेवमरिगणं सुष्वापयि[10]षुः शायि-तुमिच्छुरसि[11]ः करे यस्य सः । कोपा[12]वेशाच्छत्रूच्छे[13]दायात्तखड्ग इत्यर्थः ।

---

१ सी °रिमण सु°. २ बी °गमन°.

---

१ बी सी डी स सौर्या°. २ ए °तेशक्तौ. ३ ए °लालिसं°. ४ सी सिश्राव°. ५ ए असुश्राव. ६ बी ष्यते । दि°. ७ सी °ष्यते । चि°. ८ ए °त्र स्रुस्रु इ°. ९ ए °थत्तै स°. १० डी °षुः स्वापयि°. ११ सी °रसि क°. १२ डी कोपवे°. १३ सी °त्रूख°.

सापेक्षत्वेप्यत्र समासो नित्यसापेक्षत्वात्। तथा यद्बलं केतुभिर्ध्वजैः कर्तृभिर्गगनमौर्णुनेवद्बृंहीयस्त्वेनाच्छादयत्तद्बलमग्रे स्वस्याग्रतोचीकरत्। शत्रवभिषेणनायासंख्यं सैन्यमग्रे कृत्वा चचालेत्यर्थः ॥

सुष्वापयिषु। इत्यत्र "स्वपो णावुः" [६२] इति पूर्वस्योत् ॥

अचीकरत्। इत्यत्र "असमान°" [६३] इत्यादिना पूर्वस्य सनीव कार्यम्॥ असमानलोप इति किम्। अचकथत् ॥

अचीकरत्। इत्यत्र "लघोर्°" [६४] इत्यादिना दीर्घः ॥ अस्वरादेरिति किम्। और्णुनवत् ॥

तं स सिन्धुवहमाप महीं योतस्तरत्क्षितिभृतोददरच्च।
नोत्तितीर्षुमुदतत्वरदब्धिं द्रागसस्मरदपारपयोभिः ॥ ७४ ॥

७४. स भीमस्तं सिन्धुवहं पञ्चनदाख्यं वहनमाप प्राप यो वहो महीमपारपयोभिरपर्यन्तजलैः कृत्वातस्तरत्प्लावितवान्क्षितिभृतोद्रीनददरच्च जलाघातैर्व्यदारयच्च। अत एव द्रागब्धिमसस्मरत्स्मरयामासार्थादब्धिं दृष्टपूर्विणो लोकान्। अत एव चोत्तितीर्षुमुत्तरीतुमिच्छुं नरं नोदतत्वरद्दुस्तरत्वाशङ्कया नोत्सुकमकार्षीत् ॥

द्यामपस्पशदपप्रथदम्भोमम्रदत्तटतरूंश्च तरङ्गैः।
यस्तटानि मकरैरववेष्टद्दाविवेष्टदथ कं न भयेन ॥ ७५ ॥

७५. यो वहस्तरङ्गैः कर्तृभिर्द्यां व्योमापस्पशत्स्पर्शितवान्। तथाम्भोपप्रथद्विस्तारयत्। तथा तटतरूनमम्रदच्चोन्मूलयामास च। तथा

१ ए °दाधिवे.°

१ सी °त्वशापे°. २ डी °वद्वही°. बी ई °वद्बंही°. ३ सी °संख्यसै°. ४ सी कार्ये ॥ अ°. ५ सी °दाख्यव°. ६ सी ददार°. ७ सी डी ई °रत्स्मार°. ८ डी त्तिरीर्षुं°.

यः कूलंकषत्वेन मकरैर्मत्स्यैः कर्तृभिस्तटान्यववेष्टव्यापयामास । अथैवं सति यो भीष्मत्वाद्भयेन कर्त्रा कं नरं नाविवेष्टत्[1] ॥

योम्बुधिर्नु जलदानचचेष्टत्स्वर्वधूः सुरसरिन्न्वचिचेष्टत् ।

न त्ववाजगणदत्र जनोयं कण्ठभूषणमजीगणदुर्व्याः ॥ ७६ ॥

७६. यो वहोम्बुधिर्नु जलदानचचेष्टज्जलग्रहणाय व्यापारितवान् । तथा यो निर्मलजलत्वेन सुरसरिन्नु व्योमगङ्गेव स्वर्वधूर्देवीरविचेष्टज्जलक्रीडार्थं व्यापारयत् । अत एवात्र पृथ्व्यां यं वहं जनो न त्ववाजगणदल्पीयान्निष्फलश्चायामिति नैवावज्ञातवान् । किं तु यं जन उर्व्याः पृथ्वीरमण्याः कण्ठभूषणं ग्रैवेयकमेतदाकारत्वादजीगणज्ज्ञातवान् ॥

असस्मरत्[6] । अददरत् । उदतत्वरत् । अपप्रथत् । अमम्रदत् । अतस्तरत् । अपस्पशत् । अत्र "स्मृदृत्वर°" [६५] इत्यादिना पूर्वस्यात् ॥

अववेष्टत्[8] आविवेष्टत् । अचचेष्टत् । अचिचेष्टत् । इत्यत्र "वा वेष्टचेष्टः" [६६] इति वात् ॥

अजीगणत् । अवाजगणत् । इत्यत्र "°ईश्च गणः" [६७] इति-ईदत्त्व ॥

आदुरानृधुरथानशिरे चानश्रुराञ्छुरभितोपि यदापः ।

वाञ्छलेन गिरिराड्किमिहानाञ्छेति येन च बभूव वितर्कः ॥७७॥

७७. येन वहेन हेतुना वितर्कोर्थान्नृणां बभूव च । कथमित्याह । यद्यस्माद्धेतोरापोभितः समन्तादूर्ध्वं तिर्यग्दिक्षु चानृधुर्ववृधिरे । अथ वृद्ध्यनन्तरमभित आनशिरे व्यापुस्तथाभित आनश्रुश्च ग्रक्षयामासुरार्द्रीचक्रुश्चेत्यर्थः । चो भिन्नक्रमे । आञ्छुरपि दीर्घीबभूवुश्च । अपिः समु-

१ बी °विचेष्ट°. २ ए °नववेष्ट°. ३ ए °रविचे°. ४ सी डी °निफल°. ५ ए °षणग्रै°. ६ डी °त् । उ°. ७ ई °पश्यश°. ८ बी अचचेष्ट°. ९ डी °त् अवि°. १० ए बी ईच ग°. ११ बी सी डी °श्चश्चार्द्री°. १२ ए °र्थश्चो-क्रिम°. १३ ए सी अपि स°.

ब्ययार्थो भिन्नक्रमे। अत एवाभित आदुरिव सामस्त्येन भुक्ता इव। ये हि यथाकामं भुक्ताः स्युस्ते ह्यङ्गेन वर्धन्ते। ततः स्थौल्यादिशो व्याप्नुवन्ति स्निग्धाङ्गत्वचा म्रक्षिता इव च स्युर्दीर्घीभवन्ति चेति। अतश्च वीाश्छलेनैवं प्रवृद्धव्यापकदीर्घीभूतजलव्याजेनेह सिन्धुदेशे किं गिरिराड्हिमालय आनाञ्छ दीर्घीबभूवेति॥

किं बभूव इह चन्द्रमसा सुष्वाप किं हरिरिहेह बुभूवे।
किं श्रिया भृगुसुतः किमम्मुं विव्याध चेति जनता यमनूचे॥७८॥

७८. यं वहमनु लक्ष्यीकृत्य जनतोचे। कथमित्याह। चन्द्रमसा किमिह वहे बभूव उत्पन्नम्। तथा हरिर्विष्णुः किमिह वहे सुष्वाप तथेह वहे किं श्रियौ बुभूवे तथा भृगुसुतः परशुरामः किममुं वहं विव्याध च शरेणाताडयच्चेति। समुद्रे हि किल चन्द्रश्रियावुत्पन्ने हरिश्च सुष्वाप रामश्च समुद्रपर्यन्तायां भूमौ विप्रेभ्यो दत्तायां स्वावासभूम्यर्थमब्धिं शरेणाताडयादिति प्रसिद्धिः। अयं वहो महाप्रमाणत्वेनाब्धितुल्य इति जनतात्रैवमाशङ्कतेत्यर्थः॥

वर्त्म विव्ययिथ जिज्यिथ सीमां किं नु विव्यचिथ वारिधिरेव।
को भ्रमादिदमुवाद न यस्मिन्विव्यथे च हृदि को न तितीर्षुः॥ ७९॥

७९. भ्रमात्समुद्रभ्रान्तेर्यस्मिन्वहविषय इदं को नोवाद नावदत्। किमित्याह। वर्त्म विव्ययिथातिदीर्घत्वेनाच्छादितवान्रुद्धवानित्यर्थः। तथातिविस्तीर्णत्वात्सीमामियत्प्रमाणोयमिति मर्यादां जिज्यिथ तत्य-

---

१ सी बुभुवे. २ सी °ज्यिव सी°.

---

१ सी डी °ङ्गत्वाच्चाम्र°. २ प स्युद्दीर्घी°. ३ बी वाछ्ले°. डी वा स्थले°. ४ सी °हे कं श्रि°. ५ प सी °या बभू°. ६ सी डी, पर्शुरा°. ७ प °मः किम° सी °मः केम°. ८ सी को नावा°. ९ बी °दत। कि°.

कथाप्रमाण इत्यर्थः । अतो नु[1] इति वितर्के । संभावयेहं[2] त्वं वारिधिरेवं[3] तर्कि विव्यचिथ वह्नोहं न तु वारिधिरिति व्याजं किमिति[5] चकर्थ । तथा तितीर्षुस्तरीतुमिच्छुः को हृदि न विव्यथे कर्थमयं तरिष्यंत इति चित्ते सर्वोपि तितीर्षुः पीडित इत्यर्थः ॥

आदुः । अत्र "अस्यादेः°" [६८] इत्यादिना पूर्वस्यात् ॥

आनृधुः । आनशिरे । आनशुः । अत्र "अनातः°" [६९] इत्यादिना–आ नश्चान्तः ॥ अनात इति किम् । आञ्छुः । कश्चिदत्रापीच्छति । आनाञ्छ ॥

बभूव । बभूवे । सुष्वाप । इत्यत्र "भूस्वपोरदुतौ°" [७०] इत्यदुतौ ॥ केचित्तु कर्तर्येव भुवोकारमिच्छन्ति न भावकर्मणोः । तेन बुभूवे श्रिया ॥

जिज्यिथ । विव्ययिथ । विव्याध । विव्यचिथ । विव्यथे । अत्र "ज्याव्ये°" [७१] इत्यादिना–इः ॥

किं न्वियाज किमुवाश तरङ्गैर्द्यामुवाच नु च यः स्वमगाधम् ।
ऊयुरभ्रपटलीं मिहिकास्ता यत्र याः परिववौ पवमानः ॥ ८० ॥

८०. यो वह्नो द्यामाकाशं तरङ्गैः कृत्वा किं न्वियाज । किं न्विति वितर्के । तरङ्गाणामूर्ध्वगामित्वेनोत्क्षिप्यमाणार्घोञ्जलितुल्यत्वात्किमानर्चे । किं किं वा तरङ्गैर्द्यामुवाश तरङ्गाणां द्योभिमुखोच्छलितत्वात्साभिलाषोत्क्षिप्तभ्रूतुल्यत्वाच्चाभिललाष । नु च किं वा तर-

१ सी °टलीमि°.

१ ए नु वि°. २ सी डी °हं वा°. ३ ए बी °वारधि°. ४ सी डी °व च त°. ५ सी °मि च°. ६ सी डी °थमियं. ७ ई °ष्यते चि°. ८ बी सी डी आनश्चा°. ९ सी डी °भूवे । शुष्वा°. १० ए न बुभू°. ११ बी सी °ना—इ ॥.

ऋैर्घ्यां[1] स्वमात्मानमगाधमतलस्पर्शमुवाच । तरङ्गाणां घोसमीपगतत्वा-त्सशब्दत्वाच्च तैर्घोरभ्रे स्वमगाधं किमुवाचेत्यर्थः । तथा यत्र वहे ता मिहिका[2] नीहारा अभ्रपटलीं धूमरीमूयुः संतेनुर्या[3] मिहिकाः पवमानो वायुः परिववौ मेलितवान् ॥

न ह्रुवाय ववतुर्न नं चोवुः कोपि कावपि च केपि च यद्धि ।
वेधसा तदुपवाय परिज्यायाभ्यदर्शि वसनं नु य उर्व्याः ॥८१॥

८१. यद्वसनं हि स्फुटं न हि नैव कोपि तन्तुवायादिरुवार्यै व्युतवान् कावपि[5] च न ववतुः केपि च न चोवुरुर्व्या भूरमण्याः संबन्धि तद्वसनं नु वस्त्रमिव यो वहो वेधसाभ्यदर्शि ज्ञापितमर्थान्नृणां यद्वोर्व्या अभ्यदर्शि दर्शितं दत्तमित्यर्थः । किं कृत्वा परिज्याय स्वस्य हानिं कृत्वा कष्टं कृत्वेत्यर्थः । तयोपवार्य व्युत्य ॥

इयाज । उवाय । उवाश । उवाच । इत्यत्र "यजादि°" [७२] इत्यादिना पूर्वस्य सस्वरान्तस्था य्वृत् ॥

ऊयुः । अत्र "न वयोय्" [७३] इति वयेर्यो[10] य्वृन्न ॥

परिववौ[11] । इत्यत्र "वेरयः" [७४] इति य्वृन्न ॥ अय इति किम् । उवाय ॥

ववतुः ऊवुः । अत्र "अविति वा[12]" [७५] इति वा य्वृन्न ॥ अय इत्येव । ऊयुः ॥

परिज्याय । उपवाय । इत्यत्र "ज्यश्च यपि" [७६] इतिय्वृन्न ॥

---

१ ए न वोवुः.

---

१ डी °र्घा स्वमा°. २ सी मिहका. ३ ए ई °र्यांमहि°. ४ ई °य व्यूत°. ५ बी °पि न. ६ बी °र्थानृणां. ७ ए °दशि द°. ८ ई °य व्यूत्य ॥. ९ सी डी य्वृतः ॥ ऊ°. १० ए वर्यो. ११ सी °वनो । इ°. १२ सी वा य्वृ°.

सर्वतोपि हि सरांसि किमु प्रव्याय किं नु परिवीय नदोन्वा ।
किं तु सर्वसरितोपि परिव्याय स्थितो य उदकैः प्रतिभाति ॥८२॥

८२. यो वह उदकैः कृत्वा प्रतिभाति मम मनसि प्रतिभासते । कीदृक् । स्थितः । किं कृत्वा । हि स्फुटं सर्वतोपि सरांसि किमु प्रव्यायात्मनि प्रक्षेपात्संवृत्याच्छाद्य वा किं नु किं वा नदान्वा । वा समुच्चये । वहांश्च परिवीय संवृत्य किं नु किं वा सर्वसरितोपि सर्वनदीश्च परिव्याय संवृत्य । अतिमात्रजलत्वात्कवेरित्याशङ्का ॥

इज्यते जलनिधिं किल संवीय स्थितः कलशभूः स मुधैव ।
उह्यते यदमुनैष न संव्यायेति यत्र नृभिरुच्यत उच्चैः॥ ८३ ॥

८३. यत्र वहविषये नृभिरुच्चैरुच्यते । कथमित्याह । किलेत्यागमे । जलनिधिं संवीय पानेन संवृत्य स्थितः स प्रसिद्धः कलशभूरगस्त्यो मुधैवेज्यते । अब्धिः पीतोनेनेत्यचिन्त्यवैभवतया लोकैर्यदयं पूज्यते तन्निरर्थकमित्यर्थः । यद्यस्माद्धेतोरेष वहः संव्याय पानेन संवृत्यामुना कलशभुवा नोह्यते स्वात्मनि न धार्यते । वहेत्रापीतेब्धिः पीतोप्यपीत इति भावार्थ इति ॥

प्रव्याय । इत्यत्र "व्यः" [७७] इति य्वृत्॥

संव्याय संवीय । परिव्याय परिवीय । इत्यत्र "संपरेर्वा" [७८] इति वा य्वृत् ॥

इज्यते । उह्यते । उच्यते । अत्र "यजादिवचेः किति" [७९] इति य्वृत् ॥

---

१ बी सी डी किं तु प°. २ ए °दान्वाः । किं. ३ ई किं नु स°.

---

१ बी °भासि म°. २ बी सी डी किं तु किं. ३ सी °न्वा स°. ४ बी सी डी किं तु किं. ५ ए °निधिसं°. ६ ई °या कै°. ७ बी °ब्याज । इ°. ८ सी य्वृत ॥ डी य्वृतः ॥.

सोषुपी[1]त्यहिगणोनुतटं सास्वप्ति नक्रनिचयोपि च यस्य ।
पर्यसुष्यत यमेन नु नासोषुप्यत क्षणमसूषुपदन्यः ॥ ८४ ॥

८४. यस्य वहस्यानुतटं तटसमीपेहिगणः सोषुपीति निरुपद्रवत्वादत्यर्थं शेते । तथा नक्रनिचयोपि च सास्वप्ति । एतयोश्च मृत्युहेतुत्वादुत्प्रेक्ष्यते । य[2]मेन न्वनुतटं पर्यसुष्यत शयितम् । अत एवान्योहिनक्रेभ्य इतरो नरादिर्यस्यानुतटं क्षणं क्षणमात्रमपि नासोषुप्यत मृत्युभयेन नात्यर्थमशेत । तथान्यो नासूषुपन्न च कं चन स्वापयामास ॥

सिन्धुराडसुषुपद्भयजीनो दुर्गमं यमजिनन्द्विडविद्धः ।
आशु विध्यति च विद्विष उग्रोरुव्यचा नु विचिता विचति स्म ॥ ८५ ॥

८५. सिन्धुराडसुषुपत्स्वापमकार्षीत् । कीदृक्सन् । दुर्गमं दुःखेन ग[1]म्यं यं वहमजिनन्नत्यजन्नत एव द्विडविद्धो द्विड्भिरविद्धः पराभ[3]वेनापीडितोत एव भयजीनो भयरहितः । तथोग्रोरुव्यचा नु यथा प्रचण्डो वृश्चिको विद्विषः[4] पदादिघटनेन स्वशत्रू[5]न्कण्टकेनातर्कितमेव विध्यति तथायं विद्विष आश्वतर्कितं विध्यति च तीव्रप्रहारादिना पीडयति च । तथा विचिता । अत्र तृ[6]न् । श्वस्तन्यास्ता वा । वञ्चयते वञ्चयिष्यते वा । विचति स्मच्छलितवान् । एतद्दुर्गबलेनायं स्वयं सुखेन तिष्ठति शत्रूंश्च पराभवतीत्यर्थः ॥

असोषुप्यत । सोषुपीति । असूषुपत् । पर्यसुष्यत । इत्यत्र "स्वपेर्यङ्के च" [८०] इति व्वृत् ॥ यङ्लुपि नेच्छन्त्यन्ये । सास्वप्ति ॥ घञन्तादपि केचिदिच्छन्ति । असुषुपत् ॥

---

१ सी °पी ××× ति निरु°. २ ए °स्वप्ति न°.

---

१ ए °मेव न्व°. २ ए गम्य यं. ३ ए °भवोना°. ४ बी सी डी °षः पादा°. ५ सी °त्रूनकण्ट°. ६ बी °नू । स्वस्त°.

जीनः । अजिनैनन् । अविद्धैः । विध्यति । इत्यत्र "ज्याव्यधैः क्ङिति" [८१] इति य्वृत् ।

विचिता । विचति । इत्यत्र "व्यचोनसि" [८२] इति य्वृत् ॥ अनसीति किम् । उरुव्यचाः ॥

यद्युशन्ति पवना गरुडो वावश्यतेनुशितमन्यजनेन ।

लङ्घितुं यमगृहीतपयोन्तं संजिघृक्षुमिव सागरलक्ष्मीम् ॥ ८६ ॥

८६. यदीति संभावने । यदि परं पवना वाता अतिवेगत्वाद्यं वहं लङ्घितुमुशन्तीच्छन्ति । गरुडो वा वावश्यतेत्यर्थं वाञ्छति । यतो-गृहीतपयोन्तमपर्यन्तजलमत एव सागरलक्ष्मीमब्धेरनन्ताम्भोरूपां श्रियं संजिघृक्षुमिव संग्रहीतुमिच्छुमिवाब्धितुल्यमित्यर्थः । अतएवान्यजनेन लङ्घितुमनुशितमवाञ्छितम् ॥

वृक्णमेव परिवृश्चति भृष्टं भृज्जतीह परिपृच्छति पृष्टम् ।

विश्रुतं जगति गौरवमावाव्यक्ति यस्य समुदाहरमाणः ॥ ८७ ॥

८७. यस्य गौरवं महत्त्वं समुदाहरमाणः कथयन्नरो वृक्णमेव च्छिन्नमेव परिवृश्चतिच्छिनत्ति भृष्टमेव पक्कमेव भृज्जति पृष्टमेव परिपृच्छति । यत आवाव्यक्ति वाव्यच्यादित्याशास्यमानः तिकि वाव्यक्तिरेवंनामा कश्चिज्जनमात्रम् । आङा मर्यादार्थेनाव्ययीभावः । जनमात्रस्यापीत्यर्थः । जगति विश्रुतम् । यथा छिन्नादेश्छेदनादि निरर्थकमेवमेतद्गौरवस्य जगत्त्रयेपि प्रसिद्धत्वात्कथनं निरर्थकमेवेत्यर्थः ॥

---

१ सी वृक्णमे°. २ ए भृग्यती°.

---

१ सी डी °नत् । अ°. २ सी डी °द्धः । व्यध्य°. ३ ए °धः जिति. ४ ए °त्र वाचो°. ५ सी °व्यचा ॥. ६ ए वाव°. ७ ई °तजलपर्यन्तम. ८ ई संगृही°. ९ बी °म् ॥ विक्ण°. १० सी °रवम°. ११ सी °नरा वृ°. १२ ई °व प°. १३ सी °र्यांमा°. १४ ई °द्धस्य कथ°.

विव्यधुस्तटमहीरपवेविक्त्यंह्रिपांश्च विविधुर्यत आपः ।
वेवयीति[1] नु नभः ककुभो वेवीयते[2] नु य उदूर्मिकराग्रः ॥८८ ॥

८८. यतो यस्मिन्वह आद्य[ग्रादि?]त्वात्तस् । आपस्तटमहीर्विव्य-धुरभ्रंशयन्नित्यर्थः । तथा व्यचेर्यङ्लुपि वेविच्य[1]ादित्याशास्यमानः तिकि वेविक्तिर्नाम कश्चिन्नरोपगतो[2]ह्रिपाणामद्भिरुन्मूल्यमानत्वान्नष्टो वेविक्ति[3]-र्येभ्यस्ते येंह्रिपा वृक्षास्तांश्च[4] विविधुरुन्मूलितवन्त[5]यः । अनेनास्य जला-तिपूर्णतोक्ता । अत एव यो वह [6]उदुच्छ्रिता ऊर्मय एव कराग्राणि पाण्यग्राणि[7] शुण्डाग्राणि वा यस्य स तथा सन्नभो वेवयीति[8] नु भृश-माच्छादयतीव तथा ककुभो दिशो वेवीयते[9] नु ॥

सेसिमीषि किमहो परितः सेसिम्यते जलमदेन यथाब्दः ।
संस्यमन्निवति दृशा किल वाव्यत्तं नृपः प्रववृतेथ नियन्तुम् ॥८९॥

८९. अथ नृपो भीमस्तं वहं नियन्तुं सेतुना[10] बन्द्धुं प्रववृते प्रारेभे । कीदृक्सन्[11] । अहो वह जलमदेन जलबाहुल्यदर्पेण यथाब्दो मेघः सेसिम्यतेत्यर्थं गर्जति तथा त्वं किमिति जलमदेन सेसिमीषि । अत्यर्थं शब्दायसे । एतेन त्वज्जलमदोपनेष्यत इत्युक्तम् । इत्येवं प्रकारेण दृशा संस्यमन्नु । यात्राविघ्नोयमिति कोपाद्भृकुट्या साटोपं विलोकनाद्बावध्यमान इव तथा दृशा तं किल वाव्यन् । किलेवार्थे । कोपाल्ललाटारोपितदृष्टित्वेन वहस्याखिलस्याप्याक्रामकत्वादृशा वहमत्यर्थं संवृण्वन्निव लघूकुर्वन्निवेत्यर्थः ॥

---

१ सी °ति तु न°. २ सी °ते तु य.

---

१ सी °च्यात्या°. २ प °गतोहि°. ३ सी डी °क्तिएभ्य°. ४ बी विव्यधु°. ५ प बी सी डी °वन्तोने°. ६ बी उदच्छ्रि°. ७ बी पाप्याग्रा°. ८ ई °ति भृ° सी °ति तु भृ°. ९ सी °ते तु ॥. १० प सेतुबद्धुम°. ११ ई °दृकू । अ°.

अनुशितम् । उशन्ति । इत्यत्र "वशेरयङि" [८३] इति य्वृत् ॥ अयङीति किम् । वावश्यते ॥

गृहीत । संजिघृक्षुम्[1] । वृक्णम् । परिवृश्चति । भृष्टम् । भृज्जति[2] । पृष्टम् । परिपृच्छति । इत्यत्र "ग्रह°" [८४] इत्यादिना य्वृत् ॥ व्यचिवशिभ्रस्जिभ्र-[3] स्जिप्रच्छीनां पञ्चानां यङ्लुबन्तानां नेच्छन्त्यन्ये । आवाव्यक्ति ॥ अन्ये तु[4] यङ्लुप्यपि मन्यन्ते । अपवेविक्ति[5] ॥ अपरे तु विचतिवृश्चतिभृज्जतिपृच्छतीनां नित्यं य्वृत् । ज्यादीनां त्वनित्यमिति मन्यन्ते । तेन विव्यधुः ॥ अन्ये तु विविधुरित्येवाहुः ॥

वेवीयते[6] । वेवयीति । सेसिम्यते । सेसिमीषि । इत्यत्र[7] "व्येस्यमो[8] यङि" [८५] इति य्वृत् ॥ यङ्लुपि नेच्छन्त्येके । वाव्यत् । संस्यमत् ॥

आजुहावयिषति स्म च स क्ष्माचेक्यितोथ चतुरः प्रतिहारः ।
आजुहाव निरजूहवदाजिह्वायकीयिषत आशु चमूपान् ॥ ९० ॥

९०. क्ष्माचेक्यितः[9] क्ष्मया पृथ्वीस्थलोकेनात्यर्थं पूजितः स भीम- श्चमूपांन्नृपानाजुहावयिषाति[10] स्म चाकारयितुमियेष च । यत आजि- ह्वायकीयिषत[11] आह्वायकेच्छामिच्छतः । प्रागेवाह्वानमिच्छत इत्यर्थः । अथ चमूपाकारणेच्छानन्तरं चतुरो नृपाभिप्रायज्ञः प्रतिहार आशु शीघ्रं चमूपानाजुहाव स्वयमाकारितवान्[12] । निरजूहवदन्यैराह्वायितवान् ॥

चेक्यितः । अत्र "चायः कीः" [८६] इति कीः ॥

---

१ ए बी डी °ह्वायिकी°.

---

१ सी °क्षु । वृ°. २ ए भृषति. ३ डी °भ्रश्चिभ्र°. ४ सी तु जङ्लु°. ५ ए °पचेवि°. ६ सी वेव°. ७ ए °त्र वेस्य°. डी त्र वेस्यमोर्यङि. ८ ई °मोर्यङि. ९ बी °चेक्यतः. १० ई °पाना°. ११ बी °ह्वायिकी°. १२ सी °न् ॥ चे°.

आजुहाव । इत्यत्र "ह्वित्वे ह्वः" [८७] इति य्वृत् ॥ अनेनैव सिद्धे उत्तरसूत्रकरणं णेरन्यस्मिन्ह्वित्वनिमित्तप्रत्ययव्यवधायके य्वृन्मा भूदित्येवमर्थम् । तेनेह न भवति । आह्वायकमिच्छति आह्वायकीयति ततः सनि आजिह्वायकीयिषतः ॥

निरजूहवत् । आजुहावयिषति । इत्यत्र "णौ ङसनि" [८८] इति य्वृत् ॥

तेष्वशूशवदसौ क्षितिपाज्ञां सेतवे भृशमशिश्वयदोजः ।
ते शुशावयिषवश्च जयं शिश्वायायिष्वनुचराः स्म यतन्ते ॥ ९१ ॥

९१. असौ प्रतिहारस्तेषु चमूपेषु विषये क्षितिपाज्ञां[1] वहबन्धविषयं भीमादेशमशूशवदगमयत् । ज्ञापितवानित्यर्थः । तथासौ सेतवे सेतुबन्धार्थं तेषु विषय ओज उत्साहमशिश्वयदवर्धयत् । ते च चमूपाः सेतवे यतन्ते स्म च । चो यौगपद्ये । यदैव प्रतिहारः क्षितिपाज्ञामशूशवत्तदैवोद्येमुरित्यर्थः । यतः किंभूताः । जयं राज्ञो विजयं शुशावयिषवो विवर्धयिषवस्तथा जयं शिश्वायायिषवो[2] विवर्धयिषवोऽनुचराः[3][4] सेवका येषां ते । सापेक्षत्वेप्यत्र गमकत्वात्समासः ॥

अशूशवत् अशिश्वयत् । शुशावयिषवः[5] शिश्वायायिषु[6] । इत्यत्र "श्वेर्वा" [८९] इति[7] वा य्वृत् ॥

कथं[8] कथं यतन्ते[9] तत्राह[10] ।

शिश्वियुः सपदि केपि दृषद्भ्यस्तत्र केपि शुशुवुश्च तरुभ्यः ।
शोशवीति हनुमान्स यथा किं शेश्वयीषि[2] न तथेति वदन्तः॥९२॥

१ ए डी सी °श्रावयि°. २ डी शेश्वियी°.

१ ए °तिप्राज्ञां. २ सी डी °श्रावयि°. ३ डी °वोनु°. ४ ई °नुचाराः. ५ ए °वः शिश्वावयिषवः शि°. ६ ए सी डी °श्रावयि°. ७ ई °तिय्वृ°. ८ ई °थं य°. ९ ए यत्रन्ते. १० बी °न्त्रेत्रा°.

९२. तत्र तेषु चमूपेषु मध्ये केपि चमूपाः[1] सपदि दृषद्भ्यः। "गम्यस्याप्ये" [२.२.६२.] इति चतुर्थी। शिला आहर्तुं शिश्वियु-र्जग्मुः। केपि च तरुभ्यो वृक्षानाहर्तुं शुशुवुः। किंभूताः सन्तः। यथा हनुमान् शोशवीति स्म रामेणाब्धिसेतुबन्धे दृषदाद्याहरणा-येतस्ततो भ्रमणात्कुटिलं गतस्तथा त्वं किं न शेश्वयीषीत्यन्योन्यो-त्साहनाय वदन्तः॥

शुशुवुः शिश्वियुः। शोशवीति शेश्वयीषि[3]। इत्यत्र "वा परोक्षायङि" [९०] इति वा य्वृत्॥

पिप्यिरे प्रतिरवा गगनान्तः पेप्यिताचलदरीषु च पीनाः।
पीनवत्परशुपाणिनिकृत्तोत्प्यानपादपपरापतनोत्थाः॥ ९३॥

९३. प्रतिरवाः प्रतिशब्दा गगनान्तः[4] पिप्यिरे वृद्धिं गतास्तथा पेप्यिता अतिवृद्धा या अचलदर्योद्रिगुहास्तासु च पीना बहूभूताः[5]। किं-भूताः। पीनवन्तः स्थूलाः परशवः पाणावेषां तैर्निकृत्तानां छिन्नानामुत्प्या-नानामतिस्थूलानां पादपानां यत्परापतनं परावृत्त्या निपतनं तस्मादु-त्तिष्ठन्ति ये ते तथा॥

पिप्यिरे। अत्र "प्यायः पीः" [९१] इति पीः॥ दीर्घनिर्देशो यङ्लुबर्थः। पेप्यित[6]॥

पीनाः[7]। पीनवत्। इत्यत्र "स्फायोः°" [९२] इत्यादिना पीः॥ अनुपसर्गस्येति किम्। उत्प्यान॥

---

१ सी °कृत्योत्पान°.

---

१ बी °मूपा स°. २ डी शेश्वियी°. ३ डी शेश्वियी°. ४ ई °न्तः पेप्यि°. ५ डी ई बहुभू°. ६ बी °प्यितः॥. ७ सी पीना।. डी पीन।.

स्फीतवत्तुमुलधावदनापीनान्धुसैनिकसमूहमुदीक्ष्य।
स्फीतभीतिरटदाटविकापीनोध्निकागण उदत्रसदारात्॥ ९४॥

९४. अटन्त्यो[1] भ्राम्यन्त्य[2] आटविक्यो[3]रण्यचारिण्यो[4] या आपीनोध्निका अज्ञाता आपीनोध्न्यश्चमर्यस्तासां गण आरादन्तिकादुदत्रसदनश्यत्। यतः कीदृक्। स्फीतभीतिः प्रवृद्धभयः। किं कृत्वोदीक्ष्य। कम्। स्फीतवान्संततस्तुमुलो व्याकु[5]लरवो यस्य स तथा धावञ्जवेन गच्छंस्तथानापीनोप्रवृद्धोन्धुर्व्रणं यस्य स तथा निर्व्रण इत्यर्थः। यः सैनिकसमूहस्तम्। आटविकेत्यत्र "चरति" [६.४.११] इतीकण्॥

स्फातटङ्ककुलिशैः प्रसमाद्यस्तीतपङ्कमिव चिच्छिदुरद्रीन्।
स्फातवङ्कुजभृतः प्रसमाद्यस्तीतवद्दृषद उद्दधिरे च॥ ९५॥

९५. स्फातवङ्कुजभृतः पीवरबाहुधारिणो बलिष्ठभटाः स्फाताः स्थूला ये टङ्काः पाषाणदारकास्त एव कुलिशानि तैः कृत्वाद्रींश्चिच्छिदुः। प्रसमाद्यस्तीतपङ्कमिव प्रसमा[7]द्यस्तीतः प्रसंस्तीतः कठिनीभूतो यः पङ्कस्तं यथा केचि[8]च्छिन्दन्ति तथानायासेन चिच्छिदुरित्यर्थः। तथा प्रसमाद्यस्तीतवद्दृषदो[9]तिकठोरशिला उद्दधिरे चोत्पाटितवन्तश्च॥

अनापीनान्धु। आपीनोध्निका। इत्यत्र "आङोन्धूधसोः" [९३] इति पीः[10]॥

स्फीत[11]। स्फीतवत्। स्फीत[12]। स्फातवत्। इत्यत्र "स्फायः[13] स्फी वा (स्फीर्वा?)" [९४] इति वा स्फीः॥

१ प ॰दीक्ष। स्फी॰.

१ बी भ्रामन्त्य. २ प ॰म्यन्त आ॰. ३ सी ॰टकिक्यो॰. ४ ई ॰रिण्य आ॰. ५ डी ॰कुलो र॰. ६ बी डी ई ॰रती॰ सी ॰रतीकथा॥ स्फा॰. ७ सी ॰माद्युस्तीतम॰. ८ बी ॰च्छिदन्ति. ९ सी ॰दोभिकवोर॰. १० ई पीः॥ स्पीत। स्फीतवान्। स्फा॰. ११ सी स्फीतः। स्फी॰. १२ सी स्फातः। स्पात॰. १३ ई स्फाय स्फी॰.

प्रसंस्तीत । प्रसंस्तीवत् । इत्यत्र "प्रसमः[1] स्त्यः स्तीः" [९५] इति[2] स्तीः ॥

शीतशीनमकरन्दलवः प्रस्तीमशीनवदुदम्बुतुषारः ।

श्यानतां नृषु दिशन्पवनः प्रस्तीतघर्मसलिलानि जह्रार[1] ॥९६॥

९६. पवनः प्रस्तीतघर्मसलिलानि श्रमोद्भवान्संहतस्वेदबिन्दूञ्ज-
हार । कीदृक् । शीतेन शीतलगुणेन शीता[3] द्रवीभूय कठिनतां गता
यद्वा शीताः शीतला अत एव शीना मकरन्दलवाः पुष्परसलेशा यत्र
सः । तथा प्रस्तीमाः संहताः शीनवन्तो द्रवीभूताः सन्तः कठिनतां
गता उदुत्कटा[4] अम्बुतुषारा बहुजलसंबन्धि[5] हिमकणा यत्र सः । तथा
मृदुत्वान्नृषु श्यानतां गतिमत्तां दिशन्ददत् ॥

प्रस्तीम प्रस्तीत । इत्यत्र "प्रात्तश्च मो वा" [९६] इति वा मः ॥

शीन[6] शीर्नवत्[7] । स्पर्शे शीत । इत्यत्र "श्यः शी°" [९७] इत्यादिना[8]
शीः ॥ द्रवमूर्तिस्पर्श इति किम् । श्यानताम् ॥

प्रातिशीन्यमभिशीनमभिश्यानेन जाड्यमवशीनमथापि ।

सेतुबन्धनपरत्वमवश्यानेभ्य ओज[2] इह नाभ्यवशीनम्[9] ॥ ९७ ॥

९७. इह वहे[10] सेतुबन्धनपरत्वं[11] सेतुबन्धतात्पर्यमवश्यानेभ्यः प्रा-
प्तेभ्यो भटेभ्यः सकाशादभिश्यानेनेतस्ततो[12] भ्रमणेन प्रातिशीन्यं रो-
गित्वमभिशीनमपगतम्[13] । अथानन्तरं जाड्यमपि रोगादिकृतालस्यम-

१ प °हारः ॥ प°. २ प ओह इ°.

१ बी °मस्त्यस्ती°. २ सी °ति स्ती ॥. ३ प शीता द्र°. ४ प अम्बतु°.
५ ई °बन्धहि°. ६ प शीना शी°. ७ ई °नव°. ८ सी °नवात्.
९ सी °ना शी ॥. १० बी °हे शेतु°. ११ बी °त्वं शेतु°. १२ प °नेनैत°.
१३ सी डी °शीतम°.

प्यवशीनं गतम् । इह सेतुबन्धविषय ओज उत्साहस्तु नाभ्यवशीनम् । व्यायामेन हि रोगजाड्ये प्रायोपयात ओजस्तु वर्धते ॥

श्यानमभ्यवपरं तरुजालं ग्रावजातमभिसंपरशीनम् ।
तद्द्वहान्तरपथैरभिसंश्यानं पयोर्धश्रृतद्दुग्धहविर्वत् ॥ ९८ ॥

९८. तद्द्वहान्तस्तस्य वहस्य मध्ये तरुजालमभ्यर्वे[2]परं श्यानमभ्य-वै[3]श्यानं पतितं तथा[4] ग्रावजातं शिलौघोभिसंपे[5]र[6]शीनम[8]भिसंशीनमत एव पयोम्भोपथैरुन्मार्गैरभिसंश्यानं वहमभ्यस्य तर्वादिभिर्व्याप्तत्वो[9]त्त-ज्जलमितस्ततो गतमित्यर्थः । अर्ध[10]श्रृतदुग्धहविर्वद्यथार्ध[11]श्रृते स्वयमर्ध-पक्के दुग्धहविषी क्षीरघृते अपथैरभिसंश्यायेते उत्फणनेन स्था[12]ल्या बहिर्गच्छतः ॥

प्रा[13]तिशीन्यम् । अत्र "प्रतेः" [९८] इति शीः ॥

अभिशी[14]नम् अ[15]भिश्याने[16]न । अवशीनम् अवश्यानेभ्यः । अत्र "वाभ्यवा-भ्याम्" [९९] इति वा शीः ॥ केचित्तु समा व्यवधानेपीच्छन्ति । अभिसंशीनम् अभिसंश्यानम् । तदा वा[17]भ्यवाभ्यामिति तृतीया व्याख्येया ॥ समस्ताभ्यामपी-च्छ[18]न्त्यन्ये । अभ्यवशीनम् अभ्यव[19]श्यानम् ॥

श्रृतदुग्धहविर्वत् । इत्यत्र "श्रः श्रृतम्°" [१००] इत्यादिना श्रतेति निपात्यम् ॥

---

१ सी °ह शेतु°. २ ए °वश्यानं प°. ३ बी °वशानं प°. ४ ए °था जाग्रा°. ५ सी डी °परिशी°. ६ डी °शीतम°. ७ ए °मत. ८ बी °भिशी°. ९ डी °त्वाज्ज°. १० बी °र्धश्रित°. ११ बी °र्धश्रिते. १२ डी स्याल्यां ब°. १३ ए °तिसैन्य°. १४ डी °शीतं अ°. १५ ई अवश्यानेभ्यः. १६ ए °नेभ्यः. १७ डी वाभ्या°. १८ सी °च्छन्तोन्ये. १९ डी °वश्या°.

यज्ञकृद्भिरशृतश्रपिते संवीय दुग्धहविषी इव वह्नौ ।
संजिहीर्षुरिपुचक्रजिघांसोतैर्न्यधायि वह आर्द्रमनार्द्रम् ॥ ९९ ॥

९९. श्रातः श्रायतो वा दुग्धहविषी स्वयमेव ते[2] यज्ञकृद्भिः[3] प्रायुज्येतां शृते एवं श्रपिते[4] न[5] शृते अशृते[6] ते च ते श्रपिते चाशृतश्रपिते अपक्वपक्वे दुग्धहविषी संवीय संवृत्य संमिश्र्येत्यर्थः[7] । यथा[8] यज्ञकृद्भिः सर्वेस्वारयागादौ वह्नौ निधीयेते[9] तथा[10] संजिहीर्षु विनाशयितुमिच्छु यद्रिपुचक्रं तस्य जिघांसा हन्तुमिच्छा तयोतैः संबद्धैर्भी[11]मभटैरार्द्रं वृक्षाद्यनार्द्रं च काष्ठशिलादि संवीय वहे न्यधायि सेतुबन्धाय निक्षिप्तम् ॥

तत्र कैश्चि[2]दजिगांस्यत पाथः क्रान्त्व ऋक्षप[3]तिफालतितांसैः ।
बन्धकर्म वि[4]तितंसदनीकं क्रन्त्व ऋद्धभुजविक्रमकान्तैः ॥ १०० ॥

१००. कैश्चिन्महाभटैस्तत्र वहेऽजिगांस्यत गन्तुमिष्टम् । किं कृत्वा । पाथो वहाम्भः क्रान्त्वा । यतः किंभूतैः[12] । ऋक्षपतेरिव जाम्बवस्येव[13][14] फालस्योत्प्लुतेस्तितांसा[15] विस्तारयितुमिच्छा येषां तैर्यथा जाम्बवोऽब्धि[16]मुत्प्लुत्योल्लङ्घ्य तथा वहमुत्प्लवितुमिच्छुभिरित्यर्थः[17] । तथा बन्धकर्म सेतुबन्धकर्म[18] सेतुबन्धक्रियां वितितंसाचिकीर्षदनीकं[19] सैन्यं क्रन्त्वो-

---

१ प °रसत°. २ प °जिघास्य°. ३ बी °तिस्फाल°. ४ डी °तिसंस°.

---

१ प सी श्रातश्रा°. २ प ते जज्ञ°. ३ ई °द्भिः प्रयु°. ४ सी °ते अते ते. ५ ई °न सते असतेच. ६ प अस ते. ७ प सी °मिश्रेत्य°. ८ सी यज्ञ°. ९ प बी °धीय ते. १० सी °था सजि°. ११ सी °बद्धभीम°. १२ बी °तैः । द्वक्ष°. १३ डी जाम्बुवतस्ये°. १४ सी °वतस्ये°. १५ बी °स्तिस्तांसा. सी °स्तितासा. १६ सी जाम्बूवतोब्धि° डी जाम्बुवतोब्धि°. १७ बी सी डी °मुत्प्लुवि°. १८ बी सी डी °न्धकि°. १९ बी °कीर्षुद°.

लक्षणं यत ऋद्धः स्फीतो यो भुजविक्रमस्तेन कान्तैः रम्यैः । अतिशूरत्वेन सैन्यात्पूर्वमेव योद्धुं कैश्चिद्वह उत्प्लवितुमिष्ट इत्यर्थः ॥

किं प्रशानसि भुजौ तव शंशान्तो वदत्यवनिवृत्रहणीत्थम् ।
सेतुकष्टमपि शामति सामप्रश्नपृष्टजनतासु किल स्म ॥ १०१ ॥

१०१. सामप्रश्नपृष्टजनतासु साम्ना मधुरालापेन यः प्रश्नः पृच्छा तेन पृष्टा या जनता लोकौघास्तासु विषये किलेति सत्ये सेतुकष्टमपि सेतोर्बन्धजनितं दुःखमपि शामति स्म शमिव सुखमिवाचरति स्म । क सत्यवनिवृत्रहणि पृथ्वीन्द्रे भीमे । किंभूते । वदति । कथमित्याह । अहो भट किं प्रशानसि सेतुबन्धादुपशाम्यन्भवसि । तथा तव भुजौ किं शंशान्तो भृशमुपशाम्यत इत्थम् ॥

स्योमभिः स वह आहितसेतुस्यूत उत्पथविडम्बुभरष्ठ्यूः ।
हुं मुवो मम गिरीनिति सेष्योति स्म मोमकृतमूतिनिमित्तात् ॥१०२॥

१०२. स वहो मोमभिर्मवद्भिर्बन्धकैर्नरैः कृता या मूतिर्बन्धः सा चासौ निमित्तं च तस्माद्गिरीन्समीपस्थानद्रीन्सेष्योति स्मात्यर्थं बबन्ध सर्वतोप्लावयदित्यर्थः । कीदृक्सन् । सीव्यन्ति स्योमानो बन्धकनरास्तैः स्योमभिराहितः कृतो यः सेतुस्तेन स्यूतो बद्धोत एवोत्पथानुन्मार्गोन्विच्छति गच्छति योम्बुभरस्तं ष्ठीवति निरस्यति यः सः । उत्प्रेक्षते । न गिरीन्मोमकृतमूतिनिमित्तात्सेष्योति स्म किं तर्हि हुं मुवो ममेति । इतिर्भिन्नक्रमे । इव उत्प्रेक्षाद्योतको ज्ञेयः । हुमिति कोपे ।

---

१ बी सी °रीनति. २ सी °कृतिमू°.

---

१ ई ऋद्ध स्फी°. २ ए °श्नः प्रच्छा°. ३ डी किं शश°. ४ बी °न्धः स चा°. ५ बी °द्रीनसेष्यो°. ६ ए बी °न स्फूतो. ७ बी ई °त्प्रेक्ष्यते. ८ बी °त्तात्सैष्यो°. ९ बी सी °त्प्रेक्ष्याद्यो°.

मम भुवो बन्धका एत इति हेतोरिव । गिरिपाषाणैर्हि वहो बद्धस्त-
तस्तज्जलमुत्पथैः प्रसरद्भिरीन्प्लावितवदित्येवमाशङ्का ॥

ओमतूर्मैभिरजूर्मैभिरासेषेषि किं नृभिरनूः कृतभूते ।

श्रोमवारिणि सुजूः परितूः श्रूर्नक्रचक्र इति नूनमराटीत् ॥१०३॥

१०३. नक्रचक्रो नूनमित्येवंप्रकारेणाराटीत् । तमेवाह । कृता भुवः पृथ्व्या ऊतिरवनं येन तस्य संबोधनं हे कृतभूते भीम अजूर्मैभिरज्वरद्भिर्नीरोगैस्तथा । अवन्तीत्योमानस्त्वद्रक्षकास्त्वत्सेवका इत्यर्थः । त्वरन्ते तूर्माणो वहबन्धार्थं त्वरावन्त ओमानो ये तूर्माणस्तैर्नृभिर्भटैः सहितस्त्वमनूर्मेमारक्षकः सन्किं किमित्यासेषेष्यत्यर्थं बध्नास्यर्थान्मदाश्रयं वहमिति । कीदृक्सन् । श्रोमोत्पथगत्या स्तोकीभूतत्वाच्छुष्यद्यद्वारि तत्राधारे श्रूः स्तोकाम्बुत्वेन शुष्यन्नत एव सुजूः सुष्ठु पीडावान् । अत एव च परितः समन्तात्त्वरते संभ्रमेणेतस्ततो गच्छति यः स परितूः । नक्रचक्रो हि शुष्यज्जले संतप्यमानत्वादारटन्काविनैवमुत्प्रेक्षितः ॥

श्रूतितूर्तिकृतजूर्तिरमूर्भिर्मोर्मैमूर्तिरिव तोर्मचमूपैः ।

प्रागतूः स वह उज्झति फेनं तूर्णमुग्रविधिपाकनियोगात् ॥१०४॥

१०४. मोर्मा मूर्छावती मूर्तिरङ्गं यस्य स इव वहः फेनमुज्झति स्म । मूर्छावान् हि मुखेन फेनमुज्झति । कीदृक्सन् । प्राक्पूर्वमविद्यमानास्तुरस्तूर्वन्तः सेतुबन्धेन पीडका यस्य सोन्तरब्धितुल्यत्वेन

---

१ बी °रनू कृ°. २ ए °रितस्तूनक्र°.

---

१ सी डी °स्तज्ज°. २ सी °रत°. ३ ए °न्तीतमा°. ४ ए °न्तास्त्वर°. ५ ए °मेणत°.

केनाप्यबद्धपूर्व इत्यर्थः। तथा[1]प्युग्रोननुकूलत्वेन रौद्रो यो विधिपाको दैवपरिणामस्तस्य नियोगादवे[2]श्यंभावाद्धेतोर[3]मूर्भिरमूर्च्छेद्भिः सोद्यमै-रित्यर्थः। तोर्मचमूपैस्तोर्माणस्तूर्वन्तः सेतुबन्धेन पीडका ये चमूपास्तै-स्तूर्णः सेतुबन्धेन पीडितोत एव श्रूतौ जलशोषे या [4]तूर्तिः सैन्यपौ[5]नां त्वरणं तया कर्त्र्या कृता जूर्तिर्ज्वरः पीडा यस्य सः॥

सोद्रवक्र[1]मुरुकूजमसंकोचं च मद्रुभिरनाशि तदोघात्।
न्यङ्कुवञ्चमभिवञ्चति सैन्ये मेघवृष्टिवदटव्यनुये[2]जैः॥ १०५॥

१०५. म[6]द्रुभिर्जलवायसैस्तदोघाद्द्रहप्रवाहादनाशि भयेन पलायि-तैम्[7]। कथम। सहोद्रवक्राभ्यामार्जवकौटिल्याभ्यां वर्तते यत्तत्सोद्रवक्रं तथोरुर्महान्कूजोऽव्यक्तशब्दो यत्र तदुरुकूजं तथासन्संकोचोऽङ्गावयवानां मीलनं यत्र तत्त[8] यथा स्यादेवम्। क सति। सैन्ये। किंभूते। न्यङ्कु-र्मृगभेदस्त[8]स्येव वञ्चो गमनं[9] यत्र तद्यथा स्यादेवं द्रुतमित्यर्थः। अभि-वञ्चति गच्छति। यथा मेघस्य वृष्टिर्यतः सा मेघवृष्टिः[10] कारीरीष्टि-स्तस्यां सत्यामटव्यामनुयाजा आहुतिविशेषा अटव्यनुयाजास्तैर्नश्यते। वृष्टि[11]कामैर्हि कारीरीष्टिररण्ये क्रियते तस्यां चानुयाजाख्यास्त्रय आहु-तिविशेषा न दी[12]यन्त इति श्रुतिः॥

[13]अश्रूते दुग्धहविषी यज्ञकृद्भिः। अत्र "श्रपेः°" [१०१] इत्यादिना[14] शृभावो निपात्यः॥ अन्ये तु श्रपिं चुरादौ पठन्ति। तस्यैव श्र[15]पेर्निपातनम्। प्रयोजकण्य[16]-न्तस्य त्वेकस्यापि प्रयोगं नेच्छन्ति। तन्मते श्रपिते दुग्धहविषी यज्ञकृद्भिरित्येव स्यात्॥

१ बी °मुरकू°. २ बी °नुजाजैः.

१ डी °था तुर्णोन°. २ ई °वस्यंभा°. ३ सी °मूर्त्तिर°. ४ प तूर्ति सै°. ५ डी °पानानां. ६ डी °द्रुर्भिर्ज°. ई °द्रुद्भिर्ज°. ७ सी डी °तन्नतम्।. ८ डी °स्तस्यैव. ९ सी डी °नं तत्र. १० ई °ष्टिः करी°. ११ ई °कामे हि का°. १२ प °दीन्त. १३ सी अश्रूते. १४ सी °ना श्रभा°. १५ प °वस्रपे°. १६ प °कस्य ण्य°.

संवीय । इत्यत्र "य्वृत्सकृत्" [१०२] इति य्वृदेकवारमेव ॥ "दीर्घम्°" [१०३] इत्यादिना[1] च दीर्घः ॥ अव इति किम् । उतैः ॥

संजिहीर्षु । जिघांसा । अजिगांसत । इत्यत्र "स्वरहन्°" [१०४] इत्यादिना दीर्घः ॥

तितांसैः[2] वितितंसत् । इत्यत्र "तनो वा" [१०५] इति वा दीर्घः ॥

क्रान्त्वा क्रन्त्वा । इत्यत्र "क्रमः क्त्वि वा" [१०६] इति वा दीर्घः[3] ॥

क्विपि । प्रशान्[4] ॥ क्विति । कान्तैः ॥ क्विति । शंशान्तः । अत्र "अहन्°" [१०७] इत्यादिना दीर्घः[5] ॥ अहन्निति किम् । वृत्रहणि ॥ कश्चित्स्वाचारक्कावपि[6] दीर्घत्वमिच्छति । शमिवाचरति शामति ॥

प्रश्न । क्वि । उत्पथविद् ॥ धुट् । पृष्ट । स्योममिः ॥ क्वि । अम्बुभरच्छ्रूः ॥ धुट् । स्यूतः । अत्र "अनुनासिके च°" [१०८] इत्यादिना छ्वोः शूटौ ॥ सिवेर्यङ्लुपि तु सेष्योति ॥ अन्ये स्वासेषेपीसेवेच्छन्ति[7] । तन्मतसंग्रहार्थं क्विती-त्यनुवर्तनीयं यजादिसूत्रे च च्छग्रहणं कार्यम् ॥

मव् । मोर्म[8] । मुवः । मूति[9] ॥ अव् । ओम[10] । अनूः । ऊते ॥ श्रिव् । श्रोम ॥ श्रूः । श्रूति ॥ ज्वर । अजूर्मभिः । सुजूः[11] । जूर्तिः[12] ॥ त्वर् । अतूर्मभिः (तूर्मभिः ?) परितूः । तूर्ति[13] । अत्र "मव्यवि°" [१०९] इत्यादिना[14] नोट् ॥

मुर्छा । मोर्म । अमूर्मिः । मूर्तिः[15] ॥ तुर्वै । तोर्म[16] । अतूः । तूर्णः । अत्र "रा-ल्लुक्" [११०] इति छ्वोर्लुक्[17][18] ॥

---

१ बी °ना दी°. २ सी तिता सैः. ३ ए ई °र्घः ॥ प्र°. ४ ए सी °शात । अ°. डी °शान्तैः । अ°. ५ सी °र्घः ॥ × × त्व°. ६ ए °श्चिचाचा°. ७ सी °सेषषी°. ८ सी डी °मम् । मु°. ९ डी मूतिः ॥. १० बी डी ओम् । अ°. ११ सी डी सुजूं । जू°. १२ बी डी जूर्ति ॥. १३ ई तूर्तिः ॥ अ°. १४ ए सी °दिनो°. १५ बी मूर्ति ॥ तु°. १६. डी तोमम् । अतुः । तू°. १७ ए छलुक्. १८ डी °क् ॥ नि°.

पाकनियोगात् । इत्यत्र "कैनिटि°" [१११] इत्यादिना चजोः कगौ ॥ कैनिटि इति[2] किम् । अर्सकोचम् । कूजम् ॥

न्यङ्कु । वङ्क । उग्र । मद्गुभिः । मेघ[3] । ओघात् । इत्येते "न्यङ्कु°" [११२] इत्यादिना निपात्यौ[4] ॥

यज्ञमभियज्ञति । इत्यत्र "न यज्ञेर्गतौ[5]" [११३] इति न कत्वम्[6] ॥

अनुयाजैः । अत्र "यजेर्यज्ञाङ्गे" [११४] इति न[6] गत्वम् ॥

राडहर्षयदवश्यविरेच्यावश्यभञ्ज्यवहकर्मनियोज्यान् ।
सत्प्रयोज्यनवभोज्यगणेनात्याज्ययाज्यसुभटानुपरिस्थः ॥१०६॥

१०६. राड्भीम उपरिस्थ उपरि वर्तमानः सन्नत्याज्याः सर्वभृत्यगुणोपेतत्वेनाहेयाः[7] संगर्तार्हा[8] इत्यर्थः । याज्याश्च सत्कार्या ये सुभटास्तानहर्षयत्[9] । केन कृत्वा । सन्[10] शोभनोत एव प्रयोज्यो व्यापारयितुं शक्यो[11] नवो[12] यो भोज्यगणः[13] खण्डखाद्यादिभक्ष्यौघस्तेन[14] । किंभूतान् । अवश्यविरेच्योवश्योद्ध्वनीयोवश्यभञ्ज्यश्च[15] सेतुबन्धेनावश्यं द्विधा कार्यो यो वहस्तस्य कर्म बन्धनक्रिया तत्र नियोज्यान्व्यापारयितुं शक्यान् ॥

न प्रवाच्यगतवाक्यवदापद्वाच्यतां भुजबलेन वहं सः[1] ।
न्युब्जजिह्मियमयाञ्चिति से न्यग्रोधवीरुदवरोधचमूकः[2] ॥ १०७ ॥

१०७. स भीम इत्युक्तप्रकारेण भुजबलेन वहं नियमयञ्चियच्छय-

---

१ प सः । न्यब्ज°. २ सी स निग्रो°.

---

१ बी °निट् इ°. २ सी °ति किः अ°. ३ सी मेघः । ओ°. ४ बी °त्याः ॥ यज्ञ°. ५ प °ञ्जेगतौ. ६ सी न त्व°. ७ सी °नादेयाः. ८ ई °तार्हा इ°. ९ सी °टाकान°. १० सी डी सत् शो°. ११ सी नको भो°. १२ डी °वो भो°. १३ ई °गण ख°. १४ प ई °भक्षौघ°. १५ ई °भयं भ°.

न्सन् वाच्यतां भीमेन परिपूर्णो[1] वहो बन्द्धुं न शकित इति लोकापवादं नापत्परिपूर्णं बबन्धेत्यर्थः । यतः कीदृक् । वहबन्धे स्वयमुद्यतत्वेन न्युब्जं रोगविशेषं जितवान् न्युब्जजित्तथा[3] न्यग्रोधा वटा वीरुधो लता द्वन्द्वे सह ताभिर्या सा तथावरोधा सेतुबन्धाय वहमध्ये-वरोहन्ती चमूर्यस्य[4] सः प्रवाच्यगतवाक्यवत्प्रवाच्यः पाठविशेषस्त-द्योगाद्ग्रन्थोपि प्रवाच्यस्तद्गतं वाक्यं विशिष्टपदसमुदायो यथा वाच्यता-मत्रेदं पदं लक्षणादिदोषदुष्टमिति लोकापवादमोर्षत्वान्न प्राप्नोति ॥

अवश्यविरेच्य । अवश्यभंज्य । इत्यत्र "ण्यण्यावश्यके" [११५] इति न कगौ ॥

नियोज्यान् । प्रयोज्य । इत्यत्र "निप्राद्°" [११६] इत्यादिना न गः ॥

भोज्य । इत्यत्र "भुँजो भक्ष्ये" [११७] इति न गः ॥

त्याज्य । याज्य । प्रवाच्य । इत्यत्र[9] "त्यज्यज°" [११८] इत्यादिना न कगौ ॥

वाच्यताम् । इत्यत्र[11] "वचोशब्दनाम्नि" [११९] इति न कः ॥ अशब्द-नाम्नीति किम् । वाक्य ॥

भुज । न्युब्ज । इत्येतौ "भुज°" [१२०] इत्यादिना निपात्यौ ॥

वीरुत्[13] । न्यग्रोध । इत्येतौ "वीरुत्°" [१२१] इत्यादिना निपात्यौ ॥ अवरोध । इत्यप्यन्ये ॥

त्रयोदशः[14] पादः समाप्तः ॥

---

१ डी °र्णो विहो. २ सी °पूर्णि ब°. ३ सी °था निग्रो°. ४ सी डी °स्य सप्र°. ५ डी °मापन्न. ६ ए °भज । इ° ७ सी भुज्यो भ°. ८ ए भक्ष इ°. ९ डी त्याज्यः । प्र°. सी त्याज्यः । या°. १० ए °त्र ज्य°. ११ बी °त्रवचो°. १२ सी °त्। निग्रो°. १३ ए बी °रुत्या°. १४ सी दशपादस°.

म्लाय मा किमपि सुम्ल वहं यत्त्वं न विव्यथिथ विव्यय नाहम् ।
स्फारवानिह हि भूपतितेजःस्फाल इत्यजनि बन्धकृतां वाक्
॥ १०८ ॥

१०८. बन्धकृतां सेतुबन्धकारिणां वागजनि । कथमित्याह । हे सुम्लायं वहं बद्धवानहं तु मन्दत्वान्नेति मनःसंतापेन विच्छायमुख किमपि स्तोकमपि मा म्लाय मा विच्छायमुखो भूः । यद्यस्माद्धेतोर्वहं न त्वं विव्यथिथ नाच्छादितवान्न बद्धवानित्यर्थः । अहमपि न विव्यय त्वयेव मयापि वहो न बद्ध इत्यर्थः । तर्हि केन बद्ध इत्याह । इह सेतुबन्धविषये हि स्फुटं भूपतितेजःस्फालो भीमनृपप्रतापसंचयः स्फारवान्स्फुरतीति ॥

सुम्ल । इत्यत्र "आत्संध्यक्षरस्य" [१] इत्यात् ॥ अनैमित्तिकत्वादात्वस्य प्रागेव कृतत्वादाकारान्तलक्षणो डः स्यात् [५.१.७६.] ॥

म्लाय । इत्यत्र "नँ शिति" [२] इति नात् ॥

विव्यथिथ । विव्यय । इत्यत्र "व्यस्थवृणवि" [३] इति नात् ॥ स्फार । स्फालः । अत्र "स्फुर°" [४] इत्यादिनात् ॥

क्ष्मापगारमिव गिर्यपगोरं सोदिदासुरपि दत्तदिदीषः ।
तैर्बलैरनुपदाय बबन्धे दीनमीनकुलवायुपदायः ॥ १०९ ॥

१०९. तैर्भीमसंबन्धिभिर्बलैरनुपदाय क्षयमगत्वा सुखेनेत्यर्थः । स वहो बबन्धे बद्धः । कीदृक्सन् । अदिदासुरपि क्षेतु-

१ सी ई व्ययथ°. २ बी °पमार°.

१ सी डी यस्मा°. २ ए °द्धेतोर्वं°. ३ सी डी °वान्बद्ध°. ४ सी °व्यथि त्वयेव स म°. ५ ए °ति ॥ सुम्ल. ६ ई °भित्तक°. ७ ए न शीति इति बात्. ८ बी सी °स्थवण°. ९ ई °त् ॥ स्पार. १० ए स्फारः । स्फा°. ११ बी °त्र स्फुर. १२ ए °यगमत्वा.

मेनिच्छन्नपि दृप्ता दिदीषा क्षेप्तुमिच्छा यस्य स तथा । किं कृत्वा क्ष्मापगारमिव क्ष्मां मृदमपगूर्येवोद्यम्येव[2] गिर्यपगोरं गिरीनुद्यम्य । क्ष्मापत्र "द्वितीयया" [५.४.७८] इति[3] णम् । यथा केनापि मृत्खण्डमुत्पाट्यत एवं वहे प्रक्षेपार्थं गिरीनुत्पाट्येत्यर्थः । अत एव दीनं भयेन कातरं मीनकुलं मत्स्यौघो यत्र स तथा वायु[4]पदायो जलक्षयो यत्र[5] सः ॥

तैरदीयत वहः परिबद्धो द्राक्प्रमाय च निमाय च वृक्षान् ।
तं प्रमातुमरिमाशु निमातुं दिक्षु कीर्तिमचलश्च चुलुक्यः ॥११०॥

११०. वहोदीयताक्षीयत । कीदृक्सन् । वृक्षान्प्रमाय च हिंसित्वा छित्त्वेत्यर्थः । निमाय च वहे क्षिप्त्वा च द्राक् तैर्बलैः परिबद्धः । तथा चुलुक्यो भीमोचलश्च । किं कर्तुं[6] तमरिं सिन्धुराजं प्रमातुं[7] हिंसितुं दिक्षु कीर्तिं निमातुं च निक्षेप्तुं विस्तारयितुम् ॥

सैन्धवस्य निमयः प्रमयो वास्त्वद्य दुर्निमयदुष्प्रमयस्य ।
इत्यनामयमयाश्वचमूपा मेतुकाममभिमातुमिहोचुः ॥ १११ ॥

१११[8]. आमीना[9]तीत्यामयो रोगो मिन्वन्तीति अचि मया उष्ट्रा अनामयं नीरोगं मयांश्च[10] मया अश्वाश्च येषां ते ये चमूपा नृपास्त इह भीमसमीप ऊचुः । किं कर्तुम् । मेतुकामं जिघांसुं सिन्धुराजमभि[11]मातुं हिंसितुम् । किमूचुरित्याह । दुर्निमयै[12]र्दुष्प्रमयस्य दुःखेन क्षेप्यस्य हिंस्यस्य च सैन्धवस्य सिन्धुराभिजनो निवासोस्य "सिन्ध्वादेरञ्" [६.३.२१६] इत्यञ् । तस्य सिन्धुराजस्याद्य निमायो निरासः प्रमे[13]यो वा हिंसा वास्त्विति । सिन्धुराजोद्यास्माभिर्निरस्यो हिंस्यो वेति प्रतिज्ञां चक्रुरित्यर्थः ॥

---

१ ए °मनच्छ°. २ डी म्येच गि. ३ ए °तिणूम । य°. ४ ए सी डी ई °ईुपादायोपल°. ५ सी डी °त्र सः ॥. ६ सी °र्तुं मतरिं. ७ ए प्रमांतुं. ८ डी ॥ अमी°. ९ बी °नामीत्या°. १० ए °या अ°. ११ ए °भिहातुं. १२ ई °यदुःप्रम° १३ ई प्रमेयो°.

क्ष्मापगारं गिर्यपगोरम् । अत्र "वाप°" [५] इत्यादिना वा-आत् ॥

अदिदासुः दिदीषः । अत्र "दीङः सनि वा" [६] इत्यादा ॥

अनुपदाय[1] । उपदायः । अत्र "यबक्ङिति" [७] इत्यात् ॥ यबक्ङि-तीति[2] किम् । दीन । अदीयत ॥

निमाय[3] । निमातुम् । प्रमाय । प्रमातुम् । अत्र "मिग्मीगोखलचलि" [८] इत्यात् ॥ अखलचलीति किम् । दुर्निमयं[4]दुष्प्रमयस्य ॥ अचि । मय । अनामयं[5] ॥ अलि । निमयः । प्रमयः[6] । मिग्मीग इति किम्[7] । मीङ्[8] हिंसायामित्यस्य मा भूत् । मेतुकामम् । अस्याप्यात्वमिच्छन्त्यन्ये । अभिमातुम् ॥

नो विलात ऋजुरद्य विलेता नो युगेष्वपि स सेतुरतार्कि[1] ।
बन्धसन्धिरगमन्न विलायात्राविलीय चलिते यदनीके ॥ ११२॥

११२. ऋजुः सरलः[9] स भीमबद्धः सेतुर्लोकैरतार्कि । कथमित्याह । अद्य वर्तमानकालेयं[10] नो विलाता विश्लेक्ष्यति । युगेष्वपि कृतयुगादि-ष्वपि नो[11] विलेतेति । यद्यस्माद्धेतोरविलीय मिलित्वा चलितेप्यनीके भीमसैन्ये विलाय विश्लिष्य बन्धसंधिर्बन्धनसंधानमत्र सेतौ नागमन्ना-त्रुट्यत् । अद्येत्यनेन निकटवर्तिनो माससंवत्सरादय उपचारादुच्यन्त इति शास्त्रोक्तोद्यतनोत्र नास्तीति विलातेत्यत्र[12] श्वस्तनी न दुष्यति ॥

विलाय अविलीय[13] । विलाता विलेता । इत्यत्र "लीङ्लिनोर्वा"[14] [९] इति वा-आत् ॥

---

१ ई °तार्कि । ब°.

१ प ई °दायः । उ°. २ ई °ती किम् । अ°. ३ सी °मातु°. ४ डी ई °यदुःप्रम°. ५ ई °य ॥ नि°. ६ प ई °मय ॥ मि°. ७ डी °म् । मीङ्. ८ बी मीह हिं°. ई मीह्च हिं°. ९ प °रलस. १०. सी डी मानेका°. ११ प नो वेले° १२ बी सी °त्र स्वस्त°. १३ डी °विला°. १४ बी लीङ्लनो°.

क्रापयद्द्विषदसून्विशिखैरध्यापयच्च रुदितान्यरिनारीः ।
जापयत्स्वमभिसाधयदर्थं व्याप सेधयदरीशमनीकम् ॥ ११३ ॥

११३. अनीकं भीमसैन्यं व्याप सर्वत्र प्रससार । कीदृक्सत् । विशिखैः कर्तृभिर्द्विषदसून् क्रापयद्ग्राहयदत एवारिनारी रुदितान्यध्यापयच्च रोदयदित्यर्थः[१] । तथा स्वमात्मानं ज्ञातिमात्मीयं वा जापयद्विजयमानं प्रयुञ्जानम् । तथार्थं स्वकार्यं[२] देशस्वीकारादिकमभिसाधयन्निष्पादयत् । तथारीशं सिन्धुराजं सेधयदहं तवोपर्यागच्छामीति ज्ञापयत् ॥

क्रापयत् । जापयत् । अध्यापयत् । इत्यत्र "णौ क्रीजीङः" [१०] इत्यात् । अर्थमभिसाधयत् । इत्यत्र "सिध्यतेरज्ञाने" [११] इत्यात् । अज्ञान इति किम् । अरीशं सेधयत् ॥

स्फारयद्धनुरचापयदुच्चैः स्फोरयद्ध्वनिमचाययदेतत् ।
गाः प्रवापयति यश्च बलाका यः प्रवाययति वा स इवर्तुः ॥११४॥

११४. एतद्भीमानीकं कर्तृ धनुश्चापं स्फारयदाकर्षत्सद्धनुरेवोच्चैरचापयद्व्यस्तारयत्तथोच्चैरुदात्तं ध्वनिं सिंहनादं[३] स्फोरयदुच्छालयत्सद्ध्वनिमचाययद्व्यस्तारयत् । उपमामाह । य ऋतुर्गा धेनूः प्रवापयति गर्भं ग्राहयति य ऋतुर्बलाकाश्च पक्षिणीभेदांश्च प्रवाययति स ऋतुरिव वर्षाकाल इवेत्यर्थः । वर्षासु हि पुरोवाते[४] वाति गावो बलाकाश्च गर्भं गृह्णन्ति । यथा वर्षर्तुर्धनुरिन्द्रचापं ध्वनिं गर्जितं च विस्तारयति तथेत्यर्थः ॥

---

१ प °र्थः । स्वमात्मी°. २ सी कार्यंदे°. ३ सी °दं स्फार°. ४ ई दुत्साल°. ५ प वा तो वा°. ६ बी तुंधनु°.

अचापयत् अचाययत्। स्फारयत् स्फोरयत् । इत्यत्र "चिस्फुरोर्न वा" [१२] इत्याद्य ॥

गाः प्रवापयति बलाकाः प्रवाययति । इत्यत्र "वियः प्रजने" [१३] इत्याद्या ॥

धन्व रोपयत रोहयतेषुं मा विलीनयत सर्पिरिदानीम् ।
मा विलालयत वा नवनीतानीति सैन्धवजनैर्निरघोषि ॥ ११५ ॥

११५. सैन्धवजनैः सिन्धुनिवासिलोकै[1]रितीदं निरघोषि घोषितम्। तदेवाह । हे जना धन्व धनू रोपयत सज्यं कुरुत तथेषुं बाणं रोहयत संधत्तेदानीं सर्पि[2]र्घृतं मा विलीनयताग्निसंपर्केण मा द्रवीकुरुत नवनीतानि वा मा विलालयतेति ॥

भो विलापयत सर्पिरशङ्का एष सिन्धुमभिपालयितास्मि ।
प्रीणयञ्जनपदानिति धन्वोद्धूनयन्समिति हम्मुक आगात् ॥ ११६ ॥

११६. हम्मुको हम्मुकाख्यः सिन्धुपतिः समिति रण आगात् । कीदृक्सन् । जनपदान्प्रीणयन् । कथमित्याह । भो जना अशङ्का निर्भयाः सन्तः सर्पिर्विलापयत द्रवीकुरुत यत एष प्रत्यक्षोस्म्यहं सिन्धुदेशमभिपालयिता स्वयमेव [3]पायमानं सिन्धुं प्रयुञ्जानः सिन्धुरक्षाशीलोहं वर्त इत्यर्थ इति । तथा धन्वोद्धूनयन् गुणाकर्षणेन कम्पयन् ॥

प्रायय[1]त्स्वमभिधावयदद्रीन्वाजयद्ध्रुवमपाययदोजः ।
छाययैनमभिशाययं[2]वेत्थं जल्पदस्य च बलं प्रससार ॥ ११७ ॥

११७. अस्य हम्मुकस्य बलं प्रससार । कीदृक्सत् । ओजो बल-

---

१ ई °य चेत्थं. २ बी य चेत्थं.

---

१ ई °कैः रि°. २ ए °र्पिघृतं. ३ सी डी पालय°.

मपाययच्छत्रुभिरस्वादयदशोषयद्वा प्रकाशयदित्यर्थः । अत एव भुवं वाजयद्गाढपादप्रहारैः[1] कम्पयदत एव वाद्रीनभिधावयत्कम्पयत्तथाहो[2] एनं भटं छाययारींश्छिन्दन्तं[3][4][5] प्रयुङ्क्ष्वाभिशपयं[6] वाञ्छैररींस्तक्ष्णुवन्तं[7][8][9] प्रयुङ्क्ष्वेति जल्पच्छत्रुवधार्थं स्वभटान्प्रयुञ्जानमित्यर्थः । अत एव स्वमात्मीयं ज्ञातिं वा लोकं प्राययत्प्रीणयत् ॥

ह्वाययत्समवसाययदाशु व्याययत्समभिवाययदस्त्रैः[1] ।
श्लेपयद्भयमनर्पयदन्योन्यं चमूद्वयमरेपयदुच्चैः ॥ ११८ ॥

११८. भयमनर्पयदात्मानं भयमप्रापयं[10]निर्भीकमित्यर्थः । चमूद्वयमुच्चैरतिशयेनान्योन्यं कर्मारेपयद्गमयामास मिलितमित्यर्थः । कीदृक् । अन्योन्यं ह्वाययत्सस्पर्धमाकारयत्तथान्योन्यं[11] श्लेपयद्वरयत्तथास्त्रैरन्योन्यमाशु व्याययदाच्छादयत्तथान्योन्यमस्त्रैः कर्तृभिः समभिवाययदस्त्राणि सीव्यन्ति प्रयुञ्जानं किं बहुनान्योन्यं समवसाययदन्तं प्रापयत् ॥

क्ष्मापयते किमु चमूरिति भीमः क्नोपयन्स्वयमह्रेपितवंशः ।
प्रापयन्समिति सिन्धुपतिश्च स्फावयन्निषुगणं प्रडुढौके ॥ ११९ ॥

११९. भीमः स्वयं संमिति[12] रणे[13] प्रडुढौके । कीदृक्सन् । अह्रेपितवंशोनेकावदातैरलज्जापितान्वयोत एव क्नोपयन् भट्टमुखेन हम्मुखं[14] जल्पयन्[15][16] । किमित्याह[17] । अहो हम्मुक चमूः किमु[18] किमिति क्ष्मापयते

१ बी सी डी ई °स्त्रैः । श्लेप°.

१ सी डी °द्रप्र°. २ बी त्तदाहो. ३ बी यारीच्छिन्द°. ४ डी °रींश्छिन्द°. ५ ए °श्छिदन्तं. ६ बी ई °य चास्त्रै°. ७ सी वास्त्रैररींस्त°. ८ ए °स्त्रैररींस्त°. ९ डी °स्तक्षणव°. १० डी °यन्नभीक°. ११ बी सी डी ई °न्यं श्लेप°. १२ ए समवि र°. १३ ए बी सी °णे डु°. १४ सी °म्मुखेन हम्मुखं. १५ सी डी °ल्पन्. १६ सी °न् । कथमि°. १७ डी ई °ह । हो. बी °ह । हे ह°. १८ डी किमि°.

क्षयं नीयत इत्यर्थः । अहं च त्वं च स्वयं युध्यावहे[1] इत्यभिप्राय इति । तथा सिन्धुपतिश्च हम्मुकोपि स्वयं[2] प्रडुढौके । कीदृक्सन् । इषुगणं प्रापयन् प्रियं कुर्वन्नत एव स्फावयन्वर्धयन् ॥

[3]रोपयत रोहयत । इत्यत्र "रुहः पः" [१४] इति वा पः ॥

विलीनयत । इत्यत्र "लियो नोन्तः°" [१५] इत्यादिना वा नः । विलाययत । इति पक्षोदाहरणं ज्ञेयम् ॥

विलालयेत[4] विलापयत[5] । इत्यत्र "लो लः" [१६] इति वा लः ॥

अभिपालयिता । इत्यत्र "पातेः" [१७] इति लः ॥

धूग् धूग्श् धूग्ण् वा । उद्धूनयन् ॥ प्रींग्श्[6] प्रींग्ण् वा । प्रीणयन् । इत्यत्र "धूग्प्रीगोर्नः" [१८] इति नः ॥ यौजादिकयोर्नेच्छन्त्येके । अभिधावर्यत्[8] । प्राययत् ॥

वाजयत् । इत्यत्र "वो वि°" [१९] इत्यादिना जः[9] ॥

पां पाने पैं वा । अपाययत् । अभिशायय । छायय । समवसाययत् । समभिवाययत् । व्याययत् । ह्वाययत् । इत्यत्र "पाशा°" [२०] इत्यादिना यः ॥

अर्नपयेत्[10][11] । अरेपयत्[12] । ब्लेपयत् । अह्रेपित । क्नोपयन् । क्ष्माप्यते । प्रापयन् । इत्यत्र "अर्तिरी°" [२१] इत्यादिना पुः ॥

स्फावयन् । इत्यत्र "स्फायः[13] स्फाव्" [२२] इति स्फाव् ॥

---

१ ई °ध्यामहे. २ प बी सी ई °यं डु°. ३ सी रोह°. ४ बी °लालययत. डी ई °लापयत. सी °ला × × × × × णयन् । इत्यत्र धूग्प्री° ५ डी °यत् वि°. ६ प °प । इ°. ७ बी °ग्श् प्रीग्ण्. ८ ई °यन् । प्रा°. ९ ई °जः ॥ पं पा°. १०. बी °नपय°. ११ सी °त् । ब्ले°. १२ बी डी ई °त् । ब्लेप°. १३ प स्फाय् स्फा°.

शातयन्विघटयन्व्यथयन्वा रोदसी ध्वनिरघाटि धनुर्भ्याम् ।
खे तयोरिषुगणोघटि घाटंघाटमाशु विघटंविघटं च ॥ १२० ॥

१२०. ध्वनिः क्रेङ्कारस्तयोर्भीमहम्मुकयोर्धनुर्भ्यामघाटि कृतः । कीदृग् । रोदसी शातयन्पातयन्निव विघटयन्वा द्विधा कुर्वन्निव वा । विपूर्वो घटिरिनन्तो विदारणेपि वर्तते । यथा काष्ठं विघटयति । व्यथयन्वा पीडयन्निव वा । एष्विवा अवसीयन्ते । अतितीव्रध्वानो ह्युच्चशैलशृङ्गादीनि भ्रंशयति पृथिव्यादीनि विदारयति नरादींश्च व्यथयतीत्यतितीव्रत्वादेवमाशङ्कितः । तथा धनुर्भ्यां कर्तृभ्यामिषुगणः खेघटि निक्षेपेण योजितः । किं कृत्वा । आशु घाटंघाटमात्मभ्यां सह संयोज्य संयोज्याशु विघटंविघटं च निक्षेपकाल आत्मसकाशाद्वियोज्य वियोज्य च ॥

इषुभिरनयोर्व्याथंव्याथं व्यथंव्यथमव्यथि
प्रतिकगयिता कागंकागं कगंकगमाकगि ।
प्रतिजरयिता जारंजारं जरंजरमाजरि
क्नसयितृजनः क्नासंक्नासं क्नसंक्नसमक्नसि ॥ १२१ ॥

१२१. अनयोर्भीमहम्मुकयोरिषुभिः कर्तृभिः प्रतिकगयिता प्रतीपं हन्ता प्रत्यर्थी व्याथंव्याथं व्यथंव्यथमभीक्ष्णं दुःखयित्वा दुःखयित्वाव्यथि दुःखितः । तथेषुभिरेव प्रतिकगयिता कागंकागं कगंकगमभीक्ष्णं प्रहृत्य प्रहृत्याकगि प्रहृतः । तथेषुभिरेव प्रतिजरयिता प्रतीपं क्षयं

१ ए शान्तय॰. २ सी ॰थं व्य॰. ३ बी ॰रयता. ४ बी ॰ससक्न॰.

१ डी ॰न्वाद्वेधा. २ बी डी ॰टिरन॰. ३ ए ॰ति प्रथि॰. ४ ई ॰योज्या॰. ५ सी ॰टं च. ६ ए ॰क्ष्णं दुख॰. ७ डी ॰स्वाव्य॰. ८ ई ॰हत्या॰.

नेता शत्रुर्जारंजारं जरंजरमभीक्ष्णं निर्जरय्यै निर्जरय्य विनाश्याजरि-विनाशितः[2] । तथेषुभिः क्रसयितृजनः क्रसयिता वञ्चयिता सन्ताप-यितौ[3] वा जनः शत्रुः क्रासंक्रासं क्रसंक्रसमभीक्ष्णं वञ्चयित्वा वञ्चयि-त्वा संताप्य संताप्य वाक्रसि वञ्चितः संतापितो वा । व्यौथंव्याथमित्यादि-भिरेवाभीक्ष्ण्येवगतेपि[5] णिणम्परे णौ वा ह्रस्वोदाहरणानां लाघवेनोपन्यासार्थं व्यं-थंव्यथमित्यादीनामाभीक्ष्ण्य एव वर्तमानानां पुनः प्रयोगोतिशयेनाभीक्ष्ण्यं वक्ति । एवमन्यत्रापि ॥ हरिणी छन्दः ॥

प्रतिजनयता जानंजानं जनंजनमाग आ-
वनयितुरसून्वानंवानं वनंवनमोजसा ।
रजयसि मृगान् राजंराजं रजंरजमाः किमि-
त्यतिहसकृता भीमस्याव्याथ्यतीव मनो द्विषा ॥ १२२ ॥

१२२. ओजसा बलेन प्रयोज्यकर्त्रासून्हम्मुकप्राणान्वानंवानं वनंवनमभीक्ष्णं[10] याचयित्वा[11] याचयित्वावनयितुर्याचयितुर्मोहयितु-र्बलेन हम्मुकं मिमारयिषोरित्यर्थः । भीमस्य मनो[13] द्विषा हम्मुकेनाती-वात्यर्थमव्याथि पीडितम् । यतः कीदृशा । अतिहसकृतात्यर्थं हसता । कथमित्याह । आ इति खेदे । कष्टमहो भीम किमिति मृगान् राजं-राजं रजंरजमभीक्ष्णं रमयित्वा रमयित्वा रजयसि रमयसि व्याध इव मृगतुल्यानेतान्भटान्किमिति खेलयसि ममैव पार्श्वे ढौकस्वेत्यर्थ इति ।

१ ए सी ई °य्य वि°. २ ए °शित । त°. ३ सी डी °ता ज°. ४ ई व्याथ व्या°. ५ बी °भीक्ष्योव°. सी °भीक्ष्णेव°. ६ सी °व्यथ°. ७ सी °भीक्ष्ण ए°. ८ सी हरणी. ९ ए °त्रां तेन हम्मु° १० × The ms. ई becms to have omitted one line The omission is hointidoret but not filled in. ११ ए त्वाव°. १२ ए °तुयाच°. सी °तुर्मो°. १३ ए °नोह द्वि°.

तथागो दुर्वाक्यजनितमपराधं जानंजानं जनंजनमभीक्ष्णमुत्पाद्योत्पाद्य प्रतिजनयता कुर्वता ॥

किमरजि मयान्वेणोराजि त्वया न्विति जल्पता
तंद्जनि बलं तेजोजानि व्यकागि च तत्तथा ।
अवनि स यशोवानि प्राणानजारि च मार्गणैः
शशिकुलभुवा बद्धाक्रासि द्विषन्स्नसयन्यथा ॥ १२३ ॥

१२३. नुशब्दो विकल्पार्थः । किं मया वैणो मृगतुल्यो भटजनोरजि युद्धेन रमयांचक्रे किं त्वया नु भवता वैणोराजीत्येवं जल्पता शशिकुलभुवा सोमवंशोद्भवेन भीमेन तत्तत्रत्यलोकप्रसिद्धं बलं तथाजनि कृतं तत्तेजः प्रतापस्तथोजानि । तथा तद्बलं तेजश्च तथा व्यकागि च व्यापारितं यथा स द्विषन्हम्मुको मार्गणैः शरैः प्रयोज्यकर्तृभिर्भीमेन कर्त्रा यशोवनि याचितः प्राणांश्चावानि तत्संमुखप्रेरितबाणपार्श्वाद्भीमेन मह्यं स्वकीयं यशः प्राणांश्च देहीति याचित इवेत्यर्थः । अजारि च बलहीनः कारितोत एव बद्धाक्रासि कुटिलीकृतः । कीदृक्सन् । मार्गणैः स्नसयन्भीमं निराकारयन्प्रहारयन्नित्यर्थः ॥

शातयन् । इत्यत्र "शदिः°" [२३] इत्यादिना शात् ॥

विघटयन् । अघाटि अघटि । घाटंघाटम् विघटंविघटम् । व्यथयन् । अव्याथि अव्यथि । व्याथंव्याथम् व्यथंव्यथम् । अत्र "घटादेः°" [२४] इत्यादिना णौ ह्रस्वो ञिणम्परे तु णौ दीर्घो वा ॥

१ ए °दव°.

१ सी डी तत्र°. २ ए °थाजोनि. ३ ए °था वका°. ४ ए °त्यर्थ अ ५ ए °थि । व्या°.

प्रतिकगयिता। अ्यकागि आकगि। कागंकागम् कगंकगम्। आवनयितुः। अवानि अवनि। वानंवानम् वनंवनम्। प्रतिजनयता। अजानि अजनि। जानंजानम् जनंजनम्। प्रतिजरयिता। [3]अजारि आजरि। जारंजारम् जरंजरम्। क्नसयितृ। अक्नासि अक्नसि। क्नासंक्नासम् क्नसंक्नसम्। रजयसि मृगान्। ए्णोराजि अरजि। राजंराजम् रजंरजम्। अत्र "कगेवनू°" [२५] इत्यादिना ह्रस्वो जिणम्परे तु णौ वा दीर्घश्च। केचित्तु ण्यसूचोपीच्छन्ति। क्नसयन्॥

अदमि न सुरैर्नो वा दैत्यैरदामि य आहवे
स्म दमयति तं दामंदामं दमंदममोजसा।
[1]चुलुककुलभूः कामंकामं ह्यकामयदामय-
त्तमथ निगडं प्रामंप्रामं य आमि न केनचित्॥ १२४॥

१२४. यो हम्मुक आहवे रणे सुरैर्नादमि न दमितो नो वा दैत्यैरदामि तं हम्मुकं चुलुककुलभूर्भीम ओजसा बलेन प्रयोज्यकर्त्रा दामंदामं दमंदममभीक्ष्णं दमयित्वा दमयित्वा दमयति स्म। अथानन्तरं हम्मुकं निगडं शृङ्खलां हि स्फुटं कामंकाममभीक्ष्णं वाञ्छयित्वाकामयद्वाञ्छयत्तथा निगडं प्रामंप्रामं प्रापय्य प्रापय्यामयत्प्रापयद्यो हम्मुकः केनचित्केनापि निगडं नामि न प्रापितः॥

नाचामि नाकामि च केनचिद्या तां सोथ चौलुक्यकुलावतंसः।
आचाममाचाममिभाश्वसैन्यान्याचामयत्सेक्षुयवां तदुर्वीम्॥ १२५॥

१२५. अथ योर्वी केनचित्केनापि स्वसैन्यपार्श्वाभाचामि न

१ ई चुलक. २ ए °मं ह्य°. ३ ए °तंस। आ°.

१ सी °गयता. २ ए बी नयिता. ३ ई °रि अज°. ४ सी डी °त्। आक्ना°. ५ ए °म्। र°. ६ ई चुलक°. ७ ए °भूमी ओ°. ८ डी निगंडं.

खादयांचक्रे नाकामि च। आस्तां तावद्राचामनं नैवाभिलाषयांचक्रेपि। एतेनातिनिरुपद्रवत्वेन तद्भूमेरतिशाड्वलैतोक्ता। तां सेक्षुयवामिक्षुवाटक्षेत्रयवोपेतां तदुर्वी हम्मुकपृथ्वीं स चौलुक्यकुलावतंसो भीम इभाश्वसैन्यानि प्रयोज्यकर्तॄण्याचाममाचामं खादयित्वा खादयित्वाचामयत्। इभैरिक्षूनश्वैश्च यवानखादयत्॥

दमयति। अदामि अदमि। दामंदामम् दमंदमम्। इत्यत्र "अमोकमि°" [२६] इत्यादिना ह्रस्वो ञिणम्परे तु णौ वा दीर्घः॥ अकम्यमिचम इति किम्। अकामयत्। अकामि। कामंकामम्। आमयत्। आमि। आमंआमम्। आचामयत्। आचामि। आचाममाचामम्॥ इन्द्रवज्रा छन्दः॥

॥ इति श्रीजिनेश्वरसूरिशिष्यलेशाभयतिलकगणिविरचितायां श्रीसिद्धहेमचन्द्राभिधानशब्दानुशासनद्व्याश्रयवृत्तावष्टमः सर्गः॥

१ ए °नापिनि°. २ ए °शाद्वलितोत्कांतात्कां तां से°. ३ सी °लस्तात्का तां से°. ४ ए °चासं खा°. ५ डी °कामि. ६ ए °म्। अचा°. ७ डी °ममा°. ८ ई °र्गः समाप्तः॥

द्व्याश्रयमहाकाव्ये

नवमः सर्गः ।

[1] परिस्खादंपरि[2]स्खादं परिस्खदंपरिस्खदम् ।
स परिस्खदयन्दृप्तान्भीमोथ प्रतिचेद्यगात् ॥ १ ॥

१. अथ हम्मुकवशीकरणानन्तरं स प्रसिद्धो भीमः प्रति[1]चेदि चेदिदेशाभिमुखमगात् । कीदृक्सन् । दृप्तान्दर्पिष्ठान्नृपान्परिस्खादंपरिस्खादं स्खदि हिं[2]सास्थैर्ययोः । र[3]णे स्थिरैर्भाव्यमिति स्थिरीकृत्य स्थिरीकृत्य परिस्खदंपरिस्[4]खदं स्वसैन्यैर्घातयित्वा घातयित्वा परिस्खदयन् स्थिरीकुर्वन्घातयंश्च ॥

अपस्खादमपस्खादमपस्खदमपस्खदम् ।
यैरपास्खादि तैर्नापास्खद्यस्य वहतो ब[3]ले ॥ २ ॥

२. तैश्चरटैश्चरैरस्य भीमस्य वहतो गच्छतो बले ना[5]पास्खदि मृत्युभयान्न किमपि विनाशितम् । यैरपस्खादमपस्खादमपस्खदमपस्खदमभी[6]क्ष्णं स्वभटैर्घातयित्वा घातयित्वापास्खादि घातः कारितो यैर्नृपादयोपि गच्छन्तः प्रच्छन्नधाटीपातादिनोपद्रुता इत्यर्थः ॥

---

१ बी सी डी अर्हम् । प°. २ ए °रिस्कादं. ३ ई बलेः ॥.

---

१ सी °दिदे°. २ ए °सास्तैर्य°. ३ ए रणै स्थि°. ४ सी °स्खद°. ५ बी °पास्खादि. ६ बी सी डी °क्ष्णं सुभ°.

पर्यस्खादि च नो तेनाप्यनपस्खदयन्पथि ।
किं तु प्रस्खादयन्नेव पर्यस्खदि महौजसा ॥ ३ ॥

३. तेनापि न केवलं तैरस्त्र वहतो बले नोपास्खदि किं तु न्याय-निष्ठत्वाद्भीमेनापि पथ्यनपस्खदयन्नहिंसयन्नो च नैव पर्यस्खादि । शिष्टं स्पष्टम् ॥

परिस्खदयन् । पर्यस्खादि पर्यस्खदि । परिस्खादंपरिस्खादं परिस्खदं-परिस्खदम् । अनपस्खदयन् । अपास्खादि अपास्खदि । अपस्खादमपस्खादम् अपस्खदमपस्खदम् । अत्र "पर्यपात्स्खदः" [२७] इति णौ ह्रस्वो ञिणम्परे तु णौ वा दीर्घः ॥ स्खदेर्घटादिपाठेन सिद्धे नियमार्थं वचनमन्योपसर्गपूर्वस्य मा भूदिति । प्रस्खादयन् ॥

न्यशामि शमयन्भिल्लान् शामंशामं शमंशमम् ।
भीमश्च चेदिना दोश्च न्यशाम्यशमि नो पुनः ॥ ४ ॥

४. चेदिना चेदीशेन भीमश्च न्यशाम्यागच्छन् भुवः । कीदृक् । भिल्लान् म्लेच्छभेदान् शामंशामं शमंशममभीक्ष्णमुपशमय्योपशमय्य शमयन्निराकुर्वन्नित्यर्थः । ततो दोश्च भुजा च न्यशामि बलावलेपा-त्स्वभुजसंमुखं विलोकितमित्यर्थः । नो पुनश्चेदिना दोरशम्युपशमितं सावष्टम्भं कृतमित्यर्थः ॥

शमयन् । न्यशामि अशमि । शामंशामम् शमंशमम् । इत्यत्र "शमोऽदर्शने" [२८] इति ह्रस्वो ञिणम्परे तु णौ वा दीर्घश्च ॥ अदर्शन इति किम् । दोर्न्यशामि ॥

---

१ डी °नाथन°. २ ए महेज°.

---

१ सी डी नापस्ख°. २ ए °सयेन्नो. सी °सन्नोनैव. ३ डी °न्नो नै°. ४ ई °दि । शेषं स्प°. ५ ए °स्खदिं पारि°. ६ ए अपस्ख°. ७ ए °त् पस्ख°. ८ ए °मय्य श°. ९ ई °य्य निरा°. १० ए °मदर्यन्नि°. ११ ई °पाद्भु°. १२ सी °र्थः ॥ सम°. १३ सी डी °न् । निशा°. १४ ए दोर्न्यंशा°.

रिपून्यमयितुर्[1]मेध यामंयामं यमंयमम् ।
मैत्र्यै किमुदयं[2]म्येषोमैत्र्यै किमुदयामि वा ॥ ५ ॥
न विधिर्यामय[3]त्यर्के मां चामज्ञपयज्ञितः ।
भीमोरीन् ज्ञपयन्नेति ज्ञापंज्ञापं ज्ञपंज्ञपम् ॥ ६ ॥
अज्ञापि ज्ञपयित्वास्त्रं चहयि[4]त्वा तु नाज्ञपि ।
यत्पूर्वैः किं जयेत्सोयं चाहंचाहं चहंचहम् ॥ ७ ॥
न चाहिता चहिता नाज्वाल्यज्वल्यमु[5]ने[6]ति वा ।
नाज्ञात्वा ज्वलयाम्येनं ज्वालंज्वालं ज्वलंज्वलम् ॥ ८ ॥
ज्वालयन्प्रज्वलयन्वा विग्रहं ह्वलयन्परम् ।
[7]संधिं वा ह्वालयन्दूतं ह्मल[8]येद् ह्मालयन्नयम् ॥ ९ ॥
इति यावदभूच्चिन्तानमितग्लपिताननः ।
चैद्यस्तावद्रजोपश्ये[9]न्नामयद् ग्लापयद्दिशः ॥ १० ॥

५–१०. चैद्यश्चेदिदेशाधिपश्चिन्तयानमितं नम्रीकृतं ग्लपितं च क्षीणहर्षं कृतमाननं मुखं येन स तथा यावदभूत्तावद्दिशो ग्लापयन्मलिनीकुर्वदत [1]एव नामयन्नी[2]चैः कुर्वद्रजः सैन्यखुरोत्खातरेणुमपश्यत् । का चिन्तेत्याह । अद्य सां[3]प्र[4]तं मे मम रिपून् यामंयामं यमंयममभी-

१ प ॰मेधं या॰. २ प ॰यम्येषो॰. ३ प ॰त्यर्कं मां. ४ प ॰त्वा ना॰. ५ प ॰नेभि वा. ६ डी ॰ति चा।. ७ प सी संधि वा. ८ सी डी ॰ये ह्मा॰. ९ प ॰श्यनाम॰.

१ प एवाना॰. २ प ॰नीचै कुर्वरजा सैन्यखरो॰. ३ प ॰प्रत मे. ४ ई ॰तं म॰. ५ प ॰मपीक्ष्ण॰.

क्षणमुपरमय्योपरमय्य यमयितुरुपरमयितुस्तिरस्कुर्वतः[1] सत इत्यर्थः । मैत्र्ये बलिष्ठतयायं संप्रति शत्रून्पराभवन्मा भीममपि पराभूदिति[2] सख्याय किमेष भीम उद्यमि मन्त्रिभिरुद्यमं कारितः । किं वा मैत्र्यै[3] संप्रत्ययं शत्रूञ्जयन्मा भीमस्यै[4] दुःसाध्यो भूदित्याशयेन विग्रहायोद्यामि । तथा विधिर्दैवमर्कं[5] न यामयति न परिवेवेष्टि परचक्रकृतराष्ट्रभङ्गादिसूचकं दुर्दैवकृतमर्कपरिवेषाद्यरिष्टं न किं चिदस्तीत्यर्थः । चः पर[6]मर्थे । परं[7] भीम इतोस्मिन्देश एति । कीदृक्सन् । अरीञ् ज्ञापंज्ञापं ज्ञपंज्ञपमभीक्ष्णं हिंसित्वा हिंसित्वा ज्ञपयन्हिंसन्नत एव माम‍प्रज्ञपयन्नपरितोषयन् । तथा यत्पूर्वैर्[8]यस्य भीमस्य पूर्वजैर्मूलराजाद्यैरज्ञं ज्ञपयित्वा तीक्ष्णीकृत्याज्ञाप्यमारि शत्रुहिंसा[9] चक्रे । भावेत्र णिच् । तुः[10] परमर्थे । परं चहयित्वा शाठ्यं कृत्वा यत्पूर्वैर्[11]नाज्ञापि न हिंसितं सोयं भीमोतर्कितमभिषेणकत्वात्किं चाहंचाहं चहंचहमभीक्ष्णं छलयित्वा छलयित्वा जयेच्छत्रुं वशीकुर्यात् । "विधिनिमन्त्रण°" [५-४-२८] इत्यादिना संप्रश्ने सप्तमी । तथैनं भीमं ज्वालंज्वालं ज्वलंज्वलं प्रत्यवस्कन्द[12]नादिनाभीक्ष्णं कोपयित्वा कोपयित्वा न ज्वलयामि न कोपयामि । किं कृत्वाज्ञात्वा । किमित्याह । अमुना भीमेन न चाहिता न शाठ्यं करिष्यते[13] चहिता वा । वा शब्दोत्रापि योज्यः । शाठ्यं करिष्यते वा । तथामुना[14] नाज्वालि कोपेनात्मा न ज्वालितोज्वलि[15] वेति । तथा परं शत्रुं ज्वालयन्[16]प्रतापैः संतापयन्[17]प्रज्वलयन्प्रकर्षेण संतापयंश्च[18] भीमो दूतं[19] ह्वालयेत्प्रेषयेत् । कीदृक्सन् । विग्रहं वा[20] हलयंश्चालयन्प्रवर्तयन्नि-

---

१ प °र्वतोः स°. २ सी डी °भूयादि°. ३ डी मैत्र्ये सं°. ४ प °स्य दुसा°. ५ प °मर्के न. ६ प सी डी रमार्थे°. ७ प °रं चहयित्वा शाठ्यं कृत्वा यत्पूर्वैर्नाज्ञपि न हिंसितं सोयं भीमोतर्कितन्हि°. ८ प पूर्वैर्मू°. ९ ई °वे भि°. १० सी तु प°. ११ प °त्पूर्वैर्नो°. १२ सी °नाभी°. १३ सी डी °ते चाहि°. १४ सी डी °नाज्वा°. १५ बी °तो ज्वालिचेति. १६ प repeats from यन् to ल्यन्. १७ प ई °न्प्रज्वाल°. १८ प °पयश्च भीमौ दू°. १९ डी °ये की°. २० प वा हुल°.

त्यर्थः । संधिं वा ह्वालयन्प्रवर्तयन् । यतः कीदृक् । नयं न्यायं ह्वालयन्प्रवर्तयन् । यद्ययं मया सह विग्रहं संधिं वा चिकीर्षुः स्यात्तदा न्यायनिष्ठत्वाद्दूतं मत्पार्श्वे प्रेषयेन्न तु प्रेषितवांस्तस्मान्मैत्र्यमैत्री च न कारणं किं त्वन्यत्किमपीत्यर्थ इति ॥

स्वर्णवर्मांशुभिर्व्योम स्नपयत्स्नापयद्दिशः ।
कूर्मेण वमयत्[2]फेनं गरं शेषेण वामयत् ॥ ११ ॥
अवन्या वानयत्कम्पं [3]निश्छद्य वनयत्तथा ।
शिखिच्छदच्छत्रचयैर्धामच्छद्भिश्छदिःश्रियम् ॥ १२ ॥
दिव्य[5]प्रच्छदसाधाश्वमालुलोकश्च चेदिपः ।
कालोचितं च वेत्रीशेनाश[6]शंसदचीकरत् ॥ १३ ॥

११–१३. चेदिप आश्वमश्वौघमालुलोकश्च न केवलं रजोपश्यदिति चार्थः । कीदृशम् । स्वर्णवर्मांशुभिर्व्योमं स्नपयदुज्ज्वलीकारकत्वेनाभि[4]षिञ्चदिवैवं दिशः स्नापयत् । तथा कूर्मेण कर्त्रातिभाराक्रान्त्या फेनं वमयदुद्गारयत् । तथा [5]शेषेण कर्त्रा [6]गरं विषं वामयत् । तथावन्या कम्पं वानयद्[7]वनीं कम्पं याच[8]मानां प्रयुञ्जानं पृथ्वीं कम्पयदित्यर्थः । तथा [9]निश्छद्य निर्मोयं यथा स्यादेवं धामातपं छादयन्ति क्विप् । तैर्धामच्छद्भिः शिखिनां मयूराणां ये छदाः पक्षास्तेषां छत्रचयैः

---

१ प °यन्दिशः. २ प °त्फेनं ग°. ३ बी निच्छ्म°. ४ प °त्रत्रयै°. ५ सी डी °प्रच्छाद°. ६ प °शाशद°.

---

१ प °त्र्यमित्री. २ प सी °वल र°. ३ बी म श्नप°. ४ बी °षिञ्चिदि°. ५ ई शेषक°. ६ प गर वि°. ७ प वनीयं क°. ८ प °चनानां. ९ बी निच्छद्य.

श्रीकरीनिकरैः कर्तृभिश्छदिःश्रियं गृहाच्छादकतृणपङ्क्तिशोभां वनयथा-चयदङ्गीकारयदित्यर्थः । तथा दिव्याः प्रधानाः प्रच्छदा वस्त्राणि येषां ते तथा सादिनोऽश्ववारा यत्र तत् । ततश्च चेदिपो वेत्रीशेन कर्त्रा कालोचितमाशशासद्भाणितवानचीकरच्च कारितवांश्च ॥

असस्वामत्ततो द्वास्थ आशशासच्च पर्षदम् ।
स्वाधिकारमबभ्राजद्वाचं चैवमसिस्वदत् ॥ १४ ॥

१४. ततश्चेदिपेन कालोचितस्य भणनकरणविषये व्यापारणानन्तरं द्वास्थोसस्वामत्स्वामिनमाख्यद्युष्मदादिष्टमधुनैव करोमीति चेदिपमुवाचेत्यर्थः । तथा पर्षदमाशशासत्स्ववचःश्रवणसाभिलाषां चक्रे यतः स्वाधिकारं विज्ञप्य विज्ञपनरूपमेवबभ्राजदप्रकटयत् । एतदपि कुत इत्याह । यत एवं वक्ष्यमाणप्रकारेण वाचमसिस्वदच्च चारुरचनयी स्वाद्वीमकार्षीच्च ॥

यथासौ वाचमसिस्वदत्तथाह ।

छत्रैरबिभ्रजद्व्योमाबीभसत्कुन्तकान्तिभिः ।
अबभासत्किरीटोस्रैर्हेषारावैरबीभषत् ॥ १५ ॥
खुराग्रैरबभाषत्क्ष्मामदिदीपदपीपिडत् ।
भारेण क्रोडदंष्ट्रामप्यपिपीडददीदिपत् ॥ १६ ॥

---

१ ए °म् । स्वाधि°. २ सी डी °त्रैराबि°. ३ ए °भ्रमद्व्यो°. ४ ए °सत्कि-रीटोस्त्रैः हृषा°.

---

१ बी °दिश्चि°. २ ए °पो विर्त्रा°. ३ ए °रत्व का°. ४ ए °दिन°. ५ ए °षयै व्या°. ६ ए ई करिष्ये चे°. ७ ए °वचश्र°. ८ सी डी °बणे सा°. ९ बी सी डी °रूपं स्वव्यापारम°. १० ए मवभ्राज°. ११ डी °या साध्वीम°. १२ बी स्वाधीनम°. सी स्वाध्वीम°.

अजिजीवच्चमस्तेन रजो यदुदमीमिलत्।
अस्त्राण्युदमिमीलत्तान्युद्द्योतं यैरजीजिवत् ॥ १७ ॥
दुन्दुभीनचकाणच्चान्यैर्[1]निकुञ्जान्यचीकणत्।
अरराणच्च ढक्कास्ता यक्काभि[2]र्याममरीरणत् ॥ १८ ॥
काहला अववाणच्च निजोत्कर्षं[3] न्ववीभणत्।
शङ्खानवीवणच्चोच्चै[4]रवैभाणच्च मङ्गलम् ॥ १९ ॥
कापि क्षो[5]भमशश्राणद्विस्मयं[6] काप्यशिश्रणत्।
अजुहावद्धेषयाश्वमार्कं[7][8] चैन्द्रं न्वजूहवत् ॥ २० ॥
अजिहेठदगांस्तान्भुव्यलुलोटदलूलुपत्।
नयानजीहि[9]ठत्कश्चिदलुलोपदलूलुटत्[10] ॥ २१ ॥
नालल्लापन्मिथो नालीलपदन्यं तथापि हि।
अचिकीर्तत्प्रभोः शक्तिं निजां भक्तिमचीकृतत् ॥ २२ ॥
भीमस्य दूतेन [11]संहैषोववर्तदिहागतिम्।
अश्वायुतं चमूलेशो नोपद्रवमवीवृतत् ॥ २३ ॥

१५–२३. एष युष्माभि[1]रत्यासन्नं दृश्यमानो भीमस्य चमूलेशो-

१ ए °करन्. २ बी °भिस्ताम°. ३ सी बी °र्षं त्वबी. ४ ए °क्वाण°. ५ ए क्षोत्सम°. ६ बी °यं काप्य°. ७ ए बी सी °र्कं न्वैन्द्रं. ८ डी °न्द्रं त्वजू°. ९ ए °हिउत्क°. १० पं °लुपत्. ११ सी डी सहाषो°.

१ डी °भिरिख्या°.

श्वायुतमश्वानां दशसहस्राणि[1] दूतेन सहेह प्रत्यक्षे देश आगतिमाग-
मनमववर्तचक्रे । कीदृगित्याह । एषच्छत्रैर्म[2]हा[3]सामन्तादिमूर्धोपरि[4]स्थि-
तैरा[5]तपत्रैः कृत्वा व्योमाबिभ्रजदशोभयत् । तथैष कुन्तकान्तिभिः कृत्वा
व्योमाबी[6]भसदुददीपयत् । तथैष किरीटोस्रैर्महासामन्तशिरः[7]स्थमुकुटां-
शुभिः कृत्वा व्योमावभासन् । तथैष हेषा[8]रवैः कृत्वा व्योमाबीभषत्प्र-
तिशब्दितैरशब्दाययत् । तथैष खुराग्रैः कृत्वा क्ष्मा[9]मबभाषच्छब्दाय-
मानां प्रायुङ्क्ता[10]दिदीपत्समतापयदपीपिडत्पीडितवांश्च । तथैष भारेण
कर्त्रा क्रोडदंष्ट्रामपि न केवलं[11] क्ष्मामादिवराहदाढामप्यपिपीडददीदि-
पच्च । तथा यद्यस्माद्धेतोरेष रजो धूलिमुदमीमिलदुच्छालितवांस्तेन
हेतुना तमोजिजीवदुल्लासितवानित्यर्थः । तथैष तान्यस्त्राण्युदमिमील-
दप्रकटयद्यैः कृत्वैष उद्[12]द्योतमजी[13]जिवन् । तथैष तान्दुन्दुभीन्पटहानच-
काणदवादयद्यैः कृत्वैष निकुञ्जानि गिरिगह्वराण्यचीकणत्प्रतिशब्दैः
शब्दायितवान् । तथैष ता ढक्का[14] विजय[15]भम्भा अरराणं[16]श्चावादयच्च य-
काभिः कृत्वा[17] द्यामरीरणन् । तथैष काहला अववाणं[18]श्चावादयत् ।
एतत्स्वरस्यात्युदात्तत्वादुत्प्रेक्ष्यते । एष निजोत्कर्षं न्वात्मीयोत्कृष्टता-
मिवाबीभणदभाणयत्प्रस्तावात्काहला एव । "गतिबोध०" [२.२.५]
इत्यादिना णिकर्तुः[19] कर्मता । काहलापार्श्वा[20]दित्यर्थः । [21]तथैष उच्चैः शङ्खान-
वीवणच्च । एतत्स्वरस्य च मङ्गल्यत्वादुत्प्रेक्ष्यते । मङ्गलं[22] न्वबभा[23]णद्राणि-
तवान् । प्रस्तावाच्छङ्खानेव । तथैष कापि शत्रुपु क्षोभं भयेनाकुलता-
मशश्राणददान् । तथैष कापि नागरिकेषु ऋद्धिविशेषेण विस्मयमाश्च-

---

१ सी डी °हस्राणि. २ ए °पस्थत्रैम°. ३ ए °दिमहामू°. ४ बी सी डी °रिधृतै°. ५ ए °स्थितेरा°. ६ ए °बीसस°. ७ बी °शिरस्थ°. ८ ए °षारावः कृ°. ९ ए क्ष्मानव°. १० बी ई °युक्तादि°. ११ ए °ल क्ष्म्यानादि°. १२ ए बी डी उद्योत°. १३ ए °जिषस्तथै°. १४ ई ढक्कावि°. १५ ए विषय°. १६ ए °णच्च वा°. १७ बी सी डी कृत्वैष द्या°. १८ ए °णत्वावा°. १९ ई णिकर्तुः. २० ए °पार्श्वदि° २१ बी °थैव उ २२ डी °लं त्वब.° २३ ए °णप्राणि°.

र्थमंशिश्रणत् । तथैष हेपयाश्वशब्दिनेन कर्यार्के रविमंबन्ध्यांश्वमश्वौघमजुहावन्नु स्वाश्वशौर्यावलेपेन मस्पर्धमाकारितवानिव । तथैष हेपया कय्यैन्द्रं शक्रसंबन्धिनमश्वमुच्चैःश्रवसंमजूहवन्नु । तथैष तानगान्वृक्षानजिहे[9]ठन्मत्तगजादिभिर्बाधितवान्भुवि [10]पृथिव्यामलुलोटत्पातितवानलूलुपच्छेदितवांश्च यान्कश्चिन्ना[11]जीहिठन्नालूलुं[12]टन्नालुलोपच्च । तथैष यद्यपि मिथो नाललापदहो अस्मत्प्रभोः सामर्थ्यं येनेत्थमित्थं हेलयैव हम्मुको बद्ध इति । तथा वयं स्वप्रभुकार्ये जीवितं तृणायापि न मन्यामह इत्यादिप्रकारेणान्योन्यं न सं[13]भा[14]पितवान्नचान्यं स्वस्माद्व्यतिरिक्तं कं चनालीलपज्ज्ञापितवांस्तथापि हि स्फुटं प्रभोर्भीमस्य शक्तिं तेजस्विताश्रीविशेषाद्याडम्बरप्रकाशनेन बलादिसामर्थ्यमचिकीर्तज्ज्ञापितवान । तथा निजां भक्तिं तथाविधदुष्करपरराष्ट्रप्रवेशरूपभर्त्रादेशकरणेन स्वभर्तृविषयं बहुमानं[15] चाचीकृ[16]तन् । तथैष इह देश उपद्रवं नावीवृतन्न चक्रे ॥

यमयितुः । उदयामि उदयमि । यामंयामम् यमंयमम् । अत्र "यमोपरि°" [२९] इत्यादिना ह्रस्वादि ॥ अपरिवेषण इति किम् । यामयत्यं[17]कम् ॥

मारणे । अरीन् ज्ञपयन् ॥ तोषणे । मामप्रज्ञपयन् ॥ निशाने । ज्ञपयित्वास्त्रम् । अज्ञापि[18] अज्ञपि । ज्ञापं[19]ज्ञापम् ज्ञपंज्ञपम् । अ[20]त्र "मारण°" [३०] इत्यादिना ह्रस्वादि ॥

१ ए °मशश्राण° बी °मशश्र°. २ ए कर्य्यार्कर°. ३ सी °र्य्यार्कर°. ४ सी डी °न्ध्याश्वं तुरगौघ°. ५ ए शत्रम°. ६ सी डी °नमाश्व°. ७ ए ई °समाजू°. ८ बी °जूहाव°. ९ ए °हेवन्म°. १० बी सी पृथ्व्याम°. ११ ए °जीहवन्ना°. १२ ए °लुठन्ना°. १३ बी संनोषि°. १४ सी डी °भावित°. १५ ए सी डी °नं वाची°. १६ बी °कृत्तथै°. १७ ए सी °त्यकम्. १८ डी °पि ज्ञा°. १९ ए °पं । ज्ञ°. २० ए अर मा°.

चहयित्वा[1]। चहिता चाहिता । चाहंचाहम्[2] चहंचहम् । अत्र "चहणः शाठ्ये" [३१] इति ह्रस्वादि[3] ॥

ज्वलयामि ज्वालयन् । ह्वलयन् ह्वालयन् । ह्मलयंते[4] ह्मालयन्[5] । ग्लपित ग्लापयत । स्नपयत स्नापयत । वनयन्[6] वानयत । वमयते[7] वामयत । नमित नामयत् । अत्र "ज्वलह्वल°" [३२] इत्यादिना वा ह्रस्वः ॥ अज्वालि अज्वलि । ज्वालंज्वालम् ज्वलंज्वलम् । इत्यादिषु दीर्घविकल्पः[8] सिद्ध एव ॥ अनुपसर्गस्येति किम् । प्रज्वलयन् ॥

इमि । छदिः ॥ मनि । छद्म ॥ त्रटि । छत्रं[9] ॥ क्रिपि[10][11] । धामच्छद्भिः[12] । अत्र "छदेः°" [३३] इत्यादिना ह्रस्वः ॥

प्रच्छद् । शिखिच्छंद्[13] । इत्यत्र "एकोप°" [३४] इत्यादिना ह्रस्वः ॥

अचीकरन्[14][15] । इत्यत्र "उपान्त्यस्या°" [३५] इत्यादिना ह्रस्वः ॥ असमानलोपिशास्वृदित इति किम् । अमम्वामत । यत्रान्त्यस्वरादिलोपस्तत्र स्थानिवद्भावेन न सिध्यतीति वचनम् । यत्र तु स्वरस्यैव लोपस्तत्र स्वरादेशत्वात्स्थानिवद्भावेनैव सिध्यति । मालामाख्यदममालत् । ननु यत्रापि स्वरव्यञ्जनलोपस्तत्रावयवावयविनोरभेदनयेन[16] स्वरादेश एवेति स्थानिवद्भावेनैव सिध्यति किमसमानलोपिवचनेनेति । सत्यम् । स्थानिवद्भावस्यानित्यत्वज्ञापनार्थं[17] वचनम् । ततामिस्वदत् । अत्रोकारस्य "नामिनोकलिहलेः" [४.३.५१] इति वृद्धौ कृतायामन्त्यस्वरादिलोपादसमानलोपित्वम् ॥ शास्[18] ।

१ ई °त्वा । चाहिता । चहिता । चाह. २ ए चाह. ३ ए ई इत्यादिना ह्र°. ४ सी डी °लयत. ५ ए °त् ह्वाल°. ६ सी °न न°. ७ बी सी डी °त्प मि°. ८ डी °ल्प एव. ९ डी °त्र ॥ त्रटि. १० बी सी डी ई छत्र ॥. ११ ए क्पि. १२ ए °च्छब्द । इ°. सी डी °च्छद इ°. १३ ए °त्यादित्य°. १४ बी सी डी ई °दिनीति. १५ डी °न सि°. १६ सी °भदन.° १७ सी °वस्या°. १८ ई °स । आश°.

अशशासत् ॥ आशामोपीच्छत्यन्यः । आशशासन[1] ॥ ऋद्धिन् । लोकृ । आलुलोकत् ॥

अबिभ्रजत्[2] अबभ्राजत् । अबीभमत् अबभामत् । अबीभपत् अबभापत् । अदीदिपत् अदिदीपत् । अपीपिडत् अपिपीडत् । अजीजिवत् अजिजीवत् । अमीमिलत् अमिमीलत् । अचीकणत् अचकाणत् । अरीरणत् अरराणत् । अवीवणत् अववाणत् । अबीभणत् अबभाणत् । अशिश्रणत् अशश्राणत् । अजूहवत् अजुहावत् । अजीहिठत्[6] अजिहेठत् । अलूलुटत् अलुलोटत् । अलूलुपत् अलुलोपत् । अलीलपत् अललापत् । अत्र "भ्राजभास" [३६] इत्यादिना वा ह्रस्वः ॥

अवीवृतत् अववर्तत् । अचीकृतत् अचिकीर्तत् । अत्र "ऋद्वर्णस्य" [३७] इति वा-ऋत् ॥

दूतः सोजिघ्रपद्वाहान्द्वारं रत्नांशुशाड्वलम् ।
तं तत्रातिष्ठिपं देवाज्ञासौरभमजिघ्रिपम् ॥ २४ ॥

२४. स भीममत्को दूतो वाहानश्वान्द्वारं सिंहद्वारमजिघ्रपत् । द्वारं वाहानुद्गतहरिततृणाशङ्कया जिघ्रतः प्रयुक्तवान् । यतः कीदृग्द्वारं रत्नांशुशाड्वलं रत्नांशुभिः शाड्वलैः शब्दसांनिध्यान्नीलमणिकान्तिभिः शाड्वलमिव हरिततृणान्वितमिव द्वारदेशे दूत आयातोस्मीत्यर्थः । तं दूतं तत्र द्वारेहं प्रतीहारोतिष्ठिपं स्थापयामास । यतो देवाज्ञासौरभं

१ सी डी °शाद्वल°.

१ सी ॥ कर्दि°. २ ए सी °... ...°. ३ वी °विभ्राज°. ४ ए अदीदिप°. ५ सी °शश्रा°. ६ ए सी °जिहे°. ७ ए °जभाम° वी सी डी °जभास°. ८ सी अर्चा°. ९ सी डी °तृणश°. १० डी °लमि°.

देवस्य राज्ञो याज्ञा तस्याः सौरभं गुणगौरवं प्रधानादेशमित्यर्थः । अहमजिघ्रिपं घ्रापयामास । तवाज्ञां प्रतीच्छन्तं दूतमहं प्रयुक्तवानित्यर्थः ॥

अजिघ्रिपम् अजिघ्रपत् । इत्यत्र "जिघ्रतेरिः" [३८] इति वा-इः ।

अतिष्ठिपम् । अत्र "तिष्ठतेः" [३९] इति नित्यमिः ॥

अदूषयद्भिः प्रतिभामदूष्यैः सोप्यदोषयन् ।
धीगूहितेङ्गितैः पुम्भिरावृतोत्रैतुमिच्छति ॥ २५ ॥

२५. सोप्यदोषयन्न केवलं पुम्भिः प्रतिभामदूषयद्भिः किं तु दूतोपि प्रतिभां प्रज्ञां स्वामिद्रोहाद्यभिप्रायेणाकलुषयन्सन्नत्र देवपादान्तिक एतुमिच्छति । कीदृक् । पुम्भिर्नरैरावृतः । किंभूतैः । अदूष्यैः(ष्यैः) कुलीनत्वादिसद्गुणोपेतत्वेन श्लाघ्यैरत एव प्रतिभामदूषयद्भिः । तथा धिया प्रयोज्यकर्त्र्या गूहितं संगोपितमिङ्गितं चेष्टितं दुर्वचोव्यापारादि यैस्तैर्गम्भीराशयैरित्यर्थः ॥

अदूष्यैः । अत्र "ऊदुपो णौ" [४०] इत्यूत् ॥

प्रतिभामदूषयद्भिः प्रतिभामदोषयन् । इत्यत्र "चित्ते वा" [४१] इति वोत् ॥ चित्तग्रहणेन प्रज्ञाया अपि ग्रहणात् ॥

गूहित । इत्यत्र "गोहः स्वरे" [४२] इत्यूत् ॥

तेन्वभूवञ्जनास्तं नु पार्थदूतो बभूव यः ।
येमुं दामोदरं द्रष्टुं जग्मुर्जघ्नुर्न संशयम् ॥ २६ ॥

२६. येमुं दूतं दामोदरं दामोदराख्यं द्रष्टुं जग्मुस्ते जना यः

१ ए °प्यदूष°.

१ बी °जिघ्रिप°. २ सी डी जिघ्रिन°. ३ ए सी डी °प्यदूष°. ४ ए °यैस्तार्ग°. सी डी °यैर्ग°. ५ ए उदोपो. ६ ए °मदो°. ७ ए गोहः स्व°. ८ सी दूतदा°.

पार्थदूतो युधिष्ठिरसंदेशहारको बभूव तं नु दामोदरं विष्णुमिवान्वभूवञ्ज्ञातवन्तः । युधिष्ठिरेण हि युद्धात्पूर्वं पञ्चग्रामीप्राप्त्या संधानाय कौरवाणां पार्श्वे विष्णुर्दूतः प्रेषित आसीदिति भारतम् । तथा संशयमयं विष्णुः स्यान्न वेति संदेहं न जघ्नुर्नापजह्रुर्विष्णुर्विषयः संशयोतिनैकट्येप्येषां न व्यपगत इत्यर्थः ॥

न यच्चख्नुर्न यज्जक्षुर्न यद् घ्नन्ति स्म किं चन ।
नारितामगमन्नेते तेन जज्ञे ममेति धीः ॥ २७ ॥

२७. यद्यस्माद्धेतोरेते सैनिकाः किं चन लताद्यपि न चख्नुर्नोत्पाटितवन्तस्तथा यद्यस्मादेते किं चन तृणाद्यपि न जक्षुर्नाभक्षयंस्तथा यद्यस्मादेते किं चन मृगाद्यपि न घ्नन्ति स्म तेन हेतुनैतेरितां शत्रुतां नागमन्नित्येवंविधा धीर्मम जज्ञे बभूव ॥

अन्वभूवन् । इत्यत्र "भुवो वः॰" [४३] इत्यादिनोपान्त्यस्य-ऊत् ॥

क्ङिति । जग्मुः । जघ्नुः । जज्ञे । चख्नुः । जक्षुः ॥ ङिति । घ्नन्ति । इत्यत्र "गमहन॰" [४४] इत्यादिनोपान्त्यस्य लुक् ॥ अनङीति किम् । अगमन् ॥

अनिन्दिताध्वस्तबलोग्लुंचत्कलचुरिर्मदम् ।
नेत्रोदक्तभ्रुवा भूपाश्रितः प्रावेशयच्च तम् ॥ २८ ॥

२८. कलचुरिश्चेदीशः । कलचुरिर्हि चेदिदेशः । इति द्वास्थोक्त्यो मदं हर्षमग्लुचत्प्राप । कीदृशोनिन्दितमकुत्सितमध्वस्तं चानिराकृतं

१ ए ॰ग्लुञ्चकल॰. २ सी डी ॰रिर्मुद॰.

१ ए ॰वान्वभू॰. २ ए ॰विष्णुदूतः. ३ ए ॰ति पुराणम्. ४ ए ॰ह त जघ्नुनाप॰. ५ बी ॰ष्णुर्विष॰. ६ सी ॰त्यर्थे ॥. ७ ए चखुर्नोत्पादित॰. ८ ए ॰तुनेते॰. डी ॰तुनारि॰. ९ बी धीर्बुद्धिर्म॰. १० ए सी डी ॰मत् ॥. ११ डी ॰देशेशः. १२ सी डी ॰क्त्या मुदं. १३ ए ॰त्प्रापः ।

बलं भीमसैन्यं येन । यद्वा भीमचमूलेशेनानिन्दितमविध्वस्तं च बलं यस्य सः । तथा कलचुरिर्भूपाञ्चितो नृपैः पूजितः स्वसेवकै[1]र्नृपैरापूरितसभः सन्नित्यर्थः । नेत्राभ्यामुदक्तो[2]र्ध्वीकृता या भ्रूस्तया भ्रूसंज्ञया कृत्वा द्वास्थेन कर्त्रा तं दूतं[3] प्रावेशयच्च ॥

ध्वस्त । अग्लुचन् । इत्यत्र "नो व्यञ्जनस्य°" [४५] इत्यादिना नस्य लुक् ॥ अनुदित इति किम् । अनिन्दित ॥

नेत्रोदक्त । अत्र "अञ्चोनर्चायाम्" [४६] इति नस्य लुक् ॥ अनर्चायामिति किम् । नृ(भू)पाञ्चितः ॥

तेनाविकं[1]पितेनाविलगितैः स्वैर्निषीदता ।
नाभाजि विनयो नाभञ्ज्यवष्टम्भः सजन्यशः ॥ २९ ॥

२९. तेन दूतेन विनयः प्रणामाद्युचितप्रतिपत्तिर्नाभाजि न भग्नः । कीदृशो[4] तेन । अविकं[5]पितेन संक्षोभोत्थस्तम्भादिविकाररहितेन । तथाविलगितै[6] रोगादिनानुपतप्तैः स्वैरात्मीयैर्भटै[7]ः सह निषीदता चेदिसभायामुपविशता । तथा तेन यशः सजन्वभ्रन्नवष्टम्भ औ[8]र्जित्यं नाभञ्जि । तावानेव विनयः कृतो यावता स्वावष्टम्भो न भ्रष्ट इत्यर्थः ॥

दर्शं[2]न्क्रमुककर्पूरं सोथ रागी रजन्सदः ।
रजकक्षालितक्षौमचोक्षदन्तांशु[3]रब्रवीत् ॥ ३० ॥

३०. अथ स दूतोब्रवीत् । कीदृक्सन् । रागी शृङ्गार्यत एव

१ सी डी °कम्पिते°. २ ए °शनक्रमु°. ३ सी डी °दन्ताशु°.

१ ए स्वसेव°. २ सी °क्तोर्ध्वीकृ°. डी °क्तोर्ध्वीकृ°. ३ बी °तम्प्र वे°. ४ बी सी डी °शा सनावि°. ५ सी °कम्पते°. डी °कम्पिते°. ६ ए °गितै रो°. ७ ए °भैर्यैः स°. ८ ए °व औ°.

क्रमुककर्पूरं पूगीफलानि कर्पूरं च दशन्भक्षयन्नन एव च सदश्वेदिसभां रजन्स्वऋद्धिविशेषे मस्पृहां कुर्वन । तथा रजकेन क्षालितं धौतं यत्क्षौमं दुकूलं तद्वच्चोक्षा निर्मला दन्तांशवो यस्य सः ॥

विलगितः । विकम्पितेन । इत्यत्र "लङ्गि" [४७] इत्यादिना नस्य लुक् ॥

अभाजि अभञ्जि । इत्यत्र "भञ्जेर्जौ वा" [४८] इति वा नस्य लुक् ॥

दशन् । सजन् । इत्यत्र 'दंशसञ्जः शवि" [४९] इति नस्य लुक् ॥

रजक । रागी । रजन् । इत्यत्र "अकट्" [५०] इत्यादिना नस्य लुक् ॥

स्यन्दिनो रजयन्त्येव मृगांस्तेपि त्वदाज्ञया ।

येषां रागोनवोदौघ्रकव्यस्य दशने परः ॥ ३१ ॥

३१. तेपि व्याधा अपि मद्देशे केनापि मृगा न घात्या इति त्वदाज्ञया कृत्वा स्यन्दिनस्त्वरावन्तो मृगान रजयन्त्येव रमयन्त्येव न तु मारयन्तीत्यर्थः । नास्त्यवोदः पाको यस्य तदनवोदमपक्वम् । उद्यत इति औणादिके मनि ओद्म पक्वम् । विशेषणकर्मधारये तद्यत्कव्यं मांसं तस्य दशने भक्षणे येषां परः प्रकृष्टो रागः स्पृहा । एतेन चैदेराज्ञैश्वर्यातिधार्मिकत्वे उक्ते ॥

दग्धैधाभोयनैर्विन्ध्यस्त्वद्यशः प्रश्रैथस्ततैः ।

गतो हिमश्रथाद्रित्वमव्याहतमतेरपि ॥ ३२ ॥

३२. दग्धा य एधाः काष्ठानि तदाभैस्तत्सदृशः काल इत्यर्थः ।

---

१ ए °यन्त्यैव. २ ए °श्रधस्त°.

---

१ ए °शषो स°. सी °शपा स्पृ°. डी °शेपात्मस्पृ°. २ ए °वंस्तथा. ३ बी दन्ताश°. ४ °शवौ य°. ५ ए °गिन्नैः ।. ६ सी डी कम्पिते°. ७ ए °ञ्जेजौ वा. ८ ए °कम् इ°. ९ सी मम दे के°. डी मम देशे. १० ए °न स्वरा°. ११ ए सी डी °वन्तो मृ°. १२ ए °व न. १३ ए °के ननि. १४ ए चेदैरा°. १५ ए °भत्तत्स°.

विन्ध्योऽव्याहतमतेरपि ज्ञानकारणेन्द्रियपाटवादप्रतिहतज्ञानस्यापि पुंसो हिमश्रथाद्रित्वं हिमेन श्रथ्यते[1] व्याप्यते हिमश्रथो हिमवान्योद्रि[2]स्तद्भावं गतः। पटिन्द्रियोऽप्येवं जानाति यदयं विन्ध्यो[3] न किं[4] तु हिमाद्रिरित्यर्थः । कैर्हेतुभिः । अयतैरनुपरतैस्ततैर्विस्तीर्णैस्त्वद्यशःप्रश्रथै[5]र्भवदीयकीर्ति-सन्दर्भैः ॥

अक्षतेनौजसा[1] काशिमवमत्य निहत्य च ।
साध्वनैषीर्दशार्णेश[2]मनारतवर्तिं नतिम् ॥ ३३ ॥

३३. दशार्णेशं दशार्णदेशा[6]धिपमनारता निरन्तरा वर्तिः सेवा[7] यस्यां तां नतिं साधु यथा स्यादेवं त्वमनैषीः[8] । किं कृत्वा । अक्षतेन केनाप्यविध्वस्ते[9]नौजसा[10] बलेन कृत्वा काशिं[11] वाणारसीराजमवमत्य[12] रणे तिरस्कृत्य निहत्य[13] च ॥

परितत्य प्रसत्येभान्प्रवत्यागत्य दूरतः ।
त्वां प्रणत्याधिगम्याभूत्सुखी भद्रभटो नृपः ॥ ३४ ॥

३४. भद्राः सुजात्येभा एव भटा यस्य स भद्रभट एवंनामा नृपो गजबन्धदेशस्य राजा[14] सुख्यकुतोभयत्वात्सुखितोभूत् । किं कृत्वा । दूरतो[15] दूरदेशादागत्य त्वामधिगम्य प्राप्य त्वां प्रणत्य[16] नत्वा त्वां प्रवत्य[17] सेवित्वेभान्हस्तिनः परितत्य विस्तार्य प्रसत्य दत्त्वा च ॥

१ बी °तेनोज°. २ ए °शार्णेश°.

१ ए श्रथ्याप्य°. २ ए °वानयोद्रि°. ३ ए विध्यो न. ४ ए किं हि°. ५ ए °श्रद्धर्भ°. ६ ए °शार्णेशं दशार्णेशा°. ७ ए मेव य°. ८ सी त्वमानेषीः. डी त्वमानै°. ९ सी °ध्वस्तनं°. १० डी °स्तनोज°. ११ बी °शिं बाणा°. १२ ए °त्य रेणे. १३ ए °त्यवः ॥. १४ ए °जा मुखीश्चकु°. १५ सी °रंद°. १६ बी °णम्य न°. १७ ए °वद्य से°.

नियत्येभान्नियम्याश्वानावासे तान्प्रणम्य च।
विरम्यास्त्राद्विरत्य त्वत्संयतो यन्तिराड्ययौ ॥ ३५ ॥

३५. यन्तिराड्यम्यादित्याशास्यमानो यन्तिः "तिकृतौ नाम्नि" [५-१-७१] इति तिक्। एवमन्येष्वपि रन्त्यादिषु। यन्तेर्यन्त्याख्यदेशस्य यन्तिनामा वा राड् राजा ययौ नष्टः। किं कृत्वेभानावासे हस्तिशालायां नियत्य बद्धाश्वांश्चाश्वशालायां नियम्य बद्ध्वा गजानश्वांश्च मुक्त्वेत्यर्थः। तथा तान् गजानश्वांश्च प्रणम्य च नमोस्तु भवद्भ्य इति नमस्कृत्य चास्त्राद्विरम्य शस्त्रं मुक्त्वेत्यर्थः। त्वत्संयतो भवद्रणाद्विरत्य निवृत्य च ॥

रन्तिदेवाभ कीर्तेस्ते सत्परीतत्कलिङ्गगत्।
नैन्तिर्गन्तिस्तथा हन्तिर्वन्तिर्मन्तिः सनन्तिकः ॥ ३६ ॥

३६. हे रन्तिदेवाभ महायागकरणादिभी रन्तिदेवाख्यपूर्वराजतुल्यकलिङ्गं गच्छति कलिङ्गगत्कलिङ्गदेशाधिपः सतन्तिकस्तन्त्याख्यनृपसहितो नान्तिर्गन्तिस्तथा हन्तिर्वन्तिर्मन्तिरेवंनामा नृपौघश्च ते कीर्तेः सद्दाता त्वत्कीर्तेरुत्कीर्तक इत्यर्थः। तथा परीतद्विस्तारयिता ॥

रजयन्ति मृगान्। इत्यत्र "णौ मृग°" [५१] इत्यादिना नस्य लुक् ॥

राग। इत्यत्र "घञि°" [५२] इत्यादिना नस्य लुक् ॥

स्यदिनः। अत्र "स्यदो जवे" [५३] इति स्यदो निपात्यः ॥

१ ए °गाधयौ. २ ए नतिर्ग°. ३ ए बी °न्ति म°.

१ ए °तिक्. २ ए °पु। यंतयं°. ३ ए निगम्य. ४ बी बद्धान्गजा°. ५ ए निच्छत्य. ६ ए °लिङ्गगत्क°. ७ बी °नामनृ°. ८ डी त्वकीर्ते°. ९ ए °र्तेसत्की. १० ए °त्य वध°.

दशने । अवोद् । एध । ओद्म । प्रश्रथः । हिमश्रथ । इत्येते "दशन°" [५४] इत्यादिना निपात्याः ॥

अयतैः । अनारत । नतिम् । गतः । अन्याहतमतेः । वतिम् । ततः । अक्षत । इत्यत्र "यमिरमि°" [५५] इत्यादिनान्तस्य लुक् ॥

निहत्य । अवमत्य । प्रवत्य । परितत्य । प्रसत्य । इत्यत्र "यपि" [५६] इत्यन्तस्य लुक् ॥

नियत्य नियम्य । विरत्य विरम्य । प्रणत्य प्रणम्य । आगत्य अधिगम्य । अत्र "वा मः" [५७] इत्यन्तस्य लुग्वा ॥

कलिङ्गगत् । संयतः । परीतत् । सत् । इत्यत्र "गमां क्वौ" [५८] इत्यन्तस्य लुक् ॥

यन्ति । रन्ति । नन्तिः । गन्तिः । हन्तिः । मन्तिः । वन्तिः । तन्ति । इत्यत्र "न तिकि दीर्घश्च" [५९] इति लुक् दीर्घश्च न ॥

अजातसातिरुत्खातोयोध्येशस्ते सिषासति ।
जञ्जन्यमानभक्तीनां धुरि जाजायते च सः ॥ ३७ ॥

३७. अजातासंपन्ना सातिर्दानं यस्य स पूर्वं केनाप्यगृहीतकर इत्यर्थः । अयोध्येश उत्खातस्त्वया राज्यादुत्पाटितः सस्ते तव सिषासति दण्डं दातुमिच्छति । तथा जञ्जन्यमानमतिशयेनोत्पद्यमानं यथा स्यादेवं भक्तिर्येषां तेषां भक्तिमतां धुर्यादौ सोयोध्येशो जाजायते च बोभवीति च ॥

१ सी °जादिसा°. डी °जातिमा°. २ ए च स

१ ए एधः । ओम्रः । प्र°. २ ए °पात्या ॥. ३ ए °हत्यः । अवमन्त्यः । प्र°. ४ बी °त्यन्त्यस्य. ५ सी डी °यत् । प°. ६ बी सी डी °त्यन्त्यस्य. ७ ए यन्तिः । रन्तिः । न°. ८ ए सी डी नन्ति । ग°. ९ सी गन्ति । ह°. १० सी डी हन्ति । मन्ति । वन्ति । न°. ११ ए निकि दी°. १२ ए °तः मन्तिस्तव°. १३ ए दातुमिच्छन्ति । त°. १४ ए °नोत्पाद्य°. १५ ए °सोपर्या°. १६ ए °ते बो°.

निखन्यामन्यमानः प्रांक्रोश उत्खाय सायते ।

प्राणान्मन्याः स्थितिं साया गौडेन त्वेति जल्पता ॥३८॥

३८. गौडेन गौडदेशाधिपेन प्राक्पूर्वं निखन्य निधानीकृत्यामन्यमानोदीयमानः कोशो भाण्डागारमुत्खाय निखातादुद्धृत्य सायते तुभ्यं दीयते । किंभूतेन सता । त्वा त्वां जल्पता । कथमित्याह् । हे चेदं प्राणाञ्जीवितं मन्या देयाः स्थितिमवस्थानं देशं च साया इति ॥

उत्खातः । सातिः । अजान । इत्यत्र "आः खनि" [६०] इत्यादिनान्तस्यात् ॥

मिपामति । इत्यत्र "मनि" [६१] इत्यन्तस्यात् ॥

उत्खाय निखन्य । सायते सन्यमानः । जाजायते जञ्जन्यमान । इत्यत्र "ये न वा" [६२] इति वान्तस्यात् ॥ य इत्यकारान्तनिर्देशादिह न स्यात् । सन्याः । अन्यथा यीति क्रियेत ॥ केचिदत्रापीच्छन्ति । मायाः ॥

तन्यतेर्जुनवंशश्रीर्यशोब्धिघ्नाव तायते ।

सातेः सन्तेः सतेश्चाग्रगात्रा खात्रा द्विषां त्वया ॥ ३९ ॥

३९. सहस्राजुनवंशोत्पन्नत्वात्त्वयार्जुनवंशश्रीः सहस्रार्जुनान्वयलक्ष्मीस्तन्यते विस्तार्यते । यतो द्विषां खात्रोन्मूलकेन तथा सातेः सन्तेः सतेश्चैवंनामराजविशेषेभ्योग्रगात्रा स्वामित्वादग्रेसरेण । अत एवाब्धिषु घोणते भ्राम्यत्यब्धिघ्नाव यशस्तायते विस्तार्यते ॥

१ ए सी प्राक्रोश. २ बी न त्विति. ३ ए °ब्धिष्वाव. ४ अत्र "कवर्गकस्वरवति" [२-३-७६] इति णत्वेन भाव्यमिति भाति ।

१ ए हे वेत प्रा°. २ ए °णाच्छीवि°. ३ ए सी डी °ति । अ°. ४ ए भमि इ°. ५ ए °त्खाया निखन्य । स्पेयतो । मन्य°. ६ सी न । मन्यः । अ°. ७ ए सी साया ॥. ८ ए °हस्रार्जु°. ९ सी डी ई °हस्राजु°. १० ए °ब्धिश्चावयवश°. ११ सी °ते ॥ ता°.

तायते तन्यते । अत्र "तनः क्ये" [६३] इत्यन्तस्याद्वा ॥

सतेः । मातेः । सन्तेः । इत्यत्र "तौ सनस्तिकि" [६४] इति लुगातौ वा ॥

खान्ना । अग्रेगान्ना । घ्वाव । इत्यत्र "वन्याङ् पञ्चमस्य" [६५] इत्यात् ॥

तं नृपापचितिह्लन्नं श्रीभीमो ह्लन्नवानिति ।
त्वामाह किमरिर्मित्रं वासि मे ह्लत्तिकृद्द्विधा ॥ ४० ॥

४०. तद्यस्मात्त्वं पूर्वोक्तनीत्या राजाधिराजस्तस्माद्धेतोर्नृपाणामपचितिः पूजा तया ह्लन्नं प्रमुदितं त्वां श्रीभीमो ह्लन्नवान्प्रमुदितः सन्नित्येवमाह । यथासि त्वं मे किमरिर्मित्रं वा द्विधा शत्रुत्वमित्रत्वरूपाभ्यां द्वाभ्यामपि प्रकाराभ्यां त्वं मे ह्लत्तिकृदाह्लादक इति ॥

अपचिति । इत्यत्र "अपाद्°" [६६] इत्यादिना चिः ॥

ह्लन्नम् । ह्लन्नवान् । ह्लत्ति । इत्यत्र "ह्लाद°" [६७] इत्यादिना ह्लद् ॥

वितीर्णवानथ नयानुत्तीर्णं लूनसंशयम् ।
कर्णः कर्णावतीर्णिर्नु यशोलीन इदं वचः ॥ ४१ ॥

४१. अथैवं दूतोक्त्यनन्तरं कर्णः कर्णाख्यश्चेदीशो नयानुत्तीर्णं न्यायादनपेतं लूनसंशयं छिन्नसंदेहमिदं वक्ष्यमाणं वचो वितीर्णवान्ददौ । कीदृक् । यशोलीनो दानविक्रमोत्थकीर्त्याश्लिष्टोत एव कर्णावतीर्णिर्नु राधेयावतार इव ॥

अलूनिः सोमवंशः श्रीकृतलीनिर्जयत्यसौ ।
अधोलीनवतां तापं लूनवान्पूर्तिपावनः ॥ ४२ ॥

४२. असौ सोमवंशश्चन्द्रान्वयो जयति । कीदृक् । असती लूनि-

१ सी नरव नृ°. २ डी °पचति°. ३ ई °र्नुर्यशो°. ४ डी °कृताली°. ५ ए °वात्पूर्ति°.

१ ए °द्वा ॥ सेतेः. २ सी °भ्या त्व. ३ ए ई ह्लन्नः । ह्°. ४ ए °तं नून.

विच्छेदो यस्य सोलूनिः सदा मंततस्तथा श्रिया राज्यादिलक्ष्म्या कृता लीनिगाश्रयणं यस्य सः । तथा[1] पूर्त्या लोकरक्षया पावनः[2] पवित्रोत एवाधोलीनवतां शरणार्थमध[3] आश्रितानां तापं खेदं लूनवान् । योपि वंशोलूनिरच्छिन्नः स्यात्सोपि[4] श्रिया पत्रलम्बौन्नत्यादिलक्ष्म्या[5] कृतलीनिरत एवाधोलीनवतां तापं लूनवान्पूर्त्या[6] नभोव्याम्या पावनश्च स्यात् ॥

पूर्णिक्षमबलैः पूर्तः पूर्तवान्क्ष्मां पुरूरवाः ।
यशोभिः पूर्णवानाशास्तत्र पूर्णेन्दुनिर्मलैः ॥ ४३ ॥

४३. तत्र सोमवंशे पुरूरवाः क्ष्मां पूर्तवानपालयन्[7] । कीदृक्सन् । पूर्णी पूरणे व्याप्तौ पालने वा क्षमाणि समर्थानि यानि बलानि सैन्यानि तैः[8] पूर्तः परिपूर्णः । शिष्टं स्पष्टम् ॥

भयं छिन्नेन्द्रशक्तेर्द्योर्नघुषश्छिन्नवानिह[1] ।
मूर्तो नु तेजसां राशिः क्षात्रो धर्मो नु मूर्तवान् ॥ ४४ ॥

४४. इह सोमवंशे नघुषो[9] नाम नृपो द्योः[10] स्वर्गस्य भयं निर्नाथत्वजां भीतिं[11] छिन्नवानिन्द्रीभूयापजह्रे[12][13] । कीदृश्याः । छिन्ना वृत्रदैत्यस्य मित्रीकृतस्य विश्वस्तस्य पृष्ठलग्नया[14] हत्यया[15]च्छेदितेन्द्रस्य[16] शक्तिः प्रभुत्वं यस्यां तस्याः । यतः कीदृक् । मूर्तस्तेजसां राशिर्नु तथा मूर्तवान्क्षात्रो

१ ए °शक्तर्द्योर्नघुष°.

१ सी °था मर्त्या. २ बी °वनं प°. ३ सी डी °रर्णार्थ°. ४ ए °स्याशोपि. ५ डी °लम्बौन्न°. ६ ए °वान् पा°. ७ सी पूणव्या°. डी पूर्णव्या°. ८ ए तैप्पर्तः. सी डी तैः प°. ९ All Mss. write this name as नघुष here while they write it as नहुष in the sixth canto. १० ई द्योः सर्ग°. ११ ए भीति छि°. १२ ए °निद्रीभू°. १३ सी डी °जर्हे । की°. १४ ए °मवाह°. १५ सी डी °लया छेदि°. १६ ए °योच्छादि°.

धर्मो नु । अत्यन्तं प्रतापी विक्रान्तश्चेत्यर्थः ॥ अयं च नघुषवृत्तान्तः षष्ठे सर्गे पञ्चत्रिंशे वृत्ते प्रागेवोक्त एव ॥

रणाप्रमत्तान्दुर्मत्तवतः मूनानयानिह ।
अदूनो दूनवान्दैत्यान्भरतः मूनवान्यशः ॥ ४५ ॥

४५. इह सोमवंशे भरतो नाम नृपोदूनोनुपतप्तः सन्दैत्यान्दूनवाञ्जघानेत्यर्थः । किंभूतान् । रणाप्रमत्तान्संग्रामे सोद्यमान्दुर्मत्तवतो दुष्टमदानत एव सूनानयाञ्जनितान्यायानत एव यशः सूनवानुत्पादितवान ॥

अनिद्राणवतः शत्रूननिद्राणोत्र वृक्णवान् ।
वृक्णपापो ध्यातधर्मः ख्यातः पूतो युधिष्ठिरः ॥ ४६ ॥

४६. स्पष्टः ॥

पूनावाघ्रूनयज्ञाग्नेः समक्नाविन्द्रतक्षकौ ।
पात्रोदक्ताहुतेर्यस्मादभूत्पारीक्षितोत्र सः ॥ ४७ ॥

४७. अत्र सोमवंशे परीक्षितः परीक्षितेर्वापत्यं पारीक्षितोर्जुनप्रपौत्रो जनमेजयो नाम राजाभूत । यस्मात्पारीक्षितात्सकाशान्मृत्युभयेनेन्द्रतक्षकौ समक्नौ मिलितौ सन्तौ पूनौ नष्टौ । यत आघ्रूनः सर्पकुलकोटिभक्षकत्वेनौदरिको यज्ञाग्निर्योगवह्निर्यस्य तस्मात्तथा पात्रादाहुतिभाजनात्स्रुच उदक्तोद्धृताग्नीकर्पिप्रार्थनयोत्ताग्तितेत्यर्थः । आहु-

---

१ डी °त्तान्दूर्म°. २ ए °मनव° ई °मनव°. ३ ए °क्णमापो ध्यायत°. ४ ए सी पूतावा°. ५ ए °ज्ञाग्नेः स°.

---

१ सी °द्यमनान्दु°. २ बी सी डी °यो रा°. ३ ए °मक्नो मि°. सी डी °मक्तो मि°. ४ सी पादद्रु°.

तिरिन्द्रतक्षकरूपं हव्यं येन तस्मात् ॥ किल जनमेजयस्तक्षकाहि[1]दंशेन पितरि मृते[2] सर्पेषु क्रुद्धः सर्पहोतव्यं यागं प्रकृतवांस्तत्र[3] च यागे याचकस्येच्छा[4]यां पूरितायामेवाहुतिरग्नौ क्षिप्यत इति विधिः । इतश्चर्[5]त्विग्भिः केषुचित्सर्पेषु[6] हुतेषु तक्षको[7] भीत इन्द्रं शरणीचक्रे तज्ज्ञात्वातिकुपितेन जनमेजयेन सेन्द्रस्यापि तक्षकस्याह्वनायादिष्टा यायजूका यावन्मन्त्रैराकृष्य तक्षकेन्द्रावाहुतिस्रुचि न्यवेशयंस्तावदास्तीकर्षिर्यज्ञवाटकाद्बहिरर्थी सन्वेदं जगौ तं श्रुत्वा जनमेजयः प्राह । यदसौ मुनिर्याचते तद्दत्त्वाहुतिरग्नौ क्षिप्यतां ततस्त्वं[8] किं याचस इत्युक्तोसौ मुनिराह । या काचिदधुनाहुतिरग्नौ होतुमारब्धास्ति सैव मह्यं दीयतामिति निर्बन्धात्तेनोक्ते यदा यज्ञाग्नितः साहुतिरुत्तारिता तदा तदाजातमिवात्मानं मन्यमानौ[9] तौ झगिति पलायिताविति पुराणविदः ॥

क्षीणद्यूतास्तथेहान्येप्यसिनग्रामतेजसः ।
अद्याप्यक्षीणवन्तो[1] नु यशोभिः क्षितवर्जितैः ॥ ४८ ॥

४८. तथेह सोमवंशेन्येपि नृपाः क्षितवर्जितैरक्षयैर्यशोभिः कृत्वाद्यापि संप्रत्यप्यक्षीणवन्तो न्वक्षया इव जीवन्ती[10]वेत्यर्थः । यतः कीदृशाः । क्षीणद्यूता अपगतदुरोदर[11]व्यसनास्तथा सीयते स्म सिनो बद्धो ग्रासोन्यनृपतेजोभिर्ग्रसनं यस्य तत्सिनग्रासं न तथा[12]सिनग्रासमग्रस्तं तेजः प्रतापो येषां ते ॥

---

१ ए °न्तोत्थय°.

१ ए 'हिदंश°. २ बी मृत म°. ३ सी डी °त्र या°. ४ ए °कस्मेच्छा°. ५ ए °श्चत्रिभिः के°. ६ सी डी °पु हते° ७ ए °क्षका भी°. ८ डी °स्त्वं किया° ९ ई °नौ झ°. १० सी डी °वन्त एवे°. ११ ए °ररयस°. १२ ए तथाः सि°.

अवतीर्णिः[1] । अनुत्तीर्णम् । वितीर्णवान् । अलूनिः[2] । लून[3] । लूनवान् । लीनिः । लीनः[4] । लीनवताम् । अत्र[5] "ऋल्वादेः°" [६८] इत्यादिना तस्य नः ॥ अप्र इति किम् । पूर्ति[6] । पूर्णीत्यपि कश्चित् । पूर्तः । पूर्तवान् ॥

पूरै[7] । पूर्ण[8] । पूर्णवान् । छिन्न[9] । छिन्नवान् । इत्यत्र "रदाद्°" [६९] इत्यादिना नः ॥ अमूर्छमदः[10] इति किम् । मूर्तः[11] । मूर्तवान् । अप्रमत्तान् । दुर्मत्तवतः ॥

सूनः(न) । सूनवान् । अदून्[12] (नः) । दूनवान् । वृक्ण[13] । वृक्णवान् । इत्यत्र "सूयति°" [७०] इत्यादिना नः ॥

अनिर्द्राणः[14] । अनिर्द्राणवतः[15] । अत्र "व्यञ्जन°" [७१] इत्यादिना नः ॥ अख्याध्य इति किम् । ख्यातः[16] । ध्यात[17] ॥

पूनौ । आर्घून[18] । समक्तौ[19] । इत्यत्र "पूदिवि[20]°" [७२] इत्यादिना नः ॥ नाशाद्यूतानपादान[21] इति किम् । पूतः । द्यूताः । पात्रोदक्ता[22] ॥

अस्निप्रास । इत्यत्र "सेर्ग्रासे[23]°" [७३] इत्यादिना नः ॥

क्षीण । अक्षीणवन्तः । अत्र "क्षेः क्षी°" [७४] इत्यादिना नः क्षी–आदे[24]-शश्च । अध्यार्थ इति किम् । क्षित । भावेत्र क्तः । घ्यणर्थश्च भावकर्मणी ॥

१ सी °र्तार्णि । अ°. २ ई °ल्लनि । लू°. ३ बी सी डी लूनः । लू°. ४ ए लीनिः । ली°. ५ ए °त्र ऋल्वा°. ६ सी पूर्तिः पूर्त°. डी पूर्तिः । पू°. ७ ए पूर्णो । पू°. ८ ए सी डी पूर्णः । पू°. ९ ए छिन्ना । छि°. सी डी छिन्नः । छि°. १० ए °दरिति°. ११ बी मूर्त । मू°. १२ बी °दूनः । अदू° सी डी °दून । अदू°. १३ सी डी वृक्णः । वृ°. १४ ए ई °द्राण । अ°. १५ सी डी °वत् । अ°. १६ ए ख्यानम् । ध्या°. १७ सी डी ध्यानः ॥ पू°. १८ ए °घून् । स°. बी °घनः । म°. १९ ए सी °मक्तौ । इ°. २० डी °घृनान°. २१ बी डी घृता । पा°. २२ बी सी डी °दक्त ॥ अ°. २३ बी सेर्ग्रसे. २४ बी क्षीयादे°.

अन्यून एभ्यः पूर्वेभ्यो भीमो जयति संप्रति ।
यत्र न क्षितकः कोपि क्षीणकः केवलं कलिः ॥ ४९ ॥

४९. संप्रत्येभ्यः पूर्वेभ्यः पूर्वजेभ्यः पुरूरवःप्रभृतिभ्योन्यूनोहीनो भीमो जयति । यत्र भीमे सति सर्वस्य सुखितत्वान्न कोपि क्षितकः परपराभवादिना दीनः केवलं परं कलिः कलिकालः क्षीणको धर्मोदयाद्दीनः ॥

मैत्री हि सहजा सद्भिः सतामित्यावयोरिमाम् ।
अन्यथा ख्यापयन्कोस्तु क्षितायुः क्षीणसंततिः ॥ ५० ॥

५०. हि स्फुटं सतां साधूनां सद्भिः सह सहजा स्वाभाविकी मैत्रीति हेतोरावयोः सतोरिमां मैत्रीमन्यथामैत्रीप्रकारेण ख्यापयन्कः क्षीणायुः क्षीणतसंततिः क्षीणसन्तानश्चास्तु । अकृत्रिममैत्रीपवित्रयोरावयोरमैत्रीं मुमूर्षुरेव वक्तीत्यर्थः ॥

क्षीणं यद्वा स्वयं तेन किं हि तस्य क्षितेन नः ।
त्वं श्लाघाह्लीण नः पुण्यैर्ऋतं स्वाम्यनृणागतः ॥ ५१ ॥

५१. यद्वा तेनावयोर्मैत्रीमन्यथा ख्यापयता नरेण स्वयं क्षीणं महालीकोक्तिरूपतीव्रपापपातादात्मनैव क्षयं गतम् । ततश्च हि स्फुटं तस्य स्वयं क्षीणस्य क्षितेन क्षयेण नोस्माकं किं न किंचित्तत्क्षयस्य मृतमारणतुल्यत्वात्तस्मात्तद्वार्तामपि वयं न कुर्म इत्यर्थः । अथात्मानुगतमेव तात्पर्यमाह । हे श्लाघाह्लीण महापुरुषत्वात्प्रशंसया लज्जित तथा

---

१ बी सहजामि°. ए मन्यमि°. २ ए बी ई °ण्य ऋत°.

१ बी सी डी °भ्यः पु°. २ ए °तकोप°. ३ ए °दीनो के°. ४ ए °लिः का°. सी °लिकालक्षी°. ५ बी हि स्फट. ६ सी डी °हजा. ७ ई °त्रीहि हे°. ८ ए °यक्षः क्षी°. ९ ए बी ई °युः क्षितस°. १० सी °मूर्षर°. डी °मूर्खुरे°. ११ ए °यं तेन क्षितस्य. १२ सी डी °स्माद्वा°.

ऋतं सत्यं यथा स्यादेवं स्वाम्यनृण स्वामिनो भीमस्य सर्वकार्यसंपादकत्वादनृण जीविकोपयो[1]गरू[2]पऋणवर्जित दा[3]मोदर त्वं नोऽस्माकं पुण्यैरागतः । अर्थादत्र ॥

इति प्रश्नान्न किं ह्रीतो भीमस्त्वं ह्रीतवान्न वा ।
ह्रीणवानस्मि सौहार्दाघ्रात आघ्राणसत्पथ ॥ ५२ ॥

५२. हे आघ्राणसत्पथाङ्गीकृतसाधुमार्गेति प्रश्नात्किमरि[4]र्मित्रं वेति पृच्छया किं भीमो न ह्रीतो न लज्जितो वाथ वा त्वं[5] न ह्रीतवानस्म्यहं पुनः सौ[6]हार्दाघ्रातो मैत्र्या सामस्त्येन वशीकृतः सन्निति प्रश्नाद् ह्रीणवान् ॥

घ्रातमघ्राणमप्यत्र भीमो[1]ऽत्रैतीति मे मनः ।
अत्राणोत्कण्ठया नुन्नं नुत्तमत्रातया मुदा ॥ ५३ ॥

५[7]३. मे मनोघ्राणमपि को मामभिपेणयतीति चिन्तयातृप्तमप्यनि[8]र्वृतमपीत्यर्थः । अत्र देशे भीम एतीति हेतोरद्य[9] त्वदागमकाले घ्रातं निर्वृतमत एवात्राणा[10]रक्षिता निरर्गला योत्कण्ठा भीमाभि[11]गमेच्छा तया नुन्नं[12] प्रेरितं तथात्रातया मुदा[13] नुत्तम ॥

अवित्तमभियाम्यद्योन्नगण्डोत्तकरैररिभैः ।
राज्ञा रेवा न लङ्घ्येति लोकवि[2]न्नं तु निघ्नकृत् ॥ ५४ ॥

५४. इभैः कृ[14]त्वाद्याविन्नमविचारितं निःशङ्कमित्यर्थः । अभियामि

१ बी °मोत्रती°. २ बी °वित्त नु वि°.

---

१ बी °गरू°. २ ए °परण°. ३ ए पुस्तके 'दृनस्य नाम' इति टिप्पणी समास्ते वर्तते. ४ ए सी °रिमित्रं. ५ ई त्व कि न. ६ ए सौहार्दा°. ७ बी सी डी ५३ म°. ८ बी °वृत्तम°. ९ बी °यत्वादा°. १० बी °रक्षनानिनिर°. ११ बी सी डी °गमनेच्छा. १२ ई °न्न त°. १३ ए °दा वुत्त°. १४ ए कृताद्या°.

भीमाभिमुखं गच्छामि । किंभूतैरुन्नौ मदक्लिन्नौ गण्डौ येषां ते य उत्तकरा[1] मदक्लिन्नशुण्डा[2]दण्डा[3] जात्यगजानां[4] हि[5] करा अपि मदं क्षरन्ति तैः । तु परं गङ्गा कर्णेन रेवा[6] रेवाख्या[7] नदी न लङ्घ्या विघ्नहेतुत्वान्नातिक्रम्येत्येवंविधं[8] लोकविघ्नं नैमित्तिकादिलोकविचारितं विघ्नकृद्भीमाभिगमनान्तरायकारि ॥

ओक्रोशे[9] । क्षीणमंतर्निः[10] क्षितायुः ॥ दैन्ये । क्षीणकः क्षितकः[11] । अत्र "वाक्रोशदैन्ये" [७५] इति वा नः ॥ अध्यार्थं इत्येव । किं तस्य क्षितेन ॥ कश्चित्तु भावेपि विकल्पमिच्छति[12] । क्षीणं तेन किं तस्य क्षितेन ॥

अनृण[13] । ऋतम्[14] । ह्रीण[15] ह्रीणवान् । ह्रीनः ह्रीतवान् । आघ्राण[16] आघ्रातः । अघ्राणं घ्रातम् । अत्राण[17] अत्रातया । उन्न[18] उत्तं[19] । नुन्नं नुत्तम्[20] । विन्नम् अवित्तम् । अत्र "ऋह्री°" [७६] इत्यादिना वा नः ॥

गृहाणभांस्तदद्रूनोऽन्यंभगूनेपि कोपनान[1] ।
अशुष्कपक्वपूगाभानिर्वाणाक्षामतेजसः ॥ ५५ ॥

५५. तत्तस्माद्धेतोर्गद्रूनो[21] यद्ययं भीमे भक्तस्तर्किं भीमं नाभियातीत्येवं मनःखेदरहितः संस्त्वमिभान्भीमस्य प्राभृतार्थं गृहाण । किंभूतान । अशुष्कमार्द्रं पक्वं निष्पन्नं[22] यत्पूगं पूगीफलं तदाभमतिरक्तम्[23]-

१ ए डी °नान् ।.

१ डी उत्तक°. २ ए °क्लिन्न शु°. ३ ए °दहा जा°. ४ ए °त्यराजा°. ५ डी हि म°. ६ सी डी °वाख्या. ७ ए रेवख्या. ८ ई °तिक्राम्ये°. ९ ए °क्रोशेः । क्षी°. १० ए °ति पक्षि°. ११ ए क्षि–कः. १२ ए ई °च्छन्ति । क्षी°. १३ सी डी °नृणः ऋ°. १४ डी °त । ही°. १५ सी डी हीणः ही°. १६ डी घ्राणः आघ्रात । अ°. १७ डी त्राणः अ°. १८ डी उत्तं । नु°. १९ ए °त्त । सुन्न वुत्तं. २० डी नुत्त । नुत्तं । वि°. २१ ए °रनूनो २२ ए निष्फन्नं. सी निष्फन्न. २३ ए °रस्कम°.

निर्वाणमक्षीणमक्षाममकृशं तेजः प्रतापो येषां तानत एवान्येभगूनेपी-तरराजपुरीपेपि कोपनानमहर्नान ॥

वातनिर्वातगमनान्वातनिर्वाणजिद्रयान् ।
उल्लाघानकृशान्क्षीबान्नयाश्वान्फुल्लपद्मभान् ॥ ५६ ॥

५६. अश्वान्नय भीमपार्श्वे प्रापय । कीदृशान । वा तस्य कर्तुर्ये-न्निर्वातं निरुपहतं गमनं तद्वद्गमनं येषां तान । तथा वातस्य यन्नि-र्वाणं गमनं तज्जिद्रयो वेगो येषां तान्कांश्चिद्वातवच्छीघ्रगान्कांश्चिच्च वाताद्प्यतिशीघ्रगानित्यर्थः । तथोल्लाघान्नीरोगांस्तथाकृशान्पीनांस्तथा क्षीवान्मत्तांस्तथा फुल्लपद्मभान्विकसितपद्मवत्सश्रीकान ॥

संफुल्लकीर्ति भोजस्य स्वर्णमण्डपिकामिमाम् ।
श्रीवासोत्फुल्लपद्माभां हरापरिकृशश्रियम् ॥ ५७ ॥

५७. इमां प्रत्यक्षां स्वर्णमण्डपिकां हर नय । कीदृशीम । श्रियो लक्ष्म्या वासोवस्थानं यत्र तच्छ्रीवासमुत्फुल्लं स्मेरं यत्पद्मं तदा-भामत एवापरिकृशश्रियं स्फीतशोभाम । तथा भोजस्य मालवाधि-पभोजराजस्य संफुल्लकीर्ति विस्मेरां कीर्तिमिव तत्कारितत्वान् । कर्णेन हि भोजराजं जित्वा तन्मण्डपिकेयमानीतासीदिति ॥

१ ए सी °कीतिभो°. २ बी कार्मिमा°. ३ ए °मिनाम्.

१ ए °पा तानवमवा°. २ ई नानेभा°. ३ सी डी °पेति को°. ४ ए °ना-- ॥. ५ ई °न ये°. ६ ए नद्ग°. ७ ए नथाग°. ८ ए °शान्नीना°. ९ ए °न ॥ सफु°. १० ए द्म प्र°. ११ ए नग । की° १२ ए सी °कीतिवि°. ई °कीर्ति°. १३ बी °रित्वा°. १४ ए °न् । कण°.

उल्लैश्च नाययोल्लाघवद्भिः प्रक्षीबितेतरैः ।
मेरुभित्ततया वित्तं स्वर्णवित्तमुपायनम् ॥ ५८ ॥

५८. जात्यत्वाद्वृंहीयस्त्वाच्च मेरुभित्ततया मेरोः खण्डमिदमिति मेरुशकलत्वेन वित्तं ख्यातं स्वर्णवित्तं स्वर्णरूपं धनमुपायनं च भीमार्थं ढौकनिकां चौष्ट्रैः कर्तृभिर्नायय । किंभूतैः । उल्लाघवद्भिर्नीरोगैस्तथा प्रक्षीबितेतरैः प्रक्षीबिता इव मत्ता इवोत्कूर्दकत्वात् प्रक्षीबिता अदान्तास्तेभ्य इतरैर्दान्तैः ॥

अदूनः । गून । इत्यत्र "दुर्गोरू च" [७७] इति न ऊश्च ॥

अक्षाम । अशुष्क । पक्क । इत्यत्र "क्षैशुषि°" [७८] इत्यादिना मकवाः ॥

निर्वाण । इति "निर्वाणमवाते" [७९] इति निपात्यम् ॥ अवात इति किम् । वातनिर्वात ॥ केचिद् वातनिर्वाण इतीच्छन्ति ॥

क्षीबान् । उल्लाघान् । कृशान् । परिकृश । फुल्ल । उत्फुल्ल । संफुल्ल । इत्येते "अनुपसर्गा°" [८०] इत्यादिना क्तान्ता निपात्याः ॥ क्तवत्यपि केचित् । उल्लाघवद्भिः ॥ अनुपसर्गा इति किम् । प्रक्षीबित ॥

भित्त । इत्यनेन "भित्तं शकलम्" [८१]इति निपात्यम् । स्वर्णवित्तम् । वित्तम् । इत्येतौ "वित्तम्°" [८२] इत्यादिना निपात्यौ ॥

एतज्जुहुधि भीमस्य मित्रं मां विद्धि शाधि च ।
जहि शङ्कामेधि सज्जो निश्चिनु व्रज राध्नुहि ॥५९ ॥

५९. एतद्वजायुपायनं भीमस्य जुहुधि देहि । तथा मित्रं विद्धि

१ डी °रुवित्त°. २ सी वित्त°. ३ ए °यन् ॥. ४ ए °ज्जुहोधि. ५ ए °हि सङ्का°. ६ ए राध्नहि.

---

१ ए °त्वाद्वृदीय°. डी °त्वाद्वही°. २ ए °कां चोष्टैः. ३ सी °तास्ते°. ४ ए सी °गोरुच. ५ सी डी °ति तस्य न. ६ ए नक्रश्च. ७ ए °शुपीदि°. ८ सी डी °वा इ°. ९ ए °कृशान् । फु°. १० सी डी °भ् । एतौ.

जा[1]नीहि शाधि[2] च मां मित्रं भीमस्य कथये[3]श्र[4] । तथा शङ्कां[5] जहि त्यज । तथा सज्जः प्रस्थानप्रगुण एधि भव । तथा निश्चिन्वयमस्माकं मित्र[6]मेवेति निर्णय । तथा व्रज गच्छ । तथा राघ्नुहि मत्कृते भीममाराधय ॥

बुद्धि । विद्धि । इत्यत्र "हुधुटो हेर्धिः" [८३] इति धिः ॥

शाधि । एधि । जहि । इत्येते "शासम्" [८४] इत्यादिना निपात्याः ॥

व्रज । इत्यत्र "अत" [८५] इत्यादिना हेर्लुक् ॥

निश्चिनु । इत्यत्र "असंयोगादोः" [८६] इति हेर्लुक् । असंयोगादित्योर्विशेषणादिह न स्यात् । राघ्नुहि ॥

यथावां तनुवः प्रीतिं तन्वोर्थान्[1]कुर्व आर्जवम्
तन्मः[2] क्ष्मां तनुमो मां शं कुर्मः[3] कुर्यास्तथाद्य[4] नः ॥ ६० ॥

६०. तथा[7] तं प्रकारं नोस्माकं भीमस्य मम चाद्य कुर्या यथावां प्रीतिं तनुवः कुर्वोर्थान्[8]कार्याणि तन्व आर्जवमकौटिल्यं कुर्वः[9] क्ष्मां तन्मः शत्रुजयेन विस्तारयामो मां लक्ष्मीं तनुमः[10] शं सुखं कुर्मः ॥

"अविशेषणे द्वौ चास्मदः[11]" [२.२.१२२] इत्यस्मदो बहुत्वे तन्म इत्यादिषु बहुवचनम् ॥

१ ए °न्वोर्पान्कु°. २ ए °न्मः क्ष्मां त°. ३ सी डी कुर्म कु°. ४ ए °थाद्ध नः.

१ डी जानाहि. २ बी °धि गां. ३ ए ई °श्र । श°. ४ सी शङ्कामद्विषयामरित्वाशङ्काज°. ५ बी °ङ्कां मद्विपयामरित्वाशङ्कां ज°. ६ ई °त्रमिवे°. ७ सी °था प्र°. ८ ए सी डी °र्थात्कार्यां°. ९ ए °वं: क्ष्मां त°. १० ए °नुम शं. ११ डी °स्मदाव°.

तत्तनोमि करोमीति व्याकुर्वन्नादृतोपदः ।
दामोदरोकरोद्यानं रुन्धन्क्ष्मां सत्तुरंगमैः ॥ ६१ ॥

६१. दामोदरो यानमकरोत्[1] । कीदृक्सन् । यदुक्तं त्वया तत्तनोमि विस्तारयामि[2] करोमि विदधामीति व्याकुर्वन्कथयंस्तथादृतोपदो गृहीतप्राभृतः । तथा सत्तुरंगमैर्जात्याश्वैः क्ष्मां रुन्धन्नावृण्वन् ॥

तन्वः तनुवः ।[3] तन्मः तनुमः । अत्र "वम्यविति वा" [८७] इति-ओर्वा[4] लुक् ॥ [5]अवीति किम् । तनोमि ॥

कुर्याः । [6]कुर्वः । कुर्मः । अत्र "कृगो यि च" [८८] इत्योर्लुक् ॥ अवितीत्यवे । करोमि ॥

व्याकुर्वन् । अत्र "अतः शित्युत्" [८९] इत्यस्योत्[7] ॥ उकारनिमित्तत्वेनाकारविज्ञानात्कुर्या इत्यादावुकारलोपेपि स्यात् ॥ अवितीत्येव । अकरोत् ॥

रुन्धन् । सत् । इत्यत्र "[8]श्नास्त्योर्लुक्" [९०] इत्यस्य लुक्[9] ॥

अद्विषुर्नोपभीमं तं मन्त्रिणोन्येपि नाद्विषन् ।
किं त्वभ्ययुरयान्हर्षमकार्षुः[1] प्रत्युत स्तुतिम् ॥ ६२ ॥

६२. उपभीमं भीमसमीपे वर्तमाना मन्त्रिणस्तं दामोदरं नाद्विषुर्भीममस्मांश्चानापृच्छ्यैवानेनात्[10]मबुद्ध्येदं कुसंधानं कृतमिति प्रकारेण न द्वेषं चक्रुस्तथान्येपि[11] सामन्तादयोपि नाद्विषन्किं तु तमभ्ययुरभिमुखं गतास्तथा[12] किं तु हर्षमयान्प्रापुस्तथा प्रत्युत स्तुतिमकार्षुः ॥

१ सी डी °मकर्पुः.

१ डी °त् । य°. २ सी °मि वि°. ३ ए तन्वः न°. ४ ए °ति ओर्वा. ५ बी सी डी अवितीति. ६ ए कुमः । अ°. ७ ए °स्योत ॥ उ°. ८ ए श्नात्योर्लु°. ९ ए लुग् ॥. १० ए °त्मभुद्धेदं. ११ ई °न्य त्वन°. १२ बी °था कि प्र°. सी °था किंपु प्र°. डी °था कि तु प्र°.

भीममेवाविदुर्भीममविदन्वा बिडौजसम् ।
कृतार्थमागतं पौरा अन्वभूवंश्च मङ्गलम् ॥ ६३ ॥

६३. कृतार्थं कृतकार्यमागतं पत्तनसमीप आयातं भीमं पौरा भीममेव पाण्डवमेवाविदुर्जानन्ति स्म बिडौजसं वेन्द्रं वाविदस्तथा मङ्गलं प्रावेशिकं नगरशोभादिमङ्गलकर्मान्वभूवंश्च समवेदयंश्च चक्रुश्चेत्यर्थः ॥

अद्विषुः अद्विषन् । अयुः अयान् । इत्यत्र "वा द्विष" [९१] इत्यादिनानो वा पुस् ॥

अकार्षुः । अविदुः । अत्र "सिज्विदोभुवः" [९२] इति पुस् ॥ अविदन्नित्यपि कश्चित् । अभुव इति किम् । अन्वभूवन् ॥

नृपागममशासुर्ये तथैभ्योजुहवुर्जनाः ।
नादरिद्रुर्यथाजक्षुरचकासुरजागरुः ॥ ६४ ॥

६४. ये नरा नृपागमं भीमागमनमशासुरभणन्नेभ्यो जनाः पौरास्तथाजुहवुर्ददुर्यथा नादरिद्रुर्दरिद्रा नाभूवन्नित्यर्थः । अत एवाजक्षुर्बुभुजिरे सविलासा जहसुर्वाचकासुर्दिव्यवस्त्रादिना रेजुस्तथाजागरुरुन्निद्रा बभूवुः ॥

अजुहवुः । अजक्षुः । अदरिद्रुः । अजागरुः । अचकासुः । अशासुः । अत्र "द्व्युक्त" [९३] इत्यादिनानः पुस् ॥

---

१ ए नृपाग°. २ ए °भ्योजह°. ३ सी डी °जुजु°. ४ बी सी °जागुरः.

---

१ ई °जसमिन्द्रं. २ ए °म मिन्द्र. ३ सी वेन्द्रवा°. ४ ए वाविदस्त°. ५ ए °ङ्गमं प्रा°. ६ ए °मादिन्व°. ७ ए °व समव°. ८ ए अजान. ९ ए °ति बुस. १० डी °सम°. ११ ए °थाजह°. १२ सी डी °जुहु°. १३ बी °दुयथा. १४ ए °रिद्री°. १५ सी जहसु°. १६ ए °थाजोग°. १७ सी डी °जुहुवुः. १८ °रिद्रः । अ°. १९ ए °कासुः । अ° २० सी अत्र. २१ ए °त्र सुक्त.

शासद्भिभ्रद्भुवं भीमो विशन्स्त्रैणान्युदैक्षत ।
दृशं ददन्ति जक्षन्ति वाचं ददति जक्षति ॥ ६५ ॥

६५. भुवं शासद्रक्षन्बिभ्रत्पोपयन्भीमो विशन्पुरं प्रविशन्सन् स्त्रैणान्युदैक्षत । कीदृंशि । दृशं चक्षुर्ददन्ति भीमदर्शनाय भीमाभिमुखं क्षिपन्ति सन्ति जक्षन्ति रूपातिशयोत्थहर्षाद्धसन्ति । तथा वाचं ददति भीमरूपातिशयवर्णनायान्योन्यं वचनं वितरन्ति सन्ति जक्षति हर्षान्मिथो हसन्ति ॥

बिभ्रत् । शासत् । इत्यत्र "अन्तो नो लुक्" [९४] इति नस्य लुक् ॥

ददति ददन्ति । जक्षति जक्षन्ति । अत्र "शौ वा" [९५] इति नस्य वा लुक् ॥

तस्याद्दरिद्रल्लावण्यं प्रीणत्प्रविशतस्तदा ।
मिमते स्म न पौर्योपि मिमीतामितरः कथम् ॥ ६६ ॥

६६. तस्य भीमस्य तदा प्रविशतो लावण्यं सौन्दर्यं पौर्योपि वैदग्ध्येन प्रसिद्धा नागरिकां अपि न मिमते स्म । एतावदिदमिति न परिच्छिन्दन्ति स्म । यतोदरिद्रत्प्रचुरं तथा प्रीणत्सर्वलोकान्हर्षयत्तस्मादितरो ग्राम्यस्त्रीलोकः कथं मिमीताम् ॥

स प्रीणीते स्म दत्ते स्म धत्ते स्म च तथा श्रियम् ।
दरिद्रितः स्म न यथा बिभितः स्म न रोदसी ॥ ६७ ॥

६७. स भीमस्तथौचित्यरूपेण तेन प्रकारेण श्रियं प्रीणीते स्म या-

१ ए तस्माद°. २ सी डी °रिद्रत:. ३ ए °द्रित स्म.

१ सी डी °शन्प्र°. २ ए °णान्युद°. ३ ए कीदृशि. ४ ए °भिम्खं क्षिपन्ति स°. ५ सी डी °खं विक्षि°. ६ बी °न्ति यक्ष. ७ ई विरमन्ति. ८ ए सी °क्षन्ति ह°. ९ ए °त्र सौ वा. १० ए °काश्चपि. ११ ए °थात्प्रीण°. १२ ए °थं तिमी°.

नयामि । नयावः । नयामः । अत्र "मव्यस्याः" [११३] इत्यस्यात् ॥

भुवि संविद्रते[1] ये च दिवि संविदते[2] च ये* ।
समशेरत तेप्यस्याग्रे नैव निरचिन्वत ॥ ८० ॥

८०. ये नरा भुवि संविद्रते व्याकरणतर्कधातुवादादिशास्त्राणि सम्यग्जानते ये च देवा दिवि संविदते तेप्यस्य कर्णस्याग्रे[3] समशेरत प्रज्ञातिशयादनेनापूर्वप्रश्नादौ कृते तदुक्ते वा निर्लोठिते संशयं चक्रुर्नैव निरचिन्वत न निर्णिन्युः । एतेनास्य सर्वेभ्योपि विद्वत्तोक्ता* ॥

निरचिन्वत । इत्यत्र "अनत" [११४] इत्यादिनान्तोर्त् ॥

समशेरत । इत्यत्र "शीङो रत्" [११५] इत्यन्तो रत् ॥

संविद्रते । संविदते । अत्र "वेत्तेर्न वा" [११६] इत्यन्तो रद्वा ॥

न वेद विद्व विद्माथ न वेत्थ[3] विदथुर्विद ।
नास्याग्रे[4] वेद विदतुर्विदुः[5] केत्रेति नाब्रुवन्[6] ॥ ८१ ॥

८१. अत्र कर्णविषये के नरा नाब्रुवन् । किमित्याह । अस्य कर्णस्याग्रेहं न वेद न वेद्मावां न विद्व वयं न विद्म । अथं[10] तथा न त्वं वेत्थ[11] न वेत्सि युवां न विदथुर्यूयं न विद किंबहुनान्योपि कोपि न वेद न वेत्ति कावपि न विदतुः केपि न विदुरिति ॥

१ ए °विद्रित. २ ए विदित. ३ ए वेत्यं वि°. ४ ए °स्यार्ये वे°. ५ ए °विंपुः के°. ६ ए नाध्रुव°. * सीपुस्तके 'च ये' इत्येतदारभ्य 'विद्वत्तोक्ता' इत्येतदन्तग्रन्थस्याक्षराणि लेखकप्रमादाद्व्युत्क्रमवन्ति जानानीति दृश्यते.

१ ए सी डी ई इत्यान. २ बी ये च न°. ३ ए कमस्या°. ४ सी °पूर्वे प्र°. ५ ए °र्णिन्यु । ए°. ६ ए °न्तोना म°. ७ ए वेनेर्न. ८ ए नाध्रुव°. ९ डी °वत् । कि°. १० ए °थपत°. ११ ए वेत्स न.

इन्दुर्दस्रौ हुताशाः स्म वेत्ति वित्तो विदन्त्यमुम् ।
वेत्सि वित्थो वित्थ वेद्मि विद्वो विद्म इतीरिणः ॥ ८२ ॥

८२. अमुं कर्णमिन्दुर्वेत्ति स्म । दस्रौ नासत्यौ वित्तः स्म । हुताशा दक्षिणाहवनीयगार्हपत्याख्याग्निस्त्रोग्निदेवता विदन्ति स्म । किंभूताः सन्तः । वेत्सि वित्थो वित्थ वेद्मि विद्वो विद्म इतीरिणः । इन्दो त्वममुं वेत्सि स आह वेद्मि दस्रौ युवां वित्थमावाहतुर्विद्वो हुताशा यूयं वित्थ तेप्याहुर्विद्म इत्येवं मिथोवादिनः । एतेनायं स्वर्गेपि प्रसिद्ध इत्युक्तम् ॥

वेद । विदतुः । विदुः । वेत्थ । विदथुः । विद । वेद । विद्व । विद्म । वेत्ति । वित्तः । विदन्ति । वेत्सि । वित्थः । वित्थ । वेद्मि । विद्वः । विद्मः । अत्र "तिवाम्" [११७] इत्यादिना तिवादीनां णवादय आदेशा वा ॥

न तथाग्रे ब्रुवन्ति स्म ब्रूतः स्म स्म ब्रवीति वा ।
नाहुराहतुराहापि यथासौ सत्यमुक्तवान् ॥ ८३ ॥

८३. यथासौ कर्णः सत्यमुक्तवांस्तथाग्रे पूर्वं न कोपि ब्रवीति स्म कावपि न ब्रूतः स्म केपि न ब्रुवन्ति स्म । तथा वर्तमानकालेपि न कोप्याह न कावप्याहतुर्न केप्याहुः ॥

१ ए ताशा स्म. २ सी डी स्म ब्र°. ३ ई स्म ब्रवी°.

१ सी डी दक्षगा°. २ ए °नीयगा°. ३ ए सी भूता स°. ४ ए विद्रो वि°. ५ ए युवां वित्थः वि°. ६ ए °स्तादाह°. ७ ए °दिना । ए°. ८ ए °त्ति । वेत्तः. ९ ए वित्थ । वित्थः । वे°. सी वित्था । वे°. १० बी वामेत्या°. ११ ई °पि ब्रुवी°. १२ ए न ब्रुवान्ते स्म. १३ सी डी °ले न. १४ ए कोप्योह. १५ ए केणाहुः.

यथा[1]हथुः शिवा[2]विन्द्रौ [3]ब्रूथः कृष्ण ब्रवीषि च ।
ब्रह्मन्नात्थ तथासावित्याख्यत्तं दिवि नारदः ॥ ८४ ॥

८४. तं कर्णं दिवि शिवादीनां पुरो नारद आख्यत् । कथमित्याह । शिवश्च शिवा च हे शिवौ यथा यादृशममुं कर्णं युवामाह[1]थु-र्वर्णयथ इत्यर्थः । तथा हे इन्द्रौ शचीन्द्रौ[2] यथामुं युवां ब्रूथो हे कृष्ण यथा[3]मुं त्वं ब्रवीषि च हे ब्रह्मन् यथामुं त्वमात्थ तथा तादृशोसौ कर्ण इति ॥

आह । आहतुः । आहुः । आत्थ । आहथुः । ब्रवीति । ब्रूतः । ब्रुवन्ति[4] । ब्रवीषि । ब्रूथः । अत्र "ब्रूग°" [११८] इत्यादिना पं[5]चानां[6] तिवादीनां पञ्च णवादयो[7] वा तत्संनियोगे ब्रूग आहश्च ॥

जयताञ्जय जयतु विजयेतां भुजौ च[4] ते ।
राजेते यावदर्केन्दू जगौ[8] तत्रेत्यृषिव्रजः ॥ ८५ ॥

८५. ऋषिव्रजस्तत्र कर्णविषये जगावाशिषो ददौ । कथमित्याह । यावदर्केन्दू राजेते तावद्भवांस्त्वं वा जयतात्त्वं जय भवाञ्जयतु ते तव भुजौ च विजयेतामिति ॥

भजेथे स्म पुरा यत्तद्भजे[5]थां माधुना धनुः ।
भजेतं कर्णपादावित्यूचुस्तदरयो भुजौ ॥ ८६ ॥

८६. तदरयः कर्णारयो भुजौ स्वबाहू ऊचुः । कथमित्याह । हे

१ डी °थाहेथुः. २ प °विद्रां भृ°. ३ सी डी भृथ क्र.° ४ डी च तौ । रा°. ५ प डी °जेथा माधुमा ध°.

१ सी डी °हतुर्वर्णयथा इ°. २ बी °न्द्रौ अमुं. ३ प सी °थामु त्वं. ४ सी °न्ति । भृवी°. ५ सी पञ्च ण°. ६ प °नां वेति°. ७ बी सी डी °दयस्तत्सं°. ८ प जगां वा°.

भुजौ पुरा यद्धनुर्युवां भजेथे स्म रणायाश्रयेथे स्म तद्धनुरधुना कर्णे उदिते मा भजेथां किं त्वधुना कर्णपादौ युवां भजेतमिति ॥

जयतात् । इत्यत्र "आशिषि°" [११९] इत्यादिना तुह्योर्वा तातङ् ॥ पक्षे । जयतु । जय ॥

जगौ । अत्र "आतो णव औः" [१२०] इति णवं औः[1] ॥

विजयेताम्[2] । राजेते । भजेथाम् । भजेथे । अत्र "आतामाते°" [१२१] इत्यादिनाते[3] इः ॥

भजेतम् । अत्र "यः सप्तम्याः" [१२२] इति–इः ॥

यदि श्रियः श्रयेयुस्त्वां श्रयेयं क्ष्माश्रितं कथम् ।
इति क्रुधेव[1] यत्कीर्तिर्दिशो दिशमशिश्रियत्[2] ॥ ८७ ॥

८७. यत्कीर्तिर्यस्य कर्णस्य यशो दिशः सकाशाद्दिशमशिश्रियत् । एकस्या दिशोपरदिशं ययावित्यर्थः । उत्प्रेक्षते । क्रुधेव । कथं क्रुदित्याह । यदि त्वां क्ष्माश्रितं श्रियः श्रयेयुस्तत्कथं किमहं त्वां श्रयेयं नैवेत्यर्थ इति । अन्यापि[6] मानिनी सपत्न्याश्रितं पतिम् । यद्येता निरभिमानत्वात्त्वां सपत्न्याश्रितमपि श्रयन्ते तत्किमहमपि त्वां श्रयेयमिति कोपेनोक्त्वा[10] दिशो दिशं श्रयति तामनुनेतुं यस्यां दिशि[11] पतिरभिमुखो भवति कोपात्तस्या दिशो विमुखीभवन्त्यन्यां दिशं श्रयति ॥

१ ए क्रुद्धेव. २ ए °शिश्रय°.

१ ए सी °व औ ॥. २ ए °ता । रा°. ३ ए °त इ ॥ भ°. सी °त इति । भ°. ४ ए °शाद्दश°. ५ बी त्प्रेक्ष्यते. ६ सी डी °पि कामिनी. ७ ए °मानित्वां°. ८ डी °पत्न्यः श्र°. ९ सी °त्न्याश्रयते त°. १० ए °नोक्ता दि°. ११ सी दि······शो.

अयेयम् । अयेयुः । अत्र "याम्युमोर॰" [१२३] इत्यादिनेयमियुसौ ॥

चतुर्दशः पादः समर्थितः ॥

अयेयम् । अयेयुः । अत्र "नामिनो गुणोऽक्ङिति" [१] इति गुणः ॥ अक्ङितीति किम् । श्रितम् । अशिश्रियत् ॥

नाधूनोन्नातनोत्खड्गं तेषु येबिभयुर्युधि ।
ह्रेपयन्मल्लयोद्धृन्नामेद्यज्जागरितः श्रमे ॥ ८८ ॥

८८. युधि येबिभयुर्भीतास्तेषु भीरुषु विषये कर्णः खड्गं नातनोद्धाताय न व्यापारयत्किं बहुना नाधूनोन्नाकम्पयदपि । एतेन क्षत्रियोत्तमत्वोक्तिः । नन्वसौ कदापि शस्त्रश्रमाकरणेन यथाकामानभोजनेन च सर्वाङ्गीणमतिमेदुरत्वादस्त्रं व्यापारयितुमेव न शक्ष्यतीत्याशङ्क्याह । नामेद्यन्नोपचितमेदोधातुरभून् । कीदृक्सन् । श्रमे खड्गाद्यभ्यासे जागरितः सदोद्यतोत एव मल्लयोद्धृन्मल्लभटान्ह्रेपयन्पराजयेन लज्जयन् । श्रमे ह्यकिंचित्करत्वहेतुमेदोधातूपचयो न स्यात् ॥

धर्मे जजागृवानर्थे जजागर्वान्स वेत्रिणा ।
इदं व्यज्ञपि यद्द्वारि चित्रकृत्कश्चिदासरत् ॥ ८९ ॥

८९. स कर्णो वेत्रिणेदं व्यज्ञपि । कीदृक्सन् । धर्मे जजागृवान्सोद्यमस्तथार्थे द्रव्ये जजागर्वान्स्वस्ववेलायां धर्मार्थौ साधयन्नित्यर्थः । किं

१ डी नाधुनो॰. २ सी डी ॰र्विभयु ३ ए श्रमा ॥. ४ ए ॰गृवान॰.

१ डी ॰येयुः. २ ए सी पाद स॰. ३ सी डी ॰र्विभयु॰. ४ डी ॰षु विषयेषु क॰. ५ बी बहूना. ६ सी डी नन्वमा. ७ ए ई ॰न म॰. ८ ए बी सी डी ॰मेदधा॰. ९ ए ॰भयन्पयन्पर॰. १० ई ॰तुमदो॰. ११ ए बी सी डी ॰मेदधा॰. १२ ए ॰वाश्वस्व॰. १३ सी डी ॰स्ववे॰. १४ ए ॰माथोसमा॰. सी॰ मार्थो सा॰.

व्यञ्जपीत्याह । द्वारि मिहद्वारे कश्चिदज्ञायमानश्चित्रकृच्चित्रकर आसर-त्कुतोपि स्थानादाययौ ॥

स आनर्च्छ बहून्देशानदर्शच्चाद्भुतानि मः ।
यानि संचस्करुः पृथ्वीं वितरुर्यानि विस्मयम् ॥ ९० ॥

९०. स चित्रकृद्बहून्देशानानर्च्छ भ्रान्तवानत एव सोद्भुतान्याश्चर्यकारिवस्तून्यदर्शच्च । यान्यद्भुतानि पृथ्वीं संचस्करुरतिशायित्वेनालं चक्रुरत एव यानि विस्मयमाश्चर्यं वितरुर्ददुः । अर्थाल्लोकानाम । एतेनासौ राज्ञोपि किंचिदद्भुतं दर्शयिष्यति तस्मात्प्रवेश्यतामिति राज्ञो वेत्रिणा ज्ञापितम ॥

सोथानृच्छान्नृपादेशात्प्रणम्योचे कृताञ्जलिः ।
न के सस्मरुरारुस्त्वां तन्मया सर्यसेर्यसे ॥ ९१ ॥

९१. अथैवं विज्ञप्त्यनन्तरं म चित्रकृन्नृपादेशात्कर्णाज्ञयानृच्छान्नृपान्तिकमागतः मन्प्रणम्य कृताञ्जलिरूचे । यथा राजन् यस्मात्त्वां के नरा न सस्मरुः के च नारुर्नाययुः । न्यायपालकत्वौदार्यादिगुणोपेतत्वेन सर्वैरपि त्वं स्मर्योभिगम्यश्चेत्यर्थः । तत्तस्माद्धेतोर्मया सर्यसेर्यसे गम्यसे च ॥

अरार्यमाणाः मास्वर्यमाणास्तीर्त्वा नदीः क्रमम् ।
विसर्यासं शमर्यासं कीर्तिचेन्च्येन्त्युपागमम् ॥ ९२ ॥

१ ए °ज्ञाप्रण°. २ बी माश्चय°. ३ ए नदा ह°. ४ ए विस्मार्या°. ५ ए चेन्येत्यु°. ६ डी °त्युपोग°.

१ ए सी पृथ्वी म°. २ ए °रुभ ।°. ३ ए °चिदद्भु°. ४ ए °पिताम्. ५ बी सी °ज्ञप्यन°. ६ ए °त्रकन्न°. ७ ए °पातिक°. ८ ए° सत्प्रण°. ९ ए °रुनाययुः°. १० ए णोपित°. ११ सी डी °र्योभ्यग°. १२ बी °तोमया.

९२. हे कीर्तिचेञ्च्य । यशसोत्यर्थमुपचायक । अहमुपागमं त्वत्समीपमागतः । किं कृत्वा । अरार्यमाणा अत्यर्थं प्रसरन्तीरत एव सा[1]स्वर्यमाणा अत्यर्थं शब्दायमाना नदीस्[2]तीर्त्वातिविषमं बहुमार्गमुल्लङ्घ्येत्यर्थः । क[3]स्मादित्याह । क्लमं मार्गश्रमादिकृतां ग्लानिमहं विस्मर्यासं त्वद्दर्शनेन विस्मरेयं तथा शं[4] सुखमर्यासं प्राप्नुयामिति हेतोः ॥

दध्यां दधति वाचस्ते दध्ययन्त्यर्थिनश्च ताः ।
दिष्ट्या मय्यपि दीधित्र्यो[1] वेवित्र्यो[2] दधयन्तु ताः ॥९३॥

९३. हे राजंस्ते वाचो दध्यां दधीवाचरन्ति । क्विप्[5] लोपे[6] दधयनं[7] "शंसिप्रत्यर्याद्" [५.३. १०५] इत्यः[8] । माधुर्येण दध्न इवाचरणं दधति धारयन्ति । तथार्थिनश्च याचकाश्च तास्त्वद्वाचः कर्म दध्ययन्ति दानकाले माधुर्येण दधीवाचरन्तीः[9] प्रयुञ्जते । दधिशब्दात्[10]क्विब्वन्तात्[11]णिग् । तास्त्वद्वाचो दिष्ट्यानन्देन[12] मय्यपि दधयन्तु दधीवाचरन्तु । यूयं[13] मधुरवाग्भि[14]र्मामप्यालपते[15]त्यर्थः । कीदृश्यः सत्यो दीधित्र्यो दीप्तिमत्य ओजोगु[16]णान्विता इत्यर्थः । तथा वेवित्र्यः कान्तिगुणोपेताश्च[17] । दीधीङ् दीप्तिदेवनोः । वेवीङ् वेतिना तुल्ये[18] । वेतिना वींक् धातुना तुल्यर्थे वर्तते । एतावपरैः[19]पठितौ ॥

१ डी °श्र्यो विश्र्यो. २ प °वित्रो द°.

१ बी साश्चर्य°. २ प °स्तीर्त्वा इति. ३ प कस्यादि°. ४ प श सुख°. ५ सी डी क्विपि लो°. ६ ई लोपो द°. ७ डी °धन श°. ८ प बी सी °याद इ°. ई °या इ°. ९ प °रन्ती प्रयुञ्जति । द°. १० प °ब्दात्किप्तु°. ११ प सी °न्ताणिग्. १२ बी °न्दे म°. १३ प यूअ म°. १४ प °ग्भिमाम°. १५ प °त इत्य°. १६ प °गुणोचिता. १७ प °श्च । दीधीङ दीप्ति°. १८ सी ल्यर्थे व°. डी °ल्यर्थे । वे°. १९ बी °पचितौ. सी °पवितौ.

वेव्यते दीध्यते लक्ष्म्या भवानग्रेधुनानया ।
यदि वेवीत[1] दीधीतेत्यालेख्यपटमार्पयत् ॥ ९४ ॥

९४. चित्रकृदालेख्यपटं चित्रपटमार्पयद्राज्ञे ददौ । कथम् । इत्येवमुक्ति[1]दानप्रकारेण । इत्युक्त्वेत्यर्थस्तमेवाह । हे नृपाग्रे पूर्वं [2]भवांस्त्वं लक्ष्म्या राज्यश्रिया कर्त्र्या [3]वेव्यते धीरललितनायकत्वात्काम्यते । तथा दीध्यते । अन्तर्भूतणिगर्थत्वाद्[8] रम्यते च । अधुना सांप्रतं पुनरनयालेख्यपटस्थकन्यकया सहितां लक्ष्मीं यदि वेवीत[4] दीधीत च । इच्छा मे यदि कामयेत[5] रमयेच्चेत्यर्थः[6] । असंजातपूर्वसपत्नीका लक्ष्मीरधुनानया ससपत्नीका यदि भवेत्तदा ममात्यभिप्रेतं स्यादिति भावः । अत्र "कामोक्तावकच्चिति"[7] [५. ४. २६] इति कामोक्तौ गम्यमानायां सर्वविभक्त्यपवादा सप्तमी । यदि च भवानग्र इति पाठस्थाने पूर्वमेष इति पाठः स्यात्तदा सर्वापीयमुक्तिः कवेः स्यात्ततश्च पूर्वमेष कर्णो लक्ष्म्या वेव्यते दीध्यते चाधुना त्वेषोनया सहितो[9] लक्ष्मीं यदीति[10] यथार्थे । यथा वेवीत[11] दीधीत च । वर्तमानार्थेपि[12] सप्तमी दृश्यते । ततश्च यथाभिलषति[13] क्रीडयति चेति हेतोरालेख्यपटमार्पयदिति सरल एवान्वयः स्यात् । विशिष्टाम्नायविद्भिरन्यथा[14] वैतदर्थः[15] स्वयं व्याख्येयः ॥

अतनोत् । अधूनोत् । इत्यत्र "उश्नोः" [२] इति गुणः ॥

अबिभयुः । ह्रेपयन् । इत्यत्र "पुस्पौ" [३] इति गुणः ॥

१ ए ई °त देधी°.

१ सी डी °मुक्तदा°. २ ए सी भवास्त्व ल°. ३ ए वेव्येते. ४ ए ई °त देधी°. ५ बी °येच्च र°. सी डी °येत् र°. ६ ए °येचेत्य°. ७ बी सी डी °वकिचि°. ए °वकिन्विति. ८ बी °वादः स°. ९ बी सी डी °हितां ल°. १० ए °दी य°. ११ ए ई° त देधी°. १२ ए° र्तकमा°. १३ बी ई °षते क्री°. सी डी °षयते क्री°. १४ सी डी °यवद्भि°. १५ बी ई °था चैत°.

योवृन् । इत्यत्र "लघोरुपान्त्यस्य" [४] इति गुणः ॥

अमेद्यत् । इत्यत्र "मिदः श्ये" [५] इति गुणः ॥

जागरितः । अत्र "जागुः किति" [६] इति गुणः ॥ जजागृवान् । इत्यत्र कस्मान्न स्यात् । जागर्तेः क्वसुरनभिधानाद्भाषायां नास्तीत्येके ॥ गुणमेवेच्छन्त्येके । जजागर्[1]वान् ॥ अपरे तु क्वसुकानयोर्गुणप्रतिषेधमेवाहुः । जजागृवान् ॥

आसरत् । अदर्[2]शत् । इत्यत्र "ऋवर्णदृशोऽङि" [७] इति गुणः ॥

संचस्करुः । आनर्च्छ । वितेरुः । अत्र[3] "स्कृच्छृत°" [८] इत्यादिना गुणः ॥ अकीति किम् । आनृच्छ्वान् ॥

सस्मरुः । आरुः । इत्यत्र "संयोगादृदर्त्तेः" [९] इति गुणः ॥

स्मर्यसे । अर्यसे । सास्वर्यमाणाः । अरार्यमाणाः । विस्मर्यास्म् । अर्यासम् । अत्र "क्ययङाशीर्ये" [१०] इति गुणः ॥

[4]चेच्य । इत्यत्र "न वृद्धिर्°" [११] इत्यादिना न गुणः ॥ केचित्त्वप्रत्यये[5] णिगि च दध्यां दध्ययन्ति इत्यत्रापि । गुणवृद्ध्योः प्रतिषेधमिच्छन्ति । तन्मतसंग्रहार्थे[6] क्विल्लोपे सत्यविति प्रत्यये परे गुणवृद्धी न स्यातामिति व्याख्येयम् । विति[7] तु दधयन्तु ॥ केचित्तु दीधीवेव्योरिवर्णे यकारे[8] वान्तस्य लुकमन्यत्र[9] तु गुणवृद्धिनिषेधमारभन्ते । दीधि[10]ध्यः । वेविध्यः । दीधीत । वेवीत । दीध्यते[11] वेव्यते ॥

१ ए °गवान्. २ ए °दश्यंत्. ३ ए अउ कृच्छृ°. ४ ए चेच । इ°. ५ ए °त्ययो णि°. ६ ए °र्थं जह्लो°. ७ ए °ति सु द°. ८ °बी रे चान्त°. ९ बी °त्र गु°. सी डी °त्र गुणनि°. १० बी °ध्यः । वीवि°. ११ ए वेध्यंत.

तत्रेक्ष्य लिखितां कन्यामुत्कोभूद्राड्डवाच च ।
ईदृग्रत्नं सुवै रत्नगर्भाप्येवं न चिन्तयेत् ॥ ९५ ॥

९५. तत्रालेख्यपटे लिखितां कन्यामीक्ष्यालोक्य राङ्कर्ण उत्कः कन्यां प्रत्युत्कण्ठितोभूत्तथोवाच च । यथेदृक्सर्वोत्कृष्टं रत्नं कन्यारूपमहं सुवै जनयितुं समर्था मतान्तरेणात्र समर्थनायां पञ्चमी । एवं कर्मतापन्नं रत्नगर्भाप्यौस्तामरत्नगर्भा योषिदादीनि रत्नानि गर्भे यस्याः सापि भूरपि न चिन्तयेन । संभावनेत्र सप्तमी ॥

अभूत् । इत्यत्र "भवतेः सिज्लुपि" [१२] इति न गुणः ॥
सुवै । अत्र "सूतेः पञ्चम्याम्" [१३] इति न गुणः ॥

प्रमोमुदीति वंशः को जुहुत्या श्रियमेनया ।
बन्धुतां यन्ति के चास्या नाम तेजुहवुश्च किम् ॥ ९६ ॥

९६. अनया कन्यया कृत्वा को वंशः प्रमोमुदीत्यत्यर्थं प्रमोदते । यतो रूपादिगुणातिशयेन वंशस्यैव श्रियं शोभां जुहुत्या ददत्या । तथास्याः कन्यायाः के च बन्धुतां स्वजनतां यन्ति प्राप्नुवन्ति तथा ते बन्धवोस्याः किं नाम(मा)जुहवुर्ददुः ॥

अधियानस्तदेतस्या अधीयानोन्यदप्यहो ।
ब्रूह्ययानि यथा तोषं वसु ते जुहवानि च ॥ ९७ ॥

१ ई तत्रैक्ष्य. २ ए °त्रेख्य लि°. ३ ए सी डी °न्धुता य°. ४ सी डी °म् ॥ एतया. ५ ए ब्रूह्यया°. ६ ए वस्तु ते.

---

१ ए °न्यामेख्यालो°. ई °न्यामेक्ष्या° २ डी च । ईदृ°. ३ ए °र्था गता°. ४ डी° प्यास्तां म° ५ ए बी सी डी °दी र°. ६ ए मिज्जुपि. ७ ए सूते प°. ८ ए यति प्रा°.

९७. अहो चित्रकृ[1]दस्याः कन्यायास्तद्वंशादि ब्रूहि । यतोस्यास्तद-धिया[2]नः स्मर्तुं शक्तः स्मरणशीलो वा तथान्यदपि कलाकौशलाद्यधी-यानो यथाहं तोषमयानि प्रा[3]प्रवानि तथा ते तुभ्यं व[4]सु द्रव्यं यथा जु[5]हवानि[6] च[7] ददानि च ॥

प्रमोमुदी[8]ति । इत्यत्र "[9]व्युक्तोपान्त्य°" [१४] इत्यादिना न गुणः ॥

जुह्वत्या । यन्ति । इत्यत्र "[10]ह्विण(णोः)°" [१५] इत्यादिना वयौ ॥ [11]अप्वि-तीति कि[12]म् । पुं[13]स् । अजुह[14]वुः ॥ विन् । जुहवानि । अयानि[15] ॥

अधि[16]यानः । अधीया[17]नः । इत्यत्र "इको वा" [१६] इति वा[18] यकारः ॥

अकुटित्वेति राज्ञोक्तोनुत्कोटो नुवितेति सः ।
वचोनुत्कोटयन्[1]स्माहालेखनीयकृतां वरः ॥ ९८ ॥

९८. आलेखनीयकृतां[19] चित्रकृतां वरः श्रेष्ठ आह स्मो[20]चे । कीदृक्सन् । अकुटित्वा[21] कौटिल्यमकृत्वेत्युक्तरीत्या[22] राज्ञा कर्णेनोक्तोत एवानुत्कोटोकुटिलमनस्कोत एवं[23] वचोनुत्कोटयन्नकुटिलयन्सन्नि[24]ति वक्ष्यमाणे[25]रीत्या नुविता कन्यावंशा[26]देः स्तोता[27] ॥

१ ए °यन्माहा°

१ ई °दस्या क°. २ ए °याना स्म°. ३ ए प्राप्तवा°. बी सी डी प्राप्नवा°. ४ ए वस्तु द्र°. ५ बी जुहुवा°. ६ ए °नि वदामि च. ७ सी डी च ॥ प्र°. ८ ए °ति । अत्र. ९ बी सी डी ई ब्युक्त इ°. १० ए ह्विणोरप्वितिव्यौ इति यकारवकारादेशौ ॥ अ°. ११ डी अविती°. १२ बी सी डी ई °म् । अ°. १३ ए पुम्स अहहवुः. १४ बी सी डी ई °वुः । जु°. १५ सी °नि । अधीया°. १६ ए °यानिः । अ°. १७ बी सी डी ई °नः । अत्र. १८ बी डी ई वा यः ॥. सी वा य ॥. १९ डी ई °तां व°. २० ए सोवाच । की°. २१ ए °टिलत्वाकौ°. २२ ए ई °त्या क°. २३ बी डी °व च व°. २४ ए °न्नि व°. २५ ई °णया री° २६ बी °शादे स्तो°. २७ ए स्तो ॥.

अवाच्यां स्फरिकाश्यस्ति नाम्ना चन्द्रपुरं पुरम् ।
कंडकस्फलकस्वैणं धर्मानुद्विजितप्रजम् ॥ ९९ ॥

९९. अवाच्यां दक्षिणस्यां दिशि नाम्ना चन्द्रपुरं पुरमस्ति । कीदृक् । स्फरिका स्फुरन्ती श्रीर्लक्ष्मीर्यत्र तत् । "तद्धिताक" [३.२.५४] इत्यादिना न पुंवत् । तथा कंडकानि माद्यन्ति स्फलकानि सविलासानि स्त्रैणानि यत्र तत् । तथा धर्मादनुद्विजित्र्योनुद्विजमानाः प्रजा यत्र तत् । एतेनात्रार्थकामधर्माणां संपदुक्ता ॥

अकुटित्वा । नुविता । इत्यत्र "कुटादेर्" [१७] इत्यादिना प्रत्ययो ङिद्वत् ॥ अञ्णिदिति किम् । अनुत्कोटः । अनुत्कोटयन् ॥ कुटादेरिति किम् । आलेखनीय ॥ अपरे कंडस्फरस्फुलान्कुटादौ पठित्वा पाठसामर्थ्याद् ञ्णिति वृद्धिनिषेधमिच्छन्ति । कंडकं । स्फरिका । स्फलकं ॥

अनुद्विजितृ । इत्यत्र "विजेरिट्" [१८] इतीड् ङिद्वन् ॥

दिशां प्रोर्णुविता कीर्त्या द्विषां प्रोर्णविताजसा ।
राजेह जयकेशी यं स्तुतो वित्तश्च रोदसी ॥ १०० ॥

१ ए बी अपाच्या. २ सी °च्या स्पुरि°. ३ बी कड क°. ई कटक°. ४ बी °करफुल°.

१ बी अपाच्या. २ ए °क्ष । स्फुरि°. ३ सी डी ई °क्ष्मी यत्र. ४ ई कटका°. ५ बी °न्ति स्पल°. ६ ए यव त°. ७ सी डी °नाथ°. ८ ए इत्योदि°. ९ डी °त्यया ङि°. १० ए अञ्जिदि°. ११ ए °त्कोटय°. डी °त्कोट । अ°. १२ ए °म् । ले°. १३ ई कटस्फ°. सी कडस्फुला°. १४ ई कटक. १५ °टका । स्फ°. १६ बी स्फरक । रफ°. १७ ए °लका । अ°. १८ ए °रिटीतिट्.

१००. इह[1] चन्द्रपुरे जयकेशी नाम राजास्ति। कीदृक्। ओजसा प्रतापेन बलेन वा द्विषां प्रोर्णविता छादकोत एव कीर्त्या दिशां प्रोर्णुविता[2] व्यापकोत एव च यं जयकेशिनं रोदसी स्तुतः श्लाघेते वित्तश्च जानीतश्च ॥

कन्या जयति तस्यैषा मयणल्लेति नामतः।
समीधेस्या न दध्वंसे कान्तिर्निन्ये जगन्मुदम् ॥ १०१ ॥

१०१. नामतो मयणल्लेति मयणल्लाख्यैषा[3] चित्रपटस्था तस्य जयकेशिनः कन्या पुत्री जयति सर्वस्त्रैणादुत्कर्षेणास्ति। यतोस्याः कन्यायाः कान्तिः कमनीयता समीधे दिदीपे[4] न दध्वंसे न क्षीणा। अत एवास्याः कान्तिर्जगन्मुदं हर्षं निन्ये प्रापयत् ॥

प्रोर्णुविता[5]। प्रोर्णविता। इत्यत्र "वोर्णोः" [१९] इतीड्वा ङिद्वत् ॥

स्तुतः। वित्तः। अत्र "शिदवित्"[6] [२०] इति शिद् ङिद्वत्[7] ॥ अविदिति किम्। जयति ॥

समीधे। निन्ये। अत्र[8] "इन्ध्यसम्°" [२१] इत्यादिना परोक्षा किद्वत् ॥ इन्ध्यसंयोगादिति किम्। दध्वंसे[9] ॥

यौवनेनाथ सस्वञ्जे सा विकारैर्न सस्वजे।
नष्ट्वा याति स्मराख्यायामास्ते नंष्ट्वालिनर्मणि[1] ॥ १०२ ॥

१०२. अथ सा मयणल्ला यौवनेन सस्वञ्ज आलिङ्गिता परं

१ ए °लिमर्म°.

१ ए ई °ह पु°. २ ए प्रोर्णवि°. ३ ए °ययण°. ४ डी दिद्दीपे. ५ ए °ता। इ°. ६ ई शिदिति. ७ ए शिङ्द्वित् ॥. ८ ए अत्रध्यस°. बी अत्रन्धस°. ९ ए दध्वसो ॥.

सौभाग्यदर्पात्कापि वरे चित्तस्योनिवेशनाद्विकारैः मरागप्रेक्षितादिभिः स्मरविकृतिभिर्न सस्वजे । अत एव स्मराख्यायां कामप्रधानवार्तायां नष्ट्वा याति । तथालिनर्मणि सखीनां हास्यकर्मणि नंष्ट्वास्ते ॥

भक्त्वापाङ्गं भ्रुवं भङ्क्त्वा प्रेक्षते पुरुषं न सा ।
आस्ते कौमारमर्तित्वा ऋतित्वापि हि यौवनम् ॥ १०३ ॥

१०३. सा मयणल्ला पुरुषमस्वानुरूपत्वान्न प्रेक्षते । किं कृत्वा । अपाङ्गमक्षिप्रान्तं भक्त्वा कुटिलीकृत्य भ्रुवं भङ्क्त्वा च । अतश्च सास्ते । किं कृत्वा । यौवनमृतित्वापि प्राप्यापि हि स्फुटं कौमारं बाल्यमर्तित्वेव । इवो लुप्तोत्र ज्ञेयः ॥

अकर्शित्वाप्यमर्षित्वापीषून्किरति मन्मथे ।
तृषित्वास्यां कृशित्वाथ मृषित्वास्थुः स्फुटं न के ॥ १०४ ॥

१०४. के राजपुत्राः स्फुटं नास्थुः । किं कृत्वा । अस्यां तृषित्वा साभिलाषीभूयात एव कामार्तिरेकात्कृशित्वा कृशीभूयाथ मृषित्वा मन्मथेषूनेव क्षान्त्वा च । क्व सति । मन्मथे शरान्किरति क्षिपति । किं कृत्वा । अकर्शित्वाप्यतनूभूयापि बलिष्ठीभूयापीत्यर्थः । तथामर्षित्वापि । कुपित्वापीत्यर्थः । यद्यप्यतितरां स्मरः प्रहरति तथाप्यस्या अनिच्छुत्वादस्या अभिलाषुकाः सर्वेपि राजपुत्राः स्मरशरान्क्षान्त्वैवास्थुः । न कोपि प्रतीकारोजनीत्यर्थः ॥

१ ए भक्तापा°. २ ए °व भुङ्क्त्वा. ३ ए न कः

१ ए °पाकापि. २ सी °स्याविवे°. ३ ए °कारा स°. ४ ए °दिभि स्मरे° ५ ए भ्रुक्ता च. ६ ए ई °त्वा कु°. ७ ए °प्यत°. ८ ए °वास्थः । न.

वञ्चित्वालं वयो जन्मालं वचित्वेतिवादिनीः ।
वृणोम्यननुरूपं किं तर्षित्वेत्याह सा सखीः ॥ १०५ ॥

१०५. सा मयणल्ला सखीराह । कथमित्याह । हे सख्यस्तर्षित्वा तृष्णां विधायाननुरूपं स्वस्यामदृशं वरं किं वृणोमीति । यतः कीदृशीर्वयो यौवनं वञ्चित्वा । अन्तर्भूतणिगर्थो गमनार्थोत्र वचिः । ततो गमयित्वालं वरानङ्गीकरणाद्वयोतिक्रमेण सृतामित्यर्थः । एवं जन्म वचित्वालमित्येवंवादिनीः ॥

रत्नग्रंथित्वा ग्रन्थित्वाञ्जगुंफित्वोत्पलैः स्रजः ।
पुष्पैः सान्यैश्च गुम्फित्वार्चत्युमां मुवरेच्छया ॥ १०६ ॥

१०६. स्पष्टः । किं त्वन्यैश्च पुष्पैर्मालत्यादिभिः ॥

लुचित्वा श्मश्रु लुञ्चित्वा शिरो ये तेपिरे तपः ।
ते लेखित्वा मुदित्वास्या भाविनं सत्पतिं जगुः ॥ १०७ ॥

१०७. श्मश्रु दंष्ट्रिकास्थान्केशाल्लुंचित्वापनीय शिरः शिरःस्थान्केशाल्लुंञ्चित्वा ये बौद्धादिमुनयस्तपो व्रतं तेपिरे चक्रुस्तेस्या मयणल्लाया भाविनं भविष्यन्तं सत्पतिं शोभनं वरं जगुः । किं कृत्वा ।

१ ए °लं वचि°. २ बी °ञ्जगुफि°. ३ ए स्रजा । पुष्फरन्यै°. ४ बी. पुष्फैः सा°. ५ ए °र्चतोमां. ६ बी °त्वा स्मश्रु.

१ ए °वचित्वा. २ सी ई वचित्वा. ३ ए बी °त्वातभू°. ४ बी ई °त्र वचिः ५ ए बी °लं वरा°. ६ बी °योरति°. ७ बी °त्यर्थ । ए°. ८ ए बी पुष्फैमा°. सी डी पुष्फैमा°. ९ ए °काम्वान्के°. १० ई °रःस्था°. ११ सी डी °कुस्तस्या. १२ ए °ष्यंति स°. १३ सी °त्वा । लिखत्वा. डी °त्वा । लिखि°

लेखित्वा लग्नादि गणयित्वा तथा मुदित्वा भाव्युत्कृष्टपतिलाभदर्शनेन हर्षं गत्वा । शोभनोस्याः पतिर्भविष्यतीति ज्ञानबलेनोचुरित्यर्थः ॥

मोदित्वा त्वां लिखित्वागादन्येद्युः कोपि चित्रकृत् ।
तस्यां मुमुदिषोः सख्या मुमोदिष्वा स दर्शितः ॥ १०८ ॥

१०८. अन्येद्युः कोप्यज्ञातैश्चित्रकृच्चन्द्रपुर आगात् । किं कृत्वा । मोदित्वा त्वद्रूपातिशयेन हर्षित्वात एव त्वां चित्रपटे लिखित्वा ततो मुमुदिषोरनुरूपवरदर्शनाज्जिहर्षिषोर्हर्षिष्यमाण्या इत्यर्थः । तस्यां मयणछायाः सख्या स चित्रकृत्तस्या एव दर्शितः ॥

तस्यालिलिखिषच्छ्लाघ्ये पश्यन्तीं त्वां पटे तदा ।
दिदेविषुं तां कामोस्त्रैर्देवित्वा व्यलिलेखिषत् ॥ १०९ ॥

१०९. कामो देवित्वा क्रीडित्वा वल्गित्वेत्यर्थः । अस्त्रैः शरैस्तां कन्यां व्यलिलेखिषद्विदारयितुमैच्छत् । यत आलिलिखिषद्भिरालेखितुमिच्छद्भिश्चित्रकरैः श्लाघ्ये प्रशस्ये तस्य चित्रकृतः पटे त्वां तदा पश्यन्तीं तथा दिदेविषुं त्वया सह रिरंसुम् ॥

सस्वजे सस्वञ्जे । अत्र "स्वञ्जेर्न वा" [२२] इति परोक्षा वा किद्वत् ॥

भक्त्वा भङ्क्त्वा । नष्ट्वा नंष्ट्वा । अत्र "जनशोनि°" [२३] इत्यादिना क्त्वा किद्वद्वा ॥

१ ए °स्या मोमुदि°. २ ए °ल्लिपिष°. ३ बी सी डी ई श्यन्ती त्वां. ४ ए °टेस्तदा.

१ ए °तिभवि°. २ ई °तच्चित्र°. ३ डी °त्वा तद्र°. ४ ए °ष्यता इ°. ५ ए °स्या मिय°. ६ ए °खिखिष°. ७ सी डी °ल्पितु°. ८ सी डी °था देदिवि°. ९ ए °क्षाद्वा वा.

ऋतित्वा अर्तित्वा। तृषित्वा तर्षित्वा। मृषित्वा अमर्षित्वा। कृशित्वा अकर्शित्वा। वचित्वा वञ्चित्वा। लुचित्वा लुञ्चित्वा। ग्रथित्वा ग्रन्थित्वा। गुफित्वा गुम्फित्वा। इत्यत्र "ऋतृष°" [२४] इत्यादिना क्त्वा किद्वद्वा।

मुदित्वा मोदित्वा। मुमुदिषोः मुमोदिषोः। लिखित्वा लेखित्वा। आलिलिखिषत व्यलिलेखिषत। इत्यत्र "वौ°" [२५] इत्यादिना क्त्वासनौ वा किद्वत्॥ अय्व इति किम्। देवित्वा। दिदेविषुम्॥

त्वयास्या द्युतितं चित्ते द्योतितं च मनोभुवा।
सद्यः प्रद्युतिता भावाः प्रद्योतितसखीजनाः॥ ११० ॥

११०. अस्याः कन्यायाश्चित्ते त्वया द्युतितं विलसितं मनोभुवा चास्याश्चित्ते द्योतितम्। सद्यो मनोभूद्योतनानन्तरमेव भावाः स्तम्भस्वेदादयः प्रद्युतिता उल्लसितुमारब्धाः। किंभूताः। प्रद्योतितो हर्षोत्कर्षाद्विलसितुमारब्धः सखीजनो येषु ते॥

यया न रुदितं बाल्ये क्रीडयापि न रोदितम्।
सा स्मरार्ता प्ररुदिता प्ररोदितसखीजना॥ १११ ॥

१११. स्पष्टः प्रायः। किंतु क्रीडया प्रीतिकौतुकेनापि। प्ररुदिता रोदितुमारब्धा॥

द्युतितम् द्योतितम्। प्रद्युतिताः प्रद्योतित। रुदितम् रोदितम्। प्ररुदिता प्ररोदित। इत्यत्र "उति°" [२६] इत्यादिना क्तौ वा किद्वत्॥

१ सी डी यथा न.

१ डी मृषित्वा. २ ए मुमोदि°. ३ सी डी लेखित्वा. ४ ए °लिप°. ५ ए °सनो वा. ६ ए अय्व इ°. ७ ए °ततान°. ८ डी °म्भखेदा°. ९ °म्भश्वेदा°. ९ ए हर्षोत्क°. १० ए °रब्ध स°. ११ बी °जना ये°. १२ ए सी प्राय। किं. १३ ए °यापीति°. १४ ए °नितः। रु°. १५ बी सी डी °तिता। रु.° ए °त। प्र°. १६ बी सी डी °दि त प्र°. १७ सी ना क्तो वा.

शयिता पविते तल्पे स्मरबाणप्रधर्षिता ।
सा पृच्छति तवोदन्तमुदग्डयितपक्षिणः ॥ ११२ ॥

११२. सा कन्योदीच्या उत्तरस्या दिशो डयिता उड्डीना ये पक्षिणस्तान्कर्णपार्श्वादमी आगता इति तवोदन्तं कुशलवार्तां पृच्छति । किंभूता सती । स्मरबाणप्रधर्षिता कामास्त्रैः परिभूतात एव पविते पवित्रे तल्पे शयिता ॥

प्रस्वेदिताप्रमेदिता धैर्याप्रक्ष्वेदितापि सा ।
न मर्षितवती तापं सेवित्वाप्यम्बुजस्थितिम् ॥ ११३ ॥

११३. सा कन्याम्बुजस्थितिं कमलपत्रशय्यायामवस्थानं सेवित्वापि तापं स्मरोद्रेकोत्थं संतापं न मर्षितवती न क्षान्तवती पद्मसेवया तस्यात्यन्तं समुल्लासात् । कीदृशी । प्रस्वेदिता सात्विकविकारोज्जृम्भणात्स्वेदं क्षरितुमारब्धा । तथा धैर्याप्रक्ष्वेदितापि धैर्येणामुक्ताप्यप्रमेदितामेदुरा कृशेत्यर्थः ॥

डयित । शयिता । पविते । प्रधर्षिता । अप्रक्ष्वेदिता । प्रस्वेदिता । अप्रमेदिता । इत्यत्र "न डीङ्०" [२७] इत्यादिना क्तौ न किद्वत् ॥

मर्षितवती । इत्यत्र "मृषः क्षान्तौ" [२८] इति न किद्वत् ॥

सेवित्वा । इत्यत्र "क्त्वा" [२९] इति किद्वन्न ॥

१ डी ताप से°.

१ ई उड्डीना. २ ई °तात. ३ ए पठिते. ४ सी °वित्रे. ५ ए ई °पं न. ६ बी सी डी पद्मासे°. ७ ए °स्वेवि°. ८ सी डी °यितः । श°. ९ ए °ना क्तो न. १० ए न किं वृत्. ११ ए °ति विकि°.

स्यन्त्वा स्वेदमियं स्कन्त्वा मा गादिति सखीजनैः ।
अनास्कन्द्याभ्युपस्कद्य पयः प्रस्यन्द्य धार्यते ॥ ११४ ॥

११४. इयं कन्या स्वेदं प्रस्वेदं स्यन्त्वा क्षरित्वात एव स्कन्त्वा परिशुष्य मा गान्मा विने(न ?)शदित्यर्थः । इति हेतोः सखीजनैर्धार्यते जीव्यत इत्यर्थः । किं कृत्वा । अनास्कन्द्यापरिशुष्यं[1] । स्नेहातिरेकादार्द्रहृदयीभूयेत्यर्थः[3] । अत एवाभ्युपस्कद्याभिमुख्येन समीपे[5] गत्वा तथा पयो जलं प्रस्यन्द्य क्षरित्वा ॥

प्रस्यद्यालं पयः सख्यो गुधित्वालं जलार्द्रया ।
क्षुधित्वालं क्लिशित्वालमुदित्वा सेति मूर्छति ॥ ११५ ॥

११५. सा कन्या मूर्छति । किं कृत्वा । उदित्वोक्त्वा[6] । किमित्याह । हे सख्यः पयः प्रस्यद्यालं जलश्रा(स्रा)वणेन[7] सृतं तथा जलार्द्रया क्लिन्नवाससा करणेन गुधित्वालं परिवेष्टनेन सृतं तथा क्षुधित्वा बुभुक्षयालं तथा क्लिशित्वा युष्मत्क्लेशेनालमिति ॥

हृद्युषित्वा कुषित्वास्त्रं मृदित्वामूं[1] क गच्छसि ।
अमृडित्वा[2] रुदित्वेति सख्योस्याश्चुक्रुशुः स्मरम् ॥ ११६ ॥

११६. अमृडित्वा[8]सुखं कृत्वा रुदित्वा चास्याः सख्यः स्मरं चुक्रुशुः[9] । कथमित्याह[10] । रे स्मर[11] क त्वं गच्छसि । किं कृत्वा हृद्यस्या-

---

१ डी °त्वामुं क. २ ए °त्वा ऋचित्वेति संख्यास्या°.

---

१ डी °ष्य । श्रेह्रा°. २ बी °दाद्रह°. ३ ए °त्यर्थात. ४ डी °मुखेन. ५ बी °पेन ग°. ६ ई °दित्वे । कि°. ७ ए °णे निस्र°. ८ ए असृत्वित्वा°. ९ डी °क्रुशुः । क°. १० ई °ह । स्म°. ११ ए र कथं ग°. सी डी °र कथं ग°.

श्चित्त उषित्वा स्थित्वा तथास्त्रं शरं कुपित्वा पूर्वं न्यस्तं निष्कुष्यात[1] एवांमूं[2] मृदित्वा पीडयित्वेति ॥

मुषित्वेव मुमुषिषुः पृष्ट्वेव च पिपृच्छिषुः।
विदित्वेव विविदिषुर्गृहीत्वेव[1] जिघृक्षकः ॥ ११७ ॥
सुप्त्वेव च सुषुप्सुस्तामहं[2] रुरुदिषुर्मुहुः।
आलिख्यास्मिन्निहानीयाभूवं कृतचिकीर्षितः[3] ॥ ११८ ॥

११७–११८. अहं कृतचिकीर्षितः कृतकृत्योभूवम्। किं कृत्वा मुहुर्वारंवारं रुरुदिषुस्तद्दुःखेन[4] रोदितुमिच्छुः संस्तां कन्यामस्मिन्पट आलिख्य तथेह त्वत्समीप आनीय यथा मुमुषिषुश्चोरयितुमिच्छुर्मुषित्वा मोष्यं चोरयित्वा यथा पिपृच्छिषुः[5] प्रच्छनीयं पृष्ट्वा यथा विविदिषुर्जिज्ञासुर्विदित्वा[6] ज्ञेयं ज्ञात्वा यथा जिघृक्षको ग्राह्यं गृहीत्वा यथा सुषुप्सुः सुप्त्वा कृतचिकीर्षितः स्यात् ॥

असंशिशयिषुस्त्वेशं[4] सा बुभुत्सुरबुद्ध च।
तां भुत्सीष्ठाः कृषीष्ठास्तद्वेदभ्यां[5] यन्नलोकृत ॥ ११९ ॥

११९. सा कन्यासंशिशयिषुः[7] संशयितुमनिच्छुर्निःसंशया सती[8] त्वामेवेशं प्रियं बुभुत्सुर्ज्ञातुमिच्छुरभूदबुद्ध[9] च ज्ञातवती च मम भर्ता

१ प °पुगृही°. २ ई पुत्सुस्ता°. ३ प सी °षित ॥ अ°. ४ प °शं ता बु°. ५ प °कृतः ॥ सा.

१ प निकृष्या°. ई निःकृष्या°. २ प °वासूं मृ°. डी वामुं मृ°. ३ प कृXXXष्यं. ४ बी सी °दुखे°. ५ प °च्छिपु पृच्छनीयं. सी °च्छिपु प्र°. ६ प विवदिषुजिज्ञा°. ७ प °न्याशंसिश°. ८ ई °ती त्वात्वा°. ९ प °भूतबुद्ध.

कर्ण एवेति मनसा प्रतिज्ञातुमैच्छत्प्रतिज्ञातवती चेत्यर्थः । अतश्च तां कन्यां त्वं भुत्सीष्ठा[2] उक्तस्वरूपामवगम्याः । तथा नलो नैषधि[3]र्येद्वैदर्भ्यां दमयन्त्यां विषयेकृत तत्त्वं तस्यां कृषीष्ठा[4]स्तां प्राणेश्वरीं[5] क्रिया इत्यर्थः ॥

स्कन्त्वा । स्यन्त्वा[6] । अनास्कन्द्य । प्रस्यन्द्य[7] । इत्यत्र "स्कन्दस्यन्दः" [३०] इति क्त्वा किद्वन्न[8] ॥ केचित्[9] उपस्कद्य[10] प्रस्यद्य इति यपः कित्त्वमिच्छन्ति । तन्मतसंग्रहार्थं क्त्वेति द्वितकारो निर्देशस्तकारादिः[11] क्त्वेत्यर्थः ॥

क्षुधित्वा । क्लिशित्वा । कुषित्वा । गुधित्वा । अमृडित्वा । मृदित्वा । उं[12]दित्वा । उषित्वा । इत्यत्र "क्षुध[13]°" [३१] इत्यादिना[14] क्त्वा किद्वत् ॥

रुदित्वा । रुरुदिषुः[15] । विदित्वा । विविदिषुः[16] । मुषित्वा । मुमुषिषुः । गृहीत्वा । जिघृक्षकः । सुप्त्वा । सुषुप्सुः । पृष्ट्वा । पिपृच्छिषुः । अत्र "रुदविद°" [३२] इत्यादिना सन् क्त्वा च किद्वत् ॥

चिकीर्षितः । अत्र "नामिनोनिट्[17]" [३३] इति सन् किद्वत् ॥ अनिडिति[18] किम् । अशंशि[19]शयि[20]षुः[21] ॥

बुभुत्सुः । अत्र "उपान्त्ये" [३४] इति सन् किद्वत् ॥

अबुद्ध[22] । भुत्सीष्ठाः । अत्र "सिज्°" [३५] इत्यादिना किद्वत् ॥

अकृत[23] । कृषीष्ठाः । अत्र "ऋवर्णात्" [३६] इति किद्वत् ॥

१ ए कन्या त्वां भु°. २ ए °त्सीपुष्फक्त°. ३ ए °धियद्वै°. ४ ए °धांम्वास्तां. ५ ए र्शा° श्वरीं क्रि°. ६ ए °न्त्वा । स्यन्त्वा । अ°. ७ ए प्रस्कन्ध. ८ ए °द्वत्त ॥ के. ९ ए बी सी डी °त् अप°. १० डी °स्कद्या प्र°. ११ ए °रादिक्त्वं°. १२ डी उषि°. १३ बी सी क्षुध् इ°. ई क्षुधिधेत्या°. १४ डी नाXXXसन्. १५ ए °दिपु वि°. १६ ए °पुः । नुषि°. १७ ए °नो अनडिति. १८ ए अनडि°. १९ ए अशंशि°. २० सी शयपु । बु°. २१ ए °यिषु । पुभु°. २२ ए °बुद्धः । भु°. २३ ए °कृतः । कृ°.

यथा समगतोमेशे श्रीः कृष्णे समगंस्त च ।
संगंसीष्ट त्वयि तथा सा शुभैः संगसीष्ट च ॥ १२० ॥

१२०. यथेशे शंभावुमा गौरी समगत संबद्धाभूद्यथा कृष्णे श्रीः समगंस्त च तथा सा कन्या त्वयि संगंसीष्ट संबद्धीभूयात्तथा शुभैः पुत्रलाभादिभिः संगसीष्ट च ॥

समगत समगंस्त । संगसीष्ट संगंसीष्ट । इत्यत्र "गमो वा [३७] इति वा किद्वत् ॥

मा ते व्याहत विघ्नोत्रेत्युक्त्वा चित्रकृति स्थिते ।
रागमन्तर्गतं राज्ञो रोमोद्गम उदायत ॥ १२१ ॥

१२१. राज्ञः कर्णस्य रोमोद्गमो रोमाञ्चोन्तर्गतं रागमुदायतासूचयत् । दोषाविष्करणं चात्र धैर्यगाम्भीर्यगुणान्वितस्य राज्ञो रागदोषस्य प्रकटनात् । क सति । चित्रकृति स्थिते । किंकृत्वा । उक्त्वा । किमित्याह । हे राजन्नत्र मयणल्लाविषये ते तव विघ्नोन्तरायो मा व्याहत मा व्याघातं कार्षीदिति ॥

व्याहत । इत्यत्र "हनः सिच्" [३८] इति सिच् किद्वत् ॥

उदायत । इत्यत्र "यमः सूचने" [३९] इति सिच् किद्वत् ॥

उपायत नृपो रत्नान्युपायंस्त च काञ्चनम् ।
अदितास्मै गृहीत्वासौ प्रास्थिताधित संमदम् ॥ १२२ ॥

१ डी °म् । आदि°.

१ बी °मो विति. २ ए कृत्वेकत्वा. सी डी कृत्वेत्युक्त्वा. ३ बी सी डी ई °ये त.° ४ ई सिच कि°. ५ बी सी डी °त । अत्र.

१२२. नृपः कर्णो रत्नानि जयकेशिना प्राभृतार्थं[1] प्रेषितांश्चित्रकरे[2]-णोपढौकितान्मणीनुपायंत[3] स्वीकृतवा[4]न्काञ्चनमुपायंस्त च। ततो नृपो रत्नानि काञ्चनं च गृहीत्वास्मै चित्रकृते[5]ऽदित ददौ। ततश्चासौ चित्रकृत्प्रास्थित प्राचालीत्। तथा संमदं कार्यसिद्धिजं हर्षमधित दधार॥

उपायंत[6] उपायंस्त। इत्यत्र "वा स्वीकृतौ" [४०] इति सिच्[7] किद्वद्वा॥

प्रास्थित[8]। अदित। अधित। इत्यत्र "इश्च स्थादः" [४१] इति सिच् किद्वत्संनियोग इकारश्च॥

अत्रान्तरे च पुष्पेषुः[1] पुङ्खान्मार्ष्टा मृजन्निषून्।
मार्जन्धनुरधिज्यत्वमनै[2]षीन्न्यधुवीदपि॥ १२३॥

१२३. अत्रान्तरे च पुष्पेषुः स्मरो धनुरधिज्यत्वमनैषीदारोपयदित्यर्थः। न्यधुवीदपि ज्याकर्षेणाकम्पयच्च। कीदृक्सन्पुङ्खा[9]न् शरपत्राणि मार्ष्टा करस्पर्शेन समारचनशीलस्तथेषून्मृजन्नुत्ते[10]जनेन निर्मलीकुर्वन्। तथा धनुर्मा[11]र्जंश्चिरमव्यापारणादुद्भूतस्य रजोमलादिसङ्गस्यापनयनेन निर्मलयन्॥

मार्ष्टा। इत्यत्र "मृजोस्य वृद्धिः"[12] [४२] इति[13] वृद्धिः॥

मार्जन् मृजन्। इत्यत्र "ऋतः स्वरे[14] वा" [४३] इति ऋतो वा वृद्धिः॥

---

१ प °ष्पेपुन्मुंखान्मार्ष्टा सृज°. सी °ष्पेपुपुपान्मा°. २ प °षीन्नधु°.

---

१ प °र्थं प्रकर्षितां. २ प °रेणौप°. ३ प °य स्वी°. ४ प °वान्काञ्चमुपायं च मु°. ५ प °ते द°. डी °त आदि°. ६ सी °पायं°. ७ ई सिच कि°. ८ डी °त। आदि°. ९ प °न्पुखाञ्. १० सी डी °जनुत्ते°. ११ प °मांजश्चि°. १२ सी डी °द्धिः। मा°. १३ बी इत्यस्य वृ°. १४ प स्वरो वा.

अनैषीत्। इत्यत्र "सिचि[1]" [४४] इत्यादिना वृद्धिः[2]। अङ्गितीति किम् ॥ न्यधुवीत् ॥

न काप्यराङ्क्षीन्नादेवीन्नारौत्सीदिङ्गितं[1] नृपः ।
प्रौर्णावीन्नाकृतिं[2] नौत्क्यं प्रौर्णवीत्सोकणीत्परम् ॥ १२४ ॥

१२४. कामेन धनुषि कम्पिते स नृपः कापि शयनासनभोजनादौ नाराङ्क्षीन्नारज्यन्नादेवीज्जलक्रीडादि[3]क्रीडाभिर्नाक्रीडन्[4]। तथेङ्गितं मयणल्लारूपलेखनादि[5]स्मरविकारचेष्टितं नारौत्सीत्स्मरोद्रेकेण धैर्यभ्रंशान्न संवृतवान्। तथाकृतिं[6] स्तम्भादिविकारान्वितमाकारं न प्रौर्णावीन्न संवृतवांस्तथौत्क्यं[7] मयणल्लाविषयोत्कण्ठां[8] न प्रौर्णवीत्परं केवलमकणीत्कामोत्थसंतापातिरेकेणार्तस्वरं व्यलपन्[9] ॥

सोकाणीद्यावदज्वालीदत्सारीच्च तदुत्सुकः[3] ।
आव्राजीदित्यवादीच्च तावन्ना जयकेशिनः ॥ १२५ ॥

१२५. स कर्णस्तदुत्सुको[10] मयणल्लायामुत्कण्ठितः[11] सन्यावदज्वालीत्समताप्सीदत[12] एवाकाणीदार्तस्वरं[13] व्यलपदत्सारीच्च[14] शून्यचित्ततयालीकगतिं[15] च चक्रे[16] तावज्जयकेशिनो ना पुरुष आव्राजीदाययाविति वक्ष्यमाणमवादीच्च ॥

---

१ **ए सी** °दिगितं. २ **ए** °कृतं नौक्त्यं प्रौ°. ३ **ए** °त्सुका । आ°. **सी** °त्सुक । आ°.

---

१ **ए** सिषि इ°. २ **ए** वृद्धौ ॥ अ°. ३ **ई** °दिभि°. ४ **ए** °भिर्न्नात्तथे°. ५ **ए** °नाविस°. ६ **ए सी** °कृतिस्त°. ७ **ए** °थौत्त्यं म°. **बी** °थोक्ष्यं म°. ८ **ए** °त्कण्ठा न. ९ **ई** °पन् ॥ सो°. १० **बी** °दुत्सको. ११ **ए** °ण्ठितासत्यावदद्धतली°. १२ **डी** °त्समन्तादता°. १३ **बी सी डी** °दार्त्ते व्य°. १४ **ए सी** °रीश्च शू°. १५ **सी डी** °कमतिं. १६ **बी सी डी** °तिं चक्रे च ता°.

अरौत्सीत् । इत्यत्र "व्यञ्जनानामनिटि[1]" [४५] इति वृद्धिः ॥ बहुवचनं जात्यर्थं[2] तेनानेकव्यञ्जनव्यवधानेपि स्यात् । अराङ्क्षीत्[3] ॥ अनिटीति[4] किम् । अदेवीत् ॥

प्रौर्णावीन प्रौर्णवीत् । इत्यत्र "वोर्णुगः सेटि" [४६] इति वृद्धिर्वा ॥

अकाणीन् अकणीत् । इत्यत्र "व्यञ्जनादे[5]०" [४७] इत्यादिना वा वृद्धिः ॥

अवादीत् । आव्राजीत् । अज्वालीत् । अत्सारीन । इत्यत्र "वद[6]०" [४८] इत्यादिना[7] वृद्धिः ॥

मा[1] शसीन्मा ग्रहीत्कश्चिन्मा श्वयीदिति तर्जता ।

भर्त्रा नः प्रेषिता रत्नोपदास्ति श्रीरिव स्वयम् ॥ १२६ ॥

१२६[8]. नोस्माकं भर्त्रा[9][10] स्वामिना जयकेशिना रत्नोपदा[11] माणिक्यढौकनं[12] जात्यत्वेना[13]तिसश्रीकत्वात्स्वयं मूर्ता श्रीरिव लक्ष्मीदेवीव प्रेपितास्ति । किंभूतेन । तर्जता । कथमित्याह । युष्मासु मध्ये रत्नोपदां मा[14] कश्चिच्छसी[15]द्विनीनर्श[16]त्तथा कश्चिन्मा ग्रहीत्तथा मा श्वयीद्युष्मत्पार्श्वादेषोपदा मा यासीदिति । अत्यादरेणैषा रक्ष्ये[17]त्या[18]दिशतेत्यर्थः ॥

यत्सदाजागरीः शत्रूनक्षणीः[2] साम चास्यमीः ।

नाहयीर्नाकस्वी[3]स्त्वन्नः स्वामीभान्प्राहिणोच्च ते ॥ १२७ ॥

१ ए ना. २ बी °क्षर्णा मा°. ३ ई °कस्वीस्तन्यः स्वा°.

---

१ ए °निदि इ°. २ ए °त्यर्थि नं°. ३ ए अवांक्षीन्. ४ डी °निटाविति. ५ ए °देरिना. ६ सी वदेरित्या°. ७ सी डी °ना वा वृ°. ८ बी सी ई ॥ भर्त्रा ज°. ९ ए भर्त्ता स्वा°. १० डी °त्रां ज°. ११ ए° पहा मा°. १२ ए °कन जा°. १३ ई जाजात्य°. १४ ई मा मा क°. १५ सी डी ई °सीन्नर्नी°. १६ ए °शस्तथा. १७ ए रक्षंत्या°. १८ सी °दिनाश°· डी दिना शपते°.

१२७. तत्तस्माद्धेतोर्नोस्माकं स्वामी जयकेशी ते त्वदर्थमिभान्प्राहिणोच्च। चः पूर्ववाक्यापेक्षया समुच्चये। यच्चस्माद्धेतोस्त्वं मदाजागरीरुद्यम्यभूस्तथा शत्रूनक्षणीर्गर्हिमीस्तथा माम मधुरवाक्यमर्स्यमीश्चावोचश्च। प्रियवाक्यैः सर्वमप्यसुस्वय इत्यर्थः। तथा नाहर्यार्विपद्यपि नाक्रमीर्न व्यथद इत्यर्थः। तथा नाकर्वीः संपद्यपि नाहमीर्नाह्वष्य इत्यर्थः। त्वं महाराजो महापुरुषश्चेति तात्पर्यार्थः॥

श्रान्तांस्तानमवीन्नागान्भाजयन्द्रून्परिच्छदः।

अभाजि तु मया देवोनायि चात्मा पवित्रताम्॥ १२८॥

१२८. परिच्छदो मम परिवारः श्रान्तान्बहुमार्गातिक्रमेण खिन्नांस्ताञ्जयकेशिप्रेपितान्नागान् गजानमवीद्वृक्षेष्ववबध्नात्। कीदृक्सन्। द्रून्वृक्षान्भाजयन्नागैः सेवयन्। मया तु मया पुनर्देवः कर्णोभाजि सेवितो देवसेवयात्मा पवित्रतामनायि नीतश्च। देवसेवया ह्यात्मा पवित्रः स्यात्॥

तं न नापीपटद्राजापपटत्किं तु तुष्टिमान्।

मा नागौ जहलन्मा चकलन गच्छेति चादिशत्॥१२९॥

१२९. राजा कर्णस्तुष्टिमांस्तुष्टः संस्तं जयकेशिनरं न नापीपटन्न

१ ए °यन्दृन्प°. २ सी °जि त म°. ३ ए °नाय चा°. ४ सी डी °गा हजल°. ५ डी गच्छति.

१ बी सी डी °क्यार्थापे°. २ ए °तोरत्व म°. ३ ए °नक्षीणर°. ४ डी °स्यमी. प्रावो°. ५ ए °वोचः प्रि°. ६ ई °थः। स्तथा. ७ ए °कपीः म°. ८ ई °पि माह°. ९ ए °र्नाह्वष्य. १० ए °र्थ.। त्व म°. ११ ए °कमन्द्रूनृक्षा°. १२ डी °या पु°. १३ ए कर्णोभा°. १४ ई °र्णतुष्टि°. १५ ए °रतष्टिमास्तष्टः स°. १६ ए °टन्न न.

न पटुं दक्षमाख्यत्किं त्वपपटत्पटुमाख्यत् । तथा तेमादिशश्च । कथमित्याह । नागा[3] गजा मा जहलन हलिं महद्धलं[4] मा ग्रहीषुस्ततो मा चकलन् मा मिथः कलिं ग्रहीषुस्तस्माद्गच्छ[5] नागान्तिके[6] याहीति[7] ॥

मा श्वयीत् । अजागरीः । मा शमीत्[8] । अक्षणीः[9] । मा ग्रहीत । अस्यमीः । अहयीः । अकखीः । इत्यत्र "न श्वि°" [४९] इत्यादिना वृद्धिर्न ॥ वकारान्तस्यापि प्रतिषेधमिच्छत्यन्यः । अमवीत ॥

अभाजि । भाजयन् । इत्यत्र "ञ्णिति" [५०] इति वृद्धिः ॥

अनायि । इत्यत्र "नामिनः°" [५१] इत्यादिना वृद्धिः ॥ कलिहलिवर्जे[10]नाम्नोपि[11] । तेन अपीपटत् इत्यत्र वृद्धावन्त्य[12]स्वरादिलोपे चासमानलोपित्वात्सन्वद्भावः सिद्धः ॥ कलिहलिवर्जनं किम् । मा चकलन्[13] । मा जहलन् ॥ अन्ये तु नाम्नो वृद्धिमनिर्च्छन्तो[14]न्त्यस्वरस्योकारस्यैव णिचि लोपमिच्छन्तः समानलोपित्वात्सन्वद्भावप्रतिषेधेपपटदित्याहुः ॥

अजागारि यथा मार्गे जजागार तथा स ना[1] ।
शतं दायीव दायार्थे यावन्नादाय्युपायनम्[2] ॥ १३० ॥

१३०. यावदुपायनं रत्नादिढौकनं तेन नादायि कर्णाय[15] न दत्तं तावत्तेन यथा मार्गेजागार्युपायनरक्षार्थमुद्यतं तथा तत्रावासेपि[16] स ना जयकेशिनगे जजागार । यथा शतं द्रम्मादिशतं दायी दास्यन्नधमर्णो दायार्थे दानं दायो योर्थः कार्यं तस्मिन् शत[17]दानविषये जागर्ति ॥

---

१ ए तवा स. २ ए सी डी °दाय्युपा°. बी °दायुपा°.

१ ए °माक्षत्किं त्वपट° २ ए तमदिशश्च । क°. ३ ई °गा राजा. ४ ई °हद्वलं. ५ ई °च्छन्नांगा°. ६ ए नागीन्ति°. ७ ई °ति ॥ नाश्व°. ८ बी शशीत्. ९ डी अक्षीणः । मा. १० डी °जंXX न किम. ११ ई °नाम्नो° १२ ए °वन्त्यिस्व° १३ ए °लन । मा. १४ ए °च्छत्योन्त्य°. १५ ए °य द°. १६ ए °पि ना. १७ डी शते दा°.

अजागारि । जजागार । इत्यत्र "जागुर्ञिणवि" [५२] इति वृद्धिः ॥

दाय । शतं दायी । अदायि । इत्यत्र "आत ऐः कृञ्जौ" [५३] इत्यैत् ॥

किं जातिप्रजना जन्ययोग्या ब(व?)ध्या बै(व?)धोद्यतैः ।
इतीभान्वीक्षितुं राजा छन्नोगात्सह वेत्रिणा ॥ १३१ ॥

१३१. इभान्वीक्षितुं वेत्रिणा सह राजा कर्णैश्छन्नो वेपपगात्रतादिना गुप्तः सन्नगात् । कस्मादित्याह । किममी इभा जातौ भद्रजातौ प्रजनो जन्म येषां ते जातिप्रजनाः किं जात्यास्तथा किं जन्ययोग्याः संग्रामार्हास्तथा किं ब(व?)धोद्यतैर्बन्धनोद्यतै राजभिर्ब(वे?)ध्या आलानयितुं योग्याः किं सुलक्षणा इत्यर्थः । इति हेतोः ॥

यत्राजनि तदावासो गजव्यूहः स चावधि ।
तत्रारामेविशद्राजा शमदोशमकात्मनाम् ॥ १३२ ॥

१३२. स्पष्टः । किं तु अवधि वृद्धः । अशमकात्मनां बलाद्यवलेपेनाशाम्यतां द्विपां शमदो दर्पभङ्गेनोपशमकः ॥

न जात्वशमि यैर्यैश्चाजौ क्रीडाकाम्यरामि च ।
जयश्रीकामुकोपश्यत्तान् गजान्सोविरामकः ॥ १३३ ॥

१३३. मदोत्कटत्वाद्यैर्गजैर्जातु कदाचिदपि नाशमि सदा कुपित-

१ ए बन्धोद्यतै । इतीभीन्वी°. २ ए °गा सह. ३ बी चावधि. ४ ए °शम यै°. ५ ए °रापि च. ६ ए °त्तानाजानवि°. ७ ई °रामिकः.

१ ए °जागरि. २ ए दायः । श°. ३ सी °यीन्य°. ४ ए. कृन्नाविल्यैत्. ५ ए °क्षित्री वे°. ६ ए °र्णेच्छन्नो. ७ बी °र्हाथा. ८ बी° तैव-ध° ९ ए °भिर्वृद्धा आ°. १० ए हतो ॥. ११ सी °वलोपे°. १२ ए दोदाभिङ्ग°. ई °दो दोभङ्ग°. १३ डी °भङ्गोप°. १४ ए जैजातु.

मेवेत्यर्थः । अत एव यैराजौ रणे क्रीडा रणकेलिरकामि च वाञ्छिता-रामि च युद्धेनाजौ क्रीडितं च रणे यैर्निर्व्यूढमित्यर्थः । तान् गजान्स कर्णोविरामको दर्शनादनिवर्तमानः सन्नपश्यन्नतो जयश्रीकामुकः ॥

व्यायामच्छेदकामेन तेनागामि लतागृहे ।
दृष्टा चागामुका श्रीर्नु काप्यायामकचक्षुषा ॥ १३४ ॥

१३४. तेन कर्णेन लतागृहेगामि गतं यतो व्यायामच्छेदकामेन खेदापनोदच्छुना । तत्र च कापि नायिका श्रीर्नु रूपाद्यतिशयेन लक्ष्मीरिवागामुकागच्छन्ती तेन दृष्टा च । कीदृशा सता । आयामके तद्दर्शनाद्विशेषेण दीर्घीभवन्ती चक्षुषी यस्य तेन ॥

नानाम्यायामि हर्षाम्भोवाम्याचामि सुधेव च ।
उन्नामिकाभ्रुवस्तस्य दृशा निर्नामपक्ष्मणा ॥ १३५ ॥

१३५. तस्य कर्णस्य दृशाक्ष्णा नानामि न नीचैर्भूतम् । कीदृशस्य सतः । उन्नामिके अद्भुतरूपदर्शनेन विस्मयत्वादुन्नमन्त्यावूर्ध्वीभवन्त्यौ भ्रुवौ यस्य तस्य । यतः किंभूतया । रूपदर्शनभङ्गभयान्निर्नामानि निर्नमनानि निर्मीलनरहितानीत्यर्थः । पक्ष्माणि यस्यास्तया । किं त्वायामि दीर्घीभूतम् । तथा हर्षाम्भ आनन्दाश्रु । अवामि च क्षरितं च यतः सुधेवाचामि सुखेदरूपावलोकनेनामृतमिवास्वादितम् ॥

---

१ बी °च्छेदिका°. २ ए लगागृ°. ३ ए डी दृष्ट्वा चा°.

---

१ ए °त्यर्थो ए°. २ सी डी रणे के°. ३ ई °रकका°. ४ ए कर्णावि°. ५ बी °के उद्भु°. ६ ए °त्वादुन्नमत्यावू°. ७ बी सी डी °स्तथा । किं. ८ ई किं त्वया°. ९ ई °भयान°. १० सी डी °श्रु । आचामि. ११ ए क्षरतं. १२ ए °खलरू°.

वामाचामं सुधाचामकानां मेने चमं नृपः ।
पुलकोद्रामको दृष्ट्या तस्या लावण्यचामतः ॥ १३६ ॥

१३६. पुलकोद्रामको रोमाञ्चोद्गमवान्[1]नृपः कर्णः सुधाचामकानाममृतास्वादकानां देवानां चमं चम्यते चमः कर्मणि घञ् । भक्ष्यं[2] सुधां वामाचामं प्रतिकूलजेमनं मेने । कस्मात् । तस्या[3] नायिकाया दृष्ट्या दर्शनेन कृत्वा लावण्यचामतः[4] सौन्दर्यास्वादाद्धेतोः । तल्लावण्यमास्वाद्यामृत[5]मवाहील्लि[6]यदित्यर्थः ॥

प्रजना[7]ः । जन्य । अजनि । बध । वध्याः । अवधि[8] । इत्यत्र "न जनवधः" [५४] इति न वृद्धिः[9] ॥

शम[10] । अशमक[11] । अशमि । इत्यत्र[12] "मोकमि°" [५५] इत्यादिना न वृद्धिः[13]॥ कम्यादिवर्जनं किम् । कामेन । कार्मुकः[14] । अकामि । व्यायाम[15] । आयामक । आयामि । आरामे । अविरामकः । अरामि । निर्नाम । उत्क्रामिका[16] । अनामि । आगामुका[17] । अगामि । वाम । उद्वामकः[18] । अवामि । आचामम् । आचामकानाम् । आचामि ॥ आचम[19] इति किम् । चमम् ॥ अन्ये तु सामान्येन निषेधमिच्छन्ति । चामतः[20] ॥

यस्यां विश्रामकं चक्षुर्मनो विश्रमकं च मे ।
सा श्रीविश्रमभूः केयं कामविश्राममन्दिरम् ॥ १३७ ॥

१ ए °नृपकः सु°. २ ए भक्ष्य सु°. ३ ई ततस्या. ४ ए °वण्याचा°. ५ ई °तमिवा°. ६ ए °लर्अद°. ७ ए सी °जना । ज°. ८ ई अबधि. ९ ए न द्धिः. १० डी शमः । अ°. ११ ए °मका । अ°. १२ ई °त्यत्रामो°. १३ ए °द्धिः ॥ काम्या°. १४ सी °मुक । अ°. १५ डी °म । अया°. १६ डी° मि । अ°. १७ बी °का । आगा°. १८ ए सी डी ई °मक । अ°. १९ सी डी आचाम. २० सी °मत ॥.

यया चित्रपटे व्यश्राम्यथ व्यश्रमि मे हृदि ।
दृक्पथं किल निनेय तां निनायोद्यमं स्मरम् ॥ १३८ ॥

संशयोपरमायास्या रौमि रोरोत्वसावपि ।
अस्याः सखी वा रोरोतु जुहोतु मम निर्णयम् ॥१३९ ॥

वितर्क्येति यथोर्णोति ज्योत्स्नामूर्णोति चन्दनम् ।
ऊर्णोनोति मधूर्णोनौत्यमृतं स तथाब्रवीत् ॥ १४० ॥

१३७–१४०. स कर्णस्तथा तेनाह्लादकत्वसंतापापहारकत्वशैत्यमाधुर्याद्यतिशयरूपेण प्रकारेणाब्रवीद्यथा यः प्रकारो ज्योत्स्नामूर्णोत्याच्छादयति । अधः करोतीत्यर्थः । तथा चन्दनमूर्णोति तथा मधूर्णोनोति । अत्यर्थमधः करोतीत्यर्थः । तथामृतमूर्णोनौति । किं कृत्वा । वितर्क्य । किमित्याह । यस्यामित्यादि । तत्राद्यः श्लोकः स्पष्टः । किं तु विश्रामकं सुखेन स्थास्नु । तथा यया नायिकया चित्रपटे व्यश्रामि स्थितमथ तथा यया मे हृदि व्यश्रम्युपितम । किलेति संभावने । संभावयामि तां नायिकामहं दृक्पथं दृग्गोचरं निनय प्रापयं तथा

१ ए °पटं व्यश्रम्यव्यश्र°. २ ए °र्नयना. ३ सी ई अस्या म°. ४ ई यथोर्णो°. ५ डी °थोर्णोति. ६ ई °तिज्योत्स्ना°. ७ डी °मूर्णोति. ८ सी डी °र्णोनोति. ९ सी डी °र्णोनोत्य°.

१ ए सी डी ई °मूर्णोत्या°. २ सी °रोति । तथा XXXमृ°. ३ ए सी डी ई °मूर्णोति. ४ डी °धूर्णोनोति. ५ ए बी डी °रोति । त°. ६ डी °र्णोनोति. ७ सी डी नायक°. ८ ए °कया चि°.

किल स्मरमहमुद्यममुत्साहं निनाय कृतास्मरणे परोक्षात्र। तथास्या नायिकायाः कर्मणो यः संशयो मत्कर्तृकः संदेहस्तस्योपरमाय निवृत्तय उक्तरीत्या संशय्यमाणा(ना)या अस्याः संदेहनिवृत्तय इत्यर्थः । रौम्यहं वदाम्यसावपि नायिकापि रोरोत्वित्यर्थं वदतु । अथ वास्याः सखी रोरोतु । ततो मम निर्णयं जुहोतु ददात्विति ॥

विश्रामं विश्रम । विश्रामकम् विश्रमकम् । व्यश्रामि । व्यश्रमि । इत्यत्र "विश्रमेर्वा" [५६] इति वा न वृद्धिः ॥

उद्यमम् । उपरमाय । इत्येतौ "उद्यमोपरमौ" [५७] इति निपात्यौ ॥

निनय निनाय । इत्यत्र "णिद्वान्त्यो णव्" [५८] इति णव्वा णित् ॥

रौमि । इत्यत्र "उत औः०" [५९] इत्यादिना-औः ॥ अद्वेरिति किम् । जुहोतु । रोरोतु ॥ केचिद्यङ्लुबन्तस्यापीच्छन्ति । रोरौतु ॥

ऊर्णौति ऊर्णोति । इत्यत्र "वोर्णोः" [६०] इति वा-औः ॥ अद्वेरित्येव । ऊर्णोनोति ॥ यङ्लुबन्तस्यापीच्छन्त्यन्ये । ऊर्णोनौति ॥

सुभ्रु त्वां मा स्म भीः प्रोर्णोत्स्वं प्रोर्णोर्मा स्म वा मयि ।
तृणेढि संशयं मूर्तिः कुलं चोच्चैर्ब्रवीति ते ॥ १४१ ॥

१ ए °भ्र मा स्म भीः प्रोर्णो न मा स्म वा प्रोर्णोम्स्व म°. २ ए सी मूर्ति कु°.

१ सी नायका°. २ ए °काया क°. ३ ए संमय्य°. ४ सी डी °शयमा°. ५ ए °श्रामः विश्रमः । व्यश्रागकं व्य°. ६ डी °य । एतौ. ७ डी निना°: ८ ए णदाणि°. सी डी णवो णि°. ९ ए °होतुः । रो°. १० डी ऊर्णोति ऊर्णौति. ११ ए °र्णां ऊ°. १२ ए °ति । अत्र°

१४१. हे सुभ्रु भीरैदृष्टपूर्वमदर्शनोत्था भीतिः कर्त्री त्वां मा स्म प्रोर्णोद्व्यापत् । मा स्म वा । वा समुच्चये । मा स्म च मयि विषये स्वमात्मानं त्वं प्रोर्णोराच्छादयेर्यथावस्थितमात्मानं प्रकटयेरित्यर्थः । यतस्ते मूर्तिराकृतिरेव संशयमद्भुतगुणत्वादिविषयं संदेहं तृणेढ्यपनयति तथोच्चैरुन्नतं कुलं वंशं ब्रवीति च । आकृतिरेव त्वदीयं स्वरूपं वंशं चोन्नतं वक्तीति तवात्मनोपह्नवो निरर्थक एव यत इत्यर्थः ॥

मा स्म प्रोर्णोत् । मा स्म प्रोर्णोः । अत्र "न दिस्योः" [६१] इति–और्न ॥

तृणेढि । इत्यत्र "तृहः श्नादीत्" [६२] इति–ईत् ॥

ब्रवीति । इत्यत्र "ब्रूतः परादिः" [६३] इति–ईत् ॥

बोभवीष्यप्सराः किं किं बोभोष्युद्यानदेवता ।
यत्ते वर्वर्ति लावण्यं दिव्यतां वावदीति तत् ॥ ४२ ॥

१४२. किं त्वमप्सरा देवी बोभवीष्यत्यर्थं भवसि किं वोद्यानदेवता बोभोषि । यस्माद्यत्ते लावण्यं वर्वर्त्यतिशयेन वर्तते तल्लावण्यं ते दिव्यतां स्वर्गभवत्वं वावदीति ॥

तौषि क्व वंशे काम्बेति स्तौषि तातेति रौषि च ।
किं तवीष्यत्र कं वा संस्तवीषि न रवीपि किम् ॥ १४३॥

१४३. क्व वंशे तौषि वर्तसे । क्व कस्यां स्त्रियामम्बेति मातेति

१ प °त्र किं वा सस्त°.

१ प °रदृष्ट°. २ बी °मदर्श°. सी °मदृर्श°. ३ प °दयोर्य°. सी °दयथा°. ४ प दिश्योः इ°. ५ प औनं ॥ तृ°. ६ प °यानम्बे°.

स्तौषि वर्णयसि । वदसीत्यर्थः । तथा कस्मिस्तातेति जनकेति रौषि च वक्षि च । तथात्रास्मिन्स्थाने किं किमिति तवीपि वर्तसे कं वा पुरुषं संस्तवीपि परिचितोपि कस्ते बन्धुरित्यर्थः । किं न रवीपि किमिति न किंचिद्ब्रवीपि ॥

बोभवीपि बोभोषि । तवीपि तौषि । रवीपि रौषि । संस्तवीपि स्तौषि । इत्यत्र "यङ्लुतु०" [६४] इत्यादिना वा-ईत् ॥ क्वचिन्न स्यात् । वर्वर्ति ॥ क्वचिन्नित्यम् । वावदीति ॥

कुतो वाव्यथितेवासीरकार्षीरश्रु यत्किल ।
किमासीद्दुर्लभः कोपि यस्तेकार्षीत्पदं हृदि ॥ १४४ ॥

१४४. कुतः कस्माद्धेतोस्त्वं वाव्यथितेवात्यर्थं दुःखितेवासीरभूः । ननु कथं मे व्यथा त्वया ज्ञायते तत्राह । अकार्षीरश्रु यत्किलेति । किलेति सत्ये । यदिति क्रियाविशेषणम् । यत्त्वमश्रु नेत्राम्ब्वकार्षीर्यत्त्वमरोदीरित्यर्थः । अथ व्यथाहेतुं स्वयमेवाशङ्क्य पृच्छति । यस्ते हृदि चित्ते रूपाद्यतिशयेन पदमवस्थितिमकार्षीत् स किं कोपि युवा दुर्लभ आसीत् ॥

अकार्षीत् । अकार्षीः । आसीत् । आसीः । इत्यत्र "स०" [६५] इत्यादिना-ईत् ॥

१ ए °सीचकार्षीरस्र य°.

१ ए °मि । वेद°. २ ए °षि व°. ३ डी °पि । तौपि नवीषि । र°. ४ ए रवौषि. ५ बी यङ्तु. ६ ए सी ईत ॥ क्व°. ७ ए मे यथा. ८ बी °श्रा का°. ९ ए °रस्रु य°. १० ए °त्ये । वदि°. ११ ए °त्राम्ब्वकार्यय°. १२ ए अच व्य°. १३ सी °त् ॥ XXX व र्षीदि°.

यच्चोलकमधास्तन्नाद्यापि कन्यात्वं[1]मत्यगाः ।
आर्तेवास्था यद[2]त्र त्वं स्मरस्त्वां शरैरदात् ॥ १४५ ॥

१४५. यत्त्वं चोलकं कन्योचि[1]तं सर्वाङ्गीणकञ्चुकविशेषमे[2]धाः परिधानेनाधारयस्त[3]ज्ज्ञायते[4] त्वमद्यापि कन्यात्वं नात्य[5]गा नात्यक्रमीः । तथा यत्त्वमत्र शैत्यरम्यत्वादिसुखकारिसर्वगुणोपे[6]तकदलीगृह आर्ते[7]व पीडितेवास्थास्तज्ज्ञायते त्वां स्मरः शरैरदादखण्डयत् । अत्र हि स्थाने कामार्तिं[8] मुक्त्वान्या पीडा न स्यादेवेत्यर्थः । एतेन मनोभीष्टः कोपि ते दुर्लभोस्तीति द्रढितम् ॥

अथ दुर्लभमेव नामादिना स्पष्टं पृच्छति ॥

सुभगं कं दृशापास्त्वं येन तेभूद्दशेदृशी ।
अङ्गोष्माश्रूण्यधासीद्यच्छ्वासोधादधरच्छविम् ॥ १४६ ॥

१४६. त्वं कं सुभगं वल्लभं दृशापा अपिबः किं नामाद्युपेतं सुभगं त्वं सतर्षमपश्य इत्यर्थः । येन सुभगेन हेतुना ते तवेदृशी दशावस्थाभूदर्तिक यदङ्गोष्माङ्गसंतापोश्रूणि नेत्राम्बून्यधासीदपाद्गण्डस्थलोपरि पतितान्यशोषयदित्यर्थः । य[9]च्च श्वासो दुःखान्निश्वसनमधरच्छविं सरसत्वरूपामधरशोभामधादशोषयन् ॥

अथोद्यानसंभविनावन्यावपि व्यथाहेतू आशङ्क्य पृच्छति ॥

किं वा किंपाकमच्छासीरघ्रासी[3]श्चेह दारुणम् ।
अच्छा अघ्रा अयुक्पर्णं वाथ य[4]त्सुभ्रु दूयसे ॥ १४७ ॥

---

१ ए °त्वसत्य°. २ ए °दव त्वं. ३ ए °मीप्वेह. ४ ए यसुभ्रु.

१ बी डी °चितस°. २ ए °मधा प°. ३ ए °स्तद्जाय°. ४ बी डी °ते तस्त्वम°. ५ ए °त्यरगा. ६ बी डी °पेते क°. ७ ए °मार्तमु.° ८ सी °ति ॥ दु°. ९ ए यवश्वा°.

१४७. वा यद्वेहोद्याने दारुणमुग्रगन्धि किंपाकं विषवृक्षफलमे-च्छासी रम्यत्वेन कौतुकादत्रोटयस्तथाघ्रासीश्च । वाथ यद्वायुक्पर्णं सप्तच्छदपुष्पमच्छा अघ्राश्च । हे सुभ्रु यत्त्वं दूयसे कर्मकर्तरि प्रयोगोयम् । यत्त्वमेवमार्तीभवसीत्यर्थः । किंपाकफलाघ्राणं हि मूर्च्छाहेतुत्वेन सप्तच्छदपुष्पाघ्राणं चातिमदकत्वेन पीडके स्याताम् ॥

मा नरः शोत्सरो मा स्म शासीद्व्याधिश्च मा स्म सात् ।
हृत्स्थो माधिश्च सासीत्त्वां ब्रूहीति विभज व्यथाम् ॥ १४८ ॥

१४८. व्यथां सुभगस्मरणादुत्थां पीडां ब्रूहि ततो विभज मय्यपि विभागेन स्थापय । व्यथा ह्युक्ता निर्मलाशयत्वात्सज्जने दर्पण इव संक्रामति । स्वव्यथा निवेदकस्य लघूस्याच्च । यदुक्तम् । निवेद्यं दुःखं सुखी भवतीति । कुत इत्याह । हृत्स्थस्त्वद्धृदयवर्ती नरः सुभगस्त्वां मा शाद्दुःखोत्पादनेन मा तनूकार्षीत्तथा हृत्स्थः स्मरो मा स्म शासी-त्तथा व्याधिश्च स्मरोत्थः किंपाकाद्याघ्राणोत्थो वा संतापादिस्त्वां मा स्म सान्मान्तं नैपीत्तथाधिश्च मानसी व्यथा च त्वां मा सासी-दिति हेतोः ॥

अपाः । अत्यगाः ॥ दासंज्ञ । अदात् । अधाः । अभूत् । अस्थाः । अत्र "पिबैति°" [६६] इत्यादिना सिचो लुप् ॥

अधात् अधासीत् । अघ्राः अघ्रासीः । मा शात् मा स्म शासीत् । अच्छाः

---

१ ए °रः स्यात्सरो. २ सी शास्मरो. ३ ए °सीश्चाधि°. ४ डी स सात्.

---

१ ए °णमुग्र°. २ ए °मत्सारसी. ३ डी रम्यत्वे°. ४ ए वाव य°. ५ डी °घ्रा-णे हि. ६ ए °ण हि मूर्छाहेतुत्वेन सप्तच्छदपुष्पाघ्राणं चा°. ७ ए सी °युत्था पी°. ८ सी डी मयापि. ९ ए °स्यास्व । य°. सी डी °स्यात । य°. १० बी °ध दूरकं सु°. ११ ए °कार्ष तथाद्धृत्स्थः. १२ ए °थाविश्च. १३ सी अत्य°. १४ सी पिबैत्या°. १५ बी °बैत्या°.

अ[1]च्छासीः । मा स्म सात् मा[2] सासीत् । इत्यत्र "ट्वेग्रा°" [६७] इत्यादिना वा सिचो लुप् ॥

अथ प्रथ[3]म[4]माशङ्कितं[5] कं चित्सुभगमेतेनापि स्त्रीरत्नेनाभिलष्यमाणतया धन्यं मन्यमानोसौ श्लोकद्वयेन स्तौति ॥

तीर्थेतत स किं दानमतनिष्ट तपः स किम् ।
अ[1]तनिष्ठा रतिं यस्मि[2]न्नुत्कण्ठामतथास्तथा ॥ १४९ ॥

१४९. स सुभगस्तीर्थे गयादौ किं दानम[6]तत ददावित्यर्थः । तथा स किं तपोतनिष्ट च[7]क्रे यस्मिंस्त्वं रतिं मनःप्रीतिमतनिष्ठास्तथा यस्मिन्नुत्कण्ठामत[8]थाः ॥

वरं कस्यासनिष्टोमा हरोसातासत स्मरः ।
असनिष्ठा दृशं यत्र मनोसाथा यशोसथाः ॥ १५० ॥

१५०. उमा गौरी कस्य वरं प्रसादमसनिष्टादात्तथा कस्य हरो वरमसात तथा कस्य स्मरो वरमसत । यत्र नरे त्वं दृशमसनिष्ठा दर्शनायादास्तथा यत्र मनोसाथा अनुरागेणादां[10] अत एव यत्र यशो रूपगुणाद्यतिशयो[11]त्थां कीर्तिमसथाः ॥

अतत[12] अतनिष्ट[13] । अतथाः अतनिष्ठाः[14] । असत[15] असनिष्ट[16] । असथाः असनिष्ठाः । अत्र "त[17]न्भ्यो वा°" [६८] इत्यादिना सिचो लुग्[18]वा । तत्संनियोगे नणयो[19]श्च लुप् ॥

---

१ बी अतिनि°. २ प °स्मिन्नुत्कण्ठात°.

---

१ प °च्छासीं । मा. २ सी डी मा स सा°. ३ बी °थमा°. ४ प °माशंसितं. ५ डी °तं किंचि°. ६ प °मनत. ७ प चक्रो य°. ८ प °तथा ॥. ९ प °सासद्°. १० डी °दात् अ°. ११ प °योत्था की°. १२ प °तता अ°. १३ प °निष्टः । अ°. १४ प °निष्टा । अ°. १५ प °सता अ°. १६ प °निष्टाः । अ°. १७ प तभ्यो वा. १८ प लुत्वा । त° १९ प णवोश्च.

अमात असत। अमाथाः अमथाः। अत्र "सनस्तत्रा वा" [६९] इति लुपि सत्यां वा-आत्॥

कुथा मय्यप्रमादं मा विरुद्धा मेति वादिनि।
भूपेकृत ह्रियं वक्तुं सोपारुद्ध सखीं भ्रुवा॥ १५१॥

१५१. सा मयणल्ला ह्रियं लज्जामकृत। ततो भ्रुवा भ्रूसंज्ञया सखीं सन्निहितवयस्यां वक्तुमुपारुद्ध प्रेरितवती। क सति। भूपे कर्णे। किंभूते। मयि विषयेप्रमादं मा कुथा मयि मा विरुद्धा विरोधं मा कुथा इति वादिनि॥

सख्यूचे त्वमभाषिष्ठा अभाषिष्ट यथा सुहृत्।
इमामन्वग्रहीः पृच्छन्यच्च सत्सु चकाधि तत्॥ १५२॥

१५२. सख्यूचे। हे महापुरुष त्वमिमां तथा भाषिष्ठा यथा सुहृन्मित्रमभाषिष्टावादीत्। यच्च यत्पुनः पृच्छन्कुलादिकं प्रश्नयन्निमां कन्यामन्वग्रहीः। अस्यां यत्त्वं प्रमादं चकर्थेत्यर्थः। तत्सत्सु सज्जनेषु त्वमेव चकाधि शोभस्व॥

चकाद्ध्यवहितः श्रोतासि चेदेषा हि नः सखी।
अनया द्योतयामाहे कदम्बकुलमुज्ज्वलम्॥ १५३॥

१५३. चेद्यदि त्वं श्रोतासि भवसि तदावहितः सावधानः संश्चकाद्धि शोभस्व सावधानो भवेत्यर्थः। एषा कन्या हि स्फुटं नोस्माकं

१ ए कृत्वा म°. २ डी °नि नृपे°. ३ ए सखी भ्रु°.

१ सी डी °सात् अ°. २ डी सतस्त°. ३ बी °तस्ततो. ४ ए °मुद्यारु°. ५ ए कर्मे। किं°. ६ ए °पयेःप्र°. ७ सी °थास्तथा म°. ८ ए विरुद्धं मा कुद्ध इ°. ९ ए °ख्यूचो। हे. १० ए °न्यायाम°. ११ ए चकार्येत्य°.

सखी । तथानयासत्सख्योज्वलं निष्कलङ्कं कदम्बकुलं कदम्बाख्यवंशो द्योतयामाहे स्त्रीरत्नत्वेनाशोभ्यत ॥

दक्षिणा द्योतयामासे येन योऽब्धिमधुक्षत ।
अदिग्धादुग्ध गां तस्य पुत्रीयं जयकेशिनः ॥ १५४ ॥

१५४. तस्य जयकेशिनो राज्ञ इयं कन्या पुत्री येन दक्षिणा दिग् द्योतयामासे स्वामित्वेनाशोभ्यत तथा योऽब्धिमधुक्षत प्रभुत्वाद्रत्नान्यक्षारयत्तथा यो गां पृथ्वीमदिग्ध दिह उपचय इत्येके । न्यायपालनेनोपचितीचक्रे तथादुग्ध रत्नान्यक्षारयच्च ।

अदृष्टेष्टवरा नान्नमलीढाघुक्षताशयम् ।
न्यगूढाकारमेषा को न यथा समधिक्षत ॥ १५५ ॥

१५५. एषा कन्या दृष्टेष्टवरा सती तथान्नं नालीढ नाभुक्त तथैषाशयमिष्टवराप्राप्त्यसमाहितं चित्तं तथा महाकष्टेनाधुक्षत संवृतवती । तथैषाकारमिष्टवराप्राप्तिदुःखोद्भवं मुखविकारादि तथातिकष्टेन न्यगूढ यथा को न समधिक्षत न संदिग्धवान् । किं तु सर्वोऽप्येवंविधावस्थासौ किं जीविष्यति न वेति संदेहे पपातेत्यर्थः ॥

नैषालिक्षत यत्तस्मालिक्षातां पितरावपि ।
सुखेदरिद्रीत्स्वजनोदरिद्रासीत्सखीजनः ॥ १५६ ॥

१५६. यद्यस्मादेषा कन्या नालिक्षत नाभुक्त तत्तस्माद्धेतोः पितरा-

१ ए अदुग्धा॰. २ बी ॰म् । न्यंगू॰. ३ ए ॰क्षता ॥. ४ डी ॰जनाः ॥.

१ ए ॰ख्यास्यवं॰. २ ए राज इ॰ ३ ए योब्धिम॰. ४ बी ॰था पृ॰. ५ डी ॰चितां च॰. ६ ए ॰हे यथाते॰.

वपि नालिक्षातामत एव स्वजन एतद्बन्धुवर्गः सुखेदरिद्रीदरिद्रोभूत्सु-खरहितोभूदित्यर्थः । तथा सखीजनः सुखेदरिद्रासीत् ॥

उपारुद्ध । मा विरुद्धाः । अकृत । मा कृथाः । अत्र "धुड्°" [७०] इत्या-दिना सिचो लुक् ॥ अनिट इति किम् । अभापिष्ट । अभापिष्ठाः ॥

अन्वग्रहीः । इत्यत्र "इट ईति" [७१] इति सिचो लुक् ॥

चकाधि चकाद्धि । इत्यत्र "सो धि वा" [७२] इति सस्य वा लुक् ॥

असि ॥ हस्त्वेति । द्योतयामाहे । अत्र "अस्तेः सि हस्त्वेति" [७३] इति सस्य लुगेकारे तु हः ॥ परोक्षाया एकारे नेच्छन्त्यन्ये । द्योतयामासे ॥

अदुग्ध अधुक्षत । अदिग्ध समधिक्षत । अलीढ अलिक्षत । न्यगूढ अघुक्षत । इत्यत्र "दुहदिह°" [७४] इत्यादिना सको लुग्वा ॥

अलिक्षाताम् । अत्र "स्वरेतः" [७५] इति सकोस्य लुक् ॥

अदरिद्रीत् अदरिद्रासीत् । इत्यत्र "दरिद्रोद्यतन्यां वा" [७६] इत्यन्तस्य लुग्वा ॥

दरिद्रांचक्रुषामन्तर्दरिद्रामीति कोप्यदात् ।
कर्णरूपं लिखित्वास्या अदरिद्रायकोन्यदा ॥ १५७ ॥

१५७. कोपि चित्रकरोन्यदा कर्णरूपं लिखित्वास्याः कन्याया अदात् । कीदृक्सन् । दरिद्रांचक्रुषामन्तर्दरिद्राणां मध्ये दरिद्राम्यहं दरिद्रोस्मीति हेतोरदरिद्रायको दरिद्रिष्यन्नीश्वरीभवितुमित्यर्थः ॥

१ प °चक्षुषा°. सी °चक्षपा°. २ डी °रिद्रोमी°.

१ प °क्षातां त. २ सी °द्रीभू°. ३ प °त्यथाः । त°. ४ प °पिष्टं । अ°. ५ प सी °ग्रहीदित्य°. ६ प °ति तस्य. ७ डी °तम् । अ°. ८ प अली°. ९ सी °ढम् अ°. १० सी डी °क्षत् । न्य°. ११ प अधुक्ष°. १२ प दुहिदुह. १३ बी ई °रे इ°. १४ प लुग्व ॥. १५ प °चक्षुष्वा°. १६ प °र्दलिद्रा°. १७ प °स्मी हे°.

एषादरिद्राणमुद्यददरिद्रा[1]यिका ददौ ।
तस्यातोदिदरिद्रासोर्न[2] दरिद्रायिकाभवत् ॥ १५८ ॥

१५८. एषा कन्या यद्द्रव्यादि[1] ददौ । कीदृक्सती । अदरिद्रा[2]यिको-दारा तथाविद्यमानं दरिद्राणं[3] दारिद्र्यं यस्याः सा तथा मुत्कर्णरूपदर्श-नोत्थो हर्षो यस्याः सा तथा। अतस्तस्माद्दानाददिदरिद्रासो[4]रीश्वरी[5]बुभू-पो[6]स्तस्य चित्रकृतो दरिद्रायिका दारिद्र्यं नाभवत् ॥

कान्तेरददरिद्रावद्रूपमेषाबिभश्च तत् ।
न नाचकाः किं त्वचकादमुनेति न कोन्वशात् ॥१५९॥

१५९. तत्कर्णरूपमेषा कन्याविभश्चात्मपार्श्वेधारयच्च । यतः कान्ते[7]: सौन्दर्यादिशोभायाः सकाशाददरिद्रावददरिद्रितं परिपूर्णकान्तीत्यर्थः। ततश्चैतां को नान्वशान्नावदत् । कथमित्याह । हे कन्येमुना कर्णरूपेण कृत्वा[8] त्वं न नाचका न नाशोभथाः[9] किं त्वचकादत्यन्तं त्वमेवाशोभथा[10] एवेत्यर्थ इति[11] ॥

मां रुणो विरु[3]णन्मा स्म मां भिनः संभिं[4]नत्स मा ।
वशं जङ्गमिता तेस्मीत्येषावावद्यत स्मरम् ॥ १६० ॥

१६०. कर्णरूपदर्शनेन स्मरप[12]रवशत्वादेषा[13] कन्या स्मरं[14]मवावद्यता-भीक्ष्णमवोचत् । कथमित्या[15]ह । हे स्मर त्वं मां मा स्म रुणो मा बाधि-ष्ठास्तथा मा स्म मां विरुणन्मा विद्धिक्षस्तथा त्वं मां स्म मा मां[16] स्म भिनो

१ प बी सी ई °द्रायका. २ सी डी °न ॥ कर्ण°. ३ प °रुणोन्मा. ४ प °नत्समा.

१ प यद्रव्यदि. २ प बी सी ई °द्रायको°. ३ सी डी °द्राणां दा°. ४ प सी °द्रासौरी°. ५ बी °रीबभू°. ६ प °भूपास्त°. ७ प कान्त मौ°. ८ सी °त्वा त्वमे°. ९ प °भयाः किं. १० प °भया ए°. ११ प ई °ति ॥ मा रु°. १२ प °रपवरश°. १३ प °षा कंन्या. १४ डी °रंमवावाव°. १५ प °त्या ह°. १६ प मा साभि°.

बाणैर्विदारयस्तथा स्म मा संभिनत्सम्यग्विदार्यो यतोस्म्यहं ते तव वशमायत्ततां जङ्गमिता कुटिलं गन्ता नृत्यन्ती [नृत्यं ?] करिष्यामीत्यर्थ इति ॥

कर्णे शाशयिताहे शाशय्यिताहेथ पावके ।
संमिधिष्यति समिधिष्यमाणेत्याग्रहीदियम् ॥ १६१ ॥

१६१. इयं कन्याग्रहीन्निर्बन्धं चक्रे । कथमित्याह । कर्णे कर्णसमीपेहं शाशयिताहेत्यर्थं स्वप्स्याम्यथाथ वा यदि कर्णसमीपे शयनं न स्यात्तदाहं सम(मि ?)धिष्यति प्रज्वलितत्वात्काष्ठान्यभिलषिष्यमाणे पावकेग्नौ शाशय्यिताहे । कीदृक्सती । समिधिष्यमाणा । काष्ठतुल्यीभविष्यन्तीति ॥

समिध्यिष्यति कामाग्नौ द्राक्समिध्यिष्यते ह्यसौ ।
नान्यो भिषजितात्रार्थे कर्ण एव भिषज्यिता ॥ १६२ ॥

१६२. हि स्फुटमसौ कन्या समिध्यिष्यति काष्ठान्यभिलषिष्यमाण इव । अतिप्रज्वलिष्यतीत्यर्थः । कामाग्नौ द्राक्समिध्यिष्यते समिदिवाचरिष्यति । कामाग्निसंतापेनासौ भस्मसाद्भविष्यतीत्यर्थः । अत्रार्थे कामाग्निसंतापरोगविषयेन्यो न भिषजिता न चिकित्सिता । भिषजिधातुः कण्ड्वादौ चिकित्सितार्थः । किं तु कर्ण एव भिषज्यिता ॥

दरिद्रांचक्रुषाम् । अत्र "अशिति°" [७७] इत्यादिनान्तस्य लुक् ॥ अशितीति किम् । दरिद्रामि ॥ स्सनादिवर्जनं किम् । सनि । अदिदरिद्रासोः ॥

१ ए बी सनधि°. २ बी समध्यि°. ३ ए °कमभिध्येक्ष्यते.

१ सी डी गता नित्यं क°. २ ए °म्यथथ वा. ३ ए °धिष्टाति. ४ ए °शयिता°. ५ बी सी डी समधि°. ६ ए °कित्सता. ७ ए °षजधा°. बी °षज्धा°. ८ बी सी डी °कित्सार्थः. ९ ए °शिशीत्या°. १० ए डी ई °मि । स्सनादि°. सी °मि । स्मना°. ११ सी डी °द्रासो ॥ ण°.

णकचि । अदरिद्रा[1]यकः ॥ "पर्यायार्हं°" [५.३. १२०] इत्यादिना णके । दरिद्रायिका ॥ "णकतृ[2]चौ" [५.१.४८] इति णके । अदरिद्रायि[3]का ॥ अनटि[4] । अदरिद्राण ॥ केचिद्दरिद्रातेरनि[5]टि कसावालोपं नेच्छन्ति । तन्मत इट् आम्[6] चाभिधानान्न स्याताम् । अददरिद्रावत् ॥

अन्वशात् । अबिभः । अत्र "व्यञ्जनाद्°" [७८] इत्यादिना देर्लुक् यथासंभवं धातुसस्य च दः ॥

अचकास्त्वम् अचकात्त्वम् । स्म मा भिनः स्म मा संभिनत् । मा स्म रुणः मा स्म विरुणत् । इत्यत्र "सेः[8] स्द्धां च रुर्वा" [७९] इति सेर्लुक् सकारदकारधकाराणां च वा रुः ॥

जङ्गमिता । शाशयिताहे । अत्र "योशिति"[८०] इति यस्य लुक् ॥ शीङो (ङः?) शयादेशो व्यञ्जनान्तता ॥ अन्ये तु लाक्षणिकव्यञ्जनान्तेभ्यो यलोपं नेच्छन्ति । तेन शाशय्यिताहे । तन्मतसंग्रहार्थं व्यञ्जनान्ताद्धातोर्विहितस्येति विहितविशेषणं कार्यम् ॥ अशितीति किम् । अवावर्धत ॥

समिधिष्यति समिध्यिष्यति । समिधिष्यमा[11]णा समिध्यि[12]ष्यते । अत्र "क्यो[13] वा" [८१] इति क्यनूक्यङो[14]र्वा लुक् ॥ केचित्तु यकोपि लुग्विकल्पमिच्छन्ति । भिषजिता भिषज्यिता । तन्मतसंग्रहार्थं केनोपलक्षितो[15] यः क्य इति व्याख्येयम् ॥

---

१ डी °द्राकः. २ प कनृचौ अति. ३ प °यिक । अनदि । द°. ४ प सी डी ई °टि । द°. ५ डी °रनटि. ६ डी आमचा°. ७ प °णः मा स्म रुणः मा. ८ सी सेः सं द्धा च. ९ प शासयि°. १० प °यच ॥ स°. ११ सी °ष्यंत. १२ प °मिधिष्य°. १३ प °क्यो ध्येति. १४ प °क्यनोर्वालुक्. १५ प सी °तो य क्य. डी °तो य् क्य.

वरयित्रीमिमां कर्णं तद्देशेत्राटिटत्पिता[1] ।
उपायनं प्रेषितवान् गजैरगणितैस्तथा ॥ १६३ ॥

१६३. तत्तस्माद्धेतोः । कर्णं वरयित्रीमीप्सन्तीमिमां कन्यामत्र देशे गूर्जरत्रायां[1] पिता जयकेश्याटिटत्प्रेषितवान्[2] । तथागणितैरसंख्यातैर्गजैः सहोपायनं[3] रत्नोपदां प्रेषितवान् ॥

वरयित्रीम् । अत्र "अतः" [८२] इत्यस्य लुक् ॥

आटिटत्[4] । इत्यत्र "णेरनिटि" [८३] इति णेर्लुक् ॥ अनिटीति किम् । वरयित्रीम् ॥

अगणितैः । प्रेषितवान् । इत्यत्र "सेट्क्तयोः" [८४] इति णेर्लुक् ॥

स्पृहयालुः स्पृहयाय्यं वरयामास यं सखी ।
भूमण्डयन्तो घोषेण गदयित्नुर्न सोसि किम् ॥ १६४ ॥

१६४. स्पृहयालुरभिलापुका सती सख्यस्मद्वयस्या स्पृहयाय्यं स्पृहयालुं[5] यं कर्णं वरयामासेप्सामास[6] स त्वं कर्णः किं नासि । कर्ण एव त्वमित्यर्थः । यतः कीदृक् त्वम् । भूमण्डयन्तो[7] रूपादिगुणातिशयेन[8] पृथ्व्या भूपणम् । तथा महापुरुषत्वाद्घोषेण कृत्वा गदयित्नुर्मेघो[9] मेघगम्भीरस्वर इत्यर्थः ॥

वरयामास । मण्डयन्तः[10] । स्पृहयालुः । स्पृहयाय्यम्[11] । गदयित्नुः[12] । अत्र "आमन्त°" [८५] इत्यादिना णेरयादेशः ॥

---

१ ए °शवाटि°.

१ ए °त्राया पिता के°. २ ए °वा तथागणितै° ३ ए °होपय°. ४ ए °टिवत्. ५ ए डी °यालु यं. ६ डी °मामैप्मा°. ७ सी डी °यतो रू°. ८ ए °गुणोनि°. ९ ए °यितुर्मे°. १० सी °यन्त । स्पृ° ११ ए °हयांय्यतोरू°. १२ ए बी सी °यित्नु । अ°.

नृपानवगणय्यान्यान्खेदं प्रापय्य नः सखी ।
कर्णं प्राप्य मनोत्रागादप्रमित्य वचोसि किम् ॥ १६५ ॥

१६५. नोस्माकं सख्यत्र गूर्जरत्रायामागात्[1] । किं कृत्वा । अन्यान्नृपानुद्वोढुमिच्छून् राज्ञोवगणय्यावज्ञाय । अत एव तान्खेदं प्रापय्य ततो मनः स्वचित्तं कर्णं प्राप्य नीत्वानुरागेण कर्णं मनसि[2] कृत्वेत्यर्थः । तस्माद्वचोहं कर्ण इति वचनमप्रमित्याप्रतिदाय [3]किमसि किमिति तिष्ठसि । प्रतिवचनं दत्त्वेत्यर्थः ॥

अप्रमाय करं कर्णश्चेत्स्मराजय्यतां[1] भजेत् ।
अयशोक्रय्यमक्षय्यमेषा प्रक्षीय दास्यति ॥ १६६ ॥

१६६. चेत्कर्णः करमप्रमायैतत्कर[4]ग्रहणपूर्वं स्वपाणि[5]मदत्त्वैतामपरिणीये[6]त्यर्थः । स्मराजय्यतां स्मरस्य कर्तुर्जेतुमशक्यतां भजेद्धैर्यातिशयात्स्मरेण जेतुमशक्यो यदि स्यादित्यर्थः । तदैषा कन्या प्रक्षीय विनश्यायशो दास्यत्यर्थात्कर्णस्य । किंभूतम् । अक्रय्यमकस्मादुपनतमित्यर्थः । अक्षय्यमनेकावदातैरपि क्षेतुमशक्यम् ॥

[7]अवगणय्य । इत्यत्र[8] "लघोर्यपि" [८६] इत्यय् ॥

प्रापय्य प्राप्य । इत्यत्र "वाप्नोः"[9] [८७] इति वा[10]य् ॥

अप्रमित्य अप्रमाय । इत्यत्र "मेङो वा मित्" [८८] इति वा मित् ॥

प्रक्षीय । इत्यत्र[11] "क्षेः क्षी(क्षीः)" [८९] इति क्षीः ॥

अक्षय्यम्[12] । अजय्यताम् । अत्र "क्षय्यजय्यौ[13][14]" [९०] इत्यादिना निपात्यौ ॥

क्रय्यम् । इति "क्रय्यः क्रयार्थे" [९१] इति निपात्यम् ॥

---

१ ए °श्चेत्सरा°.

---

१ ए °जरात्रा°. २ ए बी 'सिकृत्येत्य°. ३ बी सी किमि°. ४ सी डी °त्करग्र°. ५ ए स्वप्राणि°. ६ डी °णीयो इ°. ७ ए बी डी अनव°. ८ ए °त्यव ल°. ९ बी वाप्नोतिरिति. १० ए वाइय्. सी वाइय्. ११ डी °त्र क्षः क्षी. १२ सी °म् । अजय्यम् । अ°. १३ ए °जयौ क्षय्य इ°. १४ बी °य्यां क्षय्य इ°.

शृण्वत्यवात्सीदिति राज्ञि चिन्तासौ मे दिदीयानधृतिर्दिदीये।
नाल्यः प[१]पुंस्त्वामवितास्मि कर्णः कष्टे ह[२]हो तस्थिथ चेत्यथाह्वत्
॥ १६७ ॥

१६७. शृण्वति पूर्वोक्तमाकर्णयति राज्ञि कर्णे इत्येवंविधा चिन्तावात्सीदुवास। चिन्तामेवाह। असौ मयणल्ला दिदीयाना मद्वियोगेन क्षीणा धृतिः स्वास्थ्यं यस्याः सा तथा सती मे मदर्थं दिदीये क्षीणा। अथैवं चिन्तानन्तरं मयणल्लामा[१]हूयावदच्च। कथमित्याह। हे मयणल्ले। हहा खेदे। त्वं कष्टे[२] दुःखे तस्थिथ स्थितवती। परमाल्यः सख्यस्त्वां न पपुर्न ररक्षु[३]रधुनाहं कर्णस्त्वामवितास्मि रक्षिष्यामीति। इन्द्रवज्राछन्दः॥

पाणिं ते व्यतिले नतभ्रु गुरवो यत्त्वामदुर्मे ततो
ग्लेयाद्भूपजनस्त्वदिच्छुरखिलो ग्लायाच्च दिव्यो जनः।
धेयास्त्वं महिषीपदं म[३]म रतिं दे[४]र्या विहेयास्त्रपां
[५]निष्पेया मधुपर्कमित्यभिदधत्तां पर्यणैषीन्नृपः॥ १६८ ॥

१६८. नृपः कर्णस्तां पर्यणैषीत्। कीदृक्सन्। अभिदधद्वदन्। किमित्याह। हे नतभ्रु यद्यस्मात्ते गु[४]रवः पितरस्त्वां मे मह्यमदुस्ततस्तस्मादहं ते पा[५]णिं व्यतिले [६]विनिमयेन गृह्णामि। [७]ततस्त्वत्पाणिग्रहणानन्तरं त्वदिच्छुरखिलो भूपजनो ग्लेयात्क्षीणहर्षो भूयात्तथा त्वदिच्छुर्दिव्यो जनो देवौघो ग्लायाच्च। तथा त्वं मधुर्पर्के[८] दध्ना संयुक्तं मधु निष्पेयाः। विवाहकाले हि वधूवरौ मधुपर्कं पिबत इत्याचारः। मत्पत्नी भूया इत्यर्थः। तथा महिषीपदं पट्टराज्ञीपदवीं धेया धार्या-

---

१ ए °पुंस्त्वाम°. २ ए °हा वस्थि°. ३ ए मग र°. ४ ए देया वि°. ५ ए निष्फेया. बी निष्पेया.

---

१ ए °ह्वत्। अवदस्व क°. २ ए °ष्टे त°. ३ ए °रक्षतांह. ४ ए गुरुवः. ५ ए ाणि व्य°. ६ सी डी विनम°. ७ ए तस्त्व°. ८ ई °पर्के द°.

स्तथा [1]त्रपां रतिकाले लज्जां विहे[2]यास्त्यज्या अत एव [3]रतिं सुखं देया इति । शार्दूलविक्रीडितं छन्दः ॥

गेयासं गीतैर्वा सुसूत्रेण मे[1]यासं स्थेयासं चाग्रेवसेयास[2]मं[3]हः ।
[4]अभ्यागात्तत्राथेति जेगीयमानं बन्धूनां स्त्रैणं कुङ्कुमापीतपा[5]र्ष्णि ॥ १६९ ॥

१६९. अथेत्यारम्भे । अथ विवाहारम्भकाले बन्धूनां [4]वधूवरस्वजनानां स्त्रैणं तत्रोद्वाहस्थानेभ्यागात् । कीदृग्जेगीयमा[5]नमत्यर्थं गायद्वद्[6]दृद्वा । किमित्याह । हे [7]वधूवरौ वां युवा[8]महं गीतैर्विवाहोचितगानै[9]र्गेयासं गायानि । तथाहं सुसूत्रेण सुष्ठु कुमारि[10]कांकर्तितत्वात्त्रुटितत्वादि[11]शास्त्रो[12]क्तगुणोपेतत्वाच्छोभनं यत्सूत्रं तेन कृत्वा मेयासं [13]पुङ्खणं क्रियासमित्यर्थः । तथाहमग्रे लवणोत्तारणाद्यर्थं युवयोः पुरः स्थेयासं तथा[14]हमंहश्चक्षुर्दोषाद्युद्भवं पापं कष्टमित्यर्थः । अवसेयासं लवणा[15]द्युत्तारणेनान्तं नयेयमिति । तथावृत्त्या व्याख्याने जेगीयमा[16]नं कुटिलं गच्छत्सलीलगा[17]मीत्यर्थः । तथा कुङ्कुमेनापीता आरक्ताः [18]पार्ष्ण्यो घुटिकाधोभागा अपि यस्य तत्कुङ्कुमपिञ्जरितसर्वाङ्गमित्यर्थः । एतेनास्या[19]विधवत्वोक्तिः । [20]वैश्वदेवी छन्दः ॥

१ ई मेघासं. २ सी °समहं । अ°. ३ ई °मंह । अ°. ४ ए अभ्यगात्तथे° ५ ए °पार्ष्णिः ॥. ई °पाष्णि ॥.

---

१ ए त्रपा र°. २ बी सी डी °यास्त्याज्या. ३ बी रतिसु°. ४ ई वरवधूस्व°. ५ ए °नमित्यर्थः गा°. ६ ई ° दत् । कि°. ए °दद्य कि°. ७ ए वधौव°. ८ ए °मंहगी°. ९ ए °सं गीया°. सी °सं गेया°. १० ई °काकीतितत्वात् त्रुटित्वादि°. ११ ए °दिशोक्तो°. १२ ए °गुणापे°. १३ ए पुखणं. सी पुस्वणं. १४ ए °हमहचक्षु°. १५ बी सी °णादुत्ता°. १६ ई °गीअमा°. १७ ई °गामित्य°. १८ ए प्राष्णयो. १९ ई °विधिवत्वोक्तिः. २० ई °वी छं ॥.

तेष्ठीयेते तौ स्म पेपीयमानौ दृष्ट्यान्योन्यं धाम देधीयमानौ[1] ।
देदीयन्तेऽर्थानमेमीय्यमानान्साप्ताश्चाचारानसेषीयमाणाः ॥१७०॥

१७०. धामोद्वाहसंबन्धोत्थं[1] श्रीविशेषं देधीयमानावत्यर्थं बिभ्रतौ तौ वधूवरौ तेष्ठीयेते स्मात्यर्थं स्थितौ । कीदृशौ सन्तौ । दृष्ट्या कृत्वान्योन्यं पेपीयमानावत्यर्थं पिबन्तौ । तारामेलकं कुर्वाणावित्यर्थः । तथाप्ता वधूवरयोः प्रत्ययिता:[2] स्वजना अमेमीय्यमानानत्यर्थमसंख्यान[3]र्थान्द्रव्याणि देदीयन्ते स्मात्यर्थमन्योन्यं वितेरुर्यत आचारान्दानादीनि विवाहकर्माण्यसेषीयमाणा अत्यर्थमविनाशयन्तः । शालिनी छन्दः ॥

जेहीयन्ते ये मदं नैव येद्रीन्मामायन्तेऽङ्गैरहीनैर्गजांस्तान् ।
चौलुक्यः संबन्धिभिर्दीयमानानादायाथामीयमानांश्चचाल
॥ १७१ ॥

१७१. अथ विवाहविध्यनन्तरं चौलुक्यः कर्णश्चचाल । किं कृत्वामीयमानान्प्रतिदीयमानांस्तर्थान् संबन्धिभिः श्वशुरवर्गलोकैर्दीयमानांस्तान् गजानादाय ये मदं नैव जेहीयन्ते नात्यर्थं परिहरन्ति न कदापि मदरहिता इत्यर्थः । तथा येहीनैश्चत्वारिंशद्वर्षत्वेन परिपूर्णैरङ्गैः कृत्वाद्रीन्मामायन्तेऽत्यर्थं मिमते येऽद्रिप्रमाणाङ्गा इत्यर्थः ॥

अमीयमानैरविषीयमाणैर्निधीयमानैः पथि पौरलाजैः ।
आस्थीयमानः स नवोढवध्वा तया सहोच्चैर्निजहर्म्यमागात्
॥ १७२ ॥

१७२. स कर्णस्तया नवोढवध्वा सहोच्चैरुन्नतं निजहर्म्यमागात् । कीदृक्सन् । पौरलाजैर्नागरैराक्षतैः पथ्यास्थीयमान आश्रीयमाणः । किं-

१ ए °नौ । दिदी°. २ ए °र्थानिमे°. ३ ई °रान्नसे°. ४ ए बी सी °माणा ॥. ५ ए °न्मानाय°. ६ ए °नैगजां°. ७ ए °लुक्य स°. ८ ए °भिदीय°. ९ ए °चालः ॥ अ°.

१ सी °न्धोत्थश्री°. २ बी °यिना स्व°. ३ ए °र्थमं°. ४ ए °ख्यामर्था°. ५ डी °नान्प्र°. ६ ई °थाXXXयेहीनैश्च. ७ ए °वर्गलो°. सी °वर्गेलो°. ८ सी डी ये गजा म°. ९ बी सी डी °गरिकाक्ष°.

भूतैः । अमीयमानैरसंख्यैरविषीयमाणैः प्रचण्डवातादिनाविनाश्यमानै-र्निधीयमानैर्निक्षिप्यमाणैः[1] ॥[2]

अवात्सीम् । इत्यत्र "सस्तः सि" [९२] इति सस्य तः ॥

दिदीये । दिदीयान । इत्यत्र[3] "दीय्°" [९३] इत्यादिना दीय्[4] ॥

पपुः । आह्वत् ॥ इट् । तस्थिथ[5] ॥ एत् । व्यतिले ॥ पुंस्[6] । अदुः । इत्यत्र "इडेद्°"[7] [९४] इत्यादिनातो लुक् ॥

ग्लेयात् ग्लायात् । अत्र "संयोगा°" [९५] इत्यादिना वा-एत् ॥

गेयासम्[8] । निष्पेयाः । स्थेयासम् । अवसेयासम् । दासंज्ञ[10] । देयाः । धेयाः ॥ मेयासम्[9] । विहेयाः[11] । अत्र "गापा°" [९६] इत्यादिना-एत्[12] ॥

गै गाङ्[13] । जेगीयमानम्[14] । गीतैः ॥ पा । पेपीयमानौ । आपीत[15] ॥ स्था । आस्थीयमानः । तेष्ठीयेते[16] ॥ मो । अविषीयमाणैः । असेषीयमाणाः ॥ दासंज्ञ[17] । दीयमानान्[18] । देदीयन्ते । निधीयमानैः[19] । देधीयमानौ[20] ॥ मा इति मामाङ्मेङां त्रयाणां ग्रहणम्[21][22] । मा माङ् । अमीयमानैः । अमेमीय्यमानान्[23] ॥ मेङ् । अमीयमानान् । हाक् । जेहीयन्ते । अहीनैः । अत्र "ईर्व्यञ्जनेयपि"[24] [९७] इति-ईः ॥ मातेर्नेच्छन्त्यन्ये । मामायन्ते । अयपीति किम् । आदाय ॥ उपजातिश्छन्दः[25] ॥

॥ इति श्रीजिनेश्वरसूरिशिष्यलेशाभयतिलकगणिविरचितायां श्रीसिद्धहेमचन्द्राभिधानशब्दानुशासनद्व्याश्रयवृत्तौ नवमः सर्गः ॥

१ ई °माणैर्नि°. २ सी डी °णैः ॥ आवा°. ३ ई °त्र देयीत्या°. ४ ए दीया ॥ प°. ५ ए °स्थिथा ॥ ए°. ६ ए पुरु । अ°. ७ ए ई °डेत्या°. ८ सी गेयाः । स्थे°. ९ ए °यासाम्. १० ए °संज्ञः । दे°. ११ ए °हेया । अ°. १२ ए °त् । गौगाङ्। जंगी°. डी °त् । गैगा°. १३ ई गाङ् । जे°. १४ ए °मानाम्. १५ ए °पीता ॥ स्था. १६ ए °ते ॥ सौ । अ°. १७ ए °संज्ञा । दी°. १८ ई °न् । दिदी°. १९ ए ई °मानौ । दे°. २० ए ई °मानैः ॥ मा. २१ ए °हणाम् । मोमोङ् ।. २२ सी °म् । माङ्.२३ सी डी °न् । हा°. २४ ए बी ईव्यञ्ज°. २५ बी सी डी ई °तिश्छन्दः.

दशमः सर्गः ।

[1]जेघ्रीय्यमाणोरुयशा नृपः सा [2]देध्मीय्यमानैकसतीव्रता च ।
जेघ्रीत उच्चैः शिवयोः श्रियं स्म जाघ्रीत [3]आभां[4] स्म च विष्णुलक्ष्म्योः ॥ १ ॥

१. नृपः कर्णः सा च मयणल्ला च शिवयोर्[2]हरगौर्योरुच्चैरति[3]शयि[4]तां श्रियं शुभसंबन्धरूपां शोभां [5]जेघ्रीतः स्मात्यर्थं जिघ्रतः स्म । जगृहतुरित्यर्थः । तथा विष्णुलक्ष्म्योराभां च जाघ्रीतः स्म । कीदृग्नृपः । जेघ्रीय्यमाणं सुरभित्वादत्यर्थं लोकैराघ्रायमाणम् । [6]संकीर्त्यमानमित्यर्थः । उरु महद्यशो यस्य [7]सः । सा च कीदृशी । [8]देध्मीय्यमानं निर्मलत्वा[9]ल्लोकैरत्यर्थं संकीर्त्यमानमेकमसाधारणं सतीव्रतं यस्याः सा ॥

जेघ्रीय्य[10]माणं । देध्[11]मीय्यमान । इत्यत्र "घ्राध्मोर्यङि" [९७] इति-ईत् ॥ यङीति [12]किम् । जाघ्रीतः । अत्र "एषामीर्व्यञ्जनेदः" [४ २.९८] इति-ईः ॥ [14]अन्ये यङ्लुप्यपीच्छन्ति । जेघ्रीतः ॥ सर्गेस्मिन्नुपजातिश्छन्दः ॥

१ प °घ्रीयामा°. बी °घ्रीयमा°. २ ई देध्मीय्य°. ३ प आभा स्म. ४ सी °भां सि च. डी °भां स च.

---

१ ई सा म°. २ प °योर्हर°. ३ बी °शयतां. ४ प °यिनं श्रि° ई °यिता श्रि°. ५ प जेघ्रीःत स्मा°. ६ प °कीर्यमा°. ७ प सः । स च. ८ ई देध्मीय्य°. ९ प °ल्लोकेर°. १० प बी °माणा । दे°. ११ सी डी °ध्मीयमा°. १२ प °म् । जोघ्री°. १३ प °मीर्व्यञ्ज°. १४ प अडे य°.

जेघ्नीयते यां न हि नो जघानं तां मे प्रजां जङ्घनिता नु कोपि।
आसीदसूनोरिति धैर्यघाती नृपस्य चिन्ताकुलिशाभिघातः ॥ २ ॥

२. धैर्यघाती धैर्यं व्यसनेप्यकातर्यं तद्विनाशी नृपस्य कर्णस्य चिन्ताकुलिशाभिघातश्चिन्तैवातिदुःखकत्वाद्वज्राघातोभूत् । कथमित्याह । तां मे ममासूनोर्निष्पुत्रस्य सतः प्रजां लोकम् । नु इति संभावने । संभावयेहं कोपि जङ्घनिता मत्तोनन्तरं कुटिलं गमिष्यत्यभिषेणयिष्यतीत्यर्थः । अत्यर्थं हनिष्यति वा । यां न हि नैव कोपि जेघ्नीयतेत्यर्थं हिनस्ति न जघानं वेति ॥

योनेशदाघानि मया स नाशो नश्यामि नो नाप्यनशं स्वयं च ।
परस्त्रियो नाश्वमवोचमास्थं कथं न्वपप्तं विप्लुतत्वदुःखे ॥ ३ ॥

त्वमात्मजेनाभ्युदियाः प्रतीयास्तत्स्पर्शसौख्यं प्रतियाः प्रमोदम् ।
मयीत्यसंशय्य समुह्यते स्म यं ध्यानशय्यैस्तदु किं नु शेते ॥ ४ ॥

मां संततीयन्नधियासमास्तूयासं शुचीभूय भृशायमानः ।
चेचीयमानः परिचीयमानं वल्गूयदोजास्तदहं समाधिम् ॥ ५ ॥

१ सी डी जेघ्नीय°. २ प हि भोज°. ३ प °न ता मे. ४ सी °ना न को°. ५ सी डी °नोरति. ६ ई °कुलशा°. ७ प °नि यमा स. ८ ई °भ्युदयाः. ९ प °तिया प्र°. १० प यद्धानशय्योथर्तिक नु. ११ ई शेतम् ॥ मां. १२ प °न्न--स°. १३ बी °समांस्तू°. १४ प °मान प°. १५ प °स्तमहं. १६ प °धि ॥ मा°.

१ प °कातर्य तद्वि°. २ ई °कुलशा°. ३ प °द्वजाघा°. ४ प °नोनिष्पु°. बी °नोनिष्पुत्र°. ५ ई °र्निःपुत्र°. ६ प °तामुत्तो°. ७ बी °णयषती°. ८ प न दि नै°. ९ प सी डी जेघ्नीय°. १० बी ई °न चेति.

मात्रीयतामापदि यात्र मात्रीयतेथ[1] मात्रीभवति क्रियाभिः[2] ।
क्रियात्कृपामह्रियमाणभक्तेर्जेह्रीय्यमाणा[3] तपसाद्य सा मे ॥ ६ ॥
इत्थं सुतीयन्स वितर्क्य[4] दीप्रीकृतैर्दिवाभूतनिशं प्रदीपैः ।
श्रीवेश्म मालीकृतकेतु यातोदन्याशनायो विधनाय आपत्[5] ॥७॥

३–७. स कर्णः श्रीवेश्म लक्ष्मीदेवताभवनमापत्प्राप[1] । कीदृक्सन्[2] । सुतीयन्पुत्रमिच्छन्नत[3] एव याते विगते उदन्याशनाये[4] भोजनेच्छोदकेच्छे[5] यस्य सः । तथा विगता[6] धनाया[7] धनेच्छा यस्य स निर्लोभश्च । कीदृशं श्रीवेश्म । दीप्रीकृतैः प्रज्वालितैः प्रदीपैः कृत्वा दिवाभूता[8] दिवसीभूता निशा यत्र तत् । तथा मालीकृतकेतु पङ्क्तीकृतध्वजम् । किं कृत्वा । वितर्क्य । कथमित्याह[9] । आजौ रणे योनेशन्नष्टः स मया नाघानि न हतस्तथाहं स्वयं[10] चाजौ नो नश्यामि नाप्यनशं न नष्टस्तथाहं परस्त्रियो[11] नाश्वं नागमं[12] नावोचं नालपं[13] न चाश्वं सतीत्वेन मद्वचोमन्यमाना नाह तिरश्चक्रे । नष्टप्रहारादीनि क्षात्रधर्मबाधकानि महापापानि मया न कृतानीत्यर्थः । ततो नु इति संशये । संशयितोस्मि कथमहं[14] विसुतत्वदुःखेपुत्रत्वकष्टेपप्तं पतितः । तथा ध्यानमेव सदा विश्रामसुखहेतुत्वाच्छय्या येषां तैर्योगिभिरसंशय्य सम्यग्ज्ञानेन[15] निश्चित्य मयि विषये यत्समुह्यते स्म चिन्तितम् ।

---

१ ए °तेस मा°. २ ई °भिः । कृया°. ३ ए °क्तेयही°. ४ ए °तर्का दी. ५ सी डी °त् । पञ्चभिः कुलकम् । स.

---

१ बी °तामुव°. २ ए °त्प्राप् । कीदृन्. ३ सी डी °यत्पुत्र°. ४ ए °न्याराना°. ५ ए बी °दकोच्छे. ६ ए °ता या ध°. ७ ई °नाय ध°. ८ ए दित्वाभू°. ९ बी °मिथ्याह. १० ई °यं आजौ. ११ ए परिस्त्रियो. १२ बी °भं नोवाचं. १३ ए नालंप न. १४ सी °हं वसु°. १५ ए °म्यग्जाने°.

कथमित्याह । आत्मजेन पुत्रेण कृत्वा त्वमभ्युदिया अभ्युदितपुत्रो भूया इत्यर्थः । तथा[1] तत्स्पर्शसौख्यं[2] पुत्रस्पर्शसुखं प्रतीया अनुभवे[3]र्जीवेन्पुत्र[4]सुखं[5] पश्येरित्यर्थः । तथा प्रमोदं पुत्रराज्याभिषेकाद्युद्भवं हर्षं प्रतिया इति । उ इति संबोधने । तर्तिक[6] नु शेते यन्नाद्यापि पुत्रो भवतीत्यर्थः ॥ तत्तस्माद्धेतोरहं वल्गूयच्छोभनमोजः सत्त्वं यस्य सोतिसात्त्विकोत एव शुचीभूय[7] बाह्याभ्यन्तरमलप्रक्षालनेन निर्मलीभूय परिचीयमानमभ्यस्य[8]मानं समाधिं[9] चित्तैकाग्र्यं चेचीयमानो[10]त्यर्थं पोषयन्सन्मां[11] लक्ष्मीदेवतामधियासं संस्मर्यासमास्नूयासं संकीर्तयेयम् । यतः कीदृशोहं संततीयन्संततिमिच्छंस्तथा भृशायमानः संततिप्राप्तौ त्वरमाणः । तथात्र जगति या लक्ष्मीरापदि मात्रीयतां मातरमिच्छतां नृणां क्रियाभिः पालनपोषणा[12]दिभिः कृत्वा मात्रीयते मातेवाचैर[13]त्यै[14]थाथ वा मात्रीभवति जनन्येव स्यात् सा लक्ष्मीरद्याह्रियमाणभक्तेर्नि[15]श्चलभक्तेर्मे मम तपसा जेह्रीय्यमाणात्यर्थमावर्ज्यमाना सती कृपां दयां क्रियान्ममैवेत्थम् ॥

जेघ्नीयते[16] । अत्र "हनो[17] घ्नीर्वधे[18]" [९९] इति[19] घ्नीः ॥ वध इति किम् । गतौ जङ्घनिता ॥ केचिद्धन्तेर्वधे घ्नी-आदेशं[20] वाहुस्तन्मते वधार्थेपि जेङ्घनि[21]तेति स्यात् ॥

अभिघातः । धैर्यघाती[22] । इत्यत्र[23] "ञ्णिति घात्" [१००] इति घात् ॥

अघानि । जघान । इत्यत्र "ञिणवि घन्[24]" [१०१] इति घन् ॥

१ ई °था स्तत्स्प°. २ सी °सौत्यर्थः । तत्त°. ३ प °वेजीवंन्पु°. ४ बी डी °वत्पुत्र°. ५ प ई °त्रमुखं. ६ प तत्कं नु. ७ प° चीय. ८ डी °मस्य°. ९ सी °माधिं. १० बी °यमनो°. ११ ई °न्समां ल°. १२ प °णा मा°. १३ बी °चरित्य°. १४ डी °त्यथ°. १५ बी °निश्चिल°. १६ ई °यत । अ°. १७ प °नोघ्नी वधे. १८ बी घ्नीवधे. १९ प °ति घ्नी ॥ व°. बी सी डी °ति घ्नी ॥ व.° २० प °शं चाहु°. ई °शं नाहु°. २१ बी जघनि°. २२ प ई धैर्यघा°. २३ प °त्र ञिंणति. २४ प घङ् इ°.

अनेशत् अनशम्। अत्र "नशेर्नेश्वाङि"[1] [१०२] इति वा नेश्[2] ॥ अङीति किम् । नश्यामि

अश्वम् । आस्थम् । अवोचम् । अपतम् । अत्र "श्वयति°" [१०३] इत्यादिना श्व-अस्थ-वोच-पैप्ताः[3] ॥

शेते । अत्र "शीङ एः शिति" [१०४] इत्येत् ॥

असंशय्य । ध्यानैशय्यैः[4][5] । अत्र "क्ङिति यि शय्"[6] [१०५] इति शय् ॥

समुह्यते । अत्र "उपसर्गाद्°" [१०६] इत्यादिना ह्रस्वः ॥

अभ्युदियाः । अत्र "आशिषीणः" [१०७] इति ह्रस्वः ॥ ननु प्रतीयाः इत्यत्र समानलक्षणे दीर्घे सति कथं न ह्रस्वः । न । दीर्घे सत्युपसर्गात्परस्येणोऽभावात् । केचिदत्रापीच्छन्ति । प्रतियाः ॥ इकोपि समानदीर्घत्व इच्छन्त्येके । अधियासम्[7] ॥

च्वि । शुचीभूय ॥ यङ् । चेचीयमानः ॥ यक् । वल्गूयत् ॥ क्यन् । संततीयन् ॥ क्यङ् । भृशायमानः ॥ क्य । परिचीयमानम्[8] ॥ आस्तूयामम् । अत्र "दीर्घश्च्वि°"[9] [१०८] इत्यादिना दीर्घः ॥ बहुवचनात्क्यशब्देन क्यन्क्यङ्[10] क्यङ्य(?)क्यानामविशेषेण ग्रहणम् ॥

मात्रीभवति । जेह्रीय्यमाणा[11] । मात्रीयताम्[12] । मात्रीयते[13] । अत्र "ऋतो री'(रीः)'[14] [१०९] इति रीः ॥

क्रियाभिः । अह्रियमाण । क्रियात् । इत्यत्र[15] "रिः श°" [११०] इत्यादिना रिः ॥

---

१ ई °शेनेश्वा°. २ प नेश ॥ अ°. ३ प सी °पप्ता ॥ शे°. ४ प °नशाय्यैः. ५ ई °शय्यै । अक्ङि°. ६ बी यि शिय्. ७ प ई °म् । च्वि । शु°. ८ प सी डी °म् । अ°. ९ प °दीर्घश्चि इ°. १० प क्यच्क्य°. ११ सी डी °ह्रीयमा°. १२ प सी °ता । मा°. १३ डी °यन्ते । अ°. १४ प बी सी ई °ति री ॥ क्रि°. १५ प °त्यत्र रिःशदित्या°.

दीप्रीकृतैः[1]। मालीकृत। इत्यत्र "ईश्च्वौ°" [११] इत्यादिना-ईः[2] ॥ अनव्य-यस्येति[3] किम्। दिवाभूते ॥

सुतीयन्[4]। इत्यत्र "क्यनि"[5] [११२] इति-ईः ॥

अशनायोदन्याधनायाः[6]। "क्षुत्तृड्°"[7] [११३] इत्यादिना निपात्याः ॥

तत्रावृषस्यन् गुरुणाप्यनश्वस्यता रहोध्यापितलक्ष्मिमन्त्रः।
वारिस्यतां विस्मयमप्यवार्येस्यंस्तापसानां नृपतिस्ततान ॥ ८ ॥

८. तत्र श्रीवेश्मनि नृपतिः कर्णोवार्येस्यन्वार्येपि[8] पातुमनिच्छन्[9]संन्वा-रिस्यतां[10] वारि पातुमिच्छतां तापसानामपि। अपिरत्र योज्यः। आस्ता-मन्येषामित्यप्यर्थः। विस्मयमाश्चर्यं[11] ततान चक्रे। कीदृशः। अवृष-स्यन्। वृषं[12] मैथुनमनिच्छन्। तथा गुरुणापि मन्त्राचार्येणाप्यनश्वस्य-ताश्वं मैथुनमनिच्छता सता रह एकान्तेध्यापितलक्ष्मिमन्त्रः पाठितल-क्ष्मीदेवतामन्त्रः ॥

अवृषस्यन्। अनश्वस्यता। इत्यत्र "वृष°" [११४] इत्यादिना[13] सो(स्सो?)न्तः ॥

वारिस्यताम्[14]। अवार्येस्यन्। इत्यत्र "अस्[15] च लौल्ये" [११५] इति सो-(स्सो?)स् चान्तः ॥

पञ्चदशः पादः संपूर्णः ॥

---

१ ए दीप्रीकृ°. २ ए °नाई ॥ अ°. ३ ए °व्ययः। से°. ४ ए °त ॥ स्तृती°. ५ ए सी क्यति इ°. ६ बी °दन्यध°. ७ ए बी सी °नाया। क्षु°. ८ ए °न्वापि. ९ बी °च्छन्वा°. १० ए °न्सस्वारि°. ११ ए °मामनि°. १२ बी वृषं मै°. १३ ए इण्णादि°. १४ ए °ता। अ°. १५ ए °स् चालोल्यति.

न पर्य[1]भूत्कं चन[2] न व्यवोचज्जपाक्षरं स्मास्ति रहो ब्रुवाणः ।
स्त्रीणां समाजे समजे[3]ऽन्वजानां[4] विवाय दृष्टिं स वशी न जातु ॥९॥

९. स कर्णं उपशमिततमोगुणत्वेन कं चन शत्रुमपि न पर्यभून्न न्यक्कृतवांस्तथा कं चन न व्यवोचन्न विरुद्धं भाषितवांस्तथोपशमितरजोगुणत्वाद्वशी जितेन्द्रियः सन्सोजा[1]नां छागीनां समजे नु समूह इव स्त्रीणां समाजे[2] वृन्दे जातु दृष्टिं न वि[3]वाय रागेर्ण[4] न चिक्षेप किं तु रह एकान्ते[5] जपाक्षरं जापवर्ण[6] मन्त्रं[7] ब्रुवाण उच्चारयन्नस्ति[8] स्म तस्थौ ॥

स द्विट्घ्नमज्यां तनुगां प्र[6]वेतांहः प्राजिता प्राजनवत्तपोभिः ।
द्राक्प्रा[7]वयण्यं कलयद्भिरब्जै[8]र्विघ्नान्प्रवेतुं श्रियमर्च[9]ति स्म ॥ १० ॥

१०. स कर्णोऽब्जैः[9] कृत्वा श्रियमर्चति[10] स्म । किंभूतैः । विघ्नानन्तरायान्प्रवेतुं क्षेप्तुं प्रावयण्यं तोत्रदण्डतां कलयद्भिर्धारयद्भिः[11]। सौरभा[12]तिशयेन विघ्नविनायकानां वशीकारित्वाद्विघ्नक्षेपदक्षै[13]रित्यर्थः । कीदृक्सन् । प्राजनवत्तोदनतुल्यैरतितीक्ष्णैरित्यर्थः । तपोभिः कृत्वा तनुगामन्तरङ्गां[14] द्विट्घ्नमज्यां कामाद्यरिषड्कसभां द्राक्प्रवेता क्षेप्तात एवांहः[15] पापं प्राजिता ॥

१ ए °र्यम्भूक्तं च. २ ए न च व्य°. ३ डी °जे त्वजा°. ४ ए विचार्यं वृष्टिं स. ५ ए जातुः ॥ स. ६ डी प्रवातां°. ७ ए °क्प्राचवण्यं. ८ ए °रद्वैर्वि°. ९ ए °मर्थति.

१ बी °नां छगी°. २ ए °जे वन्दे. ३ ए विवरनवविमेणचि°. ४ सी डी °ण चि°. ५ ए °न्ते पा°. ६ सी °वर्ण म°. ७ ए °त्रं ध्रुवा°. ८ ए °यन्वस्ति स तस्थौ. ९ ए र्णोब्जैकृ°. १० ए °मर्थति. ११ ए °यद्भि । सौ°. १२ डी °भाविजये°. १३ ए °द्विश्नक्ष°. १४ ए °रज्ञा द्वि°. १५ ए एवाहः.

क्शाता न हि प्राजितुमप्यनिष्टख्यातारमों ब्रह्म स किं नु चक्शे ।
ब्रह्मा न चख्शे[1] मुरजिन्न चख्ये न चाचचक्षे[2][3] च यथेन्दुमौलिः
॥ ११ ॥

११. स कर्ण उपशान्तत्वादनिष्टख्यातारमप्यप्रियवक्तारमपि नरं प्राजितुं निराकर्तुं न हि नैव क्शाता वक्ता किं तु ब्रह्म परमध्येयमोमो[1]-ङ्कारं तथा चक्श उच्चारितवान् यथा ब्रह्मा न चख्शे[2] यथा[3] मुरजिद्वि-ष्णुर्न च[4]ख्ये यथेन्दुमौलिश्च हरश्च नाचचक्षे ॥

पर्यभूत् । व्यवोचत् । इत्यत्र "अस्ति॰" [१] इत्यादिना भूवचौ[5] ॥ अशि-तीति किम् । अस्ति[6] । ब्रुवाणः[7] ॥

विवाय । इत्यत्र "अघञ्[8]॰" [२] इत्यादिना वीः ॥ अघञ्क्यबलचीति[9] किम् । समाजे । समज्या[10]म् । समजे । अजानाम् ॥

[11]प्रवेता प्राजिता । [12]प्रावयण्यम् प्राजन । इत्यत्र "अने वा" [३] इति वा वीः ॥ अन्ये त्वने प्रत्यये यकाररहिते व्यञ्जनादौ[13] चाविशेषेण विकल्पमिच्छन्ति । प्रवेता प्राजिता । प्रवेतुम् प्राजितुम् ॥

क्शाता[14] । ख्यातारम् । अत्र "चक्षो वाचि॰" [४] इत्यादिना क्शाङ्ख्याङौ ॥

च[15]क्शे । चख्शे । चख्ये । अत्र "न वा॰" [५] इत्यादिना वा क्शाङ्ख्याङौ ॥ पक्षे । आचचक्षे ॥ च[16]ख्शे । अत्र "शिट्याद्यस्य द्वितीयो वा" [१.३.५९] इति कस्य खः ॥

---

१ ए बी ॰ख्शे मुर॰. २ बी ॰चक्ष्यं च. ३ ए ॰क्षेथ य॰.

१ ए ॰मो ओङ्कार त॰. सी ॰मो आकार. २ सी ॰ख्शेन चख्शे मु॰. डी ख्शे मु॰. ३ ए ॰थासुर॰. ४ बी ॰चख्शं य॰. ५ ए ॰चौ ॥ प्रशि॰. ६ ए ॰स्ति । ध्रुवा॰. ७ सी डी ॰णः ॥ व्यवा॰. ८ ए ॰घड् इ॰. ९ ए बी ई ॰क्यवल॰. १० ए ॰ज्या । समजो । अ॰. ११ ए प्रचेता. १२ ए प्रायवण्यम् प्रोज॰. १३ बी ॰दौ वावि.॰ १४ ए ॰ता । ख्योता॰. १५ बी चक्शौ । च॰. डी चक्षे । च॰ १६ ए चख्वे । अ॰.

भर्ष्टुं बलिं भ्रष्टुमथाज्यमाज्ञां[1] प्रत्तः प्रदत्तः कुसुमानि राजा ।
नीत्ताहुति[2]स्तैर्गुरुवीत्तमन्त्रैर्देव्यं विदत्तासन आबभासे[3] ॥ १२ ॥

१२. राजा कर्ण आबभासे शुशुभे । कीदृक्सन् । गुरुणाचार्येण विशेषेण[1] दीर्यन्ते[2] स्म गुरुवीत्ता[3] ये मन्त्रास्तैः कृत्वा देव्यै लक्ष्म्यै विदत्तासनो वितीर्णपीठस्तथा बलिमुपहारं भर्ष्टुं[4] पक्तुमथ तथाज्यं घृतं भ्रष्टुं[5] विलीनयितुमाज्ञामुत्तरसाधकानामादेशं प्रत्तः प्रदातुमारब्धस्तथा देव्यै कुसुमानि प्रदत्तः प्रदातुमारब्धस्तथा तैर्बल्याज्यकुसुमैः[6] कृत्वा देव्यै नीत्ताहुतिर्दत्तहव्यः । पीठमन्त्रोच्चारपूर्वं[7] देवीं पीठे स्थापयित्वा बलिभिः[8] पुष्पैराहुतिभिश्च पूजयन् राजाभादित्यर्थः ॥

जजाप नासाग्र[4]निदत्तनेत्रोक्षसूत्रसूत्ताङ्गुलिकः क्षितीशः ।
सुदत्तचित्खे विदवत्तमन्त्रैरनूत्तपुष्पै[5]रनुदत्तहोमैः ॥ १३ ॥

१३. क्षितीशः कर्णो जजाप । कैः कैः कृत्वा विदवत्तमन्त्रैर्विदा[9] गुरुणावत्ता दत्ता ये मन्त्रास्तैस्तथानूत्तपुष्पैर्दत्तकुसुमैस्तथानुदत्ता ये होमा[10] अग्नौ तिलादिहवनानि[11] तैश्च मन्त्रजापं पुष्पजापं होमजापं च चकारेत्यर्थः । कीदृक्सन् । नासाग्रनिदत्तनेत्रस्तथाक्षसूत्र[12]सूत्ताङ्गुलिको जपमालिकायां[13] संस्थापिताङ्गुलिकस्तथा खे आकाशे सुदत्तचित्[14]संनिवेशितचित्तो[15]खिलेन्द्रियविषयव्यावृत्त्या निराकारध्यानं कुर्वन्नित्यर्थः ॥

१ ए °माशा प्र°. २ ए नीत्याहु°. ३ **सी डी** °से ॥ म रा°. ४ ए नाशाग्र°. ५ **बी डी** °पुष्फैर°.

१ **सी डी** °ण हीय°. २ ए °यते स्म. ३ ए **सी डी** °वीत्ता म°. ४ ए भष्टु प°. ५ ए °तं स्रष्टुं. ६ ए °ल्यैर्नीत्वाहु°. ७ ए °मन्त्रोच्चा°. ८ ए बहुलि°. ९ ए °मन्त्रिर्वि°. १० **बी** °माऽग्नौ. ११ **सी डी** °नादि तै°. १२ ए °क्षमूत्रसूत्रागुलि°. १३ ए °पनालि°. १४ ए °चित्सनि°. १५ **बी** °त्तोखले°.

आ[1]त्तावदत्तैर्बलिभिः स इत्थं समाहितो धीतसुधारसो नु ।
स्थित[2]ः सितांहा अदि[3]तामितौजा दिनान्यमातानि तपःशिताङ्गः ॥ १४ ॥

१४. स कर्णोमातान्यसंख्यानि दिनानि स्थितः । कीदृक्सन् । इत्थमुक्तगी[1]त्यात्तावदत्तैरात्ताः पूर्वमुत्तरसाधकेभ्यो गृहीता येवदे[2]त्ताः पश्चाल्लक्ष्म्यै प्रद[3]त्तास्तैर्बलिभिः पू[4]जोपकरणैः कृत्वा सितांहा विनाशितविघ्नस्तथा तपःशिताङ्गस्तपश्चरणकृशदे[5]होत एवादितामितौजा अप्रतिहतासंख्यत[6]पःप्रभावस्तथा समाहितः समाधिवानत एव धीत[7]सुधारसो नु पीतपीयू[8]ष इव ॥

अन्येद्युरच्छातनिशातबुद्धौ हि[4]त्वान्यकर्मा[5]च्छितसंशितेस्मिन् ।
अभूज्जहित्वा समयं स्वसामग्रिकामजाहित्व ऋतुर्घनानाम् ॥ १५ ॥

१५. अन्येद्युर्घनानामृतुर्वर्षाकालोभूत । किं कृत्वा । समयं स्वकालं जहित्वा त्यक्त्वा[9]काल इत्यर्थः । तथा स्वसामग्रिकां विद्युदादिसंपदमजाहित्वा[10] गृहीत्वा । क सति । अस्मिन्कर्णे । किंभूते । अच्छाताखण्डिता निशाता तीक्ष्णा बुद्धिर्ज्ञानं यस्य तस्मिन् । तथान्यकर्म तपस इतरद्राज्यादि कार्यं हित्वा[11]च्छितमखण्डितं संशितमसिधारातीक्ष्णं व्रतं यस्य तस्मिन् । यद्वा । अकर्मकत्वविवक्षा[12]यां संश्यति स [13]संशितो व्रते यत्नवान् । [14]अच्छितो यः संशितस्तस्मिन्[15] ॥

१ ए बी सी आत्तावदत्तैर्ब°. २ ए °तः सतां°. ३ ए °तामिता°. ४ ए हितान्य°. ५ सी डी °र्मास्थित°.

१ ए बी सी °त्यात्तावदत्तैरात्ताः पू°. २ डी °दत्ताः प°. ३ डी °दत्तास्तै°. ४ ए पूजौप°. ५ ए °देशोत°. ६ ए °तपप्र°. ७ ए °तमुधा°. ८ बी °यूख इ°. ९ ए क्त्वा इका°. १० सी डी °त्वा क. ११ ए °त्वा इच्छि°. सी डी °त्वा स्थित°. १२ ए °क्षाया सं°. १३ ए संसितो. १४ ए अस्थितो. १५ ए °न् ॥ अष्टुं अ°.

भर्ष्टुम्[1] भ्रष्टुम् । अत्र "भृज्जो भर्ज्" [६] इति वा भर्ज् ॥

प्रत्तः[2] प्रदत्तः । अत्र[3] "प्राद्दाग°" [७] इत्यादिना वा त्तः ॥

नीत्त निर्दत्त[4] । वीत्त विदत्त[5] । सूत्त सुदत्त । अनूत्त अनुदत्त । अवत्त[6] अवदत्तैः[7] । अत्र "निवि°" [८] इत्यादिना वा त्तः ॥

आत्त । इत्यत्र "स्वराद्°" [९] इत्यादिना त्तः ॥ अध इति किम् । समाहितः ॥

अवदत्तैः । अत्र "दत्" [१०] इति दत् ॥ अध इत्येव । धीत ॥

अदित । सित । अमित । स्थितः । अत्र "दोसोमास्थ इः" [११] इति-इः ॥ गामादाग्रहणेष्वविशेष इति मा-माङ्-मेङां ग्रहणम् । अन्यस्तु माङ्मेङो-रेवेच्छति । मातेस्तु । अमातानि ॥

अच्छित[10] । अच्छात । शित निशात । इत्यत्र "छाशोर्वा" [१२] इति[11] वा-इः ॥

संशिते । अत्र "शो व्रते" [१३] इति[12]-इः ॥

हित्वा । इत्यत्र "हाको हिः क्त्वि" [१४] इति हिः ॥ यङ्लुपि । जहित्वा ॥ द्वित्वे[13] पूर्वदीर्घत्वमपीच्छन्त्येके । अजाहित्वा । उभयत्रेटि-आतो[14] लुक् ॥

जग्धप्रकाशा विहितान्धकारा दिवं प्रजग्ध्याभिजिघत्सवः[1] क्ष्माम् ।
मेघा जलौघैरघसन्[2]सघासैः स्फुटप्रैवासि[3]प्रघसैर्दिगन्तान् ॥ १६ ॥

१६. मेघा जलौघैर्दिगन्तानघसन्व्यापुः । कीदृशाः सन्तः । जग्ध-

---

१ प °वः क्ष्म्याम् । २ प जलोघ°. ३ प °प्रकामि°.

१ प भर्जे ॥ प्र°. २ डी °त्तः अ°. ३ प °त्र प्रद्दा°. ४ डी °दत्तः । वी°. ५ प ई °त्त । सुत्त. ६ डी °वद°. ७ प °दत्तेः । अ°. ८ प माडो°. ९ प डी अस्थितः । अ°. १० सी °च्छिनः । अच्छातः । शि°. ११ बी °ति-इः ॥. १२ बी °ति । हि°. १३ प °त्वे दीघपू°. १४ प डी °टि-अतो.

प्रकाशा भक्षितोद्योताः । अत एव विहितान्धकारास्तथा दिवमाकाशं प्रजग्ध्य व्याप्येत्यर्थः । क्ष्मामभिजिघत्सवो व्याप्तुमिच्छवः । कीदृशै-र्जलौघैः । सघासैर्विद्यमानतृणैस्तथा स्फुटं प्रवासिनां पान्थानां प्रघसैः पीडकैः प्रादन्तीत्यच्। यद्वा । प्रादनम् अलि प्रघसः । स्फुटः प्रवासिनां प्रघसः पीडा येषु तैः ॥

विहित । इत्यत्र "धागः" [१५] इति हिः ॥

जग्ध । प्रजग्ध्य । इत्यत्र "यपि°" [१६] इत्यादिना जग्धः ॥

अभिजिघत्सवः । अघसन् ॥ कर्मणि घञि । घासैः । प्रघसैः । अत्र "घस्लृ°" [१७] इत्यादिना घस्लृः ॥

श्रुतीर्जघासाद दृशो यथाब्दस्तथा ववौ नादमुवाय वज्रम् ।
नदीः पुपूर्वान्पपृवान्सरांसि स्थलीः शिशीर्वान् शशृवान् गिरींश्च ॥ १७ ॥

१७. अब्दो मेघस्तथा नादं गर्जा ववौ संबद्धवान् । यथा श्रुतीः कर्णाञ्जघासाभक्षयदिव । तथा वज्रं विद्युतं तथोवायाग्चयद्यथा दृशो-क्षीण्याद गर्जां विद्युतं चातितीव्रां चकारेत्यर्थः । उत्तरार्धं स्पष्टम् ॥

योद्रीन्दिदीर्वान्ददृवान्बलं तं वध्याः स्मरास्त्रैरथ घानिषीष्ट ।
त्वया वियोगी मरुतापि कोपि त्वां मा वधीदित्यरसन्नुमेघः ॥१८॥

१८. मेघ इति न्विदमिवारसदवोचत् । किं तदित्याह । हे स्मर योद्रीन्दिदीर्वान्वज्रेणादारयत् । तथा यो बलं बलाख्यं दैत्यं ददृवांस्त-

१ ए बी °र्व्रांश्च°. २ सी डी गिरींश्च. ३ डी °रवघा°.

१ ए °जिघित्सवो व्याप्नुमि°. २ ए सी °ति हि ॥ ज°. ३ ए बी सी °जग्ध । इ°. ४ डी °जग्ध् ॥ अ°. ५ ए घडि । घा°. ६ ए बी घस्तृः ॥ श्रु°. ७ ए °बद्वा°. ८ ए सी डी °तीव्रं च°.

मिन्द्रं त्वमस्त्रैः शरैर्वेध्या अर्थं तथा वियोगी कर्मतापन्नस्त्वया कर्त्रा मरुताप्यासतामस्त्राणि पुरोवातेनापि कृत्वा घानिषीष्ट हन्यतां तथा त्वां कोपि हरादिरपि मा वधीदिति । वर्षासु हि मेघा गर्जन्ति स्मरश्चातिजैत्रः स्यादित्येवमाशङ्का ॥

पुष्पैः स्मरो व्याहत नावधिष्ट शस्त्रैर्न मन्त्रायुधमध्यगाद्वा ।
प्रत्याययञ्शक्तिमगाज्जयं स वशं त्रिलोकीं गमयंस्तथापि ॥१९॥

१९. यद्यपि स्मरः पुष्पैर्व्याहत प्राहरन्न तु शस्त्रैर्व्योमयात्रैराव-धिष्ट न च मन्त्रायुधं मन्त्रप्रधानमस्त्रं वायव्याद्यध्यगादस्मरत्तथापि स स्मरो वर्षामाहात्म्येन जयमगात्प्राप । कीदृक्सन् । शक्तिं स्वसामर्थ्यं प्रत्याययञ्ज्ञापयन्नत एव त्रिलोकीं वशं स्वायत्ततां गमयन्प्रापयन् ॥

केकारवैस्तन्त्र्यधिगम्यते यैर्व्यरावि षड्जाधिजिगांसया तैः ।
सद्यश्च हंसैरजिगांस्यतार्थं स मानसस्याधिजिगांस्यते च ॥ २० ॥

२०. यैर्मयूरैः केकारवैः कृत्वातिमाधुर्यात्तन्त्री वीणाधिगम्यते स्मार्यते तैर्मयूरैः षड्जाधिजिगांसया षड्जस्वरपिपठिषया व्यरावि षड्जस्वरः कृत इत्यर्थः । मयूरा हि षड्जस्वरं कुर्वन्ति । तथा सद्यः केकाश्रवणकाल एव हंसैश्चाजिगांस्यत गन्तुमिष्टमथानन्तरं मानसस्य सरसोधिजिगांस्यते स्म च सुस्मूर्षितम् ॥

जघास आद । इत्यत्र "परोक्षायां न वा" [१८] इति वा घस्लृः ॥

उवाय ववौ । अत्र "वेर्वय्" [१९] इति वा वय् ॥

१ डी °ध्यगीद्वा. २ बी °थ स्मा मा°.

१ ए °थ यथा. २ सी °न्न शास्त्रं°. ३ सी °स्त्रैरव°. ४ बी मत्रायु°. ५ डी °ध्यगीद°. ६ सी जमागा°. ७ ए °यमापत्प्रा°. डी °यमागा°. ८ डी षड्जाधि°. ९ डी षड्जस्व°. १० बी डी षड्जस्व°. ११ बी डी षड्जस्व°. १२ सी डी °श्चाधिजि°. १३ ए °मन्दान°. १४ डी सरोधि°. १५ सी घस्लृ॥ उ°.

शश्रवान् शिशीर्वान् । ददवान् दिदीर्वान् । पपृवान् पुपूर्वान् । अत्र "ऋः शृदृप्रः" [२०] इति [वा] ऋः ॥

वध्याः । अत्र "हन°" [२१] इत्यादिना वधः । अनाविति किम् । घानिपीष्ट ॥

मा वधीत् । इत्यत्र "अद्यतन्यां वा°" [२२] इत्यादिना वधः । वा त्वात्मने । आवधिष्ट । व्याहत ॥

अगात् । अध्यगात् । इत्यत्र "इणिकोर्गाः" [२३] इति गाः ॥

गमयन् । अधिगम्यते । अत्र "णौ°" [२४] इत्यादिना गमुः ॥ अज्ञान इति किम् । प्रत्याययन् ॥

इङ् । अधिजिगांस्यते ॥ ईक् । अधिजिगांमया ॥ इण । अजिगांस्यत । इत्यत्र "सनीङश्च" [२५] इति गमुः ॥

स्वनद्धनेनाधिजिगापयिष्यमाणो मयूरोधिजगे सुनृत्तम् ।
तेनैव चाध्यापिपयिष्यमाणामध्यापिपत्स्वां दयितां च हृष्टः॥२१॥

२१. मयूरो नृत्तमधिजगेधीतवांश्चकारेत्यर्थः । यतः स्वनद्धनेन गर्जता मेघेन कर्त्रा नृत्तमधिजिगापयिष्यमाणो गर्जया पाठयितुमिष्यमाण इव । तथा तेनैव च स्वनद्धनेनैव च नृत्तमध्यापिपयिष्यमाणां शिक्षयितुमिष्यमाणां स्वां दयितां च मयूरी च हृष्टः सन्मयूरो नृत्तमध्यापिपदपाठयत् । मेघगर्जा श्रुत्वा मयूरदम्पती नृत्ताविति तात्पर्यार्थः ॥

१ **ए** शृदृप्रः. २ **डी** °यत् । अ°. ३ **सी डी** इक । अ°. ४ **ए सी डी** अधिजि°. ५ **डी** °स्यते । इ°. ६ **ए ई** पाठितु°. ७ **ए ई** °व स्व°. ८ **ई** स्वनद्ध°. ९ **ए** °प XXX दपा°. १० **बी** °यिनां च. ११ **ई** च हृ°.

अध्यैष्ट यांस्तान्पुनरध्यगीष्टाध्यजीगपंस्त्रैणमितश्च रासान् ।
हल्लीसमध्यैष्यत चेद्भवत्यध्यगीष्य इत्याशु मिथो ब्रुवाणम् ॥२२॥

२२. इतोस्मिन्वर्षाऋतौ स्त्रैणं यान गमानध्यैष्टापाठीन । तान्रासान गेयकाव्यविशेषान्पुनर्भूयोप्यध्यगीष्टाध्यजीगपच्चान्यस्त्रैणमेव कर्मापीपठच्च रासान्स्वयं द्विस्त्रिर्वोच्चार्यान्यस्त्रैणेनोच्चारयामासेत्यर्थः । वृष्टौ हि स्त्रियः प्रमुदिता गमान्ददति । कीदृक् । मिथोन्योन्यं ब्रुवाणम् । किमित्याह । चेद्यदि भवती त्वं हल्लीसं नारीणां मण्डलीनृत्तमध्यैष्यताशिक्षयिष्यत तदाहमपि हल्लीममाश्वध्यगीष्ये शिक्षिष्य इति । केचिद्भूतेपि हेतुफले क्रियातिपत्तिमिच्छन्ति तन्मतेत्र क्रियातिपत्तिः ॥

मूर्छीत्प्रिया मेत्यवदंश्चिरायाध्यायन्निरगैन्पथि कष्टमासन् ।
पान्थास्तदा व्योम्नि यदा पयोद आटीद्बलाकाततिराटदारात् ॥ २३ ॥

२३. यदा व्योम्नि पयोदो मेघ आटीत्प्रससार तथारान्निकटे बलाकाततिराटद्भ्राम्यत्तदा पान्थाश्चिरायाध्यायन्नस्मरन्नवदंश्च । किमित्याह । प्रिया जातावेकवचनम् । वल्लभा मा मूर्छीदस्मद्वियोगे मा विचेतीभूदिति । अत एव निरायन्यस्मिन्देशे गता आसंस्ततो निर्गता अत एव च पथि जलदुर्गत्वात्कष्टमासन ॥

न चेद्घनाटिष्य इहाभविष्यं कथं तृषाहं भविता विहस्तः ।
चिरं तदास्स्वेति वदन्किलास्ते स्म चातकः पत्रपयोपि लिप्सुः ॥२४॥

२४. चातक आस्ते स्म तस्थौ । कीदृक्सन् । वदन् किल मेघदर्श-

१ ई °पस्त्रैण°. २ प सी °मध्येष्य°. ३ बी °यत्पथि.

१ प °षात्पुन°. २ प °मध्येष्य°. ३ ई °यिक्षन. ४ सी °ष्यति तदा°. ५ प °शिष्य°. ६ ई °ते क्रि°. ७ सी °त्प्रशसा°. ८ बी तदारा°. ९ सी °दबभ्रा°. १० प °म्यस्तदा. ११ प तस्वौ । की°.

नोत्थकूजितैर्भणन्निव । किमित्याह । हे घन चेत्त्वमिहाकाशे नाटिष्यस्तदाहं तृषा कृत्वा विहस्तो भविता व्याकुलो भवन्कथमभविष्यंस्तत्तस्माद्धेतोस्त्वं चिरं बहुकालमास्स्व तिष्ठेति[1] । यतः पत्रपयोपि वृक्षपर्णोत्पतज्जलबिन्दुमात्रमपि मेघोन्मुक्तजलकणभ्रान्त्या लिप्सुः । एतेनास्य तृष्णाधिक्यमुक्तम् ॥

अधिजगे[3] । अत्र "गा°" [२६] इत्यादिना गाः ॥

अधिजिगापयिष्यमाणः अध्यापिपयिष्यमाणाम्[3] । अध्यजीगपत् अध्यापिपत् । इत्यत्र "णौ सन्ङे वा" [२७] इति वा गाः ॥

अध्यगीष्ट अध्यैष्ट । अध्यगीष्ये अध्यैष्यत[4] । इत्यत्र "वाद्यतनी°" [२८] इत्यादिना वा गीङ् ॥

अवदन् । अध्यगीष्ट । अध्यगीष्ये । अत्र "अड् धातोर्°" [२९] इत्यादिना-अडादिः ॥ अमाङेति किम् । मा मूर्च्छीत् ॥

निरायन् । अध्यायन्[6] । आसन् । इत्यत्र "एति°" [३०] इत्यादिना वृद्धिः ॥

आटीत् । आटिष्यः । आटत् । इत्यत्र "स्वरादेस्तासु" [३१] इति वृद्धिः ॥

अभविष्यम् । भविता । इत्यत्र "स्तादि" [३२] इत्यादिना-इट् ॥ अशित इति किम् । आस्स्व । आस्ते ॥ अत्रोणादेरिति किम् । पत्र[7] । उणादि । विहस्तः ॥

चक्रे धनुष्कम्पि[1]तिसंगृहीतीर्जयं[2] ग्रहीतुं शमसंवरीता ।
शरैर्जगत्प्रावरिता वरीता प्रीते रतेर्वा वरिता स देवः ॥ २५ ॥

२५. शमसंवरीतेन्द्रियजर्यस्याच्छादयिता[8] प्रीतेर्वरीता वरो रतेर्वा

१ ई धनुःकम्पि°. २ सी डी °यं गृही°.

१ ई °ष्ठेत । य°. २ सी अत्र. ३ ए बी °माणम्. ४ डी अधैष्य°. ५ ई अद्भुतो°. ६ सी °ध्यास°. ७ सी डी पत्र । उ°. ८ सी डी °यस्यच्छा°.

वरितेंा स प्रसिद्धो देवः कामो धनुष्कम्पितिसंगृहीतीः अल्पस्वरत्वात्कम्पितेः प्राक्निपाते धनुषः संग्रहणानि कम्पनानि च चक्रे । यतो जयं ग्रहीतुं वर्षाबलेन प्राप्तुं शरैर्जगत्प्रावरिता व्याप्नुवन ॥

तटान्दरित्रीर्विटपान्दरीत्रीर्नदीः सुखं तेरिथ नाथ कच्चित् ।

सद्यो रतिस्त्वां वरिपीष्ट विस्तरिषीष्ट चेत्थं पथिकं प्रियोचे ॥२६॥

२६. प्रिया पथिकमूचे । कथमित्याह । कच्चिदिष्टपरिप्रश्ने । हे नाथ नदीः सुखं सुखेन तेरिथ । कीदृशीरनिजलापूर्णत्वेन तटान्दरित्रीर्विदारयित्रीस्तथा विटपान्वृक्षान्दरीत्रीः । तथा सद्यो नदीतरणानन्तरमेव त्वां रतिः सुखं निधुवनं वा वरिपीष्ट सेवतां तथा रतिर्विस्तरिषीष्ट च विस्तृणीयाच्चेति ॥

व्यस्तारिषुः षट्चरणाः कदम्बान्यावारिषुर्वासवकार्मुकं च ।

समास्तरिष्टाम्बरमावरिष्ट व्यस्तीर्ष्ट गां प्रावृत शाड्वलं च ॥ २७ ॥

२७. षट्चरणा भृङ्गा व्यस्तारिषुर्बाहुल्याद्विस्तृता अत एव कदम्बानि कदम्बतरुपुष्पाणि कर्मावारिषुराच्छादयन । वर्षासु हि धारांकदम्बाः पुष्प(ष्य?)न्ति । तथा वासवकार्मुकं चेन्द्रधनुश्च समास्तरिष्ट विस्तृतमत एवाम्बरं व्योमावरिष्ट व्याप । तथा शाड्वलं च । जातावेकवचनम् । सस्येन हरितानि स्थानकान्युपचाराद्धरिततृणानि वा व्यस्तीर्ष्टात एव गां पृथ्वीं प्रावृत ॥

१ ई कश्चित. २ ए °मामरि°.

१ ए °ता सः प्र°. २ बी °ष्कम्पति°. ३ ए सी डी °नि चक्र. ४ सी डी °यं गृही°. ५ डी °ष्टप्र°. ६ ए °ष्ट वि°. ७ ए °याश्चेति. ८ ए °णाभ्यङ्गा. ९ ए °दम्बोनि. १० ए बी सी °पुष्फाणि. ११ सी डी °राभिः क°. १२ ए °वान्तर. १३ ए °तनृणा°. १४ सी °श्रृतः ॥. ए °वृतः ॥ नृषी°.

वृषीष्ट केकां मृदु लास्यमास्तीर्षीष्टाशु[1] ते चेद्भवतास्मृषाताम् ।
पुरा हि ये व्यस्मरिपूर्वषातां[2] शिखण्डिनीतीव[3] ललाप[4] कान्तम्
॥ २८ ॥

२८. शिखण्डिनी मयूरी कान्तं मयूरं ललापेव मेघदर्शनोत्थस्वरेणोवाचेव । कथमित्याह । हे कान्त भवता ये केकालास्ये हि स्फुटं पुरा वर्षाकालात्पूर्वं व्यस्मरिपूर्वषातां[1] व्यस्मरिषातां चिरं[2] त्यागाद्विस्मृते[3] ते केकालास्ये चेद्भवतास्मृषातां मेघालोकेन स्मृते तदाशु केकां भवान्वृषीष्टाश्रीयात्तथा[4] मृदु लास्यं[5] नृत्तमास्तीर्षीष्ट विस्तीर्यादिति[6] ॥

स्मृषीष्ट गोप्त्री भवतेष्टदेवी प्रगोपिता वा स्मरिषीष्ट देवः ।
यत्ते धवित्री[5] तरुखण्डधोत्री[6] भोः[7] पान्थ झञ्झेत्यरमन्नु मेघः ॥२९॥

२९. मेघोरमन्नु गर्जयावोचदिव । किमित्याह । भोः पान्थ[7] तरुखण्डधोत्री[8] वृक्षवनस्य कम्पिका झञ्झा सशीकरो[9] वातो यद्यस्मात्ते धवित्री[10] कामोद्दीपकत्वेन कम्पिका तस्माद्भवता गोप्त्री रक्षिकेष्टदेवी[11] स्मृषीष्ट स्मर्यतां प्रगोपितेष्टदेवो वा[12] भवता[13] स्मरिषीष्टेति ॥

ररन्धिमैनं[7] न[8] न किं तु[9] रेध्मापिस्फायिपुर्यो[10] मदनं न चाना ।
पिस्फासुरस्त्वस्य[11] निचायिता[12] तत्केतक्य इत्यूचुरिवालिनादैः[13][14]
॥ ३० ॥

---

१ ए °र्षीष्टांशु. २ डी °ता कान्तललापेव शिषण्टिनीनि ॥ शिषण्डिनी म°. ३ ए शिषण्डि°. ४ सी °नी म°. ५ ए धरित्री. ६ डी ई °रुपण्ड°. ७ ई °न्धिमेनं. ८ बी °मैत न. ९ ए बी डी ननु किं. सी न तु कि. १० डी °रेध्मापि°. ११ ए °पिस्पायि°. १२ ए °चायता. १३ सी इत्युचूरि°. डी इत्युचु°. १४ ए °नादौ ॥ के°.

---

१ ए °रिपूर्वषातां चप त्या°. २ सी चिरत्या°. ३ ए °द्विसरिते. ४ ए सी °वान्नृषी°. ५ ए लास नृ°. ६ बी विस्तार्या°. ७ ए भो भ्यान्थ. ८ डी पान्था त°. ९ बी ससीक°. १० सी डी धरित्री. ११ ए ई रक्षके°. १२ बी वा स्म°. १३ ए भविता.

३०. केतक्योलिनादैरूचुरिव। किमित्याह। अपिस्फायिपुर्वर्धि-तुमनिच्छुः सन्यो मदनं न चाता न पूजयत्येनं मुन्यादिजनं वयं नै न ररन्धिम न न हतवन्तः किं तु ऽध्म वैयमेव तं हतवन्त एवे-त्यर्थः। तत्तस्माद्यः पिस्फासुर्जीवितव्यादिना वर्धितुमिच्छति सोस्य मदनस्य निचायिता पूजकोस्त्विति ॥

प्याता घनः प्यायितृकाम एवं मनांसि निष्कोष्टुमलं जनानाम्।
ध्यानक्रियानिष्कुषितं तु राज्ञो मनो न निष्कोषितुमीपदासीत्
॥ ३१ ॥

३१. एवमुक्तरीत्या प्याता वर्धिष्णुर्घनो जनानां मनांसि निष्को-ष्टुमाक्रष्टुं कामवासनया व्याकुलीकर्तुमित्यर्थः। अलं समर्थ आसीत्। यतः प्यायिता वर्धिष्णुः कामो यत्र सः। राज्ञस्तु कर्णस्य पुनर्मनो निष्कोषितुमीपन्मनागपि नालमासीत्। यतो ध्यानक्रियानिष्कुषितं प्रणिधानेनाकृष्टं वशीकृतमित्यर्थः ॥

संगृहीतीः। कम्पिति। इत्यत्र "तेर्" [३३] इत्यादिना-इट् ॥

ग्रहीतुम्। संगृहीतीः। अत्र "गृह्" [३४] इत्यादिना दीर्घः ॥

वृग्। संवरीता प्रावरिता। वृङ्। वरीता वरिता। ऋदन्त। दरीत्रीः

१ बी °यितृका°. २ ई °क्राम °. ३ ए मनांसि. ४ बी निःकोष्टु°. ५ ए ई °ष्कुपितं. ६ ए °ष्कोपितु°.

१ बी सी °त्येत मु°. २ ए ई न र°. ३ ए वयमे°. ४ ए °जीवित°. ५ ए °धित्तमि°. ६ ए पूजितो कोस्तिति. ७ डी °धिष्णुर्घ°. ८ ए मनासि. ९ ई °ष्टुका°. १० ए सी °धिष्णुका°. ११ ए °ष्कोपितु°. १२ ए °कृष्ण व°. १३ बी °हीती। क°. १४ डी °ट॥ गृही°. १५ ए °रीत्या व°. १६ ए °ता। ऋद°. १७ ए ई दन्ता। द°. १८ ई दरित्रीः दरीत्रीः। अ°.

दरित्रीः। अत्र "वृतो न वा°" [३५] इत्यादिना वा दीर्घः॥ परोक्षादिवर्जनं किम्। तेरिथ। वरिषीष्ट। विस्तरिषीष्ट। आवारिषुः। व्यस्तारिपुः॥

प्रावृत आवरिष्ट। व्यस्तीर्ष्ट समास्तरिष्ट। वृषीष्ट वरिषीष्ट। आस्तीर्षीष्ट विस्तरिषीष्ट। इत्यत्र "इट्°" [३६] इत्यादिनेड्वा॥

अस्मृषाताम् व्यस्मरिषाताम्। स्मृर्षीष्ट स्मरिषीष्ट। इत्यत्र "संयोगादृतः" [३७] इतीड्वा॥

धोत्री धवित्री। गोप्त्री प्रगोपिता। इत्यत्र "धूगौदितः" [३८] इतीड्वा॥

स्ताद्यशित इत्येव। रधोच। ररन्धिम॥ अन्यस्त्वत्रापि विकल्पमिच्छति। रेध्म॥ एके तु चायिस्फायिप्यायीनामपि विकल्पमिच्छन्ति। चाता निचायिता। पिस्फासुः अपिस्फायिषुः। प्याता प्यायितृ॥

निष्कोष्टुम् निष्कोषितुम्। अत्र "निष्कुषः" [३९] इतीड्वा॥

निष्कुषितम्। अत्र "क्तयोः" [४०] इतीट्॥

व्रश्चित्व ऋद्धं तिमिरं जरित्वा देवित्व ऋक्षाध्वनि हायुषित्वा।
द्यूत्वास्तभूभृत्युषितः क्षुधित्वेवात्रान्तरं प्रोषितवान्दिनेशः॥ ३२॥

३२. अत्रान्तरेऽस्मिन्प्रस्तावे दिनेशो रविः क्षुधित्वेव बुभुक्षितीभूयेव प्रोषितवान्देशान्तरं ययौ। यतोऽस्तभूभृत्यस्ताचले द्यूत्वा विलस्योषितः स्थितः। पूर्वं कीदृग्भूत्वापि। ऋद्धं स्फीतं तिमिरं व्रश्चित्वा

१ ए °श्चित्त ऋ°.

१ ए °त्र वृ्गो. २ बी °ना दी°. ३ बी °ष्ट। अवा°. ४ ए °रिपु। व्य°. ५ ई °स्तीष्ट। स°. ६ सी डी °मानरि°. ७ ए इतोड्वा. ८ सी डी °ड्वा॥ धात्री. ९ ई °न्धिन्॥ अ°. १० सी डी °ध्म॥ अपरे तु. ११ सी °ष्कोपि°. १२ ए ई नि कुपः. १३ ए ई निःकुपि°. १४ सी डी षितुम्. १५ ए ई °तोड्॥. १५ ए क्षुपित्वव पुभु°. १६ ए °त्वा। ऋ°.

खण्डशः कृत्वा जरित्वा क्षयं नीत्वा च तैर्थर्क्षाध्वनि व्योम्नि देवित्वा क्रीडित्वा तत्रैव हारि मनोज्ञं यथा स्यादेवमुषित्वा स्थित्वापि । योपीश ईश्वरः पृथ्व्यां हार्युषित्वास्तभूभृति क्षीणनृप आधारे द्यूत्वा व्यवहृत्य स्थितः स्यात्स क्षुधित्वा सर्वर्द्धिक्षयाद्बुभुक्षितो भूत्वा देशान्तरं यातीत्युक्तिलेशः ॥

गुहासु यद्वावसितं वने वा वावस्तवत्तत्क्षुधितं नु रक्षः ।
दृशो लुभित्वा लुभितालकश्रि शक्राश्रिताशां तिमिरं निराश ॥३३॥

३३. यद्गुहासु वावसितमत्यर्थं स्थितं यच्च वने वा वनगहने वावस्तवत्तत्तिमिरं दृशोक्षीणि लुभित्वा व्याकुलीकृत्य शक्राश्रिताशां पूर्वां निराशाभक्षयद्व्याप्येत्यर्थः । कीदृक्सन् । लुभिता आकुलीकृता येलकाः केशास्तद्वच्छ्रीर्यस्य तत्सर्वदिक्षु प्रसृमरं कृष्णं चेत्यर्थः । अत एव क्षुधितं नु रक्षो बुभुक्षितराक्षस इव । तदपि हि गुहासु वने वावसति विसंस्थुलवालं च स्यादत एव रौद्राकारत्वाल्लोकदृशो व्याकुलीकरोति कथाद्यप्यत्ति च ॥

दिशो ध्वजैरञ्चितवद्रमोकोञ्चित्वाभिपूतं परिपूतवत्क्ष्माम् ।
वपुः पवित्वा सुकलाश्च पूत्वाप्सरोगणोथो पवितः प्रपेदे ॥ ३४॥

३४. अथो तिमिरप्रसरणानन्तरं पवितो रूपादिश्रिया पवित्रोप्स-

१ प ई वा चाव°. २ प °त्क्षुधि°. सी °त्पुधि°. ३ डी तं तु र°. ४ °कोञ्चित्वा°. ५ प °वक्ष्याम्. सी °वतक्ष्मा°. ६ सी डी °त्वा स्वक°. ७ प °पेदेः ॥ अ°.

१ सी डी तथार्क्षा°. ई नथाध्व°. २ प °थक्षाध्व°. ३ प °तमित्य°. ४ सी वा वावस्त°. ५ प बी °न वा वाव. ६ ई °क्षद्या°. ७ प °व्याप्येत्य°. ८ प °भित्वा आ°. ९ बी सी °लका के°. १० प हि सुगुहासु भुव°. ११ ई °हाव°. १२ ई °स्थुल वा°. १३ बी सी डी °व च रौ°. १४ प °त्वालोक°. १५ ई क्थाद्यिप्य°. १६ बी °विता रू°. १७ °विवोप्स°.

रोगणो रमौको लक्ष्मीभवनं प्रपेद आगतः । किं कृत्वा । रमौको-श्चित्वा पुष्पगन्धादिभिः पूजयित्वा । किंभूतम् । ध्वजैः कृत्वा दिशोश्चितवत्पूजितवत्सर्वदिग्व्यापकध्वजान्वितमित्यर्थः । तथाभिपूतं चन्दनच्छटादिना पवित्रम् । तथा क्ष्मां पृथ्वीस्थं लोकं परिपूतवद्दारिद्र्यमलोच्छेदेन पवित्रितवन् । तथा वपुः स्वाङ्गं पवित्वा वेषेण संस्कृत्य । तथा कलाश्च गीतनृत्तादिकाः पूत्वा सतताभ्यासेन निर्मलीकृत्य ॥

तन्त्र्या करावक्लिशितौ क्लिशित्वा क्लिष्ट्वांसमक्लिष्टमथेह काचित् ।
भावैर्वपुः क्लिष्टवती विलोभित्र्यलोभ्धरि क्ष्माभुजि दत्तदृष्टिः ॥३५॥

३५. अथेह रमौकसि काचिद्देवी भावैः सात्त्विकै रत्यादिभिर्वा कृत्वा वपुः क्लिष्टवत्यपीडयत् । राज्ञि भावानां निरर्थकत्वाद्वपुःक्लेशमेव चकारेत्यर्थः । किं कृत्वा । अक्लिशितावपीडितौ मृदू इत्यर्थः । करौ तन्त्र्या वीणया कृत्वा क्लिशित्वा वादनाय तन्त्र्याघातेन पीडयित्वा तथाक्लिष्टमंसं स्कन्धं वीणादण्डस्थापनेन क्लिष्ट्वा वीणां वादयित्वेत्यर्थः । कीदृक्सती । विलोभित्री साभिलाषात एवालोब्धरि वशित्वान्निःस्पृहेपि क्ष्माभुजि कर्णे दत्तदृष्टिः ॥

न नैष सोढा सहितेव किं त्वेषित्रीरनेष्टाप्यविरोपिता नः ।
रोष्टाथ चेन्नोष्यत एष रेष्टेति भीतिरेपित्र्यपरा ननर्त ॥ ३६ ॥

३६. अपरा काचिद्देवी ननर्त । कीदृक्सती । भीतिरेपित्री मर-

१ डी क्लिष्ट्वाम°. २ ए °तावलो°. ३ सी °ना न । रो. ई °ना नाः । रो°.
४ ए °ष्टाप्य चे°. सी °ष्टा चे°.

१ ए °मोकाश्चि°. २ ए दिशाश्चित°. ३ ए °भिभूत. ४ ए ई °तंच्छ°.
५ ए °च्छेदन. ६ ए °वत । न°. ७ ई पूत्वा म°. ८ ए भावे मा°.
९ बी °कैरत्या°. १० ए वपु क्लि°. ११ ए °तौ पृद्र. ई °ता पद्रु इ°.
१२ ए °भित्री सा°. १३ ए °ती र°.

णादिभयस्थापनायिका। कथमित्याह। एष कर्णोनेष्टापि वशित्वान्निःस्पृहोपि नोस्मानेषित्रीः साभिलाषाः सर्तान्न मोढा किं तु सहिष्णैव क्षमिष्यत्येवेत्यर्थः। यतोविरोपिनाक्रोधनोथाथ वा चेद्यदि रोष्टा क्रोत्स्यति तदाप्येष कर्णोतिदयालुत्वाद्दोष्यतो रौद्रेणास्मान्न रोष्टा न हनिष्यतीति॥

भर्तासि शच्या भरिता नु भानां व्योमाशिताष्टा च दिशस्त्विषेति।
जगावसंस्तोत्र्यपरा स्तवित्री वस्त्र्युत्तरीयं वसनं वसित्री॥ ३७॥

३७. असंस्तोत्र्यपरिचितादृष्टपूर्वेत्यर्थः। अपरा देवी कर्णं जगौ गायति स्म। कीदृशी सती। उत्तरीयमुपरितनं वस्त्रं वस्त्र्येकेन करेण परिदधाना। तथा वसनं पारिशेष्याद्धोवस्त्रमपरेण करेण वसित्री। कर्णस्य मनःक्षोभनाय वस्त्रपरिधानमिषेण स्तनाद्यवयवान्दर्शयन्तीत्यर्थः। तथा स्तवित्री कर्णं स्ववशीकर्तुं गीतमध्ये वर्णयन्ती। कथमित्याह। हे राजंस्त्वं त्विषा कृत्वा व्योमाशिता भ्रमिता व्यापक इत्यर्थः। दिशश्चाष्टा व्यापकस्तदसि त्वं शच्या भर्ता नु किमिन्द्रः। भानां नक्षत्राणां भरिता नु भर्ता वा किं वा चन्द्रोसीत्यर्थः। इन्द्रचन्द्रौ हि व्योम दिशश्च त्विषा व्याप्नुत इति॥

शोक्रीमदोत्रीं दवितासि किं मां न शोचिता किं रविता न किं वा।
रोत्री प्रणोत्रीति च वेणुगीत्योपालब्ध तं श्रीनवितारमन्या॥३८॥

३८. अन्या देवी श्रीनवितारं लक्ष्मीदेव्याः स्तोतारं तं कर्णमुपा-

१ ए भर्त्यासि. २ ए सी °तासि कि. ३ ई च वीणु° ४ बी लब्धं त.

१ ई °णादलयस्थाप°. २ ए °ष्टापि व°. ई °ष्टा व°. ३ सी डी ई °त्वान्निःस्पृ°. ४ ए °तीना न. ५ ई क्रोस्यति. ६ ई °तो रोद्रेण नोस्मा°. ७ सी डी रौद्रेणा°. ८ ए °द्रेणोसान्ना रे°. ९ ए न हिनि°. १० सी डी हरिय°. ११ ए °परिक°. १२ ए °मासिता. १३ सी डी भ्रशिता. १४ ए भत्ता नु. १५ ए °षा वाप्नु°.

लब्ध[१] सैनिन्दमवोचत्। यैत[२]: कीदृशी। वेणुगीत्या वंशस्य गानेन कृत्वा रोत्री वदन्ती प्रणोत्री च परमार्थतः कर्णरूपसौभाग्यादि स्तुवती[४] च। कथमित्याह। हे राजन् शोकीं त्वद्विरहदुःखेन सशोकां तथादो[५]त्रीमसन्तापिकां त्वमेव मे प्रिय इति प्रतिज्ञया ते सुखयित्रीमित्यर्थः। मामसि त्वं किं दवितानङ्गीकारेण किमिति संतापयसि तथा[६] त्वं[७] मां[८] न किं शोचिता हा मद्विरहेणासौ वराकी दुःखितेत्येवं किं न शोचसि किं वा मां न रविना नालपसीति[१०]॥

सोतैष कोपं सविता क्षमां[१] वा दुद्रूषुरस्मानदिदेविषुर्वा।
इतीत्[२]सदूहार्दिधिषुस्मरान्या सस्मार नाधीतमपीह[३] गीतम्॥ ३९॥

४०. अन्या देवीह कर्णविषयेधीतमपि[११] पूर्वपठितमपि गीतं न सस्मार। यतः कीदृशी। ईत्सन्[१२]विवर्धिषुरूहो यस्याः सा वितर्का[१३]कुला। कथमित्याह। एष कर्णः कोपं मद्ध्यानस्य विघ्नाधायिका एता[१४] इति क्रोधं[१५] सोता[१६] जनयिता[१७] सु प्रसवै[१८]श्वर्ययोः। वाथ वा संप्रति प्रशान्तत्वात्क्षमां सविता तथैषोस्मान्दुद्रूपू रिरंमु[१९]रदिदेविषुर्वेति। तथार्दिधिपुः कर्णरूपदर्शनाद्विवर्द्धिपुः[२०] स्मरो यस्याः सा कामविह्वला च॥

१ ए °मां व दु°. ई °मां च दु°. २ ए °तीत्मपूहा°. ३ ए °ह गतिम्.

१ डी °ब्ध तमिदम°. २ सी ममिदम°. ३ ए यत की°. ४ ए °तीत। क°. ५ डी °त्रीससन्ता°. ६ ए °था त्व गां न. ७ सी त्वं मा किं न शो. ८ डी मां किं न शो ९ बी न शो°. १० ए °ति॥ सौतै°. ११ ए °पि गी°. १२ बी ईंच्छन्वि°. १३ ए °तर्कोकु°. १४ ए एमा इ°. १५ ए क्रोध मो°. १६ डी सोतां ज°. १७ बी सी डी ई °ता सु प्र°. १८ सी डी प्रशवै°. १९ डी °सुरादि°. २० बी °र्द्धिपु स°.

अधिप्सुमाशिश्रयिषुं युयूषुं शिश्रीषसे किं न दिदम्भिषो माम् ।
विभ्रक्ष्यमाणां यियविष्वनङ्गानलेन बिभ्रज्जिषसि त्वमाः किम् ॥ ४० ॥

धार्ष्ट्यं बुभूर्षुर्बिभरिष्वलज्जामितीङ्गितं काचिदनूर्णुनूषुः ।
भावैर्बलात्प्रोर्णुनविष्यमाणा तालं बिभर्षुः सहसा तमूचे ॥ ४१ ॥

४०. ४१. काचिद्देवी सहसा रत्यादिपरवशत्वेनापर्यालोचितमेव तं कर्णमूचे । कीदृक्सती । कर्णदर्शनाद्भावै रत्यादिभिर्बलात्प्रोर्णुनविष्यमाणा व्याप्नुमिष्यमाणात एवालज्जां निर्लज्जतां बिभरिषुं पोषयितुमिच्छु धारयितुमिच्छु वा धार्ष्ट्यं प्रागल्भ्यं बुभूर्षुरत एव चेङ्गितं स्मरचेष्टितमनूर्णुनूषुः प्रकटयितुमिच्छुरत एव च तालं चच्चपुटादि बिभर्षुर्धारयितुमिच्छुस्तालं वादयन्तीत्यर्थः । कथमूच इत्याह । हे दिदम्भिषो दम्भितुमिच्छो मां किमिति न शिश्रीषसे न सेवितुमिच्छसि । किंभूतामधिप्सुं दम्भितुमनिच्छुं तथाशिश्रयिषुं सिसेविषुं तथा युयूषुमालिङ्गितुमिच्छुं तथा आः खेदे यियविष्वनङ्गानलेन संव-

१ ई °शिश्रियि°. २ प °यिपु यु°. ३ प न त्रिद°. ४ सी ई °भ्रजिष°. ५ प त्वमा कि°. ६ प °र्ष्ट्यं विभू°. ७ डी बुभूंर्पु°. ८ ई °भूपुर्वि°. ९ प °पुंबिभ°. १० डी °मिताङ्गि°. ११ प °नूर्णनू°.

१ प कर्म्ममू°. २ ई °भिबला°. ३ बी °र्णुनंवि°. ४ प माणो व्याप्नुमि°. ५ सी °मिच्छुरतXXएव च ता°. ६ डी °लज्जा नि°. ७ सी ई रिपुं पो°. ८ ई °पुं प्रोप°. ९ प °तुनिच्छु. १० प °मिच्छ वा. ११ प धाष्ट्य प्रा°. १२ प °भूपुर°. १३ प °मचूर्णनूपुः. १४ ई °नूर्णनू°. १५ बी सी डी °व ता°. ई °वथ ता°. १६ प °षोर्दम्भि°. १७ ई दन्दम्भि°. १८ प °निच्छुत°. १९ प ई °शिश्रीपुं. २० ई °षुं त°. २१ प °षुना लि°. २२ सी डी °मालङ्गि°. २३ ई °ङ्गितमि°. २४ प °था आ खे°. २५ बी °दे ययिवि°. २६ प °नङ्गवले°.

द्वीभवितुमिच्छुना कामाग्निना[1] विभ्रक्ष्यमाणां दे[2]ग्धुमिष्यमाणां[3] मां किमिति बिभ्रज्जिषस्यनङ्गीकारेण [4]दग्धुमिच्छसीति । अलज्जामित्यत्रेतिशब्दो भिन्नक्रमेत्र योज्यः ॥

मानाद्यया जिज्ञपयिष्यसे न वुवूर्ष्यसे[1] नापिपतिष्यसे न ।
ज्ञीप्सुः प्रपित्सुर्विवरीषु[2]रास्तां ध्यातासि चित्ते सिसनि[3]ष्वलज्जः ॥ ४२ ॥

ततः सिषास्वा तितनिष्यमाणमुदा[4] मया शु[5]ष्कधुनीं तितीर्षा[6] ।
तितंस्यतेनुत्तितरीषु चक्षुर्मुधा[7] त्वयीत्येष[8] कया चिदूचे[9] ॥ ४३ ॥

४२. ४३. कयाचिद्दे[5]व्या एष कर्ण ऊचे । कथमित्याह । यस्मात्त्वं यया सु[6]भगया मानात्सौभाग्याहंकारान्न जिज्ञपयिष्यसे न तोषयितुमिष्यसे[7] न वुवूर्ष्यसे[8] याचितुं सेवितुं वा नेष्यसे न चापिपतिष्यस आगन्तुमपि नेष्यसे । आः खेदे कोपे वा । तां नायिकां सिसनिषुः सेवितुमिच्छुरलज्जा यस्य[9] स निर्लज्जोसि त्वं चित्ते ध्याता स्मरं[10]सि । कीदृक्सन् । तां[11] ज्ञीप्सुस्तोषयितुमिच्छुः[12] प्रपित्सुर्गन्तुमिच्छुर्विवरीषुः[13] सेवितुमिच्छुश्च[14] । ततस्तस्माद्धेतो[15]स्तितनिष्यमाणा त्वद्रूपातिशयदर्शना[16]द्विस्तारयितुमिष्यमाणा मुन्नया तया । अत एवं[17] रागोल्लासेन सिपास्वा त्वां

१ प °वृर्पंम. २ डी पुरीस्तां. ३ प °निष्टल. ४ प °माणः मु°. ५ ई शुष्कधु°. ६ प °तीर्था । ति°. ७ प क्षुर्मधान्वयी°. ८ डी त्वयात्ये°. ९ बी सी डी °च ॥ एष कर्णः क°.

१ प °ना विवक्ष्य°. २ ई दभ्रमि°. ३ ई °णां कि°. ४ ई दग्रुमि°. ५ बी सी डी ई °दे॒व्योचे. ६ ई °भया. ७ प °प्यते न. ८ प °प्यंत न. ९ प °स्य नि°. १० प °रस्ति । कीदृक्संज्ञांस्तां ज्ञी°. ११ ई तां जीप्सु°. १२ प °मित्सु प्र° सी °मिच्छुर्वि°. १३ ई °पिच्छुर्ग°. १४ सी डी °च्छुस्तत°. १५ बी तत्तस्मा°. १६ प °द्विस्तर°. १७ सी डी °व च रा°.

सेवितुमिच्छन्त्या मयानुत्तितरीष्वगाधलावण्यामृतनिमग्न[1]त्वेनोत्तरीतुम-
निच्छु चक्षुस्त्वयि विषये मुधा निरर्थकं तितंस्यते दर्शनाय विस्तारयि-
तुमिष्यते । यतः कीदृश्या । शुष्क[2]धुनीं निर्जलनदीं तितीर्ष्वा[3]नुराग-
रस[4]रहितत्वाच्छुष्कनदीतुल्यं त्वां दुः[5]खकारि निरर्थकं चाभि[6]लषन्त्ये[7]-
त्यर्थं इति ॥

दिध्माग्द[1]रिद्रासुतनुस्तपोभिर्लक्ष्मीं[2] भजे[3]तादिदरिद्रिषुर्ना ।
[4]विसिस्मयिष्वा पिपविष्यमाणो[5]गि[6]रिष्यसेऽङ्गे शिशिषुश्रिया त्वम् ॥४४॥
तेजस्तमिस्रं[7] चिकरीपदाजिगरीषदास्त्वाञ्जिजिपत्यधीशम् ।
त्वया तपः किं दि[8]धरिष्यते तन्न्यद्रिक्षुकैरादिदरिष्यते हि ॥ ४५ ॥
पिपृच्छिषुं मां निहनिष्यसि त्वं करिष्यसे नोत्तरमुचि[9]चृत्सुः ।
चिचर्तिषुश्छद्म च चेत्तितृत्स्वा [10]तर्दिष्यसेऽङ्गेन मयामुना तत् ॥४६॥
चिकर्तिषूनप्यचिकृत्सुमुच्चिच्छृत्सावर्चि[11]च्छिर्दिषुमित्यमुं द्राक् ।
[12]उक्त्वा [13]निनृत्सुः प्रनिनर्तिषुभ्रूः काचि[14]द्विलक्षाब्जदलान्यकर्ती[15]त्
॥ ४७ ॥

१ **ए** °ग्दद्रिद्रा°. २ **ए** °क्ष्मी भुजं°. ३ **ए ई** °जेथादि°. ४ **ए** वि स°. **बी ई** विसस्म°. **डी** वि जिस्म°. ५ **सी डी** रिरष्य°. ६ **ई** °रिषिमे°. ७ **ए सी** °मिश्रां चि°. **बी** °मिश्रं चि°. **ई** °मिश्रा चि°. ८ **ई** दिधिरि°. ९ **ए बी ई** °च्चिभृत्सुः. १० **डी** तर्हिष्य°. ११ **ए** °चिच्छर्दि°. १२ **ए** उक्ता नि°. १३ **ई** निनित्सुः. १४ **ई** °चिद्वल°. १५ **ए बी ई** °तांन् ॥ का°.

१ **ए** °त्वेन त्वत्त°. **सी** °त्वेनत्त°. **ई** °त्वन तूत्त. २ **ए** °ष्कधनी. ३ **सी डी** °तीर्प्वानु°. ४ **ए** °ससहि°. ५ **ए** दुःरककृा°. **बी** दुरकका°. ६ **बी** °भिलाष°. ७ **ए** °षन्तेत्य°. **ई** °षन्तीत्य°.

४४–४७. काचिद्देवी कर्णक्षोभलक्षणकार्यासिद्धे[1]र्विलक्षा सत्यब्ज-
दलानि क्रीडाकमलपत्राण्यकर्ती[2]श्चिच्छेद । विलक्षो हि पत्रकर्तनभू-
विले[3]खनादि कुरुते । किं कृत्वा । विलक्षी[4]मुं कर्णमुक्त्वा । कीदृक्सती ।
कर्णमनःक्षो[5]भनार्थं[6] निनृत्सुर्नर्तितुमिच्छुस्तथा प्र[7]निनर्तिषू[8] नर्तितु-
मिच्छू भ्रुवौ यस्याः सा[9] च । कीदृशममुम् । चिकर्तिषूनपिच्छेत्तुमि-
च्छूनपि रोद्धुमिच्छूनपि[10] वा शत्रूनपीत्यर्थः । अचिकृत्सुं[11] जितद्वेषत्वात्प्र-
तिकर्तु[12]मनिच्छुं तथोचिच्छृत्सावपि । अपिरत्रापि योज्यः[13] । क्रीडितुमि-
च्छावपि मित्रेपीत्यर्थः । अचिच्छर्दिषुं जि[14]तरागत्वात्क्रीडितुमनिच्छुम् ।
कथमुक्त्वेत्याह । हे राजन्नदिदरिद्रि[15]षुर्ददरिद्रः सन्नदरिद्रीभवितुमिच्छुर्ना
नरो ल[16]क्ष्मीं देवतां दारिद्र्योच्छेदाय भजेत सेवितुमर्हति । कीदृक्सन् ।
तपोभिः कृत्वा दिप्राग्दरिद्रा[17]सुर्दिदरिद्रा[18]सुः कृशीभवितुमिच्छुस्त[19]नुरङ्गं
यस्य स त्वं तु वि[20]सिस्मयिष्वाश्चर्यभूत[21]या शिशिषुश्रिया सर्वाङ्गं व्याप्तु-
मिच्छन्त्या लक्ष्म्या राज्यश्रिया पिपविष्यमाणः पवित्रीकर्तुमिष्यमा[22]णः
सन्नङ्गि[23]रिष्यसे[24] गन्तुमिष्यसे[25] सेवितुमिष्यस इत्यर्थः । अत एव ।
आ वि[26]स्मये । तमि[27]स्त्रं तिमिरं चिकरी[28]षत्क्षेप्तुमिच्छाजिगरी[29]षद्ग्रसि-
तुमिच्छु प्रचण्डमित्यर्थः । तेजोऽङ्गदीप्तिस्त्वा त्वामधीशं राजानमभ्रि-
जिषति प्रकटयितुमिच्छति तस्माद्धि स्फुटं यत्तपो भिक्षुकैर्भिक्षाचरै-
रादिदरिष्यते[30]ऽङ्गीचिकीर्ष्यते तत्तपस्त्वया किं केन हेतुना[31] दिधरिष्यते ।

---

१ प °द्धे विल°. २ प र्तींचिच्छे°. ३ प सी डी °लेषना°. ४ °क्षासुं क°. ५ सी °क्षोभाय. ६ प बी ई °य ननृ°. ७ प· प्रतिनि°. ८ प षूर्नेत्तितु°. ९ ई सा । की°. १० ई °पि श°. ११ प °त्सुं चित°. १२ ई °र्तुमिच्छुं. १३ ई °ज्यः । कीडि°. १४ प जिगत°. १५ बी °षुदरि°. १६ ई लक्ष्मीदे°. १७ डी °द्रासुः कृ°. १८ प °द्रासुकृसीभ°. १९ प °स्तमुरगं य°. २० प ई विसस्म°. २१ प °तयाः शि°. २२ प बी °माण स°. २३ ई °रिरंष्य°. २४ बी °से रन्तु°. सी °से पन्तु°. २५ प °से ६°. २६ ई °ये । तिमि°. २७ प °मिस्रां ति°. सी ई °मिश्रां ति°. २८ प °रीपत्क्षेषु-मिच्छाजि°. सी रीषुत्क्षे°. २९ प °षद्रुसि°. ३० सी डी °तेत°. ३१ बी °ना दधिरि°.

रह अन्तर्भूतणिगर्थः सकर्मकः । धे[2]र्तुमिष्यते चरितुमिष्यत इत्यर्थः । तथा चेत्त्वमु[3]चिचृत्सुः कोपेन हन्तुमि[4]च्छुः सन् पिपृच्छिषुमुक्तरीत्या पष्टु[5]मिच्छुं मां निहनिष्यसि चपेटादिना ताडयिष्यसि । तथा चेत्त्वं छद्म ध्यान्यहं मौ[6]न्यहमित्ये[7]वं मायां[8] चिचर्ति[9]षु[10]र्ग्रन्थितुमि[11]च्छुश्चिकीर्षुः [12]सन्नुत्तरं पूर्वपृष्टप्रतिवचनं[13] न करिष्यसे[14] च[15] तत्तदा तितृत्स्वा जिघांस्वा मयामुना प्रत्यक्षेणाब्जेन कृत्वा[16] त्वं तर्दिष्यसे[17] हनिष्यस इति ॥

जरित्वा । व्रश्चित्वा । इत्यत्र "जॄव्रश्च[18]ः क्त्वः [४१] इतीट् ॥

देवित्वा द्यूत्वा । इत्यत्र "उदितो वा" [४२] इति वेट् ॥

क्षुधितम् । क्षुधि[19]त्वा । उषि[20]तः । प्रोषितवान् । उषित्वा । इत्यत्र "क्षुध०" [४३] इत्यादिना-इट् ॥ यङ्लुपि वावमितम् । यङ्लुपि नेच्छन्त्यन्ये । वावन्तवत् ॥

लुभित । लुभित्वा । अञ्चित । अञ्चितवत् । अञ्चित्वा । इत्यत्र "लुभि° [४४] इत्यादिना-इट् ॥

अभिपू[21]तम् परिपूतवत् पूत्वा पवितः पवित्वा । [22]अक्लिष्टम् । क्लिष्टवती क्लिष्ट्वा अक्लिशितौ क्लिशित्वा । इत्यत्र "पूङ्°" [४५] इत्यादिना वेट् ॥

सोढा सहिता । अलोब्धरि विलोभित्री । अने[23]ष्टा एषि[24]त्री: । रोष्टा अविरोषिता ।

१ बी धृङ्गा अ°. २ प धर्नुमि°. ३ प °च्चिभृत्सु को°. बी ई °च्चिभृत्सुः. ४ प बी °मित्सुः स°. ५ प °मिच्छु मां. ई °मिच्छ मां. ६ प मौनाह°. ७ प °त्येव मा°. ८ सी ई °यां विवर्ति°. ९ प °पुग्रन्थि°. १० डी °ग्रंथितु°. ११ मित्सुश्चि°. १२ प समुत्त°. १३ ई °नं क°. १४ सी डी °ष्यसि च. १५ प च वत्त°. १६ प °त्वा त्व तदिष्य°. १७ प सी °से इ°. १८ बी सी °व्रश्च क्त्वः. १९ प क्षुषित्वा. २० ई °षित । प्रो°. २१ प सी °त । प°. २२ प अक्लिष्ट°. २३ प °ष्टा पषि°. २४ प °त्रीः । रौष्टा । रोषित्रीश्च वि°. डी °त्रीः । राष्टा.

रेष्टा रेषित्री[1] । इत्यत्र "सहलुभ°" [४६] इत्यादिना वेट् ॥ कश्चित्तु पठति । अशिभृग्स्तुशुचिवस्तिभ्यस्तकारादौ[2] वेट् । अष्टा अशितौ[3] । भर्ता भरिता । असंस्तोत्री स्तविंत्री[4] । शोक्त्रीम्[5] शोचिता[6] । वस्त्री वसित्री ॥ तथा[7] रु-नु-सु-दुभ्योपरोक्षायां[8] वेट् । रोत्री रविता । प्रणोत्री नवितारम् । सोता सविता । मदोत्रीम् दविता ॥

[9]इवन्त । दुद्यूषुः अदिदेविषुः । ईर्त्मेत् अर्दिधिषु । बिभ्रक्ष्यमाणाम्[10] बिभ्रजिषसि । अधिप्सुम् दिदम्भिषो । शिश्रीषमे आशिश्रयिषुम् । युयूपुम्[11][12] यियविषु । अनूर्णुनूषुः[13] प्रोर्णुनविष्यमाणा[14] । बुभूर्षुः बिभरिषु । ज्ञीप्सुः जिज्ञपयिष्यसे । सिषास्वा सिसनिषु[15] । तितंस्यते तितनिष्यमाणे[16][17] । प्रपित्सुः[18] आपिपतिष्यसे । वुवूर्ष्यसे[19] विवरीषुः[20] । ऋदन्त । तितीर्ष्वा अनुत्तितरीषु[21] । दिदरिद्रासु[22] । अदिदरिद्रिषुः[23][24][25] । अत्र "इवृध०" [४७] इत्यादिना वेट् ॥ भरेति[26][27] शवा निर्देशो यङ्लुपो बिभर्तेश्च निवृत्त्यर्थः । बुभूर्षुः । बिभर्तेरपीच्छन्त्येके । इडभावपक्षे गुणमपि । बिभर्षुः बिभरिषु[28] । तन्मतसंग्रहार्थं कृतगुणस्य भृगो[29] निर्देशस्तेनेडभावपक्षेपि[30] गुण' स्यात् ॥

अरिरिष्यसे । विमिस्मयिष्वा[31] । पिपविष्यमाणः । अञ्जिजिषति ।

१ बी °षिती । इ°. २ प °चिव्यस्ति°. ३ प °ता । मर्ता. ४ बी °त्रीम् । शो°. ५ सी डी °क्त्री शो°. ६ प शोतिना. ७ प °था ऋतुपुमु°. डी °था ऋनु°. ८ सी रुतुदु°. ९ प इदं च । दु°. १० प °भ्रक्षमाणा बि°. ११ बी युयूंपुम् । यियवि°. १२ प °यूर्पु यि°. १३ प °नूपुः प्रार्णु°. १४ प °माणो । बु°. १५ डी °निपुः । ति°. १६ डी °माणा प्र°. १७ प °ण । प्रेपित्सु आ°. १८ सी °पित्सु आ°. १९ वुभूर्ष्यं°. २० प सी °रीपु । ऋ°. २१ प °पु । दद°. २२ डी °द्रासुः अ°. २३ प अदद°. २४ सी °रिद्रपु । अ°. २५ प °द्रिपु । अव इ°. २६ प भरति. २७ प बी सी डी °तिशिवा. २८ डी °रिपुः । त°. २९ डी °गोर्निर्दे°. ३० सी निदेश°. ३१ प °यिषा । मि°.

अशिशिषु[1] । चिकरीषन् । आजिगरीषत् । दङ् । आदिदरिष्यते[2] । धृङ् । दिधरिष्यते । पिपृच्छिषुम्[3] । अत्र "ऋस्मि०" [४८] इत्यादिना-इट् ॥

निहनिष्यसि । करिष्यसे । अत्र "हनृतः स्यस्य"[4] [४९] इतीट् ॥

कृतैत्[5] कृतैप् वा । चिकृत्सुम् चिकर्तिषून्[6] । उच्चिचृत्सुः[7] । चिचर्तिषुः[8] । निनृत्सुः[9] प्रनिनर्तिषु[10] । उच्चिच्छृत्सौ अचिच्छर्दिषुम्[11] । तितृत्स्वा तर्दिष्यसे । अत्र "कृतचृत०"[12] [५०] इत्यादिना वेट् ॥ असिच इति किम् । अकर्तीत् ॥

स्वस्त्वं गमिष्यस्युत गंस्यतेधिजिगांसुनान्तः[1] किमपीह मोक्षः ।
यत्तेधिपूर्वं जिगमिष्वभिख्यां[2] स्त्रैणं प्रति प्रस्त्रविता[3]सि नान्तः ॥४८
उक्ष्णा यदा[4] स्तोष्यत आशु शैलेरुत्क्रंस्यते[5]ब्धेः क्रमितार्थ[6] वोर्वः ।
भूर्वा क्रमित्री क्रमितासि मां त्वं तदा प्रकल्प्सासि[7] रतो विवृत्साम्
॥ ४९ ॥

पाता न मां त्वं[8] शकिताप्यशत्क्रीमखेदिता यद्यधुनातिखेत्रीम् ।
क वेदिता मां ननु मृत्युवेत्रीं यत्कृत्यबोद्धापि न बोधिता किम्
॥ ५० ॥

क्ष्वेत्ता त्वमक्ष्वेदितृवन्मयासि वृतः श्रितः कीर्णह्रियेत्युदित्वा ।
स ऊर्णुतो ध्यानयुतो जिघृक्ष्वा करेण निर्लून[9]भिया कया चित्
॥ ५१ ॥

---

१ प °गांमुना°. २ प °भिख्या स्त्रं°. ३ प प्रस्त्रंवि°. ४ सी °दा स्तोष्य°. ५ प °रुत्कंस्य°. ६ प °तानचौर्वः. ७ प °कस्त्फासि. ८ प त्वं शंकि°. ९ प °नभया.

१ प °शिपुः । विक°. २ बी °ते । धृंङ्. ३ प सी °पु । अ°. ४ प °नृत स्य°. ५ बी °तैपु वा. ६ बी चिकिर्ति°. ७ प °च्चिमृत्सुः. ८ प °र्तिषु । नि° ९ प °त्सुः नि°. १० प डी र्तिषुः । उच्चिनृत्सौ अत्रिच्छ°. ११ प डी °पु । ति°. १२ प °तमृत्यत्या°. सी °तभृतेत्या°.

४८–५१. कया चिद्देव्या निर्लूनभिया निर्भयया त एव करेण कृत्वा जिघृक्षया तं[१] ग्रहीतुमिच्छन्त्या सत्या ध्यानयुतो योगी स कर्णे ऊर्णुत आच्छादितः स्वाङ्गेन व्याप्त आश्लिष्ट इत्यर्थः । किं कृत्वा[२] । उदित्वा[३] । किमित्याह । हे राजंस्त्वद्गतचित्तत्वात्तेभिख्यां[४] कर्णे इति नामान्त[५]श्चित्तेधिपूर्वे जिगमिष्व[६]धिजिगमिषु पठितुमिच्छु[७] स्मर्तुमिच्छु वा स्त्रैणं देवाङ्गनौघं प्रति लक्ष्यीकृत्य[८] यदसि त्वं न प्रश्नविता[९] नार्द्रहृदयी[१०]भवसि न प्रसीदसीत्यर्थः । तत्त्वं किं स्वर्ग[११]मिष्यस्युताथ वेह लक्ष्मीगृहेन्त[१२]श्चित्ते किमध्यैज्ञेयं[१३] रहस्यमधिजिगांसुना[१४] पिपठिषुणा जपतेत्यर्थः । त्वया मोक्षो[१५] गंस्यते । ईदृशैस्तपोजपैः स्वर्गापवर्गौ[१६] स्वप्नेपि ते दुर्लभावित्यर्थः । अथ[१७] वा यदोक्ष्णा बलीवर्देन[१८] स्तोष्यते पयः क्षारिष्यतेथ[१९] वा यदा शैलैरांशूत्कं[२०]स्यत ऊर्ध्वं यास्यतेथ वा यदौर्वो वडवाग्निरब्धेः सकाशात्क्रमिता[२१] गन्ता निःसरिष्यतीत्यर्थः । वा यद्वा[२२] भूः पृथ्वी[२३] क्रमित्री स्वपदाभ्यां संचरिष्यतीत्यर्थः । तदा त्वं[२४] मां क्रमितास्मि गमिष्यसि सेवि[२५]ष्यस इत्यर्थः । तथा तदा रतौ निधुवनविषये विमृत्सां[२६] प्रवर्तनेच्छां[२७] प्रकल्प्तासि विधास्यसि[२८] क्लृप् अन्तर्भूत[२९]णिगर्थः सकर्मकः । यदोक्षादीनां[३०] प्रश्र(स्न)वादि[३१] भविष्येति[३२] तदानया देव्या सहाहं रंस्य इति त्वया

१ बी तं गृही°. २ सी °त्वादित्वादिशकि°. ३ प °दित्या । कि°. ४ प °त्वाभि°. ५ बी सी डी °न्तश्चेतस्यधि°. ६ प °मिपु प°. ७ प °मित्सु स°. ८ प लक्ष्मीकृ°. ९ प प्रश्नवि°. १० प °दयांभ°. ११ बी °गंक्ष्मि°. १२ प °हंतश्चि°. १३ प °ष्यजेयं. १४ प °गांसना. १५ प °क्षो गम्यते. १६ प °वर्गो स्व°. १७ प °थथायवोक्ष्णा. १८ प सी डी °न स्तोष्य°. १९ प °तय वा. २० प °राश्रृत्कं°. २१ प °शाक्रमि°. २२ बी सी °द्वा यदा भूः. २३ प °थ्वी कृमि° २४ प त्वं नां क्र°. सी त्वं मा क्र°. २५ प सेथिष्य°. २६ प विमृत्सां. २७ प °नेच्छाप्र°. २८ सी °सि क्लृप्. प °सि कृ इ अ°. २९ प °न्तभूत°. ३० प यदाक्षादीना प्र°. ३१ सी प्रस्तवनादि. डी प्रस्तवनादि. ३२ प °ष्यसि तयान°.

तीव्रोभिग्रहः कुतोथ वेत्यहं जानामीत्यर्थः । परमधुना संप्रति मां यदि त्वं न पाता स्वाङ्गसङ्गामृतास्वादनेन न रक्षसि । कीदृशीम् । अशर्म्मी कामशरैर्जर्जरीकृतत्वात्किंचिदपि कर्तुमसमर्थामत एवातिखेदान्मीमत्यन्तं दीनीभवन्तीं परितप्तीभवन्तीं वा । यतः खिदंपरिताप इति केचित्पठन्ति । कीदृशः संस्त्वं शक्तितापि समर्थोपि । अत एवाखेदिताप्यदीनोपि । तदा नन्विति प्रश्ने । पृच्छामि त्वां मां क वेदिता लभेमे यतो मृत्युवेत्रीं त्वदुपेक्षायां कामाग्निदाहातिरेकेण मरणं वर्तमानां मृत्योर्लब्ध्रीं वाद्य श्वो वा मे मृत्युर्भावीति मृत्योर्विचारिकां वा । तस्माद्यत्कृत्यबोद्धापि यच्च तत्कृत्यं च यत्कृत्यं स्वयमखिन्नशक्तेन खिन्नाशक्तपालनलक्षणं महाधर्मकृत्यं तस्य बोद्धापि सर्वशास्त्रेषु लोके च प्रसिद्धत्वाज्ज्ञातापि मन्किंमिति न बोधिता न जानासि तस्याकरणात् । तस्मान्मां रक्षेति तात्पर्यार्थः । यद्वा किं बहूक्तेन क्ष्वेत्तापि । अपिरध्याहार्यः । जांपवशेनाव्यक्तं[11] वदन्नप्येनं[12]ङ्गीकारान्मां[13] त्यजन्नपि[14] वाक्ष्वेदितृवद[15]व्यक्ताक्षरं[16] मामालपन्नि[17]वात्यजन्निव वा त्वं मया वृतो भर्तृत्वेन वरितः[18] श्रितश्चासि यतः कीर्णह्रिया त्यक्तलज्जयेति ॥

कोपं जुघुक्षन्निजुगूहिषुः स्वं नृपः पुपूर्षन्नतितिक्षतैतत् ।
उड्डीनतद्विघ्नभयः स लग्नो ब्रह्मण्यनुड्डीनसमाधिशून्यः ॥ ५२ ॥

५२. नृपः कर्ण एतदप्सरःकृतमनुकूलोपसर्गवृन्दमतितिक्षताक्षाम्यत् । कीदृक्सन् । कोपं जुघुक्षन्निरुन्धंस्तथा स्वमात्मानं निजुगूहिषु-[19]

१ ए °पन्निति°. २ सी उदीन . डी उड्डीन°. ३ ए °भवः स. ४ ए °ण्यमुड्डी°.

१ सी °ग्रहं कृ°. २ ए °हः कुतो°. ३ ए मर्थीम . ४ बी सी °वन्ती वा. ५ ए °भते य . ६ ए °त्योप्त्री वा . ७ ए °पि त्वत°. ८ बी सी °त्यं य°. ९ ए °न्किंगिति. १० ए डी °क्तेनाक्ष्वे . ११ ए °पव्यमेना . १२ ए °प्यनंदगीकारान्यात्य°. १३ बी °ङ्गीकरा. १४ ए डी ई °पि क्ष्वे°. १५ ए °दिश्चव . १६ ए डी °रं नामाल°. १७ ए° न्निर्वा त्वं. १८ ए रिता श्रि°. १९ बी सी डी निजगू°.

वेशीचिकीर्षुरित्यर्थः। अत एव स्वमेव पुपूषन्पवित्रीचिकीर्षुः[1]। यतः स कर्णो ब्रह्मणि परमध्येये[2] लग्न आसक्तोभून्। कीदृक्सन्। अनुड्डीनोक्षीणो यः समाधिश्चित्तैकाग्र्यं तेन[3] शूनो वृद्धोतिस्फीतसमाधिरित्यर्थः। अत एवोड्डीनवन्नष्टं विघ्नभयं[4] यस्य सः॥

गम्लृ। गमिष्यसि। इङ् इङ्गा। अधिजिगमिषु। अत्र "गमोनात्मने[5]" [५१] इतीट्॥ इङो नेच्छन्त्येके। अधिजिगांसुना[6]॥ अनात्मने[7] इति किम्[8]। गंस्यते[9]॥

प्रस्नविता। इत्यत्र "स्नोः" [५२] इतीट्॥

क्रमितासि। इत्यत्र "क्रमः" [५३] इतीट्॥ अनात्मन इति किम्। उत्क्रंस्यते[10]॥

क्रमिता। क्रमित्री[11]। इत्यत्र "तुः" [५४] इतीट्॥

विवृत्साम्। प्रकल्प्सासि। इत्यत्र "न वृद्भ्यः" [५५] इति नेट्॥

पांक्। पाता॥ शक्लृन्[12] शकींद्वा। अशक्रीम्॥ विदिंच् विदंती विदिंप्वा[13]। वेत्रीम्[14]॥ खिदिंच्[15] खिदंन् खिदिंप्वा[16]। अनिखेत्रीम्। अत्र "एकस्वरा[17]" [५६] इत्यादिना नेट्॥ शक्यतिविन्दतिखिन्दती[18]नामिटमिच्छन्त्येके। शकिता। वेदिता। अखेदित्ता॥ अनुस्वारेत इति किम्[19]। जिक्ष्विदाँ[20] जिक्ष्विदांङ्[21] जिक्ष्विदांक्वा[22]।

१ ए °पुं:। यंतः. २ बी 'ध्यंयल°. ३ ए तेम शू°. ४ सी विघ्नं भ°. ५ ए °त्म इ°. ६ ए सी °गांमुना. ७ बी °त्म इ°. ८ डी °म्। गम्यंत. ९ ए गंम्यते. १० ए उत्क्तंस्य°. ११ ए डी °मिर्ता। इ°. १२ बी सी डी शक्लृंट् शकींच्वा। अ°. १३ ए विदिप्वा. १४ बी वेत्रांम्. १५ ए °दिंव्. १६ ए खिदिस्वा। अ°. डी °दिंस्वा। अ°. १७ बी सी डी °म्वरादित्या°. १८ बी सी °खिदती°. १९ ए °म्। निक्ष्वि°. २० सी °दाच्वा। क्ष्वं°. २१ डी ञिदाङ् निक्ष्विदाच्वा। क्ष्वे°. २२ ए °दाद्वा। क्ष्वं°. २३ बी °दाध्वा। क्ष्वे°.

क्ष्वेदितृ ॥ अस्मादपीटं नेच्छन्त्येके । क्ष्वेत्ता ॥ बुधग् बुध वा । बोधिता । आभ्याम पीटं नेच्छन्त्येके । बोद्धा ॥

वृतः । कीर्णः(र्ण) । श्रिनः । ऊर्णुतः । अत्र "ऋवर्ण°" [५७] इत्यादिना नेट्॥

युतः । लून । इत्यत्र "उवर्णात्" [५८] इति नेट् ॥

जिघृक्ष्वा । जुघुर्क्षन् । पुपूषन् । इत्यत्र "ग्रहं°" [५९] इत्यादिना नेट् ॥ गुहेरिटमिच्छत्यन्यः । निजुगृहिषुः ॥

अतितिक्षत । इत्यत्र "स्वार्थे" [६०] इति नेट् ॥

अनुड्डीन । उड्डीनवत् । शूनः ॥ एदित् । लग्नः । अत्र "डीय°" [६१] इत्यादिना नेट् ॥

सुव्यक्तमित्यस्तरुचिः स्मरास्त्रासितैः समर्णो द्युवधूजनोथ ।
नभोदितैरुत्पतितो विमानैर्न्यर्णस्त्रपां व्यर्णरुगर्णबुद्धिः ॥ ५३ ॥

५३. अथ कर्णस्य ध्यानाचलनानन्तरं द्युवधूजनो नभोदितैर्व्योमप्राप्तैर्विमानैः कृत्वोत्पतितः । कीदृक्सन । स्मरास्त्रामितैः कर्णरूपदर्शनोत्थकामशरक्षेपैः समर्णः पीडितस्तथेत्युक्तरीत्या सुव्यक्तमस्तरुचिर्भग्नमनोरथोत एव त्रपां लज्जां न्यर्णः प्राप्तस्तथा व्यर्णरुग्विच्छायस्तथार्णबुद्धिर्गतधीः ॥

१ प °त्यरु°. प °राम्वासि°. ३ प °नोव । न°. ४ बी नन्यण°. ५ प °पा त्यणरगरुणबु°.

१ प बी सी बुदृग २ बी डी उध वा. ३ प °पोग ने° ४ डी °क्षन् । पु°. ५ सी °त्र गुह°. ६ डी °हगुह र° ७ प निजगू°. ८ प °त्यव स्वा°. ९ प शून् ॥ ए°. १० प °र स्वुव°. ११ प नभ्योर्दि°. १२ प °रास्वासि°. १३ प °मर्थपी°. १४ सी डी °यरुचिस्त°.

अञ्जौ । सुव्यक्तम् । असू[1] । अस्त । इत्यत्र "वेटोपतः" [६२] इति नेट् ॥ केचिदस्यतेर्भावे क्ते नित्यमिटमिच्छन्ति । असितः ॥ अपत इति किम् । उत्पतितः ॥

समर्णः[2] । न्यर्णः । व्यर्ण । इत्यत्र "संनि°" [६३] इत्यादिना नेट् ॥ संनिवेरिति किम् । अर्दितः ॥ कश्चित्केवलादपीच्छति । अर्ण[3] ॥

अभ्यर्णमागादथ[1] वृत्तमन्त्रे नृपे विशस्तौजसि कोपि धृष्टः[2] ।
कष्टः पुमान्घुष्टगुणावबद्धातिकष्टकेशो घुषितानि कुर्वन् ॥ ५४ ॥

५४. अथ देव्युत्पातानन्तरं कोप्यज्ञातः पुमान् पुंरूपधारी सुरोऽभ्यर्ण[4] कर्णसमीपमागात् । क सति । विशस्तौजसि[5] प्रौढप्रतापे नृपे कर्णे वृत्तमन्त्रे जपितलक्ष्मीमन्त्रे । कीदृग् । धृष्टः प्रगल्भस्तथा कष्टः कषिष्यति कष्टं कृच्छ्रं तस्य हेतुस्तथा घुष्टेन संवद्धावयवेन निबिडेने-[6]त्यर्थः । गुणेन रज्ज्वावबद्धाः[7] संयमिता अतिकष्टा अतिगहनाः केशा[8][9] यस्य सः । तथा घुषितानि नानाशब्दितानि कुर्वन् ॥

अभ्यर्णम् । अत्र "अविदूरेभेः" [६४] इति नेट् ॥

वृत्तमन्त्रे । अत्र[10] "वृत्तः(तः?)°" [६५] इत्यादिना वृत्तेति निपात्यम्[11] ॥

धृष्टः । विशस्त । इत्यत्र "धृष°" [६६] इत्यादिना नेट् ॥

कष्टः । अतिकष्ट[12] । इत्यत्र "कषः°" [६७] इत्यादिना नेट् ॥

घुष्टगुण । इत्यत्र "घुषेः°" [६८] इत्यादिना नेट् ॥ अविशब्द इति किम् । घुषितानि ॥

१ ए °माथावथ. २ ए °पि सृष्टः ।.

१ ए अमू । अ°. २ ए र्णः । व्य°. ३ सी अर्णम् ॥ अ°. डी अर्णः ॥ अ°. ४ सी डी °र्ण स°. ५ ए °सि नृ°. ६ बी निवर्ट°. ७ ए रज्व अव°. ८ ए केनाय°. ९ बी सी डी °शा येन मः. १० ए बी ई °त्र वत्तः इ°. ११ ए °त्य ॥ धृ°. १२ ए अधिष्टष्टत्यकष्टत्य°.

ध्वान्ताकृतिर्बाढ[1]दृढाचलेन्द्रक्षुब्धाम्बुधिम्लिष्टविरि[2]ब्धकण्ठः ।
स पारिवृढ्यं नु दधन्नृपं[3] स्म दुं[4]ःखान्त इत्याह समाधिलग्नम् ॥५५॥

५५. स पुमान्समाधिलग्नं ध्यानलीनं नृपमिति वक्ष्यमाणनीत्याह स्माब्रवीत्[1] । कीदृक्सन् । ध्वान्ताकृतिः । तथा[2] बाढं भृशं दृढो बली स्थूलो वा योचलेन्द्रो मन्दराद्रिस्तेन क्षुब्धो मथितो[3] योम्बुधिस्तस्येव म्लिष्टमस्पष्टं विरि[4]ब्धं स्वरो यस्य स तथा कण्ठो गलो[5] यस्य सः । तथा दुं[6]ःखान्तो दुष्टचेतास्तथा पारिवृढ्यं नु प्रभुत्वमिव दधत्स्वामीव निःशङ्क इत्यर्थः ॥

फाण्टं नुं[5] मिन्नो विदितोसि मिन्नं मम क्रुधा मेदितमीर्ष्यया च ।
प्रमेदितव्याज तव प्रमिन्नं वपुः किमत्तुं शकितं मया[6] न ॥ ५६ ॥

५६. प्रमेदितं स्निग्धीकर्तुमारब्धमाश्रितमित्यर्थः । व्याजं तपोज[8]-परूपं छद्म[9] येन हे प्रमेदितव्याज फाण्टं त्वनायाससाध्यमश्रपितमपि-ष्टमुदकसंपर्कमात्राद्विभक्तरसम[10]ौषधं कषायादि फाण्टं तदिव मिन्नः स्निग्धोत्युपचित इत्यर्थः । असि त्वं मया विदितो दृष्ट इत्यर्थः । अतश्च मिथो विरुद्धाङ्गोपचयतपोध्यानावलोकेन तव मायित्वावगत्या मम क्रुधा कर्त्र्या मिन्नमुपचितमीर्ष्यय[11]ा[12] चाक्षमया च मेदितमतश्च प्रमिन्नमुपचेतुमारब्धं तव वपुरत्तुं[13] किं मया न शकितं न शक्ष्यते[14][15] । अत्र "वा हेतुसिद्धौ क्तः" [५.३.२] इति भविष्यति क्तः । चेन्मम कोपेन मिन्नं तदा त्वद्वपुरत्तुं[16] शक्ष्यत एवेत्यर्थः ॥

---

१ प °ढवृढा°. २ प °विरसक°. बी °विरब्ध°. ३ °पं स्व दुः°. ४ डी दुःखान्त. ५ प नु सिन्नो. ६ प °या त ॥.

---

१ °न् । क्न्ता°. २ प °थार्वाढं. ३ प °तोयोंधि°. ४ प बी विरब्धं. ५ सी डी °लोस्य. ६ सी डी दुःखान्तो. ७ प °रत्वं मा. ८ प तज°. ९ प °श्र जेन. १० प °समोष°. ११ प °मीर्षया. बी °मीक्ष्र्यया. १२ डी °या वाक्ष°. १३ प °रत्तुं किं. १४ प शष्यते. डी शक्यते. १५ प °ते । तत्र. १६ प रत्वं शष्यत.

न शक्तमास्थातुमशान्तदान्तैः श्रीवेश्म मे स्पष्टमदासितार्चैः ।
ततस्त्वमच्छन्नमदस्तपूर्णबलिर्मया स्पाशित एवमन्ये ॥ ५७ ॥

५७. श्रीवेश्मास्थातुमाश्रयितुं न शक्तं न शक्यते स्म । कैः कैरित्याह । अशान्तैदान्तैरजितेन्द्रियतपःक्लेशासहैस्तथा मे मह्यं स्पष्टमदासितार्चैरदत्तपूजैश्च । तत्तस्माद्धेतोरच्छन्नं प्रकटमदस्तपूर्णबलिर्मह्यमदत्तपर्याप्तपूजोपचारस्त्वं मया स्पाशित एव भक्षणाय गृहीत एवेति मन्ये । यद्यपि राज्ञः स्पशनं भावि तथाप्यनेनातिस्वाधीनत्वेन कृतमिव संभावितमित्यतीते क्तः ॥

रक्षोभिराच्छादितपूरितं प्राक् संज्ञप्तविश्वैर्दमितामरैर्हि ।
विश्वस्तया पातुमिदं श्रियौक आज्ञापितोहं शमितान्यशक्तिः ॥५८॥

५८. इदं प्रत्यक्षमोको लक्ष्मीगृहं पातुं रक्षितुं विश्वस्तया मयि कृतविश्वासया श्रियाहमाज्ञापितो नियुक्तः । यतः कीदृशम् । प्राक्पूर्वं संज्ञप्तविश्वैर्मारितलोकैर्दमितामरैः परिभूतदेवै रक्षोभिर्हि स्फुटमाच्छादितपूरितमाक्रान्तं संभृतं च । यतः कीदृशोहम् । बलिष्ठत्वेन शमितान्येषां राक्षसादिशत्रूणां शक्तिर्येन सः ॥

कथमाज्ञापित इत्याह ॥

जप्तापि मन्त्रैर्जपितापि पुंप्पैस्तूर्णं भवार्म्युच्छ्वसिता न तस्य ।
न ते बलिं यस्त्वरितो दिशेत्प्राग्बलिः स भावी रुपितस्य ते च
॥ ५९ ॥

१ ए °क्तमस्था°. २ ए °वेशनं स्प°. सी °वेस्म मे. ३ ए °र्णवलि°. ४ बी °या स्फाशि°. ५ ई °प्ताभिम°. ६ ए °र्जप्तापि. ७ बी पुप्फैस्तू. ८ ए °मुच्छसि°. ९ ए °वी रूपि°.

१ सी °वेस्मास्था°. २ सी शक्यं°. ३ बी °न्तदीतर°. ४ बी ततस्तस्मा°. ५ ए राज्ञ स्प°. ६ ए सी डी °र्वं सज्ञ°.

अभ्यान्तरक्षोवमितास्ररुष्टा वान्ताश्रुरास्वान्तवतीति वृत्तिम् ।
संघुष्टवाग्मेभ्यमितस्य देवी प्रतिज्ञया संघुषितस्वनस्य ॥ ६० ॥

५९,६०. देवी लक्ष्मीर्मे वृत्तिं जीविकामास्वान्तवत्युवाच । कीदृक्सती । अभ्यमन्ति स्माभ्यान्तान्यभिमुखमागतानि यानि रक्षांसि तैर्वमितमरुच्योद्गीर्णं यदस्रं पूर्वपीतं मनुष्यादिरक्तं तेन रुष्टात एव वान्ताश्रुः कोपावेशेन नेत्रेभ्योश्रूणि क्षरन्ती । कीदृशः सतो मेभ्यमितस्य देव्यभिमुखं गतस्य तथा प्रतिज्ञया त्वद्भ्रम मया सर्वदुष्टेभ्यो रक्ष्यमेवेत्यभ्युपगमेन संघुषितस्वनस्य नानोच्चारितशब्दस्य । कां वृत्तिमित्याह । यो नरस्त्वरित उत्सुकः संस्ते तुभ्यं प्राग्बलिं न दिशेन्न दद्यात्तस्य प्राक्तुभ्यं बलेरदातुर्नोच्छ्वसिता न प्रसन्ना भवामि । कीदृशी । मन्त्रैस्तूर्णं जप्तापि स्मृतापि पुष्पैर्मन्त्रपूतकुसुमैर्जपितापि मन्त्रोच्चारपूर्वं करवीरादिपुष्पक्षेपेण स्मृतापीत्यर्थः । तथा स प्राक्तुभ्यं बलेरदाता रुषितस्यापूजया क्रुद्धस्य ते बलिर्भावी च स त्वया प्रसनीय इत्यर्थ इति । न च वाच्यमवहेलया प्रतिज्ञातं सकृच्चैतां वृत्तिं देवी तवोचदिति । यतः संघुष्टवागेवंविधा ते वृत्तिरेवेति प्रतिज्ञातवचनैवंविधा ते वृत्तिरित्यसकृदुच्चारितवचना वा ॥

१ ए °क्षोवामिताश्रु°. २ ई °ताश्रुरु°. ३ ए सी वान्ताश्रु°. सी वाताश्रु°. ४ ए °वाग्मभ्य°.

१ ए °न्तिमाममाभ्या°. २ ए °रक्ता तेन रुष्टा°. ३ ए वाताः श्रुः°. ४ ए देभ्योभि°. ई देव्या अभि°. ५ ए रक्षमे°. ६ ए °त्यभ्यप°. ७ सी डी °गमनेन. ८ ए °त्सुकम°. ९ ई °कः मस्ते. १० सी डी °वामीनि । की°. ११ ए ई °सा स्मृ°. १२ ई प्राक् बलर°. १३ ए °ता ऋषि°. १४ ई क्रुधस्य. १५ बी नवा°. १६ ए °च्यसव°. १७ ए बी डी °कृचेतां. सी °कृत्वेती वृत्ति दे°. १८ बी सी °त्तिरेव विधा ते वृत्तिरि°.

तन्नोक्तुमित्यास्वनितं श्रिया त्वामहृष्टदन्ताहृषिताग्रदंष्ट्रः ।
सज्जोस्मि धार्ष्ट्याद्धृषिताग्रकेशलोमन्प्रहृष्टोन्नतकेशलोमा ॥ ६१ ॥

६१. तत्तस्माद्धेतोर्हे[1] धार्ष्ट्यान्न तु सत्त्वातिरेकाद्धृषिताग्रकेशलो-[2]मन्नुद्धृषि[3]तवाल[4]रोमाग्रेत्युक्तरीत्या श्रियास्वनितमादिष्टं दत्तमित्यर्थः । त्वां भोक्तुं ग्रसितुमहं सज्जोस्मि । कीदृक्सन् । प्रहृष्टोन्नतकेशलोमा त्वत्सदृशापूर्वभक्ष्यप्रापणोत्थहर्षातिरेकादुच्छ्वसितोच्चकेशलोमा तथाहृष्टा अप्रतिहता दन्ता यस्य स योहृषिताग्रदंष्ट्रोप्रतिहतदंष्ट्राग्रः[6] स तथा ॥

किं चास्मि हृष्टो हृषितो न को वा ससर्जिथाद्यापचितं न यन्मे ।
ससृष्ठ देव्या अपचायितं[2] त्वं न मां तु दद्रष्ठ ददर्शिथाः किम् ॥६२॥

६२. किं चेति विशेषे । अद्य यत्त्वं मे म[7]मापचितं पूजां न सस-र्जिथ न चर्कर्थ[8] तेनास्म्यहं हृष्टो विस्मितो[9] वाथ वा को न हृषितः किं त्वभिनवः[10] कोप्ययं ध्याता यः प्राक्पूज्यममुं व्यन्तरमपूजयित्वा मत्प्रध्यानफलं साधयिष्यतीति सर्वोपि साश्चर्योभूदित्यर्थः । ननु मयान्योपि कोपि नार्चितस्तै[11]तस्ते कोपमानो येनैवं वक्षीत्याह । त्वं देव्या लक्ष्म्या अपचायितं[12] पूजां ससृष्ठ चर्कर्थ[13] मां तु मां पुनर्नै[14] दद्रष्ठ पूजायै[15] न स्मृतवानतस्त्वम् । आः कोपे[16] । किं ददर्शिथ मूलस्मरणीयास्मर-णीान्न[17] किमप्यस्मर इत्यर्थः ॥

१ ई °त्स्टान्न°. २ ए °यित्व तं न.

१ सी °तोर्हि धा°. ई °तोहे धाष्ट्यान्न. २ ए °प्रकेशनोम°. ३ बी °न्नुद्धृषि°. ४ बी सी डी °तवाल°. ५ ए °स्वमित°. ६ ए °ष्ट्राग्र स. ७ ए मप°. ८ ए °कथ ते°. ९ ए विस्मृतो. १० ए किं तु भि°. ११ सी डी °स्ततः स को°. १२ ए °यितां पू°. १३ ए °कथमा तु. १४ ए °ननं द°. १५ ए° यै स्मृ°. १६ ई कोपि। किं, १७ ए °णान्ना कि°,

मन्त्रेण संचस्करिथाथ संचस्कर्थाम्यतन्त्रैः स्वमु शेकिथास्त्रैः ।
शशक्थ दोर्भ्यामथ चेत्ततोपि क्षयं ययाथाययिथात्र यत्त्वम् ॥ ६३ ॥

६३. उ हे राजंश्चेद्यद्यपि त्वं मन्त्रेणाङ्गरक्षामन्त्रेण स्वमात्मानं संचस्करिथ । अथ तथाभ्यतन्त्रैः संप्रभावैरङ्गरक्षाहेतुमुद्राविशेषादितन्त्रैश्च स्वं यद्यपि संचस्कर्थ तथा यद्यपि त्वमस्त्रैर्वारुणादिभिः शेकिथ समर्थोभूस्तथा यद्यपि दोर्भ्यां शशक्थ ततोपि तथापि यत्त्वमत्र श्रीगृह आययिथागास्ततस्तस्मात्क्षयं ययाथ प्राप्त एव ॥

जहर्थ यच्छिश्रयिथारिथाथ सस्वर्थ विप्राग्वरिथादिथापि ।
त्वं यच्च संविव्ययिथापसस्वरिथेह तद्गर्हय तेस्मि मृत्युः ॥६४॥

६४. हे राजन्निह जन्मनि यद्दार्यं देवद्रव्यादि जहर्थापहृतवान् यंश्चासेव्यमसत्सङ्गादि शिश्रयिथाश्रितवान् तथा यद्गम्यं परस्त्र्याद्यारिथ गतो यच्चावाच्यं सस्वर्थोक्तवान्यद्पीड्यं साध्व्यादि पीडितवान्त्रा यच्चायाच्यमधिककरादि विप्राग्वरिथ व्यवरिथ याचितवान्यच्चाभक्ष्यमादिथापि भक्षितवांश्च यच्चानाच्छाद्यं प्रच्छन्नपापं संविव्ययिथाच्छादितवान्यच्चापसस्वरिथ विरुद्धमवोचस्तत्त्वं गर्हय निन्दय यतस्तेहं मृत्युर्मरणहेतु-

१ ए °याभ्यत°. २ ई °मु शोकि°. ३ ए शेकथा°. ४ ई °च्छिश्रियि°.
५ ए सस्वर्थ. ६ डी °रिनेह.

१ बी समा°. २ ई °भावनेर°. ३ डी °स्त्रैर्वांगा°. ४ ए ई °भिः शोकि°.
५ ए °शकुन°. ६ ई तथापि. ७ ए °यिप्रामास्त°. ८ ए °हार्यं दे°. ९ ए यथासे°.
१० ए °यमत्वाथ त°. ११ ई °तोयावा°. १२ ए °न्यर्पा°. १३ ए °ध्वायिद्पी°.
१४ ए °तन्वा. १५ ई °वान् य°. १६ ए सी डी °य या°. १७ ए °तथाच्यत्वाभ°.
१८ ए यच्च ना°. १९ ए °पापमं°. २० ए ई मव्य°. २१ ए °दियवा°.
२२ ए ई °य त°. २३ बी °त्युमर°.

वेर्ते[1]। मृत्युकाले हि पापगर्हा[2] क्रियते। यद्यप्यत्र विशेषानुक्तेर्य[3]च्छब्देन निन्द्यमनिन्द्यं[4] चोच्यते तथापि तद्गर्हेयत्युक्तेर्निन्द्यमेवोच्यते॥

दृढ। इति "बलि°" [६९] इत्यादिना निपात्यम्॥

क्षुब्ध। विरिब्ध[6]। स्वान्तः[7]। ध्वान्त[8]। लग्नम्[9]। म्लिष्टं[10]। फाण्टम्[11]। बाढं[12] पारिवृढ्यम्। एते "क्षुब्ध°" [७०] इत्यादिना निपात्याः॥

मिन्नः[13]। अत्र "आदितः" [७१] इति नेट्॥

मिन्नं[14] क्रुधा मेदितमीर्ष्यया। प्रमिन्नम् प्रमेदित। इत्यत्र "न वा°" [७२] इत्यादिना नेड्वा॥

शक्तम् शकितम्। अत्र "शकः कर्मणि" [७३] इति वा नेट्॥

दान्तैः दमितैः[15]। अशान्त[16] शमित। पूर्णं[17] पूरितम्। अदस्त अदासितै[18]। स्पष्टम् स्पाशितः[19]। अच्छन्नम् आच्छादित[20]। संज्ञप्त[21] आज्ञापितः[22]। एते "णौ दान्त°[23]" [७४] इत्यादिना वा निपात्याः॥

विश्वस्तया उच्छ्वसिता[24]। जप्ता[25] जपिता। वान्त[26] वमित[27]। रुष्टा[28] रुषितस्य। तूर्णम् त्वरितः[29]। संघुष्टवाक् संघुषितस्वनस्य। आस्वान्तवती आस्वनितम्[30]। अभ्यान्त अभ्यमितस्य। इत्यत्र "श्वसजप°" [७५] इत्यादिना वा नेट्॥

१ ए °र्ते। का°. २ ए °र्हा क्रय°. ३ ए °क्तेच्छ°. ४ ए °मनन्द्यं व्योच्य°. ५ सी डी °पि गर्हे°. ६ ए बी ई विरब्ध. ७ डी ई स्वान्त।. सी स्वान्त। धात। ल°. ८ ए °न्तः। ध्वन्त. ९ ए सी °ग्न। म्लि°. १० सी °ष्टम्। फा°. ११ ए डी °ण्ट। बा°. १२ सी °ढम्। पारिवृढ्य। ए°. १३ ए मिन्न। अ°. १४ सी मिन्न क्रु°. १५ ए डी ई °मितः। अ°. १६ सी °शान्तः श°. १७ ए पूर्णा पू°. १८ सी °त। स्पष्टं स्पाशि°. १९ डी °शित। अ°. २० ए डी ई °दिता। सं°. २१ डी °ज्ञप्तः आ°. २२ सी °पित। ए°. २३ बी णौ दान्त°. २४ ई उच्छ्वसि°. २५ ए बी ई °सित। ज°. २६ ई °पित। वा°. २७ सी डी वान्ता व°. २८ ई रुष्ट रु°. २९ सी °रित। सं°. ३० ए °म्। आभ्या°.

प्रहृष्टोन्नतकेशलोमा[1] हृषितानम्रकेशलोमन् । हृष्टोसि हृषितो न कः । अ[2]हृष्टदं[3]न्त अहृषिताग्रदंष्ट्रः । अत्र "हृ[4]षः°" [७६] इत्यादिना वा नेट् ॥

अपचितम् । इ[5]ति "अपचितः" [७७] इति निपात्यं वा । पक्षे । अपचायितम्[6] ॥

सस्रष्ठ ससर्जिथ । द[7]द्रष्ठ ददर्शिथ । संचस्कर्थ[8] संचस्करिथ । स्वर । ययार्थ आययिथ । अत्वन्[9] । शशक्थ[10] शेकिथ[11] । अत्र "सृजिदृशि°" [७८] इत्यादिना वेड् ॥ तृजिति किम् । किति नित्यानिटो मा भूत् । शिश्रयिथ ॥ अनिट इति किम् ॥ शिश्रयिथ ॥

जहर्थ । इत्यत्र "ऋतः" [७९] इति नेट् ॥ [12]तृज्नित्यानिट इत्येव । अप[13]मस्वरिथ ॥ अत्रा[14]पि निषेधमिच्छन्त्येके । सस्वर्थ ॥

आरिथ । विवरिथ । संविव्ययिथ । आदिथ । इत्यत्र[15] "ऋवृ°" [८०] इत्यादिनेट् ॥

यत्तुष्टुमाथादधिमाहितास्थिशाणेषु संचस्करिमायुधं प्राक् ।
शुश्रोथ यत्त्वं बभृमाधुना तद्धन्तुं[1] भवन्तं वव्रमान्तकत्वम् ॥ ६५ ॥

६५. प्राग्यदायुधं वर्य[16]महितास्थिशाणेषु[17] । आहितास्थीन्येव तेजोहेतुत्वाच्छाणा निकषोपलास्तेषु । आदधिम संस्था[18]पितवन्तोथ तथा

१ प सी °द्धन्तं भ°.

१ प सी डी °मा ऋपि°. २ सी ई अहृष्ट°. ३ प बी डी °दन्ता हृ°. ४ प ई हृषत्या°. ५ डी रत्यत्र अ°. ६ सी °म् ॥ अत्र°. डी °म् ॥ स्र°. ७ प ददृष्ठ. ८ प °थ ययथि°. डी ई °थ य°. ९ ई °त् । अशशक्थ. १० बी °क्थ शकि°. ११ सी °किथः । अ°. १२ प तृजित्या°. १३ प °परव°. १४ डी °त्रापीट् नि°. १५ प °त्र व्रज् इ°. १६ प °यसाहि°. सी डी °यमाहि°. १७ सी डी °पु । आहि°. १८ प °स्थात°.

संचस्करिम सततव्यापारेणेनोत्तेजितवन्तश्च । येनारयो हता इत्यर्थः[1] । अत एव येत्तुष्टुम[2] श्लाघितवन्तोत[3] एवं[4] च सर्वत्र प्रसिद्धत्वाद्यस्त्वं शुश्रोथ जनवार्तयाशृणोस्तदायुधमधुना भवन्तं[5] हन्तुं वयं[6] बभूम धूतव[7]न्तो यतो भवन्तं[8] हन्तुम[9]न्तकत्वं वयं ववृमाङ्गीचकृम ॥

सुस्रोथ दुद्रोथ ससर्थ न त्वं यज्जग्लिवान्नैव न[1] चोचिवान्वा ।
तज्जक्षुषो[2] जघ्निवदस्त्रमुज्जग्मिवन्ममोत्पश्य मदं जगन्वान् ॥ ६६ ॥

६६. यद्यस्मात्त्वं न[10] सुस्रोथ मृत्युभयेन नामूत्रयो[11] न दुद्रोथ[12] न[13] स्विन्नो न[14] च ससर्थ न क्वापि नष्ट इत्यर्थः । नैव च जग्लिवान्न क्षीणहर्षो[15]भून्न चोचिवान्वा न च दीनवचनान्युक्तवान् । त्वं शूर इत्यर्थः[16] । तत्तस्माज्जक्षुषस्त्वां ग्रस्तवतो मम जघ्निवद्धा[17]तकमस्त्रमुज्जग्मिर्वत्त्व[18]न्मारणायोद्यतं[19] सत्त्वं पश्य । कीदृक्सन्[20] । मदं हर्षं जगन्वान्[21]प्राप्तः । मम प्रहारः[22] शूरेष्वेव त्वं च शूरस्तस्माद्धृष्टः सन्मत्प्रहारं पतन्तं पश्येत्यर्थः ॥

प्रोच्येति पादेन भुवं जघन्वान्स[3] वैविशुष्यं[4] क्व चनापि भेजे ।
तद्दादृशुष्यं[5] प्रति वैविदुष्यर्माञ्जीच्चुलुक्य[6]श्च समाधि[7]र्लग्नः[8] ॥ ६७ ॥

६७. इति पूर्वोक्तं प्रोच्योक्त्वा भयोत्पादाय कोपाटोपात्पादेन भुवं

१ प सी डी ई न वोचि°. सी डी न वोचि°. २ सी डी °पो जिघ्न°. ३ प °न्सर्वेवि° ४ प ई °शुष्क क. ५ ई °दानृशु°. ६ बी °मार्जाच्चु°. ७ सी डी °धिमग्नः. ८ प °लग्न ॥.

१ सी डी °त्यर्थः। अ°. २ ई यत्तुष्ट°. ३ सी डी °न्तो अत. ४ प °व स°. ५ सी डी °न्त हंतु व°. ६ प वयववृम. ७ ई धूव°. ८ सी °न्त हंतुम°. ९ प हन्तुम°. १० ई न शुश्रोथ. ११ प °यो दु°. १२ प °थ मस्वि°. १३ सी डी न श्विन्नो. १४ डी न न स°. १५ बी °पोभून चो°. ई °र्षो न चो°. १६ प °र्थः। स्तत्त°. १७ बी ई °द्धातुक°. १८ ई °वन्मा°. १९ डी °त संत्त्वं. २० सी °न्। मंदह°. २१ ई °न्वात्प्राप्तः. २२ प °हार शू°.

जघन्[1]वान्हतवान्स सुरः क चनापि[2] कापि स्थाने वैविशुष्यं प्रवेशं भेजे कर्णस्य स्वध्यानाचलने[3]न विलक्षः सन्काप्यन्तर्हित इत्यर्थः । समाधिलग्नो ध्यानस्थ[4]श्चलुक्यः[5]श्च कर्णोपि तद्दा[6]दृशुष्यं देवदर्शनं कर्माङ्गीव्यञ्जितवान् । कथम् । वैविदुष्यं लाभं प्रति लक्ष्यी[7]कृत्य अन्तर्भूतणिगर्थोञ्जिः सकर्मकोत्र । यथा व्यनक्ति पदार्थान् रविः । देवदर्शनं विफलं न स्यादिति देवदर्शनादात्मनः फलसिद्धिं[8] ज्ञातवानित्यर्थः[9] ॥

संचस्करिमं[10] ॥ स्ताद्य[11]न्येभ्यः । आ[12]दृधिम । इत्यत्र "स्क्रस[13]सृ" [८१] इत्यादिना–इट्[14] ॥ स्तादिवर्जनं किम् । समर्थ । ववृम । बभृम । तुष्टुम । दुद्रोथ । शुश्रोथ[15] । सुस्तोथ ॥

जक्षुपः ॥ एकस्वर । ऊचिवान् । जग्लिवान् । इत्यत्र "घसेक" [८२] इत्यादिना–इट् ॥

उज्जग्मिवत् । जगन्वान् । जघ्निवत् । ज[16]घन्[17]वान् । वैविदुष्यम् । वैविशुष्यम् । दा[18]दृशुष्यम् । अत्र "गमहन°" [८३] इत्यादिना वेट् ॥ इड्यनिटि च ध्य[19]णये-करूपत्वाद्विकल्पपक्षेपि विद्दविशदृशां वैविदुष्यमित्या[20]द्येवोदाहरणम् ॥

आशीत् । इत्यत्र "सिचोञः" [८४] इतीट् ॥

लक्ष्मीर्व्यधावीत्स्वशिरो नृपं चास्तावीदसावीच्च मुदश्रुपूरैः ।
विघ्नान्यरंसीद्दुरितं न्ययंसीन्मुदोदनंसीत्सविधेभ्ययासीत् ॥ ६८ ॥

६८. लक्ष्मीः स्वशिरो व्यधावीदाश्चर्यकारितद्धैर्यदर्शनादकम्पय-

१ सी डी °न्वान्स°. प °न्वाह्मतवान्सु सु°. २ बी °पि स्था°. ३ डी °ने वि°. ४ ई °स्थ श्चलु°. ५ सी °क्यक. ६ ई °दातृशु. ७ प सी ई लक्षीकृ°. डी लक्षाी कृ. ८ सी °लसुद्धिं. डी °लशुद्धि. ९ प °द्धि जात°. १० ई °म ॥ श्राद्य°. ११ प ई °घनेभ्यः. १२ सी डी °ददिम. १३ प स्क्रमित्या°. सी स्क्रसित्या°. ई स्क्रश्रित्या°. १४ प °ट् । × × × वि°. १५ ई °थ । ज°. १६ ई जघ्नवान्. १७ सी °घस्वान्. १८ प ई दातृशु°. १९ प ध्यण्येक°. सी डी ध्यणैक°. २० प °त्यादेवो°.

त्तथा नृपं कर्णमस्तावीच्च[1] । तथा मुदश्रुपूरै[2]र्मुदा कर्णधैर्यातिशयदर्शनो-
त्थानन्देन येश्रुपूरास्तैरसावीच्च स्नाता च । तथा विघ्नादनुकूलप्रति-
कूलान्तराया[3]द्व्यरंसीन्निवृत्ता । तथा दुरितं कष्टं न्ययंसीन्न्ययच्छयत् ।
तथा मुदा कृत्वोद[4]नंसीदुदश्वसीत् । तथा सविधे कर्णसमीपे[5]भ्ययासी-
दभिमुखं गता[6] ॥

न्यधावीत् । असावीत् । अस्तावीत् । इत्यत्र “धूग्सु” [८५] इत्यादिनेट् ॥

न्ययंसीत्[7] । व्यरंसीत् । उदनंसीत् । अभ्ययासीत् । अत्र “यमि”[8] [८६] इत्यादिना सिच[9] आदिरिट् । एषां[10] च सोन्तः ॥

ईशिध्वमीशिध्व उ चेदथोचेदीडिध्व ईडिध्व[1]मु मातरोमुम् ।
ईशि[2]ष्व चेदीशिष ईडिषे चेदीडि[3]ष्व चण्डि[4] स्वपिपीह किं[5] त्वम् ॥ ६९ ॥

किं रोदिषि प्राणिहि जक्षिहि क्ष्मे धर्मे[6] श्वसिह्यद्य हि मा स्म रोदीः ।
त्वं मार्थ रोदः स्म च किं तु जक्ष्या गीर्मा स्म रोदीच्च वृथा ह्यरोदत्[7] ॥ ७० ॥

वि[8]घ्नेद् स्म मादः स्वयशोस्य विघ्नैर्मा स्माद[9]दन्योपि यदद्य लक्ष्मीः ।
वरैः सुसंस्कारममुं प[10]रिष्करोतीत्यथाभाष्यत वेत्रवत्या ॥ ७१ ॥

[11] ७१. अथ वेत्रवत्या लक्ष्मीप्रतीहार्या कर्त्र्याभाष्यतोक्तम् । किमि-

१ प °ध्वनु मा°. २ प °शिपू चे°. ३ प °टिथ च°. ४ प °ण्टि ष्वपि°. ५ प कि त्वाम् ॥ सी कि वि ॥ कि. ६ प °र्मं श्वसिह्यद्य हि. ७ सी डी °रोदीत्. ८ प °घ्नेत्प्रमादस्वय°. ९ बी °दन्यों।पि. १० बी सी डी °रिम्करो°.

१ प °वीग्व । त°. २ ई °रैमुदा. ३ प °याद्वारं°. ४ प °दनमी.° ५ प °पेभ्याया°. ६ प सी डी °ता ॥ न्यधा°. ७ प सी डी °त् । अर°. ८ प यसि इ°. ९ बी सिच् । आ°. १० प एसो°. ११ सी ७१ ल°.

त्याह। उ हे मातरो[1] ब्राह्म्याद्याः[2] सप्त मातृदेवताश्चेदमुं कर्णं यूयमीशिध्वे पालयथेत्यर्थः। तदेशिध्वं पालयेत[3]। अत्रार्थे ममानुज्ञेत्यर्थः। अथ तथा हे मातरश्चेदमुमीडिध्वे निर्व्यूढधैर्यादिगुणावर्जितत्वात्[4]स्तुथ[5] तदेडिध्वं स्तुत। तथा हे चण्डि गौरि त्वं चेदमुमीशिषे[6] पासि[7] तदेशिष्व[8] चेदीडिषे तदेडिष्व किं किमिति त्वमिह कर्णस्य पालने[9] स्तवने च विषये स्वपिषि निरुद्यमीभवसि। तथा हे क्ष्मे भूदेवते किं रोदिषि मम भर्ता कर्णोनेन दुष्टसुरेण भक्ष्यते लग्न इति शोकेन किमित्यश्रूणि मुञ्चसि किं तु प्राणिहि मद्भर्ता विजयमानोस्तीत्युज्जीव तथा जक्षिहि स्वभर्तुरभ्युदयदर्शनेन हस। तथा हे धर्म हि स्फुटमद्य मा स्म रोदीः किं [10]तु श्वसिहि तथा हे अर्थ[11] त्वं मा स्म रोदः[12] किं तु जक्ष्या[13] हस तथा गीः सरस्वत्यद्य मा स्म रोदीश्च हि निश्चितं वृथा निरर्थकं गीः पूर्वमरोदीन्[14]। तथा हे विघ्नेड्[15] विघ्नविनायकास्य कर्णस्य विघ्नैः कृत्वा स्वयशो मा स्मादो मा[16] विनाशय[17]। अत्रोपसर्गा[18] अकिंचित्करत्वात्तवायश एव करिष्यन्तीति[19] भावः। तथान्योपि यक्षराक्षसादिरप्यस्य विघ्नैः[20] स्वस्यायशो[21] मा स्मादद्यद्यस्माद्धेतोः[22] सुसंस्कारं स्थिरवासनममुं कर्णं लक्ष्मीरद्य[23] वरैः[24] प्रसाददानैः परिष्करोत्यलंकरोतीति[25]॥

ईशिषे। ईशिध्वे। ईशिष्व[26]। ईशिध्वम्। ईडिषे। ईडिध्वे। ईडिष्व। ईडिध्वम्[27]। अत्र "ईशीडः[28]" [८७] इत्यादिनेट्॥

१ ए °रो ब्रह्माद्याः. २ सी ब्राह्माद्याः. ३ ए °यतीत्रा°. सी डी °यतेत्यत्रा°. ४ बी °त्वात्स्तुथ त°. ५ ए °त्सुथतडिध्वं. ६ ए °मुनोशि°. ७ ए °सि च चेशीष्व. ८ सी डी °दशीष्व. ९ सी डी °लनस्त°. १० बी तु स्वसि°. ११ ए °र्थ इं मा. १२ ए रोह कि. १३ ए जक्षा हमा त°. १४ बी °रोदत्त। त°. १५ बी °घ्नेट् वि°. १६ बी मा स्म वि°. १७ डी °शय। अ°. १८ ए °र्गा कि. १९ ए °ष्यतीति. २० ए विस्तैः स्व°. २१ ए बी स्वय°. २२ ए स्मानद्य°. बी स्मादाद्य°. सी डी °स्मादद्यस्मा°. २३ ए °लक्ष्मीर°. २४ ए वचैः प्र°. २५ बी सी डी °रिस्करो°. २६ ए ईसिष्व. २७ डी °म्। ईडिषे ईडिध्वे। ईडिष्व। ईडिध्वम्। अ°. २८ ए °शीङ् इ°.

रोदिषि । स्वपिषि । प्राणिहि[1] । श्वसिहि । जक्षिहि । इत्यत्र "रुत्पञ्च[2][3]°" [८८] इत्यादिना-इट् ॥ अय इति किम् । जक्ष्याः[4] ॥

मा स्म रोदीत् । मा स्म रोदीः[5] । इत्यत्र "दिस्योरीट्" [८९] इतीट् ॥ दिस्योरिति किम् । प्राणिहि ॥ दिसाहचर्यात्सिर्[6]ह्यस्तन्या एव । तेन रोदिषि[7] ॥

मा स्मादत् । मा स्मादः । अरोदत् । मा स्म रोदः । अत्र "अद्श्चाद्" [९०] इत्यद् ॥

संस्कारम् । परिस्क(ष्क ?)रोति । इत्यत्र "सं" [९१] इत्यादिना स्सट् ॥

देवी सितज्योतिरुपस्कृतेनोप[1]स्कुर्वती द्यामनुपस्कृतं तम् ।
नृपं प्रसन्ना रभ[2]सादुपस्कुर्वाणा[3]नुपस्कारमिदं बभा[4]षे ॥ ७२ ॥

७२. देवी[9] लक्ष्मीरनुपस्कार[10]ं वाक्याध्याहाररहितं यथा स्यादेवमिदं वक्ष्यमाणं बभाषे । कीदृक्सती । प्रसन्नात एवानुपस्कृतं रागद्वेषादिविकाररहितं तं नृपं कर्णं रभसादौत्सु[11]क्येनोपस्कुर्वाणा पुत्रलाभवरेण विशेषयन्ती । अत एव[12] सित[13]ज्योतिरुपस्कृतेन स्मित[14]स्य प्रसादोद्भवहसितस्य ज्योतिषां कान्तीनामुपस्कृतेन समुदायेन कृत्वा द्यां व्योमोपस्कुर्वत्यलंकुर्वती ॥

द्यामुपस्कुर्वती । ज्योतिरुपस्कृतेन । तमुपस्कुर्वाणा । अनुप[15]स्कृतम् । अनुपस्कारम् । अत्र "उपाद्" [९२] इत्यादि[16]ना स्स[17]ट् ॥

---

१ प डी °पकुर्व°. २ प °भरमादु°. ३ प °णामुप°. ४ प °भापेः ॥.

---

१ प °हि । स्वसि°. २ प रुव्यच°. ३ सी डी °श्वक इ°. ४ बी जक्ष्या ॥. ५ प रोदीत् । इ°. ६ प °त्सिह्यंग्तरया ए°. ७ प सी °पि ॥ सा स्मा°. ८ बी °स्कार । प°. ९ प देर्वा ल°. १० प °रं व्याक्या°. ११ प °त्सुकोनो°. १२ बी सी डी °व च स्मि°. १३ डी °तस्य. १४ प °तरम प्र°. १५ सी °पस्का°. १६ सी °ना स्मट्. १७ प रस इ॥ तु°.

तुष्टास्म्युपस्कीर्य[1] लुनामि ते[2]घं मा भूत्प्रतिस्कीर्णमतः परं ते ।
यदप्युपस्कीर्णमिहोपसर्गैस्तैस्ते तपः प्रत्युत दीपितं हि ॥ ७३ ॥

७३. हे राजन्नस्म्यहं तुष्टा सती ते तवा[1]घं कष्टमुपस्कीर्य विक्षिप्य लुनामि । अतश्चातो[2]स्मादिनात्परं पश्चात्ते प्रतिस्कीर्णं हिंसानुबन्धी विघ्नेट्कृतो विक्षेपो मा भूत् । य[3]दप्युपसर्गै[4]र्विघ्नेट्कृ[5]तोपद्रवकर्तृकै[6]मुपस्कीर्णं हिंसानुबन्धी विक्षेप इह स्थानेभूत्तेन परीक्षानिर्वाहशाणभूतेनोपस्कीर्णेन तैरुपसर्गैः[7] कर्तृभिर्हि स्फुटं [8]प्रत्युत विशेषेण ते तपो दीपितमुज्ज्वालितम् ॥

उपस्कीर्य लुनामि । इत्यत्र "किरो लवने" [९३] इति स्सट् ॥

प्रति[10]स्कीर्णम् । उपस्कीर्णम् । अत्र "प्रतेश्च वधे" [९४] इति[11] स्सट् ॥

अपस्किरन्ते श्वकवि[3]ष्किरोक्षाणः क्षेत्रपालाच्युतशंकराणाम्[4] ।
प्रस्तुम्पति स्वर्गिगवीं च वत्सो यत्रास्तु तत्राप्यहता तवाज्ञा ॥७४॥

७४. तत्रापि स्वर्गेपि तवाज्ञाहता मत्प्रसादादस्खलितास्तु । यत्र स्वर्गे क्षेत्रपालाच्युतशंकराणाम् । अज्ञातः श्वा श्वकः कु[12]कुरः । विष्किरः पक्षी । अर्थाद्गरुडोत्र । उक्षा वृषभ[13]ः । द्वन्द्वे ते वाहनान्यप[14]स्किरन्ते विक्षिपन्तीति सामा[15]न्यार्थः । विशेषस्त्वयम् । श्वा आश्रयार्थी सन् वि[16]लिख्य भस्म विक्षिपति । विष्कि[17]रो [18]भक्ष्यार्थी सन् विलिख्याव-

१ डी °पस्कार्य. २ सी तेपमा. ३ प विष्करो°. सी डी विस्करो. ४ डी °म् । प्रास्तु°.

१ प °वाय क°. २ प साद्दिना. ३ प यदिप्यु. ४ सी विंघ्नंकृतो°. डी °विंघ्नकृतो°. ५ प °कणिक°. ६ प सी °स्कीर्णि हि. ७ प °सर्गैक. ८ प प्रत्यत. ९ सी डी °नाति । इ. १० सी °निष्कीण । उ. ११ सी ति स्सट् ॥ अ°. १२ प कुक्करः. सी कुकुरः. डी कुर्कुरः. १३ प °भः । र्थाद्रत. १४ प °परिकर°. १५ प °मान्यर्थः. १६ प °लिष्यति स. सी °लिष्य भ°. १७ बी विष्करो. १८ प सी डी भक्षार्थी.

स्करं वि[1]क्षिप[2]ति। उक्षा हृष्टः सन् विलिख्य तटं वि[3]क्षिपति तथा यत्र च वत्सः स्वर्गिगवीं[4] कामधेनुं प्रस्तुम्पत्युत्तुण्डयति । पयःपानायोध आघातपूर्वं[5] लेढीत्यर्थः ॥

प्रस्तुम्पति[1]र्गौरपि मास्तु देशः प्रस्तु[2]म्पको नन्दतु ते[3]द्य वत्स ।
मा सिश्न मुश्चाद्य समाधिमुद्रामुम्भामि यत्तेन्यदभीप्सितं वा ॥७५॥

७५. हे वत्स पुत्र ते गौरपि धेनुरपि वृषोपि वा प्रकृ[5]ष्टस्तुम्पतिर्हिंसा यस्य स प्रस्तु[6]म्पतिर्मास्तु । तथा तव देशश्च प्रगै[7]तस्तुम्पोस्मात् कश्चि प्रस्तुम्पकः परचक्रोपद्रवादि[8]रहितः सन्नन्दतु । अत एवाद्य समाधिमुद्रां योगनिरोधं[9] मा सिश्च मा वर्धयेत्यर्थः । किं तु मुञ्च । वा यद्वा यत्तेन्यत्स्वर्गेप्यस्खलिताज्ञाभवनादेरपीतरदभीप्सितं समाधिमुद्राया अमोक्षलिङ्गेनाभि[10]लषितमस्ति तदप्युम्भामि पूरयामि ॥

शुम्भत्स्वदृम्फन्सुधयेव तृ[4]म्फन्गुम्फन्नु हारान्वचनै[5]रजम्भः ।
आरम्भरन्धो[6]न्मुदितोथ लक्ष्मीं स रेधुषीमारभतेति नो[7]तुम् ॥७६॥

७६. अथै[11]वंभणनानन्त[12]रं स कर्णो रेधुषीं संसिद्धां फलदानोन्मुखीमित्यर्थः । लक्ष्मीमिति व[13]क्ष्यमाणगीत्या नो[14]तुं स्तोतुमारभ[15]त । कीदृक्सन् । अजम्भो मैथुनरहितो ब्रह्मचारीत्यर्थः । अत एवारम्भरन्धोन्मु-

---

१ प °तिर्गोर°. २ प स्तुम्यको. ३ प ते व°. डी तद्य व°. ४ डी तृफन्गु°. ५ डी नैरंज°. ६ प °न्धोमुदितोद्य ल°. ७ प नोत्तुम्.

---

१ बी विक्षप°. २ प °ति विष्किरो भक्षार्थां मन्त्रिलिख्यावस्करं विक्षिपति उ°. ३ बी विक्षप°. ४ प सी °गवी का°. ५ डी °कृष्टा स्तु°. ६ प °स्तुन्तिर्मा°. ७ बी °गतः स्तु°. ८ प °रहिः स°. ९ प °रोध मा. १० प °लपत°. ११ प °थैवम°. १२ प °न्तरसं स. १३ प वक्षममा°. १४ प नोत्तु स्तो°. १५ डी °भत्। की°.

दितः कार्यस्य संसिद्ध्या हृष्टोत एव चादृम्फंस्तपोध्यानादिनाश्लिश्य-
मानोत एव च शुम्भन् शोभमानोत एव च सुधया तृम्फन्निवेव
एवं च वचनैः कृत्वा हारानिव राज्ञोतिहृष्टत्वेन वचसां स्मितसितत्वा-
त्सुसंबद्धत्वाच्च मुक्ताकलापानिव गुम्फन् ग्रथ्नन् ॥

आरेभ आलम्भ्यपशूननालम्भयन्पुरो यः करुणां लभन्तीम् ।
त्वामर्चितुं तेन यशांसि लम्भं लम्भं विभोलम्भ्युपलम्भ्यसिद्धिः
॥ ७७ ॥

७७. हे विभो स्वामिनि यस्त्वामर्चितुमारेभे । कीदृक्सन् । पुर-
स्तात्त्वाग्रत आलम्भ्यैर्पशून्वध्यांश्छागादिपशूननालम्भयन्नहिंसन् । यतः
किंभूतां त्वाम् । करुणां लभन्तीं प्राप्नुवतीम् । तेन पुंसा कर्त्रा
यशांसि लम्भं लम्भमुपलम्भ्यसिद्धिः प्रशस्यकार्यनिष्पत्तिरलम्भि प्राप्ता ॥

असूपलम्भां मतिमत्र लाभं लाभं तवालाभि पदार्चनं यैः ।
प्रालम्भि नात्मा हि कलिं प्रलम्भं प्रलम्भमेभिः सशिवोपलम्भैः
॥ ७८ ॥

७८. यैर्नरैरसूपलम्भां दुःप्रा(दुष्प्रा)पां मतिं ज्ञानं लाभं लाभमत्र
जगति तव पदार्चनमलाभि । सज्ज्ञानैर्यैस्त्वत्पादपूजा प्राप्तेत्यर्थः । ए-

१ ए आम्भप°. २ बी °लम्भप°. ३ ए °र्चितं ते°. ४ डी °भं नवा°. ५ ए तबाला°. ६ ए प्रलिम्भं°. ७ बी लभं प्र°. ८ ए प्रलिम्भ°.

१ डी °दितोक्ति°. २ ए तृफन्नि°. ३ बी °वा तृप्यंन्निवात. ४ सी डी °व व°. ५ ए चनैः. ६ डी °संबंद्ध°. ७ ए मुक्ताक°. ८ ए बी सी ई ग्रथन्. ९ ए °त्तथाग्र°. १० बी °लम्भप°. ११ ए °पशूंन्व°. १२ बी °शून्वंध्यां°. १३ ई °भती प्रा°. १४ बी °वन्तीम्. १५ ए बी सी डी °लभ्यसि°. १६ बी °निप्पत्ति°. १७ डी °रैरंसू°. १८ सी लाभम°. १९ सी डी °ति नव. २० ए °दार्थन°. २१ ए °लापि । स°. २२ ई °त्यर्थ । ए°.

भिन्नैः कलिं पापयुगं प्रलम्भं प्रलम्भमभीक्ष्णं वञ्चयित्वा हि स्फुटमात्मा न प्रालम्भि पर[1]मपुरुषार्थमोक्षप्रापणेन न वञ्चितः। किंभूतैः। सशिवोपलम्भैः परमात्मदर्शनयुक्तैः[2]। ते परमज्ञानिनः सन्तः सिद्धा इत्यर्थः॥

अपस्किरन्ते श्वकविष्किरो[3]क्षाणः। अत्र "अपात्[4]°" [९५] इत्यादिना[5] स्सट्॥

विष्किर[6]। इत्यत्र "वौ विष्किरो वा" [९६] इति वा स्सट्[7] निपात्यः॥

प्रस्तुम्पति वत्सः स्वर्गिगवीम्[8]। अत्र "प्रात्०" [९७] इत्यादिना स्सट्॥ अन्ये तु प्रात्परस्य तुम्पतिशब्दस्य गव्यभिधेये स्सडादिः स्यात्। प्रस्तुम्पति[9]र्गौः[10]। तुम्पतिधातो[11]स्तु[12] स्सट् न स्यादिति मन्यन्ते॥ एके तु प्रात्तुम्पतेः कपीत्यारभन्ते[13]। कपि हिंसायां कंप्यर्थे[14] वा कपि समामान्त इति[15] च व्याचक्षते। प्रस्तुम्पति वत्सः[16] स्वर्गिगवीम्। दुग्धक्षारणायोधसि हिनस्तीत्यर्थः। प्रस्तुम्पकः॥

नन्दतु। इत्यत्र "उदितः°" [९८] इत्यादिना नोन्तः[17]॥

मुञ्च। सिञ्च। तृम्फन्[18]। अदम्फन्। गुम्फन्। शुम्भन्। उम्भामि[19]। इत्यत्र "मुचादि°" [९९] इत्यादिना नोन्तः॥

अजम्भः[20]। अत्र "जभः स्वरे" [१००] इति नोन्तः॥

रन्ध। इत्यत्र "रध°" [१०१] इत्यादिना नोन्तः॥ इटि तु परोक्षायां[21] रेधुषीम्[22][23]। अत्र नस्य लुक्॥

आरम्भ। इत्यत्र "रभ°" [१०२] इत्यादिना नः[24]॥ अपरोक्षाशवीति किम्। आरेभे। आरभत॥

---

१ डी °रपुषा°. २ ई °क्तः। प°. ३ ई °विष्करो. ४ बी अपीत्या°. ५ ए इना. ६ ए सी डी °ष्किरो. ७ ए स्मद्विपा°. ८ ए स्वगिग. डी स्वर्गंग°. ९ ए स्तुपति°. १० ई °तिगौः। तु. ११ ए °तोस्म°. १२ सी डी °स्तु न. १३ बी °रम्भे। क°. १४ ए कन्यर्या°. सी कत्यर्या. ई कम्यया. १५ सी डी °ति व्या°. १६ ए वत्स्तास्व°. १७ डी °न्तः॥ मुञ्च. १८ ए तृफन्। अ° १९ ए उभा-त्य°. सी डी उम्भन्। इ°. २० ए अतजभस्व°. २१ डी °क्षाया रे°. २२ ए रेधुषी°. २३ ए सी डी °पी। अ°. २४ ए °नः॥ स्वप°.

अनालम्भयन् । इत्यत्र "लभः" [१०३] इति नः ॥ लभेः परस्मैपद[1]स्याप्य-भिधा[2]नाल्लभ[3]न्तीमिति केचित् ॥

आल[4]म्भ्य । इत्यत्र[5] "आङो यि" [१०४] इति नः ॥

उप[6]लम्भ्य । इत्यत्र "उपा[7]त्स्तुतौ" [१०५] इति [8]नः ॥

अलाभि अलम्भि। [9]लाभं लाभम् [10]लम्भं लम्भम्। [11]इत्यत्र "ञिख्णमोर्वा"[१०६] इति वा नः ॥

खल । असूपलम्[12]भाम् । घञ् । [13]उप[14]लम्भैः ॥ ञि । प्रा[15]लम्भि[16] । प्रलम्भं प्रलम्भम् । अत्र "उपसर्गात्°" [१०७] इत्या[17]दिना नः ॥

अभक्तिभाजां[1] त्वमिहातिदुर्लम्भतोतिदुर्लम्भ [2]ऋतं ब्रवीमि ।
भक्तात्मनां चातिसु[3]लम्भतोतिसुल[4]म्भ ऋद्ध्यास्पदमस्यजस्रम्
॥ ७९ ॥

७९. हे प्रभो अहमृतं सत्यं ब्रवीमि[18] । किं [19]तदित्याह । इह भुव्य-भक्ति[20]भाजामभक्तानां त्वमतिदुर्लम्भतोप्यतिशयदुःप्रा(दुष्प्रा)प्यादपि वस्तुनोतिदुर्लम्भा तथा[21] ऋद्ध्यास्पदमणिमादिमहर्द्धीनां स्थानमसि त्वं भक्तात्मनां चातिसुलम्भतोप्यतिसु[22]लम्भा ॥

खल् । अतिसुलम्भतः । अतिदुर्लम्भतः ॥ घञ् । अतिसुलम्भा । अतिदुर्लम्भा । इत्यत्र "सुदु[23]र्भ्यः" [१०८] इति नः ॥

१ **ए** °जां त्तमि°. २ **ए** ऋभं ब्रवीसि । भ°. ३ **बी** सुम्भंतो°. ४ **ए** °लभ ऋ°.

---

१ **डी** °स्याभि°. २ **बी** °धान्नाल्ल°. ३ **ए** °भन्तः । मि°. ४ **बी डी** °लम्भ । इ°. ५ **सी** °त्र उपा°. ६ **बी** लम्भ । इ°. ७ **ए** °पास्तुतौ. ८ **ई** नः ॥ ला°. ९ **ए** लाभ लाभ ल°. १० **बी** लभं लभम् ।. ११ **ए** इत्रत्य लिख्ण°. १२ **ए** °म्भाः ॥. **सी डी** °म्भा ॥. १३ **सी डी** उपाल°. १४ **डी** °लम्भेः ॥. १५ **ए** °लम्भिः । प्र°. १६ **बी** °म्भि । ख्णम् । प्र°. १७ **सी डी** °त्याना. १८ **ई** °मि । कित°. १९ **ए** त इत्याह । दुह भु°. २० **ए** °क्तिराजामाभ°. २१ **ई** °थास्प°. २२ **ए सी डी** °लभा ॥. २३ **ए** °दुर्लभ्य इ°.

[1]नंष्ट्रीं च मङ्क्ष्क्रीं च यदाम्बुधौ त्वां स्रष्टापि न[3] द्रष्टुमलं तदा हि ।
दृष्टं निसृष्टं जगतोपि दौस्थ्यं स्पष्टुं विमर्ष्टा तव कः कलां तत् ॥८०॥

८०. स्रष्टाप्यास्तामन्यो जनो ब्रह्मापि[1] यदा नालं[2] न समर्थोभूत् । किं कर्तुम् । त्वां द्रष्टुम् । किंभूतां सतीम् । नंष्ट्रीं[3] च ऋषिशापेन जगतो नश्यन्तीं च । तथाम्बुधौ मङ्क्ष्क्रीं[4] च मज्जन्तीं च । तदा हि स्फुटं जगतोपि सकलविश्वस्यापि निसृष्टं स्वाभाविकं दौस्थ्यं[5] दारिद्र्यं दृष्टम्[6] । अब्धिमथनात्पूर्वं किल दुर्वासोमुनिना[7]त्यादरेण दत्तायां सन्तानकपु[8]ष्पमालायामिन्द्रेणै[9]रावणकुम्भस्थले[10] क्षेपेणावज्ञातायां क्रुद्धेन शापो[11] दत्तो यथा लक्ष्मीगर्वेणै[12]वमवज्ञेति निःश्रीकं जगद्भूयादिति । ततो लक्ष्मीरब्धौ तथा निलीना[13] यथा स्रष्टापि न द्रष्टुं शकिता जगत्वातिदुःस्थमा[14]सीदिति पुराणम् । तत्तस्मात्तव[15] कलां[16] माहात्म्यं[17] स्पष्टुं[18] ज्ञातुं को विमर्ष्टा विमृशति । अहं लक्ष्मीमाहात्म्यं ज्ञास्यामीति[19] चिन्तामपि न कोपि करोतीत्यर्थः ॥

[5]स्रष्टास्त्रमास्रष्ट ऋतं च शास्त्रं स्रष्टा गिरीन्वारिनिधींश्च[6] सर्प्ता ।
अस्त्वग्निचिद्धा[7] यजमान औदासीन्यं भवत्या यदि तन्मुधैतत् ॥८१॥

८१. अस्त्रं धनोपार्जनार्थं[20] चापादि शस्त्रं स्रष्टा[21][22] स्वविद्यानैपुणेन[23][24]

१ सी ई नंष्ट्री च. २ बी मङ्क्ष्क्री च. ३ बी न द्रष्टु. ४ ए तथा हि. ५ सी डी स्प्रष्टास्त्र°. ६ ई °श्च त्रप्ता ।. ७ ए °द्धा जयमा°.

१ ई °ह्मादि य°. २ सी डी °लं स°. ३ ए सी डी °ष्ट्रीं ऋ°. ४ ए सी डी ई °ङ्क्ष्क्रीं म°. ५ बी °थ्यं द्रष्ट°. ६ ए दृष्टा अब्धिम°. ७ ई °वांसामु°. ८ ए सन्तांन°. ९ बी °पुष्फमा°. १० सी डी °स्थलक्षे°. ११ ए शापाद°. १२ ए लक्ष्मीं ग°. १३ ए °ना स्र°. १४ ए °गत्वाति°. १५ ई °स्मात्ते क°. १६ बी °लां महा°. १७ ई °त्म्यं स्प्रष्टुं ज्ञा°. १८ ए बी स्पष्टुं ज्ञा°. १९ ए °मी चि°. २० बी °नार्थे चा°. २१ सी स्प्रष्टाः स्त्ववि°. २२ बी °ष्टात्रवि°. डी ई °ष्टास्त्रवि°. २३ सी °पुष्पेन. डी °पुण्येन. २४ ई °न गृही°.

ग्रहीता नरोऽस्तु । ऋतं सत्यं शास्त्रं[1] शब्दशास्त्राद्याम्रष्टा[2] च यथावस्थिता[3]-र्थावगमेन विचारयिता वा नरोऽस्तु । उद्यमित्वाद्रिरीन् रोहणादिशै-लान् स्रप्ता वा गन्ता वा नरोऽस्तु । वारिनिधीन्सप्ता[4] च गन्ता वास्तु । यजमानोऽग्निचिद्वा धनवृद्धिहेतुयागस्य कारयिता वास्तु । परं यदि भवत्या औदासीन्यमुपेक्षानाराधितत्वेनास्रस्प्रष्टा[5][6](ष्ट्रा)दिपु चेन्नानुकूला-सीत्यर्थः । तत्तथैतदस्रस्पर्शनादि[7][8] मुधा[9] विफलम् ॥

नंष्ट्रीम्[10] । अत्र "नशो धुटि" [१०९] इति नः ॥

मङ्क्ष्यीम् । अत्र "[11]मस्जेः[12] सः" [११०] इति[13] सस्य नः[14] ॥

स्रष्टा । द्रष्टुम् । अत्र "अः सृजि°" [१११] इत्यादिना-अः । अकितीति[15] किम्[16] । निसृष्टम्[17] । दृष्टम् ॥

स्प्रष्टा स्पर्ष्टुम् । आम्रष्टा विमर्ष्टा । स्रप्ता सर्प्ता । इत्यत्र[18] "स्पृश°" [११२] इत्यादिना[19] वा-अः ॥

अग्निचित् । इत्यत्र "ह्रस्वस्य°" [११३] इत्यादिना[20] तोऽन्तः ॥

यजमानः । अत्र "अतो म आने" [११४] इति मः ॥

औदासीन्यम् । अत्र "आसीनः" [११५] इत्यासीनशब्दो[21] निपात्यः ॥

वचः सुधामुद्गिरति न्वकीर्णं[1] मुखं च[2] पूर्तेन्दुरुचिं[3] जिहीर्षु ।
पोपूर्यते कौस्तुभतां नखश्रीः शिष्टः करौ स्वर्द्रुमपल्लवत्वम् ॥८२॥

१ प °कीर्णं मु°. २ प च मूर्तें. ३ प °रुचि जि°.

१ सी शाद्या°. २ प °ब्दशब्दशा°. ३ बी °थाम्थि°. ४ प सी °धीन्सुर्प्ता°. ५ प °नास्वस्प्र°. ६ सी °स्रस्पृष्टा°. ७ बी °त्तदैत°. ई °त्तदैतत्तद°. ८ प थैदतदस्वस्प°. ९ प °दि मुधा. १० ई °टि नः. ११ बी मस्जे श इति शस्य. १२ प °स्जेः श इ°. १३ प °ति शस्य मः ॥. १४ प सी डी नः ॥ स्प्रष्टा. १५ प अती°. १६ सी डी °म् । सृ°. १७ ई म् । द्रष्ट°. १८ सी डी °त्र दृश°. १९ बी °ना अः. २० सी °ना नोतः ॥ य°. डी °ना नोन्तः. २१ बी °त्याशीन°.

इयं विशिष्टाशिषदब्जवासे तवार्यशी[1]: कामगवीत्वमाशीः ।
अक्रूतमक्ष्मापितपादमेतद्गजेन्द्रयानं दिदिवत्प्रयातम् ॥ ८३ ॥

किं क्रूय्यते वा विनिषेव्यसे[2] त्वं सहोदरैः कीर्तितसेवनैर्नु ।
मूर्ध्ना प्रणिंस्ते[3] घनघात्यविघ्नो दानीय एषोपि जनस्तवांह्री[4] ॥८४॥

८३-८४. हे अब्जवासे लक्ष्मि अकीर्णं[1] संबद्धं ते वचस्तुष्टास्मी-[2]त्यादिगीराह्लादकत्वात्सुधां[3] न्वमृतमिवोद्गिरति[4] क्षरति तथा ते[5] मुखं पूर्णे-न्दुरुचिं परिपूर्णचन्द्रलक्ष्मीं[6] जिहीर्षु पूर्णेन्दुतुल्यं मुखमित्यर्थः । तथा नखश्रीरत्यारक्तत्वादिगुणैः कौस्तुभतां कौस्तुभमणित्वमात्मनः[7] पोपूर्य-तेत्यर्थं पोषयति । तथा करौ मार्दवादिगुणैः स्वर्द्रुमपल्लवत्वं पारिजात-किशलयतां स्वस्य शिष्टो वदतः । तथार्यान्पुण्यवतः शास्ति वक्तया-र्येशीः । पुण्यपात्रेषु भवन्तीत्यर्थः । इयं प्रत्यक्षा विशिष्टा साधितवि-शेषकार्याशीरस्तु तत्राप्यहृता[8] तवाज्ञेत्यादिनोक्तपूर्वं[9] मङ्गलशंसनं[10] काम-गवीत्वं सर्वकार्यसाधकत्वात्स्वस्य कामधेनुतामशिषदवोचत् । तथैतत्प्र-त्यक्षमक्रूतं निःशब्दमक्ष्मापितपादमकम्पितांह्रि प्रयातं मत्समीपेभि-गमनं कर्तृ गजेन्द्रयानमैरावणगतिं दिदिर्वज्जितवत्[11] । वा यद्वा किं क्रूय्यते वचः सुधामुद्गिरतीत्यादि किमित्युच्यते । उपमानोपमेयतोक्त्या यद्वचनादेः सकाशाद्भेदो[12] मयोक्तः सोयुक्त एवेत्यर्थः । यतो नु शङ्के कीर्तितसेवनैर्वचनादिव्याजेन ज्ञापितसेवैः सहोदरैः[13] सुधादिभिरेव साक्षात्त्वं सेव्यसे सर्वसहोदरेभ्यूत्कृष्टत्वादाश्रीयसे । न तु ते सुधादि-तुल्यं वचनादि किंचिदस्तीत्यर्थः । सुधेन्दुकौस्तुभस्वर्द्रुमपल्लवकामधेनु-

१ सी डी तथार्य°. २ प विनेष°. ३ बी णिस्तै घ°. ४ ई °ह्री ॥ अ°.

१ प °कीर्ण सं°. २ प °सीदि°. ३ प °धा तृमृ° ई °धा त्वमृ°. ४ ई °वोद्गर°. ५ प ते सुखं. ६ प सी °लक्ष्मी जि°. ७ ई °मात्मानः. ८ डी °त्राहते त°. ९ बी °पूर्वम°. १० ई °ङ्गलशं°. ११ डी °वन्जित°. १२ प सी डी °दो नयो°. १३ प °दिरं°.

गजेन्द्रा अब्धेरुत्पन्नत्वाल्लक्ष्म्याः[1][2] सहोदरा इति। अतश्चैषोपि मल्लक्षणो जनस्तवांह्री मूर्ध्ना[3] प्रणिंस्ते[4] चुम्बति नमतीत्यर्थः। येतः[5] कीदृक्। घनैर्लोहघनैर्घात्या हन्तुं शक्या विघ्ना निष्पुत्रत्वाद्यन्तराया यस्य सः कृच्छ्रोत्तार्यविघ्न इत्यर्थः। तथा दीयते यस्मै स दानीयः[6] प्रसाददानयोग्यः॥

अकीर्णम्[7]॥ ङिति। गिरति[8]। अत्र[9] "ऋतां क्ङितीर्[10][11]" [११६] इतीर्[12]॥ बहुवचनं[13] लाक्षणिकस्यापि परिग्रहार्थम्। जिहीर्षु[14]॥

पूर्त[15]। पोपूर्यते[16]। अत्र "ओष्ठ्यादुर्" [११७] इत्युर्॥

अङि। अशिषत्[17]॥ क्ङिति व्यञ्जने[18]। शिष्टः। विशिष्टा। इत्यत्र "इसासः[19]°" [११८] इत्यादिना[20]–इस्[21]॥

आर्यशीः[22]। अत्र "क्वौ" [११९] इतीस्॥

आशीः। अत्र "आङः" [१२०] इतीस्॥

अक्ष्मापित। अक्रूतम्[22]। दिदिवत्। इत्यत्र[23] "य्वोः°" [१२१] इत्यादिना यवयोर्लुक्॥ यवर्जनं किम्[24]। क्रूय्यते। विनिपेव्यसे॥ व्यञ्जन इति किम्। सेवनैः॥

कीर्तित। इत्यत्र[25] "कृतः कीर्तिः" [१२२] इति [26]कीर्त्॥

षोडशः[27] पादः[28][29] समाप्तः

---

१ ई अब्धरु°. २ प °लक्ष्म्या स°. सी °लक्ष्मा स°. ३ ई °र्धा पणि°. ४ प °स्ते युंवति. बी °स्ते स्पृशति न°. ५ प यता की°. ६ प सी °नीय प्र°. ७ प °र्णं॥ ङि°. ८ प गिरिति. ९ प °त्र ऋतांन्तिती°. १० सी °तीर। ब°. ११ डी °र्। ब°. १२ प °तीरा। ब°. १३ ई बलुव°. १४ ई जिजिह्री°. १५ ई °र्तम्। पो°. १६ डी र्यत्ते। अ°. १७ प °त्। न्विति. १८ बी °ने। विशिष्टा। शिष्टः। इ°. १९ सी डी इशासः. ई इः सा°. २० प °दिन् इ°. २१ ई इम्॥ आर्यसी। अ°. २२ सी °त। दि°. २३ प °त्र य्वोः इ°. २४ प °म्। क्नूय्य°. २५ प °त्र कृतः. २६ प बी सी ई कीर्त्त॥. डी कीर्त्॥. २७ सी षोडः पा°. २८ सी पादस°. २९ ई °दः॥.

[1]घन[2]घात्य । इत्यत्र "आतुमः°" [१] इत्यादि[3]ना प्रत्ययः कृत् ॥ अत्यादि[4]-रिति किम् । प्रणि[5]स्ते ॥

दानीयः । अत्र "बहुलम्" [२] इत्युक्तादर्थादन्यत्रापि कृत् ॥

त्वन्नन्दनस्यास्य पुरापि मातर्न न्यूनमंह[1]श्छिदुरेस्ति किंचित् ।
यत्कृष्टप[2]च्यान्नमयी धरित्री [3]भिदे[4]लिमं भङ्गुरधैर्यमारम् ॥८५॥

८५. हे अंह[6]श्छिदुरे पापच्छेदिके मातस्त्वन्नन्दनस्य मल्लक्ष्णस्य पुरापि साक्षात्त्वदाशीर्दानात्पूर्वमपि न किंचिन्न्यूनमस्ति । यद्यस्मात्त्व[7]त्प्रसादप्रतापमात्रादपि पृथ्वी कृष्टपच्यानि कृष्टे स्वयं[8] [9]पक्कान्यन्नानि प्राचुर्येण प्राधान्येन वा यस्यां "अस्मिन्" [७.३.२] इति मयटि कृष्टपच्यान्नमय्यस्ति । तथारमरिसमूहो भङ्गुरधैर्यं [10]स्वयंविशीर्यमाणधैर्यमत एव भिदेलिमं स्वयमेव विदीर्यमा[11]णमास्ते ॥

नन्दनस्य । इत्यत्र "क[12]र्त[13]रि" [३] इति कर्तरि कृत् ॥

भङ्गुर । छिदु[14]रे । भिदेलिमम् । कृष्टपच्य । इत्यत्र "व्याप्ये°" [४] इत्यादिना घुरकेलिमौ प्रत्ययौ कृष्टपच्यश[15]ब्दश्च कर्मकर्त[16]रि स्युः ॥

---

१ प °हस्तिदु°. सी °हस्थिदु°. २ प °पश्चान्न°. ३ बी भिदिलि°. ४ प °लिसुर°.

---

१ डीपुस्तके समासे–'घनघात्य इत्यत्र कारकं कृतेति समासः'. २ प °घात । इ°. ३ प °दिनाः प्र°. ४ बी °त्यादेरि°. ५ डी पुस्तके समासे–'प्रणिस्त इत्यत्र कृत्संज्ञायां निंसनिक्षेति णत्वविकल्पः स्यात्स तु न'. ६ बी °हच्छिदु°. सी °हस्थिदु°. ७ बी त्प्रतापप्रसा°. सी °त्प्रसात्वत्प्रसा°. ८ प °यं---न्य°. ९ सी डी पच्यान्य°. १० प स्वयं वि°. ११ सी डी °णमस्ति ॥. १२ सी °तंरी क°. १३ प °रिरिति. बी °रि कृत् इ°. १४ प सी डी °दुर । भि°. १५ प °ब्दस्य क°. १६ सी °रि स्कु ॥. डी °रिस्कुः ॥.

धत्सेजर्यं[1] रुच्यमव्यथ्यभव्ये वास्तव्या चेन्मेसि चित्ते तदानीम् ।
जन्यं रम्यं सूनुना जन्यरम्यापात्याप्लाव्यस्फातिना[3]पात्यमङ्के ॥८६॥

८६. अव्यथ्येषु मुनिषु भव्या रक्षकत्वेन[1] प्रधाना यद्वाव्यथ्या निर्भया च सा भव्या च हे अव्यथ्यभव्ये लक्ष्मि चेत्त्वं रुच्यं मनोज्ञमजर्यमार्यसंगतं[2] धत्से तथा चेन्मे चित्ते वास्तव्या वसन्त्यसि भवसि तदानीं सूनुना जन्यमुत्पत्तव्यं तथाङ्के[3] ममोत्सङ्के पात्यं पतनीयं रम्यं च कूर्चाकर्षणादिना क्रीडनीयं च । किंभूतेन सता । जन्या जायमाना[4] रम्या मनोहरापात्यागच्छन्त्याप्लाव्योच्छलन्ती स्फातिर्वृद्धिर्यस्य[5] तेन त्वत्प्रसादात्पुत्रस्योत्पत्तिर्वृद्धिश्च[6][7] स्यादित्यर्थः । शालिनी छन्दः[8] ॥

गान्धारगेयजनगेय[4]यशोभिराप्ला-[5]
व्याशेन वत्स भवतस्तनयेन[6] भव्यम् ।
लक्ष्मीरिति प्रवचनीय ऋतोक्त्युपस्था-[7]
नीया जगत्प्रवचनीयगुणा तिरोभूत् ॥ ८७ ॥

८७. लक्ष्मीस्तिरोभूत् । कीदृशी । ऋतोक्तयः सत्यवचनान्युपस्थानीयाआराधिका यस्याः सा । यद्वा ऋतोक्तिभिरुपस्थानीयाराध्या । तथा जगतां प्रवचनीयाः कीर्तनीया गुणा यस्याः सा । तथा प्रवचनीया वदन्ती सती । किमित्याह । हे वत्स भवतस्तनयेन भव्यमुत्पत्तव्यम् ।

---

१ बी °त्सेजैयं रु°. २ ए °व्यसस्फा°. ३ सी °स्फाटिना°. ४ ए °ययन°. ५ ए °भिसप्लाव्याशैन. ६ ए °येयेन. ७ सी ऋत्योक्त्यु°.

---

१ ए °कक्षो प्र°. २ बी °गते ध°. ३ ए तथीङ्के समो°. ४ सी °मान्या र°. ५ ए °स्य—व°. ६ ए बी °त्तिवृद्धि°. ७ ए श्च तादि°. ८ ए °लिनीं छ°.

कीदृशा । गान्धारस्य तृतीयग्रामस्य गेयो गाता यो जनो देवलोकस्तेनैव गान्धारस्य गेयत्वात्तेन गेयानि[1] यानि यशांसि तैः कृत्वाप्लाव्याशेन पूरणीयदिक्केनेति[2] ॥

अजर्यम् । इति "संगतेजर्यम्" [५] इति निपात्यम् ॥

रुच्यम् । अव्यथ्य । वास्तव्या[3] । एते "रुच्य°" [६] इत्यादिना कर्तरि निपात्याः[4] ॥

भव्ये । गेय । जन्य । रम्य[5] । आपात्य । [आ ?]प्लाव्य । इत्येते "भव्य°" [७] इत्यादिना कर्तरि[6] वा निपात्याः ॥ पक्षे । तनयेन भव्यम् । जनगेय । सूनुना जन्यम् । रम्यम् । आपात्यम् । आप्लाव्याशेनै[7] ॥

प्रवचनीयोपस्थानीयाशब्दौ "प्रवचनीयादयः" [८] इति कर्तरि वा निपात्यौ ॥ पक्षे । प्रवचनीयगुणा ॥ तत्पुरुषे । ऋतोत्त्युपस्थानीया[8] । वसन्ततिलका छन्दः ॥

आश्लिष्टैर्दयितां नभोधिशयितैः स्वं यानमध्यासितै-
र्लक्ष्मीं शश्वदनूषितैर्मुदमुपारूढैस्त्वरामास्थितैः[1] ।
पुष्पक्षेपमिषात्तदामरजनैरारूढहर्षो नृपः[2][3]
किं श्लिष्टः किमुपासितोधिशयितः किं वाथ वानूषितः[4] ॥८८॥

८८. तदा लक्ष्म्या वरप्रदानकाल आरूढ आश्रितो हर्षो येन स आरूढहर्षो[9] नृपः कर्णः पुंष्पक्षेपमिषात्कुसुमवर्षव्याजादमरैः[10][11] किं श्लिष्टो

१ बी शस्वद°. २ ए °षास्तदा°. ३ ए °पोंन्नृपः. ४ ए °पाशितो°.

१ बी सी डी °नि य°. २ बी डी °दिक्केने°. ३ ए डी ई °स्तव्य । ए°. ४ ए °त्याः ॥ सव्ये. ५ ए रम्या । पा°. ६ बी °रि नि°. ७ सी डी °न व°. ८ सी डी °स्थापनी°. ९ ए °र्षोन्नृपः. १० बी पुप्फक्षे°. ११ ए °दनरैः.

मित्रैरिव स्नेहातिरेकादालिङ्गितः । किं वोपासितो बान्धवैरिव सदा समीपावस्थानेन सेवितः । किं वाधिशयितः परिचितलोकैरिव सुखवार्तालापेनाश्रितः । अथ वानूषितः प्रेष्यैरिवोनुगमनादिनानुसृतः । किंभूतैर्दयितामाश्लिष्टैः सभार्यैरित्यर्थः । तथा नभोधिशयितैराश्रितैस्तथा स्वं यानं विमानमध्यासितैस्तथा लक्ष्मीं श्रीदेवीं शश्वदनूषितैरनुसृतैस्तथामुदमुपारूढैराश्रितैस्तथा त्वरामौत्सुक्यमास्थितैराश्रितैः ॥ शार्दूलविक्रीडितं छन्दः ॥

अविभक्तचित्तैः सुजनैरुपस्थितो
जननीविजातैर्न्वनुजीर्णकल्मषः ।
स विजात उर्व्या प्रविभक्त उन्नतिं
न तपोनुजीर्णः प्रकृतो न च स्मयम् ॥ ८९ ॥

८९. स कर्णः सुजनैः पुरप्रधानलोकैरुपस्थितो वर्धापनकसूचकवस्त्राद्युपढौकनेनाश्रितः । किंभूतैः । सद्भिः । जननीविजातैर्नु । एकमात्रा प्रसूतैरिव सहोदरैरिवाविभक्तचित्तैर्मिथोभिन्नमनोभिः । यतः कीदृक् सः । उर्व्यामुन्नतिमभ्युदयं विभक्तो विभागेन स्थापितवान् । ईदृक्कुत इत्याह । यत उन्नतिं पुत्रलाभैवररूपमभ्युदयं विजातः प्रसूतः । ईदृशोपि कुत इत्याह । यतो नु जीर्णं लक्ष्मीप्रसादेन क्षयं नीतं कल्मषं

१ ए न विस्म°.

१ ए वाभूषि°. २ ए °वासुग°. ३ बी °नुश्रितः. सी डी °नुधृतः. ४ ए °तागाश्लि°. ५ ए °श्रियितैतथा. ६ ए °नुसृतै°. बी °नुश्रितै°. ७ ए सी डी °र्णः स्वज°. ८ ए °नीनुजा°. ९ ए °मात्रोन्न°. १० ए °र्व्यांपुन्न°. ११ सी °न् । इदृकुत°. ए ईकुत. १२ बी °दृकुत. १३ ए °भपुत्रलाभव°. १४ ए सी °जात प्र°. १५ ए यं कल्मुषं निपु°. १६ सी °षं निपु°.

निःपु(निष्पु)त्रत्वरूपं पापं येन सः । ईदृशोपि कुत इत्याह । यतस्तपो नानुजीर्णः[1] सात्त्विकत्वात्तपः प्राप्य न क्षीणस्तथा महापुरुषत्वात्स्वयं लक्ष्मीसाक्षात्करणोद्रवें[2] न प्रकृतो न कर्तुमारब्धवान् । [3]योपि तपो नानुजीर्णः स्वयं च न प्रकृतोत एवानुजीर्ण[4]कल्मषो निष्पापो मुनिः स्यात्सोपि सुजनैस्तपःप्रभावान्निवर्तितवैरत्वाज्जनने[5]नीविजातैरिवाविभक्तचित्तैः सद्भिः सेव्यत उन्नतिं प्रभा[6]वनां विजातः सन्नुन्नै[7]तिमुर्व्यां विभजतीत्युक्ति[8]ः ॥ सुदन्तं छन्दः । स्यौ स्जौ गः[9] सुदन्तम् ॥

प्रकृतोत्सवैः[1] सोनुगतो मुदं गतैरमृतं नु पीतैर्विनिपीत ईक्षणैः ।
रुचिरासितः कुञ्जरपृष्ठ आसितः सदनं प्रयातोभ्यनुयातवासवः ॥ ९० ॥

९०. स कर्णः[10] सदनं राजभवनं प्रयातः । कीदृक्सन् । मुदं गतैर्हृष्टै[11]रतैः प्रकृतः कर्तुमारब्ध उत्सवो नगरशोभादि[12]महो[13] यैस्तैः पौरैरनुगतस्तथामृतं नु पीतैः[14] स्वस्वामिदर्शना[15]नन्देन सुधां पीतैरिवेक्षणैर्विनिपीतः सं[16]हर्ष हृष्टस्तथा कुञ्जरपृष्ठ आसितः स्थितस्तथा रुचिरमासितमासनबन्धो यस्य सोत [17]एर्वा[18]भ्यनुयातवासवोनुकृतेन्द्रः ॥

आश्लिष्टैर्दयिताम् नृपः श्लिष्टः । नभोधि[19][20]शयितैः नृपोधिशयितः [21] । त्वरामास्थितैः उपस्थितः सः । यानमध्यासितैः नृप उपासितः । लक्ष्मीमनू[22]षितैः

१ ए °वैः सानु°.

१ ए °र्णः स्वत्वि°. २ ए °णादूर्वे. ३ ए योति त°. ४ ए जीर्णःक°. ५ ए °नमैवि°. ६ ए °भाविनां जा°. ७ ए °न्नतमु°. ८ ए °क्तिः । मुद°. ९ ए °गः मुद°. १० ए कर्ण स°. ११ बी °रत एव प्रकृतः प्रक°. १२ बी °दिर्महो. १३ ए °होदयै°. १४ बी °तैः सुस्वा°. १५ ए °नातिदेन मुधां. १६ ए °हष हृ°. १७ ए एडानु°. १८ सी डी °वानु°. १९ ए °शयैः नृ°. २० बी °यितः नृ°. २१ ए °यितैः । नृपोधिशयिता । त्व°. २२ ए °मभूषि°.

नृपोनूषितः । उपार्ति विजातः जननीविजातैः । मुद्मुपारूढैः आरूढहर्षः । तपो नानुजीर्णः अनुजीर्णकल्मषः । उपार्ति प्रविभक्तः अविभक्तचित्तैः । अत्र "श्लिष°"[1] [९] इत्यादिना कर्तरि वा क्तः ॥

स्मयं न प्रकृतः प्रकृतोत्सवैः । अत्र "आरम्भे"[2] [१०] इति कर्तरि वा क्तः ॥

गत्यर्थे[3] । मुदं गतैः[4] सोनुगतः । सदनं प्रयातः अभ्यनुयातवासवः[5] ॥ अकर्मक । आसितः रुचिरासितः[6] ॥ पिब । अमृतं पीतैः स विनिपीतः[7] । अत्र "गत्यर्थ°" [११] इत्यादिना क्तो वा कर्तरि[8] ॥

॥ इति श्रीजिनेश्वरसूरिशिष्यलेशाभयतिलकगणिविरचितायां श्रीसिद्ध-हेमचन्द्राभिधानशब्दानुशासनद्याश्रयवृत्तौ दशमः सर्गः ॥

१ सी डी श्लिष्य इ°. २ ए सी °रि क्तः. ३ बी °त्यर्थः । मु°. ४ ए °गतै सो°. ५ ए अत्यनु°. ६ बी °सित । रु°. ७ बी °पीत । अ°. ८ ए °र्तरिः ॥.

BOMBAY SANSKRIT & PRAKRIT SERIES.

Edited under the superintendence of Prof. V. S. Ghate, M. A. and Dr. S. K. Belvalkar, M. A., Ph. D.

	Rs.	a.
Âpastambîya Dharmasûtra, Part I., with Critical Notes and Index and various Readings of the Hiraṇyakes'i-Dharmasûtra, by Dr. G. Buhler (B. S. S. No. 44)	1	6
„ „ Part II., containing extracts from Haradatta's Commentary called Ujjvala, by Dr. G. Buhler (B. S. S. No. 50)	1	2
Âtharvaṇa Upanishads and Commentaries, by Col. G. A. Jacob. (B. S. S. No. 40)—*Under revision.*	1	4
Bhaṭṭi-Kâvya with Mallinâtha's Commentry, Vol. I., by R. B. K. P. Trivedi, B. A. (B. S. S. No. 56)	9	0
„ „ Vol. II., by R. B. K. P. Tridevi, B. A. (B. S. S. No. 57)	6	0
Concordance to the Principal Upanishads and Bhagavadgîtâ, by Col. G. A. Jacob (B. S. S. No. 39)...	4	0
Das'akumâracharita of Daṇḍin, Part I., with Critical Notes, etc., by Dr. G. Buhler (B. S. S. No. 10)—*Under revision.*		
„ „ Part II., by Dr. P. Peterson (B. S. S. No. 42)—*Under revision.*	0	8
Des'înâmamâlâ Part I., Text and Critical Notes, by Prof. Pischel and Dr. G. Buhler (B. S. S. No. 17)	1	0
Ekâvali of Vidyâdhara, with the Commentary, Tarala, of Mallinâtha, and Critical Notes, etc., by R. B. K. P. Trivedi, B. A. (B. S. S. No. 63)	14	0
Gauḍavaho, by Vâkpati, by S. P. Pandit, M. A. (B. S. S. No. 34)	3	0

	Rs.	a.
Hand-book to Ṛigveda Part I., by Dr. P. Peterson, (B. S. S. No. 41)	1	8
" " Part II., by Dr. P. Peterson (B. S. S. No. 43)	2	8
Harshacharita, by Dr. A. A. Führer (B. S. S. No. 66) ...	2	0
Hitopades'a of Nârâyaṇa, by Dr. P. Peterson (B. S. S. No. 33)	0	14
Hymns from the Ṛigveda, 3rd edn., by Dr. P. Peterson and S. R. Bhandarkar, M. A. (B. S. S. No. 36)	2	4
Hymns from the Ṛigveda (Second Selection), by Dr. P. Peterson (B. S. S. No. 58)	4	0
Kâdambarî, Vol. I. (Text), by Dr. P. Peterson (B. S. S. No. 24)	2	0
" Vol. II. (Introduction and Notes), by Dr. P. Peterson (B. S. S. No. 24)	4	8
Kîrti-Kaumudî, by A. V. Kathavate, B. A. (B. S. S. No. 25) —*Copy-right restored to the Editor*		
Kumârapâla-Charita, by S. P. Pandit, M. A. (B. S. S. No. 60)	8	8
Mṛichchhakaṭika with two Commentaries and various Readings, by N. B. Godbole, B. A. (B. S. S. No. 52) ...	3	8
Mâlavikâgnimitra, by S. P. Pandit, M. A. (B. S. S. No. 6), 2nd edition.—*Under revision*	2	2
Mâlatî-Mâdhava, with Critical Notes, etc., by Sir Dr. R. G. Bhandarkar (B. S. S. No. 15), 2nd edition	4	4
Mahâbhâshya of Patañjali, Vol. I., Parts I., II and III, (together), 2nd edition, by Dr. F. Kielhorn (B. S. S. Nos. 18–20) ...	4	8
" " Vol. II., Parts I., II. and III. (together), 2nd edition, by Dr. F. Kielhorn (B. S. S. Nos. 21, 22 and 26)	9	0
" " Vol. III, Parts I., II. and III. (together), 2nd edn., by Do. (B. S. S. Nos. 28–30). ...	9	0
Mudrârâkshasa, with the Commentary of Dhuṇḍirâja, by K. T. Telang, M. A. (B. S. S. No. 27)—*Copy right restored to the Editor*		

	Rs.	a.
Mahânârâyaṇa Upanishad, by Col. G. A. Jacob (B. S. S. No. 35)	0	7
Naishkarmyasiddhi, with the Chandrikâ of Jñânottama, by Col. G. A. Jacob (B. S. S. No. 38), 2nd Edn.	2	8
Navasâhasâṅkacharita, Part I., by Vamanashastri Islâmpurkar (B. S. S. No. 53)	1	10
Nîti and Vairâgya S'atakas, with Notes and extracts from two Commentaries, by K. T. Telang, M. A. (B. S. S. No. 11)—*Copy-right restored to the Editor*		
Nyâyakos'a, by Mahâmahopâdhâya Bhimacharya Zaḷkikar (B. S. S. No. 49)	6	0
Pañchatantra, Book I., with Notes, by Dr. F. Kielhorn (B. S. S. No. 4)	0	6
„ Books II. and III., with Notes, by Dr. G. Bühler (B. S. S. No. 3)	0	4
„ Books IV. & V., with Notes by, Dr. G. Bühler (B. S. S. No. 1)	0	4
Parâs'ara Smṛiti, Vol. I., Part I., by Vamanshastri Islampurkar (B. S. S. No. 47)	2	2
„ „ Vol. I., Part II., by Do. (B. S. S. No. 48)	2	0
„ „ Vol. II., Part I., by Do. (B. S. S. No. 59)	4	0
„ „ Vol. II., Part II., by Do. (B. S. S. No. 64)	5	0
„ „ Vol. III., Part I., by Do. (B. S. S. No. 67)	4	0
Paribhâshendus'ekhara, Part I., Text and various Readings, by Dr. F. Kielhorn (B. S. S. No. 2)	0	8
„ Part II., Translation and Notes, by Do. (Paribhâshâs 1-37), (B. S. S. No. 7)	0	8
„ Part II., Translation and Notes, by Do. (Paribhâshâs 38 to 69). (B. S. S. No. 9)	0	8
„ Part II., Translation and Notes, by Do. (Paribhâshâs 70 to 122) (B. S. S. No. 12)	0	8
Pâtañjala Sûtrâṇi, with the Scholium of Vyâsa and Vâchaspati's Commentary, by Mahâmahopâdhyâya Râjârâm Shâstri Bodas (B. S. S. No. 46) *Under revision.* ...	1	10
Pratâparudrayas'obhûshaṇa of Vidyânâtha, by R. B. K. P. Trivedi, B. A. (B. S. S. No. 65)	11	0
Raghuvaṃs'a, Part I. (Cantos i–vi), with Mallinâtha's Commentary and Notes, by S. P. Pandit, M. A. (B. S. S. No. 5)	1	8

	Rs.	a.
Raghuvaṃs'a, Part II. (Cantos vii–xiii), with Mallinâtha's Commentary and Notes, by S. P. Pandit, M. A. (B. S. S. No. 8)	0	12
„ Part III. (Cantos xiv–xix), with Mallinâtha's Commentary and Notes, by Do. (B. S. S. No. 13)...	0	8
Râjataraṅgiṇî, Vol. I., by Pandit Durgaprasad (B. S. S. No. 45)	1	8
„ Vol. II., by Do. (B. S. S. No. 51)	1	4
„ Vol. III., by Dr. P. Peterson (B. S. S. No. 54)	1	2
Rekhâgaṇita, Vol. I., by H. H. Dhruva, B. A. and R. B. K. P. Trivedi, B. A. (B. S. S. No. 61)	12	0
Do. Vol. II., by Do. Do. (B. S. S. No. 62)	9	0
S'âṛṅgadharapaddhati, Vol. I., by Dr. P. Peterson (B. S. S. No. 37)	3	0
S'rîbhâshya. Vol. I., by Vasudeva Shastrî Abhyankar. (B. S. S. No. 68)	11	0
Subhâshitâvali of Vallabhadeva, by Dr. P. Peterson (B. S. S. No. 31)	2	8
Tarka-Kaumudî of Laugâkshi Bhâskar, by M. N. Dvivedi, B. A. (B. S. S. No. 32)—*Copy-right restored to the Editor*		
Tarka-Saṃgraha, with two Commentaries and Notes, by Y. V. Âthalye, M. A. (B. S. S. No. 55)...		
Vâsishtha Dharmas'âstra, by Dr. A. A. Fuhrer (B. S. S. No. 23)	0	8
Vikramâṅkadevacharita, by Dr. G. Buhler (B. S. S. No. 14) —*Copy-right restored to the Editor*		
Vikramorvas'îya, with Notes, 3rd edn., by S. P. Pandit, M. A. and B. R. Arte, M. A. (B. S S. No. 16)	2	0

SANSKRIT PUBLICATIONS NOT INCLUDED IN THE BOMBAY SANSKRIT AND PRAKRIT SERIES.

	Rs.	a.
Amarakos'a, the Thesarus of Sanskrit Words of Amara-Siṃha with the Commentary of Mahes'vara. Edited by Raghunath Shastri Talekar with Index	0	13
Atharvaveda-Saṃhitâ with the Commentary of Sâyaṇâchârya. Edited by S. P. Pandit, M. A., Vols. I., II., III., and IV., each at	0	10
Kâvyaprakâs'a (2nd edition), edited by Vamanacharya Zalkikar —*Under revision*	5	4

Pahlavi.

	Rs.	a.
Vendidad, complete in 2 Volumes	5	0

The Department of Public Instruction, Bombay.

THE

DVYÂS'RAYAKÂVYA

BY

HEMACHANDRA

WITH

A COMMENTARY

BY

ABHAYATILAKAGAṆI

Part II—Cantos XI to XX.

EDITED BY

ABAJI VISHNU KATHAVATE[redacted]B. A.

1921.

Price Rs. 9.

Bombay Sanskri[redacted]Seri[redacted]

Printed by Ramchandra Yesu Shedge, at the 'Nirnaya-Sagar' Press
23, Kolbhat Lane, Bombay.

Published by Government Central Press, Bombay.

श्रीः

आचार्यश्रीहेमचन्द्रकृतम्

द्याश्रयकाव्यम्

अभयतिलकगणिविरचितया टीकया समेतम् ।

बी. ए. इत्युपपदधारिणा काथवटेइत्युपाह्वेन विष्णुसूनुना

आबाजीइत्येतेन संशोधितम्

(मूलमेव–सर्गाः ११—२०)

शाके १८४३ वत्सरे १९२१ खिस्ताब्दे

मूल्यं ९ रूप्यकाः

मुम्बापुरीस्थराजकीयग्रन्थमालाधिकारिणा

मुम्बय्यां

निर्णयसागरमुद्रणालये मुद्रयित्वा प्रकाशितम् ।

FOREWORD

In October 1918 was transferred to the Bhandarkar Oriental Research Institute the management of the Bombay Sanskrit and Prakrit Series, till then conducted by the Government of Bombay under the joint supervision of the Professors of Sanskrit at the Elphinstone and the Deccan Colleges. The management included also the task of completing the works in the Series to which the Govment of Bombay was already pledged—and amongst these the complete edition of the Dvyās'rayakāvya of Hemachandra with the Commentary of Abhayatilakagaṇi. The Editor, Professor Abaji Vishnu Kathavate, had prepared a press copy of the entire poem together with its commentary, to which he had intended giving his final revision before placing it into the hands of the printers. Unhappily death intervened, and the first volume of the work (cantos 1 to 10. B. S. P. S. No. LXIX) was brought to completion under the circumstances mentioned in the Preface to that part.

This second part gives the remaining text of the poem (cantos 11 to 20) together with the commentary on the same. This has been passed through the press under the care of the same Mr. D. Agashe Shastri of the Thana High Sc did similar service in connection with

tion of the first volume, and who has also at our request given a synoptical statement of the most important points where the grammatical system of Hemachandra differs from that of Pāṇini. As the poem is primarily intended to introduce the students to the niceties of Hemachandra's Grammar and only incidentally to give the History of the family of Hemachandra's great patron, this synoptical statement would, it is hoped, be found useful for purposes of comparison. Most of the historical material obtainable from the poem has been already utilised by Bühler in his German pamphlet entitled Ueber das Leben des Jaina-Mönches Hemachandra (1889), as also by Jacobi: Enclyclopaedia of Religion and Ethics, vol. VI, p. 591ff; and others.

Even after the demise of Professor Kathavate, the Introduction and the Notes which he had always contemplated including in the edition, Government decided not to forego; and the task of preparing these was assigned to a competent scholar. As, however, the work of publishing the whole poem extended over a period considerably longer than what was originally anticipated, and the scholar who was to prepare the Introduction and the Notes expressed his inability to write the Introduction
the Notes, Government ultimately decided to
critical and exegetical matter and at least
te the edition of the Text and the Com-
early a third part of the present volume

was printed off before the management of the Series was transferred to the Bhandarkar Oriental Research Institute. The rest of it has been completed and the edition published under the supervision of the Publication Department of the Bhandarkar Institute.

A verse-index, an index to proper names and an index of grammatical forms treated in the poem would have, no doubt, considerably added to the utility of the work. But that would have increased the volume of the work and entailed a further delay which it was deemed inexpedient to permit. But the possibility of bringing these out, together per chance with a historical introduction etc., as a further supplementary volume is not hereby absolutely shut out, though, naturally, no promise of any kind in the matter can be given at present.

POONA
August 1921.

S. K. BELVALKAR,
Chairman,
Publication Department.

द्व्याश्रयमहाकाव्यस्य प्रस्तावः ॥

अयि विद्वांसः। व्याकरणशास्त्रस्य प्रणेतार इन्द्रादयोऽष्टौ बभूवुरिति विदितमेव तत्रभवताम्। तेषामेकतमो हेमचन्द्र इदं द्व्याश्रयं नाम सकलकाव्यगुणवत्त्वात्सूत्रोदाहरणरूपत्वाच्च यथार्थाभिधानं महाकाव्यं रचयामास। अत्र च मूलराजादारभ्य कुमारपालान्तश्चौलुक्यवंशो वर्णितः। "हेमचन्द्रानुग्रहेण कुमारपालो राज्यमवाप। अस्यैवोपदेशाच्च कुमारपालो जिनमतं बहुमेने। आत्मनो राज्ये च हिंसादीनि दोषबहुलानि कर्माणि स्मृतिशेषतां निनाय। अयं ११४३ मिते ख्रिस्ताब्दे राजपदमारुह्य ११७४ मिते ख्रिस्ताब्दे दिवं गतः। अस्य गुरुतां गतो हेमचन्द्र इमं ग्रन्थं ११६० मिते ख्रिस्ताब्दे प्रारभ्यापूर्णमेव विहाय स्वर्लोकं जगाम। आभ्य (अभय) तिलकगणिना च जैनसाधुनायं ग्रन्थः १२५५ मिते ख्रिस्ताब्दे पूर्णतां नीतः। हेमचन्द्रस्य 'हैमी नाममाला' 'अनेकार्थमाला' 'अध्यात्मोपनिषद्' 'हैमशब्दानुशासनम्' इत्यादयोऽन्ये च ग्रन्था वर्तन्ते।" इति 'रावबहादुर मनोहर विष्णु काथवटे' इत्येतैः संपादिते 'भरतखंडाचा प्राचीन इतिहास' इत्यभिधे ग्रन्थे उपलभ्यते। एतद्ग्रन्थकर्तृत्वमन्तरेण तु मम 'द्व्याश्रयं नाम महाकाव्यं पूर्णमेव हेमचन्द्रो विरचितवान्। वृत्तिस्तु अभयतिलकगणिविरचिता' इति भाति। यतोऽस्य सप्तदशसर्गगतद्विचत्वारिंशत्तमश्लोकवृत्तौ 'अनोजा अम्बुघातेष्विति पाठो युक्तः प्रतिभाति। स्त्रीलिङ्गे पुल्लिङ्गे चास्य समानरूपत्वात्। परमनोजस्काम्बुघातेष्विति पाठः प्रायो दृश्यते। तस्मादनोजस्केत्ययं पुंसि स्त्रीलिङ्गव्यत्ययेन योज्यः।' इति मूलकर्तुरात्मनो भेदं दर्शयति। न च वाच्यमेतदुत्तरा द्वित्राः सर्गा अभयतिलकगणिविरचिता भवितुमर्हन्तीति। यतोऽन्तेऽपि 'सुगुरोस्तस्यादेशात्स कर्णकर्णोत्सवं विवृतिमेताम्। स्वमतिविभवानुसारान्मुनिर्व्यधादभयतिलकगणिः ॥' इति स्वस्य वृत्तिकर्तृत्वमेव विदधाति ॥

अस्मिन्व्याकरणे पाणिनीयव्याकरणतो बहूनि भेदस्थलानि वर्तन्ते । तानि च प्रायो यथामति प्रदर्श्यन्ते ।

१ ऌदन्ताः समानाः १. १. ७. पाणिनीये दीर्घॡकारो नास्ति ।

२ कसमासेऽध्यर्धः १. १. ४१.

३ अर्धपूर्वपदः पूरणः १. १. ४२. सूत्रद्वयं पाणिनीये नास्ति ।

४ ऌत ऋऌ ऋॡभ्यां वा १. २. ३. पाणिनीये दीर्घॡकाराभावात् पक्षोदाहरणे ऌकार इत्यत्र ऋकार इत्येव भवति ।

५ ऋणे प्रदशार्णवसनकम्बलवत्सरवत्सतरस्यार् १. २. ७. पाणिनीये वत्सरशब्दो नास्ति ।

६ अनाङ्माङो दीर्घाद्वा छः १. ३. २८. पाणिनीये तुगागमविधानात्पूर्वावयवत्वम् । इह तूत्तरावयवत्वम् ।

७ प्लुताद्वा १. ३. २९. पाणिनीये प्लुताद्विधिर्नास्ति ।

८ शिट्याद्यस्य द्वितीयो वा १. ३. ५९. ख्षीरम् । क्षीरम् ॥ अफ्सराः । अप्सराः ॥ अपदान्तेऽप्यत्रोदाहृतम् । पाणिनीये तु चयो द्वितीयाः शरि पुष्करसादेरिति पदान्त एवेति भाति ।

९ भिस ऐस् १. ४. २. अतिजरसैरित्युदाहृतं वृत्तिकृदनुसृतं किन्तु भाष्यविरुद्धम् ।

१० नेमार्धप्रथमचरमतयायाल्पकतिपयस्य वा १. ४. १०. अयग्रहणमधिकम् । पाणिनीये त्रयाः इत्येव । अत्र तु त्रये त्रयाः इति ।

११ जरसो वा १. ४. ६०. पाणिनीये नैतत् ।

१२ नि वा १. ४. ८९. पाणिनीये नैतत् । किं तु कौमुद्यां नित्यात्परादपि नुमः प्रागप्न्निति दीर्घः । प्रतिपदोक्तत्वात् । स्वाम्पि । निरवकाशत्वं प्रतिपदोक्तत्वमिति पक्षे तु प्रकृते तद्विरहान्नुमेव । स्वम्पि । इति रूपद्वयं साधितम् ।

१३ यजसृजमृजराजभ्राजभ्रस्जव्रश्चपरिव्राजः शः षः २. १. ८७. पाणिनीये तु व्रश्चभ्रस्ज० ८. २. ३६. इत्यत्र छस्यापि षकार उक्तः ।

१४ मासनिशासनस्य शसादौ लुग्वा २. १. १००. कौमुद्यामास्य-शब्दस्यासन्नादेश उक्तः । यत्तु आसनशब्दस्यासन्नादेश इति काशिकायामुक्तं तत्प्रामादिकमिति च खण्डितम् ।

१५ वाकर्मणामणिकर्ता णौ २. २. ४. पाणिनीये नैतत् । अविवक्षितकर्मस्थले पाचयति चैत्रेणेत्येव । एतन्मते तु पाचयति चैत्रमित्यपि ।

१६ कालाध्वभावदेशं वा कर्म चाकर्मणाम् २. २. २३. पाणिनीये मासमास्ते इत्येव । इह तु मासे आस्ते इत्यपि ।

१७ स्पृहेर्व्याप्यं वा २. २. २६. कर्मविषये एव विकल्पः । पाणिनीये तु ईप्सितमात्रे संप्रदानत्वं प्रकर्षविवक्षायां तु परत्वात्कर्मत्वम् ।

१८ गौणात्समयानिकषाहाधिगन्तरान्तरेणातियेनतेनैर्द्वितीया २. २. ३३. येनतेनेति पाणिनीयादधिकम् ।

१९ व्याप्ये द्विद्रोणादिभ्यो वीप्सायाम् २. २. ५०. पाणिनीयादधिकमेतत् ।

२० हितसुखाभ्याम् २. २. ६५. पाणिनीये सुखशब्दो नास्ति नित्या च चतुर्थी ।

२१ वा क्लीबे २. २. ९२. पाणिनीये अधिकरणवाचिनश्च २. ३. ६८. इति नित्यम् ।

२२ ऋरलृलं कृपोऽकृपीटादिषु २. ३. ९९. अकृपीटादिष्विति पाणिनीये नास्ति । सिद्धिस्तूणादित्वाज्ज्ञेया ।

२३ नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाङ्गगात्रकण्ठात् २. ४. ३९. भाष्याद्यनुक्तत्वादङ्गगात्रकण्ठग्रहणमप्रमाणमिति प्रामाणिका इति कौमुद्याम् ।

२४ मातुलाचार्योपाध्यायाद्वा २. ४. ६३ पाणिनीये या तु स्वयमेवाध्यापिका सा उपाध्यायी उपाध्याया वा । अत्र तु उपाध्याया इत्येव ॥ पाणिनीये आचार्यानी इत्येव । अत्र तु आचार्यी इत्यपि ।

२५ उपमानसहितसंहितसहशफवामलक्ष्मणाद्यूरोः २. ४. ७५. पाणिनीये लक्ष्मणशब्दस्थले लक्षणशब्दो वर्तते ।

२६ आसन्नादूराधिकाध्यर्धार्धादिपूरणं द्वितीयाद्यन्यार्थे ३. १. २०. अध्यर्धार्धादीति पाणिनीयादधिकम् ।

२७ तत्रादाय मिथस्तेन प्रहृत्येति सरूपेण युद्धेऽव्ययीभावः ३.१.२६. पाणिनीये केशाकेशीत्यादीनामव्ययीभावत्वं बहुव्रीहित्वं च । अत्र तु अव्ययीभावत्वमेव ।

२८ पारेमध्येऽग्रेऽन्तः षष्ठ्या वा ३. १. ३०. अग्रेऽन्तःशब्दौ पाणिनीयादधिकौ ।

२९ अव्ययं प्रवृद्धादिभिः ३. १. ४८. पाणिनीयादधिकमेतत् ।

३० द्वित्रिचतुष्पूरणाग्रादयः ३. १. ५६. पाणिनीयादग्रादय इत्यधिकम् ।

३१ चतस्रार्धम् ३. १. ६६.

३२ परःशतादि ३. १. ७५.

३३ सर्वपश्चादादयः ३. १. ८०.

३४ सिंहाद्यैः पूजायाम् ३.१.८९. एतत्सूत्रचतुष्कं पाणिनीयादधिकम् ।

३५ क्तं नञादिभिन्नैः ३. १. १०५. प्रकारार्थ आदिशब्दः पाणिनीयादधिकः । तेनात्र पीतावपीतमित्यप्युदाहृतम् ।

३६ मासवर्णभ्रात्रनुपूर्वम् ३. १. १६१. मासशब्दोऽधिकः पाणिनीयात् । किं तु पाणिनीये पूर्वोपस्थितत्वात्सेत्स्यति ।

३७ संख्या समासे ३. १. १६३. पाणिनीयादधिकमेतत् । एतदपि पाणिनीये पूर्वोपस्थितत्वात्सेत्स्यति ।

३८ ओजोऽञ्जःसहोऽम्भस्तमस्तपसष्टः ३. २. १२. पाणिनीयादधिकोऽत्र तपश्शब्दः । तेन तपसाकृतमिति भवति ।

३९ वर्षक्षरवराप्सरःशरोरोमनसो जे ३. २. २६. अप्-सरस्-उरस्-मनस्-इत्येते शब्दाः पाणिनीयादधिकाः ।

४० द्युप्रावृड्वर्षाशरत्कालात् ३. २. २७. पाणिनीयाद्वर्षाशब्दोऽधिकः ।

४१ अपो ययोनिमतिचरे ३. २. २८. पाणिनीयान्मतिचरशब्दावधिकौ । मतुश्चात्र नोक्तः ।

४२ नेन्सिद्धस्थे ३. २. २९. अत्र बध्नातिर्नोक्तः ।

४३ देवानांप्रियः ३. २. ३४. अत्र मूर्खे इति नोक्तम् ।

४४ शेपपुच्छलाङ्गूलेषु नाम्नि शुनः ३. २. ३५. अत्र नाम्नीत्यधिकं पाणिनीयात् ।

४५ वाचस्पतिवास्तोष्पतिदिवस्पतिदिवोदासम् ३. २. ३६. पाणिनीये पारस्करादित्वादेषां साधुत्वं बोध्यम् ।

४६ मातरपितरं वा ३. २. ४७. अत्र पूर्वोत्तरपदयोर्ऋतोऽरो वा निपात्यते । तेन मातरपितरयोरित्येव । पाणिनीये तु मातरपितरावुदीचाम् ६. ३. ३२. इत्यत्रोत्तरपदे ऋतोऽङि० ७. ३. ११०. इति सिद्ध्या निपातनासंभवान्मातरपित्रोरित्येव भवति । पदद्वयेऽपि तन्निपातनमित्यन्ये इति शेखरकारोक्तिमङ्गीकृत्यैकरूप्यं स्यात् ।

४७ नस् नासिकायास्तः क्षुद्रे ३. २. ९९.

४८ येऽवर्णे ३. २. १००. पाणिनीयादधिकमेतत्सूत्रद्वयम् ।

४९ अन् स्वरे ३. २. १२९. नकारस्योत्तरपदावयवत्वाभावाद् ह्रस्वाद् ङणनो द्वे १. ३. २७. इत्यस्य प्राप्तेरन्नादिरन्नन्त इत्याद्यापत्तिः । पाणिनीये तु तस्मान्नुडचि ६. ३. ७४. इति नुट उत्तरपदावयवत्वाद् ङमो ह्रस्वादचि० ८. ३. ३२. इति ङमुटः प्राप्तिरेव नास्ति ।

५० क्रियाव्यतिहारेऽगतिहिंसाशब्दार्थहसो ह्वहश्चानन्योऽन्यार्थे ३. ३. २३. पाणिनीयाद्वहतिरधिकः ।

५१ शको जिज्ञासायाम् ३. ३. ७३. नैतत्पाणिनीये ।

५२ चल्याहारार्थेङ्बुधयुधप्रुद्रुश्रुनशजनः ३. ३. १०८. अदेः प्रतिषेधः पाणिनीये ।

५३ न गृणाशुभरुचः ३. ४. १३. गृणातिः पाणिनीये नास्ति । अन्ययोरपि भृशार्थ एव निषेधः । पौनःपुन्ये तु शोशुभ्यते रोरुच्यते इति भवति ।

५४ नोतः ३. ४. १६. पाणिनीयादधिकमेतत् ।

५५ फेनोष्मबाष्पधूमादुद्वमने ३. ४. ३३. धूमशब्दोऽधिकः पाणिनीयात् ।

५६ पुनरेकेषाम् ४. १. १०. नैतत्पाणिनीये ।

५७ जृभ्रमवमत्रसफणस्यमस्वनराजभ्राजभ्रासभ्लासो वा ४. १. २६. वमतिः पाणिनीयादधिकः ।

५८ ष्ठिवूसिवोऽनटि वा ४. २. ११२. नैतत्पाणिनीये । किं तु कृत्यल्युटो बहुलम् ३. ३. ११३. इति बहुलवचनान्निष्ठीवनं सीवनमित्यनयोरपि साधुत्वं स्यात् ।

५९ इको वा ४. ३. १६. पाणिनीय इण्वद्भावान्नित्यमेव । आर्धधातुकाधिकारोक्तस्यैवातिदेश इति मते नैव यण् इति कथंचिदुभयसिद्धिः ।

६० न श्विजागृशसक्षणह्म्येदितः ४. ३. ४९. पाणिनिस्तु ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम् ७. २. ५. इति शसिस्थाने श्वसिं पठति ।

६१ विश्रमेर्वा ४. ३. ५६. पाणिनीये तु नोदात्तोपदेशस्य० ७. ३. ३४. इति वृद्धिनिषेधः । तेन विश्रम इत्येव । निवृत्तप्रेषणाद्धातोर्णिचि ततो घञि विश्राम इत्यपि सिध्यतीत्यवगन्तव्यम् ।

६२ नशेर्नेश्वा वाङि ४. ३. १०२. पाणिनीयादधिकमेतत् । तेनानेशत् अनशत् । इति रूपद्वयं साधितम् । पाणिनीये तु अनशदित्येव ।

६३ वेटोऽपतः ४. ४. ६२. अनेन पतित इति साधितम् । पाणिनीये तनिपतिदरिद्रातिभ्यः सनो वा इड् वाच्य इति वार्तिकसङ्ग्रावाद्यस्य विभाषा ७. २. १५. इतीण्निषेधवारणाय पततेर्निषेधोऽन्वेषणीयः ।

६४ श्वसजपवमरुषत्वरसंघुषास्वनामः ४. ४. ७५. पाणिनीयात् श्वसिजपिवमयोऽधिकाः । तेन श्वस्त-जप्त-वान्त इत्यपि साधितम् । पाणिनीये तु श्वसित जपित वमित इत्येव भवति । आगमशास्त्र-मनित्यमिति तत्सिद्धिर्वा ।

६५ श्लिषशीङ्स्थासवसजनरुहजॄभजेः क्तः ५. १. ९. पाणिनीया-द्भजतिरधिकः ।

६६ शकितकिचतियतिशसिसहियजिभजिपवर्गात् ५. १. २९. यजिभजी अधिकौ पाणिनीयात् । यज्यं भज्यमित्युदाहृतम् । पाणिनीये तु याज्यं भाज्यमिति भवति ।

६७ कुप्यभिद्योद्ध्यसिध्यतिष्यपुष्ययुग्याज्यसूर्यं नाम्नि ५. १. ३९. तिष्यशब्दोऽधिकः । पाणिनीये तु बाहुलकात्साधुत्वं बोध्यम् ।

६८ ऋदुपान्त्यादक्लृपिचृदृचः ५. १. ४१. ऋचिरधिकः । अर्च्यम् । पाणिनीये तु ऋच्यम् । अर्चतेरर्च्यमिति भवतीत्यन्यत् ।

६९ कृवृषिमृजिशंसिगुहिदुहिजपो वा ५. १. ४२. गुहिदुहिजपयोऽ-धिकाः । गुह्यम् । गोह्यम् ॥ दुह्यम् । दोह्यम् ॥ जप्यम् । जाप्यम् ॥ पाणिनीये तु गोह्यम् । दोह्यम् । जप्यम् । इत्येव ।

७० नाम्युपान्त्यप्रीकृगृज्ञः कः ५. १. ५४. गिरतिरधिकः । गिरः । पाणिनीये मूलविभुजादित्वात्साधुत्वमवगन्तव्यम् ।

७१ धनुर्दण्डत्सरुलाङ्गलाङ्कुशर्ष्टियष्टिशक्तितोमरघटाद्ग्रहः ५. १. ९२. दण्डत्सरुऋष्टिशब्दा अधिकाः । दण्डग्रहः । त्सरुग्रहः । ऋष्टि-ग्रहः । पाणिनीये तु कर्मण्यण् ३. २. १. इत्यण् स्यात् ।

७२ रजःफलेमलाद्ग्रहः ५. १. ९८. रजोग्रहिः । मलग्रहिः । एतौ पाणिनीयादधिकौ ।

७३ देववातादापः ५. १. ९९. अधिकमेतत्सूत्रम् । पाणिनीये तु देवापिवातापिशब्दयोर्बाहुलकात्साधुत्वं मन्तव्यम् ।

७४ संख्याहर्दिवाविभानिशाप्रभाभाश्चित्रकर्त्राद्यन्तानन्तकारबाहरुर्धनु-र्नान्दीलिपिलिबिबलिभक्तिक्षेत्रजङ्घाक्षपाक्षणदारजनिदोषादिनदिवसाट्टः ५. १. १०२. क्षपाकरः । क्षणदाकरः । रजनिकरः । दोषाकरः । दिनकरः । दिवसकरः । अधिका एते पाणिनीयात् ।

७५ क्षेमप्रियमद्रभद्रात् खाण् ५. १. १०५. भद्रशब्दोऽधिकः पाणिनीयात् ।

७६ बहुविध्वरुस्तिलात्तुदः ५. १. १२४. बहुन्तुद इत्यधिकं पाणिनीयात् ।

७७ शंसंस्वयंविप्राद् भुवो डुः ५. २. ८४. शंभुस्वयंभुशब्दावधिकौ । मितद्र्वादित्वात्तु साधुत्वमनयोः पाणिनीये ।

७८ नीदाम्ब्शसूयुयुजस्तुतुदसिसिचमिहपतपानहस्त्रट् ५. २. ८८. पात्रीत्यधिकं पाणिनीयात् ।

७९ हनोऽन्तर्घनान्तर्घणौ देशे ५. ३. ३४. पाणिनीये अन्तर्घनो देशे ३. ३. ७८. इति वर्तते । कौमुद्यामन्तर्घण इति पाठान्तरं प्रदर्शितम् ।

८० सातिहेतियूतिजूतिज्ञप्तिकीर्तिः ५. ३. ९४. ज्ञप्तिरधिकः । पाणिनीये ज्ञपयतेर्भविष्यति ।

८१ सस्मे ह्यस्तनी च ५. ४. ४०. पाणिनीये नैतद् दृश्यते ।

८२ युववृद्धं कुत्सार्चे वा ६. १. ५. पाणिनीये यूनः कुत्सायां गोत्रसंज्ञा । वृद्धस्य पूजायां युवसंज्ञा । तेन गार्ग्यो जाल्मः । तत्रभवान् गार्ग्यायणः । इत्येव । अत्र तु गार्ग्यो गार्ग्यायणो वा जाल्मः । तत्र भवान् गार्ग्यो गार्ग्यायणो वा । इति द्वयमपि ।

८३ एदोद्देश एवेयादौ ६. १. ९.

८४ प्राग्देशे ६. १. १०. पाणिनीये सूत्रद्वयस्थाने एङ् प्राचां देशे १. १. ७५. इत्येकमेव सूत्रं वर्तते । भेदश्च मूलत एव द्रष्टव्यः ।

८५ अनिदम्यणपवादे च दित्यदित्यादित्ययमपत्युत्तरपदाञ्ञ्यः ६. १. १५. पाणिनीये अनिदमीति न वर्तते ।

८६ दर्भकृष्णाग्निशर्मरणशरद्वच्छुनकादाग्रायणब्राह्मणवार्षगण्यवासिष्ठ-भार्गववात्स्ये ६. १. ५७. कार्ष्णायनो ब्राह्मणः । आग्निशर्मायणो वार्षगण्यः । राणायनो वासिष्ठः । इति पाणिनीयादधिकानि ।

८७ णश्च विश्रवसो विश्लुक् च वा ६. १. ६५. नैतत्पाणिनीये । किं तु शिवादौ विश्रवणरवणशब्दौ वर्तेते ।

८८ गोधाया दुष्टे णारश्च ६. १. ८१. पाणिनीये दुष्टे इति न वर्तते ।

८९ सेनान्तकारुलक्ष्मणादिञ् च ६. १. १०२. पाणिनीये कारुलक्ष्मणशब्दस्थले कारिलक्षणशब्दौ (सेनान्त० ४. १. १५२.) वर्तेते ।

९० दगुकोशलकर्मारच्छागवृषाद्यादिः ६. १. १०८. पाणिनीये दगुशब्दो नास्ति ।

९१ उदितगुरोर्भाद्युक्तेऽब्दे ६. २. ५. पाणिनीये नास्त्येतत् ।

९२ धेनोरनञः ६. २. १५. पाणिनीयेऽनञ इति नास्ति ।

९३ पुरुषात्कृतहितवधविकारे चैयञ् ६. २. २९. पाणिनीये नास्त्येतत् ।

९४ राष्ट्रेऽनङ्गादिभ्यः ६. २. ६५. पाणिनीयेऽनङ्गादिभ्य इति न वर्तते । विषयो देशे ४. २. ५२. द्रष्टव्यमेतत्सूत्रम् ।

९५ रङ्कोः प्राणिनि वा ६. ३. १५. पाणिनीये रङ्कोरमनुष्येऽण् च ४. २. १००. इति वर्तते ।

९६ कुशले ६. ३. ९५. पाणिनीये न सामान्येन प्रत्ययविधिः । तत्र कुशलः पथः ५. २. ६३. इति द्रष्टव्यम् ।

९७ साधुपुष्यत्पच्यमाने ६. ३. ११७. पाणिनीये कालात्साधुपुष्प्यत्पच्यमानेषु ४. ३. ४३. इति वर्तते ।

९८ जयिनि च ६. ३. १२२. पाणिनीयं तदस्य सोढम् ४. ३. ५२. इति सूत्रं द्रष्टव्यम् ।

C

९९ त्यदादेर्मयट् ६. ३. १५९.

१०० ज्योतिषम् ६. ३. १९९. पाणिनीयादधिकमेतत् सूत्रद्वयम् ।

१०१ वामाद्यादेरीनः ७. १. ४. खः सर्वधुरात् ४. ४. ७८. इति पाणिनीये ।

१०२ विध्यत्यनन्येन ७. १. ८. विध्यत्यधनुषा ४. ४. ८३. इति पाणिनीये ।

१०३ सर्वजनाण्ण्येनञौ ७. १. १९. सार्वजन्यः । सार्वजनीनः । पाणिनीये तु प्रतिजनादिभ्यः खञ् ४. ४. ९९. इति खञेव । सार्वजनीनः ।

१०४ घोषदादेरकः ७. २. ७४. पाणिनीये गोषदादिभ्यो वुन् ५. २. ६२. इत्यत्र घोषदशब्दो नास्ति ।

१०५ संख्यातैकपुण्यवर्षादीर्घाच्च रात्रेरत् ७. ३. ११९ पाणिनीये अहःसर्वैक० ५. ४. ८७. इत्यत्र वर्षादीर्घशब्दौ न वर्तेते । अत्रत्य एकशब्दः संख्यात्वेन सिद्धत्वान्निष्प्रयोजनः । एके मुख्यान्यकेवला इत्यन्यार्थो वा ।

१०६ सुप्रातसुश्वसुदिवशारिकुक्षचतुरश्रैणीपदाजपदप्रोष्ठपदभद्रपदम् ७. ३. १२९. पाणिनीयाद् भद्रपदशब्दोऽधिकः ।

१०७ नञ्सुदुर्भ्यः सक्तिसक्थिहलेर्वा ७. ३. १३६. पाणिनीयात् सक्तिशब्दोऽधिकः ।

१०८ मन्दाल्पाच्च मेधायाः ७. ३. १३८. अधिकमेतत् पाणिनीयात् । किं तु तत्त्वबोधिन्यामस्वरितत्वादेवान्यतरस्यांग्रहणाननुवृत्तिसिद्धौ नित्यग्रहणमन्यतो विधानार्थम् । तेनाल्पमेधस इति सिध्यतीति वृत्तिकारादय इत्युक्तम् । नागोजीभट्टास्तु नित्यग्रहणं स्पष्टार्थमिति भाष्यस्वरस इत्याहुः ।

१०९ देविकाशिंशपादीर्घसत्रश्रेयसस्तत्प्राप्तावाः ७. ४. ३. पाणिनीये देविकाशिंशपादित्यवाद्० ७. ३. १. इत्यत्र दित्यवाट्शब्दोऽधिकः ।

११० भृशाभीक्ष्ण्याविच्छेदे द्विः प्राक्तमबादेः ७. ४. ७३. पाणिनीये प्राक्तमबादेरिति नास्ति ।

१११ नानावधारणे ७. ४. ७४.

११२ डतरडतमौ समानां स्त्रीभावप्रश्ने ७. ४. ७६.

११३ पूर्वप्रथमावन्यतोऽतिशये ७. ४. ७७. एतत्सूत्रत्रयं पाणिनीये न दृश्यते ।

वैदिकशब्दविचारोऽनुदात्तादिविचारश्चात्र न कृतः । एतेषु प्रदर्शितेषु भेदस्थलेषु कानिचिन्मन्मतिदोषाद् भेदाभावभाञ्जि कानिचिच्च सन्त्यपि न दर्शितानि स्युः । किन्तु गुणैकपक्षपातिनो निर्मत्सराः साधवस्तत्सर्वं मे क्षमन्तामिति प्रार्थयते—

विदुषामनुचरो—

दत्तात्रेयशर्मा.

आगाशे इत्युपाह्वेन काशीनाथतनूभुवा ।
दत्तात्रेयाभिधेनासौ प्रस्तावकुसुमाञ्जलिः ॥
शाके नेत्राब्धिवसुभू(१८४२)संमिते शालिवाहने ।
अर्पितस्तेन मोदेत विद्वद्रूपो जनार्दनः ॥

द्व्याश्रयमहाकाव्यस्य विषयानुक्रमणिका ॥

सप्तमः सर्गः । ख. १, पृ. ५१५–५८२

चामुण्डराजस्य वल्लभराजदुर्लभराजनागराजाभिधानां पुत्राणामवाप्तिः । वल्लभराजस्य मालव्यदेशाधिपतेरुच्छित्तये प्रस्थानम् । शीतलिकाख्यरोगपीडितस्य वल्लभराजस्य स्वर्गगमनम् । चामुण्डराजस्य पुत्रशोकः । द्वितीयं पुत्रं दुर्लभराजं राज्ये न्यस्य नर्मदायां शुक्लतीर्थे चामुण्डराजस्य तपश्चरणम् । दुर्लभराजस्य महेन्द्रस्वसुर्दुर्लभदेव्याः स्वयंवराय गमनम् । विवाहोत्सववर्णनम् । नागराजाय च लक्ष्मीनाम्न्याः स्वसुर्महेन्द्रकृतं प्रदानम् । युद्धाय संनद्धान्नृपान्हत्वा दुर्लभराजस्य स्वपुरीप्रापणम् ॥

अष्टमः सर्गः । ख. १, पृ. ५८३–६६४

नागराजस्य भीमराजाभिधः सूनुरभूत् । भीमराजस्य राज्याभिषेकः । भीमराजं प्रति चरभाषणम् । सिन्धुपतेर्हम्मुकस्य भीमराजस्य च युद्धम् । हम्मुकपराजयः ॥

नवमः सर्गः । ख. १, पृ. ६६५–७५२

भीमराजस्य चेदिदेशं प्रति गमनम् । चेदीशप्रेषितस्य दूतस्य भाषणम् । चेदीशसंमानितस्य भीमनृपस्य स्वपुर आगमनम् । भीमनृपतेः क्षेमराजकर्णराजनाम्नोः पुत्रयोरवाप्तिः । क्षेमराजस्य देवप्रसादाभिधः पुत्रोऽभूत् । कर्णराजस्य राज्याभिषेकः । भीमराजस्य स्वर्गगमनम् । क्षेमराजः सरस्वतीनदीवर्तिदधिस्थलीसमीपस्थमण्डूकेश्वराख्यपुण्यक्षेत्रे तपश्चचार । तत्सेवार्थं गताय देवप्रसादाय कर्णो दधिस्थलीं ददौ । जयकेशिसुताया मयणल्लायाः कर्णस्य च विवाहः ॥

दशमः सर्गः । ख. १, पृ. ७५३–८१५

संतानरहितत्वेन दुःखितस्य कर्णस्य लक्ष्मीदेवताभवनगमनम् । तत्र च बहूनि दिनानि लक्ष्मीदेवतोपास्तिः । वर्षर्तुवर्णनम् । तत्र कर्णविलोभनार्थमप्सरसां संप्राप्तिः । कर्णस्याचलचित्तत्वेन भग्नमनोरथाना-

मप्सरसां विमानैर्गमनम् । ततः कस्यचिदुग्रपुरुषस्य कर्णभक्षणार्थमागमनम् । तेनाप्यविचलितचित्ते कर्णे लक्ष्मीप्रसादः । कर्णकृता लक्ष्मीस्तुतिः । पुत्रप्राप्तिरूपं वरं दत्त्वा लक्ष्म्यास्तिरोभवनम् । कर्णस्य स्वसदनप्राप्तिः ॥

एकादशः सर्गः । ख. २, पृ. १–६१

मयणल्लाया गर्भधारणम् । दशमे मासि जयसिंहनाम्नः पुत्रस्य जन्म । बाल्यवर्णनम् । जयसिंहस्य राज्याभिषेकः । कर्णस्य स्वर्गगमनम् । देवप्रसादस्य स्वपुत्रं त्रिभुवनपालं जयसिंहहस्ते समर्प्य चिताप्रवेशः ॥

द्वादशः सर्गः । ख. २, पृ. ६२–११४

राक्षसकृतोपद्रवकथनाय ऋषीणामागमनम् । राक्षसवधाय जयसिंहस्य प्रस्थानम् । युद्धवर्णनम् । राक्षसाधिपस्य बर्बरस्य तत्पत्नीप्रार्थनया मोचनम् । ततः स्वगृहागमनम् ॥

त्रयोदशः सर्गः । ख. २, पृ. ११५–१६०

बर्बरकृतमुपायनादिभिर्नृपरञ्जनम् । जनश्रुतीः श्रोतुं जयसिंहस्य निशि बहिर्निर्गमनम् । सरस्वतीसरित्तटे नागमिथुनदर्शनम् । कनकचूडो दमनकेन सह संजातं भार्यापणमूषदानेन हुल्लडं प्रति गमनेन वा पणमोचनप्रकारं चाकथयत् । कनकचूडाय कूपादूषेण घटीं भृत्वा समर्पणम् । एवं तं संकटान्मोचयित्वा जयसिंहस्य स्वपुराभिगमनम् ॥

चतुर्दशः सर्गः । ख. २, पृ. १६१–२०३

अन्येद्युस्तथैव निशि चरतो जयसिंहस्य योगिन्या सह संभाषणम् । यशोवर्मनृपं मित्रं कृत्वा कालिकाद्या योगिनीरर्चयान्यथोज्जयिनी त्वया गन्तुमशक्येति योगिन्या नृपं प्रत्युक्तिः । यशोवर्मनृपश्चेज्जीवनाशं न नङ्क्ष्यति मम स गुप्तिबन्धं बन्ध्यो युष्माभिस्तु रक्ष्यश्चेच्छ-

अन्यदा कुमारपालो निशीथ आर्तस्वरं श्रुत्वा परिहितनीलवासास्तत्परिज्ञानाय बहिर्जगाम । तरोरधो रुदतीं पतिपुत्ररहितां राजकृतधनापहारभीतां कांचिद्धनवतीं स्त्रियं दृष्ट्वा एष राजा न ग्रहीष्यति तव धनं पतिपुत्राभ्यां पयो दातुं स्थेया इति तां सान्त्वयित्वा वधोद्यमात्तां न्यवर्तयत् । गृहमागम्य चासूनोः परासोर्वित्तं न ग्राह्यमित्यमात्यान् न्यदिक्षत् । अपरेद्युः केदारहर्म्यं खसराजभग्नं चारमुखाच्छ्रुत्वा खसराजं संतर्ज्य तदुद्धाराय सोमेशवेश्मनश्चोद्धाराय मन्त्रिणमादिदेश । आर्हतैर्दत्ताशीर्वादोऽणहिलपुरे श्रीदेवपत्तनतले च पार्श्वचैत्ये अकारयत् । स्वप्ने शंभुनादिष्टः कुमारपालोऽणहिलपुरे कुमारपालेश्वराख्यायतनमकारयत् । अन्ते ऋषीणामाशीर्वचनम् ॥

द्व्याश्रयमहाकाव्ये

एकादशः सर्गः ।

उपभुक्त[1]ऋतुं देवीमुपभुक्तोथ भूपतिः ।
[2]जग्धे जग्धं तदैकस्मिन्नुद्यानान्त[3]र्यया सह ॥ १ ॥

१. अथ सौधगमनानन्तरं भूपतिः कर्णो देवीं मयणल्लामुपभुक्तो रमितवान् । किंभूतां सतीम् । उपभुक्तोतिक्रान्[1]त ऋतुः पुष्पकालो यया ताम् । ऋतुस्नातामित्यर्थः । यया देव्या सहोद्यानान्[2]तर्लीलोपवनमध्ये तदोपभोगकाल एकस्मिन्नभिन्ने[3]द्यतेस्मिन्निति जग्धं भोजनपात्रं तत्र जग्धं कर्[4]णेन भुक्तम् । एतेन विशिष्टगर्भाधानहेतुर्मिथो[5]नुरागातिशय उक्तः ॥

तयोर्ववृत एकत्र पीतं पीतेशितेशितम् ।
आसिते चासितं सृप्तं सृप्ते च प्रीतियोगतः ॥ २ ॥

२. तयोर्दम्पत्योः प्रीति[6]योगतो मिथोनुरागसंबन्धादेकत्राभिन्ने पीते पानपात्रे पीतं जलादिपानं[7] ववृते संजातम् । तथैक[8]त्राशिते भोजनपात्रेऽशितं भोजनं [9]तथैकत्रासित [10]आसन आसितं चावस्थानं च तथैकत्र सृप्ते गमनस्थाने सृप्तं च गमनं च ॥

---

१ **ए** °त्तरुतुं. २ **ए** जग्धै ज°. ३ **ए** °र्यमां स°.

---

१ **ए सी डी** °न्तः पु°. २ **ए सी** °न्तलीलो°. ३ **ए** °न्नेन्यते°. ४ **सी** °र्णे भु°. ५ **सी डी** °थो रा°. ६ **ए** °योगितो. ७ **ए सी डी** °नं प्रव°. ८ **ए** °त्रासिते. ९ **ए** तथेक°. १० **ए** आसित आसितं पाव°.

रौप्यभुक्तोज्ज्वलमुखी गर्भं देवी ततो दधौ ।
विदित्वायतत त्रातुं ध्यायं ध्यायं[1] स भीमजः ॥ ३ ॥

३. ततो देवी गर्भं दधौ । कीदृक्सती । गर्भवशाद्रौप्यं रूप्यस्य विकारो यद्भुक्तं पात्रं तद्वदुज्ज्वलं श्वेतं मुखं यस्याः सा । ततो भीमजः कर्णो विदित्वा गर्भं ज्ञात्वा ध्यायं ध्यायं रक्षोपायान्विचिन्त्य[1] विचिन्त्य त्रातुं गर्भं रक्षितुमयतत[2][3] ॥

भीष्मवायुबलोपृच्छदाशातन्तुप्रवर्धनीम् ।
देवीं दोहदकार्याणि नन्दनोत्कः स नन्दकः ॥ ४ ॥

४. भीष्मवाय्वोर्गाङ्गेयवातयोरिव[4] बलं सामर्थ्यं[5] यस्य स तथा नन्दको जगदाह्लादकः स कर्णो देवीं दोहदकार्याण्यपृच्छत् । यतो नन्दनोत्कः[6][7] पुत्र उत्कण्ठितः । किंभूतां देवीम् । आशैव पुत्रमनोरथ एव सन्तानपटहेतुत्वात्तन्तुः[8] सूत्रं तस्य[9] प्रवर्धनीं वर्धिकाम् ॥

वाक्येन तस्यास्तु समवसर्ग्यैः पाणिसर्ग्यया[2] ।
दिवोपि क्लृप्तै रज्ज्वेव[3] वाप्यैर्लाव्यैश्च वस्तुभिः ॥ ५ ॥

डेप्ययाव्यैर्जलासाव्यै राप्यालाप्यरसाश्रितैः ।
आचाम्यैर्युध्यनानाम्यः स दोहदमपूरयत् ॥ ६ ॥

५, ६. स कर्णो दोहदं गर्भानुभावजनितां श्रद्धां देव्या अपूरयत्[10] ।

---

१ बी °यं च भी°. २ ए °सग्यया. ३ ए रज्ज्वैव. ४ डी °साधै रा.

---

१ ए °क्षोमायान्विचिन्त्य विचिन्त्य त्रा°. २ बी रक्षयितु°. ३ ए °क्षितुं म°. ४ ए °वायोर्गा°. ५ ए °र्थ्यं तस्य. ६ डी °नोत्को नन्दने पु°. ७ सी °त्कः स नन्दकपु°. ८ ए °त्तन्तुसू°. ९ ए सी डी °स्य व°. १० ए °त् । कौकै°.

कैः कैरित्याह । वाप्यैर्वस्तुभिर्द्राक्षाफलादिभिर्लाव्यैश्चावश्यं छेद्यैश्च वस्तुभिर्जातिपुष्पादिभिः । तानि हि नोप्यन्तेवश्यं त्रोट्यन्ते च । तथा डेप्ययाव्यैर्डेप्यैः प्रेर्यैः किं[1]करादिभिर्याव्यैश्चात्मना सह संबन्धनीयैः प्रियसख्यादिभिः स्वाङ्गेन संबन्धनीयै[2]र्वस्त्राभरणादिभिर्वा । तथा जलासा[3]व्यैर्जल आर्सा[4]व्यानि भावेत्र घ्यण् । तैस्तीर्थस्नानैरित्यर्थः । तथाचा[5]म्यैर्भक्ष्यैः परमान्नादिभिः । किंभूतैः । रा[6]प्यालाप्यरसाञ्चितै राप्या माधुर्यादिगुणोपेता अमी इति सामान्येन वक्तुं शक्या[7] अलाप्याश्चैतावन्मात्रमाधुर्यादिगुणा अमी इति विशेषतो वक्तुमशक्याश्च ये रसा माधुर्यादयः । उक्तं च ।

इक्षुक्षीरगुडादीनां माधुर्यस्यान्तरं महत्[8] ।
तथापि न[9] तदाख्यातुं[10] सरस्वत्यापि पार्यते ॥ १ ॥

तैरञ्चितैर्युक्तैः । सर्वैरप्येतैः कीदृशैः । तस्यास्तु देव्याः पुनर्वाक्येनामुकस्मिन्फलादौ ममेच्छेति वाचा समवसर्ग्यैर्मेलनीयैः । तथा दिवोपि स्वर्गादपि पाणिभ्यां सृज्यते क्रियते पाणिसर्ग्या तया रज्ज्वेव कृष्टैराकृष्टैरति[11]दुःप्रा(दुष्प्रा)पैरपीत्यर्थः । न[12]न्वनेनैषां दिवो[13]प्याकृष्टिः कुत इत्याहं[14] । यतो युध्यनानाम्यो देवैरपि न[15]मयितुं जेतुमशक्यः ॥

नापत्राप्यं त्वया दाभ्यो नेच्छयात्मेति तां ब्रुवन् ।
अमावास्यायमेवामाव[1]स्येन्दुमपृणन्नृपः ॥ ७ ॥

---

१ **बी** °वश्येन्दु°.

---

१ **ए** °करोदि°. २ **ए** °यैर्वस्त्रा°. ३ **ए सी डी** °साद्यैर्ज°. ४ **ए सी डी** °साद्यानि. ५ **ए सी डी** °चान्यैर्भ°. ६ **ए** रापाला°. ७ **ए सी डी** °क्या आला°. ८ **सी** °त् । तदा°. ९ **ए** नदा त°. १० **ए** °तुं रसस्व°. ११ **ए** °तिदुप्रा°. १२ **सी डी** नन्वेषां. १३ **ए** °वोथा कृ°. १४ **ए** °ह । अतो. १५ **सी** नमिथितुं, **ए** °मथितुं.

७. स कर्णस्तां देवीमपृणद्दोहदपूरणेनापोषयत्। कीदृक्सन्। तां ब्रुवन्। कथमित्याह। त्वया नापत्राप्यं न लज्जनीयमिच्छया श्रद्धया कृत्वात्मा त्वया न दाभ्यो न वञ्च्य इति[1]। यथामावस्येन्दुममावास्यायेमा[2] पृणोति। अमावास्यायां हि रवेः सुखमणाख्यकिरणं लब्ध्वा चन्द्रो वर्धत इति प्रसिद्धिः॥

उपभुक्तैः[3] उपभुक्तऋतुम्। अत्र "गत्यर्थ०" [११] इत्यादिना[4] वा क्तः कर्तरि॥

जग्धे[5] जग्धम्। अशिते अशितम्। सृप्ते सृप्तम्। आसिते आसितम्। पीते पीतम्[6]। भुक्त उपभुक्तैः उपभुक्तऋतुम्[7]। अत्र "अद्यर्थाच्चाधारे" [१२] इत्याधारे[8] क्तो वा॥

विदित्वा। त्रातुम्। ध्यायं ध्यायम्। अत्र "क्त्वा०" [१३] इत्यादिना क्त्वातुममो भावे ज्ञेयाः॥

भीम। भीष्म। इत्येतौ "भीम°" [१४] इत्यादिनापादाने साधू॥

वायु। तन्तु। इत्यत्र "संप्र०" [१५] इत्यादिना संप्रदानापादानाभ्यामन्यत्रोणादयः॥

नन्दन[9] नन्दकः। अत्र "असरूप०"[10] [१६] इत्यादिनापवादविषय औत्सर्गिकः[11] प्रत्ययो वा। असरूप[12] इति किम्। घ्यणि यो न स्यात्। कार्याणि॥ प्राक्क्तेरिति किम्। प्रवर्धतेनया प्रवर्धनी। अनट्विषये[13] न क्तिः। आशायते तनूक्रियते लाभादसावित्याशा। "उपसर्गादातः" [५.३.११०] इत्यङ्विषये[14] न क्तिः॥

कार्याणि। वाक्येन। इत्यत्र[15] "ऋवर्ण०" [१७] इत्यादिना घ्यण्॥

---

१ ए सी °ति × × × × प्रसि°. २ डी पृणाति. ३ ए °क्तऋतम्।. सी °क्तऋत्। अ°. डी °क्तऋ°. ४ ए ना क्तः. ५ ए जग्धौ ज°. ६ सी डी °म्। उ°. ७ ए °भुक्तऋ°. ८ डी °धार क्तो. ९ सी °न्दकः. १० ए अस्वरू°. ११ ए °र्गिकप्र°. १२ ए अस्वरू°. १३ ए °नट्विष°. बी °नटविष°. १४ ए °त्यद्विष°. सी डी °त्यङविष°. १५ ए °त्र कर्ण°.

पाणिसर्ग्यया । समवसर्ग्यैः । अत्र "पाणि०" [१८] इत्यादिना घ्यण्[1] ॥

लाव्यैः । अत्र "इवर्णात्०" [१९] इत्यादिना घ्यण् ॥

जलासाव्यैः । याव्यैः[2] । वाप्यैः । राप्य[3] । अलाप्य । अपत्राप्यम् । डेप्य । दाभ्यः[4] । आचाम्यैः । आनाम्यः । अत्र "आसुयु०" [२०] इत्यादिना घ्यण् ॥

अमा[5]वस्यामा[6]वास्याशब्दौ "वाधारेमा[7]वस्या" [२१] इति साधू[8] ॥

ऊचे च तु[1]क्कुण्डपाय्यसंचाय्यराजसूयकृत् ।
निकाय्योपाय्यपुण्यानां भावी विश्वाप्रणाय्यकः ॥ ८ ॥
देवि यै[2]द्रष्टुमैच्छस्त्वं[3] धाय्यासान्नाय्यपावितान् ।
परिचाय्योपचाय्यानाय्यसमूह्यान्सं[4]चित्यकान् ॥ ९ ॥

८, ९. राजोचे । कि[9]मित्याह । हे देवि यद्यस्मात्त्वं परिचाय्योपचाय्यानाय्यसमूह्यानग्निभेदान्द्रष्टुमैच्छः । किंभूतान् । धाय्या रूढिशब्दत्वात्कां[10]श्चिदेव ऋचः । सान्नाय्यं हविः । द्वन्द्वे तैः पा[11]वितान् । तथा सचित्यकांश्चित्येनाग्निविशेषेण युक्तान् । तस्मा[12]त्तुक् तव पुत्रो भावी भविष्यति । कीदृक् । कुण्डपाय्यसंचाय्यराजसूयकृत्कुण्डपाय्यादियागविशेषकारकः । तथापाय्यपुण्यानामपाय्यानामविद्यमा[13]नमानानां पुण्यानां निकाय्यो निवासः । तथा विश्वाप्रणाय्यको विश्वसंमतो विजिगीषुत्वाद्विश्वाभिलाषुको वेत्यर्थः ॥

---

१ **ए बी** तुक्कुण्ड°. २ **ए** °द्रष्टुमै°. ३ **ए** °स्त्वं ध्यायासा°. ४ **ए** °न्सजो°.

---

१ **ए सी डी** °ण् ॥ जलासा°. २ **ए** °व्यैः । व्याप्यैः. ३ **बी** राप्या । लाप्या । अ°. ४ **बी सी** दाभ्य । आ°. ५ **ए सी डी** °मावास्या°. ६ **सी डी** °मावस्या°. ७ **सी डी** °मावास्या. ८ **ए** साधूः ॥. ९ **ए** °मिथत्या°. १० **बी** °श्चिद्देव°. ११ **सी डी** पाचिता°. १२ **ए सी डी** °स्मात्तव तुक् पु°. १३ **सी** °माना°.

गर्भविघ्नच्छिदेऽभूवन्भुव्यनानाय्यगोदुहः ।
संवाह्याग्नौ च याज्याभिर्यष्टव्यमृषयोयजन् ॥ १० ॥

१०. गर्भविघ्नच्छिदे गर्भापायच्छेदाय ऋषयो भुव्यनानाय्यगोदुहो नित्यगोदोहका अभूवन् । गोषु हि भुवि दुग्धासु विघ्ना विलीयन्त इति श्रुतिः । तथा संवाह्याख्याग्निभेदे याज्याभिर्दानऋग्भिः कृत्वा यष्टव्यं हव्यमृषयोयजंश्चाजुहवुः ॥

करणीयेष्वहेयेष्वशेयैः शक्येष्टसिद्धिभिः ।
प्रशस्यं यत्यमारेभे यज्यैर्भज्यैः पुरोहितैः ॥ ११ ॥

११. प्रशस्यं शसू हिंसायाम् । धातूनामनेकार्थत्वात्स्तुतावपि तेन स्तुत्यं यद्वा प्रगतं शस्यं हिंसा यस्य तत्प्रशस्यं यत्यं गर्भशान्तिकर्मविषयो यत्नः पुरोहितैरारेभे । यतः किंभूतैः । अहेयेषु धर्महेतुत्वेनात्याज्येषु करणीयेषु विघ्नच्छेदादिकर्मसु विषयेऽशेयैर्जागरूकैस्तथा महामान्त्रिकत्वाच्छक्या शक्तिः स्वभावाद्धात्वन्तरार्थानुसंहित एव प्रयुज्यते ततः कर्तुं शक्येष्टसिद्धिर्यैस्तैरत एव यज्यैः पूज्यैर्भज्यैः सेव्यैः ॥

असह्यतक्यतप्योयं याज्यश्चत्यो विजन्यताम् ।
गर्भः क्षेमेण भाग्यैर्न इति दध्यौ गुरुस्तदा ॥ १२ ॥

१२. गुरू राजाचार्यस्तदा गर्भवृद्धिकाले दध्यौ । किमित्याह । अयं गर्भो नोस्माकं भाग्यैः पुण्यैः क्षेमेण विजन्यतामुत्पद्यताम् । कीदृक् ।

---

१ ए सी °नामाय्य°. २ ए °शेयै श°.

---

१ बी °घ्नविच्छेदे. २ ए सी डी °न् । सं°. ३ ए सी डी °त्वात्सुता°. ४ सी °न सुत्यं. ५ बी यस्मात्तत्प्र°. ६ ए °स्य त्वत्प्र°. ७ ए °र्ममु द्विष°. ८ ए सी डी °च्छक्याः श°. ९ ए °र्थामुसंपहि°. १० बी °संहंसित. ११ बी °भंज्यै से°.

विशेषणकर्मधारये नञ्समासे च असह्यतक्यतप्यो महाप्रतापित्वाच्छत्रुभिरनभिभाव्योनुपहास्योसंताप्यश्च । तथा याज्यः पूज्यस्तथा चत्यो दानेश्वरत्वाद्याचकैर्याच्य इति ॥

संचाय्यकुण्डपाय्यराजसूयाः "संचाय्य०" [२२] इत्यादिना निपात्याः ॥

प्रणाय्य । इति "प्रणाय्य०" [२३] इत्यादिना निपात्यते ॥

धाय्या । पाय्य । सान्नाय्य । निकाय्य । एते "धाय्या०" [२४] इत्यादिना निपात्याः ॥

परिचाय्योपचाय्यानाय्यसमूह्यान् । चित्यं । इत्येते "परिचाय्य०" [२५] इत्यादिना निपात्याः ॥ केचिदानाय्येत्यग्निविशेषादन्यत्राप्यनित्यविशेष इच्छन्ति । अनानाय्यगोदुहैः ॥ अन्ये संपूर्वादूहेरग्नावेवेति नियमार्थं घ्यणं निपातयन्ति । अग्नेरन्यत्र समूहितव्यमित्येव । वहेस्तु तन्मतेग्नावपि संवाह्येति स्यात् ॥

याज्याभिः । इति "याज्या दानर्चि" [२६] इति निपात्यम् ॥

यष्टव्यम् । करणीयेषु । इत्यत्र "तव्यानीयौ" [२७] इति तव्यानीयौ ॥

अशेयैः । अहेयेषु । इत्यत्र "य एच्चातः" [२८] इति य आतश्चैत् ॥

शक्य । तक्य । चत्यः । यत्यम् । प्रशस्यम् । असह्य । यज्यैः । भज्यैः ॥ पवर्गे । तप्यः । अत्र "शकितकि०" [२९] इत्यादिना यः ॥ यजिभजिभ्यां नेच्छन्त्येके । याज्यः । भाग्यैः ॥

मन्दं गद्यं श्लथं यम्या नीवी मद्यं न च त्वया ।
गतिर्नियम्या नायाम्यौ चरणावप्रमाद्यया ॥ १३ ॥

---

१ ए यम्यां नी°. २ ए °द्यया: ॥.

---

१ ए °ह्यसक्य°. २ बी °त्य । एते. ३ ए °हः । शेपू सं°. ४ बी °न्ये तु सं°. ५ ए अन्येर°. ६ ए °नीयैः ॥ अ°. ७ ए इयोत्पात°. ८ बी °तियोन्त्यात°. ९ बी चत्य । य°. १० ए सी डी °त्य । प्र°. ११ ए भन्तैः ॥ प°.

न निगाद्यं न वा चर्यं मद्यपाचर्यभूमिषु ।
नोपसर्या[1]न्तिके चैतां[2] वर्याचार्यस्त्रियोशिषन् ॥ १४ ॥

१३, १४. वर्या आप्तत्वेनोपेया या आचार्यस्त्रियो राजगुरुभार्यास्ता एतां देवीमशिषन्[1]नशिक्षयन्[2] । कथमित्याह । देवि त्वयाविद्यमानं प्रमाद्यं प्रमादो[3] यस्यास्तयाप्रमाद्यया सत्या मन्दं नीचैर्गद्यं वाच्यं तथा नीव्यधोवस्त्रग्रन्थिः श्लथं शिथिलं यस्या बन्ध्या तथा न च मद्यं मद्यपानादिना[4] न क्षीबीभाव्यं तथा गतिर्यानं नियम्या नियतीकार्या । अल्पं गम्यमित्यर्थः । तथा चरणौ नायाम्यौ न प्रसार्यौ[5] । तथा मद्यपा[6]चर्यभूमिषु मद्यपैर्मद्यपानार्थं सेव्यासु भूमिषु न[7] निगाद्यं न वाच्यं न[8] वा चर्यं भ्रमणीयं[9] तथो[10]पसर्यान्तिके च ऋतुमतीसमीपे च न निगाद्यं न वाचर्यमिति । उच्चैर्गदनादौ हि गर्भाबाधा मत्ततादौ च छलच्छिद्राद्यनेकदोषसंभव इत्येतानि निषिध्यन्ते[11] ॥

नीत्वानवद्यां[3] सा मासान्पुण्यपण्यपदं नव ।
ब्रह्मक्षत्रार्य[4]शूद्राणामर्यं प्रासूत नन्दनम् ॥ १५ ॥

१५. अनवद्या[12] निष्पापा सा देवी नव मासान्नीत्वातिक्रम्य नन्दनं पुत्रं प्रासूत । कीदृशम्[13] । पुण्यपण्यपदं धर्म[14]क्रयाणकस्थानमत एव ब्रह्मक्षत्रार्यशूद्राणा[15]मर्यं स्वामिनम् ॥

---

१ **ए** °पसूया°. २ **ए** °तां चर्या°. ३ **ए** °द्या मा°. ४ **बी सी** °र्यसूद्रा°.

---

१ **ए** °वीनशि°. २ **ए** °शिष्यय°. ३ **ए** °माद्यो य°. ४ **ए** °ना भ क्षी°. ५ **ए** °सायो । त°. ६ **सी डी** °पाचार्य°. ७ **ए** न न गा.° ८ **डी** न चाच°. ९ **ए** °णी त°. १० **ए सी डी** तथाप°. ११ **ए** निषंध्य. १२ **बी** °द्या निःपापा°. १३ **सी** °दृश्यम्. १४ **ए** धर्म क्र°. १५ **ए** °मर्थं स्वा°.

यस्या। मद्यम्। गद्यम्। अत्र "यममद० (यमिमदि० ?)" [३०] इत्यादिना यः॥ अनुपसर्गादिति किम्। आयाम्यौ[1]। अप्रमाद्यया। निगाद्यम्॥ बहुलवचना-न्माद्यन्त्यनेन मद्यं करणेपि। नियम्य। इत्यत्र सोपसर्गादपि॥

चर्यम्। आचर्य[2]। इत्यत्र "चरेर्०" [३१] इत्यादिना यः। अगुराविति किम्। आचार्य[3]॥

वर्याचार्यस्त्रियः॥ उपसर्या। अनवद्या[4][5]। पण्य। इत्येते "वर्य०" [३२] इत्यादिना निपात्याः॥ वर्येति स्त्रीलिङ्गनिर्देशात्पुंसि न स्यात्॥ अन्यस्तु पुंस्यपीच्छति। सामान्यनिर्देशात्तदपि संगृहीतम्॥ तदा वर्याश्च त आचार्याश्च वर्याचार्यास्तेषां स्त्रिय एवमपि समासः स्यात्॥

अर्यम्[6]। अर्य। इत्येतौ "स्वामि०" [३३] इत्यादिना[7] निपात्यौ॥

वह्यैरेत्य ततो ब्रह्मोद्यानुवाद्यैर्नृपाज्ञया।
सुसत्यवद्यैर्दैवज्ञभूयं[1] प्राप्तैरितीरितम्[2]॥ १६॥

१६. ततः पुत्रजन्मानन्तरं दैवज्ञभूयं ज्ञानिकत्वं प्राप्तैर्दैवज्ञैरिति वक्ष्यमाणमीरितमुक्तम्। किं कृत्वा। नृपाज्ञया वह्यैरश्वादिवाहनैः कृत्वैत्यागत्य[8]। कीदृशैः। शोभनं सत्यवद्यं सत्यवदनं[9] येषां तैस्तथैकेनोदितेन्येन तस्यैव वदनमनुवाद्यं ब्रह्मोद्यं ज्ञानभणनमनुवाद्यमिदमित्थमित्यन्यैरनुवाच्यं येषां तैर्मिथः संवादं कृत्वेत्यर्थः॥

एषोरिकीर्तिहत्याकृत्स्वप्रतापाग्निचित्यया।
उत्खेयद्वीपभूपालो[3] निर्मृषोद्यो भविष्यति॥ १७॥

---

१ ए °द्यैर्दिव°. २ ए सी °भूयप्रा°. ३ ए °लोन्निनिर्नृषो°.

---

१ ए सी °चमान्मा°. २ बी आचार्य. ३ ए सी डी °चार्या॥ व°. ४ ए अनाव° ५ ए सी °द्या। पाण। इ°. ६ ए सी अर्या। अ°. ७ ए सी डी °ना वा नि°. ८ ए कृत्वेत्या°. ९ बी सत्यं व°.

१७. एष पुत्रो भविष्यति । कीदृक् । स्वप्रताप एवाग्निचित्याग्नेश्चयनं[1] तयोत्खेयद्वीपभूपाल[2] उत्पाट्यद्वीपनृपः प्रतापेनैवाब्धिमध्यमपि साधयितेत्यर्थः । अत एवारिकीर्तिहत्याकृच्छत्रुयशोविनाशकस्तथा धार्मिकत्वान्निर्मृषोद्यो मृषोद्यादसत्यवचनान्निष्क्रान्तः[3] ॥[4]

वह्यैः । इति "वह्यं करणे" [३४] इति निपात्यम् ॥

ब्रह्मोद्य[5] । सुसत्यवद्यैः । अत्र "नाम्नो वदः क्यप् च"[6] [३५] इति क्यप्यश्च[7] । नाम्न इति किम् । अनुवाद्यैः ॥

कीर्तिहत्या । दैवज्ञभूयम् । इत्येतौ "हत्या०" [३६] इत्यादिना निपात्यौ ॥

अग्निचित्यया[8][9] । इति "अग्निचित्या" [३७] इति निपात्यम् ॥

उत्खेय[10] । मृषोद्यः । इत्येतौ "खेय" [३८] इत्यादिना निपात्यौ ॥

सर्वार्थसाधने पुष्योतिसिध्यो वैष[1] भास्यति ।
भिद्योद्ध्यस्नातयुग्योयं[2] दिग्भ्योकुप्यं हरिष्यति ॥ १८ ॥

१८. एष पुत्रो भास्यति । कीदृक्सन् । सर्वार्थसाधने पुष्यः पुष्य[11]नक्षत्रतुल्योतिसिध्यो वा पुष्यादप्यधिको वा । तथा दिग्भ्योकुप्यं कुप्यं रूप्यस्वर्णाभ्यामन्यत्कांस्यादि[12] न तथाकुप्यं स्वर्णं रूप्यं च हरिष्यत्यानेष्यति । कीदृक्सन् । भिद्योद्ध्यौ[13] ह्रदविशेषौ तयोः स्नातानि युग्यानि वाहनानि यस्य[14] स तथा । भिद्योद्ध्यौ यावद्गतसैन्य इत्यर्थः ॥

---

१ ए वैषा भा°. २ डी °स्नातेयु°.

---

१ ए °यमं त°. २ बी °पालं उ°. ३ ए °षोद्याद° ४ बी °न्निष्क्रान्तः. ५ बी °ह्मोद्यः । सु°. सी डी °ह्मोद्या सु°. ६ ए नाम्नोव° ७ ए क्यप्रयश्च, सी डी क्यप्प्रत्ययश्च. ८ सी °चित्येति नि°. ९ ए °त्ययेत्यग्निचित्यया । इ°. १० ए सी डी °त्खेयः । मृ°. ११ ए °ष्यमक्ष°. १२ ए रूपस्व°. सी रूपास्व°. १३ ए °द्ध्यौ ह्रद. १४ डी °स्य त°.

सूर्योऽयं राक्षसाज्यानां[1] प्रजायास्तिष्यवत्प्रियः[2] ।
स्तुत्यः प्रावृत्य[3] आदृत्यो जुष्यश्च भविता नृपैः ॥ १९ ॥

१९. अयं पुत्रो भविता भविष्यति । कीदृक् । राक्षसाज्यानां राक्षसघृतानां सूर्यो विलीनयितेत्यर्थः । तथा प्रजा[1]यास्तिष्यवत्प्रियः पुष्ये[2] इव पोषकत्वादभीष्टस्तथा नृपैः स्तुत्यः प्रावृ[3]त्यः परि[4]वार्य आदृत्य आदरणीयो जुष्यश्च ॥

इत्योधीत्यः सुरैः कृच्छ्रे[4]ध्येयोपेयश्च पन्नगैः ।
यो विश्वामित्रशिष्योभूद्देवः सोत्रावतीर्णवान् ॥ २० ॥

२०. स देवो रामचन्द्रोत्र पुत्रेवतीर्णवानवतारं चक्रे[5] यो विश्वामित्रशिष्योभूत् । कीदृशः । यः कृच्छ्र आपदि सुरैरधीत्यः शरणाय स्मर्य इत्योभिगम्यश्च । तथा पन्नगैरध्येयश्चासावुपेयश्च सेव्यश्चाध्येयोपेयश्च ॥

कुप्यम्[6] । भिद्योद्ध्य । सिध्यः । तिष्य[7] । पुष्यः । युग्यः[8] । आज्यानाम् । सूर्यः[9] । इत्येते "कुप्य०" [३९] इत्यादिना निपात्याः ॥

आदृत्यः । प्रावृत्यः । स्तुत्यः[10] । जुष्यः ॥ एतीति इणिकोर्ग्रहणम् । इत्यः । अधीत्यः । शिष्यः । अत्र "दृवृग्[11]०" [४०] इत्यादिना क्यप्[12] ॥ इणिकोर्ग्रहणादयतेरिङश्च न स्यात् । उपेयः । अध्येयः ॥

अच्यासंकल्प्य[5]वृत्योसौ चत्वारि[6]ः शंस्यकृत्यवित् ।
दानवर्ष्यजगच्छस्यं सुरकार्यं[7] करिष्यति ॥ २१ ॥

---

१ ए °साध्यानां प्रयाया°. २ ए °त्प्रिया स्तु°. ३ बी °त्यश्चादृ°. ४ ए °कृच्छ्रोध्ये°. ५ ए बी सी °कल्पवृ°. ६ ए सी डी °त्यारिशं°. ७ ए सी °रिस्यति.

---

१ ए °जायस्ति°. २ बी °ष्यवत्पोष°. ३ ए °वृत्या प°. सी °वृत्य प°. ४ सी डी °रिचार्य. ५ ए चक्रेः यो. ६ ए कुष्यम् । भिद्धयोद्धय. ७ ए तिप्यः । पु°. डी तिष्यः । पु°. ८ सी युग्मं । आ°. ९ ए कुष्य इ°. १० ए °त्यः । जष्यः ॥ पवीति इणि°. ११ ए दृष्टग्. १२ ए क्यइ ॥ इ°.

२१. असौ पुत्रः शस्यं श्लाघ्यं सुरकार्यं दैत्यवधादि करिष्यति । कीदृक्सन् । अर्च्यं[1] धर्म्यत्वेन पूज्यमसंकल्प्यं[2] महत्तमत्वेन केनाप्यसा[3]-ध्यत्वादचिन्त्यं[4] वृत्यं वर्तनं यस्य सः । तथा चर्त्या[5] हिंस्या अरयो येन सः । तथा शंस्यकृत्यवित्[6] प्रशस्यकार्यज्ञस्तथा दानेन वर्ष्यं सेक्यं[7][8] जगद्येन सः ॥

नीत्या वृष्या च मृज्या च दुह्या चानेन गौरियम् ।
ब्रह्मजाप्यकृतां[1] जप्ये मार्ग्ये विघ्नं[2] हरिष्यते ॥ २२ ॥

२२. अनेन पुत्रेण कर्त्रा नीत्या न्यायेन कृत्वेयं गौः पृथ्वी[9] वृष्या च सेक्या न्यायेन प्रवर्तयिष्यत इत्यर्थः । अत एवं[10] मृज्या च निष्पापीकरिष्यत इत्यर्थः । अत एव दुह्या च रत्नानि क्षारयितव्या च । न्यायपूर्ता[11] हि पृथ्वी महर्द्ध्युपचितत्वाद्रत्नानि प्रसूते । तथा ब्रह्मजाप्यकृतां ब्रह्मणः परमध्येयस्य जाप्यं जपनं ध्यानं कुर्वतां योगिनां मार्ग्ये रागद्वेषादिमलापनयनेन संशोध्ये[12] जप्ये ध्याने विघ्नं दैत्याद्युपद्रवोनेन हरिष्यते ॥

ज्ञानगुह्यमिति ख्यातवत्[3]सु तेष्वनिगोह्यमुत् ।
दोह्या गाः प्रददौ जित्याशतभूमिं च भूमिपः ॥ २३ ॥

२३. इत्येवंरीत्या ज्ञानगुह्यं ज्ञानरहस्यं ख्यातवत्सूक्त[13]वत्सु[14] तेषु दैवज्ञेषु भूमिपः कर्णो ददौ । किमित्याह । दोह्या गा धेनूर्जित्याशतभूमिं च । जित्या महाहलानि[15][16] तासां यच्छतं तस्य भूमिं च । महाहल-

---

१ ए सी °जाप्यं कृ°. २ डी विघ्नह°. ३ डी वस्तु ते°.

---

१ सी धर्मात्वे°. २ ए सी °कल्पं म° ३ ए केनप्य°. ४ सी °चिन्त्यवृत्य व°. ५ ए °र्त्या हिस्या. ६ ए °त् त्प्रश°. ७ बी सेच्यं ज°. ८ ए सी °क्यं तग°. ९ ए °थ्वीन्वृषा च. १० ए सी °व सृज्या. ११ ए सी °ता दि पृ°. १२ सी डी °ध्ये जाप्ये. १३ सी °क्त ते°. १४ डी °त्सु दै°. १५ ए °लामि ता°. सी °लामि तांसां. १६ डी °नि तांसा य.°

शतेन यावती भूः कृष्यते तावतीमित्यर्थः । कीदृक्सन् । अनिगोह्या-
तिबहुत्वात्संवरीतुमशक्या मुद्येन सः ॥

पुत्रे विपूयजन्माभेस्मिन्कुङ्कुमविनीयकैः ।
श्रेणिगृह्या पुरीगृह्योत्सवं चक्रे प्रगृह्यवाक् ॥ २४ ॥

२४. पुरीगृह्या नगरवा(बा)ह्या श्रेणिः सजातीयशिल्पिसंघः कुङ्कु[1]म-
विनीयकैः कुङ्कुमानां कल्कैः कुङ्कुमद्रवैरित्यर्थः । उत्सवं सर्वत्र छटादा-
नैर्महं चक्रे । क । विपूये मुञ्जे शरवणे[2] जन्म यस्य स विपूयजन्मा
स्कन्दः[3] । तेजस्वितादि[4]गुणैस्तत्तुल्येस्मिन्पुत्रे[5] । पुत्रजन्मविषयमित्यर्थः ।
कीदृशी सती । गृह्या हर्षोत्कर्षेण मद्यपानोत्थमत्ततया वास्वतन्त्रा[6] ।
तथा प्रगृह्या स्वरसन्धिरहिता वाकपटू एतौ कुङ्कुमक्षेपकावित्यादिका
वाणी यस्याः सा । एतेनास्या अन्योन्यमुत्साहनं[7] पाण्डित्यं चोक्तम् ॥

गुणगृह्याः कर्णसूनोः शक्रभृत्याः सभार्यकाः ।
संभृत्यभूमेः संभार्यदिवः[1][2] खे मङ्गलं जगुः ॥ २५ ॥

२५. सभार्यका देवीयुक्ताः शक्रभृत्या इन्द्रपोष्या देवाः[8] खे मङ्गलं
जगुः । किंभूताः सन्तः । कर्णसूनोर्गुणगृह्या[9] गुणानां पक्षपातिनः ।
यतः किंभूतस्य । संभृत्यभूमेः पोष्यपृथ्वीकस्य । तथा संभार्यदिवो
दैत्यन्यक्कां(क्का)रादिना[10] पोष्यस्वर्गस्य ॥

वृत्यः । अत्र "ऋदु०" [४१] इत्यादिना[11] क्यप् ॥ अकृपिच्चृदच[12] इति किम् ।
असंकल्प्यं[13][14] । चर्त्यं । अर्च्यं ॥

---

१ सी डी °दिवाःखे. २ ए °वः एव म°.

---

१ सी °ङ्कुमानां वि°. २ ए °वणो ज°. ३ ए स्कन्द ते° ४ ए °तापिदि°.
५ बी °त्रे ज°. ६ ए वाश्वत° ७ सी °हन पा°. ८ बी देवा खे. ९ सी
°गुह्या. १० ए °कागदि°. ११ ए °इन्यादि°. १२ ए °पिवृद्द°. १३ सी डी
°कल्पा । च°. १४ ए °ल्प्य । वर्त्य । अर्च्या ॥ कृ.

कृत्य कार्यम् । वृष्या[1] वर्ष्यं । मृज्या मार्ग्यं[2][3] । शस्यं शंस्य । गुह्यं[4] निगोह्य । दुह्या दोह्याः[5] । जप्ये[6] जाप्य । इत्यत्र "कृवृषि०"[7] [४२] इत्यादिना क्यप् वा ॥

जित्या । विपूय । विनीयकैः । अत्र "जिवि०" [४३] इत्यादिना क्यप्[8] ॥

प्रगृह्यवाक्[9] ॥ अस्वैरिणि । गृह्या । वा(बा)ह्यायाम् । पुरीगृह्या ॥ पक्षे[10] । गुणगृह्याः । अत्र "पद०" [४४] इत्यादिना क्यप् ॥

भृत्याः । अत्र "भृगोसंज्ञायाम्" [४५] इति क्यप् ॥ असंज्ञायामिति किम् । सभार्यकाः ॥

संभृत्य संभार्यं । इत्यत्र "समो वा" [४६] इति वा क्यप् ॥

हरः श्रीनायको धाता लेहाः सर्वेमृतस्य च ।
दैत्यान्भटब्रुवाञ्जज्ञुः[1] कर्णनन्दनजन्मनि[2] ॥ २६ ॥

२६. कर्णनन्दनजन्मनि सति हरः श्रीनायको विष्णुर्धाता सर्वेमृतस्य लेहाश्चास्वादका देवाश्च दैत्यान्भटब्रुवान्निन्द्यभटाञ्जज्ञुर्मेनिरे ॥

मदनोऽङ्गान्तरग्राही[3] स्थायी पुण्ये बुधान्वये ।
किरो गिरो विपक्षाणां ज्ञप्रियोलक्षि कर्णभूः ॥ २७ ॥

२७. पुण्ये बुधान्वये सोमसुतवंशे स्थायी वर्तमानः कर्णभूः कर्णपुत्रोऽङ्गान्तरग्राही[11] शरीरान्तरग्रहीता मदनोलक्षि । तथा विपक्षाणां[12] किरो विक्षेपको[13] गिरः संहारकश्चालक्षि । तथा[14] ज्ञप्रियो विद्वज्जनवल्लभ-

१ ए °त्यान्भुडब्रु°. २ ए °अज्ञः क°. ३ ए °ङ्गातर°.

१ ए °ष्या वृष्यं. २ ए मार्गे । श°. ३ सी °र्ग्यें । शंस्यं शस्यं । गु°. ४ डी शंस्यं । गु°. ५ सी बी दोह्य । ज°. डी दोह्या । ज°. ६ सी जप्य । इ°. ७ ए कृषि°. ८ सी क्यस्तप्वा ॥ जि°. ९ ए प्रसह्य°. १० डी पक्ष्य । गु. ११ ए °रग्राही° १२ ए °पक्षकाणां. १३ ए सी विपक्षके गि°. १४ ए सी तवा ज्ञ°.

श्चालक्षि । तथाविधाकृतिविशेषेणात्यन्तं[1] रूपी शूरो विद्वांश्चायं भविष्यतीति जनैः संभावित इत्यर्थः ॥

नायकः । धाता । अत्र "णकतृचौ" [४८] इति णकतृचौ[3] ॥

हरः । अत्र "अच्" [४९] इत्यच् ॥

लेहाः । अत्र "लिहादिभ्यः" [५०] इत्यच् ॥

ब्रुवान् । इति "ब्रुवः" [५१] इति निपात्यम् ॥

नन्दनः(न) । मदनः । अत्र "नन्द्यादिभ्योनः"[3] [५२] ॥

ग्राही । स्थायी । इत्यत्र "ग्रहादिभ्यो णिन्" [५३] ॥

बुध[4] । प्रियः । किरः । गिरः[5] । ज्ञ । इत्यत्र "नामि" [५४] इत्यादिना[6] कः ॥

राजव्याघ्रगृहे प्रह्वा निष्प्रति[1]श्यायकण्ठकाः[2] ।

एयुश्छात्राः[3] प्रफुल्लाघ्राः पठन्तः सूत्रमातृकाम्[4] ॥ २८ ॥

२८. छात्राः सोपाध्यायाश्चट्टा राजव्याघ्रगृहे राजव्याघ्रस्य कर्णस्य सौध एयुः । कीदृशाः सन्तः । प्रह्वा विनीतत्वान्नम्रास्तथा निष्प्रति[7]श्यायः प्रतिश्यायाच्छ्लेष्मणो[9] निर्गतः कण्ठो ध्वनिर्येषां ते तथा तारस्वरास्तथा सूत्रमातृकां[10] पुत्रजन्मोत्सवोचितं[11] पाठविशेषं पठन्तोत एव प्रफुल्लाघ्रा उच्छ्वसितनासिकाः[12] ॥

गृहे । अत्र "गेहे ग्रहः" [५५] इति कः ॥

प्रह्वाः । अत्र "उपसर्गाद्०" [५६] इत्यादिना डः ॥ अश्य इति किम् । प्रतिश्याय[13] ॥

१ बी निःप्रति°. २ ए सी °श्यामक°. ३ ए °युश्छत्राः प्रपुल्लाघाः प°. ४ बी सूतमा.°

१ सी डी °त्यन्त रू° २ ए डी णक् तृ°. ३ ए नन्दादिभ्योतः ॥ ग्रा°. ४ बी बुधः । प्रि°. ५ ए °रः । न । इ°. ६ सी °ना यक ॥. ७ बी निष्प्रति°. ८ डी °याश्लेष्माणो. ९ ए सी °च्छ्लेष्माणो. १० बी सूतमा°. ११ बी °न्मोचि°. १२ ए सी °सि ××× त्यौ ॥. डी °सिका ॥ गृ°. १३ डी °श्यायः ॥ व्या°.

व्याघ्र । आघ्राः । एतौ "व्याघ्र०" [५७] इत्यादिना निपात्यौ ॥

माल्यजिघ्राः शङ्खधमा उत्पश्यत्वान्नभःपिबाः ।
सुधाधयसमाः संगीतकं चक्रुः कलाविदः ॥ २९ ॥

२९. कलाविदो गायनादयो विद्यावन्तः संगीतकं प्रेक्षणं चक्रुः । किंविधाः । शङ्खधमाः केचिच्छङ्खान्वादयन्तस्तथा केचिद्गायनादय उत्पश्यत्वाद्गानादावूर्ध्वं प्रेक्षमाणत्वान्नभःपिबो व्योम्नो लेहा इव । गानादि कुर्वन्तो हि गायनादयः स्वभावादूर्ध्वं पश्यन्तो व्योमचुम्बिन इव लक्ष्यन्ते । सर्वेपि चैते माल्यजिघ्राः पुष्पाणि जिघ्रन्तो भोगलिङ्गा इत्यर्थः । अत एव सुधाधयसमा गन्धर्वदेवैः समाः ॥

माल्यजिघ्राः । शङ्खधमाः । नभःपिबाः । सुधाधय । उत्पश्य । इत्यत्र "घ्राध्मा० [५८] इत्यादिना शः ॥

मित्रैर्मुचेतयैरेतज्जन्मवेदयसातयैः ।
विलम्बासाहयैरेये व्यापारान्तरपारयैः ॥ ३० ॥

३०. मित्रैरेये कर्णसौध आगतम् । कीदृशैः । एतज्जन्मनः कर्णपुत्रजन्मनो वेदयानां ज्ञापकानां पुत्रजन्मवर्धापकानां सातयैर्महादानेन सुखोत्पादकैः । सात् सौत्रो धातुः सुखार्थे । ततः साततः सुखविषयीभवतो मित्राणि प्रयुञ्जते णिग् । अतश्च पुत्रजन्मज्ञानान्मुचेतयैर्हर्षस्यानुभवितृभिरत एव विलम्बासाहयैः कालक्षेपमसहमानैरत एव व्यापारान्तरपारयैरन्यव्यापारसमापकैः कार्यान्तरं मुक्त्वेत्यर्थः ॥

---

१ ए °धायसमसं° सी °धायसुमाः.

---

१ ए °यतंस्त°. २ ए बी प्रेक्ष्यमा°. ३ ए °क्ष्यते । स°. ४ बी एवं सु°. ५ ए सी डी समा ॥ मा°. ६ ए °नां जाप°. ७ सी °दामेन. ८ बी °तः सु°. ९ डी °युञ्जाते. १० ए °म्बासहः ये का°. सी °म्बासह°.

अञ्चलोदेजयैः स्त्रैणैरक्षतामत्रधारयैः ।
उत्साहयितृभिः कान्त्या व्योमलिम्पैरुपस्थितम् ॥ ३१ ॥

३१. स्त्रैणैरुपस्थितं कर्णान्तिकेवस्थितम् । कीदृशैः । अक्षतामत्रधारयैरक्षतपात्रधारिभिः । तथोत्साहयितृभिरन्योन्यस्योत्साहकैस्तथा कान्त्याङ्गालंकारादिद्युत्या व्योमलिम्पैर्नभो[1] [2] व्याप्नुवद्भिरित्यर्थः[3] । तथाञ्चलोदेजयैः कर्णस्य निरुञ्छनाय[4] वस्त्रप्रान्तस्य चालकैः ॥

निलिम्पगोविन्दसमैर्मुद्विन्दस्यारविन्दकैः ।
तद्वेश्माभाच्चलाचालैर्बन्धुभिर्ज्वलभूषणैः ॥ ३२ ॥

३२. तद्वेश्म कर्णसौधं बन्धुभिराभात् । कीदृशैः । मुदः पुत्रजन्मोत्थहर्षस्य विन्दानि लब्धॄण्यास्यारविन्दानि मुखपद्मानि येषां तैस्तथा ज्वलभूषणैर्दीप्यमानालंकारैरत[5] एव निलिम्पगोविन्दसमैर्निलिम्पैर्देवभेदैर्गोविन्देन विष्णुना च तुल्यैस्तथा चलाचालैः[6] कैश्चिच्चलैः कैश्चिदचलैः ॥

द्विषद्वज्वालदावः पुण्यभावो भवोपमः ।
सर्वेषामुचितं चक्रे राज्ञां नायो ग्रहेशरुक् ॥ ३३ ॥

३३. राज्ञां नायो नायकः कर्णः सर्वेषां[8] छात्रादीनामुचितं वस्त्रदानादि चक्रे । कीदृक्सन् । ग्रहेशरुक्[9] सूर्योष्णतेजाः । अत एव द्विषन्त[10] एव दवा वनानि तेषु ज्वालदावो[11] ज्वलद्दावानलस्तथा पुण्य औदार्यादिगुणैः पवित्रो भावोभिप्रायो यस्य सः । अत एव[12] भवोपमः शंभुतुल्यः[13] ॥

---

१ **ए** अञ्जचलो°. २ **ए** °मैमुद्वि°. ३ **ए** °दाक पु°. ४ **ए** °ण्यपुण्यभावोप°. ५ **ए** रायां तायो. ६ **ए सी** °हेरुशक्.

---

१ **ए** व्योपलिंपैर्ने°. २ **सी** °लिपैर्न°. ३ **ए** °व्याद्रुव°. ४ **सी** नि × × × भात् । की°. ५ **ए** °दींपमा°. ६ **ए** चलैचलैः. ७ **सी** °लाचलै कै. **डी** °लाचलैः. ८ **ए** °षां स्यात्रा°. ९ **ए** °शरूक्. १० **ए** °षत एत द°. ११ **ए** °वो लदावा°. १२ **ए** °व भावो°. १३ **ए सी** °तुल्यं ॥ म्रा°.

ग्राहाणामप्यमारिं स धान्यांस्रावो धनास्रवः ।
प्रावर्तयद्धर्मनयो हर्षसंस्रावलोचनः ॥ ३४ ॥

३४. स कर्णो ग्राहाणामपि न केवलं स्थलचराणां जलचराणामपि मत्स्यादीनामप्यमारिं प्रावर्तयत् । कीदृक्सन् । हर्षेण पुत्रजन्मोत्थानन्देन संस्रावे जलं क्षरन्ती लोचने यस्य सः । तथा धर्मनयो धर्मस्य नायकोतिधार्मिक इत्यर्थः । अत एव धान्यांस्रावो मात्सिकादिषु धान्यानां दाता । तथा धनास्रवो द्रव्यदाता च ॥

अवहारालयागाधः सोवसायोपि सागसाम् ।
हर्षाश्रुसंस्रवोत्तानदृशो गुप्तिजुषोमुचत् ॥ ३५ ॥

३५. अवहाराणां जलचराणामालयोब्धिस्तद्वदगाधो गम्भीरः स कर्णो गुप्तिजुषः काराक्षिप्तान्नरानमुचत् । कीदृक् । सागसामपराधिनामवसायोपि क्षयकारोपि । कीदृशान् । अस्माकमधुना मोक्षो भावीति हर्षाश्रूणां संस्रवाः क्षरित्र्य उत्ताना आगामिमोचकनरदिदृक्षयोर्ध्वीभूता दृशो येषां तान् ॥

आश्वासाम्लायहरिणीप्रमोदाकर्णितं नृपः ।
निरन्तरायमभयं व्याधभूष्वप्यघोषयत् ॥ ३६ ॥

३६. नृपः कर्णो व्याधभूष्वप्याखेटकस्थानेष्वपीत्यर्थः । अभयं मरणभयाभावमघोषयत् । कीदृशम् । आश्वासाः स्वाभयश्रवणादुज्जीव-

१ ए सी °न्याम्रावो. २ ए °संश्राव°. ३ ए बी °संश्रवो°. ४ ए °शो मुक्ति°.

१ ए °मपि मा°. बी °ममा°. २ ए °संश्रावे. ३ बी °को धा°. ४ ए °न्याश्रावो. ५ ए °नाश्रवो. ६ बी °व्यस्य दा°. ७ सी °ता × × × तथागाधो. ८ बी संश्रवाः. सी संधवाः. ९ ए सी डी °योर्द्ध भू°. १० बी °ष्वप्यरण्येष्वपी°. ११ ए °दृशा । आस्वासाः. १२ सी आस्वासा स्वा°.

न्योत एवाम्लाया दृष्टा या हरिण्यस्ताभिः प्रमोदेनाकर्णितं तथा निरन्तरायमन्तरेत्यन्तरायो विघ्नस्तस्मान्निर्गतं प्रचण्डशासनत्वेन केनाप्य[1]-नुल्लङ्घ्यमित्यर्थः ॥

साहयैः[3] । सातयैः । वेदय । उद्देजयैः । चेतयैः । धारयैः । पारयैः । अत्र "साहि०" [५९] इत्यादिना शः ॥ अनुपसर्गादिति किम् ॥ उत्साहयितृभिः ॥

लिम्पैः[4] । विन्द । इत्यत्र "लिम्पविन्दः" [६०] इति शः ॥

निलिम्प[5] । गोविन्द । अरविन्द । इत्यत्र "निगवादेर्नाम्नि[6]" [६१] इति शः ॥

ज्वल ज्वाल । चलाचालैः । दव दावः[7] । नयः[8] नायः । भव भावः । ग्रह ग्राहाणाम्[9] । आस्रवः[10] आस्रावः[11] । अत्र "वा ज्वलादि०" [६२] इत्यादिना वा णः ॥

अवहार[12] । अवसायः । संस्राव । इत्यत्र "अवहृ०" [६३] इत्यादिना णः ॥

संस्रवेत्यपि[13] कश्चित् ॥

उत्तान । व्याध[14] । अन्तरायम् । आश्वास । अम्लाय । इत्यत्र[15] "तन्व्यधि०"[६४] इत्यादिना णः ॥

नर्तकीर्गाथिकाः[1] कान्त्या[2] रजकीर्नभसोदिशत्[3] ।
सोंहःखनक्याः श्रीदेव्या महाय सह गायनैः ॥ ३७ ॥

३७. स कर्णोंहःखनक्या अंहसि निष्पुत्रत्वादिके[16] पापे खनक्या विदारणशिल्पस्त्रीतुल्यायाः[17] श्रीदेव्या महायोत्सवार्थमदिशदाज्ञापयत्[18] ।

---

१ **सी** °गाथकाः. २ **ए** कान्त्याः र°. ३ **ए** °त् । सांहः°. **सी** °त् । साहः°.

---

१ **ए** °रायांम°. **सी डी** °रायंम°. २ **ए** °प्यमुल्ल°. ३ **ए** °यैः । सोतयैः । वद°. ४ **ए** लिपैः । वि°. ५ **ए सी डी** °लिम्पा । गो°. ६ **ए** °र्नाम्नाति°. ७ **ए सी डी** दाव । न°. ८ **बी सी डी** नय ना°. ९ **सी** °म् । स्र°. १० **ए** आश्रवः. ११ **डी** °वः । अ°. १२ **ए सी डी** °हारः । अ°. १३ **ए** संश्रवे°. **डी** संश्रावे°. १४ **ए** व्याधः । अ°. १५ **ए** इतत्र. १६ **ए** निष्पुत्र°. १७ **बी** °शिल्पिस्त्री°. १८ **ए** °दिवादा°.

का इत्याह । गायनैर्गीतशिल्पैर्नरैः सह नर्तकीर्नर्तनशिल्पा गाथिका गानशिल्पाश्च विलासिनीः । कीदृशीः । कान्त्याङ्गाभरणादिद्युत्या नभसो रजकीर्वस्त्रस्येव निर्मलीकारकत्वान्नानारागोत्पादनाद्वा रजकस्त्रीतुल्याः ॥

नर्तकीः । खनक्याः । रजकीः । अत्र "नृत्खन्०" [६५] इत्यादिनाकट् ॥

गाथिकाः । अत्र "गस्थकः" [६६] इति थकः ॥

गायनैः । अत्र "टनण्" [६७] इति टनण् ॥

प्रवकैः सरकैरापल्लवकै राजवल्लभैः ।
पुत्रनाम्न्युद्यतः सोभाद्धायनैर्नु सुहायनः ॥ ३८ ॥

३८. स कर्णः पुत्रनाम्नि पुत्रनामकरण उद्यतः सन् राजवल्लभैरन्तरङ्गपार्षद्यैः सहितोभात् । कीदृशैः । प्रवकैः पुत्रनामकरणोत्सवहर्षेण साधु प्रवमाणैस्तथा सरकैः सविलासं गच्छद्भिस्तथापल्लवकैर्हितत्वादापदां साधु छेदकैः । यथा सुहायनोखिलसस्यनिष्पत्तिहेतुत्वेन शोभनः संवत्सरः प्रवकैः साधूद्गच्छद्भिः सरकैः प्रसृमरैरापल्लवकैर्दुष्कालोच्छेत्तृभी राज्ञां वल्लभैर्हायनैर्व्रीहिभिर्भाति ॥

हायनः । हायनैः । अत्र "हः०" [६८] इत्यादिना टनण् ॥

प्रवकैः । सरकैः । लवकैः । अत्र "प्रुसृ०" [६९] इत्यादिनाकः ॥

गायन्त्यो वीरभूरन्तिवदसौ नन्दकोस्त्विति ।
नाम वृद्धाः कुमारस्य जयसिंहेत्यथ व्यधुः ॥ ३९ ॥

३९. अथ वृद्धाः कुलस्थविराः कुमारस्य जयसिंहेति नाम व्यधुः ।

---

१ **सी** °यन्यो वी°. २ **बी** °रतिव°. ३ **डी** °वदंसौ.

---

१ **ए** °दृशी । का°. २ **ए** °त्र भृत्ख°. ३ **ए** अव र्ग°. ४ **ए सी** °ल्लतैर°. ५ **ए** °रकै स°. ६ **ए सी डी** °लशस्य°. ७ **ए** °भनासं°. ८ **ए** °ल्लवोकैर्दु°. ९ **बी** कैदुष्का°. १० **बी** °च्छेतृभी.

किंभूताः सत्यः[1]। गायन्त्यः। कथमित्याह। वीरो भूयाद्वीरभू रंसीष्ट रन्तिः[2]। द्वन्द्वे वीरभूरन्ती महाराजविशेषौ। तद्वन्नन्दको[3] नन्दताद्वर्धतामित्याशास्यमानोस्त्विति। जयसिंहेतीत्यत्रानुकार्यानुकरणयोः स्याद्वादाश्रयणेनाभेदविवक्षायामर्थवत्त्वा[4]भावान्न नामसंज्ञेति न विभक्तिः॥

नन्दकः। अत्र "आशिष्यकन्" [७०] इत्यकन्॥

रन्ति। वीरभू[5]। अत्र "तिकृतौ[6] नाम्नि" [७१] इति तिकृच्च[7]॥

शिरोलाववदाकम्पकारं[1] तन्नाम[2] शुश्रुवुः।
दुर्गाण्यमण्डयंश्चारिभूमिपाला भयद्रुताः॥ ४०॥

४०. स्पष्टः। किं तु शिरोलाववद्यथा शिरश्छेदकस्य नामाकम्पकारं[8] भयजनकम्। तन्नाम जयसिंहेत्याख्याम्[9]। दुर्गाणि कोट्टानमण्डयन्नरचयन्॥

रक्षामरचयत्सूनोः[3] शेषभक्षैर्नृभिर्नृपः।
धर्मशीलैर्यशःकामैः शुभाचारैर्बहुक्षमैः॥ ४१॥

४१. नृपः कर्णः[10] शेषं बालभोजनादुद्धरितं[11] भक्षयन्ति तैः शेषभक्षैर्नृभिर्बालहारैः[12] कर्तृभिः सूनो रक्षामरचयदकारयत्[13]। किंभूतैः। यशःकामैरेकान्तेन[14] स्वस्वामिभक्ता[15] एत इत्यादियशोवादाभिलाषिभिरत एव धर्मं शीलयन्त्यभ्यस्यन्ति ये तैर्धर्मशीलैर्धार्मिकैरत[16] एव शुभाचारैः स्वस्वामिनोनुकूलमेवाचरद्भिस्तथा[17] बहु[18] क्षाम्यन्ति[19] ये तैर्बहुक्षमैः॥

१ बी °रं तंन्ना°. २ ए न्नामं शु°. ३ ए सी °नो शे°.

१ बी डी सन्त्यो गा°. २ ए रन्ति द्वंद्वे वी°. ३ सी °द्वन्ननन्दता°. ४ बी °र्थत्त्वा°. ५ ए सी डी °रभूः। अ°. ६ सी तिकृत्यौ ना°. ७ ए °तिकृ°. ८ बी °रं तथाकम्पकारं भ°. ९ सी डी °ख्या। दु°. १० ए सी °र्ण शे°. ११ ए °दुच्चरि°. १२ ए °भिबाल°. १३ ए °क्षानर°. १४ बी °मैरका°. १५ ए °क्ता इत्याभिय°. सी डी °क्ता इत्यादि°. १६ ए °शीलिधार्मि°. १७ सी °द्भिमस्त°. १८ ए बहुं क्षा°. १९ ए °म्यतिर्ये तै°.

सुखप्रतीक्षा धात्री तं वक्र[1]संगायसामगी ।
कुमारं रमयामासासुरापी[2] शीधुपीवियुक् ॥ ४२ ॥

४२. धात्र्युपमाता तं कुमारं रम[1]यामास । कीदृक्सती । असुराप्यमद्यपा । त[2]था शीधुपीवियुक् । मद्यपासङ्गरहिता । त[3]था सुखप्रतीक्षा यावत्कुमारस्य[4] सुखमुत्पद्यते तावत्प्रती[5]क्षमाणा । तथा कुमारस्य[6] सुखोत्पादनाय वक्रं गी[7]तविशे[8]षं संगायति वक्रसंगायी या सामगी मधुरं गायन्ती सा ॥

निर्व[9]र्त्यात् । आकम्पकारम् ॥ विकार्यात् । शिरोलाव ॥ प्राप्यात् । भूमिपालाः । अत्र "कर्मणो[10]ण् ॥" [७२] इत्यण् ॥ तन्नाम शुश्रुवुः । इत्यत्र प्राप्यात्कर्मणोनभिधानान्नस्यात् । तथा बाहुलकान्निर्वर्त्य[11]विकार्याभ्यामपि क्वचि[12]न्न स्यात् । रक्षामरचयत्[13] । दुर्गाण्यमण्डय[14]न् ॥

धर्मशीलैः । यशःकामैः । शेषभक्षैः । शुभाचारैः । सुखप्रतीक्षो[15] । बहुक्षमैः । अत्र "शीलिकामि०" [७३] इत्यादिना णः ॥

सामगी । इत्यत्र "गायः०" [७४] इत्यादिना[16] टक् ॥ अनुपसर्गादिति किम् । वक्रसंगाय ॥

सुरापी[17] । शीधुपी । इत्यत्र "सुरा०" [७५] इत्यादिना टक् ॥

स भूपपुत्रो ववृधे वीरहा[3]यः पराभवन् ।
तन्तुवायधान्यमायाभानिर्वो[4]र्वीशदासकान् ॥ ४३ ॥

---

१ सी °क्रोमाशुसा°. २ बी °पी सीधु°. ३ ए °हायप°. ४ ए °नित्पोर्वी°. सी डी °निवाधीश°.

---

१ ए °मयांनसे । की°. २ ए बी सी °था सीधु°. ३ ए °था मुख°. ४ ए सी °स्य × × मुखो°. ५ बी °तीक्ष्यमा°. ६ ए बी °स्य मुखो°. ७ बी °गीतिवि°. ८ ए °शेषसं°. ९ बी सी °र्वत्यात्. १० ए °मणाण्. ११ ए बी °र्वत्यवि°. १२ ए °चिभूस्यात् । पक्षामपच ··· दु°. १३ बी °यन् । दु°. १४ ए °यत् ॥ ध°. १५ ए °क्षा । अ°. १६ ए °ना दक्. १७ ए °पी । साधु°. बी सी °पी । सीधु°.

४३. स भूपपुत्रो ववृधे । कीदृक्सन् । वीरह्वायो[1] बालकयुद्धाय सुभटदारकान्सस्पर्धमाकारयंस्तथा तन्तुवायधान्यमायाभा[2]निव कुविन्दवणि[3]ग्बालकानिवो[4]र्वीशदारकान्पराभवन् ॥

भूप । इत्यत्र "आत०" [७६] इत्यादिना डः[5] । अह्वावाम इति किम् । वीरह्वायः[6] । तन्तुवाय । धान्यमाय[7] ॥

हरिर्गो[1]संख्यदायादो[2] गोप्याख्यो बाह्यभूमिषु ।
यथा तथैको रेमे स पथिप्रज्ञोरिभीप्रदः ॥ ४४ ॥

४४. स[8] कुमारो बाह्यभूमिषु सरस्वतीतटादिष्वेको रेमे । यथा गोसंख्या गोपाला[9] दायादा गोत्रिणो यस्य सः । तथा गोपीराख्यात्याचष्टे वा गोप्याख्यो गोपावस्थाः सन्नित्यर्थः । हरिर्बाह्यभूमिषु यमुनातटादि[10]ष्वेको रेमे[11] । यतः कीदृक्स हरिश्च[12] । पथिप्रज्ञः । प्राज्ञत्वान्मार्गज्ञस्तथारि[13]भीप्रदः शत्रुभयप्रदोतिपराक्रमीत्यर्थः ॥

गोसंख्य । इत्यत्र "समः[14] ख्यः" [७७] इति डः ॥

दायादः । गोप्याख्यः । अत्र "दश्चाङः" [७८] इति डः ॥

पथिप्रज्ञः । भीप्रदः । अत्र "प्रांद्[15] ज्ञश्च" [७९] इति डः ॥

क्रोशहः[3] सोरिहोक्रीडत्क्लेशापहतमोपहे ।
कुमारघाती गान्धार्यां[4] इव सारस्वते[5] तटे ॥ ४५ ॥

---

१ ए °रिस्यैसं°. २ ए °दाय:दो. ३ ए क्रोहः. ४ ए °तीर्गांधायां इ°. ५ ए °स्वमे त°.

---

१ ए °यो···यु°. २ बी °मार्याभा°. ३ ए °णित्पाल°. ४ सी डी °निवाधीश°. ५ बी° डः॥ आह्वा°. सी डी °डः॥ ह्वा°. ६ ए बी °ह्वाय। त°. ७ ए °माय: ॥. ८ ए स कुमा°. ९ सी गोघृता दा°. १० ए °तदादि°. ११ ए °मे । येन की°. १२ ए° रिश्चाप°. १३ ए °रिसीप्र°. १४ ए समाख्यः इति ज्ञः ॥ दाग्मदः, १५ ए बी सी प्राज्ञ°.

४५. स जयसिंहः[1] क्लेशापहतमोपहे महातीर्थत्वेन[2] रागद्वेषाभिनिवेशानामपहन्तर्यज्ञानस्यापहन्तरि[3] च सारस्वते तटेक्रीडत् । यथा गान्धार्याः[4] कौरवमातुः कुमारघाती कुमाराणां दुर्योधनादीनां हन्ता[5] भीमः सारस्वते तटे रेमे । भीमो हि[6] कौमारे कुरुक्षेत्रस्थायाः[7] सरस्वत्यास्तटे[8] बहुधा क्रीडितवान् । कीदृक्स भीमश्च । किंचिद्बाल्यातिक्रमेण[9] प्रौढत्वात्क्रोशं[10] हन्ति गच्छति[11] क्रोशहोत एवारीन् वध्यादित्याशास्यमानोरिहः ॥

शीर्षघाती पादघातैः[1] शतघ्न्यादि[2]भिः समैः[3] सह ।
सोभ्यास्यदरिषु क्षेप्तुं[4] पतिघ्नीमिव कन्यकाम् ॥ ४६ ॥

४६. यथा कश्चित्पतिघ्नीमपलक्षण[12]युक्तामित्यर्थः । कन्यकामरिषु क्षिपति विवाहेन[13] न्यस्यति तथा स कुमारः शतघ्न्यादिशक्तिप्रमुखं शस्त्रजातमरिषु क्षेप्तुमभ्यास्यत् । कैः सह । समैः[14] सवयोभटैः । कीदृक्सन् । शीर्षघाती पादघातश्चाभ्यासचिकीर्षया काष्ठमयशतघ्न्यादिशस्त्रेण वयस्यानामेव शीर्षाणि[15] पादांश्च[16] घ्नन् ॥

सोकृतघ्नैरजायाघ्नैरब्रह्मघ्नैर्नरैः[5] समम् ।
बाहुघ्नोरःकपाटघ्नो हस्तिघ्नो मल्लतां ययौ ॥ ४७ ॥

४७. हस्तिघ्नो बलिष्ठत्वाद्धस्तिनमपि हन्तुं शक्तः स कुमारो मल्लतां ययौ मल्लविद्याकुशलोभूदित्यर्थः । कीदृक्सन् । बाहुघ्नोरःकपाटघ्नो बाहु-

१ **बी** °तः सत°. २ **ए सी** °तघ्न्यादि°. ३ **ए** °समै स°. ४ **ए** क्षेपुं प°. ५ **ए** °घ्नैरब्रह्मघ्नैर्न°.

१ **ए** °सिंह क्ले°. २ **ए** °न······नि°. ३ **ए** °हतर्य°. **ए** हतरि अज्ञानस्यापहंतरि च. ४ **ए** °न्धार्या कौ°. ५ **ए** हय भी°. ६ **ए सी** हि कुमा°. ७ **ए** °स्थाया स°. ८ **ए** स्तदे ब°. ९ **सी डी** °ल्यादिक्र°. १० **ए** °क्रोशह°. ११ **ए** °च्छन्ति क्रो°. १२ **ए** °णमुक्ता°. १३ **ए** °हेव न्य°. १४ **ए** समै सेवयोभेदैः । की°. १५ **सी डी** शीर्षकाणि. १६ **सी डी** °दांश्चाघ्न°.

मुरःकपाटं च हन्तुं शक्तो बाहुयुद्धमुरोयुद्धं च कर्तुं शक्त इत्यर्थः । कैः सह । नरैः[1] सवयोभटैः समम् । किंभूतैः । अकृतघ्नैः सज्जनत्वात्कृतज्ञैस्तथाजायाघ्नैः पुण्यपुरुषत्वाच्छुभलक्षणोपेतैरित्यर्थः । तथाब्रह्मघ्नैर्धार्मिकत्वा[2]द्ब्राह्मणानघ्नद्भिः ॥ ज्ञापकज्ञापिता विधयो ह्यनित्या इत्युरःकपाटघ्नेत्यत्र कपाटान्तादपि परस्य हन्तेष्टक् ॥

अरिहः । अत्र "आशिषि[3] हनः" [८०] इति डः ॥ गतावपीति कश्चित् । क्रोशहः[4] ॥

क्लेशापहतमोपहे[5] । अत्र "क्लेश०" [८१] इत्यादिना डः ॥

कुमारघाती । शीर्षघाती । इत्यत्र[6] "कुमार०" [८२] इत्यादिना णिन् ॥

शतघ्नी । इत्यत्र "अचित्ते टक्" [८३] इति टक् ॥ अचित्त इति किम् । पादघातः ॥

अजायाघ्नैः । पतिघ्नीम् । अत्र[7] "जाया०" [८४] इत्यादिना टक् ॥

अब्रह्मघ्नैः[8] । अकृतघ्नैः । अत्र "ब्रह्मादिभ्यः" [८५] इति टक् ॥

हस्तिघ्नः । बाहुघ्न[9] । उरःकपाटघ्न(घ्नः) । इत्यत्र "हस्ति०" [८६] इत्यादिना टक्[10] ॥

व्यालान्नगरघातान्सोदमयत्र[1]स्तमीक्षितः[2] ।
राजघ्नैर्[3]नगरघ्नैर्[4]द्विड्[5]प्रेष्यैः[6] पाणिघताडघैः ॥ ४८ ॥

४८. स जयसिंहो नगरघातान्[11]मदोन्मत्तत्वेन[12] नगरोपद्रवकारिणो

१ बी °यत्रस्त°. २ ए सी °क्षित । रा°. ३ बी °जघ्नैर्न°. सी °जघ्नैर्न°. ४ सी डी °रघैर्द्वि°. ५ बी °घ्नैद्विट्°. ६ ए °द्विज्येष्टै पा°.

१ ए °रैः सह स°. २ ए °घ्नैधार्मि°. ३ ए °शिमिह°. ४ ए °शब्दः ॥ क्ले°. ५ ए °तनोप°. ६ ए °त्यत्रः कु° ७ ए °त्र काया°. ८ डी अकृ°. ९ बी सी °हुघ्नः ।अ°. १० ए °क ॥ व्योला°. ११ ए नवर°. १२ बी °दोत्कटत्वे°.

व्यालान्दुष्टगजानदमयत्खेदनादिना वशीचक्रे । कीदृक्सन् । द्विट्प्रेष्यैः[1] शत्रुचरैस्त्रस्तमेवंविक्रमोसावस्मत्स्वामिनो[2] नूनं पराभविष्यतीति[3] समयमीक्षितः । किंभूतैः । राजघैर्नृपान्[4] घ्नद्भिर्नगरघ्नैः पुराणि विनाशयद्भिश्चरकर्मणि निपुणैरित्यर्थः । एतैर्हि गुप्तचरप्रयोगेण राजानो नगराणि[5] च विश्वस्तान्यज्ञातं[6] घात्यन्ते तथा पाणिघताडघैरात्मगोपनाय[7] पाणिघताडघशिल्पिविशेषवेषधारिभिः[8] ॥

नगरघ्नैः । अत्र "नगरादगजे"[9] [८७] इति टक् ॥ अगज इति किम् । नगरघातान् ॥

राजघैः । इति "राजघः" [८८] इति निपात्यम् ॥

पाणिघताडघैः । अत्र "पाणिघ०"[10] [८९] इत्यादिना[11] पाणिताडाभ्यां[12] कर्मभ्यां[13] पराद्धन्तेष्टक् घादेशश्च निपात्यः ॥ पाणिना[14] ताडेन हन्तीति करणादपि केचित् ॥

रोदः:कुक्षिंभरिः[1] कीर्त्या दानैर्दीनोदरंभरिः ।
अनात्मंभरितां[2][3] भेजे पूजार्हो[4] कर्णनन्दनः ॥ ४९ ॥

४९. कर्णनन्दनः पूजार्हो[15] सर्वलोकप्रशस्यामनात्मंभरितां[16] भेजे । अनेकलोकाधारोभूदित्यर्थः । कीदृक्सन् । दानैर्दीनोदरंभरिर्व्याधिदौर्गत्याद्युपद्रुतानामुदरपूरकोत[17][18] एव कीर्त्या रोदःकुक्षिंभरिः ॥

१ ए रोदकु°. २ बी °भरतां. ३ ए °रिता भे°. ४ ए °जार्हा क°.

१ ए सी द्विप्रेष्यैः. २ ए मेव विक्रमोंभाव° ३ ए °मिना नू°. ४ ए °न् घद्भि°. ५ ए °णि वि°. सी डी °णि विश्ववि°. ६ ए सी डी °स्तानाज्ञा°. ७ ए सी °त्मनोप°. ८ ए °ताडिघ°. ९ ए °गरजे. १० सी °णिभय इ°. डी °णिता°. ११ ए इयादि°. १२ ए °णितोडा° १३ बी सी °भ्यां प°. १४ सी °ना बाडे°. १५ ए °जार्हा स°. १६ ए °भरतां°. १७ ए °भरव्याधि°. १८ बी °धिदौर्ग°.

कुक्षिंभरिः । अना[1]त्मंभरिताम् । उदरंभरिः । अत्र "कुक्षि°" [९०] इत्यादिना खिः ॥

पूजार्हाम् । अत्र "अर्हाच्" [९१] इत्यच् ॥

लाङ्गलग्रहतुल्येस्मिन्पूर्णाकर्षघटग्रहे ।
धनुर्ग्रहे धनुर्ग्राहः कोभूदृष्टिग्रहश्च कः ॥ ५० ॥

५०. अस्मिन्कुमारे धनुर्ग्रहे सति को धनु[2]र्ग्राहोभूत्कश्च ऋष्टिग्रह[3]ः खड्गग्राह्यभून्न कोपीत्यर्थः । कीदृशे । लाङ्गलग्रहतुल्ये महाबलत्वाद्धलभद्रसमे । अत एवाकृष्यतेनेनाकर्षो धन्वाभ्यासयन्त्रं[4] यत्र भृत[5]घटादिना संबद्ध[6]प्रान्ता रज्जुराकृष्य[7]ते पूर्णनाकर्णान्तं[8] प्राप्तंगुणेनाकर्षेण घटग्रहस्तस्मिन् । धनुर्धरा हि स्थापितपूर्वा[9] दा[10]र्ढ्याद्यर्थं कोदण्डचतुर्भुजाख्यधनुर्वे[11]दो[12]क्त[13]स्वरूपा[14]न्तःशुषिरस्तम्भ[15]यन्त्रच्छिद्रस्थां लालितपूर्वा[16] दार्ढ्याद्यर्थं[17] वरु[18]रुचिधनुर्वेदोक्तस्वरूपोष्ट्रपृष्ठाकारकाष्ठयन्त्रच्छिद्रस्थां[19] च रज्जुबद्धग्रीवा[20]वालुकादिभृतघटादिना संबद्धप्रा[21]न्तां रज्जुमाकर्णान्तमाकर्षन्ति यावद्घटादि वामहस्तनिकटं स्यात् ॥

यष्टिग्रहः शक्तिग्रहः सोसिधेनुत्स[1]रुग्र[2]हः ।
तोमरग्रह आसीत्पट्टित्रिंशदण्डग्रहोपि वा ॥ ५१ ॥

१ डी °त्सराग्र°. २ ए सी °ग्रहाः ।.

१ सी डी °नात्मभ°. २ बी °नुग्राहो°. ३ बी °हः षड्ग°. ४ ए °त्रं यंत्र. ५ ए °त यदादि°. सी °तयः दादि°. ६ ए °बद्धप्रा°. ७ ए °राष्य°. ८ सी °र्णान्तप्रा°. ९ ए सी डी °पूर्वा दा°. १० ए बी दाल्याद्य°. ११ डी °नुर्भुजाख्यधनुर्वे°. १२ ए° दोकुरू°. १३ सी डी °क्तरू°. १४ ए °पाम्भःशु°. १५ ए °षिरंस्तभय°. १६ ए °पूर्वाळ्याद्य°. सी °पूर्वाढ्याद्य°. डी °पूर्वादा°. १७ सी °र्थं तरुरुचिर्धनु°. १८ ए वरःरु°. १९ ए °द्रस्तां च रणुज्जु°. २० बी °ग्रीवावा°. २१ ए सी °प्रान्तार°.

५१. स्पष्टः । किं तु यष्टिर्दण्डः[1] । त्सरुं मुष्टिं गृह्णाति त्सरुग्रहः । असिधेनोः[2] खड्गस्य त्सरुग्रहोसिधेनुत्सरुग्रहः । तोमरं[3] शर्वला । वा यद्वा किं बहुनोक्तेनेत्यर्थः । षट्त्रिंशद्दण्डग्रहोप्यासीत् । दण्डानायुधानि गृह्णाति[4] सामान्येन वाक्यं कृत्वा ततो विशेषेण[5] षट्त्रिंशता दण्डैर्दण्डग्रहः स्वपोषं पुष्णातीतिवत् । षट्त्रिंशद्दण्डाश्चैते[6] । चक्र १ धनुः[7] २ वज्र ३ खड्ग ४ क्षुरिका ५ तोमर ६ कुन्त[8] ७ त्रिशूल ८ शक्ति ९ परशु[9] १० मक्षिका ११ भल्लि[10] १२ भिन्दिमाल १३ मुष्टि १४ लुण्ठि[11] १५ शङ्कु १६ पाश १७ पट्टिश १८ ऋष्टि १९ कणय २० कम्पन २१ हल २२ मुशल २३ गुलिका २४ कर्तरी २५ करपत्र २६ तरवारि[12] २७ कुद्दाल २८ दुस्फोट २९ गोफणि ३० डाह ३१ डच्चूस ३२ मुद्गर[13] ३३ गदा ३४ घन ३५ करवालिका ३६ इति ॥

शिक्षासूत्रग्रहो व्याले तथासीत्सोङ्कुशग्रहः[1] ।
यथा शशधरास्या न त्रेसुरम्भोघटीग्रहाः ॥ ५२ ॥

५२. स जयसिंहो व्याले दुष्टगजेपि तथा गाढमर्मतोदनादिवशी-[14]कारप्रकारेणाङ्कुशग्रह आसीद्यथाम्भोघटीग्रहाः[15] पानीयहारिकाः शशधरास्या नायिका[16] न त्रेसुः । यतः कीदृशः[17] । सूत्रं गृह्णाति[18] पाठार्थाव-

१ ए °सीसोङ्कु°.

१ ए °ण्डः । सरुमु°. २ ए °सिवेनो ख°. ३ **बी** °रं सर्वरा । वा. **डी** °रं सर्वला. ४ **बी** °ण्डानां बुद्वानि गृह्णातीति. ५ **बी** °शेषणं । ष°. **सी** °शेषण. ६ ए °ण्डाश्चतो । च°. ७ **सी** धनु २. ८ ए कुम्भ ७. ९ **सी डी** °शु १० गक्षि°. १० **सी डी** °ल्लि १२ कुद्दाल १३ भि°. ११ **सी** लुटि १६ श°. १२ **सी** °रि २८ दुस्पोट. **डी** °रि २८ दुःस्पोट. १३ **सी** मुडर. १४ **बी** °मैनोद°. १५ ए आशीद्यर्थाभोघ°. **बी** आशीद्य°. १६ **सी डी** नायका. १७ **बी** °दृक् । सू°. १८ **बी** °ह्णातीति.

गमाभ्यासमादत्ते[1] सूत्रग्रहः शिक्षायाः पालिकाप्यादि[2]गजशिक्षाशास्त्रस्य[3] सूत्रग्रहः ॥

धनुर्धरो दण्डधारः कर्णधारस्तरीमिव ।
दुष्टाश्वान्कवचहरोवाहयत्स मनोहरः ॥ ५३ ॥

५३. स्पष्टः । किं तु दण्डधारः कशायष्टिं धारयन्सन्नवाहयद्वाह्या-[4]लिकायामभ्रमयत् । कवचहरस्तरुण इत्यर्थः । अत एव मनोहरः । यथा चौराद्युपद्रवरक्षार्थं[5] धनुर्धरः कवचहरश्च कर्णधारो निर्यामको दण्डधारः[6] कूपस्तम्भधारी संस्तरीं[7] वेडां समुद्रे वाहयति ॥

स विद्यांशहरः पुष्पाहराणां समदर्शयत् ।
दृप्तेऽस्त्रहारे[1] शक्तिं स्वां सर्पे विषहरीमिव ॥ ५४ ॥

५४. स कुमारोऽस्त्रहारे[8] वरुणादिदैवतशस्त्रधरेत एव दृप्ते दर्पिष्ठे शत्रौ विषये स्वां शक्तिं प्रतिपक्षदैवतास्त्र[9]प्रेरणरूपं विद्याबलं समदर्शयत् । यथा सर्पे विषये[10] विषहरीं[11] विषहरीति यथार्थाभिधानां मणिं स समदर्शयत् । यतः स पुष्पाहराणां[12] पुष्पाहरणशीलानां विद्याधराणां विद्यांशहरो विद्यया कृत्वांशहरो गोत्री ॥

धनुर्ग्रहे। दण्डग्रहः[13] । त्सरुग्रहः । लाङ्गलग्रहः(ह)। अङ्कुशग्रहः । ऋष्टिग्रहः । यष्टिग्रहः । शक्तिग्रहः । तोमरग्रहः । घटग्रहे । "नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्" [न्या० १६.] इति घटीग्रहाः। अत्र "धनुर्द०" [९२] इत्यादिनाच् ॥ अणपीत्येके धनुर्ग्राह इति चोदाहरन्ति ॥

---

१ डी °प्तेस्त्रहा°.

---

१ ए सी °भ्यासद°. बी भ्यासाद°. २ बी डी पालिका°. ३ ए °शिष्याशा°. ४ डी °द्वाहालि°. ५ ए °र्थं चनु°. ६ ए °रः कप°. ७ बी °रीं वेडां. ८ बी °रे वारु°. ९ बी °क्षदेव°. १० सी °षयं विपहरीति. ११ ए °हराति य°. १२ बी पुष्फाहारा°. १३ ए °हः । शरग्र°.

सूत्रग्रहः । अत्र "सूत्राद्धारणे" [९३] इत्यच् ॥

धनुर्धरः । अत्र "आयुध०" [९४] इत्यादिनाच् ॥ आदिग्रहणात् शशधर[2] ॥ अदण्डादेरिति[3] किम् । दण्डधारः । कर्णधारः ॥

वयसि । कवचहरः[4] ॥ अनुद्यमे[5] । अंशहरः[6] । मनोहर(रः)[7] । अत्र "हृगः" [९५] इत्यादिनाच् ॥ संज्ञायां टोपीति[8] कश्चित् । विषहरीम् । वयोनुद्यम इति किम् । अस्त्रहारे ॥

पुष्पाहराणाम् । अत्र "आङः शीले"[10] [९६] इत्यच् ॥

संरेभे नाल्पसारे स सागस्यपि महामनाः ।
हरिर्नाथहरिर्न[1] ह्युत्पतेदृतिहरौ शुनि ॥ ५५ ॥

५५. स कुमारो महामना महेच्छः सन्सागस्यपि सापराधेप्यल्पसारे स्तोकबले शत्रौ न[11] संरेभे नाभिषेणनाद्याटोपं चक्रे । दृष्टान्तमाह । हि[12] यस्मान्नाथं प्रभुं[13] समर्थं गजादिं[14] हरति विदार्यात्मसमीपं प्रापयति नाथहरिर्हरिः[15] सिंहो दृतिहरौ खल्लस्यापहर्तरि शुनि विषये नोत्पतेन्न[16] विदारणाय फालां दद्यात् ॥

दृतिहरौ[17] । नाथहरिः । अत्र "दृति०" [९७] इत्यादिना–इः ॥

अमलग्रहिचेताः स गुरुपादरजोग्रहिः ।
सेवनीयः[2] सतां जज्ञे फलेग्रहिरिव[3] द्रुमः ॥ ५६ ॥

---

१ **ए** शुनिः ॥. २ **ए** °नीय स. ३ **ए** °ग्रहेरिव द्रुमा ॥

---

१ **बी** सूत्रद्धा°. २ **बी** °धरः । अ°. ३ **ए** अडाडादे°. ४ **बी** °हरं । अ°. ५ **ए** °मे । असह°. ६ **ए सी** °हर । म°. ७ **बी** °हरं । अ°. ८ **डी** हृगेत्या°. ९ **ए** °यां येपी°. **डी** °यांमपी°. १० **ए सी** आडाशी°. ११ **ए** न सरे°. १२ **बी सी डी** हिर्यस्मा°. १३ **ए** प्रभुस°. १४ **ए सी** °जादि ह°. १५ **ए** °हेरिं सिं°. १६ **बी** °त्पतते°. १७ **ए** °रौ । माथ°.

५६. फलेग्रहिर्द्रुम इव फलिततरुरिव स सतां सेवनीयो जज्ञे । कीदृक् । न मलग्रहि पापपङ्किलं चेतो यस्य सोत एव गुरुपादरजोग्रहिर्विनीतत्वात्प्रणामकाले पूज्यानां पादधूलिं गृह्णन् ॥

रजोग्रहिः । फलेग्रहिः । मलग्रहि । इत्यत्र "रजः०" [९८] इत्यादिना-इः ॥

मुनिर्देवापिवातापिजिच्छरत्समये यथा ।
यथा स्तम्बकरिर्व्रीहिः स तदासीत्तथोदयी ॥ ५७ ॥

५७. स जयसिंहस्तदा तस्मिन्यौवनकाल उदय्युदित आसीत् । यथा देवापिवातापिजिद्दैत्यत्वाज्जिगीषया देवानाप्नोति देवापिर्यो वातापिरेवंनामा दैत्यस्तज्जेता मुनिरगस्त्यः । यदि पुनर्देवापिरप्यगस्त्येन जितः कश्चिद्दैत्योभूत्स मम न प्रसिद्धः । यथा स्तम्बकरिस्थुडक्कृद्व्रीहिश्च शरत्समय उदय्युद्गतः स्यात् ॥ अगस्त्येन हि विप्रोपद्रवकारी वातापिर्दैत्यः संस्कृतपशुरूपः श्राद्धे भक्षयित्वा निर्जरित इति प्रसिद्धिः ॥

यथा शकृत्करिं बाला वत्सं स्वच्छन्दचारिणम् ।
यत्करं तत्करं वा तमन्वयुः किंकरास्तथा ॥ ५८ ॥

५८. किं कुत्सितं कर्म कुर्वन्ति किंकराः सेवकास्तं कुमारं तथान्वयुर्यथा शकृत्करिं विष्ठाकारिणं वत्सं बालाः कौतुकेनानुयान्ति । कीदृशं सन्तम् । तं वत्सं स्वच्छन्दचारिणमत एव यत्स्वमनोभीप्सितं करोति यस्तं

१ ए सत्तदा°. २ ए °था द्राकुक्करिं. बी °था सक्रु°. ३ डी °त्करिर्बाला.

१ ए °ग्रहेर्दुद्रु°. सी °ग्रहिदुद्रु° २ सी °क् सन् । मूल°. डी °क् सन् । म°. ३ ए मलिग्र°. ४ सी डी पापं पङ्कि°. ५ ए °ङ्किले चे°. ६ सी °स्य सन् तथा गु°. डी °स्य सन तथा गु°. ७ ए °त व. ८ ए सी °गस्येन क°. ९ ए °था करिस्तुड°. १० सी °व्रीहिंश्च. ११ ए करणहाका°. १२ ए °यद्वा श°. १३ सी डी °त्करं वि°. १४ ए °दृशसतं तव°. १५ बी °म् । व°. १६ ए यस्वमनाभी°.

यत्करं तदन्याभीप्सितं करोति य[1]स्तं[2] तत्करं वा । यद्रोच[3]ते तत्कुर्वाणमित्यर्थः ॥

कीर्[1]तेर्बहुकरो यच्छन्स्वमसंख्याकरोर्थिषु ।
त्रिकरोभूत्पु[2]मर्थेषु तेजसा सोत्यहस्करः ॥ ५९ ॥

५९. स जयसिंहस्त्रीन्करोति त्रि[4]करोभूत् । केषु विषये । त्रिकर इति विशेषाकाङ्क्षायां पुमर्थेषु धर्मार्थकामेषु । धर्मार्थकामांस्त्रीनपि यथावसरं सिषेव इत्यर्थः । कीदृशः । असंख्याकरो मया कियद्दत्तमिति गणनामकुर्वन्सन्न[5]र्थिषु[6] स्वं द्रव्यं यच्छंस्तथा तेजसा कृत्वात्यहस्करोत एव की[7]र्तेर्ब[8]हुकरः । बहुशब्दोत्र गुणवचनो गुणिवचनश्च । बहुत्वं बह्वीं वा प्र[9]भूतां कुर्वन् ॥

निशा[3]करकुलोत्तंसः सोतिभास्करजः सदा ।
प्रभाकरो[4]द[5]ये तातं दिवाकरमिवान[6]मत् ॥ ६० ॥

६०. स्प[10]ष्टः । किं त्वतिभास्करजो भास्करजो मनुः कर्णो वा न्यायदानादिगुणैस्तावतिक्रान्तोत एव निशाक[11]रकुलोत्तंसः ॥

स्ववंशादिकरौ प्रीतौ क्षपाकरविभाकरौ ।
एष भक्तिकरोकार्षीच्चित्र[7]कर्या गुणश्रिया ॥ ६१ ॥

---

१ **सी डी** कीर्तिबहु°. २ **ए** °त्पुनर्थे°. ३ **सी** °शावरकलो°. ४ **ए** °रोवये. ५ **सी** °दये ता°. **डी** °दये तां दि°. ६ **ए** °नसत्. ७ **बी** °त्रकार्या.

---

१ **सी डी** यस्तत्क°. २ **ए** °स्तं यत्करं तदन्याभीप्सितं करोति यस्तं तत्करं वा ।. ३ **ए** °चत त°. ४ **ए** त्रिकारोभूष्केषु. ५ **ए** °न्नर्थिषु. ६ **ए सी डी** °षु स्वद्र°. ७ **सी डी** कीर्तिबहु°. ८ **बी** °हु बहुत्वं. ९ **ए** प्रसूतां. १० **ए** स्पष्टा किं. ११ **सी** °रकलो°.

६१. एष जयसिंहः पूज्येषु भक्तिकरः संश्रित्रकर्याश्चर्यकारिण्या गुणश्रिया कृत्वा क्षपाकरविभाकरौ प्रीतावकार्षीत् । किंभूतौ । स्ववंशादिकरावात्मीयवंशस्यादिकरावात्मीयप्रथमजन्मकर्तारौ । इलो नाम राजा सूर्यवंश्यः स च मृगयार्थमुमावनं प्रविष्टः सन्नुमाशापात्स्त्रीत्वं प्राप । सा च स्त्री बुधेन सोमवंश्येनोढा । ततो यावान्वंश उत्पन्नस्तावतः सर्वस्य द्वावपि सोमसूर्यावादिकरौ घटेते ॥

अन्तकरे कर्तृकरे क्षणदाकरशेखरे ।
अभूद्बलिकरो नान्दीकरः कारकरश्च सः ॥ ६२ ॥

६२. स जयसिंहः क्षणदाकरशेखरे शंभौ विषयेभूत् । कीदृग् । बलिकरः पूजोपहारकारको नान्दीकरो द्वादशविधतूर्यवादक इत्यर्थः । कारकरश्च कारस्य नमस्कारादिक्रियायाः कर्ता च । कीदृशे । अन्तकरे जगत्संहारकारके तथा कर्तारं क्रियाकारकं पुरुषं करोति कर्तृकरस्तस्मिन् । ईश्वरेण हि कर्ता क्रियते । यदुक्तम् ।

अन्यो जन्तुरनीशः स्यादात्मनः सुखदुःखयोः ।
ईश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव वा ॥ इति ।

एतेनास्य जगत्सृष्टिरपि सूचिता ।

मृत्योर्लिपिकरः पत्रं तस्याकाण्डेप्युदक्षिपत् ।
यस्मिन्बाहुकरः सोभूदरुष्करधनुष्करः ॥ ६३ ॥

१ ए °शेषरे. २ ए °कर का°.

१ ए °र्यकरि°. २ ए °रादात्मी°. ३ बी °स्यादिः प्र°. ४ ए °करप्र°. ५ सी °रादात्मी°. ६ ए °श्येवोढा. ७ ए °करो घ°. ८ ए °शेषरे. ९ ए °कर पू°. १० ए कर्ता च. ११ ए °व···ति ॥. डी °व च ॥ इ°.

६३. स जयसिंहो यस्मिन् शत्रौ विषयेभूत् । कीदृक् । बाहुकरो बाहुमुपचाराद्बाहुकार्यं शौर्यं कर्ता । तथारुष्करोस्त्रव्रणकर्ता यो [1]धनुष्करो [2]धनुर्ग्रहीतेत्यर्थः । सोरुष्करधनुष्करश्च तस्य पत्र[3]ममुकोद्यात्रानेय इति [4]वर्णोपेतं [5]पत्रं पर्णं [6]मृत्योर्लिपिक[7]रः पारिग्रहिकश्चित्रगुप्तोकाण्डेप्युदक्षिपदु-[8]र्घटति स्मास[9]मयेपि स मृत इत्यर्थः ॥

रणे क्षेत्रकराञ्जङ्घाकरान्कुर्वन्नभूच्च सः ।
नाम्नो लिबिकरो दोषाकरे दिनकरोपमः ॥ ६४ ॥

६४. स जयसिंहो दोषाकरे चन्द्र आधारे नाम्नो लिबिकरो लेखकोभूच्च । कलङ्कव्याजेन चन्द्रप्रशस्तिपट्टिकायां स्वनाम लिलेखे-त्यर्थः । यावच्चन्द्रस्तावदसौ जगत्त्रयेपि प्रसिद्धनामाभूदिति परमार्थः । यतः कीदृक् । रणे युद्धार्थं[10] क्षेत्रकरा[11]न्व्रणभूमिरचकान्दोर्बलावलेपात्स-ङ्ग्रामारम्भिणः परानित्यर्थः । जङ्घाकरान्पराजया[12]ज्जङ्घाकर्मणः पला-यनस्य कर्तॄन्कुर्वंस्तथा दिनकरोप[13]मः प्रतापादिना ॥

[1]कर्णः क्ष्मादिवसकरस्तं नेत्ररजनीकरम् ।
अन्येद्युराजुहावाथ भक्त्यनन्तकरं सुतम् ॥ ६५ ॥

६५. स्पष्टः । किं तु दिवसकरः सूर्यः । अनन्तामपर्यवसानां करो-[14]त्यनन्तकरो [15]भक्तेरनन्तकरो [16]भक्त्यनन्तकरस्तम् ॥

देवापि । वातापि । इत्यत्र "देव०" [९९] इत्यादिना-इः ॥

---

१ ए °र्णो क्ष्मा°.

---

१ सी °नुर्गृही°. २ बी डी °नुर्गृही°. ३ ए °मनुकोत्राद्यात्राने°. ४ सी °पेतपर्णं. ५ ए पर्णं. डी पत्रं मृ°. ६ ए °त्योर्लिपि°. ७ बी °रः परिग्राहि° ८ डी °त्पठति. ९ ए °मयोपि. १० ए °र्थं क्षत्र°. ११ डी °रान्तृण°. १२ ए °याज्जंघाक°. १३ ए सी °पम प्र°. १४ बी °त्यन्नन्त. १५ डी भक्तय°. १६ ए भक्तान°. सी भक्ष्यन°.

शकृत्करिं[1] वत्सम् । स्तम्बकरिर्व्रीहिः[2] । अत्र "शकृत्०"[3] [१००] इत्यादिना-इः ॥ किंकराः । यत्करम् । तत्करम् । बहुकरः । अत्र "किं०" [१०१] इत्यादिना-अः ॥ संख्याकरः । त्रिकरः । अहस्करः[4] । दिवाकरम्[5] । विभाकरौ । निशाकर । प्रभाकर । भास्करे[6] । चित्रकर्या । कर्तृकरे । आदिकरौ । अन्तकरे । अनन्तकरम् । कारकरः । बाहुकरः । अरुष्कर[7] । धनुष्करः । नान्दीकरः[8] । लिपिकरः । लिबिकरः[9] । बलिकरः । भक्तिकरः । क्षेत्रकरान् । जङ्घाकरान् । क्षपाकरं[10] । क्षणदाकर । रजनीकरम्[11] । दोषाकरे । दिनकरं[12][13] । दिवसकरः । अत्र "संख्या०" [१०२] इत्यादिना टः ॥

आज्ञाकरो हर्षकरः[1] कुमारोपि पितुस्ततः ।
भेजे सेवाकरः[2] पादान्समस्याश्लोककारवत्[3] ॥ ६६ ॥

६६. ततः कुमारोपि पितुः पादान्भेजे[14] समस्याश्लोककारवत् । समस्यते मील्यते[15] पादैः[16] "शिक्यास्य०" (?) इत्यादिना ये समस्या । अपरिपूर्णच्छन्दःपूरणायैकपादाद्युच्चारणम्[17] । तथा श्लोककारोनुष्टुप्कर्ता[18] यथा पादान् श्लोकचतुर्थांशान्[19]सेवते समस्यापूरणायाश्रयति । कीदृक्सन् । पितुः सेवाकरः सेवाकरणशीलो विनीत इत्यर्थः । तथाज्ञाकर आदेशकरणेनुकूलोत एव हर्षकरः[20] प्रमोदकरणे[21] हेतुः ॥

सूत्रकारावैरकारैर्मन्त्रकारैः स संवदन् ।
साहाकलहकारं तं राजेति पदकारवाक् ॥ ६७ ॥

---

१ **ए सी** °कर कु°. २ **बी** °करं पा°. ३ **ए** °रत्.

---

१ **ए सी डी** °त्करि व°. २ **ए सी** °रिव्रीहिः. ३ **सी** शत्. ४ **ए** अस्क°. ५ **ए सी डी** °रः । वि°. ६ **बी** °र । श्वित्र°. ७ **बी सी डी** °ष्करः । ध°. ८ **ए** नादीक°. ९ **ए बी डी** लिविक°. १० **सी डी** °करः । क्ष° ११ **ए** °र । दो°. १२ **सी** दिव°. १३ **बी** °करे दि° **डी** °करः दि. १४ **ए** °जे सेनस्या°. १५ **ए डी** °ते पदैः. १६ **सी** पादै शि°. १७ **सी** °कपूर्णपा°. **बी** °कपदा°. १८ **ए सी** °ष्टुष्कर्ता. १९ **ए** °तुर्थशा°. **डी** °तुर्द्धांशा°. २० **डी** हर्षक. २१ **सी डी** °रणहे°.

६७. स राजा कर्णोकलहकारं[1] कलिवर्जितं तं कुमारमिति वक्ष्यमाणरीत्याह स्म । कीदृक्सन् । पदकारस्येव[2] वैयाकरणस्येव वाग् यस्य स वाग्मी तथा मन्त्रकारैर्मन्त्रिभिः सह संवदंस्तदनुमतिं गृह्णन्नित्यर्थः[3] । यतः किंभूतैः । सूत्रकारैर्नीतिसूत्रकारिभिः[4] शुक्रादिभिः सहावैरकारैस्तत्कृत[5]-नीतिसूत्रपाठान्न कलहायमानैर्नीतिज्ञैरित्यर्थः[6] ॥

गाथाकारैः शब्दकारैरचाटुकारवृत्तिभिः ।
मुनिभिर्भूभद्रकारक्षेमकारप्रियंकरैः ॥ ६८ ॥

क्षेमंकरा भद्रंकरा प्रियकारी च कीर्तिता ।
वृत्तिः कर्मकरीभूतद्विषां मत्पूर्वजन्मनाम् ॥ ६९ ॥

तेषां तु मद्रकाराणां[1] यथा मद्रंकरोभवम्[2] ।
पूर्वतीर्थंकरपथेनान्यतीर्थंकरो यथा ॥ ७० ॥

६८-७०. हे कुमार कर्मकरीभूतद्विषां मत्पूर्वजन्मनां मदीयपूर्वजानां वृत्तिर्न्यायेन[7] पृथ्वीपालनादिरूप आचारो मुनिभिः कीर्तिता प्रशंसिता । यतः किंभूता । क्षेमंकरा बाह्यशरीरस्य[8] धनकनकादे रक्षा[9] क्षेमं तत्कर्त्री तथा[10] भद्रंकरान्तरस्याङ्गस्य[11] रक्षा भद्रं तत्कर्त्री तथा प्रियकारी च सर्वलोकवाञ्छितानां कर्त्री च । किंभूतैः । गाथाकारैः कविभिस्तथा शब्दकारैर्वैयाकरणैस्तथा[12] न चाटुकारी वृत्तिर्येषां तैर्निःस्पृहैरपीत्यर्थः[13] । तथा भूभद्रकारक्षेमकारप्रियंकरैः सर्वथा पृथ्व्यां[14] हितैरित्यर्थः ।

---

१ ए °द्रकराणां मथा. २ **सी** मद्रक°.

---

१ ए °कलेव°. **बी** कलहव°. २ ए °कारास्ये वै°. ३ ए °त्यर्थ । य°. ४ ए °रैनीति°. ५ **सी डी** सह वै°. ६ **डी** °नैर्निति°. ७ ए °त्तिन्याये°. ८ ए °ह्यस्य श°. ९ ए रकक्षा. १० **डी** °था भद्रं°. ११ ए °ङ्गस्यं रक्ष भ°. १२ ए °रैर्वैयाकरणैःस्त°. १३ ए °त्यर्थ तथभूतभ°. १४ ए °ध्व्या हतै°.

मत्पूर्वजा महामुनीनामपि श्लाघ्या अभूवन्नित्यर्थः । मद्रकाराणां क्षेमकाराणां तेषां पूर्वजन्मनां यथा तु पृथ्वीन्यायपालनादिरूपमार्गेण कृत्वा पुनरहमपि मद्रंकरः सर्वलोककल्याणकार्यभवं यथा पूर्वतीर्थंकरपंथेन प्रथमार्हदुपदिष्टदयामूलमार्गेणान्यतीर्थकरोपरोर्हन्मद्रंकरः स्यात् ॥

अथ विधेयमाह ॥

तीर्थकारव्रती मेघंकरर्तौ नु भयंकरे ।
मुक्ताहारविहारोहमृर्तिकराभयंकरः ॥ ७१ ॥
प्रयते मुक्तये चेत्त्वं प्रियंवद वशंवदः ।
द्विषंतपमिदं राज्यं तद्गृहाण परंतपः ॥ ७२ ॥

७१,७२. हे प्रियंवदानुकूलवादिन् कुमार चेत्त्वं वशंवदो वशं वदसि यदहं बच्मि यदि तन्मन्यस इत्यर्थः । तदा त्वं द्विषंतपमिदं राज्यं गृहाण । यतः परंतपोतिप्रतापित्वाच्छत्रुसंतापको राज्यधुराधरणक्षम इत्यर्थः । अहं तु मुक्तये प्रयत उद्यच्छामि । कीदृक्सन् । ऋतिं स्थण्डिले गतिं सत्यतां वा करोमि ऋतिंकरो योभयंकरः सर्वजीवानां मृत्युभयाभावस्य कर्ता सः । तथा मुक्ताहारविहारस्त्यक्तभोजनविचरणः । यथा तीर्थकारव्रत्यार्हतो मुनिर्ऋतिंकराभयंकरोत एव भयंकरे महावृष्ट्यां भीषणे मेघंकरर्तौ वर्षाकालेनेकजीववधाशङ्कया मुक्ताहारविहारः सन्मुक्तये प्रयतते ॥

१ सी तीर्थंकर°. २ सी डी °करार्त्तौ नु. ३ ए °रर्तौ नु. ३ ए °रोयमृ°. ४ सी °मृतक°. डी °मृतंक.

१ ए सी श्लाघा अ°. २ डी °णां ते°. ३ ए सी डी °था नु पृ°. ४ सी °तीर्थक°. ५ ए सी डी °पदेन. ६ बी °लधर्मरूपमा°. ७ ए °मारे चे°. ८ सी डी °च्मि त°. ९ ए दातुं द्वि°. १० सी ऋत स्थ°. डी ऋतं स्थ°. ११ सी ऋतक°. डी ऋतंक°. १२ ए मृत्यभ°. ए °निरतिं°. १३ बी °निऋतिं°. सी °निऋतंक. १४ डी °ऋतंकरो भ°. १५ सी °ष्ट्यादिभी°. डी °ष्ट्यादिभी°.

हेतौ । ह[1]र्षकरः । तच्छीले । सेवाकरः । अनुकूले । आज्ञाकरः । अत्र "हेतु०" [१०३] इत्यादिना टः ॥ शब्दादि[2]निषेधः किम् । शब्दकारैः । श्लोकका[3]र । कलहकारम् । गाथाकारैः[4] । वैरकारैः । चाटुका[5]र । सूत्रकार । मन्त्रकारैः । पदकार ॥

कर्म[6]करी । इत्यत्र "भृतौ कर्मणः" [१०४] इति टः ॥

क्षेमंक[7]रा । क्षे[8]मकार । प्रियंकरैः । प्रियकारी । मद्रंक[9]रः । म[10]द्रकाराणाम् । भद्रंक[11]रा । भद्रकार । इत्यत्र[12] "क्षेम०" [१०५] इत्यादिना खाणौ ॥ एभ्य इति किम् । ती[13]र्थकरः । हेत्वादिषु टः ॥ ती[14]र्थंकर तीर्थंकार इत्यपि कश्चित् ॥

मेघंकर । ऋ[15]तिंकर । भयंकरे । अ[16]भयंकरः । अत्र "मेघर्ति०" [१०६] इत्यादिना खः ॥

प्रियंव[17]द । वशंवदः । अत्र "प्रिय०" [१०७] इत्यादिना खः ॥

द्विषंतपम् । परंतपः । इत्ये[18]तौ "द्विषंतप०" [१०८] इत्यादि[19]ना निपात्यौ ॥

जयन्[1]कुमारः शान्त्यर्षीनल्पंपचमितंपचान् ।
नखंपचयवागूं नु वाचमूचे रुजाच्छिदम् ॥ ७३ ॥

७३. कुमारो नखंपचयवागूं नु अत्युष्णप्राणामिव [20]रुजाच्छि[21]दं कष्टच्छेदि[22]नीं[23] निःस्पृहतान्तरङ्गभक्तियुक्तिबन्धुरतयाह्ला[24]दिकामित्यर्थः ।

१ **ए** °यकुमा°.

१ **ए डी** हर्षक°. २ **ए** °दिनेषे°. ३ **सी डी** °कारः । क°. ४ **ए डी** °रैः । चा°. **सी** °रै । चा°. ५ **ए** °कारः । सू°. ६ **डी** °मेकारी. ७ **ए** °कराः । क्षे°. ८ **ए** क्षेमंकरः । प्रि°. **सी डी** क्षेमंकर. ९ **ए सी डी** °कर । म°. १० **ए सी** मद्रंका°. **डी** °मद्रंकरा°. ११ **डी** °कर । भ°. १२ **ए** °त्र क्षम°. १३ **सी** तीर्थंक°. १४ **सी** तीर्थक°. १५ **सी डी** ऋतंक°. १६ **सी** अत्र. १७ **ए सी डी** °वदः । व°. १८ **बी** °त्येतो द्वि°. १९ **ए** °ना न नि°. २० **ए** रुचाछि°. २१ **बी** °छिद्रं क°. २२ **सी** °च्छेदनी निस्पृ°. २३ **ए** °दिनी निः°. २४ **बी** °ल्हादका°.

वाचमूचे । नखंपचयवागूरपि पथ्यत्वाद्रोगच्छित्स्यात् । यतः कीदृक् । शान्त्येन्द्रियजयेनाल्पंपचमितंपचान् । अल्पशब्दोत्र परिमाणविशेषवाचकः । अल्पं पचतो मितं स्तोकं पचतश्च गाढतपोनिष्ठानपीत्यर्थः । ऋषीन् जयन् ॥

अल्पंपच । मितंपचान् । नखंपच । इत्यत्र "परिमाण०" [१०९] इत्यादिना खः ॥

कूलंकषेशगम्भीर वक्तुं नाहं त्वयीश्वरः ।
न करीषंकषा वात्या प्रभुरभ्रंकषे गिरौ ॥ ७४ ॥

७४. हे कूलंकषेशगम्भीर समुद्रवदलब्धमध्य त्वयि विषये नाहं वक्तुमीश्वरः समुद्रगम्भीरत्वात्तव । दृष्टान्तमाह । अभ्रंकषेत्युच्चैस्त्वाद्व्योमस्पृशि गिरौ विषये करीषंकषा वात्याल्पत्वाच्छागण(?)रजउच्छालिका वात्या वातौघो न प्रभुश्चालनाद्यर्थे न समर्थः स्यात् ॥

कूलंकषा । अभ्रंकषे । करीषंकषा । इत्यत्र "कूलाभ्र०" [११०] इत्यादिना खः ॥

को मां सर्वंकषः प्राहाभक्तं विश्वंभरापते ।
सर्वसहोपि यत्त्वं भूबलिंदमैवमादिशः ॥ ७५ ॥

७५. स्पष्टः । किं तु सर्वंकषः खलः । हे भूबलिंदम भूमौ पालकत्वाद्विष्णो । एवं राज्यं गृहाणेति दुष्टादेशप्रकारेण ॥

शत्रुंतपशत्रुंसहधनंजयसमः स्वयम् ।
करोतु राज्यं तातोर्थिप्रदत्ताब्धिपतिंवरः ॥ ७६ ॥

---

१ ए त्वमीश्व°. २ ए सी °कथा वा°. ३ ए °कष प्रा°.

---

१ बी °पचाय°. २ ए सी °यनये°. ३ ए °पचितो. ४ ए °स्त्वाव्योमस्पशि. ५ सी डी °मस्पर्शि गि°. ६ बी °षाल्प°. ७ °उत्सालि°. ८ सी °घो नु प्र°. ९ ए किं तुः स°.

७६. अर्थिभ्यो याचकेभ्यः प्रदत्ताब्धेः पतिंवरा कन्या लक्ष्मीर्येन स तथा संस्तातः स्वयं राज्यं करोतु । यतः शत्रुंतपशत्रुंसहौ कौचिन्नृपौ धनंजयोर्जुनस्तैः समः । बलप्रतापादिप्रकर्षेणाद्यापि राज्यधुराधरणक्षम इत्यर्थः ॥

रथंतरकलालाप वसुंधरापुरंदर ।
ब्रूहि तन्मे यदागस्त्वां भगंदर इवादुनोत् ॥ ७७ ॥

७७. स्पष्टः । किं तु हे रथंतरकलालाप रथं तरत्युल्लङ्घते रथेन वा तरत्युल्लङ्घते पाठकं रथस्थैर्यं न पठ्यत इत्यर्थः । रथंतरं साम तद्वन्मधुरध्वने । आगोपराधः । भगंदरो रोगविशेषः ॥

[सर्वंकषः ।] सर्वंसहः । अत्र "सर्वात्सहश्च" [१११] इति खः ॥

विश्वंभरा । पतिंवरा । धनंजय । रथंतर । शत्रुंतप । बलिंदम । शत्रुंसह । इत्यत्र "भृवृ०" [११२] इत्यादिना खः ॥ केचित्तु रथेन तरति रथंतरं सामेत्यकर्मणोपीच्छन्ति ॥

वसुंधरा । इत्यत्र "धारेर्धर्च" [११३] इति खः–धर(र्) इत्यादेशश्च ॥

पुरंदरभगंदरशब्दौ "पुरंदर०" [११४] इत्यादिना निपात्यौ ॥

योग्यमानी ममायोग्यंमन्यस्य स्नेहतोसि चेत् ।
राजवाचंयम तथापीत्याज्ञा मेङ्गमेजया ॥ ७८ ॥

७८. राजा सन्वाचंयम ऋषिस्तदा मनसा ऋषीभूतत्वात् । हे राजवाचंयमासि त्वं स्नेहतोपत्यस्नेहाच्चेद्यद्यप्ययोग्यंमन्यस्य राज्यानर्हमात्मानं मन्यमानस्य मम योग्यमानी मां राज्ययोग्यं मन्यसे तथापी-

१ **ए सी** °करालाप. २ **ए सी डी** °दरः. ३ **डी** °गस्त्वा भ°. ४ **ए** राजा वा°.

१ **ए** °तपःसत्रुंसहै कौ. **सी** °तपःसत्रुं°. २ **सी** °मः धनाप्र°. **डी** °मः धनप्र°. ३ **बी सी** °करालाप. ४ **ए** सर्वोत्स°. ५ **ए** °जयः।. ६ **ए सी** °त्य वृवृ°. ७ **बी** °वृत्या°. ८ **ए** °र्धच्च इ°.

त्याज्ञा राज्यं गृहाणेत्यादेशो मेङ्गमेजया शरीरं कम्पयित्री राज्यधुराधरणक्षमेणापि पित्रास्मै भयाद्राज्यं दत्तमित्यादिलोकापवादवज्रपातहेतुत्वेन मयि महाभयोत्पादयित्रीत्वात् ॥

वाचंयम । इति "वाचं०" [११५] इत्यादिना निपात्यम् ॥

योग्यमानी । इत्यत्र "मन्याण्णिन्"[1] [११६] इति णिन् ॥

अयोग्यंमन्यस्य । इत्यत्र "कर्तुः खश्" [११७] इति खश् ॥

अङ्गमेजया[2] । इत्यत्र[3] "एजेः"[4] [११८] इति खश् ॥

मुधैवास्यंधयी दृष्ट्या माता तत्र स्तनंधये ।
पुष्पंधयचलः सीमोज्झेद्यः कूलंधयौघवत् ॥ ७९ ॥

७९. तत्र स्तनंधये[5] मातास्य[6] पुत्रस्य प्रसादेन वयं सुखिनो भविष्याम इत्यनुरागाद्दृष्ट्या मुधास्यंधयी मुखपायिका[7] मुखालोकिकेत्यर्थः । यः पुष्पंधयचलो भ्रमरवच्चपलस्वभावः सन् कूलंधयौघवत्कूलघातकप्रवाह इव सीम मर्यादां पितरि सति राज्याग्रहणरूपा[8]मुज्झेद्यः[9] पितरि सति राज्यं गृह्णीयादित्यर्थः ॥

शुनिंधया मुञ्जंधया ये वरं तेपि न न्वहम् ।
वचो नाडिंधमं[1] नाडिंधयं श्रोतेति तापकृत् ॥ ८० ॥

८०. ये शुनिंधयाः कुकु(कु)[10]रास्तथा ये मुञ्जं तृणविशेषं धयन्ति पिबन्ति खादन्तीत्यर्थः[11] । मुञ्जंधया मृगास्तेपि वरं श्रेष्ठा अहं न्वहं

१ बी डी °मं माडिं°.

१ सी °ति णन ।. डी °ति णन्. २ बी °जय इ°. ३ ए °त्र परिरिति. ४ सी एरिति. ५ बी °ये पुत्रे मा°. ६ सी डी °स्य प्र°. ७ सी डी °पायका. ८ डी पुस्तके समासे—उज्झेदित्यत्र दोंच् छेदने सप्तमी यात्—इति लिखितम्. ९ सी डी °ज्झेद्यदि पि°. १० ए सी डी कुकुरा°. ११ बी °दयन्ती°.

पुनरिति पूर्वोक्तं राज्यं गृहाणेति वचः श्रोता सन्न वरं न श्रेष्ठः । यतः कीदृशम् । तापकृदसुखकरमत[1] एव नाडिंधमं शिराणां संतापकं तथा नाडिंधयं संतापातिरेकोत्पादेन शिराणां ग्रासकम् । एतद्धि वचः-श्रवणं पितर्यभक्तिसूचकं तच्चाहं[2] कुर्वाणः श्वादिभ्योपि निकृष्टस्तेपि[3] हि स्वमातापित्रोर्भक्ताः[4][5] स्युरित्यर्थः ॥

घटिंधममुष्टिंधमनासिकंधमनिस्त्रपाः[1] ।
लुभ्यन्ति पितृराज्येतिवातंधयखरिंधयाः[2][3] ॥ ८१ ॥

८१. पितृराज्ये लुभ्यन्ति । के[6] क इत्याह । घटिंधमा दर्दरवादका मुष्टिंधमा मुष्टिवादका भण्डविशेषा एवं नासिकंधमा[7] अपि तद्वन्निस्त्रपा निर्लज्जा नरास्तथा निर्विवेकताद्यतिशयेन वातंधयान्सर्पान्मृगान्वा खरिंधयांश्च[8][9] गर्दभानतिक्रान्ताश्च ॥

नासिकंधयमुष्टिंधयाम्बास्तनघटिंधयः[4][5][6] ।
अहं तेद्यापि शिष्योस्मि नैतद्वातंधमं वचः ॥ ८२ ॥

८२. हे ताताद्याप्यहं ते शिष्योनुशास्यः शिक्षणीयोस्मि वर्ते यतो नासिकंधयी स्नेहातिरेकान्मदीयनासाचुम्बिनी मुष्टिंधयी मन्मुष्टिचुम्बिनी[10] याम्बा माता तस्या यौ स्तनौ ताभ्यां घटिंधयो घटतुल्यस्तनपायीत्यर्थः[11] । क्षीरकण्ठ[12] इति वाक्यार्थः । क्षीरकण्ठो हि शिक्षणीयः[13] स्यात् । एतद्वचः शिष्योस्मीति वचनं वात[14] इव वातः फल्गुरर्थस्तं धमति वक्ति वातंधमं नास्ति सत्यमेवेदं वच इत्यर्थः ॥

१ **ए** °पाः । तुल्यन्ति. २ **ए** °वातिध°. ३ **ए बी सी** °धया । पि. ४ **ए** नाशिकं°. ५ **ए सी** °यान्धास्त°. ६ **बी** °धयाः ।

१ **ए सी** °कम°. २ **ए सी** तन्वाहं. ३ **बी** °पि स्व°. ४ **ए** मात्रापि°. ५ **सी** °भक्तया स्यु°. ६ **डी** के इ°. ७ **ए** नाशिकं°. ८ **सी** °धयाअ ग° **डी** °धयाश्च. ९ **ए** °यांअ ग°. १० **ए** °न्मुष्टि चुंविनी. **सी डी** °न्मुष्टिं चु°. ११ **बी** °पानील°. १२ **डी** °कण्ठो हि. १३ **सी डी** °णीय स्या°. १४ **ए** वात इ°.

खरिंधमो नु दुग्धार्थी पश्चात्तापा[1]त्करंधमः ।
भुवः [2]करंधयः सन्स्यां त्वयि पाणिंधयः सति ॥ ८३ ॥

८३. त्वयि सति राज्यधुराधौरेये[1] विद्यमानेपि पाणिंधयो बालकः सन् यदि भुवः करंधयो राजग्राह्यभागग्राही राजाहं स्यां तदा पश्चात्तापाद्राज्यप्रतिपालनानलंभूष्णुत्वाद्युत्थात्किं मया तदा पि[2]ता प्रव्रजन्न निवारित इ[3]ति रूपात्करंधमो हस्तयोर्म[4]र्दकः स्यां यथा दुग्धार्थी दुग्धपानमिच्छन्नरः खरिंधमो गर्द[5]भीं दुहन्सन् पश्चात्तापात्करौ मृद्नाति महाकष्टदो[6]ह्यत्वाद्दोहनेपि दुग्धस्यातिविरसत्वेनापेयत्वात् ॥

पाणिंधमै[3]र्महामात्रैः कुञ्जरैः कूलमुद्रुजैः ।
कूलमुद्वहसिन्धूर्मिरयैर्गोभिर्व[4]हंलिहैः ॥ ८४ ॥
रथैरभ्रंलिहैर्हैमाबहुंतुदयुगैरपि ।
[5]द्विषामरुंतु[6]दैर्भृत्यैस्ति[7]लानां नु तिलंतुदैः ॥ ८५ ॥
तैर्ललाटंतपैः शत्रोर्यशोविधुविधुंतुदैः ।
श[8]र्धंजहान्नसंपुष्टैर्वेगवातमजैर्हयैः ॥ ८६ ॥
दारैरसूर्यपश्यैश्चेरंमदद्युतिभूषणैः ।
अनु[9]ग्रंपश्य किं मे चेन्न पश्येयं तवाननम् ॥ ८७ ॥

८४–८७. अ[7]नुग्रं[8]पश्य सौम्यविलोकक चेत्तवा[9]ननमहं न पश्येयं

---

१ **सी डी** °पाकरं°. २ **ए** करिंध°. ३ **ए** °धममहा. ४ **ए** °वंहलि°. ५ **ए** द्विषां म°. ६ **सी** °तुदैः । तै°. ७ **ए डी** °स्तिलांनां. ८ **सी डी** °द्युभू°. ९ **ए सी डी** °नुग्रप°.

---

१ **बी** °ये त्वयि वि°. २ **ए** °तानन्न°. ३ **बी** इत्यरू°. ४ **ए** °मेदकः. ५ **ए सी डी** °दंभी दु°. ६ **सी डी** °दोहितेपि. ७ **ए** अमुग्रं°. ८ **सी डी** °ग्रं सौ°. ९ **डी** °नम°.

तदा मे पार्णिधमै[1]र्हस्तिनामुपशा[2](सा)न्त्वनाद्यर्थं पृष्ठाघातेन पार्णिं वादयद्भिः । हस्ति[3]शिक्षानिपुणै[4]रपीत्यर्थः । महामात्रैर्हस्तिपकैः किं न किंचि[5]दित्यर्थः । तथा कूल[6]मुद्रुजैर्मदोन्मत्तत्वान्नदीतटोत्पा[7]टकैः कुञ्जरैः किम् । तथा गोभि[8]र्वृषैः किम् । किंभूतैः । कूलमुद्वहा[9]या नद्या आकूलं जलपूर्णत्वेन तटस्पर्शिन्यो याः सिन्धूर्मयो नदीकल्लोलास्तद्वद्रयो वेगो येषां तैः । तथा वहंलिहैर्जातिस्वभावाज्जिह्वया स्कन्धान्स्पृशद्भिः । तथा रथैरपि किम् । किंभूतैः । अभ्रंलिहैरुच्चैस्त्वाद्व्योम स्पृ[10]शद्भिः । तथा हैमानि स्वर्णमयानि यान्यबहुंतुदानि मृदुत्वात्स्थूलत्वादिगुणोपेतत्वान्न बह्वतिशयेन[11] तुदन्ति वृषाश्वादिस्कन्धान्पीडयन्ति[12] युगानि येषां तै[13]र्है[14]माबहुंतुदयुगैः । तथा भृत्यैः किम् । किंभूतैः । तिलानां तिलंतुदैर्नु यथा तिलंतुदा[15] घञ्चिकाः काका वा तिलानाम[16]रुंतुदाः[17] पीडकाः[18] स्युरेवं द्विषामरुंतुदै[19]र्मर्माविद्भिः । तथा हयैः[20] किम् । कीदृशैः । तैः सुजात्यत्वादिना प्रसिद्धैस्तथा[21] शत्रोररिर्जातैर्ललाटंतपैः[22] प्रतापित्वात्संतापकैरत एव शत्रोर्यशोविधुविधुंतुदैः कीर्तिचन्द्रे राहुभिः[23] । तथा शर्धंजहा[24] माषा यान्यन्नानि भक्ष्याणि[25] तैः पुष्टैस्तथा वेगवातमजै[26]र्वेगेन वातमजैर्मृगैरिव । तथा दारैः किम् । कीदृशैः । असूर्यंपश्यै[27]रतिगुप्तस्थानस्थत्वात्सूर्यमप्यपश्यद्भिस्तथेरया जलेन माद्यतीरंमदो विद्यु[28]त्तस्येव द्युतिर्येषां तानि भूषणानि येषां तैः ॥

---

१ ए °मैहस्ति°. २ डी °शान्तना°. ३ ए °स्तिनि शि°. ४ ए °पुणैः र°. ५ ए किंचदि°. ६ ए °लवुद्रु°. ७ बी °त्पादकैः. ८ बी सी °भिवृषैः. ९ ए सी डी °हा नद्याकू°. १० ए द्भिः । स्त°. ११ बी °न तुंद°. १२ ए डन्ति. १३ डी तैर्हैमा°. १४ ए °बहुतु°. १५ ए °दा घञ्चि. १६ डी °मरुतु°. १७ सी दाः स्यु°. १८ ए °काः स्फुरेव द्वि°. १९ ए °मैमाविं°. २० डी हयै कि°. २१ सी था वेगतमजैर्मृगैरिव ।. २२ बी °जातिर्ल°. २३ ए °भिः । स्त°. २४ डी माषयोन्य°. २५ ए भक्षाणि. २६ डी °जैर्मृ°. २७ ए °श्यैरिति°. २८ डी द्युततस्ये°.

शुनिंधयाः । स्तनंधये । मुञ्जंधयाः । कूलंधय । आस्यंधयी । पुष्पंधय । इत्यत्र "शुनीस्तन०" [११९] इत्यादिना खश् ॥ ट्वित्कारोङ्यर्थः । आस्यंधयी ॥

नाडिंधमम् । नाडिंधयम् । घटिंधम । घटिंधयः । खरिंधमः । खरिंधयाः । मुष्टिंधम । मुष्टिंधय । नासिकंधम । नासिकंधय । वातंधमम् । वातंधय । इत्यत्र "नाडी०" [१२०] इत्यादिना खश् ॥

पाणिंधमैः । करंधमः । अत्र "पाणिकरात्" [१२१] इति खश् ॥ पाणिकरा(द्र)ट्वेरपीति कश्चित् । पाणिंधयः । करंधयः ॥

कूलमुद्रुजैः । कूलमुद्वह । इत्यत्र "कूलाद्०" [१२२] इत्यादिना खश् ॥

वहंलिहैः । अभ्रंलिहैः । अत्र "वह०" [१२३] इत्यादिना खश् ॥

बहुंतुद । विधुंतुदैः । अरुंतुदैः । तिलंतुदैः । अत्र "बहु०" [१२४] इत्यादिना खश् ॥

ललाटंतपैः । वातमजैः । शर्धंजह । इत्यत्र "ललाट०" [१२५] इत्यादिना खश् ॥

असूर्यंपश्यैः । अनुग्रंपश्य । इत्यत्र "असूर्य०" [१२६] इत्यादिना खश् ॥

इरंमद । इत्ययम् "इरंमदः" [१२७] इति निपात्यः ॥

प्रियंभविष्णुर्योऽन्यो वाढ्यंभविष्णुर्वदेदिति ।
अप्रियंभावुकोनाढ्यंभावुकः सोपि मे मतः ॥ ८८ ॥

८८. अन्यस्त्वत्त इतरः । त्वं तु पितृत्वाद्यद्यपि तदपि वदन्मम पूज्य एवेति भावार्थः । अपरस्तु य इति पितृराज्यं गृहाणेति वदेत् ।

---

१ सी °विष्णुं वदे°. २ ए डी °ष्णुवदे°. ३ डी ममतः.

---

१ ए °निंवयाः. २ सी °धया । कू°. डी °धयोः । कू°. ३ ए धयः । आ°. सी डी °धया । आ°. ४ सी डी °त्र नी°. ५ ए सी डी °धयम् । घ°. ६ सी धरयः । मु°. ७ ए सी डी °धयः । मु°. ८ ए सी डी °धमः । मुष्टिंधयः । ना°. ९ ए सी °धयः । वा°. १० ए °धमः । वा°. सी °धमम् । नासिकंधय । वा°. डी °धय । इ°. ११ ए करिंध°. १२ सी °धम । अ°. १३ सी डी खश । पा°. १४ सी °धयम् । कू°. १५ डी °जैः । कूलमुद्रुजैः । कू°. १६ ए कूलद्. १७ डी अभ्रलि°. १८ बी बहेत्या°. १९ सी डी °पश्यै । अ°. २० सी डी °ना इ°. २१ ए सी °द्यपि. डी °द्यपि. २२ बी °र्थः । प°.

कीदृक्सन् । प्रियंभविष्णुर्वल्लभीभवन्नाढ्यंभविष्णुर्वैश्वरीभवन्वा । सोपि स्वमनसा प्रियीभवन्नप्याढ्यीभवन्नपि वा पुमान्मे न प्रियोप्रियो भवेत्य-प्रियंभावुकोनाढ्यंभावुको दरिद्रीभवंश्च मतस्तस्याहमप्रसन्नः सर्वस्वापहा-रकश्च स्यामित्यर्थः ॥

पलितंभावुकः स्थूलंभावुकान्धंभविष्णुधीः ।
कर्मैतदनुमेने को नग्नंभावुकनिन्दितः ॥ ८९ ॥

८९. कोमात्यादिरेतत्कर्म मयि राज्यदानरूपां क्रियामनुमेने । कीदृक्सन् । पलितंभावुकः पलितमस्यास्ति । अभ्रादित्वादः [७.२.४६] । अपलितः पलितो भवन्नतिवृद्धोत एव स्थूलंभावुको(का)तीक्ष्णा सूक्ष्मा-र्थानभिज्ञात एवान्धंभविष्णुः कार्याकार्यविचाराशक्तत्वादन्धीभवन्तीव धीर्यस्य स तथात एव च नग्नंभावुकनिन्दितो बालकैरपि जुगुप्सितः ॥

अन्धंभावुकपलितंभविष्णुरपि कः सुतम् ।
प्रौढमप्येककं मुञ्चेन्नग्नंभविष्णुबालवत् ॥ ९० ॥

९०. स्पष्टः । किं त्वन्धंभावुकपलितंभविष्णुरपि विशेषणकर्मधारये अतिवृद्धोपि । प्रौढमपि वयसा गुणैश्च समर्थमप्येककमेकाकिनं सुतं कः पिता मुञ्चेत् । यथा नग्नंभविष्णुमतिलघुत्वेन वस्त्रापरिधाय-कत्वान्नग्नीभवन्तं बालं न कोपि मुञ्चति ॥

---

१ ए कर्मैत°. २ डी नग्नभा°. ३ ए सुतीम्.

---

१ डी °न्नपीयीभ°. २ ए सी °प्यायीभ°. ३ डी °मान्म न. ४ डी °यो भ°. ५ ए सी डी °वन्प्रियं°. ६ ए बी °सन्न स°. ७ ए °मन्यास्ति. ८ ए °वन्निति. ९ ए °त्वार्दधीभ°. १० बी °न्ती धी°. ११ डी बालुकै°. १२ सी त्वन्धेभा°. डी त्वधं भा°. १३ सी डी °वुकःप°. १४ सी डी तं क पि°. १५ सी डी °भवं बा°. १६ ए °पि वस्त्र°.

सुभगंभावुकः स्थूलंभविष्णू[1] राज्यसंपदम् ।
सुभगंकरणीं[2] स्थूलंकरणीमपि नार्थये ॥ ९१ ॥

९१. अहं राज्यसंपदं नार्थये नेच्छामि । कीदृशीम् । असुभगः[1] सुभगः क्रियतेनया तां सुभगंकरणीमपि[2] । अपिरत्रापि योज्यः । सौभाग्यहेतुमपि तथा स्थूलंकरणीमपि यथेच्छभोज्यसंपत्त्योपचयहेतुमपि यतोहं सुभगंभावुकः पूज्यपादप्रसादात्सर्वलोकानां वल्लभीभवंस्तथा स्थूलंभविष्णुरुपचितीभवंश्च । यद्यस्य न स्यात्स तत्प्रार्थयते । अहं तु युष्मत्पाद[3]प्रसादेन राज्यसंपदं विनापि सुभगः[4] स्थूलश्चेतीमां नेच्छामीत्यर्थः ॥

ऊचे स्मितेन सुभगंभविष्णु द्योतयन्नभः ।
आढ्यीभवितृ[3]बुद्धिं[4] तं प्रियंकरणवाग्नृपः[5] ॥ ९२ ॥

९२. नृपः कर्णं आढ्यीभवितृबुद्धिं स्फीतीभवन्मतिं कुमारं सुभगंभविष्णु युक्तियुक्तत्वान्मधुरत्वाच्च मनोहारि यथा स्यादेवमूचे । कीदृक्सन् । स्मितेन पुत्रसद्भक्तिवाक्यश्रवणोत्थानन्दोद्भवेन हास्येन नभो द्योतयंस्तथा[5] प्रियंकरणवागाह्लादिक[6]वाणीकः ॥

यथोचे तथाह ॥

पलितंकरणी नग्नंकरण्यन्धंकरण्यथ ।
अनाढ्यंकरणी बुद्धेर्जराप्यङ्गं ग्रसिष्यते[6] ॥ ९३ ॥

---

१ डी °विष्णु रा°. २ सी डी °रणीस्थू°. ३ डी °वितुबु°. ४ ए °तृषुद्धिं त प्रि°. ५ ए °वान्नृपः. ६ बी °ष्यति । हे.

---

१ डी °गः क्रि°. २ ए णीयम°. ३ बी °ष्मत्प्रसा°. ४ ए °भगस्थूलःश्चे°. ५ सी द्योतंस्त°. ६ ए बी °ह्लादिकावा°.

९३. हे कुमार जरा[1]प्यङ्गं ग्रसिष्यते । कीदृक्सती । पलितंकरणी पलितहे[2]तुस्तथा नग्नंकरण्यचैतन्यस्योत्पादयित्रीत्वात्परिधानासं[3]ग्राहहे[4]तुर[5]थ त[6]थान्धी(न्धं)करण्यान्ध्यहेतुस्तथा बुद्धेः कर्मणोनाढ्यंकरणी क्षयहेतुः ॥

तया नग्नीकरण्या तत्स्वं ज्ञो नग्नीकरोतु कः ।
आ[1]शितंभवमात्रर्द्ध्या कश्चेच्छेदाशितंभवम् ॥ ९४ ॥

९४. तत्त[7]स्माद्धेतोर्नग्नीकरण्या त[8]या जरया कृत्वा ज्ञः पण्डितः सन्कः स्वं नग्नीकरो[9]तु । ननु ज्ञातमेवेदं [10]यज्जरा नग्नीकरोति । परमेवंविधा [11]राज्यश्रीः कथं मुच्यत इत्या[12]ह । आशितंभव[13]माशितस्य भवनं तृप्तिं कश्चेच्छेत् । क[14]याकृत्वाशि[15]तस्तृप्तो भवत्यनेनाशितंभवं तदेवाशितंभवमात्रं स्वर्गापवर्गश्रीणामपेक्षयातितुच्छत्वेन भोजनमात्रतुल्या या ऋद्धी [16]राज्यश्रीस्तया । तस्मादहं स्वर्गापवर्गौ साधयिष्यामीत्यर्थः ॥

नग्नंभ[17]विष्णु । नग्नंभावुकः(क) । पलितंभविष्णुः । पलितंभावुकः । प्रियंभवि[18]ष्णुः । अप्रियंभावु[19]कः । अन्धंभविष्णु । अन्धंभावुकः(क) । स्थूलंभविष्णुः । स्थूलंभावुकः(क) । सुभगंभविष्णुः (ष्णु) । सुभगंभावुकः । आढ्यंभविष्णुः । अनाढ्यंभा[21]वुकः । अत्र "नग्न०" [१२८] इत्यादिना खिष्णुखुकञौ । अच्वेरिति किम् । आढ्यीभवितृ ।

नग्नंकरणी । पलितंक[22]रणी[23] । प्रियंकरण । अन्धंकरणी । स्थूलंकरणीम् ।

१ **सी** आसिंतं°. **डी** आसितं°.

१ **ए** °रापायं ग्रसिप्पगे । की°. २ **ए** °तुतथा. ३ **ए सी डी** °संगाह°. ४ **सी डी** °तुरेव त°. ५ **ए** °रव त°. ६ **ए** °थान्त्वकरणीयं आन्ध्य°. **सी डी** °थाधंक°. ७ **ए** °त्तसमद्धे°. ८ **डी** °या कृ°. ९ **डी**° तु । ज्ञा°. १० **डी** यज्ञरा. ११ **ए** राज्य क°. **सी डी** राज्या कथमु°. १२ **ए** °ह । अशि°. १३ **सी** °मात्रं स्य. १४ **सी डी** °या त्वा. १५ **ए** °ततृप्तो. १६ **ए** राजश्री°. १७ **ए** °विष्णुः । नग्नभा°. **सी डी** °विष्णुः । पलितंभा°. १८ **ए** °विष्णु । प्रियभा°. **सी** °विष्णुं प्रि°. **डी** °विष्णुः । प्रि°. १९ **डी** °वुक । अ°. **सी** °वुकः । स्थू°. २० **ए बी सी** °विष्णुः । अ°. २१ **सी डी** °वुक । अ°. २२ **सी** °रण । अ°. २३ **डी** °णी । पलितंकरण । प्रि°.

सुभगंकरणीम्[1] । अनाढ्यंकरणी । इत्यत्र "कृगः०" [१२९] इत्यादिना खनट्[2] ॥ अच्वेरिति[3] किम् ॥ नग्नीकरोतु तया कः ॥ केचिच्व्यन्तपूर्वादपि[4] खनटमिच्छन्ति[5] । नग्नीकरण्या तया ॥

आशितंभवम् । आशितंभव[6] । इत्यत्र "भावे च०" [१३०] इत्यादिना खः ॥

भुजंगमेशोरुभुजं[1] देवं भुजगतल्पगम् ।
भुजंगजिद्विहंगाङ्कं[2][3] विहगेन्द्रप्रभाम्बरम्[4] ॥ ९५ ॥
सुगीकृतस्वर्गदुर्गं तावद्ध्यातुं[5] क्षणो मम ।
न जरोरंगमी[6] यावद्दशेदात्मविहंगमम्[7] ॥ ९६ ॥

९५,९६. यावज्जरोरंगमी जरैव मृत्युहेतुत्वात्सर्पिण्यात्मविहंगममात्मानमेवानियताश्रयित्वादिना[8] पक्षिणं न दशेन्न खादेत्तावद्देवं हरिं ध्यातुं मम क्षणोवसरः । किंभूतम् । भुजंगमेशोरुभुजं[9][10][11] शेषराजवत्प्रलम्बबाहुं तथा भुजगतल्पगं[12] भुजगः शेषो यत्तल्पं तत्र शयानं तथा भुजंगजिद्यो विहंगः[13] पक्षी गरुडः[14] सोङ्कश्चिह्नं यस्य तं तथा विहगेन्द्रप्रभाम्बरं[15] गरुडवत्स्वर्णवर्णवस्त्रं[16] तथा सुगीकृतं रागादिचरटोच्छेदेन सुगमीकृतं स्वर्ग एव दुःखेन गम्यत्वाद्दुर्गं विषमभूमिर्येन तम् ॥

खड् । भुजंग[17] । विहंग ॥ ड । भुजंग[18] । विहग ॥ ख । भुजंगम । विहंगमम् । अत्र "नाम्नः०" [१३१] इत्यादिना खड्डखाः ॥ विहायस्शब्दस्य च विहादेशः ॥ उरंगमीत्यपि कश्चित् ॥

---

१ डी °मेशारु°. २ बी °गद्विद्वि°. ३ ए °द्विहगा°. ४ सी डी °भावर°. ५ सी डी °वद्यात् क्ष°. ६ डी °रोरग°. ७ ए शेन्नात्म°. सी डी °शेनात्म°.

---

१ डी °णी । अ°. २ सी खद्र्. ३ बी °रित्येव । न°. ४ ए °च्व्यङ्गतपू°. ५ सी डी °न्ति । अन°. ६ सी डी आसितं°. ७ ए सी डी °वेत्या°. ८ बी °श्रयत्वा°. ९ डी °गमशशेष°. १० सी °मेशशेष°. ११ ए °शोसभु°. १२ ए भुजंग°. १३ ए सी डी विहगः. १४ डी °डः शोङ्क°. १५ सी विहंगे°. १६ सी डी °डश्च स्वर्ण°. १७ ए भुजग. १८ ए °ग । खो भु°. सी डी °गम । विहं°.

सुगी । दुर्गम् । इत्येतौ "सुग०" [१३२] इत्यादिना निपात्यौ ॥

स्वर्गनिर्गोचितं कुर्यात्किं हि पुंशम्बरस्तदा[1] ।
आर्त्या पार्श्वशयः पृष्ठशयोत्तानशयो यदा ॥ ९७ ॥

९७. तदा पुमानकिंचित्करत्वादनुकम्प्यत्वाच्च शम्बर इव मृगभेद इव । पुंशम्बरो हि स्फुटं स्वर्गनिर्गोचितं स्वर्गदेशयोग्यं सद्धर्मानुष्ठानं किं कुर्यान्न किमपि यदार्त्या जरापीडया पार्श्वशयः[2] पृष्ठशय उत्तान-[3]शयः पार्श्वाभ्यां पृष्ठेनोत्तानश्च शेते ॥

योगेनोर्ध्वशया[2] धन्या भिक्षाचरवनेचराः[3] ।
अहृच्छया अनादायचराः[4] स्वं साधयन्ति ये ॥ ९८ ॥

९८. ते भिक्षाचरवनेचरास्तापसा[4][5] धन्याः श्लाघ्याः । किंभूताः । योगेन[6] ध्यानेन कृत्वा न तु निद्रयोर्ध्वशया ऊर्ध्वा[7] एव शयाना ऊर्ध्वस्था एव सन्तो योगपरमकाष्ठया[8] शयानवन्निश्चेष्टा[9] इत्यर्थः । ये स्वं साधयन्ति । कीदृशाः सन्तः । अहृच्छया निष्कामास्तथानादायचरा अनादानं कृत्वा चरन्तो निष्परिग्रहा इत्यर्थः[10] ॥

सेनाचराग्रेसरैस्त्वं[5] वृतो धुर्यपुरःसरः ।
धेहि तद्भूधुरां येन स्यां विवेक्यग्रतःसरः[6] ॥ ९९ ॥

९९. तत्तस्माद्धेतोस्त्वं भूधुरां[11] धेहि धारय । कीदृक्सन् । सेनया चरन्ति गच्छन्ति सेनाचराः सैनिकास्तेषामग्रेसरैर्मुख्यैर्वृतस्तथा धुर्यपुरः-

१ बी पुंसंवर°. २ ए बी सी °नोर्द्वश°. ३ डी °राः । आहृ°. ४ ए °राः स्वसा°. ५ ए °स्त्वं धृतो. ६ डी °तः । त°.

१ बी सी डी सुग । दु°. २ सी डी °यः पा°. ३ बी °त्तानाश°. ४ सी डी °पसाः श्ला°. ५ ए °सा श्ला°. ६ ए °गेनाध्या°. ७ ए °र्ध्वाश ए°. ८ ए सी ऊर्द्वस्था. ९ सी डी °याश्रयान् व°. १० ए °र्थः । समाच°. ११ बी °रां पृथ्वीभारं धे°.

सरः कार्यधुराधरणक्षमेषु प्रष्ठः । येन यथाहं विवेक्यग्रतःसरो मुनिषु मुख्यः स्याम् ॥

निर्ग । इत्ययं "निर्गो देशे" [१३३] इति निपात्यः ॥

शम्बरः । अत्र "शमो नाम्न्यः" [१३४] इत्यः ॥

पार्श्वशयः । पृष्ठशयः(य) । अत्र "पार्श्वादिभ्यः[1] शीङः[2]" [१३५] इत्यः ॥

ऊर्ध्वशया[3]ः । उत्तानशयः । अत्र "ऊर्ध्वादि[4]भ्यः कर्तुः" [१३६] इत्यः ॥

हृच्छयाः । अत्र "आधारात्" [१३७] इत्यः ॥

वनेचराः । अत्र "चरेष्टः" [१३८] इति टः ॥

भिक्षाचर[5] । सेनाचर । अनादायचराः[6] । अत्र "भिक्षा[7]०" [१३९] इत्यादिना टः ॥

पुरःसरः । अग्रतःसरः[8] । अग्रेसरः । अत्र "पुरः०" [१४०] इत्यादिना टः ॥

सातपत्रे द्विपारूढे राज्ञां पूर्वसरे त्वयि ।
भवं तरामि योगस्थो नदीष्ण इव निम्नगाम्[1] ॥ १०० ॥

१००. स्पष्टः । किंतु नदीष्णो नदीतरणकुशलः ॥

पूर्वसरे । अत्र "पूर्वात्कर्तुः[9]" [१४१] इति टः ॥

योगस्थः । द्विप । नदीष्णः[10] । सातपत्रे । अत्र "स्थापा०" [१४२] इत्यादिना कः ॥

कथं स शोकापनुदः पुत्रः[2] स्तम्बेरमोऽपि ।
अप्यरुंतुद[3]परिमृज[4]स्त्यक्तकर्णेजपोऽपि च ॥ १०१ ॥

---

१ ए निम्नगा°. २ बी डी पुत्रस्त°. ३ बी तुदंप°. ४ डी °मृज्यस्त्य°.

---

१ डी °भ्यः क्रीङः. २ ए शीङ् इ°. ३ ए °शयः । उ°. डी °शय । उ°. ४ ए °दिभ्यकेतुः इ°. ५ सी डी °चरः । से°. ६ ए सी डी °चर । अ°. ७ बी भिक्ष्येत्या°. ८ सी डी अग्रे°. ९ सी डी °र्वाकर्तुः. १० सी डी °दी सा°. ए °दीते । सा°.

आज्ञाभ्रूमूलविभुजनेत्रपङ्केरुहे गुरौ ।
भवेत्कामदुघा भक्तिः पादभाजोपि यस्य न ॥ १०२ ॥

१०१,१०२. स पुत्रः कथं शोकापनुद आनन्दकरः[1] स्यात् । कीदृशः । स्तम्बेरमोगोपि[2][3] गजवद्बलिष्ठोपि । अतुन्दपरिमृजोपि निरालस्योपि । त्यक्तकर्णेजपोपि[4] सत्सङ्गरतत्वात्त्यक्तदुर्जनोपि । यस्य पुत्रस्य पादभाजोप्यास्तां यो दुर्विनीतत्वेन समीपेपि नायाति किं त्वतिविनीतत्वेन पादसेवकस्यापि[5] सतः कामदुघा मनोरथपूरिका भक्तिराज्ञापालनरूपा न भवेत् । क्व विषये । गुरौ पितरि । किंभूते । आज्ञायै भ्रुवोः सम्बन्धित्वेन मूलविभुजे मूल आदौ विभुजन्ती[6] कुटिलीभवन्ती नेत्रपङ्केरुहे यस्य तस्मिंश्चालितभ्रूमूलनेत्रसंज्ञयाज्ञां[7] ददान इत्यर्थः । आज्ञापालनमेव हि गुरौ भक्तिस्तच्चेत्त्वं[8] मयि सत्यं भक्तस्तदा राज्यं गृहाणेत्यर्थः ॥

शोकापनुदः । तुन्दपरिमृजः । स्तम्बेरम । कर्णेजपः । इत्येते "शोका०" [१४३] इत्यादिना निपात्याः ॥

मूलविभुज । पङ्केरुहे । इत्यादयो "मूल०" [१४४] इत्यादिना निपात्याः ॥

कामदुघा । इत्यत्र "दुहेर्दुघः"[9] [१४५] इति दुघः ॥

पादभाजः । अत्र "भजो विण्" [१४६] इति विण् ॥

अग्रेगावा शुभंयां सोथाश्वत्थामोपमं[2] सुतम् ।
दोष्णि धीवा सुधीवोर्व्या जागर्हेमासने न्यधात्[1] ॥ १०३ ॥

---

१ ए सी डी °स्य सः ॥ स. २ सी °श्वस्थामो°.

---

१ बी °न्दकः स्या°. ए °न्दकर स्या°. २ ए सी °भोगेपि. ३ सी डी °पि जगद्ब°. ४ डी °पिपि स° ५ बी °पि का° ६ सी विभंज°. डी विभंजन्तीं कु°. ७ डी °नेत्रे सं°. ८ ए °स्तचेत्त्वं. सी °स्तचेत्रत्त्वं. ९ ए °हेर्डुघ इति डुघः.

१०३. अथ[1] स कर्णोऽश्वत्थामोपमं[2] बलवीर्यादिना द्रोणपुत्रसमं सुतं जयसिंहं हेमासने सिंहासने न्यधादुपावेशयत्[3]। कीदृक्सन्। शुभंयां श्रेयःकर्मकारिणां मध्येऽग्रेगावाग्रेसरस्तथोर्व्याः सुधीवा सुष्ठु पोषकस्तथा जागरिहलोकपरलोकहितेषु[4] सर्वकार्येषु जागरूकोत एव दोषि(ष्णि) बाहौ धीवा पुत्रस्य धारको बलाद्राज्ये निवेशनाय पुत्रं बाहौ गृहीत्वेत्यर्थः ॥

मन्। अश्वत्थाम[5]। क्वचिद्ग्रहणात्केवलादपि। हेम ॥ वन्। अग्रेगावा ॥ क्वनिप्। सुधीवा ॥ केवलादपि। धीवा ॥ विच्। शुभंयाम् ॥ केवलादपि। जागः। अत्र "मन्वन्०" [१४७] इत्यादिना मन्वन्क्वनिप्विचः ॥

सोऽभिषेकचिकीः सूनोः कीरपां दिविषत्समः ।
पुण्यसूकुम्भहस्तोऽभाज्जिष्णुर्विष्णोर्नु गोदुहः ॥ १०४ ॥

१०४. स कर्णोऽभात्। कीदृक्सन्। दिविषत्समस्तदानीं हर्षोत्कर्षाद्वे[6]षविशेषाच्च देवतुल्यस्तथा सूनोरभिषेकचिकी राज्याभिषेकं चिकीर्षुरत एव पुण्यसूर्मङ्गल्यत्वात्कल्याणानां जनयिता[7] कुम्भो हेमकलशो[8] हस्ते यस्य[9] सः। तथात एव चापां जलानां कीः क्षेप्ता। यथा गोदुहो गोपरूपधारिणो विष्णोरभिषेकचिकीः पुण्यसूकुम्भहस्तोऽपां कीः सन् जिष्णुरिन्द्रोऽभात्। विष्णोर्हि गोपस्य राज्याभिषेकमिन्द्रश्चकारेति पुराणम् ॥

अघभित्कृत्यविद्विड्जित्स प्रत्यूहच्छिद्[1]द्द्रुहः ।
सेनानीवाजियुग्मुख्यान्सम्राट् सूनावनामयत् ॥ १०५ ॥

---

१ ए °दग्रहः.

---

१ **ए सी डी** अत्र स. २ **सी डी** °र्णोस्वस्थामो°. ३ **बी** °दुपवे°. ४ **बी** °ग इह°. ५ **सी** °श्वस्थाम. **डी** °श्वस्थाने। क्व°. ६ **सी डी** °षांदेष°. ७ **ए सी डी** जयि°. ८ **ए सी डी** °शो य°. ९ **सी** °स्य स त ए°.

१०५. स्पष्टः । किं तु स कर्णः । अद्रुह[1] आभिजात्यादिगुणैरजिघांसून् । सेनान्यो दण्डनायकान् । वाजियुग्मुख्यांश्चाश्ववारप्रवरान्साधना[2]धि[3]पान् ॥

ऋत्विग्धुर्यस्ततः सम्यगुष्णिग्दधृक्पुरोहितः ।
शङ्खस्पृगुदकस्पर्शो मन्त्रस्पृग्मङ्गलं व्यधात् ॥ १०६ ॥

१०६. ततो राज्याभिषेकानन्तरमृत्विग्धुर्यो यायजूकश्रेष्ठः पुरोहितः सम्यक् शास्त्रोक्तविधिना मङ्गलं मन्त्रपूतोदकाक्षता[4]दिन्यासरूपां मङ्गलक्रियां व्यधात् । कीदृक्सन् । उष्णिग्दधृगुष्णिहि छन्दोविशेषे प्रगल्भस्तथा श[5]ङ्खस्पृगुदकस्पर्शः शङ्खस्थमुदकं स्पृशन् । तथा मन्त्रस्पृग्मन्त्रेण कुमारं स्पृशंश्च ॥

अभिषेकचिकीः । केवलादपि[6] । कीः । अत्र[7] "क्विप्" [१४८] इति क्विप् । सदिसूद्विषद्रुहदुहयुजविदभिदछिदजिनीराजिभ्यश्च । दिविषत् । पुण्यसू । द्विट् । अद्रुहः । गोदुहः[8] । वाजियुक् । कृत्यवित्[9] । अघभित् । प्रत्यूहच्छित् । द्विड्जित् । सेनानी । सम्राट् । अक्षैः । सम्यक् । तथा ऋत्विक् । दधृक् । उष्णिग् ॥

शङ्खस्पृग् । मन्त्रस्पृग् । इत्यत्र[10] "स्पृशोनुदकात्" [१४९] इति क्विप् । कर्मोपपदादेवेच्छन्त्यन्ये । तन्मते मन्त्रस्पृगिति न स्यात् । अनुदकादिति किम् । उदकस्पर्शः ॥

एषोन्नादानिव क्रव्याक्रव्यादानपि शात्रवान् ।
त्यादृशानसदृग्जेष्यत्येवं वागभवद्दिवि ॥ १०७ ॥

---

१ बी °द्रुहः अभि°. २ सी डी °ना विपा°. ३ ए °धिमान्. ४ सी डी °दिनाऽस°. ५ सी डी °ङ्खस्थ°. ६ सी °पि । चिकी ।. डी °पि । चिकीः. ७ ए °त्र कविति क्विच् । स°. ८ सी डी °दुह । वा°. ९ डी °त् । प्र°. १० डी °त्र स्पृगित्यत्र स्पृ°.

१०७. वाग् दैवी वाणी दिव्याकाशेभवत् । कथमित्याह । असदृक् प्रतापादिगुणैर्निरुपम एष जयसिंहस्त्यादृशान्दुर्जेयत्वेन प्रसिद्धान् क्रव्याक्रव्यादानप्याममांसभक्षान्पक्वमांसभक्षांश्चापि शात्रवान् शत्रून् राक्षसानपीत्यर्थः । अन्नादानिव मनुष्यानिव हेलयैवेत्यर्थो[1] जेष्यत्येवम्[2] ॥

त्यादृक्षमङ्गलैस्तादृग्वाचा हृष्टोथ तादृशम्[1] ।
तमनन्यादृशं[2] स्माह कर्णस्तादृक्षया गिरा ॥ १०८ ॥

१०८. अथ कर्णस्तं जयसिंहं तादृक्षया तत्कालोचितया गिरा शिक्षाप्रधानवाण्याह[3] स्म । कीदृशम् । तादृशं राज्याभिषेकश्रीसमलंकृतं तथानन्यादृशं[4] शोभातिशयेन निरुपमम्[5] । कीदृक्सन् । त्यादृक्षमङ्गलैः पुरोहितकृताभिषेकोचितमङ्गलकर्मभिस्तादृक्षया(दृग्वा)चा च दिव्यवाण्या च हृष्टः ॥

नान्यादृक्षां[3] सदृक्षीं किं त्वाद्यानामुद्वहन्स्थितिम् ।
मित्रभाषी स्निग्धदर्शी विप्रादीन्[4] रक्षिता भव ॥ १०९ ॥

१०९. हे वत्स त्वं विप्रादीन्वर्णचतुष्टयीं रक्षिता पालनशीलो भव । कीदृक्सन्[6] । नान्यादृक्षां पूर्वपुरुषस्थितिसकाशान्न विपरीतां किंतु सदृक्षीमाद्यपुरुषस्थितेः सदृशीमाद्यानां पूर्वजानां स्थितिं व्यवस्थामुद्वहंस्तथा मित्रभाषी सखेवालपन् स्निग्धदर्शी सानुरागं[7] दर्शनशीलः ॥

भूया मङ्क्षातृजे देवप्रसादे वानुयायिनि ।
साधुकारी चारुदायी सर्वदा च प्रसादवान् ॥ ११० ॥

---

१ ए डी °दृशां त°. २ ए तरान°. ३ ए °दृक्षीं स°. ४ सी °न् वर्ण°.

---

१ बी °थौ ज्येष्य° २ ए सी डी °व ॥. ३ ए °ण्यासाह स्म । की°. सी डी °ण्यासाह । की°. ४ ए °थामन्या°. सी डी °था अन्या°. ५ डी निरूप°. ६ ए सी डी °न् अनन्या°. ७ सी °रागद°.

११०. स्पष्टः । किंतु अनुयायिनि तवात्यन्तं भक्त इत्यर्थः । चारुदायी चारु यथा स्यादेवं[१] पुरादि ददत् ॥

"अदोनन्नात्" [१५०] इत्यस्य आमात् इत्यादि प्रवृत्त्युदाहरणम् अन्नादान्[२] इति व्यावृत्त्युदाहरणोपदर्शनेनैव दर्शितं ज्ञेयं प्रवृत्तिमन्तरेण व्यावृत्तेरभावात् ॥

क्रव्यां[३]क्रव्यादशब्दौ "क्रव्यात्०" [१५१] इ[४]त्यादिना साधू ॥

त्यदादि । त्यादृशान्[५][६] । त्यादृक्ष । तादृशम्[७] । तादृक्षया । तादृक् ॥ अन्य । अनन्यादृशम् । अन्यादृक्षाम्[८] । [९]अनन्यादृशम् ॥ समानः[१०](न) । सदृक् । इत्यत्र "त्यदादि०" [१५२] इत्यादिना टक्सकौ क्विप्च । केचित्सकमपि टितं मन्यन्ते[११] । सदृक्षीम्[१२] ॥

मित्रभाषी । इत्यत्र "कर्तुर्णिन्" [१५३] इति णिन् ॥

स्निग्धदर्शी । इत्यत्र "अजातेः[१३] शीले" [१५४] इति णिन् । अजातेरिति प्रसज्यप्रतिषेधादसत्त्ववाचिनोप्युपसर्गाद्भवति । अनुयायिनि । अजातेरिति किम् । विप्रादीन् रक्षिता ॥

साधुकारी । चारुदायी । इत्यत्र "साधौ" [१५५] इति णिन् ॥

ब्रह्मवादी हरिस्मारी भूत्वा स्थण्डिलवर्त्यथो ।
प्रापाग्निष्टोमयाजीव स पुरीं[१] जम्भविद्विषः ॥ १११ ॥

१११. अथो स कर्णो जम्भविद्विष इन्द्रस्य [१४]पुरीं प्रापाग्निष्टोमयाजीव यथाग्निष्टोमेन स्वर्गफलेन यागविशेषेणेष्टवान्यजमानो जम्भविद्विषः पुरीं प्राप्नोति । कीदृक्सन्सः । स्थण्डिलवर्ती[१५] स्थण्डिले मुनियोग्ये भूविशेषे व्रताद् वर्तमानो भूत्वा ब्रह्मवादी[१६] परमतत्त्वं वेदान्वा ब्राह्मणान्वा वदंस्तथा हरिस्मार्यभीक्ष्णं[१७] हरिं स्मरन् ॥

१ ए सी डी पुरीं ज°.

१ ए सी डी °देव पु°. २ ए सी डी °दा इ°. ३ बी °व्याक्रव्या°. ४ सी डी इना°. ५ ए °दृशन्. ६ सी डी °न् । तादृ°. ७ ए °दृशां ता°. ८ ए °दृक्षम्. ९ बी अन्या°. १० बी °मानं स°. ११ ए सी डी न्यते । स°. १२ ए सी डी °क्षी ॥. १३ ए °जातो शी°. १४ सी पुरी प्रा°. १५ डी °ण्डिले व°. १६ सी डी °वा प°. १७ ए सी डी °क्ष्णं स°.

ब्रह्मवादी । इत्यत्र "ब्रह्मणो वदः" [१५६] इति णिन् ॥

स्थण्डिलवर्ती । हरिस्सारी । इत्यत्र "व्रत०" [१५७] इत्यादिना णिन् ॥

अग्निष्टोमयाजी । इत्यत्र "करणाद्०" [१५८] इत्यादिना णिन् ॥

स सोमविक्रयिभ्रूणहब्रह्महात्मघातिनः ।
वर्जयन् जयसिंहोथ पितृकार्येपृणद्द्विजान् ॥ ११२ ॥

११२. स्पष्टः । परं सोमं सोमवल्लीरसं विक्रीतवन्तः सोमविक्रयिण एवमादिद्विजान्महापापिष्ठत्वाद्वर्जयन्नन्यान्द्विजानपृणद्भोजनादिदानैरतर्पयत् ॥

भूवृत्रघ्नोथ सुकृतः श्रुत्वा तां पुण्यकृद्गतिम् ।
देवप्रसादः पदकृत्तमूचे दर्शयन्सुतम् ॥ ११३ ॥

११३. अथ सुकृतः कृतपुण्यस्य भूवृत्रघ्नो महीन्द्रस्य कर्णस्य तां गतिं स्वर्गप्राप्तिलक्षणां श्रुत्वा देवप्रसादस्तं जयसिंहमूचे । कीदृक्सन् । पुण्यकृत्कृतधर्मात एव पदकृदुपार्जितस्वर्गरूपस्थानस्तथा सुतमात्मीयं पुत्रं जयसिंहस्य दर्शयन् ॥

यदूचे तदाह ।

अपापकृत्रिभुवनपाल एषोस्तु ते सुतः ।
कर्मकृन्मन्त्रकृच्छ्लाघ्यस्तीर्थकृत्सोमसुत्प्रियः ॥ ११४ ॥

११४. एष प्रत्यक्षो मत्पुत्रस्त्रिभुवनपालनामा ते सुतोस्तु । पुत्रवदयं त्वया पालनीय इत्यर्थः । कीदृग् । अपापकृदत एवं कर्मकृन्मन्त्र-

१ ए °र्येपुण°. बी °र्येप्रिण°. २ ए सी °ति।. ३ ए सी डी °साद प°. ४ ए °न्सुताम्. ५ ए °घ्यकृत्ती°. ६ ए °मस्युत्प्रि°. डी °मस्तुत्प्रि°.

१ सी °दिनानै°. २ डी °तःपु°. ३ बी महेन्द्र°. ४ ए °स्य तां. ५ ए सी डी °धर्मात. ६ बी डी °त्मीयपु°. ७ बी °मा सु°. ८ बी पाल्य इ°. ९ ए °व अक°.

कृच्छ्राद्यः सेवकैः कृतमन्त्रै[1]र्मुनिभिश्च प्रशस्यस्तथा सर्वदर्शनभक्तत्वात्तीर्थकृतोर्हन्तः सोमसुतश्च सोमं सुतवन्तो यज्वानश्च प्रिया यस्य स तथा ॥

सोमविक्रयी । इत्यत्र "नि[2]न्द्ये०" [१५९] इत्यादिना-इन् ॥

आत्मघातिनः । अत्र "हनो णिन्" [१६०] इति णिन् ॥

ब्रह्म[3]ह । भ्रूणह । वृत्र[4]घ्नः । अत्र "ब्रह्म०" [१६१] इत्यादिना क्वि[5]प् ॥

सु[6]कृतः । पुण्यकृत् । अपापकृ[7]त् । कर्मकृत् । मन्त्रकृत् । पदकृत् । इत्यत्र "कृगः सु०" [१६२] इत्यादिना क्विप् । एभ्य एव भूते कृगः क्विबिति धातुनियमो नेष्यते । तेन तीर्थकृत् ॥

सोमसुत् । इत्यत्र "सोमात्सुगः" [१६३] इति क्विप् ॥

इत्युक्त्वैत्य नदीं ब्राह्मीं सोग्निचित्कङ्क[1]चिच्चिताम् ।
स्वर्गदृश्वाभवत्कर्णसहकृत्वेव भक्तिमान् ॥ ११५ ॥

११५. स[8] देवप्रसादः कर्णे भक्तिमा[9]न्सन्स्वर्गदृश्वा चिताप्रवेशेन स्वर्गं दृष्टवानभवत् । किं कृत्वा । इति पूर्वोक्तमुक्त्वा तथा ब्राह्मीं नदीं सरस्वतीमेत्य कालकरणायागत्य । किंभूताम् । अग्निचिदग्निं चितवती देवप्रसादार्थमग्निसंभृतेत्यर्थः । कङ्कचित्कं[10]ङ्काख्यपक्षिभेदवच्चिता कङ्काकारेण रचितेत्यर्थः । [11]चिता यस्यां ताम् । अतश्च तत्क्षणमेव स्वर्गगमनरूपैककार्यकरणादुत्[12]प्रेक्ष्यते । कर्णस[13]हकृत्वेव क[14]र्णसहकारीव ॥

---

१ ए °चिन्वितम्.

---

१ ए °त्रैमुनि°. २ बी निन्दे इ°. ३ बी ह्महः । भ्रू°. ४ सी °त्रघ्न । अ°. ५ सी डी °प् । पु°. ६ ए °कृत । पु°. ७ सी डी °त् । म°. ८ डी सन्स्व°. ९ बी °मान्स्व°. १० ए °त्ककाख्य°. ११ ए चिन्ता य°. १२ ए सी डी °त्प्रेक्षते. १३ बी °सकृ°. १४ बी °र्णस्य स°.

राज[1]कृत्वा राजयुध्वा सहयुध्वानमाहवे ।
आत्मानुजमिवापश्यत्सोऽब्जदृग्भ्रातृजं नृप[2]ः ॥ ११६ ॥

११६. स नृपो जयसिंहो भ्रातृजं त्रिभुवनपालमात्मानुजमिवात्मानमनु जातं लघुसोदरमिवापश्यदज्ञासीत् । कीदृक्सन् । अब्जदृक् प्रसन्नत्वात्पद्माक्षस्तथा राजकृत्वा त्रिभुवनपालं राजानं कृतवान् । कीदृशम् । आहवे सहयुध्वानं सह जयसिंहस्य सहायीभूय युद्धवन्तम् । ननु जयसिंहो युद्धकृदेव न भविष्यति तत्कथमसौ सहयुध्वेत्याह । राजयुध्वा रा[1]ज्ञो युद्धवान् । अन्तर्भूतण्यर्थत्वात् योधितवान् ॥

द्विजाञ्जातान्क्षत्रियजान्सोन्यानप्यनुजानिव ।
अब्रह्मज्यो जनान्मित्रह्वकीर्तिपट[3]होन्वशात् ॥ ११७ ॥

११७. स्पष्टः । किंत्वन्यानपि वैश्यशूद्रान् । अब्रह्मज्यो न ब्रह्मणि परम[2]ज्ञाने जीनवा[3]न् हीनवान् । मि[4]त्रह्वो मित्राण्याकारय[5]न्कीर्तिपटहो यस्य सः ॥

स क्ष्मां पयोधिपरिखां धरणीवरा[4]हः
पुंसानुजो नु भपते[5]र्नृपराजवार्चः ।
खानां जयादतिजरन्मखयज्वसु[6]त्वा
दोष्णोन्नतेन धृतवान्विजितारिवर्गः ॥ ११८ ॥

११८. स जयसिंह उन्नतेन शत्रुविजयात्सर्वोत्तमेन दोष्णा

१ ए °जत्वा रा°. २ ए सी डी °पः ॥ नृ°. ३ ए °टज्ञोन्व°. ४ ए सी °राह पुं°. ५ ए °र्चः । खनां. ६ ए °सुत्व दो°.

१ डी राजो यु°. २ डी °ज्ञानजी°. ३ ए °न् । मि°. ४ बी मित्राह्वो. ५ ए सी डी °यकीर्ति°.

बाहुना कृत्वा पयोधिपरिखामब्धिपर्यन्तां[1] क्ष्मां धृतवान्पालितवानि-त्यर्थः । कीदृक्सन् । धरणीवराहो भूभारवहनक्षमत्वात्पृथ्व्यामादिशूक-[2]रतुल्यस्तथा सौम्यत्वादिना भपतेरिन्दोः पुंसानुजो नु पुंसा करणेनानु पश्चाज्जातः पुंसानुजोनन्तरोनुज इवेन्दुतुल्य इत्यर्थः । भ्राता हि सदृशो भवति । तथा नृपराजवार्चो नृपेषु राजहंसतुल्यस्तथा खानामिन्द्रियाणां जयाद्वशीकारादतिजरन्[3] वृद्धमतिक्रान्तस्तथा मखेषु यागेषु यज्वनामृ-[4]त्विजां सुत्वा यजमानो यागानां कारयितेत्यर्थः । तथा विजितारिवर्गः ॥

अग्निचित् । इत्यत्र[5] "अग्नेश्चेः" [१६४] इति क्विप् ॥

कङ्कचित् । इत्यत्र "कर्मणि" [१६५] इत्यादिना क्विप् ॥

स्वर्गदृश्वा[6] । इत्यत्र "दृशः क्वनिप्" [१६६] इति क्वनिप् ॥

सहकृत्वा । सहयुध्वानम्[7] । राजकृत्वा । राजयुध्वा । इत्यत्र "सह०" [१६७] इत्यादिना क्वनिप् ॥

आत्मानुजम् । अत्र "अनोर्०" [१६८] इत्यादिना डः ॥

अब्ज । इत्यत्र "सप्तम्याः" [१६९] इति डः ॥

भ्रातृजम्[8] । अत्र "अजातेः पञ्चम्याः" [१७०] इति डः ॥ अजातेरिति किम् । द्विजाज्जातान्[9] ॥

उक्तान्नाम्नोन्यतोपि । द्विजातान्द्विजान् ॥ अकर्मणोपि । अनुजान्[10] ॥ जातेरपि । क्षत्रियजान् ॥ उक्ताद्धातोरन्यतोपि । ब्रह्मणि जीनवान्ब्रह्मज्यः ॥ उक्तान्नाम्नो धातो-

१ ए धिखाम°. २ बी °दिसूक°. ३ ए °तिरजन्. ४ बी यजना°. ५ सी डी °त्य अ°. ६ ए सी डी स्वर्गदृ°. ७ ए °ध्वान । रा°. ८ बी °ज । अ°. ९ डी °जाजाता°. १० ए सी डी °न् । उ°.

श्चान्यतोपि । वरमाहतवान् वराहः ॥ उक्तान्नाम्नो धातोः कारकाच्चान्यतोपि[1] । परिखाम् ॥ नामधातुकालान्यत्वे । मित्रं ह्वयति मित्रह्वः । अणोपवादो डः ॥ धातुकारकान्यत्वे । पटे हन्यते स्म पटहः ॥ धातुकालान्यत्वे । वारि[2] चरति वार्चः ॥ नामकारकान्यत्वे । पुंसानु जातः पुंसानुजः ॥ नामाभाव उक्तधातुकालान्यत्वे च । भान्ति[3] भानि नक्षत्राणि ॥ नामाभाव उक्तधातुकालकारकान्यत्वे च । खन्यमा[4]नानां खानाम् । एतेषु सर्वेषु "क्वचित्" [१७१] इति डः ॥

सुत्वा । यज्व । इत्यत्र "सु०" [१७२] इत्यादिना ङ्वनिप् ॥

जरन् । इत्यत्र "जॄषो[5]तृः" [१७३] इत्यतृः ॥

विजित । उन्नतेन । धृतवान् । इत्यत्र "क्त०" [१७४] इत्यादिना क्तक्तवतू । वसन्ततिलका छन्दः ॥

सप्तदशः पादः ॥

इति[6] श्रीजिनेश्वरसूरिशिष्यलेशाभयतिलकगणिविरचितायां श्रीसिद्धहेमचन्द्राभिधानशब्दानुशासनद्व्याश्रयवृत्तावेकादशः सर्गः ॥

---

१ **बी** °पि । परिखातां प°. २ **डी** वाविर°. ३ **डी** °न्ति न°. ४ **ए** °मानां. ५ **ए डी** °तृः । वि°. **सी** °तृ । वि°. ६ **बी** °ति जि°.

द्व्याश्रयमहाकाव्ये

द्वादशः सर्गः ।

स्मृतिमेष शुश्राव यशोशृणोत्स्वं
निषसाद नीतौ व्यषदन्न जातु ।
शममध्युवासोपगुरु न्यवात्सी-
दपथं बभज्वान्पपुराणशक्तिः ॥ १ ॥

१. एष जयसिंहः पपुराणाः पूरिताः पालिता वा शक्तयः प्रभुत्वोत्साहमन्त्रशक्तयो येन स तथा सन्नुपगुर्वाचार्यसमीपे न्यवात्सीद्धर्मशुश्रूषयोपाविक्षत् । अत एव स्मृतिं धर्मशास्त्रं शुश्राव । अत एव च नीतौ निषसाद तस्थौ । तथा न जातु व्यषदन्महाव्यसनसंभवेपि न विषण्णोभूत् । तथा शममध्युवासाश्रितवान् । तथापथं कुमार्गं बभज्वान्निर्लोठितवान् । अत एव स्वं यशो लोकैरुद्गीयमानमशृणोत् ॥

शुश्राव । निषसाद । अध्युवास । इत्यत्र "श्रुसद०" [१] इत्यादिना परोक्षा । वाँवचनाद्यथास्वकालमद्यतनी ह्यस्तनी च । अशृणोत् । व्यषदत् । न्यवात्सीत् ॥

बभज्वान् । पपुराण । इत्यत्र "तत्र०" [२] इत्यादिना क्वसुकानौ ॥
सर्गेस्मिन्केकिरवं छन्दः । स्यौ स्यौ केकिरवम् ॥

---

१ ए °षसीद. २ ए °तौ विष°. सी °तौ वष°. डी °तौ वयष°. ३ ए °मध्यवा°.

---

१ ए एच. २ ए पि निर्विषिण्णो°. ३ ए °र्गं भ°. ४ ए डी °वान्नत. ५ ए °व स्वयं य°. ६ ए सी °नं । शु°. ७ ए वाच°. ८ ए °राण्य । इ°.

स तथेयुषे[1]नाशुष आश्वदत्त द्रविणान्यनूचानकुलाय वीरः[2] ।
न यथाभ्यगाद्याचितु[3]मन्ववग्वा न यथा यथा[4] नाश[5] तदन्यगेहे २

२. वीरो दानवीरः[1] स जयसिंहोनूचानकुलाया[2]नूचाना[3]ः साङ्गे प्रवचनेधीतिनस्तेषां वृन्दाय तथा बाहुल्येनाशु या[4]ज्ञायाः प्रागेव द्रविणान्यदत्त । यतोनाशुषे व्रतनिष्ठत्वाद्यत्र तत्र[5] शूद्रादिगृहेभुक्तवते [6]निस्वत्वाद्भोजनरहिताय वा । त[7]थेयुषे याचितुं दू[8]रदेशादागताय । यथा तदनूचानकुलमन्यगेहे जयसिंहगेहादन्यस्मिन्[9] गेहे याचितुं नाभ्यगात् । यथान्यगेहे याचितुं नान्ववग्वा देहीति नावोचच्च यथान्यगेहे ना[10]श[11] वा[12] नाभुक्त च ॥

ईयुषे । अनाशुषे । अनूचान । इत्येते "वेयिवद्०" [३] इत्यादिना वा निपात्याः ॥ वावचनात्पक्षेद्यतन्यादयोपि । अभ्यगात् । नाश । अन्ववक् ॥

ऋषयोन्यदाभ्येत्य तमित्यवोचन्नगमाम या यासु पयांस्यपाम ।
[6]निरभुक्ष्महि ह्योद्य च यातुधाना उपदु[7]द्रुवुस्तास्तव सत्रशालाः[8] ॥३॥

३. अन्यदा ऋषयस्तं जयसिंहमभ्येत्येतीदमवोचन्[13] । यथा राजंस्ताः सत्र[14]शालाः सत्राय सदादानाय गृहाणि यातुधाना राक्षसा [15]उपदुद्रुवुर्बभञ्जुर्या वयमगमाम तथा यासु व[16]यं पयांसि दुग्धान्यपाम

१ ए °षेनांशु°. २ डी वीराः । न. ३ ए °मन्नव°. डी °मन्वेव°. ४ डी °था श्र त°. ५ ए नाश्न त°. सी नाशु त°. ६ बी निरुभु°. ७ सी °दुदुवु°. ८ ए सी डी °त्रसालाः.

१ ए सी डी °रः ज°. २ ए °लाद्यानूनाचाना सा°. ३ सी °नूचामासा°. डी °नूनावा सा°. ४ बी याञ्चायाः. ५ बी °त्र सूद्रा°. ६ बी निश्चत्वा°. ७ ए तथोयु°. ८ डी दूरेदे°. ९ बी °न् गृहे. १० ए नाशिवान्नाभु° ११ डी °शचाशवन्वाभु°. १२ सी वान्नाभु°. १३ डी °चत् । य°. १४ ए सी डी °त्रसालाः. १५ ए °दुदुर्ब°. सी °दुदुवु°. १६ ए वषं प°.

पीतवन्तस्तथा यासु[1] ह्योद्य[2] च चो वार्थो[3] ह्य इत्यतो ज्ञेयः। अद्य कल्पे वा निरभुक्ष्महि निश्चितं भुक्ताः ॥

अवोचन्। इत्यत्र "अद्यतनी" [४] इत्यद्यतनी ॥

अगमाम याः। पर्यास्यपाम। व्यामिश्रे[4]। अद्य ह्यश्च निरभुक्ष्महि[5]। इत्यत्र "विशेषा०" [५] इत्यादिनाद्यतनी ॥

भयवानिहावात्समिहावसं[1] चेत्यवदन्[2][3]मिथः प्रश्न उषावशेषे।
अविषुप्तसुप्ता बटवो यदेषामरुणत्क्षपाटाधिपतिः प्रचारम् ॥ ४ ॥

४. यद्यस्माद्ये(दे)षां बटूनां प्रचारं प्रसरं क्षपाटाधिपती राक्षसेश्वरोरुणद्रुद्धवांस्तस्माद्धेतोरुषावशेषे[6][7] रात्रेश्चतुर्थे यामेविषुप्तसुप्ता द्वन्द्वे अवस्कन्दभयेन[8] केचिदविषुप्ता अतिनिद्रालुत्वाच्च केचित्सुप्ता बटवो मिथः प्रश्ने। क भवानुषित इति पृच्छायां सत्यवदन्। किमित्याह। भयवान्क्षपाटेभ्यो भीतः सन्नहमिह[9] स्थानेवात्समुषितस्तथाहमिहावसं चेति। अविषुप्ता इहावात्समित्यवदन्सुप्तास्त्विहावसमित्यवदन्नित्यर्थः[10]। एतेनैषां वैयाकरणरूपतोक्ता। एतद्रोधे[11] च क्षपाटाधिपतेर्महापापिता सूचिता। बटूनां बहुत्वेपि भयवानिहावात्समित्यादावेकवचनमेकैकस्य वासापेक्षया ॥

इहावात्सम्। अत्र "रात्रौ०" [६] इत्यादिनाद्यतनी ॥ राज्यन्तयामे तु मुहूर्तमपि स्वापे ह्यस्तन्येव। इहावसम् ॥

अवदन्। इत्यत्र "अनद्यतने ह्यस्तनी[12]" [७] ॥ इति ह्यस्तनी ॥

---

१ **ए** °त्समहा°. २ **बी** °त्यदवन्मि°. ३ **ए** °वचन्मि°.

---

१ **ए** यास्तु ह्योद्य. २ **डी** °सु त्वौद्य. ३ **ए** °र्थो ह्य इ°. ४ **ए** व्यानिमि°. ५ **बी** निरुभु°. ६ **ए** द्रुहवां°. ७ **सी डी** °वांसतस्मा°. ८ **ए** °न्दच्चये°. ९ **डी** °हमह. १० **ए** °वन्नि°. ११ **ए** °द्रोध च. १२ **ए सी डी** °नी ॥ अ°.

अरुणत्क्षपाटाधिपतिः प्रचारम् । इत्यत्र "ख्याते दृश्ये" [८] इति ह्यस्तनी ॥

स्मरसीश यस्मिन्विहरिष्यसि त्वं स्मरसीदमाराद्यदखेल एणैः ।
स्मरसीदमर्चिष्यसि यच्च विप्रान्यदु दास्यसे तन्निरभञ्जि तीर्थम् ५

५. उ हे ईश स्मरसि यस्मिंस्तीर्थे विहरिष्यसि बाल्ये क्रीडार्थं विचरितवांस्तथा यस्मिंस्त्वमेणैः सहारान्नैकट्येन निकटीकृत्येत्यर्थः । यदखेलो बाल्येक्रीड इदं स्मरसि तथा यस्मिंस्त्वं यच्च विप्रानर्चिष्यसि पादप्रक्षालनादिना पूजितवान् यद्दास्यसे च विप्रेभ्यो दानं दत्तवांश्चेदं स्मरसि तत्तीर्थं श्रीस्थलपुराख्यं संप्रति सिद्धपुरेत्याख्यया प्रसिद्धं निरभञ्जि ॥

स्मरसीश यस्मिन्विहरिष्यसि । इत्यत्र "अयदि०" [९] इत्यादिना भविष्यन्ती ॥ अयदीति किम् । स्मरसीदं यस्मिन्यदखेल एणैः ॥

स्मरसीदं यस्मिन्नर्चिष्यसि । यच्च विप्रान्यद्दास्यसे । अत्र "वाकाङ्क्षायाम्" [१०] इति भविष्यन्ती वा ॥ अत्रार्चा लक्षणं दानं लक्ष्यमिति लक्ष्यलक्षणसंबन्धे प्रयोक्तुराकाङ्क्षा स्यात् । पक्षोदाहरणं ज्ञेयम् ॥

न विभो कलिङ्गाङ्गगमानृतं तद्विललाप सुप्तो यदिति ब्रुवाणः ।
स परीक्षितो यत्र निशि त्वया प्राक्तदुषाचैरैरायतनं विकीर्णम् ६

१ **ए सी डी** °स्यते त°. २ **डी** °गमोनृ°. ३ **ए सी डी** °नं प्रकी°.

१ **ए** °णक्षपा°. २ **सी डी** °पायश्रि°. ३ **ए** °तिति ह्य°. ४ **बी** विचारि°. ५ **ए सी डी** °था तस्मि°. ६ **ए** °नैकाट्ये°. ७ **डी** °सि तथा. ८ **डी** °प्राभर्चि°. ९ **ए सी डी** °क्षालादि°. १० **सी डी** यददास्य°. ११ **डी** °राख्यन्संप्र°. १२ **ए** °ख्यं प्र°. १३ **ए सी डी** °ष्यसीति । य°. १४ **ए सी डी** °काङ्क्षया°. १५ **ए** °न्ती ॥ अ°. १६ **बी** दानलक्षमि°. १७ **ए** °त् । यक्षो°. **सी डी** °त् । व्यक्षो°.

६. तदायतनं स्वयंभूरुद्रमहाकालदेवगृहं संप्रति लोके रुद्रमहालयेति[1] नाम्ना प्रसिद्धमुषाचरै[2] राक्षसैर्विकीर्णं भग्नं यत्र स कश्चिद्द्विवक्षितस्तवास्माकं[3] च[4] पूर्वत्वेन प्रसिद्धो द्विजो निशि प्राक् प्राचि काले त्वया परीक्षितः। कीदृक्सन्। ब्रुवाणः। किमित्याह। न विभो कलिङ्गाञ्जगमेति। अहो द्विज त्वया कलिङ्गेषु द्विजो हत इति[5] त्वयोक्तः[6]। किल कलिङ्गेषु हि गतमात्रोपि[7] द्विजोतिनिन्द्यत्वाच्चण्डाल[8] इव द्विजपङ्क्तेर्बाह्यः स्यात्किं पुनर्मत्सदृशो ब्राह्मणघातीत्यतितरां निन्दाभयात्कलिङ्गगमनमप्यपह्नुवान आह। हे विभो नाहं कलिङ्गान् ब्राह्मणीभूतचण्डालकान्देशभेदाञ् जगम गत एव न। एवं च ब्रह्महत्या दूरापास्तैव। ननु मया कलिङ्गेषु ब्राह्मणो हत इति त्वया सुप्तेन प्रलपितं तत्कथमिदमुच्यत इत्याह। सुप्तोहं यत्कलिङ्गेषु ब्राह्मणस्य हननं विललाप तदनृतमिति॥

सुप्तो यद्विललाप। न कलिङ्गाञ्जगम। इत्यत्र "कृत०" [११] इत्यादिना परोक्षा॥

नि[1]चकार विप्रा[2]न्ह जघान[3] शश्वद्बुभुजे स यद्वलवणो यथा वा।
इतिह न्यहञ्शश्वदभुङ्क्[4] लोकान्स खरस्तथा किं न विवेदिथैनम्॥ ७

७. तथा तादृशं द्विजाल्लोकांश्च घ्नन्तं भुञ्जानं[10] चैनं क्षपाटाधिपं किं त्वं न विवेदिथ नाज्ञासीर्यद्वद्यथा स प्रसिद्धो[11] लवणो नाम दानवो विप्रान्निचकार पराभूतवान्। ह इति संबोधने हननक्रियायां

१ डी °कारं वि°. २ ए °प्रान्जघा°. ३ डी °न श्व°. ४ ए लोखान्स.

१ सी डी °ति प्र°. २ ए °मुखाच°. ३ डी °तत्तवा°. ४ बी च स पू°. ५ ए °ति त्रयो°. ६ बी °क्तः। क°. ७ बी °पि अति°. ८ ए °जो इति°. ९ ए सी कलङ्गा°. १० ए भुजानं. ११ डी प्रद्धो°.

क्षेप[1]द्योतको वा । जघान च तथा शश्वद्बुभुजे भक्षितवांश्च । यथा वा स प्र[2]सिद्धः खरो नाम राक्षसः । इतिहे[3]ति निपातसमुदायः प्रवाद-[4]पारम्पर्ये । लोका[5]न्न्यहञ् शश्वदभुङ्क्त च ॥

किमवेत्त्वमेतत्स्मरसीश यस्यामितिहापठामोपगुरु त्रिवेदीम् ।
स्मरसीह शश्वन्न्यवसाम यस्यां रजनीचरैर्व्यापि सरस्वती सा ॥ ८ ॥

८. हे ईश एतत्त्वं [6]किमवेदज्ञासीः । यत्सा सरस्वती नदी रजनीचरैर्व्यापि । स्मरसि यस्यामुपगुरूपाध्यायसमीपे त्रिवेदीं त्रीन्वेदानितिह गुर्वाम्नायेनापठाम त्वं वयं चाधीतवन्तस्तथा स्मरसि यस्यामिह गुरुसमीपे शश्वन्न्यवसामोषिताः ॥

निचकार विप्राल्लवणः । अत्र "परो[7]क्षे" [१२] इति परोक्षा ॥

इतिह न्यर्[8]हन् । ह जघान । शश्वदभुङ्क्त । शश्वद्बुभु[9]जे ॥ प्रच्छन्ने । किमवेत्त्वमेतत् । किं न विवेदिथैनम् । अत्र "हशश्वद्०" [१३] इत्यादिना ह्यस्तनी ॥ परोक्षे वेत्येव कृते भूतानद्य[10]तनमात्रभा[11]विन्या ह्यस्त[12]न्याः पक्षे सिद्धौ ह्यस्तनीविधा[13]नं स्मृत्यर्थयोगेपि ह्यस्तन्येव यथा स्यान्न भविष्यन्त्येवमर्थम् । तेन स्मरसीश यस्यामितिहापठाम । स्मरसीह[14] शश्वन्न्यवसाम ॥

अवसच्च दुर्वासऋषिः स यस्मिन्स पुरा न्यवात्सीदथ मण्डुसूनुः ।
अवसन्पुरान्येप्यृषयो वनं तद्दलितं तदा कश्चन न ह्यरक्षीत् ॥ ९ ॥

९. [15]स्पष्टम् । किं तु तद्वनं सरस्वतीतटस्थ आश्रमविशेषः । तदा दलनकाले ॥

---

१ ए °पयोद्यो°. २ डी °सिद्धो ख°. ३ ए °तिनिपा°. ४ डी °पारः पर्ये. ५ डी °कान्नन्यह°. ६ डी किवमेद°. ७ बी °क्षेति. ८ डी °ह ज°. ९ ए डी °जे ॥ प्राच्य । कि°. १० ए सी डी °द्यनतमा°. ११ डी °विना ह्य°. १२ सी डी °स्तनीवि°. १३ ए °नं सत्य°. १४ सी डी °ह सश्व°. १५ सी डी स्पष्टः ।.

न ररक्ष नः कोपि तदा तदा च रजनीचरा[1] घ्नन्ति तुदन्ति च स्म ।
किमकृढ्वमीशं ननु कुर्महे भो इति वादिभिः सार्धमुपस्थितास्त्वाम् ॥ १० ॥

१०. तदा वनदलनकाले नोस्मान्न कोपि ररक्ष । अत एव तदा च रजनीचरा नो घ्नन्ति जघ्नुरित्यर्थः । तुदन्ति स्म चापीडयन्नत एव त्वामुपस्थिताः शरणायोपागताः । कैः सह । इति वादिभिर्मनसा त्वामीशं कृत्वैवंवदनशीलैर्बटुभिः सार्धम् । तदेवाह । अहो यूयं किमीशं रक्षकमकृढ्वं कृतवन्त इति प्रश्ने । ननु कुर्महे भोः । नन्विति पृष्टस्य प्रतिवचने । हे पृच्छका वयमीशं कृतवन्त एवेत्यर्थ इति ॥

अवसद्दुर्वासऋषिः । अत्र "अविवक्षिते" [१४] इति ह्यस्तनी ॥

न्यवात्सीत्पुरा । अवसन्पुरा । तदा न ह्यरक्षीत्[1] । तदा न ररक्ष । इत्यत्र "वाद्यतनी०" [१५] इत्यादिनाद्यतनी वा[2] ॥

तुदन्ति स्म । तदा घ्नन्ति । इत्यत्र "स्मे च०" [१६] इत्यादिना वर्तमाना[3] ॥

किमकृढ्वमीशं ननु कुर्महे[4] भोः । अत्र "ननौ०" [१७] इत्यादिना वर्तमाना ॥

समिधोच्छिदः किं बत नच्छिनद्मि कुशमच्छिदः किं भृशमच्छिदं न।
किमदर्श[2] आः क्रव्यभुजो नु पश्याम्युटजेषु नो वा[3]गिति नादुनोत्कम् ॥ ११ ॥

११. नोस्माकमुटजेषु वाग्दीनत्वा[5]त्कं नादुनोन्नादुःखयत् । कीदृशी । बतेत्यामन्त्रणे । हे मुने त्वं किं समिधोच्छिद इति प्रश्ने । आह । नच्छिनद्मि नच्छिन्नवा[6]न् । तथा[7] त्वं कुशं दर्भजातिं

१ ए °राति तु°. सी डी °राघन्ति. २ सी °र्श यः क्र°. डी °र्श याः क्र°. ३ डी °ति नोस्मा°.

१ ए °क्षीत । त°. २ ए सी वा ॥ सुद°. ३ ए °ना ॥ कम°. ४ ए °हे तोः । अ°. ५ सी °त्वा ना°. डी °त्वा किं ना°. ६ डी °वा तं कु°. ७ ए सी °था तं कु°.

किमॅच्छिद इति प्रश्ने । आह । भृशमत्यर्थं नाच्छिदमहं समिधः कुशांश्च । यत्त्वं नाच्छिदस्तत्किमाः कष्टं क्रव्यभुजो राक्षसांस्त्वमदर्श इति प्रश्ने। आह । नु इति पृष्टप्रतिवचने । पश्याम्यदर्शमित्येवंविधा ॥

किमदर्श उच्चैररुणं न्वदर्शमुदयन्नसावस्ति विराजमानः ।
समुदेष्यदर्काग्र इति ब्रुवाणाः क्षणदां क्षपामः क्षणदाचरार्ताः १२

१२. वयं क्षणदां रात्रिं क्षपामः । किंभूताः सन्तः । ब्रुवाणाः । किमित्याह । अहो त्वं किमरुणं सूर्यसारथिमरुणोदयमदर्श इति प्रश्ने । आह । न्वदर्शम् । कासावरुण इत्याह । समुदेष्यदर्काग्र उदेष्यतो रवेः प्रथमं विराजमानोरुणिम्ना शोभमानोसौ प्रत्यक्षोरुण उदयन्नस्तीति । यतः क्षणदाचरार्ताः । रात्रिंचरा हि रात्रावुपद्रवन्तीत्यरुणोदयं काङ्क्षन्त इत्यर्थः ॥

वयमत्स्यमाना रजनीचरैश्चेदिह माश्रयन्तो वत मा स्तुवानाः ।
यदि नीतिविद्वान्समयं विदंस्तान्यजमानहन्याः पवमानजौजाः १३

१३. चेद्यदि वयं रजनीचरैरत्स्यमाना ग्रसिष्यामहे तदा बतेति खेदे । इह त्वय्याधारे वयं माश्रयन्तो माश्रयणं कुर्वन्तस्तथा मा स्तुवाना मा स्तवनं कुर्वन्तस्तदा तवाश्रयणं स्तवनं च निष्फलमित्यर्थः । तस्माद्यदि त्वं नीतिविद्वान् नीतिशास्त्रेषु कोविदः समयं सिद्धान्तं विदंश्च जानन्नसि तदा हे यजमान यज्ञस्वामिंस्तान् रजनीचरान्हन्याः । यतः पवमानजौजा हनूमानिव बलिष्ठः ॥

समिधोच्छिदः किं नच्छिनश्चि । कुशमॅच्छिदः किमच्छिदं न । किमदर्शः

१ बी °मच्छद. २ ए सी डी °क्षसास्त्व°. ३ सी डी °र्शे यति. ४ ए °विधाः ॥. ५ बी °त्रिं क्षिपा°. ६ ए सी °दये का°. डी दयो का°. ७ सी °ङ्क्षत इ°. ८ बी °श्रयं कु°. ९ सी तथाश्र°. १० सी डी °मच्छदः.

क्रव्यभुजो नु पश्यामि । किमदर्शोरुणं न्वदर्शम् । अत्र "नन्वोर्वा" [१८] इति वा वर्तमाना ॥

अस्ति[१] । क्षपामः । अत्र "सति" [१९] इति वर्तमाना ॥

उदयन् । विराजमानः । ब्रुवाणाः । समुदेष्यत्[२] । अत्स्यमानाः । अत्र "शतृ०" [२०] इत्यादिना शत्रानशौ भविष्यन्तीविषयेर्थे च स्वसंहितौ ॥

माश्रयन्तः । मा स्तुवानाः । अत्र "तौ०" [२१] इत्यादिना शत्रानशौ ॥

विद्वान् । विदन् । इत्यत्र "वा वेत्तेः क्वसुः[३]" [२२] इति वा क्वसुः ॥

पवमान । यजमान । इत्यत्र "पूङ्०" [२३] इत्यादिना शानः ॥

चुलुकेषु चूलां वहमान ऐभं दलमान आत्मानमशंसमानः ।
इह धारयन्क्ष्मावलयं स को यः स्म न पाति सिद्धान्तमधीयतोस्मान्[४]
॥ १४ ॥

१४. सिद्धान्तमधीयतोकृच्छ्रेण पठतोस्मान्यो न पाति स्म न ररक्ष स इह पृथ्व्यां चुलुकेषु मध्ये चूलां शिखां वहमानोपि । अपिरध्याहार्यः । वोढुंवया अपि बालोपि कः । चौलुक्यो बालोप्यस्मान् ररक्षेत्यर्थः । कीदृक्सन् । महापुरुषत्वादात्मानमशंसमानोश्लाघनशीलस्तथातिविक्रान्तत्वादैभं गजौघं दलमानो विदारयितुं शक्तोत एव क्ष्मावलयं धारयन्नकृच्छ्रेण पालयन्नित्यर्थः ॥

यदधीयतेस्मनपि धारयन्ति बत कृच्छ्रतोमी नृप सुन्वदर्हन् ।
अनयं द्विषंस्ताननयं विधातॄन्मनुजानशितॄन्भव तन्निहन्ता ॥१५॥

१५. बत हे नृप सुन्वदर्हन् सुन्वत्सु यजमानेष्वर्हञ् श्रेष्ठत्वेन पूजार्ह यद्यस्मादमी अस्मल्लक्षणा जनाः कृच्छ्रतो राक्षसभयात्कष्टेना-

१ बी °स्ति । क्षिपा°. २ बी °ष्यन् । अ°. ३ ए डी क्वसु । प°. सी क्वसुः प°. ४ ए यस्मा°. सी डी यदयस्मा°.

धीयंते[1] पठन्त्यसूनपि प्राणानपि कृच्छ्रतो धारयन्ति तत्तस्मादनयं विधातॄन्करणशीलांस्तान्मनुजानशितॄन्[2]भक्षणधर्मांत्राक्षसान्निहन्ता साधु हिंसिता भव यतस्त्वमनयं द्विषन्। मनुजानशितॄनिति पाठस्थाने-शितॄन्मनुष्यानिति मनुजाशितॄंस्त्वमिति[3] वा पाठो यदि स्यात्तदा छन्दोभङ्गो न स्यात्। यावद्दृष्टप्रतिषु च मनुजानशितॄनित्येव पाठः ॥

चूलां वहमानः। ऐभं दलमानः। आत्मानमशंसमानः। अत्र "वैयः०" [२४] इत्यादिना शानः ॥

धारयन्। अधीयतः। अत्र "धारी०" [२५] इत्यादिनातृश्। अकृच्छ्र इति किम्। कृच्छ्रतो धारयन्ति। कृच्छ्रतोधीयते ॥

सुन्वत्। द्विषन्। अर्हन्। इत्यत्र "सुग्०" [२६] इत्यादिनातृश् ॥

विधातॄन्। मनुजानशितॄन्। निहन्ता। इत्यत्र "तृन्०" [२७] इत्यादिना तृन् ॥

प्रजनिष्णुरोचिष्णुरदभ्रभाभिः खमलंकरिष्णुः क्षितिपोसहिष्णुः।
प्रचरिष्णुरक्षांसि निराकरिष्णुर्निजगाद[1] भ्राजिष्णुरपत्रपिष्णुः १६

१६. क्षितिपो जयसिंहो मुनीन्निजगाद। कीदृक्सन्। अपत्रपि-ष्णुर्मुनिवचःश्रवणाल्लज्जालुरत एव प्रचरिष्णुरक्षांसि प्रसृमराराक्षसा-नसहिष्णुरत एव निराकरिष्णुस्तथा प्रजनिष्णुरोचिष्णुरदभ्रभाभिरुद्भ-विष्णुदीप्रदन्तकान्तिभिः कृत्वा खमलंकरिष्णुरत एव भ्राजिष्णुः ॥

ननु शान्तिवर्तिष्णुभिरुत्पतिष्णुः प्रभविष्णुवर्धिष्णुबलोन्मदिष्णुः।
जगदुत्पचिष्णुर्वियदुत्पतिष्णुर्मयि जिष्णुभूष्णौ किमुपैक्षि[2] सर्वैः १७

१७. जिष्णुभूष्णौ जिष्णोरिन्द्राद्भूष्णुरर्जुनस्तत्तुल्ये मयि सति न-

१ ए °राधारि°. २ ए° क्षित सर्वैः ॥.

१ बी °यन्ते प°. २ ए °तॄन्भिक्ष°. ३ बी °जासितॄं°. ४ सी डी व इ°.

न्वित्यक्षमायाम् । शान्तिवर्तिष्णुभिः क्षमायां स्थास्नुभिः सद्भिः सर्वैरपि भवद्भिः क्षपाटाधिपः किमुपैक्ष्युपेक्षितः । इयन्ति दिनानि ममाग्रेसौ किमिति नोक्त इत्यर्थः । कीदृक्सन् । प्रभविष्णुवर्धिष्णुबलोन्मदिष्णुरत एव वियद्व्योमोत्पतिष्णुरुत्प्लवनशीलस्तथा जगदुत्पचिष्णुः संतापनशीलः सन्नुत्पदिष्णुरुद्भवनशीलः ॥

भ्राजिष्णुः । अलंकरिष्णुः । निराकरिष्णुः । प्रभविष्णुः(ष्णु) । असहिष्णुः । रोचिष्णु । वर्तिष्णुभिः । वर्धिष्णु । प्रचरिष्णु । प्रजनिष्णु । अपत्रपिष्णुः । अत्र "भ्राजि०" [२८] इत्यादिना-इष्णुः ॥

उत्पचिष्णुः । उत्पतिष्णुः । उत्पदिष्णुः । उन्मदिष्णुः । अत्र "उदः पचि०" [२९] इत्यादिना-इष्णुः ॥

भूष्णौ । जिष्णुः(ष्णु) । अत्र "भूजेः ष्णुक्" [३०] इति ष्णुक् ॥

परिमाक्ष्णुभिः स्थाष्णु(स्नु)मनोभिरग्ला-
स्नुभिरात्मना पक्ष्णुतया भवद्भिः ।
स्थितमापदि म्लास्नुभिरद्य याव-
द्विगधि(धृ)ष्णुकं क्षेष्णुबलं ततो माम् ॥ १८ ॥

१८. ततस्तस्माद्धेतोर्मां धिक् । किंभूतं सन्तम् । अधृष्णुकं कुत्सिताप्रगल्भमप्रचण्डमित्यर्थः । तथा क्षेष्णुबलं क्षयणशीलपराक्रमम् ।

---

१ ए सी डी °माक्ष्णुभिः. २ सी डी स्थितिमा°.

---

१ बी स्थाष्णुभिः. २ ए सी डी °ष्णुः । अ°. ३ ए सी डी °चिष्णुः । व°. ४ ए सी डी °धिष्णुः । प्र°. ५ ए सी डी °रिष्णुः । प्र°. ६ ए सी डी °निष्णुः । अ°. ७ ए बी °पिष्णु । अ°. ८ बी सी °त्पदि°. ९ ए °ष्णुः । अ°. १० ए सी सतम्. ११ ए अधूष्णु°. बी अघ्रिष्णु°.

यस्माद्भवद्भिः स्थास्नुमनोभिः स्थिरचित्तैः सद्भिरद्य यावन्म्लास्नुभिर्धर्मानुष्ठानविघ्नात्परिम्लानमुखैः सद्भिरापदि कष्टे स्थितम् । किंभूतैः । परिमाक्ष्णुभिस्तीर्थजलेषु स्नानेनात्मनो विशोधकैः । तथात्मना पक्ष्णुतया स्वयंपाकितयाग्लास्नुभिर्धर्मार्थित्वेन हर्षात्स्वयंपाकिभिरित्यर्थः । यद्यहं प्रचण्डोक्षीणबलश्चाभविष्यं तदा यूयं नैवमापद्यपतिष्यत । तस्मान्मे धिक्कारोस्त्वित्यर्थः ॥

निदिदिक्षवः क्षिप्णव आशु नो यत्तदु विन्दवस्त्रस्नुकगृध्नुकं माम् ।
यश इच्छुराशंस्वशरारुभिक्षूननु वोस्मि वन्दारुरसद्रुदारुः ॥१९॥

१९. उ हे मुनयो यद्यूयमाशु मां नो निदिदिक्षवः क्षपाचरवधाय नाज्ञापयितुमिच्छवोभवत । न च क्षिप्णवः प्रेरणशीला अभवत तन्मन्ये मां त्रस्नुकगृध्नुकं विशेषणकर्मधारये कुत्सितंभीरं(रुं ?) कुत्सितलोभिनं च यूयं विन्दवो ज्ञातारोभवत । न च वाच्यं वयमिदं सत्यं विन्दव इति । यतो नन्वित्यामन्त्रणेनुनये वा । अस्म्यहं यश इच्छुः सन्वो युष्मान् वन्दारुरभिवादकः । एतेन स्वस्यागृध्नुतोक्ता । तथासद्रुरखिद्यमानः सन्दारुः पालयिता च । एतेन चात्रस्नुतोक्ता । यतः किंभूतान्वः । आशंसवो धर्मविद्यानुपघातादिमिच्छवोशरारवः स्वयमहिंसनशीलाश्च ये भिक्षवो भिक्षाचरास्तान् ॥

जनधारुसेरुः स्वयमेष शद्रुः पतयालुको दीर्घतरं शयालुः ।
इति वा भवद्भिः स उपैक्षि धर्मगृहयालुश्रद्धालुदयालुचित्तैः ॥२०॥

---

१ ए सी डी °रुशेरुः. २ सी डी °गृहालु°. ३ डी °लुचि°.

---

१ सी डी स्थाष्णुम°. २ ए सी डी °वन्माष्णुभि°. ३ डी °माष्णुभि°. ४ बी ततस्तस्मा°. ५ ए बी सी धिक्कारो°. ६ ए सी डी °र्थः । मिदि°. ७ ए सी डी नो मिदि°. ८ ए °स्नुकं गृ°. ९ बी °तलो°. १० ए बी °नुकघा°.

२०. एष क्षपाटेशः स्वयमेव शद्रुः स्वपापैरेव क्षयं यास्यति तथा पतयालुरु(लुक उ)च्चपदात्पतिष्यति तथा दीर्घतरं शयालुर्मरिष्यति च । "सत्सामीप्ये सद्वद्वा" [५. ४. १.] इति भविष्यत्यपि[1] प्रत्ययाः । कीदृक्सन् । जनधारुसेरुर्जनान्भक्षयै[2]न्बध्वंश्च[3] । इति वेति हेतोर्वा स क्षपाटाधिपो भवद्भिरुपैक्ष्युपेक्षितः । यतः किंभूतैः । धर्मं गृह्[4]-याल्ूनि ग्रहणशीलानि[5] श्रद्धालूनि श्रद्धाशीलानि दयालूनि च चित्तानि येषां तैः ॥

मृगयाल्वनिद्रालुचरैर[1]तन्द्रालुभिरस्तु नो यैरिदमप्यबोधि ।
धिग्वाव[2]हिः श्रीस्पृहयाल्वहं दोर्यदु सासहिश्चाचलिपा[3]पतिं तम्
॥ २१ ॥

२१. अतन्द्रालुभिर्निरालस्यैर्मृगयाल्वनिद्रालुचरैर्मृगयालवः सकल-पृथ्व्याचरणान्वेषणशीला अत ए[6]वानिद्रालवो जागरूका ये चरास्तै-रस्तु सृतम् । यैश्चैररिदमपि राक्षसकृतं युष्माकमुपद्रवणमपि नो अबोधि मम[7] न ज्ञापितम् । अथैतस्य दोषस्य मूलकारणं स्वमेव नि-न्दति । उ हे मुनयोहमेव धिक्कृतः । कीदृक्सन् । श्रीस्पृहयालु विज-यलक्ष्म्या अभिलाषुकं दोर्बाहुं वावहिरत्यर्थं धारयिता । यद्यस्मादहं[8] तं क्षपाटाधिपं सासहिरशि[9]क्षणेनात्यन्तं सहनशीलोभवम् । किंभूतं[10] तम् । चाचलिपापतिं युष्माकमुपद्रवायात्यर्थं[11] चलनशीलं धात्यात्यर्थं [12]पातुकं च ॥

---

१ ए °यालुनि°. २ ए सी डी °वहि श्री°. ३ ए °पाति त°.

---

१ ए °विष्यपि. सी डी °विष्येपि. २ सी °क्षन्वधरां । इ°. डी °क्षन्वधंश । इ°. ३ ए °यन्वधंश्च ।. ४ सी डी गृहालू°. ५ सी °नि द°. ६ ए एव नि°. ७ सी °म ज्ञा°. ८ बी °हं क्ष°. ९ ए सी डी °क्षणान्नात्य°. १० सी °तं चा°. ११ सी °र्थं धातु°. डी °र्थं पा°. १२ बी पातकं.

स्थास्नु । अग्लास्नुभिः । म्लास्नुभिः । पक्ष्णु । परिमाक्ष्णुभिः[1] । क्षेष्णु । अत्र "स्थाग्ला०"[2] [३१] इत्यादिना[3] स्नुः ॥

त्रस्नुक । गृध्नुकम् । धृष्णुकम्[4] । क्षिप्णवः । अत्र "त्रसि०" [३२] इत्यादिना क्नुः[5] ॥

निदिदिक्षवः । भिक्षून्[6] । आशंसु । इत्यत्र "सन्०" [३३] इत्यादिना-उः ॥

विन्दवः । इच्छुः । इत्येतौ "विन्दिच्छू" [३४] इति निपात्यौ ॥

शरारु । वन्दारु(रुः) । इत्यत्र[7] "शृ०" [३५] इत्यादिना-आरुः[8] ॥

दारुः । धारु । सेरुः[9] । शद्रुः । असद्रुः(द्रु) । अत्र "दाधा०(धे०)"[10] [३६] इत्यादिना रुः ॥

शयालुः । श्रद्धालु । निद्रालु[11] । अतन्द्रालुभिः । दयालु । पतयालुकः । गृहयालु[12][13] । स्पृहयालु । इत्यत्र "शीङ्०" [३७] इत्यादिना-आलुः ॥

सासहिः । वावहिः[14] । चाचलि । पापतिम्[15] । एते "डौ०(डो ?)" [३८] इत्यादिना निपात्याः ॥

विनयं दधौ नेम्युपचक्रिसस्रौ क्षितिभृद्गणे यन्न हि जज्ञ्यधिज्यम्[1] ।
शरवर्षुकं तन्मम धन्व तस्मिन्नभिभावुकस्थायुकघातुकेऽस्तु ॥ २२ ॥

२२. तद्धन्व तस्मिन्क्षपाटाधिपे शरवर्षुकमस्तु । यतः किंभूते । अभिभावुको मुन्यादीनामभिभवनशीलो यः स्थायुकेषु[16] रोगादिनाजङ्गमेषु घातुकस्तस्मिन् । यन्मम धन्व क्षितिभृद्गणे नृपौघविषये न हि

---

१ ए जज्ञधि°.

---

१ सी डी °माक्ष्णुभिः. २ डी स्थाम्ला इ°. ३ ए सी डी °नाम्नुः । अत्र°. ४ सी डी अध्वष्णु°. ५ बी क्नुः । नदि°. ६ ए भिक्ष्णून्. सी डी भिक्ष्णुन्. ७ डी °त्र शी°. ८ ए आरु । दारः । धा°. ९ ए सी सेरु । श°. १० बी दाधिला°. ११ ए °द्रालुः । अ°. १२ सी गृहालु. १३ ए °यालुः । स्पृ°. १४ ए सी °वहि । चा°. १५ ए °पत । ए°. सी डी °पति । ए°. १६ ए स्थायुःके°. बी स्थायिके°.

नैवाधिज्यं जज्ञि भवनशीलं यतो[1] मम विनयमभ्युत्थानादि दधौ कर्तरि तथा नेम्युपचक्रिसस्रौ नेमौ नन्तर्युपचक्रावुपकर्तरि सस्रौ गन्तरि मां सेवितरीत्यर्थः ॥

रिपुशारुको मे जयलक्ष्मिकामुक्यभिलाषुकोसावुपपादुकोसिः ।
अभिगामुकोत्पातुकराक्षसास्रैः क्षितिमण्डनो मङ्क्षुजभूषणोस्तु ॥ २३ ॥

२३. असौ मङ्क्षुजभूषणोसिरभिगामुका बलावलेपात्संमुखागामिन उत्पातुका उत्पतनशीला ये राक्षसास्तेषामस्रै रक्तैः कृत्वा क्षितिमण्डनोस्तु गलद्भिः शोणितबिन्दुभिर्भूमिं भूषयत्वित्यर्थः । कीदृक्सन् । मे जयलक्ष्मिकामुक्यभिलाषुको जयश्रीकामिन्या इच्छुरत एव रिपुशारुकः शत्रूणां हिंस्रोत एव चोपपादुको युक्तः श्रेष्ठ इत्यर्थः ॥

न न कोपनः क्रोधन एव तेषु न न गर्धनः संलषणो जयस्य ।
सरणोस्मि तस्मिञ्जवनैर्हयैरित्यभिधाय सोतिज्वलनोभ्युदस्थात् ॥ २४ ॥

२४. अतिज्वलनः कोपेन प्रतापेन वातिदीप्रः सन्स नृपोभ्युदस्थात् । किं कृत्वा । अभिधाय । किमित्याह । अस्म्यहं जवनैर्वेगवद्भिर्हयैः कृत्वा तस्मिन् राक्षसेशविषये सरणः साधु गन्ता । कीदृक्सन् । जयस्य न न गर्धनो लिप्सुः किं तु संलषणो लिप्सुरेवात एव तेषु राक्षसेषु न न कोपनः किं तु क्रोधन एवेति ॥

---

१ **ए सी डी** °मुकाभि°. २ **ए** °पादुको°. ३ **डी** °रिच्चल°.

---

१ **ए** °तो सम वि°. २ **ए सी डी** °पधाक°. ३ **ए सी डी** उज्जीवन°. ४ **ए सी डी** °न् । विज°. ५ **ए सी डी** °मुकोभि°. ६ **बी** °शारकः. ७ **ए** रा-श°. **सी डी** राक्षसवि°. ८ °गन्तः । की°.

अविशोचनैरापतनैः समं तैश्चलनः स लीलापदनः प्रतस्थे ।
अविकम्पनः सज्जितशब्दनेभान् रवणाश्वसैन्यान्वदिता चमूपान्
॥ २५ ॥

२५. स नृपः प्रतस्थे । कीदृक्सन् । निर्भीकत्वादविकम्पनोत एव लीलापदनो लीलायाः सेविता सविलास इत्यर्थः । तथाविशोचनैर्नृपेणाश्वासितत्वाच्छोकरहितैरापतनै राक्षसान्दर्शयितुं साध्वागच्छद्भिस्तैस्तापसैः समं रक्षोवधाय चलनोत एव चमूपान्वदिताकारयिता । किंभूतान् । सज्जिताः प्रगुणीकृताः शब्दना[1] जयसूचकत्वाद्बृंहितकरणशीला[2] इभा यैस्तान् । तथा रवणं जयसूचित्वाद्धेषणशीलमश्वसैन्यं येषां तान् ॥

सस्रौ । उपचक्रि । दधौ । जज्ञि । नेमि । इत्येते "सस्रि०" [३९] इत्यादिना निपात्याः ॥

शारुकः । कामुकी[3] । अभिगामुक । घातुकः(के) । वर्षुकम् । अभिभावुक[4] । स्थायुक । इत्यत्र[5] "शृकम०" [४०] इत्यादिनोकण् ॥

अभिलाषुकः । उत्पातुक । उपपादुकः[6] । इत्यत्र "लष०" [४१] इत्यादिनोकण् ॥

भूषणः । मण्डनः । क्रोधनः । कोपनः । जवनैः । सरणः । गर्धनः । ज्वलनः । अविशोचनैः[7] । संलषणः । आपतनैः । पदेरिदित्वादुत्तरेणैव[8][9] सिद्धे सकर्मकार्थं वचनम् । लीलापदनः । अत्र "भूषा०" [४२] इत्यादिना-अनः ॥

---

१ ए शब्दिता ज°. डी शब्दिना ज°. २ डी °रणाशी°. ३ सी °मुका । अ°. ४ बी सी °वुकः । स्था°. ५ बी °त्र सृक°. ६ ए °पादुके । इ°. सी डी °पादुके । इ°. ७ बी विशौच°. ८ सी डी पदैरि°. ९ डी °रेणेव.

चलनः । अविकम्पनः । शब्दन । रवण । इत्यत्र[1] "चाल०" [४३] इत्यादिना-अनः ॥ अकर्मकादिति किम् । चमूपान्वदिता ॥

अनिवर्तनस्पर्धनचेतना द्रागजुगुप्सना[1] भावयितार आजौ ।
अभिसूदितृक्रूयितृदीपितारो रणदीक्षितारोस्य बभुश्चमूपाः ॥२६॥

२६. अस्य राज्ञश्चमूपाः सेनान्यो बभुः । किंभूताः सन्तः । अनिवर्तनाः कुलीनत्वाच्छूरत्वाच्च रणान्न निवर्तनशीलाः स्पर्धनाः शत्रुभिः सह स्पर्धनशीलाश्चेतना ज्ञातारः कलाकुशला इत्यर्थः । एषां विशेषणकर्मधारयः । अत एव रणदीक्षितारो रणोस्माभिः कार्य एवेति रणविषये गृहीतव्रता अत एवाजावजुगुप्सनाः[2] श्लाघनाः सन्तो द्रागभावयितारः प्रापणशीला अत एव चाभिसूदितारः शत्रून्हिंसितारः क्रूयितारः सिंहनादं कर्तारो दीपितारस्तेजसा दीप्ताश्च ॥

स्पर्धन । अनिवर्तन । इत्यत्र "इङ्गित०" [४४] इत्यादिना-अनः[3] ॥ णेरतश्च[4] विषय एव लोपे व्यञ्जनान्तत्वादिहापि स्यात् । चितिण् । चेतनाः । अजुगुप्सनाः ॥

भावयितारः । क्रूयितृ । सूदितृ । दीपितारः । दीक्षितारः । अत्र "न णिङ्य०"[5] [४५] इत्यादिना नानः ॥

बलपृष्ठभूचङ्क्रमणा भयेन भवदाश्रमो[2]द्दन्द्रमणः क्व सोद्य ।
क्व[3] नु यायजूकेषु स दन्दशूकः क्व नु जञ्जपूकेषु स दन्दहूकः २७
अनिजागदूकेष्वपि[4] तापसौघेष्विति वावदूका रिपुपम्पशूकाः ।
अभिपापयूका युदनानशूका जयजागरूकाः सुभटा ववल्गुः २८

१ ए °जुगप्स°. २ ए डी °वताश्र°. ३ ए बी क्व न या°. ४ ए सी डी °गडूके°.

१ ए डी °त्र भाल°. २ ए एवजा°. बी एव चाजा°. ३ सी °नान । णे°. डी °नान णोरित°. ४ बी °नः । णेर°. ५ ए सी डी णिङेत्या°.

२८. सुभटा ववल्गु[१]र्युद्धाय ननृतुः । कीदृशाः सन्तः । अनिजागदूकेष्वपि[२] रक्षोभयादत्यर्थमवदनशीलेष्वपि तापसौघेषु विषय इतीदं वावदूका अत्यर्थं वक्तारो यथा भयेन रक्षोभीत्या हे बलपृष्ठभूचङ्क्रमणाः[३] सैन्यात्पश्चाद्भूभागे कुटिलं गन्तारो भवदाश्रमोदन्द्रमणो युष्मदाश्रमेषूत्प्राबल्येन विनाशनेच्छया कुटिलं गमनशीलः स क्षपादेशोद्य क्वास्ति । तथा यायजूकेषु[४] विषये दन्दशूको मृत्युहेतुत्वादिनाहितुल्यः स क्व[५] नु । तथा जञ्जपूकेषु रक्षोभयाद्गर्हितं जपत्सु योगिषु विषये दन्दहूको निर्दयं[६] दहन् गर्ह्यं दहनशीलः[७] स क्व न्विति । तथा जयजागरूका विजय उद्यमिनोत एव युदनानशूका रणादनंष्टारोत एव च रिपुपम्पशूकाः शत्रूणामत्यर्थं बाधनशीला अत एव चाभिपापयूका अयिवयिपयीत्यादिदण्डकधातुः । कुटिलं संमुखं गन्तारः ॥

उदन्द्रमणः[८] । चंक्रमणाः[९] । अत्र "द्रम०" [४६] इत्यादिना-अनः ॥

यायजूकेषु[१०] । जञ्जपूकेषु । दन्दशूकः[११] । वावदूकाः । अत्र "यजि०" [४७] इत्यादिनोकः ॥ अन्येभ्योपीति केचित् । दन्दहूकः । अभिपापयूकाः[१२] । अनिजागदूकेषु[१३] । अनानशूकाः[१४] । पम्पशूकाः ॥

जागरूकाः । अत्र "जागुः" [४८] इत्यूकः ॥

शमिदम्यनुन्मादिषु योगिषूच्चैर्न तमी क्लमी श्रम्यजनि भ्रमी वा ।
क्षमिभागिणि त्यागिनि रागिणि क्ष्माभुजि वीक्ष्य तं द्वेषिविधाय यत्नम्
॥ २९ ॥

---

१ बी °ल्गुर्युद्धाय. २ ए सी डी °गद्रूके°. ३ ए सी डी °ष्ठच°. ४ डी याजग्जूके°. ५ डी क्व त°. ६ बी °र्दयदहनाद्गर्ह्यं. ७ ए सी डी °लः क्व. ८ बी °न्द्रमाणः. ९ डी चक्रम°. १० डी याजग्जूके°. ११ सी °कः । अ°. १२ डी अनिपा°. १३ ए सी डी °गद्रूके°. १४ सी डी °काः । जा°.

२९. शमिषु जितेन्द्रियेषु दमिषु तपःक्लेशसहेष्वनुन्मादिषु निरहंकारेषु योगिषु[1] मुनिषु मध्ये कोपि नाजनि । कीदृक् । तमी रक्षोभयेन मनःपीडावान् । क्लमी धात्वपचयवान् । श्रमी[2] खेदवान् । भ्रमी वा मूर्छावान्वा । किं कृत्वा । क्ष्माभुजि जयसिंहे द्वेषिवधाय तं यत्नमादरं वीक्ष्य । किंभूते । क्षमिभागिणि क्षमिणो मुनीनाश्रयितरि तथा त्यागिनि दातरि तथा रागिणि मुनिष्वनुरागिणि ॥

अथ दोषिणां द्रोह्यवनेः स भोगी यमुनां नु दोही हरिरापगां ताम् ।
भृशमापदाक्रीड्युपतीर्थमामोष्यभिसर्पदभ्यादिकघात्युपाटाम्[1] ३०

३०. यथा दोही दोहनशीलो गोपवेषधारी हरिर्विष्णुर्यमुनामापत्तथावनेर्भोगी रक्षिता स जयसिंहस्तां[3] राक्षसाक्रान्तत्वेनोक्तामापगां भृशमापत् । कीदृक्सन् । दोषिणामन्यायिनां रक्षसां द्रोही जिघांसुरत एवोपतीर्थमवतारसमीप[4] आक्रीडी रन्ता सरस्वत्यां[5]स्तीर्थे[6] प्रापेत्यर्थः । किंभूताम् । आमोषिणश्चौरा[7] अभिसर्पन्तोभिमुखं गच्छन्तोभ्यादिकघातिनोभ्याघातिनोभिमुखमाहन्तार[8] उपाटा[9] राक्षसा यस्यां[10] ताम् ॥

शमि । दमि । तमी । श्रमी । भ्रमी । क्षमि । अनुन्मादिषु । क्लमी । इत्यत्र "शम०" [४९] इत्यादिना घिनण्[11] ॥

---

१ ए °दिघात्युषष्टाम्.

---

१ सी °षु म°. २ सी डी °मी स्वेद°. ३ बी °स्तां रक्ष°. ४ ए °मीपी आ°. सी डी °मीपं आ°. ५ सी °स्वत्यां तीर्थे. डी °स्वत्यां तीर्थ प्रा° ६ ए °त्या तीर्थे. ७ ए °रा आभि°. ८ डी °नोभ्याघातिनोभि°. ९ ए उटाटा. १० ए यस्या ता°. बी यस्याम् ॥. ११ ए बी घिनिण्. सी घिनेण्.

योगिषु । भोगी । भागिणि । त्यागिनि । रागिणि । द्वेषि । दोषिणाम्[1] । द्रोही । दोही । अभ्याघाती । इत्यत्र "युजभुज०" [५०] इत्यादिना घिनण्[2] ॥

आक्रीडी । आमोषि । इत्यत्र "आङः" [५१] इत्यादिना घिनण्[3] ॥

न्यवसत्स आयामिभुजः प्रयामी शमिनामनायासिबलोप्रयासी[1] ।
द्विषतां प्रमाथी रभसप्रलापिव्यपशङ्कविद्राविबटौ तटेस्याः ॥३१॥

३१. स जयसिंहोस्याः सरस्वत्यास्तटे न्यवसत्[4] । कीदृक् । आयामिभुजो दीर्घबाहुस्तथा शमिनां यतीनामपि मध्ये प्रयामी प्रकर्षेण संयमी तथानायासिबलोखिलसैन्योचितभक्ष्यपेयोपेतभूभागत्वेनाखिद्यमानसैन्योत[5] एवाप्रयास्यखिद्यमानोत एवं[6] च द्विषतां प्रमाथी । कीदृशे[7] तटे । रभसेन[8] हर्षादौत्सुक्येन प्रलापिनो वदनशीला[9] व्यपशङ्का निर्भया[10] अत एव विद्राविणो विचरिष्णवो बटवो यत्र तस्मिन्[11] ॥

तदुदैक्ष्यप्रद्रावि बलं प्रसारि परिसारिनागालि विसारिवाहम् ।
मुनिवृन्दसंपर्कि निशाचरैः संत्वरिभिः क्रुधा संज्वरिभिः क्षणेन ३२

३२. स्पर्ष्टम्[12] । किं त्वप्रद्रावि स्थास्नु । प्रसारि प्रसृमरम् । क्षणेन शीघ्रं क्रुधा संज्वरिभिरात्मानं संतापयद्भिरत एव संत्वरिभिर्युद्धायात्मानं संत्वरयितृभिः[13] ॥

परिवादि संज्वारि विसर्गिसंसर्ग्यनुवादि[2] संवादि विवादि चोच्चैः ।
कथितं प्रवादि क्षणदाचरैस्तैरथ तद्बलं बर्बरकाय[3][4] नेत्रे ॥ ३३ ॥

१ ए °नाया°. २ ए °र्गिपूंस°. डी °र्गिस्वंस°. ३ डी बर°. ४ बी °र्वका°.

१ ए °ही । वाही. २ ए घिनिण्. ३ ए बी घिनिण्. ४ ए सी डी न्यवीविशत्. ५ ए °मानो. ६ बी °व द्वि°. ७ डी °दृशि त°. ८ डी रसे°. ९ ए °शीलोप्यप°. १० ए बी °या त°. ११ डी °न् ॥ यदु° १२. सी डी °ष्टः ।. १३ ए °रयतृ°.

३३. अथ तद्वलं तै राक्षसैर्बर्बरकाख्याय नेत्रे स्वस्वामिने कथितम् । किंभूतम् । परिवादि रक्षसां दूषणशीलं संज्वारि कोपेन संतपनशीलं तथा विसर्गिसंसर्गि त्यागिभिर्युक्तम् । एतेन वृत्त्यविच्छेदभणनेन स्वामिकार्य एव तत्परत्वं सूचितम् । तथानुवाद्येकत्र स्थान एवमेवं राक्षसा हनिष्यन्त इत्यादौ कैश्चिद्भटैरुक्तेनु पश्चाद्वदनशीलमेकत्र च स्थाने संवादि रक्षोवधाद्युपायविषये मिथः संवदनशीलं कुत्रापि चोच्चैरत्यन्तं विवादि चाहो भवद्भिः कथमुक्त राक्षसा हन्तुं न शक्यन्ते यतस्ते ममाग्रे क इत्यादिविवदनशीलं कुत्रापि प्रवादि दर्पात्प्रकर्षेण वदनशीलं सिंहनादं कर्त्रित्यर्थः ॥

प्रयामी । आयामि । अप्रयासी । अनायासि । इत्यत्र "प्राच्च०" [५२] इत्यादिना घिनि(न)ण् ॥

प्रमाथी । प्रलापि । इत्यत्र "मथलपः" [५३] इति घिनण् ॥

विद्रावि । प्रद्रावि । इत्यत्र "वेश्च द्रोः" [५४] इति घिनि(न)ण् ॥

विसारि । परिसारि । प्रसारि । इत्यत्र "विपरि०" [५५] इत्यादिना घिनि(न)ण् ॥

संपर्कि । संज्वारि । इत्यत्र "समः०" [५६] इत्यादिना घिनि(न)ण् ॥ केचिण्णयन्तादपीच्छन्ति । संज्वरिभिः ॥ त्वरयतेरपि कश्चित् । संत्वरिभिः ॥

संसर्गि । विसर्गि । इत्यत्र "संवेः सृजः" [५७] इति घिनण् ॥

संवादि । परिवादि । अनुवादि । विवादि । प्रवादि । इत्यत्र "संपरि०" [५८] इत्यादिना घिनि(न)ण् ॥

---

१ **ए सी डी** °द्येदेक°. २ **ए** °श्चिद्भाटैरक्ते°. **सी** °श्चिद्भाटै°. ३ **बी** शक्यन्ते. ४ **बी** °दि व°. ५ **ए सी डी** °थयपः. ६ **ए सी डी** घिनिण । वि°. ७ **डी** °वि । इ°. ८ **डी** °रि । प्र°. ९ **सी** °रि । इ°. १० **सी डी** °त्र मथयप इति ना°. ११ **ए डी** घिनिण्. **सी** घिण्. १२ **सी** दि° । अ°.

अविवेकिधुर्योथ स तान्विकत्थी
प्रविकासिविश्रम्भिविलासिनीयुक् ।
प्रविकाषिद्रंष्ट्रो न्यदिशद्विघाती
समितेर्विलाषी नृपलापलाषी ॥ ३४ ॥

३४. प्रविकासिन्यो रूपादिना साधु शोभमाना विश्रम्भिण्यो विश्वासस्थानं या विलासिन्यः सातिशयविलासा नायिकास्ताभिर्युग् युक्तोकुतोभयत्वाद्रतिसुखावगाढ इत्यर्थः । नृपलापलाषी नरमांसाभिलाषी राक्षसः स बर्बरकोथागतबलश्रवणानन्तरं तान्राक्षसान्यदिशद्रणायाज्ञापयत् । कीदृक्सन् । अविवेकिधुर्योत एव विकत्थ्यात्मबहुमानीत्यर्थः । तथा विघाती शत्रून्हन्तात एव समिते रणस्य विलाषीच्छुरत एव कोपावेशात्प्रविकाषिण्यो मिथो घर्षणशीला द्रंष्ट्रा यस्य स तथा ॥

समराभिलाषी सरितीह संवास्ययमस्तुराण्मृत्युपथप्रवासी ।
इतिवादिनस्ते दधिरेतिचार्यव्यभिचारिसंचार्यपचारिणोस्त्रम् ३५

३५. ते बर्बरादिष्टा राक्षसा अस्त्रं दधिरे । कीदृशाः । अतिचारिणो हिंसादिपापकर्मकारिणोव्यभिचारिणः स्वामिन्यद्रोहिणः संचारिणश्च मिथः प्रीतत्वात्सहचारिणो येपचारिणोपकृष्टमुनिवधाद्यनुष्ठानास्ते तथा । तथेतिवादिनः । तथा हि समराभिलाष्यत एवेह सरिति

१ डी °विस्तम्भि°. २ ए °म्भिला°. ३ ए °लापला°.

१ बी °काशिन्यो. २ बी विस्रम्भि°. ३ ए °नं षा वि°. सी °नं थोषा वि°. डी °नं पोषा वि°. ४ ए सी डी नायका°. ५ बी °र्युक्तो°. ६ ए सी डी °सानादि°. ७ डी रणेस्य. ८ ए °च्छुः स ए°. सी डी °च्छु स ए°. ९ ए °दृशाति°. सी °दृशौति°. डी °दृशोति°.

सरस्वत्यां संवासी स्थातायं राड् जयसिंहो मृत्युपथप्रवासी यममार्गावस्थाय्यस्त्विति ॥

अभिचारिणो विश्वविरोधिसंरोध्य[1]वरोधिनः स्वाम्यनुरोधिनस्ते ।
परिदाहिवक्त्राग्निविदाहिनो द्राक्परिमोहृषिस्त्रीपरिदेविनोभुः ३६

३६. ते राक्षसा द्रागभिचारिणो रणायाभिमुखमागन्तार[1]: सन्तोभुः । किंभूताः । विश्वविरोधिनां समस्तवैरिणां ये संरोधिनोतिबलिष्ठत्वात्प्रतिबन्धकास्तेषामप्यवरोधिनः प्रतिबन्धकास्तथा स्वाम्यनुरोधिनः स्वामिन्यनुकूलास्तथा दिव्यश[2]क्त्युपेतत्वात्परिदाहिना सामस्त्या[3]दहनशीलेन वक्त्राग्निना मुखान्निः[4]सरता वह्निना विदाहिनस्तथा परिमोहिन्यः स्वभर्तृस्नेहला या ऋषिस्त्रियस्तासां परिदेविनस्तत्पतिवधेन विलापयितारः ॥

अविवेकि । विकत्थी । विस्र[5](श्र)म्भि । प्रविकाषि[6] । प्रविकासि । विलासिनी । विघाती । इत्यत्र "वेर्विच०" [५९] इत्यादिना घिनण्[7] ॥

विलाषी । अपलाषी । अभिलाषी । इत्यत्र "व्यप०" [६०] इत्यादिना घिनण्[8] ॥

संवासी । प्रवासी । इत्यत्र[9] "संप्राद्वसात्" [६१] इति घिनण्[10] ॥

संचारि । अ[11]तिचारि । अपचारिणः । अभिचारिणः । अव्यभिचारि । इत्यत्र "समति०" [६२] इत्यादिना घिनण्[12] ॥

---

१ **ए** °ध्यविरो°.

---

१ **ए सी** °न्तार स° **डी** °न्तारं स°. २ **ए** °शत्तयपे°. ३ **सी डी** °स्त्यादह°. ४ **ए** °सरिता. ५ **ए डी** °स्भिः । प्र°. ६ **सी** °कासि । वि°. ७ **ए बी** घिनिण्. ८ **ए बी** घिनिण्. ९ **ए** °त्र वेर्विचेत्यादिना घिनिण् । संवासी । प्रवासी । इत्यत्र संप्रा°. १० **ए बी** घिनिण्. ११ **ए** अप°. १२ **ए** घिनिण्.

संरोधि । अनुरोधिनः । विरोधि । अवरोधिनः । अत्र "समनु०" [६३] इत्यादिना घिनण्[1] ॥

विदाहिनः । अत्र "वेर्दहः" [६४] इति घिनण्[2] ॥

परिदेविनः । परिमोहि । परिदाहि । इत्यत्र "परेर्॰" [६५] इत्यादिना घिनण्[3] ॥

रजसां परिक्षेप्यनिलो द्रुपर्णैः परिराटिभिर्द्राक्परिराटकोथ ।
परिवादको घोर्वयसां परिक्षेपकहिंसकक्लेशक[1]खादकोभूत् ॥ ३७ ॥

३७. अथ राक्षसानां रणायाभिमुखगमनानन्तरमनिलो वायुर्द्राग-भूत् । कीदृक् । रजसां परिक्षेपी तीव्रत्वेन सर्वतः क्षेप्ता । तथा परिराटिभिस्तीव्रवातवशेन खरस्वरत्वाद्रक्षसां राटिं ददानैरिव द्रुपर्णैः कृत्वा परिराटको राटिदान[4]शील इव तथा घोर्व्योम्नः[5] परिवादको ध्वनयिता[6] तथा वयसां पक्षिणां परिक्षेपकहिंसकक्लेशकखादकः । रक्ष-सामरिष्टसूचको वायुर्वात इत्यर्थः ॥

प्रचुलुम्पका[2]सूयकनिन्दकव्यादिकभाषकैस्तीर्थ[3]विनाशकैर्भूः ।
परिदेवकाक्रोशकयुद्धकण्डूयितृभिर्निशाटैरचलच्चलद्भिः ॥ ३८ ॥

३८. निशाटैश्चलद्भिः सद्भिर्भूरचलच्चकम्पे । कीदृशैः । प्रचुलुम्पका मुनीनामुच्छेदिनोसूयका मत्सरिणो निन्दकाश्च ये व्यादिकभाषका[7] व्याभाषका विरुद्धवादिनस्तैः । तथा[8] तीर्थविनाशकैस्तथा परिदेवकानां हा दैवाधुना[9] कथं भविष्याम इति विलापिनां भीरूणामित्यर्थः । आक्रो-

---

१ डी °कस्वाद°. २ ए °लुपका°. ३ ए डी °स्तीर्थवि°.

---

१ ए बी घिनिण्. २ ए बी घिनिण्. ३ ए बी घिनिण्. ४ डी राटिंदा°. ५ ए सी डी द्योव्योम्नः. ६ डी ध्वनयि°. ७ बी °भाषिका. ८ डी °था प°. ९ ए डी °वानाधु°.

शका आक्षेप्तारो ये युद्धकण्डूयितारो[1] रणे कण्डूयावन्तो रणेच्छव इत्यर्थस्तैः । रक्षसामरिष्टसूची भूमिकम्पोभूदित्यर्थः ॥

परिक्षेपी । परिराटिभिः । अत्र[2] "क्षिपरटः" [६६] इति घिनण्[3] ॥

परिवादकः । परिक्षेपकः[4](क) । परिराटकः । अत्र "वादेश्च णकः" [६७] इति णकः ॥

निन्दक । हिंसक[5] । क्लेशक[6] । खादकः । विनाशकैः । व्याभाषकैः । असूयक[7] । प्रचुलुम्पक । इत्यत्र "निन्दहिंस०" [६८] इत्यादिना णकः ॥ अनेकस्वरत्वादेव[8] सिद्धेसूयग्रहणं कण्ड्वादिनिवृत्त्यर्थम् । तेन कण्डूयितृभिः ॥

देवृ[9] । देवीति दीव्यतेर्देवतेर्वा[10] ण्यन्तस्य च । परिदेवक[11] । आक्रोशक । इत्यत्र "उपसर्गाद्[12]०" [६९] इत्यादिना णकः ॥

क नु सोस्ति जल्पाकवराकभिक्षाकसखोद्य लुण्टाक इति ब्रुवाणैः[1] ।
निरवर्षि कुट्टाकभुजैस्तदा तैः प्रसविप्रजव्यत्यायिभिः[2] शिलौघः[3] ३९

३९. तदा तै राक्षसैः शिलौघो निरवर्षि । किंभूतैः सद्भिः । ब्रुवाणैः । किमित्याह । जल्पाका वाचाला[13] वराका अकिंचित्करा ये भिक्षाका मुनयस्तेषां सखा[14] स जयसिंहो लुण्टाकश्चौरोद्य[15] क न्वस्ति । अद्य न जीवत्येवेत्यर्थ इति । तथा कुट्टाकभुजैस्तथा प्रसविनः शि-

१ डी °वाणः । नि°. २ डी °व्यत्येयि°. ३ ए °यिनिः शिलोघः.

१ ए °ण्डूया°. २ ए सी डी °त्र क्षप°. ३ ए बी घिनिण्. ४ डी °रिरा°. ५ डी °सकः । क्ले°. ६ ए °शकः । स्वाद°. सी °शकः । सखाद°. डी °शकः । सखादयकः. ७ डी °यकः । प्र°. ८ डी °देक सि°. ९ ए देवी°. १० ए डी °तेदोव°. ११ ए सी डी °वका । आ°. १२ डी °र्गादिना. १३ ए वा--वराका कि°. सी डी वाला. १४ बी °खा ज°. १५ ए °रोद्द क न्व.

लादिप्रेरणशीलान्प्रजविनश्च वेगवतश्च भटानतियन्त्यतिप्रेरकत्वादति-[1] वेगवत्वाच्चातिशेरत इतिशीला ये तैः ॥

परिभव्यनादर्यसमाक्षयित्विङ्गमिवंक्रजय्यभ्यमिघस्मरैस्तैः[1] ।

पिशिताद्मरैरव्यथिभिर्द्रुषण्डं सृमरैः सरिद्विश्रयि चात्र मुक्तम् ॥४०॥

४०. तैः पिशिताद्मरैर्मांसभक्षकै राक्षसैः सरिद्विश्रयि सरस्वती-तटस्थं द्रुषण्डं वृक्षौघोत्र जयसिंहबलोपरि मुक्तम्। किंभूतैः सद्भिः। परिभविष्वरिष्वनादरिणोवज्ञापरा असमाक्षयिणोक्षीणबला अस्थास्नवो वा त्विङ्गमिवक्राश्चाग्निज्वालामोचिमुखाश्च[2] ये जय्यभ्यमिघस्मरा जयिनो जिष्णूनप्यभ्यमन्ति जयाय साध्वभिमुखं गच्छन्ति ये तेषामपि घ-स्मरा अतिबलिष्ठत्वात्क्षयं नेतारस्तैरत एवाव्यथिभिः शत्रुभ्योभीरुभिरत एव च सृमरैः प्रसरणशीलैः ॥

वराक। भिक्षाक। लुण्टाकः[3]। जल्पाक। कुट्टाक। अत्र "वृद्धि(ङ्क्षि?)-क्षि०" [७०] इत्यादिना टाकः ॥

प्रसवि। प्रजवि। इत्यत्र[4] "प्रात्सूजोरिन्" [७१] इतीन् ॥

जयि। अत्ययिभिः। अनादरि ॥ क्षीति क्षिङ्क्षितोर्ग्रहणम्। असमाक्षयि। विश्रयि। परिभवि। वमि। अभ्यमि। अव्यथिभिः। अत्र "जीणृदृक्षि०" [७२] इत्यादिना-इन् ॥

सृमरैः। घस्मरैः। अद्मरैः। अत्र "सृघसि०" [७३] इत्यादिना मरक् ॥

अविभङ्गुरान्भासुरमेदुराङ्गा विदुरांश्छलानां[3] नृभटान्निशाटाः।

भिदुरेतरानच्छिदुरा अभीरूनविभीलुका भीरुकतामनैषुः ॥४१॥

१ **ए** °मिविक्र°. २ **ए** °सारोस्तेः। पि°. **सी डी** °सरौस्तेः। पि°. ३ **बी सी डी** °रास्थला°. * **बी** पुस्तके समासे 'ख' इति प्रदर्शितं तदेव युक्तम्।

१ **ए** °तिप्रेरकत्वादतिवे°. २ **ए** °श्च ज ये. ३ **ए सी डी** °ण्टाक। ज°. ४ **ए** °त्र पूत्सजो°.

४१. निशाटा नृभटान्नरो ये भटास्तान् भीरुकतां भयमनैषुः प्रापयन् । किंभूताः । भासुरमेदुराङ्गास्तेजस्विस्थूलकाया बलिष्ठा इत्यर्थः । तथाच्छिदुरा मिथो विच्छेदरहिताः[1] संहता इत्यर्थः । यद्वा शस्त्रविद्यानैपुणेन[2] शस्त्राणामागच्छतां वञ्चकत्वाच्छस्त्रकृतच्छेदरहिता इत्यर्थः । तथाविभीलुका निर्भीकाः । नृभटानपि किंभूतान् । अ[3]-विभङ्गुरान् न स्वयं भङ्गशीलान्[4] शूरत्वेन[5] रणादनंष्टृन् बलिष्ठत्वेन न जीर्णकाष्ठवन्निःसारान्वा तथा भिदुरेतरान्स्वयं भेदनशीलेभ्योन्यान् मिथः संहतान्प्रहारवञ्चकान्वेत्यर्थः । तथाभीरून् । नन्वेवं समानगुणत्वान्नृभटा निशाटैः कथं भीतिं प्रापिता इत्याह । यतश्छ[6]-लानां मायाप्रयोगाणां विदुरा ज्ञातारः ॥

अविभङ्गुरान् । भासुर । मेदुर । इत्यत्र "भञ्जि०" [७४] इत्यादिना घुरः ॥

विदुराः । अच्छिदुराः । भिदुर । इत्यत्र "वेत्ति०" [७५] इत्यादिना किद्धुरः ॥

अभीरून् । भीरुकताम् । अविभीलुकाः । अत्र "भियः०" [७६] इत्यादिना रुरुकलुकाः ॥

अभिसृत्वरैर्जित्वरहिंस्रदीप्रैरविकम्रकम्प्रेत्वरनश्वरास्तैः ।
नृभटा यशः स्मेरमजस्रपुष्टं परिगत्वरं नागणयन्विनम्राः ॥ ४२ ॥

४२. नृभटाः स्मेरं विकस्वरमजस्रपुष्टं नानावदातैः सदा पोषितं यशा(शः)[7] परिगत्वरं विनश्वरं सन्नागणयन् । किंभूताः सन्तः ।

---

१ ए °हिता संहिता. सी डी °हिता इ°. २ बी °पुण्येन. ३ ए अभ°. ४ सी भङ्गनशी°. डी भङ्गेनशी°. ५ बी °न् सूर°. ६ सी डी °तस्थला°. ७ बी यशो ग°.

अविकम्रममनोज्ञं कम्प्रं भयेन सकम्पं च यथा स्यादेवमित्वरा गमनशीला ये नश्वरा नंष्टारस्ते तथा । कैः कृत्वा । तै राक्षसैः । किंभूतैः । जित्वराणां जिष्णूनां हिंस्रा अत एव दीप्रास्तेजस्विनस्तैरत एवाभिसृत्वरैः प्रसृमरैरत एव किंभूता विनम्रा लज्जयाधोमुखाः ॥

अभिसृत्वरैः । जित्वर । इत्वर । नश्वराः । अत्र "सृजि०" [७७] इत्यादिना कित् द्वरप् ॥

परिगत्वरम् । इति "गत्वरः" [७८] इति निपात्यते ।

स्मेरम् । अजस्र । हिंस्र । दीप्रैः । कम्प्र । अविकम्र । विनम्राः । अत्र "स्म्यजस०" [७९] इत्यादिना रः ॥

असुतृष्णजः स्वप्नगधृष्णजः स्वेश्वरभास्वरस्थावरकीर्तिकार्ये ।
अविकस्वराः पेस्वरकं प्रमद्वरतया न वासोपि दधुर्नृवीराः ॥४३॥

४३. नृवीराः प्रमद्वरतया प्रमादितया भयाकुलत्वेनेत्यर्थः । पेस्वरकमज्ञातं पातुकं सद्वासोप्यधोवस्त्रमपि न दधुः नावाष्टभ्नन् । एवं नामात्यौत्सुक्येन नेशुर्यावता वस्त्रमपि पतद्धर्तुं न शेकुरित्यर्थः । किंभूताः सन्तः । असुतृष्णजः प्राणेषु साभिलाषा अत एव स्वस्यात्मीयस्येश्वरस्य प्रभोर्जयसिंहस्य भास्वरामला स्थावरा स्थिरा या कीर्तिर्विजयोत्थं यशस्तद्रूपं यत्कार्यं तत्र स्वप्नगधृष्णजः स्वप्नजः शयालवो येधृष्णजोप्रगल्भा असमर्था इत्यर्थस्ते तथात एवाविकस्वरा म्लानमुखाः ॥

तृष्णजः । अधृष्णजः । स्वप्नग् । इत्यत्र "तृषि०" [८०] इत्यादिना नजिङ् ॥

---

१ ए सी डी °कीर्तका°.

---

१ ए सी डी सर्पकं च. २ ए °जस्रं । हिं°. सी डी °ज हिं°. ३ ए सी डी °त्यौलुक्ये°. ४ बी °प्रग: श°.

स्थावर । ईश्वर । भास्वर । पेस्वरकम् । अविकस्वराः । अत्र "स्थेश०" [८१] इत्यादिना वरः ॥ प्रमदेरपीति कश्चित् । प्रमद्वरतया ॥

तदुदीक्ष्य यायावरमाशु सैन्यं त्रिजगद्दद्दिद्युदुषाचरेभ्यः ।
अजुहूरवाक्प्राडपजूरधीश्रीरभवत्परिव्राड्जन आयतस्तूः ॥४४॥

४४. आयतं स्तौत्यायतस्तूर्यायजूकः परिव्राड्जनो मुनिलोकोभवत् । कीदृक् । अजुहूर्भयातिरेकेण जुहूनां पाताज्जुहूभिः स्रुग्भिर्यज्ञोपकरणभेदै रहितस्तथावाक्प्राडवाक्सन्पृच्छकोतिभयाद्धस्तादिसंज्ञया किमभूदिति[1] प्रष्टेत्यर्थः । तथापकृष्टं जानुदन्तभङ्गादिना निन्दितं यथा स्यादेवं जवति धावत्यपजूस्तथाधीश्रीर्बुद्धि[2]शोभारहितः किंकर्तव्यतामूढो दीनश्चेत्यर्थः । किं कृत्वा । तत्सैन्यं जयसिंहकटकमुदीक्ष्य । किंभूतम् । त्रिजगतो[3] दद्दतो विदारणशीला दिद्युतो विजयेन द्योतनशीला य उषाचरा राक्षसास्तेभ्य आशु यायावरं नश्यदि[4]त्यर्थः ॥

करिणां कटप्रूर्न मदो द्रुवां स्रुस्तदनूर्गविभ्राड्विभु बृंहितं न ।
अपतन्पवित्रासुरभिस्स्वयंभुप्रभुशंभुसंभुस्मरणाश्च योधाः ॥ ४५ ॥

४५. द्रुवां नश्यतां करिणां मदो न स्रूर्न[5] स्रवति भयेन मदः शुष्क इत्यर्थः । कीदृक् । कटेभ्यो गण्डेभ्यः प्रवते निर्गच्छति कटप्रूः पूर्वं प्रवाहेण वहन्नपीत्यर्थः । तथा करिणां तद्यत्पूर्वमूर्जस्वलं तारं च स[6]द्रित्वा(?)सीत्तदपीत्यर्थः । बृंहितं शब्दितं न विभु न व्यापकमभूत् । कीदृक्सत् । अनूर्भयेनानूर्जस्वलमत एवाविभ्राडतारम् । तथा योधा अपतंश्च भूमौ पतिताः । किंभूताः सन्तः । पवित्रो भगवानर्हन्

१ ए सी डी °रच्छित्स्व°.

१ ए बी °ति पृष्टे°. २ बी °श्रीबुद्धि°. ३ ए सी डी °तो वद्द°. ४ बी नस्यदि°. ५ बी °र्न श्रव°. ६ बी °द्रित्तासी°.

असुरद्विड्वि(भिद्वि?)ष्णुः स्वयंभुर्ब्रह्मा[1] प्रभुशंभुः स्वामिशंकरः संभवो मातापितरौ[2] द्वन्द्वे एतान्स्मरन्ति ये रम्यादित्वादनः [५. ३. १२६]। ते तथा ॥

यायावरम्। इति "यायावरः" [८२] इति निपात्यम् ॥

दिद्युत्। दद्दत्। जगत्। जुहूः[3]। वाक्। प्राट्। धी। श्रीः[4]। द्रुवाम्। स्रूः। अपजूः। आयतस्तूः। कटप्रूः। परिव्राट्। भ्राजादि। अविभ्राट्। अनूर्ग्। इत्येते "दिद्युद्०" [८३] इत्यादिना निपात्याः ॥

शंभु[5]। संभु। स्वयंभु। विभु। प्रभु। इत्यत्र "शंसं०" [८४] इत्यादिना डुः ॥

पवित्र। इत्यत्र "पुव०" [८५] इत्यादिना-इत्रः ॥

विविशुः पवित्रेष्वृषयः पवित्राः सुसहित्रचारित्रजुषोथ केचित्।
सुसवित्रकारित्रधुवित्रदण्डैरपरे[1] वहित्रैः सलिले[2]ऽधवित्रैः ॥ ४६ ॥

४६. अथ तथा केचिदृषयः पवित्रेषु दर्भेषु विविशुर्भयेनान्तर्हिताः। किंभूताः। सुष्ठु सह्यते क्षम्यतेनेन सुसहित्रं यच्चारित्रं चरित्रमेव प्रज्ञाद्यण् [७. २. १६५]। वृत्तं तज्जुषोत एव पवित्रा नैर्मल्यहेतवः। तथापर ऋषयो[6] वहित्रैर्यानपात्रैः कृत्वा सलिले[7] सरस्वतीजले[8] विविशुः। किंभूतैः। षूत्प्रेरणे। सूयते प्रेर्यते जलमेभिः सवित्राण्यज्ञानानि सवित्राणि सवित्रकाणि यान्यरित्राणि कोटिपात्राणि सवित्रकारित्राणि तथा धूयत इतस्ततः[9] क्षिप्यते जलमेभिर्धुवित्रा

१ बी °रे बहि°. २ सी डी °लेष्ववि°.

१ बी °यंभूर्ब्र°. २ बी °तरौ द्व°. ३ ए जुहू। वा°. सी डी जुह। वा°. ४ ए श्री। द्रु°. ५ बी शंभुः। सं°. डी शंभु। स्व°. ६ ए °योर्वहि°. बी °यो बहि°. ७ ए सी डी °लेषु स°. ८ ए सी डी °लेषु वि°. ९ डी इत्यतः.

ये दण्डा हस्तग्राह्ये मध्यभागे सूक्ष्मा उभयोश्चान्तयोः पृथुला वरंच्छीति[1] नाम्ना प्रसिद्धा यष्टिभेदास्ते धुवित्रदण्डा[2] द्वन्द्वे शोभनाः सवित्रकारित्रधुवित्रदण्डा येषु तैस्तथाब्धवित्रैर्[3]जलक्षेपणैः ॥

शिरसां लवित्रैर्वपुषां खनित्रैर्भयनेत्रयोत्रैः क्षणदाटशस्त्रैः ।
अतितोत्रसेत्रालघुयोक्त्रनद्ध्रिस्रविमेढ्काः पत्रहयाः प्रणेशुः ॥ ४७ ॥

४७. क्षणदाटशस्त्रैर्हेतुभिः पत्रहया रथा अश्वाश्च प्रणेशुः । यतः शिरसां लवित्रैर्वपुषां खनित्रैरत एव भयनेत्रयोत्रैर्भयस्य नेत्रैः प्रापणैर्योत्रैश्च संयोजनैश्च । किंभूताः सन्तः । तोत्रसेत्राणि प्राजनैर[4]श्मीनतिक्रान्ता[5] भयेनातिपलायनादवज्ञातवन्तोतितोत्रसेत्रास्तथालघवोतिशीघ्रं पलायनेन बन्धानां शिथिलीभावात्प्रलम्बमाना योक्त्राणां योत्राणां नद्ध्र्यो वध्रिका[6] येषु ते तथा । बाहुलकात्समासान्तविधेरनित्यत्वाद्वा[7] कजभावे ह्रस्वोत्र[8] । तथा स्रवो भयेन मूत्रमस्त्येषां स्रवीणि[9] मेढ्राणि लिङ्गानि येषां ते तथा । एषु विशेषणकर्मधारयः ॥

अतिदात्रदंष्ट्रैरतिपोत्रवक्त्रैः पिशिताशनैः स्तोत्रबलैर्बलेषु ।
अनुधात्रि नष्टेषु नृपश्चुकोप विजयैकपात्रं शरसेक्त्रधन्वा ॥ ४८ ॥

४८. शराणां सेक्त्रं क्षरणं धनुर्यस्य[10] स तथा महाधनुर्धर इत्यर्थः । अत एव विजयैकपात्रं नृपो जयसिंहो बलेषु विषये चुकोप । यतोनुधात्र्यामलकीतरूणां समीपे नष्टेषु । कैर्हेतुभिः । पिशिताशनै राक्षसैः । किंभूतैः । अतिदात्रा दात्रेभ्योपि वक्रा दंष्ट्रा येषां[11] तैस्त-

१ बी °रलीति. २ बी °दा धु°. ३ एसी डी °धास्ववि°. ४ एसी डी °नराशीन°. ५ बी °श्मीरति°. ६ बी वध्रिका. ७ डी °द्वाज°. ८ बी °त्रणम°. ९ बी °णि मेढ्रा°. १० ए °स्य त°. ११ एसी डी °षां ते तथा°.

थातिपोत्राणि पोत्राणि हलमुखानि शूकरमुखानि वातिक्रान्तानि वक्त्राणि येषां तैस्तथा स्तूयतेत्मानेन स्तोत्रमात्मस्तुतिकारणं बलं येषां तैः ॥

पवित्रा ऋषयः । पवित्रेषु । इत्यत्र "ऋषि०" [८६] इत्यादिना-इत्रः ॥

लवित्रैः । धुवित्र । सवित्रैक । खनित्रैः । चारित्र । सुसहित्र । अरित्र । इत्यत्र "लूधू०" [८७] इत्यादिना-इत्रः ॥ धूनोतेरपि कश्चित् । धवित्रैः ॥ वहेरपि कश्चित् । वहित्रैः ॥

नेत्र । दात्र । शस्त्रैः । योत्रैः । योक्त्र । स्तोत्र । तोत्र । सेत्राः । सेक्त्र । मेढ्काः । पत्र । पात्रम् । नद्ध्रि । इत्यत्र "नीदाव्(प्?)०" [८८] इत्यादिना त्रट् ॥

पोत्र । इत्यत्र "हल०" [८९] इत्यादिना त्रट् ॥

दंष्ट्रैः । अत्र "दंशेस्त्रः" [९०] इति त्रः ॥

धात्रि । इति "धात्री" [९१] इत्यनेन निपात्यम् ॥

द्युसदामपि ज्ञातमतार्चितो राड्विदितेष्टसंपूजितमाददेस्त्रम् ।
तृषितः स कीर्तौ रुषितः स्वसैन्ये चिरशीलिते वायुबलो भवाभः ॥ ४९ ॥

४९. स राड् जयसिंहोस्त्रमाददे । कीदृक्सन् । वायुबलो वातवद्बलिष्ठोत एव भवाभो हरतुल्योत एव द्युसदामपि ज्ञातः प्रसिद्धो मतोभीष्टोर्चितः पूजितश्च । तथा कीर्तौ तृषितः स्पृहयालुस्तथा चिरशीलिते कुलक्रमागतत्वात्सदा परिचिते स्वसैन्ये रुषितः क्रुध्यंश्च ।

१ बी °संख्येजि°. २ ए सी डी °तौ ऋपि°.

१ ए सी डी °णि ह°. २ ए सी डी °नि ष्टक°. ३ बी °त्मनस्तु°. ४ बी °त्र । ख°. ५ सी डी धूनेर°. ६ ए डी दात्रं । श°. सी दात्रः । श°. ७ बी योक्त्रः । स्तो°. ८ सी डी स्पृहालु°.

कीदृशमस्त्रम् । विदितेष्टसंपूजितं विदितं नानाजयश्रीहेतुत्वेन सर्वत्र प्रसिद्धमत एवेष्टं वल्लभमत एव च [सं]पूजितं पुष्पोपहारादिनार्चितम् ॥

ज्ञानार्थ । ज्ञात । विदित ॥ इच्छार्थ । इष्ट । मत ॥ अर्चार्थ । अर्चितः । पूजितम् ॥ जीत् । तृषितः ॥ शील्यादि । शीलिते । रुषितः । अत्र "ज्ञान०" [९२] इत्यादिना सत्यर्थे क्तः ।

वायु । भव । चिर । इत्यत्र "उणादयः" [९३] इति सत्यर्थे उणादयः ॥

अष्टादशः पादः ॥

समरंगमी त्वं प्रतिरोध्यथो चेद्विशिखैश्च वृष्टो विजयश्च जातः ।
प्रजनिष्यते कीर्तिरितीरितोसौ मुनिभिः सकष्टै रथमारुरोह ॥५०॥

५०. असौ जयसिंहो रथमारुरोह । कीदृक्सन् । सकष्टैः सदुःखैर्मुनिभिरीरित उक्तः । कथमित्याह । हे राजंस्त्वं चेद्यदि समरंगमी गमिष्यस्यथो तथा चेत्त्वं प्रतिरोधी शत्रून् रोत्स्यसि तथा त्वं चेद्विशिखैर्बाणैर्वृष्टश्च वर्षिष्यसि तदा विजयो जातो जनिष्यते कीर्तिश्च प्रजनिष्यत इति ॥

कषितद्विषोस्याह भटान्स्म वेत्री क्व गमिष्यथ श्वोपि यमः प्रहर्ता ।
न मरिष्यथ श्वोद्य कदाजिपारं व्रजितास्थ पादानिति यन्निधत्थ ॥ ५१ ॥

५१. कषितद्विषोस्य जयसिंहस्य वेत्री भटानाह स्म । यथा रे भटा यूयं क्व गमिष्यथ मृत्युभयेन नंष्ट्वा क्व यास्यथ । यतः श्वोपि कल्येपि युष्मान्यमः प्रहर्ता ततश्चाद्य श्वो वा न मरिष्यथ किं त्वद्य

१ ए °श्च पृष्टो. २ डी कथित°.

१ ए °त् । मृषि°. २ ए सी डी °ते । ऋषि°. ३ बी °भिरितीरि°. ४ ए °न नष्ट्वा क या°. ५ ए सी डी °हरति त°.

कल्ये वा मरिष्यथैव । तथा यूयं कदाजिपारं रणपर्यन्तं व्रजितास्थ यास्यथ । यदिति रणपृष्ठदानप्रकारेण पादान्निधत्थ निक्षिपथ ॥

गमी । प्रतिरोधी । इत्येतौ "वत्स्यति०" [१] इत्यादिना भविष्यति साधू ॥

विशिखैर्धृष्टश्चेद्विजयो जातः कीर्तिः प्रजनिष्यते । अत्र "वा हेतु०" [२] इत्यादिना भविष्यति वा क्तः ॥

कष्टः । अत्र "कषोनिटः" [३] इति भविष्यति क्तः । सत्यपि कश्चित् ॥ अनिट इति किम् । कषित[1] । कृच्छ्रगहनयोरभावात्सेट्त्वमत्र ॥

गमिष्यथ । इत्यत्र "भविष्यन्ती" [४] इति भविष्यन्ती ॥

श्वोपि प्रहर्ता[2] । इत्यत्र "अनद्यतने श्वस्तनी" [५] इति श्वस्तनी ॥ अनद्यतन इति बहुव्रीहिः किम् । व्यामिश्रे मा भूत् । मरिष्यथ श्वोद्य ॥

कदाजिपारं[3] व्रजितास्थ पादानिति यन्निधत्थ । इत्यत्र "परिदेवने" [६] इति श्वस्तनी ॥

अयशः पुरा वोस्त्यपयाथ यावत्समयः कदा वा भवतीदृशो वः ।
भविता कदा चेतननिष्क्रयो वाथ कदा भविष्यत्युचितं कुलस्य ॥ ५२ ॥

५२. यावद्यावत्कालमपयाथ रणान्नङ्क्ष्यथ तावत्कालं वो युष्माकमयशः पुरास्ति भविष्यति । वा यद्वा वो युष्माकमीदृशः समयो यत्रायं रणोस्ति स प्रस्तावः कदा भवति भविष्यति । शिष्टं स्पष्टम् ॥

युधि कर्हि यामोरिषु कर्हि भातास्मं[1] उ तोषयिष्याम इनं च कर्हि ।
कतमो ददात्याजिमु दास्यति स्वः सुयशश्च दातेत्युदितानि धिग्वः ॥ ५३ ॥

१ ए डी °स ततो°.

१ डी °पितं । कृ°. २ ए सी डी °हन्ता । इ°. ३ बी °रं प्रव्र°.

५३. वो युष्माकमुदितानि वचनानि धिग्गर्हामहे । कानीत्याह । युधि कर्हि कस्मिन्ननद्यतने काले वयं यामो यास्यामस्तथारिषु मध्ये कर्हि भातास्मो विजयेन शोभिष्यामहेत एव उ इति संबोधने । कर्हीनं स्वामिनं तोषयिष्यामस्तथा उ हे भटाः कतमो भटोस्माकमाजिं ददाति दास्यति तथा कतमः स्वर्दास्यति । रणे हि मृताः स्वर्गं यान्तीति रणे निपात्यास्माकं स्वर्गं दास्यत्यत एव कतमः सुयशश्च दातेति ॥

पुरास्ति । यावदपयाथ । इत्यत्र "पुरा०" [७] इत्यादिना वर्तमाना भविष्यति ॥

कदा भविष्यति । कदा भविता । कर्हि यामः । कर्हि तोषयिष्यामः । कर्हि भातास्मः । अत्र "कदा०" [८] इत्यादिना भविष्यति वा वर्तमाना । पक्षे भविष्यन्तीश्वस्तन्यौ ॥

कतमो ददात्याजिम् । दास्यति स्वः । सुयशो दाता । इत्यत्र "किं०" [९] इत्यादिना वा वर्तमाना ॥

अभयं प्रदत्ते शरणं प्रदाता विधुरेषु यो दास्यति चासुभिक्षाम् ।
श्रयति श्रियं द्यां श्रयिता श्रयिष्यत्यमृतं स एवं वदथाद्य किंतु ॥ ५४ ॥

५४. स्पष्टम् । किंतु प्रदत्ते दास्यति । विधुरेषु सकष्टेष्वर्थादस्मासु विषये । असुभिक्षामसवः प्राणास्त एव भिक्षा तां जीवितव्यम् । श्रयति श्रयिष्यति । अमृतं मोक्षम् ॥

योभयं प्रदत्ते । असुभिक्षां दास्यति । शरणं प्रदाता । स श्रियं श्रयति । अमृतं श्रयिष्यति । द्यां श्रयिता । इत्यत्र "लिप्स्यसिद्धौ" [१०] इति वा वर्तमाना ॥

---

१ बी °पु क°. २ एडी सी °विता. ३ सी डी ना व°. ४ बी °ष्टः । किं.

यदि मृत्युरेत्यत्स्यति हिंसिता मा बत नश्यताथोर्ध्वमरीन्मुहूर्तात् ।
अभियाति चेत्संप्रहरेत[1] हन्ता परिजेष्यतीशः सुदृढास्तदाध्वम् ५५

५५. यदि मृत्युर्यमोपि युष्मानेत्यागमिष्यति तथात्स्यति भक्षयिष्यति तथा हिंसिता हनिष्यति । अथ तस्माद्बत हे भटा मा नश्यत । तथा मुहूर्ताद्घटिकाद्वयादूर्ध्वं चेद्यदीशो जयसिंह एवारीनभियात्यभिमुखं यास्यति तथा संप्रहरेत[1] प्रहरिष्यति हन्ता हनिष्यति परिजेष्यति च । तत्तस्मात्सुदृढाः सुस्थाः सन्तो यूयमाध्वं तिष्ठत ॥

यदि मृत्युरेति । अत्स्यति । हिंसिता । अथ मा नश्यत । इत्यत्र "पञ्चमी०" [११] इत्यादिना भविष्यति वा वर्तमाना । अत्र भाविमृत्य्वागमनादि नाशाभावविषयस्य प्रैषस्यातिसर्गस्य प्राप्तकालतायाश्च हेतुर्भवति ॥

ऊर्ध्वं मुहूर्तादीशश्चेत्संप्रहरेत । अभियाति । परिजेष्यति । हन्ता । सुदृढास्तदाध्वम् । इत्यत्र "सप्तमी च०" [१२] इत्यादिना सप्तमी वर्तमाना च वा ॥

अभियोद्धुमाघातक एष जेष्यन् व्रजति प्रभुर्वो रिपुशान्तिकारः ।
शुभमापको धर्ममथोद्धरिष्य इति दोर्युगं पश्यति कीर्तये च ५६

५६. एष प्रत्यक्षो वो युष्माकं प्रभुर्व्रजति । किमर्थमित्याह । अभियोद्धुं शत्रुभिः सहाभियोत्स्य इति । तथाघातकोरीन्हनिष्यामीति । तथा जेष्यन्नरीञ्जेष्यामीति । तथा रिपुशान्तिकारो जित्वा रिपूणां शान्तिं करिष्य इति । अथ तथा दोर्युगं पश्यति । किमर्थमित्याह । दोर्युगेनामुना शुभं शत्रुजयोत्थं कल्याणमापक आप्स्यामीति । अथ तथा धर्ममुद्धरिष्य इति । कीर्तये च कीर्तयिष्ये स्वस्य कीर्तिमुत्पादयिष्य इति च ॥

---

१ सी डी °ति यत्सं°.

---

१ सी डी °हरि°.

अभियोद्धुम् । आघातकः । जेष्यन्व्रजति । इत्यत्र "क्रियायां०" [१३] इत्यादिना भविष्यति तुम्-णकच्-भविष्यन्त्यः । सत्स्यस्य शतुर्भविष्यन्त्या तुल्यार्थतया भविष्यन्तीग्रहणेन ग्रहणाज्जेष्यन्निति भविष्यन्त्युदाहरणं ज्ञेयम् ॥

रिपुशान्तिकारः । अत्र "कर्मणोण्" [१४] इति भविष्यत्यण् ॥ बहुलाधिकाराण्णकच्भविष्यन्त्यावपि । शुभमापको धर्ममुद्धरिष्य इति दोर्युगं पश्यति ॥

कीर्तये दोर्युगं पश्यति । इत्यत्र "भाववचनाः" [१५] इति भविष्यति क्तिः ॥

इति वेशवद्युध्यपपादसङ्गमिह सारवज्जल्पति कार्यसारम् ।
अतिसारकिस्पर्शसरोगवच्च स्वमथाभिनिन्दन्ववले भटौघः ॥५७॥

५७. इत्येवंप्रकारेणेह वेत्रिणि कार्यसारं कार्यस्य स्थिरमर्थं युद्धाभिमुखवलनरूपं कार्यरहस्यं सारवद्बलयुक्तं यथा स्यादेवं जल्पत्यथानन्तरं भटौघो युधि यद्धार्थं ववले । कथम् । अतिशीघ्रं वलनादपगतः पादसङ्गो भूम्या सहांह्रिसंबन्धो यत्र तद्यथा स्याद्वेशवद्यथा वेशे वेश्यापाटकविषये सहर्षत्वादपपादसङ्गं वलते । कीदृक्सन् । आत्मानमभिनिन्दन् । अतिसारकिस्पर्शसरोगवद्यथातिसारक्यतिसाररोगवान् स्पर्शेन व्याधिविशेषेण सरोगो व्याधितश्चातिदुःखितत्वादात्मानं निन्दतः ॥

अभजद्विसारालयवन्नरेन्द्रमथ वाहिनी वैरिपचप्रतापम् ।
द्विषि दायभीः प्रासभृदुज्झिताध्यायतपस्व्युपाध्याय्यभिनन्द्यमाना ॥ ५८ ॥

---

१ सी डी °ङ्गमति सा°. २ ए सी डी °न्दच्चचले.

---

१ बी सी डी °खचल°. २ सी °ल्पति तथा. डी °ल्पन्ति तथा. ३ डी °र्थं चचले. ४ ए सी डी सत्यांह्रि°. ५ डी वेश्या°. ६ ए सी डी °ङ्गं चल°.

५८. अथ वैरिणः पचति सन्तापयति । लिहाद्यचि [५. १. ५०.] वैरिपचः प्रतापो यस्य तं नरेन्द्रं जयसिंहं[1] वाहिनी सेनाभजत् । कीदृक्सती । प्रासभृत्कुन्तधारिण्यत एव द्विष्यरिजातौ दाया दातव्या भीर्यया सात एवोज्झिताध्याया भयान्मुक्तपाठा यास्तपस्व्युपाध्याय्यस्तपस्विनश्चोपाध्याय्यश्च ताभिरभिनन्द्यमाना[2] विसारालयवद्यथा विसाराणां मत्स्यानामालयमब्धिं वाहिनी नदी भजति ॥

पृतनाज्युपाध्याय ऋतं दिशन्ती दिवि शारनीशारमिवास्त्रभाभिः[1] ।
नृपमन्वगादुद्यतमाशु शारोग्रनिशाटनिष्पावदलाभिलावे ॥ ५९ ॥

५९. शारो वायुस्तद्वदुग्रा ये निशाटास्त एवोग्रत्वान्निष्पावदलानि[3] वल्लपत्राणि तेषामभिलावे छेद उद्यतं[4] नृपं पृतना सेनाश्वन्वगात् । कीदृक्सती । आज्युपाध्याया रणेतिप्रवीणा तथास्त्रभाभिः[5] कृत्व ऋतं सत्यं यथा स्यादेवं शारः कर्बुरवर्णो यो नीशारः[6] प्रावरणं तमिव दिव्याकाशे दिशन्ती ददती नानारत्नस्वर्णखचितत्वेन नानावर्णकान्तीन्यायुधानि बिभ्रतीत्यर्थः ॥

पाद । रोग । वेश । स्पर्श । इत्यत्र "पदरुज०" [१६] इत्यादिना घञ् ॥

स्थिरे । सारम् ॥ व्याध्यादौ । अतिसार । सारवत् । विसार । इत्यत्र "सर्तेः०" [१७] इत्यादिना घञ् ॥

वाहिनीत्यत्र वाहे । प्रतापम् । इत्यत्र[7] च "भावाकर्त्रोः" [१८] इति घञ् ॥ असंज्ञायामपि । दाय[8] ॥ उज्झित । इत्यत्र बहुलाधिकारान्न स्यात् ॥ भावाकर्त्रोरिति किम् । वैरिपच ॥

---

१ **ए सी डी** °वास्त्रभा°.

---

१ **ए** °सिंहिं वा°. २ **ए डी** °भिनिन्द्य°. **सी** °भिनेन्द्य°. ३ **सी** °निनल°. ४ **सी** उद्यंतं. ५ **ए सी डी** °थास्त्रभा°. ६ **बी** नीसारः. ७ **बी** °त्र भा°. ८ **बी** °यामिति । दा°.

अध्याय । उपाध्यायी । उपाध्याया । इत्यत्र "इङः०" [१९] इत्यादिना घञ् ॥ टिद्विधानसामर्थ्यात्स्त्रियां ङीर्बाध्यते ॥

शारे[1] । शार । नीशार[2] । इत्यत्र "श्रो वायु०" [२०] इत्यादिना घञ् ॥

निष्पाव । अभिलावे । अत्र "निरभेः पूल्वः" [२१] इति घञ् ॥

करभाभिरावेभरवाश्वरावप्रभवेन शत्रुप्रघसं श्रयन्ती ।
क्षितिपप्रभावाश्रयतोथ सासृग्निघसामिषन्यादकृतोभितस्थौ ॥६०॥

६०. अथ क्षितिप[3]प्रभावाश्रयतो जयसिंहप्रतापाश्रयणात्सा सेना-सृग्निघसामिषन्यादकृतो रक्तपानमांसभक्षणकारिणो राक्षसानभित-स्थावभिमुखं डुढौके । कीदृक्सती । करभाभिरावेभरवाश्वरावप्रभवे-नोष्ट्रशब्दगजशब्दाश्वशब्दानामुत्पत्त्या कृत्वा शत्रुप्रघसं शत्रूणां भक्ष-णमिव श्रयन्त्यतिदुःखंकृत्[4] ॥

अभिराव । इत्यत्र "रोरु०" [२२] इत्यादिना घञ् ॥ उपसर्गादिति किम् । रव ॥ राव । इत्यत्र बाहुलकाद्धञ् ॥

प्रभवेन । आश्रयतः । प्रघसम् । अत्र "भूश्र्यदोल्" [२३] इत्यल् ॥ बाहुलकात्प्रभाव ॥

न्याद । इत्ययं "न्यादो न वा" [२४] इति वा निपात्यः ॥ पक्षे । निघस[5] ॥

वियमी वियामे नियमी नियामेथ यथा च संयाम्युरुसंयमे वा ।
नृप उद्यतः कीर्त्युपयाम एवं विजयश्रियश्चोपयमे[1] बभासे ॥६१॥

६१. नृपो[6] बभासे । कीदृक्सन् । कीर्त्युपयामे[7] विजयोत्थकीर्ति-

१ बी °मेऽवभा°.

१ ए °र । नी°. २ बी नीसार. ३ ए °पत्रप्र°. ४ बी °खकत्वात्. ५ बी °घसः ॥ वि°. ६ बी °पोऽवभा°. ७ ए सी डी कीर्ति°.

वध्वाः पाणिग्रहण उद्यतोत एवैवमुक्तरीत्या विजयश्रियश्चोपयम उद्यतः । उपमानान्याह ।

अहिंसा सत्यमस्तेयं ब्रह्माकिंचनता यमाः ।

त एव विशिष्टा वियमास्तद्वान्वियमी यथा वियामे विशिष्टयमेष्वथाथ वा यथा नियमी ।

स्नानमौनोपवासेज्यास्वाध्यायोपस्थितिग्रहाः[1] ।

नियमा गुरुशुश्रूषा शौचाचारक्षमा दश ॥

यद्वा

नियमाः शौचसंतोषः[2](षौ ?) स्वाध्यायतपसी अपि ।

देवताप्रणिधानं च । इति ।

तद्वान्यथा नियामे वाथ वा यथा च संयामी पञ्चास्रवाद्विरमणं[3] पञ्चेन्द्रियनिग्रहः कषायजयः[4] चण्डत्रयविरतिश्चेति संयमः सप्तदशभेदस्तद्वांश्चोरुसंयम उद्यतः स्यात् ॥

संयमे संयामी । नियमी नियामे । वियमी[5] वियामे । उपयमे उपयामे ।

अत्र "संनिवि०"[6][7] [२५] इत्यादिनाल्वा ॥

धनुषां निनादैर्निनदैरिषूणां[1] निगदैर्नृणां क्रव्यभुजां निगादैः ।
रथनिस्वनैस्तत्प्रतिनिक्कणैश्च[2] जगदेकनिकाणमयं तदाभूत् ॥ ६२ ॥

६२. स्पष्टम् । किं तु तत्प्रतिनिक्कणैस्तेषां धनुर्निनादादीनां[8] व्योमादिषु प्रतिशब्दैः ॥

अथ चारणा विक्कणिवल्लकीका अतिवैणविकाणनिपाठयुक्ताः ।
निपठैः सुनिस्वानचयैश्च सूताः स्तवमादरान्निर्ममिरे[3] भटानाम् ६३

---

१ बी °रिपूणां. २ बी °निश्वनै°. ३ ए °ममरे.

---

१ बी °स्थितग्र°. २ ए बी डी शौचं सं°. ३ बी °आश्रवा°. ४ बी °यः दण्ड°. ५ ए °यमे । उ°. ६ ए संल्वा°. ७ सी डी °निल्वा°. ८ डी °नादी°.

६३. अथ चारणा बन्दिविशेषा भटानां स्तवमादरान्निर्ममिरे। किंभूताः सन्तः। विक्कणिवल्लकीकाः शब्दायमानवीणाः। चारणा[1] हि[2] वीणा वादयन्ति। तथा वैणो वीणायां भवो यो विक्काणस्तं[3] माधुर्यादिनातिक्रान्तो यो निपाठः काव्यपठनं तेन युक्ताः। तथा सूताश्च भटाश्च सुनिस्वानचयैर्मधुरशब्दसंतानैर्निपठैः[4][5] काव्यपठनैः कृत्वा भटानां स्तवं निर्ममिरे[6]॥

नृवरै रणे चारुधनुर्ग्रहैस्तैः शरवर्षभाग्भिर्विवशो भयार्तः।
रजनीचरौघोपगमो बभूव समजः पशूनां नु वृकोदजेन॥ ६४॥

६४. नृवरैर्महाभटनृपैः[7] कृत्वा रजनीचरौघो बभूव। कीदृक्। भयार्तोत एवापगमो गतिरहितोत[8] एव च विगतो वशः प्रभुत्वं यस्मात्स विवशो निःसहः। यतः किंभूतैः। चारुधनुर्ग्रहैर्निःप्र(निष्प्र)-कम्पधनुर्ग्रहणैस्तथा शरवर्षभाग्भिः। यथा वृकोदजेन[9] वृकाणां[10] प्रेरणेन पशूनां समजश्छागौघो भयार्तोपगमो विवशश्च स्यात्॥

निनदैः निनादैः। निगदैः निगादैः। निपठैः[11] निपाठ[12][13]। निस्वनैः निस्वान। निक्कणैः निक्काण। इत्यत्र "नेर्नद०" [२६] इत्यादिना वाल्॥

विक्कणिवल्लकीकाः वैणविक्काण[14]। अत्र "वैणे क्कणः" [२७] इति वाल्[15][16]॥

चयैः। स्तवम्। चैरः। आदरात्। विवशः। रणे। अपगमः॥ श्ट। शर। ग्रहैः। अत्र "युवर्ण०" [२८] इत्यादिनाल्॥

---

१ **ए** °णा वा°. २ **सी डी** हि वा°. ३ **ए** °णमा°. ४ **सी डी** °र्निपाठैः कृ°. ५ **ए** °ठैः कृ°. ६ **ए** मैमरे. ७ **ए सी डी** नृपंव°. ८ **डी** °तिसहि°. ९ **ए** वृक्षोद°. १० **ए डी** वृक्षाणां. ११ **ए** निपा°. **सी डी** निपाठे नि°. १२ **बी** निःपा. १३ **सी** °पाठे। नि°. १४ **बी** °काणः। अ°. १५ **ए** वान्। वयौ सर्वावैर...वशः. १६ **सी** °ल्। वयौ सर्वावारे...वशः. **डी** °ल्। वयौ सवावैर...वशः.

वर्ष । भय । इत्येतौ "वर्षादयः क्लीबे" [२९] इति निपात्यौ ॥

समजः पशूनाम् । वृकोदजेन । इत्यत्र "समुदोजः पशौ" [३०] इत्यल् ॥

कितवो ग्लहं नूद्धदस्त्रमागाद्धनिपातितात्तोपसरोदरोथ ।
प्रमदाढ्यनृन्शाकपणं नु भोक्तुं युधि बर्बरः संमदकृन्निजानाम् ६५

६५. अथ प्रमदाढ्यनृन्विजयेन[1] सहर्षान्नरभटान् शाकमुष्टिमिव भोक्तुं बर्बरो नाम राक्षसाधिपो युध्यागात् । कीदृक्सन् । अस्त्रमुद्धदुत्पाटयन्[2] यथा कितवो[3] द्यूतकारो ग्लहमक्षाणां[4] गृहीतान्पाश[5]-कानित्यर्थः । द्यूतफलके पातनाय तस्मादुद्धाति । तथोपसरो गर्भग्रहणार्थं स्त्रीषु प्रथमं सरणम् । अत्र चोपचारात्तदुत्पाद्यो गर्भ उच्यते । आप्तैः[6] प्राप्त उपसरो यकाभिस्ता गर्भिण्यो ध्वनिना सिंहनादेन पातितानि भयातिरेकोत्पादेन भ्रंशितान्याप्तोपसराणामुदराण्युपचारा[7][8][9]-दुदरस्था गर्भा येन स तथात एव निजानां रक्षसां संमदकृत् ॥

उपसर[10] । ग्लहम् । अत्र "सृग्लहः०" [३१] इत्यादिनाल् ॥

शाकपणम् । अत्र "पणेर्माने" [३२] इत्यल् ॥

संमद । प्रमद[11] । इत्येतौ "संमद०" [३३] इत्यादिना निपात्यौ ॥

यमभीष्मवेश्मप्रघणे मुखेन्तर्घणराजमन्तर्घनपानुजं च ।
निदधत्सह[1] प्राट रणप्रघाणे नृभुगुद्धसंघैः स निघोद्घनांसैः ॥६६॥

---

१ ए निदप्रघा°.

---

१ ए सी डी °पानु शा°. २ ए सी डी °त्पादय°. ३ सी डी कि...गृही°. ४ बी °णां ग्रही°. ५ ए सी डी °न्पाशिका°. ६ सी डी °सः...निना. ७ सी डी भ्रंसिता°. ८ ए सी डी °सरणा°. ९ ए °मुदारण्यप°. १० ए सी डी °पसंला°. ११ बी प्रमाद.

६६. स नृभुग्राक्षसो बर्बरो रणप्रघाणे रण एव कातरबालैर्दुर्ल- ङ्घत्वात्प्रघाणो द्वारालिन्दकस्तत्र प्राट बभ्राम। कीदृक्। यमस्य यद्भीष्मं रौद्रं वेश्म तस्य प्रघणे द्वारालिन्दकतुल्ये मुखे[1] वक्रेन्तर्घणराजमन्तर्घ- णाख्यदेशभेदनृपमन्तर्घनेपानुजं[2] चान्तर्घनदेशराजलघुभ्रातरं च नि- दधन्निक्षिपंस्तथोद्धसंघैरुद्धानां प्रशस्यानां महाभटानां संघैः समूहैः सह सहितः। कीदृशैः। निविशेषेण[3] हन्यन्ते ज्ञायन्ते निघास्तुल्यारो- हपरिणाहास्तथोद्धन्यन्त एष्वित्युद्धना यत्रच्छेदनाय कुट्टनार्थं वा का- ष्ठान्याधीयन्ते तत्तुल्या अतिबलिष्ठा अनेकशस्त्रघाताङ्किताश्चेत्यर्थः। अंसाः[4] स्कन्धा येषां तैः॥

अगमन्नृपोपघ्नमथाभिगर्जन्स घनं घनोच्चापघनो घनो नु।
विघनैः खगैः सूचितदुर्निमित्तो द्रुघनोग्रदंष्ट्रोरमयोघनांसः॥६७॥

६७. अथ द्रुघनोग्रदंष्ट्रः कुठाररौद्रदाढस्तथायोघनो घनस्तद्वन्निबि- डावंसौ स्कन्धौ यस्य स तथा स बर्बरो नृपोपघ्नं जयसिंहसमीपमरं शीघ्रमगमत्। कीदृक्सन्। वयः पक्षिणो हन्यन्ते यैस्तैर्विघनैः[5] खगै- र्गृध्रादिपक्षिभिः सूचितदुर्निमित्त उपरिभ्रमणेन ज्ञापितारिष्टः। तथा घनो नु मेघ इव घना निबिडा उच्चा उत्प्लवनेनोन्नता अपघना अङ्गाव- यवा यस्य सः। तथा घनं[6] निरन्तरमभिगर्जन्॥

अन्तर्घन। अन्तर्घण। इत्येतौ "हनः०" [३४] इत्यादिना निपात्यौ[7]॥

प्रघणे। प्रघाणे। इत्येतौ "प्रघण०" [३५] इत्यादिना निपात्यौ॥

---

१ डी ° नोघनस्तद्व°.

---

१ बी सी डी °खे स्वव°. २ ए सी डी °नदे°. ३ सी डी निर्विशे°. ४ बी अंशाः स्क°. ५ सी डी यैर्वि°. ६ बी °नं बहुतरम°. ७ बी °त्यौ। निघ। उ°.

निघ । उद्घ । संघैः । उद्घन । अपघनः । उपघ्नम् । इत्येते "निघोद्घ०" [३६] इत्यादिना निपात्याः ॥

घनं । घनम् । घनः । एते "मूर्ति०" [३७] इत्यादिना निपात्याः ॥

विघनैः । अयोघन । द्रुघन । इत्येते "व्ययः०" [३८] इत्यादिना निपात्याः ॥

निजघान स स्तम्बपरघ्नमुष्टी रथवाजिनः स्तम्बहनन्य ऋष्ट्या ।
असिमग्रहीत्स्तम्बघनं नु मुष्ट्या नृप उत्तरंस्तम्बपदादिहेत्या ६८

६८. स्तम्बः स्थुडं हन्यतेनेन स्तम्बघ्नो मतान्तरे तु स्तम्बघ्ना मुष्टिर्यस्य स स्तम्बपरघ्नमुष्टिर्महाबलः सन्स बर्बरः स्तम्बहनन्या ऋष्ट्या खड्गेन कृत्वा रथवाजिनो जयसिंहरथाश्वान्निजघान । ततश्चोत्तरन्रथादवरोहन्नृपः स्तम्बपदादिहेत्या स्तम्बो हन्यते यया तया स्तम्बहेत्या मुष्ट्या कृत्वासिमग्रहीत् । कीदृशम् । महाभरत्वात्स्तम्बघनं नु प्रचण्डदण्डमिव ॥

स्तम्बघ्न । स्तम्बघनम् । एतौ "स्तम्बाद् घ्नश्च" [३९] इति निपात्यौ । स्त्रियां तु परत्वादनडेव । स्तम्बहनन्या ॥ केचित्तु कप्रत्यये निपातनं कृत्वा स्त्रियामपि स्तम्बघ्ना इतीच्छन्ति । तदपि स्तम्बपरघ्नमुष्टिरित्यत्र वाक्यकाले प्रकटितम् ॥ अन्ये तु स्तम्बपूर्वस्यापि हन्तेः सातिहेतीति निपातनात्स्तम्बहेत्येतीच्छन्ति ॥

परिघद्रुजो बर्बरकाह्वयेन विहवोन्मुखः सोपहवेन तेन ।
निहवोन्मुखश्चाभिहवोन्मुखेन स समाह्वये त्वाहवमूर्ध्न्यदीव्यत् ६९

१ ए सी डी °न निह°. २ ए °न । विह°. सी डी °न । वह°.

१ बी °त्याः । विघनैः. २ ए °नम्. ३ ए °श्वा ज°. सी डी °श्वान्जघा°. ४ ए °ते त°. ५ बी °हाभार°. ६ सी डी °म्बघ्नं नु. ७ डी °म्बघ्नं । स्त°. ८ सी डी °म्बघ्नं । ए°.

६९. समाहूयन्ते प्राणिनोत्रेति समाह्वयः कुक्कुटादियुद्धमूतं कौतुकार्थिलोकमेलापकहेतुत्वादङ्गाङ्गमहायुद्धहेतुत्वाच्च तत्तुल्य आहवमूर्ध्नि रणमस्तके स नृपो बर्बरकाह्वयेन सहादीव्यद्युद्धक्रीडयाक्रीडत् । कीदृक् । परिघन्तावर्गले इवाचरन्तौ भुजौ यस्य स तथा । तथा विहवोन्मुखः स्पर्धायामभिमुखो निहवोन्मुखश्च सिंहनादाभिमुखश्च सन् । कीदृशा सता । सोपहवेन सस्पर्धेनाभिहवोन्मुखेन च सिंहनादेच्छुना च ॥

परिघ । इत्ययं "परेर्घः" [४०] इति निपात्यः ॥

समाह्वये । आह्वयेन । इत्येतौ "ह्वः०" [४१] इत्यादिना निपात्यौ ॥

निहव । अभिहव । उपहवेन । विहव । इत्यत्र "न्यभि०" [४२] इत्यादिनाल् । वाशब्दश्चोकारः स्यात् ॥

आहव । इत्यत्र "आङो युद्धे" [४३] इत्यल् । वाशब्दश्चोकारः ॥

जपकृद्व्यधाहावसदृग्रदालेर्हवकर्तुराह्वायकृदुन्मदस्य ।
गतयामतुर्ये यमवद्वधेच्छुर्नृपतिर्व्यधान्मूर्ध्न्यसिनास्य घातम् ॥७०॥

७०. नृपतिरस्य बर्बरस्य मूर्ध्न्यसिना घातं व्यधात् । कीदृक्सन् । आह्वायकृत्स्पर्धावांस्तथास्य वधेच्छुर्यथा गतयामस्य यातयामस्य वृद्धस्य तुर्ये वृद्धावस्थायाश्चतुर्थे भागे यमो वृद्धस्य वधेच्छुः स्यात् । यतः कीदृशस्यास्य । जपकृतां मुनीनां व्यधो हिंसा यतः सा तथाहावसदृक्काहावो निपानं यस्य पार्श्वभागे जलावष्टम्भाय काष्ठानि पाषाणा वा बध्यन्ते तद्वत्स्थूलोन्नता च रदालिर्दन्तपङ्क्तिर्यस्य तस्य तथोन्मदस्य बलाद्यवलेपेन मत्तस्यात एव हवकर्तुः स्पर्धाकृतः ॥

---

१ ए सी डी °धेच्छुर्नृ°.

---

१ ए °न्मुखेन च. २ सी डी °श्च सन्. ३ बी °स्य मू°. ४ बी °त्स्पर्धयंस्त°. ५ सी डी तथो°.

हसकृत्त्विषा हासकृतोस्य मूर्ध्नि कणवानसिः काणवति द्विधाभूत् ।
नृप उत्स्वनः स्वानकृतांथ तेन युयुधे भुजाभ्यां विहितारवाभ्याम्
॥ ७१ ॥

७१. त्विषा कान्त्या कृत्वा हसकृद्धसन्निवासिर्जयसिंहखड्गोस्य बर्बरस्य काणवति खड्गघातेन सशब्दे मूर्ध्नि कणवान् शिलातुल्ये मूर्ध्न्यास्फ(स्फा?)लनाद्भङ्गाच्च सशब्दः सन्द्विधाभूर्द्विखण्डो बभूव । "विचाले च" [७. २. १०५] इति धा । अत एव कीदृशोस्य । हासकृत उपहासकारिणः । अथासिभङ्गानन्तरं नृप उत्स्वन उद्गतसिंहनादः सन्स्वानकृता तेन बर्बरेण सह विहितारवाभ्यां मिथःसंघट्टेन कृतशब्दाभ्यां भुजाभ्यां कृत्वा युयुधे ॥

नृभुजस्तदाराव्यसृगाप्लवं सोजनयद्भुजप्रग्रहबन्धमूढात् ।
नृपतिर्जलाप्लावमवग्रहार्त्तं जलदादवग्राहजयी ग्रहो नु ॥ ७२ ॥

७२. तदा नृपतिर्नृभुजो बर्बरादारावी संभारेण पातात्सशब्दो योसृगाप्लवो रक्तौघस्तमजनयदुदपादयत् । यतः किंभूतात् । भुजावेव बन्धहेतुत्वात्प्रग्रहो रज्जुस्तुलासूत्रं वा तेन यो बन्धस्तेन मूढान्मूर्छितात् । यथावग्रहार्त्तं वृष्टिप्रतिबन्धेन रुद्धं जलाप्लावं वृष्टिमवग्राहजयी वृष्टिप्रतिबन्धस्य जेता ग्रहः सूर्यादिर्जलदाज्जनयति ॥

प्रग्राहवान्प्रावरदस्त्रधारोच्छ्रायस्य तस्य प्रवरत्प्रभोघः ।
प्रावारवद्राग्भुजयोः समुच्छ्र्युद्यावमुद्रावकरोकरोद्राद् ॥ ७३ ॥

---

१ **ए सी डी** °ताव ते°. २ **ए** °प्रगृह°.

---

१ **सी डी** °ङ्गात् स°. २ **ए बी** °भूर्द्वि खण्डे ब°. ३ **सी** कृभुजाभ्यां सशब्दाभ्या कृत्वा. **डी** कृभुजाभ्या सशब्दाभ्यां कृत्वा. ४ **ए सी डी** °तिर्भूभु°. ५ **बी** °प्रव°.

७३. समुच्छ्रयी महापुरुषत्वादुन्नतस्तथा प्रवरैर्बाहुल्येनाङ्गस्याच्छादकत्वशोभाहेतुत्वादिना वस्त्रविशेष इवाचरन्प्रभौघस्तेजःपूरो यस्य स तथा राड् जयसिंहस्तस्य बर्बरस्य भुजयोरुद्यावं मीलनं बन्धं द्रागकरोत् । कीदृक्सन् । प्रग्राहवान्बर्बरबन्धनाय गृहीतरज्जुस्तथोद्र्यते बन्धनायोर्ध्वीक्रियेते उद्रावौ करौ पाणी येन सः । किंभूतस्य तस्य । प्रावरन् रक्तत्वात्संततीभूतत्वाच्च वस्त्रभेदवदाचरन्नस्रधारोच्छ्रायो रक्तप्रवाहौन्नत्यं यस्य तस्य । प्रावारवदिति । यथा प्रग्राहवांस्तुलासूत्रवान्वणिक्प्रावारस्य वस्त्रस्योद्यावं मीलनं करोति । कीदृक्सन् । भुजयोः समुच्छ्रयी वस्त्रस्य भूमिलगने मलिनत्वस्य भयेन बाह्वोरौन्नत्यवानुद्रावकरश्च ॥

निग्राहस्ते स्तादवग्राह इत्युद्राहं स्वस्मिन्विद्ध्यनुत्पाव सत्यम् ।
स्रुक्प्रग्राहेणाटदर्थिद्विजानां राज्ञेत्युक्त्वाबन्धि संग्राहवत्सः ॥७४॥

७४. स बर्बरः संग्राहवन्मुष्टिरिव राज्ञाबन्धि बद्धः । किं कृत्वा । उक्त्वा । किमित्याह । रे अनुत्पावापवित्र स्रुक्प्रग्राहेण दक्षिणादिलिप्सया यज्ञोपकरणाङ्गीकारेणाटदर्थिद्विजानां चरतां याचकानां ब्राह्मणानामुद्राहं भणनं शापमित्यर्थः । स्वस्मिन्सत्यं मयैवं बन्धनादवितथं विद्धि जानीहि । किंभूतमुद्राहम् । रे बर्बरावग्राहोरात्यादेः सकाशात्पराभवस्तथा निग्राहस्तीव्रदण्डश्च ते स्तादित्येवंविधमिति ॥

आहाव । इत्ययम् "आहावो निपानम्" [४४] इति निपात्यः ॥

हव । इत्यत्र "भावे०" [४५] इत्यादिनाल् ॥ अनुपसर्गादिति किम् । आह्वाय ॥

---

१ बी स्रुक्प्राग्रा°.

---

१ बी °रत्वाद्राहु°. २ ए सी डी °रत्प्रभौ°. ३ बी °तत्वीभू°. ४ सी डी °रयस्य. ५ बी °यैव ब°. ६ सी डी °विधिमि°. ७ बी °ति । अहा°.

वध घातम् । अत्र "हनो वा वध् च" [४६] इत्यल् वा तत्संनियोगे च वधादेशोस्य ॥

व्यध । जप । उन्मदस्य । इत्यत्र "व्यध०" [४७] इत्यादिनाल् ॥

क्वण क्वाण । यम याम । हस हासे[1] । उत्स्वनः स्वान । इत्यत्र "न वा क्वण०" [४८] इत्यादिना वाल् ॥

आरवाभ्याम् आरावि[2] । आप्लवम् आप्लावम् । अत्र "आङो रुप्लोः" [४९] इति वाल् ॥

अवग्रह अवग्राह । इत्यत्र "वर्षे[3]०" [५०] इत्यादिना वाल् ॥

प्रग्रह प्रग्राहवान् । इत्यत्र "प्राद्रश्मि०" [५१] इत्यादिना वाल् ॥

प्रवरत् प्रावारवत् । इत्यत्र "वृगो वस्त्रे" [५२] इति वाल् । "घञ्युपसर्गस्य बहुलम्" [३. २. ८६] इति प्रस्य दीर्घः ॥ अन्ये तु प्राङ्पूर्व[4] एव वृणोतिः स्वभावाद्वस्त्रविशेषे वर्तते । तेन प्रावारवत्[5] प्रावरत् इति स्यात् ॥

समुच्छ्रयी उच्छ्रायस्य । इत्यत्र "उदः श्रेः [५३] इति वाल् ॥

उद्यावम्[6] । अनुत्पाव । उद्राव । इत्यत्र "युपूद्रोर्घञ्" [५४] इति घञ्[7] ॥

उद्ग्राहम्[8] । अत्र "ग्रहः" [५५] इति घञ् ॥

निग्राहः[9] । अवग्राहस्ते स्तात् । इत्यत्र "न्यवाच्छापे" [५६] इति घञ् ॥

स्रुक्प्रग्राहेण । इत्यत्र "प्राल्लिप्सायाम्" [५७] इति घञ् ॥

संग्राहवत् । इत्यत्र "समो मुष्टौ" [५८] इति घञ् ॥ शालिनी छन्दः ॥

दोःसंयावाद्रावसंदाव[1]माप्तेस्मिन्क्र्व्यादा दावसंद्रावयावात् ।
नेशुश्चाहृष्यंश्च विप्राः सुराज्ञस्तेजोनायान्निर्द्रवा निर्दवास्ते ॥७५॥

---

१ सी डी संद्राव°.

---

१ बी °स । स्वन । स्वा°. २ ए सी डी आरवि. ३ ए सी डी वर्षे इ°. ४ ए सी डी प्राङ्यपूर्व. ५ ए सी डी प्रावर°. ६ सी डी °व । अ°. ७ ए °ञ् । शालि°. ८ ए सी °ह । अ°. ९ ए °ग्राह । अ°.

७५. दावसंद्रावयावात्पराभवोत्थकष्टेन संतापस्वेदयोः संबन्धाद्धेतोः क्रव्यादा नेशुश्च । क सति । अस्मिन्बर्बरे । कीदृशे । दोःसंयावाद्बाह्वोर्बन्धनाद्द्रावसंदावं द्रावमायासजं स्वेदं संदावं संतापं चाप्ते । तथा सुराज्ञः कर्तरि षष्ठी । पूजितनृपेण जयसिंहेन यस्तेजोनायो विजयोत्थप्रतापप्राप्तिस्तस्माद्धेतोस्ते पूर्वोक्ता विप्रा अहृष्यंश्च । किंभूताः सन्तः । निर्द्रवाः खेदाभावान्निःस्वेदा निर्दवा निःसंतापाश्च ॥

भियो यवात्पिङ्गलिकास्य पत्नी कृताञ्चलोन्नायनयोन्नयोचे ।
जितस्त्वयासौ स्वभुजावनायाद् द्यूतीव शारीपरिणायघातात् ७६

७६. अस्य बर्बरस्य पिङ्गलिकाख्या पत्नी भियो भर्तृमृत्युभयस्य यवात्संबन्धाद्धेतो राज्ञोग्र ऊचे । कीदृक्सती । कृताञ्चलोन्नायेन निरुञ्छनाय वस्त्रप्रान्तोच्छ्रायेण नयस्य स्त्रीजनोचितस्य भक्त्युपचाररूपन्यायस्योन्नय उच्छ्रायो यया सा तथा । यदूचे तदाह । हे राजन्नसौ बर्बरस्त्वया स्वभुजावनायात्स्वभुजाभ्यां कर्तृभ्यां योवनायो बर्बरस्य बन्धनं तस्माज्जितः । यथा शारीणां परिणायेन समन्तान्नयनेन हननाद्द्यूती द्यूतकारो जीयते ॥

संयावात् । संदावम् । संद्राव । इत्यत्र "युदुद्रोः" [५९] इति घञ् ॥

नय नायात् । यवात् यावात् । निर्दवाः दाव । निर्द्रवाः द्राव । इत्यत्र "नियश्च०" [६०] इत्यादिना वा घञ् ॥

उन्नाय उन्नया । इत्यत्र "वोदः" [६१] इति घञ् वा ॥

---

१ ए °वात्पगलि°. सी डी °वात्पङ्ग°.

---

१ ए सी डी °दावसं°. २ ए सी डी °योनुप्र°. ३ ए सी °पथास्तिस्त°. डी °पथाप्ति°. ४ ए सी डी °प्रा आहृ°. ५ ए °जनेचि°. सी डी °जनेचत°. ६ ए सी भत्तयप°. ७ सी डी °व । सं°.

अवनायात्। इत्यत्र "अवात्" [६२] इति घञ्॥

शारीपरिणाय। इत्यत्र "परेर्घूते" [६३] इति घञ्॥ उपजातिश्छन्दः[1]॥

संस्तावपरिग्राहभागृषीणामपरिभवः परिभावमेष चक्रे।
तत्क्षान्त्वासौ मुच्यतां पतिर्मे प्रस्तावे ते पत्तितां हि कर्ता ७७

७७. एष बर्बरो न विद्यते शत्रुभ्यः परिभवो[2] यस्य स तथा सन् परिभावं न्यक्कारं चक्रे। केषाम्। समेत्य स्तुवन्ति यस्मिन्देशे छन्दोगाः स यज्ञदेशः संस्तावस्तस्य[3] यः परिग्राहः स्वीकारस्तं यद्वा संस्तावं च[4] परिग्राहं[5] च वेदैर्यज्ञाङ्गभूताया ग्रहणविशेषं भजन्ते य ऋषयस्तेषाम्। तदृषीणां परिभवरूपं कुकर्म। शिष्टं स्पष्टम्॥ औपच्छन्दसिकाप[6]रान्तिका छन्दः॥

अप्रद्रावाः[1] प्रस्तारभाजः सहाज्यप्रस्रावैर्बर्हिष्प्रस्तरैश्चात्र तीरे।[2]
राजद्विस्तारे सल्लताविस्तरेद्य द्राक्कुर्वन्त्वेते यज्ञमृग्विस्तरेण॥७८॥

७८. अद्य सांप्रतमत्र सारस्वते तीर[7] एत ऋत्विज ऋग्विस्तरेण ऋचां मन्त्रविशेषाणां विस्तीर्णतया द्राग्यज्ञं कुर्वन्तु। किंभूते। सहाज्यप्रस्रावैर्हव्यघृतक्षरणयुक्तैः[8] स्रुग्भ्यः[9] क्षरितेन घृतेन युक्तैरित्यर्थः। बर्हिष्प्रस्तरैर्दर्भसंस्तरणैः[10] कृत्वा राजद्विस्तारे शोभमानविस्तीर्णत्वे तथा सन्तः शोभना लतानां विस्तराश्छादनानि[11] यस्मिंस्तत्र लतामण्डपोपेते। किंभूताः सन्तः। अप्रद्रावा भयाभावात्पलायनरहितास्तथा प्रस्ता-

---

१ ए अपद्रा°. २ ए सी डी °प्रस्तावै°.

---

१ बी °तिच्छन्दः. २ ए सी डी °रिभावो. ३ ए सी डी °वसुरुप्रयः. ४ सी डी °वं प°. ५ बी °रिग्रहं. ६ ए °च्छदःसका°. सी डी °च्छन्दसका°. ७ ए सी डी तीरे त. ८ ए सी डी °प्रस्तावै°. ९ ए सुप्यः क्ष°. सी सुप्य क्ष°. डी सुप्यक्षारि°. १० बी °रैर्भवर्म°. ११ ए सी डी विस्तारा°.

रभाजः प्रस्तारं सामगणनाङ्गभूतानामुदुम्बरकाष्ठकुशानां रचनाविशेषं भजन्तः ॥

परिभावं परिभवः । अत्र "भुवोवज्ञाने वा" [६४] इति वा घञ् ॥

परिग्राह । इत्यत्र "यज्ञे ग्रहः" [६५] इति घञ् ॥

संस्ताव । इत्यत्र "संस्तोः" [६६] इति घञ् ॥

प्रस्तावैः । अप्रद्रावाः । प्रस्तावे । अत्र "प्रात्स्नुद्रुस्तोः" [६७] इति घञ् ॥

प्रस्तार । इत्यत्र "अयज्ञे स्त्रः" [६८] इति घञ् । प्रस्तारो हि सामगणनाङ्गं न तु यज्ञाङ्गमिति घञ् ॥ अयज्ञ इति किम् । बर्हिष्प्रस्तरैः ॥

विस्तारे । अत्र "वेरु०" [६९] इत्यादिना घञ् ॥ प्रथन इति किम् । लताविस्तरे ॥ अशब्द इति किम् । ऋग्विस्तरेण ॥ वैश्वदेवी छन्दः ॥

विप्रा विष्टारास्तारपङ्क्त्यादिगीतेर्विश्रावोद्गारान्कुर्वतां निर्निगाराः । नीवारोत्काराञ्श्यामकानां निकारांश्चोच्चैर्विक्षावा निर्भया निर्लुनन्तु ॥ ७९ ॥

७९. विप्रा निर्निगारा निगाराद्रक्षोभक्षणान्निर्गताः सन्तो विश्रावोद्गारान् विश्रावान्विविधश्रवणान्युद्गारांश्चोच्चारणानि च कुर्वतां कुर्वन्तु । कस्याः । विष्टारास्तारपङ्क्त्यादिगीतेर्विष्टारास्ताराभ्यां परे ये पङ्क्ती ते आदी यस्याः सा या गीतिश्छन्दस्तस्या विष्टारपङ्क्त्याख्यस्यास्तारपङ्क्त्याख्यस्य च छन्दस इत्यर्थः । यद्वा । यस्या आदौ विष्टारपङ्क्तिरास्तारपङ्क्तिश्चच्छन्दोविशेषौ स्तस्तस्या गीतेः सामविशेषस्येत्यर्थः । तथा नीवारोत्कारान्वनव्रीहिसमूहाञ् श्यामकानामारण्यकधान्यभेदानां च निकारांश्च राशींश्च निर्लुनन्तु । किंभूताः सन्तः । निर्भया रक्षोभयरहिता अत एवोच्चैरुदात्तो विक्षावश्छिक्का येषां ते ॥

१ ए सी डी °गणाना°. २ ए सी डी °रिभावः. ३ ए सी डी प्रस्तावैः. ४ डी °गणाना°. ५ ए सी बहिष्प्र°. ६ बी °भयान्नि°. ७ सी डी °वस्थिक्का.

विष्टारपङ्क्तिः । इत्यत्र "छन्दोनाम्नि" [७०] इति घञ् ॥ केचित्तु वेरन्यतोपीच्छन्ति । आस्तारपङ्क्तिः ॥

विश्राव । विक्षावाः । अत्र "क्षुश्रोः"[७१] इति घञ् ॥

निगारा[1]ः । उद्गारान् । इत्यत्र "न्युदो ग्रः" [७२] इति घञ् ॥

श्यामकानां निकारान् । नीवारोत्कारान् । इत्यत्र "किरो धान्ये" [७३] इति घञ् ॥

नीवार । इत्यत्र "नेर्वुः"[2] [७४] इति घञ् ॥

न्यायं श्रयिष्यति न तु न्ययमस्य नन्तुं
पर्याय आश्रमविशाय इहावनाय ।
राजोपशायवदितीह परिब्रुवत्यां
रक्षःपतिं तममुचज्जयसिंहदेवः ॥ ८० ॥

८०. जयसिंहदेवस्तं रक्षःपतिममु[3]चत् । कस्यां सत्याम् । इह पिङ्गलिकायां परिब्रुवत्याम् । किमित्याह । हे राजन्बर्बरो न्यायं नीतिं श्रयिष्यति न तु न्ययं निकृष्टमयनं न्ययोन्यायस्तं[4] न श्रयिष्यति । यतोस्य बर्बरस्य नन्तुं त्वां मुनींश्च[5] प्रणन्तुं पर्यायोवसरस्तथास्येह नदीतीरेवनाय मुनीनां रक्षार्थमाश्रमविशाय आश्रमेषु मुनिस्थानेषु क्रमप्राप्तं पर्यायसाध्यं शयनं[6] राजोपशायवद्यथास्य राज्ञोवनाय[7] राजनि जयसिंह उपशायः समीपे शयितुं पर्यायः । यतोसौ त्वां मुनींश्च नंस्यति रक्षार्थं समीपावस्थानेन सेविष्यते[8] चातो युष्माकं शिक्षयान्यायमसौ न करिष्यतीत्यर्थ इति ॥

---

१ बी °गार । उ°. २ ए नेर्वुपरिरिति. सी नेर्वुपरिनिति. डी नेर्वुपरिति. ३ डी °ममुंच°. ४ सी डी °स्तंश्र°. ५ ए सी डी मुनीश्च. ६ ए सी डी °यनीं रा°. ७ ए °वनीय. ८ ए सी डी °ते वातो.

न्यायम् । अत्र "इणोऽभ्रेषे" [७५] इति घञ् ॥ अभ्रेष इति किम्[1] । न्ययम् ॥

पर्यायः । अत्र "परेः क्रमे" [७६] इति घञ् ॥

अस्याश्रमविशायः । राजोपशाय[2] । अत्र "व्युपाच्छीङः" [७७] इति घञ् ॥ वसन्ततिलका छन्दः ॥

पुष्पावचायसुफलोच्चयपल्लवाद्यो-
च्चायैरचौर्यकुसुमावचये वने तैः ।
आकायचिद्भिर्[1]ऋषिभिर्विहितातिथेयः[2]
स्थित्वा नृपो निजनिकायमगात्सुकायः ॥ ८१ ॥

८१. सुकायः शोभनमूर्तिर्नृपो निजनिकायं स्वावासमगात् । किं कृत्वा । चौराणामुच्छेदादविद्यमानश्चौर्येण कुसुमानामवचयस्त्रोटनं यत्र तस्मिन्वने स्थित्वोषित्वा । यत आकायं यज्ञाग्निभेदं चिन्वन्त्या-हुतिभिरुपचितीकुर्वन्ति ये तैर्यायजूकैरित्यर्थः । तैः प्रसिद्धैर्[3]ऋषिभिर्विहि-तातिथेयः कृतातिथ्यः । कैः कृत्वा । पुष्पावचायसुफलोच्चयपल्लवा-द्योच्चायैर्भावानयने द्रव्यानयनमित्यवचीयमानैः पुष्पैरुच्चीयमानैः सुफ-लैरुच्चीयमानैः पल्लवाद्यैः[4] पल्लवपत्रादिभिश्चेत्यर्थः ॥

पुष्पावचाय । पल्लवाद्योच्चायैः । अत्र "हस्त०" [७८] इत्यादिना घञ् ॥ उदो नेच्छन्त्यन्ये । फलोच्चय[5] । अस्तेय इति किम् । अचौर्यकुसुमावचये[6] ॥

आकाय । सुकायः । निकायम् । अत्र "चिति०" [७९] इत्यादिना घञ् । आदेः कश्च ॥

इति श्रीजिनेश्वरसूरिशिष्यलेशाभयतिलकगणिविरचितायां श्रीसिद्धहेमचन्द्रा-भिधानशब्दानुशासनद्व्याश्रयवृत्तौ द्वादशः सर्गः समर्थितः ॥

---

१ बी °द्भिऋषि°. २ बी °थेय स्थि°.

---

१ ए °म् । न्याय°. २ बी °शायः । अ°. सी डी °शायः । इत्यत्र. ३ ए सी °द्धैरुषि°. बी द्धैऋषि°. ४ डी °ल्लवप°. ५ बी °च्चयः । अ°. डी °च्चयं । अ°. ६ ए अचोर्य°.

त्रयोदशः सर्गः ।

राज्ञो रक्षोनिकायेशो रैनिकायानपूरयत् ।
माणिक्यनिक[1](च)यांश्चैकदृषन्निश्चायलीलया ॥ १ ॥

१. रक्षोनिकायेशो राक्षसौघस्वामी बर्बरो रैनिकायान्स्वर्णानामुपर्युपरि राशीकरणानि माणिक्यनिचयांश्च प्रभूतान्मणिभेदांश्च राज्ञोऽपूरयद्ददौ । कया । एको दृषदां यो निश्चायो मानविशेषस्तस्य लीलया सुखेनेत्यर्थः ॥

अनिच्छुरन्नसंग्राहेप्यविघ्नं पत्तिसंस्थया ।
स नन्दथुकृते भूपमकृत्रिममसेवत ॥ २ ॥

२. स बर्बरो नन्दथुकृते राज्ञ आह्लादनायाविघ्नं सदेत्यर्थः । अकृत्रिमं सद्भावेनेत्यर्थः । भूपमसेवत । कया । पत्तिसंस्थया । पदातिव्यवस्थया । कीदृक्सन् । अन्नसंग्राहेपि धान्यमुष्टावप्यनिच्छुर्भोजनमात्रमप्यवाञ्छन्नित्यर्थः ॥

यज्ञरक्ष्णे सयत्नोभूत्स्वप्नेप्यप्रश्नयाचथुः ।
राक्षसो यत्प्रसादं राट् तेनायाचित्रिमं व्यधात् ॥ ३ ॥

३. यद्यस्माद्राक्षसो बर्बरो यज्ञरक्ष्णे यागरक्षायां सयत्न आदृतोभूत् । कीदृक्सन् । स्वप्नेपि चित्तेपीत्यर्थः । न विद्यते प्रश्नस्य किं

१ ए °निश्चयांनैकवर्षन्नश्चा°. सी °निश्चयांनैकर्षन्नि°. डी °निश्चयांनैकवृर्षन्नि°.

१ डी रैनिंका°. २ सी °द्दो । ए°. ३ ए डी °दौ । ए°. ४ ए °खेनने°. ५ सी °त् । स्व°.

यज्ञरक्षां करोमि न वेति कथं वा करोमीत्यादिपृच्छाया[1] याचथुर्याञ्चा यस्य स तथा स्वयमेवेत्यर्थः । तेन हेतुना राड् जयसिंहोयाचित्रिमं याञ्चयानिर्वृत्तं[2] स्वाभाविकं प्रसादं बर्बरस्य व्यधात्[3] ॥

रैनिकायान् । इत्यत्र "चिति०" [७९] इत्यादिना घञ् । आदेश्च कः ॥

रक्षोनिकाय । इत्यत्र "संघेनूर्ध्वे" [८०] इति घञ् कश्चादेः ॥ संघ इति किम् । माणिक्यनिचयान् । बहुत्वमात्रमत्र विवक्षितं न संघ इति व्यावृत्तिः ॥

एकदृषन्निश्राय । अन्नसंग्राह(हे) । इत्यत्र "माने" [८१] इति घञ् ॥

संस्थया । अविघ्नम् । इत्यत्र "स्थादिभ्यः कः" [८२] इति कः ॥

नन्दथु । इत्यत्र "ट्वितोथुः"[4] [८३] इत्यथुः ॥

अकृत्रिमम् । अयाचित्रिमम् । अत्र "ड्वितः०" [८४] इत्यादिना त्रिमक् ॥ ट्विद्याच्विरिति कश्चित् । याचथुः ॥

यज्ञ[5] । स्वप्ने । रक्ष्णे । यत्नः । प्रश्न । इत्यत्र "यजिस्वपि०" [८५] इत्यादिना नः ॥

स विश्वविधिनाब्ध्यादावपि सान्तर्धिराज्ञया ।
त्यक्तसंकुटनोसांकोटिनं नृपमरञ्जयत् ॥ ४ ॥

४. स बर्बरोब्ध्यादावपि समुद्रनद्यादावपि विश्वविधिना प्रवेशकरणेन हेतुनासांकोटिनमकुटिलं नृपमरञ्जयत् । कीदृक्सन् । त्यक्तसंकुटनो[6] मुक्तकौटिल्योत[7] एवाज्ञया नृपादेशेन सान्तर्धिर्मन्त्रादिशक्त्यादृश्यः ॥

---

१ ए °या । रक्त°.

---

१ ए °दिनापृ°. २ बी °निवृत्तं. ३ ए व्यवधा°. ४ सी °तोथूः । अ°. डी °तोथुः । अ°. ५ ए बी यज्ञः । स्व°. ६ सी डी °संकट°. ७ ए सी डी मुकुटकौ°.

विश्न । इत्यत्र "विच्छो नङ्" [८६] इति नङ् ॥

आदौ । विधिना । इत्यत्र "उपसर्गाद्दः किः" [८७] इति किः ॥

अब्धि । इत्यत्र "व्याप्यादाधारे" [८८] इति किः ॥

अन्तर्धिः । "अन्तर्धिः" [८९] इति निपात्यते ॥

संकुटनः[1] । असांकोटिनम् । अत्र "अभि०" [९०] इत्यादिनानञिनौ ॥

नीतिप्रतिश्रुता श्रोतुं राजैकाकी जनश्रुतीः ।
सार्तीनां चार्दिकां हर्तुं कदाचिन्निरगान्निशि ॥ ५ ॥

५. कदाचिदेकाकी स राजा निशि निगरात् । किं कर्तुम् । जनश्रुतीर्लोकवार्ताः[2] श्रोतुम् । कया हेतुना । नीतिप्रतिश्रुता । राजा[3] लोकचराचरितपरिज्ञानाय प्रच्छन्न एकाकी रात्रौ चरेदिति राजनीतेरङ्गीकारेण । तथा सार्तीनां रोगपराभवादिना पीडितानामर्दिकां पीडां हर्तुं च ॥

नीति । इत्यत्र "स्त्रियां क्तिः" [९१] इति क्तिः ॥

श्रुतीः[4] । सार्तीनाम् । इत्यत्र "श्वादिभ्यः" [९२] इति क्तिः ॥ वक्ष्यमाणैः क्विबादिभिः सह समावेशार्थं वचनम् । तेन प्रतिश्रुता । अर्दिकाम् । इत्याद्यपि स्यात् ॥

सासुतीनां मिथो यूत्या जूत्या वाक्समितिं नृपः ।
भावज्ञस्यै क्वाप्यपश्यत्कीर्तीप्सुर्हेतिसातिमान् ॥ ६ ॥

६. नृपः क्वापि स्थाने सासुतीनामासुत्या मद्येनान्वितानां मद्यपानां भावज्ञप्त्या अभिप्रायं ज्ञातुं तेषां मिथो वाक्समितिं वाग्युद्धमपश्यत् । कया कृत्वा । मिथो यूत्या जूत्या मिथो यूत्या संपर्केण

१ ए सी डी °त्कीर्तिप्सु°.

१ सी डी सं ट°. २ ए सी डी °वार्ताश्रो°. ३ ए सी डी राजलो°. ४ ए सी डी श्रुतीना°.

या जूतिर्गतिस्तया सासुतिभिः सह मिलित्वा गमनेनेत्यर्थः । कीदृक् । कीर्तीप्सुस्तथा हेतीनामस्त्राणां सातिः [1] षिंगृ बन्धने । सीयते सातिः संबन्धस्तद्वान् [2] ॥

संपीत्या मत्तसंगीतौ क्वचित्स्वगुणकीर्तनाम् ।
शृण्वन्ननास्थया चक्रे नान्नपक्तिमवस्थितिम् ॥ ७ ॥

७. संपीत्या सहपानेन कृत्वा मत्तानां मद्यपानां संगीतिः सहगानं यत्र तस्मिन्मत्तसंगीतौ क्वचित्स्थानेन्नपक्तिं यावता कालेनान्नपाकः [3] स्यात्तावन्तमपि कालमवस्थितिं राजा न चक्रे । कीदृक्सन् । स्वगुणकीर्तनां शृण्वन् । कया नास्थात् । अनास्थया महापुरुषत्वेन स्वगुणेष्ववहेलया ॥

समितिम् । सासुतीनाम् । अत्र "सम्०" [९३] इत्यादिना क्तिः ॥

साति । हेति । यूत्या । जूत्या । ज्ञस्यै । कीर्ति । इत्येते "साति०" [९४] इत्यादिना निपात्याः ॥ कीर्तनाम् । इत्यपि कश्चित् ॥

संगीतौ । संपीत्या । पक्तिम् । अत्र "गापा०" [९५] इत्यादिना क्तिः ॥

अवस्थितिम् । अनास्थया । अत्र "स्थो वा" [९६] इति वा क्तिः ॥

प्रव्रज्येज्याजुषामास्यासमज्यास्वट्यया च सः ।
विद्याभृत्यान् क्वचित्पश्यन्मेने चर्याफलं महत् ॥ ८ ॥

८. स राजा चर्याफलं महन्मेने । कीदृक्सन् । क्वचिद्विद्यैव भृत्या वेतनं येषां तान्विद्याभृत्यान्यज्ञविद्योपजीविनो महायाज्ञिकानित्यर्थः । पश्यन् । कया । अट्यया भ्रमणेन । कासु । प्रव्रज्येज्याजुषां प्रव्रज्यां दीक्षाविशेषमिज्यां च यागं [4] च सेवमानानां यज्ञोपाध्या-

---

१ ए सी डी °तिः षिगृ°. २ सी डी °बद्धस्त°. ३ सी डी °पावकः. ४ सी डी °गं से°.

यानामास्यासमज्यास्वास्थायायुपवेशनाय समज्यासु सभासु यज्ञपाटकेष्वित्यर्थः । यदीदृशाः पुण्यात्मानो विद्याभृत्या मया दृष्टास्तेन चर्यायाः फलं महज्जज्ञ इत्यज्ञासीदित्यर्थः ॥

निपद्यायां निषद्यानिपत्याशय्याजुषश्चरान् ।
सोज्ञासीच्छद्मसुत्यांपः[1] स्थिरमन्येत्यया क्वचित् ॥ ९ ॥

९. क्वचित्स नृपश्चरान् शत्रुहेरिकान[1]ज्ञासीत् । किंभूतान् । निपद्यायां राजमार्गे निषद्या[2] हट्टास्ता एवात्युच्चत्वान्निपत्या भैरवपातभूमयस्तासां शय्या रचनाविशेषास्तज्जुषः । तथा छद्मना किल वयं यागार्थं सुत्याविक्रायिणो द्विजा इति व्याजेन सुत्यां सोमाधानपात्रं पान्ति ये तांश्छद्मना वल्लीरसपात्रधारकानित्यर्थः । एवंविधानपि कथमज्ञासीदित्याह । स्थिरमन्येत्यया स्थिरा मन्या कन्धरा यत्र सा येत्या गतिस्तया कृत्वा । तान् क्षुद्रतया[3] जनानां राजवार्तां कुर्वतां सावधानत्वान्निश्चल[4]ग्रीवया श्रावं श्रावं गच्छतो दृष्ट्वा । चरा एत इति राजाज्ञासीदित्यर्थः ॥

आस्या । अव्यया । प्रव्रज्या । इज्या । इत्यत्र "आस्यटि०" [९७] इत्यादिना क्यप् ॥

भृत्यान् । अत्र "भृगो नाम्नि" [९८] इति क्यप् ॥

समज्यासु । निपत्या । निपद्यायाम् । निषद्या । शय्या । सुत्या । विद्या । चर्या । मन्या । इत्यया । इत्यत्र "समज०" [९९] इत्यादिना क्यप् ॥

जनेच्छाकृत्ये जिज्ञासुः क्वापि गूढाकृतिक्रियः ।
तृष्णां याञ्चां कृपां श्रद्धां[2] भान्तर्धां च स निर्ममे ॥ १० ॥

---

१ सी डी °त्याप स्थि. २ बी °द्धां चान्त°.

---

१ ए सी डी °त्रुहरि°. २ सी डी निपद्या. ३ डी क्षुप्रत°. ४ ए सी डी °त्वानिश्च°.

१०. स्पष्टः। किं तु जनेच्छाकृत्ये लोकानामभिप्रायं चेष्टां च। गूढे आकृतिक्रिये आकारगमनादिचेष्टे यस्य स तथा भान्तर्धा भाया राज्यशोभाया अन्तर्धा गोपनं च ॥

मृगयापरिसर्येच्छुरिवच्छन्नपदः क्वचित्।
परिचर्याकृतोटाट्यां जज्ञेटाटां परस्य च ॥ ११ ॥

११. क्वचिच्च राजा परिचर्याकृतो भक्तस्याटाट्यां गतिं जज्ञे निःशङ्कत्वादिगुणैर्ज्ञातवान्[१]। परस्य च शत्रोश्चाटाटां गतिं साशङ्कत्वादिना जज्ञे। कीदृक्सन्। छन्नावलक्षितौ पादौ पादन्यासौ यस्य सोज्ञात इत्यर्थः। मृगयाखेटैस्तदर्थं[२] परिसर्या परिगमनं तदिच्छुर्लुब्धको यथा छन्नपदः स्यात् ॥

क्रियः कृत्ये। अत्र "कृगः श च वा" [१००] इति शो वा चकारात्क्यप् च ॥ पक्षे। आकृति ॥

मृगया। इच्छा। याञ्चाम्। तृष्णाम्। कृपाम्। भा। श्रद्धाम्। अन्तर्धाम्। एते "मृगयेच्छा०" [१०१] इत्यादिना निपात्याः ॥

परिसर्या। परिचर्या। इत्यत्र "परेः०" [१०२] इत्यादिना यः ॥

अटाट्याम्। अटाटाम्। अत्र "वाटाट्यात्" [१०३] इति वा यः ॥

जागर्यया निशार्धस्य ज्ञात्वेहां जागरावताम्।
प्रशंसां च जुगुप्सां च कुर्वन्स निरगात्पुरात् ॥ १२ ॥

१२. स्पष्टः। किं तु प्रशंसां विद्याभृत्यादेः। जुगुप्सां चच्छन्नवतां चरादीनाम् ॥

जागर्यया। जागरा। इत्यत्र "जागुरश्च"[३] [१०४] इति-अः[४]। यश्च ॥

१ ए °त्वारिगु°. २ बी °टकस्त°. ३ ए °गुरुश्च. सी डी °गुरेश्च. ४ बी अः। अश्च.

प्रशंसाम् । जुगुप्साम् । अत्र "शंसि०" [१०५] इत्यादिना-अः ॥
ईहाम् । अत्र "क्टः०" [१०६] इत्यादिना-अः ॥

क्षमां भिदाच्छिदाभीषां सोसिभूषो व्यलङ्घयत् ।
पूर्वाद्भुतकथाचिन्ताचर्चापूजास्पृहापरः ॥ १३ ॥

१३. स नृपो[1] भिदाच्छिदाभीषां पशुमत्स्यादिविदारणद्विधाकरणै[2][3] रौद्रां क्षमां पूर्वाह्यचण्डालमात्सिकादिसंबन्धिभूमिं[4][5] व्यलङ्घयत् । कीदृक् । असिना भूषा यस्य सोसिभूषस्तथा पूर्वेषां रामादीनामद्भुता याः कथास्तासां या चिन्ता स्मरणं चर्चा मनसि विचारः पूजा बहुमानः स्पृहेच्छा तत्परः ॥

अदोलातोलचित्तः सोप्रमाः कुम्बाश्च लङ्घयन् ।
चित्रकामनया प्राप नदीं ब्राह्मीमवेदनः ॥ १४ ॥

१४. स राजा चित्रकामनयाश्चर्याभिलाषेण ब्राह्मीं नदीं सरस्वतीं प्राप । कीदृक्सन् । न दोलायाः प्रेङ्खायास्तोला साम्यं यस्य[6] तच्चित्तं यस्य सः । सात्त्विकत्वान्निश्चलचित्तोत एवावेदनो भयोत्थदुःखरहितोत एवाप्रमाः प्रमाणरहिता असंख्याः कुम्बाश्च न केवलं भिदाच्छिदाभीषां क्षमां सुगहना यज्ञवृत्ती(ती?)श्च लङ्घयन्[7] ॥

वन्दनोपासने कृत्वा[1] सोञ्जलिग्रन्थनादिभिः ।
पादाभिघट्टनोदूर्मिश्रन्थनामुत्ततार ताम् ॥ १५ ॥

१५. स राजाञ्जलिग्रन्थनादिभिरञ्जलिरचनास्नानादिभिः कृत्वा[8]

१ ए °त्वा तां नदीं°.

१ ए °पो सिदा°. २ बी °रणाद्वि°. ३ डी °रणे रौ°. ४ बी °मात्स्यका°. ५ ए सी डी °भूमिमभ्यल°. ६ बी °स्य सः. ७ डी °न् । चन्द°. ८ डी °त्वा चन्द°.

वन्दनोपासने कृत्वा तां नदीमुत्ततार । किंभूताम् । पादाभिघट्टनया पादाक्रमणेनोदुच्छलन्त्यूर्मिश्रन्थना कल्लोलरचना यस्यां ताम् ॥

क्षमाम् । अत्र "षितोङ्" [१०७] इत्यङ् ॥

भिदाच्छिदे । "भिदादयः" [१०८] इति साधू ॥

भीषाम् । भूषः[1] । चिन्ता । पूजा । कथा[2] । कुम्बाः[3] । चर्चा । स्पृहा । तोल । दोला । इत्यत्र "भीषि०" [१०९] इत्यादिनाङ् ॥

अप्रमाः । अत्र "उपसर्गादातः" [११०] इत्यङ् ॥

कामनया । अवेदनः । उपासने । श्रन्थनाम्[4] । अभिघट्टना[5] । वन्दना । इत्यत्र "णिवेत्ति०" [१११] इत्यादिनानः ॥ ग्रन्थेरपीत्यन्ये । ग्रन्थना ॥

आश्चर्यान्वेषणेष्या[1] चार्तपर्येषणया[6] च सः ।
परीष्ट्याध्येषणाभाजां चाटत्तीरेनधीष्टिकृत् ॥ १६ ॥

१६. स राजा तीरे नदीतट आटदभ्राम्यत् । कैर्हेतुभिः । आश्चर्यान्वेषणेष्या चाश्चर्यविलोकनेच्छया चार्तपर्येषणया च पीडितानां विलोकनेन च । तथाध्येषणाभाजां सत्कारपूर्वो व्यापारोध्येषणा । तद्भाजां मुनीनां परीष्ट्यां[7] च शुश्रूषणया च । न च वाच्यमसौ द्रव्येच्छया कस्यापिच्छलं वीक्षितुमत्राटद्यतो नाधीष्टिं याञ्चां करोत्यनधीष्टिकृन्निर्लोभत्वात्कस्यापि किमप्यगृह्णन्नित्यर्थः ॥

अन्वेषणा । इत्यत्र "इषोनिच्छायाम्" [११२] इत्यनः ॥ अनिच्छायामिति किम्[8] । इष्टया ॥

---

१ डी चाश्चर्यवि°.

---

१ ए भूष । चि°. २ बी कथाः । कु°. डी कथां । कु°. ३ सी डी कुम्वा । च°. ४ बी °न्थनं । अ°. ५ ए सी डी °ना । वेदना. ६ बी °षणाय च. ७ डी °ष्ट्या अध्ये°. ८ ए °म् । ईष्ट्या.

पर्येषणया । परीष्ट्या । अध्येषणा । अनधीष्टि । इत्यत्र "पर्यधेर्वा" [११३] इति वानः ॥

क्रुधा काकयुदुद्धूके कुञ्जेथाभीः स भीतिदे ।
समसंपद्विपद्भूप इति दीनं वचोशृणोत् ॥ १७ ॥

१७. अथ स राजा कुञ्जे वनगहनमध्य इति वक्ष्यमाणं दीनमार्तं वचोशृणोत् । कीदृक्सन् । समे तुल्ये संपद्विपदौ यस्य स तथा महापुरुषत्वात्संपद्यहृष्यन्विपदि चाविषादीत्यर्थः । अत एवाभीः । किंभूते कुञ्जे । भीतिदे भयप्रदेपि । यतः क्रुधा हेतुना काकयुधि काकैः सह रण उद्युता घूका यत्र तस्मिन् ॥

यद्वचोशृणोत्तदाह ।

नाथोज्झसि किमह्रीर्मां ह्रीतिं त्यक्त्वा मया कृताम् ।
व्यावभाषीं व्यतीहां च व्यतीक्षां चास्मरन्निव ॥ १८ ॥

१८. हे नाथाविद्यमाना ह्रीर्मत्त्यागविषया लज्जा यस्य सोह्रीः संस्त्वं ह्रीतिं लज्जां त्यक्त्वा मां किमित्युज्झसि । कीदृगिव । अस्मरन्निव । काम् । मया कृतां व्यावभाषीं विनिमयेन प्रेमालापं तथा व्यतीहां विनिमयेन नखक्षतादिस्मरचेष्टां च तथा व्यतीक्षां च विनिमयेन कटाक्षैरीक्षणं च । एकान्तानुरक्तां स्वप्रेयसीं मामजानन्निवेत्यर्थः ॥

क्रुधां । युत् । संपत् । विपत् । इत्यत्र "क्रुत्०" [११४] इत्यादिना क्विप् ॥

---

१ ए सी डी °ह्रीमां ह्री°. २ ए सी डी °तीक्षा च.

---

१ ए अध्यैष°. २ ए सी डी °लापां त°. ३ बी °ष्टां त°. ४ सी डी °रक्तास्व°. ५ ए सी डी °धा । यत्.

अभीः भीति । अह्रीः ह्रीतिम्[1] । अत्र "भ्यादिभ्यो वा" [११५] इति वा क्विप् ॥

व्यावभाषीम् । अत्र "व्यतिहारे०" [११६] इत्यादिना ञः ॥ अनीहादिभ्य इति किम् । व्यतीहाम् । व्यतीक्षाम् ॥

अद्यैवाजीवनिर्मेस्तु यावद्वीक्षे वराक्यहम् ।
ग्लानिहानी न ते नाथ म्लानिज्यानी कुलस्य च ॥१९॥

१९. हे नाथाहं वराकी कृपापात्रं यावत्ते ग्लानिहानी हर्षक्षयाङ्गक्षयौ कुलस्य तव वंशस्य म्लानिज्यानी त्वन्मृत्युना मालिन्यं क्षयं च न वीक्षे[2] तावन्मेद्यैवाजीवनिर्मृत्युरस्तु ॥

अजीवनिः । अत्र "नञोनिः शापे" [११७] इत्यनिः ॥

ग्लानिहानी । ज्यानी । अत्र "ग्लाहाज्यः" [११८] इत्यनिः ॥ म्लानि । इत्यपि कश्चित् ॥

का कारिः कान्त कर्पूरे कस्तूर्यां का च कारिका ।
का कृतिश्चन्दने कृत्या कागरौ[1] स्रक्षु का क्रिया ॥ २० ॥
इति पृष्टस्य प्रत्येकं सर्वेत्युक्तं पुरा तव ।
स्मरन्त्यर्हाम्यहं वह्निवेशिकां कासिकाद्य मे ॥ २१ ॥

२०, २१. अहं वह्निवेशिकामग्नौ प्रवेशमर्हामि[3] । कासिकाद्य मे कोद्य ममावस्थातुं पर्यायः । कीदृकसत्यहम् । स्मरन्ती । किमित्याह । हे कान्त कर्पूरे । निमित्तसप्तमीयम् । यथा शरदि पुष्पन्ति(?) । आतपे क्लाम्यतीति । कर्पूरनिमित्ता कर्पूरहेतुका या कारिर्विलेपनमण्डन-

---

१ सी डी कागुरौ.

---

१ बी °ति । अ°. २ बी वीक्ष्ये ता°. ३ ए °र्हानि । का°. ४ ए सी डी °ष्पन्ते । आ°.

[1]केशवस्त्रगृहवासनादिका क्रिया सा का । कोर्थः । कर्पूरहेतुकं किं विलेपनं क्रियते मण्डनं वा केशादिवासना वेत्यादिः[2] । एवं कस्तूर्यां का च कारिका । चन्दने का कृतिस्तथागरौ[3] का कृत्या क्रिया तथा स्रक्षु पुष्पमालासु च का क्रियेत्येवंप्रकारेण पुरा पूर्वं मया पृष्टस्य [4]तव प्रत्येकमेकं कर्पूरादि प्रति सर्वा विलेपनादिका समस्ता कारि[5]-(रिः) कारिका कृतिः कृत्या क्रिया चेत्येवंविधं प्रेमातिशयोत्थमुक्तं वचनम् ॥

[1]ममैधोभक्षिकोत्पेदे धारयामीक्षुभक्षिकाम् ।
[2]यां ते तां मुञ्च [3]मेन्ताय यत्त्वदापद्[4]विषूचिका ॥ २२ ॥

२२. यद्यस्मात्त्वदापद्[6]विषूचिका तवापदेव [7]विषूचिका मरणान्त उदरमहारोगस्त्वज्जीविताया [8]मेन्ताय मृत्युहेतुरस्ति तस्मान्[9]ममैधोभक्षिका काष्ठभक्षणमुत्पेदेवश्यकर्तव्यतया संपन्नेत्यर्थः । मृत्युहेतावुपस्थिते हि सत्त्वाधिकाः काष्ठभक्षणादि कुर्वन्ति । तस्माद्यामिक्षुभक्षिकामिक्षुभक्षणं ते तुभ्यं धारयामि तां मुञ्च । अनृणीभूयैव हि काष्ठभक्षणं क्रियत इति स्थितिः ॥

अरोचकः कारिकायां जीविते भाषणे च मे ।
पयःपानं सुखं प्रेत्य करिष्यामि त्वया सह ॥ २३ ॥

२३. मे मम कारिकायां भोजनादिक्रियायां जीविते भाषणे च विषये न रोचतेत्रारोचको रोगविशेषोरुचिरित्यर्थः । तस्मात्प्रेत्य भ-

१ **ए** ममेधो°. २ **ए सी डी** यां त तां. ३ **सी डी** मेताय. ४ **बी** °द्विशूचि°.

१ **बी** °केसव°. २ **बी सी डी** °त्यादि । ए°. ३ **सी डी** °थागुरौ. ४ **ए सी डी** तत्र प्र°. ५ **बी सी डी** °रिका कृ°. ६ **बी** °द्विशूचि°. ७ **बी** विशूचि°. ८ **ए सी डी** मेताय. ९ **बी** °न्गमेधोभ°.

वान्तरं गत्वा त्वया सह सुखं त्वयाविरहितत्वेनैव सुखकारि पयः-पानं दुग्धपानं करिष्यामि । एषा हि नागभार्या । नागानां[1] च दुग्ध-मेव प्रियमित्युक्तं पयःपानं करिष्यामीति ॥

राजाच्छादनवस्त्रा प्राग्नन्दनी रमणीषु या ।
प्रसादकारणात्ते सा यायां प्रपतनं न वा ॥ २४ ॥

२४. याहं प्राक्प्राचि काले ते तव प्रसादकारणात्प्रसादाद्धेतो[2] रमन्ते कान्तेषु रमण्यस्तास्वन्यभार्यासु मध्ये नन्दनी समृद्धा[3] मुख्ये-त्यर्थः[4] । अभूवम् । कीदृक्सती । राजाच्छादनानि राजभिः परि-धेयान्यतिश्रेष्ठानीत्यर्थः । वस्त्राणि यस्याः सा साहं[5] ते प्रपतनं झम्पादानस्थानं न वा यायां काका किं तु यातुमर्हामि । "श-क्तार्हे कृत्याश्च" [५. ४. ३५] इत्यर्हे सप्तमी । त्वया सहास्म्यपि झम्पां दास्यामीत्यर्थः ॥

भोजनाच्छादने लुब्धा प्राप्ते प्रस्कन्दनं त्वयि ।
इध्मव्रश्चनगोदोहनीभृत्स्थास्यामि किं न्वहम् ॥ २५ ॥

२५. त्वयि प्रस्कन्दनं कूपे पतनाय तत्तटं प्राप्ते सति भोजना-च्छादने भोजने वस्त्रे च लुब्धा सती किं न्वहं स्थास्यामि । कीदृशी । इध्मव्रश्चनगोदोहनीभृत्काष्ठभारानयनाय गवां दोहनाय च परशुपारि-काधारिणी । इदमुक्तं स्यात्पतिं विना हि स्त्रिया[6] भोजनायाच्छादनाय च काष्ठभारानयनगोदोहनादिनीचकर्माण्येव कार्याणि तान्यहं पतिमनुग-च्छन्ती नैव करिष्यामीत्यर्थः ॥

---

१ बी °नां हि दु°. २ ए °सादाद्धे°. ३ ए समुद्रा मुखेत्य°. सी डी समुद्रा मु°. ४ बी °द्धा सुखेत्य°. ५ बी साहं. ६ डी स्त्रियो भो°.

का कारिः[1] । का कारिका । का क्रिया । का कृत्या । का कृतिः ॥ आख्याने । सर्वा कारिः । सर्वा कारिका । सर्वा क्रिया । सर्वा कृत्या । सर्वा कृतिः । अत्र "प्रश्न०" [११९] इत्यादिना वेञ् ॥

कासिका । अग्नि(वह्नि?)वेशिकामर्हामि[2] । इक्षुभक्षिकां ते धारयामि । ममैधोभक्षिकोत्पेदे ॥ प्रश्ने । का कारिका ॥ आख्याने । सर्वा कारिका । इत्यत्र "पर्याय०" [१२०] इत्यादिना णकः ॥

विपूचिका[3] । अरोचकः । अत्र "नाम्नि पुंसि च" [१२१] इति णकः ॥

कारिकायाम् । अत्र "भावे" [१२२] इति णकः ॥

जीविते । अत्र "क्लीबे क्तः" [१२३] इति क्तः ॥

भाषणे । अत्र "अनट्" [१२४] इत्यनट् ॥

पयःपानं सुखम् । राजाच्छादनवस्त्रा । इत्यत्र "यत्कर्म०" [१२५] इत्यादिनानट् ॥

रमणीषु । नन्दनी । इत्यत्र रम्यादित्वादनट् [१२६] ॥

कारणात् । इति "कारणम्" [१२७] इति साधु[4] ॥

भोजनाच्छादने । प्रपतनम्[5] । प्रस्कन्दनम् । अत्र "भुजि०" [१२८] इत्यादिनानट् ॥

इध्मव्रश्चन । गोदोहनी । इत्यत्र "करणाधारे" [१२९] इत्यनट् ॥

> ऊषाकरे प्लवानेहैसंचरेगोचरव्यजे ।
> वर्हाभस्कन्धवज्रास्यमक्षिकाव्रजसंकुले[1] ॥ २६ ॥
> खलस्य मृत्योर्निगमे कूपेस्मिन्नापदापणे ।
> त्वं वेक्ष्यस्यहमीक्षिष्ये धिक् स्त्रियो बकचेष्टिताः ॥ २७ ॥

---

१ ए सी डी °हारुस्क°.

---

१ डी कारिका. २ सी डी °वेशाका°. ३ बी विशूचि°. ४ बी साधुः ॥ भो°. ५ डी °तनीम्.

२६, २७. अस्मिन्कूपे त्वं वेक्ष्यसि प्रवेक्ष्यस्यहमीक्षिष्येतश्च बकचेष्टिता बकवृत्तीः स्त्रियो धिग्गर्हे । यदि स्त्रियो बकवन्मायाविन्यो नाभविष्यंस्तदाहं स्त्री तव प्राणेभ्योप्यतिप्रिया त्वत्पुर एव कूपे प्रा[1]वेक्ष्यमित्यर्थः । किंभूतेस्मिन् । ऊ[2]षाकरे द्रवरूपक्षारद्रव्यविशेषस्य स्थाने तथा प्लवानर्हैतिसंकीर्णत्वात्प्लवेनोडुपेन तरीतुमशक्य इत्यर्थः । तथा नास्ति संचरः प्रवेशमार्गो यत्र तस्मिंस्त[3]थातिनिम्नत्वादत्यन्धकारवत्त्वान्मक्षिकातिव्याप्तत्वा[4]च्चागोचरोविषयोदृश्य इत्यर्थः । व्यज ऊषाकर्षणाय रज्जुबद्धघट्यादीनां निक्षेपमार्गो यत्र तस्मिंस्तथा वैहाभागोस्कन्धदेशतुल्याः स्कन्धा यासां तास्तथा वज्रास्या[5] वज्रवत्तीक्ष्णप्रचण्डवक्त्रा या मक्षिकास्तासां व्रजेन समूहेन संकुले व्याप्तेत एवापदापणे क्रयाणकवत्सुप्राप्यत्वाद्विपदां हट्टेत एव च खलस्य मृत्योर्निगमे मार्गतुल्ये[6] पत्तनतुल्ये वा ॥

सत्त्वाकषो धीनिकषो ममासौ कुलयोः कषः ।
सुभगोपस्थितापत्ते ज्वलन्निपकदारुणा ॥ २८ ॥

२८. हे सुभग[7] निपचन्त्यनेन[8] निपकः[9] कुलालभाण्डपाकस्थानम् । ज्वलन्योसौ निपकस्तद्वद्दारुणा संतापिकासौ प्रत्यक्षा ते तवोपस्थितापन्मम सत्त्वाकषः सत्त्वस्य परीक्षोपलस्तथा धीनिकषो बुद्धिपरीक्षोपलस्तथा कुलयोर्मातापितृपक्षयोः श्वशुर[10]पितृपक्षयोर्वा कषः । अस्यां विपदि त्वदनुगमनेन निर्व्यूढाया मम सत्त्वादीनि प्रमाणीभविष्यन्तीति भावः[11] ॥

---

१ **ए सी डी** °वेक्षामि°. २ **डी** °पाकारे, ३ **बी** °थानि°. ४ **ए** °त्वागो°. **सी डी** °त्वादगो°. ५ **ए सी डी** वज्रा°. ६ **डी** °ल्ये वा. ७ **डी** °ग विप°. ८ **डी** °न विप°. ९ **ए डी** °पकस्त°, **सी** °पक्कस्त°. १० **बी** श्वसुर°. ११ **ए** °वः । कार°.

करणे । प्लव ॥ आधारे[1] । आकरे । अत्र "पुंनाम्नि घः" [१३०] इति घः ॥

गोचर । संचरे । वह । व्रज । व्यजे । खलस्य । आपणे । निगमे । बक । सुभग । कषः[2] । आकषः[3] । निकषः । एते "गोचर०" [१३१] इत्यादिना निपात्याः ॥ निपक । इत्यपि कश्चित् ॥

दशावतार्या आरामान्नद्युत्तारेवतारभाक्[1] ।
चेष्ट्यवस्तारयुग्मा गाद्विघ्नः कोपीत्यथोच्चल[2] ॥ २९ ॥

२९. अथाथ वा किं बहूक्तेनेत्यर्थः । उच्चल मया सह कूपे प्रवेशाय शीघ्रं प्रचल । कस्मात् । इति हेतोः । तमेवाह । अवतरति विष्णुरेष्वित्यवतारा मत्स्यादय एषां पूजार्थं प्रतिकृतयोप्यवतारा मत्स्यादीनां प्रतिमाः । दशावताराः समाहृता दशावतारी तदर्थं भवनमप्युपचाराद्दशावतारी[4] तस्या दशावतारीभवनस्य संबद्धात्सरस्वतीनिकटवर्तिन आरामादुद्यानात्सकाशान्नद्युत्तारे नद्यास्तीर्थेवतारभागवतरन्कोपि नरो मा गान्मा यासीत् । कीदृक् । चेष्टन्तेनेन[5] चेष्टो बलमस्यास्ति चेष्टी तथावस्तृणन्त्यनेनावस्तारः पटभेदस्तेन युग्युक्तश्च सन् । विघ्नो बलेन ग्रहणाद्वस्त्रेण बन्धनाच्च त्वामनुगच्छन्त्या मम कूपप्रवेशेन्तरायहेतुः ॥

करणे । चेष्टी ॥ आधारे । आरामात् । इत्यत्र "व्यञ्जनाद्घञ्" [१३२] इति घञ्[6] ॥

१ **ए सी डी** °क् । वेष्टय°. २ **ए डी** °च्चलः । अ°.

१ **डी** °रे । अ°. २ **ए सी** कष । आ°. ३ **ए** °कष । नि°. **सी** °कथ । नि°. ४ **सी डी** °रीभ°. ५ **डी** °ष्टतेने°. ६ **सी** °ञ् । ब°.

अवतार्याः । अवस्तार । इत्यत्र "अवात्तृस्तृभ्याम्" [१३३] इति घञ् ॥ बहुलाधिकारादसंज्ञायामपि । अवतार । भावेत्र घञ् । उत्पूर्वादपि । उत्तारे ॥

शुक्संहारः कृपाधारो गुणावायोथ भूपतिः ।
वचः कुञ्जे लतोद्यावे श्रुत्वेत्यभिससर्प सः ॥ ३० ॥

३०. अथ स भूपतिर्जयसिंह इति पूर्वोक्तं वचः श्रुत्वा लतोद्याव उद्यूयन्ते तिलादयोस्मिन्नुद्यावो यज्ञपात्रं लतानामुद्याव इव वल्लीनामाधार इत्यर्थः । कुञ्जे वनगहनेभिससर्पाभिमुखं ययौ । यतः कीदृक् । शुचः शोकस्य संहारो मधुरवचनादिना प्रलयकालतुल्यस्तथा कृपाधारः कृपालुः । कृपाधारोपि यदि शौर्यादिगुणहीनः स्यात्तदा तत्र गन्तुं न शक्नुयादित्याह । गुणावाय एत्य वयन्त्यत्रावाय[2]स्तन्तुवायशाला गु[3]णा[4]ः शौर्यादय एव गुणास्तन्तवस्तेषामावाय इव ॥

तत्र स्वदारसंतुष्टो न्यायाध्यायो ददर्श सः ।
अजारचेष्टितं द्वन्द्वमवहारालयोपमः ॥ ३१ ॥

३१. अवहारालयो ग्राहाकरोब्धिस्तेनोपमा यस्य स तथाब्धिगम्भीरः स राजा तत्र कुञ्जे द्वन्द्वं स्त्रीपुरुषमिथुनं ददर्श । कीदृशम् । न जाराणां चेष्टितं चौर्यरतव्यञ्जिका व्याकुलत्वादिचेष्टा यस्य तत् । न च वाच्यमसौ कामवासनया स्त्रीदर्शनाभिलाषेणैतद्ददर्श । यतः स्वदारसंतुष्टः । एतदपि कुत इत्याह । न्या[5]याध्यायो न्यायस्याध्याय इव मूर्तं नीतिशास्त्रमिवेत्यर्थः ॥

न्या[6]यः । आवायः । अध्या[7]यः । उद्यावे । संहारः । अवहा[8]र । आधारः । दार । जार । इत्येते "न्याय०" [१३४] इत्यादिना निपात्याः ॥

---

१ ए °वात्तृस्तृ°. बी °वात्तृस्तृभ्या°. २ सी °यशा°. ३ ए सी डी गुणा शौ°. ४ बी °णाः सौर्या°. ५ बी न्यायध्या°. ६ बी °य । अवा°. ७ सी डी °ध्याय । उ°. ८ ए बी सी °हारः । आ°.

ऊचे शुष्काखरानायगतमीनातुरं नरम् ।
क्षरत्सुधोदङ्करसोपमस्मितभृताखनः ॥ ३२ ॥

३२. राजा नरमूचे । कीदृक्सन् । सुधो[1]दच्यतेनेन सुधोदङ्कस्तस्य रसः सुधैव क्षरन्यः सुधोदङ्करसस्तेनात्याह्लादकत्वादुपमा यस्य तत्तथा यत्स्मितमीषद्धास्यं तेन भृता आखनाः खानकानि येन स तथा । किंभूतं नरम् । शु[2]ष्काखरः शु[3]ष्काखानकमानायो जालं द्वन्द्वे तयोर्गतः पतितो यो मीनस्तद्वदातुरमाकुलम् ॥

यदूचे तदाह ।

उदकोदञ्चनी कस्त्वमत्राखविषमे तटे ।
स्वभासाखनिकवकान् व्योमाखानं च पूरयन् ॥ ३३ ॥

३३. आखविषमे खानकैर्विषमेत्र तटे कूपतीरे कस्त्वम् । कीदृक् । स्वभासा स्वकान्त्याखनिकव[4]कान्खानकानि व्योमाखानं चाकाशमेव खानकं च पूरयंस्तथोदकोदञ्चन्युदकोदञ्चनयुक्तः ॥

सुलभापदि देशेस्मिन्महा[1]खनिकदुर्गमे ।
शुचि[2]म्लायतिखेदीनां विषयः का न्वियं च ते ॥ ३४ ॥

३४. अस्मिन्देशे प्रदेशे ते तव संबन्धि[5]नीयं प्रत्यक्षा स्त्री च का नु का । किंभूते । महाखनिकैर्दुर्गमे दुःखेन गमनं यत्र तस्मिन्नत एव सुलभेन सुखप्राप्या प्रधाना आपदो यत्र तस्मिन् । किंभूतेयम् । शुचिम्लायतिखेदीनां शुचीति म्लायतीति खेदीति शब्दानां विषयः शुच्-म्ला-खिद्-धातूनां शो[6]चति म्लायति खिद्यत इत्यादिप्रयोगेषु क-

१ बी °हाखानि°. २ बी °चिम्लावय°.

१ सी डी °धोदुच्य°. २ ए सी डी शुष्कख°. ३ ए सी डी शुष्कखा°. ४ डी °कानि. सी °कान्खन°. ५ ए सी डी °नी प्र°. ६ सी °चते म्ला°.

र्तीत्वेन गोचर इत्यर्थः । यद्वा शुचिः शोको म्लायतिर्म्लानिः खेदिर्दैन्यं धात्वर्थास्तेषामाधारत्वेन विषयः ॥

यच्चानीषत्करं कृत्यं तत्रापीषद्वचं त्वया ।
सुवचं दुर्वचमपि सज्जनैर्हि सतां पुरः ॥ ३५ ॥

३५. अनीषत्करं च न केवलं सुखसाध्यं[1] दुःखसाध्यं च यत्कृत्यमास्ते तत्रापि विषये[2] त्वयेषद्वचमनायासेन वक्तव्यं दुःसाध्यमपि निःशङ्कमुच्यतामित्यर्थः । हि यस्माद्दुर्वचमपि[3] कष्टहेतुत्वाद्दुःखेन वाच्यमपि सतां साधूनां पुरः सज्जनैः सुवचमुभयेषामपि साधुत्वेनैक्यात् ॥

ईषन्म्लानंभवं स्वार्तंभवं वा दुःस्थिरंभवम् ।
कस्मात्त्वया त्वदार्त्या यदीषदाढ्यंकरोस्म्यहम् ॥ ३६ ॥

३६. यद्यस्मात्त्वदार्त्या कर्त्र्याहमीषदाढ्यंकरो[4]नायासेनाढ्यचित्तीक्रियेतिपीड्य इत्यर्थः । तस्मादहो नर त्वं वदेतिगम्यते । कस्माद्धेतोस्त्वयेषन्म्लानंभवमीषदनायासेन म्लानीभूयते स्वार्तंभवं[5] वा सुखेनार्तीभूयते च[6] । दुःस्थिरंभवं वा विमनस्कत्वेनात्र दुःखेन स्थिरीभूयते च ॥

सुविक्लवंकरः कच्चिदसि दुर्विक्लवंकरैः ।
द्विड्भिर्दुःशासनैर्दुर्योधनैर्दुर्दर्शनैरथ ॥ ३७ ॥

३७. कच्चिदिष्टपरिप्रश्ने । असि त्वं द्विड्भिः शत्रुभिरथ किं सुविक्लवंकरः सुखेन विक्लवीक्रियसे[7] परिभूयस इत्यर्थः । किंभूतैः । दुर्द-

१ ए सी डी °ध्यं च. २ डी °येष°. ३ ए सी डी °चनम°. ४ बी सी डी °दाद्रक°. ५ ए सी डी स्वातांभ°. ६ ए सी डी च । दुस्थि°. ७ ए सी डी °से भू°.

शैनैरतितेजस्वित्वाद्दुःखेनावलोक्यैस्तथा दुःशासनैर्बलिष्ठत्वाद्दुःखेन शिक्षणीयैरत एव दुर्योधनैरन्तर्भूतणिगर्थत्वेन दुःखेन योधनीयैरत एव च दुःखेनाविक्लवा विक्लवाः क्रियन्ते ये तैर्दुरभिभवनीयैरित्यर्थः ॥

अनीषच्छासनो दुर्धर्षणो दुर्मर्षणोपि च ।
मया सुशासनस्तैरिर्दुरुत्थानं न तत्त्वया ॥ ३८ ॥

३८. तेरिर्मया सुशासनः सुखेन शिक्षणीयः । किंभूतोपि । अनीषच्छासनोपि तथा दुर्धर्षणो दुरभिभवनीयोपि दुर्मर्षणोपि च दुःसह्योपि च । तत्तस्मात्त्वया न दुरुत्थानं किं तु सुखेन त्वयोदेतव्यमित्यर्थः ॥

ईषद्दानं मयानीषद्दानेपि त्वत्कृते सखे ।
सुयानमसुयानेपि दुर्ज्ञानं तद्वदेहितम् ॥ ३९ ॥

३९. हे सखेनीषद्दाने दुःखेन देयेपि वस्तुनि विषये त्वत्कृते त्वदर्थं मयेषद्दानं सुखेन दीयते तथासुयानेपि महाकूपादौ सुयानं सुखेन गम्यते तत्तस्माद्दुर्ज्ञानं दुर्ज्ञेयमीहितं स्वाभिप्रायं वद ॥

तेजोदुर्दर्शदुर्धर्षमूचे सोपीति भूपतिम् ।
शृणु दुःशास दुर्योध दुर्मर्षाशेषमावयोः ॥ ४० ॥

४०. स्पष्टः । किं त्वावयोः संबन्ध्यशेषं समस्तमर्थाद्वृत्तान्तम् ॥

उदक । इति "उदक्कोतोये" [१३५] इति निपात्यम् ॥ अतोय इति किम् । उदकोदञ्चनी ॥

आनाय । इति "आनायो जालम्" [१३६] इति निपात्यम् ॥

---

१ ए दुर्म°. २ सी °णो नं. डी °णोपि. ३ डी °ते सुखे. ४ डी °हिनां । हे.

---

१ ए सी डी °क्लवाः क्रि°. २ डी °णोपि च. ३ सी °नी । अना°.

आख । आखर । आखनिक[1] । आखनिकवकान् । आखनः[2] । आखानम् । अत्र "खनो ड०" [१३७] इत्यादिना ड-डर-इक-इकवक-घ-घञ्-प्रत्ययाः ॥

खेदीनाम् । शुचि । म्लायति । इत्यत्र "इकि०" [१३८] इत्यादिना-इकिश्तिवः[3] ॥

भावे । दुर्गमे । सुलभ । ईषद्वचं त्वया ॥ कर्मणि । दुर्वचम् । सुवचम् । अनीषत्करम् । अत्र "दुःसु०" [१३९] इत्यादिना खल् ॥

दुःस्थिरंभवम् । स्वार्तंभवम् । ईषन्म्लानंभवम् । दुर्विक्कुवं[4][करः । सुविक्कुवं]करः । ईषदार्द्रंकरः । अत्र "च्व्यर्थे०" [१४०] इत्यादिना खल् ॥

दुःशासनैः । सुशासनः । अनीषच्छासनः । दुर्योधनैः । दुर्दर्शनैः । दुर्धर्षणः । दुर्मर्षणः ॥ आदन्त । भावे । दुरुत्थानम्[5] । सुयानम् । ईषद्दानम् ॥ कर्मणि । दुर्ज्ञानम् । असुयाने । अनीषद्दाने । अत्र "शास(सू?)युधि०" [१४१] इत्यादिनानः ॥ आदन्तवर्जितेभ्यः केचिद्विकल्पमिच्छन्ति । तन्मते दुःशास । दुर्योधः(ध) । दुर्दर्श । दुर्धर्ष[म्][6] । दुर्मर्ष । इति ॥

एकोनविंशः पादः ॥

मर्त्यलोकात्कदायात एष आयामि नन्वहम् ।
गमिष्यसि कदा तत्र गच्छाम्यंयमहं[1] ननु ॥ ४१ ॥
आयान्तं पश्य यान्तं मामित्यन्योन्योक्तिशालिभिः[2] ।
नागै रम्यास्ति पाताले नाम्ना भोगवती पुरी ॥ ४२ ॥

४१, ४२. अहो त्वं मर्त्यलोकात्कदायात आगम इति प्रश्ने । एकः कश्चित्प्रत्याह । नन्विति प्रतिवचने । एष आयाम्यधुनैवागा-

---

१ ए °म्यहं. २ ए डी °त्यन्योक्ति°.

---

१ डी °खरनिक । आखानिक । आ°. २ बी आखानः. ३ ए इति किश्तिवः. ४ ए °क्कवरं । ई°. ५ डी °म् । ई°. ६ डी दुर्म°.

मित्यर्थः । अपरस्त्वाह । आयान्तं पश्याधुनैवागतं जानीहीत्यर्थः । तथाहो तत्र मर्त्यलोके कदा त्वं गमिष्यसीति प्रश्न एकः प्रत्याह । नन्वयमहं गच्छाम्यधुनैव गमिष्यामीत्यर्थः । अपरस्त्वाह । यान्तं मां पश्याधुनैव गमिष्यन्तं जानीहीत्यर्थः । इत्येवंविधा या अन्योन्यमुक्तयस्तच्छालिभिः । शिष्टं स्पष्टम् ॥

कदागा अयमागां कर्ह्येष्यस्येष्याम्यसौ विभो[1] ।
इतीशालापवांस्तत्र रत्नचूडोस्ति नागराट् ॥ ४३ ॥

४३. तत्र भोगा(ग)वत्यां रत्नचूडो नाम नागराडस्ति । कीदृक् । ईशस्य वासुकेरालापः संभाषणा तद्वान् । आलापमेवाह । अहो कदागाः सेवार्थं मत्पार्श्वे कस्यां वेलायामायासीरिति प्रश्ने प्रत्या[ह] । हे विभो अयमागां तवा(था)हो कर्हे(र्ह्ये)ष्यसि । अधुना मत्पार्श्वाद्गतः पुनः कदागमिष्यसीति प्रश्न आह । असावेष्यामीति । अतिमान्यत्वाद्वासुकित्वक्कण(किस्तं क्षण?)मपि सु(स्व?)पार्श्वान्मोक्तुं नेच्छतीत्यर्थः ॥

कदायातः । एष आयामि । आयान्तं पश्य । कदा गमिष्यसि । अयं गच्छामि । यान्तं पश्य । इत्यत्र "सत्०" [१] इत्यादिना वर्तमानावत्प्रत्ययाः । वावचनाद्यथाप्राप्तं च । कदागा अयमागाम् । कर्ह्येष्यसि एष्याम्यसौ ॥

शङ्खपालकुलोत्तंस त्वमायासी रणे यदि ।
दैत्यानजैषमित्यूचे[2] स्वयं वासुकिनापि यः ॥ ४४ ॥

४४. स्पष्टः । किं तु । आयासीरागमिष्यसि । अजैषं[1] जेष्यामि । यो रत्नचूडः । एतेनास्यातिविक्रान्तत्वोक्तिः[2] ॥

---

१ ए कर्हेष्यस्येष्या°. २ ए °नजीष°.

---

१ सी अजेषं. २ ए °स्या वि°.

यद्यधीषे प्रहृष्याम इति नित्यं प्रशासितुः ।
नाम्ना कनकचूडोहं पुत्रस्तस्य महौजसः ॥ ४५ ॥

४५. स्पष्टः । किं तु हे पुत्र यदि त्वमधीषे पठिष्यसि तदा वयं प्रहृष्यामो हर्षिष्याम इत्येवंप्रकारेण प्रशासितुः शिक्षयितुः । तस्य रत्नचूडस्य ॥

यद्येष्यति गुरुश्छन्दोध्येष्ये चेच्छ्वोरमेष्यति[1] ।
श्वोध्येष्ये तर्कमप्याश्वित्युक्त्या[2] तातमर्षयः[3](महर्षयम्?)४६

४६. स्पष्टः । किं तु गुरुरुपाध्यायः । छन्दश्छन्दःशास्त्रम् । चेच्छ्वः कल्ये । गुरुररं शीघ्रमेष्यति । तदाहं तर्कमपि न केवलं छन्दः ॥

यद्यादेक्ष्यस्यथाशंसेधीयीय मि(नि)खिलागमान् ।
त्वं चेत्प्रसन्नः सिद्धा मे विद्येति गुरुमस्तवम् ॥ ४७ ॥

४७. अहं गुरुमुपाध्यायमस्तवम् । कथमित्याह । हे गुरो त्वं यद्यादेक्ष्यस्याज्ञापयिष्यसि । अथानन्तरं तदेत्यर्थः । अहमाशंसे संभावये निखिलागमानधीयीय पठिष्यामीत्यर्थः । यतस्त्वं चेत्प्रसन्नो[1] मयि प्रसन्नीभविष्यसि तदा मे विद्या सिद्धा सेत्स्यतीति ॥

रणे यदि त्वमायासीर्दैत्यानजैषम् । यद्यधीषे प्रहृष्यामः । अत्र "भूतवच्चाशंस्ये वा" [२] इति भूतवत्सद्भच प्रत्ययाः ॥ पक्षे यद्येष्यति गुरुश्छन्दोध्येष्ये ॥

क्षिप्रार्थे । चेच्छ्वोरमेष्यति । श्वोध्येष्ये तर्कमप्याशु ॥ आशंसार्थे । यद्यादेक्ष्यस्यथाशंसेधीयीय निखिलागमान् । इत्यत्र "क्षिप्र०" [३] इत्यादिना भविष्यन्तीसप्तम्यौ ॥ क्षिप्रार्थैते न(र्थ एते नेति?) वक्तव्ये भविष्यन्तीवचनं स्व(श्व)स्तनीविषयेपि भविष्यन्ती यथा स्यादित्येवमर्थम् ॥

१ सी डी °ष्यसि । श्वो°. २ ए °त्युक्ततो । तम°. ३ सी तातेम°.

१ सी डी °सन्नी°.

त्वं चेत्प्रसन्नः सिद्धा मे विद्या । इत्यत्र "संभावने सिद्धवत्" [४] इति सिद्धवत्प्रत्ययाः ॥

अद्य यावद्भृशमदा यावज्जीवं च दास्यति(सि) ।
प्रीतिं ममेति संतुष्टो गुरुर्मां पर्यपाठयत् ॥ ४८ ॥

४८. कीदृक्सन् । संतुष्टः संतोषवाक्यं भणन्नित्यर्थः । कथमित्याह । अद्य यावदद्यतनं[1] दिनं यावद्भृशमत्यर्थं मम प्रीतिं विनयादिना प्रमोदमदास्तथा यावज्जीवं च दास्यसि । यावज्जीवसि तावद्दास्यसि चेति ॥

अतीता याष्टमी तस्यामनि(न)ध्यायोजनिष्ट यत् ।
यापि चागामिनी तस्यामनि(न)ध्यायो भविष्यति ॥४९॥
तद्गन्ताध्वा य आवेश्मास्यावरार्धेपि संहिताम् ।
गुणयिष्यामि तातैवं ब्रुवन् गुरुमरञ्जयम् ॥ ५० ॥

४९, ५०. स्पष्टौ । किं तु तत्तस्मादनध्यायस्य भूतत्वाद्भविष्यत्वाच्च हेतोरावेश्मं[2] वेश्म यावद्योध्वा मार्गो गन्तां(न्ता) मया यास्यते कर्मणि श्वस्तनी । अस्याध्वनोवरार्धेर्व्यवार्ग्भागेपि संहितां सप्तशतप्रमाणं ग्रन्थभेदं गुणयिष्याम्यनध्यायद्वयेगुणनेन शास्त्राणां विस्मरणभयाद्यथा सर्वेषां शास्त्राणां गुणनं स्यादिति संहितां प्रयत्नेन[3](त्ने)न शीघ्रं गुणयिष्यामीत्यर्थः । हे तात गुरो ॥

अद्य यावद्भृशं प्रती(प्रीति)मदाः । यावज्जीवं प्रीतिं दास्यसि ॥ आसत्तौ । अतीता याष्टमी तस्यामनध्यायोजनि[ष्ट] । यापि चागामिनी तस्यामनध्यायो भविष्यति । इत्यत्र "नानद्यतनः०" [५] इत्यादिना ह्यस्तनीस्व(श्व)स्तन्यौ न ॥

गन्ताध्वा य आवेश्मास्यावरार्धेपि संहितां गुणयिष्यामि । इत्यत्र "एष्यति०" [६] इत्यादिनां[4] श्वस्तनी न ॥

१ सी डी °नं या°. २ सी डी °श्म या°. ३ ए °यत्नेन. ४ बी °ना स्वस्त°.

योयं हेमन्त आगाम्याग्रहायण्यास्ततोवरे ।
पुष्पिष्यन्ति ममोद्याने लवल्यः सर्वतोपि हि ॥ ५१ ॥
आगामी पौषमासो यो दशरात्रोस्य योवरः ।
तत्र कर्तास्महे युक्ता मित्रैरुद्यानिकोत्सवम् ॥ ५२ ॥
त्रिंशद्रात्रो य आगाम्यवरे तस्यार्धमासि तु ।
श्रोतास्मि द्विर्गुरोर्व्याख्यां पृथग्व्याख्या हि तन्मम ॥५३॥
त्रिंशद्रात्रो य उत्कोस्यावरे पञ्चदशाहके ।
न स्वप्तासीति दमनः सहाध्याय्यब्रवीन्मम ॥ ५४ ॥

५१-५४. मम सहाध्यायी दमनो नाम नागकुमारो ममाग्रेब्रवीत् । किमित्याह । योयमित्यादि । स्पष्टम् । किं तु । अयमैषमस्तनः । ततस्तत्र हेमन्ते । आग्रहायण्या मार्गशीर्ष्याः सकाशादवरेर्वाग्भागे । लवल्यो लताविशेषाः । दशानां रात्रीणां समाहारो दशरात्रोवरोर्वाग्भागरूपः । उद्यानं विषयतयास्त(स्त्य?)स्याः क्रीडाया उद्यानिका तस्या उत्सवं कर्तास्महे लवलीपुष्पोच्चयनाद्यर्थं करिष्यामः । तथा त्रिंशद्रात्रस्त्रिंशद्रात्रसमाहाररूपो मासोर्थात्कार्तिक आगामी तस्यावरेर्वाग्भागवर्तिन्यर्धमासि त्वर्धमासे पुनरहं गुरोरुपाध्यायात् । द्वौ वारावस्या द्विर्व्याख्यां श्रोतास्मि । पौषाद्यदशरात्रे ह्युद्यानिकोत्सवेन व्याख्याभङ्गो भावीत्यत्र द्वे व्याख्याने भणिष्यामीत्यर्थः । तत्तस्माद्धेतोर्हि स्फुटं मम पृथगन्यसहाध्यायिभ्यो भिन्ना व्याख्या भविष्यति ।

१ ए सी डी °द्यानको°. २ सी डी हि तान्मनः । त्रिं°. ३ ए सी डी न सुप्ता°.

१ ए सी डी °द्यासिका. २ ए °र्तासाहे व°. सी डी °र्तासाहे. ३ ए सी डी °द्रात्रिस°. ४ सी °मासे. ५ बी °वस्यां द्वि°.

तथा यस्त्रिंशद्रात्रः कार्तिक उक्तः[1] पूर्वमागामितया भणितस्तस्यावरे पञ्चदशाहकेर्वाग्भागवर्तिषु पञ्चदशसु[2] दिनेष्वहं न स्वप्नास्मि व्याख्या-द्वयभणनचिन्तनव्यापृतत्वेन स्वापवेलाया अभावान्न शयिष्य इति ॥

अयमागामिमासस्य परतः पर्ववासरात् ।
पठित्वा भविता सिद्धो लवलीर्दर्शयिष्यति ॥ ५५ ॥
अदर्शयिष्यो[1] लवलीस्त्वं तक्षककुलाग्र्य चेत् ।
अत्याश्चर्यं न कस्योदपादयिष्यः सचेतसः ॥ ५६ ॥
दृष्टस्त्वं कुहकस्यार्थी तद्दातान्यश्च भिक्षुकः ।
अप्यद्रक्ष्यत्स चेदप्याम्नास्यदृष्टो न तु त्वमु ॥ ५७ ॥
प्रत्यष्ठास्यः कथं मिथ्यैतद्विगर्हामहे वयम् ।
कथं प्रतीयाच्छ्रद्धत्तेन्योपि चेति तमब्रु[2](ब्र)वम् ॥ ५८ ॥

५५–५८. इत्येवमुपहासप्रकारेणासत्यवादित्वप्रकारेण च तं दमनकमहमब्रु(ब्र)वम् । प्रकारमाह । अहो अयं दमनक आगामिमासस्य कार्तिकस्य संबन्धिनः पर्ववासरात्पूर्णिमादिनात्परतः पश्चात्पठित्वानेकविद्या[3] अधीत्य सिद्धो विद्यासिद्धो भविता[4] भविष्यति । ततो विद्याप्रभावेन लवलीर्दर्शयिष्यति । तथा हे तक्षककुलाग्र्य चेत्त्वं लवलीरदर्शयिष्यस्तदा कस्य सचेतसोत्याश्चर्यं नोदपादयिष्यो हेमन्ते लवल्यो न पुष्पन्त्येवेति । तत्र लवलीः पुष्पिता न दर्शयिष्यसि न च कस्याप्याश्चर्यं करिष्यसीत्यर्थः । हेमन्ते लवल्यः पुष्पन्त्येव परमसौ हेमन्ते लवल्यो न पुष्पन्त्येवेति भ्रान्त्या जानन्नेवं वक्ति । तथा उ हे दमनक मया[5] त्वं कुहकस्येन्द्रजालाश्चर्यस्यार्थीदृष्टस्तद्दाता कुहकस्य

१ डी °यिक्षो ल°. २ ए सी डी °ब्रुवाम्.

१ ए उक्तं पू°. २ बी °शदि°. ३ सी डी °द्याद्यधी°. ४ बी सी °विष्य°. ५ सी °या तु कु°.

दातान्यश्च भिक्षुको दृष्टः । परं स भिक्षुकश्चेत्त्वामप्यद्रक्ष्यद्गाढं दृष्टवानभविष्यत्तदा त्वामाम्नास्यत्कुहकविद्यामपाठयिष्यत् । न तु त्वं भिक्षुकेण दृष्टस्तस्मादसतीर्लवलीस्त्वं दर्शयितुं नालं भविष्यसीत्यर्थः । अतश्चैतद्धेमन्ते लवलीनां पुष्पोद्भवनं मिथ्यालीकं कथं त्वं प्रत्यष्ठास्थः स्थापितवान्न कथमपीत्यर्थः । वा यद्वा यदि त्वं मिथ्यैतत्प्रतिष्ठितवांस्तदा प्रतितिष्ठ परमित्यर्थः । अन्योपि न केवलमहमपरोपि जनः कथमलीकमेतत्प्रतीयात्प्रतीतवांस्तथा कथं श्रद्धत्ते संभावितवान्न कथमपीत्यर्थः । तस्मादेतद्विस्फुटं गर्हामह इति ॥

योयं हेमन्त आगाम्याग्रहायण्यास्ततोवरे पुष्पिष्यन्ति लवल्यः । अत्र "कालस्य०" [७] इत्यादिना न श्वस्तनी ॥ अनहोरात्राणामिति किम् । आगामी पौषमासो यो दशरात्रोस्य योवरस्तत्र कर्तास्मह उद्यानिकोत्सवम् । त्रिंशद्रात्रो य आगाम्यवरे तस्यार्धमासि श्रोतास्मि व्याख्याम् । त्रिंशद्रात्रो य उक्तोस्यावरे पञ्चदशाहके न स्वप्तास्मि । इति त्रिविधेष्यहोरात्रे मा भूत् ॥

अयमागामिमासस्य परतः पर्ववासराल्लवलीर्दर्शयिष्यति । भविता सिद्धः । अत्र "परे वा" [८] इति न श्वस्तनी वा ॥

चेल्लवलीरदर्शयिष्योत्याश्चर्यं कस्य नोदपादयिष्यः । अत्र "सप्तम्यर्थे०" [९] इत्यादिना क्रियातिपत्तिः ॥ लवलीदर्शनं हेतुराश्चर्योत्पादनं फलं चात्र सप्तम्यर्थः ॥

दृष्टस्त्वं कुहकस्यार्थी तद्दातान्यश्च भिक्षुकः । अप्यद्रक्ष्यत्स चेद्दर्प्यांम्नास्यदृष्टो न तु त्वम् । अत्र "भूते" [१०] इति क्रियातिपत्तिः ॥

---

१ बी °द्रक्षद्गा°. २ ए त्वान्नाम्ना°. सी त्वानाम्ना°. डी त्वाम्ना°. ३ बी °थं प्र°. ४ सी °ना श्व°. ५ बी °द्रक्षत्स. ६ डी °दर्प्यास्य°. ७ ए °प्यान्नास्य°. ८ ए ते क्रिया इ°. बी °ते क्रि°.

प्रत्यष्टास्थः कथं मिथ्यैतद्गर्हामहे वयम् । अत्र "वोतात्प्राक्" [११] इति वा क्रियातिपत्तिः ॥ वावचनाद्यथाप्राप्तं च । कथं प्रतीयात् । कथं श्रद्धत्ते गर्हामहे ॥

सोपि मामब्रवीदेवं[1] जातु त्वं दुर्जनायसे ।
अपि त्वं विब्रवीष्यस्मानहो गर्हामहे वयम् ॥ ५९ ॥

५९. स्पष्टः । किं तु जात्वपी क्षेपद्योतकौ ॥

अपि त्वं विब्रवीष्यस्मान् । जातु त्वं दुर्जनायसे । अत्र "क्षेपेपि०" [१२] इत्यादिना कालत्रयेपि वर्तमाना ॥ निन्दसि । निन्दि[2]ष्यसि । निन्दितवान् । दुर्जनायसे । दुर्जनायि[3]ष्यसे । दुजर्नायितवान् । एवमन्यत्रापि भावना कार्या ॥

कथं हसेन्र्यकुरुषे मर्मास्प्राक्षी[2]रुपारुजः ।
परित्यक्ष्यसि साधुत्वं दौर्जन्यं श्रयितासि धिक् ॥ ६० ॥

६०. कथं किमिति त्वं हसे[4]र्मामुपहसेस्तथा कथं त्वं न्यक्कुरुष उपहासेन मां पराभवसि । कालत्रये प्रयोगावि[5]मौ । तथा कथं मर्मास्प्राक्षीर्दृष्टस्त्वं कुहकस्यार्थीत्यादिना मम मर्मोद्घट्टयस्तथा कथमुपा[6]रुजो मर्मोद्घट्टनेन मामपीडयोत एव कथं त्वं साधुत्वं शिष्टतां परित्यक्ष्यसि । अत एव च कथं दौर्जन्यं श्रयितासि । अत एव च त्वं धिग्धिक्कृतः ॥

कथं हसेः । कथं न्यक्कुरुषे धिक् । इत्यत्र "कथमि०" [१३] इत्यादिना सर्वकालेषु सप्तमीवर्तमाने ॥ वावचनाद्यथाप्राप्तं च । मर्मास्प्राक्षीः । उपारुजः । श्रयितासि । परित्यक्ष्यसि धिक् ॥

---

१ बी °देव जा°. २ ए सी डी °क्षीरपारुजा । प°.

---

१ डी °त्प्राप्तं. २ ए सी डी °न्दित°. ३ ए सी डी °यित°. ४ डी °सेस्त°. ५ ए सी डी °विधौ । त°. ६ ए सी डी °रुजा म°.

भुजंगमः स को नाम योस्मान्द्विष्याद्धसिष्यति[1] ।
न श्रद्दधे न क्षमे वास्मान्वि(वा वि ?)रोत्स्यति मिषेच्च यः ॥६१॥

६१. नामेत्याक्षेपे । कः स भुजंगमो योस्मान्द्विष्यात्तथा योस्मान्हसिष्यति । तथा न श्रद्दधे न वा क्षमे यद्योस्मान्विरोत्स्यति विग्रहीष्यति । तथा योस्मान्मिषेच्च स्पर्धेत । कालत्रयेप्यमी प्रयोगाः । सर्वेपि भुजङ्गा अस्मत्तो हीना इति कीदृगेकस्त्वं य एवमस्मासु द्वेषोपहासविरोधस्पर्धाः करोषीत्यर्थः । स्पर्धमानः स कृष्णमित्यादाविवास्मान्मिषेदित्यत्र सकर्मकत्वम् ॥

न श्रद्दधे न क्षमे वा पुराहमपि दुर्मते ।
किं भवानेवमस्मासु ब्रूयाच्चेष्टिष्यतेथ वा ॥ ६२ ॥

६२. हे दुर्मते[2] कुटिलाशय किं भवानेवमुपहासादिप्रकारेणास्मासु विषये ब्रूयाद्भाषेत । अथ वैवमुपहासादि चेष्टिष्यते चक्षुर्भ्रूविक्षेपविशेषादिना करिष्यति[3] । कालत्रये प्रयोगाविमौ । इदमहं पुरा पूर्वं न श्रद्दधेपि[4] न क्षमेपि वा । "पुरायावतोर्वर्तमाना" [५. ३. ७.] इत्यतीते वर्तमाना । तव मायिनस्त्रिकालविषये एवं वचनचेष्टे परैरुक्ते अप्यहं सरलाशयत्वात्पुरा न संभावितवानपि न च सोढवानपीत्यर्थः ॥

भुजंगमः स को नाम योस्मान्द्विष्याद्धसिष्यति । इत्यत्र "किंवृत्ते०" [१४] इत्यादिना सप्तमीभविष्यन्त्यौ ॥

न श्रद्दधे न क्षमे वा योस्मान्मिषेद्विरोत्स्यति च ॥ किंवृत्तेपि । न श्रद्दधे न

---

१ बी °ष्यसि । न.

---

१ ए सी डी °थास्मा°. २ सी· दुर्गते. ३ ए सी डी °रिति. ४ सी डी °धेपि वा. ५ डी °ष्यतेथ.

क्षमे वा पुरा किं भवानेवमस्मासु ब्रूयाच्चेष्टिष्यतेथ वा । इत्यत्र "अश्रद्धा०" [१५] इत्यादिना सप्तमीभविष्यन्त्यौ ॥

न श्रद्धे न च सहे लवलीर्दर्शयिष्यति ।
हेमन्ते किंकिलेत्युक्तिर्दौर्जन्यव्यञ्जिका तव ॥ ६३ ॥

६३. अहो कनकचूडेत्येवंविधा तवोक्तिर्दौर्जन्यव्यञ्जिका । केत्याह । न श्रद्दधे न च सहे यदहो दमनक । किंकिलेति वाक्यालंकारे प्रसिद्धिद्योतने वा । पुष्पितत्वेन लोके प्रसिद्धाः पुष्पिता इत्यर्थः । लवलीर्हेमन्ते भवान्दर्शयिष्यति कालत्रये प्रयोगोयं न कदापि दर्शितवान्न च दर्शयिष्यति न च दर्शयतीत्यर्थ इति ॥

भार्या मेत्र पणो यन्न श्रद्दधे न क्षमेप्यहम् ।
अस्ति लोके स यो मां हि विवादेन विजेष्यते ॥ ६४ ॥

६४. अत्र लवलीपुष्पादर्शने भार्या मे पणो यदि हेमन्ते पुष्पिता लवलीर्न दर्शयामि तदा भार्यां हारयामीत्यर्थः । यद्यस्माद्धेतोर्हि स्फुटं यो मां विवादेन विजेष्यते जितवाञ्जेष्यति जयति वा स लोके जगत्यस्तीदमहं न श्रद्दधे नापि क्षमे न कोप्यस्तीत्यर्थः ॥

न श्रद्दधे न च सहे लवलीर्दर्शयिष्यति हेमन्ते किंकिल । न श्रद्दधे न क्षमेप्यहमस्ति लोके स यो मां विजेष्यते । अत्र "किंकिल०" [१६] इत्यादिना भविष्यन्ती ॥

अथाहमब्रु(ब्र)वं चैवं न श्रद्दधे न च क्षमे ।
मिषेत्कोपि मया जातु गर्वी वा विवदेत यत् ॥ ६५ ॥

---

१ सी डी न क्ष°.

---

१ सी डी °न किं. २ ए सी डी °ली हेम°. ३ डी भार्या हा°. ४ बी °ति स. ५ सी डी °मे नैको°.

भवेर्यदि विवादी त्वं हारयेयमहं[1] यदा ।
तदङ्गीकृत एवायं त्वत्पणेन पणो मया ॥ ६६ ॥

६५, ६६. अथ दमनस्यैवंभणनानन्तरमहं चाहमप्येवमब्रु(ब्र)वम् । यथाहं न श्रद्दधे न क्षमे च यत्कोपि कश्चिदपि गर्वी गर्विष्ठः सञ्जातु कदाचिदपि मया सह मिषेद्विवदेत वा । परं यदि त्वं विवादी भवेस्तथा यदाहं हारयेयं हरन्तं पणं प्राप्नुवन्तं त्वामनुकूलाचरणेन प्रयुञ्जीय । कालत्रयेमी प्रयोगाः । [1]तत्तदा त्वत्पणेन कृत्वायमेव भार्यालक्षण एव पणो मयाङ्गीकृतः । भवेर्हारयेयमित्यत्रापि न श्रद्दधे न च क्षम इति योज्यम् । यतोसौ दमनस्यापि वादित्वं स्वस्य हारकत्वं चाश्रद्दधानोक्षाम्यंश्चाह ॥

न श्रद्दधे न क्षमे मिषेत्कोपि मया जातु । गर्वी वा विवदेत यत् । हारयेयमहं यदा । भवेर्यदि विवादी त्वम् । इत्यत्र "जातु०" [१७] इत्यादिना सप्तमी ॥

धिग्यत्रेत्याक्षिपेर्नस्त्वं तर्जेर्वा यच्च यत्र वा ।
प्रगल्भेथा जयेर्यच्च न क्षमे श्रद्दधे न तत् ॥ ६७ ॥

६७. हे दमन यत्र निमित्तसप्तम्यर्थे[2] तत्र पू(भू?)तोयमर्थो येनासत्यलवलीपुष्पसमर्थनरूपेण निमित्तेन नोस्मानिति जातु त्वं दुर्जनायस इत्यादिप्रकारेणाक्षिपेर्निन्देस्तथा यच्च तर्जेर्वा । यच्चेति क्रियाविशेषणं भार्या मे[3]त्र पण इति यद्दण्डमाविष्कुर्याश्च तद्भिर्निन्दामस्तथा यत्र वा यस्मिंश्च[4] हैमनलवलीपुष्पदर्शनविषये त्वं प्रगल्भेथा[5] धार्ष्ट्यं[6]

१ ए सी डी °हं चाह°.

१ सी डी तत्वदा त्वत्पण्येन. २ ए °र्थेत्रत्र. ३ सी डी मे प°. ४ सी डी °श्च हे दमन ल°. ५ डी °गल्भथा. ६ ए सी डी °था नक्षमे न श्रद्दधे तत् । इत्य°.

कुर्या यच्च जयेस्तन्न क्षमे न श्रद्दधे चालीकत्वात् । कालत्रयेमी प्रयोगाः ॥

धिग्यच्च तर्जेः । यत्रेत्याक्षिपेर्नस्त्वम् । यच्च जयेः । यत्र प्रगल्भेथाः । न क्षमे न श्रद्दधे तत् । इत्यत्र "क्षेपेपि(च?)०" [१८] इत्यादिना सप्तमी ॥

चित्रं यत्रैवं[1] जल्पेस्त्वं कुप्येर्यच्चेतिवादिभिः ।
स्वैर्निषिद्धौ कलेरावां प्रतिज्ञाय पणं स्थितौ ॥ ६८ ॥

६८. आवां पणं भार्यापणं प्रतिज्ञाय स्थितौ वाक्कलहान्निवृत्तौ । यतः स्वैः[1] स्वजनैः कलेर्वाक्कलहान्निषिद्धौ । किंभूतैः सद्भिः । इतिवादिभिः । यथा चित्रमाश्चर्यं यत्र देशे काले प्रयोजने वा त्वमप्येवं साध्वनुचितं जल्पेर्यच्च त्वमपि कुप्येः । कालत्रये प्रयोगाविति[2] ॥

चित्रं यच्चैवं कुप्येस्त्वम् । यत्रैवं जल्पेः । अत्र "चित्रे" [१९] इति सप्तमी ॥

चित्रमन्धोद्रिमारोक्ष्यत्ययं यदि जयेद्धि नः ।
एवमावां प्रजल्पन्तौ ततो निजगृहं गतौ ॥ ६९ ॥

६९. ततोनन्तरमावां निजगृहं गतौ । किंभूतौ[3] सन्तौ । हि स्फुटं[4] चित्रमाश्चर्यं यद्ययं नोस्माञ्जयेत्तदा चित्रमन्धोद्रिमारोक्ष्यति । कालत्रये प्रयोगौ । एवं जल्पन्तौ ॥

चित्रमन्धोद्रिमारोक्ष्यति । इत्यत्र "शेषे०" [२०] इत्यादिना भविष्यन्ती । अयदाविति किम् । चित्रमयं यदि जयेद्धि नः । अत्राश्रद्धाप्यस्तीति "जातुयद्य-दायदौ सप्तमी" [१७] इति सप्तमी ॥

---

१ सी °त्रैव ज°.

---

१ सी डी स्वैः क°. २ ए सी डी °ति ॥ य°. ३ बी °भूतो हि. ४ डी °टं चैवमा°.

एषोपि हारयेन्नोत हारयेयं मृशन्निति ।
तेनाहूतोन्यदोद्याने लवलीर्द्रष्टुमभ्यगाम् ॥ ७० ॥

७०. अहमन्यदा हेमन्ते तेन दमनेनाहूत उद्याने लवलीर्द्रष्टुमभ्यगाम् । कीदृक्सन् । मृशंश्चिन्तयन् । किमित्याह । एष दमनोपि [1]बाढं हारयेत्तथोत बाढमहं न हारयेयं दमनोग्रेपि बाढं हारितवान् हारयत्यतोधुनापि हारयिष्यति । नाहं त्वेवमित्यर्थ इति ॥

उत हारयेयम् । अपि हारयेत् । इत्यत्र "सप्तमी०" [२१] इत्यादिना सप्तमी ॥

ल[1]वल्याः प्रेक्ष्य पुष्पाणीत्यध्यायं हन्त माय्यसौ ।
प्रदर्शयेदपि फलान्यपि कल्पद्रुमानयेत् ॥ ७१ ॥
करिष्यत्यन्यदप्येष शक्तो दमनकश्छलम् ।
संभावयामि याचेत [2]पणं म्लानिं च दास्यति ॥ ७२ ॥

७१, ७२. लवल्याः पुष्पाणि [2]प्रेक्ष्येत्यध्यायमचिन्तयं यथा मायी कुहकविद्यया [3]दाम्भिकोसौ दमनोपि ल*वलानि लवलीफलान्यपि दर्शयेत्तथापि कल्पद्रुमानयेत् । मायाबलेनासौ त्रिकालविषयेपि लवलानामपि दर्शने कल्पद्रोरप्यानयने शक्तः संभाव्यत इत्यर्थः । तथैष द[4]मनकोन्यदप्यत्यसंभाव्यमपरमपिच्छलं मायां करिष्यति । यतः श[5]क्तश्छले समर्थोत एव संभावयामि पणमपि याचेत शक्तोयमधुना पण-

१ **डी** °वल्योः प्रे°. २ **ए सी डी** पणम्ला°.

१ **ए** बाढम°. २ **ए** प्रेक्षेत्य°. ३ **ए** दाभिको°. *अनया व्याख्यया 'दर्शयेदपि लवलान्यपि कल्पद्रुमानयेत्' इति मूलेन भाव्यमिति भाति. ४ **ए सी डी** °मनोन्य°. ५ **बी** °लेन स°.

मपि याचिष्यते [१]याचते याचितवाने[२]वेति संभावयामीत्यर्थः । अत एव[३] च संभावयामि शक्तोसौ म्लानिमपि दास्यति ॥

अथोचे दमनः संभावयामि लवलानि यत् ।
पश्ये[१]र्दातुं पणं चेच्छेर्न मां निन्दितुमिच्छसि ॥ ७३ ॥

७३. स्पष्टः । किं तु लवलानि लवलीपुष्पाणि पश्येः शक्तस्त्वं पश्यसि द्रक्ष(क्ष्य)स्यपश्यश्चेत्यर्थः ॥

तथाहीन्साह कोप्येत्य यात्रां वाञ्छति हुल्लडः ।
वाञ्छेदागमनं[२] वोत्र यस्य वारः स गच्छतु ॥ ७४ ॥

७४. स्पष्टः । परं यात्रां पूजाविशेषम् । हुल्लडो नाम फणी । वो युष्माकं स्वपार्श्वे आगमनं वाञ्छति । अत्रैतेषु युष्मासु मध्ये यस्य वारो गमनपर्यायः ॥

शक्यसंभावने । अपि फलानि प्रदर्शयेत् ॥ अशक्यसंभावने[४] । अपि कल्पद्रुमानयेत् । अत्र "संभावने०" [२२] इत्यादिना सप्तमी ॥ तदर्थानुक्ताविति किम् । करिष्यत्यन्यदप्येष शक्तः ॥

संभावयामि याचेत पणम् । अत्र "अयदि०" [२३] इत्यादिना वा सप्तमी । पक्षे यथाप्राप्तम् । म्लानिं दास्यति ॥ ददाति । अदात् । इति स्वयं ज्ञेयम् ॥ अयदीति किम् । संभावयामि लवलानि यत्पश्येः । पूर्वेण नित्यं सप्तमी ॥

इ[५]च्छेः । इच्छसि । वाञ्छेत् । वाञ्छति । इत्यत्र "सतीच्छार्थात्" [२४] इति वा सप्तमी ॥

---

१ बी °श्येदातुप°. २ ए °नं चोत्र. सी °नं वात्र. डी °नं चात्र.

---

१ ए सी डी याचिते. २ ए °नेवते°. ३ सी डी °व सं°. ४ सी डी °ने इत्या°. ५ डी इच्छ°.

नागैर्दमन आहूयाथोचे वारस्त्वैषमः ।
यदि गच्छेद्भवांस्तत्र जीवेन्नागकुलं ततः ॥ ७५ ॥

७५. स्पष्टः । किं त्वैषमोस्मिन्वर्षे । तत्र हुल्लडपार्श्वे यदि भवान् गच्छेद्यास्यति । ततस्तदा नागकुलं जीवेज्जीविष्यति । यद्वा कालत्रये प्रयोगावेतौ ॥

मां सोप्यूचेत्र चेत्त्वं यास्यसि मोक्षा(क्ष्या)मि ते पणम् ।
हिमघ्नं वानयस्यूषं चेत्ततोपि त्यजाम्यहम् ॥ ७६ ॥

७६. स्पष्टः । किं तु सोपि दमनश्च । अत्र हुल्लडपार्श्वे ॥

चेन्नाजैषीर्न मादिक्षस्तन्मे श्रद्धानयेयमु ।
ऊषं कच्चित्पणं मुञ्चस्युक्त्वेत्यत्राहमागमम् ॥ ७७ ॥

७७. अत्र स्थानेहमागमम् । किं कृत्वा । उक्त्वा । किमित्याह । उ हे दमन चेत्त्वं मां नाजैषीस्तदा मा मां नादिक्षो हुल्लडयात्राया-मूषानयने वा नाज्ञापयस्तत्तस्माच्छ्रद्धाभिलाषो म ऊषमहमानयेयमधु-नानेष्याम्यानयाम्यानीतवानेवं चेत्यर्थः । परं कच्चिदिष्टपरिप्रश्ने । त्वं पणं मुञ्चसीति ॥

यदि गच्छेद्भवांस्तत्र । जीवेन्नागकुलं ततः । अत्र "वैत्स्यैति०" [२५] इत्यादिना वा सप्तमी ॥ पक्षे । चेत्त्वं यास्यसि । मोक्ष्यामि ते पणम् ॥ केचित्तु सर्वेषु कालेषु सर्वविभक्त्यपवादं वा सप्तमीं मन्यन्ते । तेन पक्षे आनयस्यूषं चेत्ततोपि त्यजामि । चेन्नाजैषीर्न मादिक्ष इत्यपि ॥

---

१ ए सी °न्नामकु°. २ ए °लं सतः. ३ ए °षीमदि°. सी डी °षीर्मदि°.

---

१ डी °मिष्याम्या°. २ ए सी °त्वं मा ना°. ३ बी °दा मां. ४ बी °षो ऊ°. ५ ए सी °हममा°. ६ ए सी डी °व देत्य°. ७ बी वत्स्यति. ८ सी डी °ना स°. ९ बी मोक्षामि. १० ए °पदं स°. डी °पदं. ११ बी सी °दं स°.

श्रद्धानयेयम् । अत्र "काम०" [२६] इत्यादिना सप्तमी ॥ अकच्चितीति किम् । कच्चित्पणं मुञ्चसि ॥

तदिच्छाम्यनुमन्येथाः प्रार्थये गच्छ संप्रति ।
अत्रोषार्थं प्रवेक्ष्यामि कूपे वज्रास्यमक्षिके ॥ ७८ ॥

७८. तत्तस्मादिच्छाम्यहं हे पुरुष त्वमनुमन्येथाः[1] कूपप्रवेशेनुमतिं दद्यास्तथाहं प्रार्थये त्वं संप्रति स्वस्थानं गच्छ । शिष्टं स्पष्टम् ॥ इच्छाम्यनुमन्येथाः । प्रार्थये गच्छ । इत्यत्र "इच्छार्थे०" [२७] इत्यादिना सप्तमीपञ्चम्यौ ॥

सहैव नय मां कुर्याः प्रसादमितिवादिनी ।
कूपप्रवेशविघ्नोयं वल्लभा मे सुलोचना ॥ ७९ ॥

७९. नाम्ना सुलोचना । शिष्टं स्पष्टम् ॥

संध्यामर्चत्विनं चार्चेदिहासीताथ गच्छतु ।
रात्र्यन्तेस्मिन्भवान्किं मे चिन्तया हि मुमूर्षतः ॥ ८० ॥

८०. अस्मिन्निदानींतने रात्र्यन्ते[2] रात्रिपर्यवसाने भवान्संध्यां प्रभातसंध्यामर्चत्विनं चादित्यं चार्चेत्तथेहास्मिन्स्थान आसीत तिष्ठेदथाथ वा गच्छतु । हि यस्मान्मुमूर्षतो मे चिन्तया किं न किंचित् । मच्चिन्तां[3] मुक्त्वा त्वं संध्यार्चनादिस्वार्थं कुर्वित्यर्थः ॥

अथ भूपस्तमित्यूचे रक्षः स्वं रक्ष च प्रियाम् ।
कुर्यां हुल्लडयात्रां किमुतोषं तेर्पयाण्यहम् ॥ ८१ ॥

८१. स्पष्टः । किं तूताथ वा । ते तुभ्यम् ॥

आख्याहि हुल्लडः कोयं ब्रूयास्तस्य च चेष्टितम् ।
धेहि स्वास्थ्यं[1] न भीर्धेया दध्याश्चानुमतो मुदम् ॥ ८२ ॥

---

१ ए सी डी स्वास्थां न.

---

१ डी °मन्ये°.　२ ए डी रात्रान्ते.　३ बी मम चिन्तां.

८२. पूर्वार्धं स्पष्टम् । त्वया भीर्दमनाद्भीतिर्न धेया न धार्या किं तु स्वास्थ्यं धेहि । त्वं हि प्रेषितोनुज्ञातस्त[1]वावसरश्च भियोधार[2]णे स्वस्थताधारणे च । तथानुमतो मयानुज्ञातः संस्त्वं मुदं दध्याश्च ॥

विधौ । प्रसादं कुर्याः नय माम् ॥ निमन्त्रणे । इनं चार्चेत्संध्यामर्चेतु ॥ आमन्त्रणे । इहासीताथ गच्छतु ॥ अधीष्टौ । रक्षेः स्वं रक्ष च प्रियाम् ॥ संप्रश्ने । कुर्यां हुल्लडयात्रां किमुतोषं तेर्पयाणि ॥ प्रार्थने । ब्रूयाश्चेष्टितमाख्याहि हुल्लडः कोयम् । इत्यत्र "विधि०" [२८] इत्यादिना सप्तमीपञ्चम्यौ ॥

भीर्न धेया धेहि स्वास्थ्यम् । अत्र "प्रैष०" [२९] इत्या[3]दिना कृत्यपञ्चम्यौ ॥ अनुज्ञायां सप्तमीमपि केचिदाहुः । दध्याश्चानुमतो मुदम् ॥

ऊर्ध्वं मुहूर्तान्मद्दत्तं प्राप्नुयास्त्वं स्वमीप्सितम् ।
गच्छ स्ववेश्म द्रष्टव्यः स्वलो[1]कस्तं स नन्द[2]य ॥ ८३ ॥

८३. स्पष्टः । किं तूर्ध्वं मुहूर्ताद्घटिकाद्वयानन्तरं मद्दत्तं स्वमात्मीयमीप्सितमूषं तथा स्मः प्राकल्प्ये । उत्सवेन प्रकटं यथा स्यादेवं तं स्वलोकं नन्द[4]य । त्वं हि प्रे[5]षितोनुज्ञातस्तवावसरश्च स्वेप्सितप्राप्तौ स्ववेश्मगमने स्वलोकदर्शननन्दनयोश्च ॥

ऊर्ध्वं मुहूर्तादीप्सितं प्राप्नुयाः । स्वलोको द्रष्टव्यः । स्ववेश्म गच्छ । इत्यत्र "सप्त[6]मी च०" [३०] इत्यादिना सप्तमी कृत्याः पञ्चमी च ॥

ऊर्ध्वं मुहूर्ता[7]त्तं स नन्दय । इत्यत्र "स्मे पञ्चमी" [३१] इति पञ्चमी ॥

नागोथोचे स[3] शृण्वेतत्कालो मे शंसितुं त्वयि ।
यथाभूतसमयो गन्तुं नागानां हुल्लडं प्रति ॥ ८४ ॥

---

१ सी डी °लोकं तं स. २ ए °न्दयः । स्प°. सी °न्दयं । स्प°. ३ बी स सृण्वे°.

---

१ सी °स्तथाव°. २ ए सी डी °णे च. ३ ए सी डी °दिकृ°. ४ सी °न्दयं । त्वं. ५ डी °षितानुजातस्तथाव°. ६ सी डी °मी कृ°. ७ ए सी डी °तात्त्वं स.

८४. अथ नागः कनकचूड ऊचे । यथा । अहो महापुरुष त्वयि विषये मम शंसितुं वक्तुं कालः प्रस्तावस्तस्माद्यथा हुल्लडं प्रति गन्तुं नागानां समयोभूत्तथा शृणु स्म प्रकटमाकर्णय ॥

नागान्प्लावयितुं वेला जयस्येति विचिन्तयन् ।
प्रचेतोवरदृप्तोगात्पातालं हुल्लडः फणी ॥ ८५ ॥

८५. हुल्लडः फणी पातालमगात् । कीदृक्सन् । प्रचेतोवरदृप्तो वरुणदत्तप्लावनविषयप्रसाददर्पिष्ठोत एव नागान्प्लावयितुं मम वेला जयस्य च नागपराभवस्य च वेलेति[1] विचिन्तयन् ॥

शृणु स्म । इत्यत्र "अधीष्टौ" [३२] इति पञ्चमी ॥

कालः शंसितुम् । प्लावयितुं वेला । समयो गन्तुम् । अत्र "काल०" [३३] इत्यादिना तुम् ॥ वावचनाद्यथाप्राप्तं च । वेला जयस्य ॥

ऊचुर्नागास्तमेत्येति कालोयं यञ्जयेद्भवान् ।
समयो यदवेन्नश्च न वेला यन्निमज्जयेत् ॥ ८६ ॥

८६. स्पष्टः ॥

कालोयं यज्जयेद्भवान्[2] । न वेला यन्निमज्जयेत् । समयो यदवेत् । इत्यत्र "सप्तमी यदि" [३४] इति सप्तमी ॥

त्वमेवार्हश्च[1] शक्तश्च भारो वाह्यस्त्वयैव नः ।
त्वमेवाज्ञापयेरस्मांस्तदादिश कृतं क्रुधा ॥ ८७ ॥

८७. हे हुल्लड त्वमेवार्हश्च[3][4] शक्तश्चास्माकं भारवहन आज्ञापने च योग्यः समर्थश्च । तस्मान्नोस्माकं[5] भारः कार्यप्राग्भारस्त्वयैव वाह्यस्त-

१ ए सी डी °वाहंश्च.

१ सी डी °ति चि°. २ बी °न् । वे°. ३ डी °मेवाहंश्च. ४ ए सी °वाहंश्च. ५ सी डी °साकं.

था त्वमेवास्मानाज्ञापयेरादिशेस्त्वत्किंकरा वयमित्यर्थः । तत्तस्मादादिश कृतं सृतं क्रुधा ॥

त्वयैव भारो वाह्यः । त्वमेवाज्ञापयेः । त्वमेवार्हश्च शक्तश्च । इत्यत्र "शक्त०" [३५] इत्यादिना कृत्याः सप्तमी च ॥

हुल्लडः स्माह कश्मीरेष्ववश्यं स्थायिनो मम ।
उत्तरायणमहे गाम्यर्चां दाय्यनुहायनम् ॥ ८८ ॥

अवश्यगेयो गाथानां गीतेर्गेयश्च भक्तिमान् ।
वारेणैकोस्तु वो नो चेत्प्लावयिष्ये रसातलम् ॥ ८९ ॥

८८, ८९. हे नागा ममोत्तरायणमहे गाम्यवश्यं गन्तानुहायनं प्रतिसंवत्सरमर्चां दायी ऋणाद्दाता च वो युष्माकं मध्य एको नागो वारेणास्तु । कीदृशस्य । कश्मीरेषु देशेष्ववश्यं स्थायिनस्तिष्ठतः । कीदृक्सन् । भक्तिमांस्तथा गाथानां मद्वर्णनाप्रधानार्याणामवश्यगेयो निश्चयेन गायंस्तथा गीतेश्छन्दोविशेषस्य गेयश्चाधमर्ण्याद्गायंश्च । नो चेद्यद्येवं न तदा रसातलं प्लावयिष्ये ॥

आवश्यके । अवश्यं स्थायिनः । अवश्यगेयः ॥ आधमर्ण्ये । अर्चां दायी । गीतेर्गेयः । अत्र "णिन् च०" [३६] इत्यादिना णिन् कृत्याश्च ॥

वोढा त्वमस्मदर्चाया जीया जीवेतिवादिनः ।
हुल्लडस्तान्विसृज्यागात्कश्मीरान्हिमदुर्गमान् ॥ ९० ॥

---

१ सी गीतैर्गे°. २ बी सी डी वारणै°. ३ डी °नः । फुल°. ४ बी °त्कस्मीरा°.

---

१ सी कृत कु°. डी कृतं कु°. २ ए सी डी °वाहंश्च. ३ ए सी डी °ताथ वो. ४ सी °वश्यस्था°. ५ सी डी °नानाम°.

९०. हे हुल्लड त्वमस्मदर्चाया अस्मत्कर्तृकपूजायाः कर्मणो वोढा वोढुमर्हः सञ्जीया जीवेतिवादिनस्तान्नागान्विसृज्य मुत्कलयित्वा । शिष्टं स्पष्टम् ॥

क्ष्मामप्युत्पाटयामेवंवादिनो ये पुराहयः ।
मा कुपद्धुल्लड इति भीता वारेषु तेप्ययुः ॥ ९१ ॥

९१. स्पष्टः ॥

वोढास्मदर्चायाः । अत्र "अर्हे तृच्" [३७] इति तृच् ॥

जीयाः । जीव । इत्यत्र "आशिषि" [३८] इत्यादिनाशीःपञ्चम्यौ ॥ कश्चित्तु समर्थनायां पञ्चमीमिच्छति । क्ष्मामप्युत्पाटयाम ॥

मा कुपत् । इत्यत्र "माङ्यद्यतनी" [३९] इत्यद्यतनी ॥

मा स्म धाक्षीद्धिमं मेति हिमम्रोषाय मादिशत् ।
दमनो मा स्म गृह्णान्मे दारानित्यागमं त्विह ॥ ९२ ॥

९२. हिमं मा स्म मा मां धाक्षीदहदिति हेतोर्दमनो हिमम्रोषाय मामादिशदहं तु मे दारान्दमनो मा स्म गृह्णादिति हेतोरिह स्थान आगमम् ॥

मा स्म गृह्णात् । मा स्म धाक्षीत् । इत्यत्र "सस्मे ह्यस्तनी च" [४०] इति ह्यस्तन्यद्यतन्यौ ॥

तत्पतित्वात्र कूपेहमप्राप्तोषोपि चान्तरा ।
वज्रास्यमक्षिकाक्षुण्णो भविष्यामि सुखी क्षणात् ॥ ९३ ॥

९३. स्पष्टः ॥

मक्षिकाक्षुण्णो भविष्यामि । इत्यत्र "धातोः०" [४१] इत्यादिना क्षु-

---

१ बी °प्युताट°. २ सी डी यामेवं°. ३ ए सी डी °मम्रौषा°. ४ ए सी डी °गमत्वि°.

---

१ ए सी डी °मम्रौषा°.

णेति भूतकालः प्रत्ययो भविष्यामीति भविष्यत्कालेन प्रत्ययेनाभिसंबध्यमानो यथाकालमपि साधुः। बहुवचनादधात्वधिकारविहिता अपि तद्धिता धातुसंबन्धे सति कालभेदे साधवः स्युः। सुखी भविष्यामि ॥

तवोषं देहि देहीति ददामीति वदन्नथ।
धेहि धेहीति तमधान्नृपतिः पाणिना[1] भुजे ॥ ९४ ॥

९४. अथ हे नाग तवोषं देहि देहीति ददामि भृशमभीक्ष्णं वा ददामीत्यर्थः। इति वदन्नृपतिस्तं नागं भुजे पाणिना धेहि धेहीत्यधात्कूपे पतन्तं भृशमभीक्ष्णं वा दधार ॥

याहि याहीति यास्यन्ति मक्षिका ध्वनिनेत्यथ।
राज्ञा हन्यस्व[2] हन्यस्वेति जघ्ने तटवेतसः ॥ ९५ ॥

९५. ध्वनिना वेतसाघातशब्देन मक्षिका भृशमभीक्ष्णं वा यास्यन्तीति हेतोरथ राज्ञा तटवेतसः कूपतटस्थवेतसवृक्षो भृशमभीक्ष्णं वा हतः ॥

नश्यत[3] नश्यतेत्येव नश्यथेतीव तद्ध्वनौ।
उड्डयस्वोड्डयस्वेत्युड्डयन्ते स्माथ मक्षिकाः ॥ ९६ ॥

९६. भृशमभीक्ष्णं वा यूयं[1] पलायध्वमितीवेदृश इव तद्ध्वनौ वेतसाघातशब्दे[2] सत्यथ[3] मक्षिका भृशमभीक्ष्णं वोड्डीनाः[4] ॥

तिष्ठत तिष्ठत यूयं स्थेयास्तेत्युरगं ब्रुवन्।
अत्रान्तरेकरोज्झम्पां कूपे निर्मक्षिके नृपः ॥ ९७ ॥

९७. स्पष्टः। किं तु तिष्ठत तिष्ठतेत्यत्रेतिशब्दो वाक्यसंबन्धाया-

१ डी °णिनो भु°. २ डी °न्यस्वे°. ३ सी डी °श्यते°.

१ ए °यं पालय°. २ डी °शमभी°. ३ ए सी °त्यपि म°. ४ ए °ड्डीनः। ति°.

ध्याहार्यः । भृशमभीक्ष्णं वा यूयमत्रैव तिष्ठतेत्येवंप्रकारेणोरगं ब्रुवन् । यूयमित्यत्र युष्मदर्थस्य पूज्यत्वविवक्षया बहुवचनम् ॥

बिभृध्वं बिभृध्वमिति बिभ्रीध्वमितिवादिनीम् ।
भृत्वोषेण घटीं[1] भूपो झगित्युदपतत्ततः ॥ ९८ ॥

९८. स्पष्टः । किं तु बिभृध्वं बिभृध्वमिति[1] बिभ्रीध्वमितिवादिनीम् । अत्रेवोवसेयः । भरणकाले बुडबुडारव[2]करणमिषेण भृशमभीक्ष्णं वा मामूषेण यूयं पूरयतेत्येवंप्रकारेण नृपं[3] भाषमाणा[4]मिव घटीमूषेण भृत्वा । ततः कूपात् ॥

आदत्स्वादत्स्व इत्येवमाददीध्वमिति ब्रुवन् ।
नागायोषघटीं सोदात्समं तेनान्यतो ययौ ॥ ९९ ॥

९९. स्पष्टः । किं तु हे नाग यूयं भृशमभीक्ष्णं वोषघटीं गृह्णीध्वमिति ब्रुवन् । आदत्स्व इतीत्यत्र विरामविवक्षया न संधिः । इत्येवमिति निपातसमुदाय इत्यर्थे ॥

देहि देहीति ददामि । धेहि धेहीत्यधात् । याहि याहीति[5] यास्यन्ति । उडुय[6]स्वोड्डयस्वेत्युड्डयन्ते । एवं भावकर्मणोरपि । हन्यस्व हन्यस्वेति जघ्ने तटवेतसः । तध्वमौ[7] च तद्युष्मदि । नश्यत नश्यतेत्येव नश्यथ । चकारात्प्रसक्तस्य हेः प्रयोगः स्वयं ज्ञेयः । बिभृध्वं बिभृध्वमिति बिभ्रीध्वम् । आदत्स्वादत्स्व इत्येव[8]माददीध्वम् । एवमन्यास्वपि विभक्तिषु । तिष्ठत तिष्ठतेति स्थेयास्त । अत्र "भृश०" [४२] इत्यादिना सर्वविभक्तिसर्ववचनविषये हिस्वौ । तद्युष्मदि

---

१ ए सी घटीभू°.

---

१ सी डी °तिवा°. २ बी °डाराव°. ३ ए नृपभा°. ४ सी °माणमि°. ५ सी °ति यास्यति या°. ६ ए °यस्वे°. ७ बी °मौ चैत°. ८ ए सी डी °मादिदी°.

बहुत्वविशिष्टे च युष्मदभिधेये तध्वमौ हिस्वौ च। देहि देहीत्यादिष्विवतिशब्दः संबन्धोपादानार्थोन्यथासत्त्वभूतार्थवाचिनोराख्यातयोर्मिथः संबन्धो नावगम्येत ॥

व्योमाटाट तिरः कूपमटेत्याटुश्च मक्षिकाः ।
पतोत्पत रसेत्युच्चैरयतन्तोषरक्षिकाः ॥ १०० ॥

१००. मक्षिकाश्च व्योमाटाट तिरः कूपमटेत्याटुर्व्योमाटुस्तिरस्तिरश्चीनमाटुः कूपमाटुरित्येवंप्रकारेणाटुर्भ्रेमुस्तथा मक्षिका ऊषरक्षिका ऊषं रक्षितुमुच्चैरत्यन्तं पतोत्पत रसेत्ययतन्तापतन्नुदपतन्नरसन्नध्वनन्निति प्रयत्नं चक्रुः ॥

अथाह नागो राजानं जगज्जयसि रक्षसि ।
शास्सीत्यधिकरोषि त्वं प्रसीदेहि रसातलम् ॥ १०१ ॥

१०१. नागो राजानमथाह बभाषे। अथशब्दस्य पुरादौ पाठादतीते वर्तमाना। हे राजंस्त्वं जगद्विश्वत्रयं जयसि रक्षसि शास्सि शिक्षयसि चेत्येवंप्रकारेण जगदधिकरोषि नियुङ्क्षे सकलजगत्स्वामीत्यर्थः। तस्मात्प्रसीद रसातलमेहि ॥ प्रसीदेहीत्यत्र "ओमाङि" [१. २. १८] इत्यलुक् ॥

संगच्छस्व प्रमोदस्व श्लाघस्वेत्युच्छ्वसिष्यति ।
नागलोकः समग्रोपि नेत्रेन्दौ त्वय्युपागते ॥ १०२ ॥

१०२. स्पष्टः। किं तु संगच्छस्व प्रमोदस्व श्लाघस्वेत्युच्छ्वसि-

---

१ ए व्योगाटा°. २ ए सी डी शास्मील्य°.

---

१ ए सी डी °ष्मद्यभि°. २ बी °दानर्थो°. ३ बी °गम्यते। व्यो°. ४ ए °टुर्मेमु° ५ ए रहितु°. ६ डी °न्नस°. ७ सी शास्मि शि°. ८ ए सी डी °दविक°. ९ ए डी °युङ्क्षे स°. सी °युक्ते स°. १० ए सी डी °माहि इ°.

ष्यति त्वया सह संगंस्यते । त्वद्दर्शनात्प्रमोदिष्यते । त्वां श्लाघिष्यते । इत्येवंप्रकारेण हर्षातिरेकादुल्लसिष्यति । उपागते पातालमायाते ॥

आहते भिन्त उच्छिन्त इति वर्त्मनि बाधते ।

ऊषार्थं यदि मे कोपि सापि हानिस्तवैव हि ॥ १०३ ॥

१०३. स्पष्टः । तस्मान्मार्गे रक्षार्थमपि त्वं मया सह पाताल-मागच्छेत्यर्थः । आहते । अत्र "आङो यमहनः स्वा(स्वे?)ङ्गे च" [३. ३. ८६.] इत्यात्मनेपदम् । म इत्यस्य हननादिक्रियाभिर्व्याप्यत्वेपि संबन्धमात्रविवक्षया षष्ठी ॥

राजाथेत्यवदद्यूयं यात सिध्यत नन्दत ।

इतीहध्वे यद्रक्षार्थं तत्रादेक्ष्यामि रक्षकान् ॥ १०४ ॥

१०४. अथ राजावदत् । किमित्याह । तत्र वर्त्मनि रक्षार्थं रक्ष-कान्नरानहमादेक्ष्यामि । यद्यस्माद्यूयं यात सिध्यत नन्दतेतीहध्वे पातालं गच्छथ दमनायोषदानेन सिद्धकार्या भवथ लक्ष्मीकीर्त्या-दिना वर्धध्व एवंप्रकारेण चेष्टध्व इति ॥

आगृह्णीथोपरुन्द्धावरुन्द्धेति प्रयतध्व उ ।

किं मयीति वदन्रक्षार्थं दिदेशेति राक्षसान् ॥ १०५ ॥

१०५. राजा रक्षार्थमिति वक्ष्यमाणरीत्या राक्षसान्बर्बरादीन्दि-देशाज्ञापयत् । कीदृक्सन् । वदन् । किमित्याह । उ हे नाग यूयं मयि

---

१ ए °ते । अत्र. २ बी °च्छित्त इ°. ३ सी °दि ने को°. डी °दि नो कोपि सोपि हानिस्तथैव.

---

१ बी उपग°. २ ए सी डी स्वाङ्ग च. ३ ए सी डी °म् । इम. ४ बी सी डी °भिर्व्याप्य°. ५ ए °यद्यसायूयं. बी °यथा यूयं. ६ ए राजर°. ७ बी °न् । उ.

विषये किमित्यागृह्णीथाग्रहं कुरुथोपरुन्द्ध दाक्षिण्ये[1] पातयथावरुन्द्ध[2] पादादिग्रहणं कुरुथेत्येवंप्रकारेण प्रयतध्वे पाताले नयनायात्यादरं कुरुथेति ॥

संगच्छध्वं निषेवध्वमयध्वं च पुरः पथि ।
इतीहध्वे मयि यथा यूयं बर्बरकादयः ॥ १०६ ॥
संगच्छेध्वं निषेवेध्वमयेध्वं च पुरोध्वनि[1] ।
इतीहेध्वं तथैवास्मिन्मित्रे मे प्राणवल्लभे ॥ १०७ ॥

१०६, १०७. हे राक्षसा यथा यूयं मयि विषये संगच्छध्वं[3] निषेवध्वं पथि पुरोयध्वं चेतीहध्वे सेवार्थं संबद्धीभवथ तथा सेवध्वे तथा मार्गेग्रतो गच्छथ चैवंप्रकारेण चेष्टध्वे तथैवास्मिन्मम प्राणवल्लभे मित्रे नागविषये संगच्छेध्वं निषेवेध्वमध्वनि पुरोयेध्वं गच्छेत चेतीहेध्वम् ॥

स्वतः समुच्चये । पतोत्पत रसेत्ययतन्त । पक्षे । जगज्जयसि[4] रक्षसि शास्सील्य[5]धिकरोषि ॥ साधनभेदेन समुच्चये । व्योमाट[6] तिरोट कूपमटेत्याटुः । अस्य च पक्षोदाहरणं स्वयं ज्ञेयम् ॥ तथा संगच्छस्व प्रमोदस्व श्लाघस्वेत्युच्छ्वसिष्यति । पक्षे । आहते भिन्त्त उच्छिन्त्त इति बाधते ॥ तध्वमौ च तद्युष्मदि । यूयं यात सिध्यत नन्दतेतीहध्वे । पक्षे । आगृह्णीथोपरुन्द्धावरुन्द्धेति[7] प्रयतध्वे । संगच्छध्वं[8] निषेवध्वमयध्वं च पुरः पथीतीहध्वे । पक्षे । संगच्छेध्वं निषेवेध्व-

---

१ **बी** पुराध्व°.

---

१ **ए** °क्षिण्योपेत°. २ **बी** °रुद्ध पा°. ३ **ए सी डी** °गच्छे°. ४ **सी** °सि शा°. ५ **ए सी डी** शा स्सील्य°. ६ **डी** °टय ति°. ७ **ए सी डी** °रुध्वे प्र°. ८ **ए सी डी** °च्छध्वे नि°.

मयेध्वं च पुरोध्वनीतीहेध्वम् । अत्र "प्रचये०" [४३] इत्यादिना ह्स्वौ वा तध्वमौ च तद्युष्मदि वा ॥

खलु क्षुभित्वा भीत्वालमित्यालापाः क्षपाचराः ।
परिवृत्य सभार्यं तं पातालं प्राविशन्नथ ॥ १०८ ॥

१०८. स्पष्टः । किं[1] तु क्षुभित्वा खलु क्षोभेण सृतं भीत्वालं भयेन सृतमितीदृगालापो येषां ते तथा ॥

अस्मिन्नलं विहरणेन खलु स्थितेना-
तिक्रम्य यद्गगनमिन्दुरनाप्य चास्तम् ।
आरादहं सरि[1]दतिक्रमणेन चेति
ध्यात्वा नृपः पुरमभि त्वरितः प्रतस्थे ॥ १०९ ॥

१०९. नृपः पुरमभि त्वरितः प्रतस्थे । किं कृत्वा । ध्यात्वा । किमित्याह । यद्यस्माद्धेतोर्गगनमतिक्रम्योल्लङ्घ्यास्तमस्ताचलमनाप्य चालब्ध्वा चेन्दुर्वर्तते गगनात्परेणास्ताच्चावरेणेन्दुरस्तीत्यर्थः । तस्माद्यस्मादहं च सरिदतिक्रमणेन सरस्वत्या उल्लङ्घनेनाराद्दूरं वर्ते सरितः परस्ताद्दूरप्र[2]देशेहमस्मीत्यर्थः । यस्माद्रात्रिशेषोभूदहं च पुराद्दूरं वर्त इति तात्पर्यार्थः । तस्मादलक्ष्यपुरप्रवेशस्य विघ्नभूतत्वेनास्मिन्नरण्ये विहरणेन विचरणेनालं सृतं तथास्मिंस्थितेनावस्थानेन खलु सृतमिति ॥

भीत्वालम् । विहरणेनालम् । खलु क्षुभित्वा । खलु स्थितेन । इत्यत्र "निषेधेलंखल्वोः क्त्वा" [४४] इति वा क्त्वा ॥

अतिक्रम्य गगनमिन्दुः । अवरे । अस्तमनाप्येन्दुः । अत्र "परावरे" [४५] इति[3] क्त्वा वा ॥ पक्षे । सरिदतिक्रमणेन ॥

---

१ ए °रिदिति°. सी डी °रिति°.

---

१ सी डी किं क्षु°. २ सी डी °रदे°. ३ बी °ति वा क्त्वा प°.

ध्यात्वा। इत्यत्र "प्राक्काले" [४७] इति क्त्वा। अर्थानुलोम्यात्सूत्रक्रम-भङ्गेनेदमुदाहरणम्। वसन्ततिलका छन्दः ॥

नेत्रे निमील्य हसतां वदतां प्रकाश्य
दन्तांश्च मूलकपणाद्यपमाय याताम्।
मौग्ध्योद्यमौ नरपतिः पथि कच्छियूनां
पश्यन्ययौ निजमलक्षित एव हर्म्यम् ॥ ११० ॥

११०. अलक्षित एव नृपतिर्निजं हर्म्यं ययौ। कीदृक्सन्। कच्छियूनां कच्छोनूपप्रायो देशविशेषोस्त्येषां ते कच्छिनः काच्छिका ये युवानस्तेषां मौग्ध्योद्यमौ मौग्ध्यं नेत्रनिमीलने हसनरूपं दन्तप्रकाशने वचनरूपं च मौर्ख्यमुद्यमं च तावत्यां वेलायां मूलकपणादिप्रतिदानाय यानं पथि पश्यन्। यतो नेत्रे निमील्याज्ञत्वेन हास्यातिरेकाल्लोचनसंकोचने सति हसतां तथाज्ञत्वादेव दन्तांश्च प्रकाश्य दन्तोद्घाटने सति वदतां वार्तयतां तथात्युद्यमित्वेन मूलकपणादि मूलकमुष्ट्यादि। अत्रादिपदात्पत्रपुष्पफलाद्यपमाय प्रतिदातुमन्यत्र यातां गच्छताम् ॥

नेत्रे निमील्य हसताम्। दन्तान्प्रकाश्य वदताम्। अपमाय याताम्। अत्र "निमील्यादि०" [४६] इत्यादिना क्त्वा वा ॥

इति श्रीजिनेश्वरसूरिशिष्यलेशाभयतिलकगणिविरचितायां श्रीसिद्धहेमचन्द्राभिधानशब्दानुशासनद्व्याश्रयवृत्तौ त्रयोदशः सर्गः ॥

---

१ ए °त्रकपथि. २ बी °लकश्छन्दः. ३ सी °नः कच्छि°. ४ ए डी वार्तं यथा तथा°. सी वार्तं यथा तत्यु°. ५ बी °णाद्यत्रा°. ६ सी डी °ष्ट्याद्यादि°. ७ ए °दिप°.

द्व्याश्रयमहाकाव्ये

चतुर्दशः सर्गः ।

इत्याटमा[१]टं निशि कर्म कृत्वा कृत्वाद्भुतं वेश्मनि पूर्वमायम् ।
स रात्रितुर्ये प्रथमं प्रबोधमानर्च देवान् गुरुमग्र आसम् ॥ १ ॥

१. स नृपो देवान्गुरुं चानर्च । किं[१] किं कृत्वा । इत्युक्तनीत्या निश्याटमाटमभीक्ष्णं विचर्य तथाद्भुतं कर्म नागाय तथो[२]षदानरूपमबदातं कृत्वा[३] कृत्वाभीक्ष्णं विधा[४]र्य तथा वेश्मनि पूर्वं लोकजागरणात्प्रथममायमागत्य तथा रात्रितुर्ये रात्रेश्च[५]तुर्थे यामे लोकप्रबोधात्प्रथमं प्रबोधं जागरित्वा तथाग्र आसं देवानां गुरोश्च पुरः स्थित्वा ॥ सर्गेस्मिन्नुपजाति[६]श्छन्दः ॥

गजं प्रभाते प्रथमं प्रपद्य पूर्वं समारुह्य हयं कदाचित् ।
अग्रेधिरुह्याथ वशामटन्स नाज्ञाय्युषासंचरितो जनेन ॥ २ ॥

२. स नृप उषासंचरि[७]तो रात्रौ चर्यया भ्रान्तो जनेन नाज्ञायि । यतः कीदृशः । प्रभातेटन् राजपा[८]टिकया भ्राम्यन् । किं कृत्वा । प्रथममन्यक्रियाभ्यः पूर्वं गजं प्रपद्यारुह्य कदाचित्पूर्वं हयं समारुह्याथ तथा कदाचिच्चाग्रे पूर्वं [९]वशां हस्तिनीमारुह्य । प्रभाते स्वापेहि रात्रौ जागर्या शङ्क्यतेयं तु जागरूकत्वात्प्रातरेवोत्थाय राजपा[१०]टिकायामगमत्तेनास्य रात्रौ चर्या न ज्ञातेत्यर्थः ॥

---

१ **ए** °माट नि°.

---

१ **सी** किं कृ. २ **ए डी** °थोपदा°. ३ **सी** °त्वाभी°. ४ **बी सी** °य यथा. ५ **ए** °तुर्ये या°. ६ **बी** °तिच्छन्दः. **सी** तिच्छदं । ग°. ७ **सी** °रिता रा°. ८ **बी** °टिकायां भ्रा°. ९ **सी** वश्यां ह°. १० **ए** °पादिका°.

आटमाटम् । कृत्वा कृत्वा । इत्यत्र "रेणम्च०" [४८] इत्यादिना रणम् क्त्वा च ॥

पूर्वमायम् । अग्र आसम् । प्रथमं प्रबोधम् । इत्यत्र "पूर्वे०" [४९] इत्यादिना रणम् वा ॥ पक्षे । पूर्वं समारुह्य । अग्रेधिरुह्य । प्रथमं प्रपद्य ॥

वेत्त्यन्यथाकारमशेषमेवंकारं कथंकारमिदं रहो नः ।
तत्कोपि विद्याधर एष इत्थंकारं जनै रात्रिविहार्यतर्कि ॥ ३ ॥

३. एष राजा रात्रिविहारी प्रच्छन्नं रात्रौ चरन्सन्नतर्कि शङ्कितः । कथमित्याह । अन्यथाकारमन्यथा यदि विद्याधरो न स्यात्तदा कथंकारं कथं नाम नोस्माकमिदं प्रत्यक्षमनेनोच्यमानमशेषं रहः प्रच्छन्नवृत्तमेवंकारमनेन यथावृत्तभणनप्रकारेण वेत्ति जानाति तत्तस्मादेष जयसिंहः कोप्यज्ञातो विद्याधरः । विद्याधरो हि विद्याबलेनाज्ञायमानश्चरन्नहोपि जानातीत्थंकारमनेन प्रकारेण ॥

जनोन्यथाकृत्व ऋजूक्तिरेवंकृत्वा कथंकृत्व ऋतं सुखी स्यात् ।
छलोन्मुखं शाकिनिकाद्यपीत्थंकृत्वा नृपो मन्त्रकृदन्वशात्सः ॥४॥

४. स नृपश्छलोन्मुखं शाकिनिकाद्यपि कुत्सितशाकिनीभूताद्यप्यास्तामन्यायिजनादीत्यप्यर्थः । इत्थंकृत्वानेन रात्रौ चर्यारूपेण प्रकारेणान्वशान्मन्त्रैरशिक्षयत् । यतो मन्त्रान्कृतवान्साधितवान्मन्त्रकृन्मान्त्रिकः । हेतुमाह । अन्यथाकृत्वान्यथा यदि शाकिन्याद्यहं नानु-

---

१ सी डी °कृत्वा ऋ°. २ सी डी °खं स्याकि°. ३ डी °पो यत्र°.

---

१ ए रणम इ°. २ सी डी रात्रवि°. ३ सी °तर्कि शंकितं क°. डी °तर्कि शंकेतं क°. ४ डी °था य°. ५ ए °नोन्यमा°. ६ सी °त्तसेवां का°. ७ ए °णवित्ति°. ८ डी °त्ति । त°. ९ सी डी °तोपि वि°. १० डी °धरा हि. ११ सी शाकनि°. डी शाकनिका°. १२ डी चर्यारू°. १३ बी °शिष्यय°. १४ डी °दि पाकि°. १५ सी डी °द्यदहं.

शासिष्यामि तदेत्यर्थः । एवंकृत्वा एवं रात्रौ चर्यया स्वयं दृष्टप्रकारेण ऋजूक्तिः सरलवचनो जन ऋतं सत्यं यथा स्यादेवं कथंकृत्वा कथं सुखी स्यादिति । ऋजूक्तीञ्जनान्वचनच्छलेनच्छलकं शाकिन्यादि मा स्मच्छलयदिति रात्रौ प्रच्छन्नचर्यया तज्ज्ञात्वा मन्त्रध्यानेनाशिक्षयदित्यर्थः ॥

अन्यथाकारम् । एवंकारम् । कथंकारम् । इत्थंकारम् । अत्र "अन्यथा०" [५०] इत्यादिना खणम्वा ॥ पक्षे । अन्यथाकृत्वा । एवंकृत्वा । कथंकृत्वा । इत्थंकृत्वा ॥

योगिन्यवन्त्या अपरेद्युरेका योगिन्यशङ्कं तमवोचदेवम् ।
वयं यथाकारमहो तथाकारमप्यटामस्तव किं त्वनेन ॥ ५ ॥

५. अन्येद्युरवन्त्या मालवदेशसंबन्धिन्येका योगिनी योगिन्यशङ्कं योगिनीषु विषयेशङ्कं निर्भयं सन्तं तं नृपमेवमवोचत् । यथा यूयं कथमटथेत्येवं पृष्टासूयया तं प्रत्याह । वयमित्यादि स्पष्टम् ॥

यथाकारमहो तथाकारमप्यटामस्तव किंत्वनेन । इत्यत्र "यथा०" [५१] इत्यादिना खणम्वा ॥

किं शाकिनिकारमु नः शपेः स्वादुंकारमत्तासि न भोज्यमत्र ।
न भोक्ष्यसे भोगमथेह मृष्टंकारं मुधायस्यसि चर्चया नः ॥ ६ ॥

१ ए °परद्य°. २ सी डी °मुनेः श°. ३ ए शपे स्वा°. ४ सी °स्यति च°. ५ ए चर्यया.

१ बी °त्वा रा°. २ बी °क्तिभिः स°. ३ ए सतं य°. ४ डी °वं कृ°. ५ बी °शिष्यदि°. ६ बी सी डी °र । ए°. ७ ए °म् । अ°. ८ सी डी अनेद्युरवन्त्यां मालादवासं°. ९ ए °देशं ब°. १० बी °चयत्. ११ सी डी किं कृत्व°. १२ डी °नेत्य°.

६. उ हे नृप किं किमिति नोस्माञ् शाकिनिंकारं शपेः शाकिनीशब्दमुच्चार्याक्रोशसि शाकिन्यो यूयमित्याक्रोशसीत्यर्थः। तथा किमित्यत्र पृथ्व्यां भोज्यं [१]भक्ष्यं स्वादुं[२]कारं रुच्यं कृत्वा नात्तासि न भोक्ष्यसे। अथ तथा भोगं वैषयिकं सुखं मृष्टं[३]कारं[४] रुच्यं कृत्वेह जगति किमि[५]ति न भोक्ष्यसे। तथा नोस्माकं चर्चया विचारेण किं मुधा निरर्थकमायस्यसि खिद्यसे॥

विलासिनीनां पिबसीह मृष्टां कृत्वा न किं गीतसुधां हताश।
किं योगिनीदर्शमिह[१] व्यराध्यस्त्वं वैरिणीवेदमिवातिमूढ॥ ७॥

७. पूर्वार्धं स्पष्टम्। हेतिमूढेह पृथ्व्यां योगिनीदर्शं[६] यां यां योगिनीमपश्यस्तां[७] तां वैरिणीवेदमिव वैरिणीं[८] ज्ञात्वेव लब्ध्वेव विचार्येव वा किमि[९]ति त्वं[१०] व्यराध्योभ्यभवः॥

शाकिं[११]निंकारं शपेः। अत्र "शापे व्याप्यात्" [५२] इति खणम्वा॥

स्वादुंकारम्। मृष्टंकारम्। अत्र "स्वादु०" [५३] इत्यादिना वा खणम्॥ अदीर्घादिति किम्। मृष्टां कृत्वा॥

वैरिणीवेदम्। योगिनीदर्शम्। अत्र "विद्दृग्भ्यः०" [५४] इत्यादिना णम्वा॥

यदीच्छसि स्वस्य सुखानि यावज्जीवं चिरायोदरपूरमाशु।
तच्चर्मपूरं ननु देहि यावद्वेदं बलिं नः परिखादिनीभ्यः॥ ८॥

---

१ **डी** °ह प्यरा°.

---

१ **बी** भक्षं स्वा°. २ **बी** °कारं कृष्यं कृ°. ३ **डी** °कार कृत्वा कृ°. **सी** °कारं कृस्त्व्यं कृ°. ४ **बी** °ष्टं कृत्वा रु°. **ए** °कार रु°. ५ **ए** °ति ना भो°. ६ **सी डी** यां यो°. ७ **सी** °स्तां वै°. ८ **बी** °णीं वैरिणीं ज्ञा°. ९ **डी** °ति श्वं विरा°. १० **सी** त्वं विरा°. ११ **डी** °किनीं का°.

८. ननु हे राजन्नाशूदरपूरमिष्टभोज्यैरुदरं पूरयित्वा यावज्जीवं यावज्जीवसि तावच्चिराय चिरकालं स्वस्य यदि सुखानीच्छसि तत्तदा यावद्वेदं यावल्लभामहे तावत्परिखादिनीभ्यो भक्षिकाभ्यो नोसभ्यं चर्मपूरं कडित्रं पूरयित्वा बलिं देहि ॥

यावद्वेदम् । यावज्जीवम् । अत्र "यावतः०" [५५] इत्यादिना णम् ॥

चर्मपूरम् । उदरपूरम् । अत्र "चर्म०" [५६] इत्यादिना णम् ॥

रुष्टासु चास्मास्वभिवर्षिताब्दो न सिन्धुपूरं न च गोष्पदप्रम् ।
न कम्बलक्नोपमहो न चेलक्नोपं च देशे तव राजजाल्म ॥ ९ ॥

९. अहो राजजाल्म नृपाधमास्मासु रुष्टासु सतीषु तव देशे यावता सिन्धुर्नदी गोष्पदं च पूर्यते तावत्किंबहुना यावता कम्बलचेले क्नूयेते आर्द्रीभवतस्तावदप्यब्दो मेघो न वर्षिता न वर्षिष्यति ॥

गोष्पदप्रम् । सिन्धुपूरम् । अत्र "वृष्टि०" [५७] इत्यादिना णम्वौ । ऊकारस्य लुक्च वा ॥

चेलक्नोपम् । कम्बलक्नोपम् । अत्र "चेल०" [५८] इत्यादिना णम् ॥

मेघे च गात्रात्पुरुषात्परस्थस्तायं ह्यवृष्टे स्वदनाय पिंषन् ।
कः शुष्कपेषं क उ रूक्षपेषं कश्चूर्णपेषं च भवेन्न गर्ह्यः ॥ १० ॥

१०. उ हे राजन् हि स्फुटं स्वदनाय धान्याभावेन बुभुक्षया म्रियमाणत्वादत्यन्तं भोजनाय को नरः शुष्कपेषं पिंषन् शुष्कं बद-

१ सी डी गोस्पद°. २ ए च गोत्रा°. ३ सी डी °त्रापुरुषापर°.

१ ए °ज्जीवसि. २ बी °रिवादि°. ३ ए °म् । अहो. ४ सी डी गोस्पदं. ५ डी मेघामवकर्षि°. ६ सी °वोमेवकर्षि°. ७ सी डी वर्ष्यिष्य°. ८ डी °ति । मास्पद°. ९ सी गोस्पद°. १० सी णस्ता । ओका°. डी णम्या । ऊ°. ११ ए °म्वा । ओका°. १२ बी सी डी को वरः.

रीफलादि पिंषन्कश्च रूक्षपेषं रूक्षमस्नेहं कण्टकादि पिंषन्कश्च चूर्णपेषं चूर्णं तुषबुसादि पिंषन्सन्गर्ह्यो निन्द्यो न भवेत् । क सति । मेघे । किंभूते । गात्रस्नायं पुरुषस्नायं चावृष्टे यावता गात्रं पुरुषश्च स्नाप्येते तावत्यप्यवृष्टे ॥

गात्रस्नायम् । पुरुषस्नायम् । अत्र "गात्र०" [५९] इत्यादिना णम् ॥

शुष्कपेषम् । चूर्णपेषम् । रूक्षपेषं पिंषन् । इत्यत्र "शुष्क०" [६०] इत्यादिना णम् ॥

करोष्यदश्चाकृतकारमुच्चैर्निमूलकाषं कषसीह यन्नः ।
तद्योगिनीस्तोषय मूढ जीवग्राहं न गृह्णन्ति यथा हि तास्त्वाम् ॥ ११ ॥

११. हे राजन् यदिति क्रियाविशेषणम् । यत्त्वं नोस्मान्नु(नु)च्चैरिह निमूलकाषं कषसि मन्त्रैर्निर्मूलं कषसि निःसन्तानाः करोषीत्यर्थः । अद एतदकृतकारं करोष्यकृतमकृत्यं करोषि परिणामे कटुविपाकत्वात्तवेदं कर्तुं न युक्तमित्यर्थः । तत्तस्माद्धेतो रे मूढ योगिनीस्तोषय मानयेत्यर्थः । यथा हि स्फुटं ता योगिन्यस्त्वां जीवग्राहं न गृह्णन्ति योगप्रभावबन्धैर्बद्ध्वा जीवन्तं न गृह्णन्तीत्यर्थः ॥

अकृतकारं करोषि । जीवग्राहं गृह्णन्ति । इत्यत्र "कृ[ग्र्]ग्रहः०" [६१] इत्यादिना णम् ॥

निमूलकाषं कषसि । इत्यत्र "निमूलात्कषः" [६२] इति णम् ॥

---

१ ए °गिनीः स्तो°. २ ए °हं निगृह्णन्ति.

---

१ ए सी डी कण्टिकादिं पिं°. २ ए किं ते । गोत्र°. ३ ए °ता गोत्रं. ४ सी डी °श्च स्नाप्ये°. ५ ए °ष्टे । गोत्र°. ६ ए °त्र गोत्र°. ७ सी डी °स्मास्तुच्चै°. ८ सी डी °सि निस°. ९ ए त्तदेवं क°. १० बी कृतम°.

समूलकाषं कषितुं समूलघातं निहन्तुं द्विषतोसिघातम्[1] ।
क्षमं यशोवर्मनृपं स्वपोषं पुष्टं च योगिन्यनुदत्तशक्तिम् ॥ १२ ॥

त्वं मित्रयित्वार्चय कालिकाद्या[2] एत्योज्जयिन्यां[3] पुरि भक्तियुक्तः ।
यद्यात्मपोषं धनपोषमश्वपोषं पुपुक्षस्यथ बन्धुपोषम् ॥ १३ ॥

१२, १३. हे राजंस्त्वमात्मना शरीरेण धनेनाश्वैरुपलक्षणत्वात्सैन्यैर्बन्धुभिश्च यद्यात्मानं पुष्टं कर्तुमिच्छसीत्यर्थः[1] । तदा त्वं भक्तियुक्तः सन्नुज्जयिन्यां[2] पुर्येत्य कालिकाद्या योगिनीरर्चय[3] । किं कृत्वा । यशोवर्मनृपं मित्रयित्वा मित्रं कृत्वा । अन्यथा ह्युज्जयिनी त्वया गन्तुमशक्येत्यर्थः । किंभूतम् । योगिनीभिरन्वनुरूपं दत्ता शक्तिर्विद्याबलं यस्य तं तथा स्वपोषं पुष्टं च पराक्रमादिगुणविशिष्टेनात्मना समर्थं चेत्यर्थः । अत एव क्षमं समर्थम् । किं कर्तुम् । द्विषतः समूलकाषं कषितुं सान्वयाद्राज्यादुन्मूलयितुमसिघातं च निहन्तुं खड्गेन हिंसितुं समूलघातं निहन्तुं सान्वयान्हिंसितुं चेत्यर्थः । अन्यथात्मना श्रिया सैन्यैर्बन्धुभिश्च सह विनङ्क्षयसीत्यर्थः[6] ॥

तां स्माह राजेत्युदपेषमाज्यपेषं[4] नु पिंषन्स गिराथ मूर्ध्ना ।
कालीं करग्राहमथ स्वहस्तग्राहं यशोवर्मनृपं जिघृक्षुः ॥ १४ ॥

१४. अथ स राजा[8] जयसिंहस्तां योगिनीमिति वक्ष्यमाणरीत्याह स्म । यतः कालीमथ तथा यशोवर्मनृपं च बद्ध्वा स्वपाणिना ग्रही-

---

१ **सी डी** °म् । क्षेमं. २ **सी डी** कालका°. ३ **ए** °ज्जयन्यां. ४ **ए सी डी** राज्येत्यु°.

---

१ **सी** °च्छतीत्य°. **डी** °च्छन्तीत्य°. २ **ए** °ज्जयन्यां. **सी डी** °ज्जन्यां. ३ **ए** °र्चनाय. ४ **सी डी** °त्वा । येशो°. ५ **ए सी डी** °तं नि°. ६ **सी डी** विनक्षसी°. ७ **ए** °नक्षसी. ८ **ए** राजज°.

तुमिच्छुरित्यर्थः । कीदृक्सन्नाह स्म । मृद्व्या श्रूयमाणकोमलयार्थतस्तु कठोरया गिरा कृत्वोदपेषमाज्यपेषं पिंषन्नुदकेन घृतेन वा वर्तयन्निव ॥

यो वर्तयन्त्रः कर[1]वर्तमर्चां गन्धाढ्यचर्चामथ हस्तवर्तम् ।
हुं वर्तते वः किल हस्तवर्तं रक्ष्यः स युष्माभिरवन्तिनाथः ॥१५॥

१५. हुमित्यमर्षे । सोवन्तिनाथो युष्माभी रक्ष्यः । किलेति सत्ये । यो वो युष्माकं हस्तवर्तं[2] वर्तते हस्तेन वर्तते[3] यो युष्माकं वश्य इत्यर्थः । कीदृक्सन् । वो युष्मदर्थमर्चामर्चार्थमुपचाराच्चन्दनाद्यप्यर्चां तां करवर्तं वर्तयन्करेण वर्तयन्भक्त्यतिरेकाज्जलादिना सह स्वयं घर्षयन्नित्यर्थः । अथ तथा गन्धाढ्यचर्चां सौरभोत्कटं विलेपनार्थकर्पूरादि च हस्तवर्तं वर्तयन् ॥

समूलघातं निहन्तुम् । समूलकाषं कषितुम् । अत्र "हनश्च०" [६३] इत्यादिना णम् ॥

असिघातं निहन्तुम् । इत्यत्र "करणेभ्यः" [६४] इति णम् ॥

स्वपोषं पुष्टम् । आत्मपोषम्[4] । अश्वपोषम् । बन्धुपोषम्[5] । धनपोषं पुपुक्षति(स्ति)[6] ॥ स्नेहनार्थात् । उदपेषम् । आज्यपेषं पिंषन् । इत्यत्र "स्व०" [६५] इत्यादिना णम् ॥

हस्तग्राहम् । करग्राहं जिघृक्षुः । हस्तवर्तम् । करवर्तं वर्तयन् । हस्तवर्तं वर्तते । अत्र "हस्तार्थात्०" [६६] इत्यादिना णम् ॥

---

१ ए °रमर्तवर्चां.

---

१ सी डी वर्चय°. २ ए वर्त°. ३ सी डी °ते यु°. ४ डी °म् । ब°. ५ डी °म् । पु°. ६ बी °पुक्ष्यति.

स क्रौञ्चबन्धं मम गुप्तिबन्धं बन्ध्यो न चेन्नङ्क्ष्यति जीवनाशम् ।
प्रेष्यः स वः पूरुषवाहमाज्ञां वोढा वृथा तं हि न यद्यवेत ॥१६॥

१६. स यशोवर्मनृपश्चेद्यदि न जीवनाशं नङ्क्ष्यति जीवन्न पलायिष्यत इत्यर्थः । तदा स मम मया क्रौञ्चबन्धं बन्ध्यः क्रौञ्चाकारेण बन्धविशेषेण बन्धनीयस्तथा गुप्तिबन्धं बन्ध्यो गुप्तौ कारायां बन्धनीयस्ततश्च हि स्फुटं तं यशोवर्मनृपं यदि यूयं नावेत मया बध्यमानं न रक्षेत तदा स नृपो युष्माकं प्रेष्यो दासः सन्वृथा निरर्थकं युष्माकमाज्ञां पूरुषवाहं वोढा पूरुषस्य कर्तुर्वहनं यथा स्यादेवं धारयति पुरुषः सन्प्रेष्यो भूत्वा वृथा युष्मदाज्ञां वहतीत्यर्थः ॥

क्रौञ्चबन्धं बन्ध्यः । अत्र "बन्धेर्नाम्नि" [६७] इति णम् ॥

गुप्तिबन्धं बन्ध्यः । अत्र "आधारात्" [६८] इति णम् ॥

जीवनाशं नङ्क्ष्यति । पूरुषवाहं वोढा । इत्यत्र "कर्तुर्०" [६९] इत्यादिना णम् ॥

मया स पूरिष्यत ऊर्ध्वपूरं रणे न शुष्येद्यदि चोर्ध्वशोषम् ।
मंस्ये तदा वो महिमोरु पूज्यास्तदा च यूयं मम मातृपूजम् ॥१७॥

१७. सोवन्तीशो यदि रणे मया सहोर्ध्वपूरं पूरिष्यत ऊर्ध्वस्य सतः पूरणं यथा स्यादेवं पूरणीभविष्यति । ऊर्ध्वः स्यास्यतीत्यर्थः ।

---

१ ए बी °न्नक्षति. २ ए वः पुरु°. ३ सी डी °मान्यां वो°. ४ ए °द्यचेतः । य°.

---

१ ए °वर्मो नृ°. २ ए °शं तंक्षति. ३ ए °ष्यति इ°. ४ ए °न्धंक्रौ°. ५ ए °न्धनी°. ६ सी डी °टं य°. ७ ए प्रेक्षो दा°. ८ सी डी °मान्यां पुरु°. ९ बी सी डी °ढा पुरु°. १० ए °न्प्रेक्ष्यो भू°. ११ ए °ति । पौरु°. सी °ति । पुरु°. १२ सी डी °र्ध्वशोषं. १३ बी पूर्णीभ°.

तथा मया सह रणे सति यदि स ऊर्ध्वशोषं न शुष्येन्न मद्वाणैः पीतरक्तो यद्यूर्ध्व एव न शुष्येदित्यर्थः । तदा वो युष्माकमुरु महन्महिम माहात्म्यं मंस्ये ज्ञास्यामि । महिमशब्दो नपुंसकोपि । तदा च यूयं मम मातृपूजं पूज्या मातृवत्पूजनीया इत्यर्थः ॥

तद्गच्छ तत्राहमसा[१]वुपैमि यूयं न चेन्न[२]क्ष्यथ काकनाशम् ।
लूयादुपस्कारमसावसिर्वस्तदा नसः श्रुत्युपदंशमत्तुम् ॥ १८ ॥

१८. यदि यूयं काकवन्न पलायिष्यध्वे तदासौ प्रत्यक्षोसिर्वो युष्माकं नसो नासिका अत्तुं भक्षयितुमुपस्का[१]रं विक्षिप्य लूयाच्छिन्द्यात् । किं कृत्वा । अत्तुं श्रुत्युपदंशं श्रुतिभिः कर्णैरुपदश्योपदंशं कृत्वा केवलानां ना[२]सिकानां भक्षणा[३]दरुचौ रुचिविशेषोत्पादनायान्तरान्तरा श्रुतीरपि जग्धे(ग्ध्वे?)त्यर्थः । शिष्टं स्पष्टम् ॥

श्रुत्योपदश्यात्स्यति नो नसोसिरसिप्रहारं च विजेष्यसेस्मान् ।
सहासमु[३]त्क्त्वेति रदोपपीडमोष्ठं दशन्ती दिवि सोत्पपात ॥ १९ ॥

१९. स्पष्टः । किं तु तवासिर्नोस्माकं नसो ना[४]सिकाः श्रुत्या श्रवणजात्योपदश्य रोचकं कृत्वात्स्यति त्वं चास्मानसिप्रहारं खड्गेन प्र[५]हृत्य विजेष्यसे रदोपपीडं कोपादन्तैर्दन्तेषु वोपपी[६]ड्यौष्ठं दशन्ती ॥

चित्तोपरोधं विमृशन्विधेयं गृह्णन्नृपोसिं स्वकरोपकर्षम् ।
ग्रामानुरोधं पुरसीमरोधं द्रा[४]ग्मेलयन्सैन्यमथ प्रतस्थे ॥ २० ॥

१ ए °साधुपै°. सी डी °सामुपैति यू°. २ सी °न्नक्षयका°. डी °न्नक्षयकारक°. ३ सी डी °क्त्वेपि र°. ४ सी डी द्राग्मैल°.

१ सी डी °स्कारविवक्षि°. २ सी डी नाशिका°. ३ सी °णादिरुचि°. डी °णादिरु°. ४ सी डी नाशिका श्रु°. ५ डी प्रपद्मप वि°. ६ ए सी °पीड्योष्ठं.

२०. अथ नृपो जयसिंहो द्राक्प्रतस्थे । कीदृक्सन् । विधेयं[1] रणं चित्तोपरोधं चित्तेन चित्ते वोपरुध्य संस्थाप्य विमृशंस्तथासिं स्वकरोपकर्षं स्वकरेण स्वकरे वोपकृष्य समीप आनीय गृह्णंस्तथा ग्रामानुरोधं ग्रामेण ग्रामे वान्यसैन्यमेलनायानुकूलं स्थापयित्वैवं पुरसीमरोधं च सैन्यं मेलयन् ॥

शैलान्बलैर्मूर्ध्न्युपपीडमस्यन्कुर्वन्नृपाज्ञ् शासनकर्षमग्रे ।
क्रोशाष्टकोत्कर्षमहन्यहन्यच्छिनत्स पन्थानमनूनशक्तिः ॥ २१ ॥

२१. स राजाहन्यहनि पन्थानं क्रोशाष्टकोत्कर्षं[2] क्रोशाष्टकेन क्रोशाष्टके वोत्कृष्य परिच्छिद्याच्छिद(न?)ल्लङ्घे । कीदृक्सन् । अनूनशक्तिः शक्तित्रयोपेतोत एव नृपाज्ञ् शासनकर्षमाज्ञयाकृष्याग्रे कुर्वन्नत एव च शैलान्बलैरुपपीडं पीडयित्वा मूर्ध्नि शृङ्गेषूपपीडमस्यन्नितस्ततः क्षिपन् ॥

आरोहिणोंसेष्वथ[1] केशपङ्क्त्या ग्राहं भटा अत्वरयंस्तथाश्वान्[2] ।
क्रोशे यथा क्रोशयुगेन वा व्योम्न्युत्कर्षमिद्धोधिरुरोह रेणुः[3] ॥२२॥

२२. अंसेषु[3] ग्राहं स्कन्धेषु गृहीत्वाथाथ[4] वा केशपङ्क्त्या ग्राहं स्कन्धस्थवालपङ्क्त्या गृहीत्वारोहिणोश्वानारोहन्तो[5] भटा अश्ववारा अश्वांस्तथा वेगेनात्वरयन्यथेद्धः स्फीतो रेणुर्व्योम्न्यधिरुरोह । किं कृत्वा । क्रोशे क्रोशयुगेन वोत्कर्षमुत्कृष्य परिच्छिद्य क्रोशं क्रोशौ वा यावदित्यर्थः ॥

---

१ **सी** °हिणोंशेंष्वथे के°. **डी** °हिणोशेष्वथ. २ **डी** °थास्यात् । क्रो°. ३ **सी** रेण: । अशेषु. **डी** रेणः । अरोपु.

---

१ **ए** °धेयर°. २ **सी डी** °ष्टके वोकृष्य. ३ **ए बी** अंशेपु. ४ **डी** °त्वाथ्येण वा. ५ **ए सी डी** °रोहणो°.

ऊर्ध्वपूरं पूरिष्यते । ऊर्ध्वशोषं शुष्येत् । इत्यत्र "ऊर्ध्वात्पूः शुषः" [७०] इति णम् ॥

मातृपूजं पूज्याः ॥ कर्तुः । काकनाशं नङ्क्ष्यथ । अत्र "व्याप्याच्चेवात्" [७१] इति णम् ॥

उपस्कारं लूयात् । इत्यत्र "उपात्०" [७२] इत्यादिना णम् ॥

श्रुत्युपदंशमत्तुम् । श्रुत्योपदश्य । इत्यत्र "दंशेस्तृतीयया" [७३] इति णम्वा ॥

असिप्रहारम् । अत्र "हिंसा०" [७४] इत्यादिना णम्वा ॥ पक्षे । असिना प्रहृत्येति स्वयं ज्ञेयम् ॥

बलैरुपपीडम् । मूर्ध्न्युपपीडम् । चित्तोपरोधम् । स्वकरोपकर्षम् । अत्र "उपपीड०" [७५] इत्यादिना णम्वा ॥ पक्षोदाहरणानि ज्ञेयानि ॥ अन्ये तूपपूर्वादेव पीडेरिच्छन्ति । रुधकर्षाभ्यां तु कामचारेण । तेन पुरसीमरोधम् । उपपूर्वादपि । चित्तोपरोधम् । अन्योपसर्गपूर्वादपि । ग्रामानुरोधम् । एवं शासनर्षकम् ।

प्रमाणे । क्रोशयुगेनोत्कर्षम् । क्रोश उत्कर्षम् । क्रोशाष्टकोत्कर्षम् ॥ समासत्तौ । केशपङ्क्त्या ग्राहम् । अंसेषु ग्राहम् । अत्र "प्रमाण०" [७६] इत्यादिना णम्वा । पक्षोदाहरणानि ज्ञेयानि ॥

शय्यात उत्थायमयुः किराता यत्किं च नारोहमुपासितुं तम् ।
नृपोपि पथ्या(भक्त्या?)लपति स्म तान्भ्रूविक्षेपमुत्क्षिप्य शिरः प्रसन्नः ॥ २३ ॥

१ ए °तमुत्था°. २ ए °लपितस्मा ता°. ३ सी डी प्रपन्नः.

१ ए सी डी नक्षथ. २ ए अशनि प्र°. ३ सी डी °म् असे°. ४ बी अंशेषु.

२३. तं नृपमुपासितुं किराताः शय्यात उत्थायं शयनात्त्वरयोत्थाय तथा यत्किं च न गर्दभादिकमप्यारोहमयुरेवं नाम नृपसेवार्थमत्वरन्त यावता प्राभातिकमवश्यकृत्यमश्वादि वाहनं च नापेक्षन्तेस्मेत्यर्थः । नृपोपि [भक्त्या?] भक्तिसूचकतत्संभ्रमातिरेकागमनेन प्रसन्नः संस्तान्किरातानालपति स्म । किं कृत्वा । शिर उत्क्षिप्योर्ध्वीकृत्य भ्रूविक्षेपं भ्रुवौ तत्संमुखं क्षिप्त्वा च ॥

शय्यात उत्थायम् । अत्र "पञ्चम्या०" [७७] इत्यादिना णम्वा ॥

यत्किंचनारोहम् । अत्र "द्वितीयया" [७८] इति णम्वा ॥

भ्रूविक्षेपम् । अत्र "स्वाङ्गेनाध्रुवेण" [७९] इति णम्वा । [अ]ध्रुवेणेति किम् । शिर उत्क्षिप्य ॥

हृत्पेषमायद्भिरगान्प्रवेशं प्रवेशमुच्चैर्विषमप्रवेशम् ।
वनं वनं वेश्मरण्यपातमापातमापातमथापगाश्च ॥ २४ ॥

सरस्सरः पातमपश्च पादं पादं प्रपादं च तटं तटं द्राक् ।
द्रुमं द्रुमं स्कन्दमनध्वपादमास्कन्दमास्कन्दमनापतन्तम् ॥२५॥

फलाद्यवस्कन्दमलं क्षणासं मुहूर्तमत्यासमथोत्फलद्भिः ।
यामप्रतर्षं दृतिवाः पिबद्भिः स तैर्जहर्ष प्लवगैर्नु रामः ॥ २६ ॥

२४-२६. स नृपो राम इव तैः किरातैः प्लवगैर्नु कपिभिरिव कृत्वा जहर्ष । यत आयद्भिः सहागच्छद्भिः । किं किं कृत्वेत्याह ।

१ सी वेश्मम°. डी वेश्यम°. २ सी °मातापम°. डी °मापम°. ३ ए °म् । पलां°. ४ ए °त्याशम°.

१ ए °नायत्त्व°. २ सी °ता प्रभा°. ३ ए °नं चा ना°. ४ सी डी °पेक्ष्यन्ते. ५ ए °नालिपित स. ६ ए °य । अ°. सी डी °यम् । तत्र.

द्वत्पेषमतिबंहीयस्त्वेनान्योन्यं संघर्षाद्धृदयानि पिष्ट्वा तथागात्र् शैलान्प्रवेशं[1] प्रवेशं पर्वतवासित्वेन तदारोहकुशलत्वादभीक्ष्णं प्रविश्य तथोच्चैर्विषमप्रवेशं कौतुकादिना विषमं[2] विषमं वनगह्वरादि प्रविश्य विषमं प्रविश्य प्रविश्य वा तथा वनं वनं तरुखण्डं[3] तरुखण्डं[4] वेशं[5] फलादिलिप्सया प्रविश्याथ तथारण्यपातमारण्यपशुवधाद्यर्थमरण्यमरण्यं पतित्वारण्यं पतित्वा पतित्वा वापगाश्च नदीश्चापातमापातं तथा सरः[6] सरः पातमपश्च जलानि च पादं पादं पानाद्यर्थमभीक्ष्णं गत्वा तथा द्राक् नद्यादीनां तटं तटं प्रपादं विश्रामाद्यर्थमाश्रित्य तथा द्रुमं द्रुमं स्कन्दं छायादिसुखलिप्सया गत्वा तथानध्वपादं मार्गस्य सैन्यैः संकीर्णत्वेन दुःसंचरत्वाद्[7]मार्गममार्गं गत्वामार्गं[8] गत्वा गत्वा वा तथानापतन्तं श्रान्तत्वेनानागच्छन्तं जनमास्कन्दमास्कन्दमश्रान्तत्वेन शीघ्र[9]गत्वा दुर्लङ्घ्यो[10]लङ्घ्य तथालमत्यर्थं फलाद्यवस्कन्दं फलपुष्पादि[11] फलपुष्पादि मुषित्वा[12] फलादि मुषित्वा[13] मुषित्वा वा तथोत्फ[14]लद्भिरुल्लद्भिः । किं कृत्वा । क्षणासं क्षणमिति[15] सूक्ष्मं कालभेदमतिक्रम्य तथा मुहूर्तं द्विघटी[16]मत्यासमतिक्रम्योत्प्लुत्य क्षणं मुहूर्तं वा स्थित्वा पुनरुत्प्लवमानैरित्यर्थः । तथा यामप्रतर्षं प्रहरं प्रतृष्य[17] दृतिवाः खल्लस्थं जलं पिबद्भिश्च । वाःशब्दं क्लीबेपि केचित्[18] ॥

---

१ **सी** °शं प°. २ **ए** °भं व°. ३ **बी सी डी** °रुषण्डं. ४ **बी सी डी** °रुषण्डं. ५ **सी डी** °ण्डं च वे°. ६ **ए** °रः पा°. ७ **सी** गत्वां दमार्गममार्गं गत्वा गत्वा वां तथा ना°. ८ **डी** °मार्गममार्गं गत्वा गत्वा वा. ९ **ए सी डी** शीघ्रं ग°. १० **ए** °दुर्लङ्घ्योल°. ११ **ए** °दि मु°. १२ **ए** त्वा वा. १३ **सी डी** °त्वा वा. १४ **ए सी डी** °थोत्पलवद्भिरुल्लद्भिः. १५ **ए** °ण म°. १६ **ए** द्विघटा°. १७ **ए** प्रकृष्य. १८ **ए** °त् । वर्षं.

तर्षं च यामावपरेह्नि नामग्राहं मिथोह्वायिभिरग्रसैन्यैः[1]।
सिप्रापयोपीयत मङ्क्षु नामादेसं(शं) समा वासभुवो गृहीताः २७

२७. अपरेह्नि यामौ प्रहरद्वयं[1] तर्षं तर्षित्वाग्रसैन्यैः सिप्रापय उज्जयिनीसमीपस्थसिप्रानदीजलमपीयत। किंभूतैः सद्भिः। नामग्राहं मिथोह्वायिभिः। तथा मङ्क्षु नामादेशमियं जयसिंहस्येयं समरसिंहस्येति नामान्युच्चार्येत्यर्थः। समाः समस्ता वासभुव आवासस्थानानि गृहीताः[2]॥

हृत्पेषमायद्भिः। अत्र "परिक्लेश्येन" [८०] इति णम्वा॥

वनं वनं वेशम्। विषमप्रवेशम्[3]॥ अगान्प्रवेशं[4] प्रवेशम्। विषमप्रवेशम्॥ सरः सरः पातम्। अरण्यपातम्॥ आपगा आपातमापातम्। अरण्यपातम्॥ तटं तटं प्रपादम्। [5]अनध्वपादम्॥ अपः पादं पादम्। [6]अनध्वपादम्॥ द्रुमं द्रुमं स्कन्दम्। फलाद्यवस्कन्दम्॥ अनापतन्तमास्कन्दमास्कन्दम्। फलाद्यवस्कन्दम्। अत्र "विशपत०" [८१] इत्यादिना णम्वा॥ वनं[7] वनं प्रविश्य[8]। वनं प्रविश्य प्रविश्य। इत्यादीनि पक्षोदाहरणानि स्वयं ज्ञेयानि॥

[9]यामौ तर्षं पयोपीयत। [10]यामतर्षं पिबद्भिः। मुहूर्तमत्यासम्[11]। क्षणा[12]त्समुत्फलद्भिः। अत्र "कालेन०" [८२] इत्यादिना णम्वा॥

[13]नामग्राहम्। नामादेशम्। अत्र "नाम्ना०" [८३] इत्यादिना णम्वा॥

---

१ बी °सैन्यः। सि°.

---

१ डी °यं वेर्षंतेर्षि°. २ ए °हीतानि॥ हृ°. ३ ए °म्। प्रवेशम्। अ°. ४ डी °शं। वि°. ५ सी डी अध्वनपा°. ६ डी अध्वनपा°. ७ ए °नं प्र°. ८ सी डी °श्य। प्रविश्य। इ°. ९ सी डी यामो त°. १० सी डी °मकर्षं. ११ डी °त्यासमु°. १२ ए °णात् समुत्फल°. १३ सी डी °मग्रहणम्.

प्राप्ताग्रगैरुज्जयिनीत्यनुच्चैःकारं शनैःकृत्य[1] किमात्थ तर्हि ।
रुद्धा च सा तैर्ननु कश्चिदुच्चैः कृत्वेत्यथ[2] प्रत्यवदन्नृपाग्रे ॥ २८ ॥

२८. यद्यग्रगैरुज्जयिनी प्राप्ता तर्हीति प्राप्ताग्रगैरुज्जयिनीत्येतत्किं किमित्यनुच्चैःकारमनुदात्तस्वरेण तथा शनैःकृत्य मन्दमात्थ भणसि[2] । उच्चैर्नाम प्रियमाख्येयमिति राज्ञोक्ते[3] नन्विति पृष्टोक्तौ ननु सोज्जयिनी तैरग्रगै रुद्धा चेत्येवंप्रकारेणोच्चैः कृत्वा कश्चिद्वर्धापको नृपाग्रे जयसिंहाग्रे प्रत्यवदत्[4] ॥

प्राप्ताग्रगैरुज्जयिनीत्यनुच्चैःकारम् । शनैःकृत्य किमात्थ तर्हि । इत्यत्र "कृगः" [८४] इत्यादिना क्त्वाणमौ ॥ अनिष्टोक्ताविति किम् । रुद्धा च सा तैरित्युच्चैः कृत्वा प्रत्यवदत् ॥

द्राक्पृष्ठतःकृत्य पयांसि तिर्यक्कारं समावासमथो नियुक्ताः ।
ते पार्श्वतःकारमिभांश्च तिर्यक्कृत्वाश्वशाला जगदुर्नृपाय ॥ २९ ॥

२९. अथो नियुक्ता नृपाय जगदुरावासादि कृतमस्तीत्यूचुः । किं कृत्वा । पयांसि नद्यादिस्थजलानि द्राक्पृष्ठतःकृत्य पृष्ठे कृत्वा तथा समावासं[5] समावासनिकां तिर्यक्कारं समाप्य रचयित्वेत्यर्थः । तथेभान्पार्श्वतःकारमावासपार्श्वभागे कृत्वा तथाश्वशालास्तिर्यक्कृत्य(त्वा?) समाप्य च[6] ॥

स्राक्पार्श्वतोभावमुपेत्य नानाभूयाङ्क्तोभूय च वारवध्वः ।
आवासमभ्यापततोस्य नानाभावं स्थितश्रीवदभानुपास्त्यै[3]॥ ३० ॥

१ ए °कृतकि°. २ ए डी °कृत्येत्य°. ३ ए °पास्तौ । वा°.

१ डी °रुज्जायि°. २ सी डी भणिसि. ३ बी सी डी °क्तेन न°. ४ बी डी °त् । आप्ता°. ५ ए सी डी °सनि°. ६ बी °च । श्राक्पा°.

३०. वारवध्वो नानाभावं स्थितश्रीवन्नानाभावमनेकरूपीभूय स्थिता याः श्रियो लक्ष्म्यस्ता इवाभान् । किं कृत्वा । आवासमभ्यापततोऽभिमुखमागच्छतोस्य जयसिंहस्योपास्त्यै[1] सेवायै स्नागुपेत्यागत्य तथा पार्श्वतोभावं राज्ञः पार्श्वयोर्भूत्वा तथा नानाभूय[2] वेषावस्थानादिविच्छित्तिभिरनेकप्रकारीभूय तथाङ्कतोभूय च सकलपरिच्छदस्य मध्ये भूत्वा[3] च ॥

भीरून्विनाकृत्य बलानि नानाकारं विनाकार[1]मथान्यकार्यम् ।
क्षान्तेर्विनाभूय नृपः स नानाकृत्यादिशद्भङ्क्तुमवन्तिवप्र[2]म् ३१

३१. अथ नृपोवन्तिवप्रमुज्जयिनीकोट्टं भङ्क्तुं नानाकृत्यानेकप्रकारमादिशत् । किं कृत्वा । अन्यकार्यं विनाकारं मुक्त्वा तथा क्षान्तेर्विनाभूयं क्रुद्धीभूयेत्यर्थः । तथा भीरून्कातरान्विनाकृत्य मुक्त्वा तथा बलानि सैन्यानि नानाकारमनेकीकृत्य ॥

सैन्याद्विनाभावमथ द्विधाभूय[3] च द्विधाकृत्य च केपि यन्त्रम्[4] ।
ग्राव्णो द्विधाकारमिहायतन्त मङ्क्ष्वद्विधाभावमधीशभक्तौ ३२

३२. अथ केपि भटा इह वप्रभङ्गविषये मङ्क्ष्वयतन्त । किं कृत्वा । अधीशभक्तौ विषये द्विधाभूयै(धाभावमे ?)कीभूय स्वामिभक्त्यैकचित्तीभूयेत्यर्थः । तथा सैन्याद्विनाभावं कटकं मुक्त्वा द्विधाभूय च द्वाभ्यां भागाभ्यां स्थित्वा च तथा शिलाः क्षेप्तुं यन्त्रं जातावेकवचनं यन्त्राणि द्विधाकृत्य च भागद्वयेन कृत्वा च[5] ग्राव्णः शिला द्विधाकारं च ॥

---

१ **ए** °रमादिशत् ।. २ **सी डी** °वप्रम्. ३ **ए** °धाकृ°. ४ **ए** °म् । ग्लावाद्वि°.

---

१ **डी** °पास्त्यै से°. २ **ए** °भूयावे°. ३ **सी** °त्वा वा । भी°. ४ **सी डी** °य च द्वा°. ५ **डी** च । तिर्यकारम् । तत्र.

तिर्यक्कृत्वा । तिर्यक्कारम् । अत्र "तिर्यचा०" [८५] इत्यादिना क्त्वाणमौ ॥

अङ्कतोभूय । पार्श्वतोभावम् । पृष्ठतःकृत्य । पार्श्वतःकारम् । नानाभूय । नानाभावम् । नानाकृत्य । नानाकारम् । विनाभूय । विनाभावम् । विना[1]कृत्य । विनाकारम् । द्विधाभूय[2] । अद्विधाभावम् । द्विधाकृत्य[3] । द्विधाकारम् । अत्र "स्वाङ्ग०" [८६] इत्यादिना क्त्वाणमौ ॥

चरवनुस्तथाज्ञामनु केपि तूष्णींभावं कुशीपाणय[1] आशु वप्रम् ।
तस्थौ यथा द्वेषिजनोपि तूष्णींभूयैव तत्साहसदर्शनेन ॥ ३३ ॥

३३. कुशीपाणयः सन्तः केपि भटा आज्ञामनु नृपादेशेन हेतुना तूष्णींभावं वप्रभङ्गप्रच्छन्नतार्थं मौनेन स्थित्वाशु तथा वप्रं चरवनुर्व्यदारयन् । यथा तत्साहसदर्शनेन तेषां भटानां दुष्करकर्मावलोकनेन द्वेषिजनोपि तूष्णीं[4]भूयैव तस्थौ । तत्साहसदर्श[5]नोत्थविस्मयातिरेकाद्यथा क्षणं निर्वच[6]नक्रियोभूदित्यर्थः ॥

तूष्णींभूय । तूष्णींभावम् । अत्र "तूष्णीमा" [८७] इति क्त्वाणमौ ॥

केप्येकशोपि प्रभुकार्यमन्वग्भावं विदध्याम समेषिणोयुः[2] ।
अमूनवेमेत्यभिकाङ्क्षिणोन्वग्भूयान्वसर्पन्नपरे च तूर्णम् ॥३४॥

३४. केपि भटा[7] अयुर्वप्रभङ्गाय गताः । किंभूताः सन्तः । समेषिण इच्छन्तः । किमित्याह । वयमेकशोप्येकाकिनोप्यन्वग्भावं प्र[8]भावनुकूलीभूय प्रभुकार्यं वप्रभङ्गं विदध्याम कुर्यामेति । इतिरत्र ज्ञेयः । तथापरे च भटा अन्वग्भूयानुकूलीभूय तूर्णमन्वसर्पन्वप्रभ-

१ सी डी कुवप्रं चरवनु°. २ बी समिषि°.

१ डी °नाका°. २ ए सी डी °य । द्वि°. ३ सी डी °त्य । अ°. ४ डी °भूयेव. ५ ए °र्शमात्तवि°. ६ सी डी °नक्षयो°. ७ सी डी °टा आयु°. ८ ए °भावानु°.

ज्ञाय गतानेकाकिनो भटाननुजग्मुः । यतो [1]वयममून्वप्रभङ्गायैकाकिनो गतान्भटानवेम साहाय्येन रक्षेमेत्यभिकाङ्क्षिणः ॥

अन्वग्भूय । अन्वग्भावम् । अत्र "आनुलोम्येन्वचा" । [८८] इति क्त्वाणमौ ॥

विदध्याम समेषिणः । अवेमेत्यभिकाङ्क्षिणः । अत्र "इच्छार्थे०" [८९] इत्यादिना सप्तमी ॥

जज्ञेशकत्प्रारभताभ्यधृष्णोदासीद्विषेहे जघटेर्हति स्म ।
मिथो विलेभे खनितुं समर्थो वप्रं [1]भटौघो न मनाक्क जग्लौ ॥ ३५ ॥

३५. [2]भटौघो वप्रं खनितुं जज्ञे कोट्टखननविद्यानिपुणत्वाज्ज्ञातवान् । तथा वप्रं खनितुं समर्थो बलिष्ठत्वात्प्रभुरत एव खनितुमभ्यधृष्णोदुदयच्छत् । ततः खनितुमर्हति स्म खनितुं शक्[3]यानां वप्रप्र[4]देशानां प्राप्त्या खननसामग्रीसंपत्त्या च योग्योभूत् । ततः खनितुं मिथो विलेभेन्योन्यं विभागेन स्थापितवांस्ततश्च खनितुं प्रारभत ततश्च खनितुं जघटे संबद्धोभूत्संततं चखानेत्यर्थः । तथा खनि[5]तुमासीत्स्थितः कोट्टान्निपतदस्त्रभयेन [6]न नष्ट इत्यर्थः । तथा खनितुं विषेहे खननं सोढवान्न [7]खन[8]नेन श्रान्त इत्यर्थः । अत एव खनितुं मनाक्स्तोकमपि न जग्लौ न क्षीणहर्षोभूदत एव खनितुमशकत्खननं समाप्तवानित्यर्थः ॥

---

१ डी भटोघो.

---

१ ए वचनमूत्थप्र°. २ सी डी भटोघो. ३ डी °क्यामां चप्रदे°. ४ डी °ग्रीप°. ५ सी डी °तुमश°. ६ ए नष्ट°. ७ ए खने°. ८ बी °ने श्रा°.

अपारयत्प्रा[1]क्रमताध्यवास्यदविद्यतालं क्षमते स चाप्नोत्[2] ।
ऐषीदवेदीद्युयुजेविदच्च संभाषितुं[3] तं नृपतिर्न मम्लौ ॥ ३६ ॥

३६. नृपतिर्जयसिंहस्तं भटौघं[1] संभाषितुं सस्नेहमालपितुमवेदीदज्ञासीत्तथा संभाषितुमलं समर्थोत एव संभाषितुमैषीद[2]भ्यलषदत एव संभाषितुमध्यवास्य[3]दुदयच्छदत एवं[4] च संभाष्यभटसामीप्यप्राप्त्या संभाषितुमाप्नोत्संभाषणं[5] भाषणमर्हति स । अत एवं[6] च संभाषितुं प्राक्रमत प्रारेभे[7] । तथा संभाषितुं युयुजे संबद्धोभूत्संततं संबभाष इत्यर्थः । तथा संभाषितुमविदच्च लेभे न केनापि निषिद्ध इत्यर्थः । तथा संभाषितुमविद्यतासीन्निपतदस्त्रादिभयं मुक्त्वा संभाषणे स्थिरोभूदित्यर्थः । तथा संभाषितुं क्षमते स संभाषणं[8] सोढवान्संभाषणेन न श्रान्त इत्यर्थः । अत एव संभाषितुं न मम्लौ संभाषणेन न म्लानवानित्यर्थः[9] । अत एव च संभाषितुमपारयत्संभाषणं परिपूर्णीचक्रे ॥

खनितुमशकत् । अभ्यधृष्णोत् । जज्ञे । प्रारभत । विलेभे । विषेहे[10] । अर्हति । जग्लौ । जघटे । आसीत् । समर्थः ॥ संभाषितुमपारयत् । अध्यवास्यत् । अवेदीत् । प्राक्रमत[11] । अविदत् । क्षमते[12] । आप्नोत् । मम्लौ । युयुजे । अविद्यत । अलम् । इच्छार्थेषु । ए(ऐ)षीत् । इत्यत्र "शकधृष०" [९०] इत्यादिना तुम् ॥

विंशः पादः ॥

---

१ बी °त्प्राक्रम°. सी त्प्राकम°. डी त्प्राक्षुमवाध्य°. २ सी डी °त् । एषी°. ३ बी °षितुं नृ°. सी डी °षि तं.

---

१ डी °टौघे सं°. २ ए डी °षितुमै°. सी °षितुंमै°. ३ सी डी °वासदु°. ४ बी सी डी °व सं°. ५ सी डी °षणम°. ६ सी डी °व सं°. ७ सी डी °तुं क्षम°. ८ ए °भाषिणं. ९ डी °त्यर्थात ए°. १० सी °षे एवं संभाषितुं अ°. ११ ए °मत् । अ°. १२ बी °ते । प्राप्नो°.

तत्तद्धितं कर्तृभिरात्मभर्तुः समेत्य वृद्धैर्युवभिः क्षणाद्वा ।
दुःस्थैरथावन्तिभटैः स वप्रोध्यारोह्यभीतै रणतूर्यवाद्यात् ॥ ३७ ॥

३७. अथावन्तिभटैर्मालवभटैर्युवभिर्वृद्धैर्वा क्षणात्समेत्य मिलित्वा स वप्रोध्यारोहि रक्षार्थमध्यारूढः । किंभूतैः सद्भिः । आत्मभर्तुस्तत्प्रसिद्धं विजयादिकं हितमनुकूलं कर्तृभिर्भक्तत्वात्साधु कुर्वद्भिस्तथा[1] दुःस्थैर्वप्रखननादिनारिभिराक्रान्तत्वाद्दुर्दशैस्तथा रणतूर्यवाद्याद्रणतूर्याणां वाद्यं शत्रुभिर्वादनं तस्मादभीतैश्च शूरत्वादक्षुब्धैश्च ॥

तद्धितमित्यनेन "तद्धितोणादिः" [१] इति तद्धितसंज्ञा वृद्धैरित्य-[2]नेन "पौत्रादि वृद्धम्" [२] इति वृद्धसंज्ञा युवभिरित्यनेन "वंश्य०" [३-५] इत्यादिसूत्रेषूक्ता युवसंज्ञा दुःस्थैरित्यनेन "संज्ञा दुर्वा" [६-१०] इत्यादिसूत्रोक्ता[3] दुसंज्ञा वाद्यादित्यनेन "वाद्यात्" [११] इति सूत्रं चासूचि ॥

ते प्रेरिताः पैङ्गलकाण्वजैह्वाकातादिभिर्हारितकातयुक्तैः ।[1][2][3]
त्रातुं पुरीं धानपतीं नु राष्ट्रपतीं ततः सौपगवाः प्रजहुः ॥ ३८ ॥[4]

३८. ततोनन्तरं सौपगवा औपगवैर्भटभेदैर्युक्तास्तेवन्तिभटा राष्ट्रपतीं[4] राष्ट्रपतेर्देशपतेर्यशोवर्मण इमां पुरीमुज्जयिनीं[5] त्रातुं प्रजहुः[6] शत्रुभिः सह युयुधिरे । यतो धानपतीं[7] नु धनपतेर्धनदस्येयं[8] धानपत्यलका महर्धिकत्वादिना तत्तुल्याम् । किंभूताः सन्तः । प्रेरिताः । कैः पैङ्गलकाण्वाः[9] पिङ्गलस्य काण्व्यस्यर्षेश्छात्रा[10] जैह्वाकाताश्च जिह्वाचपलस्य

१ सी पैगलाकात्वजै०. २ बी डी °ङ्गलिका°. ३ बी °ह्वाकांतादिदिभि°. ४ ए °जहः । त°.

१ ए °था दुस्थै°. २ ए बी वंश इ°. ३ ए °क्ता दुःसं°. ४ ए सी °पते°. ५ ए °ज्जयनीं. ६ ए °जहुः श°. ७ ए °तीं भुवन°. ८ सी °तेर्न धन°. ९ ए काण्व्य°. १० बी सी डी काण्वस्य°.

कात्यर्षेश्छात्रास्तदादिभिः पण्डितेति नाम्ना प्रसिद्धैः प्रधानैः । कीदृ-शैः । हा(ह?)रितकात्यस्येमे छात्रा हारितकातास्तद्युक्तैः ॥

यथा कौण्व्यस्येमे काण्वा इत्यत्र "शकलादेर्यञः" [६. ३. २७.] इत्यण् । तथा पैङ्गलकाण्वा इत्यत्र "गोत्रोत्तर०" [१२] इत्यादिनाञ् ॥ अजिह्वाका-त्यहरितकात्यादिति किम् । यथेहेयो भवति कात्यस्य छात्राः कातीयास्तथेह न । जैह्वाकात हारितकात ॥

औपगवाः । इत्यत्र "प्राग्जितादण्" [१३] इत्यण् ॥

धानपतीम् । राष्ट्रपतीम् । अत्र "धनादेः पत्युः" [१४] इत्यण् ॥

अत्रान्तरे दैत्यभिदस्तमाम्रोदादित्य [आदित्य]मयुङ्क्त कर्म ।
विधातुमादित्यसमः सबार्हस्पत्यो नृपो वारितयाम्यकर्मा ॥३९॥

३९. अत्रान्तरे दैत्यभिदादित्योदित्याख्यमातुरपत्यं सूर्योस्तमा-म्रोत् । ततश्च नृपो जयसिंह आदित्यमादित्यदैवतं कर्म संध्यावन्दनादि-क्रियां विधातुमयुङ्क्त संबद्धोभूत् । कीदृक्सन् । सह बार्हस्पत्येन बृह-स्पतेरपत्येन बृहस्पतिदैवतेन वा पुरोहितेनाभिगाख्येन सह यः स तथा । तथा निवारितं याम्यं यमदैवतं कर्म प्राणिवधाद्यशुभक्रिया येन स तथा । ननु तादृशि युद्धसंरम्भेन्यो नृपजन आदित्यं कर्म स्मरत्यपि न तत्कथमसौ तत्कृतवानित्याह । यत आदित्यसमोदितिर्देव-

१ ए सी °स्पतो नृ°.

१ बी काण्वस्ये°. सी काण्वास्ये°. २ ए °त्यथ शंक°. ३ बी °त्र सक°. सी °त्र सवला°. ४ ए °र्यञ् इत्यस्तथा पिङ्ग°. ५ सी °त्यस्तथा. °त्यञपै°. ६ सी °त्यहारि°. ७ बी सी °थेयो. ८ ए न । जेह्वा°. सी न । जिह्वाकातहरि°. ९ बी °हितनामगा°. १० सी °तेन पिगोख्ये°. ११ सी °दित्यासैमेदिति देव°.

तास्य मातृत्वेन ञ्ये आदित्यः सूर्यस्तस्यापत्यं पुनर्ञ्यं[1][2] आपत्यत्वाभावाद्यलोपाभावे आदित्यो(त्य्यो ?) मनुस्तेन धार्मिकत्वादिगुणैः[3] समः ॥

अथादितीयेस्तमयेत्र वानस्पत्यादिवोत्पत्य तमोग्रसिष्ट ।
अबाह्यबाहीकपदार्थसार्थं याम्यो नु कालेयमथो नु किं तत्
॥ ४० ॥

४०. अथ तथादितीयेर्कसक्तेर्स्तमयेस्तगमने[4] सति तमोबाह्यबाहीकपदार्थसार्थमबाह्यानां[5] बाह्यानां च सर्वेषामित्यर्थः । पदार्थानां समूहमग्रसिष्टादृश्यकारित्वाद्ग्रस्तवानि(वदि?)व । किं कृत्वा । अत्र वानस्पत्यादिवोत्पत्यात्र जगति यो वनस्पतीनां समूहस्तस्माद्वनगहनेभ्य इत्यर्थः । उत्प्लुत्येव । दिने[6] हि तद्वननिकुञ्जेष्वासीदित्येवमाशङ्का[7] । उत्प्रेक्षते । नैतत्तमः किं तर्हि याम्यो नु यमस्यापत्यमिवाथो अथवा किं कालेयं नु कलिकालस्यापत्यमिव कलेरागतमिव वा । किल यमो मृत्युभावेन कलिश्च कलिभावेन सर्वं वस्तुजातं ग्रसेते तमोपि सर्वं ग्रस्तवदतो[8] ज्ञायते यमकल्योरपत्यमिव पितुरनुहर्तृत्वात्पुत्रस्येत्यर्थः । यद्वातिकृष्णत्वादेवमाशङ्का । कालेयमित्यत्र मतभेदेन क्लीबत्वम् ॥

आग्नेयरुग्राडथ पार्थिवामप्यपार्थिवीं न्वीक्षितुमुज्जयिन्याः ।
बहिर्निवेश[1]श्रिय[2]मङ्गरक्षावौत्सौदपानावपि वर्जितागात् ॥ ४१ ॥

४१. अथ राड् जयसिंह उज्जयिन्या बहिर्निवेशश्रियं बाह्यप्रदेशलक्ष्मीमीक्षितुमगात्[9] । यतः पार्थिवामपि पृथिव्यां भवां जातां

---

१ बी °वेशेश्रि°. २ सी °श्रियं बाह्य°.

---

१ सी ञ्यं अप°. २ बी आपात्य°. ३ सी °दितिगुणैस°. ४ ए °स्तग°. ५ बी °दार्थे सा°. ६ बी °ने ह त°. ७ सी °शक्य उ°. ८ बी सी °वत्ततो. ९ बी °देशे ल°.

पृथिव्या इमामपत्यमपि वा । एवं यथासंभवमन्यत्राप्यर्थो अभ्यूह्याः । अपार्थिवीं न्वत्युत्कृष्टत्वा[1]त्स्वर्गभवामिव । कीदृक्सन् । औ[2]त्सौदपानावपि सदा सहचरावुत्सोदपानाख्यदेशयोर्भवौ जातौ वा । य[3]द्वोत्सोदपानदेशराजयोरपत्ये अङ्गरक्षावपि वर्जिता त्यजनशील एकाकीत्यर्थः । यत आग्नेयरुग् निर्भीकतादिगुणैः कार्तिकेयसमः ॥

दैत्यः(त्य) । आदित्यः । आदित्यम् । याम्य ॥ पत्युत्तरपद । बार्हस्प[4]त्यः ॥

अणपवादे[5] च । आदित्य[6]य । याम्यः । वानस्पत्या[7]त् । इत्यत्र "अनिदमि०" [१५] इत्यादिना ञ्यः ॥ अनिदमीति किम्[8] । आदितीये ॥

बा[9]ह्लीक । अबाह्य । इत्यत्र "बहिषष्टीकण्च" [१६] इति टीकण् ञ्यश्च ॥

कालेयम् । आग्नेय । इत्यत्र "कलि०" [१७] इत्यादिनैयण् ॥

पार्थिवाम् । अपार्थिवीम् । अत्र "पृथिव्या ञाञ्" [१८] इति ञाञौ ॥

औत्सौदपानौ । इत्यत्र "उत्सादेरञ्" [१९] इत्यञ् ॥

दैवीं स सौवष्कयिवाष्कयाश्वत्थामोड(ड्ड)लोमैरुपयुक्ततीर्थाम् ।
सिप्रां ययौ दैवमसिं दधानः श्रियं च दैव्यां महिमापि दैव्यम् ॥ ४२ ॥

४२. स राजा सिप्रां ययौ । कीदृक्सन् । दै[10]वं देवैरधिष्ठितत्वाद्देवानामिममसिं दैव्यां देवसंबन्धिनीं श्रियं चाङ्गलक्ष्मीं च दैव्यं महिमापि प्रभावमपि दधानः । किंभूतां सिप्राम्[11] । दैवीं देवैरधिष्ठितत्वेन देवसंबन्धिनीम् । तथा सौव[12]ष्कयिवाष्कयाश्वत्थामोड्डुलोमैः सुवष्कयवष्कयाश्वत्थामोड्डुलोम्नामृषीणामपत्यैरुपयुक्ततीर्थां संयुक्तावताराम् ॥

---

१ ए सी °त्वात्सर्ग°. २ ए औत्सोद°. सी औसौद°. ३ ए °द्वोत्सौद°. ४ सी °स्पतः । अ°. ५ सी °दे यः । आ°. ६ ए °दित्य । या°. बी °दित्य्यः । या°. ७ ए °त्यादिना. ८ ए °म् । अदि°. ९ सी °हीकः । अ°. १० ए °वं दैवै°. ११ ए °म् । देवीं. १२ ए सी °ष्कयवा°.

वाष्कय । इत्यत्र "वष्कयाद्०" [२०] इत्यादिनाञ् ॥ असमास इति किम् । सौवष्कयि ॥

दैव्यम् । दैवम् । इत्यत्र "देवाद्यञ्च" [२१] इति यञञौ ॥ यञन्तादञन्ताच्च ङ्यां दैवीम् । यञन्ताद्दैव्यायनीत्यपि स्यात् ॥ केचित्तु ञ्यप्रत्ययमपीच्छन्ति । दैव्याम् ॥

अश्वत्थाम । इत्यत्र "अः स्थाम्नः" [२२] इति-अः ॥

उडुलोमैः । अत्र "लोम्नोपत्येषु" [२३] इति-अः ॥

षाण्मातुराभो द्विरथर्षभांसस्त्रिवेदवन्द्यां तटिनीमटन्सः ।
स्त्रैणं बलिं पाञ्चकपालमास्वादयत्ततोपश्यदपौंस्नमारात् ॥ ४३ ॥

४३. ततः स नृप आरान्निकटे स्त्रैणं स्त्रीसमूहमपश्यत् । कीदृक् । द्वयो रथयोर्द्विरथ्या वा बोढा द्विरथो य ऋषभस्तस्येवातिबलिष्ठावंसौ स्कन्धौ यस्य स तथात एव षाण्मातुराभः षण्णां मातॄणां कृत्तिकानामपत्यं षाण्मातुरः स्कन्दस्तत्तुल्यस्तथा त्रिवेदैस्त्रीन्वेदान्विदद्भिरधीयानैर्वा तीर्थत्वाद्वन्द्यां तटिनीं नदीमटन्सन् । किंभूतं स्त्रैणम् । अपौंस्नं पुरुषौघरहितं तथा पाञ्चकपालं पञ्चकपालस्य पञ्चसु कपालेषु संस्कृतस्य हविरादेरिमं बलिमास्वादयद्भक्षयत्सत् ॥

द्विरथ । इत्यत्र यप्रत्ययस्य त्रिवेद । इत्यत्राणश्च "द्विगोर्०" [२४] इत्या-

१ ए °वद्यां त°. २ ए °दपोस्न°.

१ ए सी यञाञौ. २ ए °ङ्यां देवी°. ३ ए °न्ताद्देव्या° सी °न्तादैवायिनी°. ४ बी °द्दैवाय°. ५ ए °न्तु ञप्र°. ६ बी सी दैव्यम्. ७ सी अः । षण्मा°. ८ ए °यो द्विरश्या वा. ९ ए सी °न्दतत्तु°. १० ए सी °अपैस्नं. ११ ए °रुषोघ°. १२ ए सी °था पञ्च°. १३ ए °रिव संय°.

दिना लुप् ॥ अनपत्य इति किम् । षाण्मातुर ॥ अद्विरिति किम् । पञ्चसु कपालेषु संस्कृतं पञ्चकपालं तस्येमं पाञ्चकपालम् ॥

स्त्रैणम् । अपौंस्नम् । इत्यत्र० "स्त्री०" [२५] इत्यादिना नञ्स्नञौ ॥

स्त्रीत्वेपि चौग्र्यादतिलङ्घ्य पुंस्तास्त्रैणे मिथो जल्पति तत्र राजा।
तद्योगिनीवृन्दमिति व्यबुद्धाशृणोद्गिरं चेत्यनवद्यपौंस्नः ॥ ४४ ॥

४४. स्पष्टम् । किं तु स्त्रीत्वेपि च नारीत्वेप्यौग्र्यात्प्रचण्डिम्ना पुंस्तास्त्रैणे पुरुषत्वस्त्रीत्वे अतिलङ्घ्य स्त्रीपुंसावतिक्रान्तं प्रागल्भ्यमाश्रित्येत्यर्थः । तत्र स्त्रीसमूहे । अनवद्यपौंस्नो निष्कलङ्कपौरुषः ॥

स्त्रैणे स्त्रीत्वे । पौंस्नः पुंस्ता । इत्यत्र "त्वे वा" [२६] इति वा नञ्स्नञौ ॥

गव्ये पुरो दर्भमयं चुलुक्यं कृत्वा तथा कीलय लोहकीलैः ।
द्राग्गार्ग्यगार्ग्यायणदाक्षिबाहव्यौदश्विमन्त्रैर्न यथैष रक्ष्यः ॥४५॥

४५. स्पष्टः । किं तु हे गव्ये गोः पुत्रि गोदेवते वा । लोहकीलैः स्तम्भनमन्त्रानुविद्धलोहमयकीलकैः । गर्गस्यापत्यं पौत्रादि गार्ग्यो गार्गेरपि गार्ग्यो गार्ग्यस्यापि गार्ग्यो गार्ग्यायणस्यापि गार्ग्यस्तथा गर्गस्यापत्यं वृद्धं गार्ग्यस्तस्यापत्यं युवा गार्ग्यायण एवमादय ऋषयः ॥

गव्ये । अत्र "गोः स्वरे यः" [२७] इति यः ॥

औपगवाः । दैत्य । औत्स । एषु "ङसोपत्ये" [२८] इति यथाभिहितमणादयः ॥

---

१ **सी** दर्भम°. २ **बी सी** द्राग्जार्ग्य°. ३ **ए** °र्ग्यगर्ग्या°. ४ **सी** °बाहिन्यौद°.

---

१ **ए सी** °तुरः । अ°. २ **ए** अपौंस्तम्. ३ **सी** °व्ये गोपु°. ४ **सी** गार्ग्यो°. ५ **बी** °रे इ°. ६ **सी** दैत्यः । औ°.

गार्ग्य । इत्यत्र "आद्यात्" [२९] इत्यपत्येणादय आद्यात्परमप्रकृतेरेव ॥

गार्ग्यायण । इत्यत्र "वृद्धाद्यूनि" [३०] इति यून्यपत्ये विवक्षिते यः प्रत्ययः स आद्याद्वृद्धप्रत्ययान्तात्स्यात् ॥

दाक्षि । इत्यत्र "अत इञ्" [३१] इति-इञ् ॥

वाहवि । औदञ्चि । इत्यत्र "बाह्वादिभ्यो गोत्रे" [३२] इति-इञ् ॥

त्वं[1] सैन्द्रवर्मिं सह चाक्रवर्मणेनाजवा(बा ?)ष्कादिकधेनविभ्याम् ।
पातासि चेदुज्जयिनीपतिं तत्कार्णिं क्षिप ब्राह्मणधेनविप्रः ॥४६॥

४६. हे ब्राह्मणधेनविप्रो ब्राह्मणधेनवेर्मुनिभेदस्य[2] प्रासिके सैन्द्रवर्मिमिन्द्रवर्मणोपत्येन[3] राजभेदेन सहितमुज्जयिनीपतिं चेत्पातासि रक्षिष्यसि । कैः सह । चाक्रवर्मणेन नृपविशेषेण तथाजवाष्कादिकधेनविभ्यामाजधेनविवाष्कधेनविभ्यां[4] प्रधानाभ्यां च सह । तत्तदा कार्णिं जयसिंहं क्षिप निरस्य ॥

न खल्वयं ब्राह्मणधेनवाम्भी सांभूयिभौर्यी न च नामितौजिः ।
नौदिर्न शालङ्किरथो न[2] षाडिवैया[3]सकिर्नापि न वाड्वलिर्वा ॥४७॥
न वैम्बकिर्वारुट(ड ?)किर्न सौधातकिर्न नैषादकिरेष नापि ।
किं तु प्रतापी जयसिंह एष हन्तुं यतध्वं तदिहोग्रमन्त्रैः ॥ ४८ ॥

४७, ४८. ब्राह्मणधेनवाम्भी सांभूयिभौर्यी औदिः शालङ्किर्वाग्वद(ड्ल ?)स्यापत्यं वाड्वलिः सौधातकिर्नैषादकिश्च ऋषयः । आमितौजिर्वैव(बैम्ब ?)किश्च नृपौ[5] । तथा प्रसिद्धानां षण्णां पूर्वजानाम-

---

१ सी त्वं सेन्द्रर्वानेस°. २ सी न खाडिवैया°. ३ ए °डिविया°. बी °डिवैया°.

---

१ सी इव्यपत्योणा°. २ सी °स्य ग्रसिके सेद्रवमिमिद्रवर्मे°. ३ बी °मिद्रव°. ४ सी बी °भ्यां च. ५ बी नृपः । त°.

पत्यं[1] षाडिः पुरुषविशेषः । यद्वा षण्णां कृत्तिकानामपत्यं षाडिः कार्तिकेयः । षाडिरिवानेकशक्तियुक्तत्वा[2]त्षाडिः कश्चिन्नृपः । तथा व्यासस्यापत्यं वैयासकिऋषिः पाण्डववंश्यः कश्चिद्राजा वा । तथा [3]वरुटस्य गञ्छकस्यापत्यं वारुटकिः । एते सर्वेपि महामन्त्रशक्त्याद्युपेता अपि युष्माभिश्छलिताः । एष तु राजा नैतत्सदृशः किं तु प्रतापी जयसिंहस्तत्तस्मादिह जयसिंहविषय उग्रमन्त्रैः प्रचण्डैरभिचारमन्त्रैः कृत्वा हन्तुं[4] यतध्वमित्यर्थः ॥

चाण्डालकिं चण्डि यथाथ कार्मारकिं सवैयाघ्रकिमाशिथ प्राक् ।
विभज्य पौनर्भवमाग्निशर्मक्युदारनानान्द्रमथो यथा वा ॥ ४९ ॥
भीमस्य पौत्रं जयकेशिनश्च दौहित्रमेनं न तथात्सि किं तु ।
हतप्रभावा पवमानपारस्त्रैणेयसूनोरिव मन्त्रजातैः ॥ ५० ॥

४९, ५०. हे चण्डि चण्डिकाख्ययोगिनि यथा प्राक् चाण्डालकिं[5] चण्डालापत्यं महामान्त्रिकमाशिथाखादोथाथ वा यथा सवैयाघ्रकिं[6] व्याघ्राख्यनरभेदापत्ययुक्तं कार्मारकिं महामान्त्रिकं लोहकारापत्यमाशिथाथो वाथ वा यथा पौनर्भवं पुनर्भ्वाः पुनरूढाया अनन्तरमपत्यमाग्निशर्मक्युदारनानान्द्रमाग्निशर्मक्या अग्निशर्माह्वब्राह्मणपुत्र्याः संबन्धिनमुदारं मन्त्रबलेनोद्भटं ननान्दुरपत्यं विभज्यान्ययोगिनीभिः सह विभागेन कृत्वाशिथ । तथा भीमस्य पौत्रं जयकेशिनश्च मयणल्लापितुर्दौहित्रमेनं जयसिंहं किं तु किमिति नात्सि न खादसि । कीदृक्सती । हतप्रभावेव । कैर्मन्त्रजातैर्मन्त्रौघैः[7] । कस्य पवमानपारस्त्रैणेयसूनोः परस्य स्त्री परस्त्री तस्या अपत्यं पारस्त्रैणेयः । पवमानस्य

१ ए °त्यं पु°. २ ए °क्त क°. ३ ए वरूढछक°. ४ बी °न्तुं प्रय°. ५ सी °किं चाण्डा°. ६ ए °घ्रास्य न°. ७ ए °मैन्त्रोघैः.

वायोः पारस्त्रैणेयो यः सूनुस्तस्य हनूमतः । हनूमान्ह्यञ्जनामर्कट्यां परयोषिति वायुना मर्कटरूपेण सङ्गे सति जात इति लोकोक्तिः । हनूमद्दैवतमन्त्रैर्हि [1] भूतशाकिन्यादिप्रभावा हन्यन्ते [2] ॥

सार्या हि नः पारशवा वि(बि?)दास्ते [1]
सगार्ग्यवात्स्याश्छलिताः [2] पुरा ये ।
यद्रूप और्वाग्निरिव प्रतापी
संस्पृश्यमानोपि दहत्यसौ नः ॥ ५१ ॥

५१. स्पष्टः । किं तु नै [3] इत्यत्र "कृत्यस्य वा" [२. २. ८८.] इति [4] कर्तरि षष्ठी । अस्माभिरित्यर्थः । पारशवाः पराः पुरुषाद्भिन्नवर्णाः स्त्रियः परस्त्रियस्तासामपत्यानि [5] । विदा विदर्ष्यपत्यानि [6] । यद्यस्माद्धेतोः ॥

सैन्द्रवर्मिम् । इत्यत्र "वर्मणोचक्रात्" [३३] इतीञ् ॥ अचक्रादिति किम् । चाक्रवर्मणेन ॥

आजधेनविवाष्कधेनविभ्याम् । अत्र "अजादिभ्यो धेनोः" [३४] इतीञ् ॥

ब्राह्मणधेनवि ब्राह्मणधेनव । इत्यत्र "ब्राह्मणाद्वा" [३५] इति वा-इञ् ॥

भौयी । सांभूयि । आम्भी [7] । आमितौजिः । अत्र "भूयः" [३६] इत्यादिनेञ् सस्य लोपश्चैषाम् ॥

शालङ्किः । औदिः । षाडिः । वाड्वलिः [8] । इत्येते "शालङ्कि०" [३७] इत्यादिनेञन्ता निपात्याः ॥

---

१ ए वियस्ते संगा°. २ सी °लिता परा.

---

१ सी भूतिशा°. २ ए °न्ते । मायां हि. ३ ए न रूपेणत्य°. ४ ए °तितक°. ५ ए °स्त्रियास्ता°. ६ ए °दर्श्यप°. ७ बी आम्भीः । आ°. ८ ए सी °लिः । एते.

वैयासकिः । वारुटकिः । सौधातकिः । नैषादकिः[1] । बैम्बकिः । चाण्डालकिम् । अत्र "व्यास०" [३८] इत्यादिनेञ् । अक् इत्यन्तादेशश्चैषाम् ॥

कर्मारव्याघ्राग्निशर्मभ्योपीच्छन्त्येके । कार्मारकिम् । वैयाघ्रकिम्[2] । आग्निशर्मकी ॥

पौनर्भवम् । पौत्रम् । दौहित्रम् । नानान्द्रम् । अत्र "पुनर्भू०" [३९] इत्यादिना-अञ् ॥

पारशवाः[3] । अत्र "पर०" [४०] इत्यादिनाञ् परस्त्रीशब्दस्य परशुभावश्च ॥ असावर्ण्य इति किम् । पारस्त्रैणेय । सङ्ककाले पवमानस्य मर्कटरूपत्वादसावर्ण्याभावः ॥

विदाः । और्व । इत्यत्र "विदादेर्वृद्धे" [४१] इत्यञ् ॥

गार्ग्यवात्स्याः । अत्र "गर्गादेर्यञ्" [४२] इति यञ् ॥

सहैव माधव्यककाप्यबौध्यबाभ्रव्यवातण्ड्यवतण्ड्यपत्यैः[1] ।
श्वोसौ यशोवर्मनृपं ग्रहीताधुना न चेच्छक्नुथ हन्तुमेनम्[2] ॥५२॥

५२. स्पष्टः । किं तु मधोरपत्यं वृद्धं ब्राह्मणो माधव्यो राज्ञस्त्राणासमर्थत्वात्कुत्सितो माधव्यो माधव्यक एवमाद्यैः प्रधानैस्तथा वतण्डस्यापत्यं वृद्धं स्त्र्याङ्गिरसी वतण्डी तस्या अपत्यं वतण्ड्यपत्यं तेन च प्रधानेन सहैव । असौ जयसिंहः ॥

माधव्य[6] । बाभ्रव्य । इत्यत्र "मधु०" [४३] इत्यादिना यञ् ॥

काप्यँ । बौध्य । इत्यत्र "कपि०" [४४] इत्यादिना यञ् ॥

---

१ **बी** °ड्यचतन्द्रप°. २ **ए बी सी** °पं गृही°.

---

१ **ए** °किः । चम्ब°. **बी** °किः । बेम्ब°. २ **बी** °म् । अग्नि°. ३ **ए** °शवः । अ°. ४ **ए** राजस्त्रा°. ५ **बी** °ज्ञस्त्रीणा°. ६ **सी** °धव्यः । बा°. ७ **सी** °प्य । बोध्य.

वातण्ड्य । इत्यत्र "वतण्डात्" [४५] इति यञ् ॥

वतण्डी । इत्यत्र "स्त्रियां लुप्" [४६] इति यञो लुप् ॥

कौञ्जादिगाणादिकयन्यकौञ्जायन्यादयः कष्टमहो अमूभिः ।
तटेत्र सन्तीति मृशन्समक्षीभूयेत्यथाह्वास्त स ताश्चुलुक्यः ॥५३॥

५३. अथ स चुलुक्यः समक्षीभूय प्रत्यक्षीभूय ता योगिनीरिति वक्ष्यमाणप्रकारेणाह्वास्त सस्पर्धमाकारयत् । कीदृक्सन् । मृशंश्चिन्तयन् । किमित्याह । अत्र तटेमूभिर्योगिनीभिर्हेतुभिः कौञ्जादिगाणादिकयन्यकौञ्जायन्यादयः कौञ्जायन्यग(गा ?)णायन्यकौञ्जायनीप्रभृतय ऋषय ऋष्यश्चाहो आश्चर्यं कष्टं दुःखेन सन्तीति । आश्चर्यं चानेकशक्तियुक्तानामृषीणामप्येतासां छलनभयेन कष्टमवस्थानात् ॥

कौञ्जायनानां श्रयथाद्यवेषं गाणायनानामथ मायया चेत् ।
शाङ्खायनाश्वायनतां च याथ ज्ञात्वा निगृह्णामि ततोप्यहं वः ॥ ५४ ॥

५४. स्पष्टः । किं तु माययालक्ष्यतार्थं छद्मना । शाङ्खायनाश्वायनतां च याथ शाङ्खायनाश्वायनमुनिवेषा वा भवथेत्यर्थः । ततोपि तदापि ज्ञात्वा योगिन्य एता इति बुद्धिप्रयोगेणावगम्य ॥

कौञ्जायन्य । गाणायन्य । इत्यत्र "कुञ्जादेर्ञायन्यः" [४७] इति ञायन्यः ॥

---

१ बी सी कौजादि°. २ सी °कौजाय°. ३ सी कौजाय°. ४ बी सी °षं गणा°. ५ ए °तां य या°.

---

१ सी वक्षमा°. २ सी कौजादि°. ३ बी °दिय°. ४ ए °श्वानयतां. सी °श्वामततां यथा शा°. ५ बी च यथा शा°.

कौञ्जायनी । कौञ्जायनानाम्[1] । गार्ग्यायनानाम् । इत्यत्र[3] "स्त्री०" [४८] इत्यादिना-आयनञ् ॥

आश्वायनताम् । शाङ्खायन । इत्यत्र "अश्वादेः" [४९] इत्यायनञ् ॥

वित्रस्तशापायनबन्धुभारद्वाजायनाद्याश्रममारसन्त्यः[1] ।
भार्गायणाद्युद्द्रयमुत्पतन्त्यो योगिन्य एयुस्तमथास्त्रहस्ताः[2] ॥५५॥

५५. योगिन्यस्तं जयसिंहमेयुः । किंभूताः सत्यः । वित्रस्ता[4] भीताः शापायनस्यर्षेर्बन्धूनां भारद्वाजायनाद्यानामृषीणामाश्रमा उपचारादाश्रमस्था ऋषय[5] ऋष्यश्च यत्र[6] तद्यथा स्यादेवमारसन्त्यो रौद्रं शब्दायमानास्तथा भार्गायणादीनामृषीणामुद्द्रतं भयं यत्र तद्यथा[7] स्यादेवमुत्पतन्त्य उच्छलन्त्यस्तथास्त्रहस्ताः[8][9] ॥

शापायन । भारद्वाजायन । इत्यत्र "शप०" [५०] इत्यादिनायनञ् ॥

भार्गायण । इत्यत्र "भर्गात्०" [५१] इत्यादिनायनञ् ॥

नाडायनैरप्यवितर्जिता[3] आत्रेयायणैरप्यहतास्तपद्भिः ।
चारायणैरप्यविचारिताश्च गार्ग्यायणैरप्यविबाधिता नः ॥ ५६ ॥
अन्यैश्च दाक्षायणहारितायनाद्यैरनुन्नास्तुदसीति वक्त्र्यः ।
कौष्टायनाच्र्यास्तरसाथ ताः[4] कैदासायनेड्याः क्षितिपे प्रजह्रुः
॥ ५७ ॥

५६, ५७. स्पष्टे । किं तु । तपद्भिस्तपस्यद्भिः । अनेनैषां तप-

१ सी °सत्यः । भा°. २ बी °थात्रह°. सी °थाव ह°. ३ बी °विवर्जि°. ४ बी ताः कौंदा°. सी ताः कैंदा°.

१ बी °म् । गणा°. २ सी °णाथाय°. ३ ए °त्यस्त्रातगदेना. ४ सी °त्रस्ताः शा°. ५ सी °यत्र. ६ बी °त्र यथा त°. ७ ए ततद्य°. ८ सी °स्तह°. ९ ए °थास्तह°.

श्वरणोत्था अनेकाः शक्तय उक्ताः । तद्युक्तैरपि नाडायनादिमहर्षिभि-
रकृततर्जनाहननाद्या नोस्मांस्तुदसीति वक्ष्यः । ईड्याः स्तुत्याः । ता
योगिन्यः ॥

दार्भायणैरप्युदितं स्मृतं शालङ्कायनैश्चेति यदागसि स्त्रीम् ।
प्रशासतो नांह इति स्मरन्नप्युच्छूकमाशु प्रजहार भूपः ॥ ५८ ॥

५८. भूप उच्छूकं स्त्रीषु प्रहरणं नोचितमिति चिन्तयोद्गतघृणं
यथा स्यादेवमाशु योगिनीषु प्रजहार । कीदृक्सन् । स्मरन्नपि जान-
न्नपि । किमित्याह । आगस्यपराधे सति स्त्रीं प्रशासतो यन्नांहः
स्त्रीहत्योत्थं पापं न स्यादित्येतद्दार्भायणैरपि मुनिभेदैरप्युदितं शालङ्का-
यनैश्च स्मृतमिति ॥

काष्णीयनीव क्षुभिताग्निशर्मा-
यणीव राणायनिकेव किं वा ।
असीति जल्पन्त्यथ ता निनङ्क्षूः
कोपादुदस्थात्किल तत्र काली ॥ ५९ ॥

५९. अथ किलेति सत्ये । तत्र योगिनीषु मध्ये काली पीठस्वा-
मिनी कोपादुदस्थाद्युद्धायोदयच्छत् । कीदृक्सती । ता योगिनीर्निन-
ङ्क्षूर्नष्टुमिच्छूः प्रत्येकं जल्पन्ती । कथमित्याह । यथा काष्णीय-
न्याद्या ऋषिपुत्र्यः कातरत्वात्क्षुभ्यन्त्येवं त्वं किमिति क्षुभितासीति ॥

किं शौनकायन्यहमस्मि शारद्वतायनी पार्वतिपत्न्यथो किम् ।
किं पार्वतायन्युत शंस जैवन्तायन्यथो सेति जहास भूपम् ॥६०॥

---

१ ए °यनैर°. २ बी °तो नाह. ३ ए सी वा । आसी°. ४ बी भूपः । स्प°. सी भूप । स्प°.

---

१ बी चितयो°. २ बी सी यन्नाहः. ३ ए °नक्षूर्न°.

६०. स्पष्टः । किं तु शौनकायन्याद्या ऋषिपुत्र्यः । अस्मि वर्ते । पार्वतिपत्नी पार्वतेर्मुनेर्भार्या[1] । शंस हे राजन् कथय । सा काली ॥

जैवन्तिवद्द्रौणिवदद्य तिष्ठ तिष्ठेति वत्र्यत्रयाविरनेकरूपा ।
चौलुक्य राजंस्तरसातिशैवद्रौणायनं सापिदधेस्त्रवर्षैः ॥ ६१ ॥

६१. स्पष्टः । किं तु हे राजञ्जैवन्तिवज्जीवन्तापत्यराजवद्द्रौणिवदश्वत्थामनृपवदद्य[2] तिष्ठ[3] तिष्ठ मा नेश इत्यर्थः । इति सा काली । अतिशैवद्रौणायनं शौर्यादिगुणै(णैः) कार्तिकेयाश्वत्थामावतिक्रान्तम् ॥

काकुस्थ(त्स्थ)वच्छक्रजिता क्षणं राड्वासिष्ठवद्गाधिसुतेन चोच्चैः ।
भैमेन कानीन इवावधूतः श्वाफल्कदाशार्हसमस्तथा(या?)स्त्रैः ॥ ६२ ॥

६२. श्वफल्कस्यापत्यं श्वाफल्कोन्धकक्षत्रियभेदो दशार्हाणामपत्यं[4] दाशार्हो विष्णुर्द्वन्द्वे ताभ्यां समो राड् जयसिंहस्तया काल्यास्त्रैः क्षणमवधूतः क्षिप्तः । यथा[5] काकुस्थः(त्स्थः) ककुस्थ(त्स्थ)स्यापत्यं[6] काकुस्थो(त्स्थो) रामो लक्ष्मणो वा शक्रजिता रावणपुत्रेण यथा[7] च वासिष्ठः कामधेनुप्रत्याहरणव्यतिकरे वसिष्ठर्षिणोत्पादितत्वाद्वसिष्ठस्यापत्यं[8][9] परमारादि(पराशरादि ?)पुरुषो गाधिसुतेन विश्वामित्रेण यथा च कानीनः कन्याया अपत्यं कर्णो भैमेन भीमस्य पाण्डोरपत्येन घटोत्कचेनोच्चैः क्षणमस्त्रैरवधूतः । एतैरुपमानैर्जयसिंहकर्तृकः काल्या भावी पराभवोसूचि । काकुंत्स्थादिभिः[10] पश्चाच्छक्रजिदादीनां विजयात् ॥

---

१ **ए सी** °तेमुनेभार्या. २ **ए सी** °श्वस्थाम°. ३ **सी** °ष्ठ मा. ४ **ए** °शार्हणा°. ५ **ए** °था क°. ६ **बी** °पत्यं रा°. **सी** °पत्य रा°. ७ **ए सी** °था वा वशिष्ठः. ८ **ए सी** वशिष्ठ°. ९ **ए बी** °द्वशिष्ठ°. १० **बी** °कुस्थादि°.

यत्रैवर्णच्छागलशौङ्गवैकर्णाद्यैः स्वयं वैश्रवणेन चापि ।
सुदुर्लभं रावणजित्समौजा मायाघ्नमस्त्रं स्मरति स तत्सः ॥ ६३ ॥

६३. रावणजित्समौजा रामचन्द्रतुल्यबलैः स जयसिंहस्तन्मायाघ्नमनेकरूपकरणादिच्छद्मापहार्यस्त्रं स्मरति स्म । यन्महाप्रभावत्वात्रैवर्णच्छागलैशौङ्गवैकर्णाद्यैर्मुनिभेदैः स्वयं वैश्रवणेन चापि धनदेनापि सुदुर्लभम् ॥

आत्रेयायणैः । अत्र "आत्रेयाद्०" [५२] इत्यादिनायनञ् ॥

नाडायनैः । चारायणैः । इत्यत्र "नडादिभ्य आयनण्" [५३] इत्यायनण् ॥

गार्ग्यायणैः । दाक्षायन(ण) । अत्र "यञिञः" [५४] इत्यायनण् ॥

हारितायनँ । कैदासायनँ । इत्यत्र "हरितादेरञः" [५५] इत्यायनण् ॥

क्रौष्टायन । शालङ्कायनैः । अत्र "क्रोष्टृ०" [५६] इत्यादिनायनण् । तयोश्चान्तस्य लुक् ॥

दार्भायणैः । कार्ष्णायनी । आग्निशर्मायणी । राणायनिका । शारद्वतायनी । शौनकायनी । इत्यत्र "दर्भकृष्ण०" [५७] इत्यादिनायनण् ॥

जैवन्तायनी जैवन्तिवत् । पार्वतायनी पार्वेति । इत्यत्र "जीवन्त०" [५८] इत्यादिनायनण्वा ॥

द्रौणायनम् द्रो(द्रौ)णि । इत्यत्र "द्रोणाद्वा" [५९] इति वायनण् ॥

शैव । काकुस्थ(त्स्थ) । इत्यत्र "शिवादेरण्" [६०] इत्यण् ॥

---

१ ए °णश्छाग°. सी °णस्थाग°. २ ए सी °शौगवै°. ३ बी °न वापि.

---

१ सी °त्समो राजा. २ ए °लः ज°. ३ सी °णस्थाग°. ४ ए °लशोङ्ग.° ५ सी °शौगवै°. ६ बी °न । कैदा°. ७ बी °न । ह°. ८ बी सी °नी । अग्नि°. ९ ए °वेति. १० बी °ण् । शिव.

ऋषि । वासिष्ठ ॥ वृष्णि । दाशार्ह ॥ अन्धक । श्वाफल्क ॥ कुरु । भैमेन । इत्यत्र "ऋषि०" [६१] इत्यादिनाण् ॥

कानीनः । त्रैवण । इत्यत्र "कन्या०" [६२] इत्यादिनाण् । कनीनत्रिवणेत्यादेशौ च ॥

शौङ्ग । इत्यत्र "शुङ्गाभ्यां०" [६३] इत्यादिनाण् ॥

वैकर्ण[२] । छागल । इत्यत्र "विकर्ण०" [६४] इत्यादिनाण् ॥

वैश्रवणेन । रावण । इत्यत्र "णश्र०" [६५] इत्यादिनाण् तत्संनियोगे णश्रान्तादेशः । णसंनियोगे विशशब्दलोपश्चास्य वा ॥

द्वैमातुरारातिसमोपि कोपात्सांमातुरत्वेन दयां दधानः ।
सोस्त्रेण तेनापहृतान्यरूपामेकाकिनीमित्यवदत्स्मितास्यः ॥ ६४ ॥

६४. उत्तरार्धं स्पष्टम् । कोपाद्वैमातुरारातिसमोपि जरासंधपित्रा देवतावितीर्णायाः पुत्रोत्पत्तिहेतोरेकस्या गुटिकाया महाभारते तु स्वयमाम्रवृक्षान्नृपकरे पतितस्य चण्डकौशिकर्षिणा पुत्रहेतुत्वेनोपादिष्टस्यैकस्य[३] परिपक्वस्याम्रफलस्यार्धमर्धं विभज्यातिवल्लभयोर्द्वयोर्भार्ययोर्दानेनार्धस्यार्धस्य पुत्रस्य जन्मतो जराराक्षस्यावसंधानाद्द्वयोर्मात्रोरपत्यं द्वैमातुरो जरासंधस्तस्यारिर्विष्णुस्तस्य समोपि । अतिकोप्यपीत्यर्थः । सांमातुरत्वेन सर्वैर्दयालुत्वादिभिर्मातृगुणैः संगता माता संमाता मयणल्ला तदपत्यत्वेन दयां दधानः ॥

त्वं भाद्रमातुर्यबलासि तत्किं कुर्या(र्यां) त्रपानामेदमत्र एषः ।
पूर्वाश्च शाकुन्तलजाह्नवेयादींस्त्रीवधात्किं बत लज्जयामि ॥ ६५ ॥

६५. हे भाद्रमातुरि भद्रा प्रशंस्या[४] भद्रस्य वा या माता तस्याः

---

१ बी वाशिष्ठ. सी वाशिष्ठः । वृ°. २ सी °र्णे । त्या°. ३ ए °हेत्वे°. ४ बी °शस्य भ°.

पुत्रि त्वमबला स्त्र्यसि वर्तसे । तत्तस्मादेषोहं जयसिंहः किं कुर्याम् । यतस्त्वपैवागाधत्वान्नार्मदो नर्मदाया नद्या अपत्यं नीलाख्यो ह्रदस्तत्र निमग्नः । तथा शाकुन्तलो भरतश्चक्री जाह्नवेयो गाङ्गेयस्तत्प्रभृतीन्पूर्वांश्च सोमवंशान्पूर्वजांश्च स्त्रीवधात्किं लज्जयामि । सोमवंश्यनृपत्वात्त्वां स्त्रियं न हन्मीत्यर्थः ॥

ऊचे च सा स्मेरमुखीति जाम्बवतेयपित्रंश यथा हि गीतः ।
पैलेयपैलीपतिसाल्वमित्रसाल्वेयमाण्डूकमुखैस्तथासि ॥ ६६ ॥

६६. स्पष्टः । किं तु हे जाम्बवतेयपित्रंश जम्बवत्या अपत्यं जाम्बवतेयः शा(सा)म्बकुमारस्तस्य पिता विष्णुस्तस्यांश जयसिंह पैलेयादिमुनिभिर्यथा यादृग्गुणस्त्वं गीतस्तथा तादृशोसि ॥

ध्यायन्ति माण्डूकिमुखाश्च माण्डूकेयोपमा यं मुनयोपरेपि ।
तस्यासि दैतेयभिदे ससौपर्णेयस्य दैत्यद्विषतोवतारः ॥ ६७ ॥

६७. पूर्वार्धं स्पष्टम् । तस्य ससौपर्णेयस्य गरुडासनत्वाद्गरुडान्वितस्य दैत्यद्विषतो विष्णोरसि त्वं दैतेयभिदे दानवविनाशायावतारो मूर्तिः ॥

धैर्येण सत्त्वेन च तेस्मि हृष्टा न यौवतेयः सदृशस्तवास्ति ।
त्वं काद्रवेयानिव वैनतेयो दात्तेयसैप्रादिनृपान्प्रजीयाः ॥ ६८ ॥

६८. हे राजंस्ते तव धैर्येण चित्तावष्टम्भेन सत्त्वेन च साहसेन च हृष्टा । यतस्तव सदृशो धैर्यादिगुणैस्तुल्यो यौवतेयो युवतेरपत्यं

१ ए °यपुत्रं°. २ सी °श जम्बवत्या. ३ ए °नयोः प°. ४ ए च साह°. ५ बी सी काद्रवे°.

१ ए °गान्धत्वा°. २ बी °दान°. ३ ए °श्च स्त्री°. ४ बी °सिंहः पै°. ५ सी °ह पैले°. ६ बी सी °तोर्विष्णो°.

नास्ति । अत एव च यथा त्वं दात्तेयसैप्रादिनृपान् दात्तेयो दत्ताख्यायाः कस्याश्चिद्[1]द्राज्ञ्या अपत्यं सिप्राया नद्या अपत्यं[2] सैप्रो[3] यशोवर्मनृपः । सिप्रा हि तस्य जलैः कृत्वा पोषणवपुःक्षालना[4]द्युपचारेण मातृतुल्या द्वन्द्वे तत्प्रभृतीन्नृपान्प्रजीयाः । यथा [5]काद्रवेयान्नागान्वैनतेयो गरुडो जयति ॥ तद्वैनतेयोपम सैप्रकामण्डलेयदात्तेयनृपाञ्जय त्वमिति पाठान्तरं स्पष्टम् । किं तु हे वैनतेयोपम कमण्डल्वा अपत्यं कामण्डलेयो नृपः ॥

द्वैमातु[6]र । सांमातुरः(र) । भाद्रमातुरि । इत्यत्र "संख्या०" [६६] इत्यादिनाण् मातुश्च मातुरादेशः ॥

नार्मद । शाकुन्तल । इत्यत्र "अदोर्नदी०" [६७] इत्यादिनाण् ॥ अदोरिति किम् । जाह्नवेय । जा[7]म्बवतेय ॥

पैली पैलेय । साल्व सा[8]ल्वेय । माण्[9]डूक माण्डूकि । अत्र "पीला०" [६८] इत्यादिना वाण् ॥

दैतेय दैत्य । माण्डूकेय माण्डूकि । इत्यत्र "[10]दितेश्चैयण्वा" [६९] इत्येयण्वा ॥

सौपर्णेयस्य । वैनतेयः । यौवतेयः । कामण्ड[11]लेय । [12]काद्रवेयान् । अत्र "ङ्याप्त्यूङः" [७०] इत्येयण् ॥

दात्तेय । इत्यत्र "द्विस्वरादनद्याः" [७१] इत्येयण् ॥ अनद्या इति किम् । सैप्र ॥

---

१ **बी** °द्राज्ञा अ°. २ **ए** °त्यं सिप्रो°. ३ **बी** सैप्रेयो य°. ४ **सी** °नाद्यप°. ५ **ए सी** कार्द्रवे°. ६ **बी सी** °तुरः । सां°. ७ **ए सी** °म्बते°. ८ **ए** °ल्वे । मा°. ९ **ए** °ण्डूकः माण्डूकिः । अ°. १० **बी** दितिश्चैवय°. ११ **सी** °लेयः । कार्द्रवे°. १२ **बी** कार्द्रवया°.

आत्रेयदाक्षायणशाकलेयशौभ्रेयशस्यां हरसिद्धिमुख्याः ।
कीर्तिं प्रगास्यन्ति तवेत्युदित्वा तिरोदधे सा सह योगिनीभिः
॥ ६९ ॥

६९. स्पष्टः । किं त्वात्रेयादिमुनिभिः प्रशस्याम् । हरसिद्धिनाम्नी सर्वयोगिनीपीठस्वामिनी तदाद्या योगिन्यः । सा काली ॥

आत्रेय । इत्यत्र "इतोनिञः" [७२] इत्येयण् ॥ अनिञ इति किम् । दाक्षायण ॥

शौभ्रेय[1] । शाकलेय । इत्यत्र "शुभ्रादिभ्यः" [७३] इत्येयण् ॥

कौषीतकेयादथ लाक्षणेयाच्छ्यामेयतो निश्यपि तन्निशम्य ।
धारां यशोवर्मनृपः सवैकर्णेयः[1] सुदुर्गं तदगात्तदैव ॥ ७० ॥

७०. यशोवर्मनृपस्तदैव निश्येव तत्प्रसिद्धं सुदुर्गं शोभनं[2] दुर्गं[3] स्थानमगात् । किं तदित्याह । धारां[4] धाराख्यां पुरीम् । कीदृक् । सवैकर्णेयः वैकर्णेयैर्विकर्णर्षेरपत्यैः प्रधानैः सहितः । किं कृत्वा । कौषीतकेयादिमुनिभ्यो निश्यपि तद्योगिनीजयरूपं वृत्तान्तं निशम्य[5] ॥

श्यामेयतः । लाक्षणेयात् । इत्यत्र[6] "श्याम०" [७४] इत्यादिनैयण्[7] ॥

वैकर्णेयः । कौषीतकेयात् । इत्यत्र "विकर्ण०" [७५] इत्यादिनैयण् ॥

भ्रौवेयमुख्यैरपि गीतकीर्तिः काल्याणिनेयः शिबिरं स्वमेत्य ।
सौभागिनेयैः सभटैर[2]कौलटेयैरुषस्युज्ज[3]यिनीमभाङ्क्षीत् ॥ ७१ ॥

७१. स जयसिंहः स्वं शिबिरं सैन्यमेत्योषसि प्रभाते भटैरु-

---

१ बी सी °यः सदु°. २ ए °रकोल°. ३ सी °ज्जयनी°.

---

१ बी °भ्रेयः । शा°. २ सी °भनदुर्गस्था°. ३ बी दुर्गस्था°. ४ सी धाराख्यं पु°. ५ ए सी °म्य । शामे°. ६ बी °त्र शाम°. ७ बी °ण् । विक°.

ज्जयिनीमभाङ्क्षीत् । कीदृक् । भ्रौवेयमुख्यैरपि[1] ब्रह्मणो भ्रुवोपत्यं[2] भ्रौवेयो महर्षिस्तदाद्यैर्[3]महर्षिभिरास्तामन्यः सामान्यर्षिव्रज इत्यप्यर्थः । गीतकीर्तिः संकीर्तितयोगिनीविजयोत्थयशास्तथा काल्याणिनेयः कल्याण्या[4] भद्राया मयणल्लाया अपत्यम् । किंभूतैर्भटैः । सौभागिनेयैः सुभगाया अपत्यैः । एतेन शस्त्रादिकलाश्रयतोक्ता[5] । सौभागिनेया एव हि पितृभिर्वाल्लभ्याच्छस्त्रकलादि शिक्ष्यन्ते । तथा कौलटेयैर्महर्द्धिकक्षत्रियसतीमतल्लिकासु जातत्वान्न कुलटानां भिक्षुकसतीनामपत्यैः । प्रतिज्ञातनिर्वाहकैरित्यर्थः । इन्द्रवज्रा छन्दः ॥

धाराप्रविष्टमथ कौलटिनेयबुद्ध्या[1]
द्राक्चाटकैरमिव तं चटकारिपक्षी ।
जग्राह मालवपतिं युधि नर्तितासि
नाटेरकः सपुलक[2]श्चुलुकप्रवीरः[3] ॥ ७२ ॥

७२. अथ चुलुकप्रवीरो द्राक् तं मालवपतिं जग्राह । यथा चटकारिपक्षी चटकस्य[6] चटकाया वापत्यस्य स्त्रियोरि(या अरि ?)र्यः पक्षी श्येनः । स चाटकैरं चटकस्य चटकाया[7] वापत्यं गृह्णाति । कीदृक्सन् । सपुलको वीर्योत्कर्षाद्रोमाञ्चितोत एव युधि[8] रणाय नर्तितोसिरेव नर्तनीयत्वान्नाटेरको नट्या अपत्यं नाटकिको येन सः । किंभूतम् । तं कौलटिनेयबुद्ध्या[9] कुलटापत्यबुद्ध्या धाराप्रविष्टं धारायां दुर्गे स्थितम् । भिक्षुकसत्यपत्यस्यैव हि नीचकुलत्वान्नंष्टा दुर्गे प्रवेशनादिविषया नीचा बुद्धिः स्यात् । वसन्ततिलका[10] छन्दः ॥

---

१ **सी** कौशलिने°. २ **ए** °श्रुलक°. ३ **सी** °वीणः । अ°.

---

१ **बी सी** °पि ब्राह्म°. २ **सी** °पत्यकिं भूवैयो. ३ **ए सी** °द्यैमह°. ४ **ए सी** °ल्याणा भ°. ५ **सी** °लाशय°. ६ **सी** °टका°. ७ **बी** °याप°. ८ **ए** सुधे र°. **सी** युधर°. ९ **सी** °द्ध्या धारायां दुर्गस्थि°. १० **बी** °लकछ°.

काणेराम्बावक्रौर्यभाजं चुलुक्यो गुप्तावक्षैप्सीत्तं[1] यशोवर्मभूपम् ।
तां काणेयाम्बाकाणदृष्टिं[2] न्वकान्तिं धारां नाटेयत्कीर्तिराश्वासयँच्च[3] ॥ ७३ ॥

७३. चुलुक्यस्तं यशोवर्मभूपं गुप्तावक्षैप्सीत्[1] । यतः क्रौर्यभाजं जयसिंहं प्रति द्रोहाभिप्रायेण क्षुद्रचित्ततां भजन्तम् । काणेराम्बाव-द्यथा काणेरस्य काणाया अपत्यस्याम्बा माता काणा क्रौर्यभाक् क्रौर्यं क्षुद्रतामेकाक्षतया हीनाङ्गत्वं भजते तथा । चुलुक्यस्तां धारामाश्वास-यच्चावन्तिदेशमवासयच्चेत्यर्थः[2] । कीदृक्सन् । नाटेयन्ती नट्यपत्यमि-वाचरन्ती सकलेपि विश्वे नृत्यन्तीत्यर्थः । कीर्तिर्यस्य सः । किंभूतां धाराम् । अकान्तिं निःश्रीकां काणेयाम्बाकाणदृष्टिं नु काणेयाम्बायाः काणाया यासौ काणा दृष्टिस्तामिव ॥

भ्रौवेय । इत्यत्र "भ्रुवो भ्रुच" [७६] इति-एयण् भ्रुवादेशश्च ॥

काल्याणिनेयः । सौभागिनेयैः[3] । अत्र "कल्याण्यादेर्[4]०" [७७] इत्यादिना-एयण् इन्-चान्तादेशः[5] ॥

कौलटिनेय[6] अकौलटेयैः । अत्र "कुलटाया वा" [७८] इत्येयण् इन्-चान्ता-देशः ॥

चाटकैरम्[7] । चटका । इत्यत्र "चटकाद्०" [७९] इत्यादिना णैरः स्त्रियां तु णैरस्य लुप् ॥

काणेर । काणेय । नाटेर । नाटेयत् । इत्यत्र "क्षुद्राभ्य एरण्वा" [८०] इति वा-एरण् । वैश्वदेवी छन्दः[8] ॥

---

१ ए °वक्षेप्सी°. २ बी सी °दृष्टि न्व°. ३ ए °यनु । चु°.

---

१ ए बी °वक्षेप्सी°. २ बी सी °वाशय°. ३ ए °नेयः । अ°. ४ ए °ल्याणादे°. ५ ए °शः । कोल°. ६ सी °नेयः अ°. ७ बी सी °म् । चाट°. ८ सी बी °न्दः । गोधा°.

गौधारदृढमुष्टिकार्मुकभृतो गौधेरदुष्टाशयां[1]-
न्प(न्पा)क्षारानपि तत्र सीमनृपतीञ्जा[2]ण्टारपाण्टारवत् ।
सोबध्नादुत सौरभेयवदुताहो वाडवेयोह्य(याश्व?)व-
दृप्तान् रैवतिकाश्वपालिकसखान् गार्ष्टेयहार्ष्टेयधीः ॥७४॥

७४. स जयसिंहस्तत्र धारासमीपे सीमनृपतीनबध्नात् । यतो[1] गोधाया अपत्यं[2] दुष्टं गौधेरो योहिना गोधायां जन्यते । एवं गौधारोपि । तस्यैव जिघांसया दुष्ट आशयो येषां ताञ्जिघांसूनित्यर्थः[3] । किंवदबध्नात् । जाण्टारपाण्टारवज्जण्टपैण्टयोः[4] पक्षिविशेषयोरपत्ये[5] पक्षिभेदाविवाथा(वोता ?)थ वा सौरभेयवद्वृषभानिवोताहो अथ वा वाडवेयोह्य(याश्व?)वद्वडवानां[6] बीजसेचकान[7](न्?) वर्धितान[8]श्वानिव । कांश्चित्पक्षिवत्काष्ठपञ्जरेषु कांश्चिच्च वृषभानिव लोहशृङ्खलाभिर्गलेषु कांश्चिच्चाश्वानिव लोहनिगडैः पादेषु बबन्धेत्यर्थः । किंभूतान् । गौधारन्ति सुदृढत्वेन गौधारा इवाचरन्ति दृढमुष्टीनि[9] बलिष्ठमुष्टिकानि कार्मुकाणि बिभ्रति ये तानपि युद्धायात्तास्त्रानपीत्यर्थः । एतेनैते न च्छलाद्बद्धा इत्युक्तम् । तथा पाक्षारानपि पक्षस्य[10][11] वर्गस्य महासन्तानस्यापत्यान्यपि[12] स्वपक्षसहितानपीत्यर्थः । तथा दृप्तानपि स्वबलाद्यवलेपेन दर्पिष्ठानपि नाकिंचित्करानित्यर्थः । तथा रैवतिकाश्वपालिकसखानपि रैवतिकाश्वपालिकौ रेवत्या अश्वपाल्याश्चापत्ये कौचिन्नृपौ तयोः[13] सहायानपि

---

१ सी °यानक्षा°. २ ए °आचार°.

---

१ बी यन्मे गो°. २ ए °त्यं गोधरो. बी °त्यं गौ°. ३ बी तान्निघांशून्नित्य°. ४ बी सी °पन्तयोः ५ बी °त्ये पक्तृतिशेषयोरपत्ये प°. ६ ए °सेनका°. ७ सी °कानां व°. ८ बी °हग°. ९ सी °मुखीनिव ब°. १० सी पक्ष्यस्य. ११ ए °स्य म°. १२ सी °त्यानपि. १३ बी °योः साहा°.

साहाय्यार्थागतमित्रैर्युक्तानपीत्यर्थः । नन्वेवंविधानपि नृपान्केन बलेनासौ बबन्धेत्याह । यतो गार्ष्टेयहार्ष्टेयौ मुनिभेदौ तयोरिव धीर्यस्य सः । सर्वबलोत्कृष्टबुद्धिबलोपेतत्वादित्यर्थः ॥

गौधार । गौधेर । इत्यत्र "गोधाया" [८१] इत्यादिना णार एरण्च ॥

जाण्टार । पाण्टार । इत्यत्र "जण्टपण्टात्" [८२] इति णारः ॥ केचित्तु पाक्षारानित्यपीच्छन्ति ॥

सौरभेय । इत्यत्र "चतुष्पाद्भ्य एयञ्" [८३] इत्येयञ् ॥

गार्ष्टेय । हार्ष्टेय । इत्यत्र "गृष्ट्यादेः" [८४] इत्येयञ् ॥

वाडवेय । इत्यत्र "वाडवेयो वृषे" [८५] इति-एयञ् एयण् वा निपात्यः ॥

रैवतिकाश्वपालिक । इत्यत्र "रेवत्यादेरिकण्" [८६] इतीकण् ॥ शार्दूलविक्रीडितं[2] छन्दः ॥

इति श्रीजिनेश्वरसूरिशिष्यलेशाभयतिलकगणिविरचितायां श्रीसिद्धहेमचन्द्राभिधानशब्दानुशासनद्व्याश्रयवृत्तौ चतुर्दशः सर्गः ॥

१ ए °ण्ट पंचाटात्. २ सी °डितछ°.

द्व्याश्रयमहाकाव्ये

पञ्चदशः सर्गः ।

भ्रातृव्यान्सोतिगार्गांस्तानथ गार्गिकमन्त्रिणः ।
सभ्रात्रीयान्सस्वस्त्रीयान्धृत्वा निववृते ततः ॥ १ ॥

१. अथ स जयसिंहस्ततो मालवदेशान्निववृते । किं कृत्वा । सभ्रात्रीयान्सस्वस्त्रीयान्भ्रात्रपत्यभगिन्यपत्यसहितानुपलक्षणत्वात्सबान्धवानित्यर्थः । तथा भ्रातृव्यान्भ्रातुरपत्यानि भ्रातृव्या एकद्रव्याभिलाषित्वाद्भ्रातृव्या इव भ्रातृव्यास्तान् महाशत्रूनित्यर्थः । तान् यशोवर्मादिनृपान्धृत्वा गुप्तौ क्षिप्त्वा । किंभूतान्सतः । गार्गिका गार्ग्या अपत्यानि स्वामिने स्त्रीजनोचितकुमन्त्रदानेनाज्ञेयपितृकत्वान्निन्द्या[1] युवानो मन्त्रिणो येषां तानत एवातिगार्गानेवं[2] राज्याद्भ्रंशेन स्वपूर्वजनाम्नोपि हारणे[3]तिनिन्द्यत्वाद्गार्ग्या अपत्यं निन्द्यं युवानमतिक्रान्तान् ॥

गार्गान्[4] । गार्गिक । इत्यत्र "वृद्ध" [८७] इत्यादिना णेकणौ ॥

भ्रातृव्यान् । इत्यत्र "भ्रातुर्व्यः" [८८] इति व्यः ॥

भात्रीयान् । स्वस्त्रीयान् । इत्यत्र "ईयः स्वसुश्च" [८९] इतीयः ॥

मार्गेभात्त्रैः समातृष्वस्त्रीयपैतृष्वसेयकैः ।
पैतृष्वस्त्रीयो नु हरेः सोतिमातृष्वसेयकः ॥ २ ॥

२. स जयसिंहः समातृष्वस्त्रीयपैतृष्वसेयकैर्मातृभगिनीनां पितृ-

---

१ ए सी °न्त्रिया यु°. २ बी °वागार्ग्याने°. ३ ए °णे इनि°. सी °णेपि नि°.
४ बी गार्ग्यान्.

भगिनीनामपत्यैः सहितैस्तैः शत्रुभिः कृत्वा मार्गेभात् । कीदृक् । अतिमातृष्वसेयको मातुःष्वसुरपत्यं शिशुपालं करग्रहणेनातिक्रान्तो यो हरेर्विष्णोः पैतृष्वस्रीयः पितुःष्वसुरपत्यं भीमः स इव बलिष्ठत्वादिगुणैर्भीमतुल्यः । हरेः पिता वसुदेवस्तद्भगिन्या अपत्यं भीम इति हरेः पैतृष्वस्रीयो भीममातुश्च शिशुपालमाता भगिनीति भीमस्य शिशुपालो मातृष्वसेयः ॥

मातृष्वसेय । मातृष्वस्रीय । पैतृष्वसेय । पैतृष्वस्रीयः । अत्र "मातृ०" [९०] इत्यादिना रे(डे)यणीयणौ ॥

श्वशुर्यीभूय राजन्यैः स पथि क्षत्रियाग्रणीः ।
अमानुषो मनुष्येषु कैर्न भेजेतिमाणवैः ॥ ३ ॥

३. अतिमाणवैः पुरुषेषु श्रेष्ठत्वान्माणवान्मनोरपत्यानि कुत्सितानि मूढान्यतिक्रान्तैः कै राजन्यै राज्ञामपत्यैः क्षत्रियजात्या स नृपः पथि न भेजे । किं कृत्वा । श्वशुर्यीभूय स्वभगिनीदानेन श्वशुरापत्यीभूय श्यालीभूयेत्यर्थः । यतः कीदृक् । क्षत्रियाग्रणीः । एतेन सर्वगुणसंपद्राज्यसंपदोरतिशय उक्तः । तथा मनुष्येषु मनोरपत्येषु नरेषु मध्ये-मानुषोमर्त्यो देवः । एतेन रूपातिशयोक्तिः ॥

श्वशुर्यीभूय । इत्यत्र "श्वशुराद्यः" [९१] इति यः ॥

राजन्यैः । इत्यत्र "जातौ राज्ञः" [९२] इति यः ॥

क्षत्रिय । इत्यत्र "क्षत्रादियः" [९३] इतीयः ॥

मनुष्येषु । मानुषः । इत्यत्र "मनोर्०" [९४] इत्यादिना याणौ षश्चान्तः ॥

---

१ **बी** °ग्रहेणाति°. २ **ए** °तुःस्वसु°. ३ **बी** °नीष्वभी°. ४ **ए सी** °सेय । मा°. ५ **ए** °ष्वस्रीयः । पैतृष्वस्री°. ६ **सी** °सेयः । पै°. ७ **ए** °दिना केय°. **बी** °दित्यरेय°. ८ **ए** °त्रिया जात्याः स. ९ **सी** °य शाली°. १० **बी** °ग्रणी । ए°. **सी** °ग्रणी । ते°. ११ **सी** °न स्वरूपादिति°. १२ **सी** °ना उक्तस्त या°.

माणवैः । इति "माणवः कुत्सायाम्" [९५] इत्यनेन निपात्यते ॥

त्यक्त्वा बहुकुलीनांश्चाकुलीनांश्च तदा द्विपान् ।
राज्ञां भद्रकुलीनान्स जग्राहोपायनीकृतान् ॥ ४ ॥

४. तदा पथि गमनकाले स नृप उपायनीकृतान्ढौकनीकृतान्भद्रकुलीनान्भद्रजातीयेभेन्द्रकुलस्यापत्यानि राज्ञां द्विपाञ्जग्राह । किं कृत्वा । त्यक्त्वा । कान् । बहुकुलीनांश्च मन्दजातित्वेनेषदसंपूर्णकुलापत्यानि तथाकुलीनांश्च मृगजातिमिश्रजातित्वान्न कुलस्यापत्यानि ॥

कौलेयकानामात्तानां तेनेभानां पुरो बभौ ।
बहुकुल्यो न्वकुल्यो नु शङ्के शक्रद्विपोपि सः ॥ ५ ॥

५. शङ्के सर्वगजोत्कृष्टतया प्रसिद्धः शक्रद्विपोप्यैरावणोपि तेन राज्ञात्तानां राजभ्यो गृहीतानां कौलेयकानां भद्रजातीयानामिभानां पुरो बभौ । कीदृग् । बहुकुल्यो न्वीषदसमाप्तकुलापत्यमिवाकुल्यो न्वकुलीन इव वा । केषांचित्तेषामपेक्षया हीनगुणत्वात्केषांचिच्च हीनतमगुणत्वात् ॥

प्रेक्ष्य जिष्णुं तमायान्तं ग्राम्यैर्बाहुकुलेयकैः ।
दौष्कुलेयैर्दुष्कुलीननिम्नैश्चात्मा कृतार्थितः ॥ ६ ॥

६. स्पष्टः । किंतु कैश्चिद्बाहुकुलेयकैः किंचिद्धीनकुलापत्यैः । कैश्चिच्च दौष्कुलेयैर्दुष्कुलस्यापत्यैः । कैश्चिद्दुष्कुलीननिम्नैश्च दुष्कुलापत्येभ्योऽपि नीचैरतिनीचकुलैश्चेत्यर्थः । आत्मा कृतार्थितोदृष्टपूर्वतादृग्नृपदर्शनात्स्वजन्म सफलितमित्यर्थः ॥

---

१ ए °न्स ग्रा°. २ ए °कानां मत्ता°. बी °कानामत्ता°. ३ बी °ष्णुं त्वमा°. ४ सी °ष्कुलः स्या°.

---

१ ए °पानीयकृ°. २ बी °येनकु°. ३ बी °यामि°. ४ सी °नकुलत्वा°. ५ ए °त्वात्.

अकुलीनान् । बहुकुलीनान् । भद्रकुलीनान् । इत्यत्र "कुलादीनः" [९६] इतीनः ॥

अकुल्यः । कौलेयकानाम् । बहुकुल्यः । बाहुकुलेयकैः । अत्र "यैय०" [९७] इत्यादिना वा[1] यैयकञौ ॥ पक्षे । अकुलीनान् । बहुकुलीनान् ॥ असमास इति किम् । भद्रकुलीनान् ॥

दौष्कुलेयैः दुष्कुलीन । इत्यत्र "दुष्कुलादेयण्वा" [९८] इति-एयण्वा ॥

सोथं[1] माहाकुलो माहाकुलीनपरिवारितः ।
पुरीं महाकुलीनस्त्रीकृतार्थः प्राविशत्स्वकाम् ॥ ७ ॥

७. स्पष्टः[2] ॥

माहाकुलः । माहाकुलीन[3] । महाकुलीन । इत्यत्र "महा०" [९९] इत्यादिनाञीनञौ वा ॥

सोशाद् हार्दिक्यसाम्राज्यान्कौरव्यैर्मन्त्रिभिर्युतान् ।
भैमसेनिपितृव्यो नु[2] भैमसेन्यपितेव वा ॥ ८ ॥

८. स जयसिंहो हार्दिक्यसाम्राज्यान्हृदिकस्य सम्राजश्च राज्ञोरपत्यानि क्षत्रियानन्वशाद्विजित्याशिक्षयत् । किंभूतान् । कौरव्यैः कुरोर्ब्राह्मणस्यापत्यैर्मन्त्रिभिर्युतान् । यथा भैमसेनिपितृव्यो[4] भीमापत्यस्य घटोत्कचस्य पितृव्यो युधिष्ठिरो भैमसेन्यपितेव वा यथा वा भीमः । पाण्डवैर्हि कौरवयुद्धे हार्दिक्यसाम्राज्या जिताः ॥

वार्द्धक्यरिसमं भूपास्तं लाक्ष्मण्यबला न के ।
पितृव्यं[3] लाक्ष्मणेर्नीलवार्द्धक्याद्या[4] इवाभजन् ।॥ ९ ॥

---

१ बी °थ महाकुलो महाकुली°. २ बी नु भौम°. ३ बी °व्यं लक्ष्मणे नील°. ४ बी °द्धकाद्या.

---

१ बी सी वा येय°. २ सी °ष्टः । महा. ३ ए °लीनः । म°. सी °लीन इ°. ४ ए °सेनपि°.

९. यथा नीलवार्द्धक्याद्या नीलो नाम वानरो वार्द्धक्यश्च[1] वर्द्धकेरपत्यं वृत्रभ्राता नलाख्यो वानरस्तदाद्याः कपयो लाक्ष्मणेर्लक्ष्मणापत्यस्याङ्गदस्य चन्द्रकेतोर्वा पितृव्यं राममभजंस्तथा तं जयसिंहं के भूपा नाभजन् । किंभूताः । लाक्ष्मण्यबला लक्ष्मणापत्यतुल्यौजसोपि[2] । यतः किंभूतम् । वार्द्धक्यरिसमं वर्द्धकेरपत्यं वार्द्धकिर्वृत्रस्तस्यारिरिन्द्रस्तत्तुल्यम् ॥

कौरव्यैः । हार्दिक्य । इत्यत्र "कुर्वादेर्ञ्यः" [१००] इति ञ्यः ॥

साम्राज्याम्(न्) । इत्यत्र "सम्राजः क्षत्रिये" [१०१] इति ञ्यः ॥

भैमसेनि भैमसेन्य । वार्द्धकि वार्द्धक्य । लाक्ष्मणे(णेः)[3] लाक्ष्मण्य । इत्यत्र "सेनान्त०" [१०२] इत्यादिना-इञ् ञ्यश्च ॥

सौयामायनिफाण्टाहृतायनी भैमतायनिः ।
तमप्रीणन्फाण्टाहृतमैमतेभ्यः परेपि ये ॥ १० ॥

१०. सौयामायन्यादयो नृपाः । शिष्टं स्पष्टम् ॥

सौयामायनि । इत्यत्र "सुयाम्नः०" [१०३] इत्यादिना-आयनिञ् ॥

फाण्टाहृत फाण्टाहृतायनी ॥ मैमतेभ्यः मैमतायनिः[4] । अत्र[5] "फाण्टाहृति०" [१०४] इत्यादिना[6] ण आयनिञ्च ॥

भागवित्तायनं शा(सा?)कशापेयितार्णबिन्दविम् ।
तार्णबिन्दविकं शा(सा?)कशापेयिकमथापरम्[1] ॥ ११ ॥
सवाष्र्यायणियामुन्दायनीयं[2] भागवित्तिकम्[3] ।
सौयामायनिकं[4] यामुन्दायनिकयुतं तथा ॥ १२ ॥

१ सी °कस्याकेयक°. २ ए सी सत्वार्ष्या°. ३ ए सी °त्तिकिम्. ४ सी °यनीयौ°.

१ ए सी °श्च वार्द्ध°. २ ए °तुल्योज°. ३ बी °क्षमण्य. ४ सी °तायिनिः. ५ ए °यनि । अ°. ६ सी °ना आ°.

सौयामायनि[1]यामुन्दायनिवार्ष्यायणीयकान् ।
[2]वार्ष्यायणिकसौयामायनीयौ च मिथःश्रितौ ॥ १३ ॥
तैकायनीयमुख्यांश्च भूपजाल्मान्प्रशिष्य सः ।
वर्त्म केदारदेवस्य सुस्थं चक्रे महाभुजः ॥ १४ ॥

११–१४. स्पष्टाः । किं तु भूपजाल्मान् यात्रिकोपद्रवकारित्वेन निन्द्यनृपान् । प्रशिष्यो[1]च्छिद्य । सुस्थं निरुपद्रवम् ॥

भागवित्ति[2]कम् भागवित्तायनम्[3] । तार्णबिन्द[4]विकम् तार्णबिन्दविम् । [5]आकशापेयिकम् [6]आकशापेयि । इत्यत्र "भागवित्ति०" [१०५] इत्यादिना वेकण् ॥ पक्षे । भागवित्तेः "यञिञः" [६. १. ५४] इत्यायनँण्[7] ॥ शेषयोरिञ्[8] ॥

सौयामायनीयौ । सौयामायनि[9]कम् । सौयामायनि । यामुन्दायनीयम्[10] । यामुन्दायनिक । यामुन्दायनि । वार्ष्यायणीयकान् । वार्ष्याय[11][12]णिक । वार्ष्याय[13]णि । इत्यत्र "सौयामायनि०" [१०६] इत्यादिना वा-ईयेकणौ ॥ पक्षे "जिदार्षाद्-णिञोः" [६. १. १४०] इत्यणो लुप् ॥ कश्चित्त्वन्येभ्योपीच्छति । तैकायनीय ।

कैतवायनितैका[3]यन्यर्हे सिद्धपुरेथ सः ।
प्राच्यास्तीरे सरस्वत्याश्चक्रे रुद्रमहालयम् ॥ १५ ॥

१५. स्पष्टः । किं तु महातीर्थत्वात्कैतवायनितैकायनिमुनीनामर्हे वासयोग्ये चक्रे । केचित्त्वीगितो[14] धातोर्णिगर्थ एवात्मनेपदमिच्छन्ति । तन्मतेनाकारयदित्यर्थः ॥

---

१ बी °नियया°. २ बी वार्षावणि°. ३ बी °न्यर्हसि°.

---

१ बी सी °ष्योच्छेद्य. २ ए °त्तिकिम्. ३ बी °म् । तर्ण°. ४ ए °विकिम् । आ°. ५ बी आकाशपे°. सी आकाशापेयक. ६ बी सी आकाशा°. ७ सी °नञ् । शे°. ८ सी °मायानि°. ९ बी °नि । यामु°. १० ए °नीम्. ११ सी °णि । वर्षाय°. १२ बी °क । वर्षाय°. १३ ए °ष्याणी इ°. १४ बी °तोर्धातो°.

तैकायनि । कैतवायनि । इत्यत्र "तिक०" [१०७] इत्यादिनायनिञ् ॥

दागव्यायनिकौशल्यायनिच्छाग्यायनीन्पथि ।
स्थापयन्विदधे चैत्यं तत्रैवान्त्यस्य सोर्हतः ॥ १६ ॥

१६. स जयसिंहस्तत्रैव सिद्धपुरेन्त्यस्यार्हतः श्रीमहावीरस्य चैत्यं विदधेकारयत् । कीदृक्सन् । दागव्यायन्यादीन्ब्राह्मणभेदान्पथ्यर्हच्चैत्यमननरूपे न्यायमार्गे स्थापयन् ॥

स वार्ष्यायणिकार्मार्यायणिकात्र्यायणीनपि ।
संबोध्यार्हतसंघस्य भक्त्याकारयदर्हणाम् ॥ १७ ॥

१७. स राजार्हतसंघस्य जैनस्य साधुसाध्वीश्रावकश्राविकासमुदायस्यार्हणां वस्त्रादिभिः पूजां भक्त्याकारयत् । किं कृत्वा । वार्ष्यायण्यादीनपिशब्दार्दा(दा)गव्यायन्यादींश्च ब्राह्मणविशेषान्संबोध्यार्हतसंघपूजन ईर्ष्यतः सान्त्वयित्वा ॥

दागव्यायनि । कौशल्यायनि । कार्मार्यायणि । छाग्यायनीन् । वार्ष्यायणि । इत्यत्र "दगु०" [१०८] इत्यादिना यकारादिरायनिञ् ॥

कात्र्यायणीन् । इत्यत्र "द्विस्वरादणः" [१०९] इत्यायनिञ् ॥

पाञ्चालीपतिवत्पाञ्चालायन्याद्यैर्वृतोथ सः ।
सोमनाथं प्रत्यचालीत्पद्भ्यां दाक्षायणार्थितः ॥ १८ ॥

१८. स राजा सोमनाथं प्रति यात्रार्थं पद्भ्यां भक्त्युत्कर्षात्पादचा-

---

१ सी °निकोश°. २ ए °च्छागाय°. ३ ए सी °वान्तस्य. ४ ए °कात्रीय°. सी °कात्राय°. ५ ए सी °र्हणम्. ६ सी °आलयन्यादैर्वृतोप्य सः.

---

१ बी °रेन्तस्या°. सी °रेत्यस्या°. २ ए °पे मा°. ३ सी °संस्थस्य धु°. ४ सी °दायग°. ५ सी °पूज्यान ई°. ६ ए छागाय°. ७ ए बी °त्र दिगु°. ८ बी कात्राय°.

रेणाचालीत्। कीदृक्सन्[1]। पाञ्चालायन्याद्यैः पाञ्चालानां राजा पाञ्चालस्तस्यापत्यं पाञ्चालायनिस्तदादिभिर्नृपैर्वृतस्तथा[2] दाक्षायणार्थितो दाक्षेरपत्यैर्युवभिऋ(र्ऋ)षिभिर्माङ्गलिक्याय प्रस्थाने कृतार्थः[3]। पाञ्चालीपतिवत्। यथा पाञ्चाल्या द्रौपद्याः पतियु(र्यु)धिष्ठिरः सोमनाथं प्रति पद्यामचालीत्सोपि[4] पाञ्चालायन्याद्यैर्धृष्टद्युम्नाद्यैः[5] श्यालकैर्वृतो[6] दाक्षायणार्थितश्च ॥

पाञ्चालायनि[7]। पाञ्चाली। इत्यत्र "अवृद्धाद्दोर्न वा" [११०] इत्यायनिञ्वा ॥ अवृद्धादिति किम्। दाक्षायण[8] ॥

गार्गीपुत्रायणिं गार्गीपुत्रिश्चार्मिणवत्तदा[9]।
चार्मिकायणिवच्चापि वार्मिणं वार्मिकायणिः ॥ १९ ॥
कार्कट्यायनवद्वारेटिं च गारेटकायनिः।
काककायनिवत्कार्कट्यं(ट्यिं) च कार्कट्यकायनिः ॥ २० ॥
काकिवच्चापि लाङ्कयं लाङ्काकायनिरुत्सुकः।
लाङ्ककायनिवद्वाकिनिं च वाकिनकायनिः ॥ २१ ॥
स्वानप्रतीक्षमाणास्तं संभ्रमाद्यान्तमन्वयुः।
लाङ्किगार्गीपुत्रकायण्यादिमार्गाश्रयान्तरे ॥ २२ ॥

१९–२२. तदा राज्ञो गमनकाले यथा गार्गीपुत्रायणिं चार्मिण[1] ऋषिरन्वयात्तथा गार्गीपुत्रिऋषिर्जयसिंहमन्वयात्। एवं सर्वत्र संबन्धः कार्यः। विनीतत्वादनुज्येष्ठमृषीननुव्रजन्तो राज्ञोनुयानेत्युत्कण्ठितत्[10]वान्निजानप्यृषीनप्रतीक्षमाणाश्च[11][12] सन्तः सर्वेपि गार्गी-

१ बी °श्चार्मणिव°.

१ बी सी °न्। पञ्चा°. २ बी सी °पैवृत°. ३ सी कृत्यार्थः. ४ ए °पि पञ्चा°. ५ बी °धृष्टद्यु°. ६ बी °द्यैः शाल°. ७ बी °नि। पञ्चा°. ८ ए °यणः। गा°. ९ बी चार्म्मिण. १० सी °ने उत्क°. ११ बी °त्वानिजा°. १२ सी °तीक्ष्यमा°.

पुत्र्याद्या ऋषय आदराज्जयसिंहमनुजग्मुरित्यर्थः । यतः किंभूतं तम् । लाङ्किगार्गीपुत्रकायण्यादिमार्गाश्रयान्तरे पूर्वोक्तानां लाङ्क्यादिऋषीणां ये मार्ग आश्रया आश्रमास्तेषां यदन्तरं मध्यं तत्र यान्तम् ॥

गार्गीपुत्रायणिम् गार्गीपुत्रिः । अत्र "पुत्रान्तात्" [१११] इति वायनिञ् ॥

चार्मिकायणि । वार्मिकायणिः । गारेटकायनिः । कार्कव्यकायनिः । काककायनि । लाङ्काकायनिः । वाकिनकायनिः ॥ पुत्रान्ताद्दोः । गार्गीपुत्रकायणि । इत्यत्र "चर्मिवर्मि०" [११२] इत्यादिना-आयनिञ्वा । अन्त्यस्वरात्परः कान्तश्चैषाम् ॥ पक्षे । चार्मिणि । वार्मिणम् । गारेटिम् । कार्कव्यायन ॥ यदा त्वव्युत्पन्नः कार्कव्यशब्दस्तदा पक्ष इञेव । कार्कव्यिम् ॥ काकिवत् । लाङ्केयम् । वाकिनिम् । गार्गीपुत्रिः ॥ लङ्कशब्दं केचिदकारान्तमिच्छन्ति । तन्मते लाङ्ककायनि । लाङ्कि ॥

ग्लुचुकायनिरग्रेगाद् ग्लौचुक्यवरजोपि च ।
हस्तालम्बं सवैदेहो रामदत्तायनिर्ददौ ॥ २३ ॥

२३. स्पष्टः । किं तु ग्लुचुकायनिर्नृपविशेषः । विदेहानां राष्ट्रस्य राजा विदेहस्य राज्ञोपत्यं वा वैदेहस्तेन युक्तो रामदत्तायनिः पिता पुत्रश्च नृपभेदौ । हस्तालम्बं जयसिंहस्य वाहिकां पर्यायेण ददुः ॥

ग्लुचुकायनिः ग्लौचुकि । इत्यत्र "अदोर्०" [११३] इत्यादिनायनिर्वा ॥ अदोरिति किम् । रामदत्तायनिः ॥ आयनिञन्तादणो लुप् ॥

वैदेहः । अत्र "राष्ट्र०" [११४] इत्यादिनाञ् ॥

---

१ ए °चुकाव°.

---

१ ए बी °पुत्राद्या. २ सी °यास्ते°. ३ बी °यणि गा°. ४ ए °यणिः । गा°. ५ बी सी °यनिः । ला°. ६ सी °निः । काविनिकायनि । पु°. ७ बी °ण । कार्म्मिण°. ८ बी कार्काव्यम्. ९ ए °नि । गा°.

अस्य गान्धारसाल्वेयौ वाङ्गः पौरवमागधौ ।
सौरमसः कालिङ्गश्च पश्चाद्यां दक्षिणतो ययुः ॥ २४ ॥

२४. गान्धारादयो नृपाः । शिष्टं स्पष्टम् ॥

गान्धारसाल्वेयौ । इत्यत्र "गान्धारि०" [११५] इत्यादिनाञ् ॥
पौरवमागधौ । कालिङ्गः । सौरमसः ॥ द्विस्वरं । वाङ्गः । अत्र "पुरु०" [११६] इत्यादिनाण् ॥

औदुम्बरिः कालकूटिः सप्रात्यग्रथिराश्मकिः ।
नैषध्याम्बष्ठ्यकौरव्यावन्त्यं वामे च पर्यगात् ॥ २५ ॥

२५. स्पष्टः । किं तु नैषध्याम्बष्ठ्यकौरव्यावन्त्यमित्यत्र समाहारः ॥

ययुः कौशल्य आजाद्यः सपाण्ड्यो यवनः शकः ।
कुन्त्यवन्तीकुरूभर्तुः पृष्ठे तस्यांह्रिचारिणः ॥ २६ ॥

२६. स्पष्टः । किं तु कुन्त्यवन्तीकुरूभर्तुः कुन्त्यादिराज्ञीनां प्रियस्य तस्य जयसिंहस्य ॥

कौरव्यायण्यथो शूरसेनी मद्री च सासुरी ।
मागध्यौशीनरी भार्गी चेति राज्यस्तमन्वयुः ॥ २७ ॥

२७. स्पष्टः ।

औदुम्बरिः । प्रात्यग्रथिः । कालकूटिः । आश्मकिः । अत्र "साल्वांश०" [११७] इत्यादिनेञ् ॥
दु । आम्बष्ठ्य ॥ नादि । नैषध्य ॥ कुरु । कौरव्य ॥ इत् । आवन्त्यम् । कौशल्य । आजाद्यः । अत्र "दुनादि०" [११८] इत्यादिना ञ्यः ॥

---

१ सी अथ गा°. २ बी °सः कलि°. ३ ए °लकुटिः. ४ सी °प्रातिग्रंथि°. ५ बी °राश्मिकः । नै°. ६ ए °मे प प°. ७ ए °कुरुभ°.

---

१ बी °र । याङ्गः. २ ए सी °कुरुभ°. ३ ए °स्य सिं°. ४ सी °त्यग्रंथिः. ५ ए इन् । आ°. सी इञ् । आ°. ६ बी सी °शल्यः । आ°.

पाण्ड्यः । अत्र "पाण्डोर्ड्यण्" [११९] इति ड्यण् ॥

शकः । यवनः । अत्र "शकादिभ्यो द्रेर्लुप्" [१२०] इति[1] द्रेः प्रत्ययस्य लुप् ॥

कुन्त्यवन्ती । इत्यत्र "कुन्ति०" [१२१] इत्यादिना ञ्यस्य द्रेर्लुप् ॥

कुरू[2] कौरव्याणी । इत्यत्र "कुरोर्वा" [१२२] इति द्रेर्ञ्यस्य लुब्वा[3] ॥

अञ् । शूरसेनी ॥ अण् । मद्री । इत्यत्र "द्रेर०" [१२३] इत्यादिनाअञणो द्रेर्लुप् ॥ द्रावनुवर्तमाने पुनर्द्रिग्रहणं भिन्नप्रकरणस्यापि द्रेर्लुबर्थम् । असुरी । असुरस्यापत्यं स्त्री । "राष्ट्र०" [६. १. ११४] इत्यादिनाञ् । शकादित्वाल्लोपः । "जातेर०" [२. ४. ५४] इत्यादिना ङीः ॥ सैव शस्त्रजीविसंघः स्त्रीत्वविशिष्टो विवक्षितः । स्वार्थे "पर्श्वादेरण्" [७.३.६६] तस्यापि "स्त्रियाम्" [६. १. ४६] अनेन लुप् । अप्राच्यभर्गादेरिति किम् । मागधी । मगधः प्राच्यो राष्ट्रस्वरूपः[4] क्षत्रियः । भर्गादि । भार्गी । औशीनरी[5] ॥

पञ्चालाः पाञ्चाल्यो[1] लौहध्वज्या लोहध्वजा अपि ।
यस्का लह्या विदागर्गास्तस्याग्रे[2] चर्चरीर्जगुः ॥ २८ ॥

२८. पञ्चाला नृपाः । पाञ्चाल्यो राज्ञ्यः । लोहध्वजा एव "पूगादमुख्यकाञ्ञ्यो द्रिः" [७.३.६०] इति ञ्ये[6] लौहध्वज्या अर्थकामप्रधाना नानाजातीयाः स्त्रीपूगाः । लोहध्वजा नरपूगाः । यस्कादयो मुनिभेदाः । शिष्टं स्पष्टम् ॥

सश्यापर्णा गौपवनाः सागस्तीया अगस्तयः ।
कुण्डिनाश्च पृथासूनोस्तीर्थयात्राकथा व्यधुः ॥ २९ ॥

---

१ ए °ल्यो लोह°. २ ए °स्या चर्चरी जगुः.

---

१ बी सी °ति द्रे प्र°. २ ए सी कुरु कौ°. ३ बी लुग्वा । अ°. ४ ए सी °पः क्षित्रि°. ५ ए °शीनारी. ६ ए °ञ्ये लोह°.

२९. सागस्तीया[1] अगस्तीनामभि[2]श्छात्रैर्युक्ता अगस्तयोगस्त(स्त्य?)-स्यापत्यान्यृषय एवं श्यापर्णादयोप्यृषयः । पृथासूनोर्युधिष्ठिरस्य । शिष्टं स्पष्टम् ॥

पञ्चालाः । लोहध्वजाः । इत्यत्र "बहुष्वस्त्रियाम्" [१२४] इति द्रेर्लुप्[3] ॥ अस्त्रियामिति किम् । पाञ्चाल्यः । लौहध्वज्याः ॥

यस्काः । लह्याः । अत्र "यस्कादेर्गोत्रे [१२५] इति प्रत्ययस्य लुप् ॥

गर्गाः । विदाः । अत्र "यञि(ञ)ञः०" [१२६] इत्यादिना यञञोर्लुप् ॥ अ[4]श्यापर्णान्तगोपवनादेरिति किम् । गौपवनाः । श्यापर्णाः ॥

कुण्डिनाः । अगस्तयः । अत्र "कौडिन्य०" [१२७] इत्यादिना यञ ऋष्य-णश्च लुप् कुण्डिन्य(ना?)गस्त(स्त्य?)योश्च कुण्डिन-अगस्ति-आदेशौ । प्रत्यय-लुपं कृत्वादेशकरणमागस्तीया एवमर्थम् । प्रत्ययान्तादेशे हि कृतेगस्त्यशब्द-स्यादेराकाराभावाद् "वृद्धिर्यस्य०" [६. १. ८] इत्यादिना दुसंज्ञा न स्यात्तद्-भावे "दोरीयः" [६. ३. ३२] इतीयोपि न स्यात् । यदा तु प्रत्ययस्य लुब्वि-धीयते तदा स्वरादावीयप्रत्यये भाविनि "न प्राग्०" [६.१.१३५] इत्यादिना प्रतिषेधात्प्रत्ययस्य लुन्न । तथा च सति दुसंज्ञत्वादीयः सिद्धः स्यात् ॥

व[1]सिष्ठा गोतमाः कुत्सा भृगवोङ्गिरसोत्रयः ।
शंसन्तस्तीर्थमाहात्म्यं राज्ञोग्र्या अभवन्भृशम् ॥ ३० ॥

३०. स्प[5]ष्टः ॥

भृगवः । अङ्गिरसः । कुत्साः । वशि(सि)ष्ठाः । गोतमाः । अत्राणः । अत्रयः । इत्यत्रैयणश्च "भृगु०" [१२८] इत्यादिना लुप् ॥

---

१ ए सी वसिष्ठा.

---

१ सी °या आग°. २ ए सी °नामेभि°. ३ ए °प् । ग°. ४ बी सी अस्याप°. ५ सी स्पष्टम् । भृ°.

भक्त्या युधिष्ठिराः[1] क्षीरकलम्भा[2] भागवित्तयः ।
चक्रुरार्जुनयश्चाग्रे पथि कण्टकशोधनम् ॥ ३१ ॥

३१ स्पष्टः । किं तु युधिष्ठिराद्या नृपभेदाः ॥

क्षीरकलम्भाः । अत्रात इञः । भरत । युधिष्ठिराः । अत्र बाह्वादीञः "प्राग्भरते०" [१२९] इत्यादिना लुप् ॥ अपरे त्वाहुः । प्राग्ग्रहणं भरतविशेषणम् । क्षीरकलम्भादयो[1] वैश्याः प्राग्भरताः । युधिष्ठिरादयो राजान उदग्भरताः । तत्र प्राग्ग्रहणादुदीच्यभरतेषु राजसु लुप्न भवति । आर्जुनयः । भरतग्रहणाच्च प्राच्येषु राजसु न स्याद् भागवित्तयः ॥

उपकैर्लमका लामकायनैरौपकायनाः ।
रासकास्तिककितवैस्तथोब्जककुभा ददुः ॥ ३२ ॥

३२. स्पष्टः ॥

उपकैः[2] । लमकाः । अत्र नडाद्यायनणो "वोपकादेः" [१३०] इति वा लुप् ॥ पक्षे । औपकायनाः । लामकायनैः ॥

तैकायनयश्च[3] कैतवायनयश्च[4] तैस्तिककितवैः । इत्यत्र तिकाद्यायनिञ[5] औब्जयश्च काकुभाश्चोब्जककुभाः । अत्रोब्जादिञः ककुभाच्छिवाद्यणश्च "तिक०" [१३१] इत्यादिना लुप् ॥

वृकलोहध्वजकुण्डीदृशा[3] वङ्गाङ्गसुह्मकाः[4][5] ।
तामकेशगतिं[6] राज्ञः पश्यन्तो विस्मयं ययुः ॥ ३३ ॥

३३. स्पष्टः[6] ॥

---

१ ए सी °ष्ठिरा क्षी°. २ ए °कलिभा भा°. सी °कलम्भज्ञापवि°. ३ सी °ण्डीवृशा. ४ ए °सुब्रह्म°. ५ बी °ह्मकः । ता°. सी °ह्मगा । ता°. ६ ए °गतं रा°.

---

१ सी °लभादयो रा°. २ ए सी °पकै । ल°. ३ ए सी °नश्च. ४ ए सी °नश्च. ५ ए °नि औ औ°. ६ सी स्पष्टम् । वृ°.

वृकाः शस्त्रजीविसंघो "वृकाट्टेण्यण्" [७. ३. ६४] इति टेण्यणि वार्कैण्यः। लोहध्वजाः पूगाः[1] । "पूगाद्०" [७. ३. ६०] इत्यादिना ञ्ये लो(लौ)हध्वज्यः। कुण्डीदृशा[2] वाहीकेषु शस्त्रजीविसंघो "वाहीकेषु०" [७. ३. ६३] इत्यादिना ञ्यटि कौण्डीदृश्यो[3] द्वन्द्वे वृकलोहध्वजकुण्डीदृशाः[4,5]। इत्यत्र टेण्यणादेः वङ्गाङ्गसुह्मकाः। अत्र च द्विस्वरलक्षणाणश्च "द्र्यादेस्तथा" [१३२] इति लुप् ॥

सोमेशः संमुखं न्वेति राजा वा शीघ्र इत्यभूत् ।
वादोऽङ्गवङ्गदाक्षीणां सहाङ्गवाङ्गदाक्षिभिः ॥ ३४ ॥

३४. अचिरादेवपत्तनसमीपे राज्ञ आगमनादित्येवंविधो वाद उक्तिरभूत् । शिष्टं स्पष्टम् ॥

अङ्गवङ्गदाक्षीणाम् आङ्गवाङ्गदाक्षिभिः। अत्र 'वान्येन" [१३३] इति द्विस्वरलक्षणस्याणो लुप्वा(ब्वा) ॥

राजा गर्गकुलाद्वैदकुलं विदकुलादथ ।
ज्ञात्वा गार्ग्यकुलं[1] चेति दानं गच्छन्विवेक्यदात् ॥ ३५ ॥

३५. इति पूर्वोक्तप्रकारेण यात्रार्थं गच्छन्[6,7]सन्राजा[8] दानमदाद्गर्गकुलविदकुलयोरेव । किं कृत्वा । गर्गकुलाद्[9]गार्ग्यस्य गार्ग्ययोर्वा कुलाद्वैदकुलं वैदस्य वैदयोर्वा कुलं ज्ञात्वाथ तथा विदकुलाद्गार्ग्यकुलं च ज्ञात्वा । यतो विवेकी ॥

गर्गकुलात् गार्ग्यकुलम् । विदकुलात् वैदकुलम् । अत्र "द्वे(द्ये)केषु०" [१३४] इत्यादिना लुप्वा(ब्वा) ॥

---

१ ए गार्ग्यें चे°.

---

१ ए पूगः । पू°. २ बी सी °ण्डीवृशा. ३ बी °ण्डीवृश्यो. सी °ण्डीवृशो द्व°. ४ बी °ण्डीवृशाः. ५ सी °दृश्याः । इ°. ६ सी °च्छन्ना°. ७ बी °न्स राजा. ८ सी °जा वासम°. ९ ए °द्गार्गस्य.

भृग्वङ्गिरसिकागर्गभार्गविकास्विवोन्मुदः ।
गार्गीयाः सह फाण्टाहृतैर्गार्गीयैश्च मङ्क्षुः ॥ ३६ ॥

३६. गार्गीया गर्गाणां छात्रा उन्मुदो हृष्टाः सन्तो राज्ञा सह मङ्क्षुः । कैः सह । फाण्टाहृतस्यापत्यं वृद्धं फाण्टाहृतिस्तस्यापत्यं युवा फाण्टाहृतः "फाण्टाहृति०" [६. १. १०४] इत्यादिना णस्तस्यच्छात्रा इति प्राग्जितीये स्वरादौ चिकीर्षिते णस्य लुप्तत इञन्ताद् "वृद्धेञः" [६.३. २८] इत्यञि फाण्टाहृतास्तैर्गार्गीयैश्च गार्ग्यायणच्छात्रैश्च भृग्वि(ग्व)ङ्गिरसिकागर्गभार्गविकास्विव । यथा भृगूणामङ्गिरसां च विवाहेषु गर्गाणां भृगूणां च विवाहेषु चोन्मुदः सन्तो गच्छन्ति ॥

गार्ग्यायणीयैर्हो(हौ)त्रीयैरतिहो(हौ)त्रायणीयकैः ।
छात्रैः प्राध्ययनं प्राप भूपतिर्देवपत्तनम् ॥ ३७ ॥

३७. भूपतिर्देवपत्तनं प्राप । किंभूतम् । प्राध्ययनं प्रारब्धवेदादिपाठम् । कैः । छात्रैः । किंभूतैः । गार्ग्यायणीयैर्गार्ग्यायणसंबन्धिभिस्तथा कैश्चिद्धो(द्धौ)त्रीयैर्होत्रस्यापत्यं युवा "द्विस्वरादणः" [६. १. १०८] इत्य(त्या)यनिञि हौत्रायणिस्तत्संबन्धिभिस्तथा कैश्चिच्चातिहो(हौ)त्रायणीयकैर्गुणाधिक्येन हो(हौ)त्रायणीयकानतिक्रान्तैश्च ॥

गार्गीयाः । अत्र "न प्राग्०" [१३५] इत्यादिना गोत्रोत्पन्नस्य लुन्न ॥ भृग्वङ्गिरसिका ॥ इत्यत्र कस्मान्निषेधो न स्यादुच्यते । प्रत्यासत्तेर्यस्य प्रत्ययस्य

---

१ ए °ङ्गिरिसि°. २ ए °हृतस्या°.

---

१ सी उन्मदो. २ ए °त्यं यु°. सी °त्यं फा°. ३ बी °तित्तस्या°. ४ सी °द्धेञ्य इ°. ५ ए °ङ्गिरिसि°. ६ ए °सां विवाहेषु च ग°. ७ सी °पु चो° ८ ए °णां वि°. ९ बी सी चोन्मदः. १० ए °म् । प्रध्य°. ११ ए सी °णीयकैर्गा°. १२ ए °यणिसं°.

लुप्प्रतिषिध्यते तल्लोपिप्रत्ययान्तादेव विधीयमाने स्वरादौ प्रतिषिध्यते । अत्र द्वन्द्वाद्विधीयते न लोपप्रत्ययान्तादिति न प्रतिषेधः । "गर्गभार्गविका" इत्युत्तरसूत्रं वा नियमार्थं व्याख्यास्यते । गर्गभार्गविकाया अन्यत्र द्वन्द्वे वृद्धे यूनि वा प्रतिषेधो न स्यात् ॥

गर्गभार्गविका । इत्यत्र "गर्गभार्गविका" [१३६] इत्यणो लुप्प्रतिषेधो निपात्यते ॥

फाण्टाहृतैः । इत्यत्र यूनि विहितस्य णस्य लुप् [१३७] ॥

गार्गीयैः गार्ग्यायणीयैः । हौत्रीयैः हौत्रायणीयकैः । अत्र "वायनण्॰" [१३८] इत्यादिना यूनि विहितस्यायनण आयनिञश्च लुब्वा ॥

औदुम्बरिः पुराध्यक्षस्ततः सौदुम्बरायणः ।
सहतैकायनिस्तैकायनिश्चाभिमुखोभ्यगात् ॥ ३८ ॥

३८. ततः पुराध्यक्षो नगरस्य रक्षार्थमधिकृत औदुम्बरिरुदुम्बरस्यापत्यं "साल्वांश॰" [६. १. ११७] इत्यादिनेञि औदुम्बरिस्तस्यापत्यं युव ऋषिगण्डेति नाम्ना तत्र प्रसिद्धो नृपस्याभिमुखोभ्यगात् । कीदृक्सन् । सौदुम्बरायण औदुम्बरेरपत्येन यूना । स्वभ्रात्रेत्यर्थः । युक्तस्तथा तैकायनिश्च तिकस्यापत्यं वृद्धमार्येति नाम्ना तत्र प्रसिद्ध ऋषिश्चोपलक्षणत्वादन्योप्यार्यौघोभिमुखोभ्यगात् । कीदृक्सन् । सहतैकायनिस्तैकायनेरपत्येन यूना युतः संपुत्र इत्यर्थः । उपलक्षणत्वात्स्वजनादिपरिवारोपेतः ॥

---

१ बी सी °ल्लोपप्र°. २ ए न तोपिप्र°. ३ ए °न्द्वे यू°. ४ बी सी °यैः होत्री°. ५ बी °यैः होत्रा°. सी °यैः हात्रा°. ६ ए °म्बर°. ७ ए °पस्तस्या°. ८ ए °खोभ्यागा°.

आर्याग्रणीर्वासिष्ठश्च वासिष्ठेन सहोत्सुकः ।
अवासुदेवं तं वासुदेवं न्वाह्वातुमाययौ ॥ ३९ ॥

३९. आर्याग्रणीरार्येष्वारिये(ष्वार्ये?)त्याख्यया तत्र प्रसिद्धेष्वग्रणीः श्रेष्ठो वासिष्ठो वसिष्ठस्यापत्यं वृद्धमृषिर्वासिष्ठेन वासिष्ठस्यापत्येन यूना सह सपुत्र इत्यर्थस्तं नृपमाह्वातुं स्वमहासौधेवस्थानायामन्त्रयितुमाययौ । कीदृक्सन् । उत्सुकोन्येभ्यः पूर्वमाह्वातुमतित्वरावान् । किंभूतं तम् । वासुदेवं नु रूपवत्त्वपराक्रमित्वादिगुणैर्वसुदेवस्य वृद्धमपत्यमिव काममिवेत्यर्थः । किंभूतं वासुदेवम् । अवासुदेवं वासुदेवस्य कामस्यापत्यं युवा वासुदेवोनिरुद्धस्तेन रहितम् । एतेन राज्ञो निष्पुत्रत्वोक्तिः ॥

औदुम्बरिः औदुम्बरायणः । अत्र "द्रीञो वा" [१३९] इति यून्यायनणो लुब्वा ॥

ञितः । तैकायनिः । सहतैकायनिः । अत्रौत्सर्गिकाणः ॥ आर्षात् । वासिष्ठः । वासिष्ठेन । इत्यत्रात इञश्च "ञिद्०" [१४०] इत्यादिना युवप्रत्ययस्य लुप् ॥

वासुदेवम् । अवासुदेवम् । इत्यत्र "अब्राह्मणात्" [१४१] इति युवप्रत्ययस्यात इञो लुप् ॥

पैलः सपैलः शालङ्किः सशालङ्किस्त्वरान्वितः ।
पान्नागारिः सपान्नागारिरर्घं भूपतेर्ददौ ॥ ४० ॥

४०. सपैलः पुत्रयुक्तः पैल आर्य एवमग्रेपि । अर्घं भूपतेर्ददौ । चन्दनपुष्पाक्षतजलाद्यर्घमर्घमुपलक्षणत्वात्पाद्याचमनीयमधुपर्काद्यपि राज्ञोदात् । गुरुनृपादयः षडर्घ्या इति हि स्मृतिः ॥ शिष्टं स्पष्टम् ॥

---

१ बी सी °णीश्च वासिष्ठो वा°. २ ए °ङ्किस्वरा°. ३ बी °ङ्कि–रा°. ३ बी सी °तः । पन्ना°. ४ बी सपन्ना°. सी सपन्नगा°.

---

१ सी वशिष्ठ°. २ बी सी वाशिष्ठ°. ३ ए °वं स्वरू°. ४ बी अत्रोत्स°. ५ सी आश्चर्य.

तौल्वलिं तैल्वलिं तौल्वलायनं तैल्वलायनम् ।
महत्तरान्पुरस्कृत्य सौमेशं वेश्म सोविशत् ॥ ४१ ॥

४१. स्पष्टः । किं तु महत्तरान्प्रधानानि[1] ॥

पैलः[2] । सपैलः । अत्र "द्विस्वरादणः" [६. १. १०९] इत्यायनिञः शालङ्किः । सशालङ्किः । अत्र "यञिञः[3]" [६. १. ५४] इत्यायनणश्च "पैलादेः" [१४२] इति युवप्रत्ययस्य लुप् ॥

पान्नागारिः[4] । संपान्नागारिः[5] । अत्र "यञिञः[6] [६. १. ५४] इत्यायनणः "प्राच्येञः०" [१४३] इत्यादिना लुप् ॥ तौल्वल्यादिवर्जनं किम् । तौल्वलिं पितरम् । तौल्वलायनं पुत्रम् । तैल्वलिं पितरम् । तैल्वलायनं पुत्रम् ॥

एकविंशः पादः[7] ॥

कौसुम्भं[1] विद्रुमैः सोथ पद्मरागैश्च लाक्षिकम् ।
वज्रै[2] रौचनिकं कार्दमिकं मरकतोत्करैः ॥ ४२ ॥
कार्दमं च महानीलैर्मिश्रैः शाकलिकं च तैः ।
रुचोलो(ल्लो)चं नु तन्वानैः स्नपयित्वेशमार्चिचत् ॥ ४३ ॥

४२–४३. अथ जयसिंह ईशं सोमनाथं स्नपयित्वार्चिचत् । कैः । विद्रुमैः प्रवालैः । किंभूतैः । रुचा पीतकान्त्या कृत्वा कौसुम्भं कुसुम्भेन रक्तमुल्लोचं नु चन्द्रोदयमिव तन्वानैः कुर्वद्भिः । एवं सर्वत्र योजना कार्या । पद्मरागैर्लोहितकैर्मणिभिर्लाक्षिकं लाक्षया रक्तं वज्रैर्घृतवर्णैर्हीरकै[8] रौचनिकं गोरोचनया रक्तं मरकतोत्करैः कृष्णवर्णैरश्म-

१ बी °सुभं वि°. २ बी वज्रे रौ°.

१ ए °नाने । पैलः । अ°. २ सी पैल्यः । स°. ३ ए °ञः अत्राय°. ४ सी °रिः । अ°. ५ बी सपन्ना°. ६ ए °ञिञ अत्राय°. ७ बी °दः समाप्तः । कौ°. ८ ए °कै रो°.

गर्भरत्नौघैः कार्दमिकं कर्दमेन कृष्णेन मृद्विशेषकाटद्रव्येण रक्तं[1] महानीलैरिन्द्रनीलैः कार्दमं च कविमार्गे कृष्णनीलवर्णयोरैक्येन वर्ण्यत्वात्कर्दमेन रक्तं मिश्रैः संकीर्णैस्तैर्विद्रुमादिभिः शाकलिकं च शकलेन नानावर्णेन रागद्रव्यभेदेन रक्तम् ॥

शाकलैः पीतकैर्नीलैर[1]नीलैरपरैरपि ।

तं क्षौमैरार्चयद्भूपः कर्पूरा[2]गुरुधूपितैः ॥ ४४ ॥

४४. स्पष्टः । किं तु पीतकैः पीतेन कुसुम्भप्र[2]थमनिर्यासेन रक्तैः[1] । नीलैर्नीले[3]न रागविशेषेण रक्तैः । अनीलैर्नीली[4]रक्तक्षौमवर्जितैरपरैरपि क्षौमैः । नील्या रक्तानि हि क्षौमाणि लोके पवित्राणि ॥

[5]कौसुम्भम् । अत्र "रागाट्टो रक्ते" [१] इत्यण् ॥

लाक्षिकम् । रौचनिकम् । अत्र "लाक्षा०" [२] इत्यादिना-इकण् ॥

शाकलिकम् शाकलैः । कार्दमिकम् कार्दमम् । अत्र "शकल०" [३] इत्यादिना वेकण् ॥

नीलैः । पीतकैः । अत्र "नील०" [४] इत्यादिना-अकश्च(अकौ?) ॥ लिङ्गविशिष्टग्रहणादनीलैः ॥

पौषोब्दोसौ निशा पौषी पुष्योद्यापीति शंसिनः ।

द्विजान्विसृज्य सोन्यांश्च समाधावविशद्रहः ॥ ४५ ॥

४५. स जयसिंहो रह एकान्ते समाधौ ध्यानार्थमविशत् । किं कृत्वा । द्विजानन्यांश्च भट्टादियाचकान्विसृज्य दानसन्मानादिना मुत्क[6]लयित्वा । किंभूतान् । इति शंसिनो वदतस्तदेवाह । असौ यत्र राजा सोमनाथस्य यात्रां चकार सोब्दः संवत्सरः पौ[7]षः पुष्येणोदितगुरुणा

---

१ ए सी °रप°. २ सी °रागरु°.

---

१ सी रक्तमि°. २ ए °प्रथनि° सी °प्रवनि°. ३ ए °ले रा°. ४ ए सी °नीलर°. ५ बी कौशुम्भ°. ६ सी मुत्काल°. ७ बी सी पौष पु°.

युक्तस्तथासावनन्तरागामिनी[1] निशा पौषी पुष्येण चन्द्रयुक्तेन युक्ता[2] तथाद्यास्मिन्यात्राहे पुष्योपि पुष्येण चन्द्रयुक्तेन युक्तः कालोपि । अयं संवत्सरोहोरात्रश्च सर्वकार्यसिद्धिकर इत्यर्थ इति ॥

पौषोब्दः । अत्र "उदित०" [५] इत्यादिनाण् ॥

पौषी निशा । इत्यत्र "चन्द्रयुक्तात्०" [६] इत्यादिनाण् । लुब्बप्रै[3]युक्ते[4] पुष्योद्य ॥

निशां राधानुराधीयां ध्यानस्तिमितदृष्टिना ।

जपन्किमपि चौलुक्यो[1] व्यडम्बयन्मुखेन्दुना ॥ ४६ ॥

४६. चौलुक्यः किमप्यज्ञेयं[5] रहस्यं जपन्ध्यायन्सन् निशां[6] व्यडम्बयदन्वकरोत् । कीदृशीम् । राधानुराधीयां राधानुराधाभिर्विशाखानुराधा[7]भिश्चन्द्रयुक्ताभिर्युक्ताम्[8] । केन कृत्वा । ध्यानस्तिमितदृष्टिना समाधिनिश्चलाक्षेण मुखेन्दुना वक्त्रश्रेष्ठेन । इन्दुशब्दोत्र व्याघ्रादिशब्दवत्प्रशंसावचनः । एतेन राज्ञि समाधेः प्रकर्ष उक्तः । चन्द्रोदयोज्ज्वलनिशातुल्यो राजा । राधानुराधायुक्तचन्द्रतुल्यो राज्ञो ध्यानस्तिमितदृष्टिमुखेन्दुः । यदा हि विशाखानुराधयोश्चन्द्रः स्यात्तदा तयोर्मध्यस्थत्वाच्चन्द्रस्यैवमुपमा ॥

राधानुराधीयां निशाम् । अत्र "द्वन्द्वादीयः" [७] इतीयः ॥

कण्ठप्रभानवाम्भोदैः श्रवणां दर्शयन्निव ।

अङ्गज्योत्स्नाभिरश्वस्थां[2] चाविरासीदथेश्वरः[3] ॥ ४७ ॥

४७. अथेश्वर आविरासीत्प्रत्यक्षोभूत् । कीदृक्सन् । कण्ठप्रभानवाम्भोदैः कण्ठकान्तिभिरेव[9] नीलत्वात्प्रावृषेण्यमेघैः कृत्वा श्रवणामिव

१ बी सी °क्यो वि°. २ सी °श्वस्थां चा°. ३ ए °रः । ईश्व°.

१ बी °न्तरगा°. २ सी युक्तः का°. ३ बी °प्रत्युक्ते. ४ ए °युक्तेः पु°. ५ सी °मपि ज्ञे°. ६ बी सी °शां विड°. ७ बी °विशेषानु°. ८ बी °शाषानु°. ९ ए °न्तिरे°.

श्रवणेन चन्द्रयुक्तेन युक्तां पूर्णिमामिव श्रावणपूर्णिमामिव दर्शयन् । तथाङ्गज्योत्स्नाभिरङ्गमेवातिश्वेतत्वाज्ज्योत्स्नास्ताभिः कृत्वाश्वत्थामिवाश्वत्थेनाश्विनीभिश्चन्द्रयुक्तेन युक्तां पूर्णिमामिवाश्विनपूर्णिमामिव च दर्शयन् ॥

श्रवणाम् । अश्वत्थाम् । अत्र "श्रवण०" [८] इत्यादिना-अः ॥

इत्यूचे तं हरः स्थित्यानया जयसि तापसम् ।
भैक्षभुग्यौवतानीहं जेतः क्षौद्रकमालवीम् ॥ ४८ ॥

४८. हरस्तमित्यूचे । यथा क्षुद्रकाणां मालवानां च समूहः क्षुद्रकमालव्येवंनामा(म्नी?) काचित्सेना तां जेतर्जिष्णो हे जयसिंहानया स्थित्या योगिजनोचितावस्थानेन तापसं तापसौघं जयसि । किंभूतम् । भैक्षभुग्भिःसङ्गत्वाद्भिक्षासमूहं भुञ्जानं तथा यौवतानीहं जितेन्द्रियत्वाद्युवतिसमूहानभिलाषि ॥

तापसम् । अत्र "षष्ठ्याः समूहे" [९] इत्यण् ॥

भैक्ष । यौवत । इत्यत्र "भिक्षादेः" [१०] इत्यण् ॥

क्षौद्रकमालवीम् । इत्यत्र "क्षुद्रक०" [११] इत्यादिनाण् ॥

वात्सकैरौक्षकैः प्रागप्याजकौरभ्रकौष्ट्रकैः ।
श्रितो मानुष्यकैश्चासि वार्धकैश्चातिगार्गकैः ॥ ४९ ॥

भक्तै राजन्यकै राजपुत्रकैरतिराजकः ।
क्ष्मानृण्यायाधुना स्वर्णसिद्ध्या त्वं भव सिद्धिराट् ॥ ५० ॥

---

१ बी भैक्ष्यभु°. सी भैक्षाभु°. २ सी °श्चातिगा°. ३ ए °कैरा. ४ बी सिद्धरा°.

---

१ सी °श्वस्थामि°. २ बी °श्वत्थाश्वि°. सी °श्वस्थेमोश्वि°. ३ बी °व द°. ४ सी °पसौ°. ५ बी °भिलषि. ६ बी °ण् । भिक्ष. ७ सी भैक्ष्य । यौ°.

४९–५०. स्पष्टौ[1] । किं त्वतिगार्गकै[2]र्जितेन्द्रियत्वादिना गर्गर्षिसमूहानतिक्रान्तैर्वार्धकैश्च वृद्धसमूहै[3]श्च श्रितस्तथा भक्तै राजन्यकै राजपुत्रकैश्च[4] राजन्यानां राजपुत्राणां च समूहैः कृत्वातिराजको विजयेन राजौघ[5]मतिक्रान्तश्च वर्तसे[6] हे सिद्धिराड्[7] जयसिंह ॥

गोत्र । गार्गकैः[8] । औक्षकैः । वात्सकैः । औष्ट्रकैः । वार्धकैः । आजक । औरभ्रक[9] । मानुष्यकैः । राजकः । राजन्यकैः । राजपुत्रकैः । अत्र "गोत्र०" [१२] इत्यादिनाकञ् ॥

नृपो[1] भक्त्यम्बुकैदार्यं गुणकैदारकं स तम् ।
सिद्धि[2]कैदारिकं साहांहःकावचिकहास्तिकम् ॥ ५१ ॥

५१. स नृपस्तं सोमनाथ[10]माह स्म । किंभूतम् । गु[11]णकै[12]दा[13]रकं यथा कैदा[14]रकं क्षेत्रौ[15]घोनेकधान्यानां जन्मभूमिरेवमनेकगुणानामुत्पत्तिभूमिमित्यर्थः । तथांहांसि पापान्येव कावचिकं कवचिनां महाभटानां समूहस्तत्र हास्तिकं हस्तिनां हस्तिनीनां वा समूहं[16] पापचूर्णकमित्यर्थः । अत एव सिद्धिकैदारिकमणिमादिसिद्धीनामुत्पत्तिभूमिमत एव[17] च भक्तय एव कठोरस्यापि भेदकत्वादम्बूनि[18] तेषां कैदार्यमिव यथाम्बुभिः केदारौघः सिच्यते तथासंख्यभक्तिभिः सेक्यमाराध्यमित्यर्थः ॥

---

१ **बी** °पो भुत्तय°. २ **ए** °द्धिकेदारकं.

---

१ **ए** स्पष्टे । किं. २ **बी सी** °कैजितै°. ३ **बी** °हैश्चाश्रि°. ४ **ए** °जपु°. ५ **ए** राजोघ°. ६ **सी** °तंते हे. ७ **बी सी** सिद्धरा°. ८ **ए** °कैः । वा°. ९ **सी** °भ्रकः । मा°. १० **सी** °थस्यमा°. ११ **सी** गुणाकेदा°. १२ **बी** °ण-केदा°. १३ **ए** °दारिकं. १४ **ए** °दारिकं. १५ **बी सी** क्षेत्रोघो°. १६ **ए बी** °मूहः पा°. १७ **बी सी** °व भ°. १८ **ए** °दभूमि तेषां केदा°. **सी** °दम्बूनि.

आपूपिकैर्नु माणव्यमाधैनवं नु धैनुकैः ।
ब्राह्मण्यमिव निर्वापैर्हृष्टोस्मि त्वत्प्रसादतः ॥ ५२ ॥

५२. त्वत्प्रसादतः स्वर्णसिद्धिदानरूपात्त्वत्प्रसादादस्म्यहं हृष्टः यथा-पूपिकैः[1] पूपिकौघैर्माणव्यं बटुकौघो हृष्यति यथा वा धैनुकैर्धेन्वोघैरा-धैनवं न धेनवो येषां तेधेनवस्तेषामोघो हृष्यति यथा वा निर्वापैः पितृतर्पणैर्ब्राह्मण्यं द्विजौघो हृष्यति ॥

आवाडव्यान्महीमागाणिक्याद्विद्ध्यनृणां[1] कृताम्[2] ।
न्यस्य यत्र त्विमां साधयामि स्वं देहि तं सुतम् ॥ ५३ ॥

५३. स्पष्टः । किं त्वावाडव्याद्विजौघादारभ्यागाणिक्याद्गणिकौघं च यावदुत्तमं जनमारभ्य हीनं च यावदित्यर्थः । स्वमात्मानम् ॥

कैदार्यम् । कैदारकम् । इत्यत्र "केदाराण्यश्च" [१३] इति ण्योकञ्च ॥

कावचिक । हास्तिकम् ॥ अचित्तात् । आपूपिकैः ॥ केदारात् । कैदारिकम् । अत्र "कवचि०" [१४] इत्यादिनेकण् ॥

धैनुकैः । अत्र "धेनोरनञः" [१५] इतीकण् ॥ अनञ इति किम् । आधैनवम् । उत्साद्यञ् । अनुशतिकादित्वादुभयपदवृद्धिः [७. ४. २७] ॥

ब्राह्मण्यम् । माणव्यम् । वाडव्यात् । इत्यत्र "ब्राह्मण०" [१६] इत्या-दिना यः ॥

गाणिक्याद् । इत्यत्र "गणिकाया ण्यः" [१७] इति ण्यः ॥

मूर्ध्नि कैश्यं स्पृशञ् शंभुः पाणिना प्रत्युवाच तम् ।
भूभारं कैशिकमिवोत्तितारयिषुरागमः ॥ ५४ ॥

---

१ बी °नृणीं कृ°. २ ए °म् । नामा य°.

---

१ ए °पिकौ°.

५४. शंभुर्मूर्ध्नि कैश्यं केशौघं पाणिना स्पृशन्नाह्लादनायेच्छुपन्संस्तं नृपं प्रत्युवाच । हे राजंस्त्वं भूभारमुत्तितारयिषुः स्वपुत्रे न्यसनेन स्वत उत्तारयितुमिच्छुरागमः । कैशिकमिव यथा केशौघमुत्तितारयिषुस्त्वमागमः । सोमनाथयात्रायां हि यात्रिकैः केशा उत्तार्यन्ते ॥

कैश्यम् । कैशिकम् । अत्र "केशाद्वा" [१८] इति वा ण्यः ॥

त्वद्धात्रीयत्रिभुवनपालपुत्रोस्ति धूःक्षमः ।
कुमारपालः साश्वीयस्त्वदन्ते क्ष्मां धरिष्यति ॥ ५५ ॥

५५. स्पष्टः । किं तु धूःक्षमो भूमिप्राग्भारधरणक्षमः । साश्वीयोश्वौघेन सहितः ॥

इत्युक्त्वान्तर्हिते शंभौ यावदाश्वैर्नृपोचलत् ।
वेत्र्यादिष्टो नमन्पार्श्वे तावदागाद्विभीषणः ॥ ५६ ॥

५६. स्पष्टः । किं त्वाश्वैरश्वौघैः वेत्र्यादिष्टः प्रतीहारेण कथितो नमन् सन् विभीषणो रावणभ्राता पार्श्वे राज्ञः समीपे लङ्कात आगात् । विभीषणो हि लोकैरविनश्वर उच्यते ॥

साश्वीयः आश्वः । अत्र "वाश्वादीयः" [१९] इतीयो वा ॥

पार्श्वे । अत्र "पर्श्वा ड्वण्" [२०] इति ड्वण् ॥

ऊचे सोहीनपृष्ठ्येषु गोत्राप्रीणितकाठक ।
विद्धि द्विट्तूलवातूल भृत्यं मां पूर्वजन्मनः ॥ ५७ ॥

५७. स विभीषण ऊचे । यथाहीनपृष्ठ्येषु । अह्नां समूहा अहीनाः पृष्ठानां समूहाः पृष्ठ्याः। द्वन्द्वे तेषु यागभेदेषु हे गोत्राप्रीणितकाठक गोसमू-

१ बी °नपुष्पेषु.

१ ए °न्नाह्लद°. २ ए °यन्नुप°. ३ सी °त्ताहिते । कै°. ४ बी °न्ते । केश्य°. ५ ए °रश्वौघैः. ६ बी °यः अश्वैः.

हाह्लादितकंठौघ हे कठेभ्यो दत्तगोसहस्रेत्यर्थः । तथा हे द्विट्तूलवातूल शत्रुष्वेवार्कतूलेषु वातौघ पूर्वजन्मनो रामचन्द्ररूपस्य पूर्वभवस्य भृत्यं मां विद्धि ॥

रथकड्यां(ट्यां?) लसत्पाश्यागव्यां मुक्त्वांह्रिचारिणम् ।
त्वामत्रायान्तमाकर्ण्यारथ्यो वात्यावदागमम् ॥ ५८ ॥

५८. अरथ्यो रथौघरहितो वात्यावदतिशीघ्रत्वाद्वातौघ इवात्राहमागमम् । किं कृत्वा । त्वामाकर्ण्य । किंभूतम् । अंह्रिचारिणं सन्तमत्रायान्तं यात्रार्थमागच्छन्तम् । किं कृत्वा । रथकड्यां(ट्यां ?) रथौघं मुक्त्वा । किंभूताम् । लसन्ती स्वर्णपृष्टा(ष्ठा)दिना विच्छुरितत्वाद्देदीप्यमाना पाश्या पाशानां योत्राणां समूहो यस्याः सा तथा गव्या वृषौघो यस्यां ताम् ॥

तदादिश सदाण्डं मां सेनाग्रे रक्षितुं विभो ।
महाखल्यो यथा शौवमूकिनीखलिनीमुखे ॥ ५९ ॥

५९. तत्तस्माद्धेतोर्हे विभो सदाण्डं दण्डिनां दण्डप्रहरणवतां समूहेनान्वितं मां सेनाग्रे रक्षितुमादिश । यासु भूमिषु धान्यानि वृषादिभिर्विगाह्यन्त उत्पूयन्ते च ताः खलानि तेषां समूहः खल्या । महती खल्या यस्य स महाखल्यो गृहपतिर्यथोकिनीखलिनीमुख ऊकानां समूह ऊकिनी धान्यराशिस्तस्या या खलिनी खलानां समूहस्तस्या मुखे क्षेत्रद्वारदेशे रक्षितुं चोरादिभ्यो रक्षार्थं शौवं कुक्कुरौघमादिशति व्यापारयति ॥

---

१ बी °त्पाश्यग°. सी °त्पास्याग°. २ ए °रथो वा°. सी °रथो व्योत्या°.

---

१ सी °कठे°. २ बी °स्य भ°. ३ ए सी रथोघ°. ४ ए सतमाया°. ५ बी सी °र्णपिष्टादि°. ६ ए °मूहा य°. ७ ए °विषाह्य°. ८ बी सी क्षेत्रे द्वा°. ९ सी °क्षितु दोरा° ए क्षितुं चौरा°. १० बी °र्थं कु°.

अहीन । इत्यत्र "ईनोह्नः क्रतौ" [२१] इतीनः ॥

पृष्ठयेषु । इत्यत्र "पृष्ठाद्यः" [२२] इति यः ॥

काठक । इत्यत्र "चरणाद्धर्मवत्" [२३] इत्यकञ् ॥

गोत्रा । रथकड्या(ड्या ?)म् । वातूल । इत्यत्र "गोरथ०" [२४] इत्यादिना त्रलकड्य(ड्य?)लूलाः ॥

पाश्य(श्या) । महाखल्यः । गव्याम् । अरथ्यः । वात्या । अत्र "पाशादेश्च ल्यः" [२५] इति ल्यः ॥

शौवम् । दाण्डम् । अत्र "श्वादिभ्योञ्" [२६] इत्यञ् ॥

खलिनी । ऊकिनी । इत्यत्र "खलादिभ्यो लिन्" [२७] इति लिन् ॥

इत्यूचुषा तेन सहानूज्जयन्तं नृपोचलत् ।
ग्रामताजनतां पश्यन्वात्सल्याद्बन्धुतामिव ॥ ६० ॥

६०. स्पष्टः । किं तु ग्रामताजनतां ग्रामौघस्य जनौघम् । बन्धुतामिव बान्धवौघमिव ॥

सहायतापौरुषेयगजतायुग्दिनेपरे ।
पौरुषेयोपौरुषेयं प्राप रैवतकं नृपः ॥ ६१ ॥

६१. स्पष्टः । किं तु सहायतापौरुषेयगजतायुक् सहायपुरुषगजौघैर्युतः । पौरुषेयः पुरुषेभ्यो हितः । अपौरुषेयं स्वभावसंसिद्धत्वाद्देवनिर्मितत्वाद्वा न पुरुषैः कृतम् । एतेनातिरम्यत्वोक्तिः ॥

पौरुषेयाद्वधाद्रक्षन्विकाराच्च स्वकानथ ।
पौलस्त्यो भावविद्रूपं पुरो भूत्वेदमब्रवीत् ॥ ६२ ॥

---

१ सी °त्यूचिषा.

---

१ बी सी °श्चलाः इ°. २ बी सी °त्र श्वादि°. ३ बी °म्यत्वेनोक्तिः.

६२. पौलस्त्यो विभीषणो राज्ञः पुरो भूत्वा भूपमिदं वक्ष्यमाणं रैवतकतीर्थस्वरूपमब्रवीत् । कीदृक्सन् । पौरुषेयात्पुरुषसंबन्धिनो वधाद्धिंसाया विकाराच्च हस्ताद्यवयवच्छेदादेश्च सकाशात्[1]स्वकान्राक्षसान्[2]रक्षन्निषेधन् यतो भावविद्राज्ञोभिप्रायज्ञः । राज्ञो हि राक्षसानामन्यायान्निषेधनं रैवतकतीर्थस्वरूपज्ञानं चाभिप्रेतम् ॥

ग्रामता[3] । जनताम्[4] । बन्धुताम् । गजता । सहायता । इत्यत्र "ग्राम०" [२८] इत्यादिना तल् ॥

अपौरुषेयम्[5] । पौरुषेयः । पौरुषेयाद्वधाद्विकाराच्च । पौरुषेय । इत्यत्र "पुरुषात्कृत०" [२९] इत्यादिनैयञ्[6] ॥

असावाश्मोपि वन्द्योद्रिर्नेमिस्तेपे तपोत्र यत् ।
छागेभ्यः सक्थिमांसेभ्य इवोद्वाहाज्जुगुप्सितः ॥ ६३ ॥

६३. स्पष्टः । किं त्वाश्मोश्मविकारः । नेमिर्द्वाविंशो जिनः । तपः सर्वसावद्यविरतिरूपम् । छागेभ्यश्छागानामवयवविकारेभ्यः । जुगुप्सितो विरक्तचित्ततया छागसक्थिमांसेभ्यो राजीमतीविवाहा[7]च्च जुगुप्सित्वा[8] निवृत्त इत्यर्थः[9] ॥

रजोप्यस्य गिरेः[1] पुंसामंह[2]श्छेदाय जायते ।
कारीरं चैत्रकं काण्डे भस्म वास्त्रक्छिदे[3] यथा ॥ ६४ ॥

६४. स्पष्टः । किं तु करीरस्य[10] चित्रकौषधेश्च काण्डं हि[11] जलादिना

१ ए गिरे पुं°. २ बी सी पुंसां मं°. ३ बी °देर्यथा.

१ ए °शाद्राक्ष°. सी °शास्वका°. २ सी °सान्या°. ३ बी °मतां । ज°. ४ ए °म् । राज°. सी °म् । जगता. ५ ए °पेत्य°. ६ ए °ञ् । आसा°. ७ सी °हा जु°. ८ बी °प्सितत्वा. ९ बी °र्थः । राजो°. १० ए °रव.स्य. ११ सी हितं ज°.

घर्षित्वा[1] व्रणादौ दत्तं रुधिरच्छेदाय[2] स्याद्भस्म[3] वास्त्रप्रहारादौ दत्तं रक्त-निवृत्तये स्यात् ॥

आश्मः[4] । अत्र "विकारे" [३०] इत्यण् ॥

प्राणिभ्यः[5] । छागेभ्यः । सक्थिमांसेभ्यः ॥ औषधिभ्यः । चैत्रकं काण्डम् । चैत्रकं भस्म ॥ वृक्षेभ्यः[6] । कारीरं काण्डम्[7] । कारीरं भस्म । अत्र "प्राणि०" [३१] इत्यादिना-अण् ॥

धन्वात्राकर्षतां तालं व्याधानां तीर्थतेजसा ।
हिंस्रा गलन्त्यभिप्राया जातुषत्रापुषा इव ॥ ६५ ॥

६५. अत्रादौ तालं तालवृक्षविकारं धन्व मृगव्यापादनाभिप्रायेण(णा)कर्षतां व्याधानामाखेटिकानामपि[8] तीर्थतेजसा[9] तीर्थप्रभावेण हिंस्रा हिंसनस्वभावा अभिप्राया गलन्ति विलीयन्ते । अत एवोत्प्रेक्ष्यन्ते[10] जातुषत्रापुषा इव । जतुनो लाक्षायास्त्रपुणो वावयवा इव विकारा इव वा[11] । ते ह्यग्निसङ्गेन विलीयन्ते ॥

तालं धन्व । इत्यत्र "तालाद्धनुषि" [३२] इत्यण् ॥

त्रापुषाः । जातुष । इत्यत्र "त्रपु०" [३३] इत्यादिनाण् षान्तश्च ॥

स्याद्भव्यघृष्टशामीलयष्टेरग्निरिवांसुतः[1] ।
क्षीरौष्ट्रकपयस्योपजीविनामपि[2] पावनी[3] ॥ ६६ ॥

---

१ ए °वास्तुतः. बी °वासुतः. २ ए °पि थाविनी. ३ बी पाविनी.

---

१ ए °त्वा दौ. २ बी °धिरेच्छे°. ३ ए °स चास्त्र°. बी °स वस्त्रे प्र°. ४ ए आसः । अ°. ५ ए °भ्यः । स°. ६ ए सी °भ्यः । करी°. ७ ए °म् । करी°. ८ ए °माखिटि°. ९ सी °र्थप्र°. १० सी °क्ष्यते जा°. ११ सी वा । ह्य°.

६६. औष्ट्रकपयस्योपजीविना[1]मप्युष्ट्र्या विकार औष्ट्रकं यत्पयस्यं पयसो दुग्धस्य विकारो[2] वित्रुटितदुग्धादि तदुपजीविनाम[3]प्युष्ट्रपालानामपि। ते हि निर्दया निर्धर्माश्च स्युस्तेषामप्य[4]मुतो गिरेः सकाशाद् गम्ययबपेक्षया पञ्चम्याममुं प्राप्य वा पावनी[5] दयादिना पवित्रा धीः स्यात्। यथा द्रोर्दा[6]रुणो विकारः काष्ठखण्डं द्रव्यं तेन घृष्टा या शामीला शमीवृक्षावयवो यष्टिस्तस्याः सकाशात्तां प्राप्य वाग्निः स्यात्॥

शामील। इत्यत्र "शम्या लः" [३४] इति लः॥

पयस्य। द्रव्य। इत्यत्र "पयोद्रोर्यः" [३५] इति यः॥

औष्ट्रक। इत्यत्र "उष्ट्रादकञ्" [३६] इत्यकञ्॥

सोथामुच्यौमकं वासः पौलस्त्येनौमवाससा।
दत्तहस्तोद्रिमध्यास्त दर्शिताध्वौर्णकाम्बरैः॥ ६७॥

६७. स्पष्टः। किं त्वौमकमुमाया अतस्या विकारं वासो वस्त्रं धौतवस्त्रि[7]कामित्यर्थः[8]। आमुच्य परिधा[9]य दत्तहस्तो दत्त[10]वाहिकः। एतेन पादचारेणारोहकथनम्। औ[11]र्णकमूर्णाया विकारोम्बरं येषां तैः सौराष्ट्रैः[12]। ते ह्यूर्णवस्त्रं परिदधति॥

औ[1]र्णै[2]णेयत्वक्पटानां कौशेयान्यध्वदर्शिनाम्।
मुक्तपारश[3]वास्त्राणां दत्वा चैत्ये नृपोविश[4]त्॥ ६८॥

१ बी सी और्णेणे°. २ ए °र्णैणय°. ३ बी °शवस्त्रा°. ४ ए °शयत्.

१ सी °ना उष्ट्र्या. २ ए °रो त्रु°. ३ बी °मपि। ते. ४ सी °प्यमतो. ५ बी पाठनी. ६ बी °द्रो इ°. ७ बी °स्त्रिकमि°. ८ सी °र्थः। अमु°. ९ ए °धायाद°. १० सी दत्तावा°. ११ बी और्णमू°. १२ सी °ष्ट्रैः। ह्यू.

६८. नृपश्चैत्ये श्रीनेमिनाथप्रासादे[1]ऽविशत् । किं कृत्वा । कौशेयानि कोशस्य विकारान्पटांशुकानि दत्त्वा । केषाम् । और्णा ऊर्णाया विकारा[2] ऐणेयत्वचश्च मृग्यवयवत्वचः पटा येषां तेषामौर्णपटानां सौराष्ट्राणामैणेयत्वक्पटानां च पार्वतिकानाम् । कीदृशाम् । अध्वदर्शिनाम् । तथा परशव इदं परशव्यम्[3] "उवर्णयुगादेर्यः" [७. १. ३०] इति यः । तस्यायसो विकारः पारशवानि मुक्तानि चैत्यद्वारदेशप्राप्तत्वात्त्यक्तानि पारशवान्यस्त्राणि परशव एव यैस्तेषाम् ॥

औमकम् औम । और्णकम्(क) और्ण । इत्यत्र "उमोर्णाद्वा" [३७] इति वाकञ्[4] ॥

ऐणेयत्वक् । इत्यत्र "एण्या[5] एयञ्" [३८] इत्येयञ् ॥

कौशेयानि । इति "कौशेयम्" [३९] इत्यनेन[6] निपात्यम् ॥

पारशव । इत्यत्र "परशव्याद्यलुक्च" [४०] इत्यण् यस्य च लुक् ॥

केपि द्रुवयमानाभाः कांस्यढक्का[1] अवादयन् ।
घटिता हाटकैर्निष्कैः[2] काहलाः केप्यपूरयन् ॥ ६९ ॥

६९. केपि कांस्यढक्का मज्जनारम्भेवादयन् । कीदृशीः । द्रुवयमानाभा द्रोर्दारुणो विकारो द्रुवयं यन्मानमष्टसेतिकाप्रमाणं हाराख्यं तदाभाः पृथुलवर्तुलमुखाः । तथा केपि काहला अपूरयन्मुखवातेन पूरितवन्तोवादयन्नित्यर्थः । कीदृशीः । हाटकैः स्वर्णस्य विकारैर्निष्कैः पलशतैर्घटिता निर्मिताः ॥

---

१ बी कांश्यढ°. २ ए सी °कैनिष्कैः.

---

१ ए सी °मिप्रसा°. २ बी °रा एणे°. ३ सी °व्यर्ण°. ४ बी सी °ञ् ॥ ऋणे°. ५ ए °ण्या येय°. ६ ए °नेनेति नि°. ७ बी कांश्यढ°.

कांस्य । इत्यत्र "कंसीयाञ्ञ्यः" [४१] इति ञ्यः ॥

हाटकैर्निष्कैः । अत्र "हेम०" [४२] इत्यादिनाण् ॥

द्रुवय । इत्यत्र "द्रोर्वयः" [४३] इति वयः ॥

शतिकान्द्विशतान्हैमान्राजतानपि केचन ।
सुवर्णमयपद्मार्चान्पूर्णकुम्भानसज्जयन् ॥ ७० ॥

७०. केपि नृपा हैमान्स्वर्णविकारांस्तथा राजतानपि रूप्यमयांश्च पूर्णकुम्भानिक्षुरसघृतदुग्धदधिसुरभिवारिसंपूर्णकलशानसज्जयन् । किंभूतान् । शतिकान्द्विशतांश्च हेम्नो रजतस्य वा संबन्धिनः । शतस्य द्वयोः शतयोर्वा विकारांस्तथा सुवर्णमयानि सुवर्णस्य विकारा यानि पद्मानि तैरर्चा पूजा येषु तान् । सर्वानपि स्वर्णपद्मैः पिहितानित्यर्थः ॥

सौवर्णे पट्टके केपि धौतकार्पासवाससः ।
अमण्डयन्बलिं मौद्गं त्यक्त्वा तालमयं धनुः ॥ ७१ ॥

७१. स्पष्टः । किं त्वमण्डयन्विच्छित्त्यारचयन् । उपशान्तचित्तत्वात्तालमयं तालतरोर्विकारं धनुस्त्यक्त्वा ॥

शतिकान् । इत्यत्र "मानाक्रीतवत्" [४४] इति क्रीतवद्विकारे प्रत्ययविधिः ॥ वत्सर्वविधिसादृश्यार्थः । तेन लुबादिकस्याप्यतिदेशः स्यात् । द्विशतान् ॥

हैमान् । राजतान् । इत्यत्र "हेमादिभ्योञ्" [४५] इत्यञ् ॥

---

१ सी °वर्णपटके. २ सी °सवि । अ°. ३ सी °यलम्ब°.

---

१ बी °याञ्ञः इति ञः । हा°. २ बी °लसान°. ३ बी °भून्. ४ ए °श्च हैम्नो. ५ सी द्वयोर्वा. ६ बी °नि स्वर्ण°. ७ सी °पु । स°. ८ बी °कारोप्र°. ९ बी °विधेः । व°. सी °विधि । यत्स°. १० ए वत्संबन्धि सा°. ११ ए लुदिवालक°. १२ बी °ञ् । स्वर्ण°. सी °ञ् । सौवर्ण°.

सुवर्णमय । सौवर्ण । अत्र "अभक्ष्य०" [४६] इत्यादिना मयड्वा ॥ अभक्ष्याच्छादन इति किम् । मौद्गं बलिम् । कार्पासवाससः ॥ भक्ष्याच्छादनयोर्मयडभावपक्षे च "तालाद्धनुषि" [६. २. ३२] इत्यादिको विधिः । सावकाशोयं च सुवर्णमय इत्यादौ । तत्रोभयप्राप्तौ परत्वादनेन मयट् स्यात् । तालमयं धनुः ॥

केचिच्छरमयीर्दर्भमयीस्तृणमयीः कुटीः ।
कूदीमयीश्च गत्वाह्नन्नाचार्याञ् श्वेतवाससः ॥ ७२ ॥

७२. स्पष्टः । किं तु कूदीमयीश्च तृणविशेषविकारान् । कुटीरुटजानि । आह्वन् स्नानदर्शनायाकारयन् । गिरौ हि प्रायेण शरमय्याद्या एव कुट्यः सुलभाः स्युरित्युक्तं शरमयीरित्यादि ॥

द्राग्वल्वजमयात्सोममयाच्च गन्धवेश्मनः ।
पात्रैः केचिन्मृन्मयाद्यैरानिन्युश्चन्दनादिकम् ॥ ७३ ॥

७३. केचिन्मृन्मयाद्यैर्मृद्विकारस्वर्णविकारादिभिः पात्रैर्भाजनैः कृत्वा गन्धवेश्मनो गन्धप्रधानापणाद्द्राक्चन्दनादिकमानिन्युः । किंभूतात् । वल्वजमयात्सोममयाच्च सुलभत्वेन वल्वजसोमाख्यतृणविशेषाणां विकारात् ॥

---

१ बी कूटीम°. २ बी सी °ञ् स्वेत°. ३ सी °ग्वल्बज°.

---

१ ए °वर्णेत्यत्र°. सी °वर्ण्य । अ°. २ ए °भक्षेत्या°. बी °भक्षत्या°. ३ बी °लिः । का°. सी °लि । का°. ४ ए °ससा । भ°. बी °सवः । भ°. ५ बी सी भक्षाच्छा°. ६ बी °यं सु°. ७ सी स्पष्टं किं. ८ ए तु कूदी°. ९ ए °र्शनयोः का°. १० ए °दि । डाम्बल्व°. ११ बी °नापाणा°. सी °नामाणद्रागंचन्द°. १२ ए वल्कज°. १३ ए वल्कज°.

शर[1]मयीः । दर्भमयीः । कू[2]दीमयीः । तृणमयीः । सोममयात् । [3]वैल्वजमयात् । इत्यत्र "शर०" [४७] इत्यादिना मयट् ॥

मृन्मय । इत्यत्र "एकस्वरात्" [४८] इति मयट् ॥

भूपोथ तन्मयीभूय रत्नैश्चाषमयीं प्रभाम् ।

बिभ्र[1]द्भिरतिचाषिं वा दीप्रान्कुम्भानुदासये[2]त् ॥ ७४ ॥

७४. अथ सर्वस्नानसामग्रिकाविधानानन्तरं भूपस्तन्मयीभूय स्नानकर्मैकचित्तीभूयेत्यर्थः । कुम्भानुदासयदुदपाटयत्[4] । किंभू[5]तान् । रत्नैर्दीप्रान् । किंभूतैः । प्रभां बिभ्रद्भिः । किंभूताम् । चाषमयीं चाषाणां पञ्चवर्णपक्षिभेदानां विकारमिव पञ्चवर्णत्वेन चापकान्तितुल्यामित्यर्थः । अतिचाषिं वा नैर्मल्याद्यतिशयाच्चाषीं चाषविकारं प्रभामतिक्रान्तां वा ॥

तन्मयी । इत्यत्र "दोर्०" [४९] इत्यादिना मयट् ॥ अप्राणिन इति किम् । अतिचाषिम् । चाषमयीम् ॥

प्रविश्य चैत्यगर्भेथ गोमयायितकुङ्कु[3]मे ।

तुल्यैर्व्रीहिमयान्भोक्तुर्भव्यैः सोस्नपयज्जिने[4]म् ॥ ७५ ॥

७५. गोमयायितं सान्द्रलेपेन गोमयवदाचरितं कुङ्कुमं यत्र तस्मिंश्चैत्यगर्भे प्रविश्य स नृपो जिनं नेमि[6]मस्नपयत् । कैः सह । भव्यैर्भा[7]विकल्याणपात्रैर्नृपादिभिः । किंभूतैः । व्रीहिमयान्यागादौ प्रदेयान्व्रीहेर्विकारान्पुरोडाशान्भोक्तुरिन्द्रस्य रूपवेषादिसंपदा तुल्यैः ॥

---

१ बी °द्भिरिति°. २ सी °यदुदपा°. ३ बी °ङ्कुमैः । तु°. ४ सी °न । नेमि°.

---

१ ए °मयी । द°. २ ए कूटीम°. ३ वल्कज°. ४ ए °त् । र°. ५ सी °भूतैः. ६ ए °गिस्न°. ७ ए °भावक°.

गोमय । इत्यत्र "गोः पुरीषे" [५०] इति मयट् ॥

व्रीहिमयान् । इत्यत्र "व्रीहेः०" [५१] इत्यादिना मयट् ॥

कुम्भैर्यवमयोत्पेषगौरैश्चक्रैरिवाबभौ ।

नेमिस्तिलमयक्षोदस्निग्ध ओघो नु यामुनः[1] ॥ ७६ ॥

७६. तिलमयक्षोदस्निग्धस्तिलवर्तिवद्रूक्षकालिमगुणो नेमिः कुम्भैः स्वर्णकलशैः कृत्वाबभौ । किंभूतैः । यवानां विकारो यवमयं[1] यवपिष्टं तेन य उत्पेष[2] उज्ज्वालनं तेन गौरैर्निर्मलैः । यथा तिलमयक्षोदस्निग्धो यामुन ओघः प्रवाहो गौरैः स्वर्णवर्णैश्चक्रैश्चक्रवाकैर्भाति ॥

युजा पिष्टमयैर्गन्धैर्यावगौरैरतैलया ।

उद्वर्तितः पिष्टिकया सोऽस्तहैयङ्गवीनया ॥ ७७ ॥

७७. पिष्टिकया दलिता मुद्गादयः पिष्टं तद्विकारेणातिसूक्ष्मेण पिष्टेन कृत्वा स श्रीनेमिनाथ उद्वर्तितो राज्ञोज्ज्वालितः । कीदृश्या । गन्धैः कुष्ठादिभिर्गन्धद्रव्यैर्युजा युक्तया । किंभूतैः । यवस्य लाक्षाया विकारो यावोलक्तकस्तद्वद्गौरैः पीतवर्णैस्तथा पिष्टमयैः कुष्ठादयः किंचिच्चूर्णिताः[3] पिष्टं तस्य विकारैरतिश्लक्ष्णपिष्टरूपैरित्यर्थः । तथातैलया तिलविकारेण स्नेहेन रहितयात[4] एवातिरूक्षत्वादस्तं क्षिप्तं[5] हैयङ्गवीनं ह्योगोदोहस्य विकारः प्रतिमालम्रं स्नानघृतं[6] यया तया ॥

तिलमय । यवमय । इत्यत्र "तिल०" [५२] इत्यादिना मयट् ॥ अनाम्नीति किम् । अतैलया । याव ॥

---

१ ए यामनुः । ति°.

---

१ बी °यं पि°. २ सी उत्प्रेक्ष्य उ°. ३ ए सी चिचूर्णि°. ४ सी °त त्यत्र. ५ ए °प्तं हेयं°. ६ बी °तं तया त°.

पिष्टमयैः । अत्र "पिष्टात्" [५३] इति मयट् ॥

पिष्टिकया । अत्र "नाम्नि कः" [५४] इति कः ॥

हैयङ्गवीनया । इत्यत्र "ह्यः०" [५५] इत्यादिना-ईनञ् प्रकृतेर्हियङ्गवादेशः ॥

आप्यैः स्नातोर्चितो राज्ञा हारैः सोम्मयमौक्तिकैः ।
मल्लिकाभिरथान्यैश्च पुष्पैर्मुस्तासुगन्धिभिः ॥ ७८ ॥

७८. अथ स श्रीनेमिराप्यैर्जलानां विकारैः कुङ्कुमादिसुगन्धिद्रव्यमिश्रजलविशेषैः स्नातः सन् राज्ञा हारैरुपलक्षणत्वादन्यैरप्याभरणैरर्चितः । किंभूतैः । अम्मयानि स्वातिवृष्टमेघजलकणविकारा मौक्तिकानि येषु तैः । तथा मल्लिकाभिर्मल्लिकाया विचकिलस्य विकारैरवयवैर्वा पुष्पैरन्यैश्चम्पकादिभिश्च पुष्पैरर्चितः । किंभूतैः । मुस्ताया विकारोवयवो वा मूलं मुस्ता तद्वत्सुरभिभिः ॥

शैरीषैर्वारणैः पूजां ह्रैवेरैश्चाप्यमण्डयत् ।
श्वासान्रुन्धन्स ह्रीवेरशिरीषसुरभीनपि ॥ ७९ ॥

७९. स राजा शैरीषैः शिरीषपुष्पैर्वारणैर्वरणवृक्षभेदपुष्पैर्ह्रैवेरैरपि वालकमूलैरपि नेमेः पूजाममण्डयद्विच्छित्त्यारचयत् । कीदृक्सन् । श्वासान्मुखनिश्वासान्रुन्धन्नाशातना(?)भयेन मुखकोशकरणान्निवारयन् । शिष्टं स्पष्टम् ॥

१ सी सोमयेमौक्ति°. २ ए °यमौक्ति°. ३ ए सी °रणै पू°. ४ बी °प्यमुडय°. ५ ए °त । स्वासा°.

१ सी °मानदि°. २ बी सी °निश्चाति°. ३ ए °काया. ४ ए विचिकि°. सी विचिकल°. ५ ए °ष्पै चम्प°. ६ ए °स्तास्तद्व°. ७ बी सी °हैवैर°. ८ ए बी °न् । स्वासा°. ९ ए °निस्वासा°. सी °निश्वसा°. १० सी °खशोकक°. ११ बी °न् । शेषं स्प°.

अथ सोऽस्तौदिति स्वामिन्यः शमिच्छेत्त्वदन्यतः।
विहाय बदरीं मूलैर्धन्वैरण्डैः करोति सः॥ ८०॥

८०. स्पष्टः। किं तु त्वदन्यतस्त्वत्तोन्यस्माद्देवात्सकाशाच्छं स्वर्गापवर्गादिसुखं यो देवबुद्ध्याश्रयणेनेच्छेत्। बदरीं महासारत्वेन धनुर्दण्डयोग्यं बदरस्य विकारं वृक्षम्। यथासारत्वादेरण्डविकारैर्मूलैर्धनुर्न स्यात्तथा त्वत्तोन्यस्माद्देवाच्छं न स्याद्रागद्वेषकलुषात्मत्वेनेतरजनतुल्यतया स्वर्गापवर्गसुखदानेसमर्थत्वादित्यर्थः॥

आप्यै(प्यैः)। अश्म(श्म)य। इत्यत्र "अपो यञ्वा" [५६] इति वा यञ्॥

मल्लिकाभिः। मुस्ता। इत्यत्र "अभक्ष्य०" [६. २. ४६] इत्यादिना कृतस्याणो मयटो वा "लुब्०" [५७] इत्यादिना लुप्॥ क्वचिन्न स्यात्। वारणैः। ऐरण्डैः॥ क्वचिद्विकल्पः। शिरीष शैरीषैः। ह्रीवेर ह्रैवेरैः। क्वचित्पुष्पमूलाभ्यामन्यत्रापि। बदरीम्॥

त्वां जम्बूश्याम पश्यन्तं करामलकवज्जगत्।
निन्दतां धिग्व्रतं प्लाक्षाश्वत्थजाम्बवभोजिनाम्॥ ८१॥

८१. हे जम्बूश्याम जम्बूतरुफलवत्कृष्णाङ्ग नेमे प्लाक्षाश्वत्थजाम्बवभोजिनां महातपस्वित्वेन धान्यानाहारकत्वात्प्लक्षपिप्पलजम्बूवृक्षफलभोजिनां वनेवासितापसानां व्रतं धान्याभोजनादिरूपं दुष्करं नियमं

१ बी सी °न्यः समि°. २ ए °लैध्वनैर°.

१ बी °त्वादेर°. २ बी °र्धः। अप्यै. ३ बी सी असाय. ४ सी °भक्ष्या°. ५ ए सी °णैः। एर°. ६ ए सी °रीषः शै°. ७ ए °वेरी ह्रीवे°. ८ बी °र ह्रीवे°. ९ सी °म्बूशाम. १० ए वनिवा°.

धिग्निष्फलत्वाद्गर्हामहे यतस्त्वामदेवबुद्ध्या निन्दताम्[1] । किंभूतम् । अपि करामलकवत्करस्थामलकीफलमिव जगत्केवलज्ञानेन पश्यन्तम्[2] ॥

आमलक । इत्यत्र "फले" [५८] इत्यणो मयटो वा[3] लुप् ॥

प्लाक्षाश्वत्थ । इत्यत्र "प्लक्षादेरण्" [५९] इत्यण् ॥

जाम्बव जम्बू । अत्र "जम्ब्वा वा" [६०] इति वाण् । पक्षे लुप् ॥

त्वयि भक्तस्तद्धितवद्भूयोप्यङ्गविकारतः[2] ।
भवेन्न हि भवे जन्तुर्जगदेकदयानिधे ॥ ८२ ॥

८२. हे जगदेकदयानिधे त्रिभुवनमध्ये दयाया एकस्थान श्री-[4]
नेमे[5] त्वयि भक्तो जन्तुरङ्गविकारतोङ्गमेव योसौ विकार आत्मनो-विभिन्नत्वेन विकृतिस्तेन आद्यादित्वात्तस् । [७. २. ८४] शरीररूपेण विकारेण भूयोपि भवे न हि भवेत् त्वद्भक्त्यापुनर्भवावाप्तेः पुनः संसारे न जायेतेत्यर्थः[6] । तद्धितवदिति । अङ्गेति कोमलामन्त्रणे । यथा विकारतो विकारेर्थे कपोतस्य विकारोवयवो वा कापोतः । कापोतस्य विकारोवयवो वेत्यादौ पुनरपि तद्धितो "दोरप्राणिनः" [६. २. ४९.] इत्यादिना मयडादिस्तद्धितप्रत्ययो "न द्विरद्रुवय०" [६. २. ६१] इत्यादिना निषेधान्न स्यात् ॥

त्वदाकृष्यान्यतश्चेतो नयेद्यः स कुधीः क्षिपेत् ।
कापित्थं द्रौवयात्पात्राद्रसं भस्मनि[3] गोमये ॥ ८३ ॥

१ बी °तभूयो°. सी °तद्भ°. २ ए °योग्यङ्ग°. ३ बी सी °नि गौम°.

१ सी निन्दिता°. २ बी °श्यन्ताम्. ३ सी वाद्भयोप्यंगविकारित लु°. ४ सी श्रीभूयेपि. ५ ए °नेमि त्व°. ६ बी सी जायतेत्य°.

८३. यो नरस्त्वत्त आकृष्यान्यतोन्यस्मिन्देवे चेतो नयेत्प्रापयेत्स कुधीर्दुर्बुद्धिर्द्रौवयाद् द्रोर्दारुणो विकारो द्रुवयं मानं तस्यापि विकारात्तद्भूक्त्वा कृतात्पात्रात्काष्ठभाजनात्कापित्थं कपित्थस्य विकारः फलं कपित्थम् अण्। "फले" [६. २. ५८] लुप्। तस्य विकारं रसमाकृष्य गोमये गोमयविकारे भस्मनि क्षिपेत्। सत्पात्रे त्वयि न्यस्तं मनः कापित्थरसवद्वाञ्छितकार्यसिद्धये स्यात्। भस्मतुल्येषु तु कुपात्रेष्वन्यदेवेष्वात्मानमपि कुवासनया विनाशयतीत्यर्थः ॥

तद्धितवद्भूयोपि विकारतो न भवेदित्यनेन "न द्विः०" [६१] इत्यादिसूत्रोक्तो निषेधो ज्ञापितः ॥ अद्रुवयगोमयफलादीति किम् ॥ द्रौवयात्पात्राद्गोमये भस्मनि कापित्थं रसम् ॥

पितृव्या मातुला वृद्धा मातामहपितामहाः ।

हेतवो बन्धनस्यैव त्वं तु मोक्षस्य कारणम् ॥ ८४ ॥

८४. स्पष्टः । किं तु बन्धनस्य रागद्वेषादिरूपस्य भावबन्धनस्य ॥

पितृव्याः । मातुलाः । अत्र "पितृ०" [६२] इत्यादिना व्यो डुलश्च ॥

पितामहाः । मातामह । इत्यत्र "पित्रोर्डामहट्" [६३] इति डामहट् ॥

संत्यज्याविमरीसानि देव त्वां द्रष्टुमागताः ।

प्रियाविसोढा आभीरा नाविदूसं किलास्मरन् ॥ ८५ ॥

८५. हे देवाविमरीसान्यजादुग्धानि संत्यज्य त्वां द्रष्टुमागता आभीरा अजापालाद्याः । त्वद्रूपामृतास्वादतृप्तत्वादविदूसमजादुग्धं किलेति सत्ये नास्मरन् । कीदृशाः । प्रियाविसोढा अपि । अपिरत्र ज्ञेयः । अजादुग्धाहारत्वादभीष्टाजादुग्धा अपि ॥

---

१ ए °न्यस्मि°. २ ए सी कृत्यत्पा°. ३ ए सी °कारफ°. ४ ए सी °रं स°. ५ ए सी °ष्य गौम°. ६ ए सी °त्। यत्पा°. ७ बी °तकर्मसि°. ८ ए सी तु पा°. ९ ए बी °न द्विः. १० ए सी °तृ त्या°. ११ ए °ग्धं ति कि°. १२ ए °ढापिर°. सी °ढा अपिर°.

अविसोढाः[1]। अविदूसम्। अविमरीसानि। इत्यत्र "अवेर्०" [६४] इत्यादिना सोढदूसमरीसाः[2] ॥

शैवे(बे?) राष्ट्रेथ[1] वङ्गानामङ्गानामाङ्गवाङ्गयोः।

परतोपि[2] स्फुरेदाज्ञा तस्य यस्त्वयि भक्तिमान् ॥ ८६ ॥

८६. हे देवै[3] यस्त्वयि भक्तिमांस्तस्याज्ञा शैवे शिवीनां राज्ञां सक्ते राष्ट्रे देशे तथा वङ्गानामङ्गानां च राज्ञां राष्ट्रे तथाङ्गवाङ्गयोः[4] परतोप्यङ्ग-वङ्गराष्ट्राभ्यां परस्मिन्नपि राष्ट्रे स्फुरेत्। स सार्वभौमः स्यादित्यर्थः[5] ॥

शैवे(बे?) राष्ट्रे[6]। अत्र "राष्ट्र०" [६५] इत्यादिनाण् ॥ अनङ्गादिभ्य इति किम्। अङ्गानां राष्ट्रे[7]। वङ्गानां राष्ट्रे ॥ केचित्त्वङ्गादिप्रतिषेधं नेच्छन्ति। आङ्ग-वाङ्गयोः ॥

दैवयातवके राजन्यके वासातकेपि च।

वासातस्य परस्ताच्च शासनं जयतीश ते ॥ ८७ ॥

८७. हे ईश तव शासनमाज्ञा देवयातवानां राजन्यानां वसातीनां च राज्ञां राष्ट्रेषु वासातस्य परस्ताच्च जयति। सर्वेष्वपि देशेषु नृपा लोकाश्च तवाज्ञां कुर्वन्तीत्यर्थः ॥

राजन्यके। दैवयातवके। अत्र "राजन्य०[8]" [६६] इत्यादिनाकञ् ॥

वासातके वासातस्य। इत्यत्र "वसातेर्वा" [६७] इति वाकञ् ॥

नेमिं स्तुत्वेति पौलस्त्यं विसृज्यावातरत्समम्।

स तार्क्ष्यायणभक्तैषुकारिभक्तादिपार्थिवैः[3] ॥ ८८ ॥

१ ए °ष्ट्रे गंगानामाङ्ग°. २ ए °तो स्फु°. ३ ए बी तार्क्षायणभक्तेषु°.

१ सी °विदू°. २ बी °साः। शौवे. ३ बी °वस्त्व°. ४ बी °ङ्गवङ्ग°. ५ ए सी °र्थः। शौवे. ६ बी °ष्ट्रे इ°. ७ ए सी °ष्ट्रे। के°. ८ बी °जन इ°.

८८. स्पष्टः । किं तु तार्क्ष्यायणस्य राज्ञो राष्ट्रं तार्क्ष्यायणभक्तमे(मै)षुकारीणां राष्ट्रमैषुकारिभक्तं द्वन्द्वे तदादीनां राष्ट्राणां पार्थिवैः समं सह ॥

स भौरिकिविधं भौलिकिविधं शैवें(ब?)वैदिशे ।
भोक्तृभिः सह धर्मज्ञैर्जल्पञ्शत्रुञ्जयं ययौ ॥ ८९ ॥

८९. स्पष्टः । किं तु भौरिकीणां राज्ञां राष्ट्रं भौरिकिविधमेवं भौलिकिविधं शिवीनां शिवानां वा राज्ञां निवासः शैवो देशो विदिशाया अदूरभवं वैदिशं नगरं द्वन्द्वे ते च भोक्तृभिर्नृपैः सह जल्पन्धर्मकथां कुर्वन् यतो धर्मज्ञैः ॥

भौरिकिविधम् । भौलिकिविधम् । ऐषुकारिभक्त । तार्क्ष्यायणभक्त । इत्यत्र "भौरिकि०" [६८] इत्यादिना यथासंख्यं विधभक्तौ प्रत्ययौ ॥

शैव(ब?) । वैदिशे । अत्र "निवास०" [६९] इत्यादिनाण् ॥

सहौदुम्बरकौशाम्बीद्रुमतीमधुमन्नृपैः ।
सोध्यास्त विसवन्नाथदत्तहस्तोथ तं गिरिम् ॥ ९० ॥

९०. उदुम्बरा वृक्षा अत्र सन्त्यौदुम्बरं पुरम् । कुशाम्बेनर्षिणा निर्वृत्ता कौशाम्बी पुरी । द्रुमती नदी । मधून्यत्र सन्ति मधुमान्देशो द्वन्द्वे एषां नृपैः सह स जयसिंहस्तं गिरिमध्यास्त । कीदृक्सन् । विसवान्देशस्तन्नाथेन राज्ञा दत्तहस्तः ॥

---

१ **बी** स भैरि°. २ **बी** °ववेदि°. ३ **बी** °द्रुमंती°. ४ **ए** °रि । उ°. **सी** °रि । औदु°.

---

१ **ए** तार्क्षाय°. २ **सी** °णसक्त रा°. ३ **ए** तार्क्षाय°. ४ **सी** °ज्ञैः । भूरिकवि°. ५ **बी** °रिकवि°. ६ **बी** °लिकवि°. ७ **ए** °शाम्बीपुरद्रु°.

औदुम्बर । इत्यत्र "तदत्रास्ति" [७०] इत्यण् ॥

कौशाम्बी । इत्यत्र "तेन०" [७१] इत्यादिनाण् ॥

द्रुमती । इत्यत्र "नद्यां मतुः" [७२] इति चातुरर्थिको मतुः ॥

मधुमत् । विसवत् । इत्यत्र "मध्वादेः" [७३] इति चातुरर्थिको मतुः ॥

नड्वत्कुमुद्वद्वेतस्वच्छाद्वलिन्यद्रिमूर्धनि ।
नाभेयचैत्यं सोपश्यदतिमाहिष्मतीपतिः ॥ ९१ ॥

९१. स राजाद्रिमूर्धनि नाभेयचैत्यं श्री(श्रि ?)ऋषभदेवभवनमपश्यत् । किंभूते । नड्वन्तो नडाख्यतृणभेदयुक्ताः कुमुद्वन्तः कैरवयुता वेतस्वन्तो वेतसवृक्षयुक्ताः शाड्व(द्व)लाश्च शादः पङ्कः सस्यं वा तद्युक्ताश्च प्रदेशा अत्र सन्ति तस्मिन् । कीदृक्सः । अतिमाहिष्मतीपतिर्महिष्मान्देशस्तस्यादूरभवा पुरी माहिष्मती तस्याः पतिः सहस्रार्जुनस्तं बलादिनातिक्रान्तः ॥

सोविशत्तत्र रत्नांशुनड्वलायितभूतले ।
द्वारि मुञ्चञ्शैरीषकशिखावलमहीपती ॥ ९२ ॥

९२. स राजा तत्र नाभेयचैत्येविशत् । किंभूते । रत्नांशुभिः कृत्वा नड्वलायितं नडाख्यतृणभेदान्वितप्रदेशतुल्यं भूतलं यत्र तस्मिन् । कीदृक्सन् । द्वारि चैत्यसिंहद्वारे जिघांसया शत्रूणां छलेन प्रवेशस्य रक्षार्थं शैरीषको ग्रामः शिखावलं पुरं तयोर्महीपती मुञ्चन्स्थापयन् ॥

१ बी °श्यदिति°. २ बी °षशि°. ३ बी °खाबल°.

१ ए कौशम्बी. २ ए सी °भेयं चै°. ३ ए बी °युक्ता कु°. ४ ए °श्च सादः. ५ बी °ङ्कः शस्यं. ६ बी सी चैत्ये सिं°. ७ सी °क्षार्थशै°. ८ बी °पतीर्मुचन्स्था°. सी °पति मु°. ९ ए सी °न् । शरी°.

शिरीषिकेशहस्तेन रत्नैः शार्करिकेऽङ्गणे ।
शार्करादागतः शर्करीयेद्[1] पुष्पाण्यथार्पयत् ॥ ९३ ॥

९३. शर्करीयेट् शर्कराः क्षुद्रपा[1]षा[2]णास्तद्वतो देशस्य स्वामी शिरी[3]षि[4]केशहस्तेन शिरीषि[5]कदेशराजपाणिना कृत्वा पुष्पाणि श्रीनाभेयपूजार्थं जयसिं[6]हायार्पयत् । कीदृक् । अङ्गणे देवगृहाङ्गणे वर्तमानः । किंभूते । रत्नैः कृत्वा शार्करिके शर्करावद्देश इव कर्करैरिवँ[7] रुल्लल(वोल्लस?)द्धिर्मणिभिराकीर्णं इत्यर्थः । तथा शार्कराच्छर्करावद्देशा[8]दागतः ॥

पुष्पा[2]द्युपायनं द[3]त्त्वा[4]न्येपि शर्करिकेशवत् ।
गह्वरे भूभुजस्तस्थुरद्रेः शार्करकाश्मरे ॥ ९४ ॥

९४. शर्करिकेशवद्यथा शर्करावद्देशस्वामी नाभेयपूजार्थं पुष्पाद्यादिपदादाभरणादि जयसिंहस्य ददावेवमन्येपि भूभुजः पुष्पादि पूजार्थं दत्वाद्रेः शत्रुञ्जयस्य गह्वरे गह्वा दुरवगाहाः प्रदेशा अत्र सन्ति गह्वरं वनगहनं तत्र तस्थुर्जयसिं[9]हं प्र[10]तीक्षमाणाः स्थिताः । किंभूते । शार्क[11]रकाश्मरे शर्करायु[12]क्ते पाषाणयुक्ते च ॥

नड्वत् । कुमुद्वत् । वेतस्वत् । माहिष्मती । इत्यत्र "नड०" [७४] इत्यादिना[13] डिन्मतुः ॥

नड्वल । शाद्वलि[14]नि । इत्यत्र "नड०" [७५] इत्यादिना[15] डित्वलः ॥

---

१ सी °ट् शर्कराः. २ ए °ष्पाद्यपा°. ३ ए दत्तान्ये°. ४ सी °त्वा द्रेः शत्रु°.

---

१ सी °पाणस्त°. २ बी °णातद्व°. ३ ए °रीषेके°. ४ बी सी °केसह°. ५ ए °षिके दे°. सी °षिकिदे°. ६ ए °सिंहस्यार्प°. ७ ए °व सलद्धि°. सी °वरुल्लद्धि°. ८ ए °शाग°. ९ बी °सिंहप्रतीक्ष्यमा°. १० ए °तीक्ष्यमा°. ११ ए °करिका°. १२ सी °क्ते च. १३ सी °ना इकण्–ईय–अण्. १४ ए बी शाड्वलि°. १५ ए सी °ना ड्वलः.

शिखावल । इत्यत्र "शिखायाः" [७६] इति वलः ॥

शिरीषिक । शैरीषक[1] । अत्र "शिरीषाद्[2]०" [७७] इत्यादिनेककणौ ॥

शार्करिके । शर्करीय । शार्करात्[3] । शर्करिक । शार्करक[4] । इत्यत्र "शर्करायाः०" [७८] इत्यादिना-इकण्-ईय-अण् चकारादिककणौ ॥

अश्मरे । गह्वरे । अत्र "रोश्मादेः[5]" [७९] इति रः ॥

फलकिप्रेक्षितृणसा[1]नदसाकाशिलाधिपैः ।
समं जिनेन्द्रमर्चित्वा चौलुक्योद्रेरवातरत् ॥ ९५ ॥

९५. स्पष्टः । किं तु फलकया प्रेक्षया च निवृ(र्वृ)त्तौ फलकिप्रेक्षिणौ[6] देशौ । तृणसानदसे नद्यौ । काशा अत्र सन्ति काशिलं नगरम् ॥

सोन्वद्रिं वाशिलारीहणकखाण्डवकागतान् ।
मन्त्राशीर्वादमुखरान्काश्चनैरार्चयद्द्विजान् ॥ ९६ ॥

९६. स्पष्टः । किं तु[7] वाशाः पक्षिणोरीहणा अरिकर्त्तारः पुरुषाः[8] खण्डवो भेदका वृक्षा[9] वैषु सन्ति वाशिलारीहणकखाण्डवका देशास्तेभ्योन्वद्रिं[10] शत्रुञ्जयं[11] लक्ष्यीकृत्यागतान्[12] ॥

प्रेक्षि । फलकि । इत्यत्र "प्रेक्षादेरिन्" [८०] इतीन् ॥

तृणसा[13] । नदसा । इत्यत्र "तृणादेः सल" [८१] इति सल ॥

---

१ **सी** °सारनंद°.

---

१ **बी सी** °षकं । अ°. २ **ए** °षादिने°. ३ **ए** °त् । शार्क°. ४ **ए बी** °करिक. ५ **बी सी** रोस्मादेः. ६ **बी सी** °प्रेक्षणौ. ७ **सी** तु वशाः. ८ **ए** °षाः खाण्ड° **सी** °षा षण्ड°. ९ **बी** °क्षा वेषु. **सी** °क्षा बेषु. १० **ए** °न्वद्रिश°. ११ **ए सी** °अयल°. १२ **ए बी** लक्षीकृ°. १३ **बी सी** °सा । दनसा.

काशिल । वाशिल । इत्यत्र "काशादेरिलः" [८२] इतीलः ॥

आरीहणक[1] । खाण्डवक । इत्यत्र "अरीहण०" [८३] इत्यादिना-अकण् ॥

सोत्र सौपन्थ्य[1]सांकाश्य[2]सौतङ्गमिपुरोपमम् ।
स्थानं सिंहपुरं[3] चक्रे द्विजानां मौनिचित्तिजित् ॥ ९७ ॥

९७. स जयसिंहोत्र शत्रुञ्जयसमीपे सिंहपुरं नाम द्विजानां स्थानं चक्रे[2]कारयत् । यद्द्विजानां निमित्तं पुरादिकं क्रियते दीयते वा तत्स्थानमित्युच्यते । कीदृशम् । शोभनाः पन्थानोत्र सन्ति गणपाठान्मा[3]-(न्ना ?)गमे सौपन्थ्यं संकाशेन सुतङ्गमेन चर्षिणा निर्वृत्तं[4] सांकाश्यं सौतङ्गमि[5] च द्वन्द्वे एतैः पुरैर्महर्द्धिकत्वादुपमा यस्य तत् । कीदृक्सः । मौनिचित्ति[6] मुनिचित्तेन निर्वृत्तं[7] देशं जयति तत्स्वामि[8]जयेन स्ववशीकरोति मौनिचित्तिजित् ॥

सौपन्थ्य[9] । सांकाश्य । इत्यत्र "सुपन्था(न्थ्या?)देर्ञ्यः" [८४] इति ञ्यः ॥

सौतङ्गमि । मौनिचित्ति । इत्यत्र "सुतङ्गमादेरिञ्" [८५] इतीञ् ॥

बल्यचुल्याह्वसाखेयसाखिदत्तेयसंपदः ।
स स्थानाय ददौ ग्रामान् लौमपान्थायनोपमान् ॥ ९८ ॥

९८. स राजा स्थानाय ग्रामान्ददौ सिंहपुरप्रतिबद्धाननेकान्ग्रामांश्चकारेत्यर्थः । किंभूतान् । बलेन निर्वृत्तं[10] बल्यं चुलानां निमज्जकानां[11] निवासो चुल्यमह्वा निवृ(र्वृ)त्तमाह्वमेतानि पुराणि । साखेयसाखिद[12]-

१ ए °न्थ्यका°. २ बी °काश्यंसौ°. ३ ए °पुरे च°.

१ सी °क । खण्ड°. २ ए °क्रेबका. ३ सी °पावान्मामो सौ°. ४ सी निवृत्तं. ५ बी °मिकं च. ६ ए सी °चित्तं मु°. ७ बी निवृत्तं. सी निवृक्षं दे°. ८ सी °मिनज°. ९ ए °पथ्यं । कांश्य. सी °पन्थ्यं । सां°. १० सी निवृत्तं. ११ सी °ज्जनका°. १२ ए साख्येय°.

त्तेयौ ग्रामौ । द्वन्द्वे एतत्तुल्यश्रीकान् । तथा लोमान्यत्र सन्ति लौमं पुरं पथां[1] निवासः[2] पान्थायनो ग्रामस्[3]तयोस्तुल्यांश्च ॥

स पाक्षायणवासिष्ठायनिकार्णायनिद्विजैः ।
दत्ताशीः प्रास्थित स्थानात्संकरीयोत्करीयभात् ॥ ९९ ॥

९९. स जयसिंहः स्थानात्सिंहपुरात्[4]प्रास्थित[5] । कीदृक्सन् । पाक्षायणादिदेशविशेषाणां द्विजैर्दत्ताशीः । किंभूतात्स्थानात् । संकरेणोत्करेण च निर्वृत्तौ[6] संकरीयोत्करीयौ[7] पुरभेदौ तद्वच्छ्रिया भाति यत् "क्वचिद्" [५.१. १७१] इति डः । तस्मात्[8] ॥

बल्य । चुल्य । इत्यत्र "बलादेर्यः" [८६] इति यः ॥

आह्न[9] । लौम । इत्यत्र "अहरादिभ्योञ्" [८७] इत्यञ् ॥

साखेय । साखिदत्तेय । इत्यत्र "सख्यादेरेयण्" [८८] इत्येयण् ॥

पान्थायन । पाक्षायण । इत्यत्र "पन्थ्यादेरायनण्[10]" [८९] इत्यायनण् ॥

कार्णायनि । वासिष्ठायनि । इत्यत्र "कर्णादेरायनिञ्" [९०] इत्यायनिञ् ॥

उत्करीय । संकरीय । इत्यत्र "उत्करादेरीयः" [९१] इतीयः ॥

नडकीयप्लक्षकीयकार्शाश्वीयपुरेश्वरैः ।
सोन्वीयमानः स्वपुरीं प्रापारिष्टीयसंपदम् ॥ १०० ॥

१००. स्पष्टः । किं तु कृशाश्वेन राज्ञा निर्वृत्तं कार्शाश्वीयम् । आरिष्टीयसंपदमरिष्टा निम्बाः फेनिलवृक्षा वात्र सन्त्यारिष्टीयं पुरं तत्तुल्यर्द्धिकां स्वपुरीं पत्तनम् ॥

---

१ **ए** पन्था नि°. २ **ए** °वासाः पन्था°. ३ **ए** °मस्तु°. ४ **सी** °रात्स प्रास्थि°. ५ **ए** °स्थितः । की°. ६ **बी सी** निवृत्तौ. ७ **सी** °रीयौ. ८ **बी** त् । वुल्य. ९ **बी** आह्नः । लो°. १० **बी** पन्थादे°.

नडकीय[1] । प्लक्षकीय । इत्यत्र "नडादेः कीयः" [९२] इति कीयः ॥

कार्शाश्वीय[2] । आरिष्टीय । इत्यत्र "कृश०" [९३] इत्यादिनेयण्[3] ॥

ऋश्यकादश्मकाद्वाराहकात्पालाशकादपि[1] ।[2]

देशात्कुमुदिकादिक्कटिकादाश्वत्थिकाच्च[3] ये ॥ १०१ ॥

एत्य कौमुदिकादन्यदेशाद्वातं ययाचिरे ।

अदारिद्र्यान्स तांश्चक्रे वर्षन्नाषाढवन्नृपः ॥ १०२ ॥

१०१, १०२. स्पष्टौ । किं त्विक्कटिकादिकटाः[4] शूराः पुरुषा वृक्षभेदा वात्र सन्तीक्कटिकं[5] देशः पुरं वा तस्मात् । वर्षन्नाषाढवदाषाढाभिश्चन्द्रयुक्ताभिर्युक्ता पौर्णमास्याषाढी सा पौर्णमास्यस्याषाढो[6] मासो यथा जलं वर्षत्येवं[7] द्रव्यं वर्षन्ददित्यर्थः[8] । आषाढे हि वर्षासांनिध्यान्मेघा वर्षन्ति तत्संबन्धादाषाढोपि वर्षन्नुच्यते[9][10] ॥

ऋश्यकात्[11] । अश्मकात् । इत्यत्र[12] "ऋश्यादेः कः" [९४] इति कः ॥

वाराहकात् । पालाशकात् । इत्यत्र "वराहादेः कण्" [९५] इति कण् ॥

कुमुदिकात् । इक्कटिकात् । इत्यत्र "कुमुदादेरिकः" [९६] इतीकः ॥

आश्वत्थिकात् । कौमुदिकात् । अत्र "अश्वत्थादेरिकण्" [९७] इतीकण् ॥

आषाढ । इत्यत्र "सास्य०" [९८] इत्यादिनाण् ॥

चैत्रकार्त्तिकिकाश्वत्थिकेन्दुवत्प्रीणतो[4] जगत् ।

आग्रहायणिकोषेव तस्य कीर्तिरवर्धत ॥ १०३ ॥

१ ए °दसका°. २ ए °पि । दशा°. ३ ए °कात्त ये. ४ ए °र्त्तिकका°. सी °र्त्तिकाका°.

१ ए °कीयः । प्ल°. २ सी °श्वीयः । आपिष्टी°. ३ ए °ण् । कश्य°. ४ बी °टाः सूराः. ५ सी सन्ति क°. ६ ए °षाढे मा°. ७ ए वर्षात्ये°. ८ ए °न्ददि°. ९ सी °र्षन्नमुच्य°. १० ए °ते कश्य°. ११ बी असका°. १२ ए सी °त्र कश्या°.

१०३. स्पष्टः । किं त्वश्वत्थाश्वत्थेनाश्विन्या चन्द्रयुक्तेन युक्ता पौर्णमास्यस्याश्वत्थिक[1] आश्विनमासः[2] । आग्रहायणिकोषेवाग्रहायणी मार्गशीर्षी पौर्णमास्यस्याग्रहायणिको मार्गशीर्षस्तस्योषा रात्रिर्यथा वर्धते ॥

चैत्रिको[1] ज्ञान्यपुष्टानां[2] श्रावणो बन्दिकेकिनाम् ।
स ददत्कार्त्तिकेन्द्वाभोभाद्रा[3]ःश्रावणिकैत्करः[4] ॥ १०४ ॥

१०४. स्पष्टः । किं तु ज्ञान्यपुष्टानां[3] पण्डितकोकिलानाम् । कार्त्तिकेन्द्वाभो दानोत्थया ज्ञैर्बन्दिभिश्चोत्कीर्तितया कीर्त्या कार्त्तिकचन्द्रतुल्यैः । वाःश्रावणिकैत्करो[4] वारा निरन्तरं दानजलेन कृत्वा श्रावणिकत्[5] श्रावणमास इवाचरन् करः पाणिर्यस्य सः ॥

गते फाल्गुनिके[5] विश्वदारिद्र्यदलफाल्गुनः ।
हविर्भिरैन्द्रपैङ्गाक्षीपुत्रीयैः[6] सोकरोत्क्रतून् ॥ १०५ ॥

१०५. फाल्गुनिके[7] फाल्गुनमासे गते वसन्त इत्यर्थः । स राजा हविर्भिर्घृतादिभिर्हव्यैः[8] क्रतूनकरोत् । किंभूतैः । ऐन्द्रपैङ्गाक्षीपुत्रीयैरिन्द्रदेवतैः[9] पैङ्गाक्षीपुत्रदेवतैश्च[10][11] । कीदृग् । विश्वदारिद्र्यदलफाल्गुनो यथा फाल्गुनः पत्राणि पातयत्येवं विश्वस्यापि दारिद्र्याणां पातक इत्यर्थः ॥

---

१ सी चैत्रको. २ बी °को न्यान्य°. ३ ए °भाद्राश्रा°. ४ ए °कक्करः. ५ बी °ल्गुके. ६ बी °न्द्रपौङ्गाक्षी°.

---

१ बी पौर्णिमा°. २ बी °त्थिका आ°. ३ सी °नां खण्डि°. ४ बी सी °ल्यः । वाश्रा°. ५ ए °कक्करो. बी °कक्षरो. ६ बी °णिवत्. ७ बी °ल्गुनके. ८ ए, बी °विभिर्घृ°. ९ ए सी °न्द्रदैव°. १० बी °तैः पिङ्गा°. ११ ए °त्रदैव°.

हव्यैस्तार्णबिन्दवीयैः शुक्रियैः शतरुद्रियैः ।
तत्रातिशतरुद्रीयापांनप्त्रीयैश्च सोयजत्[1] ॥ १०६ ॥

१०६. स राजा हव्यैः कृत्वा तत्र क्रतुष्वयजदजुहोत्[1] । किंभूतैः । तार्णबिन्दवीयैस्तार्णबिन्दवदेवतैः शुक्रियैः शुक्रदेवतैः । शतरुद्रियै रुद्रशतदेवतैः[2] । अतिशतरुद्रीयापांनप्त्रीयैश्चातिशतरुद्रीयाणि[3] शतरुद्रदेवतहव्येभ्योतिशायीनि यान्यपांनप्त्रीयाण्यपांनपादेवविशेषदेवतानि तैश्च ॥

अपोनप्त्रीयकैः सूक्तैः साध्वपोनप्त्रियं द्विजैः ।
महेन्द्रियं महेन्द्रीयैर्यज्ञेस्य जुहुवे हविः ॥ १०७ ॥

१०७. अस्य जयसिंहस्य यज्ञे द्विजैर्यज्वभिरपोनप्त्रियमपोनपादेवविशेषदेवतं हविः साधु विधिवज्जुहुवेग्नौ हुतम् । कैः कृत्वा । अपोनप्त्रीयकैरपोनपादधिष्ठातृदेवतैः[4] सूक्तैर्मन्त्रैः । तथा महेन्द्रियं महेन्द्रदेवतं[5][6] हविर्महेन्द्रीयैर्महेन्द्राधिष्ठातृदेवतैः सूक्तैर्जुहुवे ॥

अपांनप्त्रियमाहेन्द्रकायसौम्येषु कर्मसु ।
द्विजानां संशयं जातं सुधीः स स्वयमच्छिनत् ॥ १०८ ॥

१०८. स्पष्टः । किं त्वपांनप्त्रियमाहेन्द्रकायसौम्येषु कः प्रजापतिः सोमश्चेन्दुर्देवता[7] येषां तानि कायानि सौम्यानि च ततश्चतुष्पदे विशेषणद्वन्द्वे तेषु । अपांनपादादीनुद्दिश्योक्तेष्वित्यर्थः । कर्मसु यागक्रियासु विषये जातं संशयम् । यतः सुधीः सर्वशास्त्रज्ञः ॥

आग्रहायणिक । आश्वत्थिक । इत्यत्र "आग्रहायणी०" [९९] इत्यादिनेकण् ॥

---

१ सी सोजयत्.

---

१ बी °ष्वजयाद°. सी °ष्वजयद°. २ ए °तदैव°. ३ ए °नपोनप्त्रीयकैः. ४ बी सी °तृदैव°. ५ सी °हेहवैव°. ६ बी °न्द्रवैव°. ७ ए सी °श्चेदुर्दे°. ८ सी °कण्वा । ऐ°.

चैत्रिकः चैत्र । कार्त्तिकिक कार्त्तिक । फाल्गुनिके फाल्गुनः[1] । श्रावणिकत् श्रावणः । अत्र "चैत्री०" [१००] इत्यादिनेकण्वा ॥

ऐन्द्र । इत्यत्र "देवता" [१०१] इत्यण्[2] ॥

पैङ्गाक्षीपुत्रीयैः । तार्णबिन्दवीयैः । अत्र[3] "पैङ्गाक्षी०" [१०२] इत्यादिनेयः ॥

शुक्रियैः । अत्र "शुक्रादियः" [१०३] इतीयः ॥

शतरुद्रीय[4] । शतरुद्रियैः । अत्र "शत०" [१०४] इत्यादिना-ईय-इयौ ॥

अपोनप्त्रीयकैः । अपोनप्त्रियम् । अपांनप्त्रीयैः । अपांनप्त्रियम्[5] । अत्र "अपोनप(पा)द्[6]०" [१०५] इत्यादिना-ईयँ-ई(इ)यौ[7] ॥

महेन्द्रीयैः । महेन्द्रियम् । अत्र "महेन्द्राद्वा" [१०६] इति वा-ईर्य-इयौ[8] ॥ पक्षेण् । माहेन्द्र ॥

काय । सौम्येषु । इत्यत्र "कसोमाट्ट्यण्" [१०७] इति व्यण् ॥

स द्यावापृथिवीयो नु द्यावापृथिव्यकर्मणि ।
अग्नीषोम्ये विधावग्नीषोमीयो[1] नूद्यतोभवत् ॥ १०९ ॥

१०९. द्यावापृथिवीयो नु द्यावापृथिवीदेवतपुरुष[9] इव स राजा द्यावापृथिव्यकर्मणि द्यावापृथिव्यौ देवते उद्दिश्योक्तायां क्रियायां विषय उद्यतोभूत् । एवमुत्तरार्धमपि व्याख्येयम् ॥

शुनासीर्याणि सूक्तानि शुनासीरीयवच्च सः ।
तथा वास्तोष्पतीयानि वास्तोष्पत्य इवाशृणोत् ॥ ११० ॥

---

१ ए °यो भूद्य°. २ बी °यो मूद्य°.

---

१ ए °ल्गुनिनः. २ सी °ण् ॥ सद्या°. ३ ए °त्र पिङ्गा°. ४ ए °द्रीयः । श°. ५ ए °प्त्रिय । अ°. ६ ए °नप इ°. ७ ए °ययौ. ८ बी °यईयौ. ९ सी °थिव्यौ.

११०. शुनो वायुः[१] सीर आदित्यस्तौ देवते एषां तानि शुनासीर्याणि[२] सूक्तानि मन्त्रान् यथा शुनासीरीयो वाय्वादित्यदेवतपुरुषः शृणोत्येवं स राजाशृणोत्। वास्तोष्पतिर्वास्तुदेवता[३] [४] देवता येषां तानि वास्तोष्पतीयानि । शिष्टं स्पष्टम् ॥

कर्माणि गृहमेध्यानि गृहमेधीयवन्मुदा ।

नृपो मरुत्वतीयानि मरुत्वत्य इवातनोत् ॥ १११ ॥

१११. गृहमेध्यानि गृहमेधं वास्तुदेवतामुद्दिश्योक्तानीत्यर्थः । मरुत्वानेकोनपञ्चाशन्मरुद्युक्तः शक्रो देवता येषां तानि मरुत्वतीयानि । शिष्टं स्पष्टम् ॥

द्यावापृथिवीयः । द्यावापृथिव्य । शुनासीरीय । शुनासीर्याणि[६] । अग्नीषोमीयः । अग्नीषोम्ये । मरुत्वतीयानि । मरुत्वत्यः । वास्तोष्पतीयानि । वास्तोष्पत्यः । गृहमेधीय । गृहमेध्यानि । इत्यत्र "द्यावा०" [१०८] इत्यादिना ईययौ ॥

वायव्यर्तव्यपित्र्योषस्यप्रौष्ठपदिकादिभिः ।

तं माहाराजिकैश्चौक्षन्मन्त्रैरवभृथे द्विजाः ॥ ११२ ॥

११२. अवभृथे[७] यज्ञान्ते द्विजा यज्वानो मन्त्रैस्तमौक्षन्मन्त्रपूतं स्नानं तस्य चक्रुरित्यर्थः । किंभूतैः । वायव्या वायुदेवता ऋतव्या ऋतुदेवताः पित्र्याः पितृदेवता उषस्याः प्रातःसंध्यादेवताः प्रौष्ठपदिकाः प्रोष्ठपदाः पूर्वभद्रपदा[८] उत्तरभद्रपदा देवता येषां ते तथा विशेषणद्वन्द्वे तदादिभिस्तथा माहाराजिकैश्च महाराजदेवविशेषदेवतैश्च[९] ॥

१ बी सी °कैश्चोक्ष°. २ सी °न्त्रैरिवभृते द्वि°. ३ ए °भृते द्वि°.

१ ए °युः शीर. २ बी सी °नाशीर्या°. ३ बी सी °तिवास्तु°. ४ बी °स्तुदैवतदेवता ये°. ५ सी °ता ये°. ६ बी °नाशीर्या°. ७ ए °भृते °य°. ८ सी °दा दे°. ९ ए °षदैव°.

वायव्य । ऋतव्य । पित्र्य[1] । उषस्य । इत्यत्र "वाय्वृतु०"[2] [१०९] इत्यादिना यः ॥

म(मा)हाराजिकैः[3] । प्रौष्ठपदिक । इत्यत्र "महाराज०" [११०] इत्यादिनेकण् ॥

सूक्तपाङ्क्तप्रगाथेभ्यः प्रावृषेण्यत्करोम्भसा ।
सोदाद्भारतनेतेव द्विजेभ्यस्तत्र दक्षिणाः ॥ ११३ ॥

११३. तत्र यज्ञान्तस्नाने[4] सति स राजा द्विजेभ्यो दक्षिणा अदात् । कीदृक्सन् । अम्भसा कृत्वा प्रावृड्देवतास्य प्रावृषेण्यो वर्षामेघस्तद्वदाचरन्करः पाणिर्यस्य सः । कीदृग्भ्यो द्विजेभ्यः । सूक्तपाङ्क्तप्रगाथेभ्यः पङ्क्तिर्दशाक्षरच्छन्दो[5]जातिरादिरेषां पाङ्क्ता यत्र द्वे ऋचौ प्रग्रन्थनेन[6] प्रकर्षगानेन वा तिस्रः क्रियन्ते ते मन्त्रविशेषाः प्रगाथाः सूक्ताः सुष्ठु भणिताः पाङ्क्ताः प्रगाथा यैस्तेभ्यः । भारतनेतेव भरता भरतगोत्रोद्भवा योद्धारोस्य युद्धस्य भारतं युद्धं तस्य नेतेव युधिष्ठिर इव । पाण्डवा हि भरतगोत्रोद्भवाः । यथा युधिष्ठिरो यज्ञान्ते द्विजेभ्यो दक्षिणा ददौ ॥

अतीत्य मैथिलं युद्धं राघवो नु कृतक्रतुः[1] ।
प्रापातेतरतिथ्यां स पूर्तं चक्रे महासरः ॥ ११४ ॥

११४. स राजा सहस्रलिङ्गाख्यं महासरः पूर्तं चक्रेकारयत् ।

वापीकूपतडागा[7]नि देवतायतनानि च ।
आरामान्नप्रदानानि पूर्तमर्थ्याः प्र[8]चक्षते ॥

१ बी °तुः । प्रपातेर°.

१ बी पितृव्य । उषस । इ°. सी पित्र्यः । उ°. २ बी सी °य्वृत्या°. ३ बी °कैः । प्रोष्ठ°. सी °कैः । पोष्ठ°. ४ ए बी °स्नाते स°. ५ बी °क्षरंच्छ°. ६ सी °ग्रन्थ्यने°. ७ बी °गादि दे°. ८ बी °चक्ष्यते.

क[1] । [2]प्रापातेतरतिथ्यां प्रपातो व्यतीपातो हानिर्वा[3]स्त्यस्यां[4] प्रापाता तदितरस्यां तिथौ व्यतीपा[5]तदुष्टयोगरहितायां प्रवर्धमानायां वा तिथौ शुभतिथावित्यर्थः । कीदृक्सन् । कृतक्रतुर्यथा मैथिली सीता प्रयोजनमस्य तन्मैथिलं युद्धं रावणेन सह रणमतीत्य समाप्य राघवो रामः कृतक्रतुरभूत् ॥

प्रावृषेण्यत् । इत्यत्र "कालाद्भववत्" [१११] इत्यतिदेशात् "प्रावृष एण्यः" [६. ३. ९२] इत्येण्यः ॥

पाङ्क्तप्रगाथेभ्यः । इत्यत्र "आदेः" [११२] इत्यादिना यथाविहित उत्साद्यञ् ॥

भारत । मैथिलं युद्धम् । अत्र "योद्धृ०" [११३] इत्यादिनाण् ॥

प्रापातेतरतिथ्याम् । अत्र "भाव०" [११४] इत्यादिना णः ॥

पापकाककुल[1]श्यैनंपातायां तत्तटीभुवि ।
सत्रशाला नृपश्चक्रे तैलंपातक्रियाजुषाम् ॥ ११५ ॥

११५. नृपस्तैलंपातक्रियाजुषां तिलानां पा[6]तोऽस्यादौ यस्यां क्रियायां यज्ञादिकायां सा तथा तत्सेविनां विप्राणां संबन्धिनीः सत्रशाला दा[7]नशालाश्चक्रेकारयत् । क्व । तत्तटीभुवि सरस्तीरप्रदेशे । कीदृश्याम् । पापमेव काककुलं तत्र श्यैनंपातः श्येनपातोऽस्यां वर्तते श्यैनंपाता तिथिः क्रियाभूमिः क्रीडा वा तस्यां धर्मा[8]र्थत्वेन पापोच्छेदिकायामित्यर्थः ॥

श्यैनंपातायाम् । तैलंपात । इत्यत्र "श्यैनंपाता०" [११५] इत्यादिना मोन्तो निपा[9]त्यः । प्रत्ययस्तु पूर्वेणैव सिद्धः ॥

---

१ **बी सी** °लस्यैनं°.

---

१ **बी** क । प्रपा°. २ **ए** प्रापते°. ३ **ए सी** °र्वास्तस्यां. ४ **बी सी** °स्यां प्रपा°. ५ **सी** °पातेदु°. ६ **बी** पातेऽस्या°. ७ **सी** दानाश्च°. ८ **सी** °र्माथित्वे°. ९ **ए** °पाल्याः । प्र°. **बी** °पाल्यं । प्र°.

पादां मिथोंह्रिसंघट्टैः स्मरन्ति सहढौकिनः ।
तासु छान्दसनैमित्तमौहूर्ता भोज्यलिप्सवः ॥ ११६ ॥

११६. छान्दसनैमित्तमौहूर्ताश्छन्दो वेदं निमित्तं शकुनशास्त्रादि मुहूर्तं मुहूर्तवाचकज्योतिःशास्त्रं च विदन्तोधीयाना वा द्विजास्तासु सत्रशालासु मिथोंह्रिसंघट्टैर्गाढसंमर्देन पादश्लेषैः कृत्वा पादां पादप्रहरणां क्रीडां स्मरन्ति । यतः सहढौकिनोहमहमिकया युगपदागच्छन्तः । एतदपि कुत इत्याह । यतो भोज्यलिप्सवः ॥

चक्रे नैमित्तिको मौहूर्तिको नैयायिकश्च सः ।
शंभोः सहस्रमष्टौ चायतनानि सरस्तटे ॥ ११७ ॥

११७. स्पष्टः । किं तु नैमित्तिको मौहूर्तिको नैयायिक इति विशेषणैः शुभे निमित्ते शुभे मुहूर्त आयतनकरणव्ययितप्रभूतद्रव्योत्पादनाय लोकानां गाढदण्डपातनरूपस्यान्यायस्याकरणे चैषामायतनानां करणमुक्तमेवं चैषामतिस्थिरता सूचिता ॥

पौराणिकानुपदिकोत्रानुला(ल?)क्षणिकोकृत ।
स देवीनां शतं साग्रं प्रासादान्मातृकल्पिकः ॥ ११८ ॥

११८. स राजात्र सरस्तटे देवीनां चण्डिकादीनां साग्रं शतमष्टोत्तरं शतं प्रासादानकृताकारयत् । कीदृक् । पुराणं पञ्चलक्षणं पदान्यनुगतमनुपदं पदनिष्पादकं निरुक्तिशास्त्रमनुरूपं लक्षणमनुलक्षणं शब्दानुशासनं मातृकल्पं मातृविधिप्रतिपादकं शास्त्रं च विदन्नधीयानो वा ॥

---

१ बी सी मिथोहि°.

---

१ बी °मर्दन. सी °मर्दनेन. २ सी °पातानुरू°. ३ बी सी °मेव चैषामिति°. ४ सी °कानां. ५ ए °णश°. ६ बी सी वा । अग्नि°.

आग्निष्टोमिकयावक्रीतिकवासवदत्तिकैः ।
दशावतारीं प्रक्रतव्याख्यामत्र व्यधत्त सः ॥ ११९ ॥

११९. स राजात्र सरस्तटे दशावतारीं नारायणदशावतारप्रतिमाप्रासादं व्यधत्ताकारयत् । किंभूताम् । प्रक्रतव्याख्यां प्रारब्धव्याख्यानाम् । कैरित्याह[1] । आग्निष्टोमिकयावक्रीतिकवासवदत्तिकैरग्निष्टोममग्निष्टोमक्रतुप्रतिपादकं ग्रन्थं यवक्रीतं गायता पठता चैकेन गोविन्देनैव[2] ग्रन्थिकेनाभिनेयमाख्यानं वासवदत्तामाख्यायिकां च विद्वद्भिरधीयानैर्वा व्यासादिभिः ॥

पादाम् । अत्र "प्रहरणात्[3]०" [११६] इत्यादिना णः ॥

मौहूर्ताः । नैमित्त । छान्दस । इत्यत्र "तद्वेत्त्यधीते" [११७] इत्यण् । केचित्तु मुहूर्तनिमित्तशब्दौ न्यायादौ पठन्ति तन्मते । मौहूर्तिकः । नैमित्तिकः ॥

नैयायिकः । पौराणिक[4] । अत्र "न्यायादेरिकण्" [११८] इतीकण् ॥

पदान्त । आनुपदिकः ॥ कल्पान्त । मातृकल्पिकः ॥ लक्षणान्तः(न्त) । आनुलक्षणिकः[5] ॥ क्रतु[6] । आग्निष्टोमिक ॥ आख्यान । यावक्रीतिक ॥ आख्यायिका । वासवदत्तिकैः । अत्र "पदकल्प०" [११९] इत्यादिना-इकण् ॥

स वार्त्तिसूत्रिकान्काल्पसूत्रानागमविद्यिकान् ।
सांसर्गविद्यांस्त्रैविद्यानाङ्गविद्यांश्च कोविदान् ॥ १२० ॥
क्षात्रविद्यान्धार्मविद्याँल्लौ(ल्लौ)कायि(य)तिकविद्विषः[1] ।
याज्ञिकानौक्थिकांश्चात्र चक्रे प्रीणयितुं मठान् ॥ १२१ ॥

१२०, १२१. स राजा कोविदान्प्रीणयितुमाश्रयदानेनाह्लादयितु-

१ बी °यितक°.

१ **बी सी** °ह । अग्नि°. २ **ए सी** °न्देनेव. ३ **बी सी** °णा इ°. ४ **ए** °णिकः । अ°. ५ **बी सी** °नुलाक्ष°. **बी सी** °तु अग्नि°.

मत्र सरस्तटे मठांश्छात्रादिनिलयांश्चकेकारयत् । किंभूतान्कोविदान् । वार्त्तिसूत्रिकान्वृत्तिं सूत्रं च विदतोधीयानान्वा तथा काल्प[1]सूत्रान् ।

सिद्धरूपः प्रयोगो यैः कर्मणामवगम्यते ।
ते कल्पा लक्षणार्थानि सूत्राणीति प्रच[2]क्षते ॥

कल्पान्सूत्राणि च विदतोधीयानान्वा । तथागमविद्यां[3] तथा संसर्गविद्यां संसर्गेणौषधसंपर्केण विद्यां सुवर्णसिद्ध्यादिविद्यां तथा[4] त्र्यवयवां विद्यां[5] त्रिविद्यां वार्तात्रयीदण्डनीतीस्तथाङ्गविद्यामङ्गानां षण्णां शिक्षादीनां विद्यां यद्वाङ्गस्य शरीरस्य विद्यां शरीरलक्षणज्ञानं तथा क्षत्रविद्यां दण्डनीतिं तथा धर्मविद्यां स्मृतिं च विदतोधीयानान्वा तथा लो(लौ)[6]कायतिकविद्विषो लोकायि(य)तं चार्वाकशास्त्रं विदन्त्यधीयते[7] वा लौ[8]कायतिकास्तेषां विद्विषो निराकर्तॄन् । तथा याज्ञिकान्यज्ञं यज्ञप्रतिपादकं शास्त्रं याज्ञिक्यं वा याज्ञिकानामाम्नायं विदतोधीयानान्वा तथौक्थिकांश्चोक्थानि कानिचित्सामान्यौक्थिक्यं वौक्थिकानामाम्नायं विदतोधीयानान्वा ॥

वार्त्तिसूत्रिकान् । इत्यत्र "अकल्पात्सूत्रात्" [१२०] इतीकण् ॥ अकल्पादिति किम् । काल्पसूत्रान् ॥

आगमविद्यिकान् । इत्यत्र "अधर्मक्षे(क्ष)त्र०" [१२१] इत्यादिना-इकण् ॥ अधर्मादेरिति किम् । धार्मविद्यान् । क्षात्रविद्यान् । त्रैविद्यान् । सांसर्गविद्यान् । आङ्गविद्यान्[9] ॥

या[10]ज्ञिकान् । औक्थिकान्[11] । लौकायि(य)तिक[12] । इत्येते "याज्ञिक०" [१२२] इत्यादिना निपात्याः ॥

---

१ ए °ल्पसौत्रा°. २ बी सी °चक्ष्यते. ३ सी °द्यां यद्वा°. ४ ए °थात्राव°. ५ ए द्यां वातात्र°. ६ ए °कायिति°. बी °कायितक°. ७ ए बी °ते लोका°. ८ ए सी °कायिति°. ९ ए °न् । यज्ञि°. १० सी याचकान् । लोका°. ११ ए °न् । लोका°. १२ बी °यितक°.

अनुब्राह्मण्याढ्यैः सशतपथिकैः[1] षष्टिपथिकैः
[2]कृताध्यायान्याशूत्तरपदिकयुक्पूर्वपदिकैः ।
द्विषद्भूवाके(क्ये)भ्यः पदिक इव निर्धार्य स पदा-
न्युरून्कीर्तिस्तम्भानिव सुरगृहाणि व्यरचयत् ॥ १२२ ॥

१२२. स राजा सुरगृहाणि[1] प्रासादान् महाकीर्तिहे[2]तुत्वेनो[3]रून्महतः कीर्तिस्तम्भानिवाशु व्यरचयदकारयत् । किं कृत्वा । यथा पदिको वैयाकरणो वा[4]क्येभ्यः सकाशात्पदानि[5] विभक्त्यन्तादीनि निर्धारयति तथा द्विषद्भू[6]वाक्येभ्यो द्विषद्भुवः शत्रुभूमय एव पदसमूहात्मकत्वाद्वाक्यानि तेभ्यः सकाशात्पदानि देवगृहस्थानानि निर्धार्यैषु स्थानेषु देवगृहाणि विधास्यन्त इति पृथक्कृत्य शत्रुदेशेष्वपि देवगृहाण्यकारयदित्यर्थः । किंभूतानि । कृताध्यायानि विहितपाठानि । कैः । षष्टिपथिकैः षष्टिः पन्थानो यस्य स षष्टिपथो वेदाध्यायविशेषस्तं विदन्त्यधीयते वा तैर्द्विजैस्तथोत्तरपदिकयु[7]क्पूर्वपदिकैः समासोत्तरपदविद्युक्तैः समासपूर्वपदविद्भिश्च लाक्षणिकैश्च । किंभूतैः । अनुब्राह्मण्याढ्यै[8]र्ब्रह्मणा प्रोक्तो ग्रन्थो ब्राह्मणं तत्सदृशो ग्रन्थोनुब्राह्मणं सदृगर्थेऽव्ययीभावः । तद्विदन्त्यधीयते वानुब्राह्मणिनस्तैराढ्यैर्युक्तैस्तथा सशतपथिकैः शतपथवेदाध्यायविशेषविद्युक्तैः ॥ शिख[9]रिणी छन्दः ॥

लसत्पदोत्तरपदिकैः ससामकैः सहाश्रमैस्तव तदपत्यमत्यये ।
कुमारपाल उ अविता महीमितीशवाक्स्मृतेरयतत स स्वसिद्धये
॥ १२३ ॥

---

१ ए सी °कैः कृ°. २ बी कृतध्या°.

---

१ ए बी °णि प्रसा°. सी °णि विधास्यन्त इति पृथक्कृत्य श प्रा°. २ बी °तुत्वानारू°. ३ ए °नोन्म°. ४ सी वाकेभ्यः. ५ सी °नि दे°. ६ ए °वाकेभ्यो. ७ ए °युत्पूर्व°. ८ बी सी °ढ्यैर्ब्राह्म°. ९ ए बी शिखिरणी.

१२३. स जयसिंहः स्वसिद्धयेयतत परलोकसाधनायानशनाद्य- न्त्यक्रियां चकारेत्यर्थः । कुत इतीशवाक्स्मृतेरेवंविधसोमनाथवचः- स्मरणमवलम्ब्य । का वागित्याह । उ हे जयसिंह तवात्यये तदपत्यं तस्य त्रिभुवनपालस्यापत्यं कुमारपालो महीमविता पालयिष्यति । कैः । सहाश्रमैर्ब्रह्मचारिमुख्यैः । किंभूतैः । लसन्तः सम्यग्ज्ञानेन देदीप्यमानाः पदोत्तरपदिकाः पदं चोत्तरपदं च विदन्तोधीयाना वा वैयाकरणा येषु तैस्तथा ससामकैः सामवेदज्ञयुक्तैः ॥ रुचिरा छन्दः ॥

उपनिषदकशिक्षकेषु मीमांसकपदकक्रमकेष्वथापरेद्युः ।
जनितशुगवनीपतिर्मघोनः पुरमगमत्परमेष्ठिनः स्मरन्सः ॥१२४॥

१२४. अथापरेद्युः सोवनीपतिर्जयसिंहो मघोनः पुरमगमद्दिवं गत इत्यर्थः । कीदृक्सन् । जनितशुग्विहितशोकः । केषु विषये । उपनिषदकशिक्षकेषूपनिषदं योगशास्त्रं शिक्षां वर्णोत्पत्तिस्थानप्रतिपादकं ग्रन्थं विदत्स्वधीयानेषु वा । तथा मीमांसकपदकक्रमकेषु मीमांसां विचारणाशास्त्रं पदक्रमौ च वेदपाठभेदौ विदत्स्वधीयानेषु वा द्विजेषु तथा परमेष्ठिनोर्हत्सिद्धाचार्योपाध्यायसुसाधून्हरिहरब्रह्मणश्च स्मरन् ।

अनुब्राह्मणि । इत्यत्र "अनु०" [१२३] इत्यादिनेन् ॥

शतपथिकैः । षष्टिपथिकैः । अत्र "शत०" [१२४] इत्यादिना-इकट् ॥

---

१ बी °दशि°. २ ए बी °दक्र°.

---

१ बी °सिंह स्व°. २ बी °लोके सा°. ३ बी सी °द्यन्तक्रि°. ४ बी °विधं सो°. ५ सी °दकग्र°. ६ बी सी वाथ त°. ७ बी सी °दक्र°. ८ सी °क्रमेषु. ९ ए विधत्स्व°. १० सी °यस्वसा°.

पूर्वपदिकैः। उत्तरपदिक[11]। पदिकः। पदोत्तरपदिकैः। अत्र "पदोत्तर०" [१२५] इत्यादिनेकः॥

पदक[12]। क्रमक। शिक्षकेषु। मीमांसक। सामकैः। इत्यत्र "पदक्रम०" [१२६] इत्यादिनाकः॥ उपनिषच्छब्दादपीच्छति कश्चित्। उपनिषदक॥ औपच्छन्दसकं छन्दः॥

इति श्रीजिनेश्वरसूरिशिष्यलेशाभयतिलकगणिविरचितायां श्रीसिद्धहेमचन्द्राभिधानशब्दानुशासनद्याश्रयवृत्तौ पञ्चदशः सर्गः॥

---

१ बी °दिकः। प°. २ ए °दकः। क्र°. बी °द क्र°.

षोडशः सर्गः ।

सवार्त्तिकैरष्टकसर्वतन्त्रैः सगौतमैरेत्य कुमारपालः ।
अथाभिषिक्तः कठताण्डिमुख्यैः पैतामहं राज्यमलंचकार ॥ १ ॥

१. अथ कुमारपालः पैतामहं कुमारपालपिता[1] हि त्रिभुवनपालो जयसिंहस्य भ्रातृजत्वात्पुत्रतुल्य इति जयसिंहः कुमारपालस्य पितामहस्तत्संबन्धि[2] राज्यमलंचकार । कीदृक्सन् । कठताण्डिमुख्यैः कठेन प्रोक्तं वेदं ताण्ड्येन[3] प्रोक्तं ब्राह्मणं च विदन्त्यधीयते वा ये तत्प्रभृतिभिः पुरोहितामात्याद्यैरेत्याभिषिक्तः कृतराज्याभिषेकः । किंभूतैः । सवार्त्तिकैर्वृत्तिरेव विनयादित्वादिकणि [७. २. १६९] वार्त्तिकं तेन सह सवार्तिकं सूत्रं विदन्त्यधीयते वा तैस्तथाष्टकसर्वतन्त्रैरष्टका[4] अष्टकमष्टाध्यायमानं पाणिनीयं सूत्रं विदन्तोधीयाना वा ये सर्वतन्त्राः[5] सर्वतन्त्राणि सर्वदर्शनसिद्धान्तान्विदन्तोधीयाना वा तैस्तथा सगौतमैर्गौतमर्षिप्रोक्तवेदवित्सहितैः[6] ॥

सवार्त्तिकैः । सर्वतन्त्रैः । अत्र "ससर्वे०" [१२७] इत्यादिनाणो लुप् ॥

अष्टक । अत्र "संख्या०" [१२८] इत्यादिनाणो लुप् ॥

गौतमैः । अत्र "प्रोक्तात्" [१२९] इत्यणो लुप् ॥

वेद । कठ ॥ इन्ब्राह्मण । ताण्डि । इत्येतौ "वेदेन्०" [१३०] इत्यादिना वेत्त्यधीत एतद्विषय एव प्रयुज्येते[7] ॥ सर्गेस्मिन्नुपजातिश्छन्दः[8][9] ॥

१ बी °पालं पि°. २ सी °बन्धरा°. ३ सी ताण्डेन. ४ बी °काष्ट°. ५ ए °तन्त्रा°. ६ बी °मैर्गौत°. ७ बी सी °युज्यते. ८ ए °पज्ञाति°. ९ बी सी °तिच्छन्दः°.

स्थानेभ्य आगत्य च वास्त्रपाण्डुकम्बल्युपारोहिण आशु विप्राः ।
क्रौश्वौपगप्राग्वकवामदेव्यौशनोद्गिरो मङ्गलमस्य चक्रुः ॥ २ ॥

२. द्विजा अस्य कुमारपालस्य मङ्गलं मन्त्रपूतचन्दनाक्षतादीनां मूर्धन्यारोपेण माङ्गलिक्यं चक्रुः । किंभूताः सन्तः । क्रौश्चो(श्चौ)पगप्राग्वकवामदेव्यौशनोद्गिरः क्रौश्चेनर्षिणौपगवेनर्षिणा वामदेवेनर्षिणोशनसा च शुक्रेण दृष्टानि सामानि क्रौश्चौपगवकवामदेव्यौशनानि तदुद्गिरस्तान्युच्चारयन्तः । किं कृत्वा । स्थानेभ्यो द्विजसंबन्धिपुरग्रामादिभ्य आश्वेत्यागत्य । यतो वस्त्रेणच्छन्ना रथा वास्त्राः पाण्डुकम्बलेनच्छन्ना रथाः पाण्डुकम्बलिनो द्वन्द्वे तेषूपारोहिणो महर्द्धिकत्वेनारोहणशीलाः ॥

औशेष्वधीतौशनसो नु शातभिषो नु ना शातभिषज्य आसीत् ।
प्रगल्भधीर्नीतिपथे गुणैश्च दुर्धर्षताद्यैरतिशातभः सः ॥ ३ ॥

३. स राजा नीतिपथे राजनीतिमार्गविषये प्रगल्भधीरासीत् । यथौशेषूशनसा दृष्टेषु सामसु विषयेधीतमौशनसं साम येन सोधीतौशनसो ना नरः प्रगल्भधीः स्याद्यथा वा शातभिषः शतभिषजि नक्षत्रे जातो नरः शातभिषज्ये शतभिषग्जातकर्मणि रौद्रक्रियादौ विषये प्रगल्भधीः स्यात् । तथा स दुर्धर्षताद्यैर्दुरभिभवनीयतादिभिर्गुणैः कृत्वातिशातभश्च शतभिषग्जातनरमतिक्रान्तश्चासीत् । शतभिषजि

---

१ ए क्रौञ्चोप°. २ बी °देव्योश°. ३ बी °द्गिरा म°. ४ बी °नसा नु. सी °नशो नु.

---

१ बी सी °रोपण. २ ए °सा शु°. ३ ए बी क्रौञ्चोप°. ४ सी °भदोव्योश°. ५ ए °देव्योश°. ६ ए °लेच्छ°. ७ ए सी रथा पा°. ८ सी राजनी°. ९ बी °नीयादि°.

जातो हि नरो दुर्धर्षतादिगुणोपेतः स्यात् । नीतिज्ञो विक्रान्तश्चायं राजाभूदित्यर्थः ॥

वाभ्रव्य । इत्यत्र "तेन०" [१३१] इत्यादिनाण् ॥

पाण्डुकम्बलि । इत्यत्र "पाण्डु०" [१३२] इत्यादिनेन् ॥

क्रौञ्च । इत्यत्र "दृष्टे साम्नि नाम्नि" [१३३] इत्यण् ॥

औपगवक । इत्यत्र "गोत्रादङ्कवत्" [१३४] इत्यतिदेशादङ्केर्थे "गोत्राद-दण्ड०" [६. ३. १६९] इत्यादिना योकञ् विहितः स स्यात् ॥

वामदेव(व्य) । इत्यत्र "वाम०" [१३५] इत्यादिना यः ॥

औशन । इत्यत्र योण् विहितः स "ङिद्वाण्" [१३६] इति वा ङित् ॥ पक्षे । औशनसः ॥

शातभिषः । शातभिषज्ये[2] । अत्र "वा जाते द्विः" [१३७] इति जातेर्थे पुनर्विहितोण्[3] वा ङित् ॥ केचित्तु द्विर्ङित्त्वमिच्छन्ति । तन्मते[4] द्विर्ङित्त्वाद्विर-न्त्यस्वरादिलोपे शातभः । एवं पूर्वसूत्रेपि । औशेषु । एवं च योगद्वयेपि त्रैरूप्यं सिद्धम् ॥

लोकात्सदा न्याय्यकराभितुष्ट इयेष नैषोपनयेन वित्तम् ।
किं स्थाण्डिलः कार्परमाल्लकोख्यभ्राष्ट्रान्नभुकाङ्क्षति शूल्यभिक्षाम् ४

४. एष राजा लोकात्सकाशादपनयेन[5]ान्यायेन सदा वित्तं द्रव्यं नेयेष यतो न्याय्यो न्यायादनपेतो यः करो राजग्राह्यो भागस्तेनाभि-तुष्टः । अर्थान्तरन्यासमाह । स्थाण्डिलः स्थण्डिल एव शयनव्रतो भिक्षुः शूल्यभिक्षां शूल्यस्य शूले संस्कृतस्य मांसस्य भिक्षां किं काङ्क्षति निन्द्यत्वान्नैवेत्यर्थः । यतः कर्पर[6] उद्धृतं[7] कार्परं मल्लके[8] शराव उद्धृतं

१ सी °त्र योण्. २ बी °षजे । अ°. ३ ए वा दितः । के°. ४ ए °तेर्ङि°. सी °ते द्विङित्वा°. ५ ए °ना स°. ६ सी कर उ°. ७ सी तं मा°. ८ बी °के सरा°.

माल्लकमुखायां स्थाल्यां संस्कृतमुख्यं भ्राष्ट्रे संस्कृतं भ्राष्ट्रं च यदन्नं तस्य[1] भुग्भोक्ता ॥

माल्लैक[2] । कार्पर । इत्यत्र "तत्र०" [१३८] इत्यादिनाण् ॥

स्थाण्डिलः । अत्र "स्थण्डिलाच्छेते व्रती" [१३९] इत्यण् ॥

भ्राष्ट्र । इत्यत्र "संस्कृते भक्ष्ये" [१४०] इत्यण् ॥

शूल्य । उख्य । इत्यत्र "शूलोखाद्यः"[3] [१४१] इति यः ॥

असाधुरौदश्वितरुच्यनीतेश्चित्तेस्य नो साधुतया न्यवात्सीत् ।
क्षैरेयतां दाधिकतां च नौदश्वित्कं भजेद्रासनवेदिनो हि ॥५॥

५. अस्य[4] राज्ञश्चित्तेसाधुः साधुतया[5] न न्यवात्सीत् । यत उदश्विति तक्रे संस्कृतं "संस्कृते भक्ष्ये"[6] [६. २. १४०] इत्यणि औदश्वितं प्रलेहस्तदिव रुच्याभिप्रेता नीतिर्न्यायो यस्य तस्य । युक्तं चैतत् । हि यस्माद्रासनवेदिनो[7] रोगादिनाप्रतिहतरसनेन्द्रियत्वाद्रसनाग्राह्यमाधुर्यादिरससंवेदिनः पुंस औदश्वित्कमुदश्विति संस्कृतमोदनादि[8] क्षी(क्षै)रेयतां क्षीरे संस्कृतत्वं परमान्नतां दाधिकतां च दध्नि संस्कृतत्वं दधिसंस्कृतौदनतां वा न भजेत् ॥

क्षैरेय । इत्यत्र "क्षीरादेयण्" [१४२] इत्येयण् ॥

दाधिकताम् । अत्र "दध्नः" [१४३] इति(त्यादिना)-इकण् ॥

औदश्वित्कम्[9] औदश्वित । इत्यत्र "वोदश्वितः" [१४४] इतीकण्वा ॥

रासन । इत्यत्र "क्वचित्" [१४५] इत्यण् ॥

द्वाविंशः पादः ॥

---

१ बी °स्य भोक्ता. २ ए °ल्लका°. ३ बी शूल्योखा°. ४ सी °स्य । अथोत्त°. षष्ठश्लोकसमाप्तिपर्यन्तं न वर्तते. ५ ए °या न्य°. ६ ए °स्कृतं भ°. ७ बी °नो रागा°. ८ बी °तमौद°. ९ ए °श्वित°.

नादेयपूराभबलः स कृत्यशेषेपि नाशेत यतस्ततोमुम् ।
माहेयराड्राष्ट्रियराजमुख्या भूपा अदूरेत्यभुवोभजन्त ॥ ६ ॥

६. यतो यस्माद्धेतोः स राजा कृत्यशेषेपि स्तोकेपि कार्ये नाशेत नालस्यभूत् । कीदृक्सन् । नादेयपूराभबलो नदीभवप्रवाहतुल्यबलः । तस्मान्महोत्साहरूपाद्धेतोर्मह्यां भवा माहेया महियडा इति प्रसिद्धाः क्षत्रियभेदास्तेषां राड्नोद्रहदेशाधिपस्तथा राष्ट्रे भवा राष्ट्रियाः क्षत्रियभेदास्तेषां राजा राष्ट्रियराजो द्वन्द्वे तदादयो भूपा अमुमभजन्त । किंभूताः सन्तः । अदूरेत्याः समीपभवा भुवो येषां ते तथा निकटस्था इत्यर्थः ॥

शेषे । इत्यनेन "शेषे" [१] इति सूत्रं सूचितम् ॥

नादेय । माहेय । इत्यत्र "नद्यादेरेयण्" [२] इत्येयण् ॥

राष्ट्रिय । इत्यत्र "राष्ट्रादियः" [३] इतीयः ॥

दूरेत्य । इत्यत्र "दूरादेत्यः" [४] इत्येत्यः ॥

अथो(थौ)त्तराहाखिलशैवहारावारीणपारीणनृपैः सहैव ।
आन्नो नृपोस्मिन्मदतोतिपारावारीणनागः सहसा व्यरुद्ध॥७॥

७. अथान्नो नृपः सपादलक्षदेशाधिपोस्मिन्कुमारपालविषये सहसातर्कितमेव व्यरुद्ध । जयसिंहे स्वर्गते नवराजत्वेन कुमारपालमसमर्थं मन्यमानो विरोधकारणाभावेप्यतर्कितं तेन सह विरोधं चकारेत्यर्थः । कीदृक्सन् । सहैव सहित एव । कैरित्याह । औत्तराहा उत्तरस्यां दिश्युत्तरस्मिन्देशे वा भवास्तथाखिला ये शैवहाराः शिव-

१ बी °व । अन्नो.

१ ए राड्नोद्र°. २ सी °रवि°. ३ बी °सिंहस्व°. ४ ए विधं. ५ ए °त्याद्योत्त°. ६ सी °था पारीणाः.

हारानदीसंबन्धिनस्ते तथावारीणा अवारे प्रस्तावाच्छिवहारानद्या अर्वाक्तटे भवास्तथा पारीणाः पारे शिवहारायाः परतटे भवा विशेषणद्वन्द्वे एते ये नृपास्तैः । यतो मदतो बलाद्यवले[1]पादतिपारावारीणनागः पारावारेऽब्धौ भवं जातं वा नागमैरावणमतिक्रान्तः ॥

प्राच्यं च व(ब?)ल्लालमयुङ्क्त पारातोवारपारीणनृपैरपाच्यैः ।
प्रतीच्यराट्पार्ष्णिनिपीडनार्थमुदीच्यरा[1]ण्नीत्यतिदिव्यमन्त्री ॥ ८॥

८. उदीच्यराडुदीच्यानामुत्तरदिग्भवानां सपाद[2]लक्षादिदेशनृणां राजान्नः प्रतीच्यानां गूर्जर[3]त्रादिपश्चिमदे[4]शभ[5]वानां नृ[6]णां रा[7]ट् कुमारपालस्तस्य यः पार्ष्णिः प[8]श्चाद्भागदेशस्तस्य निपीडनार्थमुपद्रवणार्थं प्राच्यमवन्तिदेशाधिपं ब[9]ल्लालं बल्लालदेवाख्यं नृपं पारातोवन्तिदेशस्थपारानद्याः सकाशादयुङ्क्त च । कैः सह । अपाच्यैर्दाक्षिणात्यैरवारपारीणनृपैरवारपारेऽब्धौ भ[10]वैर्नृपैः । यदा कुमारपालो मया सह युध्यते तदा युष्माभिरेतस्य पश्चाद्देशो भञ्जनीय इत्येवं मैत्रीदानसन्मानादिकरणेन प्रेरितवानित्यर्थः । यतो नीत्य[11]तिदिव्यमन्त्री नीतौ राजनीतिविषये दिव्यमन्त्रिणं बृहस्पतिमप्यतिक्रान्तः । गूर्जरत्रापेक्षया सपादलक्षदेश उत्तरः । सपादलक्षापेक्ष[12]या च गूर्जर[13]त्रा पश्चिमा । गूर्जरत्रासपादलक्षापेक्षया चावन्तयः पूर्वा इत्यन्योन्यापेक्षयावन्त्यादिदेशानां प्राग्देशत्वादिव्यवहारः । यद्वेशानतो नैऋ(र्ऋ)तिं गच्छन्त्याः शरावतीनद्या अपेक्षयावन्त्यादिदेशानां प्राग्देशत्वादिव्यवहारः । तथा च वैयाकरणाः । कः पुनः प्राग्देशो

१ बी °राणील्स°.

१ **सी** °लेपतोति°. २ **सी** °ददे°. ३ **ए** °रवादि°. ४ **सी** °देशानां भ°. ५ **ए** °भवां नृ°. ६ **बी** नृपाणां. ७ **सी** राजा कु°. ८ **ए** °श्चारादे°. ९ **ए** °ह्लालादे°. १० **बी सी** °वैर्भूपैः. ११ **सी** °तिविदि°. १२ **सी** °या चा°. १३ **बी** °त्रा स°.

यः शरावत्याः सरितः पूर्वोत्तरेण वहन्त्याः पूर्वतो दक्षिणतो वा भवति[1] यस्तु पश्चिमेत[2] उत्तरतो वा स उदगिति। ततश्च तत्तद्देशाधिपानां[3] बल्लालादीनां प्राच्यत्वाद्युक्तिरुपपन्नेति ॥

औत्तराह। इत्यत्र "उत्तरादाहञ्" [५] इत्याहञ् ॥

पारावारीण। इत्यत्र "पार०" [६] इत्यादिनेनः ॥

पारीण। अवारीर्ण[4]। अवारपारीण। इत्यत्र "व्यस्त०" [७] इत्यादिनेनः ॥

दिव्य[5]। प्राच्यम्। अपाच्यैः। उदीच्य। प्रतीच्य। इत्यत्र "द्युप्राग्०" [८] इत्यादिना यः ॥

ग्रामेयकाग्राम्यवचःप्रवीणैः कात्रेयकैराह्वत राजचक्रम्।
ग्रामीणकौलेय[1]कवत्सकौण्डेयकं सकौणेयकमेष दूतैः ॥ ९ ॥

९. ग्रामीणो ग्रामे भवो यः कुले[6] शुद्धान्वये भवो[7] जातो वा कौलेयको जात्यश्वः प्रचण्डबलशौर्यादिगुणैस्तत्तुल्य एष आम्नो दूतैर्नृपचक्रमाह्वतामारयत्। किंभूतम्। सकौण्डेयकं[8] सकौणेयकं च कुण्ड्यां[9] कुण्यां च नगर्यौ ग्रामौ वा। कुण्ड्यान्ध्रदेशे नदीत्येके। तत्र भवैर्जातैर्वा नृपैः सहितम्। किंभूतैर्दूतैः[10]। कात्रेयकैः कुत्सितास्त्रयो धर्मादयो यत्र तत्र[11] कत्रौ देशे भवैर्जातैर्वा। तथा ग्रामेयकमसभ्यम[12]ग्राम्यं च[13] सभ्यं[14] च यद्वचो यद्वा ग्रामेयकाणां मूर्खाणामग्राम्याणां च विदुषां[15] च यद्वचस्तत्र प्रवीणैः सर्वभाषानिपुणैरित्यर्थः ॥

---

१ **बी** °कौलीय°.

---

१ **सी** °ति प°. २ **ए** °मतो उ°. ३ **सी** तद्दे°. ४ **सी** °ण। इ°. ५ **ए** दिव्यः। प्रा°. ६ **सी** °ले सिद्धा°. ७ **ए** भवे जाते वा. **बी** भवे जातौ वा. ८ **बी** °कं सकौण्डेयकं स°. ९ **ए** °ण्ड्या च. १० **सी** °भूतैः का°. ११ **सी** °त्र कात्रे दे°. १२ **ए** °सत्यम°. १३ **ए** सत्यं च. १४ **बी सी** °भ्यं य°. १५ **बी सी** °षां य°.

ग्रैवेयकी प्रास्थित दीप्रकौक्षेयकः स गर्वादतिदाक्षिणात्यः ।
पौरस्त्यपाश्चात्यचमूनियुक्तवाह्लायनौ[1]दा[2]यनसैन्यपालः ॥१०॥

१०. स आन्नः प्रास्थित प्रस्थानं चक्रे । कीदृक्सन् । ग्रैवेयकी मङ्गल्याय ग्रीवालङ्कारवानुपलक्षणत्वात्परिहितसर्वालंकारस्तथा दीप्र उत्तेजितः कौक्षेयकः कङ्ककुक्षिनि[1]र्जीर्णेनायसा कृतोसिर्यस्य स गृहीतासिरित्यर्थः । तथा गर्वा[2]दतिदाक्षिणात्यो[3] दाक्षिणात्यं दक्षिणस्यां दिशि भवं रावणमतिक्रान्तस्तथा पौरस्त्या[4]ग्रेतनी पाश्चात्या[5] च पश्चाद्भागभवा ये चम्वौ तयोश्छल[6]कप्रतिद्विषदादिकृतोपद्रवाभावाय नियुक्तौ वाह्लायनो वह्लिषु देशे भवो राजौदायनश्चौ[7]दौ[8] क्रीडायां कुशल उ(ऊ?)र्दिदेशे भवो वा राजा सैन्यपालौ[9] येन स तथा ॥

स कापिशायन्यरुणेक्षणः सपार्दायनः पश्चिमभूमिमिच्छन् ।
गर्जन्ययौ गौरिव राङ्कवो[2] राङ्कवायणीं गां दुरमात्यवर्गः ॥११॥

११ स[10] आन्नो ययौ पश्चिमभूमिं प्रत्यचालीत् । कीदृक्सन् । सपार्दायनः । पर्दिदे[11]शभवेन राज्ञा सहितस्तथा कुमन्त्रकृत्त्वाद्दुष्टोमात्यवर्गो यस्य स तथात एव पश्चिमभूमिं गूर्जरत्रामिच्छन्नत एव च कापिश्यां नगर्यां नद्यां वा भवा कापिशा[12]यनी द्राक्षा तद्वद्गूर्जरत्राधिपोपरि कोपाटोपेनारुणे ईक्षणे यस्य स तथा गर्जन् सिंहनादं मुञ्चन् । यथा राङ्कवो रङ्कुदेशे भवो[13] गौर्वृषभो गर्जन्[14][15] वाद्रकुर्वन्सन्राङ्कवायणीं गां धेनुं कामातुरतया याति ॥

---

१ बी °नौदाय°. २ बी राद्रकवा°.

---

१ सी °निर्जीर्णेना°. २ बी °वादिति°. ३ बी सी °त्यो द°. ४ बी °रस्त्योग्रे°. ५ बी °त्या चा प°. ६ सी °लकः प्र°. ७ बी °नश्चार्दौ. ८ ए °श्चोदौ क्री°. ९ ए सी °पालो ये°. १० बी स अन्नो. ११ बी °देशे भ°. १२ ए बी °शायिनी. १३ सी भवा गौ°. १४ सी °र्जन्सन्राकवा°. १५ बी °न् त्राद्रकुर्न्स°.

कत्यस्ततस्त्यो न्वसि नास्मि तत्रत्यः किं त्वहं नित्यमिहत्य एवम् ।
तदीयनिष्ट्यानभिवञ्च्य कश्चिदाविष्ट्य आगात्प्रणिधिश्चुलुक्यम् ॥१२॥

१२. कश्चित्प्रणिधिश्चर आविः प्राकाश्ये भव आविष्ट्यः प्रकटः संश्चुलुक्यमागात् । किं कृत्वा । तदीयनिष्ट्यानान्नसंबन्धिनश्चण्डालानभिवञ्च्यच्छलयित्वा । कथमित्याह । अहो नरासि त्वं कत्यः कस्मिन्देशे पुरे वा भवो नु । शङ्कामहे । ततस्त्योसि तस्मात्पश्चिमदेशादागतस्त्वं कुमारपालचरस्त्वमित्यर्थः । इत्युक्ते प्रत्युक्तिर्यथा । नास्मि तत्रत्यो नाहं तस्मिन्पश्चिमदेशे भवः किं त्वहं नित्यमिहत्योस्मिन्सपादलक्षदेशे भव एवंप्रकारेण ॥

ग्रामीण । ग्राम्य । इत्यत्र "ग्रामादीनञ्च" [९] इतीनञ् यश्च ॥

कात्त्रेयकैः । ग्रामेयक । इत्यत्र "कत्त्रि० [१०] इत्यादिनैयकञ् ॥

कौण्डेयकम् । कौणेयकम् । अत्र "कुण्ड्या०" [११] इत्यादिना-एयकञ् यलुक् ॥

कौलेयक । कौक्षेयकः । ग्रैवेयकी । इत्यत्र "कुल०" [१२] इत्यादिना-एयकञ् ॥

दाक्षिणात्यः । पाश्चात्य । पौरस्त(स्त्य) । इत्यत्र "दक्षिणा०" [१३] इत्यादिना त्यण् ॥

वाह्लायनौदायन । पादायनः । कापिशायनी । इत्यत्र "वह्लि०" [१४] इत्यादिना टायनण् ॥

---

१ बी °त्प्रणधि°.

---

१ बी °विः प्रका°. २ बी °नश्चाण्डा°. ३ ए सी °हो निरा°. ४ ए सी °नन्यं°. ५ ए सी °क । कौ°. ६ पुस्तकत्रयेपि 'कुण्डेत्यादिना' इति वर्तते. ७ बी सी °यकः । कौ°. ८ सी °ञ् । राङ्क°. ९ बी °यनैदा°. १० बी °यनः । का°. ११ ए °थ । का°. १२ ए °शायिनी.

राङ्कवायणीं गाम् राङ्कवो गौः । अत्र "रङ्कोः प्राणिनि वा" [१५] इति वा टायनण् ॥

कल्यः । इहत्यः । अमात्य । तत्रत्यः । ततस्त्यः । अत्र "क्वेह०" [१६] इत्यादिना त्यच् ॥ आविःशब्दादपि कश्चित् । आविष्ट्यः ॥

नित्यम् । अत्र "नेर्ध्रुवे" [१७] इति त्यच् ॥

निष्ट्यान् । इत्यत्र "निसो गते" [१८] इति त्यच् ॥

ऊचे स नत्वेति तवैषमस्त्योप्यनैषमस्तन्य इवारिरान्नः ।
दिनेचलद् ह्यस्तन एष्यति श्वस्तने च नूनं तव देशसीमाम्॥१३॥

१३. स प्रणिधिर्नत्वेत्यूचे । यथा हे राजन्नान्नो ह्यस्तनेतीते कल्यदिनेचलत्तवाभिषेणनायाचालीत् । तथा नूनं श्वस्तने दिने भाविकल्यदिवसे तव देशसीमामेष्यति । यत एष(ऐ)षमस्त्योप्यस्मिन्संवत्सरे भवोपि नास्त्यैषमस्तन्यमिदंसंवत्सरभवतास्य सोनैषमस्तन्य इवातिप्ररूढवैरेण चिरकालीन इव तवारिः ॥

ह्यस्ते(स्त्ये) दिने कान्थिककान्थकारण्यशैवरूप्येट् च सपौर्वशालः ।
भिन्नस्तव श्वस्त्यदिनेभिगन्ता तं चाहडो हस्त्यधिरोहणेन्द्रः ॥१४॥

१४. हे राजंस्तव संबन्धी कान्थिककान्थकारण्यशैवरूप्येट् च कान्थिकाः कन्थायां ग्रामविशेषे भवा नराः कान्थका वर्णाख्यह्रदसमीपस्थकन्थाग्रामभवा नरा आरण्या अरण्ये भवाः पशुवृक्षादयः शैवरूप्याः शिवरूप्ये देशभेदे भवा नरा द्वन्द्वे तेषामीट् च राजा ह्यस्त्ये दिनेतीते

१ सी °मात्यः । त°. २ बी °त्रत्य । त°. ३ सी क्वे इ°. ४ ए बी प्रणधि°. ५ सी °दिने त°. ६ बी यतो एष°. ७ ए नास्त्यैष°. ८ ए °त्सरे भ°. ९ बी सी °ता यस्य सौनै°. १० ए °रिः । हस्ते दि°. ११ बी °रूपदे°. सी °रूपे दे°. १२ ए °जा हस्त्ये. १३ सी ह्यस्ते दि°.

कल्ये भिन्नस्त्वत्तो भेदं गत आन्नं श्रित इत्यर्थः । कीदृक् । सपौर्वशालस्तव पूर्वस्यां शालायां भवैः सुभटाश्वादिभिर्युतः । तथा तव संबन्धी हस्त्यधिरोहणेन्द्रो हका(क्का?)मात्रेण हस्तिनां वित्रा[1]सकत्वाद्धस्त्यधिरोहणेषु सादिषु(?) स्वामी चाहडः श्वस्त्यदिने तमान्नमभिगन्ता श्रयिष्यति ॥

[1]तं पौर्वमद्रेडपरे[2]षुकामशमोभजद्गौमततैकगो(गौ)ष्ठाः ।
वाहीकराड्रौमकराट् च याक्लोमोथ पाटच्चरशौ[3]रसेनौ ॥ १५ ॥

१५. पू(पौ)र्वमद्रेट् पूर्वेषु मद्रेषु देशेषु भवानां नृणां राजा तमान्नमभजत्तथापरेषुकामशमश्चापरेषुकामशमीग्रामस्य राजाचाभजत्तथा गौ[2]मततैकगो(गौ)ष्ठा गोमत्या नद्या राजा तैक्या गोष्ठयाश्च वाहीकेषु ग्रामयोर्नृपौ द्वन्द्वे ते चाभजंस्तथा वाहीकरा[3]ड्रौमकराट् च वाहीके दे[4]शे रोमके प्राग्दे[5]शग्रामे च भवानां नृ[6]णां नृ[7]पौ याक्लो[8]मश्च यक्लोम्न्युदग्रामे भवो राजा चाथ तथा[9] पाटच्च[10]रशौरसेनौ पटच्चरे प्राग्ग्रामे[11] शूरसेनेषु देशेषु च भवौ नृपौ चाभजन् ॥

नैकेतयुक्शाकलकाण्वदाक्षचैङ्कीयकाशीयमुखैः स वेत्ति ।
भावत्कवृत्तिं भवदीयपुर्यां च[4]रैर्वसद्भिर्जनकीयवृत्त्या ॥ १६ ॥

१६. एषे[12] आन्नो[13] नैकेती[14] वाहीकग्रामस्तत्र भवा नैकेतास्तैर्युजो युक्ता ये शाकलकादयः शकलस्य कण्वस्य दक्षस्य चर्षेश्चिङ्कस्य प्राच्य-

१ ए बी तं पूर्व°. २ ए सी °परेपु°. ३ बी °रमौर°. ४ सी °र्यां चौरै°.

१ ए विवास°. २ सी गौतमतै°. ३ बी राड्रोम°. ४ ए देशो रो°. ५ सी °ग्देशे ग्रा°. ६ ए नृपौ. ७ बी सी नृपो या°. ८ बी क्लोम्न्यु°. ९ सी °था पट°. १० बी °रसौर°. ११ बी °मे सूर°. १२ बी °ष अन्नो. १३ ए आन्नौ नै°. १४ ए °ती याहैक°.

गोत्रस्य[1] काशस्य भरतगोत्रस्य क्षत्रियस्यापत्यानि वृद्धानि शार्कल्यका[2][3]ण्व्यदाक्षिचैङ्किकाशयस्तेषामिमे चरास्तत्प्रमुखैश्चरैः कृत्वा भावत्कवृत्तिं[4] त्वदीयवृत्तान्तं वेत्ति। यतः किंभूतैः। जनकीया लोकसंबन्धिनी[5] या वृत्तिर्वाणिज्यादिव्यापारस्तया कृत्वा भवदीयपुर्यां वसद्भिः। एतेनास्य विजयः सुलभ इत्युक्तम्॥

अराजकीयोजनि सोपि गोनर्दीयोस्य[1] बुद्ध्या परकीयवृत्तिः।
तदुष्णकालीय[2] इवातपस्ते तं गच्छतो धक्ष्यति[3] पार्ष्णिभागम्॥१७॥

१७. हे राजन्स त्वत्सेवकत्वेन प्रसिद्धो गोनर्दीयोपि गोनर्दे गोर्णदेत्याख्यया[6] लोके प्रसिद्धेवन्तिदेशमध्यस्थे पत्तने भवो बल्लालोपि राज्ञः कुमारपालस्यायं राजकीयो न तथाराजकीयोजनि। यतोस्यान्नस्य बुद्ध्या परकीया त्वच्छत्रोरान्नस्य संबन्धिनी वृत्तिर्जीविका यस्य सः। तत्तस्माद्धेतोस्ते तव[7] तमान्नं गच्छतोभिषेणयतः सतस्ते पार्ष्णिभागं पाश्चात्यदेशमसौ धक्ष्यत्यग्निदानेन[8] भस्मसात्करिष्यति यथोष्णकालीयो ग्रीष्मसंबन्ध्यातपो गच्छतो नरस्य पार्ष्णिभागं पादपश्चाद्भागं दहति॥

ऐषमस्त्यः अनैषमस्तन्यः[9]। ह्यस्ते(स्त्ये) ह्यस्तने[10]। श्वस्त्य[11] श्वस्तने। अत्र "ऐषमः०" [१९] इत्यादिना त्यच् वा॥

कान्थिक। इत्यत्र "कन्थाया इकण्" [२०] इतीकण्॥

कान्थक। इत्यत्र "वर्णावकञ्" [२१] इत्यकञ्॥

---

१ ए °नदीयो°. २ सी °लीन इ°. ३ बी धक्षति.

---

१ सी °स्य भ°. २ सी °कलकाण्वदा°. ३ बी °काण्वादा°. ४ बी °त्कतृत्तं°. ५ ए °कीयलो°. ६ सी °णदत्ताख्य°. ७ सी तवान्नं. ८ बी धक्षत्य°. ९ ए सी °स्तन्य। ह्य°. १० सी °स्तन्ये। श्व°. ११ बी श्वस्त्यः श्व°.

शैवरूप्य । आरण्य । इत्यत्र "रू[1]प्य०" [२२] इत्यादिना णः ॥

पौर्वशालः । अत्र "दिक्पूर्वादनाम्नः" [२३] इति णः । अनाम्न इति किम् । अप[2]रेषुकामशमः ॥

पौर्वमद्र । इ[3]त्यत्र "मद्रादञ्" [२४] इत्यञ् ॥

याकृल्लोमः । अत्र "उदग्०" [२५] इत्यादिनाञ् ॥

गौष्ठाः । तैक । नैकेत । गौमत । शौरसेनौ । वाहीक । रौमक । पाटच्चर । इत्यत्र "गोष्ठी०" [२६] इत्यादिनाञ् ॥

शाकल । काण्व । इत्यत्र "शकलादेर्यञः" [२७] इत्यञ् ॥

दाक्ष । इत्यत्र "वृद्धे[4]ञः" [२८] इत्यञ् ॥

प्राचः । चैङ्कीय । भरतात् । काशीय । इत्यत्र "न द्वि०" [२९] इत्यादिना नाञ् ॥

भावत्क । भवदीय । इत्यत्र "भवतोर्०" [३०] इत्यादिना-इकणीयसौ ॥

परकीय । जनकीय । राजकी[5]यः । अत्र "परजन०" [३१] इत्यादिना कीयः ॥

गोन[6]र्दीयः । अत्र "दोरीयः" [३२] इतीयः ॥

उष्णकालीय । इत्यत्र "उष्णादिभ्यः कालात्" [३३] इतीयः ॥

वैकालिकीमप्यथ तामवैकालिकां नु तद्वृत्तिमवेत्य भूपः ।
बुद्ध्येति[1] तात्कालिकयालुलोचे तात्कालिकीं कुद्विकृतिं विजित्य ॥ १८ ॥

---

१ बी °ति तत्का°.

---

१ ए सी रूपेत्या°. २ ए °परैषु°. ३ बी °त्यम°. ४ सी °द्धेञ्यः इ°. ५ सी °कीय । अ°. ६ सी °नदीयः.

१८. अथैवं चरोक्त्यनन्तरं भूपस्तात्कालिकया तत्कालोद्भवया बुद्ध्येति वक्ष्यमाणमालुलोचेचिन्तयत् । किं कृत्वा । तां विरोधरूपां तद्वार्त्तिं त[1]स्यान्नस्य व्यापारं वैकालिकीमपि कुमारपालस्य तदैव राज्येभिषिक्तत्वे[2]नासमयोत्पन्नामपि महाविक्रान्तत्वेनावैकालिकां नु समयोत्पन्नामिवावेत्य ज्ञात्वा तथा तात्कालिकीं तत्कालोद्भवां क्रुद्विकृतिं कोपविकारं विजित्य ॥

वैकालिकाम् । वैकालिकीम् । तात्कालिकया । तात्कालिकीम् । अत्र "व्यादिभ्यः०" [३४] इत्यादिना णिकेकणौ ॥

स काशिकीं तर्हि कलां विदन्न-
प्या वञ्चितः काशिकया निकृत्या ।
तां चैदिकीं द[1]र्शयताशु भ[2]क्ति-
मचैदिकां[3]मद्य च तेन तातः ॥ १९ ॥

१९. स सर्वत्र प्रसिद्धस्तातो जयसिंह आः खेदे । तेनान्नेन वञ्चितः । किंभूतेन सता । तर्हि तस्मि[3]न्नद्यतने जयसिंहकालेसमर्थत्वात्काशिकया निकृत्या । काशिदेशे हि माया बहु विजृम्भतेत एव महादाम्भिकं प्रति वाराणसिको[4]यं बक इति लोकैरुच्यते । इति [5]वाराणसीसंबन्धिन्या मायया कृत्वा तां सर्वलो[6]कप्रसिद्धां चैदिकीं भक्तिं चेदिदेशलोको हि प्रायो विनीतः सरलस्वभावश्च स्यादिति चेदिदेशसंबन्धिनीं विनयप्रतिपत्तिं सरलस्वभावतां च दर्शयताद्य चाधुना मम समये त्वाशु शीघ्र[7]मचेदिकां भक्तिं दुर्वि[8]नीतत्वं दर्शयता ।

१ ए °र्शयिता°. २ सी °भक्तम°. ३ ए °काद्य.

१ ए तथान्न°. २ ए °नावै°. ३ बी °न्नद्य°. ४ बी °यं ठक. ५ बी वाणारसी°. ६ बी °लोके प्र°. ७ सी °मचैदि°. ८ ए °नीतित्वं.

कीदृक्तातः । काशिकीं कलां मायां विदन्नप्ययं नरो मायावीत्याकृत्यादिना जानन्नपि । यद्यसौ तदा तातं तथा नाच्छलयिष्यत्तदामुं तातस्तदैवोदच्छेदयिष्यदित्यर्थः ॥

काशिकया । काशिकीम् । चैदिकाम् । चैदिकीम् । अ[त्र] "काश्यादेः" [३५] इति णिकेकणौ ॥

सिद्धेशि कारन्तपिकाह्वजालिकीवत्स भूत्वात्तनवौर्णवासाः ।
उन्मृष्टकारन्तपिकीरदाच्छं किं तद्यशोमय्यपि हर्तुमिच्छेत् ॥२०॥

२०. स आन्नस्तद्यशो नवौर्णवासःपरिधानोत्थां सिद्धेशकीर्तिं मय्यपि मयि सत्यपि मामप्यनादृत्य चैवं विरोधकरणेन किं हर्तुमिच्छेत् । किंभूतम् । उन्मृष्टा दन्तपवनेन निर्मलीकृता ये कारन्तपिक्याः कारन्तपे वाहीकग्रामे भवाया नार्या रदा दन्तास्तद्वदच्छं निर्मलम् । किं कृत्वा । सिद्धेशि जयसिंहसमीप आत्तनवौर्णवासाः स्वस्य किंकरत्वंव्याख्यापनाय परिहितनव्यकम्बलवस्त्रो भूत्वा । यथा कारन्तपिकाह्वजालिकी च कारन्तपे वाहीकग्राम आह्वजाल उशीनरग्रामे भवे स्त्रियौ नवौर्णवाससौ भवतः । कारन्तपादिषु हि ऊर्णवासांसि परिधीयन्ते ॥

तस्यास्म्यपत्यं कथमाह्वजालिकोभं पुनश्चेत्प्रकरोमि नैनम् ।
सहैव भूपैर्वृजिकाह्वजालीयमद्रकैर्नापितवास्तुकैश्च ॥ २१ ॥

१ सी °द्धेशका°. २ बी °काह्व पु°.

१ बी विन्दन्न°. २ बी °त्या जा°. ३ बी सी °वोच्छे°. ४ ए °ति किं । णि°. ५ सी °कीर्तिः म°. ६ सी °भूताम्. ७ बी °वायो नार्यो र°. ८ ए °मैलं कृ°. ९ सी °द्धेश ज°. १० ए किंकिरव्या°. ११ सी °त्वख्या°. १२ बी °ह्वजले शी°. १३ ए °पाविच्छु हि. १४ सी हि और्ण°.

२१. यथैकवेलं[1] मत्पितैनं विजित्याह्वजालिकाभमात्तौर्णवा[स]सं चक्रे तथा चेदहं पुनः प्रकर्षेण न करोमि तदाहं तस्य जयसिंहस्य कथमपत्यमित्यर्थः । कथम् । सहैव सहितमेव । कैः । भूपैः[2] । किंभूतैः । वृजिकाह्वजालीयमद्रकैर्वृजिषु देश[3] आह्वजाले ग्रामे मद्रेषु च देशेषु भवैस्तथा नापितवास्तुकैश्च नापितवास्तौ वाहीकग्रामे प्राग्ग्रामे च भवैश्च ॥

काकन्दकैः पाटलिपुत्रकैर्माल्लवास्तवैर्जम्बुकवन्मिलित्वा ।
बल्लाल आरब्ध स जागरं यत्क्षमोस्मि तत्राप्युचितं विधातुम्॥२२॥

२२. तत्रापि विषय उचितं योग्यं[4] विधातुं क्षमोस्मि । यत्स बल्लालो नृपैः सह जम्बुकवदल्पसारत्वाच्छृगाल इव मिलित्वा जागरं मत्पाश्चात्यदेशभञ्जनायोद्यममारब्ध । कैः कैर्नृपैरित्याह । काकन्दकैः पाटलिपुत्रकैश्च काकन्द्यां पाटलिपुत्रे च प्राक्पुर्योर्भवैः । तथा माल्लवास्तवैर्मल्लवास्तौ प्राग्ग्रामे भवैश्च ॥

कारन्तपिका । कारन्तपिकी । इत्यत्र "वाहीकेषु ग्रामात्" [३६] इति णिकेकणौ ॥

आह्वजालिका । आह्वजालिकी[5] । इत्यत्र "वोशीनरेषु" [३७] इति णिकेकणौ वा ॥ पक्षे । आह्वजालीय ॥

वृजिक । मद्रकैः[6] । अत्र "वृजि०" [३८] इत्यादिना कः ॥

नापितवास्तुकैः । अत्र "उवर्णादिकण्" [३९] इतीकण् ॥ यदा तु नापितवास्तुः प्राग्ग्रामस्तदा "दोरेव प्राचः" [४०] इतीकण् । पूर्वेण सिद्धे नियमार्थं वचनम् । तेनेह न स्यात् । माल्लवास्तवैः ॥

---

१ सी °लं मिलित्वैनं. २ सी °भूतैः. ३ सी देशेषु आ°. ४ ए योगं वि°. ५ सी °जालकी. ६ ए मद्रिकैः

काकन्दकैः । अत्र "इतोकञ्" [४१] इत्यकञ् ॥

पाटलिपुत्रकैः । अत्र "रोपान्त्यात्" [४२] इत्यकञ् ॥

सहैव सांकाश्यकफाल्गुनीवहकैश्च नान्दीपुरकैश्च भृत्यैः ।
भूपोपि बल्लालमथो सवातानुप्रस्थकं दण्डपतिं न्यदिक्षत् ॥ २३ ॥

२३. स्पष्टः । किं तु सांकाश्य[क]फाल्गुनीवहकैः सांकाश्ये पुरे फाल्गुनीवहे देशे भवैर्नान्दीपुरकैश्च नान्दीपुरे भवैश्च भृत्यैः सेवकनृपैरित्यर्थः । सवातानुप्रस्थकं वातानुप्रस्थे पुरे भवेन नृपेण सहितं दण्डपतिं काकाख्यं द्विजं सेनापतिम् ॥

स्वयं स ऐरावतकाभिसारकदार्वकैः स्थालकधौमकैर्युङ् ।
त्रैगर्तकै राजभिराभिसाराद्यगर्तकैश्चारिमभि प्रतस्थे ॥ २४ ॥

२४. स कुमारपालोरिमान्नमभिलक्ष्यीकृत्य स्वयं प्रतस्थे । कीदृशः । ऐरावत आभिसारे दर्वेषु स्थल्यां धूमे त्रिगर्तेष्वाभिसारगर्ते च देशेषु भवैर्जातैर्वा राजभिर्युङ् युक्तः ॥

प्रस्थान्त । वातानुप्रस्थकम् ॥ पुरान्त । नान्दीपुरकैः ॥ वहान्त । फाल्गुनीवहकैः ॥ योपान्त्य । सांकाश्यके(क) ॥ धन्ववाचि । ऐरावतक । इत्यत्र "प्रस्थपुर०" [४३] इत्यादिनाकञ् ॥

आभिसारक । इत्यत्र "राष्ट्रेभ्यः" [४४] इत्यकञ् ॥ बहुवचनमकञः प्रकृतिबहुत्वं द्योतयदपवादविषयेपि प्रापणार्थम् । तेनेहापि भवति । आभिसारगर्तकैः । अत्र गर्तोत्तरपदलक्षण ईयो न स्यात् ॥

१ ए °पोवि ब°. सी °पोधि ब°. २ ए °दिक्षित. ३ ए °राद्याग°.

१ ए रोपादित्य°. सी रोपत्यादित्य°. २ बी °श्यसफा°. सी °श्यमफा°. ३ सी सहतं. ४ सी °रिमनुल°. ५ बी °न्नभि°. ६ बी सी °दृक् । ऐ°.

दार्वकैः । अत्र "बहु०" [४५] इत्यादिनाकञ् ॥ बहुवचनमपवादविषयेपि प्रापणार्थम् । त्रैगर्तकैः । अत्र गर्तोत्तरपदलक्षण ईयो बाध्यते ॥

धौमकैः । स्थालक । इत्यत्र "धूमादेः" [४६] इत्यकञ् ॥

चौलुक्यमन्वीयुरथेरयन्तस्तुरङ्गमान्कौलकसादिवर्याः ।
सामुद्रिका नाव इवाशु सामुद्रकाः कशादण्डभृतः समन्तात् ॥२५॥

२५. अथ कौलकसादिवर्याः कूलं नाम सौवीरग्रामस्तत्र भवा अश्ववारश्रेष्ठाः समन्ताच्चौलुक्यमन्वीयुरनुजग्मुः । किंभूताः सन्तः । कशादण्डभृतः कशायष्टिधारिणोत एवाशु तुरङ्गमानीरयन्तः कशाघातेन प्रेरयन्तः । यथा कशादण्डभृतः कशाकारारित्रदण्डधारिणः सामुद्रकाः समुद्रे भवा जाताः समुद्रकर्मणि कुशला वा नराः सामुद्रिकाः समुद्रे भवा नावस्तरीः समन्तादाश्वरित्रैः प्रेरयन्ति ॥

कौलक । इत्यत्र "सौवीरेषु कूलात्" [४७] इत्यकञ् ॥

सामुद्रका नराः । सामुद्रिका नावः । अत्र "समुद्रान्नृनावोः" [४८] इत्यकञ् ॥

न तस्य धीनागरकस्य मायितया चरैर्नागरकैः परेषाम् ।
काण्डाग्रकैः पैप्पलकच्छकैश्चे(श्चै)न्दुवक्रकैर्वौ(र्नौ)ह्यत यानहेतुः ॥ २६ ॥

२६. काण्डाग्रौ पिप्पलकच्छ इन्दुवक्रे च देशेषु भवैस्तेभ्य आगतैर्वा परेषां चरैर्द्विषां हेरिकैस्तस्य राज्ञो यानहेतुर्यात्रायाः कारणं नौह्यत न ज्ञात इत्यर्थः । किंभूतैः । मायितया नागरकैर्नगरभव-

१ सी °युरिवेर°. २ ए सी °कैर्वोह्य°.

१ बी सी °रल°. २ ए सी °स्तरी स°. ३ ए °मुद्रका. ४ सी °षां हेरकै°. ५ सी °णं नोह्य°.

नरतुल्यैरपि । नागरि(र?)का हि प्रायो मायिनः स्युरिति यानहेतुज्ञा[1]नकारणमायाप्रयोगचतुरैरपीत्यर्थः । तर्हि कथं[2] नौह्यत[3] इत्याह । यतो धीनागरकस्य बुद्ध्या कृत्वा नगरभवनरतुल्यस्य । नागरको हि प्रायोतिबुद्धिमान्स्यात् । यतोतिधीमत्त्वेनातिगूढमन्त्रस्येति भावार्थः ॥

सचाक्रवर्तक्यधृतातपत्र आरण्यके सोध्वनि सेव्यते स ।
आरण्यकन्यायविहारदक्षैरारण्यकैः प्राज्यबलैर्गजैर्नु ॥ २७ ॥

२७. स राजारण्यके वन्येध्वन्यारण्यकैररण्ये भवैर्नरैः शबरैः[4] सेव्यते स । कीदृक्सन् । चक्रवर्ते देशे भवो राजा चाक्रव[5]र्तकस्तस्य भावश्चाक्रव[6]र्तक्यं सह तेन यः स सचाक्रव[7]र्तक्यश्चाक्रव[8]र्तको राजैव तेन धृतमातपत्रं यस्य सः । किंभूतैः । आरण्यकन्यायविहारदक्षैररण्ये भवयोर्नीतिविचरणयोर्विषये प्रवीणैस्तथारण्यकैर्गजैर्नु वन्यहस्तिभिरिव प्राज्यबलैर्महाप्राणैः ॥

आरण्य आरण्यकविद्भिरध्वन्यसौ द्विडारण्यकगोमयाग्निः ।
गच्छन्नघारण्यकरीषदावैरानन्द्यताशीर्वचनैर्मुनीन्द्रैः[1] ॥ २८ ॥

२८. आरण्येध्वनि गच्छ[9]न्सन्नसौ राजा मुनीन्द्रैः कर्तृभिराशीर्वादैः कृत्वान[10]न्द्यत । किंभूतैः । आरण्यकविद्भिरात्मनोखिलेन्द्रियविष[11]यग्रामाद्या निवृत्तिः सा वनं वारण्यमिति श्रु[12]तिस्तत्स्वरूपस्य वर्णकत्वात्तस्यायं तत्र विषये भवो वारण्यकोध्यायभेदो वेदान्तस्तं जानद्भिः ।

---

१ बी सी °न्द्रैः ॥ अर°.

---

१ सी °नकर°. २ ए °थं नोह्य°. सी °थं मोह्य°. ३ ए सी °ह्यतेत्या°. ४ बी °रैः से°. ५ सी °वर्त्तिक°. ६ सी °वर्त्तिक्यं. ७ सी °वर्त्तिक्य°. ८ सी °वर्त्तिको. ९ बी °च्छन्न°. १० सी °नन्दितः किं°. ११ ए °ययामा°. १२ बी °ति स्तुतिस्त्वत्स्व°.

एतेन ज्ञानितोक्तिः । तथाघारण्यकरीष[1]दावैः पापेष्वेव वन्यच्छगणे[2]-चूर्णेषु वनवह्नितुल्यैर्महातपस्वितया[3] दग्धपापैरित्यर्थः । अनेन क्रिया-पर[4]तोक्तिः । नन्वेवंविधैरप्यसौ किमित्याशीर्भिरानन्द्यत इत्याह । यतो द्विषो धर्मान्तराया[5] आन्तराः कामादयो बाह्याश्च दैत्यादयोरयस्त ए-वासारत्वादारण्यकगोमयानि तेष्वग्निर्विजिगीषु[6]र्नृप इत्यर्थः । अथ च य आरण्यकगोमयानामग्निः स्यात्स देवतात्वान्मुनीन्द्रैराशिषानन्द्यत इत्युक्तिलेशः ॥

बालाभिरारण्यवशाभिरार[1]ण्यिका करेणुर्नु भृशं प्रगल्भा[2] ।
यौगंधरैः कौरवकैश्च सैन्यैः सेना मिलद्भिः पथि तस्य रेजे ॥२९॥

२९. तस्य राज्ञः प्रगल्भा प्रौढा सेना पथि मिलद्भिर्[7]यौगंधरैः कौरवकैश्च युगंधरेषु कुरुषु[8] च देशेषु भवैः सैन्यैः कृत्वा भृशमत्यर्थं रेजे । यथार[9]ण्यिका वन्या प्रगल्भा करेणुर्हस्तिनी बालाभिः शिशु-भिरारण्यवशाभिर्वन्यह[10]स्तिनीभिः कृत्वा भृशं राजते ॥

साल्वाः स[3]यौगंधरकाः पदाताः सकौरवाश्वा अभवन्मुदेस्य ।
द्राक्साल्वकैः साल्वकगोयवागूवृत्त्या मनुष्यैः परिवार्यमाणाः ३०

३०. सकौरवाश्वाः कुरुदेशजैरश्वैर्युक्ताः सयौगंधरका[11] युगंधरदे-शसंबन्धिपदातियुक्ताः साल्वाः पदाताः साल्वदेशस्य पत्तयोस्य राज्ञो मुदेभवन् । यतः साल्वकैः साल्वदेशे भवैर्मनुष्यैर्गोपालैः पाचकैश्च नरैर्द्राक्परिवार्यमाणाः । किंभूतैः । उपलक्षितैः । कया । साल्व-

---

१ **सी** °रण्यका. २ **ए** °ल्भा । योगं°. ३ **सी** सयोगं°.

---

१ **ए** °पदवौ पा°. २ **ए** °णतूर्णे°. ३ **ए** °या विश्वपा°. **सी** °या वन्यपा°. ४ **ए** °रत्वोक्तिः. ५ **ए** °या अन्त°. ६ **ए बी** °पुनृप. ७ **ए** °द्भियोंगं°. ८ **सी** °पु दे°. ९ **ए सी** °रण्यका. १० **ए** °स्तिभिः. ११ **सी** °का यौगं°.

कगोयवागूवृत्त्या साल्वे[1] देशे भवा या गावो धेनवो या च यवागूरुपलक्षणत्वाद्रसवती तासां या वृत्तिर्व्यापारस्तया साल्विकगोवृत्त्या रक्षणचारणादिकया साल्विकयवागूवृत्त्या च पाकादिकया । यौगंधरकाः साल्वाश्च पदातयः स्वभावेनैवात्मोपयोगि[2]सकलपरिवारपरिकलिता एव देशान्तरेषु यान्तीति तान्दासधेन्वादिसकलपरिवारेण सश्रीकान्गच्छतो दृष्ट्वा राजा जहर्षेत्यर्थः ॥

मायितया नागरकैः । धीनागरकस्य । इत्यत्र "नगरात्०" [४९] इत्यादिनाकञ् ॥

पैप्पलकच्छकैः ॥ अग्नि । काण्डाग्नकैः ॥ वक्र । ऐन्दुवक्रकैः ॥ वर्त । चाक्रवर्तक[3][4] । इत्यत्र "कच्छाग्नि०" [५०] इत्यादिनाकञ् ॥

आरण्यके[5]ध्वनि । आरण्यकन्याय । आरण्यकविद्भिः । आरण्यकैर्गजैः । आरण्यकैः । आरण्यकविहार । इत्यत्र "अरण्यात्०" [५१] इत्यादिनाकञ् ॥

आरण्यकगोमय आरण्यकरीष । इत्यत्र "गोमये वा" [५२] इति वाकञ् ॥ केचित्तु हस्तिन्यामपि विकल्पमिच्छन्ति । आरण्यिका[6] करेणुः आरण्यवशाभिः ॥ केचित्तु नरवर्जं पूर्वसूत्रेपि विकल्पमाहुः । आरण्यके आरण्येध्वनि ॥

कौरवकैः कौरवैः[7] । यौगन्धरकाः[8] यौगंधरैः[9] । इत्यत्र "कुरु०" [५३] इत्यादिना[10] वाकञ् ॥

साल्वकगोयवागूः(गू) । साल्वकैर्मनुष्यैः । अत्र "साल्वाद्०" [५४] इत्यादिनाकञ् ॥ गोयवाग्[11]वपत्ताविति किम् । साल्वाः पदाताः ॥

---

१ **सी** साल्वदे°. २ **बी** °गिकस°. ३ **बी** °वर्तिक्य । इ°. ४ **ए** °र्तं । इ°.
५ **सी** °ण्यकन्या°. ६ **ए सी** °रण्यका. ७ **बी** °व । योग°. ८ **ए** °रकः यौ°.
९ **बी** °काः योगं°. १० **ए** °नाक°. ११ **बी सी** °वागूप°.

न काच्छके[1] सैन्धवका विमर्दे न काच्छकाः[2] सैन्धवकेष्यकुप्यन्[3] ।
तैः सैन्धवैर्वाजिभिरुक्षभिश्च[4] काच्छैस्तदाज्ञायमिता व्रजन्तः ॥३१॥

३१. सैन्धवकाः सिन्धुनराः काच्छके कच्छदेशवासिनरसंबन्धिनि[1] विमर्दे[2] बाहुल्यात्संघर्षे[3] सति नाकुप्यन् । किंभूताः सन्तः । व्रजन्तः । कैः कृत्वा । तैः सुजात्यत्वादिना प्रसिद्धैः सैन्धवैः सिन्धुदेशे[4] जातैर्वाजिभिः । एतेन सिन्धौ सुजात्याः प्रभूताश्चाश्वाः[5] स्युरित्युक्तम् । तथा काच्छकाः कच्छदेशनराः[6] सैन्धवकेपि[7] सिन्धुदेशनरसंबन्धिन्यपि विमर्दे सति नाकुप्यन् । किंभूताः सन्तः । व्रजन्तः । कैः कृत्वा । तैः सुजात्यत्वादिना प्रसिद्धैः काच्छैः कच्छदेशभवै रुक्षभिर्वृषभैः । एतेन कच्छेषु सुजात्याः प्रभूताश्चोक्षाणः स्युरित्युक्तम् । यतस्तदाज्ञायमिताः कुमारपालाज्ञानियन्त्रिताः ॥

अपूर्यतैक्ष्वाक[5]शृगालगर्तीयाश्वत्थिकीयैः कटवर्तकीयैः ।
दाक्षिह्रदीयैः सहदाक्षिकन्थीयायामुखीयैर्नृपतेरनीकम् ॥ ३२ ॥

३२. नृपतेः कुमारपालस्यानीकमपूर्यत । कैः कैरित्याह । इक्ष्वाकुषु शृगालगर्त आश्वत्थिके कटवर्तके च देशेषु दाक्षिह्रदे च वाहीकग्रामे भवैस्तथा सहदाक्षिकन्थीया दाक्षिकन्थायां वाहीकग्रामे भवैर्भटैः सहिता ये आयामुखीया[8] आयामुखे[9] वाहीकग्रामे भवास्तैश्च महाभटैः ॥

---

१ **ए** °के सेन्ध°. २ **ए** °काः सेन्ध°. ३ **ए** °न् । सै°. ४ **सी** °क्षकैश्च केच्छै°. ५ **ए** °यतेक्ष्वा°.

---

१ **ए** °वाजिसि°. २ **सी** °नि बा°. ३ **ए** °हुबल्या°. ४ **बी** °देशजा°. ५ **सी** °श्चाश्चोक्षाणः स्यु°. ६ **बी** °देशे न°. ७ **सी** °केषु सि°. ८ **सी** आयोमु°. ९ **सी** आयोमु°.

दाक्षेः परस्तान्नगरीयभूपैर्ग्रामीयभृत्यैः पलदीययोधैः ।
सपर्वतीयैश्च सपर्वतीयवेषैर्युतोथार्बुदमाससाद ॥ ३३ ॥

३३. अथ स राजार्बुदं गिरिमाससाद । कीदृग् । युतः । कैः कैरित्याह । दाक्षेः परस्तान्नगरीयभूपैर्दाक्षिनगरे प्राग्देशे भवैर्नृपैस्तथा दाक्षेः परस्ताद्ग्रामीयभृत्यैर्दाक्षिग्रामे वाहीकग्रामे भवैर्दासैस्तथा दाक्षेः परस्तात्पलदीययोधैर्दाक्षिपलदे वाहीकग्रामे भवैर्भटैस्तथा सह पर्वतीयेन पर्वतसंबन्धिना वेषेण मृगाजिनोर्णादिकेन वर्तन्ते ये तैः सपर्वतीयवेषैः पर्वतीयैश्च पर्वते भवैः शबरादिभिश्च ॥

तां पार्वतीं क्ष्मां कृकणीयपर्णीयशोभमानामवितेत्यथोचे ।
पत्तिः स्वकीयो नृपतेर्गहीयपदातियुग्विक्रमसिंहनामा ॥३४॥

३४. अथ विक्रमसिंहनामा राजेति वक्ष्यमाणमूचे । कीदृक् । कृकणीयपर्णीयशोभमानां कृकणे पर्णे च भारद्वाजदेशयोर्भवैर्लोकैः शोभमानां वास्तव्यानेकदेशान्तरीयलोकामित्यर्थः । तां सर्वर्तुमण्डितवनादिलक्ष्म्यातिरम्यत्वात्प्रसिद्धां पार्वतीमर्बुदे भवां क्ष्मामविता रक्षिता । तथा नृपतेः कुमारपालस्य स्वकीयः पत्तिः सेवकस्तथा गहीयपदातियुग्गहे जालंधरदेशसमीपस्थे देशविशेषे भवा ये पदातयस्तैर्युक्तः ॥

काच्छकाः । काच्छके विमर्दे । सैन्धवकाः । सैन्धवके विमर्दे । अत्र "कच्छादेर्०" [५५] इत्यादिनाकञ् ॥ नृनृस्थ इति किम् । काच्छैरुक्षभिः । सैन्धवैर्वाजिभिः ॥

---

१ ए सी °र्वतीक्ष्मां. २ ए पत्तेः स्व°.

---

१ ए °र्बुदगि°. २ सी °तः । कैरि°. ३ ए °क्षेः पुर°. ४ बी °पे मृ°. ५ सी °जिनौर्णादिना वर्तते ये. ६ ए °र्तते ये. ७ बी वक्षमा°. ८ बी °यशो°. ९ ए °तल°. १० ए सी °पते कु°.

कोपान्त्य । ऐक्ष्वाक । कच्छादि । काच्छैः । सैन्धवैः । अत्र "कोपान्त्याच्चाण्" [५६] इत्यण् ॥

शृगालगर्तीय । इत्यत्र "गर्त०" [५७] इत्यादिना-ईयः ॥

कटपर्वतकीयैः । अत्र "कट०" [५८] इत्यादिना-ईयः ॥

आश्वत्थिकीय(यैः) । आयामुखीयैः । दाक्षिकन्थीयः(य) । दाक्षिपलदीय । दाक्षिनगरीय । दाक्षिग्रामीय । दाक्षिह्रदीयैः । इत्यत्र "कखोपान्त्य०" [५९] इत्यादिना-ईयः ॥

पर्वतीयैः । अत्र "पर्वतात्" [६०] इतीयः ॥

पर्वतीयवेपैः । पार्वतीं क्ष्माम् । अत्र "अनरे वा" [६१] इति वेयः ॥

पर्णीय कृकणीय । इत्यत्र "पर्ण०" [६२] इत्यादिनेयः ॥

गहीय । स्वकीयः । अत्र "गहादिभ्यः" [६३] इतीयः ॥

अध्यासितो माध्यममध्यमीयैः सवैणुकीयैर्गिरिरौत्तरीयैः ।
आस्माकवंशप्रभवोपि यौष्माकीणप्रसादादयमस्मदीयः ॥ ३५ ॥

३५. अयं गिरिरर्बुदं आस्माकवंशप्रभवोपि नन्द(न्दि)नीहेतुके विश्वामित्रेण सह विरोधे तच्छिक्षार्थं वसिष्ठेन परमारादिपुरुषो ह्यर्बुद उत्पादित इति यद्यप्यस्माकं वंशस्य परमारान्वयस्योत्पत्तिस्थानं तथापि यौष्माकीणप्रसादादस्मदीयोयं युष्मत्किंकरत्वादस्माकम् । कीदृशोयम् । औत्तरीय उत्तरे प्रशस्यदेशे भवोत एव सवैणुकीयैर्वेणुके

१ ए सवेणु°. २ बी °यः । असा°.

१ सी °य । आ°. २ बी °टपर्वतकी°. ३ बी °न्थीयं । दा°. ४ बी °रीयः । दा°. ५ ए सी °र्वती क्ष्मा°. ६ बी °त्र गिरे. सी °त्रनगरे. ७ सी °कण । इ°. ८ सी °हीयः । स्व°. ९ बी °द असा°. १० सी वशिष्ठे°. ११ सी °ति अद्याप्य°. १२ सी °शस्ये दे°. १३ ए बी सवीणु°. १४ ए °यैविणु°.

देशे भवा ये मुनिनरादयस्तद्युक्तैर्माध्यममध्यमीयैः पृथिवीमध्यं निवास एषां माध्यमाश्चरणाः पृथिवीमध्ये जाता भवा वा मध्यमीया नरा द्वन्द्वे तैरध्यासितः ॥

यौष्माकवंशे नु शरण्य आस्माकीनादिमानामिह किंपुरुष्यः।
अयुष्मदीया अपि तावकीना इवाभिगायन्ति यशस्त्वदीयम्
॥ ३६ ॥

३६. इहार्बुदे वर्तमानाः किंपुरुष्यः किंनर्योयुष्मदीया अप्यन्यदीया अपि तावकीना इव त्वदीयं यशोभिगायन्ति । कीदृशीह । आस्माकीनादिमानामस्माकमादिमानामादौ भवानां पूर्वजानां शरण्ये महादुर्गत्वाद्रक्षाहेतौ यौष्माकवंशे नु यथा युष्माकं वंशश्चौलुक्यान्वयोस्मत्पूर्वजानां सदा स्वामित्वेन शरण्यः ॥

न मामकीना न च तावका ये द्वैप्याः किलामामकवादिनस्ते।
आख्यन्नमुं सोदरमीश्वरस्याध्यर्याया मदीयोचितभक्तितुष्टाः ॥३७॥

३७. ये द्वैप्या द्वीपे समुद्रसमीपस्थदेशे भवा मुनयो न मामकीना न च तावका(काः) सन्ति । यतः । किलेति सत्ये । अमामकवादिनो ममेदं मामकं न तथामामकं तद्वदनशीला निर्ममत्वा इत्यर्थः । ते मुनयोमुमर्बुदाद्रिमीश्वरस्य शंभोरध्यर्याया अर्धे शरीरार्धभागे भवाया गौर्याः सोदरं भ्रातरमाख्यन्नर्थान्ममाग्रे । अर्बुदो हि हिमाद्रेः पुत्र

१ बी °रुषाः । अ°. २ बी °रस्यर्ध्या°. ३ ए °ष्टाः ॥ द्वी°.

१ सी °वा म°. २ ए °रुषाः किंनार्यायु°. ३ बी किंनार्यो°. ४ बी °दृशाह । अस्मा°. ५ सी °शी । आ°. ६ ए °नामादौ. ७ बी °नादौ. ८ ए °तौ युष्मा°. ९ बी सी °वकीनाः स°. १० बी गौर्यायाः सो°.

इति रूढिः । ननु ते यदि निर्ममत्वेन न तावकास्तत्कथं तवाग्र इद-माख्यन्नित्याह । यतो मदीयोचितभक्तितुष्टाः ॥

मध्यमीयैः । अत्र "पृथिवी०" [६४] इत्यादिना-ईयो मध्यमादेशश्च ॥

माध्यम । इत्यत्र "निवासाच्चरणेण्" [६५] इत्यण् ॥

वैणुकीयैः । औत्तरीयः । अत्र "वेणुक०" [६६] इत्यादिना-ईयण् ॥

यौष्माक[1] । यौष्माकीण[2] । आस्माक । आस्माकीन । इत्यत्र "वा युष्मद्०" [६७] इत्यादिना[3] वाञीनञौ युष्माकास्माकादेशौ च । पक्षे त्यदादित्वेन दुसं-ज्ञकत्वादीयः । युष्मदीयाः । अस्मदीयः । एकत्वे तु तवकममकौ । तावकाः । तावकीना[4]ः । मामक । मामकीनाः ॥ पक्षे । त्वदीयम् । मदीय ॥

द्वैप्याः । अत्र "द्वीपाद्०" [६८] इत्यादिना ण्यः ॥

अध्यायाः[5] । इत्यत्र "अर्धाद्यः" [६९] इति यः ॥

पूर्वार्ध्यसानावतिपौष्कराधिकाद्रौ स[1] पौवार्धिक आश्रमोस्ति ।
अस्मिन्वसिष्ठ[2]स्य मदीयराष्ट्रपाश्चार्धपौवार्धि[3]कलोकवन्द्यः ॥ ३८ ॥

३८. अस्मिन्नर्बुदे स महाप्रभावत्वादिना प्रसिद्धो वसिष्ठ[6]स्यर्षे-राश्रमोस्ति । एतेनास्य महातीर्थत्वोक्तिः । कीदृक् । मदीयराष्ट्रस्या-ष्टादश[7]शतेत्याख्यया प्रसिद्धस्यार्बुदेति मौलाभिधानस्य मदीयदेशस्य पश्चार्धे पूर्वार्धे[8] च भवो यो लोकस्तेन वन्द्यस्तथा पौवार्धिकोद्रिपूर्वार्धे भवः । किंभूतेस्मिन् । पूर्वार्ध्यसानावद्रेः[9] पूर्वार्धे भवाः सानवः प्रस्था

१ ए स पूर्वाद्धिक. २ सी °न्वशिष्ठ°. ३ ए °पौवार्धि°.

१ ए सी °ष्माकी°. २ बी °ण । असा°. ३ ए °नाञी°. ४ ए °नाः । प°. ५ बी सी °याः । अत्र. ६ सी वशिष्ठ°. ७ ए °शते°. ८ बी °र्वा-र्द्धभ°. ९ बी °र्वाद्रिभ°.

यत्र तस्मिंस्तथा पुष्करार्धे पुष्करद्वीपार्धे भवः पौष्करार्धिको योद्रिर्मानुषोत्तरस्तमुच्चैस्त्वेनातिक्रान्ते ॥

पौष्करार्धिक[1] । अत्र "सपूर्वादिकण्" [७०] इतीकण् ॥

पूर्वार्ध्य । पौर्वार्धिकः[2] । अत्र "दिक्पूर्वात्तौ" [७१] इति येकणौ ॥

राष्ट्रपार्श्वार्धे । पौर्वार्धिक । इत्यत्र "ग्राम०" [७२] इत्यादिनाणिकणौ ॥

परार्ध्यरत्नांशुभिरुत्तमार्ध्यावरार्ध्यवस्त्रे इव धत्त एषः ।
लक्ष्म्याधमार्ध्यीकृतशैलजातोन्तमस्तनूजोनवमो हिमाद्रेः ३९

३९. एषोर्बुदः परार्ध्यरत्नांशुभिः[3] परे प्रकृष्टेर्धे[4] भवानि परार्ध्यानि जात्यानि यानि रत्नानि तेषामंशुभिः कृत्वोत्तमार्ध्यावरार्ध्यवस्त्रे[5][6] इवोत्तरीयाधोवसने इव धत्ते । यतो लक्ष्म्या लक्ष्मीदेवतया कृत्वाधमार्ध्यीकृतमधमार्धे भवं कृतमधः कृतं शैलजातं गिरिवृन्दं येन सः । तथा हिमाद्रेर्हिमवतोवोधरस्मिन्देशे[7] भवोवमो न तथानवमः प्रकृष्टोन्तमश्चरमस्तनूजः[8] । यो हि लक्ष्म्या श्रिया कृत्वा सर्वोत्कृष्टो महतः प्रकृष्टपुत्रश्च[9][10] स्यात्स परार्ध्यरत्नांशुभिरुपलक्षिते[11] उत्तमार्ध्यावरार्ध्यवस्त्रे[12] धत्त इत्युक्तिलेशः ॥

परार्ध्य । अवरार्ध्य । अधमार्ध्यीकृत । उत्तमार्ध्य । इत्यत्र "परावर०" [७३] इत्यादिना यः ॥

अन्तमः[13] । अनवमः[14] । अधम । इत्यत्र "अमोन्त०" [७४] इत्यादिनामः ॥

---

१ ए °र्धिकः । अत्र पू°. २ ए °र्धिक । अ°. ३ ए °रत्नंनुभिः. ४ बी °ष्टेर्द्धेभ°. ५ बी °त्तमर्ध्या°. ६ ए °मार्ध्य°. ७ बी °वत्तोवोध°. ८ ए °न्तश्च°. ९ ए °ष्टश्च. १० सी °त्र स्या°. ११ सी °लक्ष्यते. १२ बी °राध्यें व°. १३ सी अतमः. १४ सी °वम । अ°.

अनन्तिमा तीर्थतयाग्रिमाणामपश्चिमं वारिनिधेः[1] कलत्रम् ।
पुनाति पुण्या सरिदादिमा सा मन्दाकिनी[2] मध्यमभागमस्य ॥४०॥

४०. सा प्रसिद्धा मन्दाकिनी गङ्गास्यार्बुदस्य मध्यमभागं पुनाति । कीदृक् । पुण्या पावित्र्यहेतुरत एव तीर्थतयाग्रिमाणामपि[1] । अपिरत्राध्याहार्यः । मुख्यानामप्यनन्तिमा मुख्या महातीर्थमित्यर्थः । तथा सरिदादिमा नदीषु मुख्यात एव वारिनिधे[2]रपश्चिममाद्यं कलत्रम्[3] ॥

अपश्चिमम् । आदिमा । अनन्तिमा । अग्रिमाणाम् । अत्र "पश्चाद्[4]०" [७५] इत्यादिना-इमः ॥

मध्यम । इत्यत्र "मध्यान्मः" [७६] इति मः ॥

मध्योपि चाध्यात्मिकपारलौकिकार्थाविदप्यत्र समागमेन ।
स्याज्जन्तुराकस्मिक एव सामान[3]देशिको वार्षिकमेघकर्तुः ॥ ४१ ॥

४१. अत्रार्बुदे समागमेना[5]त्म[6]साधनार्थमागमनेन कृत्वा जन्तुः स्यात् । किंभूत इत्याह[7] । आकस्मिक एवाकस्माद्भवस्तथाविधधर्मानुष्ठानाभावेनासंभावित[8]तथाविधपदत्वादतर्कितोपनतो वार्षिकमेघकर्तुरिन्द्रस्य[9] सामान[10]देशिकः समानर्द्धिकत्वेनेन्द्रसमाने देशे प्रदेशे भव इन्द्रसामानिको देव इत्यर्थः । किंभूतोपि । मध्योपि नात्यु[11]त्कृष्टो नाप्यपकृष्टो मध्यपरिणा[12]मोपि विशिष्टशुभपरिणामरहितोपीत्यर्थः । तथाध्यात्ममात्मनि भव आध्यात्मिकः परलोकस्यायं हितत्वेन यद्वा परलोके[13]

---

१ ए °रिधेः. २ सी °नी वारिनिधेः कलत्रम् । सा. ३ सी °देशको.

---

१ ए °र्थया°. २ बी °रिधे°. ३ ए °म् । प°. ४ बी सी पश्चिमाद्. ५ ए °नात्ससा°. ६ सी °त्मपावना°. ७ ए °ह । क°. ८ सी °तस्तथा°. ९ ए बी °स्य समा°. १० सी °मान्यदेशकः. ११ बी नात्कृ°. १२ ए °णामर°. १३ बी सी °लोकसु°.

परलोकसुखक्रियायां कुशलः पारलौकिक[१] आध्यात्मिको यः पारलौकिकः स योर्थो धर्मलक्षणस्त[२]स्याविद्प्यज्ञातापि निर्धर्मोपि चेत्यर्थः । एतेनास्य महातीर्थत्वोक्तिः ॥

द[१]त्त्वा द्विजैर्व्रैहिपलालिकर्णमनैशिकीभूय विधीयते द्राक् ।
ऐन्द्रो महो मासिके[२] आर्धमासिको वात्र धौतेपरवार्षिकाभ्रैः ४२

४२. अपरवार्षिकाभ्रैरपरस्यां वर्षायां शरदि भवानि यान्यभ्राणि मेघास्तै[३]र्धौते प्रक्षालिते शरदीत्यर्थः । अत्रार्बुदे द्विजै[४]रैन्द्रो महो विधीयते । कीदृग् । मासिक आर्धमासिको वा मासेर्धमासे वा भवः । किं कृत्वा[५] । व्रैहिपलालिकर्णे[६] व्रीहिपलालसहचरितः[७] कालो व्रीहिपलालं[८] शरत् तत्र देयमृणं द्राग् दत्त्वा । तथा निशासहचरितमध्ययनं निशा तत्र जयी साभ्यासो नैशिको[९] न तथानैशिकश्चावनै(श्चानै?)शिकीभूय निशाध्ययनाभ्यासं मुक्त्वेत्यर्थः । सुखीभूयैकाग्रीभूय[१०] च मासमर्धमासं वा यावद्द्विजैराश्विनमासे[११]त्रेन्द्रमहः क्रियेत[१२] इत्यर्थः । एतेनात्र गिरावन्यदेशेभ्यो विशिष्ट इन्द्रमहो भवतीत्युक्तम् । यतोन्यदेशेष्वष्टावेव दिनानीन्द्रमहः स्यात् । एवं चात्र धान्यसंपत्त्यु[१३]त्कर्षो लोकानामतिप्रक्रीडितत्वप्रमुदितत्वे च सूचितानि । द्विजैरि[१४]त्युपलक्षणत्वात्क्षत्रियादीनामपि ग्रहणं तेपि हीन्द्रमहं कुर्वन्ति ॥

---

१ **ए** दर्थाद्विजौ व्रीहिपलोलि°. २ **बी** °क अर्ध°.

---

१ **ए** °किकः स. २ **सी** °स्तथावि°. ३ **ए बी** °स्तैधौते. ४ **ए बी** °जैरेन्द्रो. ५ **बी** °त्वा । व्रीहि°. ६ **ए** °कर्णे व्री°. ७ **बी** °च का°. ८ **ए** °पलोलं. ९ **ए** °को त°. १० **ए** °य मा°. ११ **ए** °मासोत्रे°. १२ **ए** °यतेत्य°. १३ **ए** °पत्सु कत्युत्क°. १४ **ए** द्विजैत्यु°. **सी** द्विजेत्यु°.

मध्यः । अत्र "मध्ये०" [७७] इत्यादिना-अः ॥

आध्यात्मिक[1] । आकस्मिकः । अत्र "अध्यात्मादिभ्य इकण्"[2] [७८] इतीकण्[3] ॥

सामानदेशिकः[4] । पारलौकिक[5] । इत्यत्र "समान०" [७९] इत्यादिना-इकण् ॥

वार्षिक । ऋतोञ्णित्प्रत्ययस्तदवयवादेऋ(ॠ)त्वन्तादपि[6] भवत्यभिधानात् ॥ अपरवार्षिक[7] ॥ कालवाचि । मासिकः[8] । आर्धमासिक[9]ः[10] । अत्र "वर्षा०" [८०] इत्यादिनेकण् ॥ बहुवचनं यथाकथंचित्कालवृत्तिभ्यः प्रत्ययप्रापणार्थम् । अनैशिकीभूय[11] । व्रैहिपलालिकर्णम् ॥

श्राद्धक्रिया शारदिकीह मन्दाकिन्यामविघ्नं क्रियते जनेन ।
यच्छारदौ शारदिकेतरौ वा रोगातपौ नौषधिवृक्षयोगात् ॥४३॥

४३. इहार्बुदे मन्दाकिन्यां[12] जनेन शारदिकी श्राद्धपक्षे भवा श्राद्धक्रिया पिण्डप्रदानादिकाविघ्नं निरुपद्रवं क्रियते । यद्यस्मादिहौ[13]षधि[14]वृक्षयोगाच्छारदौ शरत्काले भवौ शारदिकेतरौ वान्यर्तुषु भवौ वा रोगातपौ न स्त ओषधियोगाद्रोगो नास्ति वृक्षयोगाच्चातपो नास्ति ॥

शारदिकी श्राद्धक्रिया । इत्यत्र "शरदः०" [८१] इत्यादिनेकण् ॥

शारदिके[15] शारदौ । इत्यत्र "न वा रोगातपे" [८२] इति वेकण् ॥

---

१ 'वा' इत आरभ्य 'केतरौ' इत्यन्तं **बी** पुस्तके द्विरुक्तम् ।

---

१ **ए** °त्मिकः । अध्या°. २ **सी** इती°. ३ **सी** °ण् । समा°. ४ **ए बी** °शिक । पा°. ५ **बी** °लौक. ६ **बी** °न्तावद°. ७ **ए** °र्षिक । का°. ८ **बी** °सिक । आ°. ९ **ए सी** °कः । अर्ध°. १० **बी सी** °सिक । अ°. ११ **सी** °य । व्रीहि°. १२ **सी** °न्यां मन्त्रिज°. १३ **ए बी** यस्मा°. १४ **बी** °षधेवृ°. १५ **ए सी** °कम् शा°.

प्रादोषिकेत्रानुदितेपि चन्द्रे
नैश्यस्त्विषो नैशिकमौ(मो?)षधीनाम् ।
प्रादोषदीपन्ति तमो हरन्त्यः
शौवस्तिकाश्वस्त्यविदाश्रमेषु ॥ ४४ ॥

४४. अत्रार्बुदे[1] प्रादोषिके रजनीमुखभवे चन्द्रेनुदितेपि नैश्यो रात्रौ भवा[2] ओषधीनां त्विषः[3] प्रादोषदीपन्ति प्रदोषभवदीपवदाचरन्ति । केषु । शौवस्तिकं श्वोभवं भविष्यदश्वस्त्यं च वर्तमानमतीतं च विदन्ति ये तेषां ज्ञानवन्मुनीनामाश्रमेषु । किंभूताः सत्यः । नैशिकं तमो ह[4]रन्त्यः । एतेनास्य महाप्रभावौषधित्रिकालै[5]विन्मुनिनिलयतोक्ता ॥

नैशिकम् नैश्यः । प्रादोषिके । प्रादोष । इत्यत्र "निशा०" [८३] इत्यादिनेकण्वा ॥

शौवस्तिक । इत्यत्र "श्वसस्ता[6]दिः" [८४] इतीकण्वा स च तादिः ॥

पक्षे[7] । "ऐषमोह्यःश्वसो वा" [६. ३. १९] इति त्यच् । श्वस्त्य[8] ॥

भान्तश्चिरत्नेषु चिरंतनन्तस्तथा परुत्नेषु परुत्तनन्तः ।
सिद्धाः परात्नन्त इतः परारितनेषु खेलन्ति विचित्ररूपाः ॥ ४५ ॥

४५. इतोस्मिन्नर्बुदे सिद्धा विद्यासिद्धाः । खेलन्ति बा[9]लिकाद्युचितक्रीडाभिः क्रीडन्ति । किंभूताः सन्तः । चिरत्नेषु चिरकालभवेषु वृद्धेषु मध्ये चिरंतनन्तो विद्याबलेन वृद्धं[10]वदाचरन्तस्तथा परु-

---

१ बी नैशास्त्वि°. २ ए °न्त्यः शाव°.

---

१ ए °दे प्रदो°. २ बी सी °वा औष°. ३ ए °षः प्रदो°. ४ ए हहर°. ५ ए बी °लवन्मु°. ६ बी °स्तादेरिति क°. ७ बी °क्षे । एष°. ८ ए सी श्वस्त्यः । भा°. ९ सी बालका°. १० ए °द्धयदाचरंस्त°.

त्नेषु पूर्वस्मिन्संवत्सरे[1] भवेषु बालेषु परुत्तनन्तस्तथा परारितनेषु परतरे संवत्सरे भवेषु तरुणेषु परारिन्तोत एव विचित्ररूपा अत एव च[3] भान्तः ॥

हालाः परारिंतनचूतमध्ये पिबन्परारित्नपरुन्त्तनीस्ताः ।
वंश्यान्पुराणांस्तव[1] चारणौघो गायत्यमुष्मिन्नपुरातनान्नु ॥ ४६ ॥

४६. अमुष्मिन्नर्बुदे चारणौघस्तव पुराणांश्चिरकालीनान्वंश्यान्पूर्वजानपुरातनान्[4]वधुनातनानिव[5] गायति[6] । तथा गायति यथेदानींतना इव ते भवन्तीत्यर्थः । कीदृक्सन् । हालाः सुराः पिबन् । एतेन शब्दपाटवोक्तिः । क । परारिंतनचूतमध्ये तरुणाम्रतरुवनमध्ये[7] । एतेन हालानामाम्रमञ्जरीपातेनातिसौरभोक्तिः शैत्योक्तिश्च । कीदृशीः । परारित्नपरुन्त्तनीः पुराणाः पुराणतराश्च । एतेन परिपूर्णत्वोक्तिः । अत एव ताः सुस्वादुत्वादिगुणैः प्रसिद्धाः ॥

चिरत्नेषु चिरंतनन्तः । परुत्नेषु परुत्तनन्तः । परारित्न परारितनेषु । अत्र "चिर०" [८५] इत्यादिना वा त्नः ॥ परारेस्त्ने रिलोप इत्येके । परात्नन्तः ॥ केचित्तु परुत्परार्योस्त्नतन्यन्त्यस्वरात्परं म्वागममिच्छन्ति । परुन्त्तनीः[9] । परारिंतन ॥ पुराणान् पुरातनान् । इत्यत्र "पुरो नः" [८६] इति वा नः[10] ॥

अर्यम्णि पौर्वाह्णिक आपराह्णिके चोच्चवृक्षैः स्थगिते मुनीन्द्राः ।
विदन्ति पूर्वाह्णतनीमथापराह्णेतनीं[3] नाडिकयेह संध्याम् ॥ ४७ ॥

---

१ बी सी °राणास्त°. २ बी सी °तनीं तथा°. ३ ए सी °तनी ना°.

---

१ ए °रेषु भ°. २ ए °त्तनंस्त°. ३ ए च च भा°. ४ बी सी °जान्पुरा° ५ बी °नि गा°. ६ बी °ति च गायति । त°. ७ सी °रुव°. ८ बी सी °नत्यन्त्य°. ९ ए बी परन्त्त°. १० बी नः । आर्य°.

४७. स्पष्टः । किं तु मुनीन्द्रा योगीशाः । पूर्वाह्णे(ह्ण?)तनीं प्राभातिकीम् । अपराह्णेतनीं प्रादोषिकीम् । नाडिकयो[1]च्छ्वासेन[2] निश्वासेन[3] च कृत्वा विदन्ति । ईडापिङ्गला[4]द्या[5] नाड्यो[6] नासिकोच्छ्वासनिश्वासरूपा[7]स्तासां हि सम्यग्ज्ञाने कालज्ञानं स्यात् ॥

पूर्वाह्णतनीम् । अपरा[9]ह्णेतनीम् । अत्र "पूर्वाह्ण०" [८७] इत्यादिना वा तनट् ॥ पक्षे । पौर्वाह्णिके । अ(आ)पराह्णिके । अत्र "वर्षाकालेभ्यः" [६.३.८०] इतीकण् ।

प्राह्णेतनैरेव चिरंतनस्य पूजा प्रगेतन्यचलेश्वरस्य ।
दोषातनी च क्रियतेत्र सायंतनैर्विनिद्रैर्विविधप्रसूनैः ॥ ४८ ॥

४८. अत्रार्बुदे चिरंतनस्य चिरकालीनस्याचलेश्व[11]राख्यशम्भोः प्रगेतनी प्राभातिकी पूजा विविधप्रसूनैः कृत्वा क्रियते । किंभूतैः । प्राह्णेतनैरेव प्राभातिकैरेव[12] प्रभात एवोच्चितैरित्यर्थः । अत एव विनिद्रैर्विकस्वरैः । तथा दोषातनी च सां[13]ध्या च पूजा सायंतनैरेव विनिद्रैः कुसुमैः क्रियते ॥

सायंतनैः । चिरंतनस्य । प्राह्णेतनैः । प्रगेतनी ॥ अव्यय । दोषातनी । अत्र "सायं०" [८८] इत्यादिना तनट् ॥

पदं नृणां शाश्वतमिच्छतां[1] तत्सांध्यप्रभाभं विदतां शरीरम् ।
ग्रैष्माहवद्वृद्धतरोपि पौषो[2] नूपक्रमः सिध्यति शीघ्रमत्रं[3] ॥ ४९ ॥

४९. ग्रैष्माहवद् ग्रीष्मे भवं ग्रैष्मं यदहर्दिनं तदिव वृद्धतरोपि बहुकाले फलदत्वेन महत्तरोप्युपक्रमः परमपदप्राप्तिविषयस्तीव्रं[14]तपश्चर-

१ बी °दशतां. २ बी पौषा नू°. सी पौषस्तपःक्र°. ३ ए °त्र । ग्रीष्मा°.

१ बी °यो उच्छ्वा°. २ सी °न च. ३ बी °न निश्वासेन च कृ°. ४ बी इलापि°. ५ बी °लाद्योना°. ६ सी नासि°. ७ बी नाशिको°. ८ सी निःस्वास°. ९ बी °र्वाह्णेत°. १० बी °राह्णत°. ११ सी °श्वरस्य श°. १२ ए °व प्राभा°. १३ ए सांध्यी च. १४ सी °व्रस्तप°.

णादिधर्मानुष्ठानोद्यमोत्रार्बुदे नृणां शीघ्रं सिध्यति फलति । उत्प्रेक्ष्यते।[1] पौषो[2] नु पुष्येण चन्द्रयुक्तेन युक्ते काले भव इव । पौषो[3] हि कार्यारम्भो वृद्धतरो[4]पि शीघ्रं सिध्यति । पुष्यस्य कार्यसिद्धौ प[5]दिष्टत्वात् । कीदृशां सतां नृणाम् । शरीरं सांध्यप्रभाभं संध्यारागवदस्थिरं विदन्तां[6] जानताम्[7] । एतेन भववैराग्योक्तिः । अत एव तच्छाश्वतं पदं मोक्षमिच्छताम्[8] । योन्यत्र बहुकालेन फलति स मुक्त्युपायोत्र सिद्ध[9]क्षेत्रे मुमुक्षुभिरारब्धः क्षिप्रं फलतीत्यर्थः ॥

पौषः ॥ ऋतु । ग्रैष्म ॥ संध्यादि । सांध्य । शाश्वतम् । अत्र "भर्तु०" [८९] इत्यादिनाण् ॥

सांवत्सरार्चाफलवाञ्छयेह सांवत्सरे पर्वणि नाभिसूनोः ।
हैमन्तिकोषागुरुभक्तयः के नायान्ति हैमन्तदिनाल्पिताघाः ॥ ५० ॥

५०. इहार्बुदे नाभिसूनोः श्री(श्रि?)ऋषभनाथस्य सांवत्सरे[10] संवत्सरे भवे पर्वणि चैत्रकृष्णाष्टम्यां जन्मोत्सवे के लोका नायान्ति । कया । सांवत्सरार्चाफलवाञ्छया सांवत्सरं संवत्सरे भवं सकल[11]संवत्सरेणोपार्ज्यमतिगुर्वित्यर्थः । यदर्चा[12]याः फलं स्वर्गादिप्राप्तिस्तस्येच्छया । किंभूताः सन्तः । हैमन्तिकी हेमन्ते भवा योषा रात्रिस्तद्वद्गुर्वी महती भक्तिर्येषां ते तथात एव हैमन्तदिनवदल्पितं लघूकृतमघं पापं यै[13]स्ते । एतेनात्र श्रीनाभेयभवनं महातीर्थमस्तीत्युक्तम् ॥

---

१ ए °त्प्रेक्षते. २ बी पौषा नु. सी पौषः पु°. ३ ए बी पौषा हि. ४ ए वृद्धोत°. ५ बी पदिष्ठ°. ६ सी °दन्तां जा°. ७ बी °ता । ए°. ८ सी °च्छन्ताम्. ९ बी सिद्धि क्षे°. १० ए सी °रे भ°. ११ सी °कलं सं°. १२ ए यदाचार्याः फ°. १३ ए सी यैस्तै । ए°.

वान्प्रावृषेण्यो[1] न्वथ हैमनो नु वातोत्र सिंहाजिनरोमकम्पी ।
सैंहाजिनं प्रावरणं वसानैः सेव्यो रतान्ते शबराङ्गनौघैः[2] ॥५१॥

५१. अत्रार्बुदे सैंहाजिनं सिंहचर्मण इदं प्रावरणं वस्त्रं वसानैः परिदधानैः शबराङ्गनौघै रतान्ते वातो वान् सेव्यते यतः प्रावृषेण्यो न्वथ हैमनो नु[1] गिरेरस्य जलबहुलत्वेन तरुच्छायाबहुलत्वेन च वायोः सदा शीतत्वाज्जायते[2] प्रावृषि भव इव[3] हेमन्ते भव इव वा । तथा सिंहाजिनरोमकम्पी सिंहाजिने भवानि रोमाणि कम्पयति[4][5] । एतेन मार्दवोक्तिः ॥

न माथुरौत्सं धनपुण्यमश्वत्थामा इहादुष्करदुर्लभार्थे ।
सुसंभवादुष्क्रयपुण्यकेश्वत्थाम्नोपरे वा ऋषयः स्मरन्ति ॥ ५२ ॥

५२. इहार्बुदे वर्तमाना अश्वत्थामा[6] अश्वत्थाम्नो द्रोणाचार्यपुत्रस्य[7] महर्षेः संबन्धिन ऋषयोश्वत्थाम्नोश्वत्थामसंबन्धिन ऋषिसमूहादपरे वा ऋषयो द्विजा न स्मरन्ति । किमित्याह । मथुरायां यागकरणादिना[8] कृतं प्रतिग्रहादिना[9] लब्धं वा माथुरं तथोत्सदेशे तीर्थस्नानपिण्डप्रदानादिरूपमूल्येन क्रीतं रोगाद्युपद्रवाभावेन संभूतं वौत्सं द्वन्द्वे माथुरौत्सं धनपुण्यं धनं मुनिप्रायोग्यं धान्यगवादि[10] पुण्यं तीर्थस्नानपिण्डप्रदानाद्युद्भवो धर्मो द्वन्द्वे तन्माथुरं[11] धनमौत्सं पुण्यं चेत्यर्थः । यतः । कीदृशीह । दुष्करश्चासौ दुर्लभश्च दुष्करदुर्लभो न तथादुष्करदुर्लभोर्थो द्रव्यं यत्र[12] तस्मिन्ननेकवस्तूनामाकरत्वाददुष्करद्रव्ये[13] वास्तव्ये श्च-

---

१ ए °षेणो न्व°. २ ए °ङ्गनोघैः.

---

१ सी °न वा°. २ ए सी °त्वाज्जाय°. ३ ए सी °व वा. ४ ए °म्प-यिता । ए°. ५ सी °यता । ए°. ६ सी °त्थाम्नो अ°. ७ सी °स्यर्षेः. ८ बी °गकार°. ९ सी °ना वा ल°. १० सी धान्यं ग°. ११ ए °थुरध°. १२ बी यत् त°. १३ बी °माकारत्वादु°.

रोदारलोकत्वाच्चादुर्लभद्रव्ये चेत्यर्थः । तथा सुसंभवं रोगाद्युपद्रवाभावेन धर्मोपष्टम्भकदानसद्भावेन च सुघटमदुष्क्रयं चानेकपुण्यक्षेत्राद्याधारत्वेन सुखक्रेतव्यं पुण्यं धर्मो यत्र तस्मिन् । इदमुक्तं स्यात् । किलान्यदेशेभ्यो मथुरायां स्वभावेन लोकस्य धार्मिकत्वादीश्वरोदारत्वाच्च प्रभूतयागादिप्रवृत्तिदानप्रवृत्तिभ्यां द्विजा बहु धनमुपार्जयन्ति लभन्ते च । उत्सदेशे चान्यदेशेभ्योतिपुण्यक्षेत्रात्मके द्विजानां प्रभूतस्य पुण्यस्य तीर्थवन्दनादिना क्रयः संभवश्च स्यात् । ताभ्यामपि सकाशादत्र गिरौ बहुतमयागप्रवृत्तिदानप्रवृत्त्यादिनानेकपुण्यक्षेत्रदर्शनादिना चातिप्रभूतधनोपार्जनालाभाभ्यां प्रभूतपुण्यक्रयसंभवाभ्यां च मथुरायामुपार्जितं लब्धं च धनमुत्से च क्रीतं संभूतं च पुण्यं न स्मरन्ति ॥

शंसन्ति नादेयमिवाशु नादेया राष्ट्रियं राष्ट्रियवच्च सम्यक् ।
ता रत्नखानीः पथकाः किराता इहाश्मकाकर्षकशिल्पिकानाम् ॥ ५३ ॥

५३. इहार्बुदे पथकाः पथि कुशलाः किराता अश्मकाकर्षकशिल्पिकानामश्मनि पाषाणकर्मण्याकर्षे रमणे शिल्पे कलाविज्ञाने च कुशलानां सूत्रधारद्यूतकारचित्रकारादीनां पुरतस्ताः प्रसिद्धा रत्नखानीर्जातौ जातौ यान्युत्कृष्टानि तानि रत्नानि तेषां खानीराकरान्सम्यगवितथमाशु प्रशंसन्ति । अश्मकानां पुर उत्कृष्टा अश्मखानीद्यू(र्द्यू)तव्यसने-

१ सी °च्चा × × × प्रभूतया°. २ ए धर्मोप°. ३ ए °न लोकस्य. ४ बी °तयोगा°. ५ सी °हुधा ध°. ६ सी °त्रास्तिके. ७ बी °तमाया°. ८ ए °तं पु°. ९ सी च न. १० बी °त्रकरा°. ११ सी °रः स्थाप्र°. १२ ए °सिद्धरत्नाखानीपथकाः किराता इहासकाकर्षकशिल्पिकानोर्जा°. १३ ए °रासम्य°. १४ बी सी °ष्टाश्म° १५ ए °नीर्जाद्यु°.

नात्यन्तमृणार्तत्वाद्रला[1]द्यर्थं परिभ्राम्यं[2]तामाकर्षकाणां च पुर उत्कृष्टरत्नखानी[3]: शिल्पिकानां च पुर उत्कृष्ट[4]धातुखानीरत्रत्या वर्णयन्ती[5]त्यर्थः। यथा नादेया नद्यां[6] नदीतरणे कुशला नाविका नादेयं लोकस्य निस्तारणादिना नद्यां[7] कृतं लब्धं क्रीतं संभूतं वा धनं[8] प्रशंसन्ति। यथा वा राष्ट्रिया राष्ट्ररक्षणादौ कुशला[9] भूपादयो राष्ट्रियं[10] राष्ट्रे लोकपालना[11]दिना कृतं लब्धं क्रीतं संभूतं वा द्रव्यं प्रशंसन्ति ॥

सांवत्सरार्चाफल। सांवत्सरे पर्वणि। इत्यत्र "संवत्सरात्०" [९०] इत्यादिनाण् ॥

हैमनः। हैमन्तः[12](न्त)। हैमन्तिक। अत्र "हेमन्ताद्वा तलुक् च" [९१] इति वाण् तत्संनियोगे[13] तलुक् च वा ॥

प्रावृषेण्यः। अत्र "प्रावृष एण्यः" [९२] इत्येण्यः ॥

अश्वत्थाम्नः। अत्र "अः स्थाम्नः" [६.१.२२] इत्यप्रत्ययस्य सिंहाजिन[14]। इत्यत्राणश्च "स्थाम०" [९३] इत्यादिना लुब्वा[15]। पक्षे। अश्वत्थामाः[16] ॥ सैंहाजिनम् ॥

माथुरौत्सम्। नादेयम्। राष्ट्रियम्। अत्र "तत्र कृत०" [९४] इत्यादिना यथायोगमणा[17]दय एयणादयश्च ॥

नादेयाः। राष्ट्रियवत्। इत्यत्र "कुशले" [९५] इति यथाविहितं प्रत्ययाः ॥

पथकाः। अत्र "पथोकः" [९६] इत्यकः ॥

अश्मकाकर्षक। इत्यत्र "कोश्मादेः" [९७] इति कः ॥

---

१ **ए** °द्ररला°. २ **बी** °म्यतमा°. ३ **बी** °खानी शि°. ४ **ए** °त्कृष्टं धा°. ५ **ए** °यतीत्य°. ६ **ए** नद्या न°. ७ **सी** °यां त°. ८ **बी** °यां क्रीतं. ९ **ए** °शलभू°. १० **ए** राष्ट्रेयं. ११ **ए** °पालादि°. १२ **ए** °न्तः। हेमन्तिकः। अ°. १३ **बी** °योगो त°. १४ **ए** °हाजन. १५ **ए** लुक् च वा। प°. १६ **बी** °त्थामा। सैं°. १७ **ए** °मण्याद°.

कालेयवत्स्रौघ्नवधूषु शारदकेष्विव प्रावृषिकाब्दवृष्टिः[1]।
ससिन्धुकापात्करिकापकर्या[2] च सैन्धवीहाप्सरसो विभान्ति॥५४॥

५४. इहार्बुदेप्सरसो विभ्रान्ति स्वर्गेपि दुर्लभैस्तैस्तैः[1] शाद्वलवनखण्डादिरम्यैः क्रीडास्थानविशेषैर्विशेषितत्वाच्छोभन्ते[2]। काः कास्तत्राह। ससिन्धुका सिन्धौ जाता सिन्धुका नाम देवी तया[3] युक्तापात्करिकापकरे कचवरे जातापकरिका[4]ख्या देवी तथापकर्यैवंनाम्न्या देव्या सह सैन्धवी चैवं नाम्नी देवी चेति। यथा स्रौघ्नवधूषु स्रुघ्नदेश[5]जातासु स्त्रीषु कलौ जातं कालेयं कुङ्कुमं वधूरूपादिविशेषेण विशेषितत्वाद्भाति यथा वा शारदकेषु शरदि जातेषु मुद्गविशेषेषु दर्भेषु[6] वा प्रावृषिकाब्दवृष्टिर्वर्षाकालजातमेघवृष्टिः फलाद्युपचयविशेषेण विशेषितत्वाद्भाति। एतेनैवं नामायं शैलो रम्यो येनात्र देव्योपि क्रीडन्तीत्युक्तम्। सिन्धुकादीनां देवीनां मिलितानां बहुत्वादप्सरस इत्यत्र बहुवचनम्। यद्वैकस्मिन्नप्यर्थे वाच्येप्सरश्शब्दः स्वभावेन[7] बहुवचनान्त इति बहुवचनम्॥

स्रौघ्न। कालेय। इत्यत्र "जाते" [९८] इति यथाविहितं प्रत्ययाः॥

प्रावृषिक। इत्यत्र "प्रावृष इकः" [९९] इतीकः॥

शारदकेषु। इत्यत्र "नाम्नि०" [१००] इत्यादिनाकञ्॥

सिन्धुका। सैन्धवी। अपकरिका। अपकर्या। इत्यत्र "सिन्धु०" [१०१] इत्यादिना कोण्च॥

१ ए °ब्दधृष्टिः. २ ए °पवार्या.

१ बी सी °भैः शाड्वल°. २ ए बी °न्ते। का का तत्रा°. ३ ए तत्रायु°. ४ बी °पकारि°. ५ सी °देशेषु मुद्ग°. ६ सी °षु या प्रा°. ७ ए °न व°. ८ सी इती°. ९ सी °रदिके°. १० बी सी °पकार्या.

पूर्वाह्णकोस्मिन्नपराह्णकेन प्रदोषकोवस्करकार्द्रकाभ्याम् ।
यक्षैरमावास्यकपन्थकामावास्यैः सुरः खेलति मूलकश्च ॥ ५५ ॥

५५. स्पष्टः[1] । किं तु पूर्वाह्णकादीनि[2] नामानि । पूर्वाह्णे जात इत्यादिर्निरुक्तिः[3] कार्या ॥

पूर्वाह्णकः । अपराह्णकेन । आर्द्रकाभ्याम् । मूलकः । प्रदोषकः । अवस्करक । इत्यत्र "पूर्वाह्ण०" [१०२] इत्यादिनाकः ॥

पन्थक । इत्यत्र "पथः पन्थ[4] च" [१०३] इत्यकः[5] पन्थादेशश्च[6] ॥

अमावास्यैः । अमावास्यक । इत्यत्र "अश्च०" [१०४] इत्यादिना-अ-अकौ वा । पक्षे । अ(आ)मावास्यैः ॥

आषाढ्यषाढं बहुलं श्रविष्ठाषाढीयमन्तस्तरु फल्गुनी च ।
श्राविष्ठ्यनूराधमिहामरी श्राविष्ठीय ऋच्छत्यथ फाल्गुनं च ॥५६॥

५६. इहार्बुदेषाढाभिश्चन्द्रयुक्ताभिर्युक्तः[7] कालोषाढास्तासु[8] जाताषाढी नामामरी देव्यषाढमषाढासु[9] जातं देवमन्तस्तरु वृक्षखण्डमध्य[10] ऋच्छति क्रीडायै गच्छति । तथा श्रविष्ठा[11] धनिष्ठासु जातामरी बहुलं कृत्तिकासु जातं देवमृच्छति । तथा फल्गुनी च फल्गुन्योर्जाता चामर्याषाढीयं देवमृच्छति । श्राविष्ठी चानूराधमृच्छति । अथ तथा श्राविष्ठीया फाल्गुनं चर्च्छति ॥

१ ए °विष्ठी°.

१ बी स्पष्टम् । किं. २ ए °दीनां ना°. ३ सी °दिनिरु°. ४ सी पन्था°. ५ ए °कः पन्थः प°. ६ बी पथादे°. ७ बी °र्युक्तका°. ८ सी °लोप्यषा°. ९ बी देव्याषाढमाषाढा°. १० बी °क्षषण्ड°. ११ सी °ष्ठासु.

पुष्योत्र स स्वातिविशा[1]खहस्ताः[2] सरेवतौ[3] तिष्यपुनर्वसू च ।
[4]सरौहि[5]णौ रेवतरो[6]हिणौ च चित्रः सचैत्रः खचरा रमन्ते ५७

५७. स्पष्टम् । किं तु स प्रसिद्धः पुष्यः[1] । पुष्यादीनि[2] नामानि ॥

चित्रा च रेवत्यथ रोहिणी च माघाश्विनौ कृत्तिक[7]कार्तिकौ च ।
गोस्थानगोशालकवत्सशाला नृपा[8] असिध्यन्खरशालयुक्ताः ॥५८॥

५८. स्पष्टम् । किं तु गवां शाला गोशालं "सेनाशाला०" इत्यादिना क्लीबता[3] । तत्र गोशालायां वा देशे जातो गोशालोज्ञातो गोशालो गोशालकः ॥

स वात्सशालोमुमुमासमानोदर्यं ससोदर्य इयायं[9] गूढः ।
कलापकाश्वत्थकमासिकं नु श्रीमातुरर्चां क्षितिपः प्रदातुम् ॥५९॥

५९. [4]ससोदर्यः सहोदरेण युक्तः स प्रसिद्धो वत्सशाले वत्सशालायां[5] वा देशे[6] जातो वात्सशालो नाम क्षितिपो गूढः पर[7]राष्ट्रप्रवेशेन शत्रुभयात्प्रच्छन्नः[8] सन्नुमासमानोदर्यं गौर्याः सहोदरममुमर्बुदमियाययौ । इण् धातुराङं विनाप्यागमनेर्थे दृश्यते । किं कर्तुम् । श्रीमातुर्लक्ष्मीदेव्या अर्चां प्रदातुम् । उत्प्रेक्ष्यते[9] । कलापकाश्वत्थै[10]कमासिकं नु । यस्मिन्काले मयूराः केदारा इक्षवश्च कलापिनः[11] स्युः स कालस्तत्साहचर्यात्कलापी तत्र देयमृणं कलापकं तथा यस्मिन्कालेश्वत्थाः फलन्ति

१ बी °शाषह°. २ ए सी °हस्ता स°. ३ बी सरेव°. ४ सी सरोहिणो रे°. ५ बी °हिणै रे°. ६ ए °तरौहि°. ७ ए सी कृत्तिक°. ८ बी °पान्ससि°. ९ बी °य गाढः.

१ ए सी पुष्य । पु°. २ बी पुष्फादी°. ३ सी °ता । त्यत्र. ४ बी ससौंद°. ५ सी °यां दे°. ६ ए °शे तो. सी °शे वा जा°. ७ बी °र उपरा°. ८ ए °न्नः मा°. ९ सी °त्प्रेक्षते. १० बी °त्थकामा°. ११ सी °नः स्युस्त°.

स कालोश्वत्थफलसहचरितोश्वत्थस्तत्र देयमृणमश्वत्थकं तथा मासे[1] देयमृणं[2] मासिकं समाहारद्वन्द्वे तदिव ॥

न ग्रैष्मकं यावबुसक्यवन्नोमाव्यासकं[1] नैषमकं न चापि ।
नाप्यावराद्यं समकं जनानामस्योपकण्ठेखिलधातुखानेः[2] ॥६०॥

६०. अस्यार्बुदस्योपकण्ठे समीपे वर्तमानानां जनानां[3] ग्रैष्मकं ग्रीष्मे देयमृणं नास्ति । तथा यस्मिन्काले यवानां बुसं स्यात्स कालो यवबुसस्तत्र[4] देयमृणं यवबुसकं तस्य भावो यावबुसक्यं तदस्यास्ति यावबुसक्यवद्यवबुसकमृणमित्यर्थः[5] । नास्ति । तथोमाव्यासकमुमा व्यस्यन्ते यस्मिन्स[6] काल उमाव्यासस्तत्र देयमृणं च नास्ति । न चाप्यैषमकमस्मिन्संवत्सरे[7][8] देयमृणमस्ति । तथावराद्यं समकमवरा समा संवत्सरोवरसमा समाया अवरत्वमित्यवरसमं वा तत्र देयमृणं नाप्यस्ति[9]। यतः । किंभूतस्य । अखिला धातवः स्वर्णाद्या[10] यासु ताः खानय आकरा यत्र तस्य ॥

अस्तापरप्राक्समकाग्रहायणकाः[3] श्रियो मातुरुपेत्य लोकाः ।
फलानि[4] सांवत्सरिकाणि दात्र्याः पर्वेह सांवत्सरिकं दिशन्ति ६१

६१. लोका उपेत्य दूरादागत्येहार्बुदे[11] श्रियो मातुः सांवत्सरिकं संवत्सरे देयमृणं पर्व यात्रोत्सवं दिशन्ति ददति[12] कुर्वन्तीत्यर्थः[13] । यतः । किंभूताः । अस्ते श्रीदेव्यैव क्षिप्त आपरप्राक्समकमपरसमायामपरसमे

१ ए °मान्यास°. २ ए °खानो । अ°. **सी** °खाने । अ°. ३ **बी** °काग्राहय°. ४ **बी** °लाणि सां°.

१ **बी** मारो दे°. **सी** मासि दे°. २ **बी** °णं यवबुसकं तस्य. ३ ए °नां ग्रिष्म°. ४ ए °यबु°. ५ ए **बी** °थतद्य°. ६ ए **बी** °स्मिन्काल. ७ **सी** °प्यैक°. ८ ए °कस्मि°. ९ ए °प्यसि । य°. १० ए °द्याया:सु. ११ ए °त्ये श्रि°. १२ **सी** °दन्ति कु°. १३ ए **सी** °र्वतीत्य°.

वा देयमाग्रहायणकमाग्रहायण्यां मार्गशीर्ष्यां देयं च ऋणे येषां ते तथा। यतः। कीदृश्याः श्रियः। फलानि धनधान्यलाभादीनि दात्र्याः। किंभूतानि। सांवत्सरिकाणि लोकैः सांवत्सरिकपर्वणाराधितत्वेन लोकानामवश्यं देयत्वेन संवत्सरे लक्ष्म्या [१]ऋणभूतानि देयानि॥

फलं च सांवत्[१]सरकं प्रदायी पर्वेव मेमुं नि[२]कषैष देशः।
[३]द्रागक्छारदेनोद्दलिताग्रहायणिको भृशं शालियवेन भाति॥६२॥

६२. हे राजन्नमुमर्बुदं नि[२]कषास्य समीप एष प्रत्यक्षो देशश्च शालियवेन शालिभिर्यवैश्च कृत्वा भृशमत्यर्थं भाति। कीदृशा। शारदेन शरदि पच्यन्ते ते शारदाः शालयस्तथा शरद्युप्ताः शारदा यवाः समाहारद्वन्द्वे "स्यादावसंख्येयः" [३. १. ११९.] इत्येकशेषे शारदं तेन। कीदृक्सन्। सांवत्सरकं संवत्सरे देयमृणं पर्वेव श्रीदेव्युत्सवमिव फलं लक्षसंख्यराजग्राह्यभागद्रव्यादि मे मम विक्रमसिंहस्य प्रदायी। एतद्देशप्रदत्तेन द्रव्येण हि सां[३]वत्सरकं पर्व श्रीदेव्या मया प्रतिवर्षं क्रियतेतश्च तत्पर्वणोनेन प्रतिवर्षं करणीयत्वादृणभूतं तद्यथासौ ददाति तथा फलमप्यनेकधनधान्यादि ददादित्यर्थः। अत [४]एव द्रा[५]गुद्दलितं विनाशि[६]तमाग्रहा[७]यणिक[८]माग्रहायण्यां देयमृणं येनार्थान्मम स तथा॥

ग्राम्या अमी हैमनवाससस्त्वेक्षन्तेनुवासन्ति महर्द्धयोन्नैः।
आश्वात्परसिन्युजकैश्च वासन्तकैश्च वासन्तविलक्षणैश्च॥६३॥

६३. प्रस्तावादत्रार्बुदेनुवासन्ति वसन्ते पुष्प(ष्य?)न्ति

१ बी °त्सरिकं. २ ए बी °षैक दे°. ३ ए सी द्राक् शार°.

१ ए ऋमण°. २ सी °षाद्य स°. ३ बी °त्सरिकं. ४ ए ए द्रा°. ५ बी द्राग्दलि°. ६ बी °तमग्रेहा°. ७ सी °यण्यां. ८ बी °माग्राहा°.

वासन्त्यः कुन्दलतास्तासां समीपे वर्तमाना अमी प्रत्यक्षा[1] ग्राम्यास्त्वा त्वामीक्षन्ते[2] कौतुकात्पश्यन्ति । किंभूताः । हैमनानि स्थौल्यनिबिडत्वादिना हेमन्ते साधूनि वासांसि येषां ते तथान्नैर्धान्यैर्महर्द्धयः[3] । किंभूतैः । आश्वात्परस्मिन्युजकैश्चाश्वयुजकैश्चाश्विनीपर्यायोश्वयुगाभिश्चन्द्र-[4] युक्ताभिर्युक्ता पौर्णमास्याश्वयुजी[5] । यद्यप्यत्र पौर्णमासीत्यस्य साक्षादप्रयुक्तत्वादण्लोपः[6] प्राप्नोति तथापि चैत्रीत्यादिज्ञापकाद्[7] "आश्वयुज्या अकञ्" [६. ३. ११९] इति ज्ञापकाच्च[8] पौर्णमास्यां वाच्यायां लोपो न स्यात् । तस्यामुप्तैश्च तथा वासन्ति(न्त?)कैश्च[9] वसन्त उप्तैश्च । तथा वासन्तविलक्षणैश्च वसन्त उप्तेभ्य इतरैश्च ॥

योग्रैष्मसग्रैष्मकसस्यभूम्योर्विग्रैणयोर्नैशिकयोश्च यो वा ।

अस्यान्यशैलस्य[1] च तं विशेषं प्रचक्षते राष्ट्रियदिश्यमुख्याः ॥६४॥

६४. राष्ट्रियदिश्यमुख्या राष्ट्रियेषु राष्ट्रे देशे भवेषु दिश्येषु च सर्वदिग्भवेषु लोकेषु मध्ये मुख आदौ भवा मुख्याः श्रेष्ठा अस्यार्बुदस्यान्यशैलस्य[10] च तं विशेषं भेदं प्रचक्षते यः शाड्वलत्वादिकृतो विशेषोग्रैष्मसग्रैष्मकसस्यभूम्योग्री(र्ग्री)ष्म[11][12] उप्तानि ग्रैष्माणि[13] सस्यानि न विद्यन्ते[14] ग्रैष्माण्यत्राग्रैष्मो विरोधेत्र नञ् । तेन[15] ग्रीष्मर्तुविरोधी यो वर्षर्तुस्तत्रत्य-[16] सस्यान्वितो देशस्तथा ग्रैष्मकैः सहास्ति यः स सग्रैष्मको देशोग्रैष्मश्च[17]

---

१ ए °स्य तं.

---

१ ए बी °त्यक्ष्या ग्रा°. २ बी °मीक्ष्यन्ते. ३ ए °थान्यैर्धा°. ४ बी °कैश्चाश्वि°. ५ बी पौर्णिमा°. ६ बी °दल्लोपः. ७ ए °त्रीत्यदि°. ८ ए °च्च पूर्ण°. ९ ए सी °सन्तिवि°. १० ए °लस्यो च. ११ सी °कशस्य°. १२ ए °भूम्यो ग्रै°. १३ सी °णि शस्या°. १४ बी °घते ग्रै°. १५ ए °न ग्रैष्म°. १६ सी °त्यदेशान्वि°. १७ सी °ष्मकश्च.

संग्रैष्मकश्चेति सामान्येन द्वन्द्वं कृत्वा ततो विशेषविवक्षया स्त्रीत्वे-ग्रैष्मसग्रैष्मके ये सस्यभूमी तयोर्वर्षाकालग्रीष्मकालसस्यभूम्योरस्ति यो माधुर्यव्यक्ततादिकृतो विशेषो विप्रैणयोर्द्विजहरिणविशेषयोश्च स्यात् । कीदृशोः सतोः । नैशिकयोर्निशासहचरितमध्ययनं निशा तत्र जयी साभ्यासो नैशिको द्विजस्तथा निशायां व्याहरति नैशिक एणो द्वन्द्वे "स्यादावसंख्येयः" [३. १. ११९] इत्येकशेषे नैशिकौ । तयोः ॥

गोविन्दपद्येव पुरोस्ति वर्णासैषानुदक्येव सरिन्निषेव्या ।
माध्यंदिना सानुमतोस्य मध्यंदिनाम्बुजा माध्यमकैरवा च ॥६५॥

६५. अस्य सानुमतोर्बुदस्य माध्यंदिना मध्ये भवैषा प्रत्यक्षा वर्णासा वर्नासेति नाम्ना प्रसिद्धा सरित्पुरोस्ति गोविन्दपद्येव पादे भवा पद्या गोविन्दस्य पद्या गोविन्दपद्या गङ्गा सा यथा पुरोस्ति । किंभूता । मध्यंदिनानि मध्ये भवान्यम्बुजानि यस्यां सा तथा माध्यमानि मध्ये भवानि कैरवाणि यस्यां सात एवानुदक्येवारजस्वला स्त्रीव निषेव्या लोकैः सेव्या ॥

द्राग्मध्यमीयाश्मचये स्खलन्त्योङ्गुलीयवत्क्वापि विभान्ति वीच्यः ।
क्वचिट्टवर्गीयवदत्र जिह्वामूलीयवत्क्वापि च वारिवर्ग्याः ॥ ६६ ॥

६६. अत्र वर्णासानद्यां वारिवर्ग्या वारिवर्गे जलौघे भवा वीच्यः कल्लोलाः क्वापि प्रदेशेङ्गुलीयवन्मुद्रिकाकारा भान्ति क्वचिच्च टवर्गीयवट्ट-

१ ए °णास्तेषा°. २ बी °षावदुक्ये°.

१ बी समग्रै°. २ ए °न्ये द्व°. ३ सी ये शस्य°. ४ ए °लग्रैष्म°. ५ बी भूमौरास्ति. ६ ए सी °स्ति तथा यो. ७ बी °सतोनै°. सी °सतोनिशि°. ८ ए न सा°. ९ बी द्वन्द्वं स्याद्याव°. १० बी °शिके । त°. ११ सी °सा बना°. १२ ए °नाशेति°. १३ ए सा पु°. १४ बी °ता । माध्यं°. १५ ए मध्यदि°. १६ बी °वामुदक्योवा°. १७ बी अव°.

वर्गे भवाष्टवर्गीयाष्टठडढणास्तदाकारा भान्ति । क्वापि च जिह्वामूलीयवद्वज्राकारवर्णाकारा भान्ति । यतो मध्यमीयाश्मचये नदीमध्यभवे शिलौघे द्राक्स्खलन्त्यः ॥

सुरेभवर्गीयगजाः सुराश्ववर्गीणवाहाः पृतनास्तटेस्याः ।
अर्हन्त्यवास्तेयसकालशेयदार्तेयघोषे तव विश्रमं तत् ॥ ६७ ॥

६७. तत्तस्माद्धेतोर्हे राजंस्तव पृतनाः सेना अस्या वर्णासानद्यास्तटे विश्रममर्हन्ति । कीदृश्यः । सुरेभवर्गीया ऐरावणपक्षे भवा ऐरावणतुल्या इत्यर्थः । गजा यासु ताः । तथा सुराश्ववर्गीणा उच्चैःश्रवस्तुल्या वाहा अश्वा यासु ताः । यतः । किंभूते तटे । अविद्यमानं वास्तेयं वस्तौ पुरीषनिर्गमरन्ध्रे भवं पुरीषं यत्र तदवास्तेयम् । एतेन पावित्र्योक्तिः । अत एव कलश्यां घटे भवः कालशेयस्तथा दृतौ खल्ले भवो दार्तेयो द्वन्द्वे कालशेयदार्तेयौ यौ घोषौ जलभरणोत्थौ शब्दौ ताभ्यां सहास्ति यत्तत्तथा । एतेन नदीजलस्य पेयत्वोक्तिः । विशेषणकर्मधारयेवास्तेयसकालशेयदार्तेयघोषं तस्मिन् ॥

आहेयभोगोपमहस्तहस्तिग्रैवेयदामप्रतिबन्धपात्रम् ।
सन्त्वद्रिकौक्षेयमहीरुहः कुम्भास्तेयपङ्कारुणिताग्रशाखाः ॥६८॥

६८. कुक्षौ मध्ये भवाः कौक्षेया अद्रेरर्बुदस्य कौक्षेया ये महीरुहो वृक्षास्ते सन्तु । कथंभूताः । अहौ भव आहेयो यो भोगः कायस्तेनोपमा दीर्घत्ववक्रत्वादिना सादृश्यं येषां ते तथा हस्ताः शुण्डा येषां ते तथा ये हस्तिनस्तेषां ग्रैवेयाणि ग्रीवासु भवानि यानि दामानि

१ ए °नातटे°.

१ ए ष्टगणा°. २ ए °र्णा भा°. ३ ए °च न°. ४ ए ऐण°. ५ ए सी °ताः । सु°. ६ ए सी °यं वास्तौ. ७ ए °न पवि°. ८ बी °तेयौ. ९ बी यत्र तत्तथा. १० सी °लस्यापे°. ११ बी मध्यभ°. १२ ए °या आद्रे°.

बन्धनशृङ्खलास्तैर्यः प्रतिबन्धस्तस्य पात्रं स्थानम् । किंभूताः सन्तः । अस्ति विद्यमाने मदेङ्कुशप्रहारोत्थेसृजि वा भव आस्तेयो यः पङ्कः स आस्तेयपङ्को रजःपातादिना संजातो मदस्य रक्तस्य वा कर्दमः कुम्भेषु[1] य था(आ)स्तेयपङ्कस्तेनारुणिताः कुम्भकण्डूयनेन रक्तीकृता अग्रशाखाः शाखाग्राणि येषां ते तथा ॥

श्रीग्रैवहाराहरदोस्तु चातुर्मासी नु गाम्भीर्यमनस्क पर्व[1] ।
अदैव्य[2]बाह्ये त्वयि देव चातुर्मास्यप्रियाणां क्षितिपाश्वजन्येद्र ६९

६९. हे श्रीग्रैव[2]हार श्रियः साम्राज्यलक्ष्म्या अलंकारकत्वाद्ग्रीवाभवहारतुल्य तथा गम्भीरेषु दुरवगाहेषु वस्तुषु भवं गाम्भीर्यं मनो यस्य हे गाम्भीर्यमनस्क दुरवगाहत्वेन निश्चेतुमशक्येष्वपि कार्येषु निश्चायिकाबुद्धे तथा चतुर्षु मासेषु भवानि चातुर्मास्यानि यज्ञकर्माणि प्रियाणि येषां[3] ते तेषां चतुर्णामाश्रमाणां देव[4] रक्षक[5]त्वात्स्वामिंस्तथा हे क्षितिपाश्वजन्येद्र[6] पृथिव्यां[7] पालकत्वाद्विष्णुतुल्य त्वयि सत्यदोद्यतनमहर्दिनं[8] पर्वास्तु[9] त्वदावासनिकया महानन्द[10]हेतुत्वान्महोत्सवरूपं भवतु । यतः । किंभूते त्वयि । अदैव्यबाह्ये[11] देवेषु भवा दैव्या देवा एवं[12] तेभ्यो बाह्यो बहिर्भूतो न तथा तस्मिन्[13] रूपादिना देवतुल्य इत्यर्थः । चातुर्मासी नु यथा चतुर्षु मासेषु भवा चातुर्मास्या[14]षाढी कार्तिकी फाल्गुनी वा पूर्णिमा पर्वदिनं भवति ॥

---

१ ए °र्वं । आदैयबाह्ये. २ सी °दैवबा°.

---

१ सी °षु था°. २ बी °ग्रैवेयहा°. ३ बी सी °षां तेषां. ४ ए देवा र°. ५ बी रक°. ६ बी °श्वयज्ञेद्र. ७ बी सी पृथ्व्यां पा°. ८ बी °समिक°. ९ ए °न्दत्वा°. १० ए °भूतैः । त्वद्यदै°. ११ ए °ह्येषु दे°. १२ ए सी एते°. १३ बी °न् कूपा°. १४ ए °स्याखाढी.

श्राविष्ठीया[1]। श्रविष्ठा। आषाढीयम्[2]। अषाढम्। अत्र "श्रविष्ठा०" [१०५] इत्यादिना नाम्नीयण् अश्च ॥ अणमपीच्छन्त्येके। श्राविष्ठी आषाढी ॥

फा(फ)ल्गुनी। इत्यत्र "फल्गुन्याष्टः" [१०६] इति टः ॥ अणमपीच्छन्त्येके। फाल्गुनम् ॥

बहुलम्। अनूराधम्। पुष्यार्थ[3]। पुष्यः तिष्य। पुनर्वसू[4]। हस्ताः। विशाख[5]। स्वाति। इत्यत्र "बहुल०" [१०७] इत्यादिना नाम्नि भाणो लुप् ॥

चित्रा। रेवती। रोहिणी। इत्यत्र "चित्रा०" [१०८] इत्यादिना लुप् ॥ स्त्रियामिति किम्। चैत्रः। रैवतौ। रौहिणौ ॥ पुंस्येषां विकल्प इत्येके। चित्रः। रेवत। रोहिणौ ॥

कृत्तिक कार्तिकौ। अत्र विकल्पेन ॥ अश्विनौ। अत्र नित्यम्। "बहुलमन्येभ्यः" [१०९] इति भाणो बहुलं लुप् ॥ क्वचिन्न स्यात्। माघ ॥

गोस्थान। गोशाल। खरशाल। इत्यत्र "स्थानान्त०" [११०] इत्यादिना प्रत्ययस्य[6] लुप् ॥

वत्सशालाः वात्सशालः। अत्र[7] "वत्सशालाद्वा" [१११] इति प्रत्ययस्य लुर्ब्वा[8] ॥

सोदर्यः[9]। समानोदर्यम्। एतौ[10] "सोदर्य०" [११२] इत्यादिना निपात्यौ॥

मासिकम्। अत्र "कालाद्०" [११३] इत्यादिना यथाविहितं कालेकण् ॥

कलापकाश्वत्थक। यावबुसक्य। उमाव्यासकम्। ऐषमकम्। अत्र "कलापि०" [११४] इत्यादिना अकः ॥

ग्रैष्मकम्। आवरसमकम्। अत्र "ग्रीष्म०" [११५] इत्यादिनाकञ् ॥ अपरसमादपीच्छन्त्येके। आपरसमकः[11] ॥

सांवत्सरिकाणि फलानि। सांवत्सरिकं पर्व। सांवत्सरकं फलं पर्वेव ॥ आग्र-[12]

---

१ **ए** °या। श्रावि°. २ **ए सी** °म्। आषा°. ३ **बी** °ष्यार्थः। पु°. ४ **बी** °र्वसुः। ह°. ५ **बी सी** °शाष। स्वा°. ६ **बी** °यलु°. ७ **बी सी** °त्र वात्स°. ८ **ए बी** °ब्वा। सौद°. ९ **ए सी** °दर्य। स°. १० **ए बी** °तौ सौद°. ११ **ए सी** °मकः। सां°. १२ **ए** आग्राहय°.

हायणिकः। आग्रहायणकाः। अत्र "संवत्सर०" [११६] इत्यादिना-इकण् अकञ्च ॥

हैमन। वासन्ति। शारदेन शालिना। इत्यत्र "साधु०" [११७] इत्यादिना यथाविहितमृत्वण् ॥

शारदेन यवेन। इत्यत्र "उप्ते" [११८] इति यथाविहितमृत्वण् ॥

आश्वयुजकैः। अत्र "आश्वयुज्या अकञ्" [११९] इत्यकञ्[1] ॥

ग्रैष्मक[2]। अग्रैष्म। वासन्तकैः। वासन्त। इत्यत्र[3] "ग्रीष्म०" [१२०] इत्यादिना वाकञ्[4] ॥

नैशिकयोर्विप्रैणयोः। अत्र "व्याहरति मृगे" [१२१] इति "जयिनि च" [१२२] इति च यथाविहितं कालेकण् ॥

राष्ट्रिय। ग्राम्याः। इत्यत्र "भवे" [१२३] इति यथाविहितं प्रत्ययाः ॥

दिश्य। मुख्याः[5] ॥ देहांश। पद्या। इत्यत्र "दिगादि०" [१२४] इत्यादिना यः ॥

उदक्या[6]। इत्यत्र "नाम्नि०" [१२५] इत्यादिना यः ॥

माध्यंदिना। माध्यमा[7](म)। मध्यमीय। इत्यत्र "मध्याद्०" [१२६] इत्यादिना[8] दिनण्-ण-ईयास्तत्संनियोगे मागमश्च ॥ अन्ये तु दिनं णितं नेच्छन्ति। मध्यंदिन ॥

जिह्वामूलीय[9]। अङ्गुलीय। इत्यत्र "जिह्वामूल०[10]" [१२७] इत्यादिना-ईयः ॥ चानुकष्टस्य मध्यस्येये मध्यीय[11] इत्युदाहरणं स्वयं ज्ञेयम् ॥

टवर्गीय। इत्यत्र "वर्गान्तात्" [१२८] इतीयः ॥

सुराश्ववर्गीण। वारिवर्ग्याः। सुरेभवर्गीय[12]। इत्यत्र "ईन०" [१२९] इत्यादिना-ईन-य-ईयाः ॥ अशब्द इति किम्। टवर्गीय ॥

---

१ **ए** °ञ्। अ°. २ **सी** °ष्मकः। अ°. ३ **सी** °त्र ग्रैष्म°. ४ **बी** °ञ्। नैशि°. ५ **ए** मुख्या। दे°. ६ **ए** °दकेत्य°. ७ **बी** °ध्य। म°. ८ **बी** °नाण्. ९ **ए** °ली। अ°. १० **ए** °मूलीत्यादिना-इयः. ११ **ए** मध्ययेत्यु°. १२ **ए** °रेभिव°.

दार्तेय । कौक्षेय । कालशेय[1] । वास्तेय । आहेय । इत्यत्र "दृति०" [१३०] इत्यादिना-एयण् ॥

आस्तेय । इति "आस्तेयम्" [१३१] इत्यनेन निपात्यम् ॥

ग्रैवं[2] । ग्रैवेय । इत्यत्र "ग्रीवातोण्च" [१३२] इति-अणेयणौ ॥

चातुर्मासी । इत्यत्र[3] "चतुर्मासान्नाम्नि" [१३३] इत्यण् ॥

चातुर्मास्य[4] । इत्यत्र "यज्ञे ञ्यः" [१३४] इति ञ्यः ॥

गाम्भीर्य । पाञ्चजन्य । बाह्य[5] । दैव्य । इत्यत्र[6] "गम्भीर०" [१३५] इत्यादिना ञ्यः ॥

अद्यानुपथ्यैर्गिरिपारिमुख्यैर्[1]गृहैरिवान्तःपुरिकैः स्थुलाग्र्यैः[2] ।
स्थित्वा[3] प्रयातासि जयाय नः पारिग्रामिकैर्विप्रवरैः कृताशीः ७०

७०. हे राजंस्त्वं जयाय प्रयातासि प्रयास्यसि । कीदृक्सन् । विप्रवरैर्द्विजमुख्यैः कृताशीर्विहितयात्रामङ्गलः । किंभूतैः । पारिग्रामिकैः परिर्वर्जनार्थो ग्रामेभ्यः परि परिग्रामम्[7] "पर्यपाङ्०"[३. १. ३२] इत्यादिनाव्ययीभावः । परिग्रामे[8] ग्रामवर्जे[9] नगरादौ भवैः । एतेन सर्वविद्यासु कौशलमुक्तम् । किं कृत्वा प्रयातासि । अद्य नोस्माकं[10] स्थुलाग्र्यैः श्रेष्ठगुप्यद्गुरुभिः(?) करणैः स्थिताः(तः ?) स्थुलाग्र्येषु स्थित्वेत्यर्थः । किंभूतैः । आनुपथ्यैः पथः समीपमनुपथं तत्र भवैस्तथा गिरिपारिमुख्यैः परितः सर्वतो मुखं परिमुखं "परिमुखादेरव्ययीभावात्" [६. ३. १३६] इति वचनादेवाव्ययीभावो[11] वर्जनार्थो वा परिः । "पर्यपाङ्०" । [३. १. ३२] इत्यादिनाव्ययीभावः । परिमुखे भवानि पारिमुख्यानि गिरेरर्बुदस्य पा-

---

१ **बी** °पारमु°. २ **बी** °लाग्रैः । स्थि°. ३ **ए** °त्वा प्रिया°.

---

१ **ए** कालेश°. २ **ए** ग्रैवं । ग्रै°. ३ **ए** °त्र चातु°. ४ **ए** °मास । इ°. ५ **बी** °ह्ये । देव्य. ६ **बी** °त्र गाम्भी°. ७ **ए** °म् । परि परिग्रामम् । प°. ८ **बी** °रिमुखे. ९ **सी** °वर्जन°. १० **सी** °कं स्थला°. ११ **ए** °देव्यव्य°.

रिमुख्यानि तैरतिबाहुल्येन गिरेः सर्वमुखेषु भवैर्लोकारोहाद्यर्थं गिरि[1]मुखं पद्यां वर्जयित्वा भवैर्वेत्यर्थः । तथान्तःपुरिकैः पुरस्यान्तर्नगरमध्यभागे भवैर्गृहैरिव विस्तीर्णत्वस्वर्णकलशोल्लोचैचित्र[2]पताकाद्युपेतत्वादि[3]ना नगरगर्भस्थधवलगृहतुल्यैरित्यर्थः ॥

अथावसत्तत्र चमूः सधान्यानुग्रामिकक्षेत्रभुवोभिरक्षन् ।
दृशौपकर्णिक्य[1] ऋजूल्लसन्त्यौ[2]पजानुकोद्दामभुजो नरेन्द्रः॥७१॥

७१. अथ नरेन्द्रस्तत्र वर्णासातटेवसत् । कीदृक् । औपजानुकौ प्रलम्बत्वाज्जान्वोः समीपे प्रायेण भवावुद्दामौ भुजौ यस्य[4] सः । तथा सधान्या सस्याढ्यानुग्रामिकी ग्रामसमीपे भवा या क्षेत्रभूस्तस्याः सकाशाच्चमूर[5]भिरक्षन्धान्यविनाशाभावाय निवर्तयन्सन् । कया कृत्वा । दृशा दृष्ट्या[6] । कीदृशा । औपकर्णिक्यातिविस्तीर्णत्वेन कर्णसमीपे प्रायेण भवया तथा ऋजूल्लसन्त्या कोपादिविकाराभावेनाकुटिलं यथा स्यादेवं र[7]क्षासंज्ञार्थमूर्ध्वीभवन्त्या ॥

रिंसु[3]मन्तःपुरिकादिलोकमस्यो(स्यौ)पनीविक्य ऋजुस्रजाथ ।
ज्ञात्वेव वन्यास्वगकर्णिकासु[4] ललाटिकेवर्तव[5] आविरासन् ॥७२॥

७२. अथर्तवो वसन्ताद्याः सर्वेप्याविरासन् । कीदृशः । अगस्यार्बुदस्य विभूषकत्वात्कर्णिकासु कर्णाभरणतुल्यासु वन्यासु वनानां समूहेषु ललाटिकेव शोभाहेतुत्वाल्ललाटमण्डनतुल्याः[8] । ललाटिकापि कर्णिकासु मध्ये शोभाविशेषास्याविर्भवति । किं कृत्वेवाविरासन् ।

१ बी °णिक्या ऋ°. २ बी °सन्त्योप°. ३ बी °रंशुम°. ४ सी °सु लाला°. ५ ए बी °केवार्त°.

१ बी गिरेमु°. २ बी °चविचि° सी °चप°. ३ बी °ना नाग°. ४ बी यस्या सः. ५ बी °मूभि°. ६ बी दृष्ट्याः । कीदृश्यौप°. ७ बी रक्ष्यासं°. ८ ए °दृशोस्या°. ९ सी °तुल्या । ल°.

अस्य कुमारपालस्यान्तःपुरिकादिलोकमन्तःपुर एकपुरुषपरिग्रहे स्त्रीसमूह उपचारात्तन्निवासे वा भवा आ(अ)न्तःपुरिका राज्ञ्यस्तत्प्रभृतिस्त्रीलोकं ज्ञात्वेव । किंभूतम् । औपनीविक्या नीवीसमीपे प्रायेण भवया ऋजुस्रजा[1] सरलपुष्पमालया रिरंसुम्[2] ॥

पारिमुख्यैः । आनुपथ्यैः । इत्यत्र "परि०" [१३६] इत्यादिना ञ्यः ॥

आन्तःपुरिकैः । अत्र "अन्तः०" [१३७] इत्यादिनेकण् ॥

पारिग्रामिकैः । आनुग्रामिक । इत्यत्र "पर्यनोर्ग्रामात्" [१३८] इतीकण् ॥

औपजानुक । औपनीविक्या । औपकर्णिकै[3](क्या) । इत्यत्र "उपाज्जानु०" [१३९] इत्यादिना-इकण् ॥

अन्तःपुरिका । इत्यत्र "रूढौ०" [१४०] इत्यादिनेकः ॥

कर्णिकासु । ललाटिका । इत्यत्र "कर्ण०" [१४१] इत्यादिना कल् ॥

अथ वसन्तर्तुमारभ्य सर्वर्तूनामाविर्भावं वर्णयति ।

पिकोथ कार्तार्चिकपाञ्चहोतृकतार्किकाख्यातिकसांहितेषु ।
विघ्नो मुनीनां सहवाजपेयिकेषु व्यकूजन्नवचूतमत्तः ॥ ७३ ॥

७३. अथ पिको व्यकूजदव्यक्तं शब्दमकरोत् । कीदृक्सन् । मुनीनां विघ्नः स्मरोद्दीपकत्वेनोन्मनीकारकत्वादन्तरायभूतः । केषु विषये[4][षु] । कार्तार्चिकपाञ्चहोतृकतार्किकाख्यातिकसांहितेषु कृतां तथा ऋचां मन्त्रविशेषाणां तथा पञ्चसु होतृषु भव इत्यणो लुपि पञ्चहोता ग्रन्थभेदस्तस्य तथा तर्काख्यातसंहितानां व्याख्यानानि यद्वा कृतादिषु[5] भवानि व्याख्यानानि तेषु । किंभूतेषु । सह वाजपेयिकेषु वाजपेयस्य[6] यज्ञस्य व्याख्यानं तत्र भवं वाजपेयिकं[7][8] तेन युक्तेषु । यतः कीदृक् । नवचूतमत्तः प्रत्यग्राम्रफलास्वादनेन[9] मत्तः ॥

---

१ बी °जुश्रजा. २ बी °रंशुम्. ३ बी °नोग्रामा°. ४ बी °ये कार्ता°. ५ बी कृदादिपु व्या°. ६ बी सी °स्य व्या°. ७ सी °पेयकं. ८ ए °यिकां ते°. ९ सी °फलस्वा°.

कार्ते[1] । इत्यत्र "तस्य०" [१४२] इत्यादिना यथाविहितमण् ॥

आख्यातिक । इत्यत्र "प्रायः०" [१४३] इत्यादिनेकण् ॥ प्रायोग्रहणात्क्वचिन्न स्यात् । सांहितेषु[2] ॥

आर्चिक । ऋकारान्त । पाञ्चहोतृक । द्विस्वर । तार्किक । याग । वाजपेयिकेषु । अत्र "ऋगृद्०[3]" [१४४] इत्यादिनेकण् ॥

वासिष्ट(ष्ठि)[1]काध्यायकृते पुरोडाशिके[2] पुरोडाशिकि तिष्ठ टीके । क्षणो मुनिष्वप्ययमात्मयोनेर्वसन्त इत्यूच इवालिनादैः[3] ॥ ७४ ॥

७४. इतीवेदमिव वसन्तोलिनादैरूचे । तदेवाह । वासिष्ठिका[4]ध्यायकृत उपचाराद्व[5]सिष्ठे[6]नोक्तो मन्त्रग्रन्थोपि वसिष्ठस्तस्य व्याख्यान[7]स्तत्र भवो वा योध्यायस्तत्र मध्ये कृते हे पुरो[8]डाशिके पुरोडाशाः पिष्टपिण्डास्तैः सहचरितो मन्त्रः पुरोडाशस्तस्य व्याख्या[9]नानि तत्र भवे वा टीके निरन्तरव्याख्ये त्वं तिष्ठ । तथा हे पुरोडाशिकि त्वमपि तिष्ठ या वासिष्ठिकव्याख्याध्यायमध्ये कृता पुरोडाशिका टीकास्ति या चान्या केवलैव पुरो[10]डाशिकी[11] टीकास्ति साप्यधुना मुन्यादिलोकानां धर्मकर्मणि व्यापारे[12]णरूपा[13]त्स्वव्यापारान्निवर्ततामित्यर्थः । यतो मुनिष्वपि विषय आत्मयोनेः कामस्यायं क्षणः समयोस्ति यतो युष्मदुत्पाद्य[14]धर्मपरिणामोच्छेदकः कामोधुना मुनिष्वपि व्यजृम्भ[15]तेत्यर्थः ॥

---

१ **सी** वाशिष्ट°. २ **बी** °शिकि. ३ **ए** °नादौ । इतीत्रेदमिव वसन्तोलिनादैः । इ°.

---

१ **ए बी** कार्तिकेत्य°. २ **बी** °पु । अर्चिक. **सी** °पु । अर्चि°. ३ **सी** ऋगृ इ°. ४ **सी** वाशिष्ठका°. ५ **ए** °राद्विसि°. ६ **सी** °द्वशिष्टेनो°. ७ **ए** °ख्यानेस्त°. ८ **ए** °रोशि°. ९ **ए** °ख्यानि. १० **ए** °रोशि°. ११ **बी** °की टिका°. १२ **सी** °ररू°. १३ **सी** °पास्वस्या नु कर्सि°. ७७ श्लोकपर्यन्तं ग्रन्थो नास्ति. १४ **बी** °द्यप°. १५ **बी** °म्भत इत्य°.

छन्दस्यशैक्षागेयनान्[१] नो[२] पौरोडाशिकं[३] वा जगुरौत्सशिष्याः ।
पैतृव्यकाचार्यकभीमुचस्तु स्वैरं विजहुर्बकुलावलोकात् ॥ ७५ ॥

७५. औत्सशिष्या औत्साः पाठार्थमुत्सदेशादर्बुद आगता[१]श्छात्रा न जगू रागविशेषपूर्वं न पेठुः । कान् । छन्दस्यशैक्षागेयनान् छन्दसो वेदस्य शिक्षाया वर्णप्रतिपादकग्रन्थस्य ऋगयनस्य वैदिकग्रन्थभेदस्य च व्याख्यानांस्तत्र भवान्वा ग्रन्थान् । पौरोडा[२]शिकं वा पुरोडाशानां पिष्ट[३]-पिण्डानामयं तत्र भवो वा पौरोडा[४]शस्तत्संस्कारको मन्त्रस्तस्य व्याख्यानस्तत्र भवो वा यो ग्रन्थस्तं वा नो जगुः । यतः । किंभूताः । बकुलावलोकात्के[५]सरपुष्पेक्षणात्कामपरवशत्वेन पि(पै)तृव्यकाचार्यकभीमु[६]चः पितृव्यादाचार्याच्चागतां भियं मुञ्चन्ति ये ते तथा । तर्हि किं[७] चक्रुरित्याह[८] । तु किं तु स्वैरं विजहुर्वनादिषु ललनाभिः सह चिक्रीडुः ॥

वासिष्ठिकाध्याय । इत्यत्र "ऋषेरध्याये" [१४५] इतीकण् ॥

पुरोडाशिके । पुरोडाशिकि । पौरोडाशिकम् । अत्र "पुरोडाश०" [१४६] इत्यादिनेकेकटौ ॥

छन्दस्य । इत्यत्र "छन्दसो यः" [१४७] इति यः ॥

शैक्षागेयनान् । इत्यत्र "शिक्षादेश्चाण्" [१४८] इत्यण् ॥

औत्स । इत्यत्र "तत आगते" [१४९] इति यथाविहितोञ् ॥

विद्यासंबन्ध । आचार्यक ॥ योनिसंबन्ध । पैतृव्यक । इत्यत्र "विद्या०" [१५०] इत्यादिना[९]कञ् ॥

---

१ **बी** °यमत्ते नो. २ **ए** °न्न पौ°. ३ **बी** पौराडा°.

---

१ **बी** °ताछात्रा. २ **बी** पौराडा°. ३ **ए** पिष्टापि°. ४ **बी** पौराडा°. ५ **बी** °त्केशर°. ६ **ए** °मुचा पि°. ७ **बी** किं चिकु°. ८ **बी** °ह । किं. ९ **बी** °दिना कक°.

वणिग्नु पित्र्यापणिकैर्हिरण्यैर्मन्त्रैर्द्विजः पैतृकहौतृकैर्नु ।
अभादशोकः कुसुमैरनृत्यत्तैर्थानिलैः शौण्डिकवच्च सद्यः ॥७६॥

७६. कुसुमैः कृत्वाशोकोभात् । यथा वणिग् हिरण्यैर्धनैर्भाति । किंभूतैः । पित्र्यापणिकैः[1] पितुरागतैः पित्र्यैः कुलक्रमागतैरापणादागतैरापणिकैः[2] स्वयमुपार्जितैश्च । यथा वा मन्त्रैर्द्विजो भाति । किंभूतैः । पैतृकहौतृकैः[3] पितुर्होतुश्च यायजूकादागतैः । तथा सद्योशोकस्तैर्थानिलैस्तीर्थान्नद्यवतारादागतैर्वातैः कृत्वानृत्यच्च नर्नर्तेव[4] च[5] । शुण्डिकः सुरापणः सुराविक्रयी वा तस्मान्मद्यपानं कृत्वागतः शौण्डिको मद्यपो यथा नृत्यति[6] ॥

पित्र्य । पैतृक । इत्यत्र "पितुर्यो वा" [१५१] इति वा यः ॥

हौतृकैः । पैतृक । अत्र "ऋत इकण्" [१५२] इतीकण् ॥

आपणिकैः । अत्र "आयस्थानात्" [१५३] इतीकण् ॥

शौण्डिक । तैर्थ[7] । इत्यत्र "शुण्डिकादेरण्[8]" [१५४] इत्यण् ॥

द्वैजं च वै(बै ?)दं च नयं विमोच्य द्विजान्नयन्त्यद्विजरूप्यकर्म[2] ।
क नु क्रिया वो द्विजमय्यनिद्रैरितीव[3] माधव्यहसीत्प्रसूनैः ॥ ७७ ॥

७७. माधवी[9] कुन्दलतानिद्रैर्विकसितैः प्रसूनैः कृत्वा द्विजानहसीदिव । कथमित्याह । हे द्विजा वो युष्माकं द्विजमयी द्विजेभ्य आगता क्रिया ब्रह्मचर्यादिका क नु कस्मिंस्थानेस्तीति । यतः । कीदृशी । माधवी । द्विजान् द्विजेभ्य आगतं द्विजरूप्यं न तथा यत्कर्म तद् ब्राह्मणानुचितां कामचेष्टां नयन्ती । किं कृत्वा । द्वैजं च द्विजेभ्य आगतं च

१ बी °कहोतृकै°. २ ए °कर्म । क. ३ ए °व मध्ये व्य°.

१ ए °णिकैपि°. २ बी °पणकैः. ३ बी °कहोतृ°. ४ बी °नवर्ते°. ५ बी च । शोण्डिकवत् शु°. ६ ए °ति । पैत्र्य. ७ बी तैर्थ्य । इ°. ८ बी °देरित्य°. ९ बी मादवी.

वैदं च विदस्यर्षैरपत्यानि वृद्धानि विदास्तेभ्य आगतं च नयं ब्रह्मचर्यादि-धर्मानुष्ठानरूपं न्यायं विमोच्य त्याजयित्वा । माधवी वसन्ते पुष्प-(ष्य?)ति निकामं मुनीनामपि कामोद्दीपिका च स्यादित्येवमुत्प्रेक्षा ॥

पापीयवत्पापमयान्यपापरूप्याण्यजानन्नु फलान्यनङ्गः ।
बिभेद यूनां हृदयान्यशङ्कः शक्रद्विपो हैमवतीतटीर्वा ॥७८॥

७८. अनङ्गो यूनां हृदयानि बिभेद शरैरताडयत् । कीदृक्सन् । पापमयानि पापाद्धेतोरागतान्यपापरूप्याणि च धर्मादागतानि च फला-न्यशुभशुभरूपाणि कार्याण्यजानन्नवमन्यमान इव । पापीयवत्पापाद्धेतु-भूतादागतः पापीयः पापिष्ठो नास्तिकादिर्यथा पापमयान्यपापरूप्याणि च फलानि न मन्यते । अत एवाशङ्कः पापभयरहितः । यथा शक्रद्विपो-शङ्कः सन्हिमवतः प्रभवति हैमवती गङ्गा तस्यास्तटीस्तटानि भिनत्ति । वाशब्द उपमायाम् ॥

वैदम् । अत्र "गोत्रादङ्कवत्" [१५५] इत्यण् ॥

अद्विजरूप्य । द्विजमयी । द्वैजम् ॥ हेतु । अपापरूप्याणि । पापमयानि । पापीयवत् । इत्यत्र "नृहेतुभ्यः०" [१५६] इत्यादिना वा रूप्यमयटौ ॥

हैमवती । इत्यत्र "प्रभवति" [१५७] इत्यण् ॥

अथ निदाघः ॥

वैडूर्यनीलं कदलीगृहं त्यन्मयोनिलस्तन्मयमासनं च ।
नादेयमम्भो नवमालिकातिंसौग्घ्नी(घ्नी)रदा सेव्यमभून्निदाघे ७९

१ ए °तिसौग्घ्नी°.

१ ए °दस्यार्षे°. २ सी °माधर्मानु°. ३ सी का च. ४ बी °त्प्रेक्ष्या । पा°. ५ बी °तानि आपा°. ६ बी °ङ्गास्तस्या°. ७ बी °रूपाणि. ८ सी पापी°. ९ ए °पीव°. १० सी °ण् । वै°.

७९. निदाघेतिशीतलत्वात्सेव्यमभूत् । किं किमित्याह । वैडूर्यनीलं विडूरात्पर्वतात्प्रभवति वैडूर्यो मणिस्तद्वन्नीलं हरितवर्णं कदलीगृहं तथा त्वन्मयः कदल्याः[1] प्रभवन्ननिलो वायुस्तथा तन्मयं कदल्याः[2] प्रभवदासनं च तथा नादेयं नद्याः सैक्त(त्क?)मम्भस्तथा[3] नवमालिका च सप्तला च । किंभूता । अतिस्रौग्घ्नी(घ्नी)रदा स्रुघ्नस्येयं[4][5] स्रौघ्नी[6] स्त्री तस्या रदान्दन्तान्[7] शौक्ल्येनातिक्रान्ता ॥

वैडूर्य । इति "वैडूर्यः" [१५८] इत्यनेन निपात्यम् ॥

त्वन्मर्यः[8] । तन्मयम् । अत्र "त्यदादेर्मयट्" [१५९] इति मयट्[9] ॥

स्रौग्घ्नी(घ्नी) । नादेयम् । अत्र "तस्येदम्" [१६०] इति यथाविहितं प्रत्ययाः ॥

द्राग्घालिकाः सैरिकपर्षदासीनाः साम(मि)धेनीर्विदुषो हसन्तः ।
कथा अकुर्वन्कुरुवृष्णिकाश्वावराहिकाणामिह मल्लिकाग्राः ॥८०॥

८०. इह निदाघे हलस्येमे हालिका हलधराः कुरूणां वृष्णीनां[10] च विवाहाः कुरुवृष्णिकास्तथा शुनां वराहाणां च युद्धानि[11] श्वावराहिका द्वन्द्वे तासां कथा द्राग्मूर्खत्वेन वचनपल्लवनाशक्तेरविलम्बितं तदा कृषिकर्माभावेन निष्प्रयोजनत्वादकुर्वन्[12] । किंभूताः । सीराणामिमे सैरिका हलधरास्तेषां परिषत्सभा तत्रासीनास्तथा समिधामाधानी ऋक्[13] साम(मि)धेनी तत्र विदुषो ज्ञान्द्विजान्हसन्तः । केलिप्रियत्वात्स्वरविशेषेणाङ्गुलीरचनाविशेषेण च साम(मि)धेनीः पठतो द्विजांस्तदनुकरणेनोपह-

१ बी °दल्या प्र°. २ ए सी °दल्या प्र°. ३ ए सक्तम°. ४ ए स्रुग्घ्नस्ये°. ५ ए °यं सौग्घ्नी स्त्री . ६ सी स्रौग्घ्नी स्त्री. ७ सी °न् शैत्येना°. ८ बी °यः । त्वन्म°. ९ ए °ट् । सोग्घ्नी. १० बी °नां वि°. ११ सी °नि साव°. १२ ए निष्प्रयो°. बी निःप्रयो°. १३ बी °क् समाधे°.

सन्त इत्यर्थः । तथा मल्लिकाघ्रास्तदातिसुलभत्वादतिसुरभित्वाच्च विचकिल[1]पुष्[2]पाणि जिघ्रन्तः ॥

वैरं नु दैवासुरमप्रशान्तो[1] राक्षोसुरं वाजनि[2] मन्मथोत्र[3] ।

झगित्यनाट्यानपि नाट्यमध्यापयन्दधत्पाटलचापयष्टिम् ॥ ८१ ॥

८१. अत्र ग्रीष्मे[3] [4]झगिति ग्रीष्मर्तुप्रादुर्भावकाल एव मन्मथोप्रशान्तः सदोद्दीप्तोजनि । दैवासुरं राक्षोसुरं वा वैरं नु यथा देवानामसुराणां च[5] रक्षसामसुराणां च संबन्धि वैरं शाश्व[6]तिकवैरत्वात्कदापि न प्रशान्तं स्यात् । कीदृ[7]शः सन् । पाटला[8]याः पुष्पं[9] पाटलं ग्रीष्मे हि पाटला पुष्प(ष्प्य?)ति । तदेव चापयष्टिस्तां द[10]धदत एव नास्ति नाट्यं नटानां[11] धर्म आम्नायः संघो वा येषांताननाट्यानपि नाट्यरहितान्मुन्यादीनपि नाट्यं नटानां नृत्तं स्मरोद्रेकोत्थं सविलासभ्रूत्क्षेपादिकमध्यापयन् । योपि नाट्योपाध्यायः स्यात्सोपि शिक्षायष्टिं द[12]धदनाट्यान्नाट्यानभिज्ञान्नाट्यमध्यापयन् शिक्षाग्राहणायानुपशान्तः स्यादित्युक्तिः ॥

छान्दोग्ययाज्ञिक्यमपास्य बाह्वृच्यौक्थिक्यमाथर्वणकाठकं च ।

अस्मिञ् शिरीषैर्ददृभुः स्रजो दण्डमाणवा अन्तसदश्च काण्वाः ॥ ८२ ॥

८२. अस्मिन्ग्रीष्मे काण्वाः का[13]ण्व्यस्यर्षेरिमे दण्डमाणवा आश्रमिणां रक्षापरिचरणा[14]र्था दण्डप्रधाना माणवा अन्तसदश्चाध्ययनार्थाः[15] शि[16]ष्याश्च सुरभित्वादतिशीतत्वाच्च कण्ठादौ न्यासाय शिरीषैः शिरीषवृक्षपुष्पैः स्रजो ददृभुर्ग्रथ्नन्ति स्म । ग्रीष्मे हि शिरीषाः पुष्प(ष्प्य?)न्ति । किं

१ बी °न्तो रक्षो°. २ ए वाक्षनि. ३ ए °थो नु । झ°.

१ ए सी विच्चिकि°. २ बी °पुष्फाणि. ३ सी ग्रीष्म°. ४ ए °ष्मे रिगि°. बी °ष्मे द्विगि°. ५ सी च सं°. ६ सी °श्वतवै°. ७ सी °दृक् पा°. ८ ए सी °लाया पु°. ९ बी पुष्फं पा°. १० बी सी °धत. ११ सी °नां नृसरो°. १२ ए °धना°. १३ सी काण्वस्य°. १४ सी °णार्थद°. १५ ए °र्था शि°. १६ बी सी शिक्षाश्च.

कृत्वा । छान्दोग्ययाज्ञिक्यं [1]बाह्वृच्यौ[2]क्थिकयमाथर्वणकाठकं च छन्दोगानां याज्ञिकानां[3] बह्वृचानामौक्थिकानामाथर्वणिकानां कठानां च धर्मेमाम्नायं सङ्घं[4] वापास्य ॥

किं [1]दाक्षकं रैवत(ति?)कीयगौरग्रीवीयकौपिञ्जलमातिथेयम् ।
उपस्थितं तच्चुलुकेश्वराय यदस्फुटन्काञ्चनकेतकानि ॥ ८३ ॥

८३. काञ्चनकेतकानि ग्रीष्मर्तुभवानि स्वर्णवर्णकेतकीपुष्पाणि यदस्फुटन्विकसितानि तत्किं मन्ये चुलुकेश्वराय कुमारपालनिमित्तमातिथेयमातिथ्यमुपस्थितमुपागतम् । किंभूतम् । [5]दाक्षकं रैवत(ति?)कीयगौरग्रीवीयकौपिञ्जलं दाक्षीणां रैवतिकानां गौरग्रीवा[6]णां[7] कौपिञ्जलानां चर्षीणां[8] संबन्धि वनेवासिभिर्दाक्ष्याद्यृषिभिर्वनेषु वि[9]कसितानि काञ्चनकेतकानि नृपार्थमातिथ्यमिव प्रगुणीकृतमित्यर्थः । राज्ञो हि काञ्च[10]ना-दिभिर्विशिष्टवस्तुभिरातिथ्यं क्रियते ॥

संघेषु घोषेषु च[2] वै(बै?)दगा[3]र्गदाक्षेष्वलं हास्तिपदद्विजेषु ।
असिन्नदृश्यन्त न वै(बै)दगा[4]र्गदाक्षाङ्कलक्ष्माण्यतिवात्परागैः॥८४॥

८४. अस्मिन्ग्रीष्मेतिवान्तो[11] गाढवात्यावानेनात्यन्तं परिभ्राम्यन्तो ये परागाः कुसुमरजांसि तैः कृत्वा वैदगार्गदा[12]क्षाङ्कल[13]क्ष्माणि विदानां[14] गर्गाणां दाक्षीणा[15]मृषीणां सत्का[16]न्यङ्काः स्वस्वामिसंबन्धविशेषज्ञापकाः स्वस्तिकादयो ल[17]क्ष्माणि च स्वस्यैव ज्ञापकानि[18] शिखादीनि नादृश्यन्त ।

---

१ **सी** दाक्षिकं. २ **ए** च खेद°. ३ **सी** °गार्ग्यदाक्ष्येष्व°. ४ **सी** °गार्ग्यदाक्ष्याङ्क°.

---

१ **बी** बाहन्यौक्थि°. २ **सी** °क्थिकमा°. ३ **बी** °नां वाहृ°. ४ **ए** सघं वा°. ५ **सी** दाक्षिकं. ६ **ए** °ग्रीवीणां. ७ **बी** °णां कोपि°. ८ **सी** °णां च सं°. ९ **सी** विकासि°. १० **बी** °ञ्चनकेतकादि°. ११ **ए बी** °न्तो ग्राढ°. १२ **सी** °दाक्ष्याङ्क°. १३ **बी** लक्ष्म्याणि. १४ **बी** °नां गार्गा°. १५ **ए बी** °क्षीणां स°. १६ **ए** °त्कापि अङ्काः. १७ **बी** लक्ष्म्याणि. १८ **सी** °नि शेखा°.

केषु । संघेष्वोघेषु[1] घोषेषु[2] च गोकुलेषु । किंभूतेषु । वैदगार्गदाक्षेषु[3] विदानां गर्गाणां दाक्षीणामृषीणां संबन्धिषु । तथालं रक्षादौ समर्था हास्तिपदस्यर्षेरिमे[4] द्विजा येषु तेषु । ग्रीष्मे[5] हि बहुवात्यावानेन सर्वासु दिक्षु परागा उच्छलन्ति तैश्च लोकदृशामाच्छादितत्वाद्विदाद्यृषिसमूहेषु[6] विदत्वादिसूचीनि[7] शिखादीनि लक्ष्माणि विदादीनां गोकुलेषु विदादिसत्कत्वसूचिनः स्वस्तिकाद्या अङ्काश्च लोकैर्नादृश्यन्तेत्यर्थः[8] ॥

हालिकाः । सैरिक । इत्यत्र "हल०" [१६१] इत्यादिनेकण् ॥

सामिधेनी[9] । इत्यत्र "समिधः०" [१६२] इत्यादिना टेन्यण् ॥

कुरुवृष्णिका । इत्यत्र "विवाहे०[10]" [१६३] इत्यादिनाकल् ॥

श्वावराहिकाणाम् । अत्र "अदेव०" [१६४] इत्यादिनाकल् ॥ अदेवासुरादिभ्य इति किम् । दैवासुरं राक्षोसुरं वैरम् ॥

नाट्यम् । अत्र "नटान्नृत्ते ञ्यः" [१६५] इति ञ्यः ॥

छान्दोग्य[11] । औक्थिक्यम् । याज्ञिक्यम् । बाह्वृच्य । अनाट्यान् । इत्यत्र "छन्दोग०" [१६६] इत्यादिना ञ्यः ॥

आथर्वण[12] । इत्यत्र "आथर्वणिकाद्०" [१६७] इत्यादिनाण्[13] इकलोपश्च[14] ॥

काठकम् । अत्र "चरणादकञ्" [१६८] इत्यकञ्[15] ॥

दाक्षकम् । अत्र "गोत्राद्०[16]" [१६९] इत्यादिनाकञ् ॥ अदण्डमाणवशिष्य इति किम् । काण्वा दण्डमाणवा अन्तसदश्च । "शकलादेर्यञः" [६.३.२७] इत्यञ् ॥

---

१ **बी** °घेष्वाघे°. २ **सी** °षु गोकुलेषु च । किं°. ३ **बी** °गार्गेदा°. **सी** °गार्ग्यदाक्ष्येषु° ४ **बी** °पदाहार्षिपद°. ५ **बी सी** °ष्मे ब°. ६ **बी** °त्वाविदा°. ७ **बी** विदित्वादिशूची°. ८ **बी** °कैनाद्दृ°. ९ **ए** सामधे°. १० **सी** °हेत्या°. ११ **ए** °न्दोग्यः । औ°. **सी** °न्दोग्यं । औ°. १२ **ए** °र्वणिक । इ°. १३ **ए** इना°. १४ **बी** इकूलो°. **सी** इलो°. १५ **ए** °ञ् । अ°. १६ **बी** गोत्रेत्या°.

रैवत(ति?)कीय । गौरग्रीवीय । इत्यत्र "रैवत(ति?)कादेरीयः" [१७०] इतीयः ॥

कौपिञ्जलम् । हास्तिपद । इत्यत्र "कौपिञ्जल०" [१७१] इत्यादिनाण् ॥

वैदगार्गदाक्षेषु संघेषु घोषेषु । वैदगार्गदाक्षाङ्कलक्ष्माणि । इत्यत्र "संघघोष०" [१७२] इत्यादिनाण् ॥

अथ वर्षाः ॥

द्राक् शाकलैः शाकलकान्नु संघघोषानजानन्किल लक्षणाङ्कैः ।
अशाकलाञ्शाकलकेतरैर्नु नीपैरथाग्नीध्रसदोपि वर्षाः ॥ ८५ ॥

८५. अथ ग्रीष्मानन्तरमाग्नीध्रसदोप्यग्निमिन्धतेग्नीध आहिताग्नयस्तेषामिमानि गृहाण्याग्नीध्राणि तद्वासिनोपि नीपैर्नीपतरुपुष्पैः कृत्वा वर्षाः प्रावृट्कालमजानन् । किलान्ये लोकास्तथाविधनिबिडगृहाभावादृहश्च्योतनाद्युपद्रवेण वर्षाकालं ज्ञातवन्त एव परं ये सदाग्निज्वालनव्रता अग्निविध्याना(?)भावाय गृहाणामत्यन्ताच्छादितनिबिडत्वेन वर्षाकृतोपद्रवाभावाद्वर्षा न ज्ञातवन्तस्तेग्नीध्रस्था अपि धाराकदम्बपुष्पाणि दृष्ट्वा प्रावृडागतेत्यजानन्नित्यर्थः । किलेति सत्ये । यथा किल शाकलैः शाकल्येनर्षिणा प्रोक्तं वेदं विदन्त्यधीयते वा "शकलादेर्यञः" [६.३.२७] इत्यञि शाकलास्तत्संबन्धिभिर्लक्षणाङ्कैर्लक्षणैः शिखादिभिरङ्कैश्च स्वस्तिकादिभिः कृत्वा शाकलान्संघघोषाँल्लोका जानन्ति यथा वा शाकल-

---

१ बी वर्षा । अ°.

---

१ ए °यः । कोपिजल°. २ ए सी °त्र कोपि°. ३ सी °गार्ग्यदाक्ष्येषु. ४ सी °गार्ग्यदा°. ५ ए °नो नी°. ६ बी वर्षा प्रा°. ७ ए प्राट्का°. ८ बी °हश्चोत°. ९ बी °त ए°. १० सी °विधाना°. ११ बी °कृत्योप°. १२ ए °ग्नीधस्था°. १३ बी स्थापि. १४ ए गतेत्य°. १५ बी °नवर्षि°. १६ सी °षाञ्शाकलैः शाकलेत्यत्र शाकलादिकञ्च केभ्योन्यै°.

केतरैः [1]शाकलकेभ्यो लक्षणाङ्केभ्योन्यैरन्यमुनिसत्कैर्लक्षणाङ्कैः कृत्वा-शाकलान् शाकलेभ्यः संघघोषेभ्योन्यान्संघघोषाञ्जना जानन्ति ॥

अशाकलान् । शाकलका[2]न्संघघोषान् । शाकलैः । शाकलै[3]क । इत्यत्र "शाक-[4]लादकञ्च" [१७३] इत्यण् अकञ्च ॥

आग्नीध्र । इत्यत्र "गृहे[5]०" [१७४] इत्यादिना रण् अन्तस्य[6] च तृतीयबाधनार्थं धादेशः ॥

तत्केतकं [1]रथ्ययुगं नु नव्यं धूर्वेग्र्यरथ्या नवकन्दली च ।
रथ्यो द्विरथ्यस्त्रिरथो नु [2]वाश्वः पौरस्त्यवातश्च मनोभुवोभूत्॥८६॥

८६. तत्सौरभश्वैत्यादिगुणैः प्रसिद्धं केतकं केतकीपुष्पं मनोभुवः कामस्य नव्यं [7]रथ्ययुगं रथसत्कयूपमिवाभूत् । तथा नवकन्दली च भू[8]तनाङ्कू(ङ्कु?)रजातिर्वनस्पतिभेदो वा मनोभुवोग्र्यर[9]थ्याग्र्यः प्र[10]धानं यो रथस्तदीया धूरिवाभूत् । यथा पौरस्त्यवातश्च पूर्ववायुश्च मनोभुवोश्वो न्वभूत् । कीदृशोश्वः । रथ्यो द्विरथ्यस्त्रिरथो वा महाबलत्वेन रथस्य द्वयो रथयोस्त्रयाणां रथानां वा वोढा । वर्षासु हि श्वेतकेतकं नवकन्दली पूर्ववातश्च स्युस्तत्र केतकस्य रथ्ययुगाकारत्वान्नवकन्दल्याश्च धुराकारत्वात्पौरस्त्यवायोश्चातिवेगत्वेनाश्वतुल्यत्वात्[11]सर्वेषां चैषामुद्दीपनवि[12]भावत्वान्मनोभुवाध्यासितस्य जगज्जनचित्तर[13]थस्य संक्षोभहेतुत्वाच्चैवमाशङ्का । मनसि प्राणिनां चित्ते भवति तिष्ठति मनोभूस्तस्य [14]मनोभुव

---

१ ए रम्ययु°. २ ए वाश्व पौ°.

---

१ बी °कलांके°. २ बी °कान् । शाकलकान्सं°. ३ सी °ल । इ°. ४ सी °लादिक°. ५ ए °हेला°. ६ बी °स्य तृ°. ७ बी रथयु°. ८ सी °तनांति°. ९ बी °रथोग्र्यः. १० ए °धानयो. ११ ए °त्सवैषां मु°. १२ ए °भा सि प्रा°. १३ सी °रथ्यस्य. १४ सी महसा°.

इति साभिप्रायस्मरनामन्यसनेनात्र जगज्जनमन एव स्मररथत्वेन सूचितमिति स्मररथस्याङ्गिनोत्रानाशङ्कितत्वात्तदङ्गानां युगादीनामाशङ्का न घटत इति न वाच्यम् ॥

रथ्योश्वः । रथ्ययुगम् । सादि । त्रिरथोश्वः । अग्र्यरथ्या धूः । अत्र "रथात्०" [१७५] इत्यादिनेदमर्थे यः प्रत्ययः स रथस्य वोढरि रथाङ्ग एव च स्यादित्यर्थनियमः । "यः" [१७६] इत्यनेन तु यः ॥ त्रिरथः । इत्यत्र तु "द्विगोर्०" [६. १. २४] इत्यादिना यलुप् ॥ अन्ये तु स्वरादेरेव प्रत्ययस्य लुपमिच्छन्ति । तन्मते द्विरथ्यः ॥

आश्वेष(थ) पथ्याश्वरथाग्रचक्रोत्थितैर्नु रेजे नवकेतकोत्थैः ।
आश्वं रथं पल्ययनं च सांवहित्रं रजोभिः स्थगयद्भिरङ्गम् ॥८७॥

८७. अथ तथा नवकेतकोत्थैः प्रावृषेण्यकेतकीपुष्पोद्भवै रजोभिः परागै रेजे विस्फुरितम् । किंभूतैः सद्भिः । स्थगयद्भिरतिबाहुल्याद्व्याप्नुवद्भिः । किं किमित्याह । आश्वमश्वसत्कं रथं तथाश्वं पल्ययनं च पर्याणं च तथा सांवहित्रं संवोढुः सारथेः सत्कमङ्गं च यथाश्वेऽश्वसत्के पथ्यश्ववाह्या रथा आश्वरथास्तेषामिमान्याश्वरथानि यान्यग्रचक्राणि चक्राग्राणि तेभ्य उत्थितैरुच्छलितै रजोभिराश्वरथादिस्थगयद्भिः सद्भी रेजे प्रस्तावात्कुमारपालयात्रायाम् ॥

आश्वरथाग्रचक्र । इत्यत्र "पत्र०" [१७७] इत्यादिनाञ् ॥

आश्वं रथम् । अत्र "वाहनात्" [१७८] इत्यञ् ॥

---

१ ए °अग्रचक्रोत्थि°. २ बी °तैनु रे°. ३ ए °भिः स्तग°.

---

१ सी °रस्या°. २ ए °थ्या धुः । अ°. ३ बी °नेवम°. ४ ए °त्यथनि°. सी °त्यर्थः नि°. ५ बी °वकैत°. ६ बी सी °द्भिः । कि°. ७ सी °था प°. ८ ए °त्कमैगं च. ९ बी °थास्तथानिमा°. १० ए °न्यग्रच°. ११ ए °या । आ°. १२ सी °रथ्याग्र°.

आश्वं रथम् । आश्वे पथि । आश्वं पल्ययनम् । अत्र "वाह्य०" [१७९] इत्यादिना वाहनाद्यः प्रत्यय उक्तः स बाह्यादावेवेदमर्थे स्यान्नान्यत्रेत्यर्थनियमः ॥

सांवहित्रम् । अत्र "वहेः०" [१८०] इत्यादिनाञ् तृशब्दस्य चादिरिकारः ॥

द्राक्पाणिनीयार्थविदो नु मौदा नु जाजला वा कठकर्करा नु ।
सतैत्तिरीया अथ वारतन्तवीया नु चक्रुः शिखिनः स्वरास्तान् ८८

८८. शिखिनो मयूरा द्राग् वर्षाप्रादुर्भावसमकालमेव तानुदात्तादिभेदै रागविशेषैश्च पाणिनीयार्थविन्मौदादिषु प्रसिद्धान्स्वरांश्चक्रुः । अतश्चोत्प्रेक्ष्यन्ते पाणिनीयार्थविदो नु पाणिनिना प्रोक्तोयोर्थ उदात्तस्वरादिस्तज्ज्ञा इव । किं वा मोदेन जाजलिना कठेन कर्करेण तित्तिरिणा वरतन्तुना वर्षिणा प्रोक्तान्वेदान्विदन्त्यधीयते वा ये ते मौदादय इव ॥

अथ शरत् ॥

शरत्प्रकाशाजनि खाण्डिकीयौखीयैर्नृथो वाजसनेयिभिर्नु ।
प्रणादिभिः शौनकिभिर्नु वा छागलेयिभिर्नु स्वरचारुहंसैः ॥८९॥

८९. स्वरेण चारवो मधुरा ये हंसास्तैः कृत्वा शरत्प्रकाशा प्रकटाजनि । किंभूतैः । प्रणादिभिर्माधुर्यादिना प्रकृष्टं शब्दायमानैरतश्चोत्प्रेक्ष्यते । खण्डिकेनोखेन वाजसनेयेन शौनकेनच्छगलिना वर्षिभिः

१ बी नु मोदा. २ ए °न्तथावी°. ३ बी °या न च°. ४ सी खाण्डकी°. ५ ए °यैर्नृथो. ६ बी सी °नु । प्राणा°.

१ बी वाह इ°. २ बी °दावावेद°. ३ ए सांवाहि°. ४ बी °विन्मोदा°. ५ बी °त्प्रेक्षन्ते. ६ सी °क्ष्यते पा°. ७ बी °दायत्त°. ८ बी सी जल्पिना. ९ बी ते मोददाय. १० सी इति । अ°. ११ बी सी °तैः । प्राणा°. १२ ए सी °त्प्रेक्षते. १३ ए °ण्डिकेनो°. १४ ए °ना चर्षि°.

प्रोक्तान्वेदान्विदन्त्यधीयते वा ये तैः खाण्डिकीयादिभिरिव । खाण्डिकीयादयो हि तत्त्[1]द्वेदपाठकाले प्रणदन्ति ॥

पाणिनीय । इत्यत्र "तेन प्रोक्ते" [१८१] इति यथाविहितं दोरीयः ॥

मौदाः । जाजलाः । अत्र[3] "मौदादिभ्यः" [१८२] इत्यण् ॥

कठकर्कराः । अत्र[4] "कठादिभ्यो वेदे लुप्" [१८३] इत्यणो लुप् ॥

तैत्तिरीयाः । वारतन्तवीयाः । खाण्डिकीयौखीयैः[5][6] । अत्र "तित्तिरि०" [१८४] इत्यादिना-ईयण् ॥

छागलेयिभिः । इत्यत्र "छगलिनो णेयिन्[8]" [१८५] इति णेयिन्[9] ॥

शौनकिभिः । वाजसनेयिभिः । इत्यत्र "शौनकादिभ्यो णिन्" [१८६] इति णिन् ॥

शैलालिनः काश्यपिनश्च कौशिकिनश्च पाराशरिणश्च भिक्षोः ।
सत्पैङ्गिकल्पार्थविदश्च[1] वाग्नु सद्योवदाता कुमुदालिराभात् ॥९०॥

९०. सद्यः[10] शरत्कालप्रादुर्भावक्षण एव कुमुदालिराभाद्व्यकसदित्यर्थः । कीदृशी । अवदाता निर्मला वाग्नु यथा वाग्वाण्यवदातापशब्दादिदोषमलरहितत्वेन शुद्धा स्यात् । कस्य कस्येत्याह । शिलालिना प्रोक्तं नटसूत्रं काश्यपेन प्रोक्तं पुराणं कल्पं कौशिकेन प्रोक्तं पुराणं कल्पं पारास(श)र्येण प्रोक्तं भिक्षुसूत्रं वेत्त्यधीते वा यस्तस्य शैलालिनः काश्यपिनश्च कौशिकिनश्च[11] पाराशरिणश्च भिक्षोस्तथा पिङ्गेन प्रोक्तः पुराणः[12] कल्पः पैङ्गिकल्पः सन् शोभनो यः[13] पैङ्गिकल्पस्तस्यार्थं वेत्ति यस्तस्य[14] च ॥

१ **ए बी** सत्पैङ्गि°.

१ **बी** °त्तथेद.° २ **बी** °यः । मोदाः. ३ **बी सी** °त्र मोदा°. ४ **ए** अथ क°. ५ **ए** खाडिकी°. ६ **बी** योखी°. ७ **सी** °ण् । कर्करा । छा°. ८ **ए** णेयन्. ९ **सी** °ति णोयन्. १० **ए** °द्यः सर°. ११ **ए** °शिकेन°. १२ **बी** °णः पुराणः क°. १३ **बी** यः पि ङ्गि°. १४ **बी** °स्य स । पै°.

पैङ्गिकल्प । इत्यत्र "पुराणे कल्पे" [१८७] इति णिन् ॥

काश्यपिनः । कौशिकिनः । अत्र[1] "काश्यप०" [१८८] इत्यादिना णिन् ॥

शैलालिनः । पाराशरिणो भिक्षोः[2] । अत्र "शिलालि०" [१८९] इत्यादिना णिन्[3] ॥

कार्शाश्वकं वाधिकृशाश्वि कर्मन्दिनीव कार्मन्दकमर्चनीयम् ।
सुकापिलेयिष्विव कापिलेयिकाम्नाय[1] आभाच्छरदीह जाती[2]॥९१॥

९१. इह जगति[4] शरदि जाती मालतीपुष्पमाभात्सौरभाद्युत्कर्षेण[5] रेजे । वोपमायाम् । यथाधिकृशाश्वि कृशाश्वेन प्रोक्तं नटसूत्रं[6] विदत्स्वधीयानेषु वा नटेषु कार्शाश्वकं कृशाश्विनां धर्म आम्नायः संघो वार्चनीयं सद्भाति । यथा वा कर्मन्दिनि कर्मन्देन[7] प्रोक्तं भिक्षुसूत्रं[8] विदत्यधीयाने वा भिक्षौ कार्मन्दकं कर्मन्दिनां धर्म आम्नायः संघोवार्चनीयं सद्भाति यथा वा सुकापिलेयिषु शोभनेषु कापिलेयेन प्रोक्तं नटसूत्रं[9] विदत्स्वधीयानेषु वा नटेषु कापिलेयिकाम्नायः[10] कापिलेयिनामाम्नायो गुरुपारंपर्येणोपदेशो भाति ॥

कृशाश्वि । कर्मन्दिनि । इत्यत्र "कृशाश्व०" [१९०] इत्यादिनेन् ॥ वेदवच्चेत्यतिदेशाद्वेदेण्[11] । ब्राह्मणमात्रे वेतिनियमाद्वेदित्रध्येतृविषयता ॥ "चरणादकञ्" [६. ३. १६८.] इत्यकञ्[12] स्यात् । कार्शाश्वकम् । कार्मन्दकम् । नटसूत्रे कापिलेयशब्दादपीच्छन्त्येके । सुकापिलेयिषु । कापिलेयिकाम्नायः[13] ॥

---

१ ए बी °लेयका°. २ बी जातीः । इ°.

---

१ सी °त्र कस्याप°. २ ए भिक्षो । अ°. ३ ए °न् । कर्शा°. ४ ए °ति सर°. ५ बी °ष्पमभात् शौर°. ६ ए °त्रं वद°. ७ ए °र्मदेन. ८ ए °सूत्रवि°. ९ ए °त्रं वद°. १० ए °म्नायका°. ११ ए सी °देन् । ब्रा°. १२ ए °त्यञ्च. १३ बी °लेयका°.

अभूष्यताब्जैर्जलमत्र वाररुचैः सुवाक्यैरिव पाणिनीयम् ।
सन्माक्षिकं नु प्रियसारघाणां पेयं नृणां मानसवारितुल्यम् ॥९२॥

९२. अत्र[१] शरदि जलमब्जैरभूष्यत । कीदृक् । मनसा कृतं मानसं सरस्तस्य यद्वारि तत्तुल्यमगस्त्युदयेनातिनिर्मलमित्यर्थः । अत एव नृणां कर्तरि षष्ठी । नरैः पेयं यथा प्रियं सरघाभिर्मधुमक्षिकाभिः कृतं[२] सारघं मधु येषां तेषां सच्छोभनं माक्षिकं मक्षिकाभिः कृतं मधु पेयं स्यात् । यथा मानसवारितुल्यमपशब्दमलरहितत्वेन विशुद्धमत एव नृणां पेयं[३] श्रोतव्यं पाणिनीयं[४] पाणिनेन पाणिनिनावोपज्ञातं व्याकरणं वाररुचैर्वररुचिना कृतैः सुवाक्यैः कर्तृभिरभूष्यत ॥

पाणिनीयम् । अत्र "उपज्ञाते" [१९१] इति यथाविहितं दोरीयः[५] ॥

वाररुचैः । मानस । इत्यत्र "कृते" [१९२] इत्यण् ॥ कृते ग्रन्थ एवेच्छन्त्यन्ये । तन्मते[६] तु कृतेर्थे मानसेति न स्यात् ॥

माक्षिकम् । सारघाणाम्[७] । अत्र "नाम्नि० " [१९३] इत्यादिनाण् ॥

असार्वचर्मीणमिवान्यदुज्झन्ती[१] सर्वचर्मीण इवाब्जकोशे ।
चिक्षेप लक्ष्मीं[२] शरदम्बु कौलालके[३] क्षिपेद्वारुटके न कश्चित् ॥९३॥

९३. शरदन्यदब्जकोशादितरत्पुष्पमुज्झन्ती सती लक्ष्मीं सौरभवि[८]काशादिशोभामब्जकोशे पद्मकुड्मले[९] चिक्षेप । अन्योपि हि लक्ष्मीं कोशे भाण्डागारे क्षिपति । शरदि ह्यब्जकोशेन्यपुष्पेभ्यः सर्वेभ्योप्यतिशयिता[१०] श्रीः स्यात् । यथा काचिन्नायिका[११]सार्वचर्मीणं सर्वश्चर्मणा

१ ए °दुह्यन्ती. ९ ए °क्ष्मीं सर°. ३ ए °के पे°.

१ ए °त्र सर°. २ ए °तं सरघं ये°. ३ ए पेयश्रो°. ४ ए °णिने°. ५ **सी** °यः । वेर°. ६ **बी सी** °ते कृ°. ७ ए °घाणम्. ८ ए °भवका°. ९ **बी** °झमुकुले. १० **सी** °यि श्रीः. ११ **सी** कापि नायि°.

कृतः[1] सार्वचर्मीणो न तथासार्वचर्मीणस्तं वस्त्रादिकृतं कौत्थलिकादिम[2]-सारत्वेन पाटनभयादुज्झन्ती सती सर्वचर्मीणे दाव(ब?)डीति[3] प्रसिद्धायां चर्ममय्यामाभरणकरण्डिकायां लक्ष्मीमलंकारादिऋद्धिं क्षिपति। युक्तं चैतत्। यतः सर्वोपि कश्चिदम्बु कौलालके कुलालेन कृते घटघटीशरावादिभाण्डे क्षिपेन्न तु कश्चिद्वारुटके वरुटेन कृते[4] सूर्पपिटकपटलिकादौ भाण्डे ॥

कौलालके। वारुटके। अत्र "कुलालादेरकञ्" [१९४] इत्यकञ् ॥

सर्वचर्मीणे। असार्वचर्मीणम्। अत्र "सर्व०" [१९५] इत्यादिनेन ईनञ् च ॥

अथ हेमन्तशिशिरौ ॥

येनौरसोरस्य[1]विरिञ्चिपुत्राः सौभद्रविज्ज्योतिषवेदिनश्च।
तैरप्यतर्क्यप्रभवो हिमर्तु[2]श्छन्दस्यवद्वारि हिमं चकार ॥ ९४ ॥

९४. हिमर्तुः शीतकालो हेमन्तः शिशिरश्च वारि हिमं शीतलं चकार। कीदृक्। अतर्क्यप्र[5]भवोकस्मादाविर्भवनेनाज्ञेयोत्पत्ति[6]कः। कैः। तैरपि य उरसा कृता औरसा न तथानौरसा मानसाः सनकाद्यास्तथोरस्या उरसा कृताः स्वाङ्गोद्भवाः[7] काश्यपाद्या[8] द्वन्द्वेनौरसौ(सो)रस्या ये विरिञ्चिपुत्रा विधिपुत्रा मुनयोभूवं[9]स्तथा ये सौभद्रविज्ज्योतिषवेदिनश्च सुभद्रामर्जुनपत्नीमधिकृत्य कृतं ग्रन्थं[10] ये विदन्ति ये[11] च ज्योतींष्यधिकृत्य कृतं ग्रन्थं विदन्ति ये महाज्ञानपात्राणीत्यर्थः। छन्दस्यवत्।

१ ए बी °विरञ्चि°. २ बी °तुंच्छन्द°.

१ सी °तः सर्व°. २ सी °त्थलकादिकम°. ३ बी °णे डाव°. ४ ए °ते स्वर्प°. ५ सी °प्रभावो°. ६ सी °त्तिकालः। कैः. ७ ए बी °वाः कश्य°. ८ ए °पाद्व°. ९ ए °भूवस्त°. सी °भूवन्ये तथा. १० सी °न्थं वा ये. ११ सी येम°.

ओश्रावयेति चतुरक्षरम् । अस्तु[1] श्रौषडिति चतुरक्षरम् । ये यजामह इति पञ्चाक्षरम् । यजेति व्यक्षरम् । व्यक्षरो वषट्कारः । एष वै सप्तदशाक्षरै[2]श्छन्दस्यो यज्ञमनुविहितः । अत्र स्वार्थे यः । यथानुष्टुबादिरक्षरसमूहस्तथैषां सप्तदशानामक्षराणां समूहै[3]श्छन्दस्य उच्यते । स यथापौरुषेयत्वान्महाज्ञानिभिरप्यतर्क्य[4]प्र[5]भवः स्यात् । यद्वा यथा छन्द[6]सेच्छया स्वाभिप्रायेण कृत[7]श्छन्दस्य[8]श्छन्दोनुवर्ती दासः शीतोपचारैर्वारि शीतलं करोति तथा हिमर्तुश्चकार ॥

उरस्य । अनौरस । इत्यत्र "उरसो याणौ" [१९६] इति याणौ ॥

छन्दस्य । इति "छन्द[9]स्यः" [१९७] इत्यनेन निपात्यते ॥

सौभद्र । इत्यत्र "अमोधि०" [१९८] इत्यादिनाण् ॥

ज्योतिष । इ[10]ति "ज्योतिषम्" [१९९] इत्यनेन निपात्यम् ॥

शैशुक्रन्दं यद्द[1]दीयुः शिशुक्रन्दीयाभिज्ञाः षट्पदाः कुन्दयष्टि[2]म् ।
उद्गायन्तः किं[3] किरातार्जुनीयं किं[4] वा सीतान्वेष[5]णीयं प्रहृष्टाः ९५

९५. षट्पदाः कुन्दयष्टिं कुन्दपुष्पलतामीयुः श्रिताः । यद्वद्यथा शैशुक्रन्दं शिशुक्रन्दं प्रस्तुत्य कृतं ग्रन्थं बालपुस्तिकाशास्त्रं शिशुक्रन्दीयाभिज्ञा बालपुस्तिकाशास्त्रस्य ज्ञातारः श्रय[11]न्ते । किंभूताः षट्पदाः । प्रहृष्टाः कुन्दसौरभोत्कर्षाघ्राणेन प्रमुदिता अत एवोद्गायन्त उच्चैःस्वरेण

---

१ बी °द्ददायुः. २ बी °ष्टि । उ°. ३ बी किं करा°. ४ बी सी वा शीता°. ५ ए °षर्णी प्र°.

---

१ बी °स्तु स्रौष°. सी °स्तु सौष°. २ बी °रच्छन्द°. ३ बी सी °हच्छदन्द°. ४ ए °र्क्यभ°. ५ सी °प्रभावः. ६ सी °न्दस्वेच्छ°. ७ ए बी° तच्छन्द°. ८ बी सी °स्यच्छन्दो°. ९ सी °न्दस्येत्य°. १० ए °ति समित्य°. ११ बी °यति । किं°.

शब्दायमानाः । अत एव चोत्प्रेक्ष्यन्ते । किं किरातार्जुनीयं किरातरूपधारी शम्भुः किरातोर्जुनः पार्थो द्वन्द्वे तावधिकृत्य कृतं[1] ग्रन्थं किं वा सीतान्वेषणीयं[2] सीतान्वेषणमधिकृत्य कृतं ग्रन्थमुद्गायन्तः ॥

शिशुक्रन्दीयं[3][4] । सीतान्वेषणीयम् । अत्र "शिशु०" [२००] इत्यादिनेयः ॥ शिशुक्रन्दशब्दान्नेच्छन्ति केचित् । शैशुक्रन्दम् ॥

किरातार्जुनीयम्[5] । अत्र "द्वन्द्वात्प्रायः" [२०१] इतीयः । शालिनी छन्दः ॥

स्रौघ्ना दूतासेवकाः स्रौघ्नमार्गद्वारेषूच्चैर्यद्वदत्रर्तवोस्थुः ।
पुष्पैर्माहाराजिकान्प्रीणयन्तः पूपाल्येवापूपिकाः सौपकारान् ९६

९६. स्रुघ्नं पुरं गच्छन्ति[6] स्रौघ्ना दूतास्तथा स्रुघ्नं भजन्ति[7] स्रौघ्ना आसेवका द्वन्द्वे "स्यादावसंख्येयः" [३.१.११९] इत्येकशेषे स्रौघ्नास्तथा स्रुघ्नं गच्छन्ति[8] स्रौघ्ना मार्गास्तथा स्रुघ्नमभिलक्ष्यीकृत्य निष्क्रामन्ति कन्यकुब्जद्वाराणि स्रौघ्नानि द्वन्द्वे "एकार्थं चानेकं च" [३. १. २२] इति क्लीबस्य शेषे स्रौघ्नानि तानि[9] च तानि मार्गद्वाराणि च स्रौघ्नमार्गद्वाराणि तेष्विति विषमपदार्थः। वाक्यार्थस्त्वयम्। अत्रार्बुद ऋतवोस्थुः। यद्वद्यथा स्रौघ्नाः स्रुघ्नं गच्छन्तो दूताः स्रौघ्नेषु स्रुघ्नं गच्छत्सु मार्गेषु तिष्ठन्ति । यथा वा स्रौघ्नाः स्रुघ्नं भजन्त आसेवका वास्तव्यलोकाः स्रौघ्नेषु स्रुघ्नं लक्ष्यीकृत्य[10] निर्गच्छत्सु[11] द्वारेषु कन्यकुब्जप्रतोलीद्वारेषु स्रुघ्ने वास्तव्यत्वेन स्रुघ्ने गन्तुकामत्वात्तिष्ठन्ति[12] । कीदृशा ऋतवः । पुष्पैः सर्व-

---

१ ए °माराद्रा°. २ ए °कान्प्रणीय°. ३ ए °पालोवा°.

---

१ बी कृत्यं ग्र°. २ बी °यं शीतोन्वे°. ३ सी °न्दीयः । सी°. ४ बी °य । शाता°. ५ ए °य । अ°. ६ ए °न्ति स्रोघ्ना. ७ बी °न्ति स्रोघ्ना. ८ बी °न्ति स्रोघ्ना. ९ सी °नि तानि च मार्गाणि द्वा°. १० बी लक्षीकृ°. ११ बी °र्गत्सु. १२ बी °त्तित्तिष्ठ°.

तुकुसुमैः कृत्वा महाराजं भजन्ति माहाराजिकाः कुमारपालसैनिकास्तान्प्रीणयन्तः । यथा सौपकारान्भोजनाय सूपकारान्भजतो लोकानापूपिका अपूपान्भजन्तः कान्दविकाः पूपाल्या पोलिकाश्रेण्या कृत्वा प्रीणयन्ति ॥

ऋतुभिः स हैमननिशाविशालधीर्मुमुदेन्तरुत्कवदुपस्थितैर्नृपः ।
गुरु दाक्षकार्जुनकवासुदेवकं महिमाथ नाकुलकमद्रकं दधत् ॥९७॥

९७. अथ स नृपः कुमारपाल उत्कवद्युगपच्छीघ्रं चोपस्थानादुत्कण्ठितैरिवोपस्थितैर्ऋतुभिः कृत्वान्तश्चित्ते मुमुदे । कीदृक् । हेमन्तं भजति हैमनीया निशा तद्वद्विशालधीरत एव महिम माहात्म्यं दधत् । किंभूतम् । गुरु महत्तथा दाक्षकार्जुनकवासुदेवकं दाक्षिमृषिमर्जुनं वासुदेवं च भजदथ तथा नाकुलकमद्रकं नकुलं चतुर्थपाण्डवं भजत्तथा मद्राणां देशस्य राजा मद्रस्य राज्ञोपत्यं वा माद्रः "पुरुमगध०" [६. १. ११६] इत्यादिनाण् । माद्रं माद्रौ मद्रान्वा भजेद्वा दाक्ष्यादिसंबन्धीत्यर्थः ॥

स्रौघ्नद्वारेषु । इत्यत्र "अभि०" [२०२] इत्यादिनाण् ॥

स्रौघ्नमार्गे । स्रौघ्ना दूताः ॥ अत्र "गच्छति०" [२०३] इत्यादिनाण् ॥

स्रौघ्ना आसेवकाः । अत्र "भजति" [२०४] इत्यण् ॥

माहाराजिकान् । इत्यत्र "महा०" [२०५] इत्यादिनेकण् ॥

---

१ सी °विलासधी°. २ ए °हिनाथ.

---

१ बी भवन्ति. २ ए °स्ताप्रणीय°. ३ ए सी °था सूप°. ४ ए °तै रुतु°. बी °तै ऋतु°. ५ ए °देवं दा°. सी °देवं कं°. ६ सी °कं च न°. ७ सी °तुर्थ पा°. ८ बी °रुषम°. ९ ए °जन्वा दा°. १० बी दाक्षादि°. ११ बी सी °मार्गः । स्रौ°.

आपूपिकान्(काः) । इत्यत्र "अचित्ताद्०" [२०६] इत्यादिनेकण् ॥ अचित्तादिति किम् । सौपकारान्[1] ॥ अदेशकालादिति किम् । स्रौघ्ना आसेवकाः । हैमननिशा ॥

वासुदेवकम्[3] । अर्जुनक । इत्यत्र "वासुदेव०" [२०७] इत्यादिनाकः ॥

गोत्र । दाक्षक[4] । क्षत्रिय । नाकुलक । इत्यत्र "गोत्र०" [२०८] इत्यादिनाकञ् ॥

मद्रकम् । अत्र "सपूर्वा(रूपा)द्" [२०९] इत्यादिना प्रकृतिः प्रत्ययश्च राष्ट्रवत् ॥ नन्दिनी छन्दः । स्जौ स्जौ गो नन्दिनी ॥

इति श्रीजिनेश्वरसूरिशिष्यलेशाभयतिलकगणिविरचितायां श्रीसिद्धहेमचन्द्राभिधानशब्दानुशासनद्व्याश्रयवृत्तौ षोडशः[6] सर्गः ॥

---

१ ए °कान्° २ बी सी °न् । आदे°. ३ ए °म् । आर्जु°. ४ ए दाक्षः । क्ष°. बी दाक्षिक°. ५ बी °रशि°. ६ सी °डशस°.

द्व्याश्रयमहाकाव्ये

सप्तदशः सर्गः ।

सैन्यात्सौ[1]दामनीलोला व[2]र्णासातो वनेष्वयुः ।
नार्यो[3]थ पुष्पाण्युं[4]चेतुमुरस्तःकृ[5]त्य वल्ल[6]भान् ॥ १ ॥

१. अथ[1] सर्वर्तुप्रादुर्भवनानन्तरं नार्यः पुष्पाण्युंचे[2]तुं सैन्याद्वनेष्वयुः । कीदृक्षु । वर्णा[3]सातो वर्णासया नद्यैकदिकेषु यस्यां दिशि वर्णासा तस्यां सत्स्वित्यर्थः । किं कृत्वा । वल्लभानु[4]रस्तःकृ[5]त्योरसा तु[6]ल्यदिशः कृत्वातिवाल्लभ्याद्धृदयाग्रे कृत्वेत्यर्थः । किंभूताः सत्यः । सुदामाद्रिस्तेनैकदिक् सौ[7]दामनी विद्युत्सुदामा[8] नामाद्रिर्यस्यां दिशि तस्यां वि[9]द्युत्तेन सा सुदाम्ना सहैकदिगुच्यते । तद्वल्लोला वनाभिमुखचलने[10]न चञ्चलाङ्ग्यः ॥

तत्रो[7]र[8]स्यीकृता वृक्षाः[9] स्रौघ्नीभिः कौचवार्यया ।
शाण्डिक्यासैन्धवीवार्णवीभिर्वल्लीयुता न्वभान् ॥ २ ॥

२. तत्र वनेषु वृक्षा वल्लीयुता नु वल्लीवेष्टिता इवाभान् । यत उरस्यीकृता[11] उरसै[12]कदिकाः कृता हृदयसंमुखीकृताः पुष्पोच्चयनार्थमारो-

---

१ बी °दामिनी°. २ बी वर्णसोतो. ३ ए °र्योव पु°. ४ ए °ण्युत्वेतु°. बी °ण्युचैतु°. ५ बी वन्नभा°. ६ ए °भातः । अ°. ७ सी °त्रोत्तर°. ८ ए सी °रसीकृ°. ९ बी °क्षाः । स्रोघ्नी°.

---

१ बी अत्र स°. २ ए °ण्युच्छेतुं. ३ बी °र्णासया नाद्यैकादि°. ४ ए °नुहस्वःकृ°. ५ सी °कृत्वा°. ६ बी तुल्यादि°. ७ बी सी °दामिनी. ८ ए °मा वामा°. ९ ए सी °द्यत्वेन. १० ए °नेच च°. ११ बी °सैकादिकाः कृ°. १२ सी °दिशि कृ°.

हृविषयीकृता इत्यर्थः[1] । काभिः[2] । स्रौघ्नीभिः स्रुघ्नो देशो निवास आभिजनो निवासो वा यासां ताभिस्तथा कौचवार्यया कूचवार आभिजनो निवासो यस्यास्तया[3] च तथा शाण्डिक्यासैन्धवीवार्णवीभिः[4] शण्डिकः सिन्धुर्वर्णुश्चा[5]भिजनो निवासो यासां ताभिश्च स्त्रीभिः ॥

सौदामनी[6] । इत्यत्र[7] "टस्तुल्यदिशि" [२१०] इत्यण् ॥

वर्णासातः । अत्र "तसिः" [२११] इति तसिः ॥

उरस्तःकृत्य[8] । उरस्यीकृताः[9] । अत्र "यश्चोरसः" [२१२] इति यस्तसिश्च[10] ॥

स्रौघ्नीभिः । अत्र "सेर्०" [२१३] इत्यादिना "आभिजनात्" [२१४] इति चाण् ॥

शाण्डिक्या । कौचवार्यया । इत्यत्र "शण्डिकादेर्ण्यः[11]" [२१५] इति ण्यः ॥

सैन्धवीवार्णवीभिः[12] । अत्र "सिन्ध्वादेरञ्" [२१६] इत्यञ्[13] ॥

सालातुरीयास्तौदेय्यो[1] वार्मतेय्यश्च[2] शस्त्रिभिः ।
हृद्गोलीयैः कृतारक्षाः कुसुमान्यवचिच्यिरे[3][4] ॥ ३ ॥

३. सालातुरस्तूदी[14] वर्मती च देशा आभिजना निवासा आसां ताः सालातुरीयास्तौदेय्यो[15] वार्मतेय्यश्च[16] नायिकाः कुसुमान्यवचिक्यि[17][18]-

१ ए °देय्यौ वा°. सी °देय्यो वा°. २ ए °तेयश्च°. बी °तेर्य्यश्च. ३ ए °न्यविचि°. ४ ए °रे । शालातुलस्तू°.

१ ए °त्यर्थका°. २ बी °भिः । स्रोघ्नी°. ३ बी °या त°. ४ बी °भिः शाण्डि°. ५ बी °न्धुवर्णु°. ६ बी सी °दामिनी. ७ बी °त्र स्तु°. ८ ए °कृत्यः । उ°. ९ बी सी °रसीकृ°. १० बी °श्च । स्रोघ्नी°. ११ बी °देर्णः इ°. १२ बी सी °वीवर्ण°. १३ ए °ञ् । शाला°. १४ बी °लास्तुलस्तू°. १५ ए °देव्यौ वा°. सी देव्यो वा°. १६ ए बी °तेर्य्यश्च. १७ ए °न्यविचि°. १८ बी °च्चिरे.

रेचुण्टयन् । किंभूताः सत्यः । हृद्गोलो गिरिराभिजनो निवासो येषां तैर्हृद्गोलीयैः शस्त्रिभिः शस्त्राजीवैः कृतारक्षाः ॥

सालातुरीयाः । अत्र "सला०" [२१७] इत्यादिनेयण् ॥

तौदेय्यः[1] । वार्मतेय्यः । अत्र "तूदी०" [२१८] इत्यादिनैयण् ॥

हृद्गोलीयैः । अत्र "गिरेर्०" [२१९] इत्यादिनेयः ॥

त्रयोविंशः पादः ॥

आक्षिकी चाक्षिकादाक्षिकं लिप्सुः पुष्पमुच्चतः ।
काप्युत्क्षिपन्ती दोर्मूलं कौतुकादीक्षिताभ्रिकैः[1] ॥ ४ ॥

४. कापि कामिन्याभ्रिकैरभ्र्या तीक्ष्णाग्रया काष्ठमय्या कुद्दालिकया खनद्भिरश्रान्तखनने[2]नातिश्रान्तैरपीत्यर्थः । कौतुकात्साभिलाषमीक्षिता । यतो दोर्मूलं कक्षाप्रदेशमुत्क्षिपं[3]न्त्यूर्ध्वं नयन्ती । एतदपि कुत इत्याह । यत उच्चतो वृक्षस्योच्चादुपरिभागात्पुष्पं पुष्पजातिं लिप्सुर्लब्धुमिच्छुः । यथाक्षिक्यक्षैः पाशकै[4]र्जयन्ती स्त्र्याक्षिकादक्षैर्दी[5]व्यतो द्यूतकारादाक्षिकमक्षैर्जितं[6] पणं लिप्सुः स्यात् ॥

आक्षिकम्[7] । आक्षिकी । आक्षिकात् । आभ्रिकैः । अत्र "तेन०" [२] इत्यादिना जितादिष्वर्थेषु "इकण्" [१] इतीकण् ॥

मौद्गदाधिक[2]कौलत्थैतन्तिडीके[3]ष्विवोज्झती ।
कौलत्थ[4]मनवं पुष्पं पुष्पेष्वन्यान्यदाददे[5] ॥ ५ ॥

---

१ बी °ताभ्रकैः. २ बी मौद्गादा°. ३ ए °त्थतेन्ति°. ४ ए सी °लत्थम°. ५ सी °न्यपाद°.

---

१ ए सी °देय्यः । वा°. २ सी °नेति°. ३ ए °पन्तीमूर्ध्वं. ४ सी पाशैदीव्य°. ५ ए °कैर्दी°. ६ सी °जितपाणिं लि°. ७ सी °क्षिकी । अक्षि°.

५. अन्या स्त्र्यन्यत्पुराण[1]पुष्पेभ्य इतरन्नवं पुष्पमाददे। कीदृक्सती। पुष्पेषु मध्येनवं पुराणं पुष्पमुज्झती मौद्गदाधिककौलत्थ[2]तैन्तिडीकेष्विव यथा मुद्गैर्दध्ना कुलत्थैस्तिन्तिडीकया चाम्लिकया संस्कृतेषु मुद्गयूषरसालाकुलत्थयूषाम्लिकापानकादिषु वस्तुषु मध्ये कोपि कौलत्थं(त्थं) कुलत्थ(त्थ)संस्कृतं वस्तूज्झति[3] मौद्गाद्यपेक्षया[4] कौलत्थ(त्थ)स्य विरसत्वेन परिहेयत्वात् ॥

दाधिक । इत्यत्र "संस्कृते" [३] इतीकण् ॥

कौलत्थ । कोपान्त्ये[5] । तैन्तिडीकेषु । इत्यत्र "कुलत्थ०"[6] [४] इत्यादिनाण् ॥ अन्ये तु कुलत्थ(त्थ)शब्दात्सकाराक्रान्तथकारादणं[7] मन्यन्ते । कौलिस्थम्[8] । अन्ये तु कवर्गोपान्त्यादपीच्छन्ति । मौद्ग ॥

न तथा[1] दाधिकैर्मौद्गैर्लवणैश्चूर्णिघार्तिकैः[2] ।
यथा[3]प्रीणादलित्रस्ता काचिदालिङ्गनैः प्रियम् ॥ ६ ॥

६. स्पष्टः । किं तु दाधिकैर्दध्ना संसृष्टैः शालि[9]करम्बादिभिर्मौद्गैर्मुद्गैः[10] संसृष्टैर्मुद्गयुक्तैः शाल्यादिभिरित्यर्थः । लवणैर्लवणेन[11] संसृष्टैः शाकादिभिश्चूर्णिघार्तिकैश्चूर्णेन[12][13] कर्पूरादिक्षोदेन संसृष्टाश्चूर्णिनो मोदकादयस्तथा घृतेनोपसिक्ता घार्तिका घृतपूरा द्वन्द्वे तैश्च सर्वगुणसंपूर्णसरसरसवतीकरणेनेत्यर्थः[14] ॥

दाधिकैः । अत्र "संसृष्टे" [५] इतीकण् ॥

---

१ **बी** °था दधि°. २ **ए बी** °घातिकैः. ३ **बी सी** °थाप्राणा°.

---

१ **ए** °राणापु°. २ **ए** °त्थतिडी°. ३ **ए** °ति मुद्गा°. ४ **सी** °याकुल°. ५ **ए** °न्त्य । तिन्ति°. ६ **ए** °कुलित्थ°. ७ **ए** °त्सरका°. ८ **ए सी** °लत्थम्. ९ **सी** शाका°. १० **ए** °भिमौद्गैमुद्गैः. ११ **ए** °वणे°. १२ **ए बी** °घातिकै°. १३ **सी** °न शर्करा°. १४ **बी सी** °णेनापीत्य°.

लवणैः । अत्र "लवणादः" [६] इत्यः ॥

चूर्णि । मौद्गैः । अत्र "चूर्ण०" [७] इत्यादिना-इन्-अणौ ॥

घार्तिकैः । अत्र "व्यञ्जनेभ्यः०" [८] इत्यादिना-इकण् ॥

कस्यांचित्प्रेयसो जातपुष्पोच्चयश्रमाम्भसि ।
अनाविकानौडुवि(पि?)क्यघटिकेव ममज्ज दृक् ॥ ७ ॥

७. प्रेयसो दृक्कस्यांचित्स्वप्रेयस्यां ममज्जाब्रुडच्चिरमवस्थितेत्यर्थः । यतो जातं संपन्नं पुष्पोच्चयेन श्रमाम्भः खेदजः स्वेदो यस्यां तत्रं स्थूलमुक्ताफलकल्पैः स्वेदबिन्दुभिरदृष्टपूर्वां श्रियं प्राप्तायामित्यर्थः । अनाविकानौडुविक्यघटिकेव । इवः प्रत्येकं संबध्यते । यथा नावा तर्योडुवेन प्लवेन घटेन चातंरती(न्ती) स्त्र्यम्भसि मज्जति ॥

अनौडुविकी । इत्यत्र "तरति" [९] इतीकण् ॥

अनाविका । अघटिका । इत्यत्र "नौद्वि०" [१०] इत्यादिनेकः ॥

दाधिकेत्याक्षिपन्त्यन्या ययाचे पदिकं पतिम् ।
उच्चस्थपुष्पं दुष्प्रापं पर्पिकाश्विकहास्तिकैः ॥ ८ ॥

८. अन्या काचित्पर्पिकाश्विकहास्तिकैः पर्पेणोडुपेनाश्वेन हस्तिना च चरद्भिरपि नरैरुच्चतरदुस्तटीस्थतरुस्थत्वेनात्युन्नततमत्वाद्दुष्प्रापमुच्चस्थपुष्पमुच्चवृक्षशिखरस्थानि पुष्पाणि पतिं ययाचे । यतः पदिकं पादचारिणम् । पदिको हि पादबलेन वैधर्म्यौन्नत्योपेतमपि वृक्षमारुह्य

---

१ ए सी °विकाघ°. २ ए पपिकांश्वि°. बी पथिका°.

---

१ ए °र्णि । मुद्गैः. २ बी °र्णौ । घांर्ति°. ३ बी °यस्यो दृ°. ४ सी चित्प्रेय°. ५ ए °त्र मु°. ६ बी °ल्पैःश्वेद°. ७ बी °र्वां तश्रि°. ८ बी °नौडवि°. ९ बी °था नवा°. १० ए °तरं स्त्र्य°. ११ ए बी °नौडवि°. १२ बी °तरुदु°. १३ ए °तनत्वा°. १४ ए °मुच्चवृ°. १५ बी °म् । पादि°. १६ ए बी °धर्म्योन्न°.

पुष्पाद्यानेतुं समर्थः । कीदृक्सती । दध्ना चरति भक्षयति यस्तत्सं-बोधनं हे[1] दाधिकेत्येवंप्रकारेणाक्षिपन्ती पत्युरनभिमतपुष्पप्रदायित्वेन रुषितत्वाद्धे दध्नाघ्राण किमितीदं पुष्पमर्पयसीति तं दाधिकत्वेन निन्दन्तीत्यर्थः ॥

गत्यर्थे । हास्तिकैः । भक्षार्थे[2] । दाधिक । इत्यत्र "चरति" [११] इतीकण् ॥

पर्पिकाश्विक । इत्यत्र "पर्पादेरिकट्" [१२] इतीकट् ॥

पदिकम् । "पदिकः" [१३] इति निपात्यते[3] ॥

श्वागणिकज इत्युक्त्वार्पयन्पुष्पं प्रियोन्यया ।
ऊचे घ्नत्या श्वगणिकजावैतनिक इत्यलम् ॥ ९ ॥

९. अन्यया घ्नत्या नर्मकेल्या ताडयन्त्या[4] सत्यालमत्यर्थं प्रिय ऊचे । कथमित्याह[5] । श्वगणिकजावैतनिक इति[6] श्वगणेन चरति[7] श्वगणिक आखेटिकस्तस्माज्जाता श्वगणिकजा तस्या वेतनेन जीवति वैतनिको भृत्यस्त्वमसीति मम दासस्त्वं तस्मात्त्वाभिमतं त्वया कारयिष्याम्येवेति[8] तात्पर्यार्थ इति । यतः कीदृक् । पुष्पमर्पयन्[9] । किं कृत्वा । उक्त्वा । किमित्याह[10] । हे श्वागणिकजे हे आखेटिकपुत्रि मया सुकुमालेना(रेणा?)स्य पुष्पोच्चयन[11]रूपस्य कष्टकर्मणो विधापनेनात्यन्तं निर्दय इत्यर्थ इति ॥

अवैशिक्यो विलासिन्यो लीलानां पुष्पवल्लिषु ।
क्रयिका विक्रयिकाः किं क्रयविक्रयिकाः किमु ॥ १० ॥

---

१ **ए** हे धिकोत्ये°. २ **ए सी** भक्ष्यार्थं°. ३ **बी** °ते । स्वाग°. ४ **ए** °यत्या स°. ५ **सी** °ह । स्वग°. ६ **सी** °ति स्वग°. ७ **सी** °ति स्वग°. ८ **ए** °ष्यामोवे°. **बी** ष्यामेवे°. ९ **ए बी** °यत् । किं. १० **ए** °मिक्याह. ११ **बी** °च्चयेन°.

१०. अवैशिक्यो वेशेन[1] वेश्यागृहेणाजीवन्त्यः कुलाङ्गनाः पुष्पवल्लिषु पुष्पोच्चयार्थं पुष्पाढ्यलतानां समीपे लीलानां विलासानां क्रयिका[2] विक्रयिकाः किं क्रयविक्रयिकाः किमु क्रयेण विक्रयेण क्रयसहितो विक्रयैः[3] क्रयविक्रयस्तेन वा जीवन्त्य इवासन् । मूल्येन[4] ग्राहिका इव दायिका इव वा । ग्रहणदाने द्वे[5] अपि कुर्वाणा[6] इव वासन्नित्यर्थः । यतश्चलनादि[7]वैशिष्ट्यं[8] विलासः सोऽस्त्यासां विलासिन्यः । स्त्रीषु लतासु च[9] चलनादिवैशिष्ट्यरूपाणां विलासानां सद्भावादेवमाशङ्का ॥

श्वगणिके[10,11] श्वागणिक । इत्यत्र "श्वगणाद्वा" [१४] इति वेकट् ॥

वैतनिकः । वैशिक्यः । अत्र "वेतनादेर्जीवति" [१५] इतीकण् ॥

क्रयविक्रयिकाः । क्रयिकाः । विक्रयिकाः । अत्र "व्यस्ताच्च०" [१६] इत्यादिनेकः ॥

वस्निकायुधिकानायुधीयव्रातीनदारवत्[1] ।
किं दूरन्भ्राम्यसि पत्येति श्रान्तोचे कापि संभ्रमात् ॥ ११॥

११. कापि स्त्री श्रान्ता पुष्पोच्चयनार्थमनेक[12]तरुषु भ्रमणात्खिन्ना सती पत्या[13] संभ्रमात्प्रेमातिरेकोत्थादादरादूचे । कथमित्याह । वस्नं मूल्यं तेन जीवन्ति वस्निकाः[14] कर्मकरा[15]स्तथायुधेनोपचारादायुधकर्मणास्त्रकरणादिना जीवन्त्यायुधिका लोहकारा[16]द्या अनायुधीया आयुधकर्मानुपजीवि-

१ बी °त् । कं दू°.

१ ए वेश्येन. २ सी °यिकाः किं. ३ ए °यः वि°. ४ ए मूलेन. ५ सी द्वे कु°. ६ सी °णा अपि वा°. ७ सी °ललना°. ८ ए °शिष्यं वि°. ९ ए च वल°. सी च लल°. १० ए °णिकः श्वा°. ११ सी °क । इ°. १२ सी °नेकेषु त°. १३ बी पत्याः सं°. १४ ए °स्तिका क°. १५ सी °मैकारा°. १६ ए बी लोहारा°.

न[1]श्चर्मकाराद्यास्तथा नानाजातीया अनियतवृत्तयः शरीरायासजीविनः संघा व्रातास्तत्साहचर्या[2]त्तत्कर्मापि व्रातं तेन जीवन्ति[3] व्रातीना [4]भास्मह्रिकादयो द्वन्द्वे तेषां [5]दारा यथा काष्ठतृणादिग्रहणाय द्रून्भ्राम्यन्ति तथा त्वं किमिति [6]द्रूंस्तरून्भ्राम्यसीति ॥

वस्निक । इत्यत्र "वस्नात्" [१७] इतीकः ॥

अनायुधीय । आयुधिक । इत्यत्र "आयुधादीयश्च" [१८] इती[7]ये[8]कौ ॥

व्रातीन । इत्यत्र[9] "व्रातादीनञ्" [१९] इतीनञ् ॥

स्मर्त्री वैरं कि[1]माक्षद्यूतिकत्यागि[2]मगातिकम् ।
आपमित्यकवत्प[3]त्येत्यूचेन्या कुसुमैर्व्रती ॥ १२ ॥

१२. अन्या कामिनी [10]केलिवशात्केनापि भर्तृव्यलीकेन रुष्टत्वाद्वा कुसुमैर्व्रती सती पत्योचे । कथमित्याह । त्वं किमाक्षद्यूतिकत्यागिमगातिकमक्षद्यूतेन त्यागेन गतेन च निर्वृत्तं वैरं स्मर्त्री य[11]त्त्वं पुष्पैर्मां ताडयसि तत्किं यत्त्वं मया पुराक्षद्यूतेन दाने[12]न गत्या च पराजिता तेन [13]निर्वृत्तं वैरं स्मरसीत्यर्थः । आपमित्यकव[14]दपमित्य प्रतिदानेन बुद्धिस्थेन [15]निर्वृत्तमापमित्यकमुद्धारेण गृहीतं वस्तु कदैतदहं प्रतिदास्यामीति यथा काचित्स्मरतीति ॥

काप्ययाचितकप्रेम्णि ताम्यत्यौत्सङ्गिके प्रिये ।
तिरोभवन्नर्मणाशु पुष्पपैटाकिकी द्रुषु ॥ १३ ॥

---

१ बी °माद्यू°. २ बी °गिनम°. ३ ए °त्पतेत्यू°.

---

१ बी °र्मकरा° २ बी °त्तत्क°. ३ बी °न्ति व्रती°. ४ बी सी भाम्मह्रि°. ५ ए दार य°. ६ बी °ति द्रून्भ्रातरून् न्यसी°. ७ बी °तीयकौ. ८ ए °येकौ। व्रा.° ९ बी °त्र व्रतादीनञ्. १० सी केना°. ११ बी यत्त्वं पु°. १२ ए °न मत्या. १३ सी निवृत्तं. १४ ए °ववद°. १५ सी निवृत्त°.

१३. कापि कामिनी नर्मणा हास्यादाशु झटिति द्रुषु तिरोभवत् । क सति । प्रिये ताम्यति "षष्ठी[1] वानादरे" [२. २. १०८] इति सप्तमी । प्रियाया अदर्शनात्खिद्यमानं प्रियमना[2]दृत्येत्यर्थः[3] । किंभूते । अयाचितकं[4] न याच्ञया निर्वृत्तं[5] स्वाभाविकं प्रेम यस्य तस्मिन्नत एवौत्सङ्गिक उत्सङ्गेन हरति प्रियां[6] नयति[7] निमेषमात्रमपि प्रियाविरहस्यासहिष्णा-वित्यर्थः । कीदृकसती । पुष्पाणां[8] पैटाकिकी पिटाकेन[9] पिटउ[10] इति प्रसिद्धेन[11] वंशभाजनेन हरन्ती पुष्पाहरणार्थं[12] पिटकं वहन्तीत्यर्थः[13] ॥

आक्षद्यूतिक । गातिकम् । अत्र "निर्वृत्तेक्ष०"[14] [२०] इत्यादिना-इकण्[15] ॥

त्यागिम । इत्यत्र "भावादिमः" [२१] इतीमः ॥

अयाचितकं[16] । आपमित्यक । इत्यत्र "याचित०" [२२] इत्यादिना[17] कण् ॥

औत्सङ्गिके । पैटाकिकी । इत्यत्र "हरति०" [२३] इत्यादिनेकण् ॥

काचिदौक्षीद्गृहीत्वाम्बु[1] भस्त्रिकादंशभारिकात् ।
सखीं श्रान्तां[2] निकुञ्जान्तर्भूत्वा विवधिकी[3] स्वयम् ॥ १४ ॥

१४. काचिन्निकुञ्जान्तर्वनगहनमध्ये श्रान्तां पुष्पोच्चयेन[18] खिन्नां सखीमौक्षीत्सिषेच । किं कृत्वा । विवधेन[19] मार्गेण[20] हरति विवधिकी

---

१ ए °म्बु भुस्त्रि°. २ बी श्रान्ता नि°. ३ ए °वधकी.

---

१ सी षष्ठि प्रि°. २ बी °यमानादृतेत्य°. ३ ए °दृनेत्य°. ४ बी °च्चितं न. ५ बी °निवृत्तं. ६ ए प्रियं न°. ७ बी नयाति. ८ ए °णां पेटा°. ९ बी पिटके°. १० बी सी पिडउ. ११ बी °न वांश°. १२ सी °ष्पाभर°. १३ ए °र्थः । अक्ष°. १४ सी निवृत्ते°. १५ सी °ना-अक°. १६ सी °तकः । आ°. १७ बी °ना-इक°. १८ ए °न सखीं खिन्नां मौ°. १९ ए बी विविधे°. २० ए °ण वा ह°.

श्रान्तसख्या[1] वाहिकादाना[2]न्मार्ग[3]दायिनी स्वयं भूत्वा । तथा भस्त्रिकाद्रू-स्त्रया दृतिना जलं हरतो[4] भृत्यादेरम्बु गृहीत्वा । किंभूतात् । अंशो भागभूतो भारो जलभारोंशभारस्तेन हरत्यंशभारिकस्तस्माद्द्वितीयेन सहाम्बुभारं वहत इत्यर्थः ॥

काप्यवीवधिके कुञ्जे नीत्वा वैवधिकच्छलात् ।
कांचित्कौ[1]टि[2]लिकीभूय प्रियो भ्रमयति प्रियाम् ॥ १५ ॥

१५. कांचित्प्रियां प्रियो भ्रमयति नर्मणेतस्ततो नयति तत्कालापेक्षया वर्तमाना । किंकृत्वा । वैवधिकच्छलान्मार्गेण नेतु[5]श्छलादहमत्र मार्गे[6]ण नेतास्मीति व्याजादित्यर्थः । कापि कुञ्जे[7] वनगहने नीत्वा । किंभूते । अत्यन्तं वृक्षादिभिर्गु[8]प्तिलत्वान्नास्ति वीवधिको मार्गेण नेता यत्र तस्मिन्[9] खिल इत्यर्थः । तथा कौ[10]टि[11]लिकीभूय कुटि[12]लिकाशब्देनाग्रे वक्रा[13][14] लोहादिमय्यङ्गाराकर्षणी यष्टिर्वा कुटिला गतिर्वा पलालोत्क्षेपणोग्रे वक्रो दण्डो वा परिव्राजकोपकरणभेदो वा चौराणां नौगृहाद्यारोहणार्थं दामाग्रप्रतिबद्ध आयसोर्धाङ्कुशो वोच्यते । यथा कर्मारकर्षकपरिव्राजकचौरा अङ्गारपलालपुष्पनावः कुटिलिकया हरन्त्येवं वैवधिकच्छलेन प्रियाया आक[15]र्षकीभूये[16]त्यर्थः । यद्वा कुटिलिकया कुटि[17]लगत्या हा[18]रकीभूय ॥

---

१ ए °चित्कोटिकी°. २ बी सी °त्कौटलि°.

---

१ सी °ख्या बाहि°. २ ए वाहनादा°. ३ बी सी °र्गेनायि°. ४ बी तो तृत्वादे°. सी °तो दे°. ५ ए बी °तुच्छला°. ६ ए °ण नोता°. बी °ण नैता°. ७ बी °ञ्जे ग°. ८ बी सी °र्गुपिल°. ९ ए °स्मिन्नखि°. सी स्मिनखि°. १० सी कौटलि°. ११ ए °टिकी°. १२ सी °टिलका°. १३ बी °वका लो°. १४ ए °क्रा लेहा°. १५ बी °कर्षिकी°. १६ ए °त्यर्थे । य°. १७ बी °टिलाग°. १८ ए सी हारिकी°.

भस्त्रिकात् । अंशभारिकात् । इत्यत्र "भस्त्रादेरिकट्" [२४] इतीकट् ॥

विवधिकी[1] । वीवधिके । अत्र "विवध०"[2] [२५] इत्यादिनेकङ्ग ॥ पक्षे । इकण्[3] । वैवधिकं[4] ॥

कौटिलिकीभूय । इत्यत्र "कुटिलिकाया अण्" [२६] इत्यण् ॥

आम्भसिकानौजसिको मरुद्प्रातिलोमिकः ।
अमूः साहसिको भूत्वा समस्प्राक्षीच्छ्रमश्लथाः ॥ १६ ॥

१६. मरुद्वातः श्रमश्लथाः पुष्पोच्चयोत्थखेदेन निःसहा अमूः कामिनीः समस्प्राक्षीत् । कीदृक् । अम्भसा वर्तत आम्भसिकः सजलकणः स[5] चासौ न ओजसा बलेन वर्ततेनौजसिकश्च मृदुः स तथा[6] । तथा न प्रतिलोमं वर्ततेप्रातिलोमिकः पृष्ठवाहित्वेनानुकूलः । किं कृत्वास्प्राक्षीत् । सहसा वर्तते साहसिकः परदारस्पर्शोत्थस्यायतौ विनिपातस्यानालोचकत्वादविमृश्यकारी पारदारिक इव भूत्वा । साहसिक एव हि स्मरोद्रेकोत्थस्वेदेनाम्भसिकोनौजसिकोप्रातिलोमिकश्च[7] सन् परनारीः स्पृशति ॥

गोत्रं पुष्पार्पणे प्रातिकूलिक्या[1] गृह्णतापरा ।
प्रातीपिक्यानुकूलिक्याज्ञायि प्रौढा प्रियेण न ॥ १७ ॥

१७. प्रियेणापरा कामिनी प्रतीपं[8] वर्तते प्रातीपिकी प्रतिकूलानुकूलं वर्तत आनुकूलिक्यनुकूला वा नाज्ञायि । कीदृशा । पुष्पार्पणे प्रातिकूलिक्याः प्रतिकूलं वर्तमानायाः सपत्न्या गोत्रं नाम गृह्णतोच्चारयता

१ ए बी °कूलक्या.

१ बी °विविधि°. २ बी विविध°. ३ सी °ण् । कौटलि°. ४ ए °क । कैटि°. ५ बी स वाष्णो न°. ६ सी °था न. ७ ए °सिकानौ°. ८ ए °पं पर्वते.

गोत्रस्खलितापराधं कुर्वतापीत्यर्थः । यतः कीदृक् । प्रौढा[1] । प्रौढा हि गम्भीराशयत्वेन गूढाकारेङ्गिता स्यात् । यदुक्तम् ।

लब्धायतिः[2] प्रगल्भा[3] रतिकर्मणि पण्डिता विभुर्दक्षा
आक्रान्तनायकर्मना[4] निर्व्यूढविलासविस्तारा ॥
सुरते[5] निराकुलासौ द्रवतामिव याति नायकस्याङ्गे[6][7]
न च तत्र विवेक्तुमलं कोयं काहं किमेतदिति ॥

तत्र

कुपितापराधिनि[8] संवृत्याकारमधिकमाद्रियते ।
कोपमपह्नुत्यास्ते धीरा[9] हि रहस्युदासीना ॥ इति ॥

अपारिमुखिकी पारिपार्श्विकेन्यानुलोमिके ।
पत्यौ हासादनान्वीपिक्यक्षिपत्पौष्पिकी स्रजम् ॥ १८ ॥

१८. अन्या पत्यौ हासान्नर्मणा स्रजमक्षिपत्[10] कण्ठे चिक्षेप । कीदृक्सती । अनान्वीपिकी न प्रतिकूलं वर्तमानानुरक्तेत्यर्थः । अत एवापारिमुखिकी[11][12] । परिर्वर्जनेत्र[13][14] । न मुखं वर्जयित्वा वर्तमाना संमुखीनेत्यर्थः । तथा पुष्पाण्युञ्छति पौष्पिकी पुष्पाण्युच्चिन्वती । पत्यौ च किंभूते । आनुलोमिकेनुकूलं वर्तमानेनुरक्त इत्यर्थः । अत एव पारिपार्श्विके । परिः सर्वतोभावेत्र । यतो यतः प्रियासमीपं ततस्ततो वर्तमाने सदा पार्श्वस्थे ॥

१ **सी** °ढा हि गभीराश्रय°. २ **ए** लब्धय°. ३ **बी** °यतिप्र°. ४ **ए** °ममानि°. ५ **सी** °तेन नि°. ६ **ए** नायिक°. ७ **सी** °स्यान्ते । न. ८ **सी** °राधनि. ९ **सी** °रापि र°. १० **ए** °त् कं चि°. ११ **ए सी** एव पा°. १२ **बी** °वापरि°. १३ **बी सी** °रिवर्ज°. १४ **बी** °ने च न.

पत्या नागरिकेणान्यो[1]न्वीयते स्म वने ह्यसौ ।
मा भैषीद्भीषणेस्मि[2]न्पाक्षिकमात्सिकमार्गिकैः ॥ १९ ॥

१९. अन्या नागरिकेण नगरं रक्षता तलारेण पत्या भर्त्रा वनेन्वीयते स्मानुगम्यते स्म । हेतुमाह । अस्मिन्वनेसौ मत्प्रिया मा भैषीत् । यतः पाक्षिकमात्सिकमार्गिकैः पक्षिणो मत्स्यान्मृगांश्च घ्नद्भिर्लुब्धकधीवरैः कृत्वा भीषण इति ॥

मैनिकः खा[3]गिकोसौ सौकरिकः पारिपन्थिकः ।
इत्युक्त्वा भेषयन्कान्तोपस्रजा सस्वजेन्यया ॥ २० ॥

२०. अन्ययाप[1]स्रजा पुष्पोच्चयाकरणात्पुष्पमालारहितयैव सत्या कान्तः सस्वजे । यतो भेषयन् भेषृग् भये णिगन्तः । प्रियामेव भा[2]ययन् । किं कृत्वा । उक्त्वा । किमित्याह[3] । हे प्रियेसौ प्रत्यक्षो मीनान्खगान्सूकरांश्च घ्नल्लु(ल्लुँ)ब्धकः परिपन्थं[4] पन्थानं वर्जयित्वा तिष्ठति पन्थानम[5]भिव्याप्य हन्ति वा[6] पारिपन्थिकश्चोरोस्तीति ॥

अनौजसिकः । साहसिकः । आम्भसिकः । अत्र "ओजः०" [२७] इत्यादिना-इकण् ॥

प्रातिलोमिकः । आनुलोमिके । प्रातीपिकी । अ[8]नान्वीपिकी । प्रातिकूलिक्याः । आनुकूलिकी । इत्यत्र "तं प्रति०" [२८] इत्यादिनेकण् ॥

पारिमुखिकी । पारिपा[9]र्श्विके[10] । अत्र "परेः०" [२९] इत्यादिनेकण् ॥

नागरिकेण । [11]पौष्पिकी । इत्यत्र "रक्षदुञ्छतोः" [३०] इतीकण् ॥

---

१ बी °न्यार्नीय°. २ बी °स्मिन्माक्षि°. ३ बी खानिकोसो सौक°.

---

१ बी °पसृजा. २ बी सी भापयन्. ३ ए °ह । प्रि°. ४ बी सी °न्थं परिप°. ५ ए °मस्तिव्या°. ६ ए वा परि°. ७ ए °कः । आ°. ८ ए °नान्वपि°. ९ ए °पार्श्विके. १० सी °र्श्विकी । अ°. ११ बी पौषिकी.

पाक्षिक । मात्सिक । मार्गिकैः । अत्र "पक्षि०" [३१] इत्यादिना-इकण् ॥ अर्थग्रहणात्तत्पर्यायेभ्यो विशेषेभ्यश्च स्यात् । खागिकः । मैनिकः । सौकरिकः ॥

पारिपन्थिकः । अत्र "परि०" [३२] इत्यादिनेकण् ॥

पत्या द्वैगुणिकेनेवान्या पारिपथिकी स्रजम् ।
दत्त्वाल्पां प्रार्थ्यतानल्पां वृद्धिं गृह्णाति लोभ्यहो ॥ २१ ॥

२१. पारिपथिकी पन्थानं वर्जयित्वा व्याप्य वा तिष्ठन्त्यन्या पत्यानल्पां महतीं स्रजं प्रार्थ्यत । किं कृत्वा । अल्पां लघ्वीं स्रजं दत्त्वा द्विगुणं गृह्णाति द्वैगुणिकस्तेन यथाल्पं दत्त्वाधमर्णो बहु याच्यते । युक्तं चैतत् । यस्माल्लोभी वृद्धिं कलान्तरं गृह्णाति । अहो इत्यामन्त्रणे ॥

पारिपथिकी । इत्यत्र "परिपथात्" [३३] इतीकण् ॥

द्वैगुणिकेन । इत्यत्र "अवृद्धेर्०" [३४] इत्यादिनेकण् ॥ अवृद्धेरिति किम् । वृद्धिं गृह्णातीति वाक्यमेव ॥

दशैकादशिकी नासि दशैकादशिका तु सा ।
कुसीदिकेति जल्पन्ती पत्ये पुष्पाणि काप्यदात् ॥ २२ ॥

२२. कापि पत्ये पुष्पाण्यदात् । कीदृक्सती । जल्पन्ती क्षणमियमीर्ष्यां करोत्विति प्राक्पुष्पाण्यनाददानं शठं पतिं वदन्तीत्यर्थः । कथमित्याह । कुसीदं वृद्धिस्तदर्थं द्रव्यमपि कुसीदं तद्गृह्णाति यस्तत्संबोधनं हे कुसीदिक त्वं हि स्वयं कलान्तराजीवी ततो मामप्यात्मसदृशीमाशङ्क्य त्वं मत्तः पुष्पाणि नादत्से तत्त्वयुक्तमेवेत्यर्थः । यतोस्म्यहं न दशैकादशि-

---

१ बी प्राथिता°.

---

१ सी °णात्प°. २ बी सौरि°. ३ बी लध्वीश्रजं. ४ बी सी °मर्णे ब°. ५ ए वृद्धिक°. ६ ए वृद्धिर्°. ७ ए अत्रवृ°. ८ सी °ति वाक्पु°. ९ ए °त गृह्णा°. १० ए °शङ्का त्वं.

की दशभिरेकादश दशैकादशास्तान्न गृह्णामि सा तु त्वद्वल्लभा दशैकादशिका सैव त्वत्तोलंकारादि ग्रहीतुं तव पुष्पदानाद्युपचारं करोत्यहं त्वकृत्रिमप्रेम्णैव ते पुष्पाणि ददामीत्यभिप्राय इति ॥

कुसीदिक । इत्यत्र "कुसीदादिकट्" [३५] इतीकट् ॥

दशैकादशिका । दशैकादशिकी । इत्यत्र "दश०" [३६] इत्यादिनेक इकट् च ॥

आर्थिकी पादिकी चार्धपदिक्यपि च नावदत् ।
काचिल्लालामिकप्रातिकण्ठिकाद्वित्रसन्त्यलेः ॥ २३ ॥

२३. काचिन्नावदत् । किंभूता । आर्थिक्यप्यर्थं गृह्णत्यपि प्रयोजनवत्यप्यत एव पादिक्यपि चार्धपदिक्यपि च पदमर्धपदं वा मनसा गृह्णत्यपि विवक्षुरपीत्यर्थः । तर्हि कुतो नावददित्याह । यतोलेर्वित्रसन्ती भणने मुखसौरभाकृष्टोयमोष्ठादि मा दशदिति बिभ्यती यतो ललामं तिलकं गृह्णाति लालामिकः स चासौ प्रातिकण्ठिकश्च प्रतिकण्ठं कण्ठं लक्ष्यीकृत्य पुष्पमालादि गृह्णंस्तस्मात्तिलककण्ठमालादिगन्धलोभेन मुखान्तिके भ्राम्यत इत्यर्थः ॥

आर्थिकी । पादिकी । आर्धपदिकी । लालामिक । प्रातिकण्ठिकात् । इत्यत्र "अर्थ०" [३७] इत्यादिनेकण् ॥

पारदारिक साभर्तृकिकालं ते स्रजानया ।
भूषयं प्रतिपथिकां तामितीद्र चिक्षिपेन्यया ॥ २४ ॥

---

१ बी आथिकी°. २ बी च न व°. ३ बी यति प्र°.

---

१ सी °ह्णाति सा. २ ए सी °नादत्युप°. ३ ए °कती. ४ बी °गृह्णात्य°. ५ ए °र्धपादि°. ६ ए मा दिश°. सी मा देश°. ७ ए °ति ललामि°. ८ ए बी लक्षीकृ°. ९ ए °स्तस्तसा°. १० सी °दिलो°. ११ ए °की । अर्ध°. १२ बी °र्धपादि°.

२४. अन्ययेड् भर्ता चिक्षिपे स्रजं ददन्निरस्तः । कथमित्याह । हे पारदारिक[1] परस्त्रियं गच्छंस्तथा हे साभर्तृकिक सपत्नीं गच्छन्ननया ते[2] तव स्रजा ममालं सृतं किं त्वनया स्रजा कृत्वा[3] प्रतिपथिकीं(कां) कुलटात्वेन प्रतिपथं[4] पन्थानं[5] पन्थानं[6] प्रति गच्छन्तीं[7] तां[8] स्वप्रियां स्वमनोभीष्टां[9] परदारादिकां[10] भूषयेति ॥

मुधास्याक्रन्दिकी दाण्डमाथिकी त्वां लताधिया ।
यत्प्रातिपथिको[1] नालिस्त्यक्तेत्यन्या[2] सखीमशात्[3] ॥ २५ ॥

२५. अन्या सखीमशादवदत्[11] । कथमित्याह । हे सख्यसि त्वमलिभयेन[12] मुधा निरर्थकमाक्रन्दिक्याक्रन्दन्ति[13] यत्र स देश आक्रन्द[14] आक्रन्द्यत[15] इति वाक्रन्द आर्तायनं शरणमुच्यते । तं धावसि । तथा दाण्डमाथिकी माथशब्दः पथिपर्यायो दण्ड[16] इव माथो दण्डमाथ ऋजुमार्गस्तं[17] च मुधा[18] धावसि । यद्यस्मादलिस्त्वां लताधियानेकपुष्प[19]मालापरिधानेन पुष्पगन्धोद्धुरत्वाल्लतेयमिति बुद्ध्या न त्यक्ता न त्यक्ष्यतीति[20] ॥

पादविक्या लतामध्ये खिन्नाङ्ग्या नर्मकर्मठः ।
कस्याश्चिदानुपदिकः पतिः सौस्नातिकोभवत्[3] ॥ २६ ॥

---

१ बी °थिके ना°. २ ए °लिस्तत्केत्य°. ३ सी °त् । यतः.

---

१ ए °क स्त्रि°. २ बी ते नव. ३ ए °त्वा पति°. ४ बी सी °तिपथं°. ५ सी °न्थानीं ग°. ६ ए °नं ग°. ७ ए सी °च्छन्ती तां. ८ बी तां प्रि°. ९ ए °ष्टां पार°. १० ए °दिकं भू°. ११ ए °वत्. १२ बी °मभिलये°. १३ सी °न्दिनी आक्र°. १४ ए क्रन्द्य°. १५ सी आर्ता°. १६ ए °ण्डमाथ°. १७ ए °जुर्मार्ग°. १८ बी °धाव°. १९ बी °ताधेया°. २० ए बी त्यक्षति.

२६. कस्याश्चिन्नार्याः पतिः सौस्नातिकः सुस्नातं पृच्छन्नभवत् । यतः खिन्नाङ्ग्याः । कुत एतदित्याह । लतामध्ये पुष्पोच्चयनार्थं पादविक्याः पदवीं मार्गं धावन्त्याः । कीदृक्सन् । नर्मकर्मठो हास्यक्रियायां साधुस्तथानुपदिकोनुपदं पदस्य पश्चाद्धावन्प्रत्यासत्त्या धावन्नित्यर्थः । खिन्नाङ्गीं प्रियां दृष्ट्वा पतिर्हास्येन सुस्नातं पप्रच्छेत्यर्थः ॥

सौखशय्यिक्यभूत्पत्युः शय्यां निर्माय पल्लवैः ।
प्राभूतिकवैचित्रिकसौवस्तिकस्य काचन ॥ २७ ॥

२७. काचन पल्लवैः शय्यां निर्माय पत्युः सौखशय्यिक्यभूत् । हे भर्तः सुखकारिणी शय्येति प्रपच्छेत्यर्थः । यतः प्राभूतिकवैचित्रिकसौवस्तिकस्य प्रेमातिरेकेणातिवैदग्ध्येन चानेकचाटुकारवक्रोक्त्यादिभाषित्वात्प्रभूतं विचित्रं स्वस्ति च शुभं च ब्रुवाणस्य ॥

पारदारिक । साभर्तृकिक । इत्यत्र "पर०" [३८] इत्यादिनेकण् ॥

प्रतिपथिकाम् । प्रातिपथिकः । अत्र "प्रति०" [३९] इत्यादिनेकेकणौ ॥

दाण्डमाथिकी । पादविक्याः । आक्रन्दिकी । इत्यत्र "माथ०" [४०] इत्यादिनेकण् ॥

आनुपदिकः । अत्र "पश्चाति०" [४१] इत्यादिनेकण् ॥

सौस्नातिकः । सौखशय्यिकी । अत्र "सुस्नात०" [४२] इत्यादिनेकण् ॥

प्राभूतिक । वैचित्रिक । इत्यत्र "प्रभूत०" [४३] इत्यादिनेकण् ॥ क्रियाविशेषणादयमिष्यते । क्वचिदक्रियाविशेषणादपि । सौवस्तिकस्य ॥

---

१ ए सौख्यशय्य°. २ बी °य्यिकभू°. ३ सी °त्युः सौख°. ४ ए °वैः । क्यभू°.

---

१ ए °न्नव°. २ बी °शय्यक्य°. ३ बी सुखिका°. ४ ए °रियं याति प°. ५ बी °र्तृक. ६ ए सी °थिक । अ°. ७ सी °क्रन्दकी. ८ सी °ण् । प्रा°. ९ ए °दवि°.

काचिन्माशब्दिकी शाब्दिक्यामप्याल्यां लतान्तरे ।
नैत्यशब्दिकवाचालसपत्न्या अशृणोद्वचः ॥ २८ ॥

२८. काचिल्लतान्तरे लतामध्ये नित्यशब्द इति ब्रूते नैत्यशब्दिको मीमांसकस्तद्वद्वाचाला या सपत्नी तस्या वचोऽशृणोत् । किमेषा पत्युरग्रे वक्तीत्याकर्णयत् । कीदृक्सती । शाब्दिक्यामपि वैयाकरणीत्वेनाविनष्टं शब्दमुच्चारयन्त्यामप्याल्यां सख्यां विषये माशब्दिकी माशब्द इति ब्रुवाणा मा शब्दः क्रियतामिति ब्रुवाणेत्यर्थः ॥

लालाटिकं कौकुटिकं दार्दरिक्या सह स्थितम् ।
प्रियं दृष्ट्वा लतान्तः काप्यबध्नाल्लतयैव हि ॥ २९ ॥

२९. कापि कोपातिरेकेण बन्धनान्तरग्रहणे कालक्षेपासहिष्णुत्वाल्लतयैव प्रियमबध्नात् । किं कृत्वा । लतान्तर्दार्दरिक्या दर्दरो घटो वादित्रं च । तत्र वादित्रं कुर्वत्येवमुच्यते । तया सह स्थितं दृष्ट्वा । यतः कौकुटिकं दाम्भिकचेष्टा कुक्कुटी तामाचरन्तं मायिनं तथा ललाटं पश्यति ललाटदर्शनेन दूरावस्थानं लक्ष्यते तेन च कार्येष्वनुपस्थानं यः प्रियो दृष्टं प्रियाललाटमिति दूरतो याति न तु तदभिप्रेतकार्य उपतिष्ठते स एवमुच्यते । ललाटमेव वा कोपप्रसादज्ञानार्थं यः पश्यति स ल(ला)लाटिकस्तम् ॥

माशब्दिकी । नैत्यशब्दिक । इत्यत्र "माशब्द०" [४४] इत्यादिनेकण् ॥

---

१ बी °मप्यल्यां. २ बी सी असृणो°. ३ ए °कं ददारि°. ४ बी दादरि°.

---

१ ए °स्तद्वा°. २ बी °चोसृणो°. ३ ए °र्थः । ललाटि°. ४ सी °र्दरो°. ५ बी °र्दरा घटौ वा°. ६ सी °त्रं कुर्विले°. ७ ए °चेष्टां कु°. ८ सी °नं यः. ९ सी °न का°. १० ए °नं प्रि°. ११ सी °याद्दष्टं प्रियाल°. १२ सी °दनामा यः. १३ ए °य यत्पश्य°.

शाब्दिक्याम् । दार्दरिक्या[1] । लालाटिकम् । कौक्कुटिकम् । इत्येते "शाब्दिक०" [४५] इत्यादिना निपात्याः ॥

काचित्सामाजिकान्सैन्यान्पारिषद्याश्च सैनिकीः ।
पार्षद्या रञ्जयामास स्रजं गीतिं च गुम्फती ॥ ३० ॥

३०. काचित्सामाजिकान्समाजं समवेतान्सभास्थान्सैन्यान्सेनां समवेतान्सेनानरांस्तथा पारिषद्याः[2] परिषदं समवेताः सैनिकीश्च[3] सेनां समवेताः[4] स्त्रीश्च रञ्जयामास । कीदृक्सती । पर्षदं समवैति[5] पार्षद्या[6] सभायां निषण्णा[7] तथा स्रजं गीतिं च गुम्फती रचयन्ती ॥

सामाजिकान् । इत्यत्र "समूह०" [४६] इत्यादिनेकण्[8] ॥

पार्षद्या । इत्यत्र "पर्षदो ण्यः" [४७] इति ण्यः ॥ परिषच्छब्दादपीच्छ[9]न्त्येके । पारिषद्याः ॥

सैन्यान् । इत्यत्र "सेनाया वा" [४८] इति वा ण्यः ॥ पक्षे । सैनिकीः[10] ॥

आधर्मिक्या आपणिक्यास्तस्या धार्मिक देह्यदः ।
ऊचे स्रजोर्पयन्दृष्टकक्षानख इनोन्यया ॥ ३१ ॥

३१. अन्ययेनो भर्तादः एतत्कर्मोचे । तदेवाह[11] । हे धार्मिक धर्मं[12] न्याय्यं चरन्नुपहासवचनमिदम् । तस्याः स्वप्रियायाः[13] स्रजो देहि । कीदृश्याः । आपणिक्या आपणस्य हट्टस्य धर्म्यायाः पण्याङ्गनाया अत एवाधर्मिक्या[14] अधर्मं पापमाचरन्त्या इति । कुतो[15]यमूचेद इत्याह । यतो

१ सी °क्या । ललाटि°. २ ए °षद्याः प°. ३ सी °निकैश्च. ४ बी °वेता स्त्री°. सी °वेतांश्च र°. ५ ए °मवेति. ६ सी °र्षद्याः स°. ७ बी °षन्ना त°. सी °षण्णाः त°. ८ ए °दिनाक°. ९ ए °रिच्छ°. १० बी सी °निकी । आ°. ११ ए °ह । धा°. १२ सी धर्म्यं न्या°. १३ ए °याया स्र°. १४ बी °वा-धार्मि°. १५ सी °तो हेतोय°.

[1]दृष्टाः कक्षायां नखास्तन्नखक्षतानि यस्य सः । एवंविधोपि कुत इत्याह । यतः स्रजोर्पयन्[2] ॥

धार्मिक । आधर्मिक्याः[3] । अत्र "धर्म०" [४९] इत्यादिनेकण् ॥

आपणिक्याः । अत्र "षष्ठ्या धर्म्ये[4]" [५०] इतीकण् ॥

स्रजाघ्रानां पतन्तीं[1] च प्रियोन्यामहसीदिति ।
नावैशस्त्रेपि नारे स्त्री पटुः[2] शास्त्रे नु माहिषः ॥ ३२ ॥

३२. प्रियोन्यामहसीत् । कीदृशीं सतीम् । गोत्रे[5]स्खलितादिपरा[6]-धिनं[7] प्रियं स्रजाघ्रानां[8] पतन्तीं च कोपाटोपेन पत्युर्घाताय प्रयत्नात्स्वय-मभिसरणेन पत्यौ च घातभयेन[9] पश्चादपसरति घातेन सह स्खलितत्वा-दन्तराले[10] पतन्तीं च । कथमहसीदित्याह । स्त्र्यवैशस्त्रेपि विशसितुः क्रूरस्य धर्म्यं वैशस्त्रं न तथावैशस्त्रं तस्मिन्नपि कोमलेपि नारे नरस्य धर्म्ये[11] नरोचिते प्रहारादौ विषये न पटुः । यथा माहिष्या[12] धर्म्यो[13] माहिषः पिण्डारोवैशस्त्रेपि प्रसन्नत्वेन कोमलेपि शास्त्रे शास्त्रधर्म्ये[14] ग्रन्थे[15] विषये मूर्खत्वान्न पटुः स्यात्तस्मादमुमन्यायं[16] कुर्वती त्वं युक्तं[17] पेतिथेत्यर्थ इति ॥

वैभाजित्री मालिकीव[3] सखीनां काप्यदात्स्रजः ।
गौलिमके[4]च्छोर्वक्रयं नु वनस्य ददती श्रियम् ॥ ३३ ॥

---

१ बी सी °तन्ती च. २ ए सी पटु शा°. ३ सी °लिनीव स°. ४ ए गौलिके°.

---

१ बी सी दृष्टा क°. २ ए °न् । कार्मिकः । आधार्मिक्या । अ°. ३ सी °र्मिका । अ°. ४ बी धर्मे इ°. ५ बी गोत्रे स्ख°. ६ सी °ताप°. ७ बी °राधेनं. ८ बी °नां तीं च. ९ बी घाते भ°. १० ए °राले प°. ११ बी °र्म्ये नारो°. १२ सी धर्मो मा°. १३ ए °र्म्यो महि°. १४ बी शास्त्रध°. सी शास्त्रवर्ण्ये ग्र°. १५ ए ग्रन्थं वि°. १६ ए °मुन्या°. १७ ए °क्तं पतिष्वेत्य°.

३३. कापि मालिकीव[1] मालापण्येव मालिनीव वैभाजित्री विभाजयिता विभागकारी तद्धर्मादनपेता विभागकारिणी सती सखीनां स्रजोदात् । किंभूता । वनस्य वक्रयं नु भाटकमिव[2] श्रियं लीलाविहारादिना शोभां ददती । कीदृशस्य । गौल्मिकेच्छोर्[3]गुल्मानां लतादिस्तम्बानां गुल्माया वा वनस्य पुष्पाद्युच्चयेनोपभुक्तानामवक्रयो[4] भाटकं गौल्मिकस्तस्येच्छोः ॥

शास्त्रे । नरादि । नारे । माहिषः । इत्यत्र "ऋन्नरादेरण्" [५१] इत्यण् ॥

वैभाजित्री । वैशस्त्रे । अत्र "विभाजयितृ०" [५२] इत्यादिनाण् । विभाजयितुर्णिलुक् । विशतुश्चेड्लुक् ॥

गौल्मिक । इत्यत्र "अवक्रये" [५३] इतीकण् ॥

मालिकी । इत्यत्र "तदस्य पण्यम्" [५४] इतीकण् ॥

शालालुक्या[1] किशरिकी[2] तगरिक्या[3] शलालुकी ।
विलक्षमूचे हन्तैताः कुसुमैरेव वासिताः ॥ ३४ ॥

३४. शालालुक्या शलालुगन्धद्रव्यपण्यया स्त्रिया किशरिकी[5][6] किशरगन्धद्रव्यपण्या[7] स्त्री[8] शलाल्वादिगन्धद्रव्याणाम[9]वक्रयसंभावनया[10] विलक्षमूचे । एवं तगरिक्या शलालुकी चोचे । किमित्याह । हन्तेति खेदे[11] । एता विलासिन्यः कुसुमैरेव वासिता इति । इतिरत्र ज्ञेयः ॥

किशरिकी[12] । तगरिक्या[13] । इत्यत्र "किशरादेरिकट्" [५५] इतीकट् ॥

१ सी °क्या तगरकी त°. २ बी °शरकी. ३ ए बी °गरक्या.

१ सी °लिनीव मा°. २ बी °टमि°. ३ बी °च्छोगुल्मा°. ४ सी °पभोक्ता°. ५ बी किशारि°. ६ सी °शरकी. ७ ए °पणा स्त्री. ८ बी स्त्री शाला°. ९ ए °व्यामविक्र°. १० बी °मविक्र°. ११ ए °दे । वि°. १२ ए सी °शरकी. १३ ए °रिका । इ°.

शलालुकी[1] । शालालुक्या[2] । इत्यत्र "शलालुनो[3] वा" [५६] इतीकङ्वा ॥

माड्डुकिक्यो झार्झरिक्य[1]: काञ्चीनादै[2]: स्त्रियः श्रमात्[3] ।

माड्डुकीं झार्झरीं[4] नूर्मिनादैः स्नातुं नदीमयुः ॥ ३५ ॥

३५. स्त्रियः पुष्पोच्चयोत्थाच्छ्रमाद्धेतोर्नदीं[4][5] वर्णासां स्नातुमयुः । कीदृश्यः सत्यः । गमनवशात्काञ्चीनादैः कृत्वा मड्डुकझर्झरौ वाद्यभेदौ तद्वादनं[6] शिल्पं यासां ता माड्डुकिक्य इवं[7] झार्झरिक्य इव वा । किंभूताम् । ऊर्मिनादैः कृत्वा माड्डुकीं नु झार्झरीं नु ॥

माड्डुकिक्यः । झार्झरिक्यः । अत्र "शिल्पम्" [५७] इतीकण् ॥

माड्डुकीम्[8] । झार्झरीम्[9][10] । अत्र[11] " मड्डुक०" [५८] इत्यादिना वाण् ॥ पक्षे ।

माड्डुकिक्यः[12] । झार्झरिक्यः ॥

ताम्बूलिक्योधरैः[5] सिन्धूसांस्थपद्मदलश्रियाम् ।

नार्यश्छात्र्यो नु चौर्यो नु तूष्णीकैस्तर्किताः प्रियैः ॥ ३६ ॥

३६. प्रियैस्तूष्णीकैस्तूष्णींशीलैः[13] सावधानैः सद्भिरित्यर्थः । नार्यस्तर्किताः । कथमित्याह । अधरैः कृत्वा छात्र्यो नु शिष्या इव चौर्यो नु चुराशीला इव वा[14] । कासाम्[15] । सिन्धौ वर्णासायां संस्था संस्थानं शीलमेषां सांस्थानि स्थास्नूनि[16] यानि पद्मदलानि प्रस्तावाद्रक्तोत्पलपर्णानि तेषां

---

१ **बी** झाझरि°. २ **बी** काचीना°. ३ **ए** श्रनात् । नाड्डु°. ४ **बी** झाझरीं. ५ **ए** तामूलि°.

---

१ **बी** °की । शलालुका । इ°. २ **सी** °लुका । इ°. ३ **बी** °लुमो वा. ४ **ए** °च्छ्नाद्धे°. ५ **ए** °नंदीव°. ६ **बी** °नं शल्पं. ७ **सी** °व वा । किं. **बी** °व वा झाझरि°. ८ **सी** °म् । झझरी°. ९ **बी** झाझरी°. १० **ए** °री । अ°. ११ **बी** °त्र माड्डुक्य इ°. १२ **ए** °किवयाः । झा°. १३ **ए** °ष्णींशैलैः. १४ **सी** वा । कस्या सि°. १५ **बी** कासीं सि°. १६ **सी** °नि प°.

श्रियां रक्तत्वादिलक्ष्मीणाम् । यतः कीदृश्यः । ताम्बूलिक्यस्ताम्बूल-[1]भक्षणशीलास्ताम्बूलिकीत्वात्तासामधरा रक्तोत्पलदललीला इत्येवं वितर्कः ॥

ताम्बूलिक्यः । अत्र "शीलम्" [५९] इतीकण् ॥

सांस्थ । छात्र्यः । चौर्यः । अत्र "अङ्गस्था०" [६०] इत्यादिनाञ् ॥

तूष्णीकैः । इति "तूष्णीकः" [६१] इत्यनेन निपात्यते ॥

ताः पारश्वधयाष्टीकास्तरोधःकण्टकां नदीम् ।
पारश्वधिकशाक्तीककृतरक्षास्ततोविशन् ॥ ३७ ॥

३७. ततस्ता नार्यो नदीमविशन् । किंभूताः । पारश्वधिकैः पर्शु-प्रहरणैः शाक्तीकैश्च शक्तिप्रहरणैः कृता रक्षा यासां[2] ताः । कीदृशीम् । पारश्वधयाष्टीकास्तरोधःकण्टकां पर्शुप्रहरणैर्यष्टिप्रहरणैश्चोत्क्षिप्ततटकण्ट-काम् ॥

पारश्वधिक । इत्यत्र "प्रहरणम्" [६२] इतीकण् ॥

पारश्वध । इत्यत्र "परश्वधाद्वाण्" [६३] इति वाण् ॥ पक्षे । पारश्वधिक[3] ॥

शाक्तीक । याष्टीक । इत्यत्र "शक्ति०" [६४] इत्यादिना टीकण् ॥

ता ऐष्टिकैरिवैष्टीका नास्तिकैरिव चास्तिकाः ।
आम्भसीकैः समं कान्तैराम्भसिक्यः प्रजह्रिरे ॥ ३८ ॥

३८. आम्भसिक्यो जलप्रहरणास्ता नार्य आम्भसीकैर्जलप्रहरणैः कान्तैः सह प्रजह्रिरे । यथैष्टीका इष्टिरभिचारार्थो[4] याग एव प्रहरणं येषां ते कुत्सितर्त्विजे[5] ऐष्टिकैरभिचारार्थयागप्रहरणैः सहेष्टिरूपप्रह-

---

१ बी °रस्वधि°.

---

१ ए °त्येव वितर्क्या । ता°. २ बी यासां: । की°. ३ ए सी क । या°. ४ ए °र्थो योग. ५ ए °ज एष्टि°.

रणैरेव कृत्वा प्रहरन्ति । यथा[1] चास्ति परलोकः[2] पुण्यं पापमिति वा[3] मतिरेषामास्तिका नास्तिकैः सह प्रहरन्ति विरुद्धमतत्वाद्विवादेन युध्यन्ते ॥

दैष्टिकैकान्यिकैकादशान्यिकानैकरूपिकम् ।
शिष्यं गुरुर्न्वहन्नब्जैर्नाम्न्येका स्खलितं पतिम् ॥ ३९ ॥

३९. एका नाम्नि स्खलितं सन्तं पतिमब्जैः कृत्वाहन् । यथा गुरुरुपाध्यायः शिष्यं कम्बया हन्ति। किंभूतं सन्तम् । दिष्टं दैवं पुण्यं तत्प्रमाणं न तु व्यवसाय इति मतिरस्य दैष्टिकस्तथै[4]कमन्यदपपाठोनु-[5]योगे परीक्षायां वृत्तमस्यैकान्यिकस्तथैका[6]दशान्यान्यपपाठरूपा[7]ण्यनुयो-गेस्य वृत्तान्येकादशान्यिकस्तथैकं रूपं वारोध्ययने वृत्तमस्यैकरू[8]पिको न तथानेकरूपिकोतिमन्दप्रज्ञत्वेनासकृद्धोषको विशेषणकर्मधारये तं तथा ॥

हृष्टास्तरङ्गैः कान्ताभ्रूलास्यद्वादशरूपिकैः ।
राजाग्रभोजनिक्येन सैन्या[1] मौदकिका इव ॥ ४० ॥

४०. सैन्यास्तरङ्गै[9]र्नदीकल्लोलैः कृत्वा हृष्टाः । यतो द्वादशरूपाणि वारा अध्ययने वृत्तान्येषां द्वादशरूपिकाः कान्ताभ्रूलास्यानां द्वादशरूपिकास्तैः कुटिलत्वेन[10] स्वप्रेयसीविलासभ्रूतुल्यैरित्यर्थः । यथा मोदका [11]भक्ष्यं हितमेभ्यो मौदकिका [12]राजाग्रभोजनिक्येनाग्रभोजनमस्मै

१ **ए** °न्या मोद°.

१ **ए बी** °था वास्ति. २ **ए सी** °लोक पु°. ३ **ए** वा मिति°. ४ **सी** °ष्टिकैस्त°. ५ **ए** °योगो प°. ६ **बी** °दश्यांन्या°. ७ **ए बी** °पान्यनु°. ८ **सी** °पितोति°. ९ **बी** °कास्तिकैः कु°. १० **सी** °न सप्रे°. ११ **बी** भक्षं हि°. १२ **ए** राग्र°.

नियुक्तं दीयत[1] आग्रभोजनिको राज्ञ आग्रभोजनिको राजाग्रभोजनिकस्तस्य भावेन राज्ञोग्रभोजनेन[2] मोदकादिना कृत्वा हृष्यन्ति ॥

ऐष्टीकाः । ऐष्टिकैः[3] । आम्भसीकैः । आम्भसिक्यः[4] । अत्र "वेष्टयादिभ्यः" [६४] इति वा टीकण् ॥

नास्तिकैः । आस्तिकाः[5] । दैष्टिक । इत्येते "नास्तिक०" [६६] इत्यादिना निपात्याः ॥

ऐकान्यिक । इत्यत्र "वृत्त०"[6] [६७] इत्यादिनेकण् ॥ अन्ये त्वपपाठादन्यत्राप्यध्ययनमात्रे[7] प्रत्ययमिच्छन्ति । अनैकरूपिकम् ॥

एकादशान्यिक । इत्यत्र "बहु०" [६८] इत्यादिना-इकः । अत्राप्यन्ये[8] पूर्ववदन्यत्रापीच्छन्ति । द्वादशरूपिकैः ॥

मौदकिकाः । अत्र[9] "भक्ष्यं०" [६९] इत्यादिनेकण् ॥

राजाग्रभोजनिक्येन । इत्यत्र "नियुक्तं दीयते" [७०] इतीकण् ॥

मांसौदनिकया श्राणिकेव मांसौदनिक्यपि ।
श्राणिक्येवामिलन्नार्यः सपत्नीभिर्न[1] वार्ष्वपि ॥ ४१ ॥

४१. नार्यः सपत्नीभिः सह वार्ष्वपि जलेष्वपि मध्ये नामिलन् । जलेषु ह्येकेन भर्त्रा सह जलकेलेः[10] क्रियमाणत्वेनात्यासन्नत्वान्मिथोमेलकः सुघटः परं तत्राप्यतीर्ष्यालुत्वेन वचनालापसंमुखेक्षणाङ्गस्पर्शादिरक्षर्या[11] न मिलिता इत्यर्थः । यथा श्राणा यवागूर्नियुक्तमस्मै[12] दीयते

---

१ बी °भिनवार्ष्वं°.

---

१ बी °त अग्रेभो°. २ ए °ने मो°. ३ बी °ष्टिकाः । आ°. ४ ए °सिकः । अ°. ५ बी °स्तिका । दै°. ६ ए सी वृत्येत्या°. ७ सी °मात्रप्र°. ८ ए °प्यने पू°. ९ बी °त्र भिक्षं इ°. १० ए °लेः श्रिय°. ११ सी °या मि°. १२ बी °गूनियु°.

श्राणिका पथ्याशिनी मांसौदनो मांसमिश्र ओदनो नियुक्तमस्यै दीयते मांसौदनिका तया प्रबलाभ्या स्त्रिया सह[२] विरुद्धधर्मतया न मिलति। यथा च मांसौदनिक्यपि[३] श्राणिक्या सह न मिलति[४] ॥

श्राणिका श्राणिक्या। मांसौदनिकया[५] मांसौदनिकी। इत्यत्र "श्राणा०" [७१] इत्यादिनेको वा ॥

भाक्तास्यभाक्तिको न्वोदनिक्यनौदनिकी च किम्।
अनोजस्काम्बुघातेष्वित्यूचे दम्पतिभिर्मिथः ॥ ४२ ॥

४२. दम्पतिभिर्मिथो नर्मणोचे। किमित्याह। भक्तमस्मै नियुक्तं दीयते हे[६] भाक्त प्रिय यथासि त्वमभाक्तिको भक्तभोजनरहितः सन्ननोजस्को भवसि। तथाम्बुघातेषु सत्सु किमित्यनोजस्को जलप्रहारविधुरत्वेन निस्तेजस्कोसीति। तथौदनो नियुक्तमस्यै दीयते हे ओदनिकि प्रिये यथा त्वमनौदनिक्योदनभोजनरहितानोजस्का[९][१०][११] भवसि तथाम्बुघातेषु[१२] सत्सु किमित्यनोजस्कासीति[१३]। अनोजस्काम्बुघातेष्वित्यत्रानोजा अम्बुघातेष्विति पाठो युक्तः प्रतिभाति। स्त्रीलिङ्गे[१४] पुल्लिङ्गे चास्य समानरूपत्वात्। परमनोजस्काम्बुघातेष्विति[१५][१६] पाठः प्रायो दृश्यते। तस्मादनोजस्केत्ययं पुंसि स्त्रीलिङ्गव्यत्ययेन योज्यः[१७] ॥

भाक्त। ओदनिकी(कि)[१८]। अत्र "भक्त०" [७२] इत्यादिनाणिकटौ। पक्षे। अभाक्तिकः। अनौदनिकी ॥

---

१ ए °दनौ मां°. २ सी °ह् ध°. ३ सी °निकापि. ४ ए °ति। प्राणि°. ५ सी °निकी. ६ बी हे भक्त. ७ सी °न रहि°. ८ बी °क्तस्य दी°. ९ बी °दनक्या भो°. १० ए बी °तानौज°. ११ बी °जस्को भ°. १२ ए सी °पु कि°. १३ ए °जसस्का°. १४ सी °ङ्गे चास्यमा°. १५ बी ममोज°. १६ ए °जस्कां घा°. १७ बी °ज्यः। भांक्त. १८ ए °निकिः। अ°.

क्ष्मां नावयज्ञिकीं पाकयज्ञिकीं च द्विजा यथा ।
अहृतेच्छा[1] आतरिकैर्नार्योगाहन्त निम्नगाम् ॥ ४३ ॥

४३. नार्यो निम्नगामगाहन्त व्यलोडयन् । कीदृश्यः सत्यः । आतरिकैरातरे नद्यादितीर्थे[1] नियुक्तैर्नरैरहृतेच्छा अयं नदीप्रवेशोवगाह्य[2] इत्यस्खलिताभिलाषाः । यथा द्विजा ऋत्विजोहृतेच्छाः सन्तो याग-क्रियाभिः क्ष्मामवगाहन्ते । किंभूताम् । नवयज्ञा नवैरन्नैः साध्या यागा[3] अस्यां वर्तन्ते तां नावयज्ञिकीं तथा पाकयज्ञः पाकेन हविर्विशेषेण साध्यो यज्ञोस्यां[4] तां पाकयज्ञिकीम् ॥

नावयज्ञिकीम् । पाकयज्ञिकीम् । अत्र "नवयज्ञ०" [७३] इत्यादिनेकण् ॥

आतरिकैः । अत्र "तत्र०" [७४] इत्यादिनेकण् ॥

स्मरायुधागारिकाणां वारिघातैः स्मरायुधैः ।
युवानो मुमुहुस्तासां [2]सांध्यिकाशुचिका इव[3] ॥ ४४ ॥

४४. सांध्यिकाशुचिका इव यथा संध्यायामध्यायिनोशुचौ देशे[5][6]-ध्यायिनश्चाकालादेशाध्ययनोत्थेन विघ्नेन मुह्यन्ति तथा तासां स्त्रीणां वारिघातैः कृत्वा युवानो मुमुहुर्मूर्छिताः । यतः स्मरायुधैर्विशेष्यार्था-नुकूल्येनात्र स्मरायुधशब्देनोपचारात्स्मरायुधघाता उच्यन्ते । तेन कामशरप्रहारतुल्यैः । कीदृशीनाम् । स्मरायुधागारिकाणां स्मरस्या[7]-युधानि जलक्रीडास्तेषामगारं गृहं नदी तत्र नियुक्तानाम् । जलकेलि-

---

१ **बी** °च्छा या आ°. २ **बी सी** °सांधिक्याशु°. ३ **ए सी** °व । य°.

---

१ **ए** °तीर्थनि°. २ **बी सी** °शोनाव°. ३ **ए** यागो अ°. ४ **ए** °ज्ञोस्या तां. ५ **बी** देशोध्या°. ६ **ए** °शेध्ययि°. ७ **ए बी** सरायु°.

रूपमायुधं हि स्मर[1]स्यैतद्वृत्तमेव स्यात् । अन्योपि भटः शस्त्रागारनि-युक्ता[2]च्छस्त्रं गृहीत्वा शत्रून्प्रहरति ततश्च ते[3] मूर्छन्ति ॥

स्मरायुधागारिकाणाम् । अत्र "अगारान्तादिकः" [७५] इतीकः[4] ॥

अदेश[5] । आशुचिकाः ॥ अकाल । सांध्यिक[6] । इत्यत्र[7] "अदेश०" [७६] इत्यादिनेकण् ॥

किं[1] नु नै[2]कटि[3]कीवासीत्युदित्वा वार्क्षमूलिकी ।
सांस्थानि[4]की सतीर्थ्याम्भस्येकयाकृष्य चिक्षिपे ॥ ४५ ॥

४५. समानतीर्थे गुरौ वसति सतीर्थ्या सख्येकयाकृष्याम्भसि [8]चिक्षिपे जलक्रीडार्थं क्षिप्ता । कीदृक्सती । वृक्षमूले वसति वार्क्ष-मूलिकी तथा संस्थानेवयवरचनायां व्यवह[9]रत्याचरति सांस्थानिकी मयाम्भसि न प्रवेष्टव्यमित्य[10]वस्थानविशेषेण तिष्ठन्तीत्यर्थः । किं कृत्वा चिक्षिपे । उदित्वा । किमित्याह । किं[11] नु नैकटिकीवासि निकटे वसति नैकटिक्यारण्यक्या भिक्षुण्या ग्रामा[12]त्क्रोशे वस्तव्यमिति यस्याः शास्त्रितो वासः सैवमुच्यते । यथा सा भिक्षुणी काम[13]विकाररहित-त्वाज्जलकेलिं न करोति तथा त्वं किमिति न करोषीत्यर्थ इति[14] ॥

लौहप्रस्तारि[5]को गौसंस्थानिको वासि किं त्वि(न्वि)ति ।
प्र(प्रा)स्तारिक्या कयाप्यूचे दृशोवारि[6] क्षिपन्पतिः ॥ ४६ ॥

---

१ बी सी किं तु नै°. २ ए °कटकी°. ३ बी °टिकावा°. ४ ए °निकीं स°. ५ सी °को वा°. ६ बी °रि क्षप°.

---

१ सी °रसैन्याद्द°. २ सी °युक्तच्छ°. ३ सी तेन मू°. ४ बी °कः । आदे°. ५ ए बी °देशः । आ°. ६ बी °ध्यिक्ये तत्र. ७ ए इतत्र°. ८ ए चिक्षेप ज°. ९ ए °हति आरति सां°. १० ए °व वस्तव्य°. ११ बी सी किंतु नै°. १२ सी °माव°. १३ ए °मकेलिर°. १४ ए °ति । रिक्या विशाला°.

४६. प्रस्तारो नयनादीनां विस्तारस्तस्मिन्व्यवहरति तया[1] प्रास्तारिक्या विशालाक्ष्येत्यर्थः[2] । कयापि पतिरूचे । कीदृक्सन् । दृशोर्विस्तीर्णत्वेन वारि क्षिपन् । कथमूच[3] इत्याह । त्वं किं नु लोहप्रस्तारे लोहहट्टे व्यवहरति लौहप्रस्तारिकोसि । लोहवणिग् हि स्थूलक्रयार्णत्वा[4]ल्लोहं यत्र तत्र क्षिपन्स्थूलहस्त एव स्यात् । किं वा गोसंस्थाने[5] व्यवहरति गौसंस्थानिको गवयोसि । स ह्यकिंचिज्ज्ञ एव स्यादिति ॥

कापि वांशकठिनिकी वा[1]रि[2]हत्याधिका प्रियात्[3] ।
द्वैचन्द्रायणिकी चान्द्रायणिक्या इव वाभवत् ॥ ४७ ॥

४७. वाशब्दः पूर्ववाक्यार्थापेक्षया समुच्चये कापीत्यत्र योज्यः । कापि च वंशकठिने वंशस्य कठिने[6] तापसभाजने पीठे[7] वा व्यवहरति वांशकठिनिकी वरुटी वारिहत्या जलाघातेन कृत्वा प्रियात्[8]सकाशादधिकाभवत् । यथा चान्द्रायणिक्याश्चान्द्रायणं तपोभेदं चरन्त्याः सकाशाद्द्वै[9]चन्द्रायणिकी द्वे चन्द्रायणे[10] चरन्ती ह्यधिका स्यात्[11] । चन्द्रायणं हि तपो द्वेधा । तत्रैकं शुक्लपक्ष आरभ्यते द्वितीयं तु कृष्णपक्षे । द्वयमप्येतन्मासप्रमाणम् । तत्राद्ये शुक्लप्रतिपद आरभ्य पूर्णिमां यावदेकैकं[12]कवलवृद्धिर्यावत्पूर्णिमायां[13] पञ्चदश कवला[14]स्तत एकैकं[15]कवल[16]हानिर्यावदमावास्यायामेकः कवलः । द्वितीये तु चन्द्रायणे कृष्णप्रतिपद

---

१ **बी** वांचिह°. २ **सी** 'रिसत्या°. ३ **ए** °त् । द्वैच°.

---

१ **सी** °या प्रस्ता°. २ **बी** °लाक्षेत्य°. ३ **ए** °मूचेत्या°. ४ **बी** °णकत्वा°. ५ **सी** °स्थानो ग°. ६ **ए** °ठिनता°. ७ **बी** पीठो व्य°. ८ **बी सी** °यासका°. ९ **बी** °की द्वे च°. १० **बी** °णे भोजने पीठो वा च°. ११ **सी** °त् । चान्द्रा°. १२ **ए** °कव°. १३ **बी** °माया प°. १४ **बी** °कला तत ए°. १५ **ए** °कव°. १६ **सी** °लवृद्धौ.

आरभ्यामावास्यां यावदेकैककवलहानिर्यावदमावास्यायामेककवलस्ततः[1] प्रतिपद्यप्येकः कवलस्तत एकैककवलवृद्धौ[2] पूर्णिमायां पञ्चदश कवला इति श्रीजैनाः स्मार्ताश्च ॥

हारं द्विशौर्पिकं न्यस्यन्ब्रुडन्तीं[1] कोप्यधात्प्रियाम् ।
गौदानिकं गौदानिको न्वादित्यव्रतिकि[2]प्रभः[3] ॥ ४८ ॥

४८. कोपि भर्ता ब्रुडन्तीं प्रिया[3]मधाद्धारेणाधारयत् । कीदृक्सन् । द्विशौर्पिकं नु द्वाभ्यां शूर्पाभ्यां क्रीतं द्विशूर्पम् । अत्र "शूर्पाद्वाञ्" [६. ४. १३७] इत्यञ् । "अनाम्न्यद्विः[4] लुप्" [६. ४. १४१] इति लुप् । द्विशूर्पेण क्रीतं द्विशौर्पिकं नु रज्ज्वादिकमिव[5] प्रेमातिरेकाद्रज्ज्वाद्यवगणनयेत्यर्थः । हारं न्यस्यन्प्रियाया आधारार्थं जले क्षिपन् । जले हि[6] ब्रुडल्लघुत्वात्तन्तुनापि संधार्यते । यथा गौदानिको वेदपाठविषयायां यथोक्तायां ब्रह्मचर्यसंधायां[7] संपूर्णायामपि यावद्द्विजेभ्यो गोदानं न करोति तावद्ब्रह्मचर्यं चर्यमिति यच्छ्रुत्युक्तं ब्रह्मचर्यं तद्गोदानमुच्यते । तच्चरन्नरो गौदानिकं याव[8]द्गवां दानं द्विजेभ्यो न करोमि तावद्ब्रह्मचर्यमितिप्रकारं गोदानस्य ब्रह्मचर्यं दधाति । कीदृक्सन् । आदित्यव्रतानामृचां ब्रह्मचर्यमादित्यव्रतिकम् । आदित्यव्रतसंज्ञा हि ऋचो ब्रह्मचर्येणाधीयन्ते तदस्या[9]स्तीत्यादित्यव्रतिकी तेन प्रभा साम्यं यस्य स तथा ॥

नैकटिकी । वार्क्षमूलिकी । इत्यत्र "निकट०" [७७] इत्यादिनेकण् ॥

---

१ **ए बी** °डन्ती को°. २ **ए** °तिकिं पुनः । को°. ३ **बी** °प्रभाः । को°.

---

१ **बी** °मेकः क°. २ **ए** °कव°. ३ **ए** °यामेधा°. ४ **ए** °नाम्नाद्विः°. ५ **ए सी** °व प्रेमातिरेकाद्रज्ज्वादिकमिव प्रे°. ६ **बी** हि ब्रुड°. ७ **बी सी** यां पू°. ८ **बी** °द्गवीदा°. ९ **ए** °स्तीने आदि°.

सतीर्थ्या । इति "सतीर्थ्यः" [७८] इति निपात्यम् ॥

प्रास्तारिक्या[1] । सांस्थानिकी । तदन्तं[2] । लौहप्रस्तारिकः[3] । गौसंस्थानिकः[4] । वांशकठिनिकी । इत्यत्र "प्रस्तार०" [७९] इत्यादिनेकण् ॥

द्वैचन्द्रायणिकी[5] । इत्यत्र "संख्यादेः०" [८०] इत्यादिना संख्यापूर्वाया अपि वक्ष्यमाणः प्रत्ययः ॥ अलुच[6] इति किम् । द्विशौर्पिकम् । पुनरपि[7] "शूर्पाद्वाञ्" [६. ४. १३७] इत्यञ् न स्यात् ॥

गौदानिकम्[8] । आदित्यव्रतिकि । इत्यत्र "गोदान०" [८१] इत्यादिनेकण् ॥

चान्द्रायणिक्याः । गौदानिकः । इत्यत्र "चन्द्रा०" [८२] इत्यादिनेकण् ॥

देवव्रती महाव्रत्यष्टाचत्वारिंशको नु किम् ।
चातुर्मासी नु वेत्युक्त्वा तटस्थोद्धिर्हतोन्यया ॥ ४९ ॥

४९. तटस्थो नदीतीरस्थः प्रियोन्ययाद्भिर्हतः । किं कृत्वा । उक्त्वा । किमित्याह । हे प्रिय किं देवव्रतमाजन्म ब्रह्मचर्यं तथा "यमा[9] एव देशकालसमयानवच्छिन्ना महाव्रतम्" इति[10] पतञ्जलिसूत्रम् । तथा प्रतिवेदं द्वादश वर्षाणि ब्रह्मचर्यक्रियाविधिरित्यष्टाचत्वारिंशद्वर्षसहितं व्रतमष्टाचत्वारिंशत्तच्च[11] तथा चतुर्षु मासेषु भवानि "यज्ञे ञ्यः" [६. ३. १३४] इति[12] ञ्ये चातुर्मास्यानि[13] नाम यज्ञास्तत्सहचरितानि चातुर्मास्यानि । तानि च[14] चरन्निव किं न्वसि । देवव्रत्यादयो हि

---

१ **ए** °रिक्याः । संस्थानिकां । त°. **सी** °रिक्याः । सांस्थानिक्यां । त°. २ **बी सी** °न्त । लोह°. ३ **बी** °हप्रास्तारिक्या सांस्थानिकी । तदन्त । लौहप्रस्तारिकः । गौ°. ४ **ए** °कः । वाश°. ५ **बी** द्वैचान्द्रा°. ६ **ए** °लुब इ°. ७ **बी** °पि सूर्पा°. ८ **सी** °निकी । आ°. ९ **बी** °मा य ए°. १० **बी** °ति पात°. ११ **सी** °शच. १२ **बी** °ति ञे चतु°. १३ **ए** °स्यादि ना°. १४ **ए** च वदन्निव किमन्व°.

महाव्रतस्थत्वेन कामविकारहेतुं जलकेलिं न कुर्वन्ति । त्वमप्यकुर्वन्निकमेवं व्रतीत्यर्थ इति ॥

किं* नु चातुर्मासिकै[1]षाष्टाचत्वारिंश्येष[2] किं नु वा ।
मिथः[3]प्राप्त्यै पयःकेल्यां तर्क्येते[4] स्मेति कावपि ॥ ५० ॥

५०. कावपि दम्पती पयःकेल्यां जलक्रीडायामपि लोकैस्तर्क्येते स्म । कथमित्याह । एषा प्रत्यक्षा तरुणी किं नु चातुर्मासिका चातुर्मास्यव्रतचारिणी । वा[1] तथैष युवा किं न्वष्टाचत्वारिंश्य[2]ष्टाचत्वारिंशद्व्रतचारी किमर्थं मिथः[3]प्राप्त्यै भवान्तरेऽप्यन्योन्यं संबन्धायेति । चातुर्मासिकाष्टाचत्वारिंशिनौ[4] व्रतिनौ यथा स्नानार्थं नदीजले निमग्नौ जलप्र[5]हाररहितौ च स्यातां तथा कावपि जले निमग्नौ प्रेमकलहादिनाम्बुप्रहाररहितौ चाभूतामित्येवं वितर्कः ॥

देवव्रती । महाव्रती । अत्र "देव०" [८३] इत्यादिना डिन् ॥

अष्टाचत्वारिंशकः । [6]अष्टाचत्वारिंशी । इत्यत्र "डकश्च०" [८४] इत्यादिना डको डिन् च ॥

[7]चातुर्मासिका । चातुर्मासी । इत्यत्र "चातुर्मास्यं०" [८५] इत्यादिना इकडिमौ यलोपश्च ॥

---

* एषा चातुर्मासिकाष्टाचत्वारिंश्येष किं नु वा । इति छन्दोभङ्गाभावाय पठितुं युक्तमिति भाति ।

---

१ **ए** °सिकैः षा°. २ **सी** किं युवा. ३ **सी** °प्राप्तौ प°. ४ **बी** सर्कैत स्मे°.

---

१ **सी** वा व्रत्येष. २ **सी** °श्यष्टच°. ३ **सी** °प्राप्तौ भ°. ४ **ए** °रिंशनो भ°. ५ **ए** °हासहितौ स्या°. ६ **सी** अष्टच°. ७ **ए** °सिकः । चा°.

नदी यौजनिकी[1] क्रौशा[2]द्यौजनाच्च शतिक्यसौ ।
आत्मतुल्यत[3]येवोत्का सैन्यान्सस्वञ्ज ऊर्मिभि[4]ः ॥ ५१ ॥

५१. यौजनिकी तीर्थत्वादनेकपद्माद्यद्भुतवस्तुनिधित्वाच्च योजनादभिमुखगमनमर्हन्ती तथा क्रौशा[1]द्यौजनाच्च शतिकी क्रोशशताद्योजनशताच्चाभिगमनमर्हन्ती नदी सैन्यानूर्मिभिः सस्वञ्जे । उत्प्रेक्ष्यते[2] । आत्मतुल्यतया स्वसादृश्येनोत्केवोत्कण्ठि[3]तेव । नद्या सह तुल्यता च सैन्यानां[4] यौजनिकीत्यादिनदीविशेषणानां लिङ्गव्यत्यये[5] सैन्यानामपि विशेषणत्वेन शब्दसाम्यात् । तथा[6] हि योजनं क्रोशशतं योजनशतं च दिग्विजयाद्यर्थं यान्ति ये तान्यौ[7]जनिकान्[8] क्रौशशतिकान्[9]यौजनशतिकान् । या हि रूपादिगुणोत्कर्षेण यौजनिक्यादि[10]ः स्यात्सानुरूपं पतिं[11] भुजाभिराश्लिष्यति ॥

क्रौशशतिकी[12] । यौजनशतिकी । यौजनिकी । इत्यत्र "क्रोश०" [८६] इत्यादिना–इकण् ॥

आत्मतुल्यतयेतिज्ञापितेषु । क्रौशशतिकान् । यौजनशतिकान् । यौजनिकान् । इत्येतेषु "तद्यात्येभ्यः" [८७] इतीकण् ॥

श्रान्ताञ्जहसुरश्रान्तास्ते पान्थाः पथिकानिव ।
युवानो[5] वारिपथिका जाङ्गलपथिकानिव ॥ ५२ ॥

५२. अश्रान्ता जलकेल्याखिन्नास्ते जले क्रीडन्तो युवानस्तरुणा-

१ ए सी °की क्रोशा°. २ सी °शाद्योज°. ३ ए °तयोर्थोत्का. ४ ए °भिः । योज°. ५ ए °वानौ वा°.

१ ए °शाद्योज°. २ ए °त्प्रेक्षते. ३ ए °त्कते°. ४ ए °नां योज°. ५ बी °त्ययसै°. ६ सी °था यो°. ७ ए तान्योज°. ८ ए °न् क्रोश°. ९ ए °कान्योज°. १० ए °निकादिः. ११ बी °तिं भुंजा°. १२ बी °की । योज°.

स्तरुण्यश्च श्रान्तान् यूनो जहसुः । यथा पान्था नित्यं पन्थानं यान्तो नरा नित्यगमनेन गमनाभ्यासादश्रान्ताः सन्तः पथिकान्पन्थानं [1]यातो नरान्कादाचित्कगमनेनाभ्यासाभावाच्छ्रान्तान्[2]सतो हसन्ति । यथा वा वारिपथिका वारिपथः सजलमार्गस्तेनानीता [3]यान्तो वा नराः शीतलजलपानादिनाश्रान्ताः सन्तो जाङ्गलपथि[4]कान्मरुमार्गेणानीतान्यातो वा नरांस्तृष्णादिनातिश्रान्तान्सतो हसन्ति ॥

प्रावृषीव तदोद्रोधोभूत्स्थालपथिकं पयः ।
तदाजपथिकं शाङ्कुपथिकं च विगाहनात् ॥ ५३ ॥

५३. तदा जलकेलिकाले तत्पयो नदीजलं विगाहनाद्दम्पतिभिर्विलोडनादुद्रोधो रोधसस्तटादुत्क्रान्तमभूत् । की[5]दृक्सत् । स्थालपथिकं स्थलपथं यात्तथा[6]जपथि[7]कं यत्राजाः संचरन्ति तेजपथा दण्डकास्तै[8]र्यात्तथा शङ्कुपथैः कीलकगर्ताभिर्यात् । यथा प्रावृषि स्थालपथिकमाजपथिकं शाङ्कुपथिकं च स्थलपथेना[9]जपथेन शङ्कुपथेन चानीतं नदीज[10]लमतिबाहुल्यादुद्रोधः स्यात् ॥

पुरे[1]वौत्तरपथिकी कान्तारपथिकी च सा ।
मज्जज्जम्पतिभिस्तै[2]स्तैर्नदी रेजे प्रतीपगा ॥ ५४ ॥

५४. सा नदी रेजे । कीदृक्सती । तैस्तैरनेकै[11]र्मज्जज्जम्पतिभिः[12] स्नाद्भिर्दम्पतिभिः कृत्वा [13]प्रतीपगा जम्पतीनामतिबाहुल्येन सेतुबन्धेन

---

१ **ए** °की च. २ **ए बी** °स्तैर्न°.

---

१ **ए** यान्तो न°. २ **ए** °न्सन्तो ह°. ३ **सी** यातो वा. ४ **ए** °कान्गरु°. ५ **सी** °दृक् स्था° ६ **ए** °जजप°. ७ **ए बी** °कं यात्रा°. ८ **सी** °कास्थैर्या°. ९ **ए** °जलप°. १० **बी** °लश्रा°. ११ **ए** °कैमज्ज°. १२ **बी** °भिः स्नद्भि°. १३ **बी** प्रदीप°.

वा नु[1] श्रो(स्रो?)तोमार्गस्य रुद्धत्वात्पश्चान्मुखं वहन्त्यत एव पुरेव[2] यथा जलकेलेः पूर्वमौत्तरपथिकी कान्तारपथिकी चोत्तरपथेनोत्तर[3]-दिग्मार्गेण कान्तारपथेन चारण्यमध्यवाहित्वादरण्यस्थमार्गेण वा नीता । तथा जलकेलिकालेप्युत्तरपथेन कान्तारपथेन च[4] यात्यौत्तरपथिकी कान्तारपथिकी च ॥

पथिकान् । इत्यत्र "पथ इकट्" [८८] इतीकट् ॥

पान्थाः । अत्र[5] "नित्यं०" [८९] इत्यादिना णः पन्थादेश[6]श्च ॥

शाङ्कुपथिकम्[7] । औत्तरपथिकी । कान्तारपथिकी । आजपथिकम् । वारिपथिकाः । स्थालपथिकम् । जाङ्गलपथिकान् । इत्यत्र "शङ्कूत्तर०" [९०] इत्यादिनेकण् ॥

कान्तेनोत्खातपद्मेषु काप्याच्छिद्याब्जमाददे ।
मधुके मरिचे स्थालपथे शुल्कं नु शौल्किकः ॥ ५५ ॥

५५. कापि कान्तेनोत्खातपद्मेषु मध्यादब्जमाच्छिद्य नर्मणो[8]-द्यालयाददे । यथा स्थालपथे स्थलपथे[9]नाहृते[10] मधुके मधुयष्टिजातौ मरिचे मरिचजातौ च मध्याच्छुल्कं शुल्कशालादेयं भागं शौल्किकः शुल्के नियुक्तो गृह्णाति ॥

स्थालपथे मधुके मरिचे । अत्र "स्थलादेर्०" [९१] इत्यादिनाण् ॥

तौरायणिकपारायणिकानां तद्भुवामपि ।
आसन्सांशयिकान्यब्जवने[1] वक्त्राणि[2] सुभ्रुवाम् ॥ ५६ ॥

---

१ बी °ब्जघने. २ ए °णि सुभ्रू°.

---

१ सी नु श्रुतो°. २ ए °व जथा. ३ ए °रमार्गे°. ४ सी च उत्त°. ५ ए °त्र मिल्या°. ६ ए °देश्च. ७ सी °म् । उत्त°. ८ सी °णोमाल्या°. ९ बी °लपंथे°. १० बी सी °नाहते.

५६. अब्जवने[1] पद्मखण्डमध्ये सुभ्रुवां वक्त्राणि सांशयिकानि किमेतानि वक्त्राण्यब्जानि[2] वेति संशयं प्राप्तान्यासन्। केषाम्। तुरायणं नाम यज्ञस्तं यजन्ते तौरायणिकाः[3] पारायणं वेदग्रन्थमधीयते[4] पारायणिका[5] द्वन्द्वे[6] तेषां मुनीनाम्[7]। कीदृशाम्। सा नदी भूः स्थानं येषां तेषामपि नदीतटवासित्वेन परिचिताब्जानामपीत्यर्थः। एतेन सुभ्रूवक्त्राणामब्जवनस्य च मिथोतिसादृश्यमुक्तम्॥

तौरायणिक। पारायणिकानाम्। अत्र "तुरायण०" [९२] इत्यादिनेकण्॥

सांशयिकानि। इत्यत्र "संशयं०" [९३] इत्यादिना-इकण्[9]॥

यौगिकी पद्ममालां काप्यक्षिपद्दयितोरसि[1]।
सांग्रामिकं कार्मुकं नु योग्यं कुसुमधन्वनः॥ ५७॥

५७. यो(यौ)गिकी[10] प्रौढात्वेन योगायालिङ्गनाय[11] शक्ता कापि दयितोरसि प्रियकण्ठे पद्ममालामक्षिपत्[12]। किंभूताम्। आरोपिताकृष्ट[13]चापाकारत्वाद्धृदयसंक्षोभकारित्वाच्च कुसुमधन्वनः पुष्पचापस्य कार्मुकं[14] नु। किंभूतम्। सांग्रामिकं[15] संग्रामाय शक्तमत एव योगाय शक्तं योग्यं ग्रहीतुमुचितमित्यर्थः[16]॥

यौगिकी। सांग्रामिकम्। अत्र "तस्मै[17] योग०" [९४] इत्यादिनेकण्॥

योग्यम्। कार्मुकम्। अत्र "योग०" [९५] इत्यादिना योकञौ॥

---

१ बी सी °सि। संग्रा°.

---

१ सी °ने वनषण्ड°. २ बी °क्त्रान्यब्जा°. ३ बी °णिका पा°. ४ सी °मते. ५ बी °णिके द्व°. ६ सी द्वन्द्वं ते°. ७ सी °म्। सा. ८ ए °यण्य इ°. ९ सी °ण्। योगि°. १० ए °की प्रोढा°. ११ सी °य सक्ता. १२ बी °ला-नक्षि°. १३ ए °कृष्णचा°. १४ ए कार्मकं. १५ सी °कं अत्र. १६ बी °न्नितुमि°. १७. ए बी तसौ यो°.

***यथाग्निष्टोमिकीमाग्निष्टोमिकै[1]र्दक्षिणां धनैः[2] ।**
नैशाश्लेषै[3]स्तथा नक्रत्रस्तान्यादान्मुदं प्रिये ॥ ५८ ॥

५८. अन्या[1] नक्रत्रस्ता सती नैशाश्लेषैर्निशायां देयैः कार्यैर्वालिङ्गनैः[2] कृत्वा प्रिये मुदमदात्[3] । यथा यजमान[4] आग्निष्टोमिकैरग्निष्टोमे[5] देयैर्धनैः कृत्वाग्निष्टोमिकीमग्निष्टोमसंबन्धिनीं[6] दक्षिणां ददाति[7] ॥

आग्निष्टोमिकीम्[8] । अत्र "यज्ञानां०" [९६] इत्यादिनेकण् ॥

आग्निष्टोमिकैः । अत्र "तेषु देये" [९७] इतीकण्[9] ॥

नैश । इत्यत्र "काले०" [९८] इत्यादिना[10] भवेर्थे इवाण् ॥

प्रियहस्त्याम्बुजोत्तंसैर्[4]नैत्यवैयुष्टवद्बभौ ।
याथाकथाचैरप्यन्याकार्णवेष्टकि[5]कानना ॥ ५९ ॥

५९. अन्या स्त्री प्रियहस्त्याः प्रियस्य[11] हस्तेन[12] देयाः कार्या वा येम्बुजोत्तंसाः पद्मशिरःशेखरास्तैः कृत्वा बभौ । कीदृशी[13] । कर्णवेष्टकाभ्यां न शोभतेकार्णवेष्टकि[14]कमाननं[15] यस्याः सापि । अपिरत्रापि योज्यः । कुण्डलरहितापि । किंभूतैः । याथाकथाचैरपि[16] यथाकथाचशब्दोव्ययसमुदायोनादरेणेत्यर्थे वर्तते । अस्या एते तुच्छमित्य-

* **सी** पुस्तके श्लोकोयं टीका च नास्ति.

१ **ए** °कैदक्षि°. २ **बी** °नैः । नेशा°. ३ **ए** °श्लेषितथा. ४ **बी** °सैनैत्य°. ५ **बी** °त्रेष्टिकि°.

१ **ए** अध्या न°. २ **ए** °यैंवालङ्ग°. ३ **बी** °दमुदा°. ४ **ए** यज्ञमा°. ५ **बी** °मिदे°. ६ **ए** °बन्धेन द°. ७ **बी** °ति । अग्नि°. ८ **बी** °की । अ°. ९ **ए** °ण् । निश. १० **ए** °ना भावे° ११ **ए** °यसा ह°. १२ **बी** °स्य हास्ते°. १३ **ए** °दृशीं । क°. १४ **ए सी** °तेकर्ण°. १५ **बी** °किकामा°. १६ **सी** °थाच°.

भिप्रायेणानादरेण[1] शिरसि देयैरपि[2] कार्यैरपि वा विशिष्टरचनारहितैरपी-त्यर्थः । परं नैत्यवैयुष्टवन्नित्यं सदा व्युष्टे प्रभाते च देयैरिव[3] कार्यैरिव वा नैत्यवैयुष्टा ह्यवतंसाः प्रायो विक्रयार्थत्वेनादरेण दीयन्ते[5] क्रियन्ते चेत्यादरेण देयैरिव कार्यैरिव वा विशिष्टरचनैरिवेत्यर्थः । प्रिय-हस्त्यत्वेन सर्वसपत्नीषु[6] मध्ये सौभाग्यातिशयस्य[7] ख्यापकत्वात्तेषाम् । यद्वान्या स्त्री कार्णवेष्टकिकाननापि कुण्डलशोभमानवक्त्रापि सती प्रिय-हस्त्याम्बुजोत्तंसैरेव[9] बभौ । किंभूतैः[10] । याथाकथाचैरपि कार्णवेष्टकिका-ननश्रीविशेषालोकनाक्षिप्तचित्तत्वात्प्रियस्य[11] विसंस्थुलैरचनैरपि[12] नैत्यवै-युष्टवद्विशिष्टरचनैरिव कुण्डलयोः सतोरपि प्रियहस्त्यत्वादम्बुजोत्तंसैरे-[13]वाभादित्यर्थः ॥

वैयुष्ट । नैत्य । इत्यत्र "व्युष्टादिष्वण्" [९९] इत्यण् ॥

याथाकथाचैः । अत्र "यथा०" [१००] इत्यादिना णः ॥

हस्त्य[14] । इत्यत्र "तेन०" [१०१] इत्यादिना यः ॥

कार्णवेष्टकिक । इत्यत्र "शोभमाने" [१०२] इतीकण् ॥ असमर्थनञ्स-[15]मासोप्यस्मिन्विषये भवति । अकार्णवेष्टकिक[16] ॥

एका वेष्यं पतिं स्नानस्पष्टवेश्यानखव्रणम् ।
अकर्मण्येति जल्पन्ती कर्मण्या[1] कमलैरहन् ॥ ६० ॥

---

१ बी ॰ण्या कामलेर॰.

---

१ बी ॰येना॰. २ ए ॰पि वा. ३ ए ॰व वा. ४ ए ॰त्यत्रैयु॰. ५ सी ॰न्ते चैत्या॰. ६ बी ॰र्वप॰. ७ सी ॰त्नीम॰. ८ बी ॰कानाना॰. ९ सी ॰व संब॰. १० बी ॰तैः । यथा॰. ११ सी ॰विषयालो॰. १२ सी ॰लस्यवच॰. १३ ए सी प्रिहय॰. १४ ए सी हस्त । इ॰. १५ ए ॰नञ्समा॰. १६ ए ॰किकाः । ए॰. सी किका । ए॰.

६०. कर्मण्या पतिव्रतानुरूपेण कर्मणा शोभमानैका स्त्री पतिं कमलैरहन्। कीदृशम्। वेष्यं वेषेण स्वच्छत्वातिसूक्ष्मत्वादिगुणोपेतेन नेपथ्येन शोभमानम्। यद्वा। मण्डनादीनां जलेनोत्पुंसितत्वाद्वस्त्राणां च क्लिन्नत्वाद्वेषेणाशोभमानम्। कीदृक्सती। रे अकर्मण्य दुराचारेति जल्पन्ती। यतः। किंभूतम्। स्नानेन स्पष्टानि वेश्याया नखव्रणानि नखक्षतानि यस्य तम्॥

कर्मण्या। वेष्यम्। अत्र "कर्म०" [१०३] इत्यादिना यः॥ पूर्ववन्नञ्समासः स्यात्। अकर्मण्य। अवेष्यम्। केचिद्वेषस्थाने वेशं पठन्ति। वेशो वेश्यागृहं तेन शोभते वेश्या॥

मासिक्या सेवया मानो यः प्रसादश्च मासिकः।
तमाह्निक्याजयल्लेभेम्भःकेल्या कोपि सुभ्रुवः॥ ६१॥

६१. सुभ्रुवो यो मानोहंकारोतितीव्रत्वान्मासिक्या मासेन कार्यया मासेन सुकरया वा सेवया कृत्वा मासिको मासेन परिजेतुमुपशमयितुं शक्यस्तथा सुभ्रुवो यः प्रसादश्च प्रसन्नता च मासिक्या सेवया कृत्वा मासिको मासेन लभ्यस्तं मानं कोपि काम्याह्निक्याह्ना निर्वृत्तयाम्भःकेल्या कृत्वाजयदुपाशमयत्। तथा तं प्रसादमाह्निक्याम्भःकेल्या लेभे प्राप॥

मासिकः। मासिक्या। इत्यत्र "कालात्परि०" [१०४] इत्यादिनेकण्॥

बी °ह्निक्यजियल्लेभेभः के°. २ सी °यभे°.

१ बी सी °तात्वरू°. २ सी °मानं यद्वा. ३ ए पति क°. ४ बी स्वस्थत्वातिशूक्ष्म°. ५ ए °लेत्पुं°. ६ ए °त्वाद्वेषित्वाद्वे°. ७ ए °स्य ताम्. ८ बी वेष्टयम्. सी °वे चि°. ९ ए °नोकारोती°. १० बी °पासम°. सी °पासम°. ११ सी °ल्या भेदेन प्रा°. १२ सी °सिका। इ°.

आह्निक्या । इत्यत्र "निर्वृत्ते" [१०५] इतीकण् ॥

सख्यो[1] दास्यश्च मासिक्यो[2] मासिकीर्भूतभाविनीः[3] ।
क्रीडा निनिन्दुः कस्याश्चित्पयसां क्रीडया तया ॥ ६२ ॥

६२. कस्याश्चित्कामिन्याः[1] सख्यो दास्यश्च तयानेककौतुकाद्याधारत्वेन प्रसिद्धया पयसां क्रीडया कृत्वा क्रीडा अन्याः केलीर्निनिन्दुः । कीदृश्यः[2] सख्यः । मासिक्यो मासायाधीष्टा मासं यावन्मत्पार्श्वे स्थातव्यमित्यादिप्रकारैः[3] सत्कृत्य[4] व्यापारिताः । दास्यश्च मासाय भृता मासं यावत्कर्मणे क्रीता इत्यर्थः । किंदृशीः । मासिकीर्भूतभाविनीर्मासं[5][6] भूता भविष्यन्तीश्च[7] यकाभिः स्वसत्तया मासो व्याप्तो व्याप्स्यते वा ता अपि क्रीडा[8] अस्याः क्रीडातो हीना एवेत्यनिन्दन्नित्यर्थः। मासिकीरित्यत्रेकण् अन्यस्मिन्नर्थे संभवतीति तद्व्यवच्छेदाय[9] भूतभाविनीरित्युक्तम् ॥

मासिकीः । अत्र "तं भाविभूते" [१०६] इतीकण् ॥

मासिक्यो दास्यः सख्यः । इत्यत्र "तस्मै०" [१०७] इत्यादिनेकण् ॥

षण्मासिकैर्मित्रभृत्यैः सखीदासीभिरप्यर्थं[4] ।
षाण्मास्याभिर्जम्पतीनां[5] प्रतीषिरे जलच्छटाः ॥ ६३ ॥

६३. जम्पतीनां षण्मासिकैर्मित्रभृत्यैः षड्भिर्मासैर्निर्वृत्तैः[10] षण्मा-

---

१ ए सख्या दा°. २ बी °सिक्यौमासि°. ३ ए सी °विनी । क्री°. ४ बी °र्थ । षण्मा°. ५ ए °जंपती°. बी °जपन्तीनां.

---

१ बी °मिन्या स°. २ ए °दृशाः स°. ३ बी सख्योः मासिक्या मासा°. ४ सी °त्कृत व्या°. ५ सी मासं. ६ ए °नी मांसं. बी °नी मासं. ७ बी °न्ती अय°. ८ सी °डातो. ९ सी तद्युक्तच्छे°. १० °र्निवृत्तैः.

सान्भाविभिर्भूतैर्वा[1]। यद्वा षण्मासेभ्योधीष्टैर्मित्रैः षण्मासेभ्योभृतैर्भृत्यैश्च[2]। अथ तथा षाण्मास्याभिः[3] सखीदासीभिरपि परस्परं जलच्छटा जला[4]-घाताः प्रतीषिरे वाञ्छिताः । पतिसत्कैर्मित्रैर्जायासत्काभिः सखीभिः सह पतिसत्कैर्भृत्यैर्जायासत्काभिर्दासीभिश्च सहान्योन्यं जलकेलिश्चक्र इत्यर्थः । एतेन परिवारस्यापि जलकेलिरुक्ता ॥

समीनमीनत्रस्तान्या षण्मास्यमृगलोलदृक् ।
द्विसमीना द्व्यहीना नु लिल्ये संकुच्य भर्तरि ॥ ६४ ॥

६४. अन्या षण्मासान्भूतः षण्मास्यः शिशुर्यो[5][6] मृगस्तद्वल्लोलदृक्-चसती संकुच्य भर्तरि लिल्ये लीना । द्विसमीना[7] द्व्यहीना नु । द्वाभ्यां समाभ्यामहोभ्यां वा निर्वृत्ता[8] द्वे समे अहनी[9] वा भूता भाविनी वा नु बालिकेव[10] । किमित्येवं लिल्य इत्याह । यतः समया वर्षेण निर्वृत्तः[11] समां भूतो भावी वा समीनो यो[12] मीनो मत्स्यस्तस्मात्त्रस्ता ॥

द्वैयह्निकं त्रिरात्रीणं च द्विसंवत्सरीणवत् ।
व्यस्मरत्कापि पत्यागोऽद्भिर्द्वैसमिकशीधुवत्[1] ॥ ६५ ॥

६५. द्विसंवत्सरीणवद्यथा काचिद्द्वाभ्यां संवत्सराभ्यां निर्वृत्तं[13] तौ भूतं वागश्चिरकालीनत्वाद्विस्मरति तथा काचित्पत्यागो भर्त्र[14]पराध-मद्भिर्जलके[15]लि[16]रसातिरेकेणेत्यर्थः । व्यस्मरत् । किंभूतम् । द्वाभ्याम-

१ सी °कसीधु°.

१ बी °विभूतै°. २ ए °भ्योभृत्यैर्भृ°. ३ ए सी °ण्मासाभिः. ४ सी °लाद्याः प्र°. ५ बी °शुयो मृ°. ६ ए °योग मृ°. ७ ए °नानु द्व्य°. बी °ना नु द्व्य°. ८ सी निवृत्ता. ९ सी अहिर्ना. १० बी °व । लिकि°. ११ बी सी निवृत्तः. १२ ए यो नीतो म°. १३ सी निवृत्तं. १४ ए भर्तेप°. १५ ए °केलीर°. १६ बी °लिसा°.

होभ्यां तिसृभी रात्रिभिश्च निर्वृत्तं[1] द्वे अहनी तिस्रो रात्रीर्वा भूतं वा द्वैयह्निकं त्रिरात्रीणं च । चोप्यर्थ उभयत्रापि योज्यः । नूतनमपीत्यर्थः । द्वैसमिके[2]शीधुवद्यथा द्वाभ्यां समाभ्यां निवृ(र्वृ)त्तैस्ते भूतैर्वा परिपूर्णनिष्पन्नैरित्यर्थः । शीधुभिर्मद्यैः कृत्वा[3]तिमत्तत्वात्पत्यागो विस्मरति ॥

द्विसांवत्सरिकी कापि भार्या प्रेम द्विवार्षिकम् ।
द्वैरात्रिकमिवात्याक्षीत्पत्यावन्यां जलैर्घ्नति[1] ॥ ६६ ॥

६६. स्पष्टः । किं तु द्विवार्षिकं चिरप्ररूढमपीत्यर्थः । द्वैरात्रिकमिवाप्ररूढमिव ॥

द्विवर्षीणां[2]स्त्रिवर्षांश्च पद्मकन्दान्ददत्यलम् ।
रेमे हंसैर्द्विवर्षै[3]र्द्विमास्यै[4]र्मास्यैश्च काचन ॥ ६७ ॥

६७. स्पष्टः । किं तु द्वौ वर्षौ द्वौ मासौ मासं च भूतैः[4] ॥

मीनान्मासीनषण्मास्या[5]नभि[6] षाण्मासिके बके ।
छन्नस्थे त्वद्वदेषोस्तीत्येकयोचे शठः पतिः ॥ ६८ ॥

६८. एकया शठः पतिरूचे । क सति । षाण्मासिके बके । किंभूते । मासीनषण्मास्यांश्च मासं षण्मासांश्च भूतान्मीनानभिलक्ष्यीकृत्य छन्नस्थे मीनभक्षणार्थं मायया छन्नं तिष्ठति । यथोचे तथाह । हे शठैष प्रत्यक्षो बकस्त्वद्वदस्ति यथा त्वं शठत्वान्मामीक्षसेन्यां च ध्यायसि तथैषो[13]प्यन्यदीक्षते[14]न्यच्च ध्यायतीत्यर्थ इति ॥

१ ए °लैघ्नति. २ बी द्विवार्षी°. ३ ए °र्षैद्विमा°. बी °र्षैद्विमास्यै°. ४ ए °स्यैश्च. ५ सी °षण्मांस्या°. ६ सी °भिषण्मा°.

१ बी सी निवृत्तं द्वे अहअ°. २ सी °कसीधु°. ३ सी °त्वासत्तथात्रियागो. ४ ए °त्वात्या°. ५ सी भूतौ । मी°. ६ सी °ति । षण्मा°. ७ बी °सिब°. ८ सी °सीनान् ष°. ९ ए सी °ण्मास्याश्च. १० ए °ण्मासंश्च. ११ बी °लक्षीकृ°. १२ सी °स्त्वदतस्ति. १३ ए °पोन्य°. १४ बी सी °ते मीनांश्च ध्या°.

मासिकं ब्रह्मचर्यं[1] ते मासिकब्रह्मचारिवत्।
किं षाण्मास्यार्भमुग्धेति तटस्थो जहसेन्यया ॥ ६९ ॥

६९. तटस्थः पतिरन्यया जहसे। कथमित्याह। रे षाण्मास्यार्भमुग्ध जलकेलिरसा[2]नभिज्ञतया षण्मासान्भूतो योर्भो बालकस्तद्वन्मूर्ख यत्त्वं जलकेलिं न करोषि तत्किं ते मासिकब्रह्मचारिवन्मासोस्य ब्रह्मचारिणो मासिको[3] यो ब्रह्मचारी तस्यैव[4] ब्रह्मचर्यमस्ति[5]। कीदृशम्। मासोस्य ब्रह्म[6]चर्यस्य मासिकमिति[7] ॥

षाण्मास्याभिः सखीदासीभिः[8]। षण्मासिकैर्मित्रभृत्यैः। अत्र "षण्मासाद्०" [१०८] इत्यादिना ण्येकौ[9] ॥ अवयसीति किम्। षण्मास्यमृगं[10] ॥

समीन। इत्यत्र "समाया ईनः" [१०९] इतीनः ॥

त्रिरात्रीणम्[11]। द्व्यहीना[12]। द्विसंवत्सरीण। द्विसमीना। इत्यत्र "रात्रि०" [११०] इत्यादिना वा-ईनः ॥ पक्ष इकण्। द्वैरात्रिकम्। द्वैयह्निकम्। द्विसांवत्सरिकी। द्वैसमिक[13] ॥

त्रिवर्षान्[14]। द्विवर्षीणान्। अत्र "वर्षादश्च वा" [१११] इति-अ-ईनश्च वा ॥ पक्षे। द्विवार्षिकम्। इकण् ॥

द्विवर्षैर्हंसैः। अत्र "प्राणिनि भूते" [११२] इति-अः ॥

द्विमास्यैर्हंसैः। अत्र "मासाद्०" [११३] इत्यादिना यः ॥

मासीन। मास्यैर्हंसैः। अत्र "ईनञ्च" [११४] इति-ईनञ् यश्च ॥

---

१ बी °र्यं त मा°.

---

१ बी °साभि°. २ ए °लवास्त°. ३ सी °को ब्र°. ४ बी तस्यैव. ५ सी °यस्य मासि°. ६ ए °ह्मचारस्य°. ७ बी °ति। षण्मा°. ८ बी °भिः। षाण्मा°. ९ सी °यवादिति. १० बी °ग। मी°. ११ ए °त्रीणां। द्य°. १२ सी °हीनाः। द्वि°. १३ सी °मिकः। त्रि°. १४ ए °न्। त्रिव°.

षण्मास्यान्मीनान्[1][2] । षाण्मास्याभे । षाण्मासिके बके । अत्र "षण्मासाद्०" [११५] इत्यादिना ययणिकणः ॥

मासिकम् । मासिक । इत्यत्र "सोस्य०" [११६] इत्यादिना-इकण् ॥

आभिषेचनिकैस्तोयैः क्रमैकागारिकैर्नदी ।
एवमानन्दयद्योषाश्चौडश्राद्धैरिवोत्सवैः ॥ ७० ॥

७०. नदी वर्णासा तोयैः कृत्वैवमुक्तरीत्या[3] योषा आनन्दयत् । यत आभिषेचनिकैरभिषेकप्रयोजनैस्तथा क्रमै[4] ऐकागारिकैश्चौरैः खेदोच्छेदकैः । यथा[5] चौडश्राद्धैश्चूडाप्रयोजनैः श्रद्धाप्रयोजनैश्चोत्सवै[6]र्मुण्डनोत्सवैः श्राद्धोत्सवैश्च[7] कृत्वा काचिद्योषा आनन्दयति ॥

आभिषेचनिकैः । अत्र "प्रयोजनम्" [११७] इतीकण्[8] ॥

ऐकागारिकैः । अत्र "एक०" [११८] इत्यादिनेकण् ॥

चौडश्राद्धैः । अत्र "चूडादिभ्योण्"[9] [११९] इत्यण्[10] ॥

दोर्वै[11]शाखैर्विगाह्याम्भः क्षुभ्यदाषाढिवीक्षिताः ।
कामोपस्थापनीयोत्थापनीयास्तास्तटीमयुः ॥ ७१ ॥

७१. ता नार्यस्तटीं नदीतीरमयुः । किं कृत्वा[11] । दोर्वैशाखैर्बाहुमन्थानकैः कृत्वाम्भो विगाह्य विलोड्य । कीदृश्यः सत्यः । स्नानेन शोभातिशयात्कामस्योपस्था[12]पनं निकटीकरणमुत्थापनं चोल्लासनं प्रयोजनमासां ताः कामोपस्थापनी[13]योत्थापनीया अत एव क्षुभ्यन्तो य आषाढिन आषाढो मुनिदण्डस्तद्व[14]न्तो मुनयस्तैरपि वीक्षिताः सकामं दृष्टाः ॥

१ बी °षान्सौड°. २ बी सी °शाषैर्वि°. ३ सी °षाढवी°.

१ बी षणमस्या°. २ ए °न् । पण्मा°. ३ बी °त्या येषा. ४ ए बी °म एका°. ५ सी °था खोड°. ६ बी °त्सवैर्मु°. ७ ए °वैः कृ°. ८ बी सी °ण् । एका°. ९ बी °दित्यादिभ्यो°. १० बी °ण् । दौर्वै°. ११ ए °त्वा । दौर्विशा°. बी °त्वा । दौर्वै°. १२ सी °स्थानं°. १३ बी °योस्थाप°. १४ ए °द्वदन्तो.

वैशाखैः । आषाढि । इत्यत्र "विशाखा०" [१२०] इत्यादिनाण् ॥

उत्थापनीयाः[1]। उपस्थापनीय[2]। इत्यत्र "उत्थापनादेरीयः"[3] [१२१] इतीयः[4] ॥

प्रियेच्छापूरणीयाः संवेशनीयास्ततोगमन् ।

वशाप्रपदनीयाश्वारोहणीयाः[1] स्वधाम[2] ताः ॥ ७२ ॥

७२. ततस्ता नार्यः स्वधाम स्वकीयं गृहमगमन् । कीदृश्यः सत्यः । संवेशनं सुरतं प्रयोजनमासां संवेशनीया अत एव प्रियेच्छापूरणीयाः प्रियाभिलाषपूरणप्रयोजना अत एव[5] च शीघ्रं जिगमिषया वशाभिर्हस्तिनीभिः प्रपदनं गमनमश्वस्यारोहणं[6] च प्रयोजनमासां ताः ॥

अहःसमापनीयोथ प्रतीचीमगमद्रविः ।

स्वर्ग्यैः काम्यैः स्तुतः स्वस्तिवाचनैः शान्तिवाचनैः ॥७३॥

७३. अथ रविः प्रतीचीं पश्चिमामगमत् । कीदृक् । अहःसमापनं दिनसमाप्तिः प्रयोजनं यस्य सोहःसमापनीयस्तथा स्वस्तिवाचनैः स्वस्तिवाचनप्रयोजनैर्[7]द्विजैः[8] स्तुतः । कैः कृत्वा । शान्तिवाचनैः शान्तिवाचनप्रयोजनैर्मन्त्रैः । किंभूतैः । उभै(भयै?)रपि । स्वर्ग्यैः स्वर्गप्रयोजनैः परलोकप्रयोजनैरित्यर्थः । तथा काम्यैः कामप्रयोजनैरिहलोकप्रयोजनैश्चेत्यर्थः ॥

संवेशनीयाः। अश्वारोहणीयाः[9]। वशाप्रपदनीया[10] । प्रियेच्छापूरणीयाः। अहःसमापनीयः। अत्र "विशिरुहि०"[11] [१२२] इत्यादिनेयः ॥

---

१ बी °णीया स्व°. २ ए °म तः । त°.

---

१ सी °नीया । उ°. २ बी उत्थाप°. ३ सी उपस्थाप°. ४ सी °तीय ॥ ७२ संवेशमापनीत्थ प्रतीची°. ५ बी °व शी°. ६ ए °नश्व°. ७ सी °नैरित्यर्थः. ८ बी °द्विजै स्तु°. ९ ए °याः । अश्वारोहणीयाः । व°. १० ए सी °नीयाः । प्रि°. ११ बी विशारु°.

स्वर्गादिः । स्वर्ग्यैः । काम्यैः । स्वस्तिवाचनादि । स्वस्तिवाचनैः । शान्तिवाचनैः । अत्र "स्वर्गा०" [१२३] इत्यादिना स्वर्गादिभ्यो यः स्वस्तिवाचनादिभ्य इकणो लुप् ॥

द्यौः सामयिकरागेण लतेवार्तवपल्लवैः ।
प्राशित्री तिमिरैः काल्यैरभवत्षट्पदैरिव ॥ ७४ ॥

७४. समयः कालः प्राप्तोस्य सामा(म)यिको यो रागः संध्यारागस्तेनोपलक्षिता द्यौर्व्योमाभूत् । कीदृशीव । ऋतुः प्राप्त एषामार्तवा ये पल्लवास्तैरुपलक्षिता लतेव । तथा काल्यैः प्राप्तकालैस्तिमिरैः कृत्वा द्यौः प्राशिता भक्षकः प्राप्तोस्याः प्राशित्र्यभूत् । यथा काल्यैः कालप्राप्तैः षट्पदैर्भृङ्गैः कृत्वा लता प्राशित्री भवति । यथा सौगन्ध्याकृष्टैर्भृङ्गैर्लता व्याप्यते तथा तिमिरैः किंचिद्व्याप्ता द्यौरभूदित्यर्थः ॥

सामा(म)यिक । इत्यत्र "समयात्प्राप्तः" [१२४] इतीकण् ॥
आर्तव । प्राशित्री । इत्यत्र "ऋत्वादिभ्योण्" [१२५] इत्यण् ॥
काल्यैः । अत्र "कालाद्यः" [१२६] इति यः ॥

बिभ्रतः कालिकं वैरं दैत्यानाकालिकान्घ्नते ।
विंशकैस्त्रिंशकैः पात्रैरकार्यार्घमदुर्न के ॥ ७५ ॥

---

१ ए सामायि°. २ ए काल्येर°. ३ ए °व । दाम°. ४ बी कालकं. ५ सी °लिका°. ६ बी न्घ्नतो । विं°.

---

१ बी स्वर्ग्यादिः. २ ए बी °स्तिवच°. ३ बी °प् । द्यौ सा°. सी °प् । द्योः समायक°. ४ सी °स्य समा°. ५ सी °को रा°. ६ ए ऋतु प्रा°. ७ ए °वास्तैरु°. ८ ए °तेवा । त°. ९ ए °प्तोस्या प्रा°. १० ए °भृंगैः कृ°. सी °भृंगै कृ°. ११ सी °था सोग°. १२ सी °लैतां व्या°. १३ ए °चिद्याप्ता. १४ सी °र्थः । समा°. १५ ए °भ्योल्य°.

७५. अकार्यार्घं[1] पूजां के नादुर्न[2] ददुः। कैः कृत्वा। पात्रैः पुष्पफल-जलादिवस्तुसंपूर्णैस्ताम्रभाजनैः । किंभूतैः । विंशकैस्त्रिंशकैर्विंशत्या त्रिंशता[3] वा रूपकादिभिः क्रीतैर्[4]विंशतिं त्रिंशतं[5] वार्हद्भिर्वा। कीदृशाय। दैत्यान्[6]मन्देहाख्यान्दानवान्[7]घ्नते । किंभूतान् । कालिकं दीर्घकालं वैरं बिभ्रतस्तथा[8]कालं समकालं वा भवन्त्याकालिकास्तान् जन्मानन्तरमेव रविणा विनाश्यमानत्वादाजन्मकालमेव भवतः । उदीयमान एव हि रविरमून्दैत्यान्हन्तीति स्वरूपविशेषण[9]मेवेदं रवेः ॥

कालिकं वैरम्[10] । अत्र "दीर्घः" [१२७] इतीकण् ॥

आकालिकान्[11] । इति "आकालिकम्०" [१२८] इत्यादिना निपात्यम् ॥

त्रिंशकैः । विंशकैः । अत्र "त्रिंशद्०" [१२९] इत्यादिना डकः ॥

त्रिंशत्कं विंशतिकं वा बहुकं कतिकं न्विति ।
मुग्धाभिस्तर्कितं सांध्यभाकौसुम्भं[1] प्रतीच्यधात् ॥ ७६ ॥

७६. सांध्यभैव संध्याराग एव[12] कौसुम्भं कुसुम्भेन रक्तं वस्त्रं प्रतीची पश्चिमाधात्परिदधौ । कीदृशम् । मुग्धाभिस्तर्कितमतिरमणीयतया संभावितम् । कथमित्याह । त्रिंशता विंशत्या बहुभिः[13] कतिभिर्वा रूपकादिभिः क्रीतमेतदिति[14] ॥

पाञ्चाशत्कं साप्ततिकं[2] षाष्टिकं शतिकं क्षणात्[3] ।
शत्याधिकं[4] च नेपथ्यं दधुर्वासकसज्जिकाः ॥ ७७ ॥

---

१ बी °कौशुम्भं. २ ए °तिकषा°. ३ बी सी °त्। सत्या° ४ ए °त्याविकं.

१ ए °याघं पू°. २ बी °दुनदुः. ३ सी °शकारू°. ४ बी सी °तैर्विंश°. ५ ए °शतिं वार्हद्भि°. ६ ए° त्यानादेहा°. ७ ए °वाघ्न किं. बी °वान्घ्रते. ८ सी °था अका°. ९ बी °शेषेण°. १० सी °र इति दी°. ११ ए °कामिति. सी °कागिति अका°. १२ बी ए कौशुम्भं कुशुम्भेन. १३ बी °भिः कतिभिः क°. १४ सी °ति । पञ्चा°.

७७. वामकसज्जिकाः सुरतायैष्यति प्रिये हर्षेण स्वं मण्डयन्त्यः स्त्रियः क्षणान्नेपथ्यं वस्त्रालंकारमण्डनादिवेषं दधुः । किंभूतम् । शत्याधिकं[1] शतेन क्रीतादधिकं च । शिष्टं स्पष्टम् ॥

शतकैः[1] स्तूयमानोपि स्तवनैः[2] कान्दिशीकवत् ।
यावत्कं[3] तावतिकं[4] नु रविरत्यजदम्बरम्[5] ॥ ७८ ॥

७८. रविरम्बरं व्योमात्यजत् । कान्दिशीकवदम्बरं नु । यथा कान्दिशीको भयद्रुतोतिभयेनाम्बरं वस्त्रं त्यजति । किंभूतम् । यावत्कं तावतिकं यावता तावता च क्रीतं महार्घमपीत्यर्थः[3] । कीदृक् । शतं श्लोका मानमेषां शतकैः[4] स्तवनैः कृत्वा स्तूयमानोपि । अपिर्विरोधे[5] । निग्रहानुग्रहसमर्थो हि लोकैः स्तूयते स च न कान्दिशीकवदम्बरं[6] त्यजतीति विरोधः । परिहारस्तु स्पष्ट एव । अथ[7] च यः शतकैस्तवनैः[8] स्तूयते स स्तावकेभ्यो महार्घ्य(र्घ?)मप्यम्बरं त्यजति ददातीत्युक्तिलेशः ॥

संख्या । बहुकम् । डति । कतिकम् । त्रिंशत्कम् । विंशतिकम् । अत्र "संख्या०" [१३०] इत्यादिना कः ॥ अशत्तिष्टेरिति किम् । पाञ्चाशत्कम् । साप्ततिकम् । षाष्टिकम् ॥

शत्य[9] । शतिकम् । अत्र "शतात्०" [१३१] इत्यादिना येकौ ॥ अतस्मिन्निति[10] किम् । शतकैः स्तवनैः ॥

---

१ बी °तकै स्तू°. २ ए °वनै कादिशी°. ३ ए सी °वत्क ता°. ४ ए °कं तू र°. ५ ए °दन्तर°.

---

१ सी शतेन. २ बी °त्यादिकं. ३ ए सी °हार्घ्यम°. ४ ए शतिकैः. ५ ए सी °पिविरो°. ६ बी °वदंत्य°. ७ सी °थ वा यः. ८ ए °क । षा°. ९ ए शत्या । श°. बी शति°. १० बी °तस्तस्मि°.

तावतिकम् । यावत्कम् । अत्र "वातोरिकः" [१३२] इतीको वा ॥

रूप्यस्य प्रतिकी कार्षापणिकी काञ्चनस्य किम् ।
किमर्धपलिकी मुक्ता तारा तर्क्यैत्युदैद्दिवि ॥ ७९ ॥

७९. तारा नक्षत्रं दिव्युदैत् । कीदृक् । तर्क्या । कथमित्याह । किमियं रूप्यस्य रजतस्य प्रतिकी कार्षापणेन कर्षेण मानभेदेन क्रीता मुक्ता मुक्ताफलं किं वा काञ्चनस्य कार्षापणिकी कार्षापणेन क्रीता मुक्ता किं वा रूप्यस्य काञ्चनस्य वार्धपलिक्यर्धपलेन क्रीता मुक्तेति ॥

अर्धकंसिक्यर्धकर्षिक्यार्धिकीकंसिकीर्भृशम् ।
साहस्रीः शातमानीश्च दीपिकाश्चक्रिरे स्त्रियः ॥ ८० ॥

८०. स्त्रियो दीपिका दीपान्भृशमत्यर्थं चक्रिरे । कीदृशीः । अर्धकंसादिभिः क्रीताः । कंसकर्षौ स्वर्णादिमानभेदौ । अर्धो रूपकार्धः । सहस्रं रूपकादीनाम् । शतमानं भूभागविशेषः ॥

कार्षापणिकी । प्रतिकी । इत्यत्र "कार्षापणाद्०" [१३३] इत्यादिनेकट् । कार्षापणस्य च प्रतीत्यादेशो वा ॥

अर्धपलिकी । अर्धकंसिकी । अर्धकर्षिकी । इत्यत्र "अर्धात्पल०" [१३४] इत्यादिनेकट् ॥

कंसिकीः । आर्धिकी । इत्यत्र "कंसार्धात्०" [१३५] इतीकट् ॥

---

१ सी रूपस्य. २ ए °रा तार्कैत्यु°. ३ बी °सिकार्ध°. ४ ए °कर्षिक्य°. ५ बी °र्षिकार्धि°. ६ बी °हस्री शा°.

---

१ सी °त्र वर्तो°. २ सी रूपस्य. ३ बी सी °पणेन°. ४ ए °पाद्दृश°. ५ बी °कंशादि°. ६ ए प्रणिकी. ७ बी सी °ट् । कर्षा°. ८ बी °स्य प्र°. ९ बी °कंशिकी । अर्धपलि० । अर्धकार्पि°. १० ए °कर्षिकी. ११ बी अर्धोत्प°. १२ बी अर्द्धिकी. १३ ए इकीक°.

साहस्रीः । शातमानीः । अत्र "सहस्र०" [१३६] इत्यादिनाण् ॥

शौर्पाधिकं शौर्पिकं वासनं[1] वैंशतिकं तथा[2] ।
द्राग्द्विविंशतिकीनं च सर्वमैक्यकरोत्तमः ॥ ८१ ॥

८१. सर्वं वस्तु कर्म तमः कर्त्रैक्यकरोदभिन्नीचक्रे[1][2]। कीदृशं वस्तु । शौर्पाधिकं[3] शूर्पेण क्रीतादधिकं शौर्पिकं शूर्पेण क्रीतं वासनं वसनेन वस्त्रेण क्रीतं[4] वैंशतिकं विंशती रूपकादीनि मानमस्य विंशतिकं तेन क्रीतं द्विविंशतिकीनं च द्वाभ्यां विंशतिभ्यां[5] क्रीतं[6] च । यदपि तमोज्ञानं तत्सर्वमपि वस्त्वेकीकरोतीत्युक्तिः ॥

शौर्पं[7] । शौर्पिकम् । अत्र "शूर्पाद्वाञ्" [१३७] इति वाञ् ॥

वासनम् । इत्यत्र "वसनात्" [१३८] इत्यञ्[8] ॥

वै(वैं)शतिकम् । अत्र "विंशतिकात्[9]" [१३९] इत्यञ्[10] ॥

द्विविंशतिकीनम् । अत्र "द्विगोरीनः" [१४०] इतीनः[11] ॥

द्विशौर्पिकं द्विकंसं द्विषाष्टिकं वांशुकं[3] निशः ।
पाञ्चा(ञ्च)लोहितिकोन्मेयं[4] तमो नीलमतर्क्यत[5] ॥ ८२ ॥

८२. पञ्च लोहिन्यो मानमस्य "मानम्" [६.४.१६९] इतीकणि "जातिश्च णि०" [३.२.५१] इत्यादिना पुंवद्भावे पाञ्चलोहितिकं[12][13] परिमाणभेद-

१ **ए** °नं विंश°. **बी** °नं वेशंति°. २ **बी** °था । प्राग्विंश°. ३ **सी** °कं दिनः । पा°. ४ **बी सी** °हितको°. ५ **ए** °र्क्यतः । प°.

१ **बी** कर्तैक्य°. २ **सी** °दपिनीच°. ३ **बी** °कं शौर्पेणदित्याक्री°. ४ **बी सी** °तं वेश°. ५ **बी** °तिकाभ्यां. **सी** °तिकांभ्यां. ६ **बी** °तं य°. ७ **बी** शौर्पः । शौ°. ८ **ए** °ञ् । वैंश°. ९ **सी** °शत्यका°. १० **ए** °ञ् । द्विवि°. ११ **बी सी** °तीन । द्वि°. १२ **सी** पाञ्चालो°. १३ **ए बी** °तिकपरिणामभे°.

स्तेनोन्मेयमतिप्रभूतमित्यर्थः[1] । नीलं कृष्णं तमोतक्र्यत । किंभूतम् । निशो रात्रिकामिन्या नीलमंशुकम् । किंभूतम् । द्वाभ्यां शूर्पाभ्यां[2] क्रीतम् । अञो लुपि द्विशूर्पं[3] वस्तु तेन क्रीतं द्विशौर्पिकम् । शिष्टं स्पष्टम् ॥

द्विकंसम् । अत्र "अनाम्नि०" [१४१] इत्यादिनेकणः लुप् ॥ अद्विरिति किम् । द्विशौर्पिकम्[4] । अनाम्नीति किम् । पाञ्चलोहितिक[5] ॥ संख्याताद्विगोर्लुपं नेच्छन्त्यन्ये । द्विषाष्टिकम् ॥

द्विसहस्रं त्रिसाहस्रं वाश्वमारुह्य मञ्जयुः ।
द्विसुवर्णत्रिसौवर्णिकांशुका अभिसारिकाः ॥ ८३ ॥

८३. स्पष्टः । किं तु द्विसहस्रं द्वाभ्यां सहस्राभ्यां द्रम्मादिभिः क्रीतम् । सुवर्णो मानं[6] सुवर्णकर्षः[7] । अभिसारिकाः । परपुरुषैः सह रन्तुं संकेतस्थानमभिसरन्त्यः स्त्रियः ॥

द्विकार्षापणिकान्पञ्चकार्षापणानवर्तयन् ।
सद्गन्धान्द्वित्रिबह्वाद्यनिष्कबिस्तांश्च योषितः ॥ ८४ ॥

८४. स्पष्टः । किं तु कार्षापणः कर्षः षोडशपणा वा[8] । अवर्तयन् विलेपनाद्यर्थं श्लक्ष्णीचक्रुः । सद्गन्धान्कर्पूरादीन् । द्वित्रिबह्वाद्यनिष्कबिस्तांश्च द्विनिष्कांस्त्रिनिष्कान्बहुनिष्कांश्च[9] द्विबिस्तांस्त्रिबिस्तान्बहुबिस्तांश्च[10] । निष्को हेम्नोष्टोत्तरं[11] शतं पलं वा । बिस्तः सुवर्णादीनां परिमाणविशेषः ॥

---

१ **बी** °तिभू°. २ **बी सी** °भ्यां सूर्पा°. ३ **बी सी** द्विसूर्पं. ४ **सी** द्विसौर्पि°. ५ **सी** °हितक. ६ **ए सी** °नं स्वर्ण°. ७ **बी** °र्षः । आभि°. ८ **ए** वा । आव°. ९ **बी** °ष्कांन्व°. १० **सी** °स्त्रिवस्तांश्च. ११ **सी** °ष्कोष्टो°.

नैष्किका बैस्तिका द्वित्रिबह्वाद्या द्विशता अथ[1] ।
त्रिशत्या रत्नदीपा[2] नु गिरावोषधयोद्युतन् ॥ ८५ ॥

८५. गिरावर्बुद[1] ओषधयोद्युतन । उत्प्रेक्ष्यन्ते । रत्नदीपा नु । कीदृशाः । द्वित्रिबह्वाद्या नैष्किका बैस्तिका द्विनैष्किकास्त्रिनैष्किका[2] बहुनैष्किका[3] द्विबैस्तिकास्त्रिबैस्तिका बहुबैस्तिकाः । शिष्टं स्पष्टम् ॥

द्विसहस्रम् । त्रिसाहस्रम् । अत्र "न वाणः[4]" [१४२] इत्यणो वा लुप् ॥

द्विसुवर्णं । त्रिसौवर्णिक । पञ्चकार्षापणान् । द्विकार्षापणिकान् । अत्र "सुवर्ण०" [१४३] इत्यादिना प्रत्ययस्य वा लुप् ॥

द्विनिष्कं[5] द्विनैष्किकाः । त्रिनिष्क त्रिनैष्किकाः । बहुनिष्क[6] बहुनैष्किकाः । द्विबिस्तान् द्विबैस्तिकाः । त्रिबिस्तान्[7] त्रिबैस्तिकाः । बहुबिस्तान् बहुबैस्तिकाः । अत्र "द्वित्रि०" [१४४] इत्यादिना प्रत्ययस्य लुब्वा ॥

त्रिशत्या(त्याः) । द्विशताः । अत्र "शताद्यः" [१४५] इति वा यः ॥ पक्षे संख्यालक्षणः कस्तस्य[8] लुप् ॥

अध्यर्धशाणा द्वैशाणी[3] त्रैशाणी पञ्चशाणिका[4] ।
महाशाणा नु भास्त्राणां दीपनी[5] यामिनी[6] बभौ[7] ॥ ८६ ॥

८६. यामिनी रात्रिर्महाशाणा[9] नु महच्छस्त्रोत्तेजनोपकरणमिव बभौ । यतो भास्त्राणां नक्षत्रायुधानां दीपन्युज्ज्वालिका[10] । कीदृग्महाशाणा ।

---

१ ए सी °थ । त्रिश°. २ बी °त्नद्वीपा. ३ बी °णी त्रिशा°. ४ बी सी °शाणिका. ५ सी दीपिनी. ६ ए °नीव ब°. ७ ए भौ ॥ यतो.

---

१ बी °राकर्बू°. २ ए द्विनेष्किकास्त्रैनेष्कि°. ३ सी °ष्किकाः । शि°. ४ सी वा इ°. ५ ए °ष्क द्वैनिष्किकाः । त्रैनै°. ६ ए °निष्कः ब°. ७ ए °न् त्रैबै°. ८ सी °स्य प्रत्यय ॥ अ°. ९ बी °त्रिमहा° १० सी दीपिन्यु°.

अध्यर्धेन[1] सार्धेन शाणेन मानभेदेन क्रीताध्यर्धशाणा । शिष्टं स्पष्टम् ॥

द्विशाणिनि द्विशाण्यं नु त्रिशाण्यं[1] नु त्रिशाणिनि ।
तमः खे[2]भाद् द्व्यादि पण्यं पाद्यं माष्यं नु तद्वति ॥ ८७ ॥

८७. खे तमोभात् । यथा द्वाभ्यां शाणाभ्यां क्रीतं वस्तु द्विशाणं तदस्यास्ति[2] द्विशाणी पुरुषस्तस्मि[3]न्द्विशार्ण्यं[4] द्वाभ्यां शाणाभ्यां क्रीतं वस्तु भाति । यथा वा त्रिशाणिनि त्रिशाण्यं भाति । यथा वा तद्वति द्विपण्यादिवस्तुमति नरे द्विपण्यं[5] द्विपाद्यं द्विमा[6]ष्यं च वस्तु भाति । पणः कार्षापणः । पादो माषादीनां चतुर्थो भागः । माषः स्वर्णमानभेदः ॥

पञ्चशा[7]ण्यिका अध्यर्धशाणा । इ[8]त्यत्र "शाणात्" [१४६] इति वा यः ॥ पक्षे । इकणो लुप्[9] ॥

द्विशाण्यम्[10] । द्वैशाणी । त्रिशाण्यम् । त्रैशाणी । इत्यत्र "द्वित्र्यादेर्याण्वा"[11] [१४७] इति वा[12] याणौ ॥ पक्षे । द्विशाणिनि । त्रिशाणिनि । इकणो लुप् ॥

द्विप[13]ण्यम् । द्विपाद्यम् । द्विमाष्यम् । अत्र "पण०" [१४८] इत्यादिना यः ॥

द्विकाकणीकषट्खारीकप्रास्थिकवदन्तर[3]म् ।
ताराणामविदल्लोको मौद्रिकक्षेत्रभासि खे ॥ ८८ ॥

८८. खे ता[14]राणामन्तरं गुरुत्वलघुत्वादिकृतं विशेषं लोको[15]विद-

---

१ बी °शाणि°. २ °बी भाद्वादि. ३ ए °र । ता°.

---

१ बी °न शा°. २ बी °स्यास्तीति द्वि°. ३ ए °रिमन्दिशा°. ४ सी °ण्यं द्विपाद्यं. ५ ए द्विपाण्यं. ६ ए °माद्य च. बी °मानुष्यं. ७ सी °शाणिका. ८ ए इताच शा°. ९ सी °प् । द्विपण्यं । द्विपाद्य°. १० बी °म् । द्विशा°. ११ बी °देयाण्वा. १२ ए वा यणौ. १३ ए °पणाम्. १४ ए तारोणा°. १५ ए लोकाऽविदत् । यतो.

ळभे । ज्ञातवानित्यर्थः । विदूलन्ती लाभे । यतो मुद्गानां वापो मौद्गिकं[1] यत्क्षेत्रं तद्वद्[2]भासि[3] तमसातिकृष्ण[4] इत्यर्थः । द्विकाकणीकषट्खारीकप्रास्थिकवत् । यथा द्विकाकण्यादिभिः क्रीतानां वस्तूनां मध्येल्पमहत्त्वादि[5]कृतं विशेषं[6] लोको वेत्ति । कपर्दकविंशतिः काकणी ॥

षट्खारीक । द्विकाकणीक । इत्यत्र[7] "खारी०" [१४९] इत्यादिना[8] कच् ॥

प्रास्थिक । इत्यत्र "मूल्यैः क्रीते" [१५०] इतीकण् ॥

मौद्गिक[9] । इत्यत्र "तस्य वापे" [१५१] इतीकण् ॥

वातिकः पैत्तिकश्चाथ[1] श्लैष्मिकः सांनिपातिकः ।
अवियुक्तवियुक्तानां प्रदोषोभूत्प्रियाप्रियः[2] ॥ ८९ ॥

८९. प्रदोषोवियुक्तानामविरहिणां रतिहेतुतया प्रियोभूत् । कीदृक्सन् । वातिकः पैत्तिकश्चाथ तथा[10] श्लैष्मिकः सांनिपातिको वातपित्तश्लेष्मसंनिपातानां शमनः[11] । प्रदोषो हि स्वभावेन साधारणः कालः[12] । वियुक्तानां[13] त्वप्रियोभूत् । यतो रत्यभावोत्थ[14]दुःखेन सर्वधातूद्रेकहेतुत्वाद्वातपित्तश्लेष्मसंनिपातानां कोपनः ॥

वातिकः । पैत्तिकः[15] । श्लैष्मिकः । सांनिपातिकः । अत्र "वात०" [१५२] इत्यादिनेकण् ॥

---

१ ए बी °थ श्लेष्मि°. २ सी °भूत्सदाप्रि°.

---

१ सी °कं तत्क्षे°. २ ए बी तद्भा°. ३ सी °द्भाति त°. ४ ए सी °कृष्णेत्य°. ५ ए °हस्तादि°. ६ ए °शेषलो°. ७ सी °त्र मू°. ८ ए °दिनेक°. ९ ए °द्गिकीत्य°. १० ए °था श्लेष्मि°. ११ ए °नः । प्रादो°. १२ बी कालवि°. सी कालयु°. १३ ए °नां त्वेप्रि°. १४ बी °भावात्थदुरकेन. १५ बी °कः । श्लेष्मि°. सी °कः । श्लेष्मकिकः.

सूत्पातमिव पुत्रीयं[1] शत्यमीड्योगमिच्छवः ।
ससञ्जुः कुलवध्वोपि[2] पुत्र्यधन्यैषिणो न के ॥ ९० ॥

९०. कुलवध्वोप्यासतां[1] वेश्याद्यङ्गनाः कुलाङ्गना अपि ससञ्जुः संभोगाहाङ्गभोगादिना प्रगुणीबभूवुः[2] । कीदृश्यः सत्यः । पुत्रीयं पुत्रहेतुं शत्यं सुवर्णादिशतहेतुं[3][4] चेड्योगं प्रियसंबन्धमिच्छवो यथा पुत्रीयं[5] शत्यं च सूत्पातं शुभसूचकं[6] महाभूतपरिणाममिच्छवः स्युः । युक्तं चैतत् । यस्मात्पुत्र्यधन्यैषिणः[7] पुत्रधनहेत्वीड्योगपुत्रधनहेतुसूत्पाताभिलाषिणः[8] के न स्युः ॥

आश्विकौर्णिकखारीकपञ्चकानामकाङ्क्षिणीम्[3][4] ।
ईड्योगे ब्रह्मवर्चस्ये ददृशुर्दिव्यरुन्धतीम् ॥ ९१ ॥

९१. अरुधन्तीं सप्तर्षिसमीपस्थां[9] वसिष्ठभार्यां[10] दिवि व्योम्नि लोका ददृशुः । किंभूताम् । आश्विकौर्णिकखारीकपञ्चकानामश्वाना-[11] मूर्णायाः खार्याः पञ्चानां रूपकादीनां हेतवः संयोगा उत्पाता वा ये तेषामकाङ्क्षिणीम्[12] । क सति । ब्रह्मणः परमज्ञानस्य[13] वर्चः प्रतापो ब्रह्मवर्चसं तस्य हेतौ ब्रह्मवर्चस्य ईड्योगे पतिसंबन्धे[14] । महासतीत्वात्पतिसंबन्धमेवेच्छन्तीमित्यर्थः[15] ॥

शत्यमीड्योगं सूत्पातमिव । इत्यत्र "हेतौ०" [१५३] इत्यादिना यथाविहितं यः ॥

---

१ बी सी °यं सत्य. २ सी °पि आस°. ३ ए °काङ्क्षणी°. सी °काङ्क्षणी । ई°. ४ बी °णी । इड्यो°.

---

१ ए °प्यास्तीवे°. २ ए °णीरभू°. ३ सी °वर्णश°. ४ ए °दित्वात°. ५ सी °यं सत्यं. ६ ए शुचसू°. ७ बी सी °त्पुत्रध°. ८ बी °हेतुंसू°. ९ ए °मीस्थां. १० सी वशिष्ठ°. ११ ए °कप°. १२ ए °काक्षिणी°. १३ सी °रज्ञा°. १४ सी °बन्धमे°. १५ बी °र्थः । सत्य°.

पुत्र्य । पुत्रीयम् । अत्र "पुत्राद्येयौ" [१५४] इति येयौ ॥

धन्य । ब्रह्मवर्चस्ये । अत्र "द्विस्वर०" [१५५] इत्यादिना यः ॥ असंख्या-परिमाणाश्वादेरिति किम् । संख्या । पञ्चकानाम् ॥ परिमाण । खारीक । अश्वा-दि । आश्विकौणिक ॥

पार्थिवः सार्वभौमश्च सूत्पातपुण्ययोगवत् ।
अथेन्दुरुदगाद्वन्द्यः सार्वभौमैः सपार्थिवः ॥ ९२ ॥

९२. अथानन्तरं सपार्थिवः पृथिव्या ईशः पार्थिवो राजा प्रस्तावादत्र कुमारपालस्तेन सहित इन्दुश्चन्द्र उदगात् । कीदृक्सन्निन्दुः पार्थिवश्च । पार्थिवः पृथिव्या ज्ञातः । पृथिव्येकदेशे प्रसिद्धोपि पार्थिव इत्युच्यत इत्याह । सार्वभौमः सर्वभूमेर्ज्ञातोत एव सार्वभौमैः सर्वभूमेरीशैर्नृपैर्वन्द्यः प्रणम्यः । सूत्पातपुण्ययोगवत् । यथा पार्थिवः सार्वभौमश्च पृथिव्याः सर्वभूमेश्च हेतुः सूत्पातः पुण्ययोगश्च सार्वभौमैर्वन्द्यः श्लाघ्यः स्यात् ॥

सपार्थिवः । सार्वभौमैः । पार्थिवः । सार्वभौमः । अत्र "पृथिवी०" [१५६] इत्यादिनाञ् ॥

न्यधादिन्दुः करं प्राच्यां लौकिक्यां सार्वलौकिकः ।
अधिकेष्वधिक इव पञ्चकेष्विव पञ्चकः ॥ ९३ ॥

---

१ ए °र्थिवसा°. २ बी °र्वभूमैः.

---

१ बी °त्रादेयौ. २ बी °संख्यप°. ३ ए संख्याः । प°. ४ बी °रीकः । अ°. ५ बी °णिकः । पा°. ६ ए °न्तर स°. ७ सी °व्या ज्ञा°. ८ बी °क्सनिन्दुः. ९ बी पाथिवः. १० बी सी °भौमः स°. ११ सी °श्च हे°. १२ ए सी °भौमः । अ°.

९३. सार्वलौकिकः सर्वलोकस्य ज्ञात इन्दुर्लौकिक्यां लोकस्य ज्ञातायां प्राच्यां दिशि करं किरणंन्यधान्यक्षिपत् । अर्धं रूढ्या रूपकार्धं तथा पञ्च द्रम्मादय एषु शतेषु ग्रामेषु पटेषु व्यवहारेषु शतेषु वृद्धिरायो लाभ उपदा शुल्कं वा देयमर्धिकानि पञ्चकानि पञ्चशतादीनि तेषु । तथार्धं पञ्चं वास्मै वृद्धिरायो लाभ उपदा शुल्कं वा देयमर्धिकः । पञ्चकश्च व्यवहारकादिः । यथार्धिकोर्धिकेषु पञ्चकः पञ्चकेषु च द्रम्मशतादिषु करं हस्तं रूपकार्धद्रम्मपञ्चकादिग्रहणाय क्षिपति ॥

षष्ठिकान्षष्ठिकस्येवं भाग्यस्येव च भागिकान् ।
द्रौणिकीभिः समं द्रौणाः परभागं विधोर्ददुः ॥९४॥

९४. द्रौणिकीभिर्द्रोणं पचन्तीभिः स्त्रीभिः समं सह द्रौणाः द्रोणं पचन्तो नरा विधोरिन्दोः परभागं गुणोत्कर्षं ददुः पाकेन संतप्तत्वात्सन्तापविद्रावकं चन्द्रोदयं प्रशशंसुरित्यर्थः । यथा षष्ठो भागोस्मै वृद्ध्यादीनामन्यतमो देयः षष्ठिको व्यवहारकादिस्तस्याधमर्णाः षष्ठो भागो वृद्ध्यादीनामन्यतम एषु द्रम्मशतादिषु देयः षष्ठिकास्तान्षष्ठभागदानेन ददति । यद्वा षष्ठिकशब्देनोपचारात्स्वावयवः षष्ठभागोप्युच्यते यथा पटो दग्ध इत्यादौ पटैकदेशेपि पटशब्दस्ततः षष्ठिकान्षष्ठभागान्ददति । एवं भाग्यस्येव च भागिकान् भागशब्दो रूपकार्धे रूढः ॥

१ सी °व भोग्य°. २ सी भाग्यका°. ३ ए बी °न् । द्रोणि°. ४ बी °मं द्रोणाः. ५ ए बी °दुः । द्रोणि°.

१ ए °र्वलोकि°. २ ए °न्दुर्लौकि°. ३ ए °षु शाते°. ४ ए °नि वश°. ५ बी °श्च चास्मै. ६ ए °वहरकादि । य°. ७ ए हस्तरू°. ८ बी सी द्रौणा द्रो°. ९ ए पश्चतो न°. १० ए विधोरि°. ११ बी प्रशंशंशुरि°. १२ ए °वहर°. १३ बी °म पशु द्र°. १४ बी °देशोपि. १५ सी °शे प°. १६ ए °न्दति. १७ बी °ग्यस्यैव. १८ ए रूपार्धे.

लौकिक्याम् । सार्वलौकिकः[1] । अत्र "लोक०" [१५७] इत्यादिना-इकण्[2] ॥

पञ्चकेषु । पञ्चकः । अत्र "तद्‌त्र०" [१५८] इत्यादिना यथाविहितं कः ॥

षष्ठिकान् । षष्ठिकस्य । अर्धिकेषु[3] । अर्धिकः ॥ अत्र "पूरण०" [१५९] इत्यादिनेकः[4] ॥

भाग्यस्य । भागिकान् । इत्यत्र "भागाद्येकौ" [१६०] इति येकौ[5] ॥

द्रौणाः । द्रौणिकीभिः । अत्र "तं०" [१६१] इत्यादिना वाञ्[6] ॥

ज्योत्स्नाफेनादाढकीनपात्रिकाचितिकैर्जनैः[1][2] ।
प्राच्युखोत्प्रैक्षि[3] पात्रीणाचितीनाढकिकी[4] तदा ॥ ९५ ॥

९५. तदा चन्द्रोदयकाल आढि(ढ)कीनपात्रिकाचितिकैराढकं चतुःप्रस्थीं पात्रं पात्रमितमन्नमाचितं मानभेदमितमन्नं च पचद्भिर्जनैः पाचकलोकैः[7] प्राची पूर्वदिगुखा[8] स्थाल्युत्प्रैक्षि[9] संभाविता । कुतो ज्योत्स्नाफेनाज्ज्योत्स्नैवातिश्वैत्याद्धान्ये राध्यमाने स्थालीमुखोत्थः फेनस्तस्मात् । कीदृश्युखा[10] । पात्रीणाचितीनाढकिकी पात्रमाचितमाढकं वा पचन्ती । यद्वा संभवन्ती प्रमाणानतिरेकेण धारयन्तीत्यर्थः । यद्वावहरन्ती[11] प्रमाणातिरेकेण धारयन्तीत्यर्थः । ज्योत्स्नाया राध्यमान ओदने स्थालीत उत्फणीत्[12]फेनकल्पत्वादुत्प्रेक्षकाणां[13] च पाचकत्वेन सुपरिचितस्थालीफेनत्वादेवमुत्प्रेक्षा ॥

१ ए °दाढिकी°. बी °दाढिकी°. २ सी °कैराढकं. ३ ए प्राच्यखो°. ४ ए °नाडकि°.

१ ए °र्वलोकि°. २ ए °ण् । के°. ३ ए अर्धके°. ४ बी °नेकणः । भा°. ५ ए येको । द्रौ°. ६ सी वाकञ्. ७ बी °चकालो°. ८ बी °दिग्मुखा. ९ ए °खात्थाल्यु°. १० बी सी °श्युपा । पा°. ११ ए °न्ती णा°. १२ ए बी °णत्पेन°. १३ बी °त्प्रेक्ष्यका°.

आढकिकी । इत्यत्र "संभवद्०" [१६२] इत्यादिनेकण् ॥

पात्रीणाचितीना । आढकीन । इत्यत्र "पात्र०" [१६३] इत्यादिना वा-ईनः ॥ पक्षे । पात्रिकाचितिकैः । आढकिकी ॥

ब्याचितैर्द्व्याचितीनोखा द्विपात्रीणैर्द्विपात्रिकी ।
ब्याढकी ब्याढकीनैर्नु ज्योत्स्नाभाजि चकोरकैः ॥ ९६ ॥

९६. स्पष्टः । किं तु यथा ब्याचितैर्द्वावाचितौ पचद्भिर्द्व्याचितीना द्वावाचितौ पचन्ती संभवन्त्यवहरन्ती वोखा भज्यते ॥

ब्याचितिकी ब्याढकिकी द्विपात्री द्विकुलिज्यथ ।
खेन्वमीयत शीर्णोखा कीर्णैस्तारकतन्दुलैः ॥ ९७ ॥

९७. कीर्णैरितस्ततो विक्षिप्तैस्तारकतन्दुलैस्तारका एव श्वेतत्वात्तन्दुला राद्धशालयस्तैः कृत्वोखा तन्दुलस्थाली खे शीर्णा भग्नान्वमीयत यत्खे तारकतन्दुला दृश्यन्ते तस्मादत्र महती तन्दुलस्थाली भग्नेति लोकैरनुमितमित्यर्थः । किंभूतोखा । अथाथ वा द्विकुलिजी द्वे कुलिजे मानभेदौ पचन्ती संभवन्त्यवहरन्ती वा । एवं प्राग्विशेषणार्थोपि ज्ञेयः । महाप्रमाणेत्यर्थः ॥

नवेन्दोर्द्विकुलिजिकैः सद्वैकुलिजिकीजनैः ।
नभोद्विकुलिजीनोखाचूर्णलेखा न्वलक्षि भाः ॥ ९८ ॥

---

१ ए °चितिकीर्द्व्या°. २ ए ब्याढिकी. ३ बी ब्याढिकि°. ४ ए °कुलीज्य°. ५ बी °लिजाथ. ६ बी °र्णोषाकी°. ७ ए सी °वेदोर्द्वि°. ८ ए बी °कुलजि°. ९ बी °कुलजी°. १० बी °क्षिताः ॥ स°. सी °क्षिभा ॥ स°.

---

१ ए °भवादत्या°. बी °भवाद्. २ ए पात्राणा°. ३ बी °ना ईनः. ४ बी पतद्भि°. ५ ए °वत्यथह°. ६ ए °शालाय°. ७ बी °त्वोषा त°. ८ ए बी °यते य°. ९ ए °मितिमि°. १० बी °कुलजी. ११ ए बी कुलजे. १२ ए °वत्यह°.

९८. सद्विकुलिजिकीजनैर्द्वे कुलिजे पचन्तीनां स्त्रीणां जनेन सहितै-र्द्विकुलिजिकैर्द्वे कुलिजे पचद्भिर्नरैर्नवेन्दोर्भा अलक्षि ज्ञाता। किदृशी। नभ एव कृष्णत्वाद्द्विकुलिजीनोखा द्वे कुलिजे पचन्ती संभवन्त्यवहर-न्ती वा स्थाली तस्यां या चूर्णलेखा चूर्णस्य खटिकादिक्षोदस्य रेखा सा नु। स्थाली हि शोभार्थमुपरिभागे खटिकादिश्वेतचूर्णेन मण्ड्यते। बालेन्दुकान्तीनां व्योमपार्श्ववर्तित्वादुत्प्रेक्षकाणां पाचकत्वेन सुपरिचित-स्थालीव्यापारत्वाच्चैवमुत्प्रेक्षा ॥

द्विपात्रीणैः। द्विपात्रिकी। द्व्याचितीना। द्व्याचितिकी। द्व्याढकीनैः। द्व्याढकिकी। अत्र "द्विगोर्०" [१६४] इत्यादिना वेनेकटौ। पक्ष इकण्। तस्य "अनाम्नि०" [६. ४. १४१] इत्यादिना लुप्। द्विपात्री। द्व्याचितैः। द्व्याढकी ॥

द्विकुलिजीना। द्विकुलिजिकैः। अत्र "कुलिजाद्वा लुक्(लुप् च?)" [१६५] इतीनेकटौ वा। पक्ष इकणो लुब्वा। द्विकुलिजी। द्वैकुलिजिकी ॥

वांशिकैः कौटिकैर्वांशभारिकैः कौटभारिकैः।
द्रव्यकैर्वस्न(स्नि?)कैः श्रान्तैः सुधांशुर्ददृशे मुदा ॥ ९९ ॥

९९. सुधांशुर्मुदा ददृशे। कैः कैः। वांशिकादिभिरतिस्थूलत्व-महत्त्वादिना भारभूतानल्पान्वंशानेवं भारभूतानल्पान्कुटान्घटांस्तथा

१ बी °कैः कोटि°. २ ए °कैः कोट°. ३ ए °वंस्नकैः. ४ बी °न्तैः शुधां°. ५ ए सुधाशु°. ६ बी °दा। शुधां°.

१ बी °कुलजि°. २ बी °नैर्द्विकु°. ३ बी °कैर्द्वे कु°. ४ सी °गे खाटि°. ५ बी °पार्श्वव°. ६ बी °त्प्रेक्ष्यका°. ७ बी °त्प्रेक्ष्या। द्वि°. सी °त्प्रेक्षाः। द्वि°. ८ सी °पात्रि°. ९ ए °त्रीणै। द्विपात्रीकी. १० सी °तीकी°. ११ बी °कवौ वा. १२ सी °लिजि°. १३ ए °लत्वा°. १४ ए °टान्घंटां°.

वंशभारं वेण्वोघमेवं कुटभारं तथा द्रव्यं तथा वस्त्रं मूल्यं हरद्भिर्देशान्तरं प्रापयद्भिर्वहद्भिर्वोत्क्षिप्य धारयद्भिरावहद्भिर्वोत्पादयद्भिर्भृत्यैः । यतः कीदृशैः । श्रान्तैर्भारहरणादिना खिन्नैः । श्रान्ता हि श्रमोत्थसन्तापोच्छेदकं चन्द्रोदयं स्पृहयन्ति ॥

वांशभारिकैः । कौटभारिकैः । वांशिकैः । कौटिकैः । अत्र "वंशादेर्०" [१६६] इत्यादिना–इकण् ॥

द्रव्यकैः । वस्त्र(स्नि?)कैः । अत्र "द्रव्य०" [१६७] इत्यादिना केकौ ॥

लसन्ती खेष्टके दिग्भिश्चक्रैर्दैवहतैस्तदा ।
पञ्चकैर्न्वेष्टकं वासो ज्योत्स्ना द्रौणिक्यकामि न ॥१००॥

१००. तदा तस्मिन्काले ज्योत्स्ना । अपिरत्र ज्ञेयः । विश्वविश्वाह्लादिका चन्द्रिकापि चक्रैश्चक्रवाकैर्नाकामि न वाञ्छिता । यतो दैवहतैर्निष्पुण्यैः । दैवहतानां हि सर्वानन्दकमपि वस्त्वसुखायैव स्यात् । कीदृशी । द्रोणो मानमस्या द्रौणिक्यतिप्रभूतेत्यर्थः । अत एव दिग्भिः कृत्वाष्टावंशा भागा अस्याष्टकं तत्राष्टके खे लसन्ती दिशो व्योम च व्याप्नुवतीत्यर्थः । यथा पञ्च द्रम्मा भृतिः कर्ममूल्यं येषां तैः पञ्चकैर्भृत्यैर्दैवहतैः सद्भिरष्टौ द्रम्मा वस्त्रं मूल्यं यस्य तदष्टकं वासः परिधानार्थं नेष्यते ॥

१ ए °क्रैर्दैव°. २ ए °कैर्नष्टवा°. ३ ए सी °त्स्ना द्रोणि°. ४ ए °कागिना । त°. ५ बी °मि नः । त°.

१ बी °घकु°. २ बी हरिमिर्दे°. ३ बी °द्भिभृत्यैः. ४ बी °दृश्यै । श्रा°. ५ ए °कैः । वंशि°. सी °कैः । वाशि°. ६ ए °देक°. ७ ए °कैः । दस्तकैः. ८ सी °का च°. ९ सी °वाक्यैर्ना°. १० सी °ता । या दै°. ११ बी सी °तैर्निःपुण्यैः. १२ ए °ण्यैः । देव°. १३ ए °नदक°. १४ बी °खा तं कः. १५ ए द्रोणा मा°. १६ ए °त्यैर्दैव°.

पञ्चकैः । अष्टकं[1] वासः । अष्टके । अत्र "सोस्य० [१६८] इत्यादिना यथाविहितं कः ॥

द्रौणिकी । इत्यत्र "मानम्" [१६९] इतीकण्[2] ॥

द्विषाष्टिका वरस्तोत्रैरष्टिकाधीतयोष्टकैः[1] ।

बध्नन्तः[2] पञ्चकान्संघान्[3]द्विजराजं जगुर्द्विजाः ॥ १०१ ॥

१०१. द्वे षष्टी वर्षाणि जीवितमानमेषां द्विषाष्टिका अतिवृद्धा द्विजा[3] ऋत्विजो द्विजराजं चन्द्रं जगुर्गायन्ति स्म । यो हि येषां राजा स्यात्स तैर्गीयते[4] । कीदृशाः सन्तः । अष्टावृचो मानमेषां तैरष्टकैः षड्भिर्वरस्तोत्रैः[5] सोमस्तुतिरूपषडृगष्टकमयेन बृहता स्तोमेन कृत्वेत्यर्थः । अष्टौ रूपाणि वारा मानमस्या अष्टिका साधीतिः[6] पाठो येषां ते स्तोत्रै[7]स्वरूपाणि षडृगष्टकान्यष्टौ वारान्पठन्त इत्यर्थः । तथा पञ्चावयवा मानमेषां पञ्चकान्संघानजौघान्बन्धन्तः । किलायुष्टोमयाग आयुर्वृद्ध्यर्थं[8] परमायुर्भिरेव यज्वभिः क्रियते तत्र च तैः पूर्णिमाचन्द्रोदय आलम्भाय पञ्चाजान्यूपस्तम्भे बध्नद्भिरष्टाचत्वारिंशदृग्मयमष्टाचत्वारिंशाख्यं महास्तोममष्टौ वारान्गायद्भिश्च चन्द्रः[9] स्तूयत इति याज्ञिकाः[10] ॥

द्विषाष्टिकाः । अत्र "जीवितस्य सन्" [१७०] इतीकण् स च सन् ॥

पञ्चकान् । अष्टकैः[11] । अष्टिका[12] । इत्यत्र "संख्यायाः०" [१७१] इत्यादिना कः ॥

---

१ ए °कावीत°. २ बी °भ्नन्ता प°. ३ सी °न्संध्यान्द्वि°.

---

१ ए अथकं. २ बी °ण् । द्वेषा°. ३ सी °जा द्वि°. ४ बी °गीयंते. ५ ए सी °स्तोत्रै सो°. ६ ए सावीतिः. ७ सी °त्ररू°. ८ ए °युभिः—य°. बी °युभिरिव. ९ बी चन्द्र श्रूये इ°. सी चंद्र स्तू°. १० ए °काः । अ°. ११ बी °कैः । षष्टि°. १२ सी अष्टका.

पञ्चका[1] नु शकुनयः[2] काप्युड्डीय तमांस्ययुः ।
इन्दौ निदधति व्योम्नि विंशतिं त्रिंशतं करान् ॥१०२॥

१०२. पञ्चेति संख्या मानमेषां पञ्चैव[1][2] वा पञ्चका नाम शकुनयः[3] पक्षिणो यथा काप्युड्डीय यान्ति[4] । शिष्टं स्पष्टम् ॥

पञ्चकाः । अत्र "नाम्नि" [१७२] इति कः ॥

विंशतिम्[5] । त्रिंशतम् । एतौ "विंशत्यादयः" [१७३] इति निपात्यौ ॥

ब्राह्मणैर्ब्राह्मणास्त्रैंशैश्चात्वारिंशैरिवानघैः[3] ।
जहृषुर्यज्वनां[4] पत्युरोषधिद्योतिभिः करैः ॥ १०३ ॥

१०३ यज्वनां[6] पत्युरिन्दोः[7] करैः कृत्वा ब्राह्मणा ऋत्विजो जहृषुः[8] । यत ओषधिद्योतिभिः सोमवल्ली नाम महौषधी यदेन्दुः क्षीयते तदा प्रतिदिनमेकैकपत्रपातेन[9] क्षीयते । यदा त्विन्दुर्वर्धते तदासौप्येकैकपत्रवृद्ध्या[10] वर्धते । सा च यागेषु महोपकरणमिति ऋत्विग्भिर्गिरिषु गवेष्यमाणासौ चन्द्रांशुभिः प्रकाश्यत इत्यृत्विजां[11] हर्ष इत्यर्थः । यथा ब्राह्मणैर्वेदविशेषैः कृत्वा स्वसिद्धान्ततया ब्राह्मणा हृष्यन्ति । किंभूतैः । त्रिंशच्चत्वारिंशच्चाध्याया[12] मानमेषां तैस्तथानघैर्निष्पापैः[13] ॥

त्रै(त्रैं?)शैश्चा(चा?)त्वारिंशैः[14]। एतौ[15] "त्रैंश०" [१७४] इत्यादिना निपात्यौ ॥

---

१ **ए** °का मु श°. २ **ए** °थः काप्यु°. ३ **ए सी** °शच्चत्वा°. ४ **बी** जहर्षुर्यज्वानां.

---

१ **सी** °श्चैवं प°. २ **बी** °व प°. ३ **ए** °नय प°. ४ **सी** °न्ति । प°. ५ **ए** °शति । त्रि°. **सी** °शतं । त्रि°. ६ **बी** यज्वानां. ७ **ए** °रिन्दो क°. ८ **बी** °हृषु । य°. ९ **ए** °कैप°. १० **ए** °दा साप्ये°. ११ **बी** इत्यत्वि°. १२ **ए** °शत्वाध्या°. १३ **ए सी** °पैः । त्रिंश. १४ **बी** °शञ्चत्वा°. **सी** °शञ्यत्वा°. १५ **ए** °तौ त्रैश.

दशकेषु दशद्वर्गो यथा पञ्चत्सु पञ्चकः ।
तथा शशिकरेष्वन्तर्बभूव ज्योतिषां [1]प्रभा ॥ १०४ ॥

१०४. दशमानमेषां तेषु दशकेषु वर्गेषु मध्ये दशद्वर्गो दशसंख्यामान एकः समूहो यथा यादृशोल्पत्वेनालक्ष्यः स्याच्छशि[1]करेष्वन्तर्मध्ये ज्योतिषां ताराणां प्रभा तथा तादृश्यलक्ष्या बभूव । शिष्टं स्पष्टम् ॥

पञ्चत्सु । दशत् । इत्येतौ "पञ्चद्०" [१७५] इत्यादि[2]ना निपात्यौ वा ॥ [3]पक्षे । पञ्चकः । दशकेषु ॥

विंशस्तोमविदां मन्त्रैर्यज्ञियानां नु शीतगोः[2] ।
आभिषेचनिकस्योस्रैर्द[3]ण्ड्यं वध्यं तमोद्रवत् ॥ १०५ ॥

१०५. तमोद्रवदनश्यत् । कीदृक्सत् । शीतगोरिन्दो[4]रुस्रैः किरणैः कृत्वा दण्ड्यं वध्यं च निग्रहं हिंसां चार्हत् । कीदृशस्य । आभिषेचनिकस्य सकलपृथ्व्याह्लादकत्वादभिषेचनं राज्याभिषेकमर्हतः । योप्याभिषेचनिको राजा तस्य दण्ड्यो वध्यश्च संस्तमस्तुल्य[5]श्चौरादिर्भयेन नश्यति । यथा यज्ञो नाम क्रियासमुदायः कश्चित् । तदभिव्यञ्ज्यं वा[6]पूर्वमित्याहुस्तमर्हतां यजमानानां तमः पापं द्रवति । कीदृक्सत् । विंशतिऋचो मान[7]मस्य[8] विंशो[9] य[10]ः स्तोम ऋक्समूहस्तं विदन्ति ये तेषामृत्विजां मन्त्रौ कृत्वा यागकाले दण्ड्यं वध्यं च ॥

विंशस्तोम । इत्यत्र "स्तोमे डट्" [१७६] इति डट्[11] ॥

---

१ ए प्रभाः । द°. २ ए °गोः । अभि°. ३ बी °ण्ड्यं बध्यं.

---

१ सी °करौधान्त°. २ ए °ना पा°. ३ बी पक्षं । प°. ४ ए °रुस्तो किं°. ५ ए °श्चादि°. ६ ए °पूर्वामि°. ७ ए °नस्य. ८ ए °स्य विशो. ९ बी विंशतो यः. १० सी °शो य स्तो°. ११ ए °ट् । अभि°.

आभिषेचनिकस्य । इत्यत्र "तमर्हति" [१७७] इतीकण् ॥

दण्ड्यम् । वध्यम् । अत्र "दण्डादेर्यः" [१७८] इति यः ॥

यज्ञियानाम् । अत्र "यज्ञादियः" [१७९] इतीयः ॥

प्राप्येन्दोः पात्रिया[1]न्रश्मीन्व्यकस[2]न्कुमुदान्यथ ।
स्थालीबिलीयं पात्र्यं वा कडंगर्या इवौद[3]नम् ॥ १०६ ॥

१०६. अथ तथेन्दो रश्मीन्कान्तीः प्राप्य कुमुदानि व्यकसन् । किंभूतान् । पात्रियानतिप्रधानत्वा[2]त्पात्रमर्हतः । यथा कडंग[3]र्याः कडंगरं पलालमर्ह[4]न्तो वृषा ओदनं प्राप्य हर्षाद्विकसन्ति । कीदृशम् । स्थालीबिलीयं स्थालीबिलमर्हन्तं पा[5]कार्हमित्यर्थः । पात्र्यं वातिप्रधानत्वात्पात्रमर्ह[6]न्तं वा ॥

दक्षिण्यो द[4]क्षिणीयानामपीन्दु[5]: स्वधियै[6]क्षि खे ।
कडंगरी[7]यैही(र्हो) स्थालीबि[8]ल्यै[9]हैयङ्गवीनकम् ॥ १०७ ॥

१०७. दक्षिणीयानामपि दक्षिणार्हाणां द्विजानामपि दक्षि[7]ण्यो दक्षिणार्हः पूज्यः खे वर्तमान इन्दुर्ही विस्मये । कडंगरीयैः । अपिरत्र ज्ञेयः । वृषभादि[8]पशुभिरपि स्वधियैक्षि ज्ञातः । कीदृक् । स्थालीबिल्यै-हैयङ्गवीनकम् । इ[10]वोत्रावसीयते । स्थालीबि[11]ल्यं स्थालीबिलमर्हत्पाकार्हं मन्थन्यां पिण्डीकृतमित्यर्थः । य[12]द्धैयङ्गवीनकं ह्यो[13]गोदोहस्य

१ **बी** °न्रस्मीन्व्य°. २ **ए** °सकुमु°. ३ **ए** °दनाम्. ४ **ए** दक्षणी°. ५ **ए** °न्दुः स्वाधि°. ६ **बी** °धियैः क्षि°. ७ **ए** °यैर्हं स्था°. **बी** यैर्हां स्था°. ८ **बी** बिलार्हैंगवी°. ९ **ए** °ल्यहेयगवी°.

१ **ए** °त्र म°. २ **ए** °त्वात्पत्र°. ३ **सी** गरं. ४ **ए** °न्तो तृषा. ५ **सी** °कामि°. ६ **बी** °र्हंतं वा. ७ **ए सी** °क्षिणो द°. ८ **सी** °पशूना°. ९ **ए** °ल्यहेय°. १० **ए** इत्रोत्रा°. ११ **बी** °बिल°. १२ **ए** यद्धेय°. १३ **ए** °गोदेह°.

विकारस्तदिव पशूनामपि सद्य उत्तीर्णनवनीतपिण्डवच्चन्द्र आह्लादकोभूदित्यर्थः । यद्वा ही खेदे । सकलजगत्पूज्योपीन्दुः पशुभिः स्वतुच्छबुद्ध्या नवनीतपिण्डक इव ज्ञात इत्यर्थः ॥

पा[1]त्र्यम् । पात्रियान् । अत्र "पात्रात्तौ" [१८०] इति य-इयौ ॥

दक्षिणीयानाम् । दक्षिण्यः । कडंगरीयैः । कडंगर्याः । स्थालीबिलीयम् । स्थालीबिल्य । इत्यत्र "दक्षिणा०" [१८१] इत्यादिना-ईययौ ॥

छैदिको भै[1]दिकः शीर्षच्छेद्यः किं न विधुंतुदः ।
इति वैरङ्गिकोप्यूचे विधोरानन्दितः करैः ॥ १०८ ॥

१०८. वैरङ्गिकोपि विरागमर्हन्नीरागो मुनिरपि विधोरिन्दोः करैरानन्दितः सन्नूचे । किमित्याह । विधुंतुदो [2]ग्रसनेन [3]विधो[4]र्व्यथको राहु[5]श्छैदिको भैदिकः शीर्षच्छेद्यः किं न । छेदं द्विधाकरणम् । भेदं विदारणम् । शीर्षच्छेदं [6]च किं नित्यं [7]नार्हति किं त्वर्हत्येवेति ॥

अपकौपीनशालीनैरार्त्विजीनैरिवाम्बुजैः ।
स्थितं संकुच्य चक्रै[2]श्च शैर्षच्छेदिकमानिभिः ॥ १०९ ॥

१०९. अम्बुजैश्चक्रैश्चक्रवाकैश्च संकुच्य स्थितम् । य[8]तः शैर्षच्छेदिकमानिभिश्चन्द्रविपक्षस्यार्कस्याश्रितत्वेनेन्दुना शीर्षच्छेदार्हं [9]स्वं मन्यमानैरिव । ये हि विपक्षाश्रितत्वेन स्वं राज्ञा शीर्षच्छेदार्हं मन्यन्ते तैर्भयात्कुत्रापि संकुच्य स्थीयते । यथार्त्विजीनैर्ऋत्विजं [10]यायजूकमर्ह-

१ ए °दिका शी°. २ बी °श्च शीर्ष°.

१ ए °त्र्य । पा°. २ बी ग्रसेने°. ३ ए विधौर्व्य°. ४ बी °धोव्यथ°. ५ ए °हुश्छेदि°. बी °हुच्छैदिकोभैदिकः. ६ ए च कि नि°. सी °च कि ना°. ७ ए किं अर्ह°. बी किं त्वार्ह°. ८ बी सी °तः शीर्ष°. ९ ए °र्हं स्वम°. १० बी सी याजयूक°.

द्धिर्यजमानैर्ऋत्विक्कर्मार्हद्भिर्ऋत्विग्भिरेव वा संकुच्य स्थीयते । कीदृशैः[1] सद्भिः । कूपप्रवेशनमर्हति कौपीनः । कौपीनशब्दः पापकर्मणि गोपनीयपायूपस्थे तदावरणे[2] च चीवरखण्डे वर्तते । अपगतं कौपीनं चीवरखण्डं येषां तेपकौपीना नग्ना अत एव लज्जया शालीनाः शालाप्रवेशमर्हन्तो[3] ये तैः ॥

छैदिकः । भैदिकः । अत्र "छेदादेर्नित्यम्" [१८२] इतीकण् ॥

वैरङ्गिकः । अत्र "विरागाद्विरङ्गश्च" [१८३] इतीकण् विरागस्य विरङ्गश्च[4] ॥

शीर्षच्छेद्यः शैर्षच्छेदिक । इत्यत्र "शीर्ष०" [१८४] इत्यादिना वा यः ॥

शालीनैः । कौपीन । आर्त्विजीनैः । एते[5] "शालीन०" [१८५] इत्यादिना निपात्याः ॥

चतुर्विंशः पादः ॥

गोष्विन्दोर्युग्यधुर्येषु द्विरध्येष्विव हारिषु ।
प्रासङ्ग्या नु भधौरेया न धौरेयकतां दधुः ॥ ११० ॥

११०. इन्दोर्गोषु कान्तिषु हारिषु दीप्रतया मुख्येषु सत्सु भधौरेया[6] धुरं यानमुखं भारं वा वहन्ति धौरेया मुख्यवृषभा उपचारादन्येपि मुख्या उच्यन्ते । भेषु नक्षत्रेषु धौरेया दीप्रतया[7] मुख्याः शुक्रादयो धौरेयकतां मुख्यतां न दधुः । इन्दुकरैर्निस्तेजसोभूवन्नित्यर्थः । यथा प्रासङ्ग्याः प्रासङ्गो यत्काष्ठं वत्सानां दमनकाले स्कन्ध आसज्यते तद्वहन्तो दम्यवृषा[8] धौरेयकतां मुख्यवृषभतां न दधति । केषु सत्सु । गोषु वृषभेषु । कीदृक्षु । द्विरध्येषु बलिष्ठत्वाद्द्वौ रथौ वहत्स्वत एव युग्यानां युगं वहतां वृषाणां[9][10] मध्ये धुर्येषु मुख्येषु ॥

---

१ सी °शैः । कू°. २ ए °वरेणे. ३ सी °शनम°. ४ ए °ङ्गस्य । शी°. ५ सी °ते शलीत्या°. ६ सी भधोरेया मुख्य°. ७ ए °तयं मु°. ८ बी द्रन्यवृ°. ९ ए °तां नृपाणां. १० सी वृषभाणां.

धुर्यो वामधुरीणाः सर्वधुरीणा मनोभुवः ।
धुरीणैः सर्वधुर्यैश्चेशै रन्तुं प्रावृतन् स्त्रियः ॥ १११ ॥

१११. स्त्रिय ईशैः सह रन्तुं प्रावृतन् । कीदृश्यः । मनोभुवो धुर्यो धुरं गाढरिरंसादिकरणरूपं कार्यप्राग्भारं वहन्त्यस्तथा वामधुरीणा यथा वामधुरां वहन्वृषभः सातिशयं भारं वहति तथा सातिशयं स्मरकार्यप्राग्भारं वहन्त्य इत्यर्थः । किं बहुना मनोभुवः सर्वधुरीणाः । किंभूतैः । ईशैर्मनोभुवो धुरीणैः सर्वधुर्यैश्च ॥

द्विरथ्येषु । युग्य । प्रासङ्ग्याः । अत्र "वहति०" [२] इत्यादिना वहत्यर्थे "यः" [१] इति यः ॥

धुर्येषु । धौरेयाः । अत्र "धुरो यैयण्" [३] इति यैयणौ ॥ कश्चित्तु यद्-एयकणावपीच्छति । धुर्यैः । टित्वादत्र ङीः । धौरेयकताम् ॥

वामधुरीणाः । सर्वधुरीणाः । अत्र "वामाद्यादेरीनः" [४] इतीनः ॥ सर्वधुर्यैः । अत्र यप्रत्ययोपीति कश्चित् ॥ धुरीणैः । अत्र केवलादपीन इत्यन्यः ॥

रामेण हालिकेनैकधुरीणो हालयाधिनोत् ।
रेवत्यैकधुरां कान्तां कोप्यूर्जन्गौर्न्वसैरिकः ॥ ११२ ॥

११२. कोपि युवा कान्तां हालया सुरयाधिनोदप्रीणात् । सुराम-पाययदित्यर्थः । कीदृग् । ऊर्जन्बलिष्ठः । यथासैरिकः सीरं हलमवहन्

१ ए °रीणा सर्व धु°. २ ए °नोश्रुवा । धु°. ३ ए °यैश्वशै. बी यैश्वशै रन्तं प्रा°. ४ ए कान्ता को°. ५ ए °जन्मोर्न्व°. बी °जन्गौन्वसै°.

१ ए °य विंशैः. २ बी °नोभवो. ३ सी °रं रि°. ४ ए °न्वृषः सा°. ५ ए °शयस°. ६ ए °हन्त इ°. ७ ए °नोभवो. ८ ए °धुर्येणैश्च. ९ बी °र्थे इ°. १० ए धुर्य । टि°. ११ सी °रीणा । अ°. १२ बी °त्र प्र°. १३ ए °त्यनः । रा°. १४ ए सी कान्ता हा°.

गौर्वृष ऊर्जन्हलवहनाभावेनात्रुटितबलः स्यात् । अत एव मद्यप्रियत्वाच्च हालिकेन हलं[१] वहता रामेण बलभद्रेणैकधुरीण एकां सदृशीं धुरां वहन्सदृशः सन्नित्यर्थः । कीदृशीं कान्ताम् । रेवत्या बलदेवभार्ययैकधुरां तुल्याम् ॥

एकधुराम् । एकधुरीणः । अत्र "अश्चैकादेः" [५] इति-अ ईनश्च ॥

हालिकेन । सैरिकः[६] । अत्र "हल०" [६] इत्यादिनेकण् ॥

तोत्रैर्द्विशकटानुक्ष्णो यथा द्वैशकटी[१] पुमान् ।
मधुमत्तान्स्मरो यूनो विव्याधोरस्यसायकैः ॥ ११३ ॥

११३. स्मर उरो हृदयं विध्यन्त्युरस्या ये सायका बाणास्तैः कृत्वा मधुमत्तान्मद्यपानेन क्षीबान्यूनस्तरुणांस्तरुणीश्च विव्याधाताडयत् । यथा द्वे शकटे वहन्ति द्वैशकटा वृषाः सन्त्यस्य द्वैशकटी पुमान् द्विशकटान्द्वयोः शकटयोर्वोढॄनुक्ष्णो वृषांस्तोत्रैः प्रवयणैः कृत्वा विध्यति ॥

द्वैशकटी[१०] । इत्यत्र "शकटादण्" [७] इत्यण् ॥ ननु च "तस्येदम्" [६.३.१६०] इति शकटादण् सिद्ध एव । यो हि यद्वहति स तस्य संबन्धी स्यात् । सत्यम् । रथवदेव तदन्तार्थमुपादानम् । तेनात्रापि द्विगौ[११] द्वैरूप्यं स्यात् । द्वितीयं तु रूपं द्विशकटान् ॥

उरस्य । इत्यत्र "विध्यति०" [८] इत्यादिना यः ॥ अनन्येनेति किम् । स्मरो यूनो विव्याध सायकैः । अत्र हि स्मरो यूनो विध्यन्[१२]सायकैर्विध्यति ॥

---

१ सी °कटिकी पु°.

---

१ ए °लं दह°. २ बी °धुरेण. ३ बी सी धुरं व°. ४ बी सी °म् । रैव°. ५ सी °लभद्रभा°. ६ सी °रिक । अ°. ७ ए वृषा स°. ८ बी वृषास्तो°. ९ सी °यणोः कृ°. १० सी °टी । तत्र. ११ सी द्विगो द्वै°. १२ बी °ध्यन्स्तोय°.

धन्या गण्यान्नेवातुल्यं हृद्यपथ्यं न मध्वधात् ।
जिज्ञासुः प्रेयसो भावं मधुवश्यस्य काचन ॥ ११४ ॥

११४. काचन मधु मद्यं नाधान्नापिबत् । कीदृग् । हृद्यपथ्यं हृद्यं हृदयस्य प्रियमपि पथ्यं रोगोपशमकमपि तथातुल्यं पेयवस्तुषु मध्येऽत्युत्कृष्टमपि । यतः कीदृशी । मधुवश्यस्य मत्तस्य प्रेयसो भावमनुरागविषयमभिप्रायं जिज्ञासुः । यथा धन्या धनं लब्ध्री वेश्या गण्या च गणं पुरुषसमूहं लब्ध्री कुलटा चान्ना चान्नं धान्यं लब्ध्री दासी च पुरुषस्य भावं जिज्ञासुः सती मधु न पिबति ॥

अमूल्यपद्यकस्तूरीलेखां नु ललितालकैः ।
अतिजन्यवयस्यास्ये चक्रे हाला मृगीदृशाम् ॥ ११५ ॥

११५. हाला सुरा मृगीदृशामास्ये मुखेषु ललितालकैर्मत्ततावशेनेतस्ततो लुंठितैश्चूर्णकुन्तलैः कृत्वा चक्रे । काम् । अमूल्या मूल्यं विना सुधिकयैव(?) संपन्नेत्यर्थः। तथा पदमर्स्या दृश्यं पद्या नातिद्रवा नातिशुष्केत्यर्थः । या कस्तूरी तस्या लेखां नु मण्डनविच्छित्तिमिव । अत एव कीदृग् हाला । अतिजन्यवयस्या जनीं वधूं वहन्ति जन्या जामातुः स्निग्धा वयस्याः सख्यो द्वन्द्वे ता अतिक्रान्ता तत्तुल्येत्यर्थः । जामातृवयस्याः स्वसख्योपि हि वधूमुखेषु कस्तूरीलेखां कुर्वन्ति ॥

---

१ **सी** धन्यग°. २ **ए** °थ्यं मम°. ३ **बी** न ध्व°. ४ **बी** °खां तु लु°.

---

१ **ए** कापि म°. २ **सी** °यम°. ३ **सी** °ल्यं प्रेय°. ४ **बी** °प्राय जि°. ५ **बी** °नं वे°. ६ **ए** चान्न धा°. ७ **ए** भाव जि. ८ **बी** मुख्येषु. ९ **सी** °खेप्युललि°. १० **ए सी** लुचितै°. ११ **ए** °ना सुधि°. १२ **सी** °मस्य दृ°. १३ **ए सी** तस्यां ले°. १४ **बी** °खां तु म°. १५ **ए सी** वधू व°. १६ **सी** °ता तुल्ये°. १७ **सी** °रातिले°.

धनी धेनुष्यया धर्म्यो गार्हपत्येन ना यथा ।
नदी नाव्यै[1]र्जलै[2]र्वासां[3] क्रीडयाप्रीयत स्मरः ॥ ११६ ॥

११६. आसां स्त्रीणां क्रीडया मद्यपानकेल्या[1] स्मरोप्रीयत विजृम्भित इत्यर्थः । यथा धेनुष्ययाधमर्णेनोत्तमर्णाय[2] ऋणप्रदानाद्दोहार्थं[3] धेनुर्दीयते सा धेनुरेव धेनुष्या पीतदुग्धेति यस्याः प्रसिद्धिस्तया कृत्वा धनीश्वर उत्तमर्णः प्रीयते । यथा वा गार्हपत्येनाग्निभेदेन कृत्वा धर्म्यो धर्मादनपेतो धार्मिको[4] ना नरः प्रीयते । यथा वा नाव्यै-[5]र्नावा तार्यै[6]र्जलैः[7] कृत्वा नदी प्रीयते विजृम्भत इत्यर्थः ॥

विष्यः कोपीति न न्याय्यमर्थ्यं मत्यमिति स्मरन् ।
गुडकल्पेन ताः कामो मद्यास्त्रेणाक्षिपत्ततः ॥ ११७ ॥

११७. ततो विजृम्भणानन्तरं कामो गुडकल्पेनेषदपरिसमाप्तगुडेन[8] प्रायो गुडमयेनेत्यर्थः । मद्यास्त्रेण कृत्वा[9] ता अङ्गना अक्षिपन्निराचक्रेहन्नित्यर्थः । यतः स्मरन् । किमित्याह । कोपि शत्रुरपि विष्यो विषेण वध्य इत्येतन्नार्थ्यमर्थादर्थशास्त्रादनपेतं न । यो गुडेनापि[10] म्रियते स शत्रुरपि विषेण न वध्य इत्युक्तेरिदं[11] नीतिशास्त्रोत्तीर्णमित्यर्थः । अत एवं[12] न न्याय्यं न युक्तमत एव च न मत्यं मतस्याभीष्टस्य करणं न कस्याप्येतन्न संमतमित्यर्थ इति ॥

धन्या । गण्या[13] । इत्यत्र "धन०" [९] इत्यादिना यः ॥

१ **ए** नाध्यैर्जलेर्वासां. २ **बी** °व्यैजलै°. ३ **सी** °वासं क्री°.

१ **ए** °केल्यां स्म°. २ **बी** °मर्णाया ऋ°. ३ **ए** °नाद्दौहा°. ४ **बी** °को न°. ५ **ए** नान्येनावा. ६ **बी** तार्वैर्ज°. ७ **ए** °र्यैजलैः. ८ **ए** °ल्पेनैष°. ९ **ए** °त्वा अ°. १० **बी** °पि मृयते स सत्रु°. ११ **ए** °रिदानींति°. १२ **ए** °व न्या° १३ **ए** गणा । इ°.

आम्ना। इत्यत्र "णोन्नात्" [१०] इति णः ॥

हृद्य। पद्य। तुल्यम्। मूल्य। वंश्यस्य[1]। पथ्यम्। वयस्या। धेनुष्यया। गार्हपत्येन। जन्य। धर्म्यैः। इत्येते "हृद्यपद्य०" [११] इत्यादिना निपात्याः ॥

नाव्यैः। विष्यः। अत्र "नौ०" [१२] इत्यादिना यः[2] ॥

न्याय्यम्। अर्थ्यम्। अत्र "न्याय०" [१३] इत्यादिना यः[3] ॥

मत्यम्। मद्य। अत्र "मत०" [१४] इत्यादिना यः ॥

कृता सामन्यया मद्यातिथेय्यासीत्तथा प्रिया।
वासतेय्यां न पाथेयस्वापतेयं यथा नृणाम् ॥ ११८ ॥

११८. मद्यातिथेयी[4] मद्यमेवाह्लादकत्वादातिथ्यं तथा प्रियस्य प्रियाभीष्टासीद्यथा पाथेयस्वापतेयं संबलद्रव्यं नृणां न प्रियं स्यात्। यतः कीदृशी[5]। सामन्यया सामनि सामोक्तौ साध्व्या[6] प्रियया वासतेय्यां वसतौ साध्व्यां[7] रात्रौ[8] कृता प्रियं प्रति। संबलद्रव्यं किल पथि जीवनतुल्यत्वान्नृणामतिप्रियं स्यात्तस्मादपि प्रियया स्वयंकृतत्वेन मद्यातिथेयी प्रियस्यातिप्रियाभूदित्यर्थः ॥

सामन्यया[9]। इत्यत्र[10] "तत्र साधौ" [१५] इति यः ॥

पाथेय। आतिथेयी। वासतेय्याम्। स्वापतेयम्। अत्र "पथि०" [१६] इत्यादिनैयण्[11] ॥

भाक्तशालिभुवं हालां पीत्वा[1] पारिषदैः प्रियैः।
नापारिषद्यं पार्षद्याः पार्षदेषूचिरे स्त्रियः ॥ ११९ ॥

---

१ सी °त्वा परि°.

---

१ ए वशस्य. २ सी यः। कृता. ३ ए यः। कृता. ४ बी °थेयाम°. ५ ए °कत्वां ति°. ६ ए °दृशीः सा°. ७ ए साध्या प्रि°. ८ ए साध्यां रा°. ९ ए सामान्य°. १० बी °त्र सा°. ११ ए °दिनेय°.

११९. स्त्रियः पार्षदेषु पर्षदि सभायां साधुषु विचक्षणेष्वित्यर्थः । प्रियेषु विषयेपारिषद्यं सभायामनुचितं ग्राम्यं वचो मदवशान्नोचिरे । यतः पार्षद्या विचक्षणाः । सदा सदभ्यस्तसभ्यवचना इत्यर्थः । किं कृत्वा । पारिषदैः प्रियैः सह हालां पीत्वापि । किंभूताम् । भक्त ओदने साधुर्भाक्तो यः शालिस्तस्माद्भूरुत्पत्तिर्यस्यास्ताम् । हाला हि शालिपिष्टक्षेपेण संधीयते ॥

भाक्त । इत्यत्र "भक्ताण्णः" [१७] इति णः ॥

पार्षद्याः । पार्षदेषु । इत्यत्र "पर्षदो ण्यणौ" [१८] इति ण्यणौ ॥ परिषदोपीच्छन्त्यन्ये । पारिषद्यम् । पारिषदैः ॥

जितोप्यास्यैः शशी सार्वजन्यः सार्वजनीनगुः ।
अचिचेष्टन्मदाचेष्टाः सतां प्रातिजनीनता ॥ १२० ॥

१२०. शशीन्दुरास्यैः कृत्वा स्त्रीभिर्जितोपि मदाचेष्टा अतिरिक्तमद्यपानोत्थक्षीबतया निश्चेतनीभूताः स्त्रीरचिचेष्टत् । शीतकिरणैर्मदस्योपशमनात्सच्चेतनीचक्रे । कीदृक्सन् । सार्वजन्यः सर्वजनेषु शत्रुष्वशत्रुषु चाह्लादकत्वात्साधुस्तथा सार्वजनीनाः सर्वजनेषु साधवो गावः किरणा यस्य सः । अथ च यः सार्वजन्यः सज्जनः स्यात्स सर्वजनीना गावो वाचो यस्य स तथा स्यात् । युक्तं चैतत् । यदास्यैर्जितोपि शशी स्त्रीरचिचेष्टद्यतः सतां साधूनां प्रातिजनीनता प्रत्यर्थिनो जनाः प्रतिजनाः शत्रवस्तेष्वपि साधुता स्यात् ॥

१ बी सार्धज°.

१ सी °त्वा । परि°. २ ए °ण सींधी°. ३ बी °ते । भोक्त. ४ बी पारिषदै°. ५ सी महाविष्टा. ६ बी °शमात्स°. ७ बी °त्रुषु. सी °त्रु आह्ला°. ८ बी °त्सर्व°. ९ बी °त् । यादा°. १० सी °नां प्रीति°. ११ बी सी °नताः प्र°.

सांयुगीनमनङ्गस्य काथिकं गौणिकं मधु ।
देवानां देवदेवत्यं पुष्ट्यै हविरिवाभवत् ॥ १२१ ॥

१२१. मधु मद्यमनङ्गस्य पुष्ट्यै पोषायाभवत् । यतोनङ्गस्य काथिकं कामोद्दीपकत्वेनानङ्गकथायां साधु । तथानङ्गस्य गौणिकं गुण उपकारे साधूपकारकं तथानङ्गस्य सांयुगीनं संयुगे रणे साधु । देवदेवत्यं हविरिव । देवताशब्देन देवस्य हविरादेः प्रतिगृ(ग्र)हीता स्वामी संप्रदानमुच्यते । देवाश्च ते देवताश्च ताभ्य इदं हव्यं यथा देवानां पुष्ट्यै स्यात् ॥

सार्वजन्यः । सार्वजनीन । इत्यत्र "सर्व०" [१९] इत्यादिना ण्य ईनञ्च ॥

प्रातिजनीनं । सांयुगीनम् । अत्र "प्रति०" [२०] इत्यादिनेनञ् ॥

काथिकम् । गौणिकम् । अत्र "कथादेरिकण्" [२१] इतीकण् ॥

देवदेवत्यम् । अत्र "देवता०" [२२] इत्यादिना यः ॥

तदार्घ्यपाद्यमातिथ्यं प्रियाभ्यः पूर्वतोधिकम् ।
आसेदुः कामिनो हल्याद्द्विहल्यातः फलं यथा ॥ १२२ ॥

१२२. तदा मद्यपानकाले कामिनः प्रेयसीनां स्मरातुरतया प्रियाभ्यः सकाशादासेदुः प्रापुः । किमित्याह । आतिथ्यम् । किमातिथ्यमित्याह । अर्घ्यपाद्यमर्घः पूजोपचारस्तस्मायिदमर्घ्यं स्रग्विलेपनादि तथा पादायेदं पाद्यमुदकादि । द्वन्द्वे तत् । कीदृशमासेदुः ।

१ बी काविकगौ॰. २ बी ॰सेदु का॰.

१ ए ॰स्य सं॰. २ बी ॰न हे देवस्य. ३ सी देवस्य. ४ ए देता॰. ५ बी इदह॰. ६ सी ॰जनी॰. ७ सी ॰नता । सां॰. ८ बी कायिक॰. ९ ए ॰दिनेयः. १० ए तथा म॰. ११ बी ॰पाने का॰ १२ सी किमि॰.

पूर्वतोधिकं मद्यपानकालाद्यत्पूर्वमातिथ्यं तस्मादतिरिक्तम् । यथा हल्यादेकस्माद्धलकर्षाद्यत्फलं स्यात्ततोधिकं द्विहल्यातो द्वयोर्हलयोः कर्षात्सकाशाल्लोका आसादयन्ति ॥

पाद्यम् । अर्घ्यं । इत्येतौ "पाद्यार्घ्ये" [२३] इत्यनेन निपात्यौ ॥

आतिथ्यम् । अत्र "ण्योतिथेः" [२४] इति ण्यः ॥

हल्यात् । इत्यत्र "सादेश्चातदः" [२५] इत्यधिकाराद् द्विहल्यातः । इत्यत्र च "हलस्य कर्षे" [२६] इति यः ॥

आमिक्षीयमनामिक्ष्याद्विसीत्यं सीत्यतो यथा ।
अत्यशेत प्रियागण्डूषासवश्चषकासवात् ॥ १२३ ॥

१२३. चषकासवाच्चषकेभ्यः प्राप्तान्मद्यात्सकाशात्प्रियागण्डूषासवः प्रियामुखेभ्यः प्राप्तं मद्यमत्यशेत । प्रेमातिशयोल्लासकत्वेन प्रियाणामतिसुस्वादुभूदित्यर्थः । यथा शृते क्षीरे दधि क्षिप्तमामिक्षा तस्यायिदं दध्यामिक्षीयमनामिक्ष्यात्सकाशादतिशेते । यथा वा द्विसीत्यं सीता लाङ्गलपद्धतिः । सस्यं वा द्वाभ्यां सीताभ्यां संगतं क्षेत्रं सीत्यत एकया सीतया संगतात्क्षेत्रादतिशेते ॥

ओदनीयैर्यथौदन्यमपूपीयमपूप्यकैः ।
तन्दुल्यं तन्दुलीयैर्वा स्त्रीणां मद्यैर्मदोवृधत् ॥ १२४ ॥

१२४. स्त्रीणां मद्यैर्मदः क्षीबतावृधत् । यथौदन्यमोदनायेदं

१ ए °षावसश्च°. २ ए °कावमात्. ३ बी °यथोद°. ४ ए °णां माद्यै°.

१ सी °पानाद्य°. २ बी °हल्यातोर्द्वयो°. ३ ए °तोधिकं द्विहल्यातो द्व°. ४ बी अर्घ । इ°. ५ सी °र्घ्यमेतौ. ६ सी °द्यार्घे इ°. ७ ए बी चकषास°. ८ सी °शादतिशेते ।. ९ बी °णामिति°. १० ए °मिक्षात्म°. ११ ए °शातिशात°. १२ सी °शा सं°. १३ बी यथोद°.

स्तोकतन्दुला ओदनीयैरोदनार्थैर्बहुभिस्तन्दुलैः कृत्वा वर्धते । एवमग्रेपि योजना कार्या । अपूपायेदमपूपीयं पिष्टकणिक्काघृतदध्यादि । तथा तन्दुलेभ्य इदं व्रीह्यादि तन्दुल्यम् ॥

सीत्यतः । द्विसील्यम् । अत्र "सीतया संगते" [२७] इति यः ॥

हविर्भेद । अनामिक्ष्यात् आमिक्षीय । अन्नभेद । ओदन्यम् ओदनीयैः । अपूपादि । अपूप्यकैः अपूपीयम् । तन्दुल्यम् तन्दुलीयैः । अत्र "हविरन्न०" [२९] इत्यादिना वा यः ॥ पक्षे "ईयः" [२८] इत्यधिकृत ईयः ॥

शङ्कव्यीकुरुते युग्यं नभ्यं स्रुच्यं च दारु कः ।
नोष्णीषीचक्रिरे नाभ्यं वसनान्तं मदेपि ताः ॥ १२५ ॥

१२५. ता नायिका मदेपि नाभ्यं नाभये हितं नाभिदेशस्थमित्यर्थः । वसनान्तमन्तशब्दः शोभार्थो वस्त्रश्रेष्ठमधोवसनं नोष्णीषीचक्रिरे । सदा सदभ्यस्तलज्जावशेन मदेनात्यन्तं वैकल्यस्याभावाच्च न मूर्धवेष्टनीचक्रुः । दृष्टान्तमाह । दारु काष्ठं कः शङ्कव्यीकुरुते कीलकार्थदारु करोति न कोपीत्यर्थः । यतः कीदृशम् । युग्यं नभ्यं स्रुच्यं च । युगो यूपः । अरकमध्यवर्त्यक्षधारणश्चक्रावयवो नाभिः । स्रुग् यज्ञोपकरणं दर्वी । एतेभ्यो हितमेतेस्य स्युरिति वा तन् ॥

उवर्ण । शङ्कव्यीकुरुते । युगादि । युग्यम् । स्रुच्यम् । अत्र "उवर्ण०" [३०] इत्यादिना यः ॥

१ बी स्रुभ्यं च.

१ सी °र्या । आपू°. २ बी °भेदः । अ°. ३ ए °न्दुली°. ४ बी °शास्थिनमि°. ५ बी °शब्दशो°. ६ सी °ल्यत्वाभा°. ७ ए स्रुभ्यं च. ८ ए °तेभ्य स्यु°. ९ सी युग्य स्रु°.

नभ्यम् । अत्र "नाभेर्०" [३१] इत्यादिना यो नाभेर्नभ् च ॥ अदेहांशादिति किम् । नाभ्यम् ॥

ऊधन्यवंस्तनस्पर्शी शुन्ये शून्यदृशं प्रियाम् ।
तुलामिव सकम्बल्यां घूर्णन्ती(न्तीं) कोपि सस्वजे ॥१२६॥

१२६. कोपि कामी शुन्ये शुने हिते विजनप्रदेशे प्रियां सस्वजे । आलिङ्गत् । कीदृशीं सतीम् । मदवशेन घूर्णन्तीं तुलामिव सकम्बल्यां कम्बलोस्य स्यात्कम्बल्यं परिमाणमूर्णापलशतमुच्यते । अशीतिशतमित्यन्ये । षट्षष्टिशतमित्यपरे । तेन सहिता तुला भाराक्रान्तत्वाद्यथा घूर्णति । तथा शुने हितं शून्यं विजनप्रदेशः । अत्र चोपचाराच्छून्ये विशिष्टचैतन्यव्यापाररहिते दृशौ यस्यास्ताम् । कीदृक्सन् । स्तनस्पर्शी प्रियास्तनौ स्पृशन् । यथोधसे हितं ऊधन्यो गोधुक् स्तनस्पर्शी दोहनाय गोस्तनस्पर्शकः स्यात् ॥

ऊधन्य । इत्यत्र "न्चोधसः" [३२] इति यो नश्चादेशः ॥

शुन्ये । शून्य । इत्यत्र "शुनः०" [३३] इत्यादिना यः । वश्च उरूप ऊरूपश्च स्यात् ॥

सकम्बल्याम् । अत्र "कम्बलान्नाम्नि" [३४] इति यः ॥

नाचार्याय ब्राह्मणाय राज्ञे वृष्णे हितास्तथा ।
यथासन्कामुकाः स्त्रीभ्यो मैरेयमदविह्वलाः ॥ १२७ ॥

---

१ बी °वस्ततनर्शी पुन्ये. २ ए तुल्यामि°.

---

१ ए °योर्नाभे°. २ ए °म् । औध°. ३ ए °म्बल्यां प°. ४ बी घूर्णति. ५ ए °हितौ दृ°. ६ ए यथौध°. ७ ए बी °त औध°. ८ ए स्तन्यस्पशी दो°. ९ सी °स्पशी दो°. १० ए °त् । औध°. ११ ए °शः । शून्ये. १२ बी °प उरू°. १३ बी °म्बल्यम्. १४ ए बी °लानाम्नि.

१२७. स्पष्टः । किं तु वृष्ण इन्द्रार्य । मैरेयो मद्यम् ॥

राज्ञे आचार्याय ब्राह्मणाय वृष्णे हिताः । अत्र "तस्मै हिते" [३५] इति प्राप्त ईयो "न राज०" [३६] इत्यादिना न स्यात् ॥

वाणिनीमणितैः कर्ण्यैर्मुमुदे कामिनां गणः ।
रथ्यवृष्यखल्यतिल्यमाष्ययव्यैरिवेतरः ॥ १२८ ॥

१२८. स्पष्टः । किं तु वाणिनीमणितैश्छेकानां मत्तानां च स्त्रीणां रतकूजितैः । कर्ण्यैः कर्णेभ्यो हितैः सुखदैः । रथाय हितो रथ्यः सममार्गस्तथा वृषेभ्यो वृषभेभ्यो हितो वृष्यो बुसादिर्यद्वा वृषाय मैथुनाय हितं वृष्यं क्षीरपाणं तथा खलाय हितं खल्यमग्निरक्षणं तथा तिलेभ्यो हितस्तिल्यो वातस्तथा माषेभ्यो हितो माष्यो वातस्तथा यवेभ्यो हितो यव्यस्तुषारो द्वन्द्वे एतैः कृत्वा यथेतरो ग्राम्यलोको रथ्याद्यर्थित्वान्मोदते ॥

मानं मत्तापि नौज्झत्काप्यजथ्याविथ्यवृत्तयः ।
ब्रा(ब्र?)ह्मण्याश्चारकीणा माणवीना वा भवन्ति किम् ॥१२९॥

१२९. काप्यतिमानिनी स्त्री मत्तापि मानं नौज्झत् । युक्तं चैतत् । यतो ये ब्रह्मणे ब्रह्मचर्याय ब्राह्मणाय वा चरकेभ्यो द्विजभेदेभ्यो माणवेभ्यो वा हिता भवन्ति धार्मिकाः स्युरित्यर्थस्तेजेभ्यश्छागेभ्यो हिता अजथ्या अजापालास्तथाविभ्य ऊ(उ?)रणेभ्यो हिता अविथ्या अविपाला द्वन्द्वे तेषामिव वृत्तिर्व्यापारो येषां ते निर्धर्माः किं भवन्ति ॥

१ ए °पि नोज्झ°.

१ ए °य । मेरे°. २ ए हिता अ°. ३ ए राज्य इ°. ४ सी °नां स्त्रीणां च र°. ५ बी °ततस्त°. ६ बी °पि मौनं. ७ ए °भ्यो द्विजभेदेभ्यो मा°. बी सी °भ्यो वा. ८ ए °भ्यश्चागे°. ९ बी °त्तिव्यापा°.

कर्ण्यैः । रथ्य । खल्य । तिल्य । यैव्यैः । वृष्य । ब्रह्मण्याः । माष्य । इत्यत्र "प्राणि०" [३७] इत्यादिना यः ।

अविथ्य । अजथ्य । इत्यत्र "अव्यजात्थ्यप्" [३८] इति थ्यप् ॥

चारकीणाः । माणवीनाः । अत्र "चरक०" [३९] इत्यादिनेनञ् ॥

आत्मनीनस्तदा यूनां स्त्रीभोगीणो निशामरुत् ।

जह्रे पञ्चजनीनः सर्वजनीनो रतश्रमम् ॥ १३० ॥

१३०. तदा निशामरुद्यूनां रतश्रमं जह्रे । कीदृक्सन् । पञ्चजनीनः सर्वजनीनश्च । रथकारपञ्चमस्य चातुर्वर्ण्यस्य पञ्चजन इति संज्ञा । पञ्चजनेभ्यः पञ्चजनाय वा सर्वजनेभ्यश्च हितः शैत्यादिगुणैः सुखदोत एव स्त्रीभोगीणो नारीसंभोगाय हितोत एव यूनामात्मनीन आत्मने हितः ॥

मरुद्विश्वजनीनोताय्यमाहाजनिकं सरम् ।

हितः सार्वे न्वसर्वीये यः सार्वजनिकः स हि ॥ १३१ ॥

१३१. विश्वजनीनः सर्वलोकेभ्यो हितः सन्मरुत्सरमतायि पालितवानवर्धयदित्यर्थः । किंभूतंम् । अमाहाजनिकं महान्पूज्यो जनो मुनिलोकस्तस्मै हितो माहाजनिको न तथा तमपि । युक्तं चैतत् । हि यस्मादसर्वीयेपि न सर्वेभ्यो हितेपि नरे सार्वे नु सर्वस्मै हित इव यो हितोनुकूलः स्यात्स सार्वजनिकः सर्वस्मै जनाय हितः ॥

---

१ ए °नीनेः स°. २ ए °निकस°. ३ सी °तः सर्वे.

---

१ बी सी यव्यै । वृ°. २ ए प्राण्मि इ°. ३ ए सी °कीणा । मा°. ४ बी सी °वीना । अ°. ५ ए °दामिनि°. ६ सी °नीनश्च. ७ ए °गीणाना°. ८ बी सी °संगा°. ९ बी °र्धयेदि°. १० ए °तमहा°. ११ सी अमहा°. १२ बी सी °तो महा°. १३ ए °थाम°. १४ बी स्यात्सार्वज्ञज°.

स्त्रीभोगीणः । आत्मनीनः[1] । अत्र "भोग०" [४०] इत्यादिनेनः ।

पञ्चजनीनः । सर्वजनीनः । विश्वजनीनः । अत्र "पञ्च०" [४१] इत्यादिनेनः[2] ॥

माहाजनिकम् । सार्वजनिकः । अत्र "महत्०" [४२] इत्यादिनेकण् ॥

सार्वे[3] । सर्वीये । अत्र "सर्वाण्णो वा" [४३] इति वा णः ॥

अङ्गं विरहिणीनां[1] दार्वङ्गारीयमिवादहत् ।
वार्ध्रौपानह्यचर्मेवादारयच्च[2] मनः स्मरः ॥ १३२ ॥

१३२. स्मरो विरहिणीनामङ्गमदहत्संतापितवान् । यथा कश्चिदङ्गारीयमङ्गारार्थं दारु दहति । तथा स्मरो विरहिणीनां[4] मनोदारयद्यथा वर्ध्रायेदं[5] वार्ध्रमुपानहे[6] पादुकायायिदमौपानह्यं च चर्म[7] चर्मकृद्वर्ध्राद्यर्थं[8] दारयति ॥

हृदयं कस्य नामश्नात्स्मर उच्छृङ्खलस्तदा ।
यथार्षभ्यश्छादिषेयतृणबालेयतन्दुलान्[3] ॥ १३३ ॥

१३३. पूर्वार्धं स्पष्टम् । छदिषे छादनायेमानिच्छादिषेयाणि[9] यानि तृणानि तानि तथा बलय इमे बालेया ये तन्दुलास्ते तथा द्वन्द्वे तान्यथा[10] ऋषभायायमार्षभ्यो वत्स उच्छृङ्खलः सन्खादनेन मश्नाति ॥

अङ्गारीयं दारु[11] । इत्यत्र[12] "परिणामिनि०" [४४] इत्यादिनेयः ॥

वार्ध्रं । इत्यत्र "चर्मण्यञ्" [४५] इत्यञ् ॥

---

१ बी °रहणी°. २ ए वार्ध्रौपा°. बी वार्ध्रोपा°. ३ बी °र्षभश्छा°.

---

१ ए °नीयः । अ°. २ बी सी °नेन । मा°. ३ ए सार्वं । स°. ४ ए °रहणी°. ५ बी वर्धाये°. सी वध्राये°. ६ सी वाध्रमु°. ७ बी सी °र्मकृ°. ८ ए °द्वध्राद्यर्थं दा°. सी °द्व्य°. ९ बी °नायेमनि°. सी °नायेनि°. १० ए तान्व्यथा. ११ ए °रीय दा°. १२ सी °त्र च्छदिर्.

आर्षभ्यैः[1] । औपानह्य । इत्यत्र "ऋषभ०" [४६] इत्यादिना ञ्यः ॥

छादिषेय । बालेय । इत्यत्र "छदिर्०" [४७] इत्यादि[2]नैयण् ॥

इष्टकौ[1]घैः प(पा?)रिखेयप्राकारीयैर्यथा भुवः ।

पारि[2]खेय[3]प्राकारीयाः कान्ताः कातैः[4](न्तैः) स्मरोयुनक् ॥१३४॥

१३४. स्मरः कान्ताः कान्तैः सहायुनक् संयोजितवान् । यथा कश्चिद्वर्धकिरिष्टको(कौ)घैः सह भुवः परिखाप्राकारनिष्पत्तये युनक्ति । यतः कीदृ[3]शीः । परिखा प्राकारश्चासु स्यात्पारि[4]खेयप्राकारीयाः । किंभूतैः । परिखा प्राकारश्चैषां स्याद्बहुत्वात्पारिखेयप्राकारीयास्तैः ॥

पारि[5]खेयैरिष्ट[6]कौघैः । अत्र "परिखास्य स्यात्" [४८] इत्येयण् ॥

पारिखेया भुवः । अत्र "अत्र च" [४९] इत्येयण् ॥

प्राकारीयैः । प्राकारीयाः । अत्र "तद्" [५०] इति यथाविहितमीयः ॥

आचरन्कामवत्कामः क्षत्रवत्प्रहरंस्तथा ।

तृणवन्मानिनीर्धून्वन्भृत्यवत्सेवितो न कैः ॥ १३५ ॥

१३५. कामो भृत्यवद्भृत्यैरिव कैर्न सेवितः । कीदृक्सन् । कामवत्का[7]मार्हं यथा स्यादेवमाचरन् । त्रैलो[8]क्येनापि स्वशा[9]सनं मूर्ध्नि वाहयन्नित्यर्थः । तथा क्षत्रवत्[10]क्षत्रिय इव प्रहरन्नत एव मानिनीस्तृणवद्धून्वन्मानात्पातयन्नित्यर्थः । योपि क्षत्रियः प्रहरंस्तृणानीव मानिनो धूनोति स भृत्यैरिव कैर्न सेव्यते ॥

---

१ बी सी °ष्टकोघैः. २ बी °रिषेय°. सी °रिषय°. ३ बी °यप्रका°. ४ सी कातै स°.

---

१ बी °भ्यः । उपा°. २ ए दिनेय°. ३ बी सी °दृशी । प°. ४ सी °रिषेय°. ५ बी °रिषेयिरि°. ६ बी °ष्टकोघैः. ७ ए °त्कामर्हिं य°. ८ ए °लोकोना°. ९ ए °शानं. १० ए °वत्क्षित्रयप्र°.

प्रतीच्यै[1] स्पृहयञ्श्रीवद्द्रुवत्खाच्छश्यवातरत्[2] ।
द्रष्टुं[3] ताः पूर्वदद्रौ स्त्रीः पूर्वदद्रेरुत[4] श्रियम् ॥ १३६ ॥

१३६. शशी द्रुवद्वृक्षादिव खादवातरदुत्ततार । यतः[1] प्रतीच्यै पश्चिमायै स्पृहयञ्श्रीवद्यथा कश्चिच्छ्रियै[2] स्पृहयत्यस्तं जिगमिषन्नित्यर्थः । उत्प्रेक्ष्यते । द्रष्टुमिव । काः । पूर्वत्पुर्यामिवाद्रावर्बुदे[3] वर्तमानास्ताः सुरतासक्ताः स्त्रीः । उताथ वा[4] पूर्वत्पुरस्येवाद्रेरर्बुदस्य श्रियं प्राग्वर्णितां[5] शोभाम् । चन्द्रस्यास्तोन्मुखत्वेनाकाशादवतीर्णत्वादर्बुदस्य[6] च पश्चिमदिग्वर्तित्वेनेन्दु[7][8]निकटत्वाच्चैवमाशङ्का । अन्योपि यो नीचैःस्थं वस्तु[9] व्यक्त्या द्रष्टुमिच्छति स उच्चस्थानादवतरति[10] ॥

आचारन्कामवत् । इत्यत्र "तस्य०" [५१] इत्यादिना वत् ॥

क्षत्रवत्प्रहरन् । तृणवन्मानिनीर्धून्वन् । भृत्यवत्कैर्न सेवितः । प्रतीच्यै[11] श्रीवत्स्पृहयन् । द्रुवत्खादवातरत् । इत्यत्र "स्यादेरिवे" [५२] इति वत् ॥

पूर्वदद्रौ[12] । अत्र "तत्र" [५३] इति वत् ॥

पूर्वदद्रेः[13] श्रियम् । अत्र "तस्य" [५४] इति वत् ॥

गोतावतो यथा गोत्वं शुक्लत्वं शुक्लतावतः ।
प्रबोधित्ववतो राज्ञस्तथाथाभूत्प्रबोधिता ॥ १३७ ॥

१३७. स्पष्टः । किं तु प्रबोधित्ववतः प्रबोधो जागरणं बुद्धिश्चा[14][15]-

१ ए °तीत्यै स्पृ°. २ बी °च्छस्यवा°. ३ ए द्रष्टुतापू°. ४ ए °वैवद्रे°.

१ ए यता प्र°. २ सी °च्छ्रितये. ३ बी °वेपुर्या°. ४ बी वात्पूर्व°. ५ सी °र्णितशो°. ६ बी °स्य प°. ७ बी °ग्वर्त्तत्वे°. ८ ए °त्वेनैन्दु°. ९ बी सी °स्तु वत्तया. १० ए °तरंति. ११ सी °तीच्यैः श्री°. १२ ए °र्वदिद्रौ. १३ बी °वंद्रेः. १४ ए बुश्चिश्चा°. १५ सी °द्धिरस्या°.

स्यास्ति प्रबुध्यत इत्येवंशीलो वा प्रबोधी[1] तस्य भावः प्रबोधित्वं[2] तद्वतो जागरूकस्य धीमतश्च[3] सतो राज्ञः कुमारपालस्य । अथ चन्द्रास्तानन्तरं प्रबोधिता जागरणं प्रयाणकविषया बुद्धिश्च ॥

डित्थत्वराजपुरुषत्वधनैरबालि-
श्यागाडुलीकमजिरं नृपतेरभाजि ।
प्राची तमोगडुलतां हरता च सद्यो
देवेन चक्रगडुलत्वविमोचनेन ॥ १३८ ॥

१३८. डित्थत्वराजपुरुषत्वे धने येषां तैर्डित्थादिसंज्ञै राजपुरुषैः कर्तृभिरित्यर्थः । नृपतेः कुमारपालस्याजिरमावासभूमिरभाजि[4] । राज्ञः सेवार्थमाश्रितम् । कीदृशम् । अबालिश्यं बालिशानामभावाद्बालिश्येन मौर्ख्येण रहितं[5] च तदगाडुलीकं च कालुष्यवतामभावाद्गाडुल्या कालुष्येण रहितं च तत् । तथा तेन देवेन च रविणा च सद्यः प्राची पूर्वाभाजि[6] । उदितमित्यर्थः । कीदृशा सता । तमोगडुलतां[7] ध्वान्तकृतं कालुष्यं हरता । तथा चक्रगडुलत्वविमोचनेन चक्रवाकाणां विरहव्यथाकृतस्य चित्तकालुष्यस्य[8] त्याजकेन ॥

जातिवचनेभ्यो जातौ । गोत्वम् । गोता[9] ॥ गुणशब्देभ्यो गुणे । शुक्लत्वम् । शुक्लता ॥ समासात्संबन्धे । राजपुरुषत्व ॥ कृतस्तद्धिताच्च संबन्धे । प्रबोधित्व । प्रबोधिता[10] ॥ डित्थादेः स्वरूपे[11] । डित्थत्व । इत्यत्र "भावे त्वतल्"

१ बी °वालेश्या°.

१ ए °बोधां त°. २ ए °धितत्वं. ३ सी धीतमश्च. ४ सी °मावस्याभू°. ५ सी °णरणरहि°. ६ बी °र्वाभांजि. ७ बी °तां ध्वांक्षकृ°. ८ ए चित्तः का°. ९ सी गोता. १० ए °धिताः । डि°. ११ बी °रूपा डि°.

[५५] इति त्वतलौ ॥ "प्राक्त्वादगडुलादेः" [५६] इति त्वप्रत्ययात्प्राक्त्वतलावधिकृतौ ज्ञेयौ गडुलादीन्वर्जयित्वा ॥ अगडुलादेरिति किम् । गाडुली । बालिश्य ॥ गडुलादेरपि केचिदिच्छन्ति । गडुलत्व । गडुलताम् ॥ वसन्ततिलका छन्दः ॥

इति श्रीजिनेश्वरसूरिशिष्यलेशाभयतिलकगणिविरचितायां श्रीसिद्धहेमचन्द्राभिधानशब्दानुशासनद्व्याश्रयवृत्तौ सप्तदशः सर्गः ॥

द्व्याश्रयमहाकाव्ये

अष्टादशः सर्गः ।

कैरविण्यपटुताकृति पाथोजापटुत्वहृति तेजसि भूपः ।
सोथ धीप्रथिमतो जगदाबुध्याचतुर्यहरणः प्रचचाल ॥ १ ॥

१. अथ स[1] भूपः कुमारपालः प्रचचालान्नं प्रति प्रतस्थे । क सति । तेजसि रवेरुद्द्योते[2] । कीदृशे । कैरविण्यपटुताकृति कुमुदिनीनां संकोचकारके तथा पाथोजापटुत्वहृति पद्मसंकोचस्यापनेतरि । कीदृक्सन् । धीप्रथिमतो बुद्धेर्विस्ताराद्धेतोर्जगतो यदाबुध्येना[3]बुधत्वेनाज्ञानेनाचतुर्य[4] कृत्याकृत्यविषयमकौशलं तस्य हरणोपनेता पृथ्वीं[5] न्याये प्रवर्तयन्नित्यर्थः ॥ स्वागताच्छन्दः ॥

पार्थवेन[1] स बलस्य निरास्यद्[2]दिक्पृथुत्वमवनीपृथुतां च ।
ध्वान्तचण्डिमहरस्य[4] च चण्डत्वं रजोनिचयचण्डतयांशोः ॥२॥

२. स भूपो बलस्य पार्थवेन[6] विस्तारेण कृत्वा दिक्पृथुत्वं दिशां विस्तारमवनीपृथुतां च निरास्यन्निराचक्रे । तथा रजोनिचयचण्डतयाश्वखुराद्युत्खातधूलिनिकरनिबिडतया च कृत्वांशो रवेश्चण्डत्वं संतापकत्वेन तीव्रतां निरास्यत् । किंभूतस्य । ध्वान्तचण्डिमहरस्य । दिशो भूमिं च सैन्यैरर्कं च तद्रजोभिराच्छादितवानित्यर्थः ॥

---

१ बी सी पार्थिवे°. २ बी निस्यदिक्पृ°. ३ ए °स्यदिक्पृ°. ४ बी °मरहस्य.

---

१ ए स नृपः. २ बी सी °रुद्योते. ३ बी सी °बुद्धेना° ४ बी °नाचातु°. ५ बी पृथ्वी न्या°. ६ सी पार्थिवे°.

चाण्ड्यदार्ढ्य[1]वृढतास्पदमन्वव्राजि सव्रढिमसद्रढिमांसः ।
पार्थिवै[2]ः श्रितदृढत्वव्रढत्वै[3]र्वैरिवार्ढ्यदृढते स[4] हरिष्यन् ॥ ३ ॥

३. स कुमारपाल[1]ः श्रितदृढत्वव्रढत्वैराश्रितबलोत्साहैः पार्थिवैरन्वव्राज्यनुव्रजितः । यतो वैरिवार्ढ्य[2]दृढते आत्मस्योत्[3]साहबलौ(ले?) हरिष्यन्नपहर्[4]तुमनाः । ईदृशोपि कुत इत्याह । यतः सव्रढिमानौ सोत्साहौ स[5]द्रढिमानौ च सबलावंसौ स्कन्धौ यस्य सः । तथा चाण्ड्यं सत्त्वानभिभवनीयताहेतुर्भीमत्वगुणो वा(दा)र्ढ्यं बलिता दृ(वृ)ढतोद्यम एषामास्पदम् ॥

व्योम्न्यशुक्लिमनि शौक्ल्यदं[5]माभाच्छत्रमस्य निजशुक्लतयोच्चैः ।
क्ष्मापतित्वपिशुनं[6] श(स)मशुक्लत्वाधिपत्यमिव बिभ्रददभ्रम् ॥४॥

४. अस्य राज्ञश्छत्रमाभात् । कीदृक्सत्[6] । क्ष्मापतित्वपिशुनं नृपत्व[7]सूचकं तथादभ्रं संपूर्णं समशुक्लत्वाधिपत्यमिव समं सर्वं यच्छुक्लत्वं शुक्लो गुणस्तस्य स्वामित्वमिव बिभ्रत् । कया कृत्वा । उच्चैरतिशयितया नि[8]जशुक्लतया । अत एवाशुक्लिमनि कृष्णे व्योम्नि शौक्ल्यदं शुक्लतां ददत् । यो हि यस्या लक्ष्म्याः स्वामी स्यात्स तां लक्ष्मीं तल्लक्ष्मीदरिद्रस्य नरस्य ददद्गौरवास्पदत्वेन[9] शोभते ॥

---

१ बी सी °र्ढ्यदृढ°. २ बी °र्थिवै श्रि°. ३ ए बी °त्वदृढ°. ४ ए स हिष्य°. ५ बी °दमभा°. ६ ए °नं त्सम°.

---

१ ए °पालं श्रितदृढत्वै°. २ ए °र्ढ्यवृढ°. ३ बी °त्साहेब°. ४ ए °तुं-मानाः. ५ सी सदृढि°. ६ ए °त् । क्ष्म्याप°. ७ बी °त्वशूच°. ८ ए निशु°. ९ सी °न लभ°.

सा[1]ध्वधादिव दिवसपतिता[2]भृद्यौवराज्यमधिराजतया सः ।
मूढता[3]वियुगयन्नधिराजत्वाप्तमौढ्यरिपुनिर्दलनाय ॥ ५ ॥

५. स राजा[1] साधुयं(धु य)था स्यादेवं दिवसपतिताभृ[2]द्यौवराज्यमि-
[3]वेन्द्रर्युवराजतामिवाधाद्दधार । कीदृक्सन् । मूढता[5]वियुक् । तादृक्प्र-
चण्डवै[6]रिविरोध उपस्थि[7]तेपि व्याकुलचित्ततारहितो धीर इत्यर्थः ।
अत एवाधिराजत्वाप्तमौढ्यरिपुनिर्दलनार्या[8]धिको राजाधिरा[9]जस्तस्य
भावोधिराजत्वमधिकराज्यलक्ष्मीस्तेनाप्तं मौढ्यं मोहो[10] विचेतनत्वं येन
स तथा योरिपुरान्नस्तस्य निर्दलनायाय[11]न्गच्छन् । कया कृत्वा । अधि-
राजतया महासैन्यादिसंपदा । संपदुत्कर्षेण यान्कुमारपाल इन्द्र[12]स्य
युवराज इ[13]व जात इत्यर्थः ॥

राजतापि कविताप्यविमूढत्वान्यराज्यपरकाव्यजिदेव ।
इत्यसावरमगादरिराजत्वेप्सुरभ्युदितबन्दिकवित्वः ॥ ६ ॥

६. असौ राजारं शीघ्रमगात् । यतोरि[14]राजत्वेप्सुरान्नराज्येच्छुः ।
कुत इत्याह । राजतापि कवितापि च नास्ति मूढत्वं लक्षणया नि-
न्द्यत्वं यस्यां साविमूढत्वाप्रशस्या । कीदृक्सती । अन्यराज्यप[15]रका-
व्यजिदेवान्यराज्यं शत्रुराज्यं परकाव्यमन्यदीयकवित्वं चोत्कृ[16]ष्टत्वाज्ज-
[17]यन्त्येवे[18]ति हेतोः । तथाभ्युदितान्युल्लसितानि बन्दिनां भट्टानां कवि-
त्वानि काव्यानि यत्र सः ॥

---

१ ए °ध्वदि°. बी °ध्वदादि°. २ बी °तासृद्यौ°. ३ बी °तान्नियु°.

---

१ ए °जा यथा साधु स्या°. २ ए °भृद्यैव°. ३ बी °वेन्दुयौव°. ४ ए °युधरा°. ५ बी °तान्नियु°. ६ सी °रिवध. ७ बी °स्थितोपि°. ८ बी °या-धेको. ९ ए °जत्व°. १० ए °हो वेचे°. ११ सी °यन्कया. १२ ए °न्द्रयु°. १३ बी °व ज्ञात. १४ ए °रियुरा°. १५ बी °परिका°. १६ ए °त्कृत्वा°. १७ सी °यत्येवे°. १८ ए °ति हितोः.

अपटुत्व । अपटुता । अत्र "नञ्०" [५७] इत्याद्यधिकारात्त्वतलावेव ॥ अबुधादेरिति किम् । आबुध्याचतुर्यं ॥

प्रथिमतः । चण्डिम । इत्यत्र "पृथ्वादेरिमन्वा" [५८] इतीमन्वा । प्राक्त्वादित्यधिकारात्त्वतलौ च । वावचनाद्यश्चाणादिः प्राप्नोति सोपि स्यात् । पृथुत्वम् । पृथुताम् । पार्थवेन । चण्डत्वम् । चण्डतया । चाण्ड्य ॥

शौक्ल्य । शुक्लिमनि । शुक्लत्व । शुक्लतया ॥ दृढादि । दार्ढ्य । द्रढिम । दृढत्वं । दृढते । वार्ढ्य । व्रढिम । वृढत्वैः । वृढता । इत्यत्र "वर्ण०" [५९] इत्यादिना ट्यणिमनौ वा । त्वतलौ चाधिकृतत्वात् ॥

पत्यन्त । आधिपत्यम् । क्षमापतित्व । दिवस्पतिता ॥ राजान्त । यौवराज्यम् । अधिराज्य(ज)त्व । अधिराजतया । गुणाङ्ग । मौढ्य । अविमूढत्वा । मूढता । राजादि । राज्य । राजत्व । राजता । काव्य । कवित्व । कविता । इत्यत्र "पति०" [६०] इत्यादिना ट्यण् ॥ त्वतलौ चाधिकृतौ ॥

अर्हत्तयार्हन्त्यजुषां यथैवार्हत्त्वाद्वि(द्वि)षः क्षुक्षुभुरस्य तद्वत् ।
द्विषोपसाहायकया सहायताकाङ्क्षिसाहाय्यकृतो ध्वजिन्या ७

७. यथार्हन्त्यजुषामर्हतामर्हत्तया देवकृताष्टमहाप्रातिहार्यादिलक्ष्मीरूपेणार्हतो भावेन कर्मणा वार्हत्त्वाद्वि(द्वि)षोन्यदर्शनिनः क्षुभ्यन्ति तद्वत् तथास्य राज्ञो ध्वजिन्या सेनया कृत्वा द्विषश्चुक्षुभुर्बिभ्युः ।

१ बी सी °र्हत्वद्वि°. २ ए °षश्चक्षु°. ३ ए °पहासायिक°. सी °पहासाय°. ४ बी °जिन्याः । य°.

१ ए इत्यधि°. २ ए पृथ्यादे°. ३ ए बी वाच°. ४ ए सी °थुता°. ५ ए °क्लयम°. ६ ए °ढत्वं । वृढता । वा°. ७ सी °त्व । वृढ°. ८ सी °जता. ९ ए °ण् । तत्व°. १० ए °र्हतोर्ह°. ११ बी °महत्त°. १२ बी °प्रातीहा°. १३ बी सी °र्हत्वद्वि°. १४ ए °षश्चक्षु°.

कीदृश्या । अपसाहायकयापगतान्यकृतसाहाय्यया । यतः । कीदृशोस्य । सहायताकाङ्क्षिणां साहाय्यैषिणां साहाय्यकृतो महाबलत्वेन प्रत्युत साहाय्यकारिणः ॥ उपजातिच्छन्दः ॥

स दोःसहायत्वधनोपसख्यं वणिक्तयारिं गणयन्नथाप ।
तमःसखित्वासखिते दधानै रजोस्त्रभो(भौ)घैः कथिताग्रसैन्यः॥८॥

८. अथ स राजापारिमेव प्राप । कीदृक्सन् । दोषोर्बाह्वोः सहायत्वं साहाय्यं धनं यस्य स तथा भुजबलान्वितोत एवापसख्यमपगतमैत्रीकमरिमात्रं वणिक्तया गणयन्वणिजमिव निःसत्त्वं मन्यमान इत्यर्थः । तथा रजोस्त्रभौघै रेणुभिः शस्त्रकान्तिपूरैश्च कथिताग्रसैन्यः । किंभूतैः । तमःसखित्वासखिते दधानैरुद्यो(द्यो)तस्योच्छेदकत्वात्तमसः सखित्वं दधानै रजोभिस्तथा तमउच्छेदकत्वात्तमसोसखितां शत्रुतां दधानैरस्त्रभौघैः । उपेन्द्रवज्रा ॥

समिद्वणिज्यासु नवाग्रदूत्या आकर्ण्य हेषा यमदूतताहाः ।
दूतत्वयोग्यं हि वणिक्त्वभाजामुक्त्वेत्यथाजावुदतिष्ठतान्नः ॥९॥

९. अथान्न आजौ रणायोदतिष्ठतोदयच्छत् । किं कृत्वा । हेषा आकर्ण्य । कीदृशीः । समितः संग्रामा एव जयश्रीलाभहेतुत्वाद्वणिज्याः क्रयविक्रयादीनि वणिक्कर्माणि तासु विषये नवमग्रदूत्यमग्रेगूत्वं यासां ताः व्यवसाया इव रणवणिज्यानां मेलिका इत्यर्थः । अत एव यमदूत-

१ बी °र्ण्य मूषा. २ ए सी °न्नः । तथा°.

१ ए दृशा । अपह्रासाय°. २ ए °कृसा°. ३ ए प्राप्य । की°. ४ बी °स्त्रभौघे. ५ सी °खित्वं श°. ६ ए °स्त्रभूघैः. ७ ए बी °वज्राः । स°. ८ बी °नि वाणि°. ९ बी °गूत्वा या°. १० बी सी ताः । व°. ११ ए मेलका. १२ ए °व म°. १३ बी °दूता°.

तार्हा यमस्य यद्दूतकर्म तस्य योग्या यमपार्श्वेनेकप्राणिनामाकारिका यमदूतीरिवेत्यर्थः । तथोक्त्वा च । किमित्याह । योजनं योग्यं भावप्रत्ययान्तोयम् । दूतत्वस्य दूतक्रियाया योग्यमौचित्यं हि स्फुटं वणिक्त्वभाजां वणिजामेव । यद्वा दूतत्वस्य योग्यमुचितं प्रधानप्रेषणादिकं वणिजामेव स्याद्भीरुत्वात्तेषां न तु क्षत्रियाणामिति ॥

आर्हन्त्य । अर्हत्त्व । अर्हत्तया । इत्यत्र "अर्हतस्तोन्त् च" [६१] इति ट्यण् । तस्य न्त(न्त्)आदेशश्च । त्वतलौ चाधिकृतौ ॥

साहाय्य । साहायकया । सहायत्व । सहायता । इत्यत्र "सहायाद्वा" [६२] इति ट्यण्वा । पक्षे योपान्त्यलक्षणोकञ् । त्वतलौ च ॥

सख्यम् । सखित्वासखिते । वणिज्यासु । वणिक्त्व । वणिक्तया । दूत्याः । दूतत्व । दूतता । इत्यत्र "सखि०" [६३] इत्यादिना यः । त्वतलौ च ॥ उपजातिः ॥

सोस्तेनत्वायाः स्तेनतामन्यकीर्ते रक्षोज्ञातेयं ज्ञातितां कालरात्रेः ।
मृत्योर्ज्ञातित्वं वीरहृत्स्तेयकारी प्रेप्सुर्निष्कापेयोसिमादत्त दर्पात् ॥ १० ॥

१०. स आम्रो दर्पादसिमादत्त । कीदृक्सन् । नास्ति स्तेनत्वं चौर्यं यस्यास्तस्याः केनाप्यहृताया इत्यर्थः । अन्यकीर्तेः शत्रुकीर्तेः स्तेनतां प्रेप्सुर्जयप्राप्त्या जिहीर्षुरित्यर्थः । अत एव कापेयात्कपिकर्मण-

१ बी °रहस्तेय°. २ बी °प्सुनिष्का°.

१ ए °न्तो दूतक्रि°. २ सी °यायो°. ३ सी °दिकव°. ४ सी °न्त्य । आर्ह°. ५ बी °या । साहा°. ६ ए °त्र साहा°. ७ बी सी च । संख्य°. ८ ए °णिक्त्वया । दूत्या । दूत°. ९ ए सी °तलो च. १० ए यस्याः के°. ११ बी °स्तस्या के°. १२ ए अन्यः की°. १३ बी °नताः प्रेष्टुर्जे°.

श्चापलान्[1]निष्क्रान्तो निष्कापेयो युद्धे स्थिरचित्त इत्यर्थः । अत एवं[2] वीरै[3]हृतस्तेयकारी[4] शूराणां हृदयावर्जकस्तथा तदातिरौद्रत्वाद्रक्षोज्ञातेयं राक्षसस्वजनतां[5] कालरात्रेः कृष्णचतुर्दशीरात्रेर्ज्ञातितां मृत्योर्ज्ञातित्वं च प्रेप्सुः[6] ॥ वैश्वदेवी छन्दः ॥

कपितावतामिव कपित्वमश्वताश्ववतां[1] नु शावमिव[2] शावतावताम् ।
युवतेव यौवनवतामहंकृतिर्ददृशेस्य सौष्ठवयुवत्वशालिनः[3] ॥११॥

११. स्पष्टम् । किं त्वाश्ववतामश्वत्वान्वितानामश्वानाम्[7] । शावमिव बाल्यमिव । अस्याश्वस्य सौष्ठवयुवत्वशालिनः सौष्ठवेनातिशयेन यद्युवत्वं तारुण्यं तेन शोभमानस्य ॥ नन्दिनी छन्दः ॥

निःशावत्वाश्वत्वभाक्सुरद्विड्[4]नेत्रारुणिमा क्रुधास्य रेजे ।
चातुर्हायनपञ्चहायनत्वनवहायनताभाजिनो नु मद्यात् ॥१२॥

१२. अस्याश्वस्य क्रुधा नेत्रारुणिमा रेजे । मद्यान्नु यथा सुरातो नेत्रारुणिमा राजते । किंभूतात् । चातुर्हायन[8]पञ्चहायनत्वं[9]नवहायनताभाजिनश्चतुर्वार्षिका[त्पञ्चवार्षिका?]न्नववार्षिकाद्वातिजातादित्यर्थः । निःशावत्वाश्वत्वभाक्सुरद्विड्[10]न्निःशावत्वं[11] बालत्वान्[12]निष्क्रान्तं यदश्वत्वमश्वजातिर्[13]निःशावत्वाश्वत्वं तरुणाश्वतेत्यर्थः । तद्भजते यः सुरद्विट्[14]केशिदानवस्तस्य यथा विष्णुं वैरिणं प्रति क्रुधा नेत्रारुणिमा रेजे ॥

---

१ ए °श्वव°. २ बी शामि°. ३ सी °नः ॥ ११ ॥ सौष्ठवे°. ४ बी °ड्वनेत्रा°.

---

१ बी °लान्निःक्रान्तो. २ सी °व च वी°. ३ बी सी °रहस्तेय°. ४ बी °री सूरा°. ५ बी सी °रात्रे कृ°. ६ बी प्रेष्टुः । वै°. ७ ए किं त्वश्व°. ८ ए °नत्वप°. ९ ए °त्वव°. १० ए °ड्वनिशा°. ११ सी °द्विवलत्वं. १२ बी °त्वानिःक्रान्तं. १३ बी °तिर्निशा°. १४ ए °ट्केशदा°.

स्तेय । अस्तेनस्थायाः । स्तेनताम् । अत्र "स्तेनान्नलुक" [६४] इति यो नस्य लुंक्च । त्वतलौ च ॥

निष्कापेयः । कपित्वम् । कपिता । ज्ञातेयम् । ज्ञातित्वम् । ज्ञातिताम् । अत्र "कपि०" [६५] इत्यादिनैयण् ॥ त्वतलौ च ॥

प्राणिजाति । आश्व । अश्वत्व । अश्वता ॥ वयोर्थे । शार्वम् । शावत्व । शावता । इत्यत्र "प्राणि०" [६६] इत्यादिनाञ् । त्वतलौ च ॥

यौवनं । सौष्ठव । इत्यत्र "युवादेरण्" [६७] इत्यण् । त्वतलौ च । युवत्व । युवता ॥

चातुर्हायन । पञ्चहायनत्व । नवहायनता । इत्यत्र "हायनान्तात्" [६८] इत्यण् । त्वतलौ च ॥ औपच्छन्दसकापरान्तिका ॥

आरातकार्शानवगौरवस्य पैत्रं दधत्पौरुषसौरभाढ्यः ।
भेजे स भूपैः पुरुषत्वभाग्भिर्हार्दं दधानैर्हृदयत्वधारी ॥ १३ ॥

१३. स आन्नो भूपैर्भेजे । कीदृक् । पौरुषस्य यत्सौरभमुत्कर्ष इत्यर्थः । तेनाढ्योत एवारातेर्भावः कर्म वारातं वैरं तदेव कार्शानवं कृशानुकर्म ज्वलनं तस्य यद्गौरवं महत्त्वं तस्य पैत्रं पितृत्वं जनकतां दधज्जाज्वल्यमानं महद्वैरं कुर्वन्नित्यर्थः । तथा हृदयत्वधारी स्वकीय-भूपेषु स्नेहवान् । किंभूतैर्भूपैः । पुरुषत्वभाग्भिः पौरुषान्वितैस्तथा हार्दमान्ने स्नेहं दधानैः ॥ इन्द्रवज्रा छन्दः ॥

सौहृदय्यघनसत्पुरुषत्वभ्राजिभिर्हृदयतायुगमात्यैः ।
श्रौत्रवत्पुरुषताभृदिवैष श्रोत्रियत्वदयितैः प्रतिपेदे ॥ १४ ॥

---

१ बी °नैहृद°. २ बी °धाराः । स. सी °धारैः । स. ३ सी °दत्वघ°.

---

१ ए °नानलु°. २ बी लुक् त्व°. ३ बी °पेय । क°. ४ सी °व । शा°. ५ बी °न । शौष्ठ°. ६ बी °वादिरित्य°. ७ ए °ञ्चहान°. °ञ्चपाय°. ८ ए °पैभेजे.

१४. अमात्यैः स (त्यैरेष?) आन्नः प्रतिपेद आश्रितः । कीदृक्सन् । हृदयतायुगमात्येष्वनुरागवान् । यतः किंभूतैः । सौहृदय्यघना गाढानुरागसान्द्रा ये सत्पुरुषत्वभ्राजिनः सत्पुरुषत्वेन साधुपुरुषस्य भावेन कर्मणा वा स्वाम्यद्रोहसुबुद्ध्यादिना भ्राजिष्णवस्तैः । यथा श्रोत्रियस्य भावः कर्म वा श्रौत्रं तदस्यास्ति श्रौत्रवान्यः पुरुषताभृत्पुरुषो वैदिकद्विज इत्यर्थः । वेदपाठाद्यर्थमाश्रीयते । कैः । श्रोत्रियत्वं छान्दसत्वं दयितं प्रियं येषां तैर्वेदार्थिभिर्द्विजैरित्यर्थः ॥ स्वागता छन्दः ॥

आचार्यताश्रोत्रियताप्तसुप्रख्यत्वो नयाचार्यकभागमात्यः ।
द्विषद्यशश्चौरकधौर्तिकाचार्यत्वं दधानं तमथेत्युवाच ॥ १५ ॥

१५. अथामात्य आगतामात्येषु मुख्यो मन्त्री तमान्नमिति वक्ष्यमाणमुवाच । कीदृक्सन् । आचार्यतया नीतिशास्त्रादिसर्वशास्त्रव्याख्यातृत्वेन यद्वोपचारान्मन्त्रिषु मुख्यतया श्रोत्रियतया च वैदिकद्विजतया चाप्तं प्राप्तं सुप्रख्यत्वं शोभना विख्यातिर्येन स तथात एव नयाचार्यकभाङ्न्यायस्य सम्यक्प्रतिपादयितेत्यर्थः। कीदृशं सन्तं तम्। द्विषतः कुमारपालस्य यद्यशस्तस्य ये चौरकधौर्तिके द्विषत्पराभूत्यापहरणवञ्चने इत्यर्थः । तयोर्विषये यदाचार्यत्वमतिनैपुणं तद्दधानं युद्धायोद्यतमित्यर्थः ॥ उपजातिः ॥

स्वाम्यायुक्तानां चौरतां वेत्त्वचौर-
त्वं वा शैष्योपाध्यायिकां वाथ कुर्यात् ।

१ ए नवाचा°. २ सी °श्चौरिक°. ३ ए °नां चोर°

१ ए °दस्यघ°. २ ए °जिताः स°. ३ ए वा श्रोत्रं. ४ ए बी °स्ति श्रोत्र°. ५ बी °न्दसं द°. ६ ए मुखो म°. ७ ए °णवा°. ८ सी °र्यत्वत°. ९ ए प्रमुख्य°. १० सी °पुण्यं त°. ११ बी °जाति । स्वा°. सी °जातिच्छन्द । स्वा°.

श्लाघात्याकारौ गार्गिकाकाठिकाभ्यां
भाषेतामात्यस्तथ्यपथ्यं तथापि ॥ १६ ॥

१६. स्वामी प्रभुरायुक्तानामधिकृतानां मन्त्रिणा[1]महितमानितया[2] चौ[3]रतां वेत्त्वं चौर[4]त्वं वा हितमानितया साधुतां वा वेत्तु[5] शैष्योपाध्यायिकां [6]वा किंचिज्ज्ञमानित्वाच्छिष्यत्वं वा वेत्त्वति[7]विज्ञमानित्वादुपाध्यायतां वा वेत्तु । अथाथ वा गा[8]र्गिकाकाठिकाभ्यां गार्ग्यत्वेन कठत्वेन च श्ला[9]घात्याकारौ कुर्यात् । सत्यवा[10]दित्वादिगुणोपेतस्य गर्गस्यर्षेरपत्यत्वेन सत्यवादित्वादिगुणोपेता एत इति । तथा हेयोपादेयार्थोक्तियुक्तस्य सर्वशा[11]स्त्रसारस्य कठप्रोक्तवेदस्य वेदित्रध्येतृत्वेन सर्वशास्त्ररहस्यज्ञा विधेयज्ञाश्चामी इति श्लाघां करोतु । पुलिन्दस्येव सदा वनेवासिनो गर्गर्षेरपत्यत्वेनाकिंचिज्ज्ञा एत इति । तथा कठवे[12]दाभ्या[13]सजडत्वे[14]न न नीतिशास्त्रज्ञा नापि लोकव्यवहारमात्रस्याप्यभिज्ञा इति निन्दां वा करोतु स्वामीत्यर्थः । तथाप्यमात्यस्तथ्यपथ्यं स्वामिनः सत्यहितं वचो भाषेत वक्तुमर्हति । वैश्वदेवी छन्दः ॥

तथ्यप[15]थ्याभणनेमात्यस्य दोषमाह ॥

ब्रह्मत्वपोत्रीयधरोपि गार्गिकां सकाठिकां क्ष्मावगतामवाप्य च ।
पापः स यो नावति शाकशाकटेक्षुशाकिने नु[1] स्वनियोगमुद्यतः
॥ १७ ॥

१७. यो नियुक्तो मन्त्र्युद्यतः सावधानः सन्स्वनियोगं स्वाम्यादिष्टं तथ्यपथ्यभाषणादिकं स्वव्यापारं नावति न रक्षति स पापो निन्द्यः

१ बी नु स्वानि°.

१ ए °णाहि°. २ ए °यातचोर°. ३ ए °त्वचोर°. ४ बी °रत्वाहि°. ५ सी °त्तु अथा°. ६ ए वाऽकिं°. ७ बी °विज्ञमा°. ८ बी °गिककाठि°. ९ बी श्लाघ्यात्या°. १० बी सी °दिगु°. ११ बी °स्त्रशार°. १२ बी °वेदन्यास°. १३ ए °भ्यासाज°. १४ बी सी °न नी°. १५ ए °पथ्योभ°.

स्यात् । कीदृक् । ब्रह्मत्वपोत्रीयधरोपि ब्राह्मणत्वपोतृत्वे धारयन्नपि । ब्राह्मणोपि ऋत्विग्विशेषोपि वेत्यर्थः । तथा क्ष्मावगतां पृथ्व्या ज्ञातां सकाठिकां काठिकया कठप्रोक्तवेदित्रध्येतृत्वेनान्वितां[1] गार्गिकां गर्गापत्यत्वमवाप्यापि च । अपिरत्रापि योज्यः । पृथ्व्यां प्रसिद्धो गार्ग्योपि कठोपि वा भूत्वेत्यर्थः । यथोद्यतः सन्यः शाकशाकटेक्षुशाकिने[2] शाकक्षेत्रमिक्षुक्षेत्रं च न रक्षति स ब्राह्मणादिरपि निन्द्यः स्यात् । गम्यमानास्तिक्रियापेक्षयैककर्तृत्वादवाप्येत्यत्र क्त्वा ॥

सौरभ । गौरवस्य । पैत्रम् । अत्र "य्वृवर्णाल्लघ्वादेः" [६९] इत्यण् ॥ केचित्तु कार्शानव आरातेत्यादिष्वपीच्छन्ति । तन्मतसंग्रहार्थं लघ्वादेरिति प्रकृतेर्विशेषणं न य्वृवर्णस्येति व्याख्येयम् ॥

पौरुष[3] । पुरुषत्व[4] । पुरुषता । हार्दम्[5] । हृदयत्व । हृदयता । अत्र "पुरुष०" [७०] इत्यादिनाण् । त्वतलौ च ॥ असमास[6] इति किम् । सत्पुरुषत्व । सौहृदय्य[7] । अत्र नाण् ॥

श्रौत्र । श्रोत्रियत्व । श्रोत्रियता । इत्यत्र "श्रोत्रियाद्यलुक् च" [७१] इत्यण् । यलोपश्च त्वतलौ च ॥

आचार्यक । आचार्यत्वम् । आचार्यता । इत्यत्र " योपान्त्य०" [७२] इत्यादिनाकञ् । त्वतलौ च ॥ असुप्रख्यादिति किम् । सुप्रख्यत्वः[8] ॥

चौरक । धौर्तिका । इत्यत्र[10] "चोरादेः" [७३] इत्यकञ् । त्वतलौ च[11] । चौरत्वम्[12] । चौरताम् ॥

शैष्योपाध्यायिकाम् । अत्र "द्वन्द्वाल्लित्" [७४] इति लिदकञ् ॥

गार्गिकाकाठिकाभ्यां श्लाघात्याकारौ । गार्गिकां सकाठिकामवाप्य । गार्गिकां सकाठिकां क्ष्मावगताम् । अत्र "गोत्र०" [७५] इत्यादिनाकञ् ॥

१ बी °प्रोक्तोवदि°. २ सी °शाकने. ३ ए °रुपः । पुरुषात्व. ४ बी °रुत्व. ५ ए °दं । हृ° ६ ए °मा इ° ७ सी °दत्व । अ°. ८ बी °पान्त इ°. ९ ए सी °ख्यत्व । चौ°. १० बी °त्र चौरा°. ११ ए सी च । चोर°. १२ ए सी °म् । चोर°.

पोत्रीय । इत्यत्र "होत्राभ्य ईयः" [७६] इतीयः ॥

ब्रह्मत्व । इत्यत्र "ब्रह्मणस्त्वः" [७७] इति त्वः ॥

शाकशाकटेक्षुशाकिने । अत्र "शाकट०" [७८] इत्यादिना शाकटशाकिनौ ॥

[2]इन्द्रवंशावंशस्थयोरुप[3]जातिः ॥

अथ तथ्यपथ्यं वच एकादशभिर्वृत्तैराह[4] ।

मौद्गीनशाले[1]ययवक्ययव्[2]यैत्रैहेयषा[3]ष्टिक्यम[4]णव्यमाष्यम् ।
औमीनभाङ्गी[5]नमभञ्जि तैलीनं वा न केनापि विभोः प्रसह्य ॥१८॥

१८. यवका यवतुल्या धान्यभेदाः । षष्टिकाः षष्टिरात्रैः पच्यमाना व्रीहिभेदाः । अणवो मणिचव्याख्या धान्यभेदाः । उमा अतस्य[5]ः । भङ्गाः सणधान्यानि । विभोस्तव सत्कानि मुद्गादिक्षेत्राणि प्रसह्य हठात्केनापि शत्रुणा न भग्नानि । तव भूमिः केनापि न भग्नेत्यर्थः । इन्द्रवज्रा छन्दः ॥

स को नाम यो ममापि भूमिं भङ्क्ष्यति तत्किमेवं त्व[6]मजल्प इत्ययं मदान्मा वादी[7]दित्याशङ्क्यो[8]पसान्त्वनायास्य सामर्थ्यं वर्णयन्नाह ॥

तिल्याणवीनमथ भङ्ग्यमथौ(थो)म्यमाषी-
णं[6] वास्तु देव भवतो विषयेद्य यावत् ।
भङ्गाकटं तिलकटं तदुमाकटं वा-
लाबूकटांशमपि वेप्सति को विगृह्य ॥ १९ ॥

१९. वा यद्वा हे देव भवतस्तव विषये देशे तिलादिक्षेत्रजातिरस्तु । शत्रुणा तव भूमेर्भङ्गे का वार्तेत्यर्थः । यतोद्य यावत्ते विषये भङ्गाकटं

---

१ **ए** °लेयंयव°. **बी** °लेयव°. २ **ए** °व्यव्रीहे°. ३ **बी** °ष्टिकम°. ४ **सी** °भणिव्य°. ५ **ए** °नभ°. ६ **ए** °षीणी वासु दे°.

---

१ **ए** °ह्य इ°. २ **बी** °वंशस्थ°. ३ **ए सी** °जाति । अ°. ४ **बी** °ह । मोद्गी°. ५ **ए** °तस्य । भ°. ६ **बी** त्वज°. ७ **सी** °दीरित्या°. ८ **बी सी** °शङ्क्याप°.

तिलकटं[1] तदुमाकटं वा तदत्यल्पीयस्त्वेन प्रसिद्धं भङ्गानां तिला-[2]नामुमानां वा रजोप्यलाबूकटांशमपि वालाबूकटस्य तुम्बकरजसोंशमपि[3] वा कः शत्रुर्विगृह्य विग्रहं कृत्वेप्सति[4] । त्वत्तः समर्थस्य राज्ञोभूतत्वान्न कोपीत्यर्थः ॥

मौद्गीन । इत्यत्र "धा[5]न्येभ्य[6] ईनञ्" [७९] इतीनञ् ॥

व्रैहेय । शालेय । इत्यत्र "व्रीहि०" [८०] इत्यादिनै[7]यञ् ॥

यव्य । यवक्य । षष्टिक्यम् । अत्र "यव०" [८१] इत्यादिना यः ॥

अणव्य आणवीनम् । माष्यं[8] माषीणम् । अत्र "वाणुमाषात्" [८२] इति वा यः । पक्ष ईनञ् ॥

उम्य औमीन । भङ्ग्य भाङ्गीनम् । तिल्य तैलीनम् । अत्रं[9] "वोमा०"[८३] इत्यादिना वा यः ॥

अलाबूकट । उमाकटम् । भङ्गाकटम् । तिलकटम् । अत्रं[10] "अलाब्वाश्च०" [८४] इत्यादिना कटः ॥ वसन्ततिलका छन्दः ॥

एवं च तव केनापि किमपि नापराद्धमित्युक्तम् । ततश्च किमित्याह ।

कौलीनमस्ति यदु गूर्जरविग्रहाया-
श्वीनां करीर[1]कुणपीलुकुणा[2]स्पदं क्ष्माम् ।
उत्कर्णजाहविनमन्मुखजाहरम्यै-
र्वाहैस्त्वमारिथ सुपक्षतिपक्षिवेगैः ॥ २० ॥

२०. हे राजंस्तत्कौलीनं[11] कुलस्य जल्पो लोकापवादोस्ति यत्त्वं वाहैरश्वैः कृत्वा गूर्जरविग्रहाय कुमारपालविग्रहणार्थं क्ष्मां मरुदेश-

१ ए °रगुण°. २ ए °पीलगुणा°. सी °पीलकु°.

१ ए °टं वा. २ बी °लानां मुनीनां. ३ सी °पि कःकः. ४ सी °ति । ततः स°. ५ ए सी धानेभ्य. ६ बी भ्य इत्यजिती°. ७ बी सी °दिनेय°. ८ ए ष्यं । अ°. ९ बी °त्र वामा°. १० बी °त्र ला°. ११ बी °स्तत्कोली°.

भूमिमारिथागतः । किंभूताम् । आश्वीनां सी[1]मसंधिवर्तित्वेन निकटत्वादश्वस्यैकेनाह्ना गम्यां तथा करीरकुणपीलुकुणास्पदं करीरपाकपीलुपाकस्थानम् । किंभूतैः । सुजात्यत्वेनोद्रूर्ध्वानि यानि कर्णजाहानि कर्णमूलानि तथा विनमन्ति नम्राणि यानि च मुखजाहानि मुखमूलानि तै रम्यैस्तथा शोभना पक्ष[2]तिः पक्षमूलं यस्य स यः पक्षी तद्वज्जवो वेगो येषां तैः । गूर्जरैः[3] सहासतो विरोधस्य प्रथमत उत्थापकत्वात्त्वां जनोपवदतीत्यर्थः ॥

आश्वीनाम् । अत्र "अह्ना०" [८५] इत्यादिनेनञ् ॥

कौलीनम् । अत्र "कुलाज्जल्पे" [८६] इतीनञ् ॥

पीलु[4]कुण । करीर[5]कुण । इत्यत्र "पील्वादेः०" [८७] इत्यादिना कुणः ॥

कर्णजाह । मुखजाह । इत्यत्र "कर्णादेर्०" [८८] इत्यादिना जाहः ॥

पक्षति । इत्यत्र "पक्षात्तिः" [८९] इति तिः ॥

अन्यै[6]श्च ।

हिमेलु[1]वातूलबलूलसैन्यः शी[2]तालुरुष्णालुरमर्षतोसौ ।

स्वदेश[3]तृप्रालुरिहार भैमिर्यथामुखीने त्वयि संमुखीनः ॥ २१ ॥

२१. त्वयि यथामुखीने संमुखम[7]त्रागते सत्यसौ भैमिः कुमारपालोमर्षतोमर्षात्संमुखीनः संमुख इह त्वत्समीप आरायौ । कीदृक्सन् । हिमेलु वातूलं बलूलं च हिमं शीतं वातं लूकादि बलं परबलं च सहमानं सर्वसहमित्यर्थः । सैन्यं यस्य स तथा शीतालुरुष्णालुः शीतोष्णयोर[8]सहोप्यति[9]सुकुमारोपीत्यर्थः । यद्येवं सुकुमार-

१ ए °मेलवा°. २ बी शीलालु°. ३ सी तृष्णालु°.

१ सी °संबन्धव°. २ बी °क्षति प°. ३ बी गूजरैः. ४ बी °लुकण. ५ ए °रकण. ६ सी °न्यथा । हि°. ७ बी °मत्र ग°. ८ बी °रहसोप्य°. ९ ए °तिकु°.

स्तर्हि किमित्यारेत्याह । यतः स्वदेशतृ[1]प्रालुः स्वदेशस्य कष्टमसहमानः । एतेन त्वया विरोद्धोयमत्रागादित्यस्य न्यायित्वमुक्तम् ॥

हिमेलु । इत्यत्र । "हिमाद्०" [९०] इत्यादिना-एलुः[2] ॥

बलूल । वातूल । इत्यत्र "बल०" [९१] इत्यादिनोलः ॥

शीतालुः । उष्णालुः । तृप्रालुः । अत्र "शीत०" [९२] इत्यादिनालुः ॥

यथामुखीने[3] । संमुखीनः । अत्र "यथा०" [९३] इत्यादिनेनः ॥ उपजातिः ॥

अयं मे सेवाद्यर्थमत्रायात इति न वाच्यं यतः ।

स सर्वपत्रीणकसर्वकर्मीणपत्तिकः सर्वपथीननागः ।
द्राक्सर्वपात्रीणधनोस्ति सर्वाङ्गीणप्रभः प्राग्भवदा[1]ज्यपे[2]क्षी ॥२२॥

२२. स भैमि[4]र्द्राक्प्राक्पूर्वं भवदाज्यपेक्षी तव संग्राममपेक्ष[5]माणोस्ति । चेत्त्वं रणं प्रारब्धवांस्तदायमतितरां रणकरणे प्रगुण एवास्त इत्यर्थः । यतः सर्वपत्रीणका अज्ञाताः सर्वपत्राणि व्याप्नुवन्तः सर्ववाहनारोहणशक्ता इत्यर्थः । सर्वकर्मीणाः सर्वकर्माणि व्याप्नुवन्तः सर्वकार्यकरणक्षमाश्चेत्यर्थः । पत्तयः सेवका यस्य स[6]ः । तथा सर्वपथी[7]ना बंहीयस्त्वात्सर्वा[8]न्पथो व्याप्नुवन्तो नागा गजा उपलक्षणत्वादश्वा रथाश्च यस्य सः । एतेन सर्वसैन्यसंपदुक्तिः । तथा सर्वपात्री[9]णं बंहीयस्त्वात्सर्वाणि पात्राणि देयस्थानानि व्याप्नुवद्धनं यस्य सः । एते[10]न कोशसंपदुक्तिः । तथा सर्वा[11]ङ्गी[12]णा सर्वाङ्गं व्याप्नुवती प्रभोत्साहादिसंपदुद्भवं तेजो यस्य सः ॥

१ **ए** °ज्यपक्षी. २ **बी** °क्षी । तव.

१ **बी सी** तृष्णालुः. २ **सी** °लुः यथा°. ३ **ए** ने । हंमु°. ४ **सी** भैमिः प्राक्पूर्वं द्राक्भ°. ५ **बी** °पेक्ष्यमा° ६ **सी** सः । यथा. ७ **ए** °थीनां बं°. ८ **सी** °र्वाणि पत्रा°. ९ **ए** °त्रीणां वही°. १० **सी** °तेनास्य सं°. ११ **बी** °र्वाङ्गव्या°. १२ **ए** °ङ्गीणां स°.

यद्येवं[1] तर्हि किं कार्यमित्याह ।

राजन्मौ[1](न्मो?)र्जौजसा निजानां सर्वशरावीणान्नभोजिनां त्वम् ।
पतनाय भवेन्निजापि पट्याप्रपदीनानुपदीनिका च तुङ्गा[2] ॥ २३ ॥

२३. हे राजंस्त्वं निजानां पूर्वजानां पतनाय स्वविनाशेन भ्रंशाय मा भूः । केन कृत्वा । [2]ऊर्जौजसोर्जया बलेन यदोजस्[3]तेजस्तेन बलावलेपेन[4] । कीदृशाम् । सर्वशरावीणानि[5] बंहीयस्त्वेन[6] सर्वशरावान्व्याप्नु[7]वन्ति यान्यन्नानि तद्भोजिनां त्वत्सदृशस्यापत्यस्य श्राद्धादौ नानापिण्डप्रदत्त्वेन[8] तृप्तानामित्यर्थः । सर्वथा समर्थेन[9] न्यायिना च भैमिना सह रणं मा कृथा इत्यर्थः । स्वोक्तमेवार्थान्तरेण द्रढयति । निजापि पटी वस्त्रमाप्रपदीना प्रपदं गुल्फं यावद्व्याप्नुवती सत्यतिविस्तीर्णत्वेन गतेः स्खलयित्रीत्वात्पतनाय भवेत्तथा निजाप्यानुपदीनिका कुत्सितानुपदं[10] बद्धा पदप्रमाणा पादुका[11] तुङ्गात्युच्चा सती पतनाय भवेत् ॥

सर्वपथीन । सर्वाङ्गीण । सर्वकर्मीण । सर्वपत्रीण[12] । सर्वपात्रीण । सर्वशरावीण । इत्यत्र "सर्वादेः०"[13] [९४] इत्यादिना-ईनः ॥

आप्रपदीना । इत्यत्र[14] "आप्रपदम्" [९५] इतीनः ॥

आनुपदीनिका । इत्यत्र "अनु०" [९६] इत्यादिनेनः ॥ औपच्छन्दसकं छन्दः ॥

अथ वृत्तत्रयेण त्वत्पूर्वजैरपि चुलुक्यैः सह[15] विग्रहो न कृत इति भणन् कृताया मैत्र्याः फलं चोपदर्शयन् स्वोक्तं रणाकरणमेव[16] द्रढयति[17] ।

---

१ ए °न्मौजौज°. २ ए तुरङ्गा. बी तुङ्गे । हे.

---

१ बी सी ततः किं. २ ए उर्जौज°. ३ ए °स्तेजव°. सी °स्तेन ब°. ४ ए °न । स°. ५ ए °नि वांही°. ६ सी °न तृ°. ७ ए °वान्वाप्नु°. ८ बी °दत्तेन. ९ ए °न ज्ञायि°. १० सी °दं यद्वा प°. ११ ए बी पादुका. १२ बी °वंपा°. १३ ए °र्वादिरित्या°. १४ बी °त्र प्र°. १५ सी स वि°. १६ बी °व दृढति°. १७ सी °ति । आया°.

अयानयीनैरकृतारिसर्वान्नीनैर्न[1][2] ते कोप्यरितां चुलुक्यैः ।
परोवरीणोथ[3] परंपरीणोस्मि पुत्रपौत्रीण[4] इहान्वये ते ॥ २४ ॥

२४. हे राजंस्ते संबन्धी कोपि पूर्वजश्चुलुक्यैः सहारितां वैरं नाकृत । यतोयानयीनैः । अयः[1] शुभं दैवम् । अनयोशुभम् । शुभाद्दैवा[2]त्सकाशादपवर्ततेशुभं दैवं यस्मिन्कर्मणि तदयानयं शान्तिकर्म[3] मारिघोषणदेवगुरुपूजादि[4] तद्ये नेयाः कारयितव्यास्तैरीश्वरैस्तथा[5] सर्वं सर्वप्रकारमदन्ति सर्वान्नीना अरिभिः सर्वान्नीना[6] अरिसर्वान्नीनास्तैः सर्वारिविनाशकैरित्यर्थः । अत्रार्थे कः प्रमाणमिति न वाच्यम् । यतस्ते तवेहान्वये वंशेहमस्मि वर्ते । कीदृक् । परोवरीणोथ तथा परंपरीणः पुत्रपौत्रीणश्च परांश्चावरांश्च[7] परांश्च[8] परतरांश्च पुत्रांश्च पौत्रांश्चानुभवामि[9] जानामि[10] यः स तथा[11] ॥

अयानयीनैः । अत्र "अया०" [९७] इत्यादिनेनः ॥

सर्वान्नीनैः । अत्र "सर्वान्नमत्ति[12]" [९८] इतीनः ॥

परोवरीणः । परंपरीणः । पुत्रपौत्रीणः[13] । एते "परोवरीण०" [९९] इत्यादिना निपात्याः ॥ उपजातिः ॥

यथाकामीनोर्जत्करिभिरनुकामीनतुरगैः
सदात्यन्तीनोर्व्यैर्धरणिधव संधाय चुलुकैः ।
नयाब्धेः पारीणानयसरिदवारीणजगृहुर्यशः पारावारीणमिह गुरवस्तेरिविजयात् ॥ २५ ॥

१ बी °नवीनै°. २ बी °न्नीन्नैर्न. ३ सी °णोस्मि. ४ बी °त्रपुत्री°.

१ सी अयं शु°. २ बी °भाशुभाद्दै°. ३ बी सी °कर्मा मा°. ४ ए °दि धे°. बी °दिनाधेन्यया का°. ५ सी तद्यैर्नेयाः. ६ सी °नास्तैः. ७ ए °श्च पुत्राश्च पौ°. ८ सी °श्च पु°. ९ ए बी °मियाना°. १० ए °मि स. ११ सी °था । आया°. १२ ए °वीम°. १३ सी णः° । अत्र प°.

२५. हे धरणिधव[1] राजन् हे नयाब्धेः पारीण नीतिशास्त्रसागरपारगामिन्नत एव हे अनयसरिदवारीणानावारनद्या अर्वाग्भागगामिन्न्यायनिष्ठ ते तव गुरवः पूर्वजा अरिविजयादिह जगति पारावारीणमब्धिगामि यशो जगृहुः । किं कृत्वा । चुलुकैः सह[2] सदा संधाय । कैः कैः कृत्वा । यथाकामीना यथाकामं गच्छन्तस्तथोर्जन्तो बलिष्ठा ये करिणस्तैस्तथानुकामीना अनुकामं यथेच्छं गच्छन्तो ये तुरगास्तैस्तथात्यन्तीना अत्यन्तं[3] गामिनो य उष्ट्रास्तैश्च हस्तितुरगोष्ट्रदानेनेत्यर्थः । एतेन चुलुकैः सह संधाने[4] तेषामरिविजयोत्थं यशः फलमुक्तम् ॥ शिखरिणी छन्दः[5] ॥

अवारपारीणमुदन्वतस्तद्यशो निजानां द्युपथाध्वनीनम् ।
हारि त्वया मानुगवीनबुद्ध्या भैमिं नयाध्वन्यममुं विराध्य ॥२६॥

२६. हे राजन्निजानां[6] पूर्वजानां तच्चुलुकैः संधानेनारिविजयोत्थं यशस्त्वया मा हारि[7] मापनायि । कीदृशम् । उदन्वतोब्धेरवारपारीणमर्वाग्भागपरभागयोर्गामुकं तथा द्युपथाध्वनीनं स्वर्गमार्गे पथिकतुल्यं स्वर्गगामीत्यर्थः । किं कृत्वा । नयाध्वन्यं न्यायमार्गपथिकममुं[8] भैमिं विराध्य[9] विरोध्य । कया कृत्वा । अनुगवीनबुद्ध्या गवां पश्चादनुगु तदलंगाम्यनुगवीनो गोपालस्तस्य या बुद्धिस्तयानुचितयुद्धविषयया मूर्खबुद्ध्येत्यर्थः ॥

यथाकामीन । अनुकामीन । अत्यन्तीन । इत्यत्र "यथाकाम०" [१००] इत्यादिनेनः ॥

पारावारीणम् । पारीण । अवारीण । अवारपारीणम् । इत्यत्र "पारावारं०" [१०१] इत्यादिनेनः ॥

---

१ सी °धर रा°. २ सी °ह सं°. ३ सी °त्यन्त गा°. ४ बी °धानते°. सी °धानात्तेषा°. ५ सी °न्दः । आवा°. ६ सी °नां तच्चूलैः सं°. ७ सी °रि नापायि. ८ बी °मार्गप°. ९ सी °ध्य क°.

अनुगवीन । इत्यत्र "अनुग्वलम्" [१०२] इतीनः ॥

अध्वन्यम् । अध्वनीनम् । अत्र "अध्वानं येनौ" [१०३] इति येनौ ।

उपजातिः ॥

अथ स्वोक्तस्यैव रणाकरणस्य विशेषेण द्रढनाय यस्य सैन्यस्य बलेनाम्नो युद्धायोत्सहते तन्निराकुर्वन्नाह ।

तवाभ्यमित्रीणरणेभ्यमित्र्यो भाव्यभ्यमित्रीय इहाथ वा कः ।
एष्वागवीनेषु समांसमीनाद्यश्वीनधेनुष्विव निःसहेषु ॥ २७ ॥

२७. अथ वेति कृतकाभ्युपगमे । त्वत्संतोषाय युद्धं किल मयाभ्युपगतमित्यर्थः । परं हेभ्यमित्रीणामित्राभिमुखमलंगामिन्निह भैमावभ्यमित्रीयेमित्रस्य तवाभिमुखमलंगामिनि सत्येषु प्रत्यक्षेषु तव भटेषु मध्ये को भटो रणेभ्यमित्र्योमित्रस्य भैमेरभिमुखमलंगामी भावी भविष्यति । यतः कीदृक्षु । आगवीनेष्वागोप्रदानं का(नका?)रिण आगवीनाः कर्मकरभेदास्तत्तुल्येषु । एतदपि कुत इत्याह । यतः समांसमीनाः प्रतिवर्षं गर्भग्राहिण्यो विजायमाना वा तथाद्यश्वीना अद्य श्वो वा विजनिष्यमाणा एवं नाम प्रत्यासन्नप्रसवा इत्यर्थः । द्वन्द्वे ता या धेनवस्तास्विव निःसहेष्वसमर्थेषु ॥

तदेवं सर्वथा युद्धं निषिध्य विधेयमाह ॥

भैमौ ततः साप्तपदीनमद्यप्रातीनधेनुं नु पुषाण भूत्यै ।
मन्त्रेषडक्षीण इहाश्वलंकर्मीणो भवालंपुरुषीणशक्ते ॥ २८ ॥

२८. अलंपुरुषाय पौरुषोपेतायालंपुरुषीणा शक्तिर्यस्य हे अलंपुरुषीणशक्ते महापराक्रमिंस्ततो हेतोर्भूत्यै राज्यादिलक्ष्म्यर्थं भैमौ विषये

१ ए समास°. २ बी °हास्वलं°. ३ ए °शक्तेः । अ°. सी °शक्ते । अ°.

१ ए °षा यु°. २ ए °णामि°. ३ बी °मित्र्यस्य. ४ बी सी °स्ताश्विव. ५ बी °ह । भैमौ. ६ बी °लं पौरुषा°. ७ ए °क्रमंस्त°. सी °क्रमस्त°. ८ बी °तो भूत्यै.

साप्तपदीनं सप्तभिः पदैरवाप्यं सख्यं पुषाण पोषय । अद्यप्रातीनधेनुं न्वद्य प्रातर्वा[1] विजनिष्यमाणां धेनुं यथा कश्चित्पुष्णाति । तथा-विद्यमानानि षडक्षीण्यस्मिन्नषडक्षीणस्तस्मिंस्त्वां[2] मां च विनान्येन केनाप्यज्ञात इत्यर्थः । इहं[3] कृतपूर्वे मन्त्र आश्वलंकर्मणेलंकर्मीणः[4][5] समर्थो भवामुं मदीयं मन्त्रमविलम्बं कुर्वित्यर्थः ॥ इन्द्रवज्रा छन्दः ॥

रुदितमिव वचोस्याशितंगवीने न समीचीनममंस्त राडुदीच्याः ।[1][2]
सम्यग्भेदितयैव मन्यमानः सचिवं सोश्वतयाश्वकानिवोच्चैः ॥२९॥[3][4]

२९. उदीच्या उत्तरस्या[6] दिशो राडान्नोस्यामात्यस्य[7] वचः समीचीनं[8] युक्तं नामंस्त । यथाशिता[9] गावोस्मिन्नाशितंगवीनमरण्यं तस्मिन्रुदितं निष्फलत्वात्समीचीनं लोको न मन्यते । यतः कीदृक् । सचिवं सम्यग्निश्चितं भेद(दि)तयैव भेदोस्यास्ति भेदी तद्भावेनैव भेदिना भेदितमेवेत्यर्थः । मन्यमानः । यथा कश्चिदुच्चैरुन्नतानश्वकानश्वकाख्यानश्वसदृशान्पशुभेदानश्वस्य[10] प्रतिकृतीः[11] काष्ठादिमयान्प्रतिच्छन्दकान्वा[12] भ्रान्त्याश्वतयाश्वा[13] अमी इति मन्यते । अनेनोपमानेनान्नस्य भ्रान्ततासूचि ॥

अभ्यमित्रीये । अभ्यमित्र्यः[14] । अभ्यमित्रीण । इत्यत्र "अभ्यमित्रमीयश्च" [१०४] इतीययेनाः ॥

---

१ **ए** °चोस्यशि°. २ **बी** °स्यासितं°. **सी** °स्यासितग°. ३ **बी सी** °ग्भेदत°. ४ **बी** °यास्वका°.

---

१ **ए** °र्वा ष्विज°. २ **बी सी** °स्तस्मिस्त्वां. ३ **सी** °इत्यकृ°. ४ **सी** कर्मीणोलं°. ५ **बी** °र्मणोलं°. ६ **बी** °रस्यां दि°. ७ **सी** राजान्नो°. ८ **सी** °नं लोको. ९ **बी** °शितगा°. १० **बी** °शानशु°. ११ **ए बी** °कृतीका°. १२ **बी** काष्ठम°. १३ **बी** °न्त्याश्वा इमी. १४ **ए सी** °मित्र्य । अ°.

समांसमीना । अद्यश्वीन । अद्यप्रातीन । आगवीनेषु । साप्तपदीनम् । एते "समांसमीना०" [१०५] इत्यादिना[1] निपात्याः ॥

अषडक्षीणे । आशितंगवीने । अलंकर्मीणः । अलंपुरुषीण । इत्यत्र "अषडक्ष०" [१०६] इत्यादिनेनः[3] ॥

समीचीनम् । अत्र "अदिक्०" [१०७] इत्यादिनेनो वा ॥ पक्षे । सम्यक् ॥ अदिक्स्त्रियामिति किम् । उदीच्याः ॥

अश्वकान् । इत्यत्र "तस्य०" [१०८] इत्यादिना संज्ञायां प्रतिकृतौ च कः ॥ औपच्छन्दसकापरान्तिका[4] छन्दः ॥

ऊचे च चञ्चामपि किं चुलुक्यं स्तवीषि मां भापयितुं दुराश[1] ।

को नाम चित्रायतनध्वजस्थभीमान्तकव्याघ्रशताद्बिभेति ॥ ३० ॥

३०. स्पष्टः । किं तु चञ्चामपि चञ्चा तृणमयः पुरुषो यः क्षेत्रे रक्षणाय क्रियते । अकिंचित्करत्वेन तत्तुल्यमपि । चित्रायतनध्वजस्थभीमान्तक[व्याघ्र?]शताच्चित्रस्था[5]श्चित्रे[6] लिखिता ये भीमा भीमसेना आयतनस्था देवगृहस्था येन्तकाः पूजार्था यमप्रतिकृतयो ध्वजस्था ये च व्याघ्रास्तेषां शतादपि ॥

नृ । चञ्चाम् ॥ पूजार्थे । आयतनस्थान्तक[7] ॥ ध्वजे । ध्वजस्थव्याघ्र[8] ॥ चित्र । चित्रस्थभीम । इत्यत्र[9] "न नृ०" [१०९] इत्यादिना[10] न कः ॥ उपजातिः ॥

विक्रीणते करटिकान्दधते च गौरीं

पथ्यत्र[2] देवपथराजपथे स्वगुप्त्यै ।

राज्ञां चरास्त्वमु चरः प्रकटः शिलेय

वास्तेयवक्र सुचिरादुपलक्षितोसि ॥ ३१ ॥

१ सी °श । केना°. २ ए °थ्यस्य दे°.

१ बी °द्यप्रती°. २ सी °ना संज्ञायां. ३ ए °नेन । स°. ४ सी का ॥ ऊ°. ५ बी सी °स्थाचित्रे. ६ ए °श्चित्रलि°. ७ बी °स्थानक. ८ बी °जस्थान्तव्या°. सी °जस्थ°. ९ बी °त्र नाश्रिता°. १० ए °ना कः.

३१. उ हे शिलेय स्वस्वाम्यवदातैरनार्द्रीकृतहृदयत्वाच्छिलाया-स्तुल्य कठोरहृदय तथा वास्तेयमशुचिकल्पवर्चःक्षेपित्वाद्वस्तेः पुरी-षोत्सर्गद्वारस्य तुल्यं वक्रं यस्य हे वास्तेयवक्त्र राज्ञां शत्रूणां चरा अत्र पथ्यस्य पुरस्य मार्गे करटिकान्करटिनो हस्तिनस्तुल्यान्मृत्तिकाम-यानि हस्तिप्रतिच्छन्दकानि विक्रीणते तथा गौरीं गौर्यास्तुल्यां जीवि-कार्थां गौरीप्रतिमां दधते । किंभूते पथि । देवपथराजपथे विस्तीर्णत्वान्मनोज्ञत्वाच्च देवपथराजपथतुल्ये । त्वं पुनर्द्विषां प्रकटश्चरः परं सुचिरादुपलक्षितोसि । एतेनास्य गुप्तचरेभ्योप्यतिदुष्टतोक्ता ॥ वसन्ततिलका ॥

शैलेय्यसौ धीः क्व भवादृशानां द्रव्यं कुशाग्रीयधियां क्व मन्त्राः ।
तत्काकतालीयमजाकृपाणीयं कार्यसिद्धिर्यदशाख्यमुख्यात् ॥३२॥

३२. शैलेय्यतिस्थूलत्वाच्छिलायास्तुल्यासौ पूर्वोक्ता भवादृशानां धीः क्व । तथा कुशाग्रीयधियां सूक्ष्मबुद्धीनां मन्त्राः क्व च । कीदृशाः । द्रव्यं द्रुतुल्या यथा द्रु अग्रन्थ्यजिह्मं दारूपकल्प्यमानं विशिष्टेष्टफलरूपं स्यात्तथा विशिष्टेष्टफलदा इत्यर्थः । भवादृशाः स्थूलबुद्धयो मन्त्रायोग्या इत्यर्थः । ननु मन्मन्त्रेणाप्यनेकाः कार्यसिद्धयोभूवंस्तत्कथमहं मन्त्रा-योग्य इति न वाच्यम् । यतो भवतस्त्वत्तो यत्कार्यसिद्धिस्तत्काकताली-

---

१ बी °धिकां क्व. २ बी °त्कालता°.

---

१ सी स्वष्वस्वा°. २ बी सी °नाद्रीकृ°. ३ बी °च्छिशाया°. ४ बी °चःक्षपि°. ५ सी गौर्या°. ६ ए बी गौर्यास्तु°. ७ बी गौरीं प्र°. ८ बी °त्वात्मनेज्ञात्वा°. ९ सी °भ्योति°. १० सी °क्ता । भवादृशानां धीक्व । तथा. ११ बी °र्वोक्त्या भ°. १२ सी दारुप्रक°. १३ बी सी °ष्टरू°. १४ ए °ष्टेफ°. १५ सी °फला इ°. १६ सी °योभवं°. १७ बी °ति वा°. १८ ए °त्स्वचौत्का°.

यमाश्चर्यभूतमित्यर्थः । यद्वाजाकृपाणीयमजया पादेनावकिरत्यात्मवधाय कृपाणस्य दर्शनमजाकृपाणं तत्तुल्यं परिणामेनर्थहेतुरेवाभूदित्यर्थः । यतः । किंभूतात् । पुरुषस्कन्धस्य वृक्षस्कन्धस्य वा तिर्यक्प्रसृतमङ्गं शाखेत्युच्यते । तद्यथा शाखा पार्श्वायता तथा कुलस्य यः पार्श्वायतोङ्गभूतः स शाखायास्तुल्यः शाख्यस्तथा मुखस्य तुल्यो मुख्यः प्रकृष्टो विशेषणकर्मधारये न तथा यस्तस्मात् ॥

गौरीम् । अत्र "अपण्ये जीवने" [११०] इति न कः ॥ जीवन इति किम् । करटिकान् ॥

देवपथराजपथे । अत्र "देव०" [१११] इत्यादिना न कः ॥

वास्तेय । इत्यत्र "व(ब?)स्तेरेयञ्" [११२] इत्येयञ् ॥

शिलेय । शैलेयी । इत्यत्र "शिलाया एयच्च" [११३] इत्येयच् । एयञ्च ॥

शाख्य । मुख्यात् । इत्यत्र "शाखादेर्यः" [११४] इति यः ॥

द्रव्यम् । अत्र "द्रोर्भव्ये" [११५] इति यः ॥

कुशाग्रीय । इत्यत्र "कुशा०" [११६] इत्यादिनेयः ॥

काकतालीयम् । अजाकृपाणीयम् । एतौ "काक०" [११७] इत्यादिना निपात्यौ ॥ इन्द्रवज्रा छन्दः ॥

भोः सपत्न वचनेन सैकताशार्करेण यशसो मम ध्रुवम् ।
श्येकशालिकभुजस्य नेच्छसि त्वं भवत्रिजगदेकशालिकम् ॥ ३३ ॥

---

१ बी सी °न शैक°. २ ए °म श्रियः । एक°. ३ सी °च्छति त्वं.

---

१ बी °णीम°. २ बी °नाकि°. ३ बी सी °र्थः । किं°. ४ सी °स्य वा. ५ सी °था यः कुलस्य पा°. ६ सी °यताङ्ग°. ७ ए °त शा°. ८ बी शाखास्त°. ९ बी मुख्य प्र° १० ए °री । अ°. ११ बी °ण्ये न जी°. १२ बी °ति कः. १३ बी सी °शाग्राग्री°. १४ ए कुशीयेत्या°. सी कुश्येत्या°.

३३. भोः सपत्न सपत्न्यास्तुल्य शत्रो सैकतं काठिन्यवैरस्यादिना सिकताया वालुकायास्तुल्यमत एवाशार्करं न शर्कराया इक्षुविकारस्य तुल्यं यत्तेन प्राक्तनेन वचनेन कृत्वा ध्रुवं ज्ञायसे त्वं मम यशस ऐकशालिकमेकशालायास्तुल्यं भवत्सत्रिजगन्नेच्छसि । ननु ते यशः कुतस्त्यमिति न वाच्यम् । यतः श्रियो विजयलक्ष्म्या एकशालिकावेकशालायास्तुल्यौ भुजौ यस्य तस्य कुमारपालस्यैकस्यैवारेर्जयेन जगत्त्रयेप्यकृच्छ्रेण विचरन्मम यशस्त्वं सपत्नत्वान्नेच्छसीत्यर्थः ॥ रथोद्धता छन्दः ॥

वाचापि कौलिशिक गौणिकलौहितीक-

वस्त्रार्ह नो पलितकार्किक हन्मि तत्त्वाम् ।

कार्कीककीर्तिगुरुलौहितिकानुरागे-

च्छा यद्विशालजगतीह विशङ्कटा मे ॥ ३४ ॥

३४. रे न केवलं हृदा वाचापि कौलिशिक वज्रतुल्यात एव रे गौणिकलौहितीकवस्त्रार्ह गौणिकमतिस्थूलत्वाद्द्रोण्यास्तुल्यं लौहितीकं च लोहितवर्णस्य तुल्यमलोहितवर्णमपि मञ्जिष्ठाद्युपाश्रयवशात्तथावभासमानं यद्वस्त्रं मञ्जिष्ठादिकोच्छलकवस्त्रमित्यर्थः । तस्यार्ह योग्य । तथा रे पलितकार्किक पलितैः श्वेताश्वतुल्य तत्तस्मात्त्वां न हन्मि यद्यस्मादिह विशालजगति मे मम कार्कीककीर्तयः श्वेताश्ववन्निर्मलयशसो ये गुरवो मत्पित्रादयः पूज्यास्तेषां लौहितिको लोहिततुल्यो रक्तो यैस्त्वद्विष-

१ सी °र्ह गौणिकमतिस्थू°. २ ए हतन्मि.

१ बी °पत्नारतु°. २ बी शत्रोः सै°. ३ सी °स्य तस्य कुमार°. ४ ए °शालक°. ५ ए °न्म य°. ६ बी °रत्वं संपन्नत्वा°. ७ बी °ल्यं लोहि°. ८ बी °द्वस्त्रम°. ९ ए °तैः श्वेता°. १० सी तस्मा°. ११ सी °शाले ज°. १२ बी °षां लोहि°. १३ ए °तिको लौहि°. बी °तिकालो°. १४ सी यद्वस्तुविष°.

योनुरागस्तस्येच्छा । यद्वा कार्कीककीर्तयो ये गुरवस्त्वत्पित्रादयस्तेषु या मम[1] लौहितिकानुरागेच्छा सा विशङ्कटा विस्तीर्णास्ति । मद्गुरुभिस्त्वद्गुरुभिश्च त्वं मम[2] भलापित इति त्वां न हन्मीत्यर्थः ॥

अशार्करेण । सैकत । इत्यत्र "शर्करादेरण्" [११८] इत्यण् ॥

सपत्न । इत्यत्र[3] "अः सपत्न्याः" [११९] इति-अः ॥

एकशालिक । इत्यत्र "एक" [१२०] इत्यादिना-इकः ॥

गौर्णिक[4] । कौलिशिक[5] । ऐकशालिकम् । अत्र "गोण्यादेश्चेकण्" [१२१] इतीकण् ॥

कार्कीक । कार्किक[6] । लौहितीक[7] । लौहितिक । इत्यत्र "कर्क०" [१२२] इत्यादिना टीकणिकणौ ॥

विशाल । विशङ्कटा[8] । इत्यत्र "वेर्०" [१२३] इत्यादिना शालशङ्कटौ[9] ॥

वसन्ततिलका ॥

विकटोत्कटप्रकटवाक्स्तवीषि यं रणसंकटेवकटधन्वपाणिना[1] ।
निकटेभिभूतमवटीटिनं मयावकुटारमौलिरवटीट पश्य तम् ॥३५॥

३५. रे अवटीट नासानतिमं[10]श्चि[11]पिटनासिक तिरस्कुर्वाण[12] एवं संबोधयति । यद्वा रे अवटीट स्वाम्यभक्तत्वेनातिनिन्द्यत्वाल्लोकानां[13] नासानतिहेतो यं भैमिं त्वं स्तवीषि । कीदृक्सन् । विकटा विस्तृतोत्कटाधिका प्रकटा सर्वलोकस्य प्रकाशा च वाग्यस्य सः । तं भैमिं त्वं पश्य । कीदृशम् । अवकटमारोपितत्वान्नतं धन्व यत्र स तथा पाणिर्यस्य तेन

१ ए °धनुपा°.

१ बी °म लोहि°. २ बी °म मिला°. ३ ए °त्र अ स°. ४ ए °णिकः । कोलि°. सी °णिकः । कौ°. ५ ए सी °शिकः । एक°. ६ ए °क । लोहि°. ७ सी °क । लोहि°. ८ बी सी विसङ्क°. ९ बी सी °लसङ्क°. १० बी °मंचिपि°. ११ ए °श्चिपुट°. १२ सी °ण इति सं°. १३ ए °नां सा°.

मया निकटे शीघ्रं करिष्यमाणत्वात्समीपस्थे रणसंकटे रणसंकीर्णेभिभूतमत एवावटीटं नासानतिरस्यास्त्यवटीटिनम् । पराभवेपि हि नासा मुटति । अत एव कीदृक्सन्पश्य । अवकुटारमौलिश्चौलुक्यपराभूत्यातिपराभूतंमन्यत्वान्नतशिराः ॥ नन्दिनी छन्दः ॥

अनवभ्रटः स मुनिरप्सरोजनो-
नवनाट आश्वचिपिटाश्च बन्दिनः ।
अतिचिक्क तेप्यचिकिना ध्रुवासिनो
निबिडं ममाजिमवलोक्य भाविनः ॥ ३६ ॥

३६. अतिशयितं चिक्कं नासानतिरस्य यद्वातिशयेन चिक्को नासानतिमानतिचिक्कस्तत्संबोधनं हे अतिचिक्क । यद्वा हेतिनिन्द्य निबिडं ममाजिमवलोक्य स रणकौतुकी मुनिर्नारदो भावी । कीदृक् । अनवभ्रटो नासानतिरहितोनासानतिमान्वानिन्द्यो वा । हर्षेणोत्फुल्लनासिक इत्यर्थः । एवमग्रेपि योजना कार्या ॥

अतिनिबिडतया तवात्र किं किं न्वतिनिबिरीसतयान्यदुर्जनानाम् ।
मम रणनिबिरीसताविचाराद्द्रुहिणसुतो भविता मुदश्रुचिल्लः ॥३७॥

३७. अत्राजिविषये तवातिनिबिडतयातिशयितं निबिडं नासानतिरस्य यद्वातिशयेन निबिडो नासानतिमानतिनिबिडस्तस्य भावेनारुच्यार्थ्यन्तं नक्रमोटनेन किं न किंचिदित्यर्थः । अन्यदुर्जनानां त्वदितरखलानां वातिनिबिरीसतया नक्रमोटनेन किं नु । यस्मान्मम रणनिबि-

१ सी अव°. २ ए °नोवन°. ३ बी °पिदाश्च. ४ सी °न्दिन । अ°. ५ बी °क तोप्य°.

१ बी सी °संकी°. २ ए °टीटा नासामति°. ३ बी सी °निनार°. ४ ए °भ्रष्टो मासा°. ५ बी नाशान°. ६ बी °नाशानाति°. सी °नाशान°. ७ सी °वेनरु°. ८ बी °त्यन्तन.° ९ ए वानि°. १० ए °न्मर°.

रीसताविचारात्संग्रामनीरन्ध्रताविमर्शाद्द्रुहिणसुतो नारदो भविता भविष्यति । कीदृक् । मुदश्रुचिल्लो हर्षनेत्राम्बुभिः क्लिन्नचक्षुरन्वितः ॥ एतेनामात्यं निराकृत्य युद्धविधानमेव राज्ञा समर्थितम् ॥ औपच्छन्दसकम् ॥

स मन्त्रिणं वार्धकचुल्लमेवमुत्कोपपिल्लस्तमुवाच यावत् ।
उपत्यकाधित्यकयोर्गिरीणां प्रतिध्वनंस्तावदभून्निनादः ॥३८॥

३८. स आन्नो यावद्वार्धकचुल्लं वार्धक्येन गलन्नेत्रं तं मन्त्रिणमेवमुक्तनीत्योवाच । कीदृक्सन् । उदुल्लसितो मन्त्रिणं प्रति यः कोपस्तेन पिल्लो गलन्नेत्रः । तावद्गिरीणामुपत्यकाधित्यकयोरधोभूम्यूर्ध्वभूम्योः प्रतिध्वनन्निनादः कुमारपालसैन्यकलकलोभूत् ॥

विकट । इत्यत्र "कटः" [१२४] इति कटः ॥

संकटे । प्रकट । उत्कट । निकटे । अत्र "संप्र०" [१२५] इत्यादिना कटः ॥

अवकुटार । अवकट । इत्यत्र "अवात्०" [१२६] इत्यादिना कुटारकटौ ॥

नासानतौ । अवटीटिनम् । अवनाटः । अनवभ्रटः ॥ तद्वति । अवटीटं । अनवनाटः । अनवभ्रटः । अत्र "नासा०" [१२७] इत्यादिना टीटनाटभ्रटाः ॥

अचिकिनाः । अचिपिटाः । चिक्क । इत्यत्र "नेरिन०" [१२८] इत्यादिना नेर्नासानतौ तद्वति चेनपिटकाः । नेर्यथासंख्यं चिक्चिचिक् इत्यादेशाः ॥

नासानतौ तद्वति च । निबिड । निबिरीस ॥ नीरन्ध्रे । निबिडम् । निबिरीसता । इत्यत्र "बिड०" [१२९] इत्यादिना बिडबिरीसौ ॥

१ बी °भूवन्निताव: । स.

१ ए क्लिनच°. २ ए °लनेत्र:. ३ ए °भूमूर्ध्व°. ४ सी °ललो°. ५ सी °टार: । अ°. ६ ए °रकौ । ना°. ७ बी °टीट: । अ.° ८ बी सी °वभ्र°. ९ बी सी चिकचि°. १० बी °देशः । ना°. ११ बी °रन्ध्य । नि°. १२ बी °रीशौ । चि°.

चिल्लः । पिल्लः । चुल्लम् । अत्र "क्लिन्नात्०"[1] [१३०] इत्यादिना[2] लः । क्लिन्न[3]-स्य च चिल्पिल्लचुल्लादेशाः ॥

उपत्यकाधित्यकयोः । इत्येतौ "उपत्यका०" [१३१] इत्यादिना निपात्यौ ॥

उपजातिः ॥

अविकटाविपटैरिव जाङ्गलैः करटिगोष्ठनियोगिभिराकुलैः ।
तुरगषङ्गवसन्मयगोयुगाधिकृतिभिश्च विराविभिरैधि सः ॥ ३९ ॥

३९. जाङ्गलैर्जङ्गलदेशोद्भवैर्नरैः स चौलुक्यसैन्यकलकल ऐधि वर्धितः । यत आकुलै[4]र्द्विट्सैन्यनादश्रवणा[5]त्क्षुभितैः सद्भिर्विराविभि[6]र्विरसं शब्दायमानैः । अविकटाविपटैरिव यथाविकटा ऊ(उ?)रणानां समूहा अविप[7]टाश्चावीनां विस्ताराश्चाकुलाः सन्तो विरुवन्ति । किंभूतैः । कर-टिगो[8]ष्ठे[9]षु हस्तिनां स्थानेषु नियोगिभिरायुक्तैस्तथा तुरगषङ्गवेष्वश्वष[10]ङ्गवेषु सन्मयगोयुगेषु शोभनोष्ट्रभेदानां द्वित्वेषु चाधिकृतिभिश्च ॥

अविकटाविपटैः । इत्यत्र "अवेः०" [१३२] इत्यादिना कटपटौ ॥

करटिगोष्ठ । इत्यत्र "पशुभ्यः०" [१३३] इत्यादिना गोष्ठः ॥

सन्मयगोयुग । इत्यत्र "द्वित्वे गोयुगः" [१३४] इति गोयुगः ॥

तुरगषङ्गव । इत्यत्र "ष[11]ट्त्वे षङ्गवः[12]" [१३५] इति षङ्गवः ॥ द्रुतविलम्बितं छन्दः ॥

ढक्कानकशङ्खजोथ धीरैस्तिलतैलेङ्गुदतैलवद्व्यवेचि[1] ।
रणकर्म[2]ठभैमिवीर्यशंसी स दिवा तारकितद्युवच्च भीदः ॥४०॥

४०. स्पष्टम् । किं तु धीरैर्निर्भयभटैर्व्यवेचि । अयं ढक्काजोयं चा[13]-

१ बी °वेत्ति । र°. २ ए °र्मणि भीमवी°.

१ ए बी क्लिनात्. २ सी °ना नः । क्लि°. ३ बी क्लिनस्य. ४ ए °लैर्द्वेट्सै°. ५ ए °णाक्षुभितैः सर्वि° ६ ए °भिर°. ७ बी पटोश्चा.° ८ सी °ष्ठे-त्यत्र पशुभ्यः. ९ ए °षु नि°. १० ए °षङ्गेषु. ११ ए षङ्गे ष°. १२ ए °वः । द्रु°. १३ ए चातजो°.

नकजोयं च शङ्खजो निनाद इत्यक्षुब्धचित्तत्वेन पृथग्निर्णीतः । दिवा तारकितद्युवद् दिने[1] संजाततारका द्यौर्महारिष्टसूचकत्वाद्यथा भीदा स्यादेवं[2] भीदः । औपच्छन्दसकम्[3] ॥

सोश्रावि त्रासाद्वेगितैर्द्राग्यवौघा-
लू(लूँ)त्वाप्युज्झद्भिर्गर्भितान्रज्जमात्रान् ।
गर्भः संजातोस्याः प्रियाया हि योसौ
मा च्योष्टेत्यार्तैर्जाङ्गलैः कर्मकृद्भिः ॥ ४१ ॥

४१. जाङ्गलैः कर्मकृद्भिः स निनादस्त्रासादश्रावि । कीदृशैः सद्भिः । अस्याः प्रियाया भार्याजातेर्यो गर्भो गर्भजातिः संजातोसौ मा च्योष्टैत-द्रौद्रस्वरश्रवणोत्थभयातिरेकेण माधः पप्तदिति हेतोरार्तैः सखेदैस्तथा वेगितैर्भयात्संजातवेगैरत एव यवौघाल्लू(लूँ)त्वापि द्रागुज्झद्भिः । किंभूतान् । अपि गर्भितान्संजातगर्भान्फलितानित्यर्थः । तथा रज्जुस्तिर्यक्प्रमाणमेषां रज्जुमात्रास्तान् ॥

तिलतैलेक्षुदतैल । इत्यत्र "तिल०" [१३६] इत्यादिना तैलः ॥

कर्मठ । इत्यत्र "तत्र०" [१३७] इत्यादिना ठः ॥

तारकित । वेगितैः । अत्र "तदस्य०" [१३८] इत्यादिना इतः ॥

गर्भितान् यवौघान् । इत्यत्र "गर्भादप्राणिनि" [१३९] इतीतः ॥ अप्राणिनीति किम् । गर्भः संजातोस्याः प्रियायाः ॥

रज्जुमात्रान् । इत्यत्र "प्रमाणान्मात्रट्"[१४०] इति मात्रट् ॥ वैश्वदेवी छन्दः ॥

---

१ सी °घाल्लवाप्यु°. २ ए सी गर्भ सं°.

---

१ ए °दिनं सं°. सी °दिनसं°. २ ए °वं भेदः. ३ बी °म् । सौस्रावि°. ४ ए निनद°. ५ ए °दस्राविः. ६ ए °सौ मोच्योष्टौत°. बी सी° सौ सौ मा. ७ बी °ष्टैद्रौद्र°. ८ सी पतदि°. ९ ए °वौघल्ल°. १० ए ताराकि°. ११ बी इतः. १२ बी °न्दः । पोसखीमि°.

पौरुषीमिव विलङ्घ्य हास्तिनीं हस्तिमात्र[1]दृषदं[2] नदीमथ ।
आगतो[3]स्य कथितश्चुलुक्यराड्बन्दिभिः पुरुषमात्रफालदैः ॥ ४२ ॥

४२. अथा[1]स्यान्नस्य चुलुक्यराडागतो बन्दिभिः कथितः । किं कृत्वा । नदीं पौरुषीमिव पुरुषं[2] ऊर्ध्वमानं यस्यास्तामिव[3] स्त्राघा(गाधा?)-मिव विलङ्घ्योल्लङ्घ्य । किंभूताम् । हस्त्यूर्ध्वमानं यस्यास्तां हास्तिनी-मस्त्रा[4]घा(गाधा?)मपीत्यर्थः । तथा हस्तिमात्रा[5][6] दृषदः शिला यस्यां तां महाशिलाभिर्दुर्लङ्घ्यामपीत्यर्थः । यद्येवं तर्हि कथं[7] व्यलङ्घि[8]तेत्याह । यतः पुरुषमात्रफालदैः शीघ्रं जिगमिषया पुरुषप्रमाणा[9]न्फालान्ददद्भिः ॥

हास्तिनीम्[10] हस्तिमात्र । पौरुषीम् पुरुषमात्र । इत्यत्र "हस्ति०" [१४१] इत्यादिना वाण् ॥ रथोद्धता छन्दः ॥

दो[4]ष्णेभहस्तद्वयसेन तालदघ्नं दधद्धस्तफलं च कुन्तम् ।
आन्नः पदन्यासविदीर्णहस्तमात्रावनिर्नागमथारुरोह ॥ ४३ ॥

४३. स्पष्टम्[11] । किं त्विभहस्तद्वयसेन हस्तिशु[12]ण्डाप्रमाणेन । तालदघ्नं तालवृक्षप्रमाणमतिप्रलम्बमित्यर्थः । हस्तफलं हस्तप्रमाणाग्रभागकं च । पदन्यासविदीर्णहस्तमात्रावनिः । अनेनास्यातिबलि[13]ष्ठत्वोक्तिरशकुनस्तथा[14] च ॥ इन्द्रवज्रा छन्दः ॥

---

१ **सी** हस्तमा°. २ **ए** °दृष्विन्नदी°. ३ **सी** °तोथक°. ४ **सी** दोषेभ°.

---

१ **सी** °थान्न°. २ **बी** °षमूर्द्धमा°. ३ **ए** °व स्तांघामि°. **सी** °व वि°. ४ **बी** °स्त्रायाम°. ५ **सी** हस्तमात्र्यो दृ°. ६ **बी** °मात्र्यो दृ°. ७ **बी** °थं विल°. **सी** °थं विलंघ्यते°. ८ **ए** °ङ्घन्तेत्या°. ९ **ए** °णान्फलान्दद्भिः. **बी** °णान्फला°. १० **ए** °म् हास्ति°. ११ **सी** स्पष्टः । किं. १२ **बी** °स्तिसुण्डा°. १३ **ए** °लिष्ठः । त्वो°. १४ **बी** °स्तवा च.

राजानोस्येभैः शतमात्रैः शतयोधै-
रग्रेभूवन्द्राग्द्विवि[1]त[2]स्त्यूर्जितकुम्भैः ।
बाणांश्चा[3]स्यन्षट्छतमात्रात्तधनु[4]ष्का-
स्त्रिंशन्मात्रान्विंशतिमात्रान्दशमात्रान् ॥ ४४ ॥

४४. अस्यान्नस्याग्रे द्राग्राजानोभूवन् । कैः सह । इभैर्गजैः । किंभूतैः । शत[1]मात्रैः शतप्रमाणैस्तथा शताः शतप्रमाणा योधा येषु तैरनेकयोधशतान्वितैस्तथा द्वे वितस्ती मानमे[2]षां द्विवितस्ती(स्ति?) मानमेषां स्यादिति वा द्विवितस्तयो वितस्तिद्वयमात्रमुच्छ्रिताः परिमण्डला वेत्यर्थः । ऊर्जिता बलिष्ठाः कुम्भाः कुम्भस्थलानि येषां तैस्तथास्याग्रे वर्तमानाः [3]षट्छतानि मानमेषां स्यात्[4]षट्छतमात्रा य आत्तधनुष्का धनुर्धरास्ते च बाणानास्यंश्चिक्षिपुः । कतिसंख्यान् । त्रिंशद्विंशतिश्च दश च मानमेषां स्या[5]त्तांस्तथा ॥

तालदघ्नम् । इभहस्तद्वयसेन । हस्तमात्र । इत्यत्र "वोर्ध्वं०" [१४२] इत्यादिना वा दघ्नट्द्वय[6]सटौ ॥ पक्षे मात्रट् ॥

हस्तफलम् । अत्र "मानाद्०" [१४३] इत्यादिना प्रस्तु[7]तस्य मात्रडादे[8]र्लुप् ॥ केचित्तु मानमात्रान्मात्रटं तस्यासंशये लुब्विकल्पं चेच्छन्ति । शतयोधैः । शतमात्रैः ॥

द्विवितस्ति । इत्यत्र "द्विगोः संशये च" [१४४] इति मात्रडादेर्लुप् ॥ अन्ये तु रूढप्रमाणान्तादेव द्विगोरिच्छन्[9]ति । तन्मते षट्शतमात्र इत्यत्र मात्रटो न लु[10]प् ॥

१ बी °वितिस्फूर्जि°. २ ए °तस्यूर्जि°. ३ बी °श्चास्यान्षट्कत°. ४ ए °नुष्वास्त्रि°.

१ सी °तप्र°. २ ए सी °षां स्या°. ३ बी षट्शता. ४ बी °त्षट् शत°. ५ सी स्यात्तथा. ६ बी सी °यशटौ. ७ सी °तमा°. ८ बी °त्रैः । द्वयिस्ति. ९ ए °न्ति । दश्या°. १० सी °पू । त्रि°.

दशमात्रान् । त्रिंशन्मात्रान् । विंशतिमात्रान् । अत्र "स(श)न्०" [१४६] इत्यादिना डिनोपवादो मात्रट् ॥ मत्तमयूरं छन्दः ॥

दश्याननो विंशिभुजो नु राक्षसो जेतुं त्रयस्त्रिंशिन उद्यतः सुरान् ।
आन्नोप्यधिज्यं रभसाद्धनुर्व्यधादियत्कियन्मेरिबलं ब्रुवन्निति ४५

४५. आन्नोपि रभसायुद्धातिरसेन धनुरधिज्यं व्यधात् । दशीनि दशसंख्यान्याननानि यस्य तथा विंशिनो विंशतिपरिमाणा भुजा यस्य स विंशिभुजो राक्षसो रावणो यथा रभसादधिज्यं धनुर्व्यधात् । कीदृक्सन् । त्रयस्त्रिंशन्मानमेषां त्रयस्त्रिंशिनः सुरान् ध्रुव १ धर २ सोम ३ विष्णु ४ अनिल ५ अनल ६ प्रत्यूष ७ प्रभासा ८ ख्यानष्टौ वसून् प्रागुक्तनामकानेकादश रुद्रान् द्वादशार्कांश्च नासत्यौ च ३३ जेतुमुद्यतः । शिष्टं स्पष्टम् ॥

दशि । त्रयस्त्रिंशिनः । विंशि । इत्यत्र "डिन्" [१४७] इति डिन् ॥

इयत् । कियत् । इत्यत्र "इदं०" [१४८] इत्यादिनातुरिदंकिमोरिय्किय‍ौ च ॥ इन्द्रवंशावंशस्थयोरुपजातिः ॥

आस्यन्यावन्तोरिवीरा यतीषूंस्तावन्तोमी गूर्जरास्तत्यपि द्राक् ।
एतावन्तः कत्यहो सप्ततय्यामब्धीनां नः सैन्य इत्यालपन्तः ४६

४६. पूर्वार्धं स्पष्टम् । किंभूता द्वयेपि । अहो इत्यक्षान्तौ । नोस्माकं सैन्य एतावन्त एतत्संख्या अरयः कति कियन्तो न कियन्तोपीत्यर्थः । यतः । किंभूते सैन्ये । अब्धीनां सप्तावयवा यस्याः संहतेस्तस्यां सप्ततय्यामसंख्यत्वेनाब्धिसप्तकतुल्य इत्यर्थः ॥

१ ए °न् । अन्नो°. २ बी °साधनु°. ३ ए बी °ति । अन्नो°. ४ बी °रिवारा. ५ एसी °तीषूस्ता°. ६ बी °वतोमी. ७ ए एतव°. ८ बी °तव्यामष्टीनां. ९ बी सैन्यं इ°.

१ सी °न् । दशमात्रान् । अ°. २ बी °सायुद्धा°. ३ बी दशानि. ४ सी °स्य सः त°. ५ बी धधर. ६ बी °नामाने°. ७ सी °त्यौ जे°. ८ बी एतान्संख्या. ९ ए °वा तय°. सी °वास्या संसते°. १० बी °तव्यामसंख्यना°.

यावन्तः[1] । तावन्तः । एतावन्तः । अत्र "यत्तद्०" [१४९] इत्यादिना डावादिरतुः ॥

यति । तति । कति । इत्यत्र "यत्तद्०" [१५०] इत्यादिना डतिः[2] ॥

सप्ततय्याम् । अत्र "अवयवात्तयट्" [१५१] इति तयट् ॥ शालिनी छन्दः ॥

द्वितयं[1] द्वयेन त्रितयं त्रयेण युयुधे भटानामभिलाषुकाणाम् ।
द्विमयं स्वजीवं यशसः परस्य द्विमयं स्वजीवस्य यशस्तु नैव ॥४७॥

४७. पूर्वार्धं स्पष्टम् । कीदृशानां भटानाम् । परस्य शत्रुसंबन्धिनो यशसो द्वौ गुणौ क्रेयावस्य स्वजीवस्य तद्द्विमयं स्वजीवं स्वजीवितव्यमभिलाषुकाणामिच्छतां तथा स्वजीवस्य संबन्धिनौ द्वौ गुणौ मूल्यमस्य यशसः क्रयस्य तत्परस्य शत्रोः संबन्धि यशस्तु नैवाभिलाषुकाणाम् । स्वकीयानामल्पविनाशेन परेषां च द्विगुणं[3] विनाशेन यत्[4]स्वस्य द्विगुणं यशः स्यात्तदिच्छतां यत्तु स्वकीयानां द्विगुणं विनाशे परेषां चाल्पविनाशे स्वस्यैकगुणं यशः स्यात्तन्नेच्छतां चेत्यर्थः ॥ केकिरवं छन्दः ॥

द्विमयं तनोर्मूल्यमधीशवित्तं
भवतात्तमित्यालपतो भटस्य[2] ।
सुभटे शिरश्छिन्दति तस्य रायो
द्विमयं वपुः क्रेयममंस्त भर्ता ॥ ४८ ॥

४८. भर्ता सुभटस्वामी तस्यारिशिरश्छेदकस्य स्वसुभटस्य वपुरमंस्ताज्ञासीत् । कीदृशम् । द्वौ गुणावस्य क्रेयभूतस्य वपुषस्तद् द्विमयं द्विगुणं रायो द्रव्यस्य क्रेयं क्रेतव्यम् । क्व सति । सुभटे । किंभूते । भटस्यारिवीरस्य शिरश्छिन्दति । यतः । किंभूतस्य[5] । आलपतो वदतः ।

१ ए °यं ये°. २ सी °स्य । रा°.

१ ए °न्तः । ए°. २ ए डति । स°. ३ सी °गुणवि°. ४ सी यत् स्या°. ५ ए °स्य ल°.

किमित्याह । हे सुभट भवता तनोरङ्गस्य मूल्यं मूल्यभूतमधीशवित्तं स्वामिद्रव्यं द्वौ गुणावस्य मूल्यभूतस्याधीशवित्तस्य द्विमयं द्विगुणमात्रं स्वपराक्रमस्य मानेन द्विगुणं स्वामिद्रव्यं त्वया गृहीतमास्त इत्यर्थः । तस्मात्तस्याधिकस्य द्रव्यस्य कार्यं युद्धिशेषं दर्शयेत्यर्थाद्गम्यत इति । एवं वदतो महारेः शिरश्छेदरूपेणावदातेनातिरञ्जितत्वादेतत्पराक्रमापेक्षया मयातिस्वल्पमेव दत्तमिति स्वाम्यज्ञासीदित्यर्थः ॥

द्वयेन द्वितयम् । त्रयेण त्रितयम् । अत्र "द्वि०" [१५२] इत्यादिना वायट् ॥

द्विमयं यशः स्वजीवस्य । द्विमयं स्वजीवं यशसः । द्वितीयार्थव्याख्याने । द्विमयमधीशवित्तं तनोर्मूल्यम् । द्विमयं वपू रायः क्रेयम् । अत्र "द्व्यादेर्०" [१५३] इत्यादिना मयट् ॥

एकादशं त्रिंशमथैकविंशं शतं सहस्रं कनकस्य लब्धा ।
एकादशो रुद्र इवारिमौलिं भर्त्रे ददन्निष्क्रयमाप कोपि ॥ ४९ ॥

४९. कोपि भटो निष्क्रयं कनकलाभस्यानृण्यमाप । कीदृक् । कनकस्य शतं सहस्रं च लब्धा लभमानोपि । किंभूतम् । एकादश त्रिंशदेकविंशतिर्वाधिकास्मिञ् शते सहस्रे वा तदेकादशं त्रिंशमथाथ वैकविंशम् । ईदृग्महादानस्यापि निष्क्रयं कथमापेत्याह । यतोरिमौलिं भर्त्रे ददत् । ईदृशोपि कुत इत्याह । यत एकादशानां पूरण एकादशो रुद्रः पिनाक्याख्यस्तत्तुल्यो महावीर्यत्वात् । रुद्रोपि हि देवत्वापू(त्पू)जार्थं भक्तेभ्यः कनकस्य शतं सहस्रं वा लब्धा स्यात् ॥

---

१ ए °रिमैलिर्भर्त्रे. २ सी °पि ॥ किंभू°.

---

१ ए °ण वदतो. २ सी °क्रमास्स. ३ बी °मस्यामा°. ४ ए °र्यं बुद्धिशे. ५ ए मति°. ६ ए °यधी°. ७ सी °म् । कीदृ°. ८ सी °माप्येत्या°. ९ बी सी °नाकाख्य°. १० ए °क्यास्त°. ११ सी °पि देवतापू°.

एकविंशम् । त्रिंशम् । एकादशं शतं सहस्रं वा । इत्यत्र "अधिकं०" [१५४] इत्यादिना डः ॥

एकादशः । अत्र "संख्या०" [१५५] इत्यादिना[1] डट् ॥ उपजातिः ॥

त्रिंश्यस्य विंशतितमस्य युदेकविंशी
त्रिंशत्तमस्य च सहस्रतमस्य चास्य ।
अर्वाक्तिथेः शततमीयमु मासतस्या(म्या)
भर्त्रेति[1] केपि कथिता द्विगुणीबभूवुः[2] ॥ ५० ॥

५०. केपि भटा द्विगुणीबभूवुर्हर्षेणोच्छ्वसिताः । यतो भर्त्रा कथिताः प्रशंसिताः । कथमित्याह । विंशतितमस्य विंशते[2]र्भटानां पूरणस्य विंशतिभटस्वामिन इत्यर्थः । अस्य प्रत्यक्षस्य महाभटस्येयं प्रत्यक्षा युद्रणं त्रिंशी त्रिंशतो युधां पूरणी । तथा[3] त्रिंशत्तमस्य त्रिंशतो भटानां पूरणस्यास्य च महाभटस्येयं युदेकविंश्येकविंशते[4]र्युधां पूरणी । तथा उ अहो सहस्र[5]तमस्य सहस्र[6]स्य भटानां पूरणस्यास्य[7] च भटराजस्य मासत[8]म्या मासपूरण्यास्तिथेरर्वाग्मासमध्य इत्यर्थः । इयं युच्छततमीति ॥ वसन्ततिलका ॥

संवत्सरतम्यर्धमासतम्योस्तिथ्यो[3]रिव पर्वाहवं विजानन् ।
युयुधेशीतितमा[4]ब्दकोपि कश्चित्षष्टितमाब्दमहेभवन्महौजाः[5] ॥५१॥

५१. कश्चिद्भटोशीतितमोशीतेः पूरणो[9]ब्दो वर्षं यस्य स तथातिवृद्धोपि युयुधे । किंवत् । षष्टितमः षष्टेः पूरणोब्दो वर्षं यस्य सोतितरुण इत्यर्थः । स चासौ महेभश्च तद्वत् । यतः कीदृक् । संवत्सरस्य

१ बी °ति कोपि. २ सी °वुः ॥ हर्षे°. ३ बी °स्तिथोरि°. ४ सी °मा. ब्दिको°. ५ ए °हौजः । क°.

१ ए °नाडः । उ°. २ सी °शति.° ३ सी °था उ अहो. ४ ए °विंशेर्यु°. ५ बी °हस्रत°. ६ सी °स्रभ°. ७ सी °स्य भ°. ८ बी °तस्या मा°. ९ ए °णोशब्दो-

पूरणी संवत्सरतम्यक्षयतृतीयादिस्तथार्धमासस्य पूरण्यर्धमासतम्यमावास्या पूर्णिमा वा । द्वन्द्वे तयोस्तिथ्योर्यत्पर्व हर्षक्रियारूप उत्सवस्तं[१]दिवाहवं विजानन् । ईदृशोपि कुत इत्याह[२] । यतो महौजाः शौर्यातिरेकेणोत्सवमिव रणं प्राप्यापि हृष्यन्नित्यर्थः ॥ औपच्छन्दसकापरान्तिका छन्दः ॥

एकषष्ट इव कोपि[१] कौरवः कोपि पञ्चम इवाथ पाण्डवः ।
युन्मुदं बहुतिथाद्दिना[२]दवापैकषष्टितमहायनोपि हि ॥ ५२ ॥

५२. कोपि भटो हि स्फुटमेकषष्टितमहायनोप्येकषष्टिपूर[३]णवर्षोपि कथमप्येकषष्टिवर्षमध्ये युद्धा[४]प्राप्त्या बहुति[५]था[६]द्बहूनां दिनानां पूरणा[७]द्दिनाच्चिरकालादित्यर्थः । युन्मुदं रणहर्षमवाप । यथैकषष्ट एकषष्टेः पूरणः कौरवः सेनान्या[८]ख्यो बहुतिथाद्दिनाद्युन्मुदमवाप । अथ त[९]था यथा पञ्चमः पाण्डवः सहदेवो बहु[१०]तिथाद्दिनाद्युन्मुदमवापैवं कोप्यपरोपि भटः । किल सेनानीः सहदेवश्च कु[११]रुपाण्डवयु[१२]द्धे युन्मुदमवापतुस्तच्च युद्धं पाण्डवानां कुरूणां च सर्वेषामपि षष्टि[१३]तमवर्षानन्तरमेव मिथो बभूवेति भारतम् ॥ रथोद्धता ॥

गणतिथैरिह संघ[३]तिथा भटैरमरपूगतिथत्वमयुर्हताः[४] ।
विरहितेयतिथैः कतिथैश्चभूरिति न किंचिदबुध्यत तत्र तु ॥५३॥

५३. इह रणे संघतिथाः संघानां बहूनां पूरणा भटा[१४] अयुः प्रापुः । किम् । अमरपूगतिथत्वं पूगानां बहूनां पूरणः पूगतिथोमराणां पूगति-

१ ए सी °पि कोर°. २ बी °नादिवा°. ३ ए °तितथा. ४ ए °र्हतः । वि°.

१ ए °स्तद्दिवा°. २ बी °प्यातिह°. ३ सी °रणो व°. ४ बी युद्धप्रा°. ५ बी °तिथ्याद्ब°. ६ ए °थावहू°. ७ ए सी °णादिना°. ८ सी °न्याख्ये ब°. ९ सी °था प°. १० सी °तिम°. ११ ए °रुवपा°. १२ ए °द्धेन्मु°. १३ बी °तव°. १४ बी °टा आयुः.

थोमरपूगतिथस्तद्भावं देवत्वमित्यर्थः । कीदृशाः सन्तः । गणतिथैर्गणानां बहूनां पूरणैर्भटैर्हताः । तत्र तु रणे कतिथैः कतीनां पूरणैर्भटैश्चमूर्विरहितेति प्रश्ने । इयतिथैरियतां पूरणैर्विरहितेतीदं न किंचिदबुध्यत सैन्यानामतिबहुत्वान्न किमपि ज्ञातम् ॥ द्रुतविलम्बितम् ॥

बलकतिपयथः कोपि दोर्द्वितीयस्तूणतृतीयः सद्धनुश्चतुर्थः ।
षष्ठं तुर्यं विद्विषं नृपस्य घ्नंश्चक्रे भर्त्रात्मनस्तुरीयः ॥ ५४ ॥

५४. कोपि भटो भर्त्रा नृपेणात्मनस्तुरीयश्चतुर्थश्चक्रेतिमान्यत्वादात्मनश्चतुर्थस्थाने कृत इत्यर्थः । यतो नृपस्यारिभूपस्य तुर्यं षष्ठं च चतुर्थस्थानीयं षष्ठस्थानीयं च विद्विषं घ्नन् । कीदृक्सन् । दोषौ बाहू द्वितीयौ यस्य सः । तथात्मभुजापेक्षया तूणौ तृतीयौ यस्य सः । तथात्मभुजतूणापेक्षया सद्धनुश्चतुर्थं यस्य सः । तात्पर्येणैकाकीत्यर्थः । एकाकी चेत्कथमसौ तादृशौ द्विषावहन्नित्याह । यतो बलकतिपयथो बलेन कतिपयानां स्तोकानां पूरणो बलेन कियन्तोपि तादृशा इत्यर्थः ॥

विंशतितमस्य । एकविंशी । त्रिंशत्तमस्य । त्रिंशी । इत्यत्र "विंशति०" [१५६] आदिना वा तमट् ॥

शततमी । सहस्रतमस्य । मासतम्याः । अर्धमासतम्योः । संवत्सरतमी । इत्यत्र "शतादि०" [१५७] इत्यादिना तमट् ॥

षष्टितम । अशीतितम । इत्यत्र "षष्ट्यादेर्०" [१५८] इत्यादिना तमट् ॥ असंख्यादेरिति किम् । एकषष्टितम । एकषष्टः ॥

पञ्चमः । अत्र "नो मट्" [१५९] इति मट् ॥

---

१ सी °स्तद्भवं. २ ए °दं ना किं°. ३ सी °म्बि । ब°. ४ बी °र्थकश्च°. ५ सी °यं च. ६ बी बाहौ द्वि°. ७ सी °त्मनो भु°. ८ बी त्रिंशतीत्य°. ९ बी हअत°. १० सी °तमः । ए°.

बहुतिथात्। गणतिथैः। पूगतिथत्व[म्]। संघतिथाः। इत्यत्र "पित्तिथट्०"[1] [१६०] इत्यादिना पित्तिथट्[2] ॥

इयतिथैः। अत्र "अतोरिथट्" [१६१] इतीथट् ॥

षष्ठम्। कतिथैः। कतिपयथः। अत्र "षट्कति०" [१६२] इत्यादिना थट् ॥

चतुर्थः। अत्र "चतुरः" [१६३] इति थट् ॥

तुर्यम्। तुरीयः। अत्र "येयौ चलुक्च" [१६४] इति येयौ चस्य लुक्च ॥

द्वितीयः। अत्र "द्वेस्तीयः" [१६५] इति तीयः ॥

तृतीयः। इत्यत्र "त्रेस्तृ च" [१६६] इति तीयस्त्रेश्च[3] तृ ॥ औपच्छन्दसकापरान्तिका ॥

कीर्त्या पूर्वी संदृष्टपूर्व्यद्य[1] चाहं साध्विष्ट्याम्नाती युद्धयज्ञेसि वीर।
इत्युक्त्या कोप्यामोदयद्घातमूढं द्राक्छत्रुं यद्वच्छ्राद्धिकं श्राद्धिभक्तः[2]
॥ ५५ ॥

५५. कोपि भटो घातमूढं शत्रुं द्रागामोदयदाह्लादयत्। कया। उक्तया प्रशंसावचनेन। कथमित्याह। हे वीरासि त्वं युद्धमेव स्वर्गहेतुत्वाद्यज्ञस्तत्र विषय आम्नातमभ्यस्तमनेनाम्नाती निपुणोसीत्यर्थः[4]। अत एव साधु सुभटोचितं यथा स्यादेवं युद्धयज्ञ[5] इष्टमनेकारिभटाहुतिभिर्यजनं येन स इष्ट्यसि। अत एव चाहं त्वां कीर्त्या कृत्वा पूर्वं दृष्टोनेन पूर्व्यतिविक्रान्तं त्वां पूर्वं श्रुतवानस्मीत्यर्थः। अद्य चाधुना त्वहं त्वां संदृष्टपूर्वी युद्धेन सम्यक्साक्षात्कारेण त्वां विक्रान्तं दृष्टवानित्यर्थ इति। यद्वद्यथा श्राद्धिभक्तः[6] श्राद्धं पितृदैवत्यं कर्म। उपचारात्त-

१ ए °पूर्वद्य. २ सी श्राद्धभ°.

१ बी °त्तिथिट्. २ ए सी °त्तिथिट्. ३ ए °श्च तुः। औ°. ४ ए °त्यथोऽस्यथ सा°. ५ बी युद्धं य°. ६ सी श्राद्धभ°.

दुपकरणमोदनाद्यपि श्राद्धं तद्भुक्तमद्यानेन श्राद्धी द्विजस्तत्र भक्तो यजमानः श्राद्धिकं श्राद्धे[1] भुक्तं द्विजमामोदयति । कया । हे द्विजासि यज्ञे साध्वाम्नातीष्टी चात एवाहं त्वां कीर्त्या पूज्येद्य च संदृष्ट[2]पूर्वीत्युक्त्या ॥

पूर्वी ॥ सादेः । संदृष्टपूर्वी । इत्यत्र "पूर्वम्[3]०" [१६७] इत्यादिनेन् ॥

इष्टी । आम्नाती । इत्यत्र "ईष्टादेः[4]" [१६८] इतीन् ॥

श्राद्धिकम् । श्राद्धि[न्] । इत्यत्र "श्राद्धमद्य०" [१६९] इत्यादिनेकेनौ ॥

वैश्वदेवी छन्दः ॥

अभू[1]द्विषोन्योनुपदीति संगृणंस्त्वां चेन्न दाण्डाजिनिकाद्य हन्म्यहम् ।
गृह्येय दण्डाजिनिकौघपार्श्वकायःशूलिकक्षेत्रियपातकैस्तदा ॥५६॥

५६. अन्यो भटो द्विषोरेरनुपद्यनुपदं पदस्य पश्चात्पदस्य समीपं वान्वेष्टाभून्नश्यतो द्विषः पृष्ठे लग्न इत्यर्थः । कीदृक्सन् । संगृ[5]णन्प्रतिजानानः । किमित्याह । रे दाण्डाजिनिक दण्डाजिनं दम्भस्तेनान्वेष्टश्छलप्रहारित्वाद्दाम्भिक चेत्त्वामद्य न हन्मि तदाहं गृह्येयं[6] गृ[7]हीतः स्याम् । कैः । दण्डाजिनिकौघो दाम्भिकसमूहस्तथा पार्श्वमनृजुरुपायो लञ्चादिस्तेर्[8]नान्वेष्टा पा[9]र्श्वकस्तथायःशूलसाम्यादयःशूलं तीक्ष्णोपायस्ते[10]नान्वेष्टा आयःशूलिको[11]यःशूलिको वा राभसिकस्तथान्यस्मिन्क्षेत्रे नाश्यः क्षेत्रियः पारदारिकः । स[12] हि स्वक्षेत्रादन्यस्मिन्क्षेत्रे परदारेषु वर्तमानस्तत्र नाश्यो निग्राह्यः स्याद्द्वन्द्वे एषां महापापिष्ठानां यानि पातकानि पापानि तैः । एतत्पापानि मम स्युरित्यर्थ इति ॥

---

१ सी अत्र द्विषो°.

---

१ ए °द्धे भक्तं. २ बी संसष्ट°. ३ ए पूर्वीम्. ४ ए इष्टयादेः. ५ सी °गृहण°. ६ ए °ह्येयं गृहीत स्या°. ७ सी गृह्णीयाम् । कै द°. ८ बी सी °नान्विष्टा. ९ सी पार्श्विक°. १० बी °नान्विष्टा. ११ ए सी °को वा. १२ ए स ह स्व°.

अनुपदी । इति "अनुपद्यन्वेष्टा" [१७०] इति निपात्यम्[1] ॥

दाण्डाजिनिक[2] । आयःशूलिक[3] । पार्श्वक । इत्येते "दाण्डाजिनिक०" [१७१] इत्यादिना निपात्याः ॥ केचिद्दण्डाजिनायःशूलाभ्यामिकमेवाहुस्तन्मते दण्डाजिनिक[4] । अयःशूलिकेति ॥

क्षेत्रिय । इत्यत्र "क्षेत्रे०" [१७२] "इत्यादिनेयः ॥ वंशस्थेन्द्रवंशयोरुपजातिः ॥

द्राक्[1]श्रोत्रियैश्छान्दसव[2]र्जि(र्जि)तेन्द्रियै-
र्धनुश्चणः कार्मुक[3]चुञ्चुनामिलत् ।
द्विकं द्विकस्याशु तृतीयकं नु तत्
स्व[4]स्यास्त्रवेदग्रहणं प्रदर्श[5]यन् ॥ ५७ ॥

५७. धनुश्चणो धनुषा वित्तो महाधनुर्धरजातिः । कार्मुक[5]चुञ्चुना कार्मुके[6]ण वित्तेन सह द्रागमिलत् । कीदृक्सन् । द्विकस्य द्वितीयेन रूपेणास्त्रवेदग्रन्थग्राहक[7]स्य स्वस्यात्मनो यद्द्विकं द्वितीयमस्त्रवेदग्रहणं धनुर्वेदाभ्यास[8]स्तत्तृतीयकं नु तृतीयमिव प्रदर्श[9]यन् । द्विवारमभ्यस्तधनुर्विद्योप्युत्कृष्टधनुःकलाप्रकटनात्त्रिवारमभ्यस्तध[10]नुर्विद्यो[11]हमिति लोकाञ्ज्ञापय[12]न्नित्यर्थः । यथा जितेन्द्रियैः श्रोत्रियैर्वेदमधीयानैर्द्विजैः सह छान्दसा वैदिकाः समानगुणत्वेन मिलन्ति ॥

श्रोत्रियैः । अत्र "छन्द०" [१७३] इत्यादिना-इयो[13] वा तत्संनियोगे च छन्दसः श्रोत्रभावः ॥ पक्षेण् । छान्[14]दस ॥

---

१ सी द्राक्श्रोत्रि°. २ बी सी °वर्जिते°. ३ बी सी °कचञ्चु°. ४ सी °स्वशास्त्र°. ५ ए °यत् ॥ ध°.

---

१ बी °म् । दण्डा°. २ ए बी °निकः आ°. ३ ए °लिकः । पा°. ४ ए °निकैः । अ°. ५ बी सी °कचञ्चु°. ६ ए °केन वि°. ७ ए °कस्या° ८ सी °सस्तृती°. ९ बी °र्शदय°. १० बी °नुविद्यो° ११ बी सी °द्योयमि°. १२ सी °यदित्य°. १३ सी °यो त°. १४ बी °न्दसः । इ°.

इन्द्रियैः । इति[1] "इन्द्रियम्" [१७४] इत्यनेन निपात्यम् ॥

कार्मुकचुञ्चुना[2] । धनुश्चणः । अत्र "तेन०" [१७५] इत्यादिना[3] चुञ्चुचणौ ॥

द्विकस्य । इत्यत्र[4] "पूरणाद्०[5]" [१७६] इत्यादिना कः पूरणप्रत्ययस्य लुक् च ॥

द्विकं तृतीयकमस्त्रवेदग्रहणम्[6] । अत्र "ग्रहणाद्वा" [१७७] इति कः पूरणस्य वा लुक् ॥

यत्सस्यकासीनसहन्त वीरा हिरण्यको नो धनकश्च हेतुः ।

किं त्वत्र[1] दन्तौष्ठककेशकस्वःस्त्रीकामनानौदरिकोचिताभूत् ॥ ५८ ॥

५८. सस्यकासीन् सस्यशब्दोत्र गुणवचनः । सस्येन परिजाताः सस्यकाः सर्वतः सारेण संबद्धा येसयस्तान् यद्वीरा असहन्त । अत्र सस्यकासिसहनविषये हिरण्यको[8] हिरण्ये स्वर्णे कामो नो हेतुर्नापि धनकश्च धनाभिलाषश्च हेतुः । किं त्वत्र दन्तौष्ठकाः केशकाश्च दन्तौ[10]ष्ठस्य केशानां च रचनायां प्रसक्ता[11] इत्यर्थः । याः स्वःस्त्रियो देव्यस्तासां कामना वाञ्छा हेतुः । किंभूता । अनौदरिकोचितानौदरिका[12]णामुदरेसक्तानां[13] विजिगीषूणामुचिता योग्या ॥

सस्यक । इत्यत्र "सस्याद्०" [१७८] इत्यादिना[14] कः ॥

धनकः । हिरण्यकः । अत्र "धन०" [१७९] इत्यादिना कः ॥

केशक । इत्यत्र "स्वाङ्गेषु[15] सक्ते" [१८०] इति कः । बहुवचनात्स्वाङ्गसमुदायादपि । दन्तौष्ठक[16] ॥

अनौदरिक । इत्यत्र "उदरे[17] तु०" [१८१] इत्यादिनेकण्[18] ॥ उपजातिः ॥

---

१ ए °दन्तोष्ठक°.

---

१ **बी** इत इ°. २ **बीसी** °कचञ्चु°. ३ **बी सी** °ना चञ्चु°. ४ **बी सी** °त्यस्य पू°. ५ **सी** °रणेत्या°. ६ **ए** °यम°. ७ **सी** °णाद् इ°. ८ **ए** °रणाको. ९ **सी** °ण्यस्व°. १० **ए** दन्तोष्ठ°. ११ **बी सी** प्रशक्ता. १२ **सी** °रिका°. १३ **सी** °रेशक्ता°. १४ **ए** °ना क ध°. १५ **सी** °पु शक्ते. १६ **बी** °ष्ठकः । अ°. १७ **सी** °रे इ°. १८ **सी** °ण् ॥ अ°.

अप्युष्णिकां तन्त्रकवस्त्रखण्डलं वा[1] शीतकः किं लभतेंशकोपि हि ।
इत्युष्णकैर्[2]ब्राह्मणकोद्भवैर्बलेधिकैर्भृशं कीर्त्यनुकैर्विचक्रमे ॥५९॥

५९. ब्राह्मणकोद्भवैः सदाचारब्राह्मणेभ्यस्तदानीमेवोद्धृत्य[1] पृथक्कृतो ब्राह्मणको देशो[2] यत्रायुधजीविनः काण्डस्पृष्टा नाम ब्राह्मणा भवन्ति । आयुधजीवी ब्राह्मण एव ब्राह्मणक इत्यन्ये । तत्रोद्भवैर्भटैर्विचक्रमे विक्रमः कृतः । किंभूतैः । उष्णकैरुष्णं क्षिप्रं कुर्वद्भिर्दक्षैरित्यर्थः । तथा बले सामर्थ्येधिकैर्[3]रध्यारूढैस्तथा कीर्त्यनुकैः कीर्तिकामयमानैः । कुतो विचक्रमे । इति हेतोः । तमेवाह । हि यस्मादंशं हार्यंशकोपि दायादोपि शीतं मन्दं करोति शीतकोलसः सन्[4] किं लभते नैवेत्यर्थः । किमित्याह । उष्णादचिरोद्धृतोष्णिका तामप्यास्तामन्यद्यवागूमपि । यद्वा तन्त्रात्तन्तुवायोपकरणादचिरोद्धृतं[5] तन्त्रकं यद्वस्त्रं तस्य यत्खण्डलं खण्डं तदपीति ॥

अंशकः । अत्र "अंशं हारिणि" [१८२] इति कः ॥

तन्त्रक । इत्यत्र "तन्त्राद्[6]०" [१८३] इत्यादिना कः ॥

ब्राह्मणक । इत्यत्र "ब्राह्मणान्नाम्नि" [१८४] इति कः ॥

उष्णिकाम्[7] । अत्र "उष्णात्" [१८५] इति कः ॥

शीतकः । उष्णकैः । अत्र "शीताच्च कारिणि" [१८६] इति कः ॥

अधिकैः । अत्र "अधेरारूढे" [१८७] इति कः ॥

अनुकैः । अत्र "अनोः कमितरि" [१८८] इति कः ॥ इन्द्रवंशावंशस्थयो-रुपजातिः ॥

---

१ **सी** वा सीत°. २ **ए** °त्युष्णुकै°.

---

१ **ए** °वोघृ°. २ **सी** देशे य°. ३ **सी** °मर्थ्याधि°. ४ **बी** स किं. ५ **सी** °णादचि°. ६ **ए** °न्त्रादिना. ७ **बी** °ष्णिकाम्.

एषोभिकः शृङ्खलकावतीर्णो
ममास्तु योद्धा जिनदत्तकान्यः ।
ममोत्सुकायास्त्वयमाहवोत्को-
भीकोस्त्विति व्याहियताप्सरोभिः ॥ ६० ॥

६०. अप्सरोभिर्व्याह्नियतोक्तम् । किमित्याह । एष योद्धा ममाभिको भर्तास्तु । कीदृक् । शृङ्खलं बन्धनमस्य शृङ्खलकः करभस्तस्माद्युद्धार्थमवतीर्ण इति । तथा मम तु मम पुनरुत्सुकाया उत्कण्ठिताया अयमाहवोत्को युद्ध उन्मना योद्धाभीको[1] भर्तास्तु । कीदृक् । जिनदत्तकान्यो जिनदत्तो मुख्योस्य[2] जिनदत्तकः संघस्तस्मादन्य इति च । देवीभिर्भटा इत्थं वृता इत्यर्थः ॥

अभिकः अभीकः । अत्र "अभेरीश्च[3] वा" [१८९] इति क ईश्चास्य वा ॥

जिनदत्तक । इत्यत्र "सोस्य[4] मुख्यः" [१९०] इति कः ॥

शृङ्खलक । इत्ययं[5] "शृङ्खलकः करभे" [१९१] इति निपात्यः ॥

उत्कः । उत्सुकायाः[6] । अत्र "उदुत्सोरुन्मनसि[7]" [१९२] इति कः ॥

उपजातिः ॥

तेजोभिरुष्णकतृतीयककाशपुष्प-
कान्नु ज्वरानसुहृदां दिशता क्षणेन ।
कौल्मास्य(ष्य?)थ त्रिपुटिका वटकिन्यमानि[1]
केनापि सिद्धसुरसाक्षिरणस्य लीला ॥ ६१ ॥

६१. केनापि भटेन सिद्धा विद्यासिद्धादयः सुराश्च देवाः साक्षिणः कौतुकायातत्वात्साक्षाद्द्रष्टारो यस्य तद्यद्रणं[8] तस्य लीला केलि-

१ ए बी वटिकि°.

१ सी योभी°. २ बी °ख्योख्य जि°. ३ सी °श्च श्चा इ°. ४ सी सो मु°. ५ ए °त्यत्र शृ°. ६ ए उन्मुका°. ७ ए उड्डत्सो°. ८ बी °द्यद्रणं.

रमानि ज्ञाता। कीदृशी। हर्षहेतुत्वात्कुल्मासास्त्रिपुटाश्च धान्यभेदा[1] वटकानि च[2] प्रायेण प्रायो वान्नान्यस्य पौर्णमास्यां[3] कौल्मासी त्रिपुटिका[4] वा वटकिनी वोत्सवविशेषा इव। कीदृशा सता। तेजोभिः प्रतापैः कृत्वा क्षणेनासुहृदां शत्रूणां[5] ज्वरानिवातिसंतापकत्वादिशता ददता। किंभूतान्। उष्णं फलं कार्यमस्योष्णकस्तथा[6] तृतीयो दिवसोस्याविर्भावाय तृतीयकस्तथा काशपुष्पं हेतुरस्य काशपुष्पको द्वन्द्वे तान्॥

तृतीयक[7]। काशपुष्पकान्[8]। उष्णक। इत्यत्र "काल०" [१९३] इत्यादिना कः॥

त्रिपुटिका[9]। इत्यत्र "प्रायः०" [१९४] इत्यादिना कः॥

कौल्मासी(षी?)। इत्यत्र "कुल्मासा[10](षा?)दण्" [१९५] इत्यण्॥

वटकिनी। इत्यत्र "वटकादिन्" [१९६] इतीन्॥

साक्षि। इत्यत्र "साक्षाद्द्रष्टा[11]" [१९७] इतीन्॥ वसन्ततिलका छन्दः॥

पञ्चविंशः पादः[12]॥

कुमारिकस्येव जनः कुमारीमान्साधु नौमानिव नाविकस्य।
जानन्प्रहारैः पततां रुजं कोप्याज्यब्धिनावी न पुनः प्रजह्ने॥६२॥

६२. आज्यब्धौ रणाम्बुधौ[13] नावी नौमान्दुर्विगाहं रणमवगाहमानः सन्नित्यर्थः। कोपि भटः प्रहारैः पततां भटानां पुनर्न[14] प्रजह्ने। यतस्तेषां रुजं पीडां क्षत्रियोत्तमत्वात्साधु जानन्। यथा[15] कुमारीमाननेककन्यान्वितो जनः कुमारिकस्यानेककन्यावतो जनस्य विवाहादिचिन्ताकृतां रुजं साधु जानाति। यथा वा नौमाननेकवेडान्वितो जनो नाविकस्यानेकवेडावतोनेकवेडासमारचनादिविषयचिन्ताकृतां[16][17][18] रुजं साधु जानाति। उपजातिः॥

---

१ बी सी °भेदो व°. २ सी °नि प्रा°. ३ बी पौर्णिमा°. ४ बी °टि की वा. ५ ए °णां जरा°. ६ ए °ष्णस्त°. ७ ए °यकः। का°. ८ ए °ष्पकीन्. ९ बी °पुत्रिका. १० ए °सादिण्. ११ बी °क्षाद्दृष्टा. १२ ए °दः समाप्तः। कु°. १३ ए सी °म्बुधोना°. १४ बी °र्न ज°. १५ सी °था वा नौवाननेकबेडा°. १६ सी °कबेडा°. १७ सी °क बेडा°. १८ सी °रसना°.

कुमारिणः खे वरमालिनोमिलञ्शिखावदस्त्राञ्शिखिनो नु तेजसा ।
मालावतोन्वेष्टुममायिनो भटानमायिका नव्यवराननभश्वराः ॥६३॥

६३. अमायिका अमायिनो नभश्वरा देवाः खेमिलन् । किं कर्तुम् । नव्यवरान्नवान्वधूटानन्वेष्टुम् । किंभूतान् । शिखावन्ति दीप्तियुक्तान्यस्त्राणि येषां तान्युध्यमानानित्यर्थः । तथा तेजसा कृत्वा शिखिनो न्वग्नीनिव । तथा मालावतः कण्ठस्थपुष्पमालान्वितांस्तथामायिनो मायायुद्धरहितान् । किंभूताः सन्तः । कुमारिणः कन्यायुक्ता अत एव वरमालिनो वराय माला वरमालास्तदन्विताः कुमार्यभिरुचितवरकण्ठे क्षेप्तुं गृहीतवरमालाः । वंशस्थेन्द्रवंशयोरुपजातिः ॥

नाज्ञाय्येकस्यैकतो गुर्वनीकं मायावद्भिः क्षुण्णमप्यत्र कैश्चित् ।
व्रीहिक्षेत्रं व्रीहिकाणां महीयो यद्वल्लूनं कापि चाव्रीहिमद्भिः॥६४॥

६४. स्पष्टम् । किं त्वेकस्य राज्ञ एकत एकस्मिन्प्रदेशे मायावद्भिश्छलपरैः कैश्चिद्भटैः । अत्र रणे व्रीहिक्षेत्रं व्रीहियुक्तं क्षेत्रमव्रीहिमद्भिर्व्रीहिरहितैश्चौरादिभिः ।

नाविकस्य । कुमारिकस्य । इत्यत्र "नावादेरिकः" [३] इतीकः ॥ "आयात्" [२] इति वचनात् "तदस्य०" [१] इत्यादिना मतुश्च । तेन नौमान् । कुमारीमान् ॥ नौकुमारीभ्यामिनं केचिदाहुः । नावी । कुमारिणः ॥

शिखिनः । शिखावत् । मालिनः । मालावतः ॥ अत्र "शिखादिभ्य इन्" [४] इतीन् मतुश्च ॥

व्रीहिकाणाम् । व्रीहि । अव्रीहिमद्भिः । अमायिकाः । अमायिनः । मायावद्भिः । अत्र "व्रीह्यादिभ्यस्तौ" [५] इतीकेनौ मतुश्च । शालिनी छन्दः ॥

---

१ सी °कान्नव्य°. २ ए °हीया य°.

---

१ बी °न्युद्धमा°. २ ए °त्यर्थोस्तथा. ३ बी °न्वितात्तथा°. ४ ए °ताः कु°. ५ ए सी °माला । वं°. ६ ए °द्भिस्थल°. ७ सी °हिमद्भिर्व्रीहिर°. ८ ए °द्भिर्वीहि°.

छत्रिणः कार्यिणो योधिनश्छत्रिकैः कार्यिकैर्भृत्यवद्भिः[1] स्ववद्भिर्भटैः।
छत्रवान्माल्यवान्कर्पटी[2] स्वर्मुनिर्वीरवत्याहवे पश्यति स्मात्र सः ६५

६५. वीरवति भटान्वितेत्राहवे[1] रणे स रणकौतुकी स्वर्मुनिर्नारदो भटैः सह योधिनोवश्यं युध्यमानान्भटान्पश्यति स्म । कीदृक् । छत्रवांश्छत्रिकान्वितस्तथा माल्यवान्पुष्पमालान्वितस्तथा निन्द्यः कर्पटोस्यास्ति कर्पटी कक्षापटान्वितः । कीदृशान्योधिनः[2] । छत्रिणश्छत्त्रत्वेन धृतातपत्रांस्तथा[3] कार्यिणो रणव्यापारवतः । किंभूतैर्भटैः । छत्रिकैस्तथा[4] भृत्यवद्भिस्तथा स्ववद्भिर्दानार्थद्रव्यवद्भिर्ज्ञातिमद्भिर्वा[5] तथा कार्यिकैः[6][7] ॥ श्र(स्र)ग्विणी छन्दः ॥

धनिनः कर्पटिका अपि ह्यभूवन्रसिनः सत्यरणस्तवेषु सूताः।
धनिकाधीनधनैरपीह वीरै रसिकैस्त्यागरणक्रियास्वशङ्कैः ॥ ६६ ॥

६६. इह रणे सूता भट्टाः[8] कर्पटिका अपि निःस्वत्वेन[9] निन्द्यकर्पटान्विता अपि सत्यरणस्तवेष्ववितथभटयुद्धवर्णनासु रसिनो रसिकाः सन्तो वीरैः कृत्वा धनिन ईश्वरा अभूवन्[10] । यतो धनिकाधीनधनैरप्युत्तमर्णायत्तद्रव्यैरप्यृणग्रस्तैरपीत्यर्थः । परं त्यागरणक्रियासु दानप्रधानेषु रणकर्मसु रसिकैः साभिलाषैः । एतदपि कुत इत्याह । यतोशङ्कैर्ऋणभयरहितैरकातरैश्चेत्यर्थः ॥ औपच्छन्दसकापरान्तिका ॥

समित्खलिन्यां भुवि कोप्यशै(शी?)र्षिकः
प्रत्यर्थिकीर्त्यर्थ्यकरोदशीर्षिणम् ।
अशीर्षवान्सोपि ननर्त खड्गभृत्
प्रत्यर्थिकैर्[3]रर्थिकवत्[4]परिष्टुतः ॥ ६७ ॥

१ ए °त्यद्भिः. २ ए °न्कर्षटी. ३ ए °प्रर्थि°. ४ बी °रर्थक°.

१ बी °न्वितोत्रा°. २ ए °न्योनिधि°. ३ बी °पत्रास्त°. ४ बी सी छत्रकै°. ५ बी °र्ज्ञातम°. ६ बी °यिकै । श्र°. ७ सी °कैः । स्वग्वि°. ८ सी भटा क°. ९ बी निसत्वे°. १० ए अभव°.

६७. खलाः सन्त्यस्यां खलिनी[1] समितो युद्धस्य खलिनीव समित्खलिनी तस्यां यथा खलिनी[2] धान्यखलाधार एवं संग्रामाधार इत्यर्थः । भुवि रणाङ्गणे कोपि भटोशै(शी?)र्षिकः शीर्षरहितोप्यशीर्षिणं शीर्षरहितमकरोदर्थात्प्रत्यर्थिनम् । यतः प्रत्यर्थिकीत्यर्थी शत्रुकीर्ति[3] जिघृक्षुरित्यर्थः । ततश्चाशीर्षवान् शीर्षरहितः सोपि प्रत्यर्थ्यपि खड्गभृत्सन्ननर्त वीर्यातिशयाद्युद्धाय ववल्ग । अत एव[4] प्रत्यर्थिकैः शत्रुभिरर्थिकैर्वद्याचकैरिव परिष्टुतः ॥

छत्रिकैः । छत्रिणः । छत्रवान् । इत्यत्र "अतः०" [६] इत्यादिना-इकेनौ मतुश्च ॥ अनेकस्वरादिति किम् । स्ववद्भिः ॥ अभिधानार्थस्येतिकरणस्यानुवृत्तेः[6] कृदन्तान्न भवतः । भृत्यवद्भिः ॥ क्वचिद्भवतः । कार्यिकैः[7] । कार्यिणः ॥ जातिशब्देभ्यो न भवतः । माल्यवान् । क्वचिद्भवतः । का(क)र्पटिकाः[8] । कर्पटी ॥ धनादुत्तमर्णे भवतः । धनिकः(क) । धनिनः ॥ सप्तम्यर्थे च न भवतः । वीरवत्याहवे ॥ क्वचिद्भवतः । खलिन्याम् ॥ रसरूपगन्धस्पर्शशब्दस्नेहेभ्यो गुणवाचिभ्यो न भवतः ॥ क्वचिद्भवतः । रसिकैः । रसिनः ॥

अशीर्षिकः । अशीर्षिणम्[9] । अशीर्षवान्[10] । इत्यत्र "अशिरसोशीर्षश्च" [७] इतीकेनौ मतुश्चाशिरसोशीर्षादेशः ॥ अर्थिकवत् । अर्थी । प्रत्यर्थिकैः । प्रत्यर्थी । इत्यत्र "अर्थ०" [८] इत्यादिना-इकेनौ ॥ वंशस्थेन्द्रवंशयोरुपजातिः[11] ॥

अतुन्दिलः क्वापि च तुन्दवन्तमतुन्दिकं क्वापि जिगाय तुन्दी ।
अशालिलं शाल्यथ[1] शालिमन्तमशालिकः स्थानिवशेन[2] यद्वत्[3] ॥६८॥

१ ए °त्यपि शा° २ सी स्थानव°. ३ सी °त् । कोपि.

१ सी °नी तस्यां खलिनी यथा धा°. २ ए °नी धन्य°. ३ ए सी °कीर्त्ति जि°. ४ सी एवा प्र°. ५ ए °कविद्या°. ६ सी °रस्या°. ७ सी कार्यकैः. ८ ए °काः । कार्पटीः । ध°. ९ बी °र्षिणाम्. १० ए °शीर्षिवा°. ११ ए °वंशोरु°.

६८. क्वापि च रणप्रदेशेतुन्दिलोस्थूलोदरस्तुन्दवन्तं जिगाय। क्वापि च तुन्द्यतुन्दिकं जिगाय । यथा स्थानं ग्रामादिस्तदस्यास्ति स्थानी ग्रामठकुरादिस्तद्वशेना[1]शालिलं[2] शालिरहितं दरिद्रं शालीश्वरो[3] जयति । अर्थाथ[4] वा यद्वदशालिको दरिद्रोपि शालिमन्तमिति ॥ उपेन्द्रवज्रा ॥

पङ्किलव्रीहिलक्षेत्रवद्युन्महीं शोणितैः पङ्किनीं[1] पङ्कवन्मूर्तयः ।

पङ्किकक्ष्मातलस्रंसिनः पादिलान्संत्यजन्तो मयाश्चक्रमुः[2] पत्तयः ६९

६९. पङ्कवती श्रमोत्थस्वेदसैन्यरजःसंपर्केण कर्दमवती मूर्तिर्येषां ते तथा पत्तयः स्फारका युन्महीं रणोर्वीं चक्रमु[5]र्गताः । किंभूताम् । शोणितैः पङ्किनीमत एव पङ्किलव्रीहिलक्षेत्र[6]वत्पङ्कयुक्त[7]व्रीहियुक्तक्षेत्रतु[8]ल्याम् । किंभूताः सन्तः । मयानुष्ट्रभेदान्संत्यजन्तः । किंभूतान् । पङ्किकं शोणितकर्दमयुक्तं यत्क्ष्मातलं तत्र स्रंसिनः स्खलनेनाधःपातुकान् । एतदपि कुत इत्याह । यतोतिवृद्धा महान्तः पादाः सन्त्येषां पादिला[9]स्तान् ॥ स्रग्विणी ॥

यथैव शृङ्गारकपादिभिर्द्राग्मृगैर्मृगाः पादिकशृङ्गवन्तः ।

वृन्दारकैस्तद्वदवृन्दवन्तो भटैर्भटा युद्धकृतोत्र दृष्टाः ॥ ७० ॥

७०. तद्वत्तथा वृन्दारकैः समूहवद्भिर्भटैः सहावृन्दवन्त एकाकिनो[10] भटा युद्धकृतो युध्य[11]माना अत्र रणे दृष्टाः । यथैव शृङ्गा[12]रकपादिभिः[13][14] शृङ्गवद्भि[15]र्विवृद्धपादवद्भिश्च मृगैरारण्यपशुभिः सह पादिकशृङ्गवन्तो मृगा युध्यमाना दृश्यन्ते ॥

---

१ **ए** °ङ्किनी प°. २ **बी** °क्रतुः प°.

---

१ **बी** °शेन शालिनं शालिर°. २ **सी** °लिर°. ३ **सी** °रो गाय°. ४ **ए** °थावथाय°. ५ **बी** °क्रतुर्ग°. ६ **बी** °क्षेव°. ७ **सी** °क्तक्षे°. ८ **सी** °तुल्याः। किं°. ९ **ए** °लान्. १० **सी** °कादिनो भट यु°. ११ **ए** युद्धमा°. १२ **सी** °ङ्गारिक°. १३ **ए** °दिभिश्शृंगारव°. १४ **सी** °भिः शृंगारव°. १५ **बी सी** °द्भिर्वृद्ध°.

व्रीह्यर्थे । अशालिलम् । अशालिकः । शाली । शालिमन्तम् ॥ तुन्दादि । अतुन्दिलः । अतुन्दिकम् । तुन्दी । तुन्दवन्तम् ॥ पङ्किल । पङ्किक । पङ्किनीम् । पङ्कवत् । इत्यत्र "व्रीह्यर्थे०" [९] इत्यादिना-इलः । चकारादिकेनौ । "आयात्" [२] इति मतुश्च ॥ व्रीहिशब्दोपि व्रीह्यर्थो भवति । किं तु तस्य पूर्वत्रोपादानादिलो न स्यात् । भावे हि तत्रोपादानमनर्थकं स्यात् ॥ भवतीत्येके । व्रीहिल ॥

पादिलान् । पादिक । पादिभिः । अत्र "स्वाङ्गाद्०" [१०] इत्यादिना-इल-इक-इनः ॥

वृन्दारकैः । अवृन्दवन्तः । अत्र "वृन्दादारकः" [११] इत्यारको मतुश्च ॥

शृङ्गारक । शृङ्गवन्तः । अत्र "शृङ्गात्" [१२] इत्यारको मतुश्च ॥ उपजातिः ॥

फलिनद्रुमद्बर्हवदातपत्रकाः फलवच्छरश्रेणिमुचोपि जाङ्गलाः ।
अथ गूर्जरैर्बर्हिणवन्महाहयः प्रबभञ्जिरे शृङ्गिणवच्च शाखिनः ७१

७१. अथ गूर्जरैर्जाङ्गला आन्नभटाः प्रबभञ्जिरे । कीदृशाः । फलिनद्रुमन्ति सश्रीकत्वात्सफलद्रुमा इवाचरन्ति बर्हवन्ति मायूरपिच्छयुक्तान्यातपत्राणि येषां तेपि ठक्कुरा अपि । तथा फलवती प्रशस्यशस्त्राग्रभागान्विता या शरश्रेणिस्तां मुञ्चन्ति ये तेपि यथा बर्हिणैर्मयूरैर्महाहयो भज्यन्ते । यथा च शृङ्गिणैर्वनमहिषैः शाखिनो वृक्षा भज्यन्ते ॥

फलिन । फलवत् । बर्हिण । बर्हवत् । शृङ्गिण । इत्यत्र "फल०" [१३] इत्यादिना-इनो मतुश्च ॥ सुदन्तं छन्दः ॥

१ ए °रैर्बर्हि°. २ बी प्रभ°.

१ ए बी °ह्यर्थः । अ°. २ बी °लिनम्. ३ ए °न्दिलं । अ°. सी °न्दिल । अ°. ४ ए °र्थोपि भ°. ५ सी °नर्थ°. ६ सी °दिकः । पा°. ७ बी अत्रवृन्द°. ८ बी °रकः । शृ°. ९ ए °त्वाशफ°. १० सी °क्तान्येत्र पात्रा°. ११ सी °स्यवस्त्रा°. १२ सी °था शृ°. १३ ए °नर्महिषैः शा°. १४ ए °वतत्. १५ बी बर्हिव°. १६ ए °श्च । सुद°. १७ सी दतं छ°.

मलवद्यशस्कान्मलिनेन कर्मणातिमलीमसांस्तर्जयितान्नकः स्वकान्।
दलितुं मरुत्वानिव पर्वतान्द्विषो युयुधे ततः पर्ववदस्त्रभृत्स्वयम् ७२

७२. यथा मरुत्वानिन्द्रः पर्वास्त्येषां तान्पर्वतानद्रीन्वज्रेण दलयत्येवमान्नको द्विषो दलितुं स्वयं युयुधे । कीदृक्सन् । पर्ववन्ति प्रशस्यग्रन्थिप्रदेशयुक्तानि यान्यस्त्राणि शरास्तद्भृत्तथा स्वकान्स्वकीयभटांस्तर्जयिता निर्भर्त्सयन् । यतो मलवद्यशस्कान्मलिनकीर्तीन् । एतदपि कुत इत्याह । यतो मलिनेन कर्मणा रणभङ्गेन निन्द्यकर्मणातिमलीमसान् ॥

मरुत्तवत्तुण्डिभचक्रवर्षी स योधयन् क्रुद्वलिभालिकोरीन् ।
ऊर्णायुवद्वा वटिभान्नवद्वाहंयुस्तदामंस्त शुभंयुमानी ॥ ७३ ॥

७३. स आन्नस्तदारीन्योधयन्युध्यमानान्प्रयुञ्जानोमंस्त । कीदृशान् । ऊर्णायुवद्वा सुखविनाश्यत्वेनोरणकतुल्यान् । वटिभान्नवद्वा वटिभं वटीव्यञ्जनविशेषान्वितं यदन्नं तत्तुल्यान्वा । कीदृक्सन् । शुभंयुमानी शुभंयुं शुभसंयुक्तमनुकूलदैवमात्मानं मन्यमानोत एवाहंयुरहंकारवानत एव क्रुधा वलिभं रेखायुक्तमलिकं ललाटं यस्य सोत एव च मरुत्तवद्राजविशेष इव तुण्डिभानि प्रवृद्धनाभिमन्ति चक्राणि चक्रास्त्राणि वर्षतीत्येवंशीलो यः सः ॥

मलीमसान् । मलिनेन । मलवत् । इत्यत्र "मलादीमसश्च" [१४] इतीमसेनौ मतुश्च ॥

मरुत्त । मरुत्वान् । पर्वतान् । पर्ववत् । इत्यत्र "मरुत्०" [१५] इत्यादिना तो मतुश्च ॥

---

१ बी °लयव°. २ सी दलयन् म°. ३ ए °वन्ति प्रशस्य°. ४ ए °द्वभिलाभिको.°

---

१ ए °भेस्तय°. बी °भय°. २ सी °णाति°. ३ ए °मेणोति°. ४ ए °युजानो°. ५ सी °श्यकत्वे°. ६ ए °द्वा भटिभवटी°. ७ सी °टिभव°. ८ बी °त्सद्रा॰ज°. ९ सी °मसोनौ. १० सी °त्त । अम°. ११ बी °रुत्तान्. १२ सी °त्र अम°.

वलिभ । वटिभ । तुण्डिभ । इत्यत्र "वलि०" [१६] इत्यादिना भः ॥

ऊर्णायु । अहंयुः । शुभंयु । इत्यत्र "ऊर्णा०" [१७] इत्यादिना युस् ॥ उप-जातिः ॥

अशंयकंयोपि स शन्त्वकन्तुरशंयुकंयूनपि शन्त्यकन्तीन् ।
स्वकांश्चकारालमकन्तशन्तानशंब(व)कंवान् द्विषतश्च जिष्णुः ७४

७४. स आन्नः स्वकान्निजभटाञ् शं सुखमस्त्येषां शन्तयः[1] । कमि-त्ययं[2] कुत्सायाम् । कं कुत्सास्त्येषां कन्तयो न तथाकन्तयो विशेषणकर्म-धारये ताञ् शन्त्यकन्तीन्सुखितान् सतेजस्कत्वेनाकुत्सितांश्चालमत्यर्थं चकार । कीदृशान् । अशंयुकंयूनपि द्विड्भिः पराभवात्पूर्वमसुखितनि-स्तेजस्कानपि । कीदृक्सन् । अशंयकंयोपि स्वसैन्यस्य[3] पराभवादसुखि-तनिस्तेजस्कोपि जिष्णुः सञ् शन्त्वकन्तुः सुखी सतेजस्कश्च । तथा द्वि-षतश्चाकन्तशन्ताञ् जितकाशित्वेन[4] प्राक्कान्तान्सुखिनश्च संतोशंवकंवान्[5]-सुखिनो निस्तेजस्कांश्चकार[6] ॥ उपेन्द्रवज्रा ॥

वातूलाशम्भान्कांश्चिदस्त्रैरकम्भा-
चूडालादन्तूलाललाटूलकांश्च[1][2] ।
मूर्छालान्सोस्त्रैर्मक्षिकालान्बलूलो
द्विट्पत्तींश्चक्रे सिध्मलान्वा विवर्णान् ॥ ७५ ॥

७५. स आन्नः कांश्चिद्द्विट्पत्तीनस्त्रैः कृत्वा चक्रे । किंभूतान् । वातूलाशम्भान्वातग्रस्तवदसुखितान् । तथाकम्भाचूडालादन्तूलाललाटूल[7]-कांश्च कांश्चिदकम्भान्मस्तकरहितान् कांश्चिदचूडालान्वेणीकान्[8]कांश्चिदद-न्तूलान्दन्तरहितान् । कांश्चिदललाटूलकां[9][10]ल्ललाटरहितांश्च[11] । तथा कांश्चि-

१ ए °लाहूल°. २ बी °टूकां°. सी °टूलंकां°.

१ सी °षां कंतयो. २ बी °यः किमि°. ३ सी °न्यप°. ४ सी °शिशब्देन. ५ ए सन्तोशं°. ६ ए °जस्काश्चत्वका°. ७ बी °ला°ल°. ८ बी °नवणी°. ९ सी °टूकान्कुत्सितान्लला°. १० ए °कान्कुत्सितान्लला°. ११ ए °हिताश्च°.

न्मूर्छालान्मूर्छावतस्तथा कांश्चिन्मक्षिकालान्मक्षिकावतः परासूनित्यर्थः। तथा कांश्चित्सिध्मलान्वा विवर्णान्। वात्रेवार्थे। सिध्मानि त्वक्पुष्पाणि रोगभेद एषां सन्ति सिध्मला यथा त्वचि श्वेतपुष्पैर्विवर्णा विच्छाया: स्युरेवं प्रहारैर्विवर्णाश्च। यतः। कीदृक्। सोत्रैः कृत्वा बल्लो बलिष्ठः॥ वैश्वदेवी॥

फेनिलोदकिलवक्रममूर्छन्पत्तयः पृथुलशस्त्रमुचीह।
फेनलोदकलसिन्धुरभूत्तच्छत्रशोणितजलैः पतितैश्च॥ ७६॥

७६. इहाजौ पृथुलानि पृथुत्ववन्ति शस्त्राणि मुञ्चति यस्तस्मिन्सति पत्तयोमूर्छन्। कथम्। फेनिलानि फेनवन्त्युदकिलान्युदकवन्ति वक्राणि यत्र तद्यथा स्यादेवम्। तथा फेनलोदकलसिन्धुर्डिण्डीरान्वितोदकवती च नद्यभूत्। कैः कृत्वा। तच्छत्रशोणितजलैस्तेषां पत्तीनां छत्रैः श्वेतातपत्रैः शोणितजलैश्च रक्ताम्भःप्रवाहैश्च। किंभूतैः। रणोर्व्यां पतितैः॥ स्वागता॥

प्रज्ञालोस्त्रे प्रज्ञिलेनान्नकेन स्वांश्चौलुक्यस्ताप्यमानानथास्त्रैः।
शाखीवोच्चैःपर्णिलोपर्णलद्रौ धन्वन्यत्याश्वासयत्तत्र धन्वी॥७७॥

७७. स्पष्टम्। किं त्वपर्णला अपर्णवन्तो द्रवो वृक्षा यत्र तस्मिन्धन्वति मरुस्थल उच्चैरुन्नतैः पर्णिलः पत्रबहुलः शाखी यथा तार्प्यमानाञ्जनानाश्वासयति। तत्र रण एत्य धन्वी धनुर्धरः॥

कंयून्। अशंयु। अक्रन्तीन्। शन्ति। कंयः। अशंय। अकन्तुः। शन्तु। कन्त।

१ सी फेनिलो°. २ बी सी °दकिल°. ३ बी °च्छस्त्रशो°. ४ ए °नावके°. ५ ए °मानांस्तथा°. ६ ए °लध्रो ध°. ७ बी °न्वतेला°. सी °न्वतेला°. ८ बी सी धन्वा। °स्प.

१ ए °तिसिध्माला°. २ ए °च्छायास्यु°. ३ सी °ति सति. ४ ए °दलिकान्यु°. ५ ए सी फेनिलो°. ६ सी °दकिल°. ७ ए °त पूर्णि°. ८ ए °प्यमन्जना°. ९ ए °शंशय.

शन्तान्। कंवान्। अशंव । अकम्भान् (कम्भ)। अशम्भान्। इत्यत्र "कंशंभ्यां०" [१८] इत्यादिना युस्-ति-यस्-तु-त-व-भाः ॥

बलूलः । वातूलं । दन्तूल । ललाटूलकान् । इत्यत्र "बल०" [१९] इत्यादिनोलः ॥

चूडाल । इत्यत्र "प्राणि०" [२०] इत्यादिना लः ॥

सिध्मलान् । पृथुल । क्षुद्रजन्तु । मक्षिकालान् ॥ रुग् । मूर्छालान् । इत्यत्र "सिध्मादि०" [२१] इत्यादिना लः ॥

प्रज्ञालः । प्रज्ञिलेन । पर्णल । पर्णिलः । उदकल । उदकिल । फेनल । फेनिल । इत्यत्र "प्रज्ञा०" [२२] इत्यादिना ल-इलौ ॥ शालिनी छन्दः ॥

ऊचेथ जाङ्गलनृपोभिसरन्नकाला-
लोकालिलं तमिति संप्रहरस्व दोष्मन् ।
काडालघाटिलजटालतमैरघाटा-
लाकाडिलैरजटिलैश्च हतैः किमेभिः ॥ ७८ ॥

७८. अथातिप्रकाशत्वात्क्षेप्या काला पार्दस्नसाविशेषो यस्य स तथा नाकालालो जाङ्गलनृप आन्नोभिसरन्नभिमुखं गच्छन्सन्नकालिलं तं चौलुक्यमुवाच । कथमित्याह । हे दोष्मन्संप्रहरस्व युध्यस्व । यत एभिर्भटैर्हतैः किं न किंचित् त्वमेव मे वध्य इत्यर्थः । किंभूतैरेभिः । काडा पार्दस्नसाभेदो घाटा कृकाटिका जटाश्च क्षेप्याः सन्त्येषां तेतिशयितास्तैः काडालघाटिलजटालतमैस्तथाघाटालाकाडिलैरजटिलैश्च ॥

---

१ सी काकिलं. २ सी °टाकालाडि°. ३ ए °श्च हितैः.

---

१ ए °न् । स्वागन । अक°. सी °न् । अक°. २ ए °तिशव°. ३ ए °लूल । वा°. ४ ए °ल । लला°. ५ ए सिध्माला°. ६ सी °न् । इ°. ७ बी मूछेला°. ८ ए प्रज्ञिलः. ९ ए फेनिल । फे°. १० बी °नलः । फे°. ११ ए °दस्नस्तावि°. १२ बी °प अन्नो°. १३ बी °प्रहार°. १४ ए °दस्तसापादो. सी °दश्रसा°. १५ सी °टालका°. १६ बी रजिटि°.

कालालः[1]। कालिलम्। जटाल। जटिलैः। घाटाल[2]। घाटिल। अत्र "काला०" [२३] इत्यादिना ल-इलौ॥ कालेति[3] डोपान्त्यं केचित्पठन्ति। काडाल। काडिलैः॥ वसन्ततिलका॥

ज्यावाचालधनुष्क किं न पुरतो वाग्मिन्निहागाः[1] स्वयं
वाचाटः प्रहितः खरामधुरवाग्योद्धुं जनोयं मुधा।
बन्द्धुं नोरसिलैः कृषीवलजनैर्दन्तावलः पिच्छिलो[2]
दानाल्लोमशकर्कशैरपि[3] यतः शक्योऽङ्गनानिःसहैः[4]॥ ७९॥

७९. ज्यया प्रत्यञ्चया वाचालमसकृदाकृष्यमाणत्वादव्यक्तस्वरत्वाच्च बहुगर्ह्यवाग्युक्तं धनुर्यस्य हे ज्यावाचालधनुष्क तथा हे वाग्मि(ग्मि)न्। उपहासेन संबोधने इमे। हे चौलुक्य पुरतः प्रथमं स्वयमिह[4] मत्समीपे किं किमिति त्वं नागाः। तथायं मया हतविप्रहतो जनो भटलोको योद्धुं मुधा मत्पुरोकिंचित्करत्वान्निरर्थकं[5] त्वया प्रहितः। कीदृक्। खं महत्कण्ठविवरमस्त्यस्यां खरा कठोरात एव न मधु माधुर्यमत्रास्त्य[6]-मधुरा च वाग्यस्य[7] सः। तथा वाचाटो बहुगर्ह्यवागसकृन्निष्फलमात्मनः[8][9] प्रभोश्च पराक्रमादि प्रशंसन्नित्यर्थः। अर्थान्तरन्यासमाह। यतः कृषीवलजनैर्हालिकलोकैर्दन्तावलो हस्ती न बन्द्धुं[10] शक्यः। किंभूतैः। उरसिलैरपि महावक्षोभिरप्यतिस्थूलैरपीत्यर्थः। तथा लोमानि सन्त्येषां लोमशास्ते च ते कर्कशाश्च कर्कोश्व[11] उपमेयतयास्त्येषां श्वेताश्ववत्कठोरास्तैरपि। तर्हि कस्मान्न शक्य इत्याह। यतोऽङ्गनानिःसहैः स्त्रीवद्-

१ बी सी वाग्मिन्नि. २ बी पिच्छलो. ३ बी °मक°. ४ बी शक्येङ्ग°.

१ ए °लाल। का°. २ सी °टालः। घा°. ३ बी सी °ति वोपा°. ४ सी °ह स°. ५ बी °मत्परो°. ६ ए °मथास्त्य°. बी °मत्रत्यम°. ७ ए °ग्य सः. ८ सी °कृन्निःफल°. ९ बी °न्निफल°. १० बी बद्धुं श°. ११ बी °र्को उ°.

पराक्रमैः । कीदृग्गजः । दानान्मदात्पिच्छं चिक्क[1]णत्वमस्यास्ति [2]पिच्छिलः पङ्किलो मदोत्क[3]टः ॥ शार्दूलविक्रीडितम् ॥

युध्यस्व नान्योस्म्यहमात्मतेजसो-

ष्मणः स एवोद्धुषणेन द[1]द्रुण ।

शाकीनतां याति न यत्पलालिनो

न वा पलालीनपदं च शाकिनः ॥ ८० ॥

८०. हे [4]उद्धुषणेन रोमाञ्चेन कृत्वा [5]दद्रुण दद्रूव्याधियुक्त युध्य[6]-स्वानेकभटैः सह युद्धेनातिश्रान्तत्वाद्योद्धुं न शक्नोषीत्यहं न [7]युध्य इति न वाच्यम् । यतोहमात्मतेजसा कृत्वोष्मोष्मत्वमस्यास्त्यूष्मणः सन्नान्यो-स्मि श्रान्तत्वादिप्रकारेण नान्यादृशो[8] वर्ते । किं तु स एव यादृग्युद्धा-त्पूर्वं दृष्टस्तादृश एवास्मि। युक्तं चैतत् । [9]यद्यस्मात्पलालिनो महत्पलालं पलालक्षोदो वा पलाली तद्वान्प्रदेशः । शाकीनतां महच्छाकं शाकस-मूहो वा शाकी तद्वत्प्रदेशतां न याति । शाकिनश्च पलाली[10]न[11]पदं पला-लीवत्स्थानं पलालीनतामित्यर्थः । न वा याति ॥

वाचाल । वाचाटः । अत्र "वाचः०" [२४] इत्यादिना-आलाटौ ॥

[12]वाग्मिन् । इत्यत्र "ग्मिन्" [२५] इति ग्मिन् ॥

मधुर । खर । इत्यत्र "मध्वादिभ्यो रः" [२६] इति रः ॥

कृषीवल । दन्तावल(लः) । इत्यत्र "कृष्यादिभ्यो वलच्" [२७] इति वलच् ॥

लोमश । [13]कर्कशैः । इत्यत्र । [14]पिच्छिलः । उरसिलैः । इत्यत्र च "लोम०" [२८] इत्यादिना श इलश्च ॥

---

१ **बी** दद्रुण.

---

१ **सी** °ण म°. २ **बी सी** पिच्छलः. ३ **ए** °त्कण्ठः । शादूल°. ४ **सी** उद्धूष. ५ **बी** दद्रुण दद्रूव्या°. ६ **ए** °ध्यस्थाने°. ७ **बी** युद्ध इ°. ८ **ए** °शो बर्ते । किं. ९ **ए सी** यसा°. १० **ए** °लीव°. ११ **सी** °नता°. १२ **बी सी** वाग्मिन्. १३ **ए** °र्कश । इ°. १४ **सी** पिच्छलः.

अङ्गना । ऊष्मणः । अत्र "नोङ्गादेः" [२९] इति नः ॥

शाकिनः[1] । पलालिनः । दद्रुण[2] । इत्यत्र "शाकी०" [३०] इत्यादिना नो ह्रस्वश्च ॥ केचित्तु शाकीपलाल्योर्ह्रस्वत्वं नेच्छन्ति । तन्मते शाकीनताम् । पलालीन ॥ इन्द्रवंशावंशस्थयोरुपजातिः ॥

युच्छ्राद्धवार्तो विषुणो[1] नु लक्ष्मणः[2]
प्राज्ञार्च उच्छार्करवाक् चुलुक्यराट् ।
खं पांशुतामिस्रमपि प्रपादयन्
दन्तांशुभिर्ज्यौत्स्नतुलामुवाच[3] तम् ॥ ८१ ॥

८१. चुलुक्यराट् तमाम्रमुवाच । कीदृक्सन् । विषुणो[3] नु विष्वञ्चो रश्मयो[4] विष्वग्गतानि वास्य सन्ति विषुणो रविर्वायुर्वा[5]तितेजस्वित्वाद्वलिष्ठत्वाच्च तयोस्तुल्योत एव युधि श्राद्धः श्रद्धावान्वार्तश्च व्यापारवान् युच्छ्राद्धवार्तस्तथा प्राज्ञेषु प्रज्ञावत्स्वार्चोर्चावान्पूज्यः[6] प्राज्ञार्चो विद्वत्तमोत एव शर्करात्रास्ति शार्करं दुग्धमोदकादि माधुर्यातिशयेनोत्क्रान्ता शार्करमुच्छर्करा वाग्यस्य[7] सः । तथा लक्ष्मणः स्मितेन सश्रीकोत एव खमाकाशं पांशुभिस्तमिस्रा[8] तमस्ततिस्तमो वात्रास्ति पांशुतामिस्रमपि[9][10] धूलीधूसरितमपि दन्तांशुभिः कृत्वा ज्योत्स्नात्रास्ति ज्यौत्स्नः श्वेतपक्षस्तस्य या तुला साम्यं तां प्रपादयन्नङ्गीकारयञ् श्वेतीकुर्वन्नित्यर्थः ॥ इन्द्रवंशा ॥

किमुवाचेत्याह ।

---

१ बी °णो ल° २ सी °णः प्रज्ञा°. ३ बी °भिज्योत्स्न°.

---

१ ए °नः । द.° २ ए बी दद्रुण. ३ ए विषणो. ४ बी रसयो. ५ बी °विवायु°. ६ बी °ज्यः प्रज्ञा° ७ बी °ग्यस्यां सः. ८ ए बी °मिश्रा त°. ९ बी °मिश्रम°. १० सी °स्रस°.

योशार्करासिकतिलेष्विव सैकतानः
कर्षेर्द्धि[1] शर्करिलसैकतभूषु गौः सः।
चञ्चद्द्युमद्रुमसमानभुजोपि वीरः
काण्डीर शूर इह यः क्रियया गिरेव ॥ ८२ ॥

८२. काण्डानि[1] शराः सन्त्यस्य हे काण्डीर हे धानुष्क। उपहसन्नेवं संबोधयति। हे आन्न चञ्चन्तौ विलसन्तौ द्युमद्रुमसमानौ द्यौर्द्युर्वा[2]-स्यास्मिन्वास्ति द्युमो रूढिशब्दत्वादुच्चैस्तमो यो द्रूणि[3] दारूणि सन्त्य-स्यास्मिन्वा द्रुमो रूढिवशाद्वृक्षस्तद्वत्प्रलम्ब[4]बलिष्ठौ भुजौ यस्य सोपि यो गिरेव यथा गिरा वाचा शूरस्तथा यः क्रियया रणकर्मणा शूरः स इह जगति वीरः। दृष्टान्तमाह। हि यस्मा[5]द्यो गौर्यथा शार्करासिकति-लेषु क्षुद्रपाषाणवालुकारहितेषु देशेषु सैकतं सिकतावद्वालुकाभृतं-(भृद् ?) यदनः शकटं तत्कर्षेत्तथा यः शर्करिलसैक[6]तभूषु सैकतानः कर्षेत्स[7] गौर्वृषभगुणोपेतो वृषभः स्यात्। तत्ते स्वशौर्यश्लाघावचनैः पू-र्वोक्तै[8]र्न किंचित्किं तु यदि शूरंमन्यस्तदा रणक्रियां प्रकटयेत्यर्थः॥ वसन्ततिलका॥

आण्डीरभाण्डीरहयाजिकच्छुरैः सदन्तुरेभै रथिरैः समेधिरैः।
संभूय भूपैर्हृदयालुभिः स्वकैर्ढौकस्व नन्वेसि[2] कृपालुरेकके ॥८३॥

८३. नन्विति संबोधने। हे आन्न स्वकैर्निजैर्भूपैः सह संभूय मि-लित्वा त्वं ढौकस्व। किंभूतैः। आण्डीरा वृषणवन्तो भाण्डीराश्च भाण्ड-

१ बी °द्धि कश°. २ बी न्वस क्ट°.

१ सी °नि शिराः. २ बी °द्युवास्या.° ३ सी °णि स°. ४ सी °लम्बौ ब°. ५ ए °साद्या गौ°. ६ बी °तलभू°. ७ बी °र्षेत्सा गौ°. ८ ए °र्वोक्तैर्न°.

मश्वाभरणादि तद्वन्तश्च ये हयास्तैर्वाजि[1]र्युद्धं तत्र कच्छुरैः कण्डूमद्भिस्तथा सदन्तुरेभैरुन्नतदन्तान्वितगजयुक्तैस्तथा[2] रथिरै रथवद्भिस्तथा समेधिरैर्मेधिरा बुद्धिमन्तोमात्या युद्धक्रियाचतुरा योधाश्च तद्युक्तैस्तथा हृदयालुभिः सहृदयै रणे निपुणैरित्यर्थः । कस्मादेवमुच्यत इत्याह । यत एकक एकाकिन्यसहाये त्वयि विषयेस्म्यहं कृपालुर्वर्ते[3] ॥ इन्द्रवंशावंशस्थयोरुपजातिः ॥

मेधावता हृदयिना रथिनासि पातो
गाण्डी[1]विकेशवसमेन कृपावता यत् ।
तातेन तर्हि शिरसा मणिवेन नम्रे[2]-
स्तन्नाद्य संस्मरसि नासिक सोसि वीरः ॥ ८४ ॥

८४. तर्हि[4] यदा जयसिंह आसीत्तस्मिन्काले यत्त्वं मणिवेन रत्नवता शिरसा नम्रः संस्तातेन जयसिंहेन कृपावता सता पातो द्विड्भ्यो रक्षितः । कीदृशा तातेन । मेधावता[5] तथा हृदयिना विक्रान्तेन तथा रथिनोपलक्षणत्वाद्गजाश्वपत्तिवता च शक्तित्रयोपेतेनेत्यर्थः । अत एव गाण्डीविकेशवसमेनार्जुनविष्णुतुल्येन । तत्तातकृतं रक्षणमद्य युद्धदिने न संस्मरसि । तत्तस्माच्छिन्ना नासिकास्यास्ति रे नासिक तदा कृपया तातेन रक्षितस्याद्य मयैव सह युद्धकरणेन निर्लज्जत्वान्नक्रवर्धिततुल्य त्वं यः प्रणम्रः कृपया तातेन रक्षितः स वीरोसि वर्तसे । यत्त्वमात्मनो भटत्वं वर्णयसि तन्मे[6] विदितमेवेत्यर्थः ॥

---

१ ए ण्डीवके°. २ बी °म्रतन्ना°.

---

१ बी °जि युद्धं. २ सी °था हृ°. ३ बी °र्तेते । इ°. ४ सी °र्हि तदा. ५ बी °वन्तो त°. ६ बी °न्मे वेदितमिवे°.

विषुणः । अत्र[1] "विष्वचो विषुश्च" [३१] इति नो विष्वित्यादेशश्च ॥

लक्ष्मणः । अत्र "लक्ष्म्या अनः" [३२] इत्यनः ॥

प्राज्ञ । श्राद्ध । आर्चः[2] । वार्तः[3] । इत्यत्र "प्रज्ञा०" [३३] इत्यादिना णः ॥

ज्यौत्स्न[4] । तामिस्रम्[5] । इत्यत्र "ज्योत्स्नादिभ्योण्" [३४] इत्यण् ॥

सैकतानः । शार्कर । इत्यत्र "सिकता०" [३५] इत्यादिनाण् ॥

सिकतिलेषु । सैकत । शर्करिल । अशार्कर । इत्यत्र "इलश्च देशे" [३६] इतीलोण्च ॥

द्युम[6] । द्रुम । इत्यत्र "द्युद्रोर्मः" [३७] इति मः ॥

काण्डीर । आण्डीर । भाण्डीर । इत्यत्र "काण्डाण्ड०" [३८] इत्यादिना-ईरः ॥

कच्छुरैः । अत्र "कच्छ्वा डुरः" [३९] इति डुरः ॥

दन्तुर । इत्यत्र "दन्तादुन्नतात्" [४०] इति डुरः ॥

मेधिरैः । रथिरैः । अत्र "मेधा०" [४१] इत्यादिना वा-इरः । वावचनाद्य-थाप्राप्तमि[7]नादि । "आयात्" [२] इति मतुश्च । मेधावता । रथिना ॥

कृपालुः[8] । कृपावता । हृदयालुभिः । हृदयिना । इत्यत्र "कृपा०" [४२] इ-त्यादिनालुर्वा ॥

केशव । इत्यत्र "केशाद्वः" [४३] इति वः ॥

मणिवेन । गाण्डीवि[9] । इत्यत्र "मण्यादिभ्यः" [४४] इति वः ॥

नासिक[10] । इत्यत्र "हीनात्स्वाङ्गादः[11]" [४५] इत्यः ॥ वसन्ततिलका ॥

कालोर्शसेनाभ्र इवातरस्विना मायाविनानायितमामियांस्त्वया[1] ।
स्रग्वी तपस्विन्नधुना युयुत्ससे[2] मेधाव्यसि व्यक्तमनामयाव्यहो ८५

---

१ बी °यां त्वया°. २ बी °से धा°.

---

१ सी °त्र लक्ष्म्या. २ ए आर्चं । वा°. ३ बी वाचा । इ°. ४ बी °त्स्नम् । ता°. ५ ए °स्र । इत्यजोत्स्ना°. ६ बी °म । द्रुम. ७ ए °मित्यादिः । आ°. ८ ए सी °पालु । कृ°. ९ बी °ण्डीव । इ°. १० बी नाशिक. ११ ए °नास्वाङ्गा°.

८५. हे तपस्विन्वराक त्वयातरस्विनाबलिष्ठेनात एव मायाविना नमस्क्रियादिरूपमायान्वितेन सतेयान्कालोनायितमामत्यर्थमतिवाहितो यथार्शसेनार्शोरोगवता नरेणाभ्रोभ्रवान्कालो वर्षाकालोतरस्विनार्शोरोगस्यातिवृद्धेरबलेनात एव मायाविनार्शउपशमकतथाविधौषधक्रियादिनार्शोरोगवञ्चनावता सता नीयते । अधुना तु हे तपस्विन्स्रग्वी पुष्पमालावान्सन्युयुत्ससे । तस्मादहो आत्र त्वं व्यक्तं मेधाव्यसि माययेयतः कालस्यातिवाहनेन पण्डितोसि तथानामयाव्यस्यधुना युद्धाभिलाषेणामयरहितो बलिष्ठोसि ॥

अभ्रः । अर्शसेन । इत्यत्र "अभ्रादिभ्यः" [४६] इत्यः ॥

तरस्विना । तपस्विन् । मायाविना । मेधावी । स्रग्वी । इत्यत्र "अस्तपस्०" [४७] इत्यादिना विन् ॥

अनामयावी । इत्यत्र "आमयाद्दीर्घश्च" [४८] इति विन् दीर्घश्चामयस्य ॥

इन्द्रवंशा ॥

स स्वामिगोमी मम तात ऊर्जस्व्यूर्जस्वलेष्वर्णवगीतकीर्तिः ।
हुं लज्जते त्वां न जयाम्यहिम्यज्योत्स्ना तमिस्रामिव यद्यगुण्याम् ८६

८६. यदि त्वां न जयामि । यथाहिम्या हिमरहिता निर्मला या ज्योतिरत्रास्ति ज्योत्स्ना चन्द्रिका तमोत्रास्ति तमिस्रां तामसीं रात्रिं जयति तमोपहारेण पराभवति । कीदृशीम् । अगुण्यामालोकविनाशकत्वादिदोषैर्निर्गुणाम् । तदा हुमिति कोपे । स प्रसिद्धो मम तातो जयसिंहो लज्जते । कीदृक् । ऊर्जस्वलेषु बलिष्ठेषु मध्य ऊर्जस्व्यतिबलिष्ठोत एव स्वामी चासौ गोमी च भूमिमांश्च । यद्वा स्वामिनां प्रभूणां राज्ञां गोमी पूज्योत एव चार्णवगीतकीर्तिस्तस्माद्यावश्यं त्वां जयाम्येवेत्यर्थः ॥ इन्द्रवज्रा ॥

---

१ बी °र्जस्फूर्ज°.

---

१ ए °ना ए°. २ ए °न्युत्स°. ३ ए °ना । तपस्विना । तप°. ४ सी °द्वा प्रभूणां स्वामिनां रा°. ५ ए °श्यं त्वं ज°.

इति तं गदित्वा बहुरूप्यमूल्यं गुणवद्धनुर्[1]हैमवतीपतिर्नु ।
सशरं व्यधाद्रूप्यपि पौर्णमासीशशिरूप्यवक्त्रोथ चुलुक्यचन्द्रः ८७

८७. अथानन्तरं रूप्यपीत्यत्रापि[1]र्भिन्नक्रमे । न केवलमान्नश्चौलु-क्यचन्द्रोपि धनुः सशरं व्यधात् । हैमवतीपतिर्नु हिमवतोपत्यस्य गौर्या भर्ता[2] हरो यथा त्रिपुरदाहादिकाले धनुः सशरं व्यधात् । किं कृत्वा । इत्युक्तरीत्या तमान्नं गदित्वा । कीदृक्सन् । पौर्णमास्या यः शशीन्दु-स्तद्वद्रूप्यं प्रशस्यरू[3]पान्वितं सौम्यं मु[4]खं यस्य सः । रूप्यपीत्यस्य स्थाने कुत्रापि रुष्यपीति पाठो दृश्यते तदा रुष्यपि रोषेपि सति महापुरुषत्वे-नालक्ष्य[5]कोपविकारत्वात्पौर्णमासीशशिवक्त्र इति यथास्थानमेवापिर्योज्यः[6] । हरोपि शशिरूप्यवक्त्रश्चन्द्रकलया रूपवन्मुखः । कीदृशं धनुः । आहतं रूपमस्त्येषां रूप्या दीनारादयः । निघातिकाताडना[7]द्दीनारादिषु यद्रूपमु-त्पद्यते तदाहतं रूपम् । बहवो रूप्या मूल्यं यस्य तत् । यथा(तथा?) गुणवत्प्रशस्यप्रत्य[8]ञ्चम् ॥

स्वामि । इत्यत्र "स्वा[9]मिन्नी[10]शे" [४९] इति मिन् दीर्घश्चास्य ॥

गोमी । इत्यत्र "गोः" [५०] इति मिन् ॥ पूज्य एव मिनमिच्छन्त्येके ॥

ऊर्जस्वी । ऊर्जस्वलेषु । इत्यत्र "ऊर्जो[11] विन्०" [५१] इत्या[12]दिना विन्वला-वस् चान्तः ॥

तमि[13]स्राम् । अर्णव । ज्योत्स्ना । इत्ये[14]ते "तमिस्रा०" [५२] इत्यादिना निपात्याः ॥

---

१ ए °नुर्हैम.

---

१ बी °पि भिन्न°. २ बी °र्ता हारो. ३ सी °रूप्यान्वि°. ४ ए मुख्यं य°. ५ बी °लक्षको°. ६ ए सी °पियोज्यः°. ७ ए °नादीना°. ८ ए °ञ्च । स्वा°. ९ सी स्वानूमिनीशे. १० बी °मित्तं से इ°. ११ बी ऊर्ज्यो वि°. १२ बी °दि वि°. १३ ए °स्रा । अ°. १४ बी °त्येन्ये त°.

गुण्याम् । गुणवत्[1] । हिम्य । हैमवती । इत्यत्र "गुणादिभ्यो यः" [५३] इति यो मतुश्च ॥

रूप्यवक्रः । रूप्य[3] । इत्यत्र "रूपात्०" [५४] इत्यादिना यः ॥ कथं रूपी । व्रीह्यादित्वाद्भविष्यति ॥

पौर्णमासी । इत्यत्र[4] "पूर्णमासोण्" [५५] इत्यण् ॥ केकिरवं छन्दः[5] ॥

आन्नोर्थ[1] गौशतिकनैष्कसहस्रिकैः[2] स्वै-
भृत्यैः सनैष्कशतिकैः सहगौत्रिकैश्च[3] ।
संभूय[4] सर्वधनिभिश्च रुषान्धको नु
तं देवमैकगविकं पिदधेस्त्रवृष्ट्या ॥ ८८ ॥

८८. अथान्नो रुषा कृत्वान्धको नु कुत्सितोन्ध इवात्यन्तं कोपाविष्टः[6] सन्नित्यर्थः[7] । तं चौलुक्यमस्त्रवृष्ट्या बाणवर्षणेन पिदधे । किं कृत्वा । स्वैर्भृत्यैः सह संभूय मिलित्वा । किंभूतैः । गो(गौ)शतिकनैष्कसहस्रिकैः[8] कैश्चिद्गोशतयुक्तैः कैश्चिच्च निष्कसहस्रयुक्तैः । निष्कोष्टोत्तरं शतं स्वर्णस्य[9] पलं वा तथा निष्कशतमस्त्येषां[10] सह[11] तैर्य(र्ये) तैः सनैष्कशतिकैस्तथा गोत्रा गोसमूहोस्त्येषां सह[12] तैर्ये[13] तैः सहगौत्रिकैश्च[14] गोशतादिमद्भिर्देशपा-[15][16] लैर्निष्कसहस्रादिप्रभूतजीविकैर्महायोधैश्चेत्यर्थः । तथा सर्वधनमस्त्येषां तैः सर्वधनिभिश्च चतुरङ्गबलोपेतनृपैश्चेत्यर्थः । यथान्धको[17] दैत्यः स्वै-[18] भृत्यैः सह संभूयैकगव एकवृषोस्त्यास्यैकगविकं[19][20] देवं रुद्रमस्त्रवृष्ट्या पिदधे[21] ॥

---

१ बी °थ गोश°. २ ए °सहिस्रि°. ३ बी सी °हगोत्रि°. ४ ए °य संबंध°.

---

१ ए °त् । है°. २ बी °वत्य°. ३ बी रूप । इ°. ४ ए °त्र पौर्ण°. ५ ए बी °न्दः । अन्नो°. ६ ए °विष्टा स°. ७ ए °त्यर्थं चौ°. ८ ए °कैः कश्चि°. ९ ए °र्णस्याप°. १० बी °ष्कत°. ११ सी सहितै°. १२ सी सहितै°. १३ बी °तैर्य तैः. १४ बी सी °हगोत्रि°. १५ सी °त्रिभिश्च. १६ ए °द्भिदेश°. सी °द्भिर्दश°. १७ सी °यद्वान्ध°. १८ ए स्वैभृत्यैः. १९ ए एषवृ°. सी एषोवृ°. २० सी °स्यास्त्येक°. २१ सी °धे । गोश°.

गौशतिक । इत्यत्र "गोपूर्वाद्०" [५६] इत्यादिनेकण् ॥ केचित्तु गवादेरनकारान्तादपीच्छन्ति । गौत्रिकैः ॥

नैष्कशतिकैः । नैष्कसहस्रिकैः । अत्र "निष्कादेः०" [५७] इत्यादिनेकण् ॥

ऐकगविकम् । अत्र "एकादेः०" [५८] इत्यादिनेकण् ॥

सर्वधनिभिः । अत्र "सर्वादेरिन्" [५९] इतीन् ॥ वसन्ततिलका ॥

तां भैमिश्चास्यदस्त्रवृष्टिं शृङ्ग्यश्व इवोर्गप्यभान्न चान्नः ।
सुकटकवलयी यथा हि कुष्ठी पोटा वा स्तनकेशवत्यपीह ॥८९॥

८९. भैमिश्च तामान्नीयामस्त्रवृष्टिमास्यच्चिक्षेप । ततश्चान्न ऊर्गपि बलिष्ठोपि निस्तेजस्कत्वेन नाभात् । यथेह जगति शृङ्गी शृङ्गान्वितोश्व ऊर्गपि निकृष्टतमलक्षणत्वान्न भाति । यथा वा कुष्ठी न भाति । कीदृक् । वलयः प्रकोष्ठाभरणभेदः पादाभरणविशेषश्च पादकटकः । तथा च हंसकः पादकटक इत्यमरकोशे । ततः पादकटकैकदेशोपि कटक इति द्वन्द्वविरोधाभावे शोभनौ कटकवलयावस्य स्तः सुकटकवलय्यपि । यथा वा स्तनकेशवत्यपि पोटा नृलक्षणा स्त्री दंष्ट्रिकादिपुंश्चिह्नेन विरूपत्वान्न भाति ॥

द्वन्द्व । सुकटवलयी ॥ रुक् । कुष्ठी ॥ निन्द्य । शृङ्ग्यश्व । अत्र "प्राणिस्थाद्०" [६०] इत्यादिनेन् ॥ अस्वाङ्गादिति किम् । स्तनकेशवती ॥ औपच्छन्दसकम् ॥

अथेषुवर्षं विदधे च भैमिरान्नस्य भृत्या लुलुवु(ठु)श्च भूमौ ।
वातक्यतीसारकिणः पिशाचकिनो यथा पश्चमिनश्च बालाः ९०

---

१ ए शृङ्गाश्व. २ बी °लुवश्च.

---

१ ए °पूर्वद्. २ ए सी °न्ति । गोत्रि°. ३ बी °हस्रिकैः. ४ बी °त्र इका°. ५ ए °मसुवृष्टिगासाच्चि°. ६ ए °ष्ठो नि°. ७ सी °जस्त्वेन पा°. ८ ए °भेदाःपा° ९ बी दः पादाभरणभेदः पा°. १० सी °क इ°. ११ ए °भनो क°. १२ बी °क्षणे स्त्री. १३ बी °वलीय । रु°. १४ ए शृङ्गाश्व. सी शृङ्गश्व. १५ बी अश्वाङ्गा°.

९०. स्पष्टः । किं तु पिशाचकिनो ग्रहिलाः । पञ्चमो मासः संवत्सरो वास्त्येषां पञ्चमिनो बालाः । वातक्यादयो यथा भूमौ लुठन्ति ॥

वातक्यतीसारकिणः । पिशाचकिनः । अत्र 'वात०'' [६१] इत्यादिनेन् कश्चान्तः ॥

पञ्चमिनो बालाः । अत्र ''पूरणाद्वयसि'' [६२] इतीनेव ॥ उपजातिः ॥

दुःखिनोपि सुखिनो नु मूर्छया मालिनो निपतितानहन्न सः ।
ब्रह्मवर्णिन इव द्विषोपि तान् क्षत्रधर्मियतिशील्ययं यतः ॥ ९१ ॥

९१. स चौलुक्यस्तानान्नभटान्द्विषोपि रणाङ्गणे निपतितान्सतो ब्रह्मवर्णिन इव ब्राह्मणजातिमतो ब्राह्मणानिव नाहन् । कीदृशान् । प्रभूतप्रहारैर्दुःखिनोपि मूर्छया प्रहारकष्टोत्थमोहेन कृत्वा दुःखस्यासंवेदकत्वात्सुखिनो नु । तथा मालिनो रणे पातेन विसंस्थुलम्लानस्रक्त्वान्निन्द्यमालान्वितान् । अर्हनने हेतुमाह । यतोयं भैमिः क्षत्रधर्मः क्षत्रियाचारः पतितेष्वप्रहारादिरस्यास्ति क्षत्रधर्मी स चासौ यतिशीलं मुन्याचारः कृपादिधर्मोस्यास्ति यतिशीली च सः ॥

सुखिनः । दुःखिनः । अत्र ''सुखादेः'' [६३] इतीन् ॥

मालिनः । अत्र ''मालायाः क्षेपे'' [६४] इतीन् ॥

क्षत्रधर्मियतिशीली । ब्रह्मवर्णिनः । अत्र ''धर्म०'' [६५] इत्यादिनेन् ॥ रथोद्धता ॥

---

१ **ए** °ल्ययन्तः.

---

१ **बी** °वास्तेषां. २ **बी** °मौ लुंठ°. ३ **ए बी** °यसती°. ४ **ए** °स्तान्नान्न°. ५ **ए** °तपूरै°. ६ **ए** °ष्टेथ मो°. ७ **ए** °लिनं र°. ८ **ए** °हनेन हे°. **बी** °हमनेन हे°. ९ **सी** °चारकृ°. १० **ए** च सा । सु° ११ **बी** क्षत्रिध°. १२ **ए** °तिशिली. १३ **सी** °त्र ब्रह्म इ°.

स बाहुबल्यूरुबली सवर्मी स्वान्यामिनीपङ्कजिनीवदान्नः ।
म्लानान्विदित्वा करिणं[1] नुनोद रुषा[2]ब्जिनीपुष्पदलारुणाक्षः ९२

९२. स्पष्टः । किं तु सवर्मी वर्मास्यास्ति वर्म्येवं नाम राजा तेनान्वितः । अब्जिनीपुष्पं रक्तोत्पलम् ॥ उपजा[1]तिः ॥

मदाम्भसा पुष्करिणीं नु तन्वत्यत्रान्नहस्तिन्यथ दन्तिनं स्वम् ।
नुनोद सद्दानतरङ्गिणीकं वर्णीव रामस्तरसा चुलुक्यः ॥ ९३ ॥

९३. स्पष्टः । किं तु पुष्करिणीं नु वापीमिव तन्वति मदोन्मत्त[2] इत्यर्थः । आन्नहस्ति[3]नि विषये सद्दानतरङ्गिणीकं विद्यमानमदनदीकं स्वं हस्तिनं नुनोद । [4]यतस्तरसा बलेन कृत्वा वर्णो ब्रह्मचर्यमस्यास्ति वर्णी । राम इव परशुरामतुल्यः ॥

बाहुबली । ऊरुबली । इत्यत्र "बाहु०" [६६] इत्यादिनेन् ॥

मन्नन्त । वर्मी । मान्त । यामिनी ॥ अब्जा[5]दि । अब्जिनी । पङ्कजिनी । इत्यत्र "मन्म०" [६७] इत्यादिनेन् ॥

हस्तिनि । दन्तिनम् । करिणम् । अत्र "हस्त०" [६८] इत्यादिनेन् ॥

वर्णी । इत्यत्र "वर्णात्०" [६९] इत्यादिनेन् ॥

पुष्करि[6]णीम् । तरङ्गिणी । इत्यत्र "पुष्करादेर्देशे" [७०] इति-इन् ॥

वैमुक्तमैत्रावरुणीययज्ञायज्ञीयदैवासुरगर्दभाण्डान् ।
भयाद्विजास्तर्हि सगर्दभाण्डीयेषेत्वकं घोषदकं जगुर्न ॥ ९४ ॥

९४. तर्हि तस्मिन् रणकाले भयाद्विजा न जगुर्न पेठुः । कान् । विमुक्तशब्दोत्राध्यायेनुवाँके [7]वास्ति वैमुक्तस्तथा मैत्रावरुणशब्दोत्रास्ति

१ ए °रिणा नु°. २ ए °षाड्जिनी°.

१ ए °जाति । मन्दाभसा. २ सी °न्मत्ते यइ°. ३ ए °नि नु°. ४ ए यस्त°. ५ ए °ब्जाति । अ°. सी °ब्जानि । अ°. ६ सी °णी । त°. ७ ए °वास्ति.

मैत्रावरुणीयं सूक्तमेवमग्रे[1]पि वाक्ये । यज्ञायज्ञीयं साम । दैवासुरो[2] गर्दभाण्डश्चाध्या[3]योनुवाको वा द्वन्द्वे तांस्तथा गर्दभाण्डीयेषेत्वकाभ्यामध्यायाभ्यामनुवा[4]काभ्यां[5] वा सहितं घोष[6]च्छब्दोत्रास्ति घोषद[7]कमध्यायमनुवाकं वा ॥

मैत्रावरुणीय । यज्ञायज्ञीय । इत्यत्र "सूक्त०" [७१] इत्यादिनेयः ॥

गर्दभाण्डान् । गर्दभाण्डीय । इत्यत्र "लुब्वा०" [७२] इत्यादिनेयस्य लुब्वा ॥

वैमुक्त[8] । दैवासुर । इत्यत्र "विमुक्तादेरण्" [७३] इत्यण् ॥

घोषदकम् । इषेत्वकम्[9] । अत्र "घोषदादेरकः" [७४] इत्यकः ॥

सुस्थूलकैः प्रहरतोर्दशनैः प्रवीर-
जातीययोस्तदिभयोरुदगुः स्फुलिङ्गाः ।
भ्रष्टुं क्षमा यवककृष्णकजीर्णकादि
गोमूत्रकं[1] दिव इवानणुकं दिशन्तः ॥ ९५ ॥

९५. तदिभयोर्भैम्यान्नगजयोः स्फुलिङ्गा दन्तसंघट्टोत्था अग्निकणा उदगुरुच्छलिताः । यतः स्थूलः[10] प्रकार एषां स्थूलकाः सुष्ठु स्थूलकाः सुस्थूलकास्तैरतिस्थूलैर्दशनैः[11] प्रहरतोः । एतदपि कुत इत्याह । यतः प्रवीरः[12] प्रकारो ययोस्तयोः प्रवीरजातीययोः प्रकृष्टशूरयोः[13] । किंभूताः । यवप्रकारा यवका व्रीहयः कृष्णप्रकाराः कृष्णकास्तिला जीर्णप्रकारा जीर्णकाः शालयो द्वन्द्वे तदादि वस्तु भ्रष्टुं दग्धुं क्षमास्तथा[14]रक्तप्रभूतातिसान्द्रत्वाद्दिवो व्योम्नो गोमूत्रकमिव गोमूत्रप्रकारं गोमूत्रवर्णमाच्छा-

१ ए °मूत्रिकं.

१ सी °ग्रे वा°. २ बी °सुरौ ग°. ३ बी °ध्यायानु°. ४ ए °वाक्याभ्यां. ५ बी °भ्यां स°. ६ बी सी °षशब्दो°. ७ बी °दकं । इषे°. सी °दकं वाध्या°. ८ ए °क्त । देवा°. ९ सी °क । अ°. १० बी सी स्थूलप्र°. ११ बी °दर्शनैः. १२ ए °वीरजा°. १३ बी °ष्टसूर°. १४ सी °स्तमार°.

दनमिव दिशन्तो ददतः । किंभूतम् । अणुः प्रकारोस्याणुकं न तथा महाप्रमाणम् ॥ वसन्ततिलका ॥

अवदातिकां पीत इवान्नकः सुरां
सुरकाहिरक्ताक्ष इषून्रुषामुचत् ।
नगरीं नु[1] गौष्ठीन इषूश्चुलुक्यपो-
प्यचिरादिहा[2]विष्टचरीन्र्यवीविशत् ॥ ९६ ॥

९६. आन्नक इषूनमुचदक्षिपत् । कीदृक्सन् । रुषा हेतुना सुरकः सुरावर्णो योहिस्तद्वद्रक्ताक्षोत एव ज्ञायतेवदातिकामवदातप्रकारां प्रसन्नां सुरां मद्यं पीत इव । तथा चुलु[1]क्यपोपीहान्नेविष्टचरीः पूर्वमप्रविष्टा इषूरचिरान्न्यवीविशत्समस्थापयत् । यथा भूतपूर्वो गोष्ठो गोस्था[2]नं गोष्ठीनस्तत्र पवित्रभूमित्वेन कश्चित्पुरीं निवेशयति । गोखुरक्षु[3]ण्णे हि प्रदेशे पुरादि निवेश्यमिति वा[4]स्तु ॥

प्रवीरजातीययोः । अत्र "प्रकारे जातीयर्" [७५] इति जातीयर् ॥

अनणुकम् । सु[5]स्थूलकैः । अत्र "कोण्वादेः" [७६] इति कः ॥

जीर्ण[6]क । गोमूत्रकम् । अवदातिकाम् । सुरक । यवक । कृष्णक । इत्यत्र "जीर्ण०" [७७] इत्यादिना कः ॥

अविष्टचरीः । अत्र "भूत०" [७८] इत्यादिना[7] ष्चरट् ॥

गोष्ठीने । अत्र "गोष्ठादीनञ्" [७९] इतीनञ् ॥ सुर्दन्तम्[8] ॥

चौलुक्यरूप्या भृशमान्नतोभवं[3]श्चौलुक्यतश्चान्नचराः पदातयः ।
तौ तेभितो वा परितश्च युच्छ्रमप्रवाहिकातो व्यधुरादितस्ततः॥९७॥

---

१ ए बी नु गोष्ठी°. २ बी °दिहवि°. ३ बी °वं चौलु°.

---

१ ए °लुक्योपी°. २ ए °स्थानां गो°. ३ बी °क्षुन्ने हि. ४ बी वास्तुः । प्र°. ५ सी °म् । सस्थू°. ६ ए °र्णकः । गो°. ७ ए °ना स्वर°. ८ ए °दन्ता । चौ°.

९७. चौलु[1]क्यरूप्याश्चौलुक्यस्य भूतपूर्वाः पदातयश्चाहडादयो भृशमान्नत आन्नस्य पक्षेभवन्। तथान्नचरा आन्नस्य[2] भूतपूर्वाश्च पदातयो गो[3]विन्दराजादयश्चौलुक्यत[4]श्चौलुक्यपक्षेभवन्। ततस्तस्मिन्पक्षद्वयभवने सति ते चौलुक्यरूप्यौ[5] आन्नचराश्चादितोग्रे भूत्वा तौ भैम्यान्नावभितो वा। वात्र समुच्चये। परितश्च[6] तयोरग्रे पार्श्वयोः सर्वतश्च भूत्वेत्यर्थः। व्यधुः। किं युच्छ्रमप्रवाहिकातो युच्छ्रम एव भैम्यान्नयोर्युद्धश्रान्तिरेव दुःखकत्वात्प्रवाहिका रोगभेदस्तस्य प्रतीकारं स्वयं युद्धकरणेन तौ युद्धश्रान्तौ विश्रमयामासुरित्यर्थः॥

चौलुक्यरूप्याः। आन्नचराः। अत्र "ष[7]ष्ठ्याः०" [८०] इत्यादिना रूप्य[8]प्चरटौ॥

चौलुक्यरूप्या आन्नतोभवन्। चौलुक्यतश्चान्नचराः। अत्र[9] "द्व्याश्रये तसुः" [८१] इति तसुः॥

प्रवाहिकातो व्यधुः। अत्र "रोगा[10]त्०" [८२] इत्यादिना तसुः॥

परितः। अभितः। अत्र "परि०" [८३] इत्यादिना तसुः॥

आदितः। ततः। अत्र[11] "आद्यादिभ्यः" [८४] इति तसुः॥ इन्द्रवंशा[12]वंशस्थयोरुपजातिः॥

ते वृत्ततोप्यव्यथिताः प्र[1]हीणाः क्षिप्ताश्च पा[2]पाः प्रहृ[3]तैः प्रहारम्।
मिथो[4]सुतोसून्प्रति दायिनो द्राग्न नात्यगृह्यन्त तदा यशस्तः[5]॥९८॥

---

१ ए प्रहीःणाक्षप्ता°. २ सी पापैः प्र°. ३ ए हृते प्र°. ४ सी °थोसतो°. ५ बी °स्तः। त्तौ चौ°.

---

१ ए °क्यस्य भू°. सी °क्यस्य स्वरू°. २ ए °स्य पू°. ३ बी विंदरा°. ४ ए °श्चौलक्य°. ५ ए °प्या अन्न°. ६ ए °श्च यो°. ७ ए सी षष्ठ्यादि°. ८ ए °प्यचर°. सी °प्यर°. ९ ए °त्र द्व्याश्र°. १० ए °गादिना. बी °गादि इ°. ११ ए °त्र द्या°. १२ ए °वंश°.

९८. ते चौलुक्यरूप्या आन्नचराश्च राणकास्तदा युद्धकाले द्राग्यशस्तः पराक्रमोत्थयशसा कृत्वा न नात्यगृह्णन्त किं त्वन्याननतिक्रम्य यशसा गृहीता अतियशस्विनः[1] संभाविता इत्यर्थः । यद्वा । अतिशयेन[2] यशसा गृहीता इत्यर्थः । यतो[3] मिथः प्रहृतेः[4] प्रति प्रहारं दायिनः । तथासुतः प्रत्यसून्दायिनः । आधमर्ण्येत्र[5] णिन् । प्रहृतेरसुत इत्यत्र "यतः प्रतिनिधि०" [२. २. ७२] इत्यादिना पञ्चमी[6] । विपक्षाणां प्रहृतिं प्राणांश्च गृहीत्वा[7] स्वस्य प्रहारं प्राणांश्च ऋणमिव ददतः । प्राणनिरपेक्षं युध्यमाना इत्यर्थः । किंभूताः । वृत्ततः[8] शौर्यवृत्त्यादिना चरित्रेण कृत्वाव्यथिता अप्यचलिता[9] अप्यभीता[10] अपि वा यावता[11] स्वस्वामिनं परिहृत्य रिपुपक्षे स्थितास्तावता वृत्ततः[12] स्वस्वामिनि चुक्कपदातितारूपेण निकृष्टाचारेण[13] कृत्वा प्रहीणाः सदाचाराद्भ्रष्टास्तथा वृत्ततः पापाश्च पापिष्ठाश्चात एव वृत्ततः क्षिप्ता निन्दिताः ॥

वृत्ततः क्षिप्ताः । यशस्तो न नात्यगृह्णन्त[14] । वृत्ततोऽव्यथिताः । अत्र "क्षेप०" [८५] इत्यादिना तसुः ॥

वृत्ततः पापाः । वृत्ततः प्रहीणाः । अत्र "पाप०" [८६] इत्यादिना तसुः ॥

प्रहारं प्रहृतेः प्रति दायिनः । असूनसुतः प्रति दायिनः । अत्र "प्रतिना०" [८७] इत्यादिना वा तसुः ॥ उपजातिः ॥

मानाद्रिमूर्ध्नोनवरोहिणौ[1] नृपौ वीर्यादहीनौ प्रसभं प्रजह्नतुः ।
निर्यन्न तूणान्न च चापतः[2] शरोलक्ष्यापतन्नेव कुतोपि सर्वतः॥९९॥

---

१ सी °रोहणौ. २ ए °तः शिरो°.

---

१ बी °शस्विनः. २ ए °तिय°. ३ सी यथा मि°. ४ सी °ते प्र°. ५ बी °र्ण्येत्र्य णि°. ६ ए °मी । प्र०. ७ ए °त्वा स्तस्य. सी °त्वा तस्य. ८ सी °त्तयः शौ°. ९ ए अच°. १० ए अथामी°. ११ °ता स्वं स्वा°. १२ ए वृत्तेन स्व° सी वृत्तयः स्व°. १३ ए °ष्टा प्र°. १४ बी °ह्णन्ते । वृ°.

९९. स्पष्टम्[1] । किं तु सर्वस्मात्कुतोप्यस्माद्देशादय[2]मायातीति विवेक्रुमश[3]क्यप्रदेशादा[4]पतन्[5]नेवागच्छन्नेव तयोः शरोलक्षि[6] । अतिलघुहस्तत्वात् ॥ इन्द्रवंशा ॥

स्थाम्नाधिकाभ्यां बहुतोथ विश्वतो
द्वाभ्याममूभ्यां चकितोन्तकोपि सः ।
कालाद्बहोरौ[3]ज्झदितः कुतोपि ता-
मतो न[4] मत्कोपि बलीत्यहंकृ[5]तिम् ॥ १०० ॥

१००. स सर्वजगद्ग्रासकत्वेन प्रसिद्धो[7]न्तकोपि । अपिः[8] संभावने । संभावयेहं यमोपीतः प्रत्यक्षेणानुपलभ्यमानादथ वानुभूयमानादत एव कुतोप्यनिर्दे[9]श्यां[10]द्बहोर्विस्तीर्णात्कालादौज्झदत्यजत् । काम् । अतोस्मा[11]न्मत्सकाशान्न कोपि[12] बली बलिष्ठ इत्येवंविधां तां सर्वत्र[13] प्रसिद्धामहंकृतिम् । यतो द्वाभ्याममूभ्यां भैम्यान्नाभ्यां सकाशाच्चकितो भीतः । यतो बहुतो बहुभ्यः सकाशादथाथ वा विश्वतः सर्वस्मादपि सकाशात्स्थाम्ना बलेन कृत्वाधिकाभ्याम् ॥

तूणान्निर्यन् । चापतो निर्यन् । इत्यत्र "अहीय०" [८८] इत्यादिना वा तसुः ॥ अहीयरुह इति किम् । वीर्यादहीनौ । मूर्ध्नोनवरोहिणौ ॥

---

१ सी रोहणौ. २ ए °तः शिरो°. ३ ए °रौद्यदि°. बी °रौज्झिदि°. ४ सी न हि कोपि. ५ बी °कृतिः । स°.

---

१ सी स्पष्टः । किं. २ ए बी °मापती°. ३ बी शक्यात्प्रदे°. ४ ए °पन्ने°. ५ बी °न्नेव. ६ सी °क्षित अ°. ७ सी °द्धोपि. ए द्धोतको°. ८ ए बी अपि सं°. ९ सी °देंशाद्ब°. १० बी °श्यानातीतस्यापि कर्णार्जुनयुद्धस्य सुराणां वर्तमानत्वेन प्रसिद्धमात्मयोधं स्वभटं. (१०३ श्लोको द्रष्टव्यः). ११ सी °स्मात्स°. १२ ए °पि बलि°. १३ ए °त्र सि°.

किम्[1]। कुतः॥ सर्वादि। सर्वतः। विश्वतः॥ बहु[2]। बहुतः। अत्र "किमद्यादि[3]०" [८९] इत्यादिना पित्तस्॥ द्याादिवर्जनं किम्। द्वाभ्याम्। मत्॥ बहोर्वै-पुल्यप्रतिषेधः किम्। बहोः कालात्॥

इतः। अतः। कुतः। एते "इतोतः कुतः" [९०] इति निपात्याः॥ इन्द्र-वंशावंशस्थयोरुपजातिः॥

स भवान्बली कोस्त्वभि तं भवन्तं भवितालमस्मै भवतेपि कोत्र।
न ऋते भटोस्माद्भवतोप्यनेन भवतेति कोस्तौन्न ततोभवन्तौ[1]१०१

१०१. ततोभवन्तौ पूज्यौ भैम्यान्नौ को नास्तौत्। कथमित्याह। हे भैमे स प्रसिद्धो भवान् बलयतश्च तं प्रसिद्धं भवन्तमभिलक्ष्यीकृत्य[4] को बलयस्तु न कोपीत्यर्थः। अत एवास्माद् भवतस्त्वत्त ऋते विना न भटस्त्वमेव वीर इत्यर्थ इति। तथा हे आन्नास्मै प्रत्यक्षाय भवतेपि तुभ्यमप्यलं समर्थोत्र जगति को भवितास्ति भविष्यति वा न कोपी-त्यर्थः। अत एवा[5]नेन भवतापि सह को भटो न कोपीत्यर्थ इति च॥ केकिरवम्॥

आयुध्यते किमु ततोभवतो[2] विवस्वतः
पुत्रेण पार्थ उ ततोभवता ततोभवान्।
विष्णोर्ऋ[6]तेपि हि ततोभवतः सुरा इति
शश्लाघिरे किल ततोभवतेथ भैमये॥ १०२॥

१०२. अथ किलेति सत्ये। सुरास्ततोभवते पूज्याय भैमये शश्लाघिरेवर्णयन्। कथमित्याह। उ हे भैमे ततोभवान्पूज्यः पार्थो-र्जुनस्ततोभवतः पूज्यस्य विवस्वतो रवेस्ततोभवता पूज्येन पुत्रेण

१ ए °स्तौस्त्वत्त ऋते. २ सी °वतेथ.

१ ए किमु। कु°. २ सी °हुतः. ३ सी °दिव°. ४ सी °वन्तिम°. ५ सी °त्यकौ ब°. ६ सी °वान्नेन.

कर्णेन सह[1] हि स्फुटं किमु आयुध्यते नैवेत्यर्थः । कथं ततोभवतः पूज्याद्विष्णोर्[2]ऋतेपि विष्णुं सहायं विनापीत्यर्थः । एतेन त्वमसहाय एव कर्णतुल्येनान्नेन सहायुध्यमानोर्जुनादप्यतिबलिष्ठ इति व्यञ्जितं [3]स्यादिति । प्रत्यक्षस्य भैम्यान्नयुद्धस्य दर्शनेनातीतस्यापि कर्णार्जुनयुद्धस्य सुराणां वर्तमान[4]त्वेनावभासनादायुध्यत इत्यत्र वर्तमाना । मृदङ्गच्छन्दः ॥

आन्नं स दीर्घायुरहं[5]स्ततो देवानां प्रियं भैमिरयःशरेण ।
पपात सोथानवलम्ब्य तं देवानांप्रियं घातरुजात्मयोधम् ॥१०३॥

१०३. स प्रसिद्धो दीर्घायुश्चिरजीवी भैमिस्ततो देवानां प्रियं पूज्यमान्नमयःशरेण लोहबाणेनाहन् । अथ स आन्नो घातरुजा प्रहारपीडया हेतुना पपात भूमौ । किं कृत्वा । तं [6]हस्त्यारोहश्रेष्ठत्वेन प्रसिद्धमात्मयोधं स्वभटं गजाग्रभागारूढं चाहडमनवलम्ब्यानवष्टभ्य यतो [7]देवानांप्रियं मूर्खमवलम्बदानेसमर्थ[8]मित्यर्थः[9] ॥ उपजातिः ॥

न ततोदीर्घायुर्न्यहंश्चुलुक्योस्त्वयमायुष्मानित्युपेक्ष[1]माणः[2] ।
इतआ[3]युष्मान्केवलं तदीयां जग्राहेभघटां तुरङ्गमांश्च ॥ १०४ ॥

१०४. स्पष्टम् । किं तु ततोदीर्घायुः पूज्यः । अयमान्न आयुष्मानस्त्विति जीवतादित्युपेक्ष[10]माणः[11] । इतआयुष्मान्पूज्यः ॥ औपच्छन्दसकापरान्तिका ॥

स्वस्त्यस्तु तत्रभवतेत्रभवाञ्जयत्वि-
त्याशंसिनात्रभवता दिविषज्जनेन ।

१ सी °पेक्ष्यमा°. २ ए °णः । अत. ३ सी °युष्मन्न केव°.

१ सी °ह स्फु°. २ ए °ष्णो ते°. ३ सी °दित्यप्र°. ४ ए °नत्वभा°. ५ सी °युरहंस्त°. ६ ए हस्त्यरो°. ७ बी °प्रियमू°. ८ ए °र्थ इत्य°. ९ सी °र्थः ॥ न. १० सी °पेक्ष्यमा°. ११ ए °णः । अत.

शक्रस्य तत्रभवतस्तनये नु भैमौ[1]

न्यक्षेपि तत्रभवति प्रसवोत्करोथ ॥ १०५ ॥

१०५. स्पष्टम् । किं तु तत्रभवते पूज्याय । एवमग्रेपि । यथा कर्णस्य विजये शक्रस्य तनयेर्जुने दिविषज्जनेन पुष्पौघो न्यक्षेपि ॥ वसन्ततिलका ॥

ईन्द्रो[2] ऋतेत्रभवतोत्रभवन्तमीशं

स्थित्यानुकुर्वति ततोभवतीह[3] भैमौ ।

द्राक्तत्रभोः[4] क नु गमिष्यसि कं ततोभो

यामीति वादिन[5] इतो रिपवोथ नेशुः ॥१०६॥

१०६. अथ रिपवो द्रागितो भैमेर्नेशुः । किंभूताः । इति वादिनः । तदेवाह[1] । नुः प्रश्ने । हे तत्रभोः पूज्य शरणार्थं के[2] कं देशं नृपं वा गमि[3]ष्यसीति । तथा हे ततोभोः पूज्याहं कं नृपं देशं वा यामीति । क्व सति । ततो[4]भवति पूज्य इह भैमौ । किंभूते । अत्रभवतः पूज्यादिन्दोः शिरःशेखराच्चन्द्राहते चन्द्रकलारहितमित्यर्थः[5] । अत्रभवन्तमीशं शंभुं स्थि[6]त्या जित्वा रणाङ्गणे समपादाख्येन स्थानविशेषेण कृत्वानुकुर्वति । शंभुर्हि समपादस्थानेन तिष्ठति । अत एव स्थाणुरिति नामास्य ॥

ततोभवान् । ततोभवन्तौ । ततोभवता[7] । ततोभवते । ततोभवत[8] ऋते । ततोभवतः पुत्रेण । इतआयुष्मान् । ततोदीर्घायुः । ततो देवानां प्रियम् । अत्र "भवतु०" [९१] इत्यादिना तस्वा ॥

१ बी °ये न भैमो न्य°. सी °ये न भै°. २ बी इन्द्रो ऋते°. ३ ए ह भीमौ. ४ ए °त्त भोः. ५ ए °न अतो.

१ सी °ह । नुप्र°. २ ए °र्थं कः दे°. ३ ए °मिष्यासी°. ४ ए °तोभीतिं. ५ सी °र्थः । तत्र°. ६ बी स्थित्वा जि°. ७ ए °वतः पु°. ८ सी °वत पु°.

अत्र[1]भवान् । अत्रभवन्तम् । अत्रभवता[2] । तत्रभवते । अत्रभवत[3] ऋते। तत्रभवतस्तनये । तत्रभवति । इत्यत्र "त्रप्च" [९२] इति त्रप् ॥ एवमायु[4]ष्मदादिभिरप्युदाहार्यम् । सूत्रद्वयस्यापि विकल्पपक्षे । स भवान् । तं भवन्तम् । अनेन भवता । अस्मै भवते । अस्माद्भवतः । अयमायुष्मान् । स दीर्घायुः । तं देवानांप्रियम् ॥ "त्रप्च" [९२] इति योगविभागश्चकारेण पुनस्तस्विधानार्थः । तेन सप्त[5]म्यन्तादपि तस् स्यात् । ततोभवति । तत्रभवति । अन्यथा हि ततः "सप्तम्याः" [९४] इति परत्वात्त्रबेव स्यात् ॥ केचि[6]च्च भवच्छब्दस्यामन्त्रणे सौ[7] भो आदेशं कुर्वन्ति । तन्मते ततोभोः । तत्रभोः । इत्यत्रापि स्यात् ॥ कश्चित्तु भवदाद्ययोगेपि त्रप्तसाविच्छति । क्व गमि[8]ष्य[9]सि । कं यामि ॥

इति श्रीजिनेश्वरसूरिशिष्यलेशाभयतिलकगणिविरचितायां[10] श्रीसिद्ध[11]-हेमचन्द्राभिधानशब्दानुशासनद्व्याश्रयवृत्तावष्टादशः सर्गः ॥

---

१ ए °भवता. २ ए °ता । अ°. ३ ए °वते । अत्र°. बी °वते ऋ°. ४ ए °युष्मादि°. ५ ए °म्यान्ता°. ६ बी सी °चित्तु भ°. ७ ए सौ भे आ°. सी सौ भा आ°. ८ सी °ष्यति । कं. ९ बी °सि । किं या°. १० बी °यां सिद्धहे°. ११ ए श्रीहे°.

एकोनविंशः सर्गः ।

ख्यातो बहुत्र[1] सर्वत्रे[2]हैव भैमिरै[3]थावसत् ।

रणेऽत्र[4] पतितान्कुत्राप्यरीन्स्वान्क्वा[5]प्यशोधयत् ॥ १ ॥

१. अथ भैमिरिहैव रणभूनिकट एवावसत् । कीदृक्सन् । आन्न-विजयेन बहुत्र[1] बहुषु स्थानेषु सर्वत्र जगत्त्रयेपि ख्यातः । ततश्चात्र रणे क्वापि स्थानेरीन्पतितानशोधयदगवेषयत् । क्वापि च स्वान्स्वकीय-भटान्पतितानशोधयद्रणभूमिम[2]शोधयदित्यर्थः ॥

क्व । कुत्र । अत्र । इह । इत्येते "क्व०" [९३] इत्यादिना निपात्याः ॥

सर्वत्र । बहुत्र[3] । इत्यत्र "सप्तम्याः" [९४] इति त्रप् ॥

नैकदा[6] नान्यदोत्सेको न कदाचिन्न सर्वदा ।

ह्रीः प्रत्युत तदा[7] तस्य यदासीज्जयकीर्तनम् ॥ २ ॥

२. यदा तस्य[4] भैमेर्जयकीर्तनमासीत्तदा प्रत्युतेति[5] विपरीतफलो-पदर्शने । तस्य ह्रीर्लज्जासीत्[6] । यस्मान्महापुरुषत्वात्तस्यैकदोत्सेकहेता-वेकस्मिन्विवक्षिते शत्रुविजयरूपाभ्युदयकाल उत्सेक औद्धत्यं नासीत्त-थान्यदा[7] शत्रुविजयाभ्युदयकालादन्यस्मिन्नप्यभ्युदयकाले तस्योत्सेको[8]

---

१ बी °हुत्व स°. २ ए °र्वत्र है°. ३ बी °रवाव°. ४ बी °णेप्रप°. ५ सी °रीन्वीक्ष्याप्य°. ६ सी °दा मान्य°. ७ सी °दासी°.

---

१ सी °हुबहुस्था°. २ ए °मिशो°. ३ ए °हुव । इ°. ४ बी °स्य भीमे°. ५ सी प्रत्येति. ६ बी ह्रीलज्जा. ७ ए °न्यदो श°. ८ बी °स्योच्छेको.

नासीत् । न[1] तस्यान्यदोत्सेकोभवत्किं कदाचिन्नासीत्सर्वदा वेत्याह । न कदाचिन्न सर्वदा न स्तोकेनापि सर्वस्मिन्नपि काल इत्यर्थः[2] ॥

कदाचित् । यदा । तदा । सर्वदा । एकदा । अन्यदा । इत्यत्र "किंयत्[3]०" [९५] इत्यादिना दा ॥

आन्नदूतो[1]भ्यगा[2]देतर्ह्यूचे चेति सदा पटुः ।
यत्तदानीं व्यधत्ता[3]न्नो न तत्सन्मन्यतेधुना ॥ ३ ॥

३. स्पष्टः[4] । किं त्वेतर्ह्यस्मिन्प्रस्तावेभ्यगा[5]द्भिमिमभ्याययौ । ततः सदा पटुर्वाग्मी(ग्मी ?) सन्नूचे[6] च । यद्विग्रहादि । तदानीं कल्ये । न सन्मन्यते मया भद्रं[7] न कृतमिति जानातीत्यर्थः ॥

क्षात्रो धर्म इदानीम[4]स्त्यद्या[5]द्यानां कथा ऋताः ।
यत्सद्यो मूर्छिते शत्रौ परेद्यवि कृपां व्यधाः ॥ ४ ॥

४. इदानीं कलिकालेपि क्षात्रो धर्मः पतितप्रहाराकरणादिः क्षत्रियाचारोस्ति । तथाद्यानां रामचन्द्रादीनां कथा अद्य ऋताः सत्या बभूवुः । अनेन क्षत्रियोचितयुद्धेन कृत्वा त्वया पूर्वे क्षत्रियाचारयो[8]धिनोद्य सत्यीकृता इत्यर्थः । शत्रावाप्ते । परेद्यवि परस्मिन्नहनि । शिष्टं स्पष्टम् ॥

सदा । अधुना । इदानीम्[9] । तदानीम् । एतर्हि । इत्येते "सदा०" [९६] इत्यादिना निपात्याः[10] ॥

सद्यः । अद्य[11] । परेद्यवि । इत्येते "सद्योद्य" [९७] इत्यादिना निपात्याः ॥

---

१ ए °तोभागातर्ह्यनेचेति. २ बी °गादैतर्ह्यूचेति. ३ बी °त्तान्ये न. ४ सी °नीनस्तदाद्यानां. ५ बी °मस्तद्या°.

---

१ ए सी नन्वस्या°. २ सी °र्थः ॥ य°. ३ सी यदेत्या°. ४ सी स्पष्टम् । किं. ५ ए °वेभ्यागा°. ६ ए सचैव । य°. ७ ए बी °द्रं कृ°. ८ ए °योधनो°. ९ सी °म् । ए°. १० सी °त्याः ॥ पू°. ११ बी अद्यः । प°.

पूर्वेद्युरपरेद्युश्चान्येद्युरन्यतरेद्युरु[1] ।

तुभ्यं द्रुह्यन्ति ये दर्पादुत्तरेद्युः पतन्ति[2] ते ॥ ५ ॥

५. स्पष्टः । किं तु उ हे चौलुक्य । उत्तरेद्युरग्रेतनेह्नि ॥

नोभयेद्युर्व्यधात्कर्णो नोभयद्यु[3]र्यदर्जुनः ।

अधरेद्युर्व्यधास्तत्त्वमितरेद्युः करोषि किम् ॥ ६ ॥

६. स्पष्टः[1] । किं तूभयेद्युर्दिनद्वये । यदन्योन्यं युद्धम् । कर्णार्जुनौ हि दिनद्वयं मिथो युद्धाविति पुराणम् । अधरेद्युरधरस्मिन्नहनि दिन-स्यान्त्ये[2] याम इत्यर्थः । तन्निरुपमविजयफलं महायुद्धम्[3] । इतरेद्युरधर-स्मादह्नोन्यस्मिन्नह्नि करोषि किं विधेयस्यातिस्तोककाले[4]पि विहितत्वाच्छे-षकाले किं करिष्यसीत्यर्थः ॥

पूर्वेद्युः । अपरेद्युः । अधरेद्युः । उत्तरेद्युः । अन्येद्युः । अन्यतरेद्युः । इतरेद्युः ।

अत्र "पूर्वापर॰" [९८] इत्यादि[5]नैद्युस्[6] ॥

उभयद्युः । उभयेद्युः । अत्र "उभयाद् द्युश्च" [९९] इति द्युसँ एद्युस च ॥

न परुन्न परार्यासीन्न बहुर्हि न कर्हिचित् ।

चौलुक्यैर्विग्रहो नः किं त्वकस्मादेष[4] ऐषमः ॥ ७ ॥

७. स्पष्टः । किं तु बहुर्हि[7] बहुषु संवत्सरेषु । कर्हिचित्कस्मिन्नप्य-नद्यतने काले । अकस्मादतर्कितम्[8] । ऐषमोस्मिन्संवत्सरे ॥

अकुप्यत्सर्वथा[5] यर्हि कथंचित्ते पितामहः ।

तर्ह्यपीत्थं व्यधान्नान्नो भक्तिं तु बहुधाकरोत् ॥ ८ ॥

१ सी °द्युश्चा°. २ सी °न्ति । स्पष्ट उ. ३ बी °भयेद्यु°. ४ बी सी °ष एष°. ५ ए °था यार्हि.

१ बी °ष्टः । उभ°. २ बी सी °स्यान्ते या°. ३ ए °म् । अत°. ४ ए °ले किं करोष्यतीत्य°. ५ ए सी °दिनेद्यु°. ६ ए °स् ॥ न. ७ सी °ह्रुषु. ८ बी °तम् । एमेसि°. सी °त एष°.

८. स्पष्टः । किं त्वकुप्यदान्नं प्रति । ते पितामहो जयसिंहः । इत्थमिममेतं[1] वा विग्रहलक्षणं प्रकारं न व्यधात् । बहुधा बहुभिः प्रकारैः[2]॥

ऐषमः । परुत्[3] । परारि । इत्येते "ऐषमः०" [१००] इत्यादिना निपात्याः ॥

कर्हिचित् । यर्हि । तर्हि । बहुर्हि । इत्येतेषु "अनद्यतने र्हि(र्हिः)" [१०१] इति र्हिः ॥

सर्वथा । इत्यत्र "प्रकारे[4] था" [१०२] इति था ॥

कथंचित् । इत्थम् । एतौ "कथमित्थम्" [१०३] इति निपात्यौ ॥

बहुधा । इत्यत्र "संख्याया धा" [१०४] इति धा ॥

चिकीर्षत्यान्न ऐकध्यं पूर्वस्नेहं द्विधाकृतम् ।
तितिक्षस्वैकधैकध्यमपराद्धं[1] तदास्य तत्[2] ॥ ९ ॥

९. आन्नो द्विधाकृतमनेन विग्रहेणैकं सन्तं द्वौ कृतं पूर्वस्नेहमग्रेतनीं[5] प्रीतिमैकध्यमनेकं सन्तमेकमभिन्नं चिकीर्षति मैत्रीं चिकीर्षतीत्यर्थः । तत्तस्माद्धेतोस्तदानन्तरातीतदिनेस्यान्नस्यापराद्धं विग्रहलक्षणमैकध्यं प्रसादकरणरूपेणै[6]कप्रकारेण तितिक्षस्व सहस्व । किंभूतम् । एकधानेकदुर्वाक्यप्रहाराद्यपेक्षयानेकं सदेकविग्रहापेक्षयैकमान्नस्यैकमपराद्धं[7] प्रसह्य सहस्वेत्यर्थः ॥

द्वेधा त्रेधापराद्धेपि द्वैधं त्रैधमिवैकधा ।
प्रार्थितानां सतां चेतो द्वैधं त्रैधं च नो भवेत्[3] ॥ १० ॥

१०. द्वेधा त्रेधा द्वाभ्यां[8] प्रकाराभ्यां त्रिभिः प्रकारैर्वापराद्धेपि[9] द्वि-

१ ए °कध्य°. २ सी °राधं त°. ३ ए भवत्.

१ सी °तं च वि°. २ बी सी °रैः । एष°. ३ बी परत्. ४ बी °रे वा इ°. ५ बी °नीं प्रति°. ६ बी °रूपप्र°. ७ ए बी °राधं प्र°. ८ सी °भ्यां त्रि°. ९ सी °राधेपि.

स्त्रिर्वापराधे कृतेपीत्यर्थः । सतां सज्जनानां चेतो न भवेत् । कीदृशम् । द्वैधमेकं सत्तोषातोषाभ्यामुभयरूपं त्रैधं चैकं सत्तोषातोषमिश्रत्वैस्त्रिरूपं[1] च । कीदृशां सताम् । प्रार्थितानां[2] मैत्र्यर्थं याचितानाम् । कथम् । एकै-[3] धैकप्रकारेण सकृदित्यर्थः । किंवत् । द्वैधं त्रैधमिव । द्वाभ्यां प्रकारा-भ्यामिव त्रिभिः प्रकारैरिव वा । अनेकशो याचितानामिव[4] सकृद्या-चितानामपीत्यर्थः । तस्मादाप्ते प्रसन्न एव भवेति सकलश्लोकस्य भावार्थः[5] ॥

द्वेधा त्रेधा न भाव्याप्तो द्वैधस्त्रैधश्च मा[1] स भूः ।
सकृद्द्विस्त्रिश्चतुः पञ्चकृत्वो वागः सहेन्महान् ॥ ११ ॥

११. आप्तो न भावी । कीदृक् । द्वेधा भक्तोभक्तश्च । तथा[6] त्रेधा भक्तोभक्तो मिश्रश्च । अत्यन्तं भक्त एव भविष्यतीत्यर्थः । तथा त्वमपि मा[7] स्म भूः । कीदृक् । द्वौ[8] विभागौ प्रकारौ वास्य द्वैधः प्रसन्नोप्रसन्न-श्चैवं त्रैधश्च । उत्तरार्धं स्पष्टम् ॥

द्विधाकृतम्[9] । अत्र "विचाले च" [१०५] इति धा ॥

ऐकध्यं तितिक्षस्व एकधा प्रार्थितानाम् ॥ विचाले । ऐकध्यं चिकीर्षति एकधापराद्धम् । अत्र "वैकाद्ध्यमञ्" [१०६] इति ध्यमञ् ॥

द्वैधं त्रैधं प्रार्थितानाम् । द्वेधा[10] त्रेधापराद्धे ॥ विचाले । द्वैधं त्रैधं मनः (चेतः) । द्वेधा । त्रेधा । इत्यत्र "द्वित्रेर्०" [१०७] इत्यादिना धमञेधौ ॥

द्वैधः । त्रैधः । अत्र "तद्वति[11] धण्" [१०८] इति धण् ॥

१ **बी** मा साभूः.

१ **ए** °पं । की°. २ **सी** °नां मत्यर्थया°. ३ **ए** °कधेक°. ४ **बी** °चिना°. ५ **सी** °र्थः । द्वैधा त्रैधा. ६ **ए** °था त्रैधा. ७ **बी** मा साभूः. ८ **बी** द्वौ भा°. ९ **सी** °त । अ°. १० **ए** °धाप°. ११ **ए** °द्वविधति धण् । प°.

पञ्चकृत्वः । अत्र "वारे कृत्वस्" [१०९] इति कृत्वस् ॥

द्विस्त्रिश्चतुः । इत्यत्र "द्वित्रि०" [११०] इत्यादिना सुच् ॥

सकृत् । इत्यत्र "एकात्सकृच्चास्य" [१११] इति सुच् सकृदित्यादेशश्च ॥

बहुधा गणधा तावद्धा वा[1] वक्ष्याम्यहं यथा ।
भवेत्प्रागागतः स्नेहो युवयोः प्रागिवाधुना ॥ १२ ॥

१२. बहवः प्रभूता गणाः समुदायभूतास्तावन्तश्च कियन्तोपि विवक्षिता आसन्ना[1] वारा अस्य वचनस्य बहुधा गणधा तावद्धा वा तथाहं वक्ष्यामि यथा युवयोः प्राक्प्राचः कालादागतश्चिरकालीन इ[2]त्यर्थः । स्नेहः प्रागिव प्राचि काल इवाधुनापि भवेत् ॥

रमणीयं[2] यथासीत्प्राक्सिद्धेशे प्राग्गतागते ।
भृत्येनान्नेन देवात[3] उपर्यपि तथास्तु ते ॥ १३ ॥

१३. हे देव भैमेतोस्य वर्तमानकालस्योपर्यप्यूर्ध्वकालेपि ते तव भृत्येनान्नेन कृत्वा प्राक्प्राची दिग्देशो वावन्तयस्तथा रमणीयं[3] त्वदाज्ञामनोज्ञमस्तु । यथा सिद्धेशे जयसिंहे सति प्राक्प्राची दिग्देशः कालो वा रमणीयं जयसिंहाज्ञया[4] मनोज्ञमासीत् । किंभूते । प्राग्गतागते[5] गतश्चासावागतश्च[6] गतागतस्तस्मिन्प्राक्प्राच्यां दिशि[7] देशे वा मालवेषु यशोवर्मनृपजयाय[8][9] गते प्राच्या दिशो देशाद्वा[10] विजित्यागते[11] च । आन्नेन सह तव सख्य आन्नमाश्रितोवन्तिपतिर्बल्लालोपि त्वत्किंकरो भविष्यत्यतो यथा सिद्धेशाज्ञयावन्तयः प्राग्रमणीया आसंस्तथाधुना त्वदाज्ञ-

१ बी वा पक्ष्या°. २ ए °मणीं य°. ३ बी देवता उ°.

१ ए °न्नां चारा. २ बी इत्यः स्ने°. ३ ए °यं त्वादा°. ४ °हाज्ञाया. ५ ए °गतश्चासावगत आगता°. ६ सी °श्च तस्मि°. ७ सी °शि दिशो वा. ८ ए बी °शोधर्म°. ९ सी °यादाग°. १० बी देशद्वा वितिजि°. ११ सी °ते आ°.

यापि सन्त्वित्यर्थः। क्रियाव्ययविशेषण इति वचनाद्रम्य(मणीय ?)-मित्यत्र क्लीबता। एवमग्रेपि॥ अत इत्यत्र "आद्यादिभ्यः" [७. २. ८४] इति षष्ठ्यर्थे तस्। "रिरिष्टात्" [२. २. ८२] इत्यादिना रियोगे षष्ठ्या विधानात्॥

उपरिष्टाद्गते सिद्धेधस्तादिन्द्रस्त्वमागमः।
द्वयं युवाभ्यां भोक्तव्यमान्नस्तज्ज्ञातवान्न हि॥ १४॥

१४. हे भैमे त्वमुप(त्वमिन्द्र उप?)रिष्टादूर्ध्वाया दिशो देशाद्वा स्वर्गात्सकाशादधस्तादधरस्यां दिशि देशे वा मर्त्यलोक आगम आगतः। क्व सति। सिद्धे जयसिंहेधस्तान्मर्त्यलोकात्सकाशादुपरिष्टात्स्वर्गे गते प्राप्ते। ततश्च द्वयमुपरिष्टादधस्ताच्च स्वर्गो मर्त्यलोकश्च युवाभ्यां भोक्तव्यमुपभोग्यम्। तत्तु स्वर्गः सिद्धेन भोक्तव्यो मर्त्यलोकश्च त्वयेत्येतदान्नो मर्त्यलोकोपभोगवाञ्छया त्वया सहैवं युद्धकरणेन न हि नैव ज्ञातवान्॥

खेचराः कौतुकं द्रष्टुं ये यान्त्यायान्त्युपर्यधः।
अस्तु रम्यं द्वयं तेषां युन्मैत्रीवार्तयाद्य वाम्॥ १५॥

१५. ये खेचरा विद्याधराद्याः कौतुकं रणकुतूहलं द्रष्टुं यान्ति। क्व। उपर्यूर्ध्वायां दिशि देशे वा स्वर्गे तथाधश्चाधरस्यां दिशि देशे वा पाताले च। तथा य आयान्ति मर्त्यलोक आगच्छन्ति। कुतः। उपर्यधश्च स्वर्गात्पातालाच्च। कौतुकं द्रष्टुं लोकत्रयेपि ये भ्राम्यन्तीत्यर्थः। तेषां खेचराणामद्यास्मिन्दिने वां युवयोर्युन्मैत्रीवार्तया रणसख्ययोर्वृ-

१ सी °यावि°. २ सी °स् । अरिष्टा°. ३ ए °ष्टादिना. ४ ए °तश्चाद्वमु°. ५ बी °र्गो मृत्युलो°. ६ ए °न हि. ७ बी वा पा°. ८ सी °लाद्वा । कौ°. ९ बी °योर्न्मै°.

त्तान्तेन कृत्वा द्वयमुपर्यधश्च रम्यमस्तु । युवयोः संबद्धां युन्मैत्रीवार्तां स्वर्गे पाताले च खेचराः कुर्वन्त्वित्यर्थः ॥

पुरस्तादुदयत्यंशाववस्ताच्च त्वयि प्रभो ।
अर्घाञ्जलिं करोत्वान्नो रम्यमस्तु द्वयं च तत् ॥ १६ ॥

१६. हे प्रभो आन्नः पुरस्तात्पूर्वस्यां दिशि देशे[1] वावस्ताच्चावरस्यां दिशि देशे वापि गूर्जरत्रायां च रविं त्वां चोद्दिश्यार्घाञ्जलिं पूजार्थमञ्जलिं करोतु । क सति । अंशौ रवौ । कीदृशे । पुरस्तात्पूर्वस्या दिशो देशात्का[2]लाद्वा प्रभातात्सकाशादुदयत्युदयं गच्छति । तथा त्वयि च । कीदृशे । अवस्तादवरस्याः पश्चिमाया दिशो देशाद्वा[3] गूर्जरत्रायाः सकाशादुदयति वृद्धिं गच्छति । ततश्चाचर्यत्वात्तद्वयं पुरस्तादवस्ताच्च रम्यमस्तु ॥

योधो याति पुरोवश्च येन रम्यं त्रयं च तत् ।
तस्मान्नित्योदयोन्योसि भास्वान्[1]मोहात्तु नार्चितः[2] ॥ १७ ॥

१७. यो भास्वानधोधरस्या[4] दिशो देशाद्वा समुद्रमध्यात्[5]सकाशादुदयकाले पुरः पूर्वस्यां दिशि देशे वा याति । तथा यः पुरः पूर्वस्या[6] दिशो देशाद्वा सकाशादपराह्णेवोवरस्यां[7] पश्चिमायां दिशि देशे वा याति तथा योवश्च[8] पश्चिमाया दिशो देशाद्वा सकाशादस्तकालेधोब्धिमध्ये याति[9] । अस्तकाले हि रविः पश्चिमाब्धिमध्ये[10][11] मज्जति प्रातश्च पूर्वाब्धिमध्यादुदेतीति रूढिः । तथा येन च भास्वता तत्त्रयमधः पुरोवश्च

१ ए भासान्मो°. २ बी नाञ्चितः.

१ बी °शेव°. २ ए °शाकालाद्वायप्र°. ३ सी °द्वा समुद्र°. ४ बी °रस्यां दि°. ५ ए °ध्यासका°. ६ बी °वेस्यां दि°. ७ सी °शादस्त°. ८ बी °व प°. ९ ए यास्ति । अ°. १० ए °माध्यमज्ज°. ११ सी °ब्धिचम°.

प्रकाशितत्वाद्रम्यं तस्माद्भास्वतः सकाशादसि त्वमन्यो भिन्नो भास्वान्रविः । यतो नित्योदयः । मोहात्त्वज्ञानात्पुनस्त्वमान्नेन नार्चितः ॥

बहुधा । इत्यत्र "बहोर्धासन्ने" [११२] इति धा ॥ एके तु । गणधा । तावद्धा । अत्रापीच्छन्ति ॥

प्राग्रमणीयम् । प्रागागते । प्राग्गते ॥ काले । प्रागागतः । प्रागिव । इत्यत्र "दिक्शब्दाद्०" [११३] इत्यादिना धा ॥

उपरि रम्यम् । उपरिष्टाद्भोक्तव्यम् । उपरि आयान्ति । उपरिष्टादागमः । उपरि यान्ति । उपरिष्टाद्गते ॥ काले । अत उपरि । अत्र "ऊर्ध्वाद्रि०" [११४] इत्यादिना रिरिष्टातावूर्ध्वस्य चोपादेशः ॥

पुरः पुरस्ताद्रम्यम् । पुरः सकाशाद्याति । पुरस्तात्सकाशादुदयति । पुरो याति । पुरस्तादर्घाञ्जलिम् ॥ अवः अवस्ताद्रम्यम् । अवः सकाशाद्याति । अवस्तात्सकाशादुदयति । अवो याति । अवस्तादर्घाञ्जलिम् ॥ अधो रम्यम् । अधस्ताद्भोक्तव्यम् । अधः सकाशाद्याति । अधस्तात्सकाशाद्गते । अधो याति । अधस्तादागमः । अत्र "पूर्वावर०" [११५] इत्यादिना–अस्–अस्तातौ । पूर्वावराधराणां च पुर्–अव्–अधादेशाः ॥

परस्तादवरस्ताद्यात्वायात्वान्नस्त्वदाज्ञया ।
दक्षिणतोथोत्तरतस्तच्चतुष्कं वशं हि ते ॥ १८ ॥

१८. त्वदाज्ञयान्नः परस्तादवरस्ताद्दक्षिणत उत्तरतश्च पूर्वपश्चिमाद-

१ बी दक्षण°. २ सी °णत उत्त°. ३ ए °तुष्कव°.

१ बी °काशत्वा°. सी °काशत°. २ सी °भिनवो भा°. ३ ए °तो मित्याद°. ४ बी °हाचज्ञा°. ५ बी °न्नेना°. ६ सी °रिष्टा°. ७ ए °ति । अव°. ८ बी °धः शका°. ९ बी अधःस्ता°. १० ए सी °राणां. ११ सी °या प°. १२ ए °स्तान्दक्षि°.

क्षिणोत्तरासु दिक्षु देशेषु वा यातु स्वेच्छया विचरतु । तथा त्वत्से-
वाद्यर्थं पूर्वपश्चिमादक्षिणोत्तराभ्यो दिग्भ्यो देशेभ्यो वा[1] त्वत्पार्श्वमा-
यातु । हि यस्मात्तच्चतुष्कं परस्ता[2]दवरस्ताद्दक्षिणत उत्तरतश्च[3] ते वशं
जितत्वादा[4]यत्तमस्ति ॥

परतोवरतो यात उत्तरा[1]द्दक्षिणा[2]दथ ।
त्वत्सैन्यस्याग्रगोस्त्वान्नो वश्यं यद्यपि तत्तव ॥ १९ ॥

१९. आन्नस्त्वत्सैन्यस्याग्रगोस्तु । कीदृशस्य सतः । यद्यपि तत्परतो-
वरत[5][6] उत्तरा[7]द्दक्षिणाच्च पूर्वपश्चि[8]मादक्षिणोत्तरा दिशो देशा[9] वा तव
वश्यं तथापि कौतुकाद्देशश्रीदर्शनाद्यर्थं यातो विचरतः । क । परतः
सकाशादवर[10]तस्तथा[11]वरतः सकाशात्परतोथ तथोत्तरात्सकाशाद्दक्षिणा[12]त्तथा[13]
दक्षिणात्सकाशा[14]दुत्तरात् । चतुर्ष्वपि दिक्षु देशेषु वेत्यर्थः ॥

यात ए[3]तोधरात्पश्चाद्रामरूपेण यः फणी[4] ।
यत्कीर्त्या तद्द्वयं रम्यं वेत्त्यान्नस्त्वां तमोजसा ॥ २० ॥

२०. यः फणी शेषाहिरधरादधरस्या दिशो देशा[15]द्वा पातालाद्राम-
रूपेण बलभद्रमूर्त्येत आगतः । क । पश्चादपरस्यां पश्चिमायां दिशि
देशे वा सुराष्ट्रासु । यो मर्त्यलोकेवतीर्ण इत्यर्थः[16] । बलभद्रो हि शेषा-
वतार इति रूढिः । तथा यश्च पश्चात्सुराष्ट्राभ्यो मर्त्यलोका[17]त्सकाशादि-

१ बी सी °रादक्षि°. २ बी °दश्च । त्व°. ३ सी °एवाध°. ४ ए फणीः । य°.

१ बी वा तत्पा°. २ ए °स्ताद्°. ३ सी °त्तश्च. ४ बी °दायात्त°. ५ सी °वतर°. ६ बी °र उ°. ७ बी सी °रादक्षि°. ८ ए °श्चिमद°. ९ बी °शाद्वा त°. १० सी °रतः स°. ११ ए °वतर°. १२ सी °णात्स°. १३ ए °त्तद°. १४ बी °शात्तथादु°. १५ सी °शात्पाता°. १६ बी °र्थः । तथा यत्की°. १७ सी °काशा°.

त्यर्थः । अधरात्पाताले यातो गतः पुनः शेषाहिरेवाभूदित्यर्थः । तथा यत्कीर्त्या तद्द्वयमधरात्पश्चाच्च[1] पातालमर्त्यलोकावित्यर्थः । रम्यमोजसा बलेन कृत्वा तं शेषाहिं शेषतुल्यबलमित्यर्थः । त्वामान्नो वेत्ति ॥

परस्तात् अवरस्ताद्वशम् । परस्तादवरस्तादायातु । परस्तादवरस्ताद्यातु । इत्यत्र "पर०" [११६] इत्यादिना स्तात् ॥

दक्षिणत[2] उत्तरतो वशम् । दक्षिणत उत्तरत आयातु । दक्षिणत उत्तरतो यातु । परतोवरतो वश्यम् । परतोवरतः सकाशाद्यातः । परतोवरतो यातः । अत्र "दक्षिण०" [११७] इत्यादिना तस् ॥

अधरात् पश्चाद्रम्यम् । अधरात्पश्चादेतः । अधरात्पश्चाद्यातः । दक्षिणादुत्तराद्वश्यम्[3] । दक्षिणादुत्तरात्सकाशाद्यातः । दक्षिणादुत्तराद्यातः । अत्र "अधर०" [११८] इत्यादिना-आत् ॥

वसता दक्षिणा रम्यं येन तस्य मुनेः समम् ।
मात्रा सह गुरुं[1] प्रैषीदान्नस्ते दातुमात्मजाम् ॥ २१ ॥

२१. आन्नस्ते तुभ्यमात्मजां दातुं मात्रा +पुत्रीजनन्या सह गुरुं पुरोहितं प्रैषीत् । कीदृशम् । तस्य मुनेरगस्त्यस्य[4] प्रभावादिना समं तुल्यम् । येन मुनिना कृत्वा दक्षिणा दक्षिणा दिग्देशो वा रम्यं पवित्रम् । यतो दक्षिणा[5] दक्षिणस्यां दिशि देशे वा वसता तिष्ठता ॥

दक्षिणा रम्यम्[6] । दक्षिणा वसता । इत्यत्र "वा दक्षिणात्०" [११९] इत्यादिना-आ वा ॥ पक्षोदाहरणानि प्राक्तनान्येव ज्ञेयानि ॥

---

१ बी सी गुरप्रै°.

---

१ ए °श्चान्वपा°. २ ए °णतो । उ°. ३ ए °त्तराद्यातः । अत्र. ४ बी °गस्तस्य. ५ सी °क्षिण°. ६ ए °म् । याद°.

+ पञ्चाशत्तमश्लोकस्थेन पितामहीसममित्यनेन विरोधं परिहर्तुं स्वजनन्या इत्यावश्यकमिति भाति ।

यदितो दक्षिणा रम्यं स्थितैर्लोकैस्ततोपि यत् ।
दक्षिणाह्यागतस्तत्र गुरुरान्नस्य तिष्ठति ॥ २२ ॥

२२. इतः स्थानाद्दक्षिणा दक्षिणस्यां दूरवर्तिन्यां दिशि देशे वा स्थितैर्लोकैः कृत्वा यद्दक्षिणा रम्यं या दक्षिणा दूरा दिग्देशो वा रम्यस्ततोपि दक्षिणस्या दिशो देशाद्वापि परं यद्दक्षिणाहि या दूरा दक्षिणा दिग्देशो वास्ति तत्र दक्षिणाहि दक्षिणस्यां दूरायां दिशि देशे वागत आन्नस्य गुरुस्तिष्ठति ॥

दक्षिणा रम्यम् । दक्षिणा स्थितैः । दक्षिणाह्यस्ति । दक्षिणाह्यागतः । अत्र "आही दूरे" [१२०] इत्याहिप्रत्ययौ ॥

यैः ख्यातमुत्तरा जातैर्वर्धितैरुत्तराहि सत् ।
तानश्वान्प्राहिणोदान्नो दातुमुद्वाहमङ्गले ॥ २३ ॥

२३. उत्तरोत्तरस्यां दिशि देशे वा केकाणे जातैर्यैः केकाणाश्वैः कृत्वोत्तरोत्तरा दिग्देशो वा ख्यातं तथोत्तराह्युत्तरस्यां दिशि देशे वा वर्धितैर्वृद्धिं नीतैर्यैः कृत्वोत्तराहि सच्छोभनम् । उत्तरार्धं स्पष्टम् ॥

उत्तरा ख्यातम् । उत्तरा जातैः । उत्तराहि सत् । उत्तराहि वर्धितैः । अत्र "वोत्तरात्" [१२१] इत्याही वा ॥ पक्षोदाहरणानि प्राक्तनान्येव ॥

जातैर्विन्ध्याद्रेः पूर्वेणोत्तरपश्चादपाक्तथा ।
पश्चाच्छ्लाघ्यं च यैस्तान्स प्राहिणोत्त्वत्कृते गजान् ॥ २४ ॥

२४. स आन्नस्त्वत्कृते तान्गजान्प्राहिणोत् । भद्रजातीयत्वेन यैः

१ ए °णात्याग°. २ ए °तैरु°. ३ बी °हि तत्. ४ ए °त् । न°. ५ बी °श्चाछ्लाघ्यं.

१ ए दक्षणाहि दक्षण°. २ ए °णाहस्ति. ३ बी सी °त्यादिप्र. ४ ए °यौ। यै ख्या°. सी °यौ । खैः ख्या°. ५ ए °काणै जा°. ६ बी सी °त्तरा°. ७ ए °शो व्याख्या°. ८ ए °हि व°. ९ ए °क्षोद्द°.

कृत्वा श्लाघ्यम् । किम् । विन्ध्याद्रेर्विन्ध्यशैलात्पूर्वेण पूर्वादूरा दिग्देशो वा । तथोत्तरपश्चादुत्तरा च सापरा चोत्तरापरा दिग्देशो वा वायव्यकोणस्तथापागपाची दक्षिणा दिग्देशो वा तथा पश्चाच्चापरा पश्चिमा दिग्देशो वा । उपलक्षणत्वाद्विन्ध्याद्रेरष्टापि दिशो देशा वेत्यर्थः । यतः । किंभूतैः । जातैः । क । विन्ध्याद्रेः पूर्वेण । तथोत्तरपश्चात्तथापाक्तथा पश्चाच्च पूर्वेण श्लाघ्यम् ॥

पूर्वेण जातैः । अत्र "अदूरे एनः" [१२२] इत्येनः ॥

अपाक् श्लाघ्यम् । अपाग्जातैः । अत्र "लुबञ्चेः" [१२३] इति धाप्रत्ययस्य लुप् ॥

पश्चात् । उत्तरपश्चात् । अत्र "पश्चः०" [१२४] इत्यादिना पश्चादेशः ॥

इत्युक्त्वोत्तरपश्चार्धभूपदूते स्थितेब्रवीत् ।
क्ष्मापरार्धे खपश्चार्धे शुक्लीकुर्वन्सितैर्नृपः ॥ २५ ॥

२५. स्पष्टः । किं तूत्तरपश्चार्धभूपदूत उत्तरापरस्या दिशो यदर्धमुत्तरदिग्विभागस्तस्य भूप आन्नस्तस्य दूते । क्ष्मापरार्धे खपश्चार्धे पृथ्व्या व्योम्नश्चापरमन्यतममर्धं खण्डमेकमित्यर्थः । नृपो भैमिः ॥

अरूकुर्वन्नजीकुर्वन्संमुखीभवतो रणे ।
असानप्युन्मनीकुर्वन्न्यूनीस्यादान्नकः कुतः ॥ २६ ॥

२६. आन्नकः कुतो न्यूनीस्याद्धीनो भवेन्न कस्मादपीत्यर्थः । कीदृक्सन् । रणे संमुखीभवतो भटानरूकुर्वन् शस्त्रव्रणवतः कुर्वंस्तथा

---

१ बी सी °त्युक्तोत्त°. २ ए सी °र्धे शु°.

---

१ ए बी °द्रेविन्ध्य°. २ बी °रा चासा अप°. ३ बी °क्षणाद्वि°. ४ सी देशो वे°. ५ बी पश्चा इ°. ६ सी °त्तरस्याप°. ७ बी °मर्द्धा ख°. ८ ए °पो नैमि ॥ अ°. ९ सी °तोपि न्यू°.

रजीकुर्वन्धूलीकुर्वंस्तीव्रप्रहारैश्चूर्णीकुर्वन्नित्यर्थः । अतिविक्रान्त इत्यर्थः । अत एवास्मानप्युन्मनीकुर्वन्सङ्गमायोत्कण्ठयन्नित्यर्थः । साश्चर्यीकुर्वन्नित्यर्थो वा ॥

उच्चक्षूभवतोचेतीभवतो मूर्छया भटान् ।
रहीभूते रणे नाहन्यः श्लाघार्हः कथं न सः ॥ २७ ॥

२७. स आन्नः कथं न श्लाघार्हः । यः क्षत्रियोत्तमत्वाद्रणे भटान्नाहन् । किंभूतान् । मूर्छया तीव्रप्रहारोत्थमोहेनोच्चक्षूभवत उद्भ्रान्तनेत्रगोलकीभवतस्तथाचेतीभवतोचेतनीभवतः । अत एव किंभूते रणे । रहीभूते रहसि रहसि भूते भटानां मूर्छितत्वेनासत्कल्पत्वाच्छून्यीभूत इवेत्यर्थः ॥

पश्चार्धम् । अपरार्धम् । उत्तरपश्चार्धं । इत्यत्र "वोत्तर०" [१२५] इत्यादिना वा पश्चादेशः ॥ उत्तरापरार्धम् । इति पक्षोदाहरणं ज्ञेयम् ॥

शुक्लीकुर्वन् । संमुखीभवतः । न्यूनीस्यात् । अत्र "कृभू०" [१२६] इत्यादिना च्विः ॥

अरूकुर्वन् । उन्मनीकुर्वन् । उच्चक्षूभवतः । अचेतीभवतः । रहीभूते । रजीकुर्वन् । इत्यत्र "अरुर्मन०" [१२७] इत्यादिना च्वावन्तस्य लुक् ॥

सर्पीकृत्यादति भटान्संबन्धोप्यत्र युज्यते ।
धनूभवति वंशे हि गुणः श्लाघास्पदं भवेत् ॥ २८ ॥

---

१ सी °त्यादिति. २ बी °न्संबोधोप्य°. ३ ए °ते । धेनू°. ४ बी वंशो हि. ५ बी सी गुण श्ला°. ६ ए श्लाघ्यास्प°.

---

१ सी °त्यर्थादत. २ ए °ङ्गमयो°. ३ सी °थं श्लाघार्हे न यः. ४ सी °न्। मू°. ५ ए °न्ततत्र°. ६ बी °चेत°. ७ सी °सि भू°. ८ बी रभू°. ९ ए °च्छून्यां भू°. १० सी °श्चार्धः । अ°. ११ सी रजी°.

२८. स्पष्टः । किं तु सर्पीकृत्या[1]दति भटान् सर्पीषीवे सुखेन भटान्संहरमा[3]ण इत्यर्थः । संबन्धो विवाहेन स्वजनसंबन्धः । अत्रान्नविषये[4] । धनूभवति चापीभूत इत्यर्थः । गुणो ज्या । यथा[5] धनूभूतो वंशो गुणारोपयोग्यस्तथै[6]व विक्रान्त आन्नोपि संबन्धयोग्य इत्यर्थः ॥

आन्न एवेदृशो नान्यः कश्चिद्भवितुमर्हति ।
सर्पिर्भवति किं तैलं धनुर्भवति किं नडम् ॥ २९ ॥

२९. स्पष्टः । किं त्वीदृशो विक्रान्तत्वादिगुणोपेत आन्न एव भवितुमर्हति नान्यः कश्चित् । नडं तृणभेदः ॥

सर्पीकृत्य[7] । धनूभवति । इत्यत्र "इसुसोर्बहुलम्[8]" [१२८] इति च्व्यावन्तस्य बहुलं लुप् । न च स्यात् । सर्पिर्भवति । धनुर्भवति ॥

यथार्को दृषदीभूतं कुर्यादुदकसाद्धिमम् ।
आन्नभक्तिर्दृषद्भूतमस्मदीयं मनस्तथा ॥ ३० ॥

३०. यथा रविर्हिमं दृषदीभूतं शीतेन पाषाणतुल्यीभूतं सदुदकसात्कुर्यात्सर्वमप्युदकीकरोति तथान्नभक्तिरस्मदीयं मनो दृषद्भूतं कोपात्कठोरीभूतं सदुदकसात्कुर्यादार्द्रीकरोति प्रसन्नं करोतीत्यर्थः ॥

आन्नो भक्त्यानया मित्रसात्स्यात्संबन्धिसाद्भवेत् ।
सर्वोप्येवं सखिसात्स्यात्संपद्येत[1] च बन्धुसात् ॥ ३१ ॥

३१. स्पष्टः । किं तु मित्रसात्स्यान्मित्रीभवेत् । संबन्धिसाद्भवे[9]त्संबन्धीभवेत् । एवं भक्त्या कृत्वा ॥

---

१ ए °द्येति च.

---

१ सी °त्यादिति. २ सी °वतेत्यत्र जाते संपदा च इति स्सात्. (३३ श्लोको द्रष्टव्यः). ३ बी °माणेत्य°. ४ ए °ये । धेनू°. ५ ए °था धेनू°. ६ ए °थैवं विक्रीत आ°. ७ ए °त्य । धेनू°. ८ बी °सुमोबाहु°. ९ ए °वेत् । ए.

भक्त्यान्नस्य प्रसादो नः सुघटोनन्यसात्कृतः ।
वर्षासु कोम्बुसात्कुर्याल्लवणं हि स्वयं भवेत् ॥ ३२ ॥

३२. नोस्माकं प्रसाद आन्नस्य भक्त्या कर्त्र्या सुघटः[1] सुखेन घट्यते क्रियते[2] सुघटः । यत आन्नभक्त्यानन्यसात्कृतो[3] नान्यत्राधीनः कृत आन्न एवायत्तीकृतः[4] । युक्तं चैतत् । हि यस्माद्वर्षासु लवणं कोम्बुसात्कुर्यादुदकीकुर्यात्[5]किं तु स्वयमेव लवणमम्बुसाद्भवेत् ॥

संबन्धो गुरुसात्संपद्येताथो मातृसाद्भवेत् ।
आत्मसात्केवलो न स्यात्तद्युक्तं तौ न्ययुङ्क्त सः ॥ ३३ ॥

३३. तत्तस्माद्धेतोः स आन्नस्तौ मातृगुरू युक्तं न्ययुङ्क्त विवाहसंबन्धाय व्यापारयत् । यस्मात्संबन्धो विवाहसंबन्धो गुरुसात्संपद्येत[6] पुरोहितेधीनो भवेत्तथा मातृसाद्भवेन्मातर्यधीनः स्यात् । आत्मसादात्मन्यायत्तः केवलोयं न स्यात् ॥

दृषदीभूतम् । अत्र "व्यञ्जनस्यान्त ई(ईः)" [१२९] इति[7] च्वौ-ई (ईः)। न च स्यात् । दृषद्भूतम् ॥

उदकसात्कुर्यात् । संबन्धिसाद्भवेत् । मित्रसात्स्यात् । अत्र "व्याप्तौ स्सात्" [१३०] इति स्सात् ॥

वर्षासु लवणमम्बुसात्कुर्यात् । अम्बुसाद्भवेत् । सर्वोपि सखिसात्स्यात् । बन्धुसात्संपद्येत । इत्यत्र[8] "जातेः संपदा च" [१३१] इति स्सात् ॥

अनन्यसात्कृतः । मातृसाद्भवेत् । आत्मसात्स्यात् । गुरुसात्संपद्येत[9] । इत्यत्र "तत्राधीने" [१३२] इति स्सात् ॥

---

१ ए सुघंटः. २ ए °ते । य°. ३ बी आन्नः भ°. ४ बी °ययत्ती°. ५ बी °र्या उद°. ६ बी °पद्यते पुरोहिताधी°. ७ बी °ति च्वौः ई । न चः स्या°. ८ ए °त्र ज्ञाते । सं°. ९ ए सी °पद्यत.

सोऽस्मत्रा भाविनीं कन्यामस्मत्रा कुरुतां पुरे ।
अस[1]त्रा[2] सन्त्विभाः संपद्यन्तां तत्रैव वाजिनः ॥ ३४ ॥

३४. स्पष्टः । किं तु स आन्नः । अस्मत्रा भाविनीमस्मासु देयामधीनां भविष्यन्तीम् । पुरेणहि[1]ल्लपाटके । अस्मत्रा कुरुतामस्मदर्थं[2] प्रेषयत्वित्यर्थः । तत्रैव पुरे ॥

अस्मत्रा कुरुताम् । अस[3]त्रा भाविनीम् । अस्मत्रा सन्तु । अस[4]त्रा संपद्यन्ताम् । अत्र "देये त्रा च" [१३३] इति त्रा ॥

येषां बहुत्रा देवत्रा भ्राम्यन्त्यद्यापि कीर्तयः ।
तेषां पुरं नः पूर्वेषां गुरुर्माता च पश्यतु ॥ ३५ ॥

३५. येषामस्मत्पूर्वजानामद्यापि संप्रत्यपि कीर्तयो बहुत्रा भ्राम्यन्ति[5] देवत्रा[6] भ्राम्यन्ति[7] च । बहुषु देशेषु देवेषु[8] च विजृम्भन्ते । उत्तरार्धं स्पष्टम् ॥

देवत्रा भ्राम्यन्ति[9] । बहुत्रा भ्राम्यन्ति । इत्यत्र "सप्तमी०" [१३४] इत्यादिना त्रा ॥

[3]व्यसृजत्तं प्रतीष्यो[4]प्तकार्यबीजां स तद्गिरम् ।
क्ष्मां द्वितीयाकृतशम्ब्राकृतबीजाकृतामिव ॥ ३६ ॥

३६. स भैमिस्तं दूतं व्यसृजत् । किं कृत्वा । तद्गिरं दूतवाणीं प्रतीष्याङ्गीकृत्य । किंभूताम् । उप्तं न्यस्तं कार्यबीजं संधिविवाहरूपं

---

१ **सी** °सत्राः स°. २ **ए** °त्रा सींत्वभाः. ३ **ए** व्यसृज°. ४ **सी** °ष्योप्ते का°.

---

१ **बी सी** °हिल्लपा°. २ **ए** °दर्थी प्रे°. ३ **सी** °सत्राभा°. ४ **सी** °सत्रा सं°. ५ **बी** °म्यति दे°. ६ **सी** °वता भ्रा°. ७ **बी** °न्ति । ब°. ८ **बी** °षु वि°. ९ **सी** °न्ति । इ°.

कार्यसारो यस्यां ताम् । यथा कश्चित्क्ष्मां भूमिं प्रतीच्छति । किंभूताम् । द्वितीयं वारं कृता द्वितीयाकृता द्वितीयं वारं कृष्टेत्यर्थः । तथा शम्बं तिर्यक्कृता शम्बाकृतानुलोमं कृष्ट्वा पुनस्तिर्यक्कृष्टेत्यर्थः । अन्ये त्वाहुः । शम्बसाधना कृषिरिति[2] शम्बेन हलभेदेन कृष्टेत्यर्थः । तथा बीजैः[3] कृता बीजाकृतोप्ते पश्चाद्बीजैः सह कृष्टेत्यर्थः । वि[4]शेषणकर्मधारये तां त[5]थोप्तं कार्याय धान्य[6]निष्पत्तिप्रयोजनाय बीजं यस्यां ताम् ॥

दूतः शीघ्रं ययौ काले द्विगुणाकर्तुमुर्वराम् ।
कः शम्बाकृतकुलिवः समयाकुरुतेथ वा ॥ ३७ ॥

३७. दूतः शीघ्रं ययौ । अर्थान्तरमाह । अथ वा लोहकाञ्ची व[7]र्ध्रे-कुण्डलिका वा शम्बमस्य क्रियते शम्बाकृतं कुलिवं हलविशेषो ये[8]न स तथा क्षेत्रकर्षणाय स[9]ज्जितह[10]लः कः कर्षकः काले वर्षासु स[11]मया-कुरुते समयं कालक्षेपं करोति । किं कर्तुम् । उर्वरां सर्वसस्याढ्यां [12]भूमिं द्वि[13]गुणाकर्तुं द्वि[14]गुणं कर्षणं कर्तुं द्विगुणं कृष्टुमित्यर्थः ॥

द्वितीयाकृत । शम्बाकृत । बीजाकृताम् । अत्र "तीयशम्ब[15]०" [१३५] इत्यादिना डाच् ॥ एके तु शम्बाकृतकुलिव इत्युदाहरन्ति ॥

द्विगुणाकर्तुम् । अत्र "संख्या०" [१३६] इत्यादिना डाच् ॥

स[16]मयाकुरुते । अत्र "समया[17]द्०" [१३७] इत्यादिना डाच् ॥

१ बी °कृष्ट्वेत्य°. २ बी °ति वा श°. ३ ए कृतो°. ४ ए बी °शेषेण°. ५ सी °थोप्तां का°. ६ सी °न्यत्ति°. ७ ए वर्द्धकु°. सी वर्ध्रकु°. ८ सी °न था°. ९ ए सर्जितहलकर्ष°. १० ए °लः कर्ष°. ११ ए समाया°. १२ बी सी भूमिद्वि°. १३ ए °गुणां क°. १४ सी °गुणक°. १५ बी तीयेश°. १६ ए °मकु°. १७ ए °यादिना.

सपत्राकृत्य निष्पत्राकृत्यान्यानपि भूभुजः ।
निष्कुलाकृतकर्पासा[1]ल्पान्कुर्वन्न्यवृतन्नृपः ॥ ३८ ॥

३८. नृपो भैमिर्न्यवृतत्स्वदेशं प्रति[1] निवृत्तः । कीदृक्सन् । अन्या-[2]न्यान्नादितरानपि भूभुजः कुर्वन् । किंभूतान् । निकृष्टं कुल[3]म[4]वयवसंघातो[5]ऽस्मादिति[6] निष्कुलो निष्कुलः क्रियते स्म निष्कुलाकृतो निष्कुषित इत्यर्थः । स यः कर्पासस्तद्वदल्पान्निःसारान् । किं कृत्वा[7] । सपत्राकृत्य सपत्रान्सशरान्कृत्वा शरानेषां शरीरे प्रवे[8]श्येत्यर्थः । तथा कांश्चन निष्पत्राकृत्य निर्गतशरान्कृत्वा शरानेषामपरपार्श्वे[9] निष्क्रमय्येत्यर्थः[10] ॥

सपत्राकृत्य । निष्पत्राकृत्य । इत्यत्र "सपत्र०" [१३८] इत्यादिना डाच् ॥

निष्कुलाकृत[11] । इत्यत्र "निष्कुलाद्०" [१३९] इत्यादि[12]ना डाच् ॥

क्ष्माप्रियाकृ[2]त्सुखाकृत्स सत्याकुर्वञ्जगज्जयम् ।
दुःखाकुर्वन्नरीञ्शूलाकुर्वन्निव ययौ पुरे ॥ ३९ ॥

३९. स भैमिः पुरे पत्तनसमीपे ययौ । कीदृक्सन् । क्ष्माया[13]ः प्रियाकृतामानुकूल्यं कुर्वतां राजादीनां सुखाकृद्राज्यादिदानेनानुकूल्यं कुर्वंस्तथा जगज्जयं सत्याकुर्वञ्जगज्जयस्य सत्यं[14] सत्यंकारं कुर्वन्पराक्रमेण मयावश्यमेव जगज्जय[15]ः[16] क्रेतव्य इति शत्रून्प्रत्याययन्नित्यर्थः । अत एवारीञ्शूलाकुर्वन्निव शूले पचन्निव दुःखाकुर्वञ् शत्रूणां प्रातिकूल्यं कुर्वन्प्रतिकूलमाचरन्ननभिमतानुष्ठानेन तान्पीडयन्नित्यर्थः ॥

---

१ ए °सान्कु°. २ सी °कृत्स.

---

१ सी °ति वृ°. २ बी °नपि अन्ना°. ३ सी °लमेव°. ४ ए °मय°. ५ ए °तोस्यादि°. ६ सी °ति निःकुलः क्रि°. ७ सी °त्वा । शरामेषामपर°. ८ ए °वेशेत्य°. ९ ए °पार्श्वो निष्क्रामयेत्य°. १० बी °र्थः । प°. ११ ए सी °कृत्य । इ°. १२ बी °दि डा°. १३ बी °याः कृ°. १४ सी °त्यंका°. १५ ए °ज्जयके°. १६ सी °यः कर्तव्य.

स सत्यं कुर्वतो भद्राकृताल्ल(ल्लँ)क्ष्म्यपहारतः ।
क्लैब्यान्मद्राकृतश्मश्रूनप्यरीन्गुप्तितोमुचत् ॥ ४० ॥

४०. स भैमिरासतामन्येरीनपि गुप्तितः कारातोमुचत् । किंभूतान्सतः । लक्ष्म्यपहारतो राज्यलक्ष्म्या अपहारेण भद्राकृतान्मुण्डितानिव यथा मुण्डिता अपहृतकेशश्रीकाः स्युस्तथापहृतलक्ष्मीकानित्यर्थः । तथा क्लैब्यान्निःसत्त्वतया मद्राकृता तवाग्रे वयं क्लीबा नपुंसका न तु पुरुषा इति ज्ञापनाय मुण्डिता श्मश्रुयैस्तान् । तथा सत्यं कुर्वतोद्यप्रभृति वयं त्वद्दासा इति प्रत्यायनार्थं सप्रत्ययदेवतादिशपथं कुर्वाणान् ॥

प्रियाकृत् । सुखाकृत् । इत्यत्र "प्रिय०" [१४०] इत्यादिना डाच् ॥

दुःखाकुर्वन् । इत्यत्र "दुःखात्०" [१४१] इत्यादिना डाच् ॥

शूलाकुर्वन् । इत्यत्र "शूलात्पाके" [१४२] इति डाच् ॥

सत्याकुर्वन् । इत्यत्र "सत्याद्०" [१४३] इत्यादिना डाच् ॥ अशपथ इति किम् । सत्यं कुर्वतः ॥

मद्राकृत । भद्राकृतान् । अत्र "मद्र०" [१४४] इत्यादिना डाच् ॥

सोथ झात्कारिकाञ्चीनां स्त्रीणां झलझलाकृताम् ।
नेत्रैर्झलझलायद्भिः पीयमानः पुरेविशत् ॥ ४१ ॥

४१. अथ स भैमिः पुरेविशत् । कीदृक्सन् । स्त्रीणां नेत्रैः पीयमानः सतर्षं दृश्यमान इत्यर्थः । कीदृशीनाम् । झात्कारिण्यो दि-

१ ए °न्मद्राः कृ°. २ सी °तसश्रू°.

१ ए भैमीरा°. २ बी °न्सतोऽल°. ३ सी °हारे°. ४ बी क्ष्म्याप°. ५ सी °तानि त°. ६ सी °तानि सश्रूणि यैस्ता°. ७ बी °यं त्वं दासा. ८ बी °खाहृत्. ९ ए °नाच्. १० बी °त्र शूलात्पाके इति डाच् । अ°. ११ बी °रिण्या दि°.

द्दक्षया सत्वरमागमनाज्झाच्छब्दकरणशीला: [1] काञ्च्यो यासां तासाम् । तथा झलझलाकृतः प्रसरज्जलानां शब्देन झलदिति शब्दं [2] कुर्वाणा नद्यादयस्ततः कान्तिजलानामितस्ततोतिप्रसरणाज्झलझलाकृत [3] [4] इव झलझलाकृतस्तासां शरीराभरणादिकान्तिजलैः संभृतानामित्यर्थः [5] । किंभूतैर्नेत्रैः । झलझलायद्भिः । झलच्छब्दोत्र [6] तद्वति वर्तते । ततो [7] झलच्छब्दवन्तो [8] [9] भवन्ति झलझलायन्तो दीर्घिकादयस्तत्तुल्यैः प्रसरत्स्वच्छस्निग्धज्योतिर्जलपूरेण [10] संपूर्णैरित्यर्थः [11] ॥

तूर्ये झणिति कुर्वाणे द्राग्झणज्झणदित्यपि ।
पटत्पटेति पटहेलंचकार स्वधाम सः ॥ ४२ ॥

४२. स्पष्टः ॥

झलझलाकृताम् । झलझलायद्भिः । अत्र "अव्यक्त०" [१४५] इत्यादिना डाच् ॥ अनेकस्वरादिति किम् । झात्कारि ॥ अनिताविति किम् । झणिति कुर्वाणे ॥ अत्र "इतावतो लुक्" [१४६] इत्यतो लुक् ॥

झणज्झणदिति । इत्यत्र "न द्वित्वे" [१४७] इति नातो लुक् ॥

पटत्पटेति [12] । इत्यत्र "तो वा" [१४८] इति तस्य वा लुक् ॥

द्वास्थैः पटपटाकृत्य भूरिशः सारितान्नृपान् ।
संभाषमाणो [1] बहुशो नाल्पशो व्यसृजत्ततः ॥ ४३ ॥

४३. ततो भैमिर्बहुशो बहून्नृपान्नाल्पशोल्पान्व्यसृजत् [13] किं तर्हि सर्वा-

---

१ ए °षणो.

---

१ ए °शीला का°. २ ए शब्दकु°. ३ सी °सरेण ज्झ°. ४ ए °लज्झला°. ५ बी °तामि°. ६ बी सी °लशब्दो°. ७ बी सी °तोऽझ°. ८ ए बी °च्छब्दं व°. ९ बी °न्तो झलच्छब्दावन्तो भ°. १० ए °च्छस्निधज्यो°. ११ ए सी °पूर्णैरि°. १२ ए °टपटे°. १३ बी °ल्पसोल्पा°.

नपि यथास्थानं मुत्कलितवानित्यर्थः। कीदृक्सन्। संभाषमाण आलपन्। किंभूतान्सतः। भूरिशः प्रभूतैर्द्वास्थैर्वेत्रिभिः पटपटाकृत्य भित्त्यादिषु प्रतिशब्दैः पटच्छब्दं कृत्वा स्मारितान्[1] ॥

अस्तोकशो रिपूञ्झिष्णुं[1] तं पौरा एकशोभ्ययुः।
अश्वमश्वं ढौकयतस्तान्सोप्येकैकमालपत्[2] ॥ ४४ ॥

४४. तं भैमिं पौरा एकशे[2] एकैकोभ्ययुरभिजग्मुः[3]। यतः स्तोकान्स्तोकशो न तथास्तोकशो बहून्रिपूञ्झिष्णुम्। सोपि भैमिरप्यश्वमश्वं ढौकयतः[4] प्राभृतीकुर्वतः सतस्तान्पौरानेकैकमेकमेकमालपत्[5] ॥

नादण्डयद्द्विपदिकां न स द्विशतिकां च यान्।
द्वे ते ददानास्ते ग्राम्या अश्वशश्च तमभ्ययुः ॥ ४५ ॥

४५. स भैमिर्यान्ग्राम्यान्द्विपदिकां[6] द्वौ पादौ रूपकादेर्द्वौ[7] भागावपि नादण्डयत्। द्विशतिकां[8] च रूपकादेर्द्वे शते च नादण्डयत्ते ग्राम्यास्तं भैमिमभ्ययुः। किंभूताः सन्तः। ते द्वे द्विपदिका[9]द्विशतिके[10] अश्वशश्चाश्वमश्वं च ददानाः ॥

ये लभन्ते द्विपदिकां वृत्तौ द्विशतिकां च ये।
तानप्युत्कान्स्थितान्पश्चात्सोपश्यत्[3]स्निग्धया दृशा[4] ॥ ४६ ॥

४६. ये भटा वृत्तौ जीविकायां द्विपदिकां रूपकादेर्द्वौ द्वौ पादौ भागौ भोजन[11]मात्रमित्यर्थः। लभन्ते ये च द्विशतिकां रूपकादेर्द्वे[12] द्वे

---

१ ए °पूजिष्णुं. २ बी °यन्तस्तान्सोप्यैक°. ३ ए °श्यस्निग्ध°. ४ ए दृशाः ॥ ये.

---

१ बी °रितवान्. २ बी °श एकैकश ए°. ३ सी °कैकेभ्य°. ४ बी °यत प्रा°. ५ बी सी °कमा°. ६ ए °न्द्विपादि°. ७ सी °देर्द्वेश°. ८ ए °तिका च. ९ ए °पदाका°. १० बी °शतके. ११ सी °नमि°. १२ ए °कार्द्वे.

शते च लभन्ते तानप्यासतां महान्तोल्पकानपि भटान्स्निग्धया सानु[1]रागया दृशा स भैमिरपश्यत्। यत उत्कान्नृपदर्शन[2] उत्कण्ठितान्। तथाल्पकत्वेन पश्चात्स्थितान्दूरस्थानित्यर्थः ॥

[3]पटपटाकृत्य। इत्यत्र[4] "डाच्यादौ" [१४९] इति पूर्वपदे यस्[5]तस्य लुक् ॥

बह्वर्थादिष्टे। बहुशो नृपान्। भूरिशो द्वास्थैः॥ अल्पार्थादनिष्टे। अल्पशो नृपान्। अस्तोकशो रिपून्। इत्यत्र "बह्वल्प०"[6] [१५०] इत्यादिना[7] शस् ॥

एकशः। एकार्थैः[8]। अश्वशः। अत्र "संख्या०" [१५१] इत्यादिना शस् ॥ वाधिकारात्पक्षे द्विर्वचनमपि। एकैकम्। अश्वमश्वम् ॥

द्विपदिकाद्विशतिके ददानाः। द्विपदिकाम् द्विशतिकामदण्डयत्॥ वीप्सायाम्। द्विपदिकां द्विशतिकां लभन्ते। अत्र "संख्यादेः०" [१५२] इत्यादिना-अकल्। प्रकृतेरन्तस्य लुक्च[9] ॥

द्वैतीयीकः शशी कान्त्या द्वितीयस्तेजसा रविः।
तां तृतीयाग्र्यविद्यां स धारयंस्तर्कितो जनैः॥ ४७॥

४७. स्पष्टः। किं तु कान्त्या शशी तेजसा रविश्च। कुतोयमतर्कीत्याह। यतस्तां राज्ञां[10][11] भीमकान्तगुणादीनां प्रतिपादकत्वेन प्रसिद्धां तृतीया[12]ग्र्यविद्यामान्वीक्षिकी त्रयी वार्ता दण्डनीतिरिति चतस्रो विद्यास्तत्र तृतीयस्या वार्ताविद्याया अग्र्या चतुर्थी या विद्या दण्डनीति[13]स्तां धारयन्। राजनी[14]तिशास्त्रोक्तं राज्ञा प्रजासु कान्तेन भाव्यं शत्रुषु च तेजस्विनेत्याद्यर्थं प्रजासु कान्तीभवनेन शत्रुषु भीमीभव[15]नेन च बिभ्रत्[16] ॥

---

१ **ए** °रागाया. २ **सी** °र्शनस्य लुप। बह्व°. ३ **बी** पटेप°. ४ **बी** °त्र द्राद्यादौ. ५ **बी** °स्तस्य. ६ **ए** °ह्वल इ°. ७ **बी** °ना म्शस्. **सी** °ना शस्. ८ **सी** °कार्थाः। अ°. ९ **बी** °क्च । द्वितीयी°. १० **बी** राज्ञा भी°. ११ **सी** °ज्ञां सीम°. १२ **बी** °याग्रवि°. १३ **ए** °नीस्तां. १४ **ए** °नी शा°. १५ **ए** °न बि°. १६ **ए** °त्। द्वितीयी°. **बी** °त्। द्वितीयकः.

द्वैतीयीकः । द्वितीयः । अत्र "तीयात्०" [१५३] इत्यादिना टीकण् स्वार्थे ॥ न विद्या चेदिति किम् । तृतीयाऽयविद्याम् ॥

स यावद्व्यसः स्थाम्ना तावन्मात्रो न कोप्यभूत् ।
तिलपेजेतरसमस्तिलपिञ्जो भवेन्न हि ॥ ४८ ॥

४८. स भैमिः स्थाम्ना कृत्वा यावद्व्यसो यावानभूत्तावन्मात्रः कोपि नाभूत् । हि यस्मात्तिलपिञ्जो निष्फलस्तिलस्तिलपेजेतरसमस्तिलपेजान्निष्फलतिलादितरस्य फलतिलस्य समो न भवेत् ॥

तिलपिञ्जः । तिलपेज । इत्यत्र "निष्फले०" [१५४] इत्यादिना पिञ्जपेजौ ॥

यावद्व्यसः । तावन्मात्रः । अत्र "प्रायोतोर्०" [१५५] इत्यादिना द्वयसट्मात्रटौ ॥

रकारो नु षकारो नु मूर्धन्यो वाग्मि(ग्मि?)नां गुरुः ।
नमस्कारार्ह आन्नस्यानहंकारोन्यदागमत् ॥ ४९ ॥

४९. अन्यदान्नस्य गुरुरागमत् । कीदृग् । यथा रकारषकारौ मूर्धन्यौ मूर्धनि स्थाने भवौ तथा वाग्मि(ग्मि?)नां मूर्धन्यो विद्वच्चूडामणिः परमनहंकारो ज्ञानाद्यहंकाररहितोत एव नमस्कारार्हः ॥

कन्यादाद्रेफभुग्नभ्रूर्जल्हणा नामधेयतः ।
सुरूपधेया सद्भागधेया पितामहीसमम् ॥ ५० ॥

५०. नामधेयतो नाम्ना जल्ह(ह्ल)णा कन्या पितामह्या समं सह "ऊनार्थपूर्वाद्यैः" [३. १. ६७] इति समासे पितामहीसममागात् । कीदृशी ।

---

१ बी सी °वद्वय°. २ ए सी °जेल्हणा. ३ ए °तः । सरू°. बी °तः । स्वरू°.

---

१ सी °तीया°. २ बी °वद्वय°. ३ बी °वान्नभू°. ४ बी °लमिल°. ५ बी °स्तिलेपे°. ६ ए पेजोनिष्फ°. ७ सी °स्य सफ°. ८ ए ञपिंजौ. ९ बी °वद्वय°. १० सी °सः । तावद्वयसः । ता°. ११ बी प्रायातो°. १२ बी °समा°.

रेफवद्भुग्ने कुटिले भ्रुवौ यस्याः सा तथा सुरूपधेया शोभनरूपा तथा सद्भागधेया कुमारपालसदृशवरभविष्य[1]त्तया शोभनभाग्या ॥

[2]षकारः । नमस्कार । इत्यत्र “वर्ण०” [१५६] इत्यादिना कारः ॥ प्रायोनुवृत्तेरन्यत्रापि भवति[3] । अनहंकारः ॥

रेफ । [4]इत्यत्र “रादेफः*” [१५७] इत्येफः ॥ प्रायोवचनाद्रकार इत्यपि ॥

नामधेयतः । सुरूपधेया । सद्भागधेया । अत्र “नाम०” [१५८] इत्यादिना धेयः ॥

नूत्नातिथीनामेतेषां सूर्यो[1] मर्त्येषु नूतनः ।
[2]नवीनमार्पयद्भूप आवासं नव्यमन्दुरम् ॥ ५१ ॥

५१. भूपो भैमिरेतेषां पितामहीकन्यागुरूणां नूत्नातिथीनां[5] नव्यप्राघूर्णकानां नव्यमन्दुरं [6]नवाश्वशालं नवीनं नवमावासं[7]मार्पयत् । कीदृक् । मर्त्येषु नूतनः सूर्यः प्रकाशकत्वाद्द्वितीयोर्कः ॥

मर्त्येषु[8] सूर्यः । अत्र “मर्तादिभ्यो यः” [१५९] इति यः ॥

नवीनम् । नूतनः । नूत्न[9] । नव्य[10] । इत्यत्र “नवाद्[11]०” [१६०] इत्यादिना-ईन-तन-त्न-या नवस्य नू-आदेशश्च ॥

पप्रच्छोद्वाहहोत्रीयं[3] प्रीणेभ्योपि प्रणं विधीन् ।
नृपोप्रत्नोपि [4]माहात्म्याद्देवता प्रतनेव सः ॥ ५२ ॥

---

१ ए °र्यो मूर्त्ये°. २ सी नदान°. ३ बी °यं प्राणे°. ४ ए माहत्म्यादेव°.

---

१ सी °ष्यतया. २ ए °कार । न°. ३ सी °ति । रे°. ४ ए इत्ररादेः फ इति फः प्रा°. ५ सी °नां प्रा°. ६ सी नव्याश्व°. ७ ए °समर्प°. ८ बी °षु अ म°. ९ बी नूलं । न°. १० ए बी नव । इ°. ११ ए °वादिना.

---

*रादिफ इति कात्यायनवार्तिकमेव युक्तम् । अन्यथा वृद्ध्यापत्तिर्दुर्वारा स्यात् । उच्चारणार्थाकारानङ्गीकारे तु रकार इत्यादौ तदङ्गीकारेणार्धजरतीयत्वमापतेत् । इति भाति ।

५२. स नृपो भैमिः[1] प्रीणेभ्योपि पुराणेभ्योपि प्रणं पुराणमतिवृद्धं विवाहहोत्रीयं विवाहस्य ऋत्विजं विवाहेग्निकारिकाकारकमान्नपुरोहितं[2] विधीन्विवाहकार्याणि पप्रच्छ। कीदृशः। अप्रत्नोप्यपुराणोपि युवापि माहात्म्यात्प्रतना देवतेव[3] पुराणदेव इव। चिरकालीनदेवता ह्यतिसप्रभावा स्यात् ॥

प्रणम्। प्रीणेभ्यः[4]। प्रतना। अप्रत्नः। अत्र "प्रात्०" [१६१] इत्यादिना स्वार्थे न-ईन-तन-त्नाः ॥

देवता। इत्यत्र "देवात्तल्"[5] [१६२] इति तल् ॥

होत्रीयम्। अत्र "होत्राया ईयः" [१६३] इतीयः ॥

आवसथ्यं श्रियः प्राज्ञो भैषज्यं विश्वभीरुजाम्[1]।
सोसज्जदैवतश्रौत्रः कार्ष्णलक्ष्मकुलाग्रणीः[2] ॥ ५३ ॥

५३. स भैमिर्विवाहोचितनेपथ्यविशेषेणातिशयितरूपादिलक्ष्मीकत्वाद्दैवतस्येव[6] देवस्येव[7] श्रौत्रमङ्गं यस्य स तथा सन्नसज्जद्विवाहार्थं प्रगुणोभूत्[8]। कीदृक्। प्राज्ञस्तथा विश्वभीरुजां जगद्भयरोगाणां भैषज्यमौषधं जगतः शरणमित्यर्थः[9]। अत एव श्रियः संपत्तीनामावसथ्यमावासोत[10] एवं[11] च कृष्ण एव कार्ष्णो मृगो लक्ष्म[12] चिह्नं यस्य स कार्ष्णलक्ष्मा[13][14] चन्द्रस्तस्य यत्कुलं तत्राग्रणीः[15] ॥

---

१ बी °रुजम्. २ ए कार्ण्णल°. बी कार्ष्णं ल°.

---

१ बी °मिः प्राणे° २ सी °कारिक°. ३ सी °व इ°. ४ ए °णेभ्य। प्र°. ५ सी देवतात्त°. ६ ए °वस्ये°. ७ बी सी °व श्रोत्र°. ८ सी °य गु°. ९ ए °यः सर्वपत्नीना°. १० बी °मावासपथ्य°. ११ ए °व कृ°. १२ बी लक्ष्म्य चि°. १३ बी कार्ण्णलक्ष्म्या च°. १४ सी °लक्ष्म्यां च°. १५ बी सी °ग्रणी। शं°.

शंसन्कार्मणमान्नीयसवैनयिकवाचिकैः ।
तं सांप्रदानिकायाह्वद्गुरुः संजीवनौषधम् ॥ ५४ ॥

५४. गुरुराज्ञपुरोहितः संजीवनौषधं संजीव्यतेनेन संजीवनं यदौषधं तत्तुल्यं चौराद्यन्यायिगदेभ्यः सकलजगतो रक्षकमित्यर्थः । तं भैमिमाह्वदाकारयत् । किमर्थम् । सांप्रदानिकाय कन्यासंप्रदानार्थम् । कीदृक्सन् । आन्नीयान्यान्नसंबन्धीनि सवैनयिकानि सविनयानि यानि वाचिकानि कन्याविवाहादिविषयाः संदिष्टा वाचस्तैः कृत्वा कार्मणं विवाहादिक्रियालक्षणं संदिष्टं कर्म शंसन् । सविनयमान्नेन संदिष्टमेतद्यदधुना कन्याया विवाहः प्रसह्य कार्य इति वदन्नित्यर्थः ॥

भैषज्यम् । आवसथ्यम् । अत्र "भेषजादिभ्यष्ट्यण्" [१६४] इति ट्यण् ॥

प्राज्ञः । दैवत । इत्यत्र "प्रज्ञादिभ्योण्" [१६५] इत्यण् ॥

श्रौत्रः । औषधम् । कार्ष्ण । इत्यत्र "श्रोत्र०" [१६६] इत्यादिनाण् ॥

कार्मणम् । अत्र "कर्मणः संदिष्टे" [१६७] इत्यण् ॥

वाचिकैः । अत्र "वाच इकण्" [१६८] इतीकण् ॥

वैनयिक । सांप्रदानिकाय । इत्यत्र "विनयादिभ्यः" [१६९] इतीकण् ॥

कान्त्यौपयिकमृद्रूपाभूः पुरोमृत्स्न आश्वगात् ।
समृत्समृत्तिकापात्रोद्यद्यवं तद्गृहं नृपः ॥ ५५ ॥

५५. नृपो भैमिः पुरोग्रतो मृत्स्ना प्रशस्ता मृच्छुभशकुनभूता

१ ए शंकन्कर्म°. २ सी °ह्वुरुरान्न°. ३ बी °रुः सञ्जीव°. ४ बी °पाभूपु°. ५ बी मृत्स्नमृ°.

१ सी °दाका°. २ बी आतीयान्नान्न°. ३ ए न्धीन् स°. ४ सी °हावि°. ५ ए °र्मे संशन्. ६ ए °सह्य का°. ७ ए °ण् । श्रोत्र । औ°. ८ ए कार्ष्ण्य । इ°. ९ सी वाचि इ°. १० ए °दायिका°. ११ सी मृत्सातिप्र°.

यस्य[1] स पुरोमृत्स्नः संस्तद्गृहं गुरुगृहमाश्रगात्। कीदृशम्[2]। माङ्गल्याय समृत्[3]स्नानि प्रशस्तमृत्तिकान्वितानि यानि मृत्तिकापात्राणि[4] शरावास्तत्रोद्यन्त उद्गच्छन्तो यवा यत्र तत्। कीदृग्नृपः। कान्ते रूपादिश्रिय[5] औपयिकमुपायः कारणं या मृद्रूपा प्रशस्ता मृत्तस्या भवति स्मोत्पद्यते स्म यः सः। कान्तिहेत्वत्युत्कृष्टपरमाणुभिर्निष्पन्न इत्यर्थः॥

[6]औपयिक। इत्यत्र "उपायाद्ध्रस्वश्च" [१७०] इतीकण् ह्रस्वश्च॥

मृत्तिका। इत्यत्र "मृदस्तिकः" [१७१] इति [ति]कः॥

समृत्स्न। पुरोमृ[7]त्स्नः। अत्र "सस्नौ प्रशस्ते" [१७२] इति सस्नौ॥ केचित्तु रू[8]पपमपीच्छन्ति। मृद्रूपा॥

षड्विंशः पादः॥

तिलकं मङ्गलमये राज्ञो दधिमयं व्यधुः।

अग(गा?)णिक्याः स्त्रियो द्वारि महेत्रागणिकामये॥५६॥

५६. न गणिकाः प्रकृता आ[9]स्व[10]गाणिक्याः स्त्रियः कुलाङ्गना दधि प्रकृतं दधिमयं द[11]धिस्वरूपं तिलकं व्यधुः। कस्य। मङ्गलमये प्रकृतमौक्तिकस्वस्तिकादिमङ्गलक[12]र्मणि द्वारि गृह[13]द्वारदेशे वर्तमानस्य[14] राज्ञो भैमेः। क। अत्र[15] महे विवाहोत्सवे। किंभूते। गणिकाः प्रकृता गीतगानमाङ्गलिक्यकरणादौ प्राचुर्येण प्राधान्येन वा कृता अत्र गणिकामयो न तथा तस्मिन्कुलाङ्गनाप्र[16]स्तुतोद्वाहविधावित्यर्थः॥

---

१ ए °स्य पु°. २ सी °म्। मङ्ग°. ३ बी सी °मृत्स्नानि. ४ बी °णि शाखास्त°. ५ बी औपायि°. ६ बी औपायि°. ७ बी सी °मृत्स्न। अ°. ८ बी सी °पम°. ९ बी आश्वगा°. १० ए सी °स्वगणि°. ११ बी °धिरू°. १२ बी °कर्माणि. १३ सी °हदे°. १४ सी °स्य भै°. १५ ए °त्र हे°. १६ सी प्रशस्तोद्वा°.

त्यक्त्वापूपमयं मौदकिकं च धवलान्दधुः[1] ।
तत्रागायनपाशाश्च स्त्रीतमा विलसत्तमाः ॥ ५७ ॥

५७. स्पष्टः । किं त्वपूपमयं[1] मौदकिकं च त्यक्त्वापूपान्मोदकांश्च[2] प्रकृतान्मुक्त्वा ॥

सूक्ष्मवस्त्रतमः श्रेष्ठतमश्रुलुकजन्मनाम् ।
ययौ गौरतमः सोन्तर्भित्त्वा लवणसंपुटम् ॥ ५८ ॥

५८. स्पष्टः । किं त्वतिशयेन[3] सूक्ष्माणि वस्त्राण्यस्य सूक्ष्मवस्त्रतमः । लवणसंपुटं लवणाग्निगर्भं शरावसंपुटम् ॥

दधिमयम् । अत्र "प्रकृते[4] मयट्" [१] इति मयट् ॥

मङ्गलमये द्वारि । इत्यत्र "अस्मिन्" [२] इति मयट्[5] ॥

मौदकिकम् । अपूपमयम् । अगाणिक्याः । अगणिकामये । अत्र "तयोः०" [३] इत्यादिना[6] समूहवत्प्रत्ययाः स्युरिति "कवचि०" [६. २. १४] इत्यादिनेकण् । "गणिकाया ण्यः" [६. २. १७] इति ण्यः । चकारान्मयट् च ॥

अगायनपाशाः । अत्र "निन्द्ये पाशप्" [४] इति पाशप् ॥

गौरतमः । विलसत्तमाः । अत्र "प्रकृष्टे तमप्" [५] इति तमप् ॥ जातिद्रव्यवचनेभ्योपि गुणक्रियाप्रकर्ष[7]विवक्षया स्यात् । स्त्रियोमूर्या अपूपपाकादिस्त्रीकार्यं[8] सुश्लिष्टाः कुर्वन्ति । स्त्रीतमा एता याः सुलक्षणा अपूपपाकादि[9] गीतगानादि च स्त्रीकार्यं कुर्वन्ति । द्रव्यान्तरसमवायिना च प्रकृष्टेन[10] गुणेन प्रकृष्टे द्रव्ये तद्वतः प्रत्ययः स्यात् । सूक्ष्मवस्त्रतमः । प्रकर्षप्रत्ययान्ताच्च प्रकर्षस्यापि[11] प्रकर्षविवक्षायां प्रत्ययः स्यात् । श्रेष्ठतमश्रुलुकजन्मनाम् ॥

---

१ बी °न्दद्‌ुः । त°.

---

१ ए बी °यं मोद°. २ बी °पूपोमोद°. ३ बी °न शूक्ष्मा°. ४ बी °ते-मैय°. ५ बी °ट् । सोद°. ६ ए °नामस°. ७ सी °र्षक्रियावि°. ८ ए °पूपा°. बी °पूपंका°. ९ बी °पूपा°. १० ए °ष्टे द्र°. ११ सी °र्षवि°.

अयं शुभतरः किं वासौ शोभनंतरा[1] न्विति ।

दृष्टो वधूसखीवर्गैर्मातृवेश्माविशन्नृपः[2] ॥ ५९ ॥

५९. वधूवरयोर्मध्ये किमयं वरः सौन्दर्यश्रिया शुभतरः[1] प्रधानतरः किं वासौ वधूः[2] शोभनतरातिशोभमाने[3]ति हेतोर्वध्वाः सखीलो[4]कैर्दृष्टः सन्नृपो मातृवेश्म सप्तानां मातॄणां देवतानां गृहमविशत् ॥

तत्र पूज्यतरैः सांकाश्यकेभ्यो नागरेयकैः ।

आगात्पुरोहितो[3]ग्रेपि प्रीतः प्रीततरस्तदा[4] ॥ ६० ॥

६०. अग्रेपि[5] भैम्यागमकाला[6]त्प्रागपि विवाहोत्सवेन प्रीतस्तदा भैम्यागमकाले[7] तु प्रीततरः सन्पुरोहितोपि[8] तत्र मातृगृह आगात् । कैः सह । नागरेयकैर्नगरे स्थानविशेषे भवैर्द्विजैः । किंभूतैः । सांकाश्यकेभ्यः[9] सांकाश्ये पुरे भवेभ्यो द्विजेभ्यः सकाशात्पूज्यतरैः[10] । नागरा हि द्विजाः सर्वद्विजेभ्योत्युत्कृष्टत्वेन प्रसिद्धाः ॥

किं पाणी पाणिपादस्यांह्री[5] वा मृदुतराविति ।

ज्ञातुं नूच्चैस्तरां सख्यो(ख्या)त्रोत्क्षिप्यानायि[6] कन्यका[7] ॥ ६१ ॥

६१. स्पष्टः । किं त्विती‍दमुच्चैस्तरामत्यन्तं ज्ञातुं नु वेत्तुमिवोत्क्षि[11]प्योत्पाद्य सख्या कन्यकात्र मातृगृह आनायि ॥

अतिशेतेतरां[8] न्वेषोतिशेते किंतरामियम् ।

पुरोधा इति विमृशंस्तयोः पाणी अयोजयत् ॥ ६२ ॥

१ ए °नहरा. २ ए °विशान्नृ°. ३ ए °त्पुरहि°. ४ बी प्रीतं प्री°. ५ सी पादस्यंह्री. ६ ए °त्रोक्षिप्यानावि क°. ७ बी °न्यकाः । स्प°. ८ बी °शेषेतरा न्वे°.

१ सी °रः किं. २ ए वधू शो°. ३ बी °भने°. ४ ए °खीलोकै°. ५ बी °पि भीम्यागमनका°. ६ सी °ला तु. ७ बी °मनका°. ८ ए °तो त°. ९ ए °काशकेभ्यः संका°. १० सी °त्पूज्यैः पूज्य°. ११ बी °त्क्षिप्येत्पा°.

६२. स्पष्टः । किं त्वियं कन्यका वा किंतरामतिशेते । इदमनयोर्वधूवरा[1]तिशयनयोर्मध्ये रूपश्रीप्रकर्षेणोत्कृष्टं[2] स्वस्यातिशयनं यथा स्यादेवं किमुत्कृष्टा भवति । किं वेयं[3]मत्यर्थमतिशेत इत्यर्थः ॥

स गायन्तितमां तत्र मन्त्रानग्रेतरां द्विजाः ।

प्रगेतमामिवाब्जेषूच्चै[1]स्तमां हर्षिणोलयः ॥ ६३ ॥

६३. स्पष्टः । किं तु स गायन्तितमां द्विजाः व[4]र्न[5]र्षिवटुद्वि(द्वि?)-जानां मध्ये द्विजा अतिशयेन गायन्ति स्म । तत्र महे । अग्रेतरां द्वयो[6]रग्रकालयोर्मध्ये प्रकृष्टे[7]ग्रकालेतिप्रथममित्यर्थः । प्रगेतमा[8]मति-प्रभात इत्यर्थः ॥

वध्वा उत्तमसख्यो[8]थैवं नर्मधवलाञ्जगुः ।

पटिष्ठो वञ्चय[2]तेसौ किंतमां नः पटीयसीः ॥ ६४ ॥

६४. अथ पाणियोजनानन्तरं वध्वा[9] अतिशयेनोत्कृष्टा उत्तमा याः स[10]ख्यस्ता एवं वक्ष्यमाणरीत्या नर्मधवलान्हासप्रधानानि गीतानि जगुः । तथा हि । असौ भैमिः पटीयसीरपि द्वयोः पट्वी[11]र्योर्मध्येतिशयेन पट्वीरपि नोस्मान्किंतमां वञ्चयते बहूनां व[12]ञ्चनानामिदं वञ्चनमतिशयितं यथा स्यादेवं कथं नाम वञ्चयते । एवं सख्याः पाणिग्रहणेनायमस्मान्पश्यन्तीरेव वञ्चयत इत्यर्थः । अत ए[13]व कीदृक् । पटिष्ठो बहूनां पटूनां मध्येतिपटुः ॥

शुभतरः । शोभनत[14]रा ॥ विभज्ये । सांकाश्यकेभ्यो नागरेयकैः पूज्यतरैः ।

---

१ ए °षूस्तैच्चमां. २ बी °यति सो किं°.

---

१ बी °शयेन°. २ सी °ष्टं तस्या°. ३ बी °यमित्यर्थमिति°. ४ बी वमर्षि°. ५ °नर्षेव°. ६ सी °रमग्र°. ७ ए °ष्टेतिका°. ८ बी °मामिति°. ९ बी ध्वानति°. १० ए सस्ता. ११ बी °रास्योर्मे°. १२ ए °ञ्चचना°. १३ ए ए की°. १४ ए °तराः । विभजो । संका°.

अत्र "द्वयोर्०" [६] इत्यादिना तरप् ॥ पाणिपादस्य पाणी अंही वा मृदुतरौ। इत्यत्र यद्यपि विग्रहे बहुत्वसंख्या प्रतीयते तथापि समाहारेवयवौ स्वार्थमात्रं पाणित्वादिलक्षणमभेदैकत्वसंख्यायोग्युपादाते न संख्याभेदमिति द्वयोरेव प्रकर्षः। तथाग्रेपि प्रीतः प्रीततरस्तदेत्यत्रैकस्यापि पर्यायार्थार्पणया द्वित्वमिति द्वयोरेव प्रकर्षः ॥

उच्चैस्तराम्। अत्र "क्वचित्स्वार्थे" [७] इति तरप् ॥

किंतराम्। किंतमाम् ॥ त्यादि । अतिशेतेतराम् । गायन्तितमाम् ॥ ए। अग्रेतराम्। प्रगेतमाम् ॥ अव्यय । उच्चैस्तराम् । उच्चैस्तमाम्। अत्र "किंत्यादि०" [८] इत्यादिना तरप्तमपोरन्तस्याम् ॥ असत्त्व इति किम्। उत्तमसख्यः ॥

पटिष्ठः । पटीयसीः । अत्र "गुण०" [९] इत्यादिना तमप्तरपोरर्थ इष्ठेयस् ॥

असौ हरतिरूपं नश्चौररूपः सखीमिमाम्।
पद्मकल्पे करे गृह्णन्वज्रदेश्येन पाणिना ॥ ६५ ॥

६५. असौ वरो वज्रदेश्येन वज्रवत्कठोरेण पाणिना पद्मकल्पे पद्मवत्कोमले करे नोस्माकमिमां सखीं गृह्णन्हरतिरूपं सर्वलोकसंमत्या हरणात्प्रशस्तं चोरयति। अत एवासौ चौररूपः प्रशस्यश्चौरः ॥

वरोसौ सीरिदेशीयो धत्तेदेश्यं च पाणिना।
इयं च कम्पतेकल्पं भ्रूमोदेशीयमत्र किम् ॥ ६६ ॥

---

१ ए बी हरंति°. २ ए वसौ. ३ बी सीरेदे°. ४ बी °देश्यां च.

---

१ ए °पादिदा°. २ ए °दमति. ३ बी °र्थापण°. ४ सी °तमा° ५ सी °दिना. ६ सी °ज्रव°. ७ ए °देशेन. ८ सी °ज्ञव°. ९ बी °मलक°. १० सी °स्यचौरः.

६६. असौ वरः सीरिदेशीयो[1] हलधरतुल्यः सन्पाणिना धत्तेदेश्यं च हलधरकर्तृक[2]कठोरपाणिधरणादीषदपरिसमाप्तमस्मत्सखीं हस्तेन धारयति हलधरवत्कठोरपाणिना गृह्णातीत्यर्थः । इयं चातिमृद्वङ्ग्यस्मत्सखी च कम्पतेकल्पं कठोरकर[3]ग्रहणोत्थकष्टे[4]नेषदपरिसमाप्तं कम्पते । अत्रास्मिन्विषये वयं किं ब्रूमोदेशीयं किं वदामः । सर्वलोकसंमत्यास्मत्सखीमेवं पाणौ गृह्णतोस्य पुरो वयं न किमपि वक्तुं शक्ता इत्यर्थः । अथ वासौ वरः[5] सीरिदेशीयो रूपाद्यतिशयेन बलभद्रतुल्यः सन्पाणिनेमां धत्तेदेश्यमनुरागेणास्याः कष्टभयादीषदपरिसमाप्तं धत्ते । इयं च कन्याभीष्टवरस्पर्शोत्थस्मरोद्रेकेण कम्पतेकल्पम् । अत्र च वयं[6] किं ब्रूमोदेशीयम्[7] । अस्माकमप्येतत्संमतमित्यर्थः[8] । इत्यर्थो व्यज्यते ॥

बहुरक्षोनु[1]वरोसौ प्रकृष्टः पटुकः सखि ।
वाञ्छतिच्छिन्नकतमो मनसा केन मोदकान् ॥ ६७ ॥

६७. हे सख्यसौ प्रत्यक्षोनुवरो[9] वरमनुगतो[10] नरः केन मनसा केनाभिप्रायेण मोदकान्[11]वाञ्छति । कीदृक्सन् । बहुरक्ष ईषदपरिसमाप्तं रक्ष औदरिकतया[12] राक्षसतुल्य इत्यर्थः । अत एव प्रकृष्टः पटुको[13] द्वयोर्बहूनां वा पटुकानां मध्ये प्रकर्षवान्कुत्सितः पटुर्बुभुक्षार्त[14]मनस्कत्वेनातिकुपटुरित्यर्थः । अत एव चच्छिन्नकतमः । कुत्सितश्छिन्नश्छि-

१ ए °नुवारो°.

१ सी °यो धत्ते°. २ ए °कठो°. ३ ए °रकरग्र°. ४ ए °ष्टेनैष°. ५ ए °रः सैरि°. ६ ए वर्या किं. ७ सी °म् । तेसा°. ८ सी °त्यर्थो. ९ ए °त्यकोनु°. १० सी °मनसा. ११ ए °कावाञ्छ°. १२ बी °या रक्ष°. १३ सी °टुके वांछति छिन्नकतमो मद्द°. १४ ए °टुर्बभु°. बी °टुबुभु°.

न्नकोयमे[1]षामनत्यन्तं छिन्नकश्छिन्नकतमस्तत्तुल्यः कान्दविकश्ववत्सस्पृहं मुहुर्मोदकानामालोकनेन निर्लज्जत्वान्नकवर्धिततुल्य इत्यर्थः । अस्माभिः सहास्य कः संबन्धो येनायं निर्लज्जो मोदकान्वाञ्छतीत्यर्थः । जेमनवेलायां किल प्रधानं मोदकादि भोज्यं यादृग्वरो लभते तादृगनुवरोपीत्येवं[2] श्यालिकाद्या उप[3]हसन्ति । हास्यवशादेव च बहुरक्ष इत्यादिविशेषणान्यसन्त्यप्यनुवरे लोकैः प्रयुज्यन्ते । एवं वक्ष्यमाणान्यपि ॥

अस्य केशद्वयी दृश्या[1]देश्यिकाविकवन्मुखे ।
प्रकृष्टच्छिन्नकस्यानुवरस्य[2] यावकदृशः ॥ ६८ ॥

६८. यावकन्त्यावलक्तवदाचर[4]न्त्यौ दृशौ यस्य तस्य रक्ताक्षस्या[5]स्यानुवरस्य मुखे दंष्ट्रिकाप्रदेशे केशद्वयी द्वौ[6] वालौ दृश्यादे[7]श्यिकातिलघुत्वेन कुत्सितेषदपरिसमाप्ता दृश्या यतोनत्यन्तं छिन्न[9]श्छिन्नको बहूनां मध्ये प्रकृष्टच्छिन्नकस्तस्य दंष्ट्रिकायामतिनिन्द्यं मुण्डितस्येत्यर्थः ।अविकवद्यथाविकस्यच्छागस्य मुखे केशद्वयी दृश्यादेश्यिका स्यात् । मुण्डितश्मश्रुत्वादेवमुपहासः ॥

हरतिरूपम् । चौररू[10]पः । अत्र "त्यादेश्च०" [१०] इत्यादिना रू[11]पप् ॥

कम्पतेकल्पम् । धत्तेदेश्यम् । ब्रूमोदेशीयम् ॥ पच्चकल्पे । वज्रदेश्येन । सीरिदेशीयः । अत्र "अतमबादेर्०" [११] इत्यादिना कल्पप्दे[12]श्यप्देशीयरः ॥ केचिद्देश्यं पितं नेच्छन्ति । तन्मते दृश्यादेश्यिका ॥

---

१ बी °देश्यका°. २ ए °स्य मव°.

---

१ ए °षामेत्य°. २ बी °वं शालि°. सी °वं शालका°. ३ ए °पस°. ४ ए °रन्त्यो दृशो य°. ५ सी °स्यानु°. ६ बी द्वौ बालौ. ७ सी °देशिका°. ८ ए °का स्यात्. ९ सी °न्नको. १० सी °रूपं । अ°. ११ ए रूपपत् । क°. १२ ए °देशी°.

बहुरक्षः । अत्र "नाम्नः प्राग्बहुर्वा" [१२] इति प्राग्बहुः ॥

प्रकृष्टः पटुकः । अत्र "न तमब्०" [१३] इत्यादिना तमबादिर्न ॥ अच्छिन्नादिभ्य इति किम् । छिन्नकतमः ॥

प्रकृष्टच्छिनकस्य । इत्यत्र "अनत्यन्ते" [१४] इति न तमबादिः ॥

यावकत् । अविक । इत्यत्र "यावादिभ्यः कः" [१५] इति कः ॥

कन्दुकं मोदकधिया ज्यायस्कानुवरेप्ससि ।
गृध्रो मणिपटौ क्रव्यधिया लोहितकौ यथा ॥ ६९ ॥

६९. रे ज्यायस्क लाम्पट्यातिशयादतिवृद्धतुल्यानुवर कन्दुकं कन्यायाः क्रीडार्थं गेन्दुकं मोदकधिया मोदकोयमिति बुद्ध्येप्ससि वाञ्छसि । यथा गृध्रः पक्षिभेदो लोहितकौ रक्तौ मणिपटौ क्रव्यधिया मांसबुद्ध्येप्सति ॥

मणी व+ दृग्लोहिनिका क्रुधानुवर ते मुधा ।
वैलक्ष्येण मुखं चैतत्कालकं कालकांशुक ॥ ७० ॥

७०. हेनुवरास्माकमुपरि कोपेन यत्ते दृगारक्ता तेन न कोपि बिभेतीत्यर्थः । तथा हे कालकांशुक कृष्णवस्त्रैतत्प्रत्यक्षं ते मुखं च वक्रमपि वैलक्ष्येण कोपवैफल्योद्भवया विलक्षतया कृत्वा मुधा कालकं कृष्णं दैन्याश्रयणेनापि न किंचित्ते त्राणं भविष्यतीत्यर्थः । रात्रिजागरणादिना रक्ताक्षत्वात्कस्तूरिकामण्डनेन कृष्णमुखत्वाच्चैवमुपहासः ॥

कन्दुकम् । ज्यायस्क । इत्यत्र "कुमारी०" [१६] इत्यादिना स्वार्थे कः ॥

---

१ ए °या लौहि°. + इवार्थे वो ज्ञेयः. २ बी °धा । विल°. ३ ए °शुकः । हे°.

---

१ बी °नत्यं इ°. २ सी °भ्य इ°. ३ बी °द्ध्येप्स्यति. ४ सी °न को°. ५ सी °खं व°. ६ ए बी दैत्याश्र°. ७ बी °क । ज्या°.

लोहितकौ मणिपटौ । अत्र "लोहितान्मणौ" [१७] इति कः ॥ लिङ्ग-विशिष्टस्यापि ग्रहणाल्लोहि[1]निका मणी ॥

[2]रक्ते । लोहितकौ मणिपटौ ॥ अनित्यवर्णे । क्रुधा लोहि[3]निका दृक् । अत्र "रक्त०" [१८] इत्यादिना कः ॥

[4]स्वार्थे रक्ते । कालकांशु[5]क । अनित्यवर्णे । वैलक्ष्येण कालकं मुखम् । अत्र "कालात्" [१९] इति स्वार्थे कः ॥

रोमप्रावर[1]णं वोढा शीतके नूष्णकेप्यृतौ ।
विहानकालूनकाङ्गवियातकपशुर्न्वयम् ॥ ७१ ॥

७१. अयमनुवरो यथा शीत[6]क ऋतौ शीतकाले रोमप्राव[7]रणं शीतत्राणाय वहति तथोष्णकेप्यृतावुष्णकालेपि रोमाण्यङ्गलोमान्येवातिसान्द्रत्वेनाङ्गाच्छादकत्वात्प्रावरणमाच्छादनं तद्वोढा वहति । विगतं हानं गमनं यस्य स विहानः स एव विहानकस्तथा लून एव लूनको लूनरोमा पशु[8]र्न तथालूनकः सरोमा पशुस्तस्येवाङ्गमस्यालूनका[9]ङ्गो लो[10]मशाङ्गस्तथा वियात एव वियातकश्च धृष्टो यः पशु[11]रुरणः स यथा रोमाण्येव प्रावरणं शीतके नूष्णकेप्यृतौ वहति । रो[12]मशत्वादेवमुपहासः ॥

शीतके । उष्णक ऋतौ । अत्र "शीत०" [२०] इत्यादिना स्वार्थे कः ॥

अलू[13]नक । वियातक । इत्यत्र "लून०" [२१] इत्यादिना स्वार्थे कः ॥

विहानशब्दादपीच्छन्त्येके । विहानक ॥

---

१ बी °णं वोढा.

---

१ सी °हितिका. २ बी रक्त । लो°. सी रक्तौ । लो°. ३ ए °हितिका. ४ ए स्वार्थो र°. ५ ए °शुका । अ°. ६ सी °तकोले. ७ ए °वणं. ८ सी °शुस्त°. ९ ए °ङ्गो लाम°. १० बी °मसाङ्ग°. ११ बी °शुरूर°. सी °शुरूरुणः. १२ बी °मसत्वा°. १३ बी °नकः । वि°.

पुरोधाः स्नातकाग्र्योथ तनुकब्रह्मसूत्रभृत् ।
पुत्रको न्वणुकः स्रष्टुरग्निकार्यं प्रचक्रमे ॥ ७२ ॥

७२. अथानन्तरं पुरोधा आम्नगुरुरग्निकार्यं वेदिकायामग्निकारिकां प्रचक्रमे । कीदृक् । तनुसूत्रं तनुकं भङ्गादिमयं तस्य यद्ब्रह्मसूत्रं यज्ञोपवीतं तद्बिभर्ति । यद्वा तनुकं शिक्षाकल्पादि सूत्रं तच्च ब्रह्मसूत्रं बिभर्ति यः सः । तथा वेदं समाप्य स्नाताः स्नातका वेदपारदृश्वानस्तेष्वग्र्यो मुख्योत एव स्रष्टुर्ब्रह्मणोणुको निपुणः पुत्रको नु कृत्रिमः पुत्र इवाङ्गीकृतः पुत्र इवेत्यर्थः ॥

अशून्यका बृहतिकावन्तोहौषुर्द्विजास्तथा ।
भागं खस्याष्टमं षाष्ठं वा धूमो व्यानशे यथा ॥ ७३ ॥

७३. स्पष्टः । किं तु शून्या एव शून्यका न तथाशून्यका विद्याधनसंपूर्णाः । बृहतिकावन्त उत्तरासङ्गवस्त्रावृताः । आष्टममष्टमम् । षाष्ठं षष्ठम् ॥

स्नातक । इत्यत्र "स्नाताद्०" [२२] इत्यादिना कः ॥

तनुकः(क) । पुत्रकः । अणुकः । बृहतिका । अशून्यकाः । अत्र "तनुपुत्र०" [२३] इत्यादिना कः स्वार्थे ॥

आष्टमं भागम् । अत्र "भागेष्टमाञ्जः" [२४] इति ञः ॥

षाष्ठं भागम् । अत्र "षष्ठात्" [२५] इति ञः ॥

---

१ बी °रोधा स्ना°. २ सी °कोण्वणु°. ३ बी असून्य°. ४ बी °वन्तौहोषु°. ५ ए °हौषुर्द्विजातास्त°. ६ सी °गं स्वस्या°. ७ ए °मो व्यानशो य°.

---

१ सी °कारि°. २ ए सी °त्रं च बि°. ३ ए °णुक्ये नि°. ४ बी शूनका. ५ बी °पूर्णं बृ°. ६ ए °तिकाः । अ°. ७ बी °माञ्शः इ°. सी माञ्यः इ°. ८ बी ञः ॥ षारी°.

खारीषाष्ठामेयकान्तिस्तालषष्ठकमेयदोः ।
वध्वानेकिकयानेकाक्येकेनामन्त्र्यथो वरः ॥ ७४ ॥

७४. अथो पुरोधसाग्निकार्यप्रारम्भानन्तरमनेकाकी महापरिवारान्वितो वरोनेकिकया महापरिवारान्वितया वध्वा सहितः सन्नेकेन महापुरुषेणामन्त्रि वेदिकायां प्रदक्षिणादानायाकारितः । कीदृक् । खारीषाष्ठेन खार्याः षष्ठभागेनामेयातिप्रभूतत्वान्मातुमशक्या कान्तिस्तेजो यस्य सः । तथा तालषष्ठकेन तालवृक्षस्य षष्ठेन भागेन मेयावतिप्रलम्बावित्यर्थः । दोषौ भुजौ यस्य सः ॥

तालषष्ठक । खारीषाष्ठं । इत्यत्र "माने कश्च" [२६] इति कञौ ॥

अनेकाकी । अनेकिकया । अत्र "एकाद्०" [२७] इत्यादिना-आकिन् कश्च ॥ असहाय इति किम् । एकेन ॥

स वधूटिकया भ्राम्यतकि साग्नेः प्रदक्षिणम् ।
जगुश्च सर्वकानन्दि मङ्गलं विश्विकाः स्त्रियः ॥ ७५ ॥

७५. स वरो वधूटिकया ह्रसितया वध्वा सहाग्नेः प्रदक्षिणं प्रदक्षिणावर्तं भ्राम्यतक्यल्पं भ्राम्यति । तथा विश्विकाः कस्येमा इत्यज्ञाता विश्वाः सर्वाः स्त्रियो मधुरत्वेन सर्वकानन्दि मङ्गलं मङ्गलगीतानि जगुश्च ॥

वधूटिकया । इत्यत्र "प्राग्नित्यात्कप्" [२८] इति कप् ॥

---

१ ए °मेका°. २ सी °यानेका°. ३ ए °काक्यैके°. ४ ए साग्ने प्र°.

---

१ ए °रमेका°. २ सी °न्वित°. ३ ए वध्वाः स°. ४ ए °था काल°. ५ ए °ष्ठक । इ°. ६ सी °कादिना°. ७ सी भ्राम्यंतकल्पं. ८ सी विश्वकाः. ९ ए सका°. १० ए °त्याक्षप्.

आस्यंतकि। सर्वक। विश्विकाः। अत्र "त्यादि०" [२९] इत्यादिनान्त्यात्स्वरात्पूर्वोक्॥

यद्युष्मकासु मयका लभ्यं न त्वसकासु तत्।
अर्प्यतां त्वयकेत्युक्त्वा श्यालोङ्गुष्ठे दधार तम्॥ ७६॥

७६. स्पष्टः। किं तु युष्मकासु ह्रस्वेषु युष्मासु विषये। एवं सर्वत्र। तं वरम्॥

अयं युवकयोर्नावकयोर्भृत्यः कृतार्थ्यताम्।
युवकाभ्यां नावकाभ्यां सुहृद्वृन्दैरगाद्यदः॥ ७७॥

७७. सुहृद्वृन्दैर्युगलीभूतैर्भैमिमित्रैरन्योन्यमदोगादि नर्मणोक्तम्। यथा। अयं श्यालो युवकयोर्ह्रस्वयोर्युवयोर्भृत्यो नावकयोस्ततश्चायं युवकाभ्यां कृतार्थ्यतां भृतिदानेन कृतकृत्यः क्रियतां नावकाभ्याम्॥

तूष्णीकां नीचकैः स्थास्नुं चित्तादपृथकन्नृपैः।
श्यालकं नर्मणेत्यूचे देयं भवतकेत्र किम्॥ ७८॥

७८. स्पष्टः। किं तु तूष्णीकाम्। नीचकैः। अपृथकत्। भवतके। एषु कुत्सितत्वाल्पत्वाज्ञातत्वानि त्रयोप्यर्था भावनीयाः। चित्तादपृथकत्प्रियत्वेन भैमेश्चित्ते वसन्तमित्यर्थः। यद्वा चित्तादभिन्नं यथा स्यादेवमूचे दानाभिप्रायेणोवाचेत्यर्थः। श्यालकमल्पं वा केनापि गुणेनाज्ञातं वानुकम्पितं वा श्यालम्॥

---

१ सी अर्पकं त्व°. २ बी त्वयंके°. ३ बी °भ्यां ताव°. ४ ए नाका°. ५ सी स्थातुं चि°. ६ बी °पः। शाल°. ७ ए °र्मणोत्यू°.

---

१ ए °म्यतिकि. २ ए सी विश्वकाः. ३ सी °दिनांक्षरा°. ४ बी °तैभैमि°. ५ सी °यं शालो. ६ ए °योह्रस्व°. ७ बी °त्योर्नाव°. ८ ए सी °कृत्य क्रि°. ९ ए अ अथपृक°. १० ए °त्वाज्ञा°. ११ बी यस्या°. १२ बी सी °र्थः। शाल°. १३ ए °मल्पं वा. १४ बी °णेन ज्ञा°. १५ ए °नामाज्ञान्तं.

दिग्धकः पङ्केनासि बालकोत्तिष्ठक त्वकम् ।
ददके गुडधानाकाः कर्किं देवियं[1] देविकं[2] ॥ ७९ ॥

७९. हे बालकं[1] त्वकं[2] पङ्केन पङ्किलभूमावेवं पाताळमग्नेन कर्दमेन दिग्धकोसि लिप्तोसि । अत उत्तिष्ठक । हे देवियानुकम्पितदेवदत्त । तूष्णीकत्वेनाभाषमाण[3]त्वात्पुनः संबोधयति । हे देविकानुकम्पितदेवदत्त । अभिधान्तरे[4]ण वा संबोधनम्[5] । हे अनुकम्पितदेवसिंह कर्किं किं तुभ्यं गुडधानाका ददके ददामि ॥

व्याघ्रकं [3]व्याघ्रिलं मित्रं देवदत्तक देविल ।
उपडं रामकोपेन्द्रदत्तकावुपकोपियौ[4] ॥ ८० ॥

उ[5]पिकं वोपिलं वा मातृयमातृकमातृलान् ।
भानुयं भानुकं भानुलं वा संपृच्छ्य मार्गय[6] ॥ ८१ ॥

८०, ८१. प्राग्वद् । हे देवदत्तक हे देविल मार्गय परं संपृच्छ[6]य । कान् । व्या[7]घ्रकं व्याघ्रिलं[8] मित्रं व्याघ्रा[9]ख्यौ द्वौ वयस्यावित्यर्थः । तथोपडमुपेन्द्रदेवम् । तथा रामकोपेन्द्रदत्तकौ [*रामोपेन्द्रद[10]त्तौ । तथोपकोपियावुपाग्निशर्माणौ । तथोपिकं वोपा[11]शीर्दत्तं वा । त[12]थोपिलं

१ ए °य वेविकः । हे. २ बी °विकं । हे. ३ ए व्याघ्रलं. ४ बी °पियौ. ५ सी °पिमं वो°. ६ ए °य ॥ किं व्या°.

१ सी °क त्वं प°. २ बी त्वप°. ३ सी °णत्पु°. ४ सी °रे वा. ५ सी °म् । अ°. ६ बी °च्छय । क्यत् । व्याघ्रिकं. ७ सी व्याघ्रिलं. ८ ए °घ्रिलं मि°. ९ सी °घ्रास्यो द्वौ. १० सी °दश°. ११ सी °पासीर्द°. १२ ए तथापि°.

* विंशतितमसर्गस्थचतुर्विंशतितमपद्यटीकायां दर्शितधनुश्चिह्नपर्यन्तं बीपुस्तकस्थपत्राणि न लब्धानि ॥

वोपाशीर्देवं वा । तथा मातृयमातृकमातृलान् मातृदत्तमातृदेवमातृभक्तान्वा । तथा भानुयं भानुकं भानुलं वा भानुदत्तं भानुदेवं भानुभक्तं वा । सर्वानप्येतान्वयस्याननुकम्पितान् । बालकत्वेन स्वयंमार्गणेनभिज्ञत्वादेतान्विज्ञान्वयस्यान्कियदहं मार्गयामीति पृष्टेत्यर्थः ॥

त्वयका । मयका । इत्यत्र "युष्मद्०" [३०] इत्यादिनान्त्यात्स्वरात्पूर्वोक् ॥ केचिद्भवच्छब्दस्यापि स्याद्यन्तस्यान्त्यस्वरात्पूर्वकम(वैम)कमिच्छन्ति । तन्मते भवतके ॥ असोभादिस्यादेरिति किम् । युष्मकासु । अस्मकासु । युवकयोः । आवकयोः । युवकाभ्याम् । आवकाभ्याम् ॥

नीचकैः । अपृथकद् । इत्यत्र "अव्ययस्य को द् च" [३१] इत्यक् । तत्संनियोगे यत्ककारान्तमव्ययं तस्य दोन्तादेशः ॥

तूष्णीकाम् । इति "तूष्णीकाम्" [३२] इत्यनेन निपात्यम् ।

श्यालकम् । भवतके । नीचकैः । तूष्णीकाम् । अत्र "कुत्सित०" [३३] इत्यादिना कबादयः ॥

अनुकम्पायाम् । श्यालकम् ॥ तद्युक्तनीतौ । दिग्धकैः पङ्केनासि । बालकोत्तिष्ठक । ददके गुडधानाकाः । ककिम् । इत्यत्र "अनुकम्पा०" [३४] इत्यादिना कबादयः ॥ असीत्यादिष्वनभिधान्न स्यात् ॥ यत्र त्वभिधानं तत्र स्यात् । त्वकम् ॥

देविय । देविक । देविल । इत्यत्र "अजातेर्०" [३५] इत्यादिना-इय-

१ सी °पासीर्दे°. २ ए °शीदेवं. ३ सी °नुकं. ४ सी वा तथा भा°. ५ सी °नात्यस्वरा°. ६ सी °स्यात्यस्व°. ७ सी °चकै । अ°. ८ ए दोन्वादे°. ९ ए °के । नायकैः. १० सी °ना बा°. ११ सी °म् । शालकं । श्या°. १२ ए °कः पंके°. १३ सी बालोको°. १४ सी °ना बा°. १५ सी अनुकंपेजातर्. १६ ए °यइइ°.

इक-ईला(लाः) ॥ वावचनात्कबपि ॥ देवदत्तक ॥ अजातेरिति प्रायिको निषेध इत्यन्ये । व्याघ्रिलमिति हि दृश्यते । तन्मते बहुस्वरादित्यपि प्रायिकम् । स्वमते तु व्याघ्रकमित्येव भवति ॥ बहुस्वरादिति किम् । रामक ॥

उपडम् । उपकोपियौ । उपिकम् । उपिलम् । अत्र "वोप०" [३६] इत्यादिना ड-अकौ चकारादिय-इक-इलाः । वावचनात्कबपि । उपेन्द्रदत्तकौ ॥

मातृय । मातृक । मातृलान् ॥ भानुयम् । भानुकम् । भानुलम् । अत्र "ऋवर्ण०" [३७] इत्यादिनानुकम्पायां विहितस्य स्वरादेः प्रत्ययस्यादेर्लुक् ऋवर्णोवर्णान्तं च प्रकृत्या तिष्ठति ॥

देवकां व्याघ्रकां पृच्छ वाचियां षडियां प्रियाम् ।
कुवियां कहियां शेवलियां वाथ विशालियाम् ॥ ८२ ॥

८२. हे श्यालक प्रियां पृच्छ । कां कामित्याह । देवदत्तायाः "ते लुग्वा" [३. २. १०८] इत्युत्तरपदलोपेनुकम्पिता देवी देवका । अत्र कँपि पित्वात्पुंवद्भावे नित्वादाप्परेपि ककार इत्वं न स्यात् तां देवकां तथा व्याघ्रकां व्याघ्राजिनां व्याघ्रमहाजिनां वा । तथा वाचियां वागाशिषं वाग्दत्तां वागाशीर्दत्तां वा । तथा षडियां षडङ्गुलीं तथा कुवियां कुबेरदत्ताम् । तथा कहियां कहोडां वा । तथा शेवलियां शेवलदत्ताम् । अथ तथा विशालियां विशालदत्ताम् । सर्वा अप्येता अनुकम्पिता(ताः) ॥

१ सी °विया क°.

१ ए °इल । वा°. २ सी °को । पिक°. ३ ए °कलाः । वाच°. ४ सी °तृला°. ५ सी °र्णान्तप्र°. ६ सी °च्छ । कारे इत्वं. ७ ए कपि पि°. ८ ए °द्भावि नि°. ९ ए °त्वं च स्या°. १० सी °नां वा. ११ ए °ङ्गुली त°. १२ सी कुबेर°.

इत्युक्त्वा बृहस्पतियविशाखिलकुमारिलैः ।
सोदापयद्त्तियाय[1] शुण्डारिकलभाश्वकान् ॥ ८३ ॥

८३. स भैमिरिति पूर्वोक्तं नर्मणोक्त्वा बृहस्पतियविशाखिलकुमारिलैरनुकम्पित[1]बृहस्पतिदत्तविशाखादत्तकुमारदत्तैः कर्तृभिर्दत्तियायानुकम्पिताय देवदत्ताय श्यालायादा[2]पयत् । कान् । शुण्डारा ह्रस्वाः शुण्डाः सन्त्येषां शुण्डारिणस्ते ये कलभास्त्रिंशदब्दका गजास्ते शुण्डारिकलभास्तथा ह्रस्वा अस्वा(श्वा)[3] अश्वकाः किशोरा द्वन्द्वे तान् ॥

माणिक्यकुतुपान्कूदीरशमीरकुटीरगान् ।
शमीरुस्तम्भमध्येसै[2] हयांश्चान्नगुरुर्ददौ ॥ ८४ ॥

८४. आन्नगुरुरस्मै भैमये ददौ । कान् । माणिक्यकुतुपान् माणिक्यैर्भृत्वा ह्रस्वाः[4] कुतूश्चर्ममयानि स्नेहपात्राणि । किंभूतान् । ह्रस्वाः कूद्यस्तृणभेदाः कूदीरास्तथा ह्रस्वाः शम्यः[5] शमीरा द्वन्द्वे तेषां यः कुटीरो ह्रस्वा कुटी तत्रस्थान्[6] । तथा शमीरुस्तम्भमध्ये[7] ह्रस्वशमीस्तम्भध्ये बद्धत्वेन वर्तमानान्हयांश्च ॥

देवकाम् । अत्र[8] "लुकि०" [३८] इत्यादिना कप् ॥

व्याघ्रकाम् । अत्र "लुक्च०" [३९] इत्यादिना कप् लुक्चोत्तरपदस्य ॥

वाचियाम् । अत्र "षड्वर्ज०" [४०] इत्यादिनोत्तरपदस्य लुक् ॥ षड्वर्जेति किम् । षडियाम्[9] । अत्र "द्वितीयाद्०" [४१] इत्यादिना द्वितीयात्स्वरादूर्ध्वं

---

१ सी °याया शु°. २ ए °ध्येसे ह°.

---

१ सी °म्पितैर्बृह°. २ ए °लादा°. ३ ए अश्व°. ४ सी ह्रस्वा कु°. ५ सी शमी°. ६ सी °न् । यथा. ७ सी °ध्ये ब°. ८ सी अत्रांगुलि इ°. ९ सी षडि°.

लोपः। तथा च "अवर्णेवर्णस्य" [७. ४. ६८] इत्यल्लुबः(कः) स्थानिवद्भावात्पदस्यानिवृत्तेस्तृतीयत्वं न निवर्तते ॥

कुवियाम्। कहियाम्। अत्र "संध्यक्षराच्तेन" [४२] इति द्वितीयात्संध्यक्षररूपात्स्वरादूर्ध्वं लुक् तेन द्वितीयेन स्वसंध्यक्षरेण सह ॥

शेवलियाम्। विशालियाम्। अत्र "शेवल०" [४३] इत्यादिना तृतीयात्स्वरादूर्ध्वं लुक् ॥ केचित्तु विशाखिल। कुमारिलैः। इत्यत्रापीच्छन्ति ॥

बृहस्पतिय। इत्यत्र "क्वचित्तुर्यात्" [४४] इति क्वचिच्चतुर्थात्स्वरादूर्ध्वं लुक् ॥

दत्तियाय। इत्यत्र "पूर्वपदस्य वा" [४५] इति पूर्वपदस्य लुग्वा ॥ वावचनाद्यथाप्राप्तम्। देवियेत्यादीनि पूर्वोक्तान्येवोदाहरणानि ॥

अश्वकान्। इत्यत्र "ह्रस्वे" [४६] इति कप् ॥

कुटीर। शुण्डारि। इत्यत्र "कुटी०" [४७] इत्यादिना रः ॥ केचित्तु कुटीस्थाने कूर्दी पठन्ति ॥ कूदीरं ॥

शमीरु। शमीर। इत्यत्र "शम्या रुरौ" [४८] इति रुरौ ॥

कुतुपान्। इत्यत्र "कुत्वा डुपः" [४९] इति डुपः ॥

वत्सतरोक्षतराश्वतरर्षभतरव्रजैः।
ऊढं गोणीतरीः कासूतर्या छित्वा स वस्वदात् ॥ ८५ ॥

८५. स आम्रगुरुः कासूतर्या ह्रस्वय(या) कास्वा शक्तिशस्त्रेण कृत्वा गोणीतरीर्ह्रस्वा गोणीर्वस्त्रावपनानिच्छित्वा पाटयित्वा भैमये

१ सी °तराः का°. २ सी °र्याश्छित्वा पाट°.

१ ए °दस्यानि°. २ ए °क्षरांतत्वेन. ३ सी °क्। तेन वि°. ४ सी °क्। कत्यया°. ५ सी देवये°. ६ सी कूदी प°. ७ सी °दीरु. ८ सी °ये सुवर्ण°.

वसु स्वर्णमदात् । किंभूतम् । वत्सतरा दम्या उक्षतरा महोक्षा अश्व-तरा वेसरा ऋषभतरा वृद्धोक्षा द्वन्द्वे तेषां व्रजैरतिबंहीयस्त्वेनोढम्[1] ॥

कासूतर्यां । गोणीतरीः । अत्र "कासू०" [५०] इत्यादिना[2] तरट् ॥

वत्सतर । उक्षतर । अश्वतर । ऋषभतर । इत्यत्र "वत्सोक्ष०" [५१] इत्यादिना पित्तरट् ॥

अपकृष्टो नैकतरः क्रियाहीनो न चैककः ।
अमहेच्छो न चैकोपि तयोः संबन्धिपक्षयोः ॥ ८६ ॥

८६. तयोः संबन्धिपक्षयोर्मध्येमहेच्छोनुदार एकोपि न च नैवाभूद्त एवैकक एकोपि न च नैव क्रियाहीनो विवाहकार्येन्यूनोभूद्त एव चैकतर एकोपि नापकृष्टो निन्दितोभूत् ॥

तयोरेकतरः । अत्र "वैकाद्०" [५२] इत्यादिना वा डतरः ॥ वावचन-[3]मगर्थम् । तयोरेककः ॥ महावाधिकारान्न भवत्यपि । तयोरेकः ॥

पक्षयोर्यतरो[1]प्यैक्षि ततरोपि क्रियाधिकः ।
स्तूयतां कतरस्तत्रान्यतरो निन्द्यतां कथम् ॥ ८७ ॥

८७. स्पष्टः । किं तु यतरोपि योपि । एवमग्रेपि[4] ॥

पक्षयोर्यतरः । ततरः । कतरः । अन्यतरः । अत्र "यद्०" [५३] इत्यादिना डतरः ॥

स्वर्गभाजामन्यतमां वधूमन्यतरं च तम् ।
अकारयदथ प्रीतः पुरोधाः[2] करमोचनम् ॥ ८८ ॥

८८. स्पष्टः । किं तु स्वर्गभाजां देवीनां मध्ये रूपाद्यतिशयेनान्य-

१ ए °योर्यात°. २ ए °रोधा क°.

१ सी °ति बही°. २ ए °दिन त°. ३ सी °वनगमर्थं°. ४ ए °पि । क्ष°. ५ सी °तरकन्य°.

तमामेकां वधूम् । स्वर्गभाजां देवानां मध्येन्यतरमेकं तं च वरं च । करमोचनं पाणिग्रहणमोक्षम् ॥

कतरो वः कठो विद्वान् कतमो वेति भाषयन् ।
नृपोप्रीणाद्धनैर्विप्रान्यतरांस्ततरान्न हि ॥ ८९ ॥

८९. हे विप्रा वो युष्माकं मध्ये कतरः कठः कः कठप्रोक्तवेदाध्यायी । वा यद्वा । वो मध्ये कतमः को विद्वानिति स्वनरैर्भाषयन्सन्नृपो विप्रान्कठत्वादिविशिष्टान्द्विजान्धनैरप्रीणाद्बहुद्रव्यैस्तृप्तीचक्रे । न हि पुनर्यतरांस्ततरान्कठत्वादिरहितान् ॥

भूरिदक्षिणया विप्रान्यतमा(मां)स्ततमानपि ।
कौन्तेयबलिकर्णानामयमेकतमोप्रृणत् ॥ ९० ॥

९०. स्पष्टः । किं तु गुणिनो द्विजांस्तावद्भूरिद्रव्यैरप्रीणयत् । निर्गुणानपि भूरिदक्षिणामात्रेणाप्रीणयदित्यर्थः । कौन्तेयो युधिष्ठिरः ॥

यतरान् । यतमान् । ततमान् । ततरान् । कतमः । कतरः । अन्यतमाम् । अन्यतरम् । अत्र "बहूनां०" [५४] इत्यादिना डतमो वा चकाराड्डतरश्च ॥

एकतमः । अत्र "वैकात्" [५५] इति डतमः ॥ वावचनादक् । एकक इति पूर्वोक्तमेव ॥

क्षणेत्रच्छिन्नतमकश्रमच्छि(श्छि ?)न्नकंवस्त्रभृत् ।
रजसा भिन्नतरकः पुमानागादवन्तितः ॥ ९१ ॥

९१. अत्र क्षणेस्मिन्प्रस्तावेवन्तितो मालवदेशात्पुमानागात् । की-

१ सी °रो व कवो वि°. २ ए °न् कत°. ३ सी °पोपूर्णद्ध°. ४ ए °तरंस्त°. ५ सी °पृणात्. ६ ए °कमन्त्र°. ७ ए °गावदन्ति°.

१ सी °रं क°. २ सी कठकः. ३ ए °ठः क°. ४ ए °णानामपि. ५ सी °तराम्. ६ ए °हूनादित्या°. ७ ए °तमौ वा.

दृक् । छिन्नतमकोनत्यन्तं छिन्नतमस्तदैवागमनेनातिश्रान्तत्वादनपगतो राजदर्शने [1]गमनावधेः पूर्णत्वेन स्वस्थचित्तत्वाच्च किंचिदपगते[2]श्चेत्यर्थः । श्रमो मार्गखेदो यस्य सः । तथा छिन्नकमनत्यन्तं छिन्नं[3] स्फुटितमित्यर्थः । यद्वस्त्रं तद्बिभर्ति यः सः । तथा रजसा भिन्नतरकोनत्यन्तं भिन्नतरः किंचिद्व्याप्त उद्धूलितजङ्घ इत्यर्थः ॥

छिन्नक । तमबाद्यन्तात् क्तात् । छिन्नत[4]मकः(क) । भिन्नत[5]रकः । अत्र "क्तात्०" [५६] इत्यादिना कप् ॥

द्वाःस्थेन साम्यनत्यन्तं[1] प्रविष्टः सामिवारितः ।
सोर्धोक्तोर्द्धमनत्यन्तं निवेदि[2]त[3]तमः प्रभोः ॥ ९२ ॥

९२. स पुमान् द्वाःस्थेन प्रभोर्भैमेरत्यौत्सुक्यादिवशेनावन्तितः पुमानित्यर्धमनत्यन्तं मधुरवचसा निवेदिततमोतिशयेन विज्ञप्तः । कीदृक् । साम्यर्धमन[6]त्यन्तं प्रविष्टः सन् द्वाःस्थेन सामिवारितः प्रविशन्नर्धमनत्यन्तं[7] निषिद्धस्तथार्धोक्तो राज्ञो निवेदनेत्यन्तमुत्सुकत्वेन संपूर्णवाक्यस्योक्तावशक्तत्वात्क्षणं द्वारदेश एवेत्यर्धमनत्यन्त[8]मुक्तः ॥

भूपतिः साम्यनत्यन्तं निर्भुग्नतरया भ्रुवा ।
सांराविणं व्यावभाषीं विनापि तमवीविशत् ॥ ९३ ॥

९३. भूपतिः साम्यनत्यन्तं निर्भुग्नतरया प्रवेशसंज्ञार्थमनतिशयेन वक्रीकृतया भ्रुवा कृत्वा तं पुमांसमवीविशत्प्रवेशितवान् । कथम् । विनापि । किम् । सांराविणं समन्ताद्द्रवणं[9] पुमांसं शीघ्रं प्रवेश[10]येति

१ सी °न्तं प्राविष्टः स्वामि°. २ ए °तमः. ३ सी °तमोति°.

१ सी गमाव°. २ सी °तश्र°. ३ ए °न्नं स्फटि°. ४ ए °तरकः. ५ ए °तमकः. ६ सी °नस्यन्तं. ७ सी °न्तं न विषि°. ८ सी °मुक्तं ॥ भू°. ९ सी °द्रव्यणं. १० ए °शयति.

संशब्दनम् । तथा व्यावभाषीं[1] व्यवभाषणं किमर्थमसावागतः[2] कीदृग्वामुनार्थेनागत ईदृग्वेत्यन्योन्यालापं च[3] ॥

साम्यनत्यन्तं प्रविष्टः[4] । अर्धमनत्यन्तं निवेदिततमः । साम्यनत्यन्तं निर्भुग्नतं[5]-रया । इत्यत्र "न सामि०" [५७] इत्यादिना न कप् ॥ अन्ये तु समास एवोदाहरन्ति[6] । सामिवारितः । अर्धोक्तः ॥

व्यावभाषीम् । सांराविणम् । अत्र "नित्यं ञजिनोण्" [५८] इति स्वार्थे नित्यमण्[7] ॥

वैरिवैसारिणाङ्केशं[1] शिबीनां सोग्रणीर्नृपम् ।
प्रणम्येत्यब्रवीद्वाचो देवदत्तकपूगजित् ॥ ९४ ॥

९४. स पुमान्वैरिण एव सन्तापकत्वाद्वैसारिणाङ्को मीनध्वजः[8] कामस्तत्रेशं शत्रूणां भस्मसात्कारकं तं भैमिं प्रणम्य स पुमानिति वक्ष्यमाणवाचोब्रवीत्[9] । कीदृक् । शिबीनां नानाजातीयानामनियतवृत्ती[10]-नामर्थकामप्रधानानां संघानामग्रणीर्मुख्यस्तथा देवदत्तको देवदत्तमुख्यो[11] यः पूगः[12] संघविशेषस्तज्जित् । एतदपेक्षयोत्कृष्टानां शिबिपूगानामग्रणीत्वात्स्वपूगस्वामिनो[13] देवदत्तादुत्कृष्ट इत्यर्थः ॥

वैसारिण । इत्यत्र "विसारिणो मत्स्ये" [५९] इति स्वार्थेण् ॥

शिबीनाम् । अत्र "पूगाद्०" [६०] इत्यादिना[14] ञ्यः स च द्रिः । द्रित्वाद्बहुत्वस्त्रियां लुप् ॥ अमुख्यकादिति[15] किम् । देवदत्तकपूग[16] ॥

---

१ सी °वैशारि°.

---

१ ए व्याबभा°. २ सी °र्थमागतोसौ कीदृक् पुमर्थेना°. ३ सी च । सनमन°. ४ सी °वि अ°. ५ सी °तमया. ६ सी एववाह°. ७ ए °ण् । विरि°. ८ सी °जः कामनस्त°. ९ सी °णवतोब्र°. १० सी °तव्रतीना°. ११ ए °त्तख्यो. १२ सी पूग सं°. १३ सी °त्वात्सपू°. १४ सी °ना ञ्याः । स. १५ सी °मुष्यका°. १६ ए °पूगः ॥ स्त्री°.

स्त्रीव व्रीहिमता[1] व्रीहिमतानां[2] संमतोस्म्यहम् ।
दण्डनेतुर्नियुक्तस्य मालवेषु सकुन्तिषु ॥ ९५ ॥

९५. यथा व्रीहिमतानां[1] व्रातानामनियत[2]वृत्तीनां[3] शरीरायासजीविनां[4] संघानां व्रीहिमता स्त्री संमता भवति तथाहं दण्डनेतुः संमतोस्मि दण्डेशस्य पुमानहमित्यर्थः । किंभूतस्य[5] । सकुन्तिषु कुन्तिभिः शस्त्रजीविसंघेन सहितेषु मालवेषु मालवा वाहीकेषु शस्त्रजीविसंघस्तेषु विषये नियुक्तस्य त्वया विजयाय व्यापारितस्य ॥

तदा[3] गौपालिराजन्यकाम्बव्यवृकपत्तिकः ।
सेनानीस्ते सयौधेयशौभ्रेयोगादवन्तिषु ॥ ९६ ॥

९६. तदा यदा त्वमात्मजयाय स्वयं चलितः । सेनान्यं तु बल्ला[6]लजयाय प्रेषितवांस्तस्मिन्काले ते सेनानीरवन्तिष्वगात् । कीदृक्सन्[7] । गौपालयो गोपालस्यापत्यानि ब्राह्मणभेदा राजन्याश्च राज्ञोपत्यानि[8] काम्बव्याश्च काम्बवस्यापत्यानि वाहीकेषु शस्त्रजीविसंघा[9] वृकाश्च शस्त्रजीविसंघाः पत्तयो यस्य सः । तथा युधायाः शुभ्रस्य वापत्यानि वहंका[10](क?)कुमारास्ते शस्त्रजीविसंघा यौधेयशौभ्रेयाः सह[11] तैर्यः सः ॥

व्रीहिमतानाम् । अत्र "व्रातादस्त्रियाम्" [६१] इति स्वार्थे ञ्यः स च द्रिः[12] । अस्त्रियामिति किम् । व्रीहिमता स्त्री ॥

कुन्तिषु । इत्यत्र "शस्त्र०" [६२] इत्यादिना ञ्यट् स च द्रिः ॥

---

१ ए °ता व्रहीम°. २ सी °मत्मनां सम°. ३ सी °दा गोपा°.

---

१ ए °नां व्रता°. २ सी °ताम°. ३ सी °तव्रतीनां. ४ सी °नां व्री°. ५ सी °स्य कु°. ६ सी बल्लोज°. ७ सी °न् । गोपा°. ८ सी राज्ञेप°. ९ सी °घा पत्तये य°. १० सी °हबकु°. ११ सी सहितै°. १२ ए द्रिः । मा°.

मालवेषु । इत्यत्र "वाहीकेषु०" [६३] इत्यादिना ञ्यट् स च द्विः ॥

अब्रा[1]ह्मणरा[2]जन्येभ्य इति किम् । गौपालिराजन्यकाम्बव्य ॥

वृक । इत्यत्र "वृकाट्टेण्यण्" [६४] इति टेण्यण् स च द्विः ॥

यौधे[3]य । शौभ्रेयः । अत्र "यौधेयादेरञ्" [६५] इत्यञ् स च द्विः ॥

रक्षोभिः प[1]र्शुभिर्दार्मनिभिरौलपिभिर्वृतः ।
श्रौमतैः[2] श्रैमतैश्चामुं बल्लालो दर्पतोभ्यगात् ॥ ९७ ॥

९७. स्पष्टः । किं तु रक्षांसि पर्शवो दार्[4]मनय औलपयश्च शस्त्रजीविसंघ[5](घा?)स्तैस्तथा श्रुमतः श्रीमतश्चापत्यानि श्रौमताः श्रैमताश्च त एव श्रौमताः श्रैमताश्च तै[6]श्च वृतः ॥

शा[3]मीवत्याभिजित्याभ्यां शैखावत्येन चैष ते ।
कृत्यौ बि[4]भेद सामन्तौ नाम्ना विजयकृष्णकौ[5] ॥ ९८ ॥

९८. एष च बल्लालो नाम्ना विजयकृष्णकौ ते तव सामन्तौ बि[7]भेद । कैः कृत्वा । शामीवत्याभिजि[8]त्याभ्यां शैखावत्येन च शमीवतोभिजितः शिखावतश्चापत्यैः । यतः कीदृशौ । कृत्यौ करणीयौ भे[9]दार्हावित्यर्थः ॥

शालावत्यौर्णावत्याभ्यां वैदभृत्येन चेरितौ ।
किंराजानमराजानौ सुराजंस्तौ तमी[6]यतु(तुः) ॥ ९९ ॥

---

१ सी पशुभि॰. २ ए ॰तैः श्रेमतेश्चा॰. ३ ए ॰मीवित्या॰. ४ सी ॰भेदे सा॰. ५ सी ॰कौ ॥ ते तव. ६ ए ॰मीयुधः॥ हे.

---

१ सी ॰ह्मण्यरा॰. २ ए ॰जनेभ्य. ३ सी ॰धेयः । अ॰. ४ सी ॰मनेय. ५ सी ॰घस्त॰. ६ सी तैर्वृत ॥ शा॰. ७ ए ॰भे कैः. ८ सी ॰त्याभ्यौ शै॰. ९ ए ॰दाहावि॰.

९९. हे सुराजन्पूजितनृप भैमे तौ सामन्तौ शालावत्यौर्णाव[1]-त्याभ्यां वैदभृत्येन च शालावत ऊर्णावतो[2] विदभृतश्चापत्यैरीरितौ बल्लालपक्षे भवनाय प्रेरितौ सन्तौ किंराजानं निन्द्यं नृपं बल्लालमीयतुराश्रितौ । यतोराजानौ[3] । नञत्राल्पार्थो निन्दार्थो वा । स्वामिनि द्रूढत्वादल्पौ तुच्छौ निन्द्यौ वा राजानौ । निषेधार्थ एव वा[4] नञ् । राजार्हचरित्ररहिताविल्यर्थः ॥

सौ(सो)तिराजंस्तवानीके[1] आसन्नबहुभिर्नृपैः ।
कुर्वन्नागादस्यसि द्विदण्डि द्विमुशलि क्षणात् ॥ १०० ॥

१००. हेतिराजन्पूजितनृप स बल्लालस्तवानीके क्षणादागात् । कीदृक्सन् । आसन्ना बह्वो भटगजाद्या येषां तैर्नृपैः कृत्वा कुर्वन् । किम् । अस्यस्यसिभिरसिभिः[5] प्रहृत्य युद्धं वृत्तं[6] तथा द्वौ दण्डौ द्वौ मुशलौ चास्मिन्प्रहरणे द्विदण्डि द्विमुशलि च ॥

पर्शुभिः । रक्षोभिः । अत्र[7] "पर्श्वादेरण्" [६६] इत्यण् स च द्रिः ॥

दामनिभिः । औलपिभिः । अत्र "दामन्यादेरीयः" [६७] इतीयः स च द्रिः[8] ॥

श्रौमतैः । शामीवत्य । शैखावत्येन । शालावत्यं[9] । और्णावत्याभ्याम् । वैदभृत्येन । अ(आ?)भिजित्याभ्याम् । इत्यत्र[10] "श्रुमत्०" [६८] इत्यादिना स्वार्थे यञ् स च द्रिः ॥ श्रीमच्छब्दादपि[11] केचिदिच्छन्ति[12] । श्रैमतैः ॥

---

१ सी °के क्ष°.

---

१ ए °त्यौर्णव°. २ सी °तो वेद°. ३ सी °नौ । नाञ्यत्रा°. ४ ए वा टञ्. ५ सी °स्यसि आसिभिः प्र°. ६ सी °त्तं यथा. ७ सी °त्र पार्श्वो°. ८ सी द्रिः । शा°. ९ ए °त्य । ऊर्णा°. १० ए °त्य श्रु°. ११ सी °च्छब्दमपि. १२ सी °न्ति । श्रौम°.

किंराजानम् । अत्र "न किमः क्षेपे" [७०] इति वक्ष्यमाणः समासान्तोत् न स्यात् ॥

अ[1]रा[2]जानौ । अत्र "नञ्०" [७१] इत्यादिना समासान्तो न ॥

सुराजन्[3] । अतिराजन् । अत्र "पूजा०" [७२] इत्यादिना टात्प्राक् समासान्तो न ॥

आसन्नबहुभिः । अत्र "बहोर्डे"[4] [७३] इति डप्रसङ्गे[5] डः कच्च न ॥

अस्यसि । इत्यत्र "इ[6]च्युद्धे" [७४] इतीच् ॥

द्विदण्डि । द्विमुशलि । इत्येतौ "द्विदण्[7]ड्यादेः(दिः)" [७५] इति निपातौ ॥

तस्योक्तचैरिवर्त्विग्भिः श्रीपुरैः क्ष्वेडिभिर्भटैः ।
प्रा(आ?)रेभेसद्धलं होतुं समीपपथरोधिभिः ॥ १०१ ॥

१०१. उक्तचैरुच्चारितमन्त्रविशेषैः सद्भिर्ऋत्विग्भिर्यथा हव्यं होतुमारभ्यते तथा तस्य भटैर्बल्लालस्य वीरैरसद्बलं होतुमारेभे हन्तुमारब्धमित्यर्थः । किंभूतैः सद्भिः । श्रीपुरैः श्रियश्चतुरङ्ग[8]बलविक्रमादिलक्ष्म्याः पूर्भिर्नगरैर्निवासैरित्यर्थः[9] । तथा क्ष्वेडिभिः सिंहनादवद्भिस्तथा संगता आपो यत्र तत्समीपं तडागादि तस्य ये पन्थानः प्रवेशमार्गास्तद्रोधिभिर्जलस्थानानि[10] रुद्ध्वा स्थितैः । यद्वा रुद्ध्वा(?) समीपान्निकटान्पथो रुन्धानैरस्मत्सैन्यस्य निकटमागतैरित्यर्थः ॥

ऋच् । उक्तचैः[11] ॥ पुर् । श्रीपुरैः ॥ पथिन् । समीपपथ ॥ अप् । समीप । इत्यत्र "ऋक्पूर्०" [५६] इत्यादिना[12]-अत् ॥

---

१ सी °अत्ररा°. २ ए °जानं । अ°. ३ ए °न् । अ°. ४ सी °होड इ°. ५ ए °सङ्ग डः. ६ ए इच् । द्वि°. ७ ए °ण्ड्यादिभिः इनिपा°. ८ सी °ङ्गकलावि°. ९ सी °र्थः । यथा. १० सी °नि रुदस्थि°. ११ सी उचैः. १२ सी °नाक ॥ ना°.

नारोढुं दृढधूरक्षान्रथान्रणधुराक्षमान् ।
लेभिरेसङ्कटा रुद्धा उदग्भूमस्थितैः परैः ॥ १०२ ॥

१०२. असङ्कटा उदीच्युत्तरा भूमिरुदग्भूमस्तत्र स्थितैः परै रुद्धाः सन्तो रथानुपलक्षणत्वादश्वेभं चारोढुं न लेभिरे । किंभूतान् । दृढधुरो बलि[ष्ठधु]रोक्षाश्चक्राणि येषु तान् । तथा र[ण]धुराक्षमान् शस्त्रादिसर्वसामग्र्या रणकार्यप्राग्भारशक्तान् ॥

कृष्णभूमं पाण्डुभूमं द्विभूमं च विहाय नः ।
पुरोगा नेशुरत्यध्वं घातान्धतमसान्धिताः ॥ १०३ ॥

१०३. नोस्माकं पुरोगा अग्रेसरभटा अत्यध्वं मुक्तमार्गं यथा स्यादेवं नेशुः । किं कृत्वा । कृष्णा भूमिः कृष्णभूमं तत् कृष्णा भूमिरत्र कृष्णभूमो देशस्तं वा । एवं पाण्डुभूमं तथा द्वयोर्भूम्योः समाहारो द्विभूमं तत् । द्वे भूमी अत्र त(तं) द्विभूमं देशं वा विहाय पश्चाद्भूत्वेत्यर्थः । यतो घाता द्विट्प्रहारा एवातिनिबिडत्वेनान्धका-(न्धं क)रोत्यन्धमन्धं च तत्तमश्चान्धं तमोस्मिन्वान्धतमसमतिनिबिडतिमिरं तेनान्धिता अन्धीकृताः ॥

शरसंतमसेरीणां मूर्छावतमसस्पृशः ।
अन्येप्यतप्तरहसा भियावरहसं ययुः ॥ १०४ ॥

१०४. अन्येपि पुरोगेभ्योपरेपि भटा अवरहसमवहीनं रहोवहीनं रहसा वावरहसमवहीनं रहोस्यावरहसस्तं वा निकृष्टं विजनदेशं निकृष्ट-

---

१ ए °णधरा°. २ सी °न् । शस्त्रा°.

---

१ ए °मत्स्या र°. २ सी °हारे द्वि°. ३ ए °त्र तद्वभू°. ४ ए °मन्तं च. ५ ए °श्चान्धत°. ६ ए °न्वान्धं तमसमिति°. ७ सी °हीनर°. ८ सी °स्तं-पिवा. ९ सी °कृष्ट विजनदेशा°.

विजनदेशान्वितं पर्वतादि[1] वा ययुर्नेशुरित्यर्थः । किंभूताः सन्तः । अरीणां शरसंतमसे शरैरतिनिबिडत्वात्संतते[2] तमसि सति मूर्छावतम[स]स्पृशो[3] मूर्छया किंचिदचैतन्येन यदवहीनं[4] तमोवहीनं[5] तमसो[सा?]वहीनं तमोस्मिन्वावतमसमन्धकारिका[6] तत्स्पृशन्तः । तथा भिया नास्ति[7] तप्ररहसं तप्रं तप्राय इवानधिगम्यं रहोप्रकाश्यं[8] वस्तु येषां तेतप्ररहसाः[9] । यद्वा । तप्रं रहो येषां ते तप्ररहसा न तथा[10] स्वजीविताशयातिगोप्यं[11] स्वाम्यादिमपि[12] द्विषां दर्शयन्त इत्यर्थः ॥

प्रतिसामः प्रतिलोमो ज्ञातानुरहसो द्विषाम् ।
सोनुसामोनुलोमः[1] स्वान्नृपानूचे चमूपतिः ॥ १०५ ॥

१०५. स चमूपतिरनुगतानि लोमान्यस्यानुलोमो रूढ्यानुकूलोत[13] एवानुसामः साम्नानुगतः सन्स्वान्नृपात्रणे स्थिरीभवनायोचे । यतः कीदृक् । द्विषां प्रतिलोमो रूढ्या प्रतिकूलस्तथा द्विषां प्रतिगतं[14] सामास्य प्रतिसामो दण्डे प्रगुण इत्यर्थः । तथा[15] द्विषां ज्ञातमनुरहसमनुरूपं[16] रहो येन सः । गूढचरादिप्रयोगेण द्विषां विदितसामर्थ्यादिपरमार्थ इत्यर्थः ॥

अवलोमावसामेन भर्त्रा मे ब्रह्मवर्चसम् ।
धिक्स्तुतं धिक्च वो राजवर्चसं हस्तिवर्चसम् ॥ १०६ ॥

---

१ **सी** सोनसामोनलो°.

---

१ **सी** °तार्थं वा. २ **ए** °बिडित्वा°. ३ **सी** मूर्छया. ४ **सी** °दही°. ५ **ए** °नं तमो°. ६ **सी** °वसस°. ७ **सी** नाति त°. ८ **सी** °वाधिनम्यं. ९ **सी** °काशं वास्तु. १० **सी** °था साजी°. ११ **सी** °तिसगोप्यं संत्यादि° १२ **ए** °दिनपि. १३ **सी** °कूलात. १४ **सी** °गतसा°. १५ **सी** °था ज्ञा°. १६ **ए** °रहंस°.

१०६. अवलोमेष्ववहीनलोमसु रूढ्या शत्रुषु विषयेवसामेनावहीनसाम्ना[1] सामरहितेनेत्यर्थः । भर्त्रा भैमिना धिक्स्तुतं श्लाघितम्[2] । किं तदित्याह । मे मम ब्रह्मवर्चसं ब्रह्मतेजस्तथा वो युष्माकं राजवर्चसं राजतेजो हस्तिवर्चसं च हस्तिनां बलं च । एवं नाशेनातिनिन्द्या[3]न्येतानि त्रीणि स्वामिना धिक्स्तुतानीत्यर्थः ॥

पल्यवर्चसवद्वर्म[1] धिग्वः[2] प्रत्युरसं नृपाः ।
यन्नश्च स्वामुपाक्ष्येते विशन्त्योकोगवाक्षवत्[3] ॥ १०७ ॥

१०७. हे नृपाः प्रत्युरसमुरसि वर्तमानं वो युष्माकं[4] वर्म धिग्गर्हे । यतः पल्यवर्चसवत्पल्यं कटकृतं पलालवर्तिकृतं वा धान्यभाजनं[5] हस्तिविधा(?) वा तस्य[6] यद्वर्चो बलं रणकार्याकरणेन भारभूतत्वात्तत्तुल्यम् । एतदपि कुत इत्याह । यद्यस्मान्नोस्माकं च स्वा(?)मुपाक्ष्यक्ष्णोः[7] समीपे युष्माकं पश्यतामेवेत्यर्थः । एते शत्रवो विशन्ति । ओकोगवाक्षवत् । [*यथा गृहगवाक्षे सुखात्सर्वोपि विशति ॥

रणु(ण)धुरा । इत्यत्र "धुरोनक्षस्य" [७७] इत्यत् ॥ अनक्षस्येति किम् । दृढधूरक्षान् ॥

द्विभूमम् । [पाण्डुभूमम् ।] उदग्भूमः(म) । कृष्णभूमम् । अत्र "संख्या०" [७८] इत्यादिना-अत् ॥

अत्यध्वम् । अत्र "उपसर्गादध्वनः" [७९] इत्यत् ॥

---

१ ए °द्वर्माधि°. २ सी °र्मे द्विग्व प्र°. ३ ए °क्षवात्.

---

१ ए साम्ला सा°. २ ए °म् । कं त°. ३ सी °न्द्यान्यिता°. ४ ए °कं चमाधि°. ५ सी धान्यं भा°. ६ सी °स्य द्वयर्चो. ७ सी °पाक्षक्ष्णोः.

---

* एतदारभ्य १२० तमपद्यटीकादर्शितधनुश्चिह्नान्तस्थो ग्रन्थः सीपुस्तके नास्ति.

संतमसे । अवतमस । अन्धतमसा । इत्यत्र "[सम]व०" [८०] इत्यादिना-अत् ॥

अततरहसाः । अनुरहसः । अवरहसम् । अत्र "तप्त०" [८१] आ(इत्या)-दिना-अत् ॥

प्रतिसामः । अनुसामः । अवसामेन । प्रतिलोमः । अनुलोमः । अवलोम । इत्यत्र "प्रत्यनु०" [८२] इत्यादिना-अत् ॥

ब्रह्मवर्चसम् । [हस्तिवर्चसम् । राजवर्चसम् ।] पल्यवर्चसम् । अत्र "ब्रह्म०" [८३] इत्यादिना-अत् ॥

प्रत्युरसम् । अत्र "प्रतेर्०" [८४] इत्यादिना-अत् ॥

गवाक्ष । इत्यत्र "अक्ष्णोप्राण्यङ्गे" [८५] इत्यत् ॥ अप्राणा(ण्य)ङ्ग इति किम् । [उपाक्षि] ॥

प्रत्यक्षं नः समक्षं च सैन्ये क्षुण्णे परोक्षवत् ।
कस्माद्द्रक्ष्यन्ति तेन्वक्षं कटाक्षैर्हासगर्भितैः ॥ १०८ ॥

१०८. स्पष्टः । किं त्वन्वक्षं सकललोकप्रत्यक्षम् ॥

समक्षम् । कटाक्षैः । इत्यत्र "स(सं)कटाभ्याम्" [८६] इत(त्य)त् ॥

प्रत्यक्षम् । परोक्षं(क्ष) । अन्वक्षम् । अत्र "प्रति०" [८७] इत्यादिना-अत् ॥

प्रतिराजं वदत्येवं सेनान्यां तेपि भूभुजः ।
अध्याजिकर्म निश्चिक्युः प्रतिवर्म कृतादराः ॥ १०९ ॥

१०९. स्पष्टः । किं तु प्रतिराजं नृपं नृपं प्रति । अध्याजिकर्म रणकर्मविषये । निश्चिक्युर्निश्चयं चक्रुः । प्रतिवर्म(र्मं) सन्नाहं प्रति सन्नाहाभिमुख्येन लक्ष्यीकृत्य वा । ते नृपाः ॥

प्रतिराजम् । अत्र "अनः" [८८] इत्यत् ॥

अध्याजिकर्म । प्रतिवर्मम् । अत्र "नपुंसकाद्वा" [८९] इति वा-अत् ॥

उपनद्युपगिपर्य(गिर्य)न्तर्नदमन्तगि(र्गि)रं गतान् ।
तेध्याग्रहायणीवोडून्ना(म्ला)नानाह्वन्स्वकान्भटान् ॥ ११० ॥

११०. स्पष्टः । किं तु ते नृपाः । यथाध्याग्रहायणि मार्गशीर्ष्यां हिमेन व्याप्तव्योमत्वेनोडवस्तारा म्लानाः स्युरेवं म्लानान् ॥

तेधियुत्प्रत्यसुहृदं प्रसस्रुः सोर्जगर्जिताः ॥
अध्याग्रहायणमुपपौर्णमासं यथाब्धयः ॥ १११ ॥

१११. ते नृपा अधियुद्रणे प्रत्यसुहृदं शत्रूनाभिमुख्येन लक्ष्यीकृत्य प्रसस्रुः प्रसृताः । किंभूताः सन्तः । सोर्जाः सबला ये गर्जिताः कृतसिंहनादाः । यथाध्याग्रहायणं मार्गशीर्षपूर्णिमायामुपपौर्णमासं पौर्णमास्याः समीपे च श्वेतचतुर्दश्यां कृष्णप्रतिपदि वेन्दोरुदितत्वेनाब्धयः सोज(र्ज)गर्जिताः सन्तः प्रसरन्ति ॥

अन्वगाद्दण्डनेताधिपौर्णमासीन्दुरुक्स तान् ।
इदं पञ्चनदं सप्तगोदावरमिति ब्रुवन् ॥ ११२ ॥

११२. अधिपौर्णमासीन्दुरुग् रणाय भूभुजा(जां) व्यावर्तनेतिप्रमुदितत्वात्पूर्णिमाचन्द्रोज्ज्वलविकसितमुख(खः) स दण्डनेता तान्भूभुजोन्वगात् । कीदृक्सन् । उत्साहनाय ब्रुवन् । किमित्याह । इदं रणं स्वर्गहेतुत्वात्पञ्चनदसप्तगोदावरतीर्थयोस्तुल्यमिति ॥

अन्तर्गिरम् । उपगिरि । अन्तर्नदम् । उपनदि । उपपौर्णमासम् । अधिपौर्णमासं(सि) । अध्याग्रहायणम् । अध्याग्रहायणि ॥ अपञ्चमवर्ग्ये । प्रत्यसुहृदम् । अधियुत् । अत्र "गिरि०" [९०] इत्यादिना-अत्(अद्वा) ॥

पञ्चनदम् । सप्तगोदावरम् । अत्र "संख्यायाः०" [९१] इत्यादिना-अद्वा (अत्) ॥

सेनानीरधिशरदं शशीवाधितदं बभौ ।
व्याधो वोपशुनं निघ्नन्विनोपजरसं द्विषः ॥ ११३ ॥

११३. सेनानीरुपजरसं जरायाः समीपं विना वर्तमानांस्तरुणानित्यर्थः । द्विषो निघ्नन्सन्नधितदं तेषु स्वराजस्वाह्लादकत्वाद्बभौ । यथा शश्यधिशरदं शरत्काले भाति । यथा वा व्याध आखेटिक उपशुनं शुनां समीपे भाति ॥

तदास्त्राणामनुगवानोभिः पांशुस्तथोद्धतः ।
यथा सरजसं मृत्युर्महोक्ष इव जग्रसे ॥ ११४ ॥

११४. तदास्त्राणां सत्कैरनुगवानोभिर्गां(र्गा) अन्वायतैः शकटैः कृत्वा पांशुस्तथोद्धत उच्छलितो यथा निबिडं रणोर्व्या व्याप्तत्वान्मृत्युर्यमो महोक्ष इव सरजसं रजसा सकलं यथा स्यादेवं जग्रसेनेकसुभटादीनभक्षयत् ॥

नष्टाञ्जातोक्षवृद्धोक्षस्त्रीपुंसानिव मालवान् ।
न जघ्नुस्तावकाः शुद्धक्षत्रस्त्रीपुंसजा भटाः ॥ ११५ ॥

११५. स्पष्टः । किं तु जातोक्षस्तरुणवृषभः । स्त्री चासौ पुमांश्च स्त्रीपुंसो नपुंसकः । यथैते रणकातरत्वेन नश्यन्ति तथा नष्टान् । शुद्धक्षत्रस्त्रीपुंसजाः । शुद्धं ब्राह्मणत्वादिजात्यासंकीर्ण(र्णं) क्षत्रं राजबीजं यस्य तद्यत्स्त्रीपुंसं तस्माज्जाताः शुद्धक्षत्रिया इत्यर्थः ॥

अधिशरदम् । अधितदम् । अत्र "शरदादेः" [९२] इत्यत् ॥

उपजरसम् । अत्र "जराया जरस् च" [९३] इत्यत् । जरसादेशश्च ॥

सरजसम् । उपशुनम् । अनुगव । इत्येते "सरजस०" [९४] इत्यादिना निपात्याः ॥

जातोक्ष । महोक्षः । वृद्धोक्ष । इत्यत्र "जात०" [९५] इत्यादिना-अत् ॥

द्वन्द्वात् । स्त्रीपुंस । कर्मधारय(या)त् । स्त्रीपुंसान् । इत्यत्र "स्त्रियाः०" [९६] इत्यादिना-अत् ॥

ऋक्सामे ऋग्यजुषं वा केपि जीवातवे जगुः ।

तृणं धेन्वनु(न)डुहवक्षे(त्के?)प्यधुर्मार(न?)वा रदैः ॥११६॥

११६. स्पष्टः । किं तु जीवातवे जगुर्जीवनाय ब्राह्मणीबभूवुरित्यर्थः ॥

ऊर्वष्ठीवे पदष्ठीवेक्षिभ्रुवे च कृतव्रणः(णाः) ।

त्यक्तदारगवा नेशुस्तेहोरा[त्र]व(व्र)णार्दिताः ॥ ११७ ॥

११७. स्पष्टः । किं तूर्वष्ठीवे ऊर्वे(र्वो)र्जान्वोश्च केचित्कृतव्रणाः पदष्ठीवे केचिच्च । पादयोर्जान्वोश्च कृतव्रणा इत्यर्थः ॥

रात्रिंदिवमिवार्को भान्नक्तंदिवमिवानलः ।

अवाङ्मनसगम्यौजा बल्लालो वा(लोथा)भ्यधावत ॥ ११८ ॥

११८. [अथ बल्लालोभ्यधावत ।] कीदृक्सन् । न वाङ्मनसेन वाचा मनसा च गम्यं परिच्छेद्यमोजस्तेजो यस्य सोतिप्रचण्डप्रतापोत एव च रात्रिंदिवं सर्वदा योर्कः स इव तथा नक्तंदिवं सदा योनलोग्निः स इव भाज्ज्वाज्वल्यमानः ॥

गोगोदुहवदासाकान्मन्वानोहर्दिवं च सः ।

शरैस्तुतोद कीर्णास्थित्वचमांसास्रविप्रुषैः ॥ ११९ ॥

११९. स बल्लाल आस्साकान्भटान्गोगोदुहवद्गोगोपालानिव निःसत्त्वान्मन्वानः सन् शरैः कृत्वाहर्दिवं सदा तुतोद विव्यते(थे) । किंभूतैः । कीर्णे विक्षिप्ते अस्थित्वचमस्थीनि च त्वचश्च मांसास्रविप्रुषं च मांसं चास्रविप्रुषो रक्तबिन्दवश्च यैस्तैः ॥

समिद्दृषदवद्भित्त्वाशु दुर्भेदां व्यहेपि हि ।

शतराजीं तवाथारिः प्रपेदे दण्डनायकम् ॥ १२० ॥

१२०. अथारिर्बल्लालो दण्डनायकं प्रपेदे प्राप्तः। किं कृत्वा।] तव शतराजीमाशु भित्त्वेतस्ततः क्षिप्त्वा। किंभूताम्। महाबलत्वेन दृढव्यूहत्वेन च द्व्यहेपि दिनद्वयेपि दुर्भेदाम्। समिद्दृषदवत्। यथा समिधः काष्ठानि दृषदश्च दुर्भेदाः स्युः॥

ऋक्सामे। ऋग्यजुषम्। धेन्वनडुह। वाङ्मनस। अहोरात्र। रात्रिंदिवम्। नक्तंदिवम्। अहर्दिवम्। ऊर्वष्ठीवे। पदष्ठीवे। अक्षिभ्रुवे। दारगवाः। एते "ऋक्साम०" [९७] इत्यादिना निपात्याः॥

चवर्ग। अस्थित्वच॥ द। समिद्दृषद॥ ष। मांसास्रविप्रुषैः॥ ह। गोगोदुह। इत्यत्र "चवर्ग०" [९८] इत्यादिना-अत्॥

शतराजीम्। द्व्यहे। अत्र "द्विगोरन्नह्नोट्" [९९] इत्यट्॥

सेनानीः स्वांस्ततर्जाथ द्व्यायुषं त्र्यायुषं न वा।
द्व्यञ्जलत्र्यञ्जलस्वर्णाहर्भृत्या जीविताः स्थ किम्॥ १२१॥

१२१. अथ सेनानीः स्वांस्ततर्जे। यथा द्वयोरञ्जल्योः समाहारो द्व्यञ्जलमेवं त्र्यञ्जलम्। द्वन्द्वे उपचारात्तत्परिमाणं यत्स्वर्णं तदहर्भृत्या दिवसे भृतिर्येषां ते हे द्व्यञ्जलत्र्यञ्जलस्वर्णाहर्भृत्या हे स्वर्णभृताञ्जलीनां द्वयं त्रयं वा जीविकां दिने दिने लब्धारो न द्व्यायुषं वर्तमानजनायुरपेक्षया न द्वे आयुषी स्तो न वा त्र्यायुषं न वा त्रीण्यायूंषि सन्त्यर्थाद्वस्तत्किं जीविताः स्थ जीवथ। अद्य श्वो वा मृत्युर्भाव्येव तस्मात्स्वजीवितनिरपेक्षं युध्यध्वमित्यर्थः॥

१ ए °ता। म°. २ ए च द्व्याहे°. ३ सी °ये दु°. ४ सी अहर्दि°. ५ ए द। ष। मां°. ६ सी °रनह्नो°. ७ ए °नानी स्वां तस्ततर्जेः। य°. ८ सी °रात्प°. ९ ए ते द्व्य°. १० ए °भृतीता°. ११ सी °यं वा. १२ सी °वितास्थ जीविथ. १३ सी °त्युभाव्ये°. १४ ए °र्भावेत°. १५ ए °ध्यमि°.

द्व्यञ्जलयस्त्र्यञ्जलयः पूर्वे[1]षां नौरसाः स्थ भोः ।
द्व्यंलि(द्व्यञ्जलि)त्र्यञ्जलिकृता मया भ्रान्त्यैव पूजिताः ॥१२२॥

१२२. भो द्व्यञ्जलयस्त्र्यञ्जलयः स्वर्णादीनां द्वाभ्यामञ्जलिभ्यां त्रिभिरञ्जलिभिश्च क्रीता भटा यूयं पूर्वे[1]षां पूर्वमहाभटानामौरसाः पुत्रा न स्थ । एतद्युपस्थितस्य युद्धस्याकारकत्वात् । अत एव यूयं मया भ्रान्त्यै[2]व तेषां महाभटानामौरसा एत इति महायोधा भविष्यन्तीति मतिभ्रमेणैव पूजिताः स्वर्णवस्त्रादिदानैः सत्कृताः । कीदृशा सता[3] । द्व्यञ्जलित्र्यञ्जलिकृता द्वयोरञ्जल्योस्त्रयाणामञ्जलीनां समाहारं कुर्वता भक्त्यर्थं द्विस्त्रिर्वाञ्जलियोजनानि कुर्वता ॥

द्व्यायुषम् । त्र्यायुषम् । अत्र "द्वित्रेरायुषः" [१००] इत्यट् ॥

द्व्यञ्जल[4] । द्व्यञ्जलि । त्र्यञ्जल[5] । त्र्यञ्जलि । इत्यत्र "वाञ्जलेरलुकः[6]" [१०१] इति वा-अट् ॥ अलुक इति किम् । द्व्यञ्जलयः । त्र्यञ्जलयः ॥

तेनेत्युक्ता युयुधिरे तेधिकीभू[2]य वैरितः ॥
द्वि[3]खा[4]रतस्त्रिखारीव त्रिखारेः पञ्चखारि वा ॥ १२३ ॥

१२३. स्पष्टः । किं तु यथा द्विखा[7]रतो द्वयोः खार्यो(र्योः) समाहारात्सकाशात्त्रिखारी तिसृणां[8] खारीणां समाहारोधिका स्यादेवं यथा त्रिखारेः पञ्चखारि वाधिकं स्यादेवं वैरितः शत्रुभ्योधिकीभूय ॥

द्विखारतः । पञ्चखारि । इत्यत्र "खार्या वा" [१०२] इति वा-अट् ॥ केचिदत्र पुंस्त्वमपीच्छन्ति । तन्मते "गो[9]श्च०" [२. ४. ९६] इत्यादिना

१ **सी** °यस्वर्णा°. २ **ए** °भूयो वै°. ३ **ए** द्विषार°. ४ **सी** °खारींव-त्रिस्वारी°.

१ **सी** °वें म°. २ **सी** °न्त्यैते ते°. ३ **सी** °ता । द्व्यं कृ°. ४ **ए** °ल । त्र्य°. ५ **सी** °ञ्जलि त्र्य°. ६ **सी** °लुक् इ°. ७ **सी** °खारितो. ८ **सी** णां° स°. ९ **ए** गोश्चात्या°.

ह्रस्वत्वे त्रिखारेः । स्त्रीत्वमप्यन्ये । तन्मते पूर्ववद्धस्वत्वे "इतोक्त्यर्थात्" [२. ४. ३२] इति ङ्यां च त्रिखारी ॥

अर्धखार्यर्धखारेण भूत्वा खारीव ते स्वकैः ।
द्विनावव्यूहवन्तोर्धनावव्यूहं रिपुं व्यधुः ॥ १२४ ॥

१२४. ते नृपा रिपुं बल्लालं[1] व्यधुः । किंभूतम् । नावोर्धमर्धनावं तद्व्यूहः[2] सैन्यरचना यस्य[3] तं नावाकारस्य व्यूहस्य तत्सैन्यस्य संबन्धिनोर्धस्य हननेनार्धनावाकारव्यूहम् । किं कृत्वा[4] । स्वकैर्भटैः कृत्वा द्वयोर्नावोः समाहारो द्विनावं तदाकारो यो व्यूहः सोस्त्येषां द्विनावव्यूहवन्तो भूत्वा । यथार्धखारि खार्या अर्धमर्धखारेण खार्या अर्धेन[5] खारी स्यात् ॥

अर्धखारेण । अर्धखारि । इत्यत्र "वार्धाच्च" [१०३] इति वा-अट् ॥

अर्धनाव ॥ द्विगोः । द्विनाव । इत्यत्र "नावः" [१०४] इत्यट् ॥

सोवन्तिपुंगवः[1] पञ्चराज्या हतमहासखः ।
सेनान्यो गूर्जरब्रह्मस्यान्वक्षं पातितो गजात् ॥ १२५ ॥

१२५. स्पष्टः । किं तु स बल्लालोवन्तिपुङ्गवो मालवश्रेष्ठः पञ्चराज्या[6] पञ्चानां राज्ञां[7] संहत्या[8] कर्त्र्या पातितः । गूर्जरब्रह्मस्य गूर्जरेषु देशे ब्रह्मा गूर्जरब्रह्मस्तस्य[9] गूर्जरा(र)त्रावासिद्विजस्य सेनान्यः ॥

पुंगवः । अत्र "गोः०" [१०५] इत्यादिना-अट्[10] ॥

पञ्चराज्या । महासखः । अत्र "राजन्सखेः" [१०६] इत्यट् ॥

गूर्जरब्रह्मस्य । इत्यत्र "राष्ट्र०" [१०७] इत्यादिना-अट् ॥

---

१ ए °वः पुंवरा°.

---

१ ए °ल्लाभं व्य°. २ सी तद्व्यू°. ३ सी °स्य सः तं. ४ सी °त्वा द्व°. ५ सी °न कृत्वारी°. ६ ए °राज्यां प°. ७ सी °ज्ञां हत्यां क°. ८ ए °त्या कीर्त्यां पा°. ९ ए °रत्वावासिज्जम्य से°. १० सी °ट्। अकौ°.

अकौब्रह्मिम(र्म?)हाब्रह्मा महाब्रह्मैश्चमूपतिः ।
यावन्निषेधेत्तावत्स कैश्चित्कुब्रह्मभिर्हतः ॥ १२६ ॥

१२६. तावत्स बल्लालः कैश्चित्कुब्रह्मभिः पापिष्ठब्राह्मणैर्हतो यावच्चमूपतिर्महाब्रह्मैर्बृहद्ब्राह्मणैर्निषेधेन्मारणान्निवर्तयेत् । यतो महाब्रह्मा । एतदपि कुत इत्याह । यतोकौब्रह्मिः[1] पापो ब्रह्मा कुब्रह्मो न तस्यापत्यम् ॥

अकौब्रह्मिः कुब्रह्मभिः । महाब्रह्मैः महाब्रह्मा । इत्यत्र "कुमहद्भ्यां वा" [१०८] इत्यड्वा ॥

ग्रामतक्षैः कौटतक्षैः स्यूतानःश्वस्ततोचलत् ।
सोगोष्ठश्वैरतिश्वैर्युङ्[2] व्याघ्रश्वैरिव लुब्धकः ॥ १२७ ॥

१२७. स चमूपतिस्ततो रणस्थानादचलत् । कीदृक्सन् । अनांसि शकटान्येवातिशीघ्रगत्वाच्छ्वानः[2][3] इवानःश्वाः[4] । स्यूताः प्रगुणीकृता अनःश्वा यस्य सः । कैः । ग्रामतक्षैर्ग्रामस्य तक्षभिर्ग्रामसाधारणैस्तक्षभिस्तथा कुटी शाला स्त(त)स्यां भवाः कौटा ये तक्षाणस्ते कौटतक्षा ये स्वतन्त्रा न कस्याप्यायत्तास्तैश्च तथा गोष्ठे गोकुले[5] श्वानो गोष्ठश्वा गोष्ठश्वा इव गोष्ठश्वा यथा गोष्ठश्वास्तथाविधशौर्याभावेनापकारिषु[6] गोष्ठश्वा एव भवन्ति नान्यत्किंचित्कर्तुमलं तथा ये स्युस्त एवमुच्यन्ते । न तथा ये तैर्महाशूरैरित्यर्थः । अतिश्वैः श्वानमतिक्रान्तैः सुष्ठु स्वामिभक्तैः सेवकैर्युङ् युक्तः । व्याघ्र इवातिशूराः श्वानो व्याघ्रश्वा जात्यकुर्कुरास्तैर्युङ्[7] लुब्धको यथा स्यात् ॥

---

१ सी °ब्रह्मम°. २ ए °रतैश्वैर्यङ्.

---

१ सी यतःकौब्र°. २ ए शकायन्ये°. ३ ए °न वा°. ४ सी इव श्वानः स्यू°. ५ ए °कुलश्वा°. ६ ए °परि°. ७ सी °स्तैर्यङ्.

अथोद्रजःपूर्वसक्थोत्तरसक्थाय भूपतिः ।
रामो नु वानरशुनेदात्तस्मै पारितोषिकम् ॥ १२८ ॥

१२८. अथ भूपतिस्तस्मै पुंसे पारितोषिकं परितोषप्रयोजनं स्वर्णाद्यदात् । कीदृशाय । पूर्वं सक्थि सक्थ्न(क्थ्नः?) पूर्वभागो वा पूर्वसक्थमेवमुत्तरसक्थं द्वन्द्वे उद्रजसी भूरिमार्गात्तदैवागतत्वादुद्धूलिते पूर्वसक्थोत्तरसक्थे यस्य तस्मै । यथा रामः सीताप्रवृत्तिं गृहीत्वा बहुमार्गागतत्वेनोद्रजःपूर्वसक्थोत्तरसक्थाय वानरशुने वानरः श्वेव बलिष्ठत्वाद्वानरश्वा हनूमांस्तस्मै पारितोषिकमदात् ॥

हसन्कुक्कुटसक्थे[1] स मृगसक्थे विडम्बयन् ।
पुमान्फलकसक्थाभ्यां निर्ययौ[2] जवनोरसम् ॥ १२९ ॥

१२९. जवनानां वेगवतामुर(रः) प्रधानं जवनोरसं वेगवत्सु श्रेष्ठः स पुमान्निर्ययौ राजभवनान्निर्गतः । कीदृक्सन् । फलके इव फलके अमांसले अतिकठिने च ये सक्थ्नी(क्थिनी) ऊरू ताभ्यां कृत्वा कुक्कुटसक्थे हसन्मृगसक्थे च विडम्बयन्ननुकुर्वन्नित्यर्थः ॥

ग्रामतक्षैः । कौटतक्षैः । अत्र "ग्राम०" [१०९] इत्यादिना-अट् ॥

गोष्ठश्वैः । अतिश्वैः । अत्र "गोष्ठ०" [११०] इत्यादिना-अट् ॥

व्याघ्रश्वैः । अत्र "प्राणिनः०" [१११] इत्यादिना-अट् ॥ प्राणिन उपमानादिति पूर्वपदविज्ञानादिह न स्यात् । वानरशुने ॥

अनःश्वः । अत्र "अप्राणिनि" [११२] इत्यट् ॥ अप्राणिनीति किम् । वानरशुने ॥

---

१ सी °क्थे च मृ°. २ ए °यौ व°.

---

१ सी °सक्थः द्व°. २ सी रामसी°. ३ सी °भुरु प्र°. ४ ए अमास°. ५ ए °न्नकु°. ६ ए °क्षैः । अत्र ग्रा°. ७ ए उमा°.

पूर्वसक्थोत्तरसक्थाय । मृगसक्थे । उपमानात् । फलकसक्थाभ्याम् । अत्र "पूर्व०" [११३] इत्यादिना-अट् ॥ कुक्कुटादपीच्छन्त्यन्ये । कुक्कुटसक्थे ॥

जवनोरसम् । अत्र "उरसोग्रे" [११४] इत्यट् ॥

लावण्यजालसरसंमे(म)मृताश्मं दृशोर्वधूम् ।
गृह्णन्वेश्माभि भूपोथाचलत्कालायसास्त्रभृत् ॥ १३० ॥

१३०. अथ कालायसं प्रधानलोहजातिभेदस्तस्य यदस्त्रं क्षुरिका तद्भृद्भूपो वेश्माभिलक्ष्यीकृत्याचलत् । कीदृक्सन् । वधूं गृह्णन् । किंभूताम् । लावण्यस्य जालसरसमेवंनाम सरः सौन्दर्यामृतपूर्णामित्यर्थः । अत एव दृशोर्जगच्चक्षुषोरमृताश्ममममृतस्याश्मामृताश्म एवंनामा प्रधानाश्मजातिविशेषस्तत्तुल्यामत्याह्लादिकामित्यर्थः ॥

पौरैरुपानसाट्टस्थैः पुण्याहे ददृशे व्रजन् ।
संख्याताह्नजयोत्सिक्तैः सोसंख्याताहकौतुकात् ॥ १३१ ॥

१३१. स भैमिः पुण्याहे शुभदिने प्रासादाय व्रजन्सन्नुपगतमन्नं उपानसमित्यन्नविशेषस्य संज्ञा । तस्य यान्यट्टानि हट्टास्तत्रस्थैः पौरैर्ददृशे । कस्मात् । असंख्यातेष्वहःसु यत्कौतुकं तस्मादतिकौतुकादित्यर्थः । यतः कीदृशैः । संख्याताह्नेषु स्तोकदिनेषु यो जयः स्वामिकर्तृक आन्नविजयस्तेनोत्सिक्तैर्गर्वितैः ॥

जालसरसम् । उपानस । अमृताश्मम् । कालायस । इत्यत्र "सरोनोश्म०" [११५] इत्यादिना-अट् ॥

१ ए °सनमृ°. २ ए °शोवधू°. ३ ए °यस्यास्त्रभृ°.

१ ए °लक्षीकृ°. २ सी °स्यात्मैश्ममृ°. ३ ए °ल्यामात्या°. ४ ए °सादय. ५ सी °न उपासन उपासनस°. ६ ए °षसं°. ७ ए °नि हाट्टा°. ८ सी °कौका°. ९ ए आह्नवि°. १० ए °पाना अ°.

पुण्याहे । अत्र "अह्नः" [११६] इत्यट् ॥

संख्याताह्न[1] संख्याताह । इत्यत्र "संख्यातादह्नश्च वा" [११७] इत्यट् । अह्नोह्नादेशो वा ॥

सर्वाह्नशुभलग्ने स्वैर्युतो व्यह्नोत्सवैर्गृहम् ।
तयात्यह्नेन्दुमुख्या स पूर्वाह्णार्कप्रभोविशत् ॥ १३२ ॥

१३२. पूर्वाह्णार्कप्रभः[2] प्रवर्धमानप्रतापोदय(यः) स भैमिः सर्वाह्न-शुभलग्ने सर्वाह्ने सकलदिनमध्ये शुभं यैल्लग्नं[3] तत्र गृहमविशत् । क-थम् । अत्यह्नोहरतिक्रान्तो[4] रात्रौ भवो य इन्दुस्तद्वन्मुखं यस्यास्तया वध्वा सह । कीदृक्सन् । द्व्यह्नो द्वयोरह्नोर्भव उत्सवो येषां तैर्व्यह्नो-त्सवैः स्वैः स्वजनैर्युत(तः)[5] ॥

सर्वाह्न ॥ अंश । पूर्वाह्न ॥ संख्या । व्यह्न ॥ अव्यय[6] । अत्यह्न । इत्यत्र "सर्वांश०" [११८] इत्यादिना-अट् । अह्नादेशश्च ॥

गते संख्यातरात्रेर्वाग् वर्षारात्रान्महीपतिः ।
व्यसृजत्पुण्यरात्रार्धरात्रे श्वश्रूं गुरुं च तम् ॥ १३३ ॥

१३३. भूपतिर्वर्षारात्रादर्वाक् पुण्यरात्रस्य नक्षत्रादिभिः पवि-त्राया रात्रेर्योर्धरात्रस्तस्मिन्[7] सन्मुहूर्त[8] इत्यर्थः । श्वश्रूं तं गुरुं च व्य-सृजत् । क सति । संख्याता या रात्री रात्रिजातिस्तत्र संख्यातरात्रे[9] गते कियतीष्वपि रात्रिष्वतिक्रान्तास्वित्यर्थः ॥

---

१ सी °यापाहे°. २ ए °ह्णाप्र°.

---

१ सी °ताह्नः सं°. २ ए °ह्णार्कः प्रव°. ३ ए यलग्नं. ४ ए °क्रान्तौ रा°. ५ ए °र्युता । स°. ६ सी °व्ययं । अ°. ७ ए °त्रेयोर्ध°. ८ सी °न् मुहू°. ९ सी °त्रे कि°.

कालेप्यदीर्घरात्रेन्तरेकरात्रद्विरात्रयोः ।
शक्त्यान्यानपि चक्रेरीनतिरात्रेन्दुनिष्प्रभान् ॥ १३४ ॥

१३४. भैमिरन्यानप्यान्नादितरानप्यरीनेकरात्रद्विरात्रयोरन्तरतिशीघ्रमित्यर्थः । शक्त्या कृत्वातिरात्रो रात्रिमतिक्रान्तो दिवातनो य इन्दुस्तद्वन्निष्प्रभान्निस्तेजस्कांश्चक्रेभिषेण्य जिगायेत्यर्थः । क । न दीर्घरात्रा दीर्घा रात्रयोत्रादीर्घरात्रस्तस्मिन्कालेपि यात्राया अयोग्य उष्णकाले वर्षाकालेपि चेत्यर्थः ॥

सर्वरात्रजागरूकः स्यन्द्विषां पुरुषायुषम् ।
आक्रामत्क्ष्मां स द्विस्तावात्रिस्तावे इव याज्ञिकः ॥ १३५ ॥

१३५. स भैमिः सर्वरात्रजागरूकः सदोद्यतोत एव द्विषां पुरुषायुषं पुरुषस्यायुर्वर्षशतं स्यंस्तद्वधेनान्तं नयन्सन्द्विषां क्ष्मामाक्रामद्वशीचक्रे । यथा याज्ञिकः सर्वरात्रजागरूकस्तथाभिचारमन्त्रैर्द्विषां रात्रिंचराणां पुरुषायुषं स्यन् द्विस्तावात्रिस्तावे विकृतियागस्य वेदिविशेषावाक्रामत्यनेकयागक्रियाकरणैर्व्याप्नोति ॥

वह्निं द्विस्तावं त्रिस्तावमिव सश्वोवसीयसम् ।
श्वःश्रेयसार्थमार्चंस्तमुच्चेशाद्या हयद्विपैः ॥ १३६ ॥

१३६. सह श्वोवसीयसेन कल्याणेनास्ति यस्तं सश्वोवसीयसं तं भैमिं शोभनं श्रेयः श्वःश्रेयसं क्षेमं तदर्थमुच्चेशाद्या उच्चदेशाधिपाद्या नृपा हयद्विपैः कृत्वार्चन् । हयाश्च द्विपाश्च हयद्विपम् । हयद्विपं च

१ सी °त्रयोरतरतिशी°. २ सी °र्वत्र°. ३ ए °रूकस्य°. ४ सी °स्ताव इ°.

१ ए °त्त्याति°. २ सी दीर्घरा°. ३ ए °रात्रिस्त°. ४ सी °त्रायां अ°. ५ सी °ले चे°. ६ सी °र्वत्र°. ७ ए °ज्ञिका स°. ८ सी °वशीय°. ९ सी °वशीय°. १० ए °यः स्वश्रे°. ११ ए °त्वा कुर्वन्. १२ सी °द्विपं चे°.

हयद्विपं च हयद्विपं चेत्येकशेषे हयद्विपानि तैरतिप्रभूतैरित्यर्थः । अन्यथा तु सेनाङ्गत्वादेकत्वमेव स्यात् । यथाग्निहोत्रिणः सश्वो[1]वसीयसं द्वि[2]स्तावान्द्विस्तावस्तमेवं त्रिस्तावं च वह्निमग्निविशेषं श्वःश्रेयसार्थमर्चन्ति ॥

निःश्रेयसार्थिभिरपि स्तुतदोस्त[1]थोर्वीं
निस्त्रिंशपाणिरदशैः स जिगाय मासैः ।
न द्व्यङ्गुलं नयपथस्य विलङ्घते स्म
नात्यङ्गुलो भवति जातु यथा स्म कोपि ॥ १३७ ॥

१३७. यथा कोपि जातु नयपथस्य द्व्यङ्गुलं द्वे अङ्गुली न विलङ्घते स्म । यथा कोपि नयपथ[3]स्यात्यङ्गुलश्चाङ्गुलिमप्यतिक्रान्तश्च जातु न भवति[4] स्म । सर्वोपि यथात्यन्तं ना(न्या)य्यभूदित्यर्थः । तथात्य[5]न्तं कण्टकोच्छे[6]दान्न्याय्यनुशासनादिप्रकारेण स[7] भैमिर्निस्त्रिंशपाणिः खड्गव्यग्रकरः सन्नदशैः न दशादर्शा[8]स्तैर्न्यूनैर्दशभिर्मासैरुर्वीं जिगाय वशीचक्रे । अत एव कीदृक् । निःश्रेयसार्थिभिरपि मोक्षेच्छुभिर्निःस्पृ[9]हैर्मुनिभिरपि स्तुतदोर्वर्णितबाहुवीर्यः ॥

संख्याततरात्रे । एकरा[10]त्रं । पुण्यरात्र । वर्षारात्रात् । दीर्घरात्रे ॥ सर्व[11] । सर्वरात्र ॥ अंश । अर्धरात्रे ॥ संख्या । द्विरात्रयोः ॥ अव्यय । अतिरात्र । इत्यत्र "संख्यात०" [११९] इत्यादिना-अत् ॥

---

१ ए °स्तथार्वीं नि°.

---

१ सी °वशीय°. २ ए स्तावास्त°. ३ ए °थयस्या°. ४ ए °ति । स°. ५ सी °त्यन्तक°. ६ ए °दानाय्य°. ७ ए स भौमिमिस्त्रिं°. ८ सी °शादशास्तै°. ९ ए °भिर्निस्पृ°. १० सी °त्र । व°. ११ सी °वरा°.

पुरुषायुषम् । द्विस्तावात्रिस्तावे[1] । इत्येते "पुरुष०" [१२०] इत्यादिना निपात्याः ॥ द्विस्तावात्रिस्तावयोर्वेद्यां प्रयोगः ॥ अन्यत्रापि[2] दृश्यते । द्विस्तावं त्रिस्तावं वह्निम्[3] ॥

श्वोवसीयस[म्] । अत्र "श्वसः०" [१२१] इत्यादिना-अत् ॥

निःश्रेयस । श्वःश्रेयस[4] । इत्यत्र "निसश्च०" [१२२] इत्यादिना-अत् ॥

अदशैः । निस्त्रिंश । इत्यत्र "नञव्ययात्०" [१२३] इत्यादिना डः ॥

व्यङ्गुलम् । अत्यङ्गुलः । अत्र "संख्या०" [१२४] इत्यादिना डः ॥ वसन्ततिलका छन्दः ॥

इति श्रीजिनेश्वरसूरिशिष्यलेशाभयतिलकगणिविरचितायां श्रीसिद्धहेमचन्द्राभिधानशब्दानुशासनद्व्याश्रयवृत्तावेकोनविंशः सर्गः ॥

---

१ ए °स्तावत्रिस्तावेत्ये°. २ ए °न्यथापि. ३ ए °ह्नि । श्वो°. ४ सी °श्रेय°.

द्व्याश्रयमहाकाव्ये

विंशः सर्गः ।

पद्माक्ष्य आततषडङ्गुलकृष्यरिक्था[1]
रन्तुं वनेष्वयुरथ श्रमजिह्मसक्थ्यः[2] ।
निःशङ्कमूषुरिह शासति गां द्विमूर्धा
कः कस्त्रिमूर्ध उत योपनयं विदध्यात्[3] ॥ १ ॥

१. पद्माक्ष्यः स्त्रियः पुष्पोच्चयादिक्रीडया[1] रन्तुं वनेष्वयुः । कीदृश्यः । आततं विस्तीर्णं यत्षडङ्गुलं षडङ्गुलयो यस्य तदङ्गुलिसदृशावयवं धान्यकण्टकादीनां विक्षेपणकाष्ठं[2] तेन कृष्यमतिबहुत्वात्कर्षणीयं रिक्थं धनं यासां ताः । अत्यन्तमीश्वर्य इत्यर्थः । अथ गमनानन्तरं श्रमजिह्मसक्थ्यः श्रान्ताः सत्यो वनेष्वेव निःशङ्कं निर्भयमूषुः । युक्तं चैतत् । यस्मादिह[3] भैमौ गां पृथ्वीं शासति को द्विमूर्धोताथ[4] वा कस्त्रिमूर्धो योपनयं चौर्यलुण्टनाद्यना(द्यन्यायं) विदध्यात् । चण्डशासनत्वेनान्यायिनो मस्तकं ग्रहीतर्यस्मिन्[6] यो द्विमूर्धा त्रिमूर्धा वा स्यात्स एवाहमस्यैकं[7] द्वे वा मस्तके दत्त्वैकेन शिरसा जीविष्यामीत्यभिप्रायेणान्यायं कुर्यादित्यर्थः ॥ वसन्ततिलका ॥

जायाप्रमाणजनताभिरगायि स त्रि-
मूर्धद्विमूर्ध इव देव उदात्तशक्तिः ।

१ ए °रिक्था र°. २ सी °सक्थाः । नि°. ३ सी विध्यत्.

१ सी °डय र°. २ सी °क्षेपणपाका°. ३ सी °ह भीमो गां. ४ सी °र्धोथ°. ५ सी °मूर्धा वा स्या°. ६ ए यो हि मू°. ७ सी °कं वा.

सुप्रातसुश्वसुदिवस्त्रिदशेश्वरो वा[1]
एणीपदाजपदभद्रपदादिराड्वा ॥ २ ॥

२. स भैमिर्जाया भार्या प्रमाणी मुख्या यासां ता या जनता जनौघास्ताभिरगायि गीतः । यत उदात्तशक्तिरुद्भटप्रभुत्वादिशक्तित्रयस्तथा शोभनं कर्म प्रातः प्रभातेस्य सुप्रातस्तथा शोभनं कर्म श्वोस्य सुश्वस्तथा शोभनं कर्म दिवा यस्य सुदिवस्ततो विशेषणकर्मधारयः । सर्वदा न्याय्योचितसत्क्रिय इत्यर्थः । त्रिमूर्धद्विमूर्ध इव देवो यथा पञ्चशिराः सदाशिवो गीयते । यथा वा त्रिदशेश्वरो देवेन्द्रो गीयते । तथैण्या इव पादावस्यैणीपदं मृगशिर एवमजपदो मेषराशिः । स चाश्विनीभरणीकृत्तिकैकपादरूप[1] इत्यश्विनी भरणी कृत्तिकाया[2] एकपादश्चोच्यन्ते । तथा भद्राः[3] पादा आसां भद्रपदाः[4] पूर्वभद्रपदा उत्तरभद्रपदाश्च द्वन्द्वे ता आदिर्येषां नक्षत्राणां तेषां राट् चन्द्रः । श्रिया संपूर्णकलादिलक्ष्म्या युक्तो य एणीपदाजपदभद्रपदादिराट् स यथा वा गीयते ॥

अशारिकुक्षं[2] चतुरश्रवक्षःस्थलं[3] स्वयं प्रोष्ठपदाधिपं[4] नु ।
नमस्यतां तं रजनी ध्रुवं कल्याणीद्वितीया समभून्न कस्य ॥ ३ ॥

३. तं भैमिं नमस्यतां प्रणमतां[5] मध्ये कस्य नमस्यन्नरस्य[6] रजनी प्रणामरात्रिध्रु(र्ध्रु)वं[7] न समभूत् । किंभूता । कल्याणी भैमेः प्रसत्त्या सद्यः सर्वसंपदुल्लासात्सर्वशुभहेतुर्द्वितीया प्रणामरात्रेरनन्तरा रात्रिर्यस्याः सा कल्याणीद्वितीया । किंभूतं त[म् ।] न शारेरिव स्थूलः

१ सी वा श्रेणी°. २ सी °कुक्षि च°. ३ सी °रस्त्रव°. ४ ए °पदधि°.

१ ए °णी कृत्तिका°. २ सी °का ए°. ३ ए भद्रापा°. ४ सी °द्रपाद उत्त°. ५ ए °णम्यतां. ६ सी °स रज°. ७ सी °त्रिध्रावं. ८ सी °व स्थलं कु°.

कुक्षिर्मध्यं यस्य तं कृशोदरम् । तथा चतस्रोश्रयो यस्य तच्चतुरस्रं(श्रं) तद्वक्षःस्थलं यस्य तम् । उपलक्षणत्वात्प्रमाणोपेतसर्वाङ्गोपाङ्गमित्यर्थः । तथा सकलजगदाह्लादकत्वात्स्वयं साक्षात्प्रोष्ठपदाधिपं नु प्रोष्ठो गौस्तस्येव पादा आसां प्रोष्ठपदाः पूर्वभद्रपदा उत्तरभद्रपदाश्च । तासामधिपश्चन्द्रस्तमिव । अथ चये प्रोष्ठपदाधिपं प्रस्तावाद्द्वितीयेन्दुं स्वयं नमस्यन्ति तेषां मध्ये कस्य नरस्य द्वितीया तिथि(थिः) कल्याणी शुभहेतुर्न स्याद्द्वितीयायामिन्दुदर्शनस्य सर्वसंपन्निबन्धनत्वेन शास्त्रेषु गीयमानत्वादित्युक्तिलेश(शः) ॥

षडङ्गुल । इत्यत्र "बहु०" [१२५] इत्यादिना टः ॥

जिह्मसक्थयः । पद्माक्षयः । अत्र "सक्थि०" [१२६] इत्यादिना टः ॥

द्विमूर्धः द्विमूर्धा । त्रिमूर्धः(र्ध) त्रिमूर्धा । इत्यत्र "द्वि०" [१२७] इत्यादिना वा टः ॥

जायाप्रमाण । त्रिदश । इत्यत्र "प्रमाणी०" [१२८] इत्यादिना डः ॥

सुप्रात । सुश्व । सुदिवः । शारिकुक्षम् । चतुरश्र । एणीपद । अजपद । प्रोष्ठपद । भद्रपद । इत्येते "सुप्रात०" [१२९] इत्यादिना निपात्याः ॥

कल्याणीद्वितीया रजनी । इत्यत्र "पूरणीभ्यः०" [१३०] इत्यादिना अप् ॥ उपजातिः ॥

समप्रथत सोचतुरः कषायैः
सदा सुचतुरोस्खलितैः पुमर्थैः ।

१ ए पुमार्थैः.

१ ए °क्षिसंध्यं. २ सी °तश्रोस्रयो. ३ सी °दाश्च. ४ ए च यथोष्टप°. ५ ए तिथिं क°. ६ सी °यामि°. ७ सी °न्धत्वे°. ८ ए °लेश्यः । ष°. ९ सी °मूर्द्धि द्वि°. १० सी °कुक्षि । च°. ११ सी °रस्र । ए°. १२ ए °श्र । पाणी°.

इहोपचतुरेषु जगत्सु पाष-
ण्डिनां विचतुरं शतमर्चमानः ॥ ४ ॥

४. स भैमिश्चत्वारि समीपे येषां संख्येयानां तेषूपचतुरेषु त्रिषु जगत्सु समप्रथत प्रख्यातः । यतः कषायैः कृत्वा सदाचतुरः क्रोधादिकषायचतुष्टयरहित इत्यर्थः । तथास्खलितैः पुमर्थैः सुचतुरः शोभनपुमर्थचतुष्टयान्वित इत्यर्थः । तथेह पृथ्व्यां पाषण्डिनां विद्दृश्यानि विगतानि वा चत्वारि यस्य तद्विचतुरं शतं षण्णवतिमर्चमानः ॥ कोलश्छन्दः । ज्सौ स्यौ कोलः ॥

अन्तर्लोमं दधदथ बहिर्लोममौर्णं त्रिचत्वाः
कर्षन्दीनांस्त्रिचतुरपशूनेकदा पुष्यनेत्रे ।
आसेव्येहन्यनृचसहितैर्बह्वृचैः पद्मनाभे
दुःसक्थः पथ्यहलिरमुना कोपि दुःसक्त ऐक्षि ॥ ५ ॥

५. अथामुना भैमिना कोपि ग्राम्यनरो दीनान्बलादाकृष्यमाणत्वेन दीनमुखांस्त्रिचतुरपशूंस्त्रींश्चतुरो वा छागान्पथि कर्षन्विक्रेतुं राजमार्गे नयन्सन्नैक्षि । क्व । एकदैकस्मिन्काले । एकस्मिन्वर्ष इत्यर्थः । पुष्यो नेता नायको यस्य तस्मिन्पुष्यनेत्रे पुष्येण चन्द्रयुक्तेन युक्त इत्यर्थः । अहन्यामलकैकादशीत्याख्यया प्रसिद्धायां पौष्यां फाल्गुनशुक्लैकादश्याम् । महापर्वदिन इत्यर्थः । क्व सत्यैक्षि । पद्मनाभे विष्णौ । किंभूते । न विद्यन्त ऋचो येषामनृचा माणवास्तत्सहितै-

१ ए °न्तभोमं. २ सी °लौम द°. ३ सी °मौर्ण त्रि°.

१ ए °षू च°. २ ए °तुर क्रो. ३ ए पुमार्थैः सच°. ४ सी °दृशानि. ५ सी °नः। कौलछन्दः. ६ ए °श्छन्दं । ज्सो स्यौ. ७ ए °चपुरपशुंस्त्रीच-तुरो. ८ सी °तुरः प°. ९ सी °द्धाया पौ°.

[1]बह्वथ ऋचो येषां तैर्बह्वृचैश्चरणैरुपलक्षणत्वादन्यलोकेनाप्यासेव्य उपवासव्रतविशेषपूजाविशेषादिना[2]राध्ये । पौष्यां फाल्गुनशुक्लैकादश्यां विष्णोराराधनं महाफलम् । यद्ब्रह्माण्डपुराणम् ।

यदा तु शुक्लद्वादश्यां पुष्यं भवति कर्हिचित् ।
तदा सा तु महापुण्या कथिता पापनाशिनी ॥ १ ॥

पुराणभाषया द्वादशीशब्देन व्रतैकादश्युच्यते ।

तस्यां जगत्पतिर्देवः स[3]र्वसर्वेश्वरो हरिः ।
प्रत्यक्षतां प्रयात्येव तेनानन्तं फलं स्मृतम् ॥ २ ॥
इमामेकामुपो[4]ष्यैव पुष्यनक्षत्रसंयु[5]ताम् ।
एकादशीसहस्रस्य फलं प्राप्नोति नान्यथा ॥ ३ ॥
तस्मादेषा प्रयत्नेन कर्तव्या फलकाङ्क्षिभिः ।
फाल्गुने च विशेषेण विशेषः कथि[6]तो नृप ॥

एतेन च पर्वोपन्यासेन तदा राजाप्युपोषितो व्र[7]तविशेषस्थो धर्मध्यानस्थश्चासीदिति वि[8]शेषेणोल्लसद्दयं बलादाकृष्यमाणान्दीनान्पशून्ददर्शेत्यर्थो व्यञ्जितः । कीदृग्नरः । अन्तर्लोमान्यस्यान्तर्लो[9]मं तथा बहिर्लोमान्यस्य बहिर्लोमं च । उभयपार्श्वयोर्लोमशमित्यर्थः । और्णमूर्णामयं [10]पटं दधत्तथा मुग्धत्वा[11]त्त्रय एव चत्वारो यस्य स त्रिचत्वास्तथा [12]नि(निः)स्वत्वान्नास्ति हलिर्महद्धलमस्याहलिरत एव दुष्टे कार्श्यकठोरत्वादिना विकृते सक्थी(क्थिनी) यस्य स दुःसक्थस्तथा

१ **ए** °बह्वृ ऋ. २ **ए** °राध्यपौ°. ३ **ए** सर्वे°. ४ **सी** °पोष्यतं पु°. ५ **सी** °युतं । ए.° ६ **ए** °थिते नृपः । ए.° ७ **ए** °तशे°. ८ **ए** °शेषणो°. ९ **ए** °लोम त°. १० **सी** पदं द°. ११ **सी** °त्वात्त्रय. १२ **सी** निसत्वा°.

दुष्टा निन्द्या सक्तिः पशुविक्रया[1]दिकुव्यापारसंसर्गो यस्य स दुःसक्तः ॥ मन्दाक्रान्ता छन्दः ॥

दुःसक्तिमूचे तमसौ सुसक्ति-
रेनस्यसक्तिः सुकृते सुसक्तः ।
अवीनसक्थान्[1]नु गतावसक्ता-
न्हेतोः कुतः कर्षसि भोः सुसक्थ[2] ॥ ६ ॥

६. असौ भैमिर्दुःसक्तिं पशुविक्रयरूपदुष्कर्मासक्तं तं नरमूचे । कीदृक्सन् । शोभना सक्तिर्धार्मिकैः सह संसर्गो यस्य स सुसक्तिरत एवैनसि पापकर्मविषयेसक्तिस्तथा सुकृते धर्मे सुसक्तः । किमूच इत्याह । शोभने ग[2]मनदक्षे सक्थ्नी(क्थिनी) यस्य भोः सुसक्थावीं-श्छागान्कुतो हेतोः कर्षसि । किंभूतानपि । असक्थान्नु यथा सक्थिरहिता गता[3]वसक्ताः स्युरेवं गमनेसक्तानसंसर्गान्बलान्नीयमानत्वेन स्वयं[4]मगच्छत इत्यर्थः ॥ उपजातिः ॥

स प्रत्यवोचत्सुहलो न दुर्हलो
न चास्म्यहं किं त्वहलो नयामि तत् ।
असक्थिदुःसक्थि[3]सुसक्थिकानमू-
न्दातुं वसुभ्यः प्रति सौनिकापणे ॥ ७ ॥

७. स नरः प्र[5]त्यवोचत् । तथा हि । हे राजन्नस्मि न सुहलो न च दुर्हलो न शोभनया न वाशोभनया हल्या युक्तः किं त्वहमहलो हलिरहितोतिदरिद्र इत्यर्थः । तत्तस्मादमून्पशून्[6]वसुभ्यः प्रति दातुं ध-

१ प °सक्थ्यन्नु. २ प °सक्थः ॥ अ°. ३ सी °क्थिका°.

१ प °दिव्या°. २ सी °मद°. ३ सी °वशक्ताः. ४ सी °यमाग°. ५ प प्रत्युवो°. ६ प °न्वस्तुभ्यः.

नानि गृहीत्वामून्दातुमित्यर्थः । सौनिकापणे खाटिकशालायाममूत्र-यामि । कीदृशान् । एकोसक्थिरल्पोरुर्द्वितीयो दुःसक्थिस्तृतीयस्तु सुसक्थिकः । विशेषणद्वन्द्वे तान् ॥ इन्द्रवंशावंशस्थयोरुपजातिः ॥

दुर्हलिः सुहलितो यथा हलिं
सुप्रजस्त इव चाप्रजाः प्रजाम् ।
एतदीयपिशितानि सौनिका-
त्सन्ति दुष्प्रजस ईप्सवो धनैः ॥ ८ ॥

८. यथा दुर्हलिः सुहलितः सकाशार्द्धलिं महद्धलं यथा वाप्रजा निरपत्यः सुप्रजस्तो बह्वपत्यात्सकाशात्प्रजामपत्यं धनैरीप्सुः स्यात् । उत्तरार्धं स्पष्टम् । किं तु । दुष्टा प्रजा येषां ते दुष्प्रजसो निन्द्य-लोकाः ॥

अचतुरः । सुचतुरः । विचतुरम् । उपचतुरेषु । त्रिचतुर । इत्यत्र "न-ञ्सुवि०" [१३१] इत्यादिना-अप् ॥ समासान्तविधेरनित्यत्वादिह न स्यात् । त्रिचत्वाः ॥

अन्तर्लोमम् । बहिर्लोमम् । अत्र "अन्तर्०" [१३२] इत्यादिना-अप् ॥

पुष्यनेत्रे । अत्र "भान्नेतुः" [१३३] इत्यप् ॥

पद्मनाभे । अत्र "नाभेर्नाम्नि" [१३४] इत्यप् ॥

अनृच । बह्वृचैः । अत्र "नञ्०" [१३५] इत्यादिना-अप् ॥

---

१ सी °वजाम्.

---

१ ए °तु सौ°. २ सी °टिकेशा°. ३ सी °य सु°. ४ सी °द्धलं म°. ५ सी °ष्ट । दु°. ६ सी °रः । सच°. ७ ए °नाप्स । स°. ८ सी °म् । अ°. ९ ए नङ् इ°.

असक्तान् असक्तिः । सुसक्तः सुसक्तिः[1] । दुःसक्त[2](क्तः) दुःसक्तिम्[3] । असक्थान् असक्थि[4] । सुसक्थ सुसक्थिकान् । दुःसक्थः दुःसक्थि[5] । अहलः अहलिः । सुहलः सुहलितः । दुर्हलः दुर्हलिः । अत्र "नञ्सु०" [१३६] इत्यादिना वा[6]-अप् ॥

अप्रजाः । सुप्रजस्तः । दुष्प्रजसः । अत्र "प्रजाया अस्" [१३७] इत्यस् ॥

रथोद्धता छन्दः ॥

दुर्मेधसस्तस्य वचोल्पमेधसः
श्रुत्वेति राज्ञा जगदे सुमेधसा ।
अमेधसो धिग्बत मन्दमेधसो
हिंसन्ति जन्तून्निजजीविकाकृते ॥ ९ ॥

९. पूर्वार्धं स्पष्टम् । बतेति खेदे । धिग्निन्दायाम् । खिद्येहं निन्दामि च । यदमेधसो जीववधोद्यतमनस्कत्वेन निन्द्यबुद्धयः[7] खाटिकादिपापिष्ठलोका मन्दमेधसः[8] परलोकपराङ्मुखत्वेनाल्पबुद्धयः सन्तो निजजीविकाकृते जन्तून्हिंसन्ति ॥

मन्दमेधसः । अल्पमेधसः । अमेधसः । सुमेधसा[9] । दुर्मेधसः । अत्र "मन्द०" [१३८] इत्यादिना वा-अप् ॥ इन्द्रवंशावंशस्थयोरुपजातिः ॥

स्वजीविकायै[1] न भवन्ति दुर्जा-
तीया वरं सप्तकमासिकाः किम् ।
घ्नन्ति[2] श्वधर्माण इमे विधर्माः
किं सोमजम्भस्तृणजम्भ एतान् ॥ १० ॥

---

१ प °काये न. २ सी °न्ति सध°.

---

१ सी °क्तिः । दुसिक्त । दुः°. २ प °सक्ति°. ३ सी °सक्तिः । अ°. ४ प °सक्थि । सु°. ५ प °सक्थिः । अ°. ६ सी वापा । अल्पमे°. ७ प °यः खदिका°. ८ सी °सः । अ°. ९ प °धसाः । दु°.

१०. दुष्टा पशुवधादिपापकारित्वेन निन्दिता जातिः सामान्यं पुरुषत्वादि येषां ते दुर्जातीया इमे सौनिकादिलोका विधर्मा निर्धर्मा अत एव अधर्माणः कुक्कुराचाराः[1] सन्तः किं किमित्येतान्पशून्घ्नन्ति । किंभूतान् । सोमो[2] वल्लीरसो जम्भोभ्यवहार्यो येषां तान् सोमजम्भांस्तथा तृणजम्भश्च । निरपराधानित्यर्थः । किं तु । सप्त द्रम्मा भृतिरस्य "सोस्य भृतिवस्नांशम्" [६. ४. १६८.] इति के सप्तको मासो येषां ते सप्तकमासिका[3] भृत्याः सन्तः स्वजीविकायै स्ववृत्त्यर्थं किं किमिति न भवन्ति । वरं श्लाध्यमेतज्जीव[4]वधाहेतुत्वात्[5] ॥ उपजातिः ॥

व्याधा वने हरितजम्भि[1] सुजम्भ्यमन्तौ[2]
यद्दक्षिणेर्मणि मृगे प्रहरन्त्यघं तत् ।
भूशासितुः सुरभिगन्धि यशः क्षिणोति
प्रत्यक्षमेव किमुतैष[3] वधः पशूनाम् ॥ ११ ॥

११. व्याधा वने मृगे यत्प्रहरन्ति । किंभूते । शोभना जम्भा दंष्ट्रा यस्य तस्मिन्सुजम्भि । तथा हरितानि तृणानि जम्भो भक्ष्यमस्य तस्मिंस्तथामन्तौ निरपराधे[6] । तथेर्मं[7] बहुव्रणं वा दक्षिणमङ्गमीर्मं बह्वस्य दक्षिणाङ्ग ईर्म(र्मं) व्रणमस्येति वा दक्षिणेर्मा तस्मिन् । व्यद्धुकामानां व्याधानां दक्षिणं भागं बहूकृत्य व्यधनानुकूलं स्थिते[8] व्याधेन वा दक्षिणभागे कृतव्रणे । तद्वनेभवत्वेन परोक्षमप्यघं[9] पापं कर्तृ भू-

१ ए °म्भि सज°. २ ए °मन्तो य°. ३ सी °मुनेष.

१ सी कुर्कुरा°. २ सी सोमव°. ३ सी °सका. ४ सी °मेधजीव°. ५ सी °त् । व्या°. ६ सी °राद्धे । त°. ७ सी ईर्म्मं व्र°. ८ ए °तेन व्या°. ९ सी °घं क°.

शासितुः सुरभिगन्धि यशः कर्म क्षिणोति क्षयं नयति किमुत[1] किं पुनः प्रत्यक्षमेवैष पशूनां वधः ॥ वसन्ततिलका ॥

उद्गन्धि दुग्धं कलमान्सुगन्धीं-[1]
स्त्यक्त्वा पलं काङ्क्षति पूतिगन्धि[2] ।
लोको यदुद्गन्धि सुगन्धमत्तुं
तच्छासितुस्तत्खलु दुर्विवेकः ॥ १२ ॥

१२. स्पष्टम् । किं तु । पूतेरिव गन्धो यस्य तत्पूतिगन्धि स्वभावेन दुर्गन्धं परं कर्पूरादिसुरभिद्रव्यक्षेपेणोद्गन्ध्युल्लसद्गन्धं सुगन्धं च सत्पलं मांसमत्तुम् । तच्छासितुर्लोकं शिक्षयितुर्नृपस्य ॥ इन्द्रवज्रा ॥

उद्गन्धमम्ब्विह सुगन्ध्यथ पूतिगन्धि
यद्वन्मरुत्सुरभिगन्धिरु पूतिगन्धः ।
संसर्गतः सुरभिगन्धमिदं वपुर्वा
राजानुरूपगुणभृज्जन एष तद्वत् ॥ १३ ॥

१३. उ हे पशुकर्षिन्नर यद्वद्यथेह जगत्यम्बु जलं संसर्गतः सुरभिद्रव्यसंसर्गादुद्गन्धमुत्कृष्टगन्धं सुगन्धि चाथाथ वा दुर्गन्धद्रव्यसंसर्गात्पूतिगन्धि[2] दुर्गन्धं स्याद्यथा वा मरुद्वातः संसर्गतः सुरभिगन्धिः पूतिगन्धो[3] वा स्याद्यथा वेदं प्रत्यक्षदौर्गन्ध्यं वपुः संसर्गतः सुरभिगन्धं स्यात्तद्वत्तथैष जनः संसर्गतो नृपसंसर्गेण राजानुरूपगुणभृत् । राजन्शब्देनात्र राजगता गुणा उपचारादुच्यन्ते । ततो राजानुरूपा[4] राजगुणसदृशा ये गुणाः कृपादयोकृपादयो वा तद्बिभ्रत्स्याद् यथा

१ ए °गन्धीस्त्य°. २ सी °न्धि सु°.

१ सी °मुति किं. २ सी °गन्धिद्र°. ३ ए °न्धो यथा स्या.° ४ ए °जारू°.

राजा तथा प्रजेति वचनात् । एतेन राज्ञात्मनोव हि(न्येव हिं?)साकरणदोषः स्थापितः ॥

दुर्जातीयाः । अत्र "जातेरीयः०" [१३९] इत्यादिनेयः ॥

५ कमासिकाः । अत्र "भृति०" [१४०] इत्यादिनेकः ॥

श्वधर्माणः । अत्र "द्विपदाद्धर्मादन्" [१४१] इत्यन् ॥ विकल्पमिच्छन्त्येके । श्वधर्माणः विधर्माः ॥

सुजम्भि । हरितजम्भि । तृणजम्भः । सोमजम्भ(म्भः) । अत्र "सुहरित०" [१४२] इत्यादिना-अन् ॥

दक्षिणेर्मणि । इत्ययं "दक्षिणेर्मा०" [१४३] इत्यादिनाअन्तः साधुः ॥

सुगन्धीन् । पूतिगन्धि पलम् । उद्गन्धि । सुरभिगन्धि । अत्र "सुपूति०" [१४४] इत्यादिना-इत् ॥

सुगन्धि अम्बु सुगन्धं पलम् । पूतिगन्ध्यम्बु पूतिगन्धो मरुत् । उद्गन्धि पलम् उद्गन्धमम्बु । सुरभिगन्धिर्मरुत् सुरभिगन्धं वपुः । अत्र "वागन्तौ" [१४५] इतीद्वा ॥ वसन्ततिलका ॥

न न्यायगन्धोस्मि न धर्मगन्धिः करीषगन्धस्य पुरीषगन्धिः ।
कृते शरीरस्य करं धिगेष गृह्णामि भूमेर्न तु रक्षणार्थं ॥ १४ ॥

१४. न्यायस्य गन्धो यस्मिन्स न्यायगन्धोहं नास्मि । एवं निरपराधपशुवधस्य महापन्यायस्यानिवर्तकत्वान्मयि न्यायस्य गन्धोपि नास्तीत्यर्थः । अत एवाहं न धर्मगन्धिर्वर्तेत एव वाहं पापाशुचिलिप्तत्वात्पुरीषस्येव गन्धो यस्य स पुरीषगन्धिः सन्नेषोहं करीषगन्ध-

---

१ सी °य ॥ न्योय°.

---

१ ए °म्भः । अ°. २ सी °गन्धो महत्. ३ ए °गन्धमरु°. ४ ए °गन्धव°. ५ ए °र्मंग°. ६ सी °चितिप्त°.

स्यानेकमलाविलत्वाच्छागणचूर्णवद्दुर्गन्धस्य शरीरस्य कृते करं राजभागं धिग्निन्दितं यथा स्यादेवं गृह्णामि न तु भूमे रक्षणायानेकपशूनामेवं वधात् ॥

धर्मगन्धिः न्यायगन्धः । अत्र "वाल्पे" [१४६] इतीद्वा ॥

पुरीषगन्धिः करीषगन्धस्य । इत्यत्र "वोपमानात्" [१४७] इतीद्वा ॥

उपजाति(तिः) ॥

तौ विष्णुपद्यामजपादहस्ति-
पादौ सह व्याघ्रपदा सुपादौ ।
मुनी द्विद[त्कु]म्भपदीजडं मां
सुदच्चतुष्पाद्वधकं स्तुतो धिक् ॥ १५ ॥

१५. सुपादौ पृथ्वीपवित्रैकांह्री तौ सर्वत्र प्रसिद्धावजपादहस्तिपादौ नाम मुनी व्याघ्रपदा मुनिना सह सहितौ मां धिक्स्तुतः । क । विष्णोः पादौ कारणतया यस्यास्तस्यां विष्णुपद्यां गङ्गायाम् । कुमारपालनृपोत्यन्तं न्यायी धार्मिकः कृपालुश्चेत्यादि यन्मदीयं वर्णनं गङ्गातटस्था अपि मुनयः कुर्वन्ति तद्गर्ह इत्यर्थः । यतः किंभूतम् । सुजाताः शोभनाः समस्ता वा दन्ता येषां ते सुदन्तोतिक्रान्तबाल्यावस्था ये चतुष्पादश्चतुष्पदाश्छागादयस्तेषां वधकं तद्वधकानां वधादनिवर्तकत्वात् । एतदपि कुत इत्याह । यतो द्वौ दन्तौ यस्य स द्वि-

१ ए °द्वदकं.

१ ए °कमाला°. २ सी °णायांने°. ३ सी °मे व°. ४ ए °वं विधा°. ५ ए °रीग°. ६ ए °द्वा ॥ तौ. ७ सी °त्रकाह्री. ८ सी °प्रपादा सुपादौ मुनीति मु°. ९ सी °दिना य°. १० ए °दतोति°. ११ सी °न्तोविक्रा°.

दन्बालस्तथा कुम्भस्येव पादौ यस्याः कुम्भपदी दासी । द्वन्द्वे तद्व-ज्जडं हेयोपादेयार्थे[1]ष्वज्ञम् ॥

व्याघ्रपदा । इत्यत्र "पात्पादस्य०" [१४८] इत्यादिना पादस्य पाद् ॥ अहस्त्यादेरिति किम् । हस्तिपादौ । अजपाद ॥

कुम्भपदी । विष्णुपद्याम् । इत्येतौ "कुम्भपद्या[2]दिः" [१४९] इति नि-पात्यौ ॥

सुपादौ । चतुष्पाद् । इत्यत्र "सुसंख्यात्" [१५०] इति पाद् ॥

सुदत् । द्विदत् । इत्यत्र "वयसि०" [१५१] इत्यादिना दन्तस्य दतृ[3] ॥

अत्ययोदतिररोकदन्क्रुधा श्यावदन्तयुगरोकदन्तकः ।
श्यावदंश्च[1] यमकिंकरो यथा प्राणिभिन्मयि नृपेपि ही जनः १६

१६. मयि नृपेपि[4] मयि राज्ञि सत्यपि । ही खेदे । जनः क्रुधा कृत्वा प्राणिभित् प्राणिनः पशून् भिनत्ति विनाशयति । कीदृक्सन् । अय इव दन्ता अस्या अयोदती नाम राक्षसी । तामतिक्रान्तः । रा-क्षसीतुल्य इत्यर्थः । यथा यमकिंकरः क्रुधा प्राणिभित् । किंकिंनामे-त्याह । अरोकदंस्तथा श्याव[5]दन्तयुगरोकदन्तकस्तथा श्यावदंश्च । अरोका निर्दीप्तयो निश्छिद्रा वा श्यावाः कपिशा दन्ता अस्येति व्युत्पत्तिः ॥

अत्ययोद[6]तिः । अत्र "स्त्रियां नाम्नि" [१५२] इति दतृ[7] ॥

श्यावदन् श्यावदन्त । अरोकद[8]न् अरोकदन्तकः । अत्र[9] "श्यावारोकाद्वा" [१५३] इति वा दतृ[10] ॥ रथोद्धता छन्दः ॥

---

१ सी °श्च नृप°.

---

१ सी °र्थेष्वज्ञ°. २ ए °द्यादिति. ३ ए दतृः । अ°. ४ सी °पि ही म°. ५ सी °वदंश्च. ६ सी °दति । अ°. ७ ए दतृः । श्या°. ८ सी °दन्तक । अ°. ९ सी °त्रशावा°. १० ए दतृः । र°.

लोकोत्र मूषिकदतोहिदतः पशून्ह-
न्त्याः शुद्धदन्खलु हसन्न तु शोचति स्वम् ।
वज्राग्रद[1]च्छि[2]खरदद्वृषदद्वराह-
दन्ताहिदन्तयमदूतहनिष्यमाणम् ॥ १७ ॥

१७. आः खेदे । लोकोत्र भुवि मू[1]ष(षि)कस्येव दन्ता येषां तान्मूषिकदत एवमहिदतश्च पशून्खलु निश्चयेन हन्ति । कीदृक्सन्[2] । पशुषु हतेष्वस्माकं प्रधानं भोज्यं भविष्यतीति हर्षेण हसन्नत एव शुद्धदन्हा[3]स्यश्वैत्येनोज्ज्वलदन्तः । न तु न पुनः स्वं शोचति । कीदृशं सन्तम् । वज्राग्रददादिविशेषणोपेता ये यमदूतास्तैर्हनिष्यमाणम् ॥ वसन्ततिलका ॥

किं शुभ्रदच्छिखरदन्तखराग्रदन्त-
दुःशुद्धदन्त[3]वृषदन्तवराहदद्भिः ।
दूतैर्हरे[4]र्यदिह मूषिकदन्तकीटाः
क्लिश्नन्ति जन्तुवधकं स्फुटशुभ्रदन्तम् ॥ १८ ॥

१८. यद्वा । हरेर्यमस्य दूतैः । किंभूतैः । शुभ्रदच्छिखरद[4]न्तखराग्रदन्तदुःशुद्धदन्तवृषदन्तवराहदद्भिः । खराग्राः प्रचण्डाग्रभागा दन्ता येषां ते त[5]था दुष्टु शुद्धा दन्ता येषां ते तथा । शेषविशेषणव्युत्पत्तिः स्पष्टैव । ततो विशेषणद्वन्द्वे तैः । यमदूतकृतव्यथानां परलोकभावित्वेन परोक्षत्वात्त[6]द्गणनेन[7] न किंचिदित्यर्थः । यद्यस्मादिहेह-

१ ए °दख°. २ सी °च्छिषर°. ३ ए °न्तनृष°. ४ ए °रेयदि°.

१ ए मूखिक°. २ ए °न् । कान् । प°. ३ सी °न्हास्याश्वेतेनो.°. ४ सी °दन्तिख°. ५ सी °था शे°. ६ सी °त्तद्रण°. ७ सी °न किं°.

लोकेपि[1] जन्तुवधकं[2] मांसभक्षणाय प्राणिनां घातुकं[3] नरं मूषिकदन्ता ये कीटा लूतास्त एव क्लिश्नन्ति पीडयन्ति । किंभूतम् । स्फुटशुभ्रदन्तमभीष्टभोज्यप्राप्तिहर्षोत्थहास्येन प्रकटोज्व(ज्ज्व)लदन्तम्[4] । मांसभक्षका हि प्रायो लूतारोगमहाक्लेशेन विपद्यन्ते ॥

वज्राग्रदत् खराग्रदन्त । शुद्धदन्[5] शुद्धदन्त । शुभ्रदत् शुभ्रदन्तम् । वृषदत् वृषदन्त[6] । वराहदद्भिः[7] वराहदन्त । अहिदतः[8] । अहिदन्त । मूषिकदतः[9][10] मूषिकदन्त । शिखरदत्[11] शिखरदन्त । इत्यत्र "वाग्रान्त०" [१५४] इत्यादिना वा दत्(तृ) ॥

संज्ञोसंज्ञुः प्रज्ञुरप्रज्ञ ऊर्ध्वज्ञोनूर्ध्वज्ञुर्जानुना स्वेन भुङ्क्ते ।
पापं पापोपार्जितार्थं नु जन्तुर्दुर्हृत्प्रायैः स्वैः सुहृद्भिश्च सार्धम्
॥ १९ ॥

१९. संगते गुर्वादौ विनयेन रोगादिना वा मिलिते जानुनी यस्य[12] स संज्ञोसंज्ञुर्वासंगतजानुर्वा तथा प्रगते प्रवृद्धे प्रणते[13] प्रकृष्टे वा जानुनी यस्य स प्रज्ञुरप्रज्ञो वा तथोर्ध्वे जानुनी यस्य स ऊर्ध्वज्ञ ऊर्ध्वस्थोनूर्ध्वज्ञुर्वा सर्वोपीत्यर्थः । ज स्वेनात्मीयेन जानुना । उपलक्षणत्वात्स्वकायेनेत्यर्थः । पापमशुभं कर्म भुङ्क्तेनुभवति । पापोपार्जितार्थं नु पापेन जीववधादिनोपार्जितो[14] योर्थो द्रव्यं तं स्वैर्ज्ञातिभिः सुहृद्भिश्च मित्रैश्च सार्धं भुङ्क्ते । किंभूतैः । दुर्हृत्प्रायैः । पापोपार्जितद्रव्यविभागस्य ग्राहकत्वेन[15] दुःखहेतोः पापविभागस्य त्वग्राहकत्वेन च नरकादिमहा-

१ ए °लोकिपि. २ सी °कं मास°. ३ सी घातकनरमू°. ४ ए °दन्तामां°. ५ सी °दन्त । शुभ्रदन्तम् । वृ°. ६ सी °दन्तं । व°. ७ ए °हद्भिः. ८ सी °दन्तं । अ°. ९ सी °दत मू°. १० सी °दत् । शि°. ११ ए शिर°. १२ सी °स्य सं°. १३ ए °ते वा प्र°. १४ ए °धादिनो°. १५ सी °न च नर°.

दुःखहेतुत्वादरितुल्यैः । तस्मादेतदर्थ[1]मज्ञानान्ध एव प्राणी प्राणिवधादिमहापापकर्म करोतीत्यर्थः ॥ शालिनी छन्दः ॥

[1]उक्त्वोर्ध्वजानुमिति तं द्रुण[2]सं स जैत्र-
धन्वाथ गाण्डिवध[3]नुःशतधन्वतुल्यः ।
इत्यादिशत्खरणसं खुरणस्तनूज-
मायोगिनं खुर[4]णसं खरणःसुतं च ॥ २० ॥

२०. स्प[2]ष्टम् । किं तु । ऊर्ध्वजानुमूर्ध्वस्थम्[3] । तं पशुकर्षिणं नरम् । द्रु[4]वन्नासिकास्य द्रुणसं नाम[5] । जैत्रं जिष्णु[6] धनुर्यस्य[7] स जैत्रधन्वात एव गाण्डिवधनुषार्जुनेन शतधन्वना च नृपभेदेन तुल्यः । खरा खरस्येव वा नासिकास्य खरणसं नाम । आयोगिनमधिकारिणम् । खुरवन्नासिकास्य खुरणसं नाम ॥ वसन्ततिलका ॥

किमादिशदित्याह[8] ।

विखो वि[5]खुर्न खलु किं तु मृषाभिभाषी
स्यात्स्थूलनासिक इव प्रणसोपि विग्र[6](ग्रः) ।
शि[7]ष्यस्ततोपि परयौवतजानिरस्मा-
[8]दप्यत्र जन्तुवधकः प्रसभं भवद्भिः ॥ २१ ॥

२१. विखो विगतनासिकः पुमान्खलु निश्चयेन न विखुर्न[9] विगतनासिकः किं[10] तु स्थूलनासिकः प्रणसः स्यादेवं प्रणसोपि प्रवृद्धनासि-

१ **सी** उक्तोर्ध्वं°. २ **ए** °णसमजै°. ३ **ए** °धनुश°. ४ **सी** °रणःसु°. ५ **ए** विपुर्न. ६ **ए** विग्रहः श्रे°. ७ **सी** शिक्ष्यस्त°. ८ **ए** °दथत्र.

१ **ए** °र्थसंज्ञा°. २ **सी** स्पष्टः । किं. ३ **सी** °म् । पंशुः°. ४ **सी** द्रुवानासि°. ५ **ए** नामाः । जै°. ६ **सी** °त्रं विष्णु. ७ **ए** °स्य हर°. ८ **सी** °ह । निक्खेतिखु°. ९ **सी** °न नु विपुर्न. १० **ए** किं स्थू°.

कोपि मृषाभिभाषी विग्रो विगतनासिकः साधुवादरूपस्य परमार्थनक्रस्याभावात्(?) । अत एवायं महापापिष्ठत्वाद्धवद्भिः शिष्यः[1] शिक्षणीयस्ततोपि मृषाभाषिणोपि सकाशात्परयौवतं[2] परस्त्रीसमूहो जाया यस्य स परयौवतजानिः[3] पारदारिकः परदारासेवनेनैतदपलापमहालीकेन च मृषाभिभाषकाद्विगुणं महापापिष्ठत्वाद्भवद्भिः प्रसभं हठाद्विशेषेणेत्यर्थः[4] । शिष्यः[5] । अस्मादपि परयौवतजानितोप्यत्र जगति जन्तुवधको मृषावादादिसर्वमहापापमूलेन[6] जन्तुवधेन मृषाभिभाष्या[7]दिपापिष्ठेभ्योतिमहापापिष्ठत्वाद्भवद्भिः[8] प्रसभं शिष्यः[9] ॥

संज्ञुः[10][11] । संज्ञः । प्रज्ञुः । प्रज्ञः । अत्र "संप्राद्०"[12] [१५५] इत्यादिना[13] ज्ञुज्ञौ ॥

अनूर्ध्वजः(ज्ञुः) । [ऊर्ध्वज्ञः।] ऊर्ध्वजानुम् । अत्र "वोर्ध्वात्" [१५६] इति ज्ञुज्ञौ वा ॥

सुहृद्भिः । दुर्हृत् । इत्येतौ "सुहृद्०" [१५७] इत्यादिना निपात्यौ ॥

जैत्रधन्वा । इत्यत्र "धनुषो धन्वन्" [१५८] इति धन्वन् ॥

शतधन्व[14] गाण्डिवधनुः । अत्र "वा नाम्नि" [१५९] इति वा धन्वन् ॥

खरणः । खुरणः । अत्र "खर०" [१६०] इत्यादिना नस् ॥

द्रुणसम् । खरणसम् । खुरणसम् । अत्र "अस्थूलाच्च नसः" [१६१] इति नसः ॥ अस्थूलादिति किम् । स्थूलनासिकः ॥

प्रणसः । अत्र "उपसर्गात्" [१६२] इति नसः ॥

---

१ सी शिक्ष्यः शि°. २ सी °शातं पर°. ३ ए °निः पर°. ४ सी °द्विशिष्येत्य°. ५ सी शिष्यासा°. ६ सी °र्वपा°. ७ सी °षाभा°. ८ सी °भ्योप्यति°. ९ सी शिक्ष्यः । सं°. १० ए संज्ञः प्रज्ञः. ११ सी ज्ञुः । प्रज्ञुः । अ°. १२ ए संप्रत्या°. १३ सी °ना निपा°. १४ ए °धन्वः गा°.

विखुः । विखः विग्रः । अत्र "वेः खुखग्रम्" [१६३] इति खुखग्राः ॥

परयौवतजानिः । अत्र "जायाया जानिः" [१६४] इति जानिः ॥

विकाकुदुत्काकुदपूर्णकाकुदं संपूर्णकाकुत्सममेव तद्वचः ।
प्रपद्य ते पूर्णककुज्जनैरमार्योघोषणामा त्रिककुद्गिरेर्व्यधुः ॥२२॥

२२. ते नियोगिनः पूर्णं ककुदं स्कन्धो येषां ते जनास्तैस्तरुणलोकैः कृत्वामार्याघोषणां व्यधुः । कथम् । त्रीणि ककुदानि ककुदाकाराणि शिखराण्यस्य त्रिककुद्यो गिरिर्लङ्काद्रिस्तस्मादा तमभिव्याप्य तमवधीकृत्य वा । किं कृत्वा । तद्वचो भैमेर्वचनं सममेव युगपदेव प्रपद्याङ्गीकृत्य । किंभूतम् । विगतं काकुदं तालवत्र विकाकुत्तथोत्काकुत्तथापूर्णकाकुदं तथा संपूर्णकाकुत्किंचित्तालुस्पर्शरहितं किंचिच्चोद्गततालुस्पर्शं किंचिच्चापूर्णतालुस्पर्शं किंचिच्च संपूर्णतालुस्पर्शमित्यर्थः ॥

विकाकुत् । उत्काकुत् । इत्यत्र "व्युदः०" [१६५] इत्यादिना लुंक्समासान्तः ॥

संपूर्णकाकुत् । अपूर्णकाकुदम् । अत्र "पूर्णाद्वा" [१६६] इति वा लुक् ॥

पूर्णककुज्जनैः । अत्र "ककुदस्य०" [१६७] इत्यादिना लुक् ॥

त्रिककुत् । इति "त्रिककुद्गिरौ" [१६८] इति निपात्यम् ॥ वंशस्थेन्द्रवंशयोरुपजातिः ॥

जन्तुं घटोध्नीवदहन्न कोपि जनः सुशस्त्रीकसुभोक्तृकोपि ।
सुस्वामिकायां शुभदण्डिकायां श्रेयस्तनूकेन भुवामनेन ॥२३॥

---

१ ए °कुदं. २ ए °र्यामघो°. ३ सी ° णामत्रक°. ४ सी °दन्नकोपि जिन सु°. ५ सी °स्तत: के°.

---

१ सी विखः. २ ए विग्रैः । अ°. ३ ए जानिरजा°. ४ ए ते येना°. ५ ए °लैकाद्रि°. ६ सी ततम°. ७ सी °त्र का°. ८ सी °र्शहि°. ९ सी °ञ्चिच. १० सी लुक् । त्रि°. ११ सी °म् ॥ ज°.

२३. कोपि[1] जनो भुवां[2] पृथ्व्यां जन्तुं घटोध्नी[3]वद्गामिव नाहन् । कीदृक् । महाभटत्वाच्छोभना शस्त्री क्षुरिका यस्य स सुशस्त्रीकस्तथा शोभनो भोक्ता रक्षको राजादि[4]र्यस्य स सुभोक्तृको वि[5]शेषणकर्मधारये सोपि । यतः । कीदृश्यां भुवाम् । शुभाः पशुवधनिवारणाय नियुक्तत्वेन पशुवधस्थानेषु परि[6]भ्रामुकत्वाच्छुभव्या[7]पारा दण्डिनो राजकाम्बिका यस्यां[8] तस्याम् । एतदपि कुत इत्याह । य[9]तः श्रेयस्तनूकेन न्यायदयादिसद्गुणपवित्राङ्गकेनानेन भैमिना कृत्वा सुस्वामिकायां शोभनक(भ?)र्तृकायाम् ॥

घटोध्नी । इत्यत्र "स्त्रियामूधसो न्" [१६९] इति नः समासान्तः ॥

बहु(शुभ)दण्डिकायाम् । अत्र "इ[10]नः कच्" [१७०] इति कच् ॥

अनिनस्मन्ग्रहणान्यर्थ[11]वतानर्थकेन च तदन्तविधिं प्रयोज[12]यन्ति । सुस्वामिकायाम् ॥

ऋत् । सुभोक्तृकः ॥ नित्यदित् । सुशस्त्री[13]क । श्रेयस्तनूकेन । इत्यत्र "ऋन्नित्यदितः" [१७१] इति कच् ॥ उपजातिः ॥

सुशालिके[1] सद्द[2]धिके सुसर्पिष्के भोजने निर्मधुकोत्पयस्के ।
प्रजो[3]दु[4]रस्का रमते स्म न [5]स्वामिषेनुपानत्क इवापमार्गे ॥२४॥

२४. स्पष्टम् । किं तु । निर्मधुकोत्पयस्के मधुनो म[14]ध्यान्निर्गतं

---

१ ए °के सुद°. २ सी °द्दकिके. ३ ए °दुरुस्का. ४ सी °रधेस्का. ५ सी स्वानिषे°.

---

१ ए °पि भु°. २ सी भुवि पृ°. ३ सी °ध्नीमिव°. ४ ए °दियस्य. ५ सी °शेषेण°. ६ सी °भ्रामक°. ७ ए °पारद°. ८ सी °स्यां ए°. ९ ए यथाश्रे°. १० सी इन क°. ११ सी °र्थके°. १२ सी °जन्ति°. १३ ए °स्त्रीकः । श्रे°. १४ सी मध्यान्नि°.

निर्मधुकं तथोत्प्रा]बल्येन पयो दुग्धं यत्र तदुत्पयस्कं विशेषणकर्मधारये तस्मिन् । उदुरस्काभीष्टामारिघोषणोत्थहर्षेणोच्छ्वसितहृदया सती । यथानुपानत्कः पादुकारहितो नरोपमार्गे कण्टकाद्याकीर्णत्वान्न रमते ॥

भूभुजा सदनडुत्कसुलक्ष्मीकादिदेवसदृशेन तदानीम् ।
दुष्कृताब्धितरणे जितनौकेनैकपुंस्कममुना जगदासीत् ॥२५॥

२५. तदानीममुना भूभुजा भैमिना कृत्वा जगदासीत् । किंभूतम् । एकः कुमारपाल एव पुमान्पुंगुणोपेतः पुरुषो यत्र तदेकपुंस्कम् । विक्रमाभयदानन्यायपालनादिभिः पुंगुणैर्जगति कुमारपालतुल्यः पुमानन्यो नाभूदित्यर्थः । यतः । किंभूतेन । विक्रमादिगुणैः सदनडुत्कसुलक्ष्मीकादिदेवसदृशेन सदनडुत्कदेवेन शम्भुना सुलक्ष्मीकदेवेन च विष्णुना तुल्येन । प्रचण्डशासनेनेत्यर्थः । तथोर्व्याममारिप्रवर्तनया दुष्कृताब्धितरणे जिता नौर्वेडा येन तेन । स्वागता ॥

योलीकदर्पात्पलमाद ऋद्धिमान्
स तं सलक्ष्मीकमपि व्यवासयत् ।
अश्रद्धमुच्छ्रद्धकमाश्वनर्थकै-
स्तरैर्वचोभिः करुणाविधौ व्यधात् ॥ २६ ॥

२६. पूर्वार्धं स्पष्टम् । किं तु । व्यवासयद्देशताडितं चक्रे । तथा करुणाविधौ दयाकरणविषये नास्ति श्रद्धान्तरः परिणामविशेषो यस्य

१ सी °भुजां स°. २ ए °वशदृ°. ३ ए दुक्षता°. ४ ए °कपुस्क°.
५ सी °त्पदमा°. ६ ए व्यवताय°. ७ बी °द्धमच्छ्र°. ८ ए °र्थकैत°.

१ ए तथात्प्रा°. २ सी उदर°. ३ बी °मधुना. ४ बी °दामन्या°.
५ बी °दनुडु°. ६ बी °दनुडु°. ७ ए सी नौ बेडा. ८ बी °म् । व्य°.
९ बी °णादिवि°.

तमश्रद्धं नरमनर्थकेतरैः सार्थकैर्वचोभिर्धर्मदेशनाभिः कृत्वोच्छ्रद्धक-मुल्लसच्छ्रद्धं व्यधात् ॥

सद्दधिके । उदुरस्का[1] । सुसर्पिष्के । निर्मधुक[2] । अनुपानत्कः[3] । सुशालिके । अत्र "दधि०" [१७२] इत्यादिना कच् ॥

एकपुंस्कम् । सदनडुत्क[4] । जितनौकेन । उत्पयस्के । सुलक्ष्मीक । इत्यत्र "पुम्०" [१७३] इत्यादिना कच् ॥ केचिल्लक्ष्मीशब्दाद्वित्वबहुत्वयोरपि नित्यं कचमिच्छन्ति । सलक्ष्मीकम् ॥

अनर्थक । इत्यत्र "नञोर्थात्" [१७४] इति कच् ॥

उच्छ्रद्धकम् अश्रद्धम् । अत्र "शेषाद्वा" [१७५] इति वा कच् ॥ इन्द्र-वंशावंशस्थयोरुप[5]जातिः[6] ॥

सुप्रेयसी करुणया बहुविष्णुमित्र-
ग्रामेप्यभू[1]त्ससुत एव जनो नृपेसिन्[2] ।
सुभ्रातृपुत्रसहिते क्षतनाडिकृ[3]त्त-
तन्त्रीगलो[4]जबलिमाप न देवतापि ॥ २७ ॥

२७. अस्मिंन्भैमौ[7] नृपे नृ[8]न्शासति सति बहवो विष्णुमित्रा यत्र स बहुविष्णुमित्र एवंनामा यो ग्रा[9]मस्तस्मिन्नपि । आस्तां सुप्रसिद्धे पुरा-दिस्थाने[10] । अत्यप्रसिद्धे ग्रामादिस्थानेपीत्यर्थः[11] । ससुत एव । उपलक्ष-णत्वात्सबान्धवोपीत्यर्थः । जनोभूत् । कीदृक् । करुणया कृत्वा शो-

---

१ बी °भूत्सुत. २ ए °न् । त्सुभ्रा°. ३ ए °कृत°. ४ ए °लाजाब°.

---

१ सी उदर°. २ ए °धुके । अ°. सी °धुकः । अ°. ३ ए °पावुत्कः. ४ ए °डुक्क । जि°. ५ ए सी °जाति । सु°. ६ बी °तिः । समे°. ७ ए °सिन्भौमौ. ८ ए बी °ति ब°. ९ ए ग्रामी असि°. १० ए °नेपी°. ११ सी °र्थः । अस्सुत.

भना प्रेयसी प्रियतमा यस्य स सुप्रेयसी । ग्रामेपि लोको न जन्तुवधं चकारेत्यर्थः । तथा[1] देवतापि । आस्तां जनैः[2] । चण्डिकादिदेव्यपि नाप न लेभे । का(क)म् । क्षताश्छिन्ना नाड्योङ्गस्नसा येषां ते[3] क्षतनाडयस्तथा कृत्ता[4] छिन्ना तन्त्रीर्धमनिर्येषां[5] ते तथा गला येषां ते कृत्ततन्त्रीगलाश्च येजाः । देवतानां पुरो ये हिंसिताश्छागा इत्यर्थः । तद्रूपो यो बलिस्तम् । किंभूतेस्मिन्[6] । शोभनो भ्राता कुमारपालो यस्य स सुभ्राता महिपालदेवस्तस्य पुत्रोजयदेवस्तेन[7] सहिते ॥ वसन्ततिलका ॥

व्याधोपि तत्रालमनेकतन्त्री[1]-
कामेकतन्त्रीं[2] ध्वनयन्विपञ्चीम् ।
स्तम्बं[3] सुनाडीकमखण्डनाडिं
श्रित्वा मृगान्कर्षति न स्म हन्तुम् ॥ २८ ॥

२८. तत्र भैमौ सति व्याधोपि मृगान्हन्तुं न कर्षति[8] स्म लक्ष्यं नानयति स्म । कीदृक्सन् । अनेकतन्त्रीकामनेकवल्लकीगुणामेकतन्त्रीं[9] च विपञ्चीं वीणामलमत्यर्थं[10] ध्वनयन्मृगचित्तहरणाय वादयन् । किं कृत्वा । स्तम्बं गुल्मं श्रित्वा । मृगाणां स्वमदर्शयितुं स्तम्बेनान्तर्हितो भूत्वेत्यर्थः । किंभूतम् । शोभना अखण्डाश्च नाड्यः[11] स्नसा यस्य तं सुनाडीकमखण्डनाडिं च ॥

बहुविष्णुमित्र । इत्यत्र "न नाम्नि" [१७६] इति न कच् ॥

---

१ ए °कलत्री°. २ ए °कलत्रीध्व°. ३ ए °म्बं ना°.

---

१ सी °था कृत्ता. २ बी °नः त्चिण्डि°. ३ ए ते न क्ष°. ४ बी कृत्ताछि°. ५ बी °त्रीधम°. सी °त्रीधर्मनयें°. ६ बी °ते तस्मि°. ७ सी °स्ते । व°. ८ बी °तिस्मालक्षं ना.° ९ ए °नेव°. १० बी °लत्य°. ११ सी °ड्यः स्नसा.

सुप्रेयसी । इत्यत्र "ईयसोः०" [१७७] इति न कच् ॥

ससुतः । अत्र "संहात्०" [१७८] इत्यादि[2]ना न कच् ॥

सुभ्रातृ । इत्यत्र[3] "भ्रातुः स्तुतौ" [१७९] इति न कच् ॥

क्षतनाडिकृत्ततन्त्री । इत्यत्र "नाडी०" [१८०] इत्यादि[4]ना न कच् ॥ स्वाङ्ग इति किम् । सुनाडीकं स्त[5]म्बम् । अनेकतन्त्रीकां विपञ्चीम् ॥ अन्ये [6]त्वाहुः । न पारिभाषिकं स्वाङ्गमिह गृह्यते किं तु स्वमात्मीयमङ्गं स्वाङ्गम् । आत्मा चेहान्यपदार्थस्तस्याङ्गमवयवस्तस्मिन्निति । तेषां[7] मते । अखण्डना[8]डिं स्तम्बम् । एकतन्त्रीं विपञ्चीम् । इन्द्रवं[9]शा ॥

निष्प्रवाणिवसनाः करभो[1]रुसुभ्रवनस्तमनसः क्रतुपूचैः ।

दाक्षिभार्गवमुखा अतिकै[2]केय्यात्मजे पशुवधं जहुरस्मिन् ॥२९॥

२९. केकयस्य राज्ञोपत्यं स्त्री कैकेयी तस्या आत्मजो भरतः । अमार्याघोषादि[10]महाधर्मेण तमप्यतिक्रान्तेस्मिन्नस्मौ सति दाक्षिभार्गवमुखा मुनयः क्रतुपूचैः पशुवधं [11]जहुस्तत्यजुः । प[12]शुवधपरिहारेण [13]क्रतूंश्चक्रुरित्यर्थः । किंभूताः सन्तः । प्रोयतेस्यामिति प्रवाणी तन्तुवा[14]यशलाका । सा निर्गतास्मादिति निष्प्र[15]वाणि । तत्रादचिरोद्धृतमित्यर्थः । "क्लीबे" [२. ४. ९७] इति ह्रस्वः । यद्वा । ऊयतेस्यां [16]वानिर्दे(र्द)शाः । प्रसृता [17]वानिः प्र[18]वाणिः । सा निर्गता तन्तुभ्योस्ये[19]ति नि-

१ ए °भोरुस्तुभ्रून°. सी °भोरुसुनन°. २ बी °कैकय्या°.

१ बी सी °हा इ°. २ ए °ना क°. ३ बी °त्र भानुः स्तु°. ४ ए °ना क°. ५ ए स्तम्बा । अ°. ६ ए त्वाहु नापा°. ७ ए °षां ख°. ८ ए °ना स्त°. ९ बी °वंश । नि°. १० सी °दिना ध°. ११ ए जहुस्त°. १२ ए सी °शुप°. १३ ए क्रतुंश्च°. १४ बी °यसला°. १५ सी °वाणं । तत्र्याद°. १६ ए °निर्देशाः. सी °निर्देशाः. १७ सी वानि प्र°. १८ ए °वाणि । सा. १९ ए °ति निःप्रवा°.

ष्प्रवाणि सदशमित्येके । तद्वसनं येषां[1] ते निष्प्रवाणिवसनाः । यागाचार्यत्वाद्यागक्रियाकाले माङ्गलिक्याय परिहितसदे[2]शनूतनवस्त्रा इत्यर्थः । तथा करभो[3]रूभिः[4] सुभ्रूभिश्च स्त्रीविशेषैरनस्तमक्षिप्तमजितं मनो येषां ते । जितेन्द्रियाश्चेत्यर्थः ॥ स्वागता ॥

मैत्रे[1]यिकाप्युग्रधियोपि दाविका-
कूलैर्यवैर्दाविकपूर्वदाविकाः ।
ते[2] दार्घसत्राहुतिमत्र चक्रिरे
प्रालेयभ[3]श्रायस तद्वचोवशात् ॥ ३० ॥

३०. अत्र जगति दा[5]विकपूर्वदाविका दे[6]विकायां नद्यां भवा पूर्वदे[7]वि[8]कानाम्नि प्राच्यग्रामे भवा[9]श्च ते दाक्षिभार्गवमुखा मुनयो[10] दार्घसत्री दीर्घसत्रे[11] चिरकालीनयागे भवा याहुतिरा[12]ह्वनं तां चक्रिरे । कैः कृत्वा । दाविकाकूलैर्देविकाया नद्याः कूले भवैर्यवैः । न तु पशुभिरित्यर्थः । कस्मात् । प्रलयाद्धिमाद्रेरागतं प्रालेयं हिमं विनयादिप्रधानत्वेनातिशीतलत्वात्तद्वद्भाति प्रालेयभं तथा श्रेयसो दयाप्रधानधर्मस्येदं श्रायसं[13] च धर्मसंबद्धं यद्वचो भैमिवचनं तस्य यो वश आयत्तता तस्मात् । किंभूताः । मित्रयुराद्यपुरुषो गोत्रस्य प्रवर्तयिता तस्य कर्म मैत्रेयिका मित्रयुप्र[14]वर्तितो यागे छागादिवधस्तस्या आप्तिः का-

१ सी °त्रेयका°. २ ए ते दीर्घ°. ३ बी °भस्राय°.

१ ए ते निःप्रवा°. २ बी °दसनू°. ३ ए सी °भोरुभिः. ४ सी °भिः शुश्रूषिश्च. ५ सी °विकापू°. ६ ए देका°. ७ सी °देवेका°. ८ ए °विना°. ९ सी °श्च त दा°. १० ए सी °यो दी°. ११ ए °सत्रि चि°. १२ ए बी °राड्डव°. १३ ए °सं ब°. १४ सी °प्रवृत्तितो.

येत्वेन लाभस्तयोग्रा हिंसा धीर्येषां तेपि । आम्नाया[1]यात[2]च्छागव[3]धक[4]र्मणोपीत्यर्थः ।। इन्द्रवंशा ।।

स शां[1]शपस्तम्भभुजोतिनैया-
यिकोतिसौवागमिको मृगव्यात् ।
ररक्ष सत्त्वानि धनानि वैही-
नराणि वै[2]हीनरिवन्महौ[3]जाः ॥ ३१ ॥

३१. स भैमिर्मृगव्याद[5]खेटात्सत्त्वा[6]न्यारण्यान्पशून्ररक्ष । यतः । कीदृक् । सर्वधर्मप्रधानदयाधर्मस्या[7]ख्यातृत्वेन परस्परवाक्यविरोधादिदोषरहितत्वे[8]न च सर्वागमेषु शोभन आगमः स्वागमः श्रीद्वा[9]दशाङ्गं तं सदार्हतमुनिपर्युपास्त्या[10]तिशयेन वेत्त्यधी[11]ते वातिसौवागमिकः । एतेन सम्यग्ज्ञानमुक्तम् । तथातिनैयायिकोत्यन्तं न्यायेन प्राणिवधरक्षादिना धर्मं[12] न[13]येन चरन् । एतेन सम्यक्क्रियापरत्वोक्तिः । तथा शिंशपाया वृक्षभेदस्य विकारः शां[14]श[15]पो यः स्तम्भस्तद्वदतिसारौ भुजौ[16] यस्य सः । तथा महदोजः स्व[17]मित्रबन्धुमित्रसैन्या[18]दिजनितं बलं यस्य सः । एतेन सर्वशक्तिसंपन्न इत्युक्तम् । यथा[19] वैहीनरिर्वहीनरस्यापत्यं विज्ञो[20] न्यायी शक्तश्च सन्[21]वैहीनराणि वहीनरस्य स्वपितुः सत्[22]कानि धनानि रक्षति ।। उपेन्द्रवज्रा ।।

---

१ **ए** शांसप°. २ **ए** वैरीन°. ३ **ए** °हौजः । स.

---

१ **बी सी** °यात°. २ **बी** °तयागच्छा°. ३ **ए** °वधः कर्मणो°. ४ **बी** °कर्म्मणो°. ५ **सी** °खेलात्स°. ६ **ए** °त्त्वानार°. ७ **ए** °स्यातृ°. ८ **सी** °त्वे च. ९ **सी** °दशङ्ग. १० **सी** °स्त्यावे°. ११ **सी** °धीयैते. १२ **बी** धर्म्मं न°. **सी** धर्मं न°. १३ **ए** °ये च°. १४ **सी** °शपायस्त°. १५ **ए** °पो यस्त°. १६ **सी** भुजो य°. १७ **बी सी** स्वब°. १८ **ए** °न्याजनितब°. १९ **सी** °था विही°. २० **बी** °ज्ञो ज्ञायी. २१ **बी** °णि वाही°. २२ **बी सी** सत्कानि.

सौवश्विदौवारिकमन्त्रिदौवा-
रपालि सौवस्तिकमुख्यलोकः ।
मांसान्यतिस्फैयकृतोत्र नैय-
ग्रोधं कषायं नु न भोक्तुमैच्छत् ॥ ३२ ॥

३२. स्पष्टम् । किं तु । शोभनोश्वोस्य स्वश्वस्तस्यापत्यं सौवश्विः । दौवारिको द्वारे नियुक्तः । दौवारपालिर्द्वारपालस्यापत्यम् । अतिस्फैयकृतो दयादिगुणैः स्फा(स्फ्य)कृतस्यर्षेरपत्यमतिक्रान्तः सन् । अत्र भैमौ सति ॥

निष्प्रवाणि । इत्यत्र "निष्प्रवाणिः" [१८१] इति कजभावो निपात्यः ॥

सुभ्रू । करभोरू । अत्र "सुभ्र्वादिभ्यः" [१८२] इति न कच् ॥

सप्तविंशः पादः ॥

ञिति । दाक्षि ॥ णिति । भार्गव । इत्यत्र "वृद्धिः०" [१] इत्यादिना वृद्धिः ॥

कैकेयी । मैत्रेयिका । प्रालेय । इत्यत्र "केकय०" [२] इत्यादिना वृद्धियादेश्च शब्दरूपस्येयादेशः ॥

दाविक । दाविकाकूलैः । पूर्वदाविकाः । शांशप । दार्घसत्रे । श्रायस । इत्यत्र "देविका०" [३] इत्यादिना वृद्धिप्रसङ्ग आकारः ॥

---

१ सी मांसम्यतिस्पैय°. २ सी °ति स्पैय°. ३ सी °यग्रौधक°. ४ ए °ग्रोधे क°. ५ ए भोक्तमै°. ६ सी °त् । सेष्टः । किं.

---

१ बी स्पष्टः । किं. २ बी °स्य सश्व°. ३ ए °वश्वि दौ°. ४ सी °ति सैन्यकृ°. ५ सी °णैः कृ°. ए °णैः स्याकृ°. ६ ए °स्यवर्षे°. सी °स्यपरत्य°. ७ बी °त्यमिति°. ८ बी भैमो स°. ९ सी सुभ्रूः । किर°. १० ए °भोरु । अ°. ११ सी °द्धिः । किंके°. १२ ए °श्व रू°. १३ ए °वि दा°. सी °विकादादिकाकलैः. १४ बी °विककू°. १५ बी °त्र । प्राय°.

जिति[1]। वैहीनरि ॥ णिति । वैहीनराणि । अत्र "वहीनरस्यैत्" [४] इत्यैत् ॥

नैयायिकः । सौवागमिकः ॥ जिति । सौवश्वि । इत्यत्र "स्वः" [५] इत्यादिनैदौतावागमौ ॥

दौवारिक[2]। सौवस्तिक[3]। स्फैयकृत[4]ः। अत्र "द्वारादेः" [६] इत्यौदैतावागमौ ॥ श्वादेरिति" [७. ४. १०.] इति प्रतिषेधाद्वारादिपूर्वाणामपि स्यात् । दौवारपालि ॥

नैयग्रोधम् । अत्र "न्यग्रोधस्य[5]०" [७] इत्यादिनैदागमः ॥ उपजातिः ॥

नैयङ्क्व्यासीन्न्याङ्क्वत्वक्पटानां
त्वग्दुःप्रा(ग्दुष्प्रा)पास्मिन्घोषयत्याश्वमारिम् ।
स्वाङ्गिव्याङ्गिश्वाभस्त्रिभिर्व्यावभाषी-[1]
निष्ठैः श्वाकर्ण्युच्चकैः पल्लिदेशे ॥ ३३ ॥

३३. न्याङ्क्वी[6] न्यङ्कुमृग[7]भेदस्तत्का त्वक् चर्म पटो[8] येषां न्याङ्क्[9]वत्वक्पटानां मुनीनां शबराणां[10] वा[11] नैयङ्क्वी त्वक् दुष्प्रापासीत् । मृगाणां मारणाभावात् । क सति । अस्मिन्[12]भैमौ । किंभूते[13]। व्याव-[14]भाषीनिष्ठैर्विनिमयेनान्योन्यं भाषणे तत्परैः सद्भिः स्वाङ्गिव्याङ्गि[15]श्वाभस्त्रिभिः [16]स्वङ्गव्यङ्गश्वभस्त्राणामपत्यैः प्रयोज्यकर्तृभिरुच्चैरुदात्तस्वरेणा-

१ ए °षीनष्ठैः श्वा°.

१ सी °ति । विवै°. २ ए बी °रिकः । सौ°. ३ ए बी °स्तिकः । स्फै°. ४ सी °कृत । अ°. ५ ए °धस्यादि°. ६ बी °वीनाङ्कु°. ७ सी °ङ्कमृग°. ८ ए °टो षां. ९ ए °ङ्कत्व°. १० ए °णां नै°. ११ बी वा नय°. १२ ए °स्मिन्भौमौ. १३ सी °भूतैर्व्याव°. १४ ए °भाषानिष्ठेविनि°. बी °भाषानिष्ठैर्विनये°. १५ बी °ङ्गिस्त्राभ°. १६ ए सी °भिः श्वङ्ग°.

श्वमारिं घोषयति । क । श्वाकर्णे श्वाकर्णेः श्वकर्णापत्यस्य पल्लीपतेः सत्के पल्लिदेशेपि ॥

नैयङ्कवी न्याङ्कव । इत्यत्र "न्यङ्कोर्वा" [८] इति वा-ऐदागमः ॥

व्यावभाषी । स्वाङ्गि । व्याङ्गि । इत्यत्र "न ञ्स्वाङ्गादेः" [९] इत्यैदौतौ न ॥

श्वाभस्त्रिभिः । अत्र "श्वादेरिति" [१०] इति नौत् ॥

श्वाकर्णे । अत्र "इञः" [११] इत्यौत्त्र ॥ वैश्वदेवी छन्दः ॥

न श्वापदं श्वापदिकोपि शौवापदामिषेच्छुः पलमाददेसिन् ।
न प्रोष्ठपादोप्यभवन्नृशंसो धर्मात्तदात्युत्तरभद्रपादः ॥ ३४ ॥

३४. अस्मिन्नृपे सति शुन इव पदमस्य श्वापदमारण्यकः पशुर्मृगचित्रकादिस्तेन चरति श्वापदिकोपि व्याधोपि श्वापदं श्वापदस्य मृगस्य विकारं पलं मांसं नाददे श्वापदवधेन नाग्रहीत् । कीदृक् । शौवापदामिषेच्छुः श्वापदसत्कमांसमिच्छन् । एतेन राज्ञोतिप्रचण्डाज्ञतोक्ता । तथा तदा भैमे राज्यकाले प्रोष्ठपादोपि प्रोष्ठपदाभिश्चन्द्रयुक्ताभिर्युक्ते काले जातोपि नरो नृशंसो हिंस्रकर्मा नाभूत् । प्रोष्ठपदासु हि जातोतिनिस्त्रिंशः स्यात् । यदुक्तम् ।

---

१ बी न प्रौष्ठ°. २ बी °शंशोध°.

---

१ सी °कर्णेः श्रावर्णे श्व°. २ ए °र्णे श्वक°. ३ ए °पतेसत्के: प°. ४ ए बी ञस्वङ्गा°. ५ बी इत्येदौ°. ६ बी नौनु । स्वाक°. सी नौनु । श्वा°. ७ बी °वीरछन्दः. ८ सी °न्दः । नाश्वा°. ९ ए °मश्वाश्वा°. १० सी °ण्यकप°. ११ ए °शुमृग°. १२ सी °दिकापि श्वा°. १३ सी °कृ । पादाशौवामि°. १४ ए °ज्ञोपि प्र°. १५ बी राजका°. १६ ए सी °ष्ठपदो°. १७ बी °पि प्रौष्ठ°. १८ सी °ले नृ°.

परदारमद्यसेवी दारुणकर्मा[1] निशाचरस्तीक्ष्णः ।
विषमः प्रसह्य हर्ता प्राक्प्रोष्ठपदे भवति जातः ॥

प्राक्प्रोष्ठपदा पूर्वभद्रपदा यत्र स प्राक्प्रोष्ठपदः कालस्तत्र[2] । यतः । कीदृक् । धर्मादत्युत्तर[3]भद्रपाद उत्तर[4]भद्रपदासु[5] जातमतिक्रान्तः । उत्तर[6]भद्रपदासु हि जातोतिधार्मिकः स्यात् । उक्तं च । वक्ता सुखी[7] प्रजावान्धार्मिको द्वितीयास्वित्यादि । द्वितीया[8]सूत्तरभद्रपदासु । श्रीकुमारपालोत्पादितयाहिंसादिविषयया धर्मवासनया तस्मादप्यतिधार्मिक इत्यर्थः ॥

श्वापदम् शौवापद । इत्यत्र "पदस्यानिति वा" [१२] इति वा-औत् ॥

अनितीति किम् । श्वापदिकः ॥

प्रोष्ठपादः[9] । उत्तरभद्रपादः । अत्र "प्रोष्ठ०" [१३] इत्यादिनोत्तरपदस्य वृद्धिः ॥ उपजातिः ॥

तं पूर्वनैदा[10]घरविप्रतापमनुव्रजन्सोपि न जन्तुहिंसाम् ।
चक्रे सुपाश्वाल[1]क[2]सर्वपाश्वालकार्धपाश्वालकलोक उच्चैः ३५

३५. सोपि हिंसकत्वेन[11] सर्वत्र प्रसिद्धोपि सुपाश्वालकसर्व[12]पाश्वालकार्धपाश्वालकलोकः[13] सुपश्वालेषु[14] सर्वेषु पश्चालेष्वर्धेषु पश्चालेषु च भवो यो लोकः स जन्तुहिंसामुच्चैर्न चक्रे । यतः । पूर्वनैदाघो निदाघस्य पूर्वस्मिन्भागे भवो यो रविस्तद्वत्प्रतापो यस्य तं तथा[15] तं भैमिमनुव्रजन्सेवकत्वात्तदाज्ञाप्रतिपालनेनानुगच्छन् ॥

---

१ ए °लका°. २ सी °कलो°.

---

१ बी °र्माभिनि°. २ ए °त्र । यः की°. ३ ए °रभाद्रपद. ४ ए °रभाद्र°. ५ सी °सु हि. ६ ए °रभाद्र°. ७ सी °खी च प्र°. ८ ए °यास्वसू°. ९ बी वात्. १० सी °दः । अ°. ११ सी °सत्वे°. १२ ए °कलो°. १३ सी °लकसु°. १४ ए बी सुपाश्वा°. १५ सी °था भै°.

पूर्वनैदाघ । इत्यत्र "अंशाद्दतोः" [१४] इत्युत्तरपदवृद्धिः ॥

सुपाञ्चालक । सर्वपाञ्चालक[1] । अर्धपाञ्चालक[2] । इत्यत्र "सुसर्व०" [१५] इत्यादिनोत्तरपदवृद्धिः ॥

पदातिभिः सोपरकार्ष्णमृत्तिकपूर्वपाञ्चालकपौर्वमद्रैः[1][2] ।
हालामथो दारितभाण्ड आस्यद्द्वैवार्षिकीं[3] वाधिकवार्षिकीं[4] च ॥ ३६ ॥

३६. स्पष्टम् । किं तु । अपरकार्ष्णमृत्तिकपूर्वपाञ्चालकपौर्वमद्रैरपरकृष्णमृत्तिकानाम्नि प्राग्ग्रामे[3] पूर्वेषु पञ्चालेषु पूर्वेषु मद्रेषु च भवैः । द्विवार्षिकीं द्वे वर्षे भूतामधिकवार्षिकीं चाधिकानि द्वाभ्यां वर्षाभ्यां सकाशादतिरिक्तानि वर्षाणि भूतां च ॥

सीदतामदित धान्यमसौ त्रै-
वा(व)र्षिकं[5] यदिह तेन कदापि ।
न द्विकौडविक आढ्यगृहं[6] को-
प्यभ्यगादधिककौडविको[7] वा ॥ ३७ ॥

३७. असौ भैमिर्यद्यस्माद्धेतोः सीदतां मांसादिविक्रयनिषेधेनावर्तमानानां सौनिककल्लालादीनां[4] त्रैवा(व)र्षिकमतिबहुत्वेन[5] त्रीणि वर्षाणि भावि धान्यमदित ददौ । तेन कारणेनेह जगति कोप्याढ्यगृहं[6] कदापि[7] नाभ्यगात् । कीदृक्सन् । द्वौ कुडवौ सेतिके प्रयोजनमस्य

१ बी °कपूर्व°. २ सी °मद्रैरपकृष्ण°. ३ बी °द्विषर्षि°. ४ बी °कवर्षि°. ५ बी °र्षिकीं य°. ६ ए °ढ्यकींगृ°. ७ सी °भ्यद°.

१ ए °लकः । अ°. २ ए °क पौर्वमद्रैरपरकृ°. ३ ए प्राग्भागे पूर्वेषु पाञ्चा°. ४ बी °कल्लोला°. सी °कल्पपाला°. ५ बी °तिबाहु°. ६ सी °हं तदाप्य ना°. ७ बी °दाप्यना°.

द्विकौडविको धान्यसेतिकाद्वयार्थी । एवमधिककौडविकः ॥ स्वागता ॥

नृपः स्वपत्पाञ्चकलायिकार्ह-
वृत्तिद्विसांवत्सरिकाङ्गरक्षे ।
द्वैशाणशाणानिशितासिपार्श्वो-
शृणोन्निशीथे स्वरमन्यदार्तम् ॥ ३८ ॥

३८. अन्यदा नृपो निशीथ आर्तं सदुःखं स्वरमशृणोत् । कीदृक् । द्वाभ्यां शाणाभ्यां मानभेदाभ्यां क्रीता द्वैशाणी । श्रेष्ठत्वेन महार्घेत्यर्थः । या शाणा तेजनोपलस्तस्यां निशितस्तीक्ष्णीकृतो योसिः स पार्श्वे यस्य सः । किंभूते निशीथे । पञ्च कलाया मानमस्य "मानम्" [६ ४. १६९] इतीकणि पाञ्चकलायिकम् । तद्धितान्तमिदम् । स्वर्णादिपरिमाणविशेषस्य नाम । पाञ्चकलायिकमर्हवृत्तिर्दिनजीविका येषां ते पाञ्चकलायिकार्हवृत्तयः । शूरत्वाचुकतादिगुणैर्महावृत्तय इत्यर्थः । द्विसांवत्सरिकाश्च द्वौ संवत्सरौ भूताः । चिरकालीना इत्यर्थः । येङ्गरक्षा निशीथस्य निद्राभरहेतुत्वात्स्वपन्तस्ते यत्र तस्मिन् ॥ उपजातिः ॥

नृपोथ दध्याविति कापि शोका-
पूरान्मुमूर्षन्त्यभिरोदितीह ।

१ बी सी °त्तिर्द्विसां°. २ ए °क्षे । द्वेशा°. ३ सी °शाणनि°. ४ ए °दात्त । अ°. ५ बी °रोदती°.

१ सी °दुःखस्व°. २ बी °मसृणो°. ३ बी °दृक्सन् । द्वा°. ४ सी °र्थः । अथ वा शा°. ५ बी °कण् पा°. ६ बी °हवृत्तिर्दिनूजी°. ७ बी °यः । सूरत्वानुक्तता°. ८ सी °त्वानुद्धतादिभिर्गुणोर्म°. ९ ए °दिर्गुणै°.

विदीर्यते[1] द्वैकुलिजिक्[2]युखा ह्या-
र्धकौडविक्यभ्यधिकान्नपूरात् ॥ ३९ ॥

३९. पूर्वार्धं स्पष्टम् । युक्तं चैतत् । यदसौ[1] शोकापूरादभि[2]रोदिति । हि यस्मादार्धकौडवि[3]की कुडवस्यार्धेन क्रीतोखा स्थाली द्वैकुलिजिकी द्वे कुलिजे धान्यमानभेदौ पचन्[4]ती संभवन्[5]त्यवहरन्ती वा सत्यभ्यधिकान्नपूराद्विदीर्यते ॥

राजार्धकंसिकमथो परिधाय वस्त्र-
मात्तार्ध[3]कौडविकगुण्ठननीलवासाः ।
प्रावाहणेयपदिकान्स्वपतः प्रवाह-
णेयेतरानपि विहाय ततश्चचाल ॥ ४० ॥

४०. अथो राजा ततः स्थानाच्चचाल । किं कृत्वा । कंसो व्रीह्यादिमानम् । अर्धं कं[6]सस्यार्धकं[7]सः प्रयोजनमस्यार्धकंसिकम् । अल्पमूल्यमित्यर्थः । वस्त्रं परिधाय[8] तथा स्वपतः[9] प्रावाहणेयपदिकान्प्रवाहणः[10] शस्त्राजीवी विप्रस्तस्यापत्यानि शुभ्रा[11]दित्वादेयणि[12] [६. १. ७३.] प्रावाहणेया[13] ये पदिकाः पत्त[14]यस्तान्प्रवाहणेयेतरा[15]नपि विहाय[16] । कीदृक्सन् । केनाप्य[17]नुपलक्षणार्थमात्तं गृहीतमार्धकौडविकं कुडवार्धेन क्रीतं गुण्ठनं सकलशरीराच्छाद[18]कं नीलं वासो वस्त्रं येन सः ॥

---

१ ए °र्यंत द्वैकलि°. बी °र्यत द्वेकु°. २ सी °जित्सुखा. ३ सी °र्धकोड°.

---

१ ए यसौ. २ ए °भि । हि. ३ सी °विक्य कु°. ४ सी °चती सं°. ५ ए °वन्तीत्यवह°. ६ ए कंसः प्र°. ७ सी °कंसप्र°. ८ सी °यतः प्रा°. ९ बी °तः प्रावा°. १० ए °हणा श°. ११ बी °भ्रादत्वा°. १२ बी °णि प्रवा°. १३ सी °णेयप°. १४ सी °त्तयो यस्मात्प्रवा°. १५ बी °रामपि. १६ ए °हायः । की°. १७ बी °नाप्युप°. १८ बी °दनं नी°.

पूर्वपाञ्चालक । इत्यत्र "अमद्रस्य दिशः" [१६] इत्युत्तरपदवृद्धिः ॥ अमद्रस्येति किम् । पौर्वमद्रैः[1] ॥

अपरकार्ण्णमृत्तिक । इत्यत्र "प्राग्ग्रामाणाम्" [१७] इत्युत्तरपदवृद्धिः ॥

द्विवार्षिकीम्[2] । अधिकवार्षिकीम् । अत्र "संख्या०" [१८] इत्यादिनोत्तरपदवृद्धिः ॥ अभाविनीति किम्[3] । त्रैवा(व)र्षिकं धान्यम् ॥

मान[4] । द्विकौडविकः । अधिककौडविकः ॥ संवत्सर । द्विसांवत्सरिक । इत्यत्र "मान०" [१९] इत्यादिनोत्तरपदवृद्धिः ॥ अशाणकुलिजस्येति किम् । द्वैशाणे[5] । द्वैकुलिजिकी[6] ॥ अनाम्नीति किम् । पाञ्चकलायिक ॥

अर्धकौडविक । आर्धकौडविकी[7] । इत्यत्र "अर्धात्०" [२०] इत्यादिनोत्तरपदवृद्धिः । वा त्वादेः । परिमाणात्पूर्वस्य त्वर्धशब्दस्य वा स्यात् ॥ अनत इति किम् । आर्धकंसिकम् ॥

प्रवाहणेयं[8][9] । प्रावाहणेय । इत्यत्र "प्राद्०" [२१] इत्यादिनोत्तरपदवृद्धिरादेः पूर्वस्य तु प्रस्य वा ॥ वसन्ततिलका ॥

समलक्षि स यान्प्रवाहणेयकतो[1][2]प्यप्रावाहणेयकः[3] ।
तादृग्वेषः प्रवाहणेयिभिरेकप्रावाहणेयिवत्[4] ॥ ४१ ॥

४१. स राजा प्रवाहणेयकतोपि[10] प्रवाहणेयानां प्रवाहणस्यापत्यानां समूहादपि यान्सन् । बहूनां रक्षापालानां[11] मध्यान्निर्गच्छन्नपीत्यर्थः ।

१ सी °णेयेय°. २ बी °यकातोप्यप्रवा°. ३ बी °यकं प्रावाहणेयानां समूहः. ४ ए °त् । रा°.

१ बी °मद्रेः । अ°. २ सी °र्षिका । अत्र. ३ ए °म् । द्वैशा°. ४ सी मानार्द्धकौ°. ५ ए °ण । द्वैकु°. ६ बी °कुलजि°. ७ ए °र्धकाड°. ८ बी °णेत्य°. ९ सी °य प्रवाहणेत्य°. १० सी °हतो°. ११ सी रक्षपा°.

प्रवाहणेयिभिः प्रवाहणेयस्यापत्यै[1]र्युवभी रक्षापालैः समलक्षि । क इव । एकप्रवाहणेयिवत् । कोप्येकोयं प्रवाहणेयस्यापत्यं युवा यातीति ज्ञातो न तु राजेत्यर्थः । यतो नास्ति प्रावाहणेयकं प्रावाहणेयानां समूहः सहचरं यस्य[2] सः । एकाकीत्यर्थः । तथा[3] तादृग्वेषः परिहितात्पमूल्यनीलवस्त्रत्वेन प्रावाहणे[4]यिवेषसदृशवेषैः[5] ॥

प्रवाहणेयिभिः[6] । प्रावाहणेयि[7] । प्रवाहणेयकर्तः[8] । प्रावाहणेयकः । अत्र "एयस्य" [२२] इत्युत्तरपदवृद्धिः । आदेस्तु प्रस्य वा ॥ वैतालीयं छन्दः[10] ॥

आचापलेनैष जयन्नचापलं
क्षितेरनैश्वर्यमनैपुणं विना ।
पथानशौ[1]चेन ययौ[2] स तस्य य-
न्नाकौशलं[3] पथ्यपथ्ये(थे) ह्यकौशलम् ॥ ४२ ॥

४२. स एष राजानशौचेना[11]शुचित्वरहितेन पथा[12] कृत्वा ययौ । कीदृक्सन्[13] । आचापलेन स्थिरचित्त[14]तया क्षितेः पृथ्व्या अचापलं स्थिरतां जयन् । निर्भय इत्यर्थः । तथानैश्वर्यमनैपुणं विनासामर्थ्ये[15]नादक्षतया च रहितः । शक्तो[16] दक्षश्चेत्यर्थः । युक्तं यदसौ शुचिना पथा ययौ । यद्यस्मात्तस्य भूमेः पथि[17] मार्गविषये[18] आकौशलमनिपु[19]-

१ ए °नशोचे°. २ ए °यौ न त°. सी °यौ च त°. ३ सी °लं पाथ्ये.

१ ए °त्यैयुव°. २ ए °स्य । ए°. ३ सी °था सदृ°. ४ बी °णेयवे°. ५ ए °षः । प्रावा°. ६ बी °भिः प्रवा°. ७ ए °यि प्रावा°. ८ बी °तः प्रवा°. ९ सी °यकन्तः । अ°. १० बी °न्दः । अचापलेन्नैष. ११ ए °नासुचि°. १२ ए पथ्या कृ°. १३ बी °न् । अचा°. १४ बी °त्तनाया. १५ बी °र्थ्येन द°. १६ ए शक्तौ द°. १७ ए परिमा°. १८ बी °षये अकौ°. १९ ए आकोश°.

णत्वं नास्ति । मार्गे ह्यसौ कुशल[1] एवेत्यर्थः । तथा हि यस्मात्तस्यापथेमार्गेकौशलम् । अथ च पथि सदाचारेपथेनाचार इत्यर्थः । शब्दच्छलेनायमर्थान्तरन्यासः । इन्द्रवंशावंशस्थयोरुपजातिः[2] ॥

आनैश्वर्यानैपुणाशौचरुग्णो यल्लोकस्तत्किं मयेत्यन्यदुःखैः ।
दुःखीत्याटीद्यन्नृपस्तेन नाक्षैत्रज्ञेप्याक्षैत्रज्ञ्य(ज्ञ?)मेषोन्वमंस्त ४३

४३. यद्यस्माल्लोक आनैश्वर्यं दारिद्र्यमसामर्थ्यं वा । आनैपुणमज्ञा(ज्ञ)ता[3] । आशौचं रोगादिनाशुचित्वम् । द्वन्द्वे तै रुग्णः पीडितो वर्तते । कस्या अपि स्त्रिया एवं शोकेन रोदनात् । तत्तस्माद्धेतोर्मया किम् । आनैश्वर्यादिदुःखादरक्षक[4]त्वेन व्यर्थनृपशब्दार्थत्वान्मया नृपेण न किमपीत्यर्थः । इत्येवंप्रकारेणान्य[5]दुःखैरानैश्वर्यादिविषयैर्लोकस्य कष्टैर्दुःखी सन्नृपो[6] भैमिर्यद्यस्मादाटीदभ्राम्यत्तेन हेतुनैष नृपो[7]क्षैत्रज्ञे[8]पि क्षेत्रज्ञ आत्मा न[9] तथाक्षेत्रज्ञः परस्तस्य भावेपि लोकस्य परत्वेप्याक्षे(क्षै)त्रज्ञं[10][11] स्वस्माल्लोकस्य परत्वं नान्वमंस्त । प्रजादुःखदुःखितत्वादात्मनो भिन्नां प्रजां नाज्ञासीदित्यर्थः ॥

अक्षैत्रज्ञ्ये(ज्ञे?) आक्षैत्रज्ञ[12]म्[13] । अनैश्वर्यम् आनैश्वर्यं[14] । अकौशलम् आकौशलम् । अचापलम् आचापलेन[15] । अनैपुणम् आनैपुणं[16][17] । अनशौचेन[18] अ(आ)-

१ ए सी °ष्याक्षेत्र°.

१ सी कुल. २ ए °तिः । अनै°. ३ ए सी °मन्यता. ४ ए °रक°. ५ ए °न्यदुखै°. ६ सी सनृपो. ७ ए सी °पोक्षेत्र°. ८ ए बी °त्रज्ञेपि. ९ सी आत्म न. १० ए °त्रज्ञां स्व°. बी °त्रज्ञंस्तसा°. ११ सी °ज्ञं अनै°. १२ ए आक्षेत्र°. १३ ए °म् । आ°. १४ सी °श्वर्यं । अ°. १५ बी °पलान् । अ°. १६ बी सी °म् अनै°. १७ सी °पुणः । अ°. १८ बी °नशोचे°.

शौच । इत्यत्र "नञः०" [२३] इत्यादिनोत्तरपदवृद्धिरादेस्तु नञो वा ॥ शालिनी छन्दः ॥

किं कौरुजङ्गल्युत वैश्वधेनवी
न कौरुजाङ्गल्युत वैश्व[1]धैनवी ।
इयं हि सौवर्ण[2]वलज्यदो[3] मृशं-
स्तरो[4]रधः[5] स्त्रीं रुदतीं ददर्श सः ॥ ४४ ॥

४४. स भैमिस्तरोरधो रुदतीं स्त्रीं ददर्श । कीदृक्सन् । अदः एतन्मृशं[1]स्तस्यास्तथाविधरू[2]पनेपथ्यादिदर्शनात्परिभावयन् । तदेवाह । इयं स्त्री किं[3] कौरुजङ्गली कु[4]रुसंब[5]द्धा जङ्गला नि[6]र्जला देशाः कुरु[7]-जङ्गलास्तेषु भ[8]वा । उत किं[9] वा वैश्वधे[10]नवी विश्वधेनौ देशभेदे भवा । उताथ वेयं न कौरुजाङ्गली नापि वैश्वधे(धै)नवी । किं त्वियं स्त्री हि स्फुटं सौवर्णवलजी[11] सुवर्णवल[12]जे पुरे भवा ॥ इन्द्रवंशावंश[13]-स्थयोरुपजातिः ॥

अथेत्यवोचत्स पितेव वत्से
सौवर्णवालज्यसि किं सदुःखा ।
सौभाग्यदर्पादपसौहृदेन
सौहार्दिनी किं विधुतासि पत्या ॥ ४५ ॥

---

१ ए °श्वधेन°. २ बी °र्णबल°. ३ ए °दो भृशंततोर°. ४ बी °रोदधः. ५ बी °धः स्त्री रु°. सी °धः स्त्री रुदन्ती द°.

---

१ सी °स्तथा°. २ बी °पमने°. ३ ए किं कुरु°. ४ बी °कुरसं°. ५ ए °द्धाजाङ्ग°. ६ बी निजाला. ७ ए °रुजाङ्ग°. ८ ए भवो कि वा. ९ सी किं सदुः°. १० ए °धेनौ. ११ ए °जी सौव°. १२ बी °लपु°. १३ बी °वंश°.

४५. अथ स राजा पितेवावोचत् । तथा हि । हे वत्से[1] सौवर्णवालर्जि[2] किं किमिति सदुःखासि किं त्वं सौहार्दिनो सुहृदः सुहृदयस्य वेदं भावः कर्म वा "तस्येदम्" [६. ३. १६०.] इत्यणि युवाद्यणि [७. १. ६७.] वा सौहार्दं पत्यौ प्रेम तद्वती[3] सत्यपि पत्या विधुतासि[4] पराभूतासि । यतः[5] । सौभाग्यदर्पादपसौहृदेन त्वय्यपगतस्नेहेन ॥ उपजातिः ॥

सौरसैन्धव उ सौह्मनागरो[1] वानुशातिकिरपारलौकिकः ।
त्वां न दुर्व्रतिक आग्निवारुणीं गामिवेह विनिहन्तुमाहरत् ४६

४६. उ हे वत्से सुरसिन्धोर्गङ्गायाः समीपो देशोपि सुरसिन्धुर्वाराणसी तत्र जातः । "कोपान्त्याच्चाण्" [६. ३. ५६.] इत्यणि सौरसैन्धवः[6][7] सौह्मनागरो[8] वा सुह्मनगरे प्राचां नगरे भवो[9] वा । एतद्देशभवो ह्यतिदाम्भिकः स्यादि[10]त्यतिदाम्भिक इत्यर्थः । कोपि दुर्व्र[11]तिको दुष्टव्रती कापालिकादि[12]र्दुर्विद्यासाधनाय[13] त्वां विनिहन्तुमिह स्थान आहरन्न किमानिनाय । नञत्र लोकभाषया किमर्थे[14] । यतः । कीदृक् । आनुशातिकिरनुशतिकस्य[15] चोरस्यापत्यं कुलक्रमागतचौरिकाबलेन हरणे कुशल इत्यर्थः । तथा परलोकः प्रयोजनमस्य पारलौकिको[16] न तथापारलौकिकः स्त्रीवधमहापापस्य चिकीर्षुत्वेन परलोकानपेक्षी[17] । यथा सौरसैन्धवः सौह्मनागरो वा[18] कोप्यृत्विगाग्निवारुणीमग्निवरुणदैवतां

---

१ बी °गरौ वा°.

---

१ **सी** °त्से स सौ°. २ **ए** °र्जि किमि°. ३ **ए** तद्विती. ४ **ए** वितासि य°. ५ **सी** यथा सौ°. ६ **ए** °रसेन्ध°. ७ **बी सी** °न्धव सौ°. ८ **सी** °गरैः प्राचीनगरे भ°. ९ **ए** भवौ त°. **बी** भवौ चैत°. १० **बी** °दिति°. ११ **सी** °व्रंती. १२ **बी** °दिदुर्वि°. १३ **सी** °य त्वा वि°. १४ **ए** °मर्थ । य°. १५ **बी** °स्य चौर°. १६ **बी** °को नु त°. १७ **ए** °नपक्षी. १८ **सी** वातोगृत्वि°.

गामनड्वाहीं[1] विनिहन्तुं यागे यूपसमीप आहरति । असाध्यराजय-[2] क्ष्ममहाव्याधिनिवर्तनायाग्निवारुणीमनड्वाहीमालभेतेति[3][4] हि श्रुतिः ॥

कौरुजङ्गली[5][6] कौरुजाङ्गली । वैश्वधेनवी वैश्वधैनवी[7] । सौवर्णवलजी सौवर्णवालजि । अत्र "जङ्गल०" [२४] इत्यादिना पूर्वपदस्य नित्यं वृद्धिरुत्तरपदस्य तु वा ॥

सौहार्दिनी । सौभाग्य[8] । सौरसैन्धवः । अत्र "हृद्०" [२५] इत्यादिनोभयपदवृद्धिः ॥ बहुलाधिकारान्मित्रामित्रार्थयोः सुहृद्दुर्हृच्छब्दयोरपसौहृदेनेत्यपि[9] स्यात् । दौहृ(र्हृ)दमित्यपि ज्ञेयम् ॥

सौह्मनागरः । अत्र "प्राचां नगरस्य" [२६] इत्युभयपदवृद्धिः ॥

आनुशातिकिः । पारलौकिकः । अत्र "अनु०"[२७] इत्यादिनोभयपदवृद्धिः[10] ॥

आग्निवारुणीम् । अत्र "देवतानामात्वादौ" [२८] इत्युभयपदवृद्धिः ॥

रथोद्धता ॥

सौमेन्द्रमैन्द्रावरुणं हविर्नु
किं त्वाच्छिनत्कोप्यसुरश्छलेन[1] ।
ऐक्ष्वाकदारान्नु[2] हिरण्मयेणे-
नाग्नौणहत्यक्षुभितो[3] दशास्यः ॥ ४७ ॥

४७. किं कोप्यसुरो दैत्यश्छलेन त्वा त्वामाच्छिनद्रूपातिशयमूढत्वेन हठादग्रहीत् । यथा सौमेन्द्रदेवतमैन्द्रावरुणं च [ह]विर्हव्यं कोप्यसुरश्छलेन ऋत्विग्भ्य आच्छिनत्ति । यथा वा दशास्यो रावण

१ बी सी °रछले°. २ बी °रान्राम°. ३ सी °हत्या ते°.

१ सी °नश्वड्वा.° २ बी °साध्यं रा°. ३ ए °रुणंमिन°. ४ बी सी °ति श्रु°. ५ बी °रुजा°. ६ सी °ली वै°. ७ ए °श्वधेन°. ८ सी सौर°. ९ बी °हृदुहृच्छ°. १० सी °द्धिः । अग्नि°.

ऐक्ष्वाकदारान्नामभार्यां सीतां हिरण्मयैणेन स्वर्णमृगेण कृत्वाच्छिनत् । यतः । कीदृक् । भ्रूणघ्नो भावो भ्रूणहत्यं भ्रूणहत्या तेन क्षुभितो भीतो भ्रौणहत्यक्षुभितो न तथा । महापापिष्ठ इत्यर्थः ॥ उपजातिः ॥

मैत्रेयवाक्सारववाःपवित्रा-
मनन्तमान्तिक्यनिजप्रियां त्वाम् ।
अनन्तियोप्यन्तितमोत्र विध्वं-
सितुं कुधैवत्य उतानिनाय ॥ ४८ ॥

४८. उताथ वा कुत्सितं धैवत्यं धीन्नः पण्डितस्य भावः पाण्डित्यं यस्य स कुधैवत्यः कुधीः पारदारिकस्त्वां विध्वंसितुं विध्वस्तशीलां कर्तुमत्र स्थान आनिनाय । कीदृक्सन् । अनन्तियोपि शीलभङ्गहेतुत्वादन्तिकेसाधुरप्यन्तितमः शीलभङ्गायातिशयेनान्तिकः । किंभूतां सतीं त्वाम् । मित्रयोरपत्यं गृष्ट्यादित्वादेयञि [६. १. ८४.] मैत्रेयो मुनिस्तस्य या वाक् तथा सरय्वां भवं सारवं यद्वार्जलं तद्वत्पवित्रां सुशीलत्वेन निर्मलाम् । तथान्तिके निकटे साधुरन्तिकयोत्यनुरक्त इत्यर्थः । यो निजप्रियः स तथान्तमोतिनिकटो न तथानन्तमः प्रोषितत्वादिना दूरस्थ आन्तिक्यनिजप्रियो यस्यास्ताम् ॥

अप्यन्तितोन्तिकतं एत्य तदैवमुक्त्वा
भूपे स्थितेन्तिकतमे निजबान्धवे नु ।
साथान्तिषद्यगदद्न्तिकसन्नृपांह्रि-
द्वन्द्वं स्रजिष्ठमिव दन्तरुचादधाना ॥ ४९ ॥

---

१ ए °वचाः पवित्रा°. २ सी °नन्तिमा°. ३ ए °न्तिकानि°. ४ बी °त क ए°. ५ ए °धानः । अथान्तिकतः.

---

१ सी न म°. २ सी °स्य वा भा°. ३ सी °ङ्गाति°. ४ सी °थान्तिमो°. ५ बी सी °न्तिकनि°.

४९. अथान्तिके सीदत्यन्तिषन्निकटस्था सा स्त्री न्यगदद्बभाषे । क सति । भूपे । किंभूते । अन्तिकात् । "अहीयरुहोपादाने" [७. २. ८८.] इति तसावन्तितोपि निकटादप्यन्तिके आद्यादित्वात्तसौ [७. २. ८४.] अन्तिकतः । अत्यन्तं निकट इत्यर्थः । एत्यागत्य तदैवमुक्तरीत्योक्त्वावस्थिते मौनमाश्रिते । कस्मिन्निव । अन्तिकतमेतिनिकटे निजबान्धवे नु । अतिनिकटमात्रके पित्रादिस्वजन इवेत्यर्थः । कीदृक्सती । सलज्जत्वेनाधोमुखं भाषणाद्दन्तरुचा कृत्वान्तिकसन्निकटस्थं नृपांह्रिद्वन्द्वं स्रजिष्ठमिव बहूनां मध्येतिशयेन स्रग्वीव दन्तकान्तेरतिविशदत्वादतिप्राचुर्याच्च पूजाहेत्वतिशयितपुष्पमालान्वितमिवादधाना ॥ वसन्ततिलका ॥

बोधिसत्त्वमिव वेद्मि भवन्तं सुत्वचिष्ठतय ऋज्ववदातम् ।
अस्रजीयसि जने स्रजयेत्कः कोत्वचीयसि बत त्वचयेद्वा ५०

५०. हे महापुरुष भवन्तं त्वां सुत्वचिष्ठतया बहूनां मध्येत्यर्थं त्वग्वांस्त्वचिष्ठः सुष्ठु त्वचिष्ठः सुत्वचिष्ठस्तद्भावेन त्वचः सौम्यतादिश्रीविशेषेण हेतुन ऋजुः सरलस्वभावः स चासाववदातश्च पापमलरहितश्च ऋज्ववदातस्तम् । यद्वा । ऋजूनि सरलान्यवदातान्युत्कृष्टकृपाकरणादीन्यद्भुतकर्माणि यस्य तं वेद्मि । कमिव । बोधिसत्त्वमिव बुद्धदेवतामिव । आकृतिविशेषेणापि त्वां बुद्धदेवमिव लोकोत्तरकृपार्जवादिगुणाधारं जानामीत्यर्थः । अमुमेवार्थं व्यतिरेकार्थान्तर-

---

१ ए °त्वतिष्ठ°. सी °त्वचष्ठ°.

---

१ सी °त्योक्ताव°. २ ए बी °टनात्र°. ३ सी °त्रकं पि°. ४ सी °दति°. ५ बी °त्विष्टं सु°. ६ ए °चिष्ठस्त°. ७ बी °नि शर°. ८ बी °कृतवि°. ९ सी लोकेत्त°.

न्यासाभ्यां द्रढयति । बतेति कोमलामन्त्रणे । द्वयोर्मध्येत्यन्तं स्रग्वी स्रजीयान्न तथास्रजीयांस्तस्मिन्पुष्पमालारहितजनविषये कः स्रजयेत् स्रग्विणमाचक्षीत । वा यद्वा । अत्वचीयसि विशिष्टत्वग्रहिते जने कस्त्वचयेत्त्वग्वन्तमाचक्षीत । न कोपीत्यर्थः ॥

सौमेन्द्रम् । ऐन्द्रावरुणम् । अत्र "आतो न०" [२९] इत्यादिना नोत्तरपदवृद्धिः ॥

सारव । ऐक्ष्वाक । मैत्रेय । भ्रौणहत्य । धैवत्यः । हिरण्मय । इत्येते "सारव०" [३०] इत्यादिना साधवः ॥

अनन्तम । अन्तितमः । अन्तितः । अनन्तियः । अन्तिषद् । एते "वान्तम०" [३१] इत्यादिना वा साधवः ॥ पक्षे । अन्तिकतमे । अन्तिकतः । अन्तिक्य । अन्तिकसद् ॥

स्रजयेत् । स्रजिष्ठम् । स्रजीयसि । त्वचयेत् । सुत्वचिष्ठतया । त्वचीयसि । इत्यत्र "विन्मतोर्०" [३२] इत्यादिना विन्मतोर्लुप् ॥ स्वागता ॥

कनयन्नघं धर्ममथो कनीया-
नथ वा कनिष्ठोसि मनुः स्वयं सः ।
यवयेद्यविष्ठस्य यवीयसोपि-
ष्ठजने तथाल्पीयसि नाल्पयेत्कः ॥ ५१ ॥

१ ए °न्नघर्थध°. २ सी °यं नु । य°.

१ सी ध्ये स्त्र°. २ ए °यस वि°. ३ सी °सि वशि°. ४ ए सौम्येन्द्र । ऐ°. ५ बी °रवः । ऐ°. ६ ए °वहत्यः. ७ ए °न्तमः । अ°. बी °न्तमा । अ°. ८ ए सी °न्तिय । अ°. ९ सी वान्त्यम°. १० सी °न्तिक्य°. ११ बी °ये । स्त्र°. १२ ए त्वचेय°. १३ ए विनत्वोर्लु°. १४ बी °न्मत्तोर्लु°. १५ ए °गताः । क°.

५१. अथ वाहो महापुरुष कनीयान्द्वयोर्मध्येत्यन्तं युवा कनिष्ठो बहूनां मध्येत्यन्तं युवा चातितरुणतम इत्यर्थः । असि त्वम् । सोतिधार्मिकत्वेन प्रसिद्धः स्वयं साक्षान्मनुर्मन्वृषिः[1] । को मनुरित्याह । कनीयान्[2] द्वयोरल्पयोर्मन्वोर्मध्येत्यल्पोथ वा कनिष्ठो बहूनां मनूनां मध्येत्यल्पो वा । स्वायंभुव[3] १ स्वारोचिष २ औत्तम ३ तामस ४ चाक्षुर्ष[4] ५ रैवत[5] ६ वैवस्वत[6] ७ सूर्यसावर्ण ८ ब्रह्मसावर्ण ९ रुद्रसावर्ण १० धर्मसावर्ण ११ दक्षसावर्ण १२ रौच्य[7] १३ भौत्याख्या[१४] हि चतुर्दश मन्वर्ष(न्वृष)यः आद्याः सप्त भूता अन्त्यास्तु भाविनः । तेषु त्वं लघुर्तरो लघुतमो वा मनुर्भवसीत्यर्थः । यतः । कीदृक् त्वम् । एवं कृपालुत्वादिगुणैरघं पापं कनयन्नल्पीकुर्वन् । अथो तथा धर्मं[8] कनयन्युवानं कुर्वन् । अमुमेवार्थमर्थान्तरन्यासाभ्यां[9] द्रढयति । यविष्ठस्य[10] यवीयसश्च । संबन्धमात्रेत्र षष्ठी । माषाणामश्नीयादित्यादिवत् । बहूनां यूनां द्वयोर्वा[11] मध्येतियुवानं नरं को न[12] यवयेद्युवानं नाचक्षीतेत्यर्थः । तथाल्पिष्ठजनेल्पीयसि च विषये को नाल्पयेत् ॥

कनयन् । कनिष्ठः । कनीयान् । अत्र "अल्प०" [३३] इत्यादिनाल्पयूनोः कन्वा[13] ॥ पक्षे । अल्पयेत् । अल्पिष्ठ । अल्पीयसि[14] ॥ यवयेत् । यविष्ठस्य । यवीयसः ॥ केकिरवं छन्दः ॥

श्रेष्ठे[1] ज्येष्ठे श्रेयसि ज्यायसि त्व-
य्यात्मोत्क्लेशान्द्राक्छ्रयामि ज्ययामि ।

---

१ सी °ष्ठेय°.

---

१ बी नुर्मान्वृ°. २ सी °यान्नल्प°. ३ ए °भुवः १ स्वा°. ४ बी °ष ५ ऐराव°. ए °स्वतः ७ सू°. ६ बी °र्यस्यव°. ७ सी रोद्रच्य. ८ ए °तमो°. ९ ए °रमन्या°. १० ए °यवष्ठ°. ११ बी सी योर्मध्ये°. १२ बी न युव°. १३ सी कण्वा । प°. १४ ए °ल्पीयिसि.

साधीयःसाधिष्ठनेदिष्ठनेदी-

यांसः श्रोतुः[1] सन्तु ते दुःखवेगाः ॥ ५२ ॥

५२. उद्गतः क्लेशो येभ्यस्त उत्क्लेशा दुःखहेतव आत्मन उत्क्लेशा आत्मोत्क्लेशास्तानहं[1] त्वयि विषये द्राक् श्रयामि वचनस्यातिस्फुटसत्यत्वेन प्रशस्यं यथा स्यादेवमाचक्षे[2][3] । तथा ज्ययामि वचनस्यातिमहत्त्वा[4]द्वृद्धं यथा स्यादेवमाचक्षे[5] । । प्रशस्यशब्दाद्वृद्धशब्दाच्च क्रियाविशेषणादत्र[6] णिज् । यतः । किंभूते त्व । श्रेष्ठे श्रेयसि च । महापुरुषत्वेनातिप्रशस्यतम इत्यर्थः । तथा ज्येष्ठे ज्यायसि च । अत्यन्तं गुणैर्वृद्धतम[7] इत्यर्थः । ततश्च श्रोतुर्मदीयोत्क्लेशानाकर्णयतः सतस्ते तव महापुरुषत्वेन परदुःखदुःखितत्वाद्दुःखवेगाः कष्टसंभाराः सन्तु । कीदृशाः । द्वयोर्मध्येतिबाढाः साधीयांसो बहूनां मध्येतिबाढाः साधिष्ठास्तथा[8][9] बहूनां मध्येत्यन्तिका नेदिष्ठा द्वयोरत्यन्तिका[10] नेदीयांसः । विशेषणकर्मधारये ते तथा । अतिगाढतमा अतिनिकटतमाश्चेत्यर्थः ॥ शालिनी छन्दः ।

प्रेम नेदयति साधयितोक्तेः[2]

प्रापयन्सवरिमेह गरीयान् ।

त्वां त्रपिष्ठमहमत्रपिमाणं

ह्री करोम्यगरिमा त्रपयन्ती ॥ ५३ ॥

५३. गरीयान्द्वयोर्मध्येत्यन्तं गुरुत्वयुक्त उक्तेर्वचसः साधयिता बाढमाख्याता[11] । अत्रापि क्रियाविशेषणाद्बाढाण्णिज् । अत्यन्तं वक्ता पुमा-

१ बी श्रोतः स°. २ बी °तोक्ति प्रा°.

१ सी °नवहं. २ प °चक्ष । त°. ३ बी क्षेत । त°. ४ बी °त्त्वावृद्धं. ५ बी °माषक्षे. ६ सी °याया वि°. ७ सी °णादिति णि°. ८ सी °तमेत्य°. ९ प °धिष्टा ब°. १० सी °त्यन्तका°. ११ सी °ख्या । अ°.

निह् जगति प्रेम प्रियभावं प्रीतिं नेद्यत्यन्तिकं करोति । कीदृशम् । सह वरिम्णोरुत्वेन यत्तत्सवरिम महत् । यतः । कीदृशः । प्रापयन्प्रियमाचक्षाणः । यो हि गरीयान्वक्ता स्यात्स सुखदोक्तिभिर्जगतो महतीं प्रीतिं निकटीकरोतीत्यर्थः । अहं त्वगरिमा स्त्रीत्वेन गुरुत्वरहितात्रपिमाणं त्रपिम्णा दुःखेन रहितं त्वां हीं खेदे त्रपिष्ठं महापुरुषत्वेन दर्पणवन्निर्मले त्वच्चित्ते स्वदुःखसंक्रमणेनातिदुःखिनं करोमि । यतस्त्रपयन्ती नृपं(तृप्रं?) स्वदुःखमाचक्षाणा ॥ स्वागता छन्दः ॥

दुःखभणनेन सज्जनजनस्य दुःखकारिणं स्वं प्रणिन्द्य दुःखहेतूनाह ।

आसीत्प्रेयान्मेतिवृन्दिष्ठ वृन्दी-
यान्स्त्रीप्रेष्ठः स्फेष्ठबंहिष्ठकान्तिः ।
स्फेयोद्राघिष्ठेक्षणश्रीरतिस्थे-
योवर्षीयान्स्थेष्ठवर्षिष्ठबुद्ध्या ॥ ५४ ॥

५४ हे अतिवृन्दिष्ठ महापुरुषत्वेनातिप्रशस्य मे मम प्रेयान्भर्तासीत् । कीदृक् । स्फेष्ठातिस्थिरात्युपचिता बंहिष्ठातिबहुला कान्तिर्लक्ष्म्याद्युत्कर्षजनिता दीप्तिर्यस्य सः । तथा स्फेयस्त्युपचिता द्राघिष्ठातिदीर्घेक्षणश्रीर्यस्य सः । अतिरूपपात्रमित्यर्थः । तथा स्थेष्ठातिस्थिरा वर्षिष्ठा चातिवृद्धा या बुद्धिस्तया कृत्वातिस्थेयो वर्षीयान् स्थेया-

---

१ ए °न्तिः । स्पेय°. सी °न्तिः । स्फाय°. २ सी °तिस्थायो°. ३ बी °यान्श्रेष्ठ°. सी °यान्स्वेष्ठ°.

---

१ बी °रिम्नोरु°. २ ए °त् । की°. ३ बी °न्वक्तयास्यात्सुख°. ४ बी ही क्षेदे. ५ सी °णनिर्मे°. ६ ए °न्ती पृप्रं दुः°. ७ सी °नस्य°. ८ सी स्वं प्राणि°. ९ ए °क् । स्पेष्ठा°. सी °क् । स्पष्टाति°. १० ए °था स्वेष्ठा°. बी °था श्रेष्ठा°.

नतिस्थिरप्रकृतिर्यो वर्षीयानतिवृद्धस्तमप्यतिक्रान्तोत एव वृन्दीयानतिप्रशस्योत एव स्त्रीप्रेष्ठः स्त्रीणामतिप्रियः ॥ शालिनी छन्दः ॥

द्राघीयोबंहीयोवणिज्यैर्गरिष्ठो

लक्ष्मीं सोस्थेमां स्थापयेन्स्फापयंश्च ।

दध्यौ रात्रौ निर्बंहिमद्राघिमायां

वर्षिम्णानाप्तोपि त्रपीयान्कदाचित् ॥ ५५ ॥

५५. स मत्प्रियो वर्षिम्णा वार्धकेनानाप्तोपि युवापि त्रपीयान् बहुलक्ष्मीरक्षाचिन्तयातिदुःखी सन्कदाचिन्निर्बंहिमद्राघिमायां बंहिम्नो बाहुल्याद्द्राघिम्णो दीर्घत्वाच्च निष्क्रान्तायां शेषायामित्यर्थः । रात्रौ दध्यौ चिन्तितवान् । कीदृग् । द्राघीयांस्यतिदीर्घाणि बंहीयांसि चातिबहुलानि यानि वाणिज्यानि वणिक्कर्माणि व्यवहारास्तैः कृत्वा गरिष्ठोतिगुरुरत एवास्थेमां स्थेम्ना स्थैर्येण रहितां स्वभावेन चपलामपीत्यर्थः । लक्ष्मीं स्थापयन् स्थिरां कुर्वन्स्फापयंश्चोपचितीकुर्वंश्च ॥ वैश्वदेवी छन्दः ॥

यद्दध्यौ तदाह ।

बंहयेच्च गरयेत्प्रिययेद्वा योर्थमक्षमसलोभनृपोर्व्याम् ।

द्राघयेत्स वरयेत्स्थिरयेच्चानर्थमेकमवरिष्ठमनीष(षः) ॥ ५६ ॥

---

१ बी °स्थेम्नां स्था°. २ बी °यन्स्थाप°. ३ ए °येच्चा°. ४ सी °येद्वान°. ५ सी °मविरि°. ६ ए °नीयः । अ°. बी °नीषुः । अ°.

---

१ ए °ति ये व°. २ बी मम प्रियो. ३ बी °प्तोसि यु°. ४ सी सन निर्बं°. ५ बी °घिम्नो दी°. ६ बी दधौ चि°. ७ सी °नि वा°. ८ ए सी °नि वाणि°. ९ बी सी °त्वातिग°. १० ए °रुतर ए°. सी °रुतरं त ए°. ११ बी °स्थेम्नां स्थे°. १२ ए °पयांश्चो°. १३ बी °वीश्छन्दः. १४ सी तदेवाह.

५६. अक्षमः पालयितुमशक्तः सलोभश्च लुब्धो यो नृपस्तस्य योर्वीं तस्यां यो नरोर्थं[1] द्रव्यं बहुव्यवहारादिभिर्बंहयेच्च[2] बहुलं कुर्याद्वरयेच्च विस्तारयेत्प्रिययेद्वा प्रियं कुर्याच्च । स चौरादिभि[*नृपेण वार्थस्यापहरणादेकं केवलमनर्थं द्रव्याभावं कष्टं वा द्राघयेद्दीर्घीकुर्याद्वरयेदुरूकुर्यात्स्थिरयेच्च । कीदृक्सन् । अवरिष्ठात्यन्तमनुरुरमहत्तमा मनीषा यस्य सः । निर्बुद्धिरित्यर्थः ।। स्वागता ।।

स्वानि वर्षयितुमेषु[1] वृन्दयन् राट्स्ववृन्दिमसु[2][3] वीक्ष आत्मनः ।
आपदं क्रशिमदां[4] वरीयसीमक्रशिष्ठविभवाक्रशीयसः[5] ।। ५७ ।।

५७. स्वानि द्रव्याणि वर्षयितुं वर्धयितुं वृन्दयन्वृन्दारकं प्रकृष्टं कुर्वन्नर्थादात्मानम् । अनेकव्यवहारैः प्रकर्षेण द्रव्याणि वर्धयन्सन्नित्यर्थः । अहमात्मनः स्वस्य क्रशिमदां[3] कृशत्वदायिकां दारिद्र्यदामित्यर्थः । वरियसीमतिमहतीमापदं[4] सर्वस्वापहाररूपां वीक्षे[5] संभावयामि । क्व । एषु राट्सु सामीप्यके सप्तमीयम् । यद्देशे[6]धुनोष्यते तेषां मनःस्थत्वेन प्रत्यक्षाणां नृपाणां समीप[7] इत्यर्थः । यतोवृन्दिमसु वृन्दिम्ना प्रशस्यत्वेन रहितेष्वसामर्थ्यलोभातिरेकादिना निकृष्टेष्वित्यर्थः । आत्मनश्च कीदृशस्य । अक्रशिष्ठोकृशतमो महत्तमो यो विभवो द्रव्यं तेनाक्रशीयसो महत्तमस्य[8] ।। रथोद्धता ।।

उष्ट्रान्भ्रंशिष्ठान्[6]भ्रशयन्भ्रंशीया[7]-
न्श्रथान्प्रथिष्ठान्प्रथयन्प्रथीयान् ।

१ ए °षु छन्द°. २ बी °मनुवीक्ष्य आ°. ३ ए °सु दीक्ष. ४ ए क्रसिम°. ५ बी °क्रसीय°. ६ बी °न्भ्रसिष्ठा°. ७ बी °न्भ्रसीया°.

१ सी रोर्थाद्द्रव्यं. २ ए °दि निर्बं°. ३ बी क्रमिशदां. ४ ए °पदां स°. ५ बी वीक्ष्ये सं°. ६ बी °शेधनो°. ७ ए °मीपेत्य°. ८ ए °स्य । उ°.

*धनुश्चिह्नान्तर्गतो ग्रन्थः सी पुस्तके नास्ति ।

वृषान्व्रढिष्ठान्व्रढयन्व्रढीया-
न्सुराज्ञि देशेत्र ततः स आगात् ॥ ५८ ॥

५८. ततः स्वस्य महापत्संभावनाकरणानन्तरं स मत्प्रियः सुराज्ञ्यत्र देशे गूर्जर]त्रायामागात् । कीदृक्सन् । म्रशिष्ठानतिभृशानुष्ट्रान्म्रशयन् शीघ्रान्कुर्वन्यतो म्रशीयानत्युत्सुकस्तथातिपृथून्प्रथान्प्रथयन्नतिबहुत्वेन सर्वपथीनान्कुर्वन्यतः प्रथीयान्महर्द्ध्यातिपृथुस्तथातिवृढान्सोद्यमान्वृषान्सोद्यमीकुर्वन्यतोतिसोद्यमः ॥ उपजाति(तिः) ॥

स मां म्रदिष्ठां म्रदयन्म्रदीया-
ल्ल(ल्लँ)क्ष्मीं द्रढिष्ठां द्रढयन्द्रढीयान् ।
परिव्रढीयान्सुपरिव्रढिम्ना
सहानयत्सव्रढिमभ्रशिम्ना ॥ ५९ ॥

५९. स मत्पतिर्म्रदीयान्मनसा वाचातिमृदुरत एव म्रदिष्ठामतिमृद्वीं मां म्रदयन्मृद्वाचक्षाणः सन्नत्र देशे सहानयत् । केन हेतुना । सह व्रढिम्न उद्यमस्य भ्रशिम्नातिशयेनास्ति यस्तेनोत्साहप्रकर्षान्वितेन सुपरिव्रढिम्ना सुप्रभुत्वेन । कीदृशः । द्रढीयानत्यन्तं बल्युपचितो वा । तथा द्रढिष्ठामत्युपचितां लक्ष्मीं द्रढयन् वृद्धिरक्षादिना बलिष्ठामुपचितां वा कुर्वन्नत एव परिव्रढीयानतिपरिवृढोनेकजनस्वामी ॥

१ बी °न्व्रढ°. २ बी °न्सुसुरा°. ३ ए °शे त°. ४ सी स म म्र°. ५ सी °यन्मदीयालक्ष्मीं. ६ ए °म्ना ॥ समत्प°.

१ बी °तः म°. २ ए °नाकार°. ३ बी °त्प्रिया सु°. ४ सी °ति भ्रशा°. ५ बी °मान्कु°. ६ ए °तोपिसो°. ७ ए °मः ॥ स सां म्र°. ८ बी °तिर्मृदी°. सी °तिर्मेदी°. ९ ए दुतर ए°. १० सी °श्चिऽति°. ११ बी सी °प्रभत्वे°. १२ सी वान्नकु°. १३ सी एवातिप°.

स परिव्रढयन्परिव्रढिष्ठं सद्रढिमं[1]म्रदिमानमत्र भूपम् ।
विभवप्रे[2]थिमापहारशङ्कां कृशयं[3]न्भूयिष्ठादभूय[य]त्स्वम् ॥६०॥

६०. स मत्पतिः स्वं धनं भूयिष्ठादतिबहोरपि स्वात्सकाशादभूययदनेकवणिग्भ्यैर्बहूचक्रे । यतो विभवप्रथिमापहारशङ्कां कृशयन्कृशीकुर्वन् । मुञ्चन्नित्यर्थः । एतदपि कुत इत्याह । यतोत्र देशे नृपं परिव्रढयन्वास्तव्यीभवनेन प्रभूकुर्वन् । किंभूतम् । सद्र[1]ढिमम्रदिमानं द्रढिम्ना प्रजारक्षासामर्थ्येन म्रदिम्ना च निर्लोभत्वोत्थेन सदयहृदयत्वेन सहितमत एव प[2]रिव्रढिष्ठमुत्कृष्टप्रभुम् ॥ औपच्छन्दसकं[3]म् ॥

बहयन्स्वधर्मं[4] वसु भावयंश्च
स्थवयन्विलासान्सुखभूम्नि मग्नः ।
कुधियां दविष्ठो विपदां दवीयान्
स निनाय भूयः समयं यवीयान् ॥ ६१ ॥

६१. यवीयानतियुवा स मत्पतिर्भूयःसमयमतिबहुकालं निनायातिचक्राम । कीदृक्सन् । कुधियां मूर्खाणां कुत्सितानां बुद्धीनां वा दविष्ठोतिदूरोत एव विपदां दवीयानतिदूरोत एव स्वधर्मं बहयन्बहूकुर्वं[5]स्तथा वसु द्रव्यं भावयंश्च बहूकुर्वंश्च । तथा विलासान् शृङ्गारचेष्टाविशेषान्स्थ[6]वयन्नुपचितीकुर्वन् । यथावसरं धर्मार्थकामा[7]न्सेवमान इत्यर्थः । अत एव च सु[8]खभूम्नि सुखबाहु[9]ल्ये मग्नः ॥ केकिरवं छन्दः ॥

---

१ बी °मत्रढिमा°. २ ए °प्रतिमा°. बी °प्रथमा°. ३ सी °यद्भूयि°.

---

१ सी °ढिमा प्र°. २ सी °रिवृढमु°. ३ बी °क ॥ ब°. ४ ए दां पद°. ५ ए सी °कुर्वस्त°. ६ बी °न्स्थन्नु°. ७ ए °मानासेव°. ८ सी °खबा°. ९ बी °ल्येन म°.

अस्थवीय इह सोऽस्थविष्ठधीः क्षोदयद्यवयदन्ययौवतम् ।
क्षेपयच्च दवयन्नजीजनत्स्वोपमं मयि यविष्ठ आत्मजम् ॥६२॥

६२. स यविष्ठोतियुवा मत्पतिरिह देशे वसन् स्वोपममात्मतुल्य-[1] मात्मजं मय्यजीजनत् । कीदृक्सन् । अस्थविष्ठधीरस्थूलबुद्धिः[2] । दीर्घदर्शीत्यर्थः । अत एवान्ययौवतं दवयन्दूरीकुर्वन् । परदारसङ्गं वर्जयन्नित्यर्थः । कीदृशम् । अस्थवीयः कृशाङ्गम् । रूपपात्रमित्यर्थः । तथा क्षोदयद्यवयत्क्षेपयच्चासतीत्वेन[3] क्षुद्रान्नटविटादीन्यूनस्तरुणान्क्षिप्रांश्च[4] सोद्यमानाचक्षाणम् ॥ रथोद्धता ॥

अक्षोदीयानह्रसिष्ठहर्षो विदधे क्षेपीयो महोत्सवं सः ।
ह्रसिमक्षोदिमशातनं ह्रसीयःक्षोदिष्ठानामप्यथार्थदानैः ६३

६३. अथ पुत्रजन्मानन्तरं स मत्पतिः क्षेपीयोतिक्षिप्रं महोत्सवं विदधे । कीदृशम् । ह्रसीयःक्षोदिष्ठानामपि ह्रसीयांसोतिह्रस्वा[5] इ-(अ)[6]तिलघवोतिदरिद्रा इत्यर्थः । तथा क्षोदिष्ठा अतिक्षुद्रा अतिनृशंसा व्याधादयो द्वन्द्वे तेषामपि । आसतां ह्रस्वमात्राः क्षुद्रमात्राश्चेत्यपि[7]त्यर्थः । अर्थदानैर्ह्रसिमक्षोदिमशातनं द्रव्यस्यातिबहोर्दानादतिदरिद्राणामप्यतिनृशंसानामपि च दरिद्रत्वनृशंसत्वयोर्विनाशकमित्यर्थः । यतः । कीदृक्सः । क्षुद्रो दरिद्रः कृपणश्चात्यन्तं क्षुद्रः क्षोदीयान्न तथा । ईश्वर उदारश्चेत्यर्थः । तथाह्रसिष्ठहर्षो गुरुतमानन्दः ॥ औपच्छन्दसकापरान्तिका ॥

स्थूलयामि युवयामि शिशुं क्षेपिष्ठमित्यह्रसिताशयवृत्तिः ।
क्षेपिमोपनतसत्पयसिष्ठत्वाभ्यदूरयमहं न हि पुत्रम् ॥ ६४ ॥

---

१ ए °म हि.

---

१ सी °त्मजमजी°. २ ए °बुद्धिदी°. सी °बुद्धिरदी°. ३ बी °वक्षेप°. ४ सी °न्नतट°. ५ बी सी °स्वाति°. ६ ए °ति द°. ७ बी °त्यर्थः.

६४. अहं पुत्रं न हि नैवाभ्यदूरयम्[1] । सदा स्वसमीपस्थमकार्षमित्यर्थः । कीदृक्सती । क्षेपिष्ठमतिक्षिप्रं[2] यथा स्यादेवं शिशुं[3] स्थूल[4]यामि स्थूलं करोमि । तथा युवयामि युवानं करोमि । इत्येवंप्रकारेणा[5]हसिता स्नेहातिरेकादहस्वीकृता विपुलीकृताशयवृत्तिर्मनोरथो यया सा । तथा प्रकृष्टा पयस्विनी पयसिष्ठा तस्या भावः पयसिष्ठत्वम् । क्षेपिम्णा[6] क्षिप्रतयोपनतं[7] स्वयं ढौकितं सन्नीरोगत्व[8]पुष्टिकृत्त्वादिना[9] शोभनं पयसिष्ठत्वं यस्याः सा । अतिस्नेहात्स्वयं प्रस्नुत[10]प्रचुर[11]चारु[12]स्तनेत्यर्थः ॥ स्वागता ॥

सुतं करिष्ठं करयन्त्यवर्धयं
करीयसी[1] स्वं पयसी[यसी] स्वयम् ।
पतिं वसिष्ठं वसयन्त्यहं कदा-
प्यानाययं न ह्यपराः पयीयसीः ॥ ६५ ॥

६५. अहं सुतं स्तन्यपानादिनावर्धयम् । कीदृशी । कर्ता जनको[13]स्त्यस्याः कर्तृमती[14] प्रकृष्टा कर्तृमती करीयसी । प्रशस्यपितृवंशेत्यर्थः । यद्वा । प्रकृष्टा कर्त्री[15] जनयित्री करीयसी । तथा प्रकृष्टं कर्तृमन्तं करिष्ठं प्रशस्यजनकवन्तं स्वमात्मीयं सुतं करयन्ती कर्तृमन्तं विद्यमानप्रशस्यजनकमाचक्षाणा । यद्वा । प्रकृष्टं कर्तारमव्यक्तालापरिङ्गणादि[16]बाल[17]-

१ ए °सी स्व°.

१ ए °रम्. २ बी °ष्ठमितिक्षिप्र य स्या°. ३ सी °शुं क°. ४ ए स्थूलं. ५ सी °रेण ह°. ६ सी °पि प्र°. ७ बी सी °पनंतं. ८ सी सनीरो°. ९ सी °ष्टिकत्त्वा°. १० बी प्रस्थत°. सी प्र ष्ठं वस°. ११ ए °तथस्तुतप्र°. १२ ए °रुभूत्येत्य°. १३ ए °कोस्तस्या क°. सी °को तस्याः. १४ सी °ती करी°. १५ सी कत्री क°. १६ ए °रिवणा°. १७ बी °लकौचि°.

कोचितक्रियाणां विधातारं करिष्ठं[1] स्वं सुतं करयन्ती कर्तारमाचक्षाणा तत्तदनुकूलाचरणेन कर्तारं कुर्वाणा[2] वा । यद्वा । करिष्ठं प्रकृष्टं[3] जनकवन्तं कर्तारं वा पुत्रस्य जनयितारं स्वमात्मानं करयन्ती कर्तृमन्तं कर्तारं वाचक्षाणा । न हि न पुनरपरा अन्याः पयीयसीरतिपयस्विनीः पुत्रस्तन्यपानार्थं कदाप्यानाययम् । कीदृक्सती । वसिष्ठमत्यन्तं वसुमन्तमतिद्रव्याढ्यं पतिं भर्तारं वसयन्ती वसुमन्तमाचक्षाणा । ईश्वरोयं बहुद्रव्यं वो दास्यतीति[4] पुत्रस्य स्तन्यपानाय स्वपतिमत्याढ्यं भणन्तीत्यर्थः । यतः स्वयमेव पयसीयस्यतिपयस्विनी[5] । वंशस्थेन्द्रवंशयोरुपजातिः ॥

स्नेहेन मां पयसयन्[1] वसवीयसश्च[2]
पुत्रो भवन्स तु जनैर्भृशमित्यतर्कि ।
एष प्रपा वसवयत्पययज्जनानां[3]
चक्रे पयिष्ठवसविष्ठशुभा वसीयान् ॥ ६६ ॥

६६. स तु स पुनर्बालको जनैर्भृशमतर्कि । कथमित्याह । एष बालको वसीयानतिवसुमान्सन्[6]प्रपाश्चक्रे । पूर्वभवेकारयदित्यर्थः । कीदृशीः । पयिष्ठवसविष्ठशुभाः[7] पयिष्ठाः शीतलसुरभिसुस्वादुजलपूर्णघटत्वादतिशयेन पयस्विन्यो वसविष्ठाश्च[8] विशिष्टोपभोग्यगवाक्षो[9]पवनपुष्पफलशीतल[10]च्छाया[11]दिमहर्द्धिकत्वेनातिवसुमत्यो याः शुभा म-

१ ए °सन्. २ ए °यशश्च. ३ ए °सय°.

१ ए °ष्ठं स्वसु°. २ सी °णा । न हि. ३ बी °कृष्टज°. ४ बी सी °स्यति. ५ सी पयीय°. ६ ए °मान्प्र°. सी ७ °स यिष्ठ°. ८ सी °सयिष्ठाश्च वशि°. ९ ए °गप°. १० बी सी °तच्छा°. ११ ए °याम°.

नोज्ञास्ताः । केषां कृते । वसवयत्पययज्जनानां वसवयन्तः[1] पययन्तश्च[2] वसुमतीः पयस्विनीश्चाचक्षाणा[3] ये जनास्तेषाम् । गवाक्षादिभिर्महर्द्धिकाः सुपयःपूर्णाश्च प्रपाः क सन्तीत्युपभोगेच्छया वदतां लोकानां निमित्तमित्यर्थः । कुत एवं वितर्क इत्याह । यतः स्नेहेन[4] मां पयसयन्पयस्विनीं[5] कुर्वंस्तथा वसवीयसो[6] महेभ्यस्य पुत्रश्च[7] भवन्[8] ॥

श्रयामि । श्रेष्ठे । श्रेयसि । इत्यत्र "प्रशस्यस्य श्रः"[9] [३४] इति श्रः[10] ॥

ज्ययामि । ज्येष्ठे । अत्र "वृद्धस्य च ज्यः" [३५] इति ज्यः ॥ प्रशस्यस्य तु ज्यादेशोदाहरणं स्वयं ज्ञेयम् ॥

ज्यायसि । इति "ज्यायान्" [३६] इति निपात्यम् ॥

साधयिता । साधिष्ठ[11] । साधीयः । नेदयति । नेदिष्ठः(ष्ठ) । नेदीयांसः । अत्र "बाढ°" [३७] इत्यादिना साधनेदौ ॥

प्रिय । प्रेम । प्रापयन्[12] । प्रेष्ठः । प्रेयान् । स्थिरे[13] । अस्थेमाम् । स्थापयन् । स्थेष्ठ[14] । स्थेयः ॥ स्फिर ॥ स्फापयन्[15] । स्फेष्ठ । स्फेयः ॥ उरु । वरिम । वरयेत् । वरिष्ठ । वरीयसीम् ॥ गुरु । गरिमा[16] । गरयेत् । गरिष्ठः । गरीयान् ॥ बहुल । बंहिम । बंहयेत् । बंहिष्ठ[17] । बंहीयः ॥ तृप्र । त्रपिमाणम् । त्रपयन्ती । त्रपिष्ठम् । त्रपीयान् ॥ दीर्घ । द्राघिमायाम् । द्राघयेत् । द्राघिष्ठ[18] । द्राघीयः ॥ वृद्ध । वर्षिम्णा । वर्षयितुम् । वर्षिष्ठ । वर्षीयान् ॥ वृन्दारके[19] । वृन्दिमसु । वृन्दयन् ।

---

१ **ए** °सय°. २ **सी** °न्तश्च. ३ **बी सी** °यश्विनी°. ४ **ए** °न मा प°. ५ **सी** °ससन्प°. ६ **ए सी** वसीय°. ७ **बी** °भ्यश्च पु°. ८ **सी** °त्रस्य भ°. ९ **बी** °स्य श्रः. १० **ए बी** °श्रः ॥ जाया°. ११ **ए बी** °धिष्ठः । सा°. १२ **बी** °न् । स्पष्टः । प्रे°. १३ **बी** स्थिरः । अ°. १४ **ए सी** स्थेष्ठः । स्थे°. १५ **सी** °न् । स्पष्टः । स्फे°. १६ **ए** °रिम । ग°. १७ **ए** बंहीष्ठ. १८ **सी** °घिष्ठः । द्रा°. १९ **बी सी** °रकः । वृ°.

वृन्दिष्ठ । वृन्दीयान् । अत्र "प्रियस्थिर°" [३८] इत्यादिना प्रादय आदेशाः ॥ कश्चित्तु करोत्यर्थे णौ प्राद्यादेशान्नेच्छति[1] । तन्मते प्रियेत्[2] । स्थिरयेत् ॥

प्रथिम । प्रथयन् । प्रथिष्ठान्[3] । प्रथीयान् ॥ म्रदिमानम् । म्रदयन् । म्रदिष्ठाम् । म्रदीयान् ॥ ऋशिम्ना । ऋशयन् । ऋशिष्ठान् । ऋशीयान् ॥ क्रशिम[4][5] । क्रशयन् । क्रशिष्ठ । क्रशीयसः[6] ॥ द्रढिम । द्रढयन् । द्रढिष्ठाम् । द्रढीयान् ॥ परिव्रढिम्ना । परिव्रढयन् । परिव्रढिष्ठम्[7] । परिव्रढीयान् । अत्र "पृथुमृदु०" [३९] इत्यादिना ऋतो रः ॥ केचित्तु वृढशब्दस्यापीच्छन्ति । व्रढिम । व्रढयन् । व्रढिष्ठान् । व्रढीयान् ॥

अभूययत् । भूयिष्ठात् । इत्यत्र "बहोर्णीष्ठे भूय्" [४०] इति भूय् ॥ णौ केचिद्विकल्पमाहुः । अभूययत् । बंहयन्[10] ॥ बहोर्णौ[9] भाविति कश्चित् । भावयन् ॥

भूयः । भूम्नि । इत्यत्र "भूर्०" [४१] इत्यादिना भूं[11] इत्यादेश ईयसिमनोश्चेवर्णस्य लुक् ॥

स्थवयन्[12] । स्थविष्ठ[13][14] । स्थवीयः ॥ दवयन् । दविष्ठः । दवीयान् ॥ यवयत् । यविष्ठः । यवीयान् ॥ ह्रसिम[15] । ह्रसिता[16] । ह्रसिष्ठ । ह्रसीयः ॥ क्षेपिम[17] । क्षेपयत् । क्षेपिष्ठम् । क्षेपीयः[18] ॥ क्षोदिम[19] । क्षोदयत् । क्षोदिष्ठानाम्[20] । क्षोदीयान् । अत्र "स्थूलदूर०" [४२] इत्यादिनान्तस्थादेरवयवस्य[21] लुग्नामिनश्च गुणः ॥

---

१ बी सी °देशं नेच्छ°. २ सी °त् । प्र°. ३ ए प्रतिष्ठा°. ४ सी क्रशम. ५ ए °शिन । क्र°. ६ बी सी क्रसीय°. ७ ए °व्रढी°. ८ ए °ष्ठानिल्य°. ९ सी बहो°. १० ए °न् । वाहोर्णा. ११ बी भूत इ°. १२ सी स्थयय°. १३ सी स्थवी°. १४ ए °विष्टः । स्थ°. १५ ए °सिता. १६ बी °सित । ह्र°. सी °सि । ह्र°. १७ सी °मषिष्ठं । क्षे°. १८ ए °पीय । क्षो°. १९ ए बी °दिमः । क्षो°. २० सी °म् । अ°. २१ ए °दिनां स्था°.

केचित्स्थूलदूरयूनां करोत्यर्थे णौ नेच्छन्ति । स्थूलयामि । अभ्यदूरयम् । युवयामि[1] ॥

करयन्ती । करिष्ठम् । करीयसी ॥ पर्थयत्[2] । पयिष्ठ[3] । पयीयसीः ॥ वसयन्ती । वसिष्ठम्[4][5] । वसीयान् । अत्र[6] "न्न्त०" [४३] इत्यादिना तृप्रत्ययान्तस्यान्त्यस्वरादेश्चावयवस्य लुक्[7] ॥ विन्मतोर्लुप्यनेकस्वरस्यान्त्यस्वरादेर्लुर्ब (कं ?) विकल्पेनेच्छन्त्येके । लुँगभावपक्षे णौ गुणं चेच्छन्ति । पययत् । पयसयन् । पयिष्ठ । पयसिष्ठत्वा । पयीयसीः । पयसीर्यसी[8] ॥ वसयन्ती । वसवयत । वसिष्ठम्[9] । वसविष्ठ[10] । वसीयान् । वसवीयसः ॥ वसन्ततिलका छन्दः[11] ॥

मां लपन्स्रजयिता[1]स्रजीयसीम[2]स्रजिष्ठपितरं च सुस्मितैः[3] ।
दाण्डिनायन[4] उ हास्तिनायनो[5] वाशिनायनिरुतेत्यलक्षि[6] सः ॥६७

६७. उ हे महारुष स बालकः सौभाग्यादिगुणैः शुद्धब्राह्मणवंशजातत्वेन चालक्षि लोकैरशङ्कि । कथमित्याह । किमयं दण्डिनो हस्तिनो वाशिनो[12] वर्षेरपत्यं बालक इति । कीदृशः । लपन्नव्यक्तमधुरं भाषमाणः सन् सुस्मितैः कृत्वास्रजीयसीमस्रग्विणीं[13] मामस्रजिष्ठपितरं चास्रग्विणं जनकं च स्रजयिता स्रग्विणं[14] कर्ता ॥

स्रजयिता । स्रजिष्ठ । स्रजीयसीम् । अत्र "नैकस्वरस्य" [४४] इत्यन्त्यस्वरादेर्न लुक् ॥

१ बी °पन्सज°. २ बी °स्रजयीय°. ३ बी °तैः । डांड्ना°. ४ ए दाण्डना°. ५ बी °नायुतो वासिना°. ६ ए °यनैरु°.

१ ए °मि । वार°. २ ए बी °यत्. ३ ए °यिष्ठः । प°. ४ सी वशिष्ठ°. ५ ए °सिष्ठः । व°. ६ ए °त्र त्रेत्या°. बी °त्र त्रं त्या°. ७ बी लुक् भा°. ८ सी °यसीः । व°. ९ सी वशिष्ठ°. १० सी °विष्ठः । व°. ११ ए °न्दः । मा ल°. १२ सी वासिनो. १३ ए °णीं नाम°. १४ सी स्रजि°.

दाण्डिनायनः । हास्तिनायनः । अत्र "दण्डि०" [४५] इत्यादिनान्त्यस्वरादेर्लुक् ॥

वाशिनायनिः । अत्र "वाशिन आयनौ" [४६] इत्यन्त्यस्वरादेर्न लुक् ॥

रथोद्धता ॥

जैह्माशिनेयान्निगमाध्वनीना-
त्सामन्यकाथर्वणिकात्स विद्याम् ।
प्रापात्मनीनादथ सौत्वनाच्चा-
दौरात्म्यसद्यौवनिकां तनूजाम् ॥ ६८ ॥

६८. स पुत्रो जैह्माशिनेयाज्जिह्माशिनो ब्राह्मणस्यापत्यात्सकाशाद्विद्यां प्राप । किंभूतात् । अज्ञातः सामनि सामवेदे सान्त्वने वा साधुः सामन्यको य आथर्वणिकोथर्ववेदज्ञस्तस्मात्तथा निगमेषु वेदेष्वर्थादृग्यजुषोरध्वनीनोध्वानमलंगामी यस्तस्माच्चतुर्वेदीविद इत्यर्थः । तथात्मनीनाद्धार्मिकत्वेनात्मने हितात् । अथ विद्याप्राप्त्यनन्तरमात्मनीनात्सौत्वनाच्च सुत्वनो याज्ञिकस्यापत्यात्सकाशात्तनूजां पुत्रिकां प्राप । किंभूताम् । अविद्यमानं दौरात्म्यं कुरूपत्वनिर्गुणत्वादिना दुष्टं स्वरूपं यस्याः सादौरात्म्या या सद्यौवनिका शोभनयौवना ताम् ॥

जैह्माशिनेयात् । इत्यत्र "एये०" [४७] इत्यादिनान्त्यस्वरादेर्लुक् ॥

१ बी °ह्मासिने°. सी °ह्माशने°. २ ए °यौथनि°.

१ ए °दिनां स्व°. २ सी वासिना°. ३ ए °नायिन । अ°. ४ सी वासिन आयिनौ. ५ सी °ह्माशने°. ६ ए °शिनया°. ७ बी °नेवाजिह्मा°. ८ बी °वेदसा°. ९ ए बी सामान्य°. १० सी दुष्टस्व°. ११ बी सा आदौ°. १२ सी °ह्माशने°. १३ सी इत्येये.

अध्वनीनात्[1] । आत्मनीनात् । अत्र "ईनेध्वात्मनोः[2]" [४८] इति न लुक्[3] ॥

आथर्वणिकात् । अत्र[4] "इकणि०" [४९] इत्यादिना[5] न लुक् ॥

यौवनिकाम् । अत्र "यूनोके[6]" [५०] इति न लुक् ॥

सामन्य । इत्यत्र "अनोत्व्ये ये"[५१] इति लुग्न ॥ अत्य इति किम् । दौरात्म्य ॥

सौत्वनात् । इत्यत्र "अणि" [५२] इति लुग्न ॥ इन्द्रवज्रा ॥

शाङ्खिनगाथिनवैदथिनाद्यैः[1] कैशिनपाणिनगाणिनमुख्यैः[2] ।

गौणिनवादमदत्त स मैधावस्तनयो मम मङ्क्षु मुदं च ॥ ६९॥

६९. मैधावो मेधाविनोपत्यं [स] मम तनयः शङ्खिनो गाथिनो विदथिनः केशिनः पा[प]णिनो गा[ग]णिनश्चापत्यैराचार्यैः सह गुणिनां पण्डितानामयं[9] गौणिनो यो वादस्तमदत्तात्यन्तं सर्वशास्त्रवेत्तृत्वादनेकाचार्यैः सह पण्डितवादं[10] चकारेत्यर्थः । तथा सर्वत्र[11] जेतृत्वान्मम मङ्क्षु मुदं चादत्त ॥

शाङ्खिन । इत्यत्र "संयोगादिनः" [५३] इति लुग्न । संयोगादिति किम् । मैधावः[12] ॥

गाथिन । वैदथिन[13] । कैशिन । पाणिन[14] । गाणिन । इत्यत्र "गाथि०" [५४] इत्यादिना लुग्न ॥

गौणिन[15] । इत्यत्र "अनपत्ये" [५५] इति लुग्न ॥ अनपत्य इति किम्[16] । मैधावः[17] ॥ दोधकवृत्तं छन्दः ॥

१ ए शान्तिन°. २ बी °द्यैः कौशि°.

१ बी °नीत्. २ ए °ध्वानोः. ३ सी °क् । अथ°. ४ ए °त्र क°. ५ बी °ना लु°. ६ सी यूनेके. ७ ए °ग्न । इ°. ८ ए °यः शाङ्खि°. ९ ए °यं गोणि°. १० ए °ण्डितं च°. ११ बी °त्र जैतृ°. १२ सी °धाव । गा° १३ ए °दथिनः । कै°. १४ ए °न । गणि°. १५ ए णित्य°. १६ ए °म् । मेधा°. १७ सी °धावं । दो°.

पालानिवौक्षान्प्रतिवादिनोजयद्दुर्ब्राह्मणान्ब्राह्मरहस्यवेद्यसौ ।
सौषामवद्ब्राह्म्ययुतोपि धीयुतोतिहैतनामो जितचाक्रवर्मणः ७०

७०. असौ मत्पुत्रः प्रतिवादिनो दुर्ब्राह्मणान्परिभवितुकामत्वेन दुष्टचित्तान्द्विजानौक्षानुक्ष्णां संबन्धिनः पालानिव पालकानिव गोपालानिवेत्यर्थः । अजयत् । कीदृक्सन्[1] । ब्रह्मण इयं ब्राह्मी प्रज्ञाहेतु[2]रोषधिः प्रज्ञार्थं तस्या अभक्षणेन तयायुतोपि धीयुतः स्वाभाविकप्रज्ञया युक्त इत्यर्थः । अत एव सौषामवत्सुषाम्नोपत्यं सौषाम ऋषिस्तद्वत् । ब्रह्मणः स्रष्टुरिदं ब्रा[3]ह्मं यद्रहस्यमुपनिषच्छास्त्रं वेदग्रन्थस्तद्वेदी । अत एव चा[4]तिहै[5]तनामो हितनाम्न ऋषेरपत्यं वेदवेदिनमतिक्रान्तस्तथा जि[6]तचाक्रवर्मणः ॥ इन्द्रवंशा[7]वंशस्थयोरुपजातिः ॥

स यशो जितहैतनामनस्तन्मैधावो मेधाविरूप्यमापत् ।
कौथुमकालापपैठसर्पास्तैतलजाजललाङ्गलाश्च नो यत् ॥७१॥

७१. मैधावो मेधाविनोपत्यं स[8] मत्पु[9]त्रो जितहैतनामनः सन्मेधाविरू[10]प्यं मेधाविनां भूतपूर्वं तद्यश आपत् । यद्यशो नापुः । के । कुथुमिना कलापिना[11] च प्रोक्तं वेदं विदन्त्यधीयते वा कौथुमा[12]ः कालापाश्च तथा पीठसर्पिण ऋषेरपत्यानि पैठसर्पा[13] द्वन्द्वे[14] ते तथा तैत[15]ली[16] जाजली लाङ्गली चा[17]चार्यास्तदुक्ता ग्रन्था[18] अप्युपचारात्तत्तच्छब्दैरुच्यन्ते । तानधीयते तैतलजाजललाङ्गलाश्च महावैदिकाः ॥ औपच्छन्दसकम् ॥

---

१ **बी** °न् । ब्राह्म°. २ **बी** °तुरौष°. ३ **बी** ब्राह्मयं य°. **सी** ब्राह्म य°. ४ **ए** °तिहेतुनामो हैतनामं हि°. ५ **बी** °मो हैतनामं ऋतनाम्न. ६ **सी** °तचक्र°. ७ **ए** °शास्थ°. ८ **सी** सत्पु°. ९ **बी** °त्पुत्रौ जि°. १० **ए** °रूपं मे°. ११ **सी** °ना वा प्रो°. १२ **बी** °माः कला°. १३ **बी** °न्द्वे त°. १४ **ए** ते तैतक°. १५ **सी** तैतिली. १६ **बी** °ली जांज°. १७ **सी** चार्या°. १८ **सी** °न्था उप°.

सौपर्वयुक्सौकरसद्मशिष्यशैलालशैखण्डजितस्तुतोष ।
साब्रह्मचारोस्य जनो गुणेनाश्मोपि द्रवेत्कीदृगनाश्मनो यः ॥७२॥

७२. अस्य मत्पुत्रस्य सब्रह्मचारिणामयं साब्रह्मचारो जनः सहाध्यायिलोको गुणेन महाविद्वत्तादिना तुतोष । किंभूतस्य । सुपर्वणोपत्यं सौपर्वस्तेन युजो युक्ता ये सौकरसद्मशिष्यशैलालशैखण्डजितः । सूकरसद्मापत्यस्य च्छात्रश्च शिलालिशिखण्डिनोरपत्ये च तान्वैदिकद्विजाञ्जयति यस्तस्य । यद्वा किमत्र चित्रं यदस्य गुणेन साब्रह्मचारो जनस्तुतोष । यतो गुणेन कृत्वाश्मोप्यश्मविकारवदतिकठिनहृदयः खलादिरपीत्यर्थः । द्रवेदार्द्रहृदयी स्याद्यस्त्वनाश्मनो नाश्मविकारतुल्यः स्नेहार्द्रचित्तः सज्जनमित्रादिः स कीदृक्सन्नितरां द्रुत एवेत्यर्थः ॥

औक्षान् । इत्यत्र "उक्ष्णो लुक्" [५६] इत्यन्त्यस्वरादेर्लुक् ॥

ब्राह्म । इत्यत्र "ब्रह्मणः" [५७] इति लुक् ॥

ब्राह्मी । इत्यत्र "जातौ" [५८] इति लुक् ॥ पूर्वेण सिद्धे जातावनपत्य एवेति नियमार्थं वचनम् । तेनोत्तरसूत्रेणापत्ये लुग्न । ब्रह्मणोपत्यानि ब्राह्मणान् ॥

सो(सौ)षाम । इत्यत्र "अवर्मणो ञो(मनो)पत्ये" [५९] इति लुक् । अवर्मण इति किम् । चाक्रवर्मणः ॥

हैतनामः हैतनामनः । अत्र "हितनाम्नो वा" [६०] इति वा लुक् ॥

मैधावः । अत्र "नोपदस्य" [६१] इत्यादिना लुक् ॥ अपद इति किम् । मैधाविरूप्यम् ॥

---

१ ए °ष । सब्र°. २ ए °नाश्मानो. सी °नासनेय ॥ अ°.

---

१ बी °स्य ब्र°. २ बी °रिण्याम°. ३ सी °द्वादः कि°. ४ सी °यी साध्यस्त्वनाश्मना ना°. ५ बी °त्रादि स°. ६ ए °दिः की°. ७ सी °क् । अवर्मण इति कि°. ८ ए °त्य इति लुक्°. ९ बी सी °धाव । अ°.

७८

कालाप । कौथुम । तैतलजाजे[1]ललाङ्ग[2]लाः । शैखण्ड[3] । शैलाल । साब्रह्मचारः । पैठसर्पाः । सौकरसद्म । सौपर्व । इत्यत्र "कलापि०" [६२] इत्यादिना लुक् ॥

आश्मः । अनाश्मनः । अत्र "वाश्मनो विकारे" [६३] इति लुक् ॥ इन्द्रवज्रा ॥

स चार्मकोशस्थगितासिबाह्योतिशौवसंकोच इहानहंयुः ।
[1]गुरोरपार्थक्य इवांह्रिमूलादाह्नं निनाय द्व्यहवद् द्व्यहीनः ७३

७३. यथा द्व्यहीनो द्वाभ्यामहो[4]भ्यामधीष्टो भूतो वा द्व्यहं द्वयोरह्नोः समाहारं नयति तथा स मत्पुत्र आह्नं[5] "श्वादिभ्योञ्" [६.२.२६] इत्यञि[6] अह्नां समूहं निनायात्यवाहयत् । कीदृक्सन् । चार्मश्चर्मणो विकारो यः कोशः प्रत्याकारस्तेन स्थगितो योसिस्तद्वद्बाह्योबहिर्भूतो गुरुहृदयमध्यस्थः । कुत ईदृगित्याह । यतो गुरोर्मातापित्रादेः पूज्यस्यांह्रिमूलादपार्थक्य इवापृथग्भूत इव । ईदृगपि कुत इत्याह । यत इह गुरोरंह्रिमूले शुनो[7]यं[8] शौवो यः संकोचः शीतादिना संकुचनं तमतिक्रान्तो विनीततमत्वेन नतसंलीनाङ्गत्वादतिसंकुचित इत्यर्थः । ईदृशोपि कुत इत्याह । यतोनहंयुर्विद्याद्यवलेपरहितः । विनयोत्कर्षेण गुरूनावर्जयन्प्रभूतानि दिनानि[9] दिनद्वयवत्सुखेनातिचक्रामेत्यर्थः ॥

चार्मकोश । शौवसंको[10]चः । अत्र " चर्म० " [६४] इत्यादिनान्त्यस्वरादेर्लुक् ॥

---

१ ए °रोपा°.

---

१ ए °जलाला°. २ सी °ङ्गल शैला°. ३ ए °खण्डः । शै°. ४ ए °महाभ्या°. ५ बी सी °ह्नं श्वादि°. ६ सी °ञि आह्नां. ७ ए शुनेयं. ८ सी °यं शौवाय सं°. ९ ए °नि निदन°. १० सी °कोच । अ°.

बाह्यः[1] । अत्र "प्रायोव्ययस्य" [६५] इति लुक् ॥ प्रायोग्रहणं प्रयोगानुसरणार्थम् । तेनेह न स्यात् । अपार्थिक्यः[2] ॥ पदस्येत्येव । अनहंयुः ॥

आह्नम् । अत्र "अनीन०" [६६] इत्यादिनाह्नोतो[3] लुक् ॥ अनीना[द्]टीति किम् । द्व्यहीनः[4] । "रात्र्यहर्०" [६. ४. ११०] इत्यादिनेनः[5] ॥ द्व्यह । "द्विगोरन्नह्नोट्" [७. ३. ९९] इत्यट् ॥ अति(टि?) । अन्वहमित्यादिप्रत्युदाहरणं स्वयं ज्ञेयम् ॥ उपजातिः[6] ॥

विंशेथ वर्षेस्य पिता विपन्नः शुक्काद्रवेय्यैष[1] सुतोपि दष्टः ।
सांकृत्यदौलेयसदाक्षि[2]चौडि[3]कामण्डलेयैः प्रतिबोधितोपि[4] ॥७४॥

७४. स्पष्टः । किं तु शुक्काद्रवेय्या[9] शोकसर्पिण्या[10] सुतोपि दष्टोतिशोकातुरोभूदित्यर्थः । सांकृत्यादयो मुनयः ॥ इन्द्रवज्रा[11] ॥

ययावभाग्यैर्मम पाण्डवेयजाम्बेयबाभ्रव्यनिभोथ धाम[5] ।
स्वायम्भुवं शाबरजम्बुकं[6] नु स मातृकस्नेहनदीं[7] विलङ्घ्य ॥ ७५ ॥

७५. अथ शुक्काद्रवेयीदशनानन्तरं ममाभाग्यैर्[12]पुण्यैः[13] स पुत्रः स्वायंभुवं स्वयंभुव इदं धाम ब्रह्मलोकं स्वर्गं ययौ । कीदृक् । पण्डोरपत्यानि शुभ्रादित्वादेयणि [६. १. ७३] पाण्डवेयाः पञ्च पाण्डवास्तथा जम्बूवर्णा[14]

---

१ सी °शुष्काद्रतोव्येष°. २ सी °दाक्षचौ°. ३ ए °क्षिवोडि°. ४ सी °पि सः ॥ स्प°. ५ ए धामः । स्वा°. ६ सी °जम्बूकं. ७ ए °तृकः स्ने°.

---

१ सी बाह्य । अ°. २ सी °पार्थिक्य । प°. ३ सी °तो । अ°. ४ सी °हीन । रा°. ५ बी °नेन । द्व्य°. सी °नेम । द्व्य°. ६ सी °रनह्नो°. ७ बी °जाति ॥ विं°. सी °जाति । विशे°. ८ ए °तिः । वंशे°. ९ सी °द्रव्येय्या°. १० सी °पिण्य सु°. ११ ए °वज्राः । य°. १२ ए °ग्यैः स. १३ सी °पुण्यै पुत्र स्वा°. १४ सी °वर्णगौ°.

गौर्जम्बूस्तस्या अपत्यं चतुष्पाच्च एयञि [६. १. ८३] जाम्बवेयो बाभ्रव्यश्च ऋषी बलविद्वत्त्वादिना तैर्निभस्तुल्यः। किं कृत्वा ययौ। मातुरागतो मातृको यः स्नेहः स एव संततं प्रवाहित्वान्नदी तां विलङ्घ्यावगणय्येत्यर्थः। यथा कश्चिन्नदीं मार्गसिन्धुं विलङ्घ्य शबरजम्ब्वां देशे भवम् "उवर्णात्" [६. ३. ३९] इतीकणि शाबरजम्बुकं ग्रामं याति ॥ उपजाति(तिः) ॥

अब्धौ दौष्कोध(ध्व)न्यधानुष्कसार्पि-
ष्को यद्वद्वाकस्मिकं याति नाशम्।
शाक्रत्क्येषाशाश्वतिक्यङ्गयष्टि-
स्तद्वत्किं तां धारयिष्याम्यनाथा ॥ ७६ ॥

७६. यद्वद्यथा दौष्को दोर्भ्यां तरन्नरोब्धेर्दोर्भ्यां तरीतुमशक्यत्वादब्धावाकस्मिकमकस्माद्भवं नाशं याति विनश्यति। यथा वाधानुष्को न धनुःप्रहरणो यः सार्पिष्कः सर्पिष्पण्यः स धनुःप्रहरणाभावात्सर्पिःसद्भावाच्च सर्पिर्लुण्टनाय निःशङ्कं चौरपातेनाध्वन्याकस्मिकं नाशं याति तद्वत्। तथा शाक्रत्की शक्रता विष्ठया संसृष्टैषा प्रत्यक्षाङ्गयष्टिराकस्मिकं नाशं याति। यतोशाश्वतिक्यशाश्वती तस्मात्तां विनश्वरीमङ्गयष्टिमनाथा पतिपुत्ररहिता सत्यहं किं धारयिष्यामि नैवेत्यर्थः ॥

१ सी °ब्धौ दोष्को°. २ ए दौष्वोध°. ३ ए °र्पिषो य°. ४ ए °षाश्वाश्वतिकिङ्ग°. ५ ए °द्वकिं ता धा°. ६ सी °त्किं ता धा°.

१ ए गौजम्बू°. २ बी °म्बू तस्या°. ३ सी °स्याप°. ४ ए सी °न्नदी मा°. ५ सी °र्णादिकण् इ°. ६ ए इक°. ७ ए °रजाम्बु°. ८ ए °था दोष्वो दो°. ९ बी दौष्कौ दोर्भ्यां तरी°. सी दौर्भ्यां त°. १० ए °रोब्धदोर्भ्यां ततरी°. ११ सी °यः सर्पि°. १२ बी °र्पिष्क स°. १३ ए °त्सर्पिलुण्ट°. सी °त्सर्पिस°. १४ बी °र्पिलुण्ट°. १५ सी °लुंटना°. १६ सी °क्रतिकी श°. १७ ए °सृष्टा प्र°. १८ बी °कश्मिकं. १९ बी °शास्वती°.

[1]विंशे । अत्र “विंशतेस्[2]तेर्डिति” [६७] इ[3]ति तेर्लुक् ॥

दक्ष । दाक्षि ॥ [4]चूडा । चौडि । बाह्वादित्वादिञ् ॥ इवर्ण । सांकृत्य । गर्गादित्वाद्यञ् ॥ दुली । दौलेय । “द्विस्वरादनद्याः” [६. १. ७१] इत्येयण् । अत्र “अवर्णेवर्ण[5]स्य” [६८] इ[6]त्यवर्णेवर्णयोर्लुक् ॥

कामण्डलेयैः । देवीविवक्षायां “ङ्याप्त्यूङः” [६. १. ७०] इत्येयण् । ग[7]वि तु “चतुष्पाद्भ्यः[8]” [६. १. ८३] इत्येयञ् । जाम्बेय । इत्यत्र “अकद्रू०” [६९] इत्यादिनोवर्णस्य लुक् ॥ अकद्रूपाण्डोरिति किम्[9] । काद्रवे[10]यया । शुभ्रादित्वादेयण् [६. १. ७३]। पाण्डवे[11]य ॥

बा[12]भ्रव्य । इत्य[13]त्र “अस्वयंभुवोव्” [७०] इत्यव् । [14]अस्वयंभुव इति किम् । स्वायंभुवम् ॥

ऋवर्ण । मातृक ॥ उ[*]वर्ण । शाबरजम्बुकम् ॥ दोस्[15] । दौष्कः ॥ इस् । सा[16]र्पिष्कः ॥ उस् । धा[17]नुष्क । त् । शा[18]कृत्की । अत्र “ऋवर्ण०” [७१] इत्यादिनेकस्येतो लुक् ॥ शश्वदकस्मात्प्रतिषेधः किम् । [19]शाश्वतिकी । “वर्षाकालेभ्यः” [६. ३. ८०] इतीकण् । आकस्मिकम् । अध्यात्मादित्वादिकण् [६. ३. ७८] शालिनी ॥

अथं नृपो पुत्रमृतस्य गृह्णात्यर्थोऽपि नास्थेत्ययि गच्छ गच्छ ।
मा जल्प मा जल्प तवेति जल्पन्त्यगे स्वमुल्लम्बयि[1]तुं प्रवृत्ता ॥७७॥

---

१ ए °यितुं प्रवृत्ता । की°.

---

१ ए °विंश अ°. २ बी सी °स्तेडिति°. ३ ए °ति स्तेर्लु°. सी °तिर्लु°. ४ ए °चूड । चौ°. ५ ए °र्णयोलुक्. ६ सी इवर्ण°. ७ ए सी °वि च°. ८ बी सी °द्भ्यः एएय°. ९ ए °म् । शु°. १० ए °वेयी । शु°. ११ सी °वेयः । बा°. १२ सी °भ्रव । इ°. १३ ए °त्र स्व°. १४ बी अश्वयं°. १५ ए °स् । दोष्वः । इ°. १६ ए °पिष्टः । उ°. सी °पिष्क । उ°. १७ ए °नुष्व । त्. १८ सी °कृत्तिकी । अ°. १९ ए शास्वति°.

---

* बी पुस्तके ९३ तमपद्यटीकास्थधनुश्चिह्नपर्यन्तं पत्राणि न सन्ति.

७७. तदा सा स्त्री अग्रे वृक्षे स्वमुल्लम्बयितुं प्रवृत्ता । कीदृक्सती । जल्पन्ती । किमित्याह । अपुत्रः सन्यो मृतस्तस्यार्थं नृपो गृह्णातीति हेतोरर्थेपि धनेपि विषये[1] नास्था न ममाशास्ति[2][3] । तस्माद्यपि हे महापुरुष मद्धेतुका[4] तवापि काप्यापन्मा स्म भूदिति त्वं गच्छ गच्छ । तथा कोपि[5] श्रोष्यतीति मा जल्प मा जल्पेति ॥

गच्छ गच्छ । मा जल्प मा जल्प । इत्यत्र "असकृत्संभ्रमे" [७२] इति पदस्य वाक्यस्य च द्विरुक्तिः ॥ उपजाति(तिः) ॥

आच्छिन्द्ध्याच्छिन्द्धीत्याच्छिदत्पाशमस्याः[1]
शोचं शोचं तामित्यवोचच्च भूपः ।
राजायं तेऽर्थं न ग्रहीता ग्रहीता
स्तोकं स्तोकं श्रद्धीयतां मद्वचोपि[2] ॥ ७८ ॥

७८. स्पष्टम् । किं तु पाशं गलबन्धनवस्त्रमाच्छिन्द्ध्याच्छिन्द्धीत्याच्छिदत् । भृशं बलात्कारेणोद्दालितवान् । शोचं शोचमभीक्ष्णं स्वं निदि(न्दि)त्वेत्यर्थः । अयमत्रत्यो राजा । अथ चायं प्रत्यक्षो मल्लक्षणो राजेत्यपि राज्ञा व्यञ्जितम् । न ग्रहीता ग्रहीताविच्छेदेन सदा न ग्रहीष्यति ॥ वैश्वदेवी[6] छन्दः ॥

कुरुते कुरुतेतमां दयां यन्नृपतिर्मोक्ष्यति तत्परासुवित्तम् ।
स्थेयाः पतिपुत्रयोः प्रदातुं पयसः पुत्रि[3] घटं घटं हि नित्यम् ॥७९॥

७९. यद्यस्मान्नृपतिरत्रत्यो राजा सकलपृथ्व्याममार्याघोषणाकारित्वाद्दयां[7] [कुरुते] कुरुतेतमां भृशमभीक्ष्णमविच्छेदेन वात्यन्तं कुरुते ।

१ ए °त्पाशोम°. २ सी °पि । पेशं°. ३ ए पुत्र घ°.

१ ए °वि ना°. २ ए मनाशा°. ३ सी °मास्थास्ति°. ४ ए °का का तवापि क्याप्या°. ५ ए कोप्य श्रो°. ६ सी °वी । कु°. ७ ए °त्वादयां.

तत्तस्मात्परासुवित्तं मृतस्य द्रव्यं मोक्ष्यति । तस्माद्धे पुत्रि पयसो जलस्य[1] प्रत्येकं घटं घटमेकैकं घटं[2] हि स्फुटं नित्यं परलोकगतयोः पतिपुत्रयोस्तर्पणाय प्रदातुं स्थेयाः । द्रव्यापहारशङ्कां मुक्त्वैतयोः परेतकार्याणि कर्तुं तिष्ठेत्यर्थः ॥

भृशे । आच्छिन्द्याच्छिन्द्धीत्याच्छिदत्[3] ॥ आभीक्ष्ण्य(क्ष्ण्ये ?)[4] । शोचं शोचमवोचत् ॥ अविच्छेदे । न ग्रहीता[5] ग्रहीता । इत्यत्र "भृश०" [७३] इत्यादिना द्विरुक्तिः ॥ भृशादयश्च क्रियाधर्मा इति क्रियापदमेवात्र संबध्यते । क्रियाविशेषणस्यापि क्रियात्वेनाध्यवसायाद्भृशादियोगे द्विर्वचनं स्यात्[6] । यथा स्तोकं स्तोकं श्रद्धीयताम् । प्राक्तमबादेरिति किम् । कुरुते कुरुतेतमाम् । अत्र तमबादेराति-शयिकात्[7]पूर्वमेव द्विर्वचनं पश्चात्तमबादिरन्यथा ह्यनियमः स्यात् ॥

पतिपुत्रयोः पयसो घटं घटं प्रदातुम् । अत्र "नाना०" [७३] इत्यादिना द्विरुक्तिः[8] ॥ औपच्छन्दसकम् ॥

कुर्वत्यनिशं नमो नमस्त्वं ज्येष्ठं ज्येष्ठमनु प्रसादयर्षीन् ।
कतरा कतरा त्वदीशसून्वोर्विपदेवं जनवाचि मा स्म रोदीः ॥८०॥

८०. हे पुत्र्यनिशं सदा नमो[9] नमोधिकं नमस्कारं कुर्वती[10] सती त्वमृषीन् ज्येष्ठं ज्येष्ठमनु प्रसादय ज्येष्ठानुक्रमेण मुनीन्संतोषय द्रव्यापहारशङ्कां[11] मुक्त्वा सदा गुरुसेवादिधर्मकृत्यानि कुर्वित्यर्थः । तथा त्वदीशसून्वोस्त्वत्पतिपुत्रयोः[12] कतरा कतरा विपत् । आधिविपद्व्याधिव्या(वि)-

---

१ सी °स्य घटं प्रत्येकमैकं घ°. २ सी °टं स्फुटं हि नि°. ३ सी °च्छिन्दत् । अभी°. ४ ए °भीक्ष्ण । शो°. ५ सी °ता । इ°. ६ सी °त् । तथा. ७ ए °शयका°. ८ सी °क्तिः । कु°. ९ सी °मोधि°. १० सी °ती त्व°. ११ सी °शङ्का मु°. १२ सी °न्वोस्त्वदीशपु°.

पदोर्मध्ये[1] का मृत्युहेतुर्विपदभूदित्यर्थः । एवंप्रकारेण जनतावाचि[2] लोकस्य प्रश्नवाक्ये सति तयोर्विपस्म(त्स्म)[3]रणेन मा[4] स्म रोदीः ॥

कतमा कतमानयोर्विभूतिः कतमन्निह्नुतमीश्वरत्वमस्ति ।
कतमत्कतमत्प्रकाशमेवं न खलु प्रक्ष्यति पुत्रि राजना[1] त्वाम् ॥८१॥

८१. स्पष्टम् । किं त्वनयोस्त्वत्पतिपुत्रयोः कतमा कतमा विभूतिरस्ति[5] किं रत्नसंबन्धकृतोत स्वर्णरूपादिसंबन्धकृताहो[6]स्विदुभयसंबन्धकृ[7]तेत्यर्थः । निह्नुतं गुप्तं निर्धा[8]नीकृतमित्यर्थः । ईश्वरत्वमैश्वर्यं[9][10] विभूतिरित्यर्थः । राजना राजपुरुषः ॥

नमो नमः । ज्येष्ठं ज्येष्ठमनु प्रसादयर्षीन् । इत्यत्र "आधिक्य[11]०" [७५] इत्यादिना द्विरुक्तिः ॥

त्वदीशसून्वोः कतरा कतरा विपत् । कतमा कतमानयोर्विभूतिः । अत्र "डतर०" [७६] इत्यादिना द्विरुक्तिः ॥ स्त्रीग्रहणं किम् । अनयोः कतमदीश्वरत्वम् ॥ केचिड्डुतरडतमाभ्यां स्त्रीलिङ्गाच्चान्यत्रापीच्छन्ति । अनयोः कतमत्कतमदीश्वरत्वम् ॥

प्रथमं प्रथमं पुत्रि मा स्म भुक्थाः पूर्वं पूर्वं भोजये[2]गुरू[3]स्त्वम् ।
अनुपोपप्लवमायुरभ्यतीयाः प्रप्रशमं संसंश्रयत्य(न्त्य)खण्डम् ॥८२॥

८२. हे पुत्रि प्रथमं प्रथमं गुरुभ्यः[12] पूर्वतरं त्वं मा स्म भुक्थाः किं तु पूर्वं पूर्वं स्वस्मात्पूर्वतरं गुरून्भोजये राजोपद्रवाभावेन प्रभूतं[13]

१ ए °ज त्वा°. २ ए °जयोर्गु°. ३ सी °र्गुरूस्त्व°.

१ सी °दोमध्ये. २ ए °जनिता°. ३ सी °पस्मर°. ४ सी °मा रो°. ५ ए °स्ति कं र°. ६ ए °होश्विदु°. ७ सी °कृत्येत्य°. ८ ए °निधनी°. ९ सी °धामीकृ°. १० ए °श्वर्य वि°. ११ सी °धिक इ°. १२ सी °गुरुः पूर्वं मा. १३ सी °तं स्वं ध°.

स्वधनं गुरुभोजनादिना धर्मकार्येण सफलयेरित्यर्थः। तथा नास्त्युपोपप्लवो राजादिकृतो धनापहारादिरुपद्रवो यत्र तद्यथा स्यादेवमखण्डं वृक्षादावुल्लम्बनादिनापमृत्योरकरणेन परिपूर्णं निष्कलङ्कं वायुरभ्यतीयागमयेः। कीदृक्सती। प्र[प्र]शममुपशान्तिं शोकोपशमेनेन्द्रियविजयेन च मनःसमाधिमित्यर्थः। संसंश्रयन्ती ॥ औपच्छन्दसकापरान्तिका ॥

उपर्युपर्यार्तिमिमामथोच्चैः स इत्युदुद्बोध्य तरूनधोधः।
चिकीर्षुरध्यध्युपकारमार्तमार्तं च पाता स्वगृहाञ्जगाम ॥ ८३ ॥

८३. अथ राजा तरूनधोधो वृक्षाणामासन्नः सन्स्वगृहान्स्वसौधं जगाम। गृहा(हाः) पुंसि च भूम्न्येवेति गृहस्य पुंस्त्वम्। किं कृत्वा। आर्तिमुपर्युपरि धनापहारशङ्कोत्थस्य दुःखस्यासन्नामिमां स्त्रियमित्युक्तरीत्योच्चैरत्यन्तमुदुद्बोध्य संबोध्य सुस्थीकृत्येत्यर्थः। यतः। कीदृक्। आर्तमार्तं दुःखितं दुःखितं पाता दुःखेभ्यो रक्षिता। तथार्मार्त(थार्त?)मध्यध्युपकारमुपकारस्यासन्नं चिकीर्षुश्चौ(श्चो)पचिकीर्षुरित्यर्थः॥ उपजातिः॥

पुरे पुरे स्वस्य हठापहृत्यासुतोसुतो दुःस्थ इति स्मरन्सः।
अथ प्रजा(जां) नन्दयितैक एकाममात्यमेकैकमिति न्यदिक्षत् ८४

१ ए °र्यातिऽपमृत्योमिमेमेथो°. २ ए °पकृत्या°. ३ सी °कमेकमामात्यमैकै°.

१ ए °स्त्युप°. २ ए °शमिने°. ३ सी संश्र°. ४ सी °काजाति। उ°. ५ ए °त्वातमु°. ६ सी °यगिमि°. ७ ए °रत्यंमु°. ८ सी °ध्य सु°. ९ सी °कृत्वेत्य°. १० ए °र्थः। की°. ११ ए °खितपा°. १२ ए °मार्त्तम°. १३ सी °रस्या°. १४ ए °र्षुरि°. १५ सी °जाति। पु°.

८४. स्पष्टम्[1] । किं तु स्वस्य द्रव्यस्य । असुतोसुतो[2] निष्पुत्रो[3] निष्पुत्रः । स राजा । एक एकां सर्वामित्यर्थः । प्रजां[4] नन्दयितासुतद्रव्यस्य हठापहृतेर्निवारणेच्छयाह्लादयिता सन्नेकैकममात्यमिति[5] वक्ष्यमाणरीत्या न्यदिक्षत् ॥

पूर्वं पूर्वं भोजयेगुरून्[6] । प्रथमं प्रथमं मा स्म भुङ्क्थाः । अत्र "पूर्व०" [७७] इत्यादिना द्विरुक्तिः ॥

प्रप्रशमम्[7] । अनुपोपप्लवम् । संसंश्रयन्ती । उदुद्बोध्य । इत्यत्र "प्रोप०" [७८] इत्यादिना द्विरुक्तिः ॥

तरूर्नधोध(धः)[8] । अध्यध्युपकारम् । उपर्युपर्यार्तिम्[9] । अत्र "सामीप्येऽधोध्युपरि" [७९] इति द्विरुक्तिः ॥

क्रियया वीप्सायाम् । आर्तमार्तं पाता ॥ गुणेन । असुतोसुतो दुःस्थः ॥ द्रव्येण । पुरे पुरेसुतः[10] । अत्र "वीप्सायाम्" [८०] इति द्विरुक्तिः ॥

एकैकम् । अत्र "लुप् च०" [८१] इत्यादिना द्विरुक्तस्यैकस्यादौ य एकस्तत्सक(स्क?)स्यादेः लुप् ॥ एक एकाम्[11] । अत्र विरामस्य विवक्षितत्वा[12]त्पुंवद्भावे सति संधिकार्यं न स्यात् ॥ उपेन्द्रवज्रा[13] ॥

द्वन्द्वं हीनाः सन्तु लक्षा मदाये द्वाभ्यां द्वाभ्यां कोटयो वाथ निम्नाः।
ग्राह्यं वित्तं न त्वसूनोः परासोरेतद्द्वन्द्वं[1] निर्दिशामो भवद्भ्यः॥८५॥

---

१ ए °रेतं द्वन्द्वं.

---

१ सी °स्पष्टः । किं. २ सी °तो नि°. ३ ए °ष्पुत्रः°. ४ ए प्रजा न°. ५ सी °कमामा°. ६ ए °येद्गुरू°. ७ ए प्रशप्र° सी प्रश°. ८ ए °नवधोवः । अ°. ९ ए °धोध्यप°. १० ए °रेसु°. ११ सी °एकम्°. १२ ए विविक्षि°. १३ ए °न्द्रका । द्व°.

८५. अहो अमात्या मदाये मदीय आयपदे ये द्रम्मादीनां लक्षाः स्युस्ते द्वन्द्वं द्वाभ्यां द्वाभ्यां लक्षाभ्यां हीना न्यूनाः सन्तु । अथ वा मदाये याः कोट्यो भवन्ति ता द्वाभ्यां द्वाभ्यां कोटिभ्यां निम्ना हीना(नाः) सन्तु । तु परमसूनोः परासोर्वित्तं भवद्भिर्न ग्राह्यम् । एतद्द्वन्द्वं रहस्यं भवद्भ्यो निर्दिशामो वदामः ॥ शालिनी ॥

ये द्वन्द्वमत्राचतुरं त एव द्वन्द्वं विभिन्ना मृतवित्तलुब्धाः ।
द्वन्द्वं प्रयुङ्क्ते य उ यज्ञपात्राण्यन्यः समस्तेन तदस्मि शास्मि ॥८६॥

८६. उ हे अमात्या अत्र भुव्याचतुर्भ्यः "शरदादेः" [७. ३. ९२] इत्यति आचतुरं ये द्वन्द्वं मैथुनाय द्वौ द्वौ भवन्ति माता पुत्रेण पौत्रेण प्रपौत्रेण तत्पुत्रेण च मैथुनं यातीत्यर्थः । मृतवित्तलुब्धा मृतद्रव्याभिलाषुका नरास्त एव पशव एव द्वन्द्वं विभिन्ना द्वैराश्येन पृथग्भूताः । एके मृतवित्तलुब्धा मृतद्रव्यग्रहणस्य निन्द्यतमकार्यस्य करणेन निर्विवेकत्वाच्छृङ्गपुच्छपरिभ्रष्टा नृरूपाः पशवोपरे तु शृङ्गपुच्छादिमन्त इत्यर्थः । अन्यो मृतवित्तलुब्धेभ्योपरः पुनस्तेन तुल्यो यो याज्ञिको द्वन्द्वं यज्ञपात्राणि प्रयुङ्क्ते यज्ञक्रियासु द्वे द्वे यज्ञपात्रे व्यापारयतीत्यर्थः । मृतवित्तानभिलाषी तु पुण्यपात्रत्वाच्छ्लाघ्यतमत्वाच्च याज्ञिकतुल्यः स्यादित्यर्थः । तत्तस्माद्धेतोरस्म्यहं शास्मि मृतवित्तं भवद्भिर्न ग्राह्यमित्यादिशामि ॥

द्वन्द्वं हीनाः । इति "द्वन्द्वं वा" [८२] इति वा निपात्यम् । पक्षे । द्वाभ्यां द्वाभ्यां निम्नाः ॥

---

१ सी °ज्ञपत्रा°. २ ए °ण्यन्य स°.

---

१ सी °भ्यां ल°. २ ए °भ्यां को°. ३ ए °मः ॥ ये. ४ सी °रहं. ५ सी °भ्यां रभिम्ना । र°.

रहस्ये । द्वन्द्वं निर्दिशामः ॥ मर्यादोक्तौ । आचतुरं ये द्वन्द्वम् ॥ व्युत्क्रान्तौ । द्वन्द्वं विभिन्नाः ॥ यज्ञपात्रप्रयोगे । द्वन्द्वं यज्ञपात्राणि प्रयुङ्क्ते । अत्र "रहस्य०" [८३] इत्यादिना द्वन्द्वमिति निपात्यते ॥ इन्द्रवज्राः(ज्रा) ॥

द्वन्द्वं विजित्य शिववैश्रवणौ स्थितस्य
वाच्यस्य तेथ न न कुर्म इति स्म नाहुः ।
छायां दधुर्न खलु कालिककालिकां स-
जातीयबुद्धय उपाददिरे तदाज्ञाम् ॥ ८७ ॥

८७. अथ तेमात्या वाच्यस्य सुराजत्वेन युक्तायुक्तं वक्तुं शक्यस्यापि राज्ञः पुरो न न कुर्म इति नाहुः स्म मनसा पीड्यमानत्वेन मृतवित्ताग्रहणाज्ञां नैव कुर्म इति नोचुरित्यर्थः । कीदृशस्य । द्वन्द्वं शिववैश्रवणावत्यन्तं सहचरौ शंभुधनदौ विजित्यैवं परोपकारितोदाराशयत्वादिगुणोत्कर्षेण पराभूय स्थितस्य वर्तमानस्य । ननु राज्ञो मुखदाक्षिण्येनेदं नोक्तं भविष्यति । मनस्यरुच्या तु मुखं कृष्णं कृतं भविष्यति । नेत्याह । काल्येव कालिका कालिकायाः सदृशी कालिककालिका तां मनस्यरुच्या कृष्णां छायां मुखकान्तिं च न खलु दधुः । किं तु तदाज्ञामुपाददिरेङ्गीचक्रुः । यतः । सती प्रकारोस्याः सज्जातीयातुच्छत्वेन स्वामिशुभाभिप्रायबहुमानिनीत्वेन च शोभना बुद्धिर्येषां ते ॥

द्वन्द्वं शिववैश्रवणौ । अत्र "लोक०" [८४] इत्यादिना द्वन्द्वमिति निपात्यम् ॥

न न कुर्मः । अत्र "आबाधे" [८५] इति द्विरुक्तिः ॥

---

१ सी द्वद्वं वि°. २ सी °पात्यंते । द्व°. ३ सी °ति चु°. नौ ४ए °वश्रैव°. ५ ए °ष्णं भ°. ६ ए °लिकः का°.

कालि(लि)ककालिकाम् । अत्र "न वा गुणः" [८६]इत्यादिना द्विरुक्तिः । तत्र चादौ स्यादेः लुप्[1] सा च रित् । रित्करणं प्रतिषिद्धस्य पुंवद्भावस्य रितीति विधानार्थम् । तेनात्र कोपान्त्यत्वात्पुंवद्भावप्रतिषेधेपि[2] "रिति" [३. २. ५८] इति पुंवद्भावः ॥ वाग्रहणात्पक्षे जातीयरपि । सजातीय ॥ वसन्ततिलका ॥

इत्यादिशक्षि(क्षि)तिपतिः स यथा प्रियप्रि-[1]
येण व्यधुः सुखसुखेन तथा ह्यमात्याः ।
त्यागी प्रियेण परिपर्यसुतः सुखेन
दाताथ वा परि[2] बलेः क इति ब्रुवाणाः ॥ ८८ ॥

८८. स क्षितिपतिर्भैमिर्यथा[3] प्रियप्रियेणाक्लेशेनेति पूर्वोक्तरीत्या मृतवित्ताग्रहणविषयेमात्यानादिशत् । तथा हि तथैवामात्याः सुखसुखे-[4] नाक्लेशेन नृपादेशं व्यधुः । कीदृशाः सन्तः । भैमेरौदार्यातिशयरञ्जि-तत्वेन ब्रुवाणाः । किमित्याह । असुतः परिपर्यसंख्यस्याप्यपुत्रमृतद्र-व्यस्यैवं लीलयैव मोक्षणादमुं भैमिं विना प्रियेण सुखेन त्यागी दाता कोथ वा बलेः परि बलिं विना सुखेन[5] को दाता भैमिबली मुक्त्वात्र[6] न कोपि त्यागीत्यर्थ इति ॥

प्रियप्रियेण प्रियेण । सुखसुखेन सुखेन । इत्यत्र "प्रिय०" [८७] इत्या-दिना वा द्विरुक्तिस्तत्र चादौ स्यादेः लुप् ॥

परिपर्यसुतः । परि बलेर्दाता । इत्यत्र " वाक्यस्य० " [८८] इत्यादिना वा द्विरुक्तिः ॥

---

१ सी प्रिये°. २ सी °रिकलेक.

---

१ सी °प् सो च. २ सी °धेप रि°. ३ ए °ति भैमि°. ४ ए °सुखाक्ले°. ५ सी °न दाता को भै°. ६ ए °त्र प्रिय इ°.

राजन्राजन्नृधव नृधवास्येकवीरः पृथिव्यां
न्यायिन्न्यायिन्बुध बुध जहि प्राग्नयं दुर्नियुक्त[1] ।
सौजः [सौजः] खल खल कले वेत्स्यदो दुष्ट दुष्ट
क्षुद्र[2] क्षुद्रेत्यजनि जनतावाद उच्चैस्तदानीम् ॥ ८९ ॥

८९. तदानीमपुत्रमृतवित्तत्यागकाल उच्चैरुत्कृष्टो जनतावादो लोकोक्तिरजनि । कथमित्याह । हे राजन् राजन् हे नृधव[1] नृधव नराणां भर्तः कुमारपालासि त्वं पृथिव्यामेकवीरः । केनाप्यकृतपूर्वस्यापुत्रमृतवित्तत्यागस्य[2] करणान्निरुपमो[3] दयावीरो दानवीरश्चेत्यर्थ[4] इति । तथा हे न्यायिन्न्यायिन्न्यायवन्मन्य हे बुध बुध पण्डितंमन्य दुर्नियुक्त दुष्टस्यापुत्रमृतवित्तस्य ग्रहणेन दुष्टाधिकारिन्[5]दुष्टामात्य प्राग्नयमपुत्रवित्तग्रहणरूपां प्राक्तनीं नीतिं जहि त्यजेति । तथा रे [सौजः] सौजो बलिष्ठ तथा सर्वंकषत्वाद्रे[6] खल[7] खल तथा रे दुष्ट दुष्टापुत्रमृतस्वापहारादिदोषयुक्त तथा लोकानां महाकष्टे पातुकत्वेन रे क्षुद्र क्षुद्र कले कलिकालाद[8] एतदपुत्रमृतवित्तत्यागलक्षणं त्वदीयसौजस्त्वादीनां निपूदनं[9] राज्ञः सन्न्यायाचरितं वेत्सीति च ॥

संमतिः[10] कार्येष्वाभिमत्यं पूजनं वा तत्र । राजन्राजन्[11]नृधव नृधवास्येकवीरः पृथिव्याम् । असूयायाम् । न्यायिन्न्यायिन्बुध[12] बुध जहि प्राग्नयं दुर्नियुक्त[13] ॥ कोपे । सौजः सौजः खल खल कले वेत्स्यदः ॥ कुत्सने । क्षुद्र क्षुद्र दुष्ट दुष्ट[14] कले

१ सी °युक्त । सौ°. २ सी °क्षुद्रे°.

१ ए °व न°. २ ए °त्यागेस्य. ३ ए °णानिरु°. ४ सी °त्यर्थः । त°. ५ ए °कारन्दु°. ६ सी °ल त°. ७ ए °हादि°. ८ सी °कालद. ९ ए °निसूद°. १० ए °मति का°. ११ सी °जन्नृ°. १२ सी °ध ज°. १३ ए °नि । कौ°. १४ ए °ष्ट काले.

वेत्त्यदः । अत्र "संमति०" [८९] इत्यादिना द्विरुक्तिस्तत्र पूर्वोक्तौ स्वरेऽव-न्त्यः स्वर(रः) प्लुतो वा ॥ मन्दाक्रान्ता ॥

दस्यो३ दस्यो हतक हतक३ पाप पापाङ्ग कूज३
अङ्गोत्कूजानुभवसि फलं त्वं स्वयं वेश्म यासि३ ।
देवं खण्डालयमकलयः[1] सोपरेद्युः खसं प्र-
त्येवं प्रोचे प्रणिधिकथिते शीर्णकेदारहर्म्ये ॥ ९० ॥

९०. अपरेद्युः[2] शीर्णे भग्नं यत्केदारस्य शंभोर्हर्म्यं तस्मिन्प्रणिधि-कथिते केदारहर्म्यं भग्नमस्तीति चरैः कथिते सतीत्यर्थः । स भैमिः खसं खसाः केदारसमीपदेशस्थाः क्षत्रियभेदाः[3] खसानां राजाप्यभे-दात्खसस्तं खसराजं इत्येवं तर्जनाप्रकारेण प्रोचे । तथा हि । हे दस्यो३ दस्यो ग्रामिकादिव्यक्तलाछाटैः पातकत्वेन[5] चौरात एव रे पाप पातक एव च रे हतक हतक३ निन्द्यतम । अङ्गशब्दः[6] संबो-धने । हे खस कूजाव्यक्तं शब्दं कुरु तथाङ्ग हे खसोत्कूज प्राबल्ये-नाव्यक्तं शब्दं कुरु । केनाप्यनिगृहीतत्वेनानिशं चौर्यादिपापकर्मणोपा-र्जितप्रभूतविभूतिदर्पेणाव्यक्तान्कलकलारावान्कुर्वित्यर्थः । परमेतत्कुक-र्मणः[7] फलमनुभवसि त्वं "सत्सामीप्ये सद्वद्वा" [५. ४. १] इति भवि-ष्यति वर्तमाना । अधुनैव त्वां निग्रहीष्यामीत्यर्थः । तथा हे खस विन-यादिधर्माचारभ्रष्टत्वात्स्वयं[8] वेश्म गृहं यासि३ आश्रयसि । देवं केदारं खण्डो विशीर्ण आलयः प्रासादो यस्य तं तथाकलयोधारयः

---

१ सी °लयः कलयेऽसो°.

---

१ सी °ष्वत्यस्व°. २ सी °रेद्युशीर्णे भ°. ३ सी °यभेदाः. ४ सी या-तृका°. ५ सी °त्वे चौ°. ६ सी °शब्द सं°. ७ सी °त्कुकार्मेण फ°. ८ सी °भ्रष्टास्वयं.

केदारप्रासादं विशीर्णं न समाचरय इत्यर्थः । अस्यापि फलमनुभवसीति ॥

तदेवं चौर्याद्यन्यायकारित्वाद्विशीर्णस्य केदारप्र(प्रा)सादस्य सारायाः अकर्तृत्वाच्च केदारसमीपदेशस्थं खसराजं संतर्ज्यात्मानं निन्दन्विशीर्णकेदारप्रासादोद्धारायामात्यमाह ॥

सन्नन्यासे खण्डालये देव आस्ते
प्रायश्चित्तं देवोपदिश्याः क्रियां च ।
तच्चाचर्यासं तद्विशेषं च राजे-
त्यन्तर्ध्यात्वोचे वाग्भटामात्यमेवम् ॥ ९१ ॥

९१. राजा वाग्भटामात्यं भग्नकेदारप्रासादोद्धारायैवं वक्ष्यमाणरीत्योचे । किं कृत्वा । भक्त्यतिशयादन्तश्चित्ते ध्यात्वा । किमित्याह । अहं सन्नन्यासे तिष्ठामि । देवः केदारः खण्डालये विशीर्णप्रासाद आस्ते । तस्माद्धे देव केदार तद्विषयकृतैवंविधाविनयोत्थमहापापविशुद्ध्यर्थं मम प्रायश्चित्तं विशोधि तपश्चरणं क्रियां च स्वर्णदानादिकं कार्यं चोपदिश्यात् । आदिशेस्त(त्त)तश्च तच्च प्रायश्चित्तं च तद्विशेषं च प्रायश्चित्तविशेषं स्वर्णदानादिकं चाहमाचर्यासमनुष्ठेयासमिति ॥ वैश्वदेवी छन्दः ॥

यदूचे तदाह ॥

कारूंश्च प्रहिणुश्व धनं च भृतकानायुङ्क्ष्व नेतृंस्तथा
चान्द्रं वेश्म चिदस्तु गान्धिकपुटीचिज्जायतां धाम तच्चत् ।

१ सी °क्रियायां. २ ए राज्येत्य°. ३ ए °स्तु गन्धि°. ४ सी तत्°.

१ ए °रस्य. २ सी °स्य सरा°. ३ सी °अक्षतत्वा°. ४ सी संत्यज्यात्मा°. ५ सी °मात्ममेवं भ°. ६ सी °सादमाचर्यास°. ७ ए °श्याम् । आ. ८ सी °ह । कोरूं°.

भक्तिस्ते मयि यद्वदर्हति विभौ शंभौ तथा मेर्हति३

तद्वेश्माक्षतमात्थ तत्प्रवरमित्यात्थ३ तदामात्य भोः ॥९२॥

९२. भो अमात्य यद्वत्ते मयि विभौ प्रभौ विषये भक्तिरर्हत्युचिता स्यात्तथा मे शंभौ विषये भक्तिरर्हति३ । तस्माद्विशीर्ण[1]केदारभवनोद्धाराय कारूंश्च वर्धक्यादीञ् शिल्पिनो धनं च प्रहिणु३ । तथा भृतकान्कर्म-करा[2]न्नेतॄंस्तथा भृतकादिचिन्ताकारिणो नायकांश्चायुङ्क्ष्व[3] प्रयुङ्क्ष्व । ततश्च तद्धाम[4] केदारभवनं चान्द्रं वेश्मचिदस्तु चन्द्रप्रासाद इव भवतु चन्द्र-भवनं ह्येकरात्रावेव निष्पद्यतेन्यथा पतेत्तद्वच्छीघ्रं निष्प[5]द्येतामित्यर्थः । तथा गान्धिकपुटीचिज्जायता३म् । यथा गन्धपण्यस्य वणिज औ-षधपुटिका क्षणान्नि[6]ष्पद्यत एवं निष्पद्यताम् । तथा भो अमात्य तदा तस्मिन्विवक्षित आ[7]वयोः प्रसि[8]द्धे काले तद्वेश्म केदारभवनं त्वमक्ष-तमभग्नमस्तीत्यात्थावोचः । तदायोगे "स्मे च वर्तमाना" [५.२.१६] इत्यतीतेत्र वर्तमाना । तथा तद्वेश्म तदा प्रवरमनेकरूपकचित्रादिभिः प्रधानमस्तीति त्वमात्थाख्यः । तद्वेश्माक्षतं तत्प्रवरमित्युक्तवन्तममात्यं प्रणिधिभणितियुक्त्या स्वमतात्प्रच्याव्यैवमुपालम्भं चामात्यं प्रति रा-जोच इति संबन्धः ॥

दस्यो३ दस्यो । हतक हतक३ । अत्र "भर्त्सने पर्यायेण" [९०] इति द्विरुक्तिः । तत्र पर्यायेण पूर्वस्यां[9]मुत्तरस्यां वोक्तावन्त्यस्वरः प्लुतो वा ॥ पक्षे । पाप पाप ॥

---

१ सी °र्णकदा°. २ ए °रानेतॄं°. ३ सी °ङ्क्ष्व । त°. ४ सी तद्वासं के°. ५ सी °द्यतां । तथा भो आमा°. ६ ए °निषद्य°. ७ ए आचार्योः प्र°. ८ सी °सिद्धे°. ९ ए °ण ति. १० ए °स्याप्रवर°.

अङ्ग कूज३ । अङ्गो३कूजानुभवसि फलम् । पाप पाप । इत्यत्र "त्यादेः०" [९१] इत्यादिना वा प्लुतः ॥

क्षिया आचारभ्रेषः । तत्र स्वयं वेश्म यासि३ । देवं खण्डालयमकलयः । सब्रह्मचर्यासे । खण्डालये देव आस्ते ॥ आशिषि । प्रायश्चित्तं देवोपदिश्या(३)-क्रियां च । तच्चाचर्यासं तद्विशेषं च ॥ प्रैषे । कारूंश्च प्रहिणु३ धनं च । भृतकानायुङ्क्ष्व नेतॄंस्तथा । इत्यत्र "क्षिया०" [९२] इत्यादिना वा प्लुतः ॥

गान्धिकपुटीचिज्जायतां धाम त३त् । चान्द्रं वेश्मचिदस्तु । इत्यत्र "चि-तीवार्थे" [९३] इति वा प्लुतः ॥

प्रतिश्रवणे । शंभौ तथा मे भक्तिरर्हति३ । भक्तिस्ते मयि यद्वदर्हति ॥ नि-गृह्यानुयोगे । तत्प्रवरमित्यात्थ(३) । तद्वेश्माक्षतमात्थ । इत्यत्र "प्रतिश्रवण०" [९४] इत्यादिना प्लुतो वा ॥ शार्दूलविक्रीडितं छन्दः ॥

स्रष्टा नु३ शंभुर्न्वित्युशन्तो मुनीन्द्रा
ओ३म्स्रष्टारमो३म्(मोम्?) शंभुमित्यस्तुवन्यम् ।
शीर्णागारं तं नाभृणोर्नाबुधो वा-
श्रौषं हि३ प्रावेदं ह्युदित्वा स ऊचे ॥ ९३ ॥

९३. अथ वाहो अमात्य यं केदारमों स्रष्टारं विधातारं [ओं शंभुं संहर्तारं?] प्रतिपद्यामह इत्येवंप्रकारेण मुनीन्द्रा अस्तुवन् । यतः । स्रष्टा नु३ शंभुर्न्वित्युशन्तः सृष्टिसंहारकारित्वात्केदारोयं ब्रह्मा वा

---

१ सी °वति फ°. २ सी त्यादेत्या°. ३ सी °चाराभ्रे°. ४ ए °रभ्रेषः । तत्रास्व°. ५ सी °लयः । स°. ६ ए °श्यात्रः क्रियां. ७ ए प्रैष । का°. ८ ए °पुत्रीचि°. ९ सी प्लुत । श्र°. १० सी °रही ति°. ११ सी °मों श्रष्टरं°.

हरो वेति देवताद्वयविषयसंशयप्रकारेणेच्छन्तस्तं केदारं शीर्णं भग्नमागारं यस्य तं शीर्णागारं लोकेभ्योनाश्रृणोर्नाबुधो वा चरैर्नाज्ञासीर्वा यत्त्वं तद्वेश्म तदाक्षतं प्रवरं वास्थेत्यर्थः । इति नृपप्रश्नेमात्यो हे राजन् हि स्फुटं तं शीर्णागारमश्रौषं प्रावेदं चाधुनाहमपि श्रुतवाञ्ज्ञातवांश्चेत्यर्थः । इत्युदित्वा प्रत्युत्तरमुक्त्वा राजानमूचे ॥

स्रष्टा नु३ शंभुर्नु । इत्यत्र "विचारे पूर्वस्य" [९५] इति प्लुतो वा ॥

ओ३म् स्रष्टारम् ओ३म्(ओम्?) शंभुम् । इत्यत्र "ओमः प्रारम्भे" [९६] इति प्लुतो वा ॥

शीर्णागारं तं नाश्रृणोर्नाबुधो वा अश्रौषं हि३ प्रावेदं हि । इत्यत्र-"हेः प्रश्न०" [९७] इत्यादिना हेः प्लुतो वा ॥ वैश्वदेवी छन्दः ॥

मन्त्री यदूचे तदाह ।

सोमेशवेश्म३ अगमे३[:] अपश्य-
स्तदित्यथोचे नृपतिः पुनस्तम् ।
एत३दगच्छे३न्तदपश्यमुच्चै-
र्मन्त्रिन्नदोप्युद्ध्रियतां विशीर्णम् ॥ ९४ ॥

९४. हे राजंस्त्वं सोमेशवेश्म३ सोमनाथभवनं यात्रार्थमगम३स्तथा तत्सोमेशवेश्मापश्य इति मन्त्र्यूच इति संबन्धः । अथामात्यस्यैव भणनानन्तरं प्रत्युत्तरयन्नृपतिः पुनस्तममात्यमूचे । यथा हे मन्त्रिन्नेत३-

१ ए सोमोशवेश्मः३ अप°. २ सी °म अ°. ३ सी °च्छ३स्तद°.

१ सी °षयशंश°. २ ए °मारं. ३ ए °भ्यो वा ना°. ४ सी वावेत्य°. ५ ए °मश्रोषं. ६ ए वा । शी°. ७ सी हि प्रा°. ८ ए °शवोश्म. ९ बी °र्थमागमत् । स्त°. १० ए °वेश्म प°. ११ ए °त्यस्येवं.

त्सोमेशवेश्माहमुच्चैरतिशयेनागच्छ३म् । तथा तत्सोमेशवेश्मोच्चैर[1]-पश्यम् । अदोपि सोमेशवेश्मापि विशीर्णमुद्भ्रियताम् ॥

प्रश्ने । सोमेशवेश्मं[2]३ अगमइ[ः] अपश्यस्तत् ॥ प्रश्नाख्याने । एत३-दगच्छ३म् तदपश्यम् । अत्र "प्रश्ने च०" [९८] इत्यादिना वा प्लुतः[3] ॥

उपजातिः ॥

[1]राजाज्ञयाथ सचिवो न्यगदत्स्वकानि-
त्यागच्छ भोः कपिलक[2]३ व्रजे [3]दे३वदत्त ।
उत्तिष्ठ क्रू३प्तशिख साधय कृ[4]ष्णमि(३)त्र
केदारसोमशिरसोर्भवने वि[5]धध्वम् ॥ ९५ ॥

९५. स्पष्टम् । किं त्वागच्छ मद्व[4]चःश्रवणाद्यर्थं मत्समीपमायाहि । साधयामुकं किंचित्कार्यं निष्पादय ततो यूयं सर्वेपि मिलित्वा केदार-सोमशिरसोः केदारसोमनाथयोर्भवने विधध्वं निष्पाद[5]यध्वम् ॥

वसन्ततिलका ॥

नम कपिलक मन्त्रिशासनं त्वं प्रतिशृणु क्लृप्तशिख त्वमप्यदो भोः ।
बिभृहि शिरसि देवद(३)त्त शीघ्रं मिथ इति ते प्रणिगद्य तत्र जग्मुः ९६

९६. स्पष्टम् । किं तु नम शिरो नमयित्वाङ्गीकुर्वित्यर्थः । प्रतिशृण्व-ङ्गीकुरु । अदो मन्त्रिशासनम् । शिरसि बिभृहि शिरस्यञ्जलिं बद्धा मन्त्रि-शासनं प्रतीच्छे[6]त्यर्थः । तत्र केदारसोमना[7]थौ यत्र स्तः ॥

---

१ ए सी राज्ञाज्ञ°. २ ए °ज३ दे°. ३ ए बी देव°. ४ सी °ष्ण३ मि°. ५ ए सी विदध्व°.

---

१ सी °मैचै°. २ बी °श्म३ आगमः३ अ°. ३ सी °तः । रा°. ४ ए सी °द्वचश्र°. ५ ए °यश्च । व°. ६ ए °र्थः । के°. ७ ए °नाथो य°.

आगच्छ भोः कपिलक३ । नम कपिलक ॥ गुरुर्वैकोनन्त्योपि ऌनृत् । व्रज दे३वदत्त । बिभृहि शिरसि देवद(३)त्त । उत्तिष्ठ क्लृ(३)प्तशिख । प्रतिश्रृणु क्लृप्तशिख । अत्र "दूराद्०" [९९] इत्यादिना वा प्लुतः ॥ महाविभाषयैव प्लुतविकल्पे सिद्धे वाग्रहणं न विकल्पार्थं किं त्वन्त्यस्य प्लुतेन सह गुरोरसमावेशार्थम् । तेन क्लृ३प्तशिख३ इति न स्यात् ॥ अनृदिति किम् । साधय कृष्णमि३त्र । कृसंबन्धिन ऋतो न प्लुतत्वम् ॥ औपच्छन्दसकम् ॥

[1]हे३ देवदत्त चल[2] है३ व्रज यज्ञदत्त
गोविन्द हे३ त्वरय माधव[3] है३ त्वरस्व ।
अन्योन्यमित्यभिदधद्भिरुपेत्य हर्षेणाकारि शिल्पिभिरथायतनद्वयं तत् ॥ ९७ ॥

९७. स्पष्टम् ॥

[4]हे३ देवदत्त चल । गोविन्द हे३ त्वरय । है३ व्रज यज्ञदत्त । माधव[5] है३ त्वर[6]स्व । इत्यत्र "हेहैष्वेषामेव" [१००] इति यत्रतत्रस्थयोर्हेहैशब्दयोरन्त्यः स्वरः प्लुतो वा ॥ वसन्ततिलका ॥

युष्मान्भो अभिवादये भव जयी भो३ एधि जैनश्च[4] भो
युष्मानप्यभिवादये सुकृतवान्भूयाः कुमार३ भव ।
आयुष्मांश्च कुमारपाल चिरमित्याशंसितो[5]त्राहर्तैश्चैत्यं स्फाटिकपार्श्वबिम्बमकृत स्वर्णेन्द्रनीलैर्नृपः ॥ ९८ ॥

९८. नृपो भैमिः स्फाटिकं स्फटिकमयं पार्श्वबिम्बं श्रीपार्श्वनाथप्र-

---

१ बी हे दे°. २ ए बी °ल हे३ व्र°. ३ बी °व हे३ त्व°. ४ सी °नस्वभोश्च. ५ ए °तोवार्हतैश्चैत्यं स्फटि°.

---

१ बी नमः क°. २ बी °ख इ°. ३ सी °मित्र. ४ बी हे दे°. ५ ए °व हे३ त्व°. ६ बी °रय । इ°.

तिमा यत्र तच्चैत्यं प्रासादं स्वर्णेन्द्रनीलैः स्वर्णेन नीलमणिभिश्च कृत्वा-त्राणहिल्लपाटकेऽकृताकारयदित्यर्थः । कीदृक्सन् । आर्हतैरर्हद्दैवतैराचार्योपाध्यायाद्यैराशंसितो दत्ताशीर्वादः । कथमित्याह । भो आर्हता आचार्या अहं युष्मानभिवादये वन्द इति भैमेरभिवाद आर्हताः प्रत्यभिवदन्ति । भो३ भैमे त्वं जय्यमार्याघोषणादिप्रकृष्टधर्मवृद्धये जयनशीलो भव । तथा भो भैमे जैनश्चार्हतश्चैधि भव । तथा भो उपाध्यायाद्यार्हता युष्मानप्यहमभिवादय इति भैमेरभिवादेपरेप्यार्हताः प्रत्यभिवदन्ति हे कुमार३ कुमारपाल त्वं सुकृतवान्धर्मलाभवान्भूयास्तथा हे कुमारपाल त्वं जिनधर्मवृद्धये चिरमायुष्मांश्च भवेति ॥ शार्दूलविक्रीडितम् ॥

मोदस्व गार्ग्य शिवमस्तु तवापि वात्स्य३
पुण्यैधि वात्सि जयतात्तुषजेत्यृषीणाम् ।
यत्राभिवादमनु वागथ तत्र भूपः
श्रीदेवपत्तनतलेऽकृत पार्श्वचैत्यम् ॥ ९९ ॥

९९. अथ तथा भूपो भैमिस्तत्र श्रीदेवपत्तनतले देवपत्तनाख्यपुरस्य तलपदे पार्श्वचैत्यमकृताकारयत् । यत्राभिवादमभिवादये गार्ग्योहं भो इत्याद्यभिवन्दनामनुलक्ष्यीकृत्य ऋषीणां वागाशीर्वचनं वर्तते । तथाहि । हे गार्ग्याभीष्टपूर्त्या मोदस्व तथा हे वात्स्य३ तवापि शिवमस्तु तथा हे वात्सि वत्सस्यापत्य स्त्रि पुण्या पापमलापगमात्पवित्रैधि भव तथा हे तुषज शूद्रभेद त्वं जयतादिति ॥

१ सी °स्तु मत्स्य. २ ए °चैत्याम्.

१ बी तच्चेत्यं. २ बी सी °हिल्लपा°. ३ सी °था भैमे जेजै°. ४ ए °यादर्ह°. ५ सी °रपा°. ६ सी °दमये. ७ सी वापितस्य. ८ सी तवापि हे. ९ सी °गतात्प°. १० ए °भे त्वं.

युष्मान्भो अभिवादये भव जयी भो३ एधि जैनश्च भोः ॥ गोत्रे । अभिवादये वात्स्योहं भोः शिवमस्तु तवापि वात्स्य३ अभिवादये गार्ग्योहं भो मोदस्व गार्ग्य ॥ नाम । युष्मानप्यभिवादये सुकृतवान्भूयाः कुमार३ भवायुष्मांश्च कुमारपाल । इत्यत्र "अस्त्री०" [१०१] इत्यादिना प्लुतो वा ॥ स्त्रीशूद्रवर्जनं किम् । अभिवादये वात्स्यहं भोः पुण्यैधि वात्सि । अभिवादये तुषजोहं भो जयतात्तुषज ॥ वसन्ततिलका ॥

सोमेट्पुरी३मकलय३ः सुमता३इ आप३ः
साधा३उ गूर्जरपुरे३ अगम३ः पृथा३उ ।
तत्र३ अभू३र्वरकुमारविहारचैत्य-
दृष्टया३इ दिक्ष्विति तदाजनि पान्थवार्ता ॥ १०० ॥

१००. तदा पार्श्वनाथभवनद्वयविधानकाले दिक्षु पान्थवार्ता पथिकानां मिथो वार्ताजनि । कथमित्याह । हे सुमता३इ सुमते त्वं सोमेट्पुरी३म् देवपत्तनमकलय३ अज्ञासीरपश्य इत्यर्थस्तथा हे साधा३उ साधो त्वं सोमेट्पुरी३माप३ः अगमस्तथा हे सुमता-३इ त्वं तथा हे साधा३उ त्वं च पृथा३उ पृथौ विस्तीर्णे गूर्जरपुरे३ अणहिलपाटके चागम३स्तथा तत्र सोमेट्पुरीगूर्जरपुरयोर्वरकुमारविहारचैत्यदृष्ट्या३इ वरे अद्भुते कुमारविहारौ कुमारविहाराख्ये ये चैत्ये पार्श्वनाथप्रासादौ तयोर्या दृष्टिस्तदर्थं त्वमभूः संपन्नो वरकुमारविहारचैत्ये देवं दृष्टवानित्यर्थ इति । एतेनैतयोः कुमारविहा-

१ ए अपग°. २ ए °कुलामा°.

१ सी °वात्स्य अ°. २ ए बी °दयो गा°. ३ बी स्त्रीसूद्र°. ४ सी °हं भो पु°. ५ ए °य३ आज्ञा°. ६ बी °धा३ सा°. ७ बी °प आग°. सी °प अ°. ८ सी पृथो वि°. ९ सी °हिलपा°. १० बी °त्यर्थः । ए°.

रयोर्निरुपमं[1] रामणीयकमुक्तम् । सर्वत्र "प्रश्ने च प्रतिपदम्[2]" [७. ४. ९८] इति प्लुतः ॥

भक्तोसि साधा३उ ततो वसामि
गिरा३उ किं ते पुरि शंभुनेति ।
स्वप्ने निदिष्टः क्षितिपः कुमार-
पालेश्वराख्यायतनं *व्यधत्त[1] ॥ १०१ ॥

१०१. क्षितिपो भैमिरणहिल्लपुरे कुमारपालेश्वराख्यायतनं व्यधत्ताकारयत् । यतः स्वप्ने शंभुना[3] निदिष्ट आज्ञप्तः । कथमित्याह । हे साधा३उ अत्र "दूराद्०" [७. ४. ९९] इत्यादिना प्लुतः[4] । हे साधो कुमारपालासि त्वं मयि भक्तस्ततस्तस्माद्धेतोः किं गिरा३उ । अत्र "विचारे पूर्वस्य" [७. ४. ९५] इति प्लुतः । गिरौ हिमवति स्फटिकाचले वा स्वाश्रये वसामि किं वा ते पुरि वसामि त्वद्भक्तिविशेषहृतहृदयोहं स्वाश्रयं गिरि(रिं) मुक्त्वाणहिल्लपुरे वस्तुमिच्छामीति तात्पर्यार्थ इति ॥ उपजातिः[5] ॥

आयुष्मान्भव भूपता३इ अजय३[ः] शान्त्या३ सुबुद्धा३यृषी[३]त्र्
जिष्णा३वूर्जं तदै४न्दवे जय चिरं[2] चौ४लुक्यचूडामणे ।
क्ष्मानृण्यीकरणात्प्रवर्तय निजं संवत्सरं चेत्यृषि-
ष्वाघोषत्सु सदा नृपः पदविधिर्यद्वत्समर्थोभवत् ॥ १०२ ॥

१०२. यद्वद्यथा पदविधिः पदसंबन्धी विधिः सदा समर्थपदा-

१ ए °धत्ताका°. २ ए °रं चो४लु°.

१ बी °मं रम°. २ ए सी °ति पाद°. ३ सी °ना इति आ°. ४ ए प्लुतो सा°. ५ सी °जाति । आ°.

* इत उत्तराणि बी पुस्तकपत्राणि न लब्धानि.

श्रयो भवति समर्थानां पदानां स्यादित्यर्थः। तथा नृपः कुमारपालः सदा[1] समर्थः सर्वशक्तिसंपद्भिः शक्तोभवत्। शब्दश्लेषेणोपमा। केषु सत्सु। ऋषिषु। किंभूतेषु। आघोषत्सु भैमेर्लोकोत्तरैर्विनयादिगुणैरवदातैर्हृतहृदयत्वेनाशिषो ददत्सु। कथमित्याह। हे भूपता३इ भूपते आयुष्मान्भव युष्मान्भो अभिवादय इति कुमारपालाभिवादोत्र गम्यः। "अस्त्रीशूद्रे" [७. ४. १०१] इत्यादिना प्रत्यभिवादेत्र प्लुतः। तथा हे सुबुद्धा३य् सुबुद्धे शान्त्या३ इन्द्रियजयेन कृतवर्षा३नप्यजय३ः। सर्वत्रात्र "प्रश्ने[2] च०" [७. ४. ९८] इत्यादिना प्लुतः। तत्तस्मात्केनाप्यजेयानामन्तरङ्गद्विषामपि जयाद्धेतोर्हे जि[3]ष्णा३व् जिष्णो ऊर्जे जगत्त्रयेपि बलिष्ठो भव। विकल्पेन [ण्य]न्ताश्चुरादय इति मताश्रयणान्नात्र णिच्। तथा हे ऐ३न्द्वे[4] अत्राणन्तायूनीञ्। हे सोमवंश्य तथा हे चौ३लुक्यचूडामणे जगद्रक्षायै चिरं जय। तथा क्ष्मानॄ[5]ण्यीकरणान्निजं संवत्सरं प्रवर्त्तय[6] च। पृथ्वीमनृणीकुर्वन्हि निजनाम्ना संवत्सरं प्रवर्तयतीति स्थितिरिति॥

प्रश्ने। सोमेद्पुरी३मकलय३[ः] सुमता३इ। आप३ः साधा३उ। तत्र३अभू३र्वरकुमारविहार[चैत्य]दृष्ट्या३इ। गूर्जरपुरे३ अगम३[ः] पृथा३उ॥ अर्चायाम्। भक्तोसि साधा३उ॥ विचारे। ततो वसामि गि[7]रा३उ किं ते पुरि॥ प्रत्यभिवादे। आयुष्मान् भव भूपता३इ। अत्र "प्रश्नार्चा०" [१०२] इत्यादिना संधियोग्यस्य संध्यक्षरस्य प्लुतो भवन्नाकार इदुत्परः प्लुतो भवति। स च प्रत्यासत्त्या एकारै[8]कारयोरिकारपर ओकारौकारयोरुकारपर इति॥

---

१ ए °दा सदा स°. २ सी °श्नेत्ये च. ३ सी जिष्णो. ४ सी °न्वे तिअ°. ५ सी °नृणीक°. ६ सी °यस्व। पृथिवीम°. ७ सी गिरौ३उत किं. ८ ए ° काररै°.

अजय३[ः] शान्त्या३ सुबुद्धा३यृषी३न् । जिष्णा३वूर्जे । इत्यत्र "तयोर्व्वौ०" [१०३] इत्यादिना तयोः प्लुताकारात्परयोरिदुतोः स्थाने स्वरे परे संहितायां विषये यवौ ॥ केचिदैदौतोश्चतुर्मात्रं प्लुतमिच्छन्ति । ऐ४न्द्रवे । चौ४लुक्यचूडामणे ॥

पदविधिर्यद्वत्समर्थोभवत् । इत्यनेन "समर्थः पदविधिः" [१२२] इति सूत्रार्थो ज्ञापितः ॥ शार्दूलविक्रीडितं छन्दः ॥

अष्टाविंशः पादः समर्थितः ॥

इति श्रीजिनेश्वरसूरिशिष्यलेशाभयतिलकगणिविरचितायां श्रीसिद्धहेमचन्द्राभिधानशब्दानुशासनद्व्याश्रयवृत्तौ विंशः सर्गः समर्थितः ॥

---

१ ए °मर्थ प°.

संपूर्णं चेदं द्व्याश्रयमहाकाव्यं तत्संपूर्णा च तद्वृत्तिरपीति[1] शुभमस्तु ॥ नमः श्रीपार्श्व[2]नाथजिनदत्तगुरुपादपद्मेभ्यः । प्रसीदन्तु जिनेश्वरसूरिगुरुपादाः । सदा प्रमत्यै तत्रभवत्यै सरस्वत्यै नमोस्त्विति ॥

श्रीचान्द्रे विपुले कुलेतिविमले श्रीवर्धमानाभिधा-
चार्येन्द्रस्य जिनेश्वरोन्तिषदभूत्सूरिर्द्विजानां पतिः ।
श्रीमद्दुर्लभराजसंसदि वसत्यध्वानमुद्द्योत्य यः
साधून्साधुविहा[3]रिणो[4] व्यरचयच्छ्रीगूर्जरात्रावनौ ॥ १ ॥

संवेगरङ्गशालां[5] सुधाप्रपां स्वकृत शिवपथिकहेतोः ।
[6]योन्तःसिद्धिपथं तत्पदे(ट्टे?) स जिनचन्द्रसूरिरुदैत् ॥ २ ॥

तत्पट्टेभयदेवसूरिरभवद्यः पार्श्वकल्पद्रुमं
सच्छायं श्रितदत्तवाञ्छितफलं श्रीस्तम्भनेरोपयत् ।
जन्तूनां हित[7]हेतवेत्र सुघटार्थैः[8] सदोद्यद्रसैः
संपूर्णा[9]श्नवाङ्गवृत्तिसरसीः श्रेयोर्थसोसूं[10]च्यतः ॥ ३ ॥

तच्छिष्यो जिनवल्लभो गुरुरभाच्चारित्रपावित्र्यतः
सारोद्धारसमुच्चयो नु निखिलश्रीतीर्थसार्थस्य यः ।
सिद्धाकर्षणमन्त्रको[11] न्वखिलसद्विद्याभिरालिङ्गनात्
कीर्त्या सर्वगया प्रसाधितनभोयानार्घ्य[12]विद्यो ध्रुवम् ॥ ४ ॥

तत्पट्टाम्बरसूरडम्बरधरः[13] कृष्णद्युतिर्दैवतैः
सेव्यः श्रीजिनदत्तसूरि[14]रविभः प्राच्यां युगार्घ्रीयताम् ।

---

१ **सी** °ति । न°. २ **सी** °नाथाय श्रीजि°. ३ **सी** °हारणो. ४ **ए** °रिणे व्य°. ५ **ए** °शालायां सु°. ६ **सी** °योन्तिसिद्धप°. ७ **सी** °तहैत°. ८ **ए** °टार्थे स°. ९ **सी** °र्णावन°. १० **सी** °सून्यात । त°. ११ **सी** °को ष्वस्थिल°. १२ **सी** °ध्यपिद्यो°. १३ **सी** °धर कृ°. १४ **सी** °रिभविभ प्रा°.

केनाप्यस्खलितप्रतापगरुडो यस्य त्रिलोक्यां स्फुरं-
स्त्रोटं त्रोटमपास्यति श्रितवतां विघ्नाहिपाशान्क्षणात् ॥ ५ ॥
तत्प[1]ट्टेचलचूलिकाञ्चलमलंचक्रेष्टवर्षोपि स
श्रीसान्द्रो जिनचण्डसूरिसुगुरुः कण्ठीरवाभोपमः ।
यं लोकोत्तररूपसंपदमपेक्ष्य स्वं पुलिन्दोपमं
मन्वानो नु दधौ स्मरस्तदुचितांश्चापं शरान्पञ्च च ॥ ६ ॥
आरुह्य क्षितिभृत्सभाचतुरिकां निर्जित्य दुर्वादिन-
स्तेजोग्नौ ज्वलिते लसत्यनुदिशं नादे यशोदुन्दुभेः ।
पाणौकृत्य जयश्रियो गुरुमहै[2]र्यैः सा(शा?)रदां मातरं
पृथ्वीं चोन्मुदितां व्य[3]धाज्जिनपतिः सूरिः स जज्ञे ततः ॥ ७ ॥
प्रासादोत्तमतुङ्गशृङ्गसुभगं पर्यष्करोत्तत्पदं[4]
श्रीमान्सूरिजिनेश्वरोत्र भगवान्गाङ्गेयकुम्भप्रभः ।
माधुर्यातिशयश्रिया निरुपमां यद्वाचमन्वर्हतो
नूनं सापि सिता सुधा च लवणं वारीव चोत्तारणाम् ॥ ८ ॥
या रूपातिशयाद्विदूषकमिवानङ्गं हसत्यञ्जसा
सौम्यत्वान्नु ददाति ल[5]क्ष्ममिषतः पत्रावलम्बं विधौ ।
नानासिद्धिरमाद्भुतात्करकजाज्जित्वैव ल[6]क्ष्म्याश्रितं
पद्मं वात्ततृणाननं वितनुते मन्ये मृणालच्छलात् ॥ ९ ॥
सूरिजिनरत्न इह बुद्धिसागरः सुधी-
रमरकीर्तिः कविः पूर्णकल[7]शो बुधः ।
ज्ञौ प्रबोधेन्दुगणिलक्ष्मितिलकौ प्रमो-
दादिमूर्त्यादयो यद्विनेयो[8]त्तमाः ॥ १० ॥

---

१ सी °त्पट्टां च°. २ सी °हैर्यच्छार°. ३ सी व्यध्याज्जि°. ४ सी °दं धीमा°. ५ सी लक्ष्म्यमि°. ६ सी लक्ष्म्युज्झितं. ७ सी °लसो बु°. ८ सी °त्तमा । सु°.

सुगुरोस्तस्यादे[1]शात्स कर्णकर्णोत्सवं विवृतिमेताम् ।
स्वमतिविभवानुसारान्मुनिऽर्थधादभयतिलकगणिः ॥ ११ ॥

आम्नां[2]ती सर्वविद्यास्वविकलकविताकेलिकेलीनिवास(सः)
कीर्त्या(र्त्ये?)ब्धेः पारदृश्वा त्रिभुवनजनतोपक्रियास्वात्तदीक्षः ।
निःशेषग्रन्थसार्थे मम गुरुरिह तु व्याश्रयेतिप्रकामं
टीकामेतां स लक्ष्मीतिलककविरविः शोधयामास सम्यक् ॥१२॥

अ[3]ब्दे द्वादशभिस्त्रयोदशशते श्रीविक्रमाब्देष्वियं
श्रीप्रह्लादनपत्तने शुभदिने दीपोत्सवेपूर्यत ।
मेधामान्द्यमदात्कथंचिदिह यच्चायुक्तमुक्तं मया
शोध्यं स्वल्पमतौ प्रसद्य मयि तन्निर्मत्स[4]रैर्मेधिरे(रैः) ॥१३॥

सप्तदश सहस्राणि श्लोकाः पञ्च शतानि च ।
चतुःसप्ततिरप्यस्या वृत्तेर्मानं विनिश्चितम् ॥ १४ ॥

प्रक्रीडत्परिमाद्यदङ्गिसुभगा श्रीभूर्भुवःस्वस्त्रयी
सर्वेषां परमेष्ठि[5]नां सितयशोभिर्द्योतिता सर्वतः ।
यावद्दीपमहोत्सवं प्रबिभृते तेषां प्र[6]तापोज्ज्वल-
द्दीपैस्तावदियं करोतु विवृतिः प्राज्यं सुरा[7]ज्यं भुवि ॥ १५ ॥

---

१ सी °शात्स्यक°. २ सी °म्नाता स°. ३ सी °अग्रे द्वा°. ४ सी °त्सरै। स°. ५ प °नां शत°. ६ प °तापज्ज्व°. ७ सी °राज्ये मु°.

Bombay Sanskrit and Prakrit Series, Edited under the Supervision of the Publication Department of the Bhandarkar Oriental Research Institute, Poona.

		RS.	AS.
No. I	Pañcatantra, Book IV and V, edited with Notes by Dr. G. Bühler	0	4
No. II	Nāgojibhaṭṭa's Paribhāṣendus'ekhara, Part I, Sanskrit Text and Various Readings, edited by Dr. F. Kielhorn (*out of stock*)	...	
No. III	Pañcatantra, Books II, and III, edited with Notes, by Dr. G. Bühler	0	4
No. IV	Pañcatantra, Book I, edited with Notes, by Dr. F. Kielhorn	0	6
No. V	Raghuvaṁs'a of Kālidāsa, with the Commentary of Mallinātha, Part I (Cantos 1–VI), edited with Notes, by Mr. S. P. Pandit, M. A.	1	8
No. VI	Mālavikāgnimitra of Kālidāsa, edited with Notes, by Mr. S. P. Pandit, M. A., 2nd edition (*out of stock*)	...	
No. VII	Nāgojibhaṭṭa's Paribhāṣendus'ekhara, Part IIA, (Paribhāṣās 1–37) Translation and Notes, by Dr. F. Kielhorn	0	8
No. VIII	Raghuvaṁs'a of Kālidāsa, with the Commentary of Mallinātha, Part II (Cantos. VII–XIII,) edited with Notes, by Mr. S. P. Pandit, M. A. (*out of stock*)	...	
No. IX	Nāgojibhaṭṭa's Paribhāṣendus'ekhara, Part IIB, (Paribhāṣās 38–69), Translation and Notes, by Dr. F. Kielhorn	0	8
No. X	Das'akumāracarita of Daṇḍin, Part I, by Dr. Bühler and Part II, by Dr. Peterson, re-edited with Notes in one Volume, by G. J. Agashe ...	4	6
No. XI	Nītis'ataka and Vairāgyas'ataka of Bhartṛhari, edited with Notes, by Justice K. T. Telang, M. A. (*copy-right restored to the editor*)	...	

	RS.	AS.
No. XII Nāgojibhaṭṭa's Paribhāṣendus'ekhara, Part IIC, (Paribhāṣās 70-122), Translation and Notes, by Dr. F. Kielhorn	0	8
No. XIII Raghuvaṁs'a of Kālidāsa, with the Commentary of Mallinātha, Part III (Cantos. XIV-XIX) edited with Notes, by Mr. S. P. Pandit, M. A. (*out of stock*)	...	
No. XIV Vikramāṅkadeva-carita of Bilhaṇa, by Dr. G. Bühler (*copy-right restored to the editor*)	...	
No. XV Mālatī-Mādhava, with the Commentary of Jagaddhara, edited with Critical Notes, etc., by Dr. R. G. Bhandarkar, *Second edition*	4	4
No. XVI Vikramorvas'īya of Kālidāsa, with Notes, by S. P. Pandit, M. A., *Third edition*	2	0
No. XVII Hemacandra's Des'ī-nāmamāla, Part I, by Prof. Pischel and Dr. Bühler, *Under revision* ...	...	
No. XVIII* Vyākaraṇa-Mahābhāṣya of Patañjali, Vol. I, Part I, by Dr. Kielhorn, *Second edition*	1	8
No. XIX* Vyākaraṇa-Mahābhāṣya of Patañjali, Vol. I, Part II, by Dr. Kielhorn, *Second edition*... ...	1	8
No. XX* Vyākaraṇa-Mahābhāṣya of Patañjali, Vol. I, Part III, by Dr. Kielhorn, *Second edition*	1	8
No. XXI† Vyākaraṇa-Mahābhāṣya of Patañjali, Vol. II, Part I, by Dr. F. Kielhorn, *Second edition* ...	3	0
No. XXII† Vyākaraṇa-Mahābhāṣya of Patañjali, Vol. II, Part II, by Dr. F. Kielhorn, *Second edition* ...	3	0
No. XXIII Vāsiṣṭha-Dharmas'āstra, edited with Notes, by Dr. A. A. Führer (*Second edition*)	0	12
No. XXIV Kādambarī by Bāṇa and his Son, Vol. I, Text; Vol. II, Notes and Introduction, by Dr. P. Peterson, Vol. II, *out of stock*, Vol. I, Rs. 2, *both together* ...	5	8
No. XXV Kīrti-kaumudī, edited with Notes, by Professor A. V. Kathawate (*copy-right restored to the editor*)...	...	

* Nos. 18, 19 and 20 are bound together in one volume, the whole volume being priced Rs. 4-8.

† Nos. 21, 22 and 26 are bound together in one volume, the whole volume being priced Rs. 9.

	RS.	AS.
No. XXVI† Vyākaraṇa-Mahābhāṣya of Patañjali, Vol. II, Part III, by Dr F. Kielhorn, *Second edition* ...	3	0
No. XXVII Mudrārākṣasa of Vis'ākhadatta, with the Commentary of Dhuṇḍirāja, edited with Notes, by Justice K. T. Telang, M. A. (*copy-right restored to the editor*)	...	
No. XXVIII* Vyākaraṇa-Mahābhāṣya of Patañjali, Vol. III, Part I, by Dr. F. Kielhorn, *Second edition* ...	3	0
No. XXIX* Vyākaraṇa-Mahābhāṣya of Patañjali, Vol. III, Part II, by Dr. F. Kielhorn, *Second edition* ...	3	0
No. XXX* Vyākaraṇa-Mahābhāṣya of Patañjali, Vol. III, Part III, by Dr. F. Kielhorn, *Second edition* ...	3	0
No. XXXI Subhāṣitāvali of Vallabhadeva, edited by Dr. P. Peterson and Pandit Durgaprasad	2	8
No. XXXII Tarka-kaumudī of Laugākṣi Bhāskara, edited by Mr. M. N. Dvivedi (*copy-right restored to the editor*)	...	
No. XXXIII Hitopades'a of Nārāyaṇa, edited by Dr. P. Peterson	0	14
No. XXXIV Gaüḍavaho of Vākpati, edited by Mr. S. P. Pandit, M. A. (*under revision*)	...	
No. XXXV Mahānārāyaṇa Upaniṣad, edited by Col. G. A. Jacob	0	7
No. XXXVI Selections of Hymns from the Ṛgveda (First Series) By Dr. P. Peterson, (*Fourth edition*)...	2	0
No. XXXVII S'ārṅgadharapaddhati, Vol. I, edited by Dr. P. Peterson	3	0
No. XXXVIII Naiṣkarmyasiddhi, by Col. G. A. Jacob (*under revision*)	...	
No. XXXIX Concordance to the Principal Upaniṣads and the Bhagavadgītā, by Col. G. A. Jacob	4	0
No. XL Eleven Ātharvaṇa Upaniṣads, with Dīpikās, by Col. G. A. Jacob, *Second edition*	1	8

† Nos. 21, 22 and 26 are bound together in one volume, the whole volume being priced Rs. 9.

* Nos. 28, 29 and 30 are bound together in one volume, the whole volume being priced Rs. 9.

	RS.	AS.
No. XLI Handbook to the study of Ṛgveda, Part I, Comprising Sāyaṇa's Introduction to his Ṛgveda-bhāṣya, with English Translation, by Dr. P. Peterson (*under revision*)	...	
No. XLII* Das'akumāracarita of Daṇḍin, Part II, by Dr. P. Peterson	...	
No. XLIII Handbook to the Study of Ṛgveda, Part II, Comprising the Seventh Maṇḍala of Ṛgveda with the Bhāṣya of Sāyaṇa	2	8
No. XLIV Āpastambha-Dharmasūtra, with the Commentary of the Hiraṇyakes'ī, Part I, by Dr. G. Bühler (*under revision*)	...	
No. XLV Rājataraṅgiṇī of Kalhaṇa, Part I, (Cantos I to VII) by Pandit Durgaprasad	1	8
No. XLVI Patañjali's Yogasūtra, with the Scholia of Vyāsa, and the Commentary of Vācaspati, and the Vṛtti of Nāgojibhaṭṭa, by Rajaram Shastri Bodas and Vasudeo Shastri Abhyankar (*Second edition*)	3	8
No. XLVII Parās'ara's Dharma-saṁhitā, with the Commentary of Sāyaṇa-Mādhavācārya, Vol. I, Part I, by Mr. Vaman Shastri Islampurkar	2	2
No. XLVIII Parās'ara's Dharma-Saṁhitā, with the Commentary of Sāyaṇa-Mādhavācārya, Vol. I, Part II, by Mr. Vaman Shastri Islampurkar	2	0
No. XLIX Nyāyakos'a, by Mahāmahopādhyāya Bhimacharya Zalkikar, (*under revision*)	...	
No. L Āpastambha-Dharmasūtra with the Commentary of Hiraṇyakeśi Part II, by Dr. Bühler (*under revision*)	...	
No. LI Rājataraṅgiṇī of Kalhaṇa, Vol. II, (Canto VIII) by Pandit Durgaprasad (*under revision*)	...	
No. LII Mṛcchakaṭika, Vol. I, Text with two Commentaries and Various Readings, by Mr. N. B. Godbole	3	8
No. LIII Navasāhasāṅka-carita, Part I, by Mr. Vaman Shastri Islampurkar	1	10

* See above, No. X.

	RS.	AS.
No. LIV Rājataraṅgiṇī of Kalhaṇa, Vol. III, containing the supplements to the work by Dr. P. Peterson (*under revision*)		
No. LV Tarkasaṁgraha of Annambhaṭṭa with Dīpikā, and Nyāyabodhinī, edited with Notes etc. by Y. V. Athalye and M. R. Bodas (*Second edition*) ...	3	0
No. LVI Bhaṭṭikāvya, edited with the Commentary of Mallinātha, Vol. I, by Rao Bahadur K. P. Trivedi ...	9	0
No. LVII Bhaṭṭikāvyȧ, edited with the Comementary of Mallinātha, Vol. II, by Rao Bahadur K. P. Trivedi ...	6	0
No. LVIII Selections of Hymns from the Ṛgveda (Second Series), by Dr. P. Peterson (*under revision*) ...	...	
No. LIX Parās'ara's Dharma-Saṁhitā, with the Commentary of Sāyaṇa-Mādhavācārya, Vol. II, Part I, by Mr. Vaman Shastri Islampurkar	4	0
No. LX Kumārapāla-carita of Hemacandra, (in Prākrit) by S. P. Pandit, M. A.	8	8
No. LXI Rekhāgaṇita, Vol. I, by Messrs. H. H. Dhruva and K. P. Trivedi	12	0
No. LXII Rekhāgaṇita, Vol. II, by Messrs. H. H. Dhruva and K. P. Trivedi	9	0
No. LXIII Ekāvali of Vidyādhara, with Mallinātha's Commentary, edited by Rao Bahadur K. P. Trivedi...	14	0
No. LXIV Parās'ara's Dharma-Saṁhitā, with the Commentary of Sāyaṇa-Mādhavācārya, Vol. II, Part II, by Mr. Vaman Shastri Islampurkar	5	0
No. LXV Pratāparudra-yas'obhūṣaṇa of Vidyānātha, with Commentary Ratnāpaṇa of Kumārsvāmin, edited by Rao Bahadur K. P. Trivedi	11	0
No. LXVI Harṣa-carita of Bāṇa, Part I, Text with Commentary Saṁketa, edited by Dr. A. A. Führer ...	2	0
No. LXVII Parās'ara's Dharma-Saṁhitā, with the Commentary of Sāyaṇa-Mādhavācārya, Vol. III, Part I, by Mr. Vaman Shastri Islampurkar	4	0
No. LXVIII S'rībhāṣya of Rāmānuja, Vol. I, Text, edited by Mr. Vasudev Shastri Abhyankar	11	0

	RS.	A.
No. LXIX Dvyās'raya-kāvya of Hemacandra, Vol. I, (Cantos I—X) by Prof. A. V. Kathawate ...	9	0
No. LXX Vaiyākaraṇabhūṣaṇa of Koṇḍabhaṭṭa, with the Vaiyākaraṇabhūṣaṇasāra and the Commentary Kās'ika of Harirāma edited with Notes, by Rao Bahadur K. P. Trivedi	10	0
No. LXXI Ṣaḍbhāṣācandrikā of Lakṣmīdhara, with Introduction, Notes etc., by Rao Bahadur K. P. Trivedi	7	8
No. LXXII S'rībhāṣya of Rāmānuja, Vol II, Notes, by Mr. Vasudev Shastri Abhyankar	6	8
No. LXXIII Nirukta of Yāska, with the Commentary of Durgācārya, Vol. I, by Professor H. M. Bhadkamkar	9	8
No. LXXIV Parās'ara's Dharma-Saṁhitā, with the Commentary of Sāyaṇa-Mādhavācārya Vol. III, Part II, by Vaman Shastri Islampurkar	5	8
No. LXXV Kāvyādars'a of Daṇḍin with a new Commentary, edited with Notes by Professor S. K. Belvalkar and Rangacharya Raddi Shastri, Parts I and II published, Part III in Press. The published Parts	4	4
No. LXXVI Dvyās'raya-kāvya of Hemacandra with the Commentary of Abhayatilakagaṇi, Vol. II, (Cantos XI—XX) by Prof. A. V. Kathawate ...	9	0

WORKS OUT OF SERIES

Aitareya Brāhmaṇa, Word-index to, compiled by Pandit Vishwanath Balkrishna Joshi	4	0
Amarakos'a with the Commentary of Mahes'vara, edited, with an Index, by Mr. Ramchandra Shastri Talekar...	0	13
Atharvaveda Saṁhitā, with the Commentary of Sāyaṇācārya, edited, by Mr. S. P. Pandit, *Four volumes at Rs. 10 each*	40	0
Kāvyaprakās'a,* edited by Vamanacharya Zalkikar with his own Commentary, (*under revision*)	...	
Vendidad, *Complete in two Volumes*	5	0

	RS.	AS.
*Kāvyaprakās'a, Ullāsas I and II (available separately)	0	10
Kāvyaprakās'a, Ullāsas I, II, and X with Zalkikar's Sanskrit Introduction (available separately)	3	0

THE SAME LIST ABRIDGED AND ARRANGED ALPHABETICALLY

(*For fuller details see the earlier list*).

	RS.	AS.
Aitareya-Brāhmaṇa, Word-index to, by Vishwanath Balkrishna Joshi (out of series)	4	0
Amarakos'a with Mahes'vara's Commentary, by Ramchandra Shastri Talekar, (out of Series)	0	16
Āpastambha-Dharmasūtra, Part I, by G. Bühler, (No. 44)...	1	3
Āpastambha-Dharmasūtra, Part II, by G. Bühler. (No. 50).	...	
Atharvaveda Saṁhitā with Sāyaṇabhāṣya, four volumes, by S. P. Pandit, (out of Series)	40	0
Ātharvaṇa Upaniṣads, eleven, with Dīpikās, by G. A. Jacob, (No. 40)	1	8
Bhaṭṭikāvya with Mallinātha's Commentary, Part I, by K. P. Trivedi, (No. 56)	9	0
Bhaṭṭikāvya with Mallinātha's Commentary, Part II, by K. P. Trivedi, (No. 57)	6	0
Concordance to the Principal Upaniṣads and the Bhagavadgītā, by G. A. Jacob, (No. 39)	4	0
Das'akumāracarita, Part I, by G. Bühler, (No. 10) and Part II, by P. Peterson (No. 42), both together ...	4	6
Des'ī-nāmamālā, Part I, by Pischel and Bühler (No. 17) ...	...	
Dvyās'raya-kāvya, Part I, by A. V. Kathawate, (No. 69) ...	9	0
Dvyās'raya-kāvya, Part II, by A. V. Kathawate (No. 76)...	9	0
Ekāvali, with Commentary, by K. P. Trivedi, (No. 63) ...	14	0
Gaüḍavaho, by S. P. Pandit (No. 34)	...	
Handbook to the Study of Ṛgveda, Part I, by P. Peterson (No. 41)	...	
Handbook to the Study of Ṛgveda, Part II, by P. Peterson (No. 43)	2	8
Harṣa-carita, with Commentary, by A. A. Führer, (No. 66)...	2	0
Hitopades'a, by P. Peterson, (No. 33)	0	14
Hymns from Ṛgveda, Selection of, (First Series), by Dr. Peterson, (No. 36)	2	0

	RS.	A.
Hymns from Ṛgveda, Selection of, (Second Series) by Dr. Peterson, (No. 58)	...	
Kādambarī, Vol. I, Text and Vol. II, Notes and Introduction, by Dr. Peterson, (No. 24)	6	6
Kāvyaprakā'sa, with a Commentary, by Vamanacharya Zalkikar, (out of Series)	...	
Kāvyādars'a with Commentary, Notes, etc. by S. K. Belvalkar and Raddi Shastri, Parts 1 and 2 (*Part 3 in Press*)	4	4
Kīrtikaumudī, by A. V. Kathawate, (No. 25)	...	
Kumārapālacarita, by S. P. Pandit, (No. 60)	8	8
Mṛcchakaṭika, Vol I, by N. B. Godbole (No. 52)	3	8
Mālavikāgnimitra, by S. P. Pandit, (No. 6)	...	
Mālatī-Mādhava, by R. G. Bhandarkar, (No. 15)	4	4
Mahābhāṣya, Vyākaraṇa—, of Patañjali, Vol. I, Parts I, II, and III together (Nos. 18, 19, 20)	4	8
Mahābhāṣya, Vyākaraṇa—, of Patañjali, Vol. II, Parts I, II, and III together (Nos. 21, 22 and 26)	9	0
Mahābhāṣya, Vyākaraṇa—, of Patañjali, Vol. III, Parts I, II, and III together (Nos. 28, 29, 30)	9	0
Mudrārākṣasa, by K. T. Telang, (No. 27)	...	
Mahānārāyaṇa Upaniṣad, by G. A. Jacob (No. 35) ...	0	7
Naiṣkarmyasiddhi by G. A. Jacob, (No. 38)	2	8
Navasāhasāṅkacarita Part I, by Vaman Shastri Islampurkar, (No. 53)	1	10
Nirukta of Yāska, with Durga's Commentary, Vol. I, by H. M. Bhadkamkar	9	8
Nīti and Vairāgya S'atakas, by K. T. Telang, (No. 11) ...	...	
Nyāyakos'a, by Bhimacharya Zalkikar, (No. 49)	...	
Pañcatantra, Book I, by F. Kielhorn, (No. 4)	0	6
Pañcatantra, Books II and III, by G. Bühler, (No. 3) ...	0	4
Pañcatantra, Books IV and V by G. Bühler, (No. 1) ...	0	4
Parās'ara Dharmasaṁhitā, Vol. I, Part I, by Vaman Shastri Islampurkar, (No. 47)	2	2

	RS.	A.
Parās'ara Dharmasaṁhitā, Vol. I, Part II, by Vaman Shastri Islampurkar, (No. 48)	2	0
Parās'ara Dharmasaṁhitā, Vol. II, Part I, by Vaman Shastri Islampurkar, (No. 59)	4	0
Parās'ara Dharmasaṁhitā, Vol. II, Part II, by Vaman Shastri Islampurker, (No. 64)	5	0
Parās'ara Dharmasaṁhitā, Vol. III, Part I, by Vaman Shastri Islampurkar, (No. 67)	4	0
Parās'ara Dharmasaṁhitā, Vol. III, Part II, by Vaman Shastri Islampurkar, ...	5	8
Paribhāṣendus'ekhara, Part I, by F. Kielhorn, (No. 2) ...	...	
Paribhāṣendus'ekhara, Part II A, by F. Kielhorn, (No. 7)	0	8
Paribhāṣendus'ekhara, Part II B, by F. Kielhorn, (No. 9)	0	8
Paribhāṣendus'ekhara, Part II C, by F. Kielhorn, (No. 12)	0	8
Pratāparudrayas'obhūṣaṇa of Vidyānātha, with Commentary, by K. P. Trivedi, (No. 65)	11	0
Raghuvaṁs'a, Part I, by S. P. Pandit, (No. 5)	1	8
Raghuvaṁs'a, Part II, by S. P. Pandit, (No. 8)	...	
Raghuvaṁs'a, Part III, by S. P. Pandit, (No. 13)	...	
Rājataraṅgiṇī, Part I, by Pandit Durgaprasad, (No. 45)...	1	8
Rājataraṅgiṇī, Part II, by Pandit Durgaprasad, (No. 51) ...	...	
Rājataraṅgiṇī, Part III, by P. Peterson, (No. 54)	...	
Rekhāgaṇita, Part I, by H. H. Dhruva and K. P. Trivedi, (No. 61)	12	0
Rekhāgaṇita, Part II, by H. H. Dhruva and K. P. Trivedi, (No. 62)	9	0
S'ārṅgadharapaddhati, Part I, by P. Peterson (No. 37) ...	3	0
Ṣaḍbhāṣācandrikā of Lakṣmīdhara, by K. P. Trivedi, (No. 71)	7	8
S'rībhāṣya, Part I, by Vasudev Shastri Abhyankar, (No. 68)	11	0
S'rībhāṣya, Part II, by Vasudeo Shastri Abhyankar, (No. 72)	6	0
Subhāṣitāvali of Vallabhadeva, by P. Peterson, (No. 31) ...	2	8
Tarkakaumudī of Laugākṣi Bhāskara, by N. M. Dvivedi, (No. 32)	...	

	RS.	AS.
Tarkasaṁgraha of Annambhaṭṭa, by Y. V. Athalye, (No. 55)	3	0
Vāsiṣṭha Dharmas'āstra, by A. A. Führer, (No. 23) ...	0	12
Vaiyākaraṇabhūṣaṇa of Koṇḍabhaṭṭa, with two Commentaries, by K. P. Trivedi, (No. 70)	10	0
Vendidad, in Two Volumes, (out of Series)...	5	0
Vikramāṅkadeva-carita, by G. Bühler, (No. 14)		
Vikramorvas'īya by S. P. Pandit, (No. 16)	2	0
Yogasūtras of Patañjali, by Rajaram Shastri Bodas, and Vasudev Shastri Abhyankar, (No. 46)	3	8

BOMBAY SANSKRIT AND PRAKRIT SERIES.

(i) Works in Press.

(1) Aṇubhāṣya of Vallabhācārya with an Original Commentary by Pandit Shridhar Shastri Pathak.

(2) Āpastamba-Dharmasūtra Parts I and II, by Bühler, No. 44 and 50 (*Second edition*).

(3) Gaüḍavaho of Vakpati, by S. P. Pandit, No. 34 (*Second edition*).

(4) Hymns from Ṛgveda, Second Selection, by P. Peterson, No. 58 (*Second edition*).

*(5) Kāvyaprakās'a of Mammaṭa by Vamanacharya Zalkikar (*Fourth edition*).

(6) Kāvyādars'a of Daṇḍin with Commentary, Notes etc. Part 3, by S. K. Belvalkar, and Raddi Shastri (No. 75).

(7) Kāvyālaṁkārasārasaṁgraha by N. D. Banhatti.

(8) Syādvādamañjarī of Malliṣeṇa with the Com. of Hemacandra and Notes by Prof. A. B. Dhruva, M. A., LL. B.

(9) Tarkabhāṣā of Kes'avamis'ra, with Notes, by Prof. D. R. Bhandarkar, and Pandit Kedarnath.

	RS.	AS.
*Kāvyaprakās'a, Ullāsas I and II (available separately)	0	10
Kāvyaprakās'a, Ullāsas I, II, and X with Zalkikar's Sanskrit Introduction (available separately)	3	0

(ii) Works under Revision.

(1) Des'ī-nāmamāla of Hemacandra, Second edition, with an Index by Prof. P. V. Ramanujaswami, M. A. (No. 17.)

(2) Hand-book to the study of Ṛgveda Parts I and II by P. Peterson, Second edition (Nos. 41 and 43).

(3) Naiṣkarmyasiddhi, (No. 38) Second edition, by Prof. Hiriyanna, M. A.

(4) Nyāyakos'a by Vamanacharya Zalkikar, Second edition, revised and enlarged, (No. 49).

(5) Rājataraṅgiṇī of Kalhaṇa, Parts I, II, and III, by P. Peterson and Pandit Durgaprasada, Second edition, (No. 45, 51 and 54).

(iii) Works in Preparation.

(1) Mṛcchakaṭika, Vol. II, Notes, etc., by K. C. Mehendale, B. A.

(2) Nirukta, Vol. II, by R. G. Bhadkamkar, M. A.

(3) Prakriyākaumudī of Rāmacandra, by Rao Bahadur K. P. Trivedi, B. A.

(4) Vyavahāra-mayūkha of Nīlakaṇṭha, by Prof. P. V. Kane, M. A. LL. M.

GOVERNMENT ORIENTAL (HINDU) SERIES.

(i) Works in Press.

(1) Sarvadars'anasaṁgraha of Sāyaṇa, with a new Commentary by Mahāmahopādhyāya Vasudeo Shastri Abhyankar.

(ii) Works undertaken.

(1) Āpastamba S'ulba Sūtra by Prof. R. N. Apte, M. A., LL. B.

(2) Bṛhatsaṁhitā by Mr. R. V. Patwardhan, B. A., LL. B.

(3) Nighaṇṭu and Nirukta by Prof. V. K. Rajwade, M. A.

(4) R. G. Bhandarkar's Collected Writings, Vol. I, by Mr. N. B. Utgikar, M. A.

(5) R. G. Bhandarkar's Collected Writings, Vol. II, by Mr. N. B. Utgikar, M. A.

(6) S'ābarbhāṣya by Dr. Ganganath Jha, M. A., D. Litt.

(7) Vyākaraṇa-Mahābhāṣya, English Translation, by Prof. K. V. Abhyankar, M. A. and Mahāmahopādhyāya Vasudeo Shastri Abhyankar.

(8) Vyākaraṇa-Mahābhāṣya, Word-Index, by Pandit Shridhar Shastri Pathak and Siddheshwar Shastri Chitrao.

MISCELLANEOUS WORKS.

(i) In Press.

(1) List of new Mss. added to the Manuscripts Library (1895-1915).

(ii) In Preparation.

(1) Catalogue of Sir R. G. Bhandarkar's Private Library.

*** The Annals of the Bhandarkar Oriental Research Institute, issued six-monthly. Annual Subscription Rs. 10.

Vol. I, Part I.	July 1919.
Do, Part II.	January 1920.
Vol. II, Part I.	July 1920.
Do, Part II.	January 1921.